# শব্দকল্পদ্রুমঃ

অর্থাৎ

এতদ্দেশস্থ সমস্ত কোষাশেষশাস্ত্র সঙ্কলিতাকারাদিবর্ণ ক্রমবিন্যস্ত শব্দ

তল্লিঙ্গ নানার্থ পর্য্যায় প্রমাণ প্রয়োগ ধাতু তদনুবন্ধাভিধেয় সহিত

তত্তচ্ছব্দ প্রসঙ্গোত্থিত বেদ বেদাঙ্গ পুরাণেতিহাস জ্যোতিস্তন্ত্রাখ্যান

কাব্যালঙ্কার ছন্দঃ প্রভৃতি নাম লক্ষণোদাহরণ দ্রব্যগুণ

রোগনিদানৌষধ স্মৃত্যুক্তব্যবস্থাদি সংযুক্ত সর্ব্বদর্শন

মতানুসারি সংস্কৃতাভিধানগ্রন্থঃ

তত্র

## চতুর্থ কাণ্ডঃ

রাজ শ্রীরাধাকান্ত বাহাদুরেণ বিরচিতঃ

১৭৬০ ষষ্ট্যধিক সপ্তদশশত শকাব্দে

কলিকাতাখ্য নগরে

শ্রীপ্রাণকৃষ্ণনাগেন মুদ্রাঙ্কিতঃ

ভকারঃ। স চ ব্যঞ্জন চতুর্বিংশতিতমঃ পবর্গীয় চতুর্থো বর্ণঃ। অস্যোচ্চারণ স্থানং ওষ্ঠঃ। ইতি ব্যাকরণং॥ তস্য স্বরূপাদি যথা। ভকারং শৃণু চার্ব্বঙ্গি স্বয়ং পরম কুণ্ডলী। মহামোক্ষ প্রদং বর্ণং তরুণাদিত্য সংপ্রভং॥ পঞ্চপ্রাণ ময়ং বর্ণং পঞ্চদেব ময়ং সদা। ইতি কামধেনু তন্ত্রং॥ ❀॥ তস্য লিখন ক্রমো যথা। ঊর্দ্ধাধঃ ক্রমতোরেখা বামে বক্রা তু কুণ্ডলী। পুনশ্চাধো গতা সৈব অত ঊর্দ্ধ গতা পুনঃ॥ ব্রহ্মাশম্ভুশ্চ বিষ্ণুশ্চ ক্রমতস্তাসু তিষ্ঠতি। ইতি বর্ণোদ্ধারতন্ত্রং॥

ভং ক্লী নক্ষত্রং। ইত্যমরঃ॥ গ্রহঃ। ইতি শব্দরত্নাবলী॥ রাশিঃ। যথা। রাশিনামানি চ ক্ষেত্রং ভ মৃক্ষং গৃহনাম চ। ইতি জ্যোতিস্তত্ত্বং॥

ভঃ পুং শুক্রাচার্য্যঃ। ইতি মেদিনী॥ ভ্রমরঃ। ইত্যেকাক্ষরকোষঃ॥ ভ্রান্তিঃ। ইতি শব্দরত্নাবলী॥

ভক্তং ক্লী অন্নং। ইত্যমরঃ॥ অথ ভক্তস্য নামানি সাধনং গুণাশ্চ। ভক্তমন্নং তথান্ধশ্চ ক্বচিৎ কূরঞ্চ কীর্ত্তিতং। ওদনো হস্ত্রী স্ত্রিয়াং ভিস্সা দীদিবিঃ পুংসি ভাষিতঃ॥ ❀॥ সুধৌতাং তণ্ডুলান্ স্ফীতাং স্তোয়ে পঞ্চগুণে পচেৎ। তদ্ভক্তং প্রস্রুতং প্রোক্তং বিশদং গুণবন্মতং॥ ভক্তং বহ্নিকরং পথ্যং তর্পণং রোচনং লঘু। অধৌত মস্রুতং শীতং গুর্ব্বরুচ্যং কফপ্রদং॥ ইতি ভাবপ্রকাশঃ॥ ❀॥ হরয়েনিবেদিতান্নস্য নিত্যং ভক্ষণে ফলং যথা। যে বিপ্রা হরয়ে দত্ত্বা নিত্য মন্নঞ্চ ভুঞ্জতে। উচ্ছিষ্ট ভোজনাত্তেষাং হরে র্দাস্যং লভেন্নরঃ॥ ❀॥ হরয়ে অদত্ত্বা তদ্ভক্ষণে দোষো যথা। ন দত্ত্বা হরয়ে ভক্ত্যা ভুঞ্জতে চেদ্ভ্রমাদপি। পুরীষ সদৃশং বস্তু জলং মূত্র সমং ভবেৎ॥ ❀॥ শূদ্রশ্চেদ্ধরিভক্তশ্চ নৈবেদ্য ভোজনোৎসুকঃ। আমান্নং হরয়ে দত্ত্বা পাকং কৃত্বা চ খাদতি॥ ❀॥ অন্নদানফলং যথা। অন্নঞ্চ সর্ব্বজীবিভ্যঃ পুণ্যার্থং দাতু মর্হতি। দত্ত্বা বিশিষ্ট জীবিভ্যো বিশিষ্টং ফল মাপ্নুয়াৎ॥ অতো দত্ত্বা মানুষেভ্যো লভতে হষ্টগুণং ফলং। ততো বিশিষ্ট শূদ্রেভ্যো দত্ত্বা তদ্দ্বিগুণং ফলং॥ দত্ত্বান্নং বৈশ্যজাতিভ্য স্ততশ্চাষ্টগুণং ফলং। দত্ত্বান্নং ক্ষত্রিয়েভ্যোপি বৈশ্যানাং দ্বিগুণং ভবেৎ॥ ক্ষত্রিয়াণাং শতগুণং বিপ্রেভ্যো হন্নং প্রদায় চ। বিপ্রাণাঞ্চ শতগুণং শা-

শ্রজ্ঞে ব্রাহ্মণে ফলং ॥ শাস্ত্রজ্ঞানাং শতগুণং ভক্তে বিপ্রে লভেন্নরং। সচান্নং হরয়ে দত্ত্বা ভুঙ্ক্তে ভক্ত্যা চ সাদরং॥ বিষ্ণবে ভক্ত বিপ্রায দত্ত্বা দাতুশ্চ যৎফলং। তৎফলং লভতে নূনং ভক্ত ব্রাহ্মণভোজনে॥ ভক্তে তুষ্টে হরিস্তুষ্টো হরৌ তুষ্টে চ দেবতা। ভবন্তি সিক্তাঃ শাখাশ্চ যথা মূল নিষেচনাৎ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২১ অধ্যায়ঃ॥ *॥ তস্য একাদশ্যাং পাপাশ্রয়ত্বং ভক্ষণেদোষশ্চ যথা। একাদশ্যা মাগতায়াং পাবয়ন্ত্যাং জগত্রয়ং। স্থাতব্য মন্নমাশ্রিত্য ভবতা পাপপূরুষ॥ অন্নমাশ্রিত্য তিষ্ঠন্তং ভবন্তং পাপপূরুষং। ন হনিষ্যতি সন্মূর্ত্তি রিযমেকাদশী তিথিঃ॥ তস্মাদন্নং ন ভোক্তব্যং কদাচিদপি সত্তমৈঃ। আত্মনো হিত মিচ্ছদ্ভিঃ সংপ্রাপ্তে হরিবাসরে॥ সংসারে যানি পাপানি তান্যেবৈকাদশী দিনে। অন্নমাশ্রিত্য তিষ্ঠন্তি পুণ্ডরীকেক্ষণাজ্ঞয়া॥ ভুঞ্জতাং সর্ব্বপাপানি নরকান্নিষ্কৃতি র্ভবেৎ। ন নিষ্কৃতি র্ভবেন্নৃণাং ভুঞ্জতাং হরিবাসরে॥ মর্ত্ত্যা ভক্তানি যাবন্তি ভুঞ্জতে হরিবাসরে। প্রতিভক্তে ব্রহ্মহত্যা কোটিজং পাতকং লভেৎ॥ সর্ব্বপাপাশ্রয়ং ভক্তং ত্যক্তব্যং হরিবাসরে। মোহাদন্নে ভুঞ্জতে বাপি তে জ্ঞেয়াঃ পাপিনাং বরাঃ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ২১ অধ্যায়ঃ॥ *॥ বর্জ্জনীযান্নং যথা। নাদ্যাৎ শূদ্রস্য বিপ্রোঽন্নং মোহাদ্বা যদি বান্যতঃ। স শূদ্র যোনিং ব্রজতি যস্তু ভুঙ্ক্তে হ্যনাপদি॥ ষণ্মাসান্ যো দ্বিজো ভুঙ্ক্তে শূদ্রস্যান্নং বিগর্হিতং। জীবন্নেব ভবেৎ শূদ্রো মৃতঃ শ্বাচাভিজাযতে॥ ব্রাহ্মণ ক্ষত্রিয বিশাং শূদ্রস্য চ মুনীশ্বরাঃ। যস্যান্নেনোদরস্থেন মৃত স্তদ্যোনি মাপ্নুযাৎ॥ রাজান্নং নর্ত্তকান্নঞ্চ তক্ষ্ণো হন্ন কর্ম্মকারিণঃ। গণান্নং গণিকান্নঞ্চ ষণ্ডান্নঞ্চৈব বর্জ্জযেৎ॥ চক্রোপজীবি রজক তস্কর ধ্বজিনাং তথা। গান্ধর্ব্ব লোহকারান্নং সূতকান্নং বিবর্জ্জযেৎ॥ কুলাল চিত্রকর্ম্মান্নং বার্দ্ধুষেঃ পতিতস্য চ। পৌনর্ভব ছাত্রিকযো রভিশস্তস্য চৈব হি॥ সুবর্ণকার শৈলূষ ব্যাধিতস্যাতুরস্য চ। চিকিৎসকস্য চৈবান্নং পুংশ্চল্যা দাম্ভিকস্য চ॥ স্তেন নাস্তিকযো রন্নং দেবতা নিন্দকস্য চ। সোমবিক্রযিণ শ্চান্নং শ্বপাকস্য বিশেষতঃ॥ ভার্য্যাজিতস্য চৈবান্নং যস্য চোপপতি র্গৃহে। উৎসৃষ্টস্য কদর্য্যস্য তথৈ-

নোচ্ছিষ্টভোজিনঃ ॥ অপণ্ড্যন্নঞ্চ সং-
ঘান্নং শস্ত্রজীবস্য চৈব হি। ক্লীব-
স্যান্ত্যাসিনশ্চান্নং মত্তোন্মত্তস্য চৈ-
ব হি ॥ ভীতস্য রুদিতস্যান্নং অব-
ক্রুষ্টং পরিক্ষুতং। ব্রহ্মদ্বিষঃ পাপরু-
চেঃ শ্রাদ্ধান্নং সূতকস্য চ ॥ বৃথাপা-
কস্য চৈবান্নং শাবান্নং শ্বশুরস্য চ।
অপ্রজানান্তু নারীণাং কৃতঘ্নস্য তথৈ-
ব হি ॥ কন্দুকান্নং বিশেষেণ শস্ত্র-
বিক্রযিণস্তথা ॥ শৌণ্ডান্নং নালিকা-
ন্নঞ্চ ভিষজা মন্নমেব চ। বিদ্ধপ্রজন-
নস্যান্নং পরিবিত্ত্যন্নমেব চ ॥ পুন-
র্ভুবো বিশেষেণ তথৈব দিধিষূপতেঃ
। অবজ্ঞাতঞ্চাবধূতং সরোষং বিস্ম-
যান্বিতং। গুরাবপি ন ভোক্তব্য ম-
ন্নং সংকারবর্জ্জিতং ॥ দুষ্কৃতং হি ম-
নুষ্যস্য সর্ব্বমন্নেষ্বনুষ্ঠিতং। যো যস্যা-
ন্নেন জীবেত স তস্যাশ্নাতি কিল্বিষং
॥ ❀ ॥ আভীরঃ জলমিত্রঞ্চ গোপা-
লো দাস নাপিতৌ। এতে শূদ্রেষু
ভোজ্যান্না যশ্চাত্মানং নিবেদয়েৎ ॥
কুশীলবঃ কুম্ভকারঃ ক্ষেত্রকর্ম্মক এ-
ব চ। এতে শূদ্রেষু ভোজ্যান্না দত্ত্বা
স্বল্পং পণং বুধৈঃ ॥ ইতি কৌর্ম্মে উপ-
রিভাগে ১৬ অধ্যায়ঃ ॥

ভক্তঃ ত্রি তৎপরঃ। ইতি হেমচন্দ্রঃ
॥ অথ শ্রীভগবদ্ভক্ত লক্ষণানি।
লিঙ্গপুরাণে। ব্রত কর্ম্ম গুণ জ্ঞান
ভোগ জন্মাদি নৎস্বপি। শৈবেষ্বপি
চ কৃষ্ণস্য ভক্তাঃ সন্তি তথা তথা ॥
শ্রীভাগবতে একাদশ স্কন্ধে। উত্ত-
ম ভক্তা যথা। জ্ঞাত্বাজ্ঞাত্বাথ যে
বৈ মাং যাবান্ যশ্চাস্মি যাদৃশঃ।
ভজন্ত্যনেন ভাবেন তে মে ভক্ততমা
মতাঃ ॥ মধ্যম ভক্তো যথা। ঈশ্বরে
তদধীনে বা বালিশেষু দ্বিষৎ সু চ।
প্রেম মৈত্রী কৃপোপেক্ষা যঃ করো-
তি স মধ্যমঃ ॥ প্রাকৃত ভক্তো যথা
। অর্চ্চাযা মেব হরয়ে পূজাং যঃ শ্র-
দ্ধয়েহতে। ন তদ্ভক্তেষু চান্যেষু স
ভক্তঃ প্রাকৃতঃ স্মৃতঃ ॥ ইতি শ্রীহরি-
ভক্তিবিলাসঃ ॥ ❀ ॥ অপিচ। ভ-
ক্তানাং লক্ষণং ব্রূহি ভক্তানুগ্রহ কা-
তর। যেষাং স্পর্শন সন্দর্শাৎ সদ্যঃ
পূতো নরাধমঃ ॥ হরিভক্তিবিহীনা-
শ্চ মহাহঙ্কার সংযুতাঃ। স্বপ্রশং-
সা রতা ধূর্ত্তাঃ শঠাশ্চ সাধুনিন্দকাঃ
॥ পুনন্তি সর্ব্বতীর্থানি যেষাং স্নানা-
বগাহনাৎ। যেষাঞ্চ পাদরজসা
পূতা পাদোদকান্মহী ॥ যেষাং স-
ন্দর্শনং স্পর্শং দেবা বাঞ্ছন্তি ভারতে।
সর্ব্বেষাং পরমো লাভো বৈষ্ণবানাং
সমাশ্রমঃ ॥ নহ্যম্মযানি তীর্থানি ন
দেবা মৃচ্ছিলামযাঃ। তে পুনন্ত্যুরুকা-

লেন বিষ্ণুভক্তঃ ক্ষণাদহো ॥ সৌতি রুবাচ। মহালক্ষ্মী বচঃ শ্রুত্বা লক্ষ্মীকান্তশ্চ সস্মিতঃ। নিগূঢ় তত্ত্বং কথিতু মৃষি শ্রেষ্ঠোপচক্রমে ॥ শ্রীনারায়ণ উবাচ। ভক্তানাং লক্ষণং লক্ষ্মি গূঢ়ং শ্রুতি পুরাণযোঃ ॥ পুণ্য স্বরূপং পাপঘ্নং সুখদং ভক্তি মুক্তিদং ॥ সারভূতং গোপনীয়ং ন বক্তব্যং খলেষু চ। গুরুবক্ত্রাদ্বিষ্ণুমন্ত্রো যস্য কর্ণে প্রবিশ্যতি ॥ বেদান্ত বেদ বেদাঙ্গাস্তং পবিত্রং বদন্তি হি। পুরুষাণাং শতং পূর্ব্বং পূতং তজ্জন্ম মাত্রতঃ ॥ স্বর্গস্থং নরকস্থং বা মুক্তি মাপ্নোতি তৎ ক্ষণাৎ। যৈঃ কৈশ্চিদ্যত্র বা জন্ম লব্ধং যেষু চ জন্তুষু ॥ জীবন্মুক্তাস্তে চ পূতা যান্তি কালে হরেঃ পদং। মদ্ভক্তি যুক্তো মৎপূজা নিযুক্তো মদ্গুণান্বিতঃ॥ মদ্গুণ শ্লাঘনীয়শ্চ মন্নিবিষ্টশ্চ সন্তত‌ং। সগদ্গদঃ সাশ্রু নেত্রঃ স্বাত্মবিস্মৃত এব চ ॥ ন বাঞ্ছন্তি সুখং মুক্তিং সালোক্যাদি চতুষ্টয়ং। ব্রহ্মত্ব মমরত্বং বা তদ্বাঞ্ছা মম সেবনে ॥ ইন্দ্রত্বঞ্চ মনুত্বঞ্চ দেবত্বঞ্চ সুদুর্লভং। স্বর্গরাজ্যাদি ভোগঞ্চ স্বপ্নে চ নহি বাঞ্ছতি ॥ ব্রহ্মাণ্ডানি বিনশ্যন্তি দেবা ব্রহ্মাদয় স্তথা। কল্যাণ ভক্তি যুক্তশ্চ মদ্ভক্তো ন প্রণশ্যতি ॥ ভ্রমন্তি ভারতে ভক্তা লব্ধা জন্ম সুদুর্লভং। তেপি যান্তি মহীং পূত্বা নবং তীর্থং মমালয়ং ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫ অধ্যায়ঃ ॥*॥ অপিচ। রতিঃ কৃষ্ণকথায়াঞ্চ যস্যাশ্রুপুলকোদ্গমঃ। মনো নিমগ্নং যস্যৈব স ভক্তঃ কথিতো বুধৈঃ ॥ পুত্রদারাদিকং সর্ব্বং জানাতি হরেরপি। আত্মনা মনসা বাচা স ভক্তঃ কথিতো বুধৈঃ ॥ দয়াস্তি সর্ব্বভূতেষু সর্ব্বং কৃষ্ণময়ং জগৎ। যো জানাতি মহাজ্ঞানী স ভক্তো বৈষ্ণবোত্তমঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণ জন্মখণ্ডে ১ অধ্যায়ঃ ॥*॥ ভগবদ্ভক্তা যথা। মদ্ভক্তাশ্চৈব নিঃশঙ্কাঃ কর্ম্ম নির্মূলকারকাঃ। নাহং শক্তশ্চ ভক্তানাং সংহারে নিত্য দেহিনাং ॥ ভক্তা মমানুগা নিত্যং মৎপাদানত তৎপরাঃ। অহং ভক্তান্তিকে নিত্যং তেষাং রক্ষণ হেতবে ॥ সর্ব্বে নশ্যন্তি ব্রহ্মাণ্ডে প্রভবন্তি পুনঃপুনঃ। ন মে ভক্তাঃ প্রণশ্যন্তি নিঃশঙ্কাশ্চ নিরাপদঃ ॥ ইতি তত্রৈব ৩ অধ্যায়ঃ ॥*॥ হরিভক্ত মাহাত্ম্যং যথা। দ্বিজানাং হরিভক্তানাং প্রভাবো দুর্লভঃ শ্রুতৌ। যেষাং পাদাব্জ রজসা সদ্যঃ পূতা বসুন্ধরা। তেষাঞ্চ পাদ চিহ্নং যত্তীর্থং তৎপরিকীর্ত্তিতং। তেষাঞ্চ স্পর্শ

মাত্রেণ তীর্থপাপং প্রণশ্যতি ॥ আলিঙ্গনাৎ সদালাপাত্তেষা মুচ্ছিষ্ট ভোজনাৎ । দর্শনাৎ স্পর্শনাচ্চৈব সর্ব্ব পাপাৎ প্রমুচ্যতে ॥ ভ্রমণে সর্ব্ব তীর্থানাং যৎ পুণ্যং স্নানতো ভবেৎ হরিদাসস্য বিপ্রস্য তৎ পুণ্যং দর্শনাল্লভেৎ ॥ ইতি তত্রৈব ২১ অধ্যায়ঃ ॥ ❀ ॥ ত্রিবিধ ভক্ত লক্ষণং যথা । ভক্তানাং ত্রিবিধানাঞ্চ লক্ষণং শ্রূয়তা মিতি । তৃণশয্যারতো ভক্তো মন্নাম গুণ কীর্ত্তিষু ॥ মনো নিবেশয়েত্ত্যক্ত্বা সংসার সুখ কারণং । দাস্যং বিনা নহীচ্ছন্তি সালোক্যাদি চতুষ্টয়ং ॥ নৈব নির্ব্বাণ মুক্তিঞ্চ সুধাপান মভীপ্সিতং । ধ্যায়তে মৎপদাব্জঞ্চ পূজয়েদ্ভক্তি ভাবতঃ ॥ শ্রীহেতুকীং তস্য দেবাঃ সঙ্কল্প রহিতস্য চ । সর্ব্বসিদ্ধিং ন বাঞ্ছন্তি তে হণিমাদিক মীপ্সিতং ॥ ব্রহ্মত্ব মমরত্বং বা সুরত্বং সুখকারণং । বাঞ্ছন্তি নিশ্চলাং ভক্তিং মদীযা মতুলামপি ॥ স্ত্রী পুং বিভেদো নাস্ত্যেবং সর্ব্বজীবেষু ভিন্নতা । তেষাং সিদ্ধেশ্বরাণাঞ্চ প্রবরাণাং ব্রজেশ্বর ॥ ক্ষুৎ পিপাসাদিকাং নিদ্রাং লোভ মোহাদিকং রিপুং । ত্যক্ত্বা দিবানিশং মাঞ্চ ধ্যায়তে চ দিগম্বরঃ ॥ স মদ্ভক্তোত্তমো নন্দ শ্রূয়তাং মধ্যম ॥ দকং ।❀।। না সক্তঃ কর্ম্মসু গৃ পূর্ব্ব প্রাক্তনতঃ শুচিঃ ॥ করোতি সৎ তঞ্চৈব পূর্ব্বকর্ম্ম নিকৃন্তনং । ন করোত্য পরং যত্নাৎ সঙ্কল্প রহিতস্য চ ॥ সর্ব্বং কৃষ্ণস্য যৎকিঞ্চিন্নাহং কর্ত্তা চ কর্ম্মণঃ । কর্ম্মণা মনসা বাচা সততং চিন্তয়েদিতি ॥ ❀ ॥ ন্যূনভক্তশ্চ তন্ন্যূনঃ সচ প্রাকৃতিকঃ শ্রুতৌ । যমং বা যমদূতং বা স্বপ্নেন চ নপশ্যতি ॥ পুরুষাণাং সহস্রঞ্চ পূর্ব্বং ভক্তঃ সমুদ্ধরেৎ । পুংসাং শতং মধ্যমশ্চ তচ্চতুর্থঞ্চ প্রাকৃতঃ ॥ ভক্তশ্চ ত্রিবিধ স্তাত কথিতশ্চ তবাজ্ঞয়া । ইতি তত্রৈব ৮৪ অধ্যায়ঃ ॥ ❀ ॥ কৃষ্ণভক্ত শরীরে তীর্থাদীনি যথা । পৃথিব্যাং যানি তীর্থানি পুণ্যান্যপি চ জাহ্নবি । মদ্ভক্তানাং শরীরেষু সন্তি পূতেষু সন্ততং ॥ মদ্ভক্ত পাদরজসা সদ্যঃ পূতা বসুন্ধরা । সদ্যঃ পূতানি তীর্থানি সদ্যঃ পূতং জগত্তথা ॥ মন্মন্ত্রোপাসকা বিপ্রা যে মদুচ্ছিষ্টভোজিনঃ । মামেব নিত্যং ধ্যায়ন্তে তে মৎপ্রাণাধিকাঃ প্রিয়াঃ ॥ তদুপস্পর্শ মাত্রেণ পূতো বায়ুশ্চ পাবকঃ । কলের্দ্দশ সহস্রাণি মদ্ভক্তাঃ সন্তি ভূতলে ॥ একবর্ণা ভবিষ্যন্তি মদ্ভক্তেষু গতেষু চ । তদ্ভক্ত শূন্যা পৃথিবী কলিগ্রস্তা

বিষ্যতি ॥ ২০৩ বুহ্মবৈবর্ত্তে শ্রীকৃষ্ণ জন্মখণ্ডে ১২৮ অধ্যায়ঃ ॥ * ॥ ভগবদ্ভক্ত মাহাত্ম্যং যথা। সংস্মৃত কীর্ত্তিতো বাপি দৃষ্টঃ স্পৃষ্টো ঽপি বা প্রিযে। পুনাতি ভগবদ্ভক্ত শ্চাণ্ডালো ঽপি যদৃচ্ছযা ॥ ইতি বারাহে উপরিভাগে প্রবোধিনীমাহাত্ম্যং ॥ * ॥ হরিভক্ত কর্ত্তব্যানি যথা। হরে শ্চরিত মীশস্য সর্ব্বলোকেষু কীর্ত্তনং। বৈষ্ণবেষু চ কার্য্যেষু ভক্তঃ কুর্য্যাদহর্নিশং ॥ দাসী দাসাংশ্চ যৎ কিঞ্চিৎ স্বকীযং বস্তু চাত্মনঃ। কৃষ্ণভক্তস্য গার্হস্থ্যং সর্ব্বং কৃষ্ণে নিবেদনং ॥ ভক্তস্য লক্ষণান্তরং যথা। প্রেম্না সংজাতযা ভক্ত্যা তনূ মুৎপুলকাঞ্চনঃ। বিভর্ত্ত্যলৌকিকং ভক্তো বদেদ্ধসতি নৃত্যতি ॥ পরমানন্দ যুক্তো ঽসৌ কৃচিদ্গাযতি নন্দতি। ক্রন্দত্যচ্যুত ভাবেন গদ্গদেন পুনঃ পুনঃ ॥ অনুশীলযতি ভজেৎ গোবিন্দ মনুমোদতে। তরেদেবং বিষ্ণুমাযাং দুস্তরাং মুনি মোহিনীং ॥ সর্ব্বত্রেশ্বর বুদ্ধ্যা যো ভজেদীশং সনাতনং। স তত্ত্ববাদী ভক্তশ্চ সর্ব্বভূত সুহৃত্তমঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ১০১ অধ্যাযঃ ॥ * ॥ ভক্তত্যাগে দোষো যথা। বুহ্মহত্যা গুরো র্ঘাতো গোবধঃ স্ত্রী বধ স্তথা। তুল্যমেভি র্মহাপাপং ভক্তত্যাগাদুদাহৃতং ॥ ভজন্তং ভক্ত মত্যাজ্য মদুষ্টং ত্যজতঃ সুখং। নেহ নামুত্র পশ্যামি তস্মাৎ শক্র দিবং বৃজ ॥ ইতি মার্কণ্ডেয় পুরাণে হরিশ্চন্দ্রোপাখ্যানং ॥

ভক্তকরঃ পুং কৃত্রিমধূপঃ। যথা। ...বকধূপে ভক্তকরো গিরিঃ স্যাৎ সমগন্ধকঃ। ইতি শব্দচন্দ্রিকা ॥ ভক্তকারকে ত্রি ॥

ভক্তকারঃ ত্রি পাচকঃ। ভক্তমন্নং করোতি পচতি যঃ। তৎপর্য্যাযঃ। সূদঃ ২ ঔদনিকঃ ৩ গুণঃ ৪ ভক্ষ্যংকারঃ ৫ সূপকারঃ ৬ সূপঃ ৭ আরালিকঃ ৭ বল্লবঃ ৮। ইতি হেমচন্দ্রঃ ॥

ভক্ততা স্ত্রী ভক্তত্বং। ভক্তস্য ভাব ইত্যর্থে ত প্রত্যযেন নিষ্পন্না ॥

ভক্ততূর্য্যং ক্লী ভোজনকালেবাদনীয তূর্য্যং। তৎপর্য্যাযঃ। নৃপমানং ২। ইতি ত্রিকাণ্ডশেষঃ ॥

ভক্তদাসঃ পুং পঞ্চদশদাসান্তর্গত দাসবিশেষঃ। যথা। ভক্তদাসশ্চ বিজ্ঞেয স্তথৈব বডবাকৃতঃ। সুভিক্ষে ঽপি ভক্তেনাঙ্গীকৃত দাস্যঃ। ইতি দাযক্রমসংগ্রহঃ ॥

ভক্তমণ্ডঃ পুং ক্লী অন্নাগ্রসঃ।

ভাতেরমাড ইতি ভাষা। তৎপর্য্যাযঃ। মাসরঃ ১ আচামঃ ২ নিঃস্রাবঃ ৩। ইত্যমরঃ ॥

ভক্তিঃ স্ত্রী বিভাগঃ॥ সেবা। ইতি মেদিনী॥ গৌণবৃত্তিঃ॥ ভঙ্গী॥ শ্রদ্ধা। ইতিহেমচন্দ্রঃ॥ ॥ ভজ ইত্যেষ বৈ ধাতুঃ সেবাযাং পরিকীর্ত্তিতঃ। তস্মাৎ সেবা বুধৈঃ প্রোক্তা ভক্তিঃ সাধন ভূযসী॥ ইতি গারুড়ে ২৩১ অধ্যাযঃ॥ ॥ অথ শ্রীমদ্ভক্তি লক্ষণং তৃতীযে শ্রীকাপিলেযে। দেবানাং গুণলিঙ্গানা মানুশ্রবিক কর্ম্মণাং। সত্ত্ব এবৈকমনসো বৃত্তিঃ স্বাভাবিকী তু যা॥ অনিমিত্তা ভাগবতী ভক্তিঃ সিদ্ধে র্গরীযসী। ॥ অথ বিশেষ লক্ষণানি। শ্রীগৌতমীযতন্ত্রে। দেবতাযাঞ্চ মন্ত্রে চ তথা মন্ত্রপ্রদে গুরৌ। ভক্তি রষ্ট বিধা যস্য তস্য কৃষ্ণঃ প্রসীদতি॥ তদ্ভক্ত জন বাৎসল্যং পূজাযাঞ্চানুমোদনং। স্বযমভ্যর্চযেন্নিত্যং তদর্থে দম্ভ বর্জ্জনং॥ তৎকথা শ্রবণে রাগ স্তদর্থে চাঙ্গ বিক্রিযা। তদনুস্মরণং নিত্যং যস্তন্নাম্নোপজীবতি॥ ভক্তি রষ্ট বিধা হ্যেষা যস্মিন্ ম্লেচ্ছেপি বর্ত্ততে। স মুনিঃ সত্যবাদী চ কীর্ত্তিমান্ স ভবেন্নরঃ॥ সপ্তমস্কন্ধে শ্রীপ্রহ্লাদোক্তৌ। শ্রবণং কীর্ত্তনং বিষ্ণোঃ স্মরণং পাদসেবনং। অর্চনং বন্দনং দাস্যং সখ্য মাত্ম নিবেদনং॥ ইতি পুংসার্পিতা বিষ্ণৌ ভক্তিশ্চে ন্নব লক্ষণা। ক্রিযতে ভগবত্যদ্ধা তন্মন্যে ঽধীত মুত্তমং॥ ॥ তত্রৈব শ্রীনারদ যুধিষ্ঠির সম্বাদে। শ্রবণং কীর্ত্তনঞ্চাস্য স্মরণং মহতাং গতেঃ। সেবেজ্যাবনতি র্দাস্যং সখ্য মাত্ম নিবেদনং॥ ॥ পাদ্মে কার্ত্তিকমাহাত্ম্যে শ্রীযমধূম্রকেশ সম্বাদে। শ্রবণং কীর্ত্তনং পূজা সর্ব্বকর্ম্মার্পণং স্মৃতিঃ। পরিচর্য্যা নমস্কারঃ প্রেমস্বাত্মার্পণং হরৌ॥ ॥ তত্রৈবোত্তরখণ্ডে শিব পার্ব্বতী সম্বাদে। আদ্যন্তু বৈষ্ণবং প্রোক্তং শঙ্খ চক্রাঙ্কণং হরেঃ। ধারণঞ্চোর্দ্ধ পুণ্ড্রাণাং তন্মন্ত্রাণাং পরিগ্রহঃ॥ অর্চনঞ্চ জপো ধ্যানং তন্নাম স্মরণং তথা। কীর্ত্তনং শ্রবণঞ্চৈব বন্দনং পাদ সেবনং। তৎপাদোদক সেবা চ তন্নিবেদিত ভোজনং॥ তদীযানাঞ্চ সংসেবা দ্বাদশী ব্রত নিষ্ঠতা। তুলসী রোপণং বিষ্ণো র্দেব দেবস্য শার্ঙ্গিণঃ॥ ভক্তিঃ ষোড়শধা প্রোক্তা ভববন্ধ বিমুক্তযে। ইতি চ॥ ॥ কিঞ্চ। দর্শনং ভগবন্মূর্ত্তেঃ স্পর্শনং ক্ষেত্রসেবনং। আঘ্রাণং ধূপশেষাদে র্নির্ম্মাল্যস্য চ

শ্রবণং॥নৃত্যং ভগবদগ্রে চ তথা বী-
ণাদি বাদনং। কৃষ্ণলীলাদ্যভিনয়ঃ শ্রী
ভাগবত সেবনং॥ পদ্মাক্ষ মালাদি
ধৃতি রেকাদশ্যাদি জাগরঃ। প্রাসা-
দ রচনাদ্যন্যজ্জ্ঞেয়ং শাস্ত্রানুসার
তঃ॥ লিখিতা ভগবদ্ধর্ম্মা ভক্তানাং
লক্ষণানি চ। তানি জ্ঞেয়ানি সর্ব্বাণি
ভক্তেবৈ লক্ষণানি হ॥তেষু জ্ঞেয়ানি
গৌণানি মুখ্যানি চ বিবেকিভিঃ।
বহিরঙ্গান্তরঙ্গাণি প্রেমসিদ্ধৌ চ তা-
নি যৎ॥ ভেদাস্তু বিবিধা ভক্তে র্ভক্ত
ভাবাদি ভেদতঃ। মুক্তাফলাদি গ্র-
ন্থেভ্যো জ্ঞেয়া স্তল্লিখনৈ রলং॥প্রে-
মভক্তৌ চ সিদ্ধায়াং সর্ব্বে হর্থাঃ সে-
বকাঃ স্বয়ং। ভগবাংশ্চাতিবশ্যঃ
স্যাল্লিখ্যতে হস্যাঃ সুলক্ষণং॥*॥
অথ প্রেম ভক্তি লক্ষণং। নারদপ-
ঞ্চরাত্রে। অনন্য মমতা বিষ্ণৌ মম-
তা প্রেম সঙ্গতা। ভক্তি রিত্যুচ্যতে
ভীষ্ম প্রহ্লাদোদ্ধব নারদৈঃ॥ প্রেম
ভক্তেশ্চ মাহাত্ম্যং ভক্তে র্মাহাত্ম্য-
তঃপরং। সিদ্ধমেব যতো ভক্তেঃ ফ-
লং প্রেমৈব নিশ্চিতং॥ চিহ্নানি প্রে-
মসম্পত্তে র্বাহ্যাণ্যাভ্যন্তরাণি চ। কি-
যন্ত্যল্লিখিতা তস্যা মহিমৈব বি-
লিখ্যতে॥*॥ অথ প্রেমসম্পত্তি
চিহ্নানি সপ্তমস্কন্ধে শ্রীপ্রহ্লাদস্য

বালানুশাসনে। নিশম্য কর্ম্মাণি গু-
ণানতুল্যান্ বীর্য্যাণি লীলাতনুভিঃ
কৃতানি। যদাতিহর্ষোৎপুলকাশ্রু
গদ্গদং প্রোৎকণ্ঠ উদ্গায়তি নৃত্যতে চ
॥ যদা গ্রহ গ্রস্ত ইব ক্বচিদ্ধসত্যাক্র-
ন্দতি ধ্যায়তি বন্দতে জনং। মুহুঃ
শ্বসন্ বক্তি হরে জগৎপতে নারায়ণে-
ত্যাত্ম মতি র্গতত্রপঃ॥ তদা পুমান্
মুক্ত সমস্ত বন্ধন স্তদ্ভাব ভাবানু কৃ-
তাশয়াকৃতিঃ। নির্দ্দগ্ধ বীজানুশয়ো
মহীয়সা ভক্তি প্রয়োগেণ সমেত্য-
ধোক্ষজং॥*॥ একাদশেচ শ্রীকবি
যোগেশ্বরোত্তরে। শৃণ্বন্ সুভদ্রাণি র-
থাঙ্গপাণে র্জন্মানি কর্ম্মাণি চ যানি
লোকে। গীতানি নামানি তদর্থকা-
নি গায়ন্ বিলজ্জো বিচরেদসঙ্গঃ॥
এবং ব্রতঃ স্বপ্রিয় নাম কীর্ত্ত্যা জাতা-
নুরাগো দ্রুত চিত্ত উচ্চৈঃ। হসত্যথো-
রোদিতি রৌতি গায়ত্যুন্মাদবন্নৃত্য
তি লোক বাহ্যঃ॥*॥ তত্রৈব শ্রীপ্রবুদ্ধ
যোগেশ্বরোত্তরে। স্মরন্তঃ স্মারয়ন্তশ্চ
মিথোঘৌঘ হরং হরিং। ভক্ত্যা সং-
জাতয়া ভক্ত্যা বিভ্রত্যুৎপুলকাং ত-
নুং॥ ক্বচিদ্রুদন্ত্যচ্যুত চিন্তয়া ক্বচি-
দ্ধসন্তি নন্দন্তি বদন্ত্যলৌকিকাঃ।
নৃত্যন্তি গায়ন্ত্যনুশীলয়ন্ত্যজং ভবন্তি
তূষ্ণীং পরমেত্য নির্বৃতাঃ॥ শ্রী

ভগবদুদ্ধব সম্বাদে চ। কথং বিনারো
মহর্ষং দ্রবতা চেতসা বিনা। বিনান-
ন্দাশ্রুকলয়া শুদ্ধ্যেদ্ভক্ত্যা বিনাশয়ঃ
॥ বাগ্গদ্গদা দ্রবতে যস্য চিত্তংরোদিত্য
ভীক্ষ্ণং হসতি ক্বচিচ্চ। বিলজ্জ উদ্গা-
য়তিনৃত্যতে চ মদ্ভক্তি যুক্তো ভুবনং
পুনাতি ॥ যথোক্ত ভক্ত্যশক্তো তু
ভগবচ্চরণাম্বুজং। শরণাগত ভাবেন
কৃৎস্ন ভীতিঘ্ন মাশ্রয়েৎ॥ ইতি হরি
ভক্তিবিলাসে ১১ বিলাসঃ ॥ ❁ ॥
অপিচ। উত্তমা ভক্তে র্লক্ষণং যথা।
অন্যাভিলাসিতা শূন্যং জ্ঞান কর্ম্মা-
দ্যনাবৃতং। আনুকূল্যেন কৃষ্ণানুশী-
লনং ভক্তিরুত্তমা ॥ তথা নারদপঞ্চ
রাত্রে। সর্ব্বোপাধি বিনির্মুক্তং তৎ
পরত্বেন নির্ম্মলং। হৃষীকেণ হৃষীকে-
শসেবনং ভক্তি রুচ্যতে॥ শ্রীভাগব-
তস্য তৃতীয স্কন্ধে চ। অহৈতুক্য ব্যব-
হিতা যা ভক্তিঃপুরুষোত্তমে। সালো-
ক্য সার্ষ্টি সামীপ্য সারূপ্যৈকত্বম-
প্যুত ॥ দীযমানং ন গৃহ্নন্তি বিনা মৎ
সেবনং জনাঃ। সএব ভক্তি যোগাখ্য
আত্যন্তিক উদাহৃত ইতি ॥ ❁ ॥ সা
উত্তমা ভক্তিঃ ষড্বিধা যথা। ক্লেশঘ্নী
শুভদা মোক্ষলঘুতাকৃৎ সুদুর্লভা।
সান্দ্রানন্দবিশেষাত্মা শ্রীকৃষ্ণাকর্ষণী
চ সা ॥ ❁ ॥ তত্রাস্যাঃ ক্লেশঘ্নত্বং। ক্লে

শাস্তু পাপং তদ্বীজ মবিদ্যা চেতি
তে ত্রিধা। শুভদত্বং যথা। শুভানি
প্রীণনং সর্ব্ব জগতামনুরক্ততা। সদ্গুণা
সুখ মিত্যাদীন্যাখ্যাতানি মনীষি-
ভিঃ ॥ মোক্ষলঘুতাকৃদ্যথা। মনা-
গেব প্ররূঢাযাং হৃদয়ে ভগবদ্রতৌ।
পুরুষার্থাস্তু চত্বার স্তৃণাযন্তে সমন্ত-
তঃ ॥ ❁ ॥ সুদুর্লভা যথা। সাধনৌ-
ঘৈ রনাসঙ্গৈ রলভ্যা সুচিরাদপি।
হরিণা চাশ্বদেযেতি দ্বিধা সা স্যাৎ
সুদুর্লভা ॥ সান্দ্রানন্দবিশেষাত্মা
যথা। ব্রহ্মানন্দো ভবেদেষ চেৎ
পরার্দ্ধ গুণীকৃতঃ। নৈতি ভক্তি সুখা
ম্ভোধেঃ পরমাণু তুলামপি ॥ ❁ ॥
শ্রীকৃষ্ণাকর্ষণী যথা। কৃত্বা হরিং প্রে-
মভাজং প্রিয়বর্গ সমন্বিতং। ভক্তি র্ব-
শীকরোতীতি শ্রীকৃষ্ণাকর্ষণী চ সা
॥ ❁ ॥ সা উত্তমাভক্তি স্ত্রিধা যথা।
সা ভক্তিঃ সাধনং ভাবঃ প্রেমা চেতি
ত্রিধোদিতা। সাধন ভক্তি র্যথা।
কৃতি সাধ্যা ভবেৎ সাধ্য ভাবা সা
সাধনাভিধা। নিত্য সিদ্ধস্য ভাব-
স্য প্রাকট্যং হৃদি সাধ্যতা ॥ ❁ ॥
ভাবভক্তি র্যথা। শুদ্ধসত্ত্ব বিশেষা-
ত্মাপ্রেম সূর্য্যাংশু সাম্যভাক্। রুচি-
ভি শ্চিত্ত মাসৃণ্যকৃদসৌ ভাব উচ্য-
তে ॥ ❁ ॥ প্রেমভক্তি র্যথা। সম্যঙ্ম-

সৃণিত স্বান্তো মমত্বাতিশযাঙ্কিতঃ। ভাবঃ সএব সান্দ্রাত্মা বুধৈঃ প্রেমা নিগদ্যতে॥ ইতি ভক্তিরসামৃতসিন্ধৌ পূর্ব্ববিভাগঃ॥

ভক্তিমান্ ত্রি ভক্তিযুক্তঃ। যথা। গুণবান্ পত্রবান্ শ্রীমান্ কীর্ত্তিমান্ ভক্তিমান্ ভবেৎ। ঐহিকে পরমৈশ্বর্য্য মন্তে নাথপদং ব্রজেৎ॥ ইতি শাম্ভবীতন্ত্রান্তর্গতমহাকালভৈরব স্তোত্রং॥ অপিচ। অন্যেপি যে বিকর্ম্মস্থাঃ শূদ্রাদ্যা নীচ জাতয়ঃ। ভক্তিমন্তঃ প্রমুচ্যন্তে কালেন মযি সঙ্গতাঃ॥ ইতি কৌর্ম্মে ৪ অধ্যায়ঃ॥

ভক্তিযোগঃ পুং পরমেশ্বরে ভজনসম্বন্ধঃ। যথা। ভক্তিযোগ প্রকাশায লোকস্যানুগ্রহায চ। সন্ন্যাসাশ্রমমাশ্রিত্য কৃষ্ণ চৈতন্য নামধৃক্॥ ইতি চৈতন্যভাগবতং॥ অপিচ। বাসুদেবে ভগবতি ভক্তিযোগঃ প্রযোজিতঃ। জনযত্যাশু বৈরাগ্যং জ্ঞানঞ্চ যদ হৈতুকং॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ২ অধ্যায়ঃ॥

ভক্তিরসঃ পুং ভক্তিরেবরসঃ। যথা। বিভাবৈ রনুভাবৈশ্চ সাত্ত্বিকৈ র্ব্যভিচারিভিঃ। স্বাদ্যত্বং হৃদি ভক্তানামানীতা শ্রবণাদিভিঃ। এষা কৃষ্ণ রতিঃ স্থাযিভাবা ভক্তিরসো ভবেৎ॥ ইতি ভক্তিরসামৃতসিন্ধুঃ॥

ভক্তিলঃ পুং সাধুঘোটকঃ। যথা। প্রভুভক্তা ভক্তিলাশ্চ কুলীনেষু জনোৎকটাঃ। ইতি শব্দচন্দ্রিকা॥

ভক্তিদাতরি ত্রি॥

ভগং ক্লী স্ত্রীচিহ্নং। তৎপর্য্যাযঃ। যোনিঃ ২। ইত্যমরঃ॥ বরাঙ্গং ৩ উপস্থঃ ৪ স্মরমন্দিরং ৫। ইতি রাজনির্ঘণ্টঃ॥ রতিগৃহং ৬ জন্মবর্ত্ম ৭ অধরং ৮ অবাচ্যদেশঃ ৯ প্রকৃতিঃ ১০ অপথং ১১ স্মরকূপঃ ১২ অপ্রদেশঃ ১৩ প্রকৃতিঃ ১৪ পুষ্পী ১৫ সংসারমার্গঃ ১৭ গুহ্যং ১৮ স্মরাগারং ১৯ স্মরধ্বজং ২০ রত্যঙ্গং ২১ রতিকুহরং ২২ কলত্রং ২৩ অধঃ ২৪। ইতি শব্দরত্নাবলী॥ তস্য লক্ষণং। যথা। বিস্তীর্ণঞ্চ গভীরঞ্চ দ্বিবিধং ভগ লক্ষণং। তদ্গুণা যথা। কূর্ম্মপৃষ্ঠং গজস্কন্ধং পদ্মগন্ধং সুকোমলং। অকোমলং সুবিস্তীর্ণং পঞ্চৈতে চ ভগোত্তমাঃ॥ তদ্দোষা যথা। শীতলং নিম্ন মত্যুঞ্চং গোজিহ্বা সদৃশং পরং। ইত্যুক্তং কামশাস্ত্রজ্ঞৈ র্ভগ দোষ চতুষ্টয়ং॥ বিস্তীর্ণে মুষলং যোজ্যং গভীরে বংশ বীজকং। ইতি রতিমঞ্জরী॥ * ॥ শ্রীঃ॥ বীর্য্যং॥ ইচ্ছা॥ জ্ঞানং॥ বৈরাগ্যং॥ কীর্ত্তিঃ॥

মাহাত্ম্যং ॥ ঐশ্বর্য্যং ॥ যত্নঃ ॥ ধর্ম্মঃ ॥ মোক্ষঃ ॥ ইতি মেদিনী ॥ পুংসাং গুহ্যমুষ্কমধ্যভাগঃ। ইতি রাজনির্ঘণ্টঃ ॥ স্ত্রী ॥ যশঃ ॥ সৌভাগ্যং ॥ কান্তিঃ ॥ সূর্য্যঃ ॥ শস্ত্রবিশেষঃ ॥ চন্দ্রঃ । ইত্যনেকার্থধ্বনিমঞ্জরী ॥ পূর্ব্বফল্গুনীনক্ষত্রং। যথা। অক্ষতামাষ যুক্তাশ্চ ভগে সর্পি স্তদুত্তরে। ইতি জ্যোতিস্তত্ত্বং ॥

ভগঃ পুং রবিঃ। ইতি মেদিনী ॥ ক্লীবেপ্যযং। যথা। জ্ঞান বৈরাগ্যযো র্যোনৌ ভগ মন্ত্রী তু ভাস্করে। ইতি রুদ্রঃ ॥

ভগণঃ পুং নক্ষত্রসমূহঃ ॥ শীঘ্রগামিনাং গ্রহাণা মল্লেন কালেন মন্দগামিনাং গ্রহাণাং মহতাকালেন পূর্ব্বগত্যা পাতানাং পশ্চিমগত্যা পরিবর্ত্তনেনাশ্বিন্যাদি রেবত্যন্ত নক্ষত্র ভোগকালঃ॥ ষষ্টিবিকলাভিঃ কলা ষষ্টিকলাভি র্ভাগ স্ত্রিংশদ্ভাগৈ রাশি র্দ্বাদশ রাশিভি র্ভগণঃ। যথা। শীঘ্রগ স্তান্যথাল্লেন কালেন মহতাল্পগঃ। তেষান্তু পরিবর্ত্তেন পৌষ্ণান্তে ভগণঃ স্মৃতঃ॥ বিকলানা কলাষষ্ট্যা তৎষষ্ট্যা ভাগ উচ্যতে। তত্রিংশতা ভবেদ্রাশি র্ভগণো দ্বাদশৈব তে ॥ যুগে সূর্য্য জ্ঞ শুক্রাণাং খ চতুষ্ক রদার্ণবাঃ ৪৩২০০০০। কুজার্কি গুরু শীঘ্রাণাং ভগণাঃ পূর্ব্বযায়িনাং ॥ ইন্দো রসাগ্নি ত্রিত্রীষ সপ্ত ভূধর মার্গণাঃ ৫৭৭৫৩৩৩৬। দস্র ত্র্যষ্ট রসাঙ্কাক্ষি লোচনানি কুজস্য তু ২২৯৬৮৩২। বুধশীঘ্রস্য শূন্য র্ত্তু খাদ্রি ত্র্যঙ্ক নগেন্দবঃ ১৭৯৩৭০৬০। বৃহস্পতেঃ খ দস্রাক্ষি বেদ ষড়্বহ্ণয় স্তথা ৩৬৪২২০ ॥ সিত শীঘ্রস্য ষট্ সপ্ত ত্রি যমাশ্বি খ ভূধরাঃ ৭০২২৩৭৬। শনে র্ভুজঙ্গ ষট্ পঞ্চ রস বেদ নিশাকরাঃ ১৪৬৫৬৮ ॥ চন্দ্রোচ্চস্যাগ্নি শূন্যাশ্বি বসু সর্পার্ণবা ৪৮৮২০৩ যুগে। বামং পাতস্য সর্পাগ্নি যমাশ্বি শিখি দস্রকাঃ ২৩২২৩৮। ইতি সূর্য্যসিদ্ধান্তঃ॥*॥ অপিচ। গ্রহাণাং মন্দোচ্চানাং চলোচ্চানাং গ্রহপাতানাঞ্চ ভগণান শ্লোক ষট্কেনাহ। অর্ক শুক্র বুধপর্য্যয়া বিধে র্বহ্নি কোটি গুণিতা রদাব্ধয়ঃ। ৪৩২০০০০০০০ এত এব শনি জীব ভূভুবাং কীর্ত্তিতাশ্চ গণকৈ শ্চলোচ্চজাঃ ॥ ১ ॥ খাভ্র খাভ্র পগণান্নরেন্দ্রিয় ক্ষ্মাধরাদ্রি বিষয়া ৫৭৭৫৩ ৩০০০০০ হিমদ্যুতেঃ। যুগ্ম যুগ্ম শর নাগ লোচন ব্যাল ষড়্ব যমাশ্বিনো সৃজঃ ২২৯৬৮২৮৫২২ ॥ ২ ॥ সিন্ধু সিন্ধুর নবাষ্ট গোঙ্ক ষট্ ত্র্যঙ্ক সপ্ত

শশিনো ১৭৯৩৬৯৯৮৯৮৪ জ্ঞ শীঘ্র জাঃ। পঞ্চ পঞ্চ যুগ ষট্ লোচন দ্ব্য ঙ্কি ষড্গুণ মিতা ৩৬৪২২৬৪৫৫ গুরো র্মতাঃ ॥ ৩ ॥ দ্বি নন্দ বেদাঙ্ক গজাগ্নি লোচন দ্বিশূন্য শৈলাঃ ৭০২ ২৩৮৯৪৯২ সিত শীঘ্র পর্য্যযাঃ। ভুজঙ্গ নন্দ দ্বি নগাঙ্ক বাণ ষট্ কৃত্তেন্দবঃ সূর্য্যসুতস্য পর্য্যযাঃ ১৪৬৫৬ ৭২৯৮ ॥ ৪ ॥ খাষ্টাব্ধয়ো ৪৮০ ষ্টাঙ্ক গজেষু দিগ্বিবহ্নিপাব্ধয়ো ৪৮০১০৫ ৮৫৮ দ্ব্যঙ্ক যমা ২৯২ রদাগ্নয়ঃ ৩৩২। শরেষ্বিভা ৮৫৫ স্ত্র্যঙ্ক রসাঃ ৬৫৩ ক্ষসাগরাঃ ৪১ সুঃ পূর্ব্বগত্যা তরণেন্দুজাঃ ॥ ৫ ॥ গজাষ্টি ভগ ত্রিরদাশ্বিনঃ ২৩২৩১১১৬৮ ক্ষভূদ্দসাশ্বিনঃ ২৬৭ ক্ষ দ্বি শরাঃ ৫২১ ক্রান্তেঃ ৬৩। ত্রি নন্দ নাগা ৮৯৩ যুগ ক্ষঞ্জরেষবো ৫৮৪ নিশাকরাদ্ব্যস্তগ পাত পর্য্যযাঃ ॥ ৬ ॥ ইতি সিদ্ধান্তশিরোমণিঃ ॥ * ॥ গ্রহাণাং পূর্ব্বগমনেন কল্পে এতে পর্য্যযাঃ। তথা মন্দোচ্চানাঞ্চ প্রাগ্গত্যা এতাবন্তঃ। পাতানাং পশ্চিমগত্যা এতাবন্তো ভবন্তি। অত্রোপপত্তিঃ সাতু তদ্ভাষাক্ষশালেন তৎ ক্ষেত্রসংস্থানজ্ঞেন শুক্রণো লেনৈব শ্রোতুং শক্যতে নান্যেন। গ্রহ মন্দ শীঘ্র পাতাঃ স্ব স্ব মার্গেষু গচ্ছন্ত এতাবতঃ পর্য্যযান্ কল্পে ক্ষ্বন্তীত্যত্রাগম এব প্রমাণং। ইতি তট্টীকা ॥

ভগদত্তঃ পুং নরকরাজস্য জ্যেষ্ঠপুত্রঃ। সতু প্রাগ্জ্যোতিষপুরাধিপঃ। যথা। ঋতুমত্যাস্তু জায়ায়াং কালেন নরকঃ ক্রমাৎ। ভগদত্তং মহাশীর্ষং মদবন্তং সুমালিনং ॥ চতুরো জনয়ামাস পুত্রাং স্তাংশ্চ ক্ষিতেঃ সুতঃ। শ্রীভগবানুবাচ। ভারাবতরণে দেবি নরকস্য বধঃ পুরা। ত্বয়ৈব প্রার্থিতো যস্মাত্তেনাসৌ নিহতো ময়া ॥ পালয়িষ্যে হস্য সন্তানং দেবি ত্বদ্বচনাদহং। প্রাগ্জ্যোতিষে হভিষেক্ষ্যামি নপ্তারং ভগদত্তকং ॥ পৃথিব্যাং নারদেনৈব সহিতঃ কেশবস্তদা। ভগদত্তং ভৌমসুতং প্রাগ্জ্যোতিষ পুরোত্তমে ॥ অভিষিচ্য তদা ভূপং পুরমধ্যে ন্যবেশয়ৎ। ইতি কালিকাপুরাণে ৩৯ অধ্যায়ঃ ॥

ভগদৈবতং ক্লী পূর্ব্বফল্গুনীনক্ষত্রং। তত্তু বৃহস্পতে র্জন্মনক্ষত্রং। যথা। বিশাখানল তোয়ানি বৈষ্ণব্যং ভগদৈবতং। পুষ্যা পৌষ্ণো যমঃ সর্পো জন্ম ভান্যর্কতঃ ক্রমাৎ ॥ ইতি জ্যোতিস্তত্ত্বং ॥

ভগন্দরঃ পুং অপানদেশে ব্রণরোগ বিশেষঃ। তস্য রূপ মাহ। গুদস্য ত্ব্যঙ্গুলে ক্ষেত্রে পার্শ্বতঃ পিডকার্ত্তি কৃৎ। ভিন্নো ভগন্দরো জ্ঞেয়ঃ স চ পঞ্চবিধো ভবেৎ॥ অর্ত্তিকৃৎ পী-ড়াকৃৎ। পঞ্চবিধঃ বাতিক পৈত্তি-ক শ্লৈষ্মিক সান্নিপাতিক শল্যজ ভেদৈঃ॥ ❀॥ ভগন্দর শব্দস্য নি-রুক্তি মাহ ভোজঃ। ভগং পরিসম স্তাদ্যো গুদ বস্তী তথৈব চ। ভগব-দ্দারয়েদ্যস্মাত্তস্মাদেষ ভগন্দরঃ॥ ভজন্ত্যনেনেতি ভগং মেহনং। ভ জন্ত্যস্মিন্নিতি ভগং যোনিঃ। অত্র ভগশব্দেন দ্বয়মপি কথ্যতে। ত-গবৎ যোনি বৎ॥ ❀॥ কটী ক-পাল নিস্তোদ দাহ কণ্ডু রুজাদয়ঃ। ভবন্তি পূর্বরূপাণি ভবিষ্যতি ভগ-ন্দরে। কটী কপালমত্র কটীফলকং ॥ ❀॥ বাতিকং শতযোনক সংজ্ঞং ভগন্দর মাহ। কষায রুক্ষৈ রতি-কোপিতো হনিল স্তপানদেশে পি-ডকাং করোতি যাং। উপেক্ষণাৎ পাকমুপৈতি দারুণং রুজাঞ্চ ভিন্না রুণ ফেন বাহিনী॥ তত্রাগমো মূত্র পুরীষ রেতসাং ব্রণৈ রনেকৈঃ শত যোনকং বদেৎ। দারুণং অতিদারু ণাৎ। ব্রণৈ রনেকৈঃ সূক্ষ্মমুখৈঃ। শ-তযোনক শ্চালনী তত্তুল্যং॥ ❀॥ পৈত্তিক মুষ্ট্রগ্রীব সংজ্ঞমাহ। প্রকো-পনৈঃ পিত্ত মতিপ্রকোপিতং করো-তি রক্তাং পিডকাং গুদে গতাং। ত-দাশুপাকাহিম পূতি বাহিনীং ভগ-ন্দরঞ্চোষ্ট্র শিরোধরং বদেৎ॥ আশু-পা কাহিম পূতি বাহিনীং। শীঘ্রপা-কাং উষ্ম দুর্গন্ধ বাহিনীঞ্চ। তদা তং ভগন্দরং উষ্ট্র শিরোধরং উষ্ট্রগ্রীব সং জ্ঞং বদেৎ। উষ্ট্রগ্রীব সংজ্ঞঞ্চ। পি-ডকা কালীন বক্রতযোষ্ট্রগ্রীবাকার-ত্বেন॥ ❀॥ শ্লৈষ্মিক পরিস্রাবি সং-জ্ঞমাহ। কণ্ডুযনো ঘনস্রাবী কঠিনো মন্দবেদনঃ। শ্বেতাবভাসঃ কফজঃ পরিস্রাবী ভগন্দরঃ॥ কঠিনঃ পিড কাবস্থাযাং পরিস্রাবী নিরন্তরং স্র-বণ শীলঃ॥ ❀॥ সান্নিপাতিক শম্বু-কাবর্ত্ত সংজ্ঞ মাহ। বহুবর্ণ রুজা-স্রাবাঃ পিডকা গোস্তনোপমাঃ। শ-ম্বুকাবর্ত্ত বন্নাড়ী শম্বুকাবর্ত্তকো মতঃ ॥ বহুবর্ণ রুজা স্রাবাঃ বহুশব্দো বর্ণা-দিভিঃ প্রত্যেকং সম্বধ্যতে। নাড়ী স্রা-বমার্গঃ॥ ❀॥ শল্যজ মুন্মার্গ সংজ্ঞ-মাহ। ক্ষতাদ্গতিঃ পাযুগতাদ্বিবর্দ্ধ-তে হ্যুপেক্ষণাৎ স্যুঃ কৃময়ো বিদার্য্য তে। প্রকুর্ব্বতে মার্গ মনেকধা মুখৈ র্ব্রণৈ স্তমুন্মার্গ ভগন্দরং বদেৎ॥

ক্ষতাৎ কণ্টকাদিনা নখেন কণ্ডুয়না-দিনা বা হর্ভিবা তাৎ। গতিঃ স্রাবঃ। উন্মাগ ভগন্দরং। এতস্য কৃমিকৃত মার্গৈঃ পুরীষাদি নির্গমাৎ মার্গ সংজ্ঞা॥ ❀॥ কষ্টাসাধ্যমসাধ্যঞ্চাহ। ঘোরাঃ সাধয়িতুং দুঃখাঃ সর্ব্ব এব ভগন্দরাঃ। তেষ্বসাধ্য স্ত্রিদোষোত্থঃ ক্ষতজশ্চ বিশেষতঃ॥ বাত মূত্র পুরীষাণি শুক্রঞ্চ কৃময় স্তথা। ভগন্দরাৎ স্রবন্তস্তু নাশয়ন্তি তমাতুরং॥ ❀॥ অথ ভগন্দরস্য চিকিৎসা। অথাস্য পিডকা মেব তথা যত্নাদুপাচরেৎ। শুদ্ধ্যস্র স্রুতি সেকাদ্যৈর্যথা পাকং ন গচ্ছতি॥ ❀॥ পুনর্নবামৃতা শুণ্ঠী পিষ্টিকা বদরৈঃ কৃতঃ। লেপায় পিডকাবস্থে কল্কঃ শস্তো ভগন্দরে॥ পয়ঃ পিষ্টৈ স্তিলারিষ্ট মধুকৈঃ শীতলৈঃ কৃতঃ। লেপো ভগন্দরে শস্তঃ পৈত্তিকে বেদনাবতি॥ অরিষ্টো নিম্বঃ॥ ❀॥ সুমনায়াশ্চ পত্রাণি গুডুচী বিশ্বভেষজং। সৈন্ধবং তক্র সংপিষ্টং লেপাদ্ধন্তি ভগন্দরং॥ সুমনা জাতি স্তস্যাঃ পত্রং॥ পিডকানা মপক্বানা মপতর্পণ পূর্ব্বকং। কর্ম কুর্য্যাদ্বিরেকান্তং ভিন্নানাং ব্রণবৎ ক্রিয়া॥ নিশার্কক্ষীর সিন্ধুত্থ পুরাশ্বহননচ্ছদৈঃ। সিদ্ধ মভ্যঞ্জনে

তৈলং ভগন্দর হরং পরং॥ পুরা গুগ্গুলুঃ। অশ্বহননচ্ছদাঃ করবীরপত্রাণি। নিশাদিতৈলং॥ ❀॥ ত্রিফলা পুর কৃষ্ণানাং ত্রিপঞ্চাংশৈক যোগিতা। গুটিকা শোথ গুল্মার্শো ভগন্দরবতাং হিতা॥ নবকার্ষিকো গুগ্গুলুঃ॥ ❀॥ শস্ত্রক্রিয়াপি কথিতা শস্ত্রসাধ্যে ভগন্দরে। সা চ তেনৈব কর্ত্তব্যা শস্ত্রশাস্ত্রে ন বেত্তি যঃ॥ ব্যায়ামং মৈথুনং যুদ্ধং পৃষ্ঠযানং গুরূণি চ। রূঢ ব্রণেপি যত্নেন বর্জয়েদ্বৎসরং নরঃ॥ ইতি ভাবপ্রকাশে ভগন্দরাধিকারঃ॥ ❀॥ অপিচ। লঙ্ঘনং স্বেদনং লেপ বিস্রাপন বিরেচনৈঃ। রক্তমোক্ষাদিভিঃ শীঘ্রং গুদজাং পিডকাং জয়েৎ॥ তথা যত্নং ভিষক্ কুর্য্যাদ্যথা পাকং ন গচ্ছতি। অপক্বং বাথ পক্বং বা জলৌকাপাতনং হিতং॥ তদভাবে তু শৃঙ্গাভ্যা ন্নিদং রক্তস্য মোক্ষণং। ❀। বটপত্রাষ্টকা শুণ্ঠী গুডূচ্যঃ সপুনর্নবাঃ। পিষ্ট্বা তু পিডকারম্ভে লেপঃ শস্তো ভগন্দরে॥ আমাবস্থা ক্রিয়া প্রোক্তা পক্বাবস্থা ক্রিয়োচ্যতে। ❀। ত্র্যূষণা পাটলা ক্ষার বহ্নি দাহাদিকং ক্রমং। বিধায় ব্রণবৎ কার্য্যং যথা দোষো যথা বলং॥ স্নুহ্যর্কদুগ্ধ দার্ব্বীভি র্ব্বর্ত্তিং

কৃত্বা ভগন্দরে। দদ্যাৎ সর্ব্বশরীরস্থা নাড়ীর্হন্যাৎ প্রযোগরাট্॥ * ॥ তিলাভয়া লোধ্র মরিষ্টপত্রং নিশা বচা কুষ্ঠ মগারধূমঃ। ভগন্দরে নাড়্যুপদংশযোশ্চ দুষ্টব্রণে শোধন রোপণো হয়ং॥ * ॥ শুনো হস্তি ঘৃষ্টং ত্রিফলা রসেন বিড়ালকাস্থি ত্বথবা বিলেপনাৎ। চিরপ্রভূতং ব্রণরোগ দুষ্টং ভগন্দরং নাশ মুপৈতি নূনং॥ * ॥ জম্বুকমাংসং ভুঞ্জীত প্রকারৈ র্ব্যঞ্জনাদিভিঃ। শৃগাল মাংস ব্যঞ্জনং খাদ্যং। অথবা শম্বূক মাংস ব্যঞ্জনং খাদ্যং॥ * ॥ ত্রিকটু ত্রিফলা মুস্তং বিড়ঙ্গামৃত চিত্রকং। শট্যেলা পিপ্পলী মূলং হবুষা সুরদারু চ॥ তুম্বুরুং পুষ্করং চব্যং বিশালা রজনী দ্বয়ং। বিড়ং সৌবর্চ্চলক্ষারৌ সৈন্ধবং গজপিপ্পলী॥ যাবন্ত্যেতানি চূর্ণানি তাবদ্দ্বিগুণ গুগ্গুলুঃ। কোলপ্রমাণাং গুটিকাং খাদয়েন্মধুনা সহ॥ ভগন্দরং শ্বাস কাসং ক্ষয়ং জীর্ণজ্বরোদরং। নাড়ী দুষ্টব্রণানাহ কুষ্ঠোন্মাদাশ্মরী ক্রমীন্॥ মেহান্ত্রবৃদ্ধি হৃদ্রোগ শূলং শ্লীপদ মেবচ। সপ্তবিংশতিকো হন্তি গুগ্গুলুঃ সর্ব্বরোগহা॥ হৃদ্রোগ শূল মিত্যত্র হৃৎপার্শ্ব শূল মিত্যপি পাঠঃ। সপ্তবিংশতি গুগ্গুলুঃ॥ * ॥ চিত্রকার্কৌ ত্রিবৃৎ পাঠৌ মলপূ হয়মারকৌ। সুধাং বচাং লাঙ্গলিকাং হরিতালং সুবর্চ্চলাং॥ জ্যোতিষ্মতীঞ্চ সংহৃত্য তৈলং বৈদ্যো বিপাচয়েৎ। এতদ্বিস্যন্দনং নাম তৈলং মূক্ষং ভগন্দরে॥ শোধনং রোপণঞ্চৈব সুবর্ণ করণং স্মৃতং। বিস্যন্দন তৈলং॥ * ॥ সূতস্য দ্বিগুণেন শুদ্ধ বলিনা কন্যাপয়োভি স্ত্র্যহং পিষ্ট্বা তাম্রময়ং সমস্ত তুলিতং পাত্রং বিধায়োপরি। স্বেদ্যং যাম যুগং সভস্ম পিঠরে জম্বুজলৈঃ সপ্তধা সার্দ্ধং তৎ পুটয়েৎ ভগন্দর হরো গুঞ্জোন্মিতা স্যাদিতি॥ জম্বুজলৈ রিত্যত্র নিম্বুজলৈ রিতিচ পাঠঃ। ভগন্দরহরো রসঃ॥ * ॥ শুদ্ধসূতং সমং গন্ধং মৃতনাগং সতুত্থকং। জীরকং সৈন্ধবং তুল্যং তিক্তকোষাতকীদ্রবৈঃ॥ পিষ্ট্বা তল্লেপনাদ্ধন্তি ভক্ষণাচ্চ ভগন্দরং। রসঃকালাগ্নিরুদ্রো হয়ং গুঞ্জৈকং মৃত্যুজিদ্ভবেৎ॥ কালাগ্নি রুদ্রো রসঃ॥ ইতি সারদীপিকায়াং ভগন্দর চিকিৎসাধ্যায়ঃ॥ * ॥ অপিচ। গুগ্গুলুং ত্রিফলা যুক্তং পীত্বা নশ্যেৎ ভগন্দরঃ। ইতি গারুড়ে ১৮৮ অধ্যায়ঃ॥

ভগভক্ষকঃ পুং কুট্টনী। কোটনা ইতি ভাষা। ইতি মহাভারতে

দানধর্ম্মঃ।। তস্যান্ন ভক্ষণ নিষেধো যথা। যো বান্ধবৈঃ পরিত্যক্তঃ সাধুভি র্ব্রাহ্মণৈরপি। কুণ্ডাশী যশ্চ তস্যান্নং ভুক্ত্বা চান্দ্রায়ণঞ্চরেৎ।। ইতি মার্কণ্ডেয়পুরাণে সদাচারাধ্যায়ঃ।।

ভগবতী স্ত্রী গৌরী।। পূজ্যা। ইতি মেদিনী।। সরস্বতী। যথা। সা মাং পাতু সরস্বতী ভগবতী নিঃশেষজাড্যাপহা। ইতিপৌরাণিকাঃ।। গঙ্গা। যথা। ভগবতি ভবলীলামৌলিমালে তবাম্ভঃ কণমণু পরিমাণং প্রাণিনো যে স্পৃশন্তি। ইতি শঙ্করাচার্য্য কৃত গঙ্গাস্তোত্রং।।*।। তস্যাঃ স্বরূপং যথা। যথা নিত্যোহি ভগবান্ নিত্যা ভগবতী তথা। স্বমায়যা তিরোভূতা তত্রেশে প্রাকৃতে লয়ে।। আব্রহ্ম স্তম্বপর্য্যন্তং সর্ব্বং মিথ্যৈব কৃত্রিমং। দুর্গা সত্য স্বরূপা সা প্রকৃতি র্ভগবান্ যথা।। সিদ্ধ্যৈশ্বর্য্যাদিকং সর্ব্বং যস্যা মস্তি যুগে যুগে। সিদ্ধ্যাদিকে ভগো জ্ঞেয়স্তেন ভগবতী স্মৃতা।। ইতি ব্রহ্মবৈবর্ত্ত পুরাণে প্রকৃতিখণ্ডে ৫৪ অধ্যায়ঃ

সর্ব্বে স্তাঞ্চৈব ভজতে যতঃ। ধাতু র্ভজেতি সেবায়াং ভগবত্যেব সা স্মৃতা।। ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ।।*।। তস্যাঃ প্রতিমাবিশেষস্য পূজনে ফলবিশেষো যথা। ব্রহ্মোবাচ। শৃণু তস্যাঃ সুরাধ্যক্ষ আরাধন বিধিং পরং। যথা সা তোষিতা পূর্ব্বং শঙ্করাদ্যৈঃ ফলেপ্সুভিঃ।। কর্ম্ম যজ্ঞেন দেবেশ তথাত্ম মপি পূজয়। শম্ভুঃ পূজয়তে দেবীং মন্ত্রশক্তিময়ীং শুভাং।। অক্ষমালাকরো নিত্যং তেনাসৌ বিবুধাম্বরঃ। অহং শৈলময়ীং দেবীং যজামি সুরসত্তম।। তেন ব্রহ্মত্ব মেবেদং ময়া প্রাপ্তং সুদুর্লভং। ইন্দ্রনীলময়ীং দেবীং বিষ্ণু রর্চয়তে তাং।। বিষ্ণুত্বং প্রাপ্তবাং স্তেন অদ্ভুতৈকং সনাতনং। দেবীং হেমময়ীং কান্তাং ধনদো হর্চয়তে সদা।। তেনাসৌ ধনদো দেবো ধনেশত্ব মবাপ্তবান্। বিশ্বেদেবা মহাত্মানো রৌপ্যাং দেবীং মনোহরাং।। যজন্তি বিধিবদ্ভক্ত্যা তেন বিশ্বত্ব মাপ্নুয়ুঃ। বায়ুঃ পূজয়তে ভক্ত্যা দেবীং পিত্তল সম্ভবাং।। বায়ুত্বং তেন তৎ প্রাপ্ত মনৌপম্যং গুণাবহং। বসবঃ কাংসিকাং দেবীং পূজয়ন্তে বিধানতঃ।। প্রাপ্নুবন্তো মহাত্মানো বসুত্বং সুমহোদয়ং। অশ্বিনৌ পার্থিবাং দেবীং পূজয়ন্তৌ বিধানতঃ।।তেন তাব-

শিন্যৈর্দেবৌ দিব্য দেহং গতাবুভৌ ॥ স্ফাটিকাং শোভনাং দেবীং বরুণো হর্চ্চয়তে সদা। বরুণত্বংহি সংপ্রাপ্তং তেন ঋদ্ধ্যা সমন্বিতং ॥ দেবী মন্ময়ীং পুণ্যা মগ্নি র্যজতি ভাবিতঃ। অগ্নিত্বং প্রাপ্তবাং স্তেন তেজোরূপ সমন্বিতং ॥ তাম্রাং দেবীং সদাকালং ভক্ত্যা দেবো দিবাকরঃ। অর্চ্চতে তত্র সম্প্রাপ্তং তেন সূর্য্যত্ব মুত্তমং ॥ মুক্তা শৈলময়ীং দেবীং সোমঃ পূজয়তে সদা। তেন সোমো হপি সম্প্রাপ্তঃ সোমত্বং সততোজ্জ্বলং॥ প্রবালকময়ীং দেবীং যজন্তে পন্নগোত্তমাঃ। তেন নাগাস্তু ভোগাঢ্যাঃ প্রযান্ত্যেতে পরং পদং ॥ কৃষ্ণায়সময়ীং দেবীং পূজয়ন্ত্যসুরোত্তমাঃ॥ রাক্ষসাশ্চ মহাত্মান স্তেন তে হমিত বিক্রমাঃ॥ ত্রপু সীসময়ীং দেবীং পিশাচাঃ পূজয়ন্তি তাং। তেন ঋদ্ধি বলোপেতাঃ প্রযান্তি পরমং পদং ॥ ত্রৈলোহিকাং সদা দেবীং যজন্তে গুহ্যকাদয়ঃ। তেন ভোগবলোপেতাঃ প্রযান্তীশ্বর মন্দিরং ॥ বজ্র লৌহময়ীং দেবীং যজন্তে মাতরঃ সদা। মাতৃত্বং প্রাপ্য তাঃ সর্ব্বাঃ প্রযান্তি পরমং পদং ॥ এবং দেবাঃ সগন্ধর্ব্বাঃ পিশাচোরগ রাক্ষসাঃ। পূজয়ন্তে সদাকালং চর্চ্চিকাং সুরনায়িকাং ॥ তথাত্বমপি দেবেন্দ্র যদীচ্ছসি পরাংগতিং ॥ শিবাং মণিময়ীং পূজ্য লভসে মনসেপ্সিতান্। কামান্ সুরবরাধ্যক্ষ কানিকৈঃ পূজিতৈঃ সদা ॥ দদাতি সর্ব্ব লোকানাং চিন্তামণি র্যথা শিবা। ইত্যাদ্যে দেব্যবতারে দ্রব্যবিধি পূজামাহাত্ম্যে ৩৮ অধ্যায়ঃ॥ ॥ তস্যৈ গৃহদানস্য ফলং যথা। ঈশ্বর উবাচ। দেব্যাঃ গৃহন্তু যঃ শুক্র করাপয়তি শোভনং। সর্ব্বোপকরণৈ র্যুক্তং সকপাটার্গলান্বিতং ॥ তস্মিন্ ঘণ্টা ধ্বজং ছত্রং বিতানং দর্পণানি চ। দত্ত্বা মুরজ বংশাদি নিত্যং সঙ্গীতকানি চ ॥ দেবী শাস্ত্রার্থ বেত্তারং পূজনং ভবনে শুভং। এবং প্রবর্ত্ততে যস্তু তস্য পুণ্যফলং শৃণু ॥ দশ পূর্ব্বাপরাং স্তাত আত্মনশ্চৈক বিংশতিং। উদ্ধৃত্য চ কুলং পাপাদ্ব্রহ্মলোকে মহীয়তে ॥ গচ্ছতে ভগবতী যত্র পরাপরম পূজিতা। তত্র কল্পান্তরং যাবদ্ভুক্ত্বা ভোগান্ মনোরমান্ ॥ পুনঃ কালাদিহায়াতঃ পৃথিব্যা মেকরাড্ভবেৎ। সভৃত্য বাহনোপেতঃ শান্তঃ পুরপরিচ্ছদঃ ॥ পুন র্দেব্যা দ্বিজাতীনাং তদ্ভক্তানাং প্রিয়ো ভবেৎ। কন্যা সম্পূজকো

নিত্যং দেবী শাস্ত্রার্থ পারগঃ ॥ ল- ভতে পরসদ্ভাবং তদন্তে শিবতাং ব্রজেৎ। দেব্যা গৃহস্ত যঃ শুক্র সর্ম্মা- জযতি নিত্যশঃ ॥ স ভবেদ্বলবান্ সৌখ্য সর্ব্ব সম্পত্তি সংযুতঃ। তদা- গচ্ছেছিবা লোকং সর্ব্বকাম ফলপ্র- দং ॥ দেব্যা গৃহস্ত যঃ শুক্র গোম- যেনানুলেপযেৎ। স্ত্রিযো বা যদি বা পুংসঃ ষণ্মাসস্ত নিরন্তরং ॥ স লভেদীপ্সিতান্ কামান্ দেব্যা লো- কঞ্চ গচ্ছতি। ইত্যাদ্যে দেব্যবতা- রে ৪২ অধ্যাযঃ ॥

ভগবান্ পুং বুদ্ধঃ। ইত্যমরঃ ॥ কৃষ্ণঃ। যথা। ভগবানপি তা রাত্রীঃ শারদোৎফুল্ল মল্লিকাঃ। বীক্ষ্য রন্তুং মনশ্চক্রে যোগমাযামু- পাশ্রিতঃ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ২৯ অধ্যাযঃ ॥ পূজ্যে ত্রি। ইতি মেদিনী ॥ * ॥ ভগবৎ স্বরূ- পং যথা। মনুরপ্যাহবেদার্থং মৃত্বা যন্মুনি সত্তম। তদেতৎ শ্রূযতা মত্র সম্বন্ধে গদতো মম ॥ দ্বে ব্রহ্মণী বে- দিতব্যে শব্দব্রহ্ম পরঞ্চ যৎ। শব্দ ব্রহ্মণি নিষ্ণাতঃ পরংব্রহ্মাধিগচ্ছতি ॥ দ্বে বিদ্যে বেদিতব্যে বৈ ইতি চাথর্ব্বণী শ্রুতিঃ। পরযাত্বক্ষর প্রা- প্তি ঋগ্বেদাদি মযা ঽপরা ॥ যত্তদ- ব্যক্ত মজর মচিন্ত্য মজ মব্যযং। অ- নির্দ্দেশ্য মরূপঞ্চ পাণি পাদাদ্য সং- যুতং ॥ বিভুং সর্ব্বগতং নিত্যং ভূত- যোনি মকারণং। ব্যাপ্যাব্যাপ্যং যতঃ সর্ব্বং তং বৈ পশ্যন্তি সূরযঃ ॥ তদ্ব্রহ্ম তৎপরং ধাম তদ্ধ্যেযং মো- ক্ষকাঙ্ক্ষিণাং। শ্রুতিবাক্যাদিতং সূক্ষ্মং তদ্বিষ্ণোঃ পরমং পদং ॥ তদেব ভ- গবদ্বাচ্যং স্বরূপং পরমাত্মনঃ। বা- চকো ভগবচ্ছব্দ স্তস্যাদ্যস্যাক্ষরা- ত্মনঃ। এবং নিগদিতার্থস্য স তত্ত্বং তস্য তত্ত্বতঃ। জ্ঞাযতে যেন তজ্জ্- জ্ঞানে পরমন্যত্রযীমযং ॥ অশব্দ গোচরস্যাপি তস্যৈব ব্রহ্মণো দ্বিজ। পূজাযাং ভগবচ্ছব্দঃ ক্রিযতে হ্যৌপ- চারিকঃ ॥ শুদ্ধে মহাবিভূত্যাখ্যে পরে ব্রহ্মণি বর্ত্ততে। মৈত্রেয ভগব- চ্ছব্দঃ সর্ব্বকারণ কারণে ॥ সংভর্ত্তেতি তথা ভর্ত্তা ভকারো ঽর্থ দ্বযান্বিতঃ। তেনাগমযিতা স্রষ্টা গকারার্থ স্তথা মুনে ॥ ঐশ্বর্য্যস্য সমগ্রস্য বীর্য্যস্য যশসঃ শ্রিযঃ। জ্ঞান বৈরাগ্যযো- শ্চৈব ষণ্ণাং ভগ ইতীঙ্গনা ॥ বসন্তি যত্র ভূতানি ভূতাত্মন্যখিলাত্মনি। সচ ভূতেষ্বশেষেষু বকারার্থ স্ততো ঽব্যযঃ ॥ এব মেব মহাবাহো ভগ- বানিতি সত্তম। পরম ব্রহ্ম ভূতস্য

বাসুদেবস্য নান্যগঃ ॥ তত্র পূজ্য পদার্থোক্তি পরিভাষা সমন্বিতঃ । শব্দোঽয়ং নোপচারেণ অন্যত্র হ্যুপচারতঃ ॥ উৎপত্তিং প্রলয়ঞ্চৈব ভূতানামাগতিং গতিং । বেত্তি বিদ্যামবিদ্যাঞ্চ স বাচ্যো ভগবানিতি ॥ জ্ঞান শক্তি বলৈশ্বর্য্য বীর্য্য তেজাংস্যশেষতঃ । ভগবচ্ছব্দ বাচ্যানি বিনা হেয়ৈ গুণাদিভিঃ ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৫ অধ্যায়ঃ ॥ * ॥ অপিচ । পরমাত্মা চ ভগবান্ বিষ্বক্সেনো জনার্দ্দনঃ । ভক্তিমান্ ভাগবতো নাম্ন পর্য্যে হি জায়তে ॥ ভগবচ্ছাসনাসক্তো ভগবচ্ছাসনপ্রিয়ঃ । ভগবদ্ভক্তি সাহায্যাদ্বৎস ভাগবতো ভব ॥ ভগবান্ ভূত ভব্যেশো ভূতাদি প্রভুরব্যয়ঃ । ভাবেন তং ভজস্বেশং ভব ভঙ্গকরং হরিং ॥ ভজস্ব ভাবেন বিভুং ভগবন্তং ভবেশ্বরং । ততো ভাগবতো ভূত্বা ভববন্ধাৎ প্রমোক্ষ্যসি ॥ ইত্যাদ্যে বহ্নিপুরাণে বৈষ্ণবক্রিয়াযোগে সনাতুপাসনো নামাধ্যায়ঃ ॥ * ॥ অন্যচ্চ । মহতাংক্ষুদ্রজন্তূনাং সর্ব্বেষাং জীবিনাং সদা । স্রষ্টা পাতা চ শাস্তা চ ভগবান্ করুণানিধিঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৫ অধ্যায়ঃ ॥

ভগালং স্ত্রী নৃকরোটিঃ । যথা । ভগালং নরমস্তকং । ইতি কবি[illegible]ধরঃ ॥ ভগস্য মহাদেবস্য আলং ভূষণমিতি ব্যুৎপত্তিঃ ॥

ভগালী পুং শিবঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

ভগিনী স্ত্রী সহোদরা । তৎপর্য্যায়ঃ । স্বসা ২ । ইত্যমরঃ ॥ ভগং যত্নঃ পিত্রাদিতো দ্রব্যদানে বিদ্যতেঽস্যা ইতি ইনি ভগিনী । ইতি তট্টীকায়াং ভরতঃ ॥ স্ত্রীমাত্রং । যথা । পরিগৃহ্য চ বামাঙ্গী ভগিনী প্রকৃতি নরী । ইতি শব্দচন্দ্রিকা ॥

ভগিনীপতিঃ পুং স্বসৃভর্ত্তা । তৎপর্য্যায়ঃ । আবুত্তঃ ২ ভাবঃ ৩ । যথা । ভগিনীপতি রাবুত্তো ভাবো নিদ্যালপারদঃ । ইতি নাট্যোক্তানগরঃ ॥ অহো ভগিন্যহো ভাম ময়া বাং বত পাপ্মনা । পুরুষাদ ইবাপত্যং বহবো হিংসিতাঃ সুতাঃ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৪ অধ্যায়ঃ ॥

ভগীরথঃ পুং দিলীপরাজপুত্রঃ । যেন গঙ্গা আনীতা । যথা । অসমঞ্জস্ত তনয়ো হ্যংশুমানাম বিশ্রুতঃ । তস্য পুত্রো দিলীপস্তু দিলীপাত্তু ভগীরথঃ ॥ যেন ভাগীরথী গঙ্গা

তপঃ কৃত্বাবতারিতা। ভগীরথস্য তনয়ো নাভাগ ইতি বিশ্রুতঃ ॥ ইতি মাৎস্যে ১২ অধ্যায়ঃ ॥

ভগোঃ পুং) হেভগবন্। ইতি মুগ্ধ ভগো° ব্য) বোধব্যাকরণং সংক্ষিপ্ত সারশ্চ ॥

ভগোলঃ পুং ভপঞ্জরং। নক্ষত্রচক্রং। যথা। ইদানীং ভগোলমাহ। যাম্যোত্তর ক্ষিতিজবৎ সুদৃঢ়ং বিদধ্যাদাধার বৃত্ত যুগলং ধ্রুব যষ্টি বদ্ধং। যষ্ট্যঙ্ক মত্র সম মণ্ডল বত্তৃতীয়ং নাড্যাহ্বয়ঞ্চ বিষবদ্বলয়ং তদেব ॥ যথা খগোলে ক্ষিতিজং যাম্যোত্তরঞ্চ তদাকার মপর মাধার বৃত্ত দ্বয়ং ধ্রুবযষ্টিস্থং কৃত্বা তদুপরি অন্যত্তৃতীয়ং সম মণ্ডলাকারং ঘটী ষষ্ট্যাচাঙ্কিতং কার্য্যং তন্নাড়ীবৃত্তং বিষুবৎবৃত্ত সংজ্ঞং ॥ * ॥ ইদানীং ক্রান্তি বৃত্ত মাহ। ক্রান্তি বৃত্তং গৃহাঙ্কং বিধেয়ং ভ্রমত্যত্র ভানুশ্চ ভার্দ্ধে হ্গভা ভানুতঃ। ক্রান্তিপাতঃ প্রতীপং তথা প্রস্ফুটা ক্ষেপ পাতশ্চ তৎ স্থান কান্যঙ্কয়েৎ ॥ অথান্যত্তৎ প্রমাণ মেব বৃত্তং কৃত্বা তত্র মেষাদীন্ প্রকল্প্য দ্বাদশ রাশয়ো হঙ্ক্যাঃ। তৎ ক্রান্তি বৃত্ত সংজ্ঞং। তস্মিন্ বৃত্তে রবি র্ভ্রমতি তথা রবের্ভার্দ্ধান্তরে ভূভা চ। তথা তত্র ক্রান্তি পাতো মেষাদে র্বিলোমং ভ্রমতি। তথা গ্রহাণাং বিক্ষেপপাতাঃ প্রস্ফুটা বিলোমং ভ্রমন্তি। অতঃ ক্রান্তি পাতাদীনি স্থানানি তত্রাঙ্ক্যানি ॥ * ॥ ইদানীং ক্রান্তিবৃত্ত নিবেশ মাহ। ক্রান্তিপাতেচপা তাত্ত ষট্কান্তরে নাড়িকা বৃত্ত লগ্নং বিদধ্যাদিদং। পাততঃপ্রাক্ ত্রিভে সিদ্ধ ভাগৈ ক্রদগ্দক্ষিণে তৈশ্চ ভাগৈ র্বিভাগেপরে। ক্রান্তি পাত চিহ্নাৎ ষড্ভে হন্তরে হন্যচিহ্নং কার্য্যং। তে চিহ্নে নাড়ী বৃত্তেন সংসক্তে কৃত্বা পাত চিহ্নাদগ্রতঃ ত্রিভে হন্তরে নাড়ী বৃত্তাত্তাগ চতুর্বিংশত্যা উত্তরতো যথা ভবতি। অপর ভাগে ত্রিভে হন্তরে দক্ষিণ তস্তৈ র্ভাগৈ র্যথা ভ~~বতি তথা~~ বধ্নীয়াৎ ॥ * ॥ ইদানীং বিমণ্ডলমাহ। নাড়িকা মণ্ডলে ক্রান্তি বৃত্তং যথা ক্রান্তি বৃত্তে তথা ক্ষেপ বৃত্তং ন্যসেৎ। ক্ষেপ বৃত্তস্ত রাশ্যঙ্কিতং তত্রচ ক্ষেপ পাতেষু চিহ্নানি কুর্ব্বোক্তবৎ। ক্রান্তি বৃত্তস্য বিক্ষেপ বৃত্তস্য চ ক্ষেপপাতে সম্পাতে কৃত্বা যুতিং। ক্ষেপ পাতাগ্রতঃ পৃষ্ঠতশ্চ ত্রিভে ক্ষেপ ভাগৈঃ স্ফুটৈঃ সৌম্যযাম্যে ন্যসেৎ। শীঘ্রকর্ণেন ভক্তা স্ত্রি,ভজ্যা গুণাঃ স্যুঃ

পরক্ষেপ ভাগা গ্রহাণাং স্ফুটাঃ। ক্ষেপবৃত্তানি যত্নাং বিদধ্যাৎ পৃথক্ স্বস্ববৃত্তে ভ্রমন্তীন্দু পূর্বাগ্রহাঃ॥ অস্য শ্লোকস্য সমগ্রস্য ব্যাখ্যানং। যথা ক্রান্তি বৃত্তং পৃথক্ কৃতং এবং বিমণ্ডলমপি রাশ্যঙ্কং পৃথক্ পৃথক্ কৃত্বা তত্র মেষাদের্ব্যস্তং স্ফুট ক্ষেপ পাতং দত্ত্বাগ্রে চিহ্নং কার্য্যং। অথ ক্রান্তি বৃত্তস্য বিমণ্ডলস্য চ ক্ষেপপাত চিহ্নযোঃ সম্পাতং কৃত্বা তস্মাৎ ষড়্ভে হন্তরে অন্যঞ্চ সংপাতং কৃত্বা ক্ষেপ পাতাগ্রত্ত্রিভে হন্তরে ক্রান্তি বৃত্তাদুত্তরতঃ স্ফুটৈঃ ক্ষেপভাগৈঃ পৃষ্ঠতশ্চ ত্রিভে হন্তরে তৈরেব ভাগৈর্দক্ষিণতঃ স্থিরং কৃত্বা বিমণ্ডলং নিবেশং। অথ পঠিতা যে বিক্ষেপ ভাগাস্তে ত্রিজ্যা গুণাঃ শীঘ্রকর্ণেন ভক্তাঃ স্ফুটা জ্ঞেয়াঃ॥ *॥ অথানুপাতঃ। যদি কর্ণাগ্রে এতাবদন্তরং তর্হি ত্রিজ্যাগ্রে কিযদিতি। যতো ভূগোলে ত্রিজ্যৈব ব্যাসার্দ্ধং। এব চন্দ্রা দীনাং ষট্ বিমণ্ডলানি কার্য্যাণি। স্ব স্ব বিমণ্ডলে গ্রহা ভ্রমযন্তি॥ *॥ ইদানীং ক্রান্তিংবিক্ষেপঞ্চাহ। নাড়িকা মণ্ডলা তির্য্যগত্রাপমঃ ক্রান্তি বৃত্তাগ্রধিঃ ক্রান্তিবৃত্তাচ্চরঃ। ক্ষেপ বৃত্তাবধি স্তির্য্যগেব স্ফুটো নাড়িকা বৃত্তখেটান্তরালে হপমঃ॥ ক্রান্তি বৃত্তে স্ফুট গ্রহ স্থানং তস্য নাড়ীবৃত্তাদ্যন্তির্য্যগন্তরং সা ক্রান্তিঃ। অথ বিমণ্ডলে চ যদ্‌গ্রহ স্থানং তস্য ক্রান্তি বৃত্তাৎ যত্তির্য্যগন্তরং স বিক্ষেপঃ। অথ বিমণ্ডলস্থ গ্রহস্য নাড়ী বৃত্তাদ্যন্তির্য্যগন্তরং সা স্ফুটা ক্রান্তিঃ॥ *॥ ইদানীং ক্রান্তিপাত মাহ। বিষুবৎ ক্রান্তি বলযযোঃ সংপাতঃ ক্রান্তি পাতঃ স্যাৎ। তদ্ভগণাঃ সৌরোক্তা ব্যস্তা অযুত ত্রয়ং কল্পে॥ অযন চলনং যদুক্তং মঞ্জালাদ্যৈঃ সএবাযং। তৎ পক্ষে তদ্ভগণাঃ কল্পে গোঙ্গর্তু নন্দ গো চন্দ্রাঃ ১৯৯৬৬৯॥ তৎ সংজাতং পাতং ক্ষিপ্ত্বা খেটে হপমঃ সাধ্যঃ। ক্রান্তি বশাত্তচর মুদযাশ্চর দল লগ্নাপমে ততঃ ক্ষেপ্যাঃ॥ ক্রান্ত্যর্থপাতঃ ক্রান্তিপাতঃ। পাতো নাম সম্পাতঃ কযোঃ বিষুবৎ ক্রান্তি বলযযোঃ। নহি তযো র্মেষাদাবেব সম্পাতঃ। কিন্তু তস্যাপি চলন মস্তি। যে অযন চলন ভাগাঃ প্রসিদ্ধা স্ত এব বিলোমগস্য ক্রান্তি পাতস্য ভাগাঃ। মেষাদেঃ পৃষ্ঠত স্তাবদ্ভাগান্তরে ক্রান্তিবৃত্তে বিষুবদ্বৃত্তং লগ্ন মিত্যর্থঃ। নহি ক্রান্তিপাতো হস্তীতি বক্তুং ন শক্যতে। প্রত্যক্ষেণ তস্যোপলব্ধ

ত্বাৎ। উপলব্ধি প্রকার মগ্রে বক্ষ্য-
তি। সৎ কথং ব্রহ্মগুপ্তাদিভি র্নি
পুণৈ রপি নোক্ত ইতি চেৎ। তদা
স্বল্পত্বাত্তৈ র্নোপলব্ধঃ। ইদানীং বহু
ত্বাৎ সাম্প্রতে ক্বপলব্ধঃ। অতএব
তস্য গতি রস্তীত্যবগতং। যদ্যেব
মপ্যনুপলব্ধোপি সৌরসিদ্ধান্তো-
ক্তত্বাদাগম প্রামাণ্যেন ভগণ পরি-
ধ্যাদিবৎ কথং তৈ র্নোক্তঃ। সত্যং
। অত্র গণিতস্কন্ধে উপপত্তিমানেবা
গমঃ প্রমাণং। তর্হি মন্দোচ্চ পাত
ভগণা আগম প্রামাণ্যেনৈব কথং
তৈ রুক্তা ইতি ন বক্তব্যং। যতো গ্র
হাণাং মন্দফলাভাবস্থানানি প্রত্য
ক্ষেণৈবোপলভ্যন্তে তান্যেব মন্দোচ্চ
স্থানানি যান্যেব বিক্ষেপাভাব স্থা-
নানি তান্যেব পাতস্থানানি কিন্তু
তেষাং গতি রস্তি নাস্তি বেতি সন্দি-
গ্ধং। তত্র মন্দোচ্চ পাতানাং গতি র-
স্তি। চন্দ্র মন্দোচ্চ পাতবদিত্যনুমা-
নেন সিদ্ধা। সা চ কিযতী তদুচ্যতে।
যৈ র্ভগণৈ রুপলব্ধি স্থানানি তানি
গণিতেনাগচ্ছন্তি। তদ্ভগণ সম্ভবা
বার্ষিকী দৈনন্দিনী বা গতি র্জ্ঞেযা।
নৈবং। যদ্যন্যৈ রপি ভগণৈ স্তান্যেব
স্থানানি আগচ্ছন্তি। তদা কতরস্যা
গতেঃ প্রামাণ্যং। সত্যং। তর্হি সা-
ম্প্রতোপলব্ধ্যনুসারিণী কার্য্যা গতি-
রঙ্গীকর্ত্তব্যা। যদা পুন মহতা কালে
ন মহদন্তরং ভবিষ্যতি তদা মহা-
মতিমন্তো ব্রহ্মগুপ্তাদীনাং সমানধ-
র্ম্মিণ এব উৎপৎস্যন্তে। তদুপলব্ধ্য-
নুসারিণীং গতি মুররী কৃত্য শাস্ত্রা-
ণি ব্যাকরিষ্যন্তি। অতএবাযং গণি-
ত স্কন্ধো মহামতিমদ্ভি দৃষ্টঃ সন্
অনাদ্যনন্তে কালেপি খিলত্বং ন
যাতি। অতো ঽস্য ক্রান্তি পাতস্য
ভগণাঃ কল্প ঽযুত ত্রযং তাবৎ সূর্য্য-
সিদ্ধান্তোক্তাঃ। তথা মুঞ্জালাদ্যৈর্য-
দযন চলন মুক্তং স এব ক্রান্তি পাতঃ।
তে গোঙ্গ ত্রু নন্দ গো চন্দ্রা উৎপদ্য-
ন্তে। অথচ তেষা যেষা ভগণা ভবন্তু
। যদা যে ঽংশা নিপুণৈ রুপলভ্যন্তে
তদা স এব ক্রান্তিপাত ইত্যর্থঃ।
তং বিলোমগং ক্রান্তিপাতং গ্রহে প্র-
ক্ষিপ্য ক্রান্তিঃ সাধ্যা ॥ * ॥ ইদা-
নীং বিক্ষেপপাতানাহ। এবং ক্রান্তি
বিমণ্ডল সংপাতাক্ষেপ পাতাঃ স্যু
। চন্দ্রাদীনাং ব্যস্তাঃ ক্ষেপানযনে তু
তে যোজ্যাঃ॥ মন্দ স্ফুটো দ্রাক্ প্র-
তিমণ্ডলে ঽে গ্রহো ভ্রমত্যত্র চ তস্য
পাতঃ। পাতেন যুক্তা গণিতাগতেন
মন্দ স্ফুটাৎ খেচরতঃ শরো ঽস্মাৎ
॥ পাতে ঽথবা শীঘ্রফলং বিলোমং

কৃত্বা স্ফুটাস্তেন যুতা ছুরো হতঃ। চন্দ্র-
স্য কক্ষা বলয়ে হি পাতঃ স্ফুটাদ্বিধো
র্মধ্যম পাত যুক্তাৎ॥ তথা ক্রান্তিবৃত্ত
বিমণ্ডলয়োঃ সম্পাতঃ ক্ষেপপাতঃ।
তং গ্রহে প্রক্ষিপ্য ক্ষেপঃ সাধ্যঃ।
এতদুক্তং ভবতি ক্রান্তিপাতঃ প্রসিদ্ধঃ
। যথা তং গ্রহে প্রক্ষিপ্য ক্রান্তিঃ সা-
ধ্যত এব ক্ষেপপাতং গ্রহে প্রক্ষিপ্য
ক্ষেপঃ সাধ্য ইত্যর্থঃ। অথ বিক্ষেপ
পাতো মন্দস্ফুটে যৎ প্রক্ষিপ্যতে
তৎকারণ মাহ। মন্দস্ফুটো দ্রাক্
প্রতিমণ্ডল ইত্যাদি। যতঃ শীঘ্র
প্রতিমণ্ডলে মণ্ডল স্ফুটগত্যা গ্রহো
ভ্রমতি তত্র চ বৃত্তে পাতঃ। অতো গ-
ণিতাগতপাতঃ মন্দস্ফুটে প্রক্ষিপ্য
ক্ষেপঃ সাধ্যতে। শেষং স্পষ্টার্থং
॥ ৯॥ ইদানীং জ্ঞ শুক্রযো র্বিশেষ
মাহ। যে চাত্র পাত ভগণাঃ কথি-
তা জ্ঞ ভৃগ্বো স্তে শীঘ্রকেন্দ্র ভগণৈ
রধিকা যতঃ স্যুঃ। স্বল্পাঃ সুখার্থ ম-
দিতা শ্চলকেন্দ্র যুক্তৌ পাতৌ তযোঃ
পঠিত চক্র ভবৌ বিধেয়ৌ॥ চলাদ্বি-
শোধ্যঃ কিল কেন্দ্র সিদ্ধ্যৈ কেন্দ্রে স
পাতে দৃঢ়চন্ত্র যোজ্যঃ। অত শ্চ
লাৎ পাত যুতাৎ জ্ঞ ভৃগ্বোঃ সুধী
ভি রাদ্যৈঃ শর সিদ্ধি রুক্তা॥ স্ফু-
টোন শীঘ্রোচ্চ যুতৌ স্ফুটৌ তযোঃ
পাতৌ ভগোলে স্ফুট এবপাতঃ। ন-
নু জ্ঞ শুক্রযোঃ শীঘ্রোচ্চ পাত যুতিং
কেন্দ্রং কৃত্বা যো বিক্ষেপ আনীতঃ স
শীঘ্রোচ্চ স্থান এব ভবিতুমর্হতি ন
গ্রহ স্থানে। যতো গ্রহো হন্যত্র বর্ত্ত-
তে। অত ইদ মনুপপন্ন মিব প্রতি-
ভাতি। তথা ব্রহ্মসিদ্ধান্ত ভাষ্যে।
জ্ঞ শুক্রযোঃ শীঘ্রোচ্চ স্থানে যাবান্
বিক্ষেপ স্তাবানেব যত্র তত্রস্থস্যাপি
গ্রহস্য ভবত্যত্রোপলব্ধিরেব বাসনা
। নান্যৎ কারণং বক্তুং শক্যত ইতি
চতুর্ব্বেদে নাপ্যনধ্যবসায়ো হত্র কৃতঃ
। অত্রোচ্যতে। যে হত্র জ্ঞ শুক্রযোঃ
পাত ভগণাঃ পঠিতা স্তে শীঘ্রকেন্দ্র
ভগণৈ র্যুতাঃ সন্ত স্তদ্ভগণা ভবন্তি।
তথাচ মাধবীয়ে সিদ্ধান্তচূড়ামণৌ
পঠিতাঃ। অতো হল্প ভগণভবঃ পাতঃ
স্বশীঘ্রকেন্দ্রেণ যুতঃ কার্য্যঃ। শীঘ্রো-
চ্চাদ্ গ্রহে শোধিতে শীঘ্রকেন্দ্রং তস্মি-
ন্ সপাতে ক্ষেপকেন্দ্র করণার্থং গ্রহঃ
ক্ষেপ্যঃ। অত স্তুল্যশোধ্য ক্ষেপক-
যো র্নাশে কৃতে শীঘ্রোচ্চ পাত যোগ
এবাবশিষ্যত ইত্যুপপন্নং। কিঞ্চ
। মন্দ স্ফুটোনং শীঘ্রোচ্চং প্রতিমণ্ড-
লে চলকেন্দ্রং তৎপাতে ক্ষেপ্তুং যুজ্য-
তে। এবং কৃতে সতি ক্ষেপ কেন্দ্রং
মন্দফলে নান্তরিতং স্যাৎ। তদঙ্গী-

কৃতং । ইতরকেন্দ্রস্যানুপপত্তেঃ । অতো মন্দফলং পাতে ব্যস্তং দেযং । যতো ঽনুপাত সিদ্ধং চলকেন্দ্রং মধ্যোনং শীঘ্রোচ্চং ভবতি । যত্তু ভগোলে ক্রান্তিবৃত্তং তৎ কক্ষা বৃত্তং তত্র যদ্বিমণ্ডলং তত্র স্ফুটগ্রহঃ । তৎ স্ফুট পাত যোগো হি বিক্ষেপ কেন্দ্র অতঃ স্ফুট পাতস্থানে সম্পাতং কৃত্বা তত ত্রিভে ঽন্তরে স্ফুটীকৃতৈঃ পরম ক্ষেপাংশৈঃ প্রাগুক্তরে দক্ষিণে চ বিন্যস্যং । তথা ন্যস্তে বিমণ্ডলে স্ফুট গ্রহস্থানে বিক্ষেপঃ স্ফুট বিক্ষেপেণ গণিতাগতে ন তুল্যো দৃশ্যতে নান্য থেত্যর্থঃ ॥ ❀ ॥ ইদানীং গ্রহগোলে বিশেষ মাহ । গ্রহস্য গোলে কথিতাপমণ্ডলং প্রকল্প্য কক্ষাবলয়ং যথোদিতং । নিবধ্য শীঘ্র প্রতিবৃত্ত মস্মিন্ বিমণ্ডলং তৎ পঠিতৈঃ শরাংশৈঃ । মধ্যোঽত্র পাতো দ্যুসদাং জ্ঞভৃগ্বোঃ স্বশীঘ্র কেন্দ্রেণ যুতৌ তু যোজ্যাঃ । ভগোল এব তাবদ্গ্রহ গোলঃ কল্প্যঃ তত্র স্ফুট এব পাতঃ । অথ যদি তদন্তর্গ্রহগোলোঽন্যো নিবধ্যতে তদা তত্র যথোক্ত বিষবদ্বৃত্তং ক্রান্তিবৃত্তঞ্চ বদ্ধা কক্ষামণ্ডলং প্রকল্প্য তত্র ছেদ্যকোক্ত বিধিনা শীঘ্র প্রতিমণ্ডলং বদ্ধা তত্র প্রতিমণ্ডলে গণিতাগতপাতং মেষাদে বিলোমং গণয়িত্বা তত্র চিহ্নং কার্য্যং । অথ ত্রিজ্যাব্যাসার্দ্ধমেবান্যদ্বৃত্তং রাশ্যঙ্কং বিমণ্ডলাখ্যং কৃত্বা তত্রাপি মেষাদে ব্যস্তং পাতাগ্রে চিহ্নং কৃত্বা প্রতিমণ্ডল বিমণ্ডলযোঃ সম্পাত চিহ্নে প্রথমং সম্পাতং । ততো ভার্দ্ধান্তরে দ্বিতীয়ং কৃত্বা পাতাদগ্রতঃ পৃষ্ঠতশ্চ ত্রিভে ঽন্তরে পরমবিক্ষেপাংশৈঃ পঠিতৈঃ প্রতিবৃত্তাদুত্তরে দক্ষিণে চ বিমণ্ডলং ন্যস্যং । তত্র মন্দ স্ফুটগৈর্ভ্রমণ পারমার্থিকো গ্রহো ভ্রমতি । অতো মেষাদে রনুলোম মন্দস্ফুটো বিমণ্ডলে দেযঃ । স তত্রস্থঃ প্রতিমণ্ডলাৎ যাবতান্তরেণ বিক্ষিপ্ত স্তাবান্ তৎ প্রদেশে বিক্ষেপঃ । যস্মিন্ বৃত্ত সংপাতস্থে গ্রহে বিক্ষেপাভাবঃ ত্রিভেঽন্তরে পরমো বিক্ষেপো মধ্যেঽনুপাতেন । অতো বৃত্তসম্পাতগ্রহযো রন্তরং জ্ঞেযং । তদন্তরং পাতগ্রহযোগে কৃতে ভবতি । পাতস্য বিলোমগত্বাৎ । সংযোগঃ শরাথং কেন্দ্রং । যদি ত্রিজ্যা তুল্যযা কেন্দ্র জ্যযা পরম শর স্তদাভীষ্টয়া কা ইতি ফলং প্রতি মণ্ডলবিমণ্ডলযো স্তির্য্যগন্তরং স্যাৎ । বিমণ্ডলস্থ গ্রহাদ্ভূমধ্যগং সূত্রং তদন্তরং গ্রহান্তরং সচ শীঘ্র কর্ণঃ ।

যদি ভূমধ্যাৎ কর্ণাগ্রে এতাবান্ বি-
ক্ষেপ স্তদা ত্রিজ্যাগ্রে কিযানিতি দ্বি-
তীয় ত্রৈরাশিকং। আদ্যে ত্রিজ্যা হ-
রো দ্বিতীয়ে গুণঃ। তয়ো নাশে কৃতে
কেন্দ্র জ্যাযাঃ পরম শর গুণাযাঃ
কর্ণো হরঃ ফলং কক্ষা বৃত্ত সূত্রযো
স্তির্য্যগন্তরং স্ফুটশরঃ॥ *॥ ইদানী
মহোরাত্র বৃত্তমাহ। ঈপ্সিত ক্রান্তি
তুল্য্যন্তরে সর্ব্বতো নাড়িকাখ্যাদ-
হোরাত্র বৃত্তাহ্বযং তত্র বদ্ধা। ঘটী
যাম্য সৌম্যাক্ষযেদন্য বিষ্কম্ভখণ্ডং দ্যু-
জীবা মতা। নাড়ীবৃত্তাদুত্তরতো দ-
ক্ষিণতো বা সর্ব্বত্রেষ্ট ক্রান্তি তুল্যান্ত-
রে যদ্বৃত্তং নিবধ্যতে তদহোরাত্র বৃ-
ত্তং তেন বৃত্তেন তস্মিন্ দিনে রবি
র্ভ্রমতীত্যর্থঃ। তস্য বৃত্তস্য ব্যাসা-
র্দ্ধং দ্যুজ্যা॥ * ॥ ইদানী মন্যদাহ।
অথ কল্প্যা মেষাদ্যা হ্যনুলোমং ক্রা-
ন্তি পাতাঙ্কাৎ এষা মেষাদীনাং দ্যু-
রাত্র বৃত্তানি বধ্নীযাৎ। নাড়ীবৃত্তো-
ভযতস্ত্রীণি ত্রীণি ক্রমোৎক্রমাত্তানি
। ক্রান্তি পাতাদারভ্য ত্রিংশৎ ত্রিং-
শদ্ভির্ভাগৈরন্যান্ মেষাদীন প্রকল্প্য
তদগ্রেষুক্ত বদহোরাত্র বৃত্তানি বধ্নী-
যাৎ। তানিচ নাড়ী বৃত্তোভযত স্ত্রীণি
ত্রীণি ভবন্তি। তান্যেব ক্রমোৎ ক্রম-
তঃ মানা[ং]শাকস্যাদ্যন্মার্লীনাঞ্চ

।*। ইদানীমস্যোপসংহারঃ। এষ
ভগোলঃ কথিতঃ খেচরগোলো
হ্যযমেব বিজ্ঞেযঃ। ইতি সিদ্ধান্ত
শিরোমণিঃ॥

ভগ্নং ত্রি পরাজিতং। ইতি হেম-
চন্দ্রঃ॥ ত্রুটিতং। চূর্ণিতং। ভাঙ্গা
ইতি ভাষা। যথা। চিরকালোষি-
তং জীর্ণং কীট নিষ্কুষিতং ধনুঃ। কিং
চিত্রং যদি রামেণ ভগ্নং ক্ষত্রিয়কা-
ন্তিকে॥ ইতি ভট্টিঃ॥

ভগ্নং ক্লী রোগবিশেষঃ। অথ ভগ্না-
ধিকারঃ। তত্র ভগ্নস্য ভেদমাহ।
ভগ্নং সমাসাদ্দ্বিবিধং হুতাশ কাণ্ডে
চ সন্ধাবপি তত্র সন্ধৌ। উৎপিষ্ট
বিশ্লিষ্ট বিবর্ত্তিতানি তির্য্যগ্গতং ক্ষি-
প্ত মধশ্চ ষড়্বা॥ ভগ্নমত্র ভাবার্থে
ক্ত প্রত্যয স্তেন ভগ্নং ভঙ্গঃ স চাত্র
বিশ্লেষো হভিপ্রেতঃ। তেন ভগ্নম-
ত্রাস্থিবিশ্লেষ লক্ষণং। সমাসাৎ
সংক্ষেপাৎ। হুতাশ হে অগ্নিবেশ
। যত শ্চরকে হগ্নিবেশস্য হুতাশে-
তি নামান্তর মুক্তং। কাণ্ডে সন্ধিপ-
র্য্যন্ত একখণ্ডে। অস্থিসন্ধৌ দ্বযো
রস্থ্নোঃ সন্ধান স্থানে। তত্র সন্ধৌ
উৎপিষ্টাদি ভেদৈঃ ষট্প্রকারং ভগ্নং
ভবতি। স্বল্প বক্তব্যত্বেন সন্ধিভগ্ন-
স্যাদৌ বিবরণং। উৎপিষ্টেত্যাদি।

অধঃ অধো ভগ্নং ॥ ❀ ॥ সন্ধি ভগ্নস্য সামান্যং লিঙ্গমাহ। প্রসারণাকুঞ্চন বর্ত্তনোগ্রা রুক্ স্পর্শ বিদ্বেষণ মেতদুক্তং। সামান্যতঃ সন্ধিগতস্য লিঙ্গমুৎপিষ্ট সন্ধেঃ শ্বযথুঃ সমন্তাৎ॥ বিশেষতো রাত্রি ভবা রুজশ্চ বিশ্লিষ্টকেতৌ চ রুজা চ নিত্যং। বর্ত্তনং পরিবর্ত্তনং ॥ ❀॥ উৎপিষ্টস্য লিঙ্গমাহ। উৎপিষ্টসন্ধেঃ উৎপিষ্টঃ দ্বাভ্যামস্থিভ্যাং পিষ্টঃ সন্ধি র্যস্য তস্য। সমন্তাৎ উভয ভাগদ্বযোঃ। বিশ্লিষ্টমাহ বিশ্লিষ্ট ইত্যাদি। তৌ উভযতঃ শোথৌ। রুজা চ নিত্যং সদা রুজাধিকা ভবতীত্যুৎপিষ্টাদ্ভেদঃ॥ ❀॥ বিবর্ত্তিততির্য্যগ্নতাক্ষিপ্তাধোগতানাহ। বিবর্ত্তিতেপার্শ্বরুজশ্চ তীব্রা স্তির্য্যগ্নতে তীব্রুরুজো ভবন্তি। ক্ষিপ্তেঽতিশূলং বিষমঞ্চ সক্থ্নোঃ ক্ষিপ্তে ত্বধো রুক্ বিঘটশ্চ সন্ধেঃ॥ বিবর্ত্তিতে সন্ধাবমুক্তে। অস্থিদ্বযোপরিবর্ত্তিতে পার্শ্বরুজঃ সন্ধিস্থিতাস্থিখণ্ডদ্বয পার্শ্বযো রুজঃ। তির্য্যগ্নতে সন্ধিগতে। একস্মিন্নস্থি সন্ধিস্থানং ত্যক্ত্বা তির্য্যগ্নতে ক্ষিপ্তে সক্থ্নোঃ ঊরুসন্ধ্যোঃ। একস্মিন্নস্থি পরস্যাস্থ্ উপরিগতে। সক্থ্নোঃ অতিশূলং তত্র বিষমং কদাচিদধিকং কদাচিন্ন্যনং। অধঃ ক্ষিপ্তে সন্ধিগতে একস্মিন্নস্থি অধোগতে। রুক্ সন্ধে র্বিঘটঃ বিঘটনঞ্চ ॥ ❀ ॥ কাণ্ডভগ্ন মাহ। ভগ্নঞ্চ কাণ্ডে বহুধা প্রযাতি বিশেষতো নামভিরেব তুল্যং। ভগ্নং কাণ্ডে কাণ্ড বিষযে বহুধা বহুভিঃ প্রকারৈঃ প্রযাতি। অত্র বহুবিধত্বং দ্বাদশ বিধত্বং বোদ্ধব্যং। বহুবিধস্য কাণ্ডভগ্নস্য পৃথক্ লক্ষণং নোক্তং কিন্তু কাণ্ড নামভি রেব তুল্যত্বং। কর্কটকাদি নামানুরূপ মেব লক্ষণং কিন্তু নামভিরেব বোদ্ধব্যং॥ ❀ ॥ তান্ প্রকারা নাহ। কাণ্ডে ত্বতঃ কর্কটকাশ্ব কর্ণৌ বিচূর্ণিতং পিচ্চিত মস্থিছল্লিতং। কাণ্ডেষু ভগ্নং হ্যতিপাতিতঞ্চ মজ্জাগতং বিস্ফুটিতঞ্চ বক্রং॥ ছিন্নং দ্বিধা দ্বাদশধা চ কাণ্ডে। অতঃ সন্ধি ভগ্নানন্তরং কাণ্ডে কাণ্ডভগ্নে তদাহ। কর্কটকঃ অস্থিবিশ্লেষ পূর্ব্বকো মধ্যে প্রোন্নতঃ পার্শ্বযো রবনতঃ কর্কট তুল্য রূপত্বাৎ কর্কটঃ। অশ্বকর্ণঃ অশ্বকর্ণবদ্বিপুলাস্থি নির্গমাদশ্বকর্ণঃ। বিচূর্ণিতং চূর্ণিত মস্থি তচ্চ শব্দ স্পর্শাভ্যাং বোদ্ধব্যং। পিচ্চিত মস্থি নিষ্পিষ্টং বহুশোথং। ছল্লিতং বিশ্লিষ্টং সম্যক্ স্রবং। কাণ্ডেষু ভগ্নং কাণ্ডভগ্নং। যদ্যপি কর্কটকাদি সর্ব্বমেব

কাণ্ডভগ্নং তথাপি ইযং কাণ্ডভগ্ন সং-
জ্ঞাবিশিষ্টা। অত্র ভগ্নং ভঙ্গঃ ত্রুটিঃ
তত্র সর্ব্বথা ত্রুটিতং পৃথগ্‌ভূতং ত্বচি
ছিন্নং যত্র কাণ্ডং তৎ কাণ্ডভগ্নং।
অতিপাতিতং অশেষেণ ছিত্ত্বা পা-
তিত মস্থি। মজ্জাগতং অস্থ্যবয-
বো হস্থিমধ্যে প্রবিশ্য মজ্জানং
গতং। বিস্ফুটিতং স্তোকবিদীর্ণং ব-
হুং স্থানং ত্যক্ত্বা স্ফুটীভূতং। ছিন্নং
দ্বিধা একং বিদীর্ণং সৎ লগ্নং অপরং
বিদীর্য্য দ্বিধাভূতং। দ্বাদশধা চ
কাণ্ডে। কাণ্ডে চ ভগ্নং দ্বাদশধেত্য
র্থঃ। তচ্চোক্তমেব কর্কটকাদি॥*॥
কাণ্ডভগ্নস্য সামান্যং লক্ষণমাহ।
শ্বয়থুবাঙ্গতা শোফঃ রুজাতিবৃদ্ধিঃ সং-
পীড্যমানে ভবতীহ শব্দঃ। স্পর্শা-
সহং স্পন্দনতোদ শূলং সর্ব্বাস্ব-
স্থাসু ন শর্ম্মলাভঃ॥ ভগ্নস্য কাণ্ডে
খলু চিহ্ন মেতৎ॥ স্পর্শাসহ মি
তি কাণ্ডভগ্নস্য বিশেষণং স্পন্দনং
নাড়ীনাং স্ফুরণং শূলং শূলেনেব
ব্যথা। রুজা সামান্যা পীড়া। স
র্ব্বাবস্থাসু শয়নাসনাদিষু॥*॥
কষ্টসাধ্যমাহ। অল্পাশিনো হনা-
ত্মবতো জন্তো র্বাতাত্মকস্য চ।
উপদ্রবৈ র্বা জুষ্টস্য ভগ্নং কৃচ্ছ্রেণ সি
ধ্যতি। অনাত্মবতো রোগপ্রতীকা-
রে যত্নরহিতস্য। বাতাত্মকস্য চ
বাতপ্রকৃতেঃ। উপদ্রবৈঃ জ্বরাধ্মান
মোহ মূত্র পুরীষ সঙ্গাদিভিঃ॥*॥
অসাধ্যমাহ। ভিন্নং কপালং ক-
ট্যাস্তু সন্ধিমুক্তং তথা চ্যুতং। জঘনং
প্রতিপিষ্টঞ্চ বর্জ্জয়েত্তচ্চিকিৎসকঃ॥
কপালং জানু নিতম্বাংস গণ্ড তালু
শঙ্খ বঙ্ক্ষণ শিরো হস্থীনি কপালানি
তথা চ্যুতং তথা ক্ষিপ্তং। প্রতিপিষ্টং
উৎপিষ্টং॥*॥ পুন রসাধ্য মাহ।
অসংশ্লিষ্ট কপালঞ্চ ললাটে চূর্ণিত-
ঞ্চ যৎ। ভগ্নং গুদে স্তনে পৃষ্ঠে শঙ্খে
মূর্দ্ধনি বর্জ্জয়েৎ॥ অসংশ্লিষ্ট কপা-
লমিতি ভগ্নবিশেষণং। স্তনে স্তনযো
রন্তরে উরসি। মূর্দ্ধনি চূড়াস্থানে
॥*॥ অপর মপ্যসাধ্য মাহ।
সম্যক্ সংহিত মপ্যস্থি দুর্ন্যাসাদ্দুষ্ট
বন্ধনাৎ। সংক্ষোভাদ্বাপি যদ্গচ্ছেদ্বি
ক্রিয়াং তচ্চ বর্জ্জয়েৎ॥ সম্যক্ সংহি-
ত মপি সম্যগ্যোজিত মপি অস্থি দু-
র্ন্যাসাৎ দুঃস্থাপনাৎ সংন্যস্ত মপি
দুষ্টবন্ধনাৎ সুবদ্ধমপি সংক্ষোভাৎ
অভিঘাতাদিনা সঞ্চলনাৎ যদ্বি-
ক্রিয়াং গচ্ছেৎ বিকৃতং ভবতি তদ্বর্জ্জ-
য়েৎ॥*॥ অস্থিবিশেষেণ ভগ্ন
বিশেষ মাহ। তরুণাস্থীনি নম্যন্তে
ভিদ্যন্তে নলকানি তু। কপালানি

ন্থি ভজ্যন্তে স্ফুটন্তি রুচকানি চ ॥ ত-রুণাস্থীনি ঘ্রাণকর্ণাক্ষি গুদেষু কোমলাস্থীনি নম্যন্তে বক্রীভবন্তি। তেনাত্র বক্রতা লক্ষণং ভগ্নং। নলকানি নলাদীনি নাড়ীবৎ সরন্ধ্রাণ্যস্থি পর্ব্বাণি ভিদ্যন্তে অস্থ্যন্তরানুপ্রবেশাদ্বিদীর্য্যন্তে। কপালানি জানু নিতম্বাংস গণ্ড তালু শঙ্খ শিরো হস্তানি বিভজ্যন্তে স্ফুটন্তি রুচকানি দন্তাঃ স্ফুটন্তি ত্রুটন্তি। অস্থীনি তরুণা নলক কপাল রুচক বলয ভেদাৎ পঞ্চবিধানি। তত্র রুচকানি চেতি। চকারাদ্বলযান্যপি ত্রুটন্তীতি বোদ্ধব্যং। পাণ্যোঃ পার্শ্বযুগে পৃষ্ঠে বক্ষো জঠর পাযুষু। পাদযোরপি চাস্থীনি বলযানি বভাষিরে ॥ * ॥ অথ ভগ্নস্য চিকিৎসা। ভগ্নে লেপায মঞ্জিষ্ঠা মধুকঞ্চাম্লপেষিতং। শতধৌত ঘৃতোন্মিশ্রশালিপিষ্টঞ্চ লেপনং। লেপাৎ পিষ্টক লবণৈ রম্লীকা ফল রসাভ্যাং বা। সদ্যোভিঘাতজনিতা রাগরুজাশ্বযথবঃ প্রশাম্যন্তি। সঘৃতঞ্চাস্থিসংহারং লাক্ষা গোধূম মর্জ্জুনং। সন্ধি ভগ্নে হস্থিসম্ভগ্নে পিবেৎ ক্ষীরেণ বা পুনঃ ॥ ঘৃতেন পিবেৎ ক্ষীরেণ বেত্যর্থঃ। অস্থিসংহারঃ হড়সিংহার ইতি লোকে ॥ রসোন মধু লাক্ষাজ্য সিতা কল্কং লমশ্নুতং। ছিন্ন ভিন্ন চ্যুতাস্থ্নাঞ্চ সন্ধান মচিরাদ্ভবেৎ ॥ লাক্ষাস্থিসংহৃৎ কজ্জভাশ্বগন্ধা চূর্ণীকৃতা নাগবলা পুরশ্চ। সংভগ্ন মুক্তাস্থি রুজো নিহন্যাদঙ্গানি কুর্য্যাৎ কুলিশোপমানি ॥ অস্থি সংহৃৎ হরসিংহার। লাক্ষাদিগুগ্গুলুঃ ॥ * ॥ মাংস মাংসরসঃ ক্ষীরং সর্পির্যূষঃ কৌযজঃ। বৃংহণঞ্চান্ন পানঞ্চ দেযং ভগ্নায জানতা ॥ লবণং কটুকং ক্ষারং মদ্যং মৈথুন মাতপং। রুক্ষমন্নশনঞ্চাপি ভগ্নঃ সেবেত ন ক্বচিৎ ॥ ইতি ভাবপ্রকাশে ভগ্নাধিকারঃ ॥

ভগ্নপাদর্ক্ষং স্ত্রী পুষ্করাখ্যনক্ষত্রষট্কং। যথা। পুনর্ব্বসূত্তরাষাঢা কৃত্তিকোত্তরফল্গুনী। পূর্ব্বভাদ্রা বিশাখাশ্চ ষড়েতে পুষ্করাঃ স্মৃতাঃ ॥ ভগ্নপাদর্ক্ষ সংযোগাৎ দ্বিতীযা দ্বাদশী যদি। সপ্তমী চার্ক মন্দারে জাযতে জারজো ধ্রুবং ॥ ইতি জ্যোতিস্তত্ত্বং ॥

ভগ্নপৃষ্ঠঃ পুং সম্মথঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ মুটিতমেরুদণ্ডঃ। যথা। ভগ্নপৃষ্ঠ কটি গ্রীবং স্তব্ধদৃষ্টি হ্যধোমুখং। কষ্টেন লিখিতং পুস্তং যত্নেন পরিপালযেৎ ॥ ইতি প্রাচীনবাক্যং

ভগ্নসন্ধিঃ পুং শরীরস্য সন্ধিস্থান ভঙ্গ রোগবিশেষঃ। তস্যৌষধং যথা। অভয়া ত্রিফলা ব্যোষঃ সর্ব্বৈরেভিঃ সমীকৃতৈঃ। তুল্যো গুগ্‌গুলুনা যোজ্যো ভগ্নসন্ধি প্রসারকঃ॥ ইতি গারুড়ে ১৭৫ অধ্যায়ঃ॥

ভগ্নসন্ধিকং ক্লী ঘোলং। ইতি শব্দচন্দ্রিকা॥

ভগ্নাত্মা পুং চন্দ্রঃ। ইতিশব্দচন্দ্রিকা

ভগ্নাশঃ ত্রি হতাশঃ। দীর্ঘতৃষ্ণাভ। যথা। অতিথির্যস্য ভগ্নাশো গৃহাৎ প্রতি নিবর্ত্ততে। স তস্মৈ দুষ্কৃতং দত্ত্বা পুণ্যমাদায় গচ্ছতি॥ ইত্যাহ্নিকতত্ত্ব॥

ভগ্নী স্ত্রী ভগিনী। ইতি দ্বিরূপকোষঃ॥

ভঙ্কারী স্ত্রী দংশঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভঙ্ক্তা ত্রি ভঙ্গকর্ত্তা। ভঞ্জধাতোঃ কর্ত্তরি তৃন্‌প্রত্যয়েন নিষ্পন্নঃ॥

ভঙ্গঃ পুং তরঙ্গঃ। ইত্যমরঃ॥ পরাজয়ঃ॥ ভেদঃ॥ রোগবিশেষঃ। ইতি মেদিনী॥ কৌটিল্যং॥ ভয়ং॥ বিচ্ছিত্তিঃ। ইতি হেমচন্দ্রঃ॥ রোগমাত্রং। ইতি রাজনির্ঘণ্টঃ॥ গমনং॥ জলনির্গমঃ। ইত্যজয়পালঃ॥

ভঙ্গবাসা স্ত্রী হরিদ্রা। ইতি শব্দরত্নাবলী॥

ভঙ্গসার্থঃ ত্রি জটিলঃ। ইতি হারাবলী॥

ভঙ্গা স্ত্রী বৃক্ষঃবিশেষঃ। তৎপর্য্যায়ঃ। মাতুলানী ২। ইত্যমরঃ॥ দ্বে ভঙ্গাযা ভঙ্গা কাশ্মীরেষু স্বনামখ্যাতা। ইতি সুভূত্যাদয়ঃ। ইতি ভরতঃ॥ এতস্যাঃ ফলং কলায়পরিমাণমিতি সর্ব্বস্বং। ইতি সারসুন্দরী॥ শণাখ্যশস্যং। যথা। ভঙ্গা শস্যে শণাহ্বয়ে। ইতি মুকুটধৃতরুদ্রঃ॥ *॥ ত্রিবৃতা। তেউড়ী ইতি ভাষা। যথা। ত্রিভণ্ডী রেচনী ভঙ্গা কলিঙ্গা পরিপাকিনী। ইতি শব্দচন্দ্রিকা॥ ঔষধবিশেষঃ। ভাঙ্ ইতি সিদ্ধি ইতিচ ভাষা। যথা। ত্রৈলোক্যবিজয়া ভঙ্গা বিজয়েন্দ্রাশনং জয়া। ইতিচ শব্দচন্দ্রিকা॥ অস্যাগুণাঃ বিজয়া শব্দে দ্রষ্টব্যাঃ॥

ভঙ্গানঃ পুং মৎস্যবিশেষঃ। ভাঙ্গন ইতি ভাষা। তৎপর্য্যায়ঃ। দীর্ঘজঙ্গলঃ ২। ইতি শব্দমালা॥

ভঙ্গারী স্ত্রী দংশঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভঙ্গিঃ স্ত্রী বিচ্ছেদঃ॥ কৌটিল্যভেদঃ। ইত্যমরভরতৌ॥ বিন্যাসঃ। ইতি

কলিঙ্গঃ॥ কল্লোলঃ। ইত্যকণদত্তঃ॥ ॥ ভঙ্গঃ। ইত্যন্যে॥ ব্যাজঃ॥ ছলনিভঃ। ইতি ভরতঃ॥

ভঙ্গিমা পুং ভঙ্গিঃ। যথা। অধরে কজ্জলং চারু দৃশো তাম্বুল রঙ্গিমা। প্রাণনাথ কিমেতত্তে বেশ বিন্যাস ভঙ্গিমা॥ ইতি কাব্যচন্দ্রিকা॥

ভঙ্গী স্ত্রী ভঙ্গিঃ। যথা। জানামি ম্লান মলসাঙ্গি বচো বিভঙ্গীং ভঙ্গীশতং নয়নয়োরপি চাতুরীঞ্চ। আভীর নন্দন মুখাম্বুজ সঙ্গ শংসী বংশীরবো যদিন মা মবশীকরোতি॥ ইত্যুদ্ভটঃ॥

ভঙ্গুরঃ ত্রি জটিলঃ। ইতিজটাধরঃ॥

ভঙ্গুরঃ পুং নদ্যাবক্রঃ। নদীরবাঁক ইতি ভাষা। ইতি শব্দমালা॥

ভঙ্গুরা স্ত্রী অতিবিষা॥ প্রিয়ঙ্গুঃ। ইতি রাজনির্ঘণ্টঃ॥

ভঙ্গ্যং ক্লী ভঙ্গাক্ষেত্রং। তৎপর্য্যায়ঃ। ভাঙ্গীনং ২। ইত্যমরভরতৌ॥

ভচক্রং ক্লী রাশিচক্রং। যথা। ভ্রমাবর্ত্তো ভচক্রেঽস্মিন্ ধ্রুবো নাভৌ ব্যবস্থিতঃ। আরাচক্রে ত্রিন্দু ভৌমৌ শুক্র জীব শনৈশ্চরাঃ॥ রাহুঃ কেতুর্গস্ত্যশ্চ নক্ষত্রাণ্যথ রাশয়ঃ। যদা দিক্ষু চ অষ্টাসুমেরো ভূগোলকোদ্ভবা॥ ছায়াভবেত্তদা রাত্রিঃ স্যাচ্চ তদ্বিরহাদ্দিনং। সূর্য্যেন্দো কারাহু গোলক ছায়য়া ভবেৎ॥ অন্যোন্যযো স্তযো রেব ব্যাপয়োরেব কারকণাৎ। গ্রাসমোক্ষৌ তু জায়েতে তত্রাতঃ পূর্ব্বপশ্চিমৌ॥ তত্র পুণ্য কলাভাগঃ কৃতো ব্রহ্মণা স্ত বিষ্ণুনা। ইত্যাদ্যে বহ্নি পুরাণে গণভেদ নামাধ্যায়ঃ॥*॥ অথ ভচক্র ভ্রমণ ব্যবস্থা মাহ। নিরক্ষদেশে ক্ষিতি মণ্ডলোপগৌ ধ্রুবৌ নরঃ পশ্যতি দক্ষিণোত্তরৌ তদাশ্রিতং খে জল যন্ত্রবৎ সদা ভ্রমদ্ভচক্রং নিজ মস্তকোপরি॥ উদগ্দিশং যাতি যথা যথা নর স্তথা তথা খান্নত মৃক্ষ মণ্ডলং। উদগ্ধ্রুবং পশ্যতি চোন্নতং ক্ষিতে স্তদন্তরে যোজনজাঃ পলাশকাঃ॥ যোজন সংখ্যা ভাংশৈঃ ৩৬০ গুণিতা নপরিধি হৃতা ৪৯৬৭ ভবন্ত্যংশাঃ। ভূমৌ কক্ষায়াং বা ভাগেভ্যো যোজনানি চ ব্যস্তং॥ ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

ভজ ঞ ঔ ভাগসেবয়োঃ। ইতি কবিকল্পদ্রুমঃ॥ ঞ বিভজতি বিভজতে ধনং ভ্রাতা। ঔ অভাক্ষীৎ কৃষ্ণং সাধুঃ। ইতি দুর্গাদাসঃ॥

ভজ ক পাকে। ইতি কবিকল্পদ্রুমঃ॥ ক ভাজয়তি। বিশ্রাণনে ইতি প্রাঞ্চঃ

বিশ্রাণনং দানং। ইতিদুর্গাদাসঃ॥ ॥
জ ই ক ভাসি। ইতি কবিকল্প-
দ্রুমঃ॥ ইক ভজ্যতি। ভাসি দী-
প্তৌ। ইতিদুর্গাদাসঃ॥
ভজন্ ত্রি ভাগকর্ত্তা॥ সেবাকর্ত্তা।
ইতি ভজধাতোঃ কর্ত্তরি শতৃপ্রত্য
যেন নিষ্পন্নং॥
ভজনং ক্লী ভাগঃ॥ সেবা। ইতি
ভজধাতো র্ভাবে অনট্ প্রত্যযেন
নিষ্পন্নং॥ দারান্তেয়ে ভজন সহাযাঃ
পুত্রাস্তে যে তদ্ভজনকাযাঃ। ধনমপি
তদ্বদ্ধরি ভজনার্থং নোচেদেতৎ স-
র্ব্বং ব্যর্থং॥ ইতি মোহমুদ্গরঃ॥
ভজমানঃ ত্রি ন্যায্যং। ন্যাযাগত
দ্রব্যাদিঃ। ইত্যমরঃ॥ ভাগকর্ত্তা
॥ সেবাকর্ত্তা। ইতি ভজধাতোঃ ক-
র্ত্তরি শানচ্ প্রত্যযেন নিষ্পন্নং॥
ভঞ্জকঃ ত্রি ভঞ্জনকর্ত্তা। ভনক্তি যঃ
ইত্যর্থে ভঞ্জধাতোঃ কর্ত্তরি ণক প্র-
ত্যযেন নিষ্পন্নঃ॥
ভঞ্জন্ ত্রি বর্ত্তমানভঞ্জনাশ্রযঃ। ইতি
ভঞ্জধাতোঃ কর্ত্তরি শতৃ প্রত্যযেন
নিষ্পন্নং॥
ভঞ্জনং ক্লী মোটনং। ইতিভঞ্জধাতো
র্ভাবে হনট্ প্রত্যযেন নিষ্পন্নং॥
ভঞ্জনকঃ পুং মুখরোগবিশেষঃ।
তস্য নিদানাদি যথা। বক্ত্রং বক্রং
ভবেদ্যস্য দন্তভঙ্গশ্চ জাযতে। ক-
ফ বাত কৃতো ব্যাধিঃ স ভঞ্জনক
সংজ্ঞিতঃ॥ ইতি মাধবকরঃ॥
ভঞ্জকঃ পুং দেবজগোড্ডূতরুঃ।
তৎপর্য্যাযঃ। কাচিমঃ ২। ইতি
ত্রিকাণ্ডশেষঃ॥
ভঞ্জা স্ত্রী অন্নপূর্ণা। যথা। ভীতিহা
ভযহন্ত্রী চ ভাবনাবশবর্ত্তিনী।
ভীমাঙ্গবাসিনী ভঞ্জা ভিত্তিসংবি-
ত্তি বর্দ্ধিনী॥ ইতি রুদ্রযামলে সপ্ত-
বিদ্যারহস্যং॥
ভট ০ ভৃতৌ। ইতি কবিকল্পদ্রুমঃ॥
ভৃতিরিহ পোষণং। কর্ম্মমূল্য মি-
তি গোবিন্দভট্টঃ॥ ভটতি ভৃত্যং
স্বামী। ইতি দুর্গাদাসঃ॥
ভট ম ভাষণে। ইতি কবিকল্পদ্রুমঃ॥
ম ভটযতি। ভাষণং কথনং। ইতি
দুর্গাদাসঃ॥
ভটঃ পুং যোদ্ধা। ইত্যমরঃ॥ ম্লেচ্ছ-
ভেদঃ। ইতি হেমচন্দ্রঃ॥ বীরঃ॥
পামরবিশেষঃ। ইতি মেদিনী॥
রজনীচরঃ। ইতি শব্দরত্নাবলী॥
বর্ণসঙ্করবিশেষঃ। যথা। বর্দ্ধকা-
রাদ্ভটো জাতো নটিক্যাং বরবাহ-
কঃ। ইতি পরাশরপদ্ধতিঃ॥
ভটা স্ত্রী ইন্দ্রবারুণী। রাখালশসা
ইতি ভাষা। ইতি রত্নমালা॥

ভটিত্রং ক্লী শূলপক্বমাংসাদি। কাবাব ইতি পারস্যভাষা। ইত্যমরঃ॥

ভট্টঃ পুং জাতিবিশেষঃ। ভাট ইতি ভাষা। তস্যোৎপত্তি র্যথা। বৈশ্যায়াং শূদ্রবীর্য্যেণ পুমানেকো বভূবহ। স ভট্টো বাবদূকশ্চ সর্ব্বেষাং স্তুতিপাঠকঃ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১০ অধ্যায়ঃ॥ অপিচ। ক্ষত্রিয়াদ্বিপ্রকন্যায়াং ভট্টো জাতো হনুবাচকঃ। ইতি যুধিষ্ঠির পরশুরাম সংবাদে জাতিসঙ্কর লক্ষণং॥ শিবিরান্তিকে রাজ্ঞা তস্য বাসো দেয়ঃ। যথা। ব্রাহ্মণং ক্ষত্রিয়ং বৈশ্যং সহৃদং গণকং শুভং। ভট্টং বৈদ্যং পুস্তকারং স্থাপয়েৎ শিবিরান্তিকে॥ ইতি ব্রহ্ম বৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১০১ অধ্যায়ঃ॥

ভট্টাচার্য্যঃ পুং তুতাতভট্টমতং মীমাংসাশাস্ত্রং উদয়নাচার্য্যমতং ন্যায়শাস্ত্রং এতদুভয় শাস্ত্রবেত্তা। এতদুভয়মতং জানাতি যঃ ইত্যর্থে চযেকাদিতি কারকাৎ কর্ত্তরি অণিতা ক্ষ প্রত্যযেন নিষ্পন্নঃ॥

ভট্টারঃ ত্রি পূজ্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভট্টারকঃ পুং নাট্যোক্তৌ রাজা। ইত্যমরঃ॥ দেবঃ॥ তপোধনঃ। ইতি মেদিনী॥ পূজ্যে ত্রি ইতি জটাধরঃ॥

ভট্টারকবারঃ পুং রবিবারঃ। যথা। সখে স্নায়ু নির্ম্মিত পাশা স্তদদ্য ভট্টারকবারে কথমেতান্ দন্তৈঃ স্পৃশামি। ইতি হিতোপদেশে ১ পরিচ্ছেদে কাকং প্রতি জম্বুকবাক্যং॥

ভট্টিঃ পুং স্বনামখ্যাত রামকথাশ্রয় মহাকাব্যং। তত্তু বলভীস্থস্তব্য শ্রীস্বামিসূনু ভট্টি মহাব্রাহ্মণ মহাবৈয়াকরণেন কৃতং। ইতি জয়মঙ্গলকৃতা টীকা॥ এতৎকাব্যং ভর্ত্তৃহরিণা কৃত মিতি ভরত মল্লিকেন লিখিতং॥

ভট্টিনী স্ত্রী নাট্যোক্তৌ অকৃতাভিষেকা রাজপত্নী। ইত্যমরঃ॥ ব্রাহ্মণ ভার্য্যা। ইতি মেদিনী॥

ভড ইড বাচি। ইতি কবিকল্পদ্রুমঃ॥ পরিভাষণ ইতি গোবিন্দভট্টঃ॥ পরিহাস ইতি চতুর্ভুজঃ॥ ই ভণ্ড্যতে উ ভণ্ডতে শিষ্টং লোকঃ। ইতি দুর্গাদাসঃ॥

ভড ই ক শিবে। ইতি কল্পদ্রুমঃ॥ শিবং কল্যাণক্রিয়া বেদেষ্বেব। প্রতারণে প্রসিদ্ধো হয়ং। ইক ভণ্ড-

বতি শুতারকো মুক্ষং ধনদানাঙ্গী-
কারেণ। ইতি দুর্গাদাসঃ ॥
ভড়ঃ পুং বর্ণসঙ্করজাতিবিশেষঃ।
স তু লেটাৎ তীবর কন্যাযাং জাতঃ
। যথা। লেট স্তীবর কন্যাযাং জন-
যানাস ষণ্‌সুতান্। মাল্লং মল্লং মা-
তরঞ্চ ভড়ং কোলঞ্চ কন্দরং॥ ইতি
ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১০ অধ্যাযঃ॥
ভড়িলঃ পুং সেবকঃ॥ শূরঃ। ইত্যু-
ণাদিকোষঃ॥
ভণ ধ্ব শব্দে। ইতি কবিকল্পদ্রুমঃ॥
ধ্ব অ ী ভণৎ অবভাণৎ সচেহ
ব্যক্তবাক্যং। শ্রীজযদেবকৃত হরি
সেবং ভণতি পরম রমণীযং। ইতি
দুর্গাদাসঃ॥
ভণিতং ত্রি শব্দিতং। কথিতং।
যথা। শ্রীজযদেব ভণিত মিদমদ্ভুত
কেশব কেলি রহস্যং। ইতি গীত-
গোবিন্দঃ॥
ভণিতিঃ স্ত্রী বাক্যং। ইতি ভূরিপ্র-
যোগঃ ত্রিকাণ্ডশেষশ্চ॥
ভণ্টাকী স্ত্রী বার্ত্তাকী। ইত্যমরঃ॥
বৃহতী। ইতি রত্নমালা॥
ভণ্টুকঃ পুং শ্যোনাকবৃক্ষঃ। ইতি
রত্নমালা॥ কুত্রচিৎ ভণ্ডুকোপি
পাঠঃ॥
ভণ্ডঃ পুং অশ্লীলভাষী। ভাঁড় ইতি
ভাষা। ইতি সংক্ষিপ্তসারোণাদি
বৃত্তিঃ॥ তৎপর্য্যাযঃ। চাটুপটুঃ ২।
ইতি ভূরিপ্রযোগঃ॥
ভণ্ডকঃ পুং খঞ্জনপক্ষী। ইতি জটা-
ধরঃ॥
ভণ্ডনং ক্লী কবচং॥ যুদ্ধং॥ খলী-
কারঃ। ইতি মেদিনী॥
ভণ্ডহাসিনী স্ত্রী গণিকা। ইতি
শব্দরত্নাবলী॥
ভণ্ডিঃ স্ত্রী বীচিঃ। ইতি হারাবলী॥
ভণ্ডিকা স্ত্রী মঞ্জিষ্ঠা। ইতি শব্দ-
রত্নাবলী॥
ভণ্ডিরঃ পুং শিরীষবৃক্ষঃ। যথা।
ভণ্ডিলো ভণ্ডিরো নেমীতি ভরত-
ধৃত বাচস্পতিঃ॥
ভণ্ডিলঃ পুং শিরীষবৃক্ষঃ। ইত্য-
মরঃ॥
ভণ্ডিলঃ ত্রি শুভঃ॥ দূতঃ। ইত্যু-
ণাদিকোষঃ॥ শিল্পী। ইতি সংক্ষি-
প্তসারোণাদিবৃত্তিঃ॥
ভণ্ডী স্ত্রী মঞ্জিষ্ঠা। ইত্যমরঃ॥
শিরীষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
ভণ্ডীতকী স্ত্রী মঞ্জিষ্ঠা। ইতি ভাব-
প্রকাশঃ॥
ভণ্ডীরঃ পুং সমষ্ঠিলক্ষুপঃ। তণ্ডু-
লীযশাকঃ॥ শিরীষবৃক্ষঃ। ইতি
রাজনির্ঘণ্টঃ॥

ভণ্ডীরলতিকা স্ত্রী মঞ্জিষ্ঠা। ইতি রাজনির্ঘণ্টঃ ॥

ভণ্ডীরী স্ত্রী মঞ্জিষ্ঠা। ইত্যমরঃ ॥

ভণ্ডীলঃ পুং মঞ্জিষ্ঠা। ইতি শব্দরত্নাবলী ॥

ভণ্ডুকঃ পুং মৎস্যবিশেষঃ। ভাঙ্গর ইতি ভাষা। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। বৃষ্যত্বং। শ্লেষ্মকরত্বং। গুরুত্বং। বিষ্টম্ভিত্বং। রক্তপিত্তহরত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

ভণ্ডুকঃ পুং শ্যোনাকবৃক্ষঃ। ইতি রত্নমালা ॥

ভদ ই ঙ হর্ষে॥ প্রীতৌ॥ শুভে। ইতি কবিকল্পদ্রুমঃ॥ ই ভন্দ্যতে। ঙ ভন্দতে পণ্ডিতঃ সদা। ইতি দুর্গাদাসঃ॥

ভঁদ ই ক শুভে। ইতি কবিকল্পদ্রুমঃ ॥ ইক ভন্দয়তি। শুভং কল্যাণক্রিয়া। ইতি দুর্গাদাসঃ॥

ভদন্তঃ পুং সৌগতাদিবুদ্ধঃ। ইতি হেমচন্দ্রঃ॥ মাযাদেবী সুতঃ॥ সুতেজঃ॥ পূজিতে ত্রি। ইত্যুণাদিকোষঃ॥

ভদাকঃ পুং ক্লী মঙ্গলং। ইত্যুণাদিকোষঃ॥

ভদ্রং ক্লী মঙ্গলং॥ মুস্তং॥ কাঞ্চনং। ॥ ইতি মেদিনী॥

ভদ্রং ক্লী স্ত্রী করণবিশেষঃ। হস্ত মেদিনী॥ তত্তু বিষ্টিভদ্রাত্বেন প্রসিদ্ধং অশ্বভদং। ইতি জ্যোতিষং॥

ভদ্রঃ পুং শিবঃ॥ খঞ্জরীটঃ॥ বৃষভঃ॥ কদম্বকঃ॥ করিজাতিবিশেষঃ। ইতি মেদিনী॥ নবশুক্লবলাস্তর্গত বলদেবঃ। রামচরঃ॥ সুমেরুঃ। ইতি হেমচন্দ্রঃ॥ সুহী। ইতি রাজনির্ঘণ্টঃ॥ সাধ্যমৌলিকানাং পদ্ধতিবিশেষঃ। যথা। বিষ্ণু র্নাগঃ খিল পিল গৃত ইন্দো গুপ্তঃ পালো ভদ্রঃ। ইত্যাদি কুলাচার্য্যকারিকা॥

ভদ্রঃ ত্রি শ্রেষ্ঠঃ॥ সাধুঃ। ইতি মেদিনী॥

ভদ্রকং ক্লী ভদ্রমুস্তকং। ইতি শব্দমালা॥ মনোজ্ঞে ত্রি। ইতি ত্রিকাণ্ডশেষঃ॥

ভদ্রকঃ পুং দেবদারু। ইতি শব্দরত্নাবলী॥

ভদ্রকণ্টঃ পুং গোক্ষুরঃ। ইতি রাজনির্ঘণ্টঃ॥

ভদ্রকালী স্ত্রী গন্ধোলী॥ কাত্যায়নী। ইতি মেদিনী॥ তস্যা উৎপত্তি র্যথা। শ্রীঔর্ব্ব উবাচ। শৃণু ত্বং নৃপ শার্দূল ভদ্রকালী যথা পুরা। প্রাদুর্ভূতা মহাভাগা মহিষেণ

ষাঁদেবত্ব। মহিষাসুর এবাসৌ নিদ্রা যাং নিশিং পর্ব্বতে ॥ স্বপ্নং প্রদদর্শে বীরো দারুণং ঘোরদর্শনং। মহামায়া ভদ্রকালী ছিত্ত্বা খড়্গেন কাশরং ॥ পপৌ তস্য চ রক্তানি ব্যাদিতাস্যাতিভীষণা। ততঃ প্রাত র্ভয়যুতঃ স দৈত্যো মহিষাসুরঃ॥ তামেব পূজযামাস সুচিরং সানুগ স্তদা। আরাধিতা তদা দেবী মহিষেণাসুরেণ বৈ ॥ প্রাদুর্ভূতা ভদ্রকালী ভুজৈঃ ষোড়শভি যুতা। ততঃ প্রণম্য মহিষো মহামায়াং জগন্ময়ীং॥ উবাচেদং বচো নম্রমূর্ত্তি র্ভক্তিযুতো হসুরঃ। মহিষ উবাচ। দেবি খড়্গেন সংছিদ্য শোণিতানি শিরো মম। ত্বযা ভুক্তানি দৃষ্টানি ময়া স্বপ্নে সুনিশ্চিতং ॥ অবশ্যং তত্ত্বযা কার্য্যং ময়া জ্ঞাতং প্রমাণতঃ।এতদ্রুধির পানং মে তত্রৈকং দেহি মে বরং ॥ বধ্য স্তবাহং নাত্রাস্তি সংশয়ঃ পরমেশ্বরি। মমাপি তত্র নো দুঃখং নিয়তিঃ কেন লঙ্ঘ্যতে ॥ কিন্তু ত্বয়ৈব সহিতঃ শম্ভু রারাধিতঃ পুরা। মম পিত্রা মদর্থেন জাতঃ পশ্চাদহং ততঃ॥ ময়াপ্যারাধিতঃ শম্ভুঃ প্রাপ্তা শ্চেষ্টা স্তথাবরাঃ। মন্বন্তরত্রয়ং যাবদাসুরং রাজ্য মুত্তমং ॥ অকণ্টকং ময়া ভুক্ত মনুতাপো ন বিদ্যতে। কাত্যায়নেন মুনিনা শপ্তো হহংশিষ্য কারণাৎ॥ সীমন্তিনী বিনাশং তে করিষ্যতি ন সংশয়ঃ। পুরা মুনিং তপস্যন্তং রৌদ্রাশ্বং নামচোত্তমং ॥ মুনেঃ কাত্যায়নাখ্যস্য শিষ্যং হিমবদন্তিকে। দিব্য স্ত্রীরূপ মতুলং কৃত্বাহং কৌতুকাত্তদা ॥ ময়া সংমোহিতো বিপ্রোহত্যজন্মূঢ় স্তদা তপঃ। ন দূরাৎ সংস্থিতেনাহং মুনিনা কাত্যসূনুনা॥ জ্ঞাত্বা মায়াং তদা শপ্তঃ শিষ্যার্থে ক্রোধ বহ্নিনা। যস্মাত্ত্বয়া মে শিষ্যো হয়ং মোহিত স্তপস শ্চ্যুতঃ ॥ কৃত স্ত্বয়া স্ত্রীরূপেণ তত স্ত্বাং স্ত্রী হনিষ্যতি। ইতি মাং শপ্তবান্ পূর্ব্বং মুনিঃ কাত্যায়নঃ পুরা ॥ তস্য শাপস্য কালো হয় মাগত্য সমুপস্থিতঃ। দেবেন্দ্রত্বং ময়া প্রাপ্তং ভুক্তং ত্রিভুবনং সমং ॥ কিঞ্চিন্নশোচ্যং তত্রাস্তি বাঞ্ছনীয়ং হি যন্ময়া।তস্মাত্ত্বাং বৈ প্রপন্নোহহং প্রার্থ্যংশেষং হি যন্ময়া॥ তদ্দেহি দেবি দুর্গে ত্বং ভূয় স্তভ্যং নমো নমঃ।শ্রীদেব্যুবাচ। প্রার্থনীয়ো বরো য স্তে তং বৃণু ত্বং মহাসুর। দাস্যামি তে বরং প্রার্থ্যং সংশয়ো নাত্র বিদ্যতে ॥ মহিষ উবাচ। যজ্ঞভাগ মহং ভোক্তুমিচ্ছামি ত্বৎ প্রসাদতঃ। যথা যজ্ঞেষু সর্ব্বেষু পূজ্যো

হং সাং তথাঙ্গক॥ ত্বৎপাদসেবাং ন ত্যক্ষ্যে যাবৎ সূর্য্যঃ প্রবর্ত্ততে। এবং বরদ্বয়ং দেহি যদি দেয়োবরো মম॥ শ্রীদেব্যুবাচ। যজ্ঞভাগাঃ সুরেভ্যশ্চ কল্পিতা বৈ পৃথক্ পৃথক্। ভাগো ন বিদ্যতে চান্যো যদ্দাস্যামি তবাধুনা॥ কিন্তু ত্বয়ি ময়া যুদ্ধে নিহতে মহিষাসুর। নৈব ত্যক্ষ্যসি মৎপাদং সততং নাত্র সংশয়ঃ॥ মন প্রবর্ত্ততে পূজা যত্র যত্র চ তত্র তে। পূজ্যশ্চিন্ত্যশ্চ তত্রৈব কায়ো হয়ং তব দানব॥ ইতি শ্রুত্বা বচ স্তস্যাঃ প্রত্যুচে মহিষাসুরঃ। বরং প্রাপ্যেহ মুদিতঃ প্রসন্নবদন স্তদা॥ উগ্রচণ্ডে ভদ্রকালি দুর্গে দেবি নমো হস্তু তে। প্রভূতা মূর্ত্তয়ো দেবি ভবত্যাঃ সকলাত্মিকাঃ॥ কাভি স্তে মূর্ত্তিভিঃ পূজ্যো যজ্ঞে হহং পরমেশ্বরি। তৎ সমাচক্ষ্ব যদি মে ভবত্যেহ কৃপা কৃতা॥ শ্রীদেব্যুবাচ। যানি নামানি চোক্তানি ত্বয়েহ মহিষাসুর। তাসু মূর্ত্তিষু সংস্পৃষ্টঃ পূজ্যো লোকে ভবিষ্যতি॥ উগ্রচণ্ডেতি যা মূর্ত্তির্ভদ্রকালী হ্যহং পুনঃ। যয়া মূর্ত্ত্যা ত্বাং হনিষ্যে সা দুর্গেতি প্রকীর্ত্তিতা॥ এতাসু মূর্ত্তিষু সদা পাদলগ্নো নৃণাং সদা। পূজ্যো ভবিষ্যসি ত্বং বৈ দেবানা মপি রক্ষসাং॥ আদিসৃষ্ট্যা উগ্রচণ্ডা মূর্ত্ত্যা ত্বং নিহতঃ পুরা। দ্বিতীয় সৃষ্টৌ ত ভবান্ ভদ্রকাল্যা ময়া হতঃ॥ দুর্গারূপেণাধুনা ত্বাং হনিষ্যামি সহানুগং। কিন্তু পূর্ব্বং ন গৃহীত স্ত্বং ময়া পাদয়ো স্তলে॥ অধুনা প্রার্থিত বরো গৃহীতঃ পূর্ব্বকালয়োঃ। গৃহীতবাংশ্চ পশ্চাত্ত্বং যজ্ঞভাগোপভুক্তয়ে॥ ইতি কালিকাপুরাণে ৫৯ অধ্যায়ঃ॥ ক্ষ॥ গঙ্গায়াঃ পশ্চিমেতীরে গ্রামবিশেষশ্চ॥

ভদ্রকাশী স্ত্রী ভদ্রমুস্তা। ইতি রাজনির্ঘণ্ট॥

ভদ্রকন্তঃ পুং পর্ণদন্তঃ। ইত্যমরঃ॥

ভদ্রগন্ধিকা স্ত্রী মুস্তকং। ইতি রত্নমালা॥

ভদ্রঙ্করঃ ত্রি মঙ্গলকারকঃ। তৎপর্য্যায়ঃ। ক্ষেমঙ্করঃ ২ ক্ষেমকারঃ ৩ মদ্রঙ্করঃ ৪ শুভঙ্করঃ ৫ অরিষ্টতাতিঃ ৬ শিবতাতিঃ ৭ শঙ্করঃ ৮। ইতি ভূরিপ্রয়োগঃ॥

ভদ্রচূড়ঃ পুং লঙ্কাস্থায়ী। লঙ্কাসিজ ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

ভদ্রজঃ পুং ইন্দ্রযবঃ। ইতি রাজনির্ঘণ্টঃ॥

ভদ্রতরুণী স্ত্রী কুব্জকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ভদ্রতুরগং ক্লী জম্বুদ্বীপস্যনববর্ষান্ত-

র্গতবর্ষবিশেষঃ। যথা। মাল্যবজ্জ-লধি মধ্যকর্ত্রি বর্ত্তু ভদ্রতুরগং জগু বুধাঃ। ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যায়ঃ॥

ভদ্রদন্তিকা স্ত্রী দন্তীবৃক্ষভেদঃ। ভদ্রদন্তী ইতি খ্যাতা। তৎপর্য্যায়ঃ। কেশরুহা২ চিত্রগুদ্রা৩ জয়াবহা৪ আবর্ত্তকী৫ ভৃঙ্গাঙ্গী৬ জবাহ্বা৭। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। রেচনত্বং। কৃমি শূল জঠারদোষ তুন্দাময নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ভদ্রদারু ক্লীং পুং দেবদারু। ইত্যমর ভরতৌ॥ সরলকাষ্ঠং। ইতি রত্নমালা॥

ভদ্রদার্ব্বাদিকঃ পুং ঔষধগণবিশেষঃ। যথা। ভদ্রদারু কুষ্ঠ হরিদ্রা বরুণ মেষশৃঙ্গী বলাতিবলার্ত্তগল কচ্ছুরা শল্লকী জবেরাক্ষী নীরভক সহচরাগ্নিমন্থ বৎসাদন্যেরণ্ডাশ্মভেদকালর্কার্ক শতাবরী পুনর্নবা বসুক বসির কাঞ্চনক ভার্গী কার্পাসী বৃশ্চিকালীপত্তুর বদর যব কোল কুলত্থ প্রভৃতীনি। ইতি সুশ্রুতসূত্রস্থানস্য সংশোধন সংশমনীয়াধ্যায়ঃ॥ *॥ অপিচ। দেবদারু হরিদ্রে দ্বে বরুণঃ কুষ্ঠ মেব চ। মস্থানিম্বং নাগবলা শ্যামজাগরলো হপরঃ॥ পাটলা চাশ্মগুপ্তা চ শুণ্ঠী পাষাণভেদিকা। শতাবরী চার্কমূলং গুডূচী গণিকারিকা॥ পুনর্নবা চ বাস্তুক সূর্য্যাবর্ত্তক কানতং। গোক্ষুরং শরমূলঞ্চ কুশমূলং সমাংসিকং॥ ঊনচত্বারিংশদ্দ্রব্যৈর্ভদ্রদার্ব্বাদিকো গণঃ। ইতি শব্দচন্দ্রিকা॥ *॥ এতন্মধ্যে চতুর্দশ দ্রব্যাণি ন প্রাপ্তানি॥

ভদ্রনামা পুং কাষ্ঠকুট্টপক্ষী। কাঠঠোকরা ইতি ভাষা। ইতিত্রিকাণ্ডশেষঃ॥

ভদ্রনাসিকা স্ত্রী ত্রায়ন্তীবৃক্ষঃ। বহলা ইতি ভাষা। ইতি রত্নমালা॥

ভদ্রনিধিঃ পুং মহাদানবিশেষঃ। যথা। ইন্দ্র উবাচ। বিধানং ব্রূহি মে ব্রহ্মন্ দানস্যাস্য মহানিধেঃ। যথা দেব বিশেষেণ বিষ্ণো রানন্দ কারকং॥ ব্রহ্মোবাচ। পুণ্যাং তিথিং প্রাপ্য তু পৌর্ণমাস্যাং তথোপরাগে শশি সূর্য্যয়োর্ব্বা। চতুর্যুগাদিষ্বয়ন দ্বয়ে বা প্রবোধনে প্রস্বপনে হথ বিষ্ণোঃ॥ কার্য্যাদথোডুম্বর মেব জন্তুং হিরণ্ময়েনেন যথাত্ম শক্ত্যা। তথাপি বিদ্বানক্ষ সম্রাজতং স্যাদ্ধরণ্য ভারেণ তু পূর্ণমেতৎ॥ তদর্দ্ধ-

তো হর্দ্ধেন তদর্দ্ধতো বা স্ব শক্তিতঃ স্বর্ণপলৈঃ শতেন। তদর্দ্ধ মধ্যেন তু বিত্তশক্ত্যা পলত্রযাদূন মধ্যো ন স্যাৎ॥ তত্তাম্র ভাণ্ডে কনকং নিধেযং সবজ্র নীলোত্তম পদ্মরাগং। সুমুক্ত বৈদূর্য্য সবিক্রমঞ্চ তদ্রাজতং পাত্র মধ্যো মুখং স্যাৎ॥ এবন্তু তং ভদ্রনিধিং সুবিদ্বান্ কৃত্বাসনে প্রাবরণোপযুক্তে। স্যোত্তরে দর্পণ চামরাঢ্যং সপাদুকোপানহ ছত্র যুক্তং॥ তং ক্ষৌমবস্ত্রোত্তম যুগ্ম যুক্তং সম্পূজযেন্মন্ত্র বরৈ রথৈতং। আদৌ তু পঞ্চামৃত মাপ্য বিষ্ণুং সংস্নাপ্য সংসার তরং সমর্চ্য॥ তথেশ্বরং পাবক মেব হুত্বা আমন্ত্রযেদ্ভদ্রনিধিং ভক্তস্তং। শ্রীখণ্ড কর্পূর সঙ্কুমেন শঙ্খাক্ষরং নাম শিরঃ প্রলিখ্য॥ নম স্তথোঙ্কার যুতঞ্চ পাত্রে তদ্রাজতে হপ্যেব মথার্চযেত্তাং। ত্বযা সনন্দাবর সিদ্ধ যক্ষ বিদ্যাধরেন্দ্রোরগ কিন্নরেন্দ্রৈঃ॥ গন্ধর্ব দিব্যাপ্সর দান বেন্দ্রৈ র্যুতং বৃতং বিশ্বমিদং নমস্তে। সমস্ত সংসারকরী ত্বমেব বিভোঃ সদানন্দমযী চ মাযা॥ সমস্ত কল্যাণনিধিঃ সমাধি র্হরিপ্রিযে ভদ্রনিধে নমস্তে। এবং সংপূজ্য বিধিনা ততো বিপ্র মথার্চ্চযেৎ॥ কিরীটাঙ্গদ নিস্কাগ্র্য সণ্ডলাঙ্গুলি ভূষণৈঃ। অলংকৃত্য হরিং যদ্বৎ পীতাম্বর ধরং ততঃ॥ পূজযেদচ্যুতং ধ্যাত্বা মন্ত্রেণানেন ভক্তিমান্। ভূদেবো হসি বিভো নিত্যং নিত্যানন্দ মযো হরে॥ হর মে দুষ্কৃতং কৃষ্ণ কৃপাকর নমো হস্তু তে। ভূদেব ভগবান্ ভর্গ ভব ভক্তকরেশ্বর। ভবভূতিকরো জিষ্ণো প্রভবিষ্ণো নমো স্তু তে। এবং পূজ্য হৃদি ধ্যাত্বা তং দ্বিজং ব্রহ্মরূপিণং॥ ততো ভদ্রনিধিং দদ্যান্মন্ত্রেণানেন বাসব। স্বগোত্রোচ্চারণেনাদৌ বিপ্রনাম তথাত্মনঃ॥ যব দর্ভ তিলৈঃ সার্দ্ধ মুদকং সংপরিত্যজেৎ। পিতৃ সন্তারণার্থায নিত্যানন্দ বিবৃদ্ধযে॥ সর্ব্বাঘৌঘ বিঘাতায বিষ্ণো দানং মযা কৃতং। তদনেন সরত্নেন ধাতুত্রয যুতেন চ॥ সক্ষৌমাম্বর যুক্তেন সাদর্শ পাদুকেন চ॥ সাসনেন সছত্রেণ চামরোপানহেন চ॥ সদানন্দ নিধানেন প্রীযতাং বিষ্ণুরীশ্বরঃ। এবমুচ্চার্য্য তং দদ্যাদ্দ্বিজায হরিরূপিণে॥ গোপেন বিধিনা দদ্যাদ্ধেম সংখ্যাং ন কীর্ত্তযেৎ। প্রকীর্ত্তিতে কোটি যুগাযুতং ফলং প্রগোপিতে কল্পগণৈর্ন সংক্ষযঃ॥ ইতীয মন্ত্রো নতু কীর্ত্তযেৎ সুধী নিধান মধ্যে নিহিতঞ্চ

যন্তসু॥ এবং কৃতে স্যান্মনুজঃ কৃতা- ত্মা তপেশ্চ স্বামরণং কদাচিৎ॥ প্রযাতি বিষ্ণোঃ পদ মব্যযং তৎ শিবাত্মকানন্দময়ং সদাখ্যং॥ ইত্যাদ্যে বহ্নিপুরাণে ভদ্রনিধি দান নামাধ্যাযঃ॥

ভদ্রপদা স্ত্রী ভাদ্রপদা। পূর্ব্বভাদ্রপদোত্তরভাদ্রপদা নক্ষত্রং। ইত্যমরটীকাযাং রাযমুকুটঃ॥

ভদ্রপর্ণা স্ত্রী কটম্ভরাবৃক্ষঃ। ইতি শব্দমালা॥

ভদ্রপর্ণী স্ত্রী গাম্ভারী। ইত্যমরঃ॥ প্রসারিণী। ইতি জটাধরঃ॥

ভদ্রবলনঃ পুং বলরামঃ। ইতি শব্দমালা॥

ভদ্রমল্লিকা স্ত্রী গবাক্ষী। ইতি শব্দমালা॥

ভদ্রমুঞ্জঃ পুং মুঞ্জভেদঃ। রামশর ইতি শরপত ইতিচ ভাষা। তৎপর্য্যাযঃ। শরঃ ২ বাণঃ ৩ তেজনঃ ৪ ইক্ষুবেষ্টনঃ ৫। অথ মুঞ্জস্য পর্য্যাযঃ। মুঞ্জঃ ১ মুঞ্জাতকঃ ২ বাণঃ ৩ স্থূলদর্ভঃ ৪ সুমেধসঃ ৫। এতযো র্গুণাঃ। মুঞ্জদ্বযন্তু মধুরং তুবরং শিশিরং তথা। দাহ তৃষ্ণা বিসর্পাস্র মূত্র বস্ত্যক্ষিরোগজিৎ॥ দোষত্রয হরং বৃষ্যং মেখলাসূপযুজ্যতে। ইতি ভাবপ্রকাশঃ॥

ভদ্রমুস্তকঃ পুং নাগরমুস্তকঃ। ইত্যমরঃ॥

ভদ্রমুস্তা স্ত্রী ভদ্রমুস্তকঃ। তৎপর্য্যাযঃ। বরাহী ২ গুন্দ্রা ৩ গ্রন্থিঃ ৪ ভদ্রকাশী ৫ কশেরুঃ ৬ ক্রোড়েষ্টা ৭ জলবিন্দাখ্যা ৮ সুগন্ধিঃ ৯ গ্রন্থিলা ১০ হিমা ১১ বল্যা ১২ রাজকশেরুঃ ১৩ কচ্ছোত্থা ১৪ মুস্তা ১৫ অর্ণোদঃ ১৬ বারিদঃ ১৭ অম্ভোদঃ ১৮ মেঘঃ ১৯ জীমূতঃ ২০ অব্দঃ ২১ নীরদঃ ২২ অভ্রং ২৩ ঘনঃ ২৪ গাঙ্গেযঃ ২৫। অস্যা গুণাঃ। কষাযত্বং। তিক্তত্বং। শীতত্বং। পাচনত্বং। পিত্তজ্বর কফ নাশিত্বং। সংগ্রাহিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। মুস্তকং নস্ত্রিযাং মুস্তং ত্রিষু বারিদনামকং। জলবিন্দশ্চ সংখ্যাতো ঽপরঃ ক্রোড়কশেরুকঃ॥ ভদ্রমুস্তশ্চ গুন্দ্রা চ তথা নাগরমুস্তকঃ। মুস্তং কটু হিমং গ্রাহি তিক্তং দীপন পাচনং॥ কষাযং কফ পিত্তাস্র তৃট্ জ্বরারুচি জন্তুহৃৎ। অনূপদেশে যজ্জাতং মুস্তকং তৎ প্রশস্যতে॥ তত্রাপি মুনিভিঃপ্রোক্তং বরং নাগরমুস্তকং। ইতি ভাবপ্রকাশঃ॥

ভদ্রযবং ক্লী ইন্দ্রযবং। ইত্যমরঃ॥

ভদ্ররেণুঃ পুং ঐরাবতহস্তী। ইতি ত্রিকাণ্ডশেষঃ ॥

ভদ্রবৎ ক্লী দেবদারু। ইতি রাজনির্ঘণ্টঃ ॥

ভদ্রবতী স্ত্রী ভদ্রপর্ণী। ইতি জটাধরঃ ॥

ভদ্রবর্ম্মা পুং নবমল্লিকা। ইতি শব্দচন্দ্রিকা ॥

ভদ্রবলা স্ত্রী লতাবিশেষঃ। গন্ধভাদালিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। সরণা ২ প্রসারণী ৩ কটম্ভরা ৪ রাজবলা ৫। ইত্যমরঃ ॥ অস্যাঃ পর্য্যায়ান্তরং গুণাশ্চ প্রসারিণী শব্দে দ্রষ্টব্যাঃ ॥ * ॥ বলা। ইতি রাজনির্ঘণ্টঃ ॥

ভদ্রবল্লিকা স্ত্রী গোপবল্লী। অনন্তমূল ইতি ভাষা। ইতি রত্নমালা ॥

ভদ্রবল্লী স্ত্রী মল্লিকা ॥ মাধবীলতা। ইতি রাজনির্ঘণ্টঃ ॥ লতাবিশেষঃ। মদনমালী ইতি হাপরমালী ইতিচ ভাষা। তৎপর্য্যায়ঃ। শাতভীরুঃ ২ ভূমিমণ্ডা ৩ অষ্টপাদিকা ৪। ইতিরত্নমালা ॥

ভদ্রশ্রয়ং ক্লী চন্দনং। ইতিরত্নমালা।

ভদ্রশ্রীঃ পুং চন্দনবৃক্ষঃ। ইত্যমরঃ ॥

ভদ্রসোমা স্ত্রী গঙ্গা। ইতি শব্দমালা ॥

ভদ্রা স্ত্রী রাস্না ॥ কৃষ্ণা ॥ ব্যোমনদী ॥ তিথিভেদঃ। সা তু দ্বিতীয়া সপ্তমী দ্বাদশী চ ॥ প্রসারিণী ॥ কট্‌ফলং ॥ অনন্তা। ইতি মেদিনী ॥ জীবন্তী ॥ অপরাজিতা ॥ নীলী ॥ বলা ॥ শমী ॥ বচা ॥ দন্তী ॥ হরিদ্রা ॥ শ্বেতদূর্ব্বা ॥ কাশ্মরী ॥ সারিবাবিশেষঃ ॥ গৌঃ। ইতি রাজনির্ঘণ্টঃ ॥ কাকোডুম্বরিকা। ইতি রত্নমালা ॥ গঙ্গায়া স্ত্রি স্রোতো হন্তর্গত স্রোতো বিশেষঃ। তত্তু উত্তরে জম্বুবর্ষীয়গঙ্গা। ইতি পুরাণং শব্দমালা চ ॥ বুদ্ধশক্তিবিশেষঃ। তৎপর্য্যায়ঃ। তারা ২ মহাশ্রীঃ ৩ ওঙ্কারা ৪ স্বাহা ৫ শ্রীঃ ৬ মনোরমা ৭ তারিণী ৮ জয়া ৯ অনন্তা ১০ শিবা ১১ লোকেশ্বরাত্মজা ১২ খদূরবাসিনী ১৩ বৈশ্যা ১৪ নীলসরস্বতী ১৫ শঙ্খিনী ১৬ মহাতারা ১৭ বসুধারা ১৮ ধনন্দদা ১৯ ত্রিলোচনা ২০ লোচনা ২১। ইতি ত্রিকাণ্ডশেষঃ ॥ ছায়াগর্ব্ভজাতা সূর্য্যকন্যা। যথা। যমলৌ তু তত স্তস্যাং জনয়ামাস ভাস্করঃ। শনৈশ্চরঞ্চ ভদ্রাঞ্চ ছায়ায়া মমিতদ্যুতিঃ ॥ তথা চ তেজসা বিষ্ণো স্তস্য চক্র মবর্ত্তয়ৎ। তদপ্রতিহতে যুদ্ধে

ক্ষানবাস্ত চিকীর্ষয়া ॥ তদ্ভগিনী মুখতো ভদ্রা নিযুক্তৈব বিগর্হিতা ॥ ইতি বহ্নিপুরাণে বৈবস্বতানুকীর্ত্তনং ॥ ॥ সুভদ্রা । যথা । আষাঢস্য সিতে পক্ষে দ্বিতীয়া পুষ্য সংযুতা। তস্যাং রথে সমারোপ্য রামং মাং ভদ্রয়া সহ ॥ ইতি স্কান্দে ভগবদ্বাক্যং ॥ ॥ বিষ্টিভদ্রা যথা । একাদশ্যাং চতুর্থ্যাস্ত শেষার্দ্ধে শুক্লপক্ষকে । অষ্টমী পৌর্ণমাস্যোস্ত পূর্ব্বার্দ্ধে বিষ্টি সম্ভবঃ ॥ কৃষ্ণ পক্ষে তৃতীয়ায়াং দশম্যাশ্চ পরার্দ্ধতঃ ॥ সপ্তম্যাশ্চ চতুর্দ্দশ্যাঃ পূর্ব্বার্দ্ধে বিষ্টিরীরিতা ॥ বিহায় বিষ রৌদ্রাণি বিষ্টিং সর্ব্বত্র বর্জয়েৎ। বিষ্টিশেষে ত্রিদণ্ডে হি পুচ্ছে কার্য্যং জয়াবহং ॥ ॥ কর্ম্মপ্রকাশে তস্যা অঙ্গ বিশেষো যথা। নাড্যস্ত পঞ্চবদনং গলকস্তথৈকা বক্ষো দশৈক সহিতা নিযতং চতস্রঃ। নাভিঃ কটিঃ ষডথ পুচ্ছলতা চ তিস্রো বিষ্টে ধ্রুবং নিগদিতো হ্যঙ্গ বিভাগ এষঃ ॥ ॥ অঙ্গবিশেষে কার্য্যধ্বংসাদি ফলং যথা । মুখে কার্য্য ধ্বংসো ভবতি মরণঞ্চাথ গলকে ধনগ্লানি র্বক্ষস্যথ কটিতটে বুদ্ধিবিলয়ঃ। কলি র্নাভীদেশে বিজয়মথ পুচ্ছে চ জগদুঃ শরীরে ভদ্রায়াঃ পৃথগিতি ফলং সর্ব্ব মুনয়ঃ॥ ॥ মনু বসু মুনি তিথি যুগ দশ শিব গুণ সংখ্যাসু তিথিষু পূর্ব্বাদ্যাস্যং । আযাতি বিষ্টি রেষা পৃষ্ঠে শুভদা পুরস্ত্বশুভা ॥ চতুর্দ্দশ্যাদিষু পূর্ব্বাস্যাদি মুখং ভবতীত্যর্থঃ । ইতি জ্যোতিস্তত্ত্বং ॥

ভদ্রাকরণং ক্লী মুণ্ডনং । ইতি হেমচন্দ্রঃ ॥

ভদ্রাত্মজঃ পুং খড়্গঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভদ্রারকঃ পুং অষ্টাদশক্ষুদ্রদ্বীপান্তর্গতদ্বীপবিশেষঃ। ইতিশব্দমালা॥

ভদ্রালপত্রিকা স্ত্রী গন্ধালী। ইতি শব্দমালা ॥

ভদ্রালী স্ত্রী গন্ধালী। ইতি শব্দমালা ॥

ভদ্রাবতী স্ত্রী কট্ফলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভদ্রাশ্বং ক্লী ভুবো নববর্ষান্তর্গত বর্ষবিশেষঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ তদ্বিবরণং যথা। মাল্যবতঃপূর্ব্বপার্শ্বে পূর্ব্বগণ্ডিকা একশৃঙ্গাদ্যোজন সহস্রাণি মান স্তত্র চ ভদ্রাশ্বা নাম জনপদাঃ ভদ্রশালবনঞ্চ তত্র ব্যবস্থিতং কালাম্রবৃক্ষাঃ পুরুষাঃ শ্বেতাঃ পদ্মবর্ণিনঃ স্ত্রিয়ঃ কুমুদবর্ণাঃ

দশবর্ষসহস্রাণি চ তেষামায়ু স্তত্রচ পঞ্চজলপর্বতাঃ তদ্যথা শৈলবর্ণঃ মালাখ্যকো বরজম্বঃ ত্রিপর্ণো নীল শ্চেতি তদ্বিনির্গতা স্তদস্তঃ স্থিতা- নাং দেশানাং তান্যেব নামানি তেচ দেশাঃ এতাঃ নদীঃ পিবন্তি তদ্যথা সীতা সুবাহিনী হংসবতী কাবেরী সুরসা শাখাবতী ইন্দ্রনদী অঙ্গার- বাহিনী হরিতোয়া সোমাবর্ত্তা শ- তহ্রদা বনমালা বসুমতী হংসা পর্ণা পঞ্চগঙ্গা ধনুষ্মতী মণিবপ্রা সুব্র- হ্মভাগা বিলাসিনী কৃষ্ণতোয়া পু- ণ্যোদা নাগবতী শিবা শৈবালিনী মণিতটা ক্ষীরোদা বরুণাবতী বিষ্ণু পদী মহানদী হিরণ্যস্কন্ধবাহা সু রাবতী বামোদা পতাকাশ্চেত্যেতা মহানদ্যঃ এতাশ্চ গঙ্গাসমাঃ কী- র্ত্তিতাঃ আজন্মান্তং পাপং নিনাশ- যন্তি ক্ষুদ্রনদ্যশ্চ কোটিশ স্তাশ্চ নদী যে পিবন্তি তে দশবর্ষ সহস্রা- য়ুষঃ রুদ্রোমাভক্তা ইতি। ইতি বা- রাহে ভুবনকোষে রুদ্রগীতা ॥ ※॥ অপিচ। তথৈবেলাবৃত্ত মপরেণ পূর্ব্বেণ চ মাল্যবদ্গন্ধমাদনাবানীল নিষধায়তৌ দ্বিসহস্রং পপ্রথতুঃ কে- তুমাল ভদ্রাশ্বযোঃ সীমানং বিদধা- তে। মন্দরো মেরুমন্দরঃ সুপার্শ্বঃ ॥ কুমুদ ইত্যযুত যোজন বিস্তারোন্না- হা মেরো শ্চতুর্দ্দিশ মবষ্টম্ভগিরয উপকৃপ্তাঃ। চতুর্ষ্বেতেষু চূত জম্বু ক- দম্ব ন্যগ্রোধা শ্চত্বারঃ পাদপ প্রব- রাঃ পর্ব্বত কেতব ইবাধিসহস্র যো- জনোন্নাহা স্তাবদ্বিটপ্র বিততয়ঃ শ- তযোজন পরিণাহাঃ। হ্রদা শ্চত্বা- রঃ পযো মধ্বিক্ষুরস মৃষ্টজলাঃ যদুপ- স্পর্শিন উপদেবগণা যোগৈশ্বর্য্যাণি স্বাভাবিকানি ভরতর্ষভ ধারয়ন্তি। দেবোদ্যানানিচ ভবন্তি চত্বারি ন- ন্দনং চৈত্ররথং বৈভ্রাজকং সর্ব্বতো ভদ্রমিতি। যেষ্বমর পরিবৃঢাঃ সহসু- র ললনা ললাম যূথপতয উপদেব- গণৈরুপগীযমান মহিমানঃ কিল বি- হরন্তি। মন্দরোৎসঙ্গ একাদশশত যোজনোত্তুঙ্গ দেবচূতশিরসো গিরি শিখরস্থূলানি ফলান্যমৃতকল্পানি নিপতন্তি। তেষাং বিশীর্য্য মানানা মতিমধুর সুরভি সুগন্ধি বহলারুণ রসোদেনারুণোদা নাম নদী মন্দর গিরিশিখরান্নিপতন্তী পূর্ব্বেণেলাবৃ- ত মুপপ্লাবযতি। যদুপজোষণাদ্ভ- বান্যা অনুচরীণাং পুণ্যজনবধূনা ম- বযবস্পর্শ সুগন্ধিবাতো দশযোজনং সমন্তাদনুবাসযতি। এবং জম্বূফলা- নামত্যুচ্চ নিপাত বিশীর্ণানা মনস্থি

প্রায়াণাং নিভকায়নিভানাং রসেন জম্বুনদী নাম নদী মেরু মন্দরশিখরাদযুত যোজনাদবনিতলে নিপতন্তী-দক্ষিণেনাত্মানং যাবদিলাবৃত মুপস্যন্দতি। তাবদুভযো রপি রোধসো র্যা মৃত্তিকা তদ্রসেনানুবিধ্যমানা বাযুর্ক সংযোগ বিপাকেন সদামরলোকাভরণং জাম্বূনদং নাম সুবর্ণং ভবতি যদুহবাব বিবুধাদয়ঃ সহ যুবতিভি র্মুকুট কটক কটি সূত্রাদ্যাভরণ রূপেণ খলু ধারয়ন্তি। যস্ত মহাকদম্বঃ সুপার্শ্ব পার্শ্ব নিরূঢ স্তস্য কোটরেভ্যো বিনিঃসৃতাঃ পঞ্চাযামপরিণাহাঃ পঞ্চ মধুধারাঃ সুপার্শ্ব শিখরাৎ পতন্ত্যো হপরেণাত্মান মিলাবৃত মনুমোদযন্তিযো হ্যপযুঞ্জানানাং মুখ নির্ব্বাসিতো বাযুঃ সমন্তাৎ শতযোজন মনুবাসযতি। এবং কুমুদ নিরূঢো যঃ শতবল্লো নাম বট স্তস্য স্কন্ধেভ্যো-নীচীনাঃ পযোদধি মধু ঘৃত গুড়ান্নাদ্যম্বর শয্যাসনাভরণাদযঃ সর্ব্বএব কামদুঘা নদাঃ কুমুদাগ্রাৎ পতন্ত স্তমুত্তরেণেলাবৃত মুপযোজয়ন্তি বানুপজুষাণানাং ন কদাচিদপি প্রজানাং বলীপলিত ক্লম স্বেদ দৌর্গন্ধ্য জরামযাপ মৃত্যু শীতোষ্ণ বৈবর্ণ্যোপ সর্গাদয স্তাপ বিশেষা ভবন্তি যাবজ্জীবং সুখ নিরতিশয় মেব ক্ররঙ্গ ক্ররর ক্রসুম্ভ বৈকঙ্ক ত্রিকূট শিশির পতঙ্গ রুচক নিষধ শিতিবাস কপিল শঙ্খ বৈদূর্য্য জারুধি হংসর্ষভ নাগ কালঞ্জর নারদাদযো গিরযো মেরোঃ কর্ণিকাযা ইব কেশর ভূতা মূলদেশে পরিত উপকৢপ্তাঃ। জঠর দেবকূটৌ মেরুং পূর্ব্বেণাষ্টাদশযোজন সহস্র মুদগাযতৌ দ্বিসহস্র পৃথুতুঙ্গৌভবতঃ এব মপরেণ পবন পারিপাত্রৌ দক্ষিণেন কৈলাস করবীরৌ প্রাগাযতৌ এব মুত্তরত স্ত্রিশৃঙ্গ মকরৌ অষ্টাভি রেতৈঃ পরিবৃতো হগ্নিরিব পরিতশ্চ কাস্তে কাঞ্চন গিরিঃ। মেরো র্মূর্দ্ধনি ভগবত আত্মযোনে র্মধ্যত উপকৢপ্তাং পুরীমযুত যোজন সাহস্রীং সম চতুরস্রাং শাতকৌম্ভীং বদন্তি। তামনুপরিতো লোকপালানামষ্টানাং যথা দিশং যথা রূপং তুরীয মানেন পুরো হষ্টাবুপকৢপ্তাঃ। ইতি শ্রী ভাগবতে ৫ স্কন্ধে ভুবনকোষবর্ণনে ১৬ অধ্যাযঃ ॥

ভদ্রাশ্রয়ঃ পুং চন্দনং। ইতি শব্দচন্দ্রিকা ॥

ভদ্রাসনং ক্লী নৃপাসনং। ইত্যমরঃ ॥

ভদ্রেশ্বরঃ পুং কল্পগ্রামস্থশিবঃ। যথা। উত্তিষ্ঠ কান্ত গচ্ছাবঃ কল্পগ্রামং সুশোভনং। তযাসাৰ্দ্ধং জগামাথ কল্পগ্রামং বসুন্ধরে॥ ভদ্রেশ্বর নিমিত্তং হি দ্রব্যঞ্চ কথিতং শুভং। নিত্যঞ্চ ভুঞ্জতে যত্র পাত্র দ্রব্যং সমর্পিতং॥ দৃষ্ট্বা ভদ্রেশ্বরং দেবং চক্রতীর্থ ফলং লভেৎ। কল্পগ্রামাচ্ছত গুণং চক্রতীর্থং বসুন্ধরে॥ ইতি বারাহে মথুরামাহাত্ম্যে চক্রতীর্থপ্রভাবো নামাধ্যাযঃ॥ * ॥ শিবপ্রাপ্ত্যর্থং দুর্গারাধিত হিমালযস্থ পার্থিবশিবলিঙ্গং। যথা। তবার্থায গুহিষ্যামি মহর্ষীন্ হিমবদ্গৃহে। যশ্চেহ রুদ্র মীহস্ত্যা মৃন্ময শ্চেশ্বরঃ কৃতঃ॥ অসৌ ভদ্রেশ্বরেত্যেবং খ্যাতে লোকে ভবিষ্যতি। দেব দানব গন্ধর্ব্বা যক্ষ কিম্পুরুষোরগাঃ॥ পূজযিষ্যন্তি সততং মানবাশ্চ শুভেপ্সবঃ। ইতি বামনপুরাণে ৪৬ অধ্যাযে উমাংপ্রতি শিববাক্যং॥*॥ গঙ্গাযাঃ পশ্চিমতীরে গরিট্যাখ্য গ্রামস্যোত্তরে পাষাণময শিবলিঙ্গবিশেষো গ্রামবিশেষশ্চ॥

ভদ্রৈলা স্ত্রী স্থূলৈলা। ইতি রাজনির্ঘণ্টঃ॥

ভদ্রোদনী স্ত্রী বলা॥ নাগবলা। ইতি রাজনির্ঘণ্টঃ॥

ভন্দিলং ক্লী শুভং। ইত্যুণাদিকোষঃ॥ কম্পঃ॥ দূতঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভক্করুঃ পুং ভারতবর্ষান্তর্গতদেশবিশেষঃ। যথা। লঙ্কা শঙ্কারুএবাপি গ্রামাণাং ভক্করুকে স্মৃতাঃ। ইতি স্কান্দে কুমারিকাখণ্ডে বক্রেশ্বরমাহাত্ম্য নামাধ্যাযঃ॥

ভপঞ্জরং ক্লী নক্ষত্রচক্রং। ইতি সিদ্ধান্তশিরোমণিঃ॥

ভপতিঃ পুং চন্দ্রঃ। ইতি হেমচন্দ্রঃ॥

ভম্রঃ পুং ধূমঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মক্ষিকা। ইতি শব্দরত্নাবলী॥

ভম্ভরালিকা স্ত্রী ভঙ্কারী। ডাঁশ ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

ভম্ভরালী স্ত্রী মক্ষিকা। ইতি ত্রিকাণ্ডশেষঃ॥

ভম্ভাসারঃ পুং মগধরাজবিশেষঃ। তৎপর্য্যাযঃ। শ্রেণিকঃ ২। ইতি হেমচন্দ্রঃ॥

ভযং ক্লী বিভেত্যস্মাৎ তৎ। ইতি ভরতঃ॥ তস্য লক্ষণং যথা। রৌদ্রশক্ত্যা তু জনিতং চিত্ত বৈক্লব্যদং ভযং। ইতি সাহিত্যদর্পণে ৩ পরিচ্ছেদঃ॥ অপিচ। রাগ বিষযন্য বিনাশকে সমুপস্থিতে তন্নিবারণা-

সামর্থ্যমাত্মনো মনস্যানস্য দৈন্যাত্মক শ্চিত্তবৃত্তি বিশেষো ভয়ং। তি ভগবদ্গীতায়াঃ ২ অধ্যায়ে মধুসূদন সরস্বতী ॥ অন্যচ্চ। পরতঃ স্বানিষ্ট সম্ভাবনা ভয়ং। যথা ব্যাঘ্রাদিভেতি ব্যাঘ্রাধীনত্বেন স্বীয মরণং সম্ভাবয়তি। ইতি ২ বুৎপত্তিবাদে গদাধর ভট্টাচার্য্যঃ॥ তৎপর্য্যায়ঃ। দরঃ ২ ত্রাসঃ ৩ ভীতিঃ ৪ ভীঃ ৫ সাধ্বসং ৬। ইত্যমরঃ॥ ক্ষুদ্রাসঃ ৭ সাধ্বসং ভবঃ ৮ প্রতিভয়ং ৯। ইতি শব্দরত্নাবলী ॥ আতঙ্কঃ ১০ আশঙ্কা ১১ ভিয়া ১২। ইতি হেমচন্দ্রঃ ॥ * ॥ আগতে ভয়ে অভীতবৎ স্থাতব্যং যথা। তাবদ্ভয়স্য ভেতব্যং যাবদ্ভয মনাগতং। উৎপন্নে তু ভয়ে তীব্রে স্থাতব্যং তৈরভীতবৎ॥ ইতি গারুড়ে নীতিসারে ১১৫ অধ্যায়ঃ॥ * ॥ নরকপুষ্পং ॥ ঘোরে ত্রি। ইতিমেদিনী॥ রোগে পুং। ইতি রাজনির্ঘণ্টঃ॥

ভয়ঙ্করং ত্রি ভয়জনকং। তৎপর্য্যায়ঃ। ভৈরবং ২ দারুণং ৩ ভীষণং ৪ ... ৫ ঘোরং ৬ ভীমং ৭ ভয়ানকং ৮ প্রতিভয়ং ৯। ইত্যমরঃ॥ ভয়াবহং ১০। ইতি হেমচন্দ্রঃ॥ ডুণ্ডুলপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

ভয়ডিণ্ডিমঃ পুং সংগ্রামপটহঃ। তি পুরাণং॥

ভয়দ্রুতঃ ত্রি ভীত্যাপলায়িতঃ। তৎপর্য্যায়ঃ। কান্দিশীকঃ ২। ইত্যমরঃ॥

ভয়নাশিনী স্ত্রী ত্রায়মাণালতা। ইতি রাজনির্ঘণ্টঃ॥ ভয়নাশকর্ত্রী চ

ভয়ভীতঃ ত্রি ত্রাসেনাতঙ্কিতঃ। যথা। একতো ভয়ভীতস্য প্রাণিনঃ প্রাণরক্ষণং। নাতো গুরুতরো ধর্ম্মঃ কশ্চিদন্যোহস্তিখেচর॥ ইতিবহ্নিপুরাণে শিবিরাজোপাখ্যানং ॥

ভয়ভ্রষ্টঃ ত্রি ভয়দ্রুতঃ। ইতি জটাধরঃ॥

ভয়ানকঃ পুং ব্যাঘ্রঃ॥ রাহুঃ॥ রস বিশেষঃ। ইতি মেদিনী॥ সতু শৃঙ্গারাদ্যষ্ট রসান্তর্গত ষষ্ঠরসঃ। তস্য লক্ষণং যথা। ভয়ানকো ভয়স্থায়ি ভাবঃ কালাধি দৈবতঃ। স্ত্রী নীচপ্রকৃতিঃ কৃষ্ণোমত স্তত্ত্ববিশারদৈঃ॥ যস্মাদুৎপদ্যতে ভীতিস্তদত্রালম্বনং মতং। চেষ্টা ঘোরতরা তস্য ভবেদুদ্দীপনং পুনঃ॥ অনুভাবো হত্র বৈবর্ণ্যং গদ্গদস্বর ভাষণং। প্রলয স্বেদ রোমাঞ্চ কম্প দিক্ প্রেক্ষণাদয়ঃ॥ জুগুপ্সা বেগ সংমোহ সংত্রাস গ্লানি দীনতাঃ।

শঙ্কাপস্মার সংভ্রান্তি মৃত্যাদ্যা ব্যভিচারিণঃ ॥ উদাহরণং যথা। নষ্টং বর্ষবরৈর্মনুষ্যগণনা ভাবাদপাস্যত্রপামন্তঃ কঞ্চুকি কঞ্চুকস্য বিশতি ত্রাসাদয়ং বামন ইত্যাদি ॥ইতিসাহিত্যদর্পণে৩পরিচ্ছেদ॥

ভয়ানকঃ ত্রি ভয়ঙ্করঃ। ইত্যমরঃ॥

ভয়াপহঃ পুং রাজা। ইতি ত্রিকাণ্ডশেষঃ ॥

ভয়াবহঃ ত্রি ভয়ঙ্করঃ। ইতি হেমচন্দ্রঃ ॥

ভরঃ পুং অতিশয়ঃ। ইত্যমরঃ॥ ভরণকর্ত্তরি ত্রি ॥

ভরটঃ পুং কুম্ভকারঃ। ইত্যুণাদিকোষঃ ॥

ভরণং ক্লী বেতনং॥ ভৃতিঃ। ইতি মেদিনী॥ পোষণং। যথা। ভরণং পোষ্যবর্গস্য প্রশস্তং স্বর্গসাধনং। নরকং পীড়নে চাস্য তস্মাদ্যত্নেন তং ভরেৎ॥ ইতি দায়ভাগঃ॥

ভরণঃ পুং ভরণীনক্ষত্রং। ইতি শব্দরত্নাবলী ॥

ভরণী স্ত্রী ঘোষকলতা। ইতি মেদিনী॥ অশ্বিন্যাদি সপ্তবিংশতিনক্ষত্রান্তর্গত দ্বিতীয়নক্ষত্রং। তৎপর্য্যায়ঃ। যমদৈবতা ২। ইতি হেমচন্দ্রঃ ॥ সা তারকাত্রয়মিত ত্রিকোণাকৃতিঃ। তস্যা অধিষ্ঠাত্রী দেবতা যমঃ। যথা। তারকাত্রয়মিতে ত্রিকোণকে মধ্যগে দিবিষদধ্বনো যমেন পঙ্কজাক্ষি গণিতাঃ জলীরতঃ সায়কাক্ষি ভুজ সংখ্যকাঃ কলাঃ ॥ দং ৩। ৪৫। ইতি কালিদাসকৃত রাত্রিলগ্নমানং ॥ সাচ উগ্রগণান্তর্গতা। অধোমুখগণান্তর্গতা চ। বিদ্যার্থ্য ভূমিখননে প্রশস্তা। ইতি জ্যোতিস্তত্ত্বং ॥ তত্র জাত ফলং। সদাপকীর্ত্তি র্হি মহাপবাদো নানা বিনোদৈশ্চ বিনীতকালঃ। জলে বিলাসী চপলঃ খলঃ স্যাৎ প্রাণি প্রণীতো ভরণীষুজাতঃ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

ভরণীভূঃ পুং রাহুগ্রহঃ। ইতি হেমচন্দ্রঃ ॥

ভরণীয়ঃ ত্রি ভরণযোগ্যঃ। পোষ্যঃ। ভৃ ধাতোঃ কর্ম্মণি অনীয় প্রত্যয়েন নিষ্পন্নঃ ॥

ভরণ্ডঃ পুং স্বামী॥ ভূপালঃ॥ বৃষঃ। ইত্যুণাদিকোষঃ ॥ ভূঃ॥ কৃমিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

ভরণ্যং ক্লী মূল্যং। বেতনং। ইত্যমরঃ ॥

ভরণ্যভুক্ ত্রি কর্ম্মকরঃ। মূল্যং গৃহীত্বা কর্ম্মকারকঃ। ইত্যমরঃ ॥

ভরণ্যা স্ত্রী বেতনং। ইত্যমরটীকা-
যাং স্বামী ॥

ভরণ্যাহ্বা স্ত্রী পর্ব্বপুষ্পী। রামদূতী-
তিখ্যাতা। ইতি শব্দচন্দ্রিকা ॥

ভরণ্যুঃ পুং শরণ্যুঃ। মিত্রং। ইতি
শব্দমালা॥ অগ্নিঃ ॥ চন্দ্রমাঃ ॥
ঈশ্বরঃ। ইতি সংক্ষিপ্তসারোণাদি-
বৃত্তিঃ ॥

ভরতঃ পুং নাট্যশাস্ত্রং॥ মুনিবিশেষঃ
। সতু অলঙ্কারাদি শাস্ত্রস্য সূত্র-
কর্ত্তা॥ নটঃ॥ রামানুজঃ॥ দৌষ্মন্তিঃ
। ইতি মেদিনী॥ শবরঃ ॥ তন্তবা-
য়ঃ। ইতি বিশ্বঃ ॥ ক্ষেত্রং॥ ভরতা-
গ্রজঃ। ইতি হেমচন্দ্রঃ॥*॥ দুষ্মন্ত
রাজপুত্রভরতস্য পর্য্যায়ঃ। শাকু-
ন্তলেয়ঃ ২ দৌষ্মন্তিঃ ৩ সর্ব্বদমনঃ ৪
। ইতি ত্রিকাণ্ডশেষঃ॥ য স্ত্রয়স্ত্রিং-
শচ্ছত মশ্বমেধং কৃতবান্ । পঞ্চা-
শদ্রাজসূয়ং এবমন্যান্ নানাবিধান্
যজ্ঞানকরোৎ। সপ্তবিংশতি সহ-
স্রবৎসরানেকচ্ছত্রং রাজ্যং কৃতবা-
ন্। তস্যোৎপত্ত্যাদি যথা। দুষ্ম-
ন্তো মৃগয়াং যাতঃ কণ্বাশ্রমপদং
গতঃ। তত্রাসীনাং স্বপ্রভয়া নগুয়
ন্তীং রমামিব ॥ বিলোক্য সদ্যো
মুমুহে দেবমায়া মিব স্ত্রিয়ং। বভা-
ষে তাং বরারোহাং ভটৈঃ কতি-
পয়ৈ র্বৃতঃ॥ তদ্দর্শন প্রমুদিতঃ সং-
নিবৃত্ত পরিশ্রমঃ। পপ্রচ্ছ কাম সন্ত-
প্তঃ প্রহসন্ শ্লক্ষ্ণয়া গিরা ॥ কা ত্বং ক-
মলপত্রাক্ষি কস্যাসি হৃদয়ঙ্গমে। 
কিংস্বিচ্চিকীর্ষিতং ত্বত্র ভবত্যা নি-
র্জনে বনে ॥ ব্যক্তং রাজন্যতনয়াং
বেদ্ম্যহং ত্বাং সুমধ্যমে। নহি চেতঃ
পৌরবাণা মধর্ম্মে রমতে ক্বচিৎ ॥
শ্রীশকুন্তলোবাচ। বিশ্বামিত্রাত্মজৈ-
বাহং ত্যক্তা মেনকয়া বনে। বেদৈ-
তদ্ভগবান্ কণ্বো বীর কিংকরবাম-
তে ॥ আস্যতাং হ্যরবিন্দাক্ষ গৃহ্য-
তা মর্হণঞ্চ নঃ। ভুজ্যতাং সন্তি নীবা-
রা উষ্যতাং যদি রোচতে॥ শ্রীদুষ্ম-
ন্ত উবাচ। উপপন্ন মিদং সুভ্রু জাতা-
যাঃ কুশিকান্বয়ে ॥ স্বয়ং হি বৃণুতে
রাজ্ঞাং কন্যকা সদৃশং বরং। ওমিত্যু-
ক্তে যথা ধর্ম্ম মুপযেমে শকুন্তলাং ॥
গান্ধর্ব্ব বিধিনা রাজা দেশ কাল বি-
ধানবিৎ। অমোঘবীর্য্যো রাজর্ষির্ম-
হিষ্যাং বীর্য্যমাদধে ॥ শ্বো ভূতে স্ব
পুরং যাতঃ কালেনাসূত সা সুতং।
কণ্বঃ কুমারস্য বনে চক্রে সমুচিতাঃ
ক্রিয়াঃ॥ বদ্ধ্বা মৃগেন্দ্রং তরসা ক্রীড-
তিস্ম স বালকঃ। তং দুরত্যয় বিক্রান্ত-
মাদায় প্রমদোত্তমা ॥ হরে রংশাং-
শ সম্ভূতং ভর্ত্তুরন্তিক মাগমৎ। যদা

ম্ ঞ্জগৃহে রাজা ভার্য্যা পুত্রাবনিন্দিতৌ ॥ শুশ্রুতা সর্ব্বভূতানাং খে বাগাহাশরীরিণী। মাতা ভস্ত্রা পিতুঃ পুত্রো যেন জাতঃ স এব সঃ॥ ভরস্ব পুত্রং দুষ্মন্ত মাবমংস্থাঃ শকুন্তলাং। রেতোধাঃ পুত্রো নয়তি নরদেব যমক্ষয়াৎ॥ ত্বঞ্চাস্য ধাতা গর্ভস্য সত্যমাহ শকুন্তলা॥ পিতর্য্যুপরতে সোঽপি চক্রবর্ত্তী মহাযশাঃ। মহিমা গীযতে তস্য হরে রংশ ভুবো ভুবি॥ চক্রং দক্ষিণহস্তে ঽস্য পদ্মকোষো ঽস্য পাদযোঃ। ঈজে মহাভিষেকেণ সো ঽভিষিক্তো ঽধিরাড্বিভুঃ॥ পঞ্চ পঞ্চাশতা মেধ্যৈ র্গঙ্গাযা মনুবাজিভিঃ। মামতেয়ং পুরোধায যমুনা মনূচ প্রভুঃ॥ অষ্ট সপ্ততি মেধ্যাশ্বান্ ববন্ধ প্রদদদ্বসু। ভরতস্য হি দৌষ্মন্তে রগ্নিঃ সাচী গুণে চিতঃ ॥ সহস্রং বদ্ধশো যস্মিন্ ব্রাহ্মণা গা বিভেজিরে। ত্রয স্ত্রিংশচ্ছতং হ্যশ্বান্ বদ্ধ্বা বিস্মাপযন্নৃপান্॥ দৌষ্মন্তি রত্যগান্মাযাং দেবানাং গুরু মাযযৌ। মৃগান্ শুক্লদতঃ কৃষ্ণান্ হিরণ্যেন পরীবৃতান্॥ অদাৎ কর্ম্মণি মষ্ণারে নিযুতানি চতুর্দ্দশ। ভরতস্য মহৎ কর্ম্ম নপূর্ব্বে নাপরে নৃপাঃ॥ নৈবা পুর্নৈব প্রাপ্স্যন্তি বাহুভ্যাং ত্রিদিবং যথা। কিরাত হূনান্ যবনান্ পৌণ্ড্রান্ কঙ্কান্ খশাঞ্ছকান্॥ অব্রহ্মণ্য নৃপাংশ্চাহন্ ম্লেচ্ছান্ দিগ্বিজযে ঽখিলান্। জিত্বা পুরাসুরা দেবান্ যে রসৌকাংসি ভেজিরে॥ দেবস্ত্রিযো রসাং নীতাঃ প্রাণিভিঃ পুন রাহরৎ। সর্ব্বান্ কামান্ দুদুহতুঃ প্রজানাং তস্য রোদসী॥ সমা স্ত্রি নব সাহস্রী র্দিক্ষু চক্র মবর্ত্তযৎ। স সম্রাট্ লোকপালাখ্য মৈশ্বর্য্য মধিরাট্ শ্রিযং॥ চক্রঞ্চাস্খলিতং প্রাণান্মৃষেত্যুপররামহ। তস্যাসন্নৃপ বৈদর্ভ্যঃ পত্ন্য স্তিস্রঃ সুসম্মতাঃ॥ জঘ্নু স্ত্যাগভযাৎ পুত্রান্নানুরূপা ইতীরিতে। ইতি শ্রীভাগবতে ৯ স্কন্ধে ২০ অধ্যাযঃ॥ * ॥ ঋষভদেবাৎ ইন্দ্রদত্ত জযন্ত্যাং কন্যাযাং জাত শতপুত্রান্তর্গত জ্যেষ্ঠপুত্রঃ। যথা। অথহ ভগবান্ ঋষভদেবঃ স্ববর্ষং কর্ম্মক্ষেত্র মনুমন্যমানঃ প্রদর্শিত গুরুকুল বাসো লব্ধবরৈ র্গুরুভি রনুজ্ঞাতো গৃহমেধিনাং ধর্ম্মাননুশিক্ষমাণো জযন্ত্যা মিন্দ্রদত্তাযা মুভযবিধং কর্ম্ম সমাম্নায মভিযুঞ্জন্নাত্মজানা মাত্মসমানানাং শতং জনযামাস। যেষাং খলু মহাযোগী ভরতো জ্যেষ্ঠঃ শ্রেষ্ঠগুণ আসীদ্যেনেদং বর্ষং ভারত মিতি ব্যপদিশন্তি

। ইতি শ্রীভাগবতে ৫ স্কন্ধে ৪ অধ্যায়ঃ ॥ * ॥ পাবকপুত্রঃ। যথা। পাবনো লৌকিকো হ্যগ্নিঃ প্রথমো ব্রহ্মণঃ স্মৃতঃ। ব্রহ্মৌদনাগ্নিস্তৎ পুত্রো ভরতো নাম বিশ্রুতঃ ॥ ইতি মাৎস্যে অগ্নিবংশো নাম ৪৮ অধ্যায়ঃ ॥ * ॥ শ্রীরামানুজ ভরতস্য জন্ম যথা। ভরতো নাম কৈকেয্যাং জজ্ঞে সত্যপরাক্রমঃ। সাক্ষাদ্বিষ্ণো শ্চতুর্ভাগঃ সর্ব্বৈঃ সমুদিতো গুণৈঃ ॥ তস্যানুগতঃ শত্রুঘ্নঃ। যথা। ভরতস্যাপি শত্রুঘ্নো লক্ষ্মণাবরজো হি সঃ। প্রাণৈঃ প্রিয়তরো নিত্যং তস্য চাসীত্তথা প্রিয়ঃ ॥ স কুশধ্বজ কন্যাং মাণ্ডবীং পরিণীতবান্। যথা। ভ্রাতা যবীয়ান্ ধর্ম্মজ্ঞ এষ রাজা কুশধ্বজঃ। অস্য ধর্ম্মাত্মনো রাজন্ রূপেণাপ্রতিমং ভুবি ॥ সুতাদ্বয়ং নরশ্রেষ্ঠ পত্ন্যর্থং বরয়ামহে। তমেব মুক্ত্বা জনকো ভরতঞ্চাভ্যভাষত ॥ গৃহাণ পাণিং মাণ্ডব্যাঃ পাণিনা রঘুনন্দন ॥ স নন্দিগ্রামে রাজ্যং কৃতবান্। যথা। সবল্কল জটাধারী মুনিবেশধরঃ প্রভুঃ। নন্দিগ্রামে ঽবসদ্বীরঃ সসৈন্যো ভরত স্তদা ॥ সবালব্যজনং ছত্রং ধারয়ামাস স স্বয়ং। ভরতঃ শাসনং সর্ব্বং পাদুকাভ্যাং নিবেদয়ন্॥ ততস্তু ভরতঃ শ্রীমানভিষিচ্যার্য্য পাদুকে। তদধীন স্তদা রাজ্যং কারয়ামাস সর্ব্বদা ॥ ইতি রামায়ণে বালকাণ্ডে ১৮। ৭২। ৭৩ অধ্যায়াঃ। অযোধ্যাকাণ্ডে ২৪ অধ্যায়শ্চ ॥ * ॥ তস্য দ্বৌপুত্রৌ যথা। ভরতস্যাত্মজৌ বীরৌ তক্ষঃ পুষ্কল এব চ। মাতুলেন সুগুপ্তৌ তু ধর্ম্মেণ সুসমাহিতৌ ॥ ভরতশ্চাগতঃ কৃত্বা কুমারৌ সবলানুগৌ। নিহত্য গন্ধর্ব্ব সুতান্ দ্বে পুরে বিভজিষ্যতঃ ॥ ইতি রামায়ণে উত্তরকাণ্ডে ১০১ অধ্যায়ঃ ॥

ভরতখণ্ডং ক্লী ভারতবর্ষান্তর্গতকুমারিকাখণ্ডং। যথা। কুমারিকেতি বিখ্যাতা যস্যা নাম্না প্রকথ্যতে। ইদং কুমারিকাখণ্ডং চতুর্ব্বর্গ ফলপ্রদং ॥ যথা কৃতাবনীয়ঞ্চ নানাগ্রামাদি কল্পনা। ইদং ভরতখণ্ডঞ্চ যথা সম্যক্ প্রকল্পিতং ॥ ইতি স্কান্দে কুমারিকাখণ্ডে ভূসংস্থিতি নামাধ্যায়ঃ ॥

ভরতপুত্রকঃ পুং নটঃ। ইতি হেমচন্দ্রঃ ॥

ভরতপ্রসূঃ স্ত্রী কেকয়ী। ইতি শব্দরত্নাবলী ॥

ভরতাগ্রজঃ পুং শ্রীরামচন্দ্রঃ। যথা।

শেতে স চিত্ত শযনে মম মীন কূর্ম্ম কোলো হভবন্নৃহরি বামন জামদগ্ন্যঃ। যো হভূদ্ভূব ভরতাগ্রজ কৃষ্ণ বুদ্ধঃ কল্কী সতাঞ্চ ভবিতা প্রহরিষ্যতে হরীন্॥ ইতি বোপদেবঃ॥

ভরথঃ পুং লোকপালঃ। ইত্যুণাদিকোষঃ॥

ভরদ্বাজঃ পুং মুনিবিশেষঃ। স চ উতথ্য পত্ন্যাং মমতাযাং বৃহস্পতি বীর্য্যাজ্জাতঃ। তস্য জন্মবিবরণং যথা। ততো হস্য বিতথে পুত্র জন্মনি পুত্রার্থিনে মরুৎ সোমযাজিনে দীর্ঘতমসা পার্ষ্ণিপা স্তাদ্বৃহস্পতি বীর্য্যাদুতথ্য পত্নী মমতা সমুৎপন্নো ভরদ্বাজাখ্যো নাম পুত্রো মরুদ্ভির্দত্তঃ॥ অস্যাপি নাম নির্ব্বচন শ্লোকঃ পঠ্যতে। মূঢে ভরদ্বাজ নিমং ভরদ্বাজং বৃহস্পতে। যাতৌ যদুক্ত্বা পিতরৌ ভরদ্বাজ স্ততস্তেন মিতি॥ ভরদ্বাজশ্চ তস্য বিতথে পুত্রজন্মনি মরুদ্ভির্দত্তো বিতথ সংজ্ঞা মবাপ॥ * ॥ অস্য টীকা। বিতথে ব্যর্থে সতি। অত্রৈব মিতিহাসঃ। বৃহস্পতে রগ্রজস্যোতথ্যস্য মমতাখ্যা পত্নী গর্ব্ভিণ্যাসীৎ। তস্যাং বৃহস্পতিঃ কামাভিভূতো বীর্য্যং ব্যসৃজৎ। তচ্চ গর্ব্ভং প্রবিশদ্গর্ব্ভস্থেন স্থান সঙ্কোচ ভযাৎ পার্ষ্ণি প্রহারেণাপাস্তং বহিঃ পতিত মপি অমোঘ বীর্য্যতযা বৃহস্পতে র্ভরদ্বাজ নাম পুত্রো হভূৎ। গর্ব্ভস্থশ্চ বৃহস্পতিনা ত্বমান্ধো হপরাধাদন্ধো ভবেতি শপ্তো দীর্ঘতমা নামা ভবৎ। তত্র ভরদ্বাজ নাম নিঃরুক্তি পর স্তৎ পিত্রো র্বিবাদকরো হযং শ্লোকো দেবৈঃ পঠিতঃ। হে মূঢ়ে মমতে দ্বাজং দ্বাভ্যা মাবাভ্যাং জাত মিমং পুত্রং ত্বং ভর রক্ষ। এবং বৃহস্পতিনোক্তেন মমতা তমাহ হে বৃহস্পতে দ্বাজং দ্বাভ্যাং জাত মিম মেকাকিনী কিমিত্যহং ভরিষ্যামি। ত্বমিমং ভরেতি পরস্পর মুক্ত্বা তং পুত্রং ত্যক্ত্বা যস্মাৎ পিতরৌ মমতা বৃহস্পতী ততো যাতৌ। ততো ভরদ্বাজাখ্যো হযং। পাঠান্তরে এবং বিবদমানৌ। যদ্দুঃখাৎ যস্মিন্নিত্যাদ্দুঃখাৎ পিতরৌ যাতা বিত্যর্থঃ। তদেবং তাভ্যাং ত্যক্তো মরুদ্ভির্ভৃতঃ। মরুৎ সোমাখ্যেন চ যাগে নারাধিতৈ র্মরুদ্ভি স্তস্য বিতথে পুত্র জন্মনি সতি দত্তত্বাদ্বিতথ সংজ্ঞাঞ্চাবাপ। ইতি বিষ্ণুপুরাণে ৪ অংশে ১৯ অধ্যাযঃ॥*॥ পক্ষিবিশেষঃ। ভাকই ইতি ভাষা। তৎ পর্য্যাযঃ।

ব্যাঘ্রাটঙ্গ। ইত্যমরঃ ॥ ভরদ্বাজ-কঃ ৩। ইতি শব্দরত্নাবলী ॥

ভরদ্বাজকঃ পুং ব্যাঘ্রাটপক্ষী। ইতি শব্দরত্নাবলী ॥

ভরিণী স্ত্রী হরিদ্বর্ণঃ। ইত্যুণাদি-কোষঃ ॥

ভরিতঃ ত্রি হরিদ্বর্ণঃ। ইত্যুণাদি-কোষঃ ॥ পুষ্টঃ ॥ ভারযুক্তঃ। ভরো-ঽস্য জাত ইত্যর্থে ইত প্রত্যযেন নিষ্পন্নঃ ॥

ভরিমা পুং ভরণং। ইত্যুণাদিকোষঃ

ভরুঃ পুং বিষ্ণুঃ। ইতি সিদ্ধান্তকৌ-মুদ্যামুণাদিবৃত্তিঃ॥ সমুদ্রঃ॥ স্বামী। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥ স্বর্ণং ॥ শিবঃ। ইতি মেদিনী ॥

ভরুজঃ পুং ক্ষুদ্রশৃগালঃ। ইতি হেম-চন্দ্রঃ ॥

ভরুটকং ক্লী ভৃষ্টামিষং। ইতি হেম-চন্দ্রঃ ॥

ভর্গঃ পুং শিবঃ। ইত্যমরঃ॥ জ্যো-তিঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদি-বৃত্তিঃ॥ আদিত্যান্তর্গততেজঃ॥ যথা। আদিত্যান্তর্গতং বর্চো ভর্গাখ্যং মুমুক্ষুভিঃ। জন্ম মৃত্যু বিনাশায দুঃখস্য ত্রিতযস্য চ ॥ ধ্যানেন পু-রুষো যশ্চ দ্রষ্টব্যঃ সূর্য্যমণ্ডলে। ইত্যাহ্নিকতত্ত্বং ॥ ভর্জনং। ইতি ভৃজধাতো র্ভাবে অনট্ প্রত্যযেন নিষ্পন্নং ॥

ভর্গ্যঃ পুং ভর্গঃ। ইত্যমরটীকাযাং ভরত রাযমুকুটৌ ॥

ভর্জনং ক্লী ভৃষ্টিঃ। ভাজা ইতি ভাষা। ইতি শব্দমালা ॥

ভর্ত্তব্যং ত্রি ভরণীযং। পোষণীযং। যথা। বৃদ্ধৌ চ মাতা পিতরৌ সা-ধ্বীভার্য্যা সুতঃ শিশুঃ। অপ্যকার্য্য শতং কৃত্বা ভর্ত্তব্যা মনু রব্রবীৎ ॥ ইতি দাযভাগ টীকাধৃত বচনং ॥

ভর্ত্তা পুং অধিপতিঃ। তৎপর্য্যাযঃ। অধিপঃ ২ ঈশঃ ৩ নেতা ৪ পরি-বৃঢঃ ৫ অধিভূঃ ৬ পতিঃ ৭ ইন্দ্রঃ ৮ স্বামী ৯ নাথঃ ১০ আর্য্যঃ ১১ প্রভুঃ ১২ ঈশ্বরঃ ১৩ বিভুঃ ১৪ ঈশিতা ১৫ ইনঃ ১৬ নাযকঃ ১৭। ইতি হেমচন্দ্রঃ ॥ ধাতরি পোষ্টরি চ ত্রি। ইতি মেদিনী ॥

ভর্ত্তৃঘ্নী স্ত্রী পতিঘাতিনী। ইতি মহাভারতং ॥

ভর্ত্তৃদারকঃ পুং নাট্যোক্তৌ যুব-রাজঃ। ইত্যমরঃ ॥

ভর্ত্তৃদারিকা স্ত্রী নাট্যোক্তৌ রাজ-সুতা। ইত্যমরঃ ॥

ভর্ত্তৃহরিঃ পুং স্বনামখ্যাতঃ কাব্য-কর্ত্তৃ রাজবিশেষঃ। ইতি জটাধরঃ

॥ সচ বিক্রমাদিত্য রাজভ্রাতা ॥

ভর্ৎস কড এ ভর্ৎসনে। ইতি কবিকল্পদ্রুমঃ ॥ রেফযুক্তঃ। দন্ত্যবর্গাদ্যোপধঃ। ভর্ৎসো ভর্ৎসনং। ভর্ৎসনস্ত্বপকারগী রিত্যমরঃ ॥ ক ড ভর্ৎসযতে খলং রাজা। এ ভর্ৎসযতি ভর্ৎসযতে। অযমাত্মনেপদীত্যন্যে। কদাচিৎ পরস্মৈ পদার্থো এ কারঃ। ইতি দুর্গাদাসঃ ॥

ভর্ৎসনং স্ত্রী অপকারগীঃ। ইত্যমরঃ ॥ চৌরো হসি ত্বাং ঘাতযিষ্যামি ইত্যাদ্যপকারার্থং বচনং। ইতি ভরতঃ ॥ তৎপর্য্যাযঃ। অৎসা ২ নিন্দা ৩ জুগুপ্সা ৪ গর্হা ৫ গর্হণং ৬ নিন্দনং ৭ অৎসনং ৮ পরিবাদঃ ৯ পরীবাদঃ ১০ জুগুপ্সনং ১১ আক্ষেপঃ ১২ অবর্ণঃ ১৩ নির্ব্বাদঃ ১৫ অপক্রোশঃ ১৫। ইতি শব্দরত্নাবলী ॥

ভর্ৎসপত্রিকা স্ত্রী মহানীলী। ইতি রাজনির্ঘণ্টঃ ॥

ভর্ম্ম স্ত্রী স্বর্ণং ॥ ভৃতিঃ ॥ নাভিঃ। ইতি দ্বিরূপকোষঃ ॥

ভর্ম্মন্ স্ত্রী বেতনং। ইতি হেমচন্দ্রঃ ॥ স্বর্ণং ॥ ধুস্তূরং। ইত্যমরঃ ॥ নাভিঃ। ইতি বিশ্বঃ ॥

ভর্ম্মণ্যা স্ত্রী বেতনং। ইতি হেমচন্দ্রঃ ॥

ভর্ব্ব হিংসে। ইতি কবিকল্পদ্রুমঃ ॥ রেফোপধঃ। ভর্ব্বতি। ইতি দুর্গাদাসঃ ॥

ভর্ব্ব হিংসৈ। ইতি কবিকল্পদ্রুমঃ ॥ ভর্ব্বতি। অন্ত্যস্থবান্তোহ্যং। ইতি দুর্গাদাসঃ ॥

ভল ঙ দানবধনিরূপণেষু। ইতি কবিকল্পদ্রুমঃ ॥ ঙ ভলতে। ইতি দুর্গাদাসঃ ॥

ভল ক ঙ নিরূপণে। ইতি কবিকল্পদ্রুমঃ ॥ ক ঙ ভালযতে। ইতি দুর্গাদাসঃ ॥

ভলতা স্ত্রী রাজবলা। ইতি শব্দরত্নাবলী ॥

ভলন্দনঃ পুং কান্যকুব্জদেশীযনৃপবিশেষঃ। যথা। কলাবতী কান্যকুব্জে বভূবাযোনি সম্ভবা। জাতিস্মরা মহাসাধ্বী সুন্দরী কমলা কলা ॥ কান্যকুব্জে নৃপশ্রেষ্ঠো ভলন্দন উরুক্রমঃ। স তাং সংপ্রাপ যোগান্তে যজ্ঞকুণ্ড সমুত্থিতাং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৭ অধ্যাযঃ ॥

ভল্ল ঙ দানবধনিরূপণেষু। ইতি কবিকল্পদ্রুমঃ ॥ ল দ্বযান্তঃ। ঙ ভল্লতে। ইতি দুর্গাদাসঃ ॥

ভল্লঃ পুং ভল্লূকঃ। ইত্যমরঃ।

ভল্লঃ পুং স্ত্রী শস্ত্রভেদঃ। ভালা ইতি ভাষা। ইতি মেদিনী শব্দমালা চ॥

ভল্লকঃ পুং ভল্লুকঃ। ইতি দ্বিরূপকোষঃ॥

ভল্লপুচ্ছী স্ত্রী গবেধুকা। গোরক্ষতণ্ডুলা ইতি খ্যাতা। ইতি শব্দচন্দ্রিকা॥

ভল্লাটং ক্লী শশিধ্বজরাজপুরং। যথা। সেনাগণৈঃ পরিবৃতঃ কল্কির্নারায়ণঃ প্রভুঃ। ভল্লাট নগরং প্রাযাৎ খড়্গধৃক্ সপ্তিবাহনঃ। ইতি কল্কিপুরাণে ২২ অধ্যায়ঃ॥

ভল্লাতঃ পুং ভল্লাতকবৃক্ষঃ। ইতি রত্নমালা॥

ভল্লাতকঃ পুং বৃক্ষবিশেষঃ। ভেলা ইতি ভাষা। তৎপর্য্যায়ঃ। অরুষ্করঃ ২ ভল্লাতঃ ৩ শোথহৃৎ ৪ বহ্নিনামা ৫ বীরতরুঃ ৬ ব্রণকৃৎ ৭ ভূতনাশনঃ ৮। ইতি রত্নমালা॥ ভল্লাতকী ৯ অগ্নিমুখী ১০ বীরবৃক্ষঃ ১১। ইত্যমরঃ॥ নির্দহনঃ ১২ তপনঃ ১৮ অনলঃ ১৯ কৃমিঘ্নঃ ২০ শৈলবীজঃ ২১ বাতারিঃ ২২ স্ফোটবীজকঃ ২৩ পৃথগ্বীজঃ ২৪ ধনুর্বৃক্ষঃ ২৫ বীজপাদপঃ ২৬ বহ্নিঃ ২৭। অস্যগুণাঃ। কটুত্বং। তিক্তত্বং। কষায়ত্বং। উষ্ণত্বং। কৃমি কফ বাতোদরানাহ মেহ দুর্নাম নাশিত্বঞ্চ॥ তৎ ফলগুণাঃ। কষায়ত্বং। মধুরত্বং। কোষ্ণত্বং। কফার্ত্তি শ্রম শ্বাসানাহ বিবন্ধ শূল জঠরাধ্মান কৃমি নাশিত্বঞ্চ॥ তন্মজ্জগুণাঃ। বিশেষে দাহ শমনত্বং। পিত্তাপহত্বং। তর্পণত্বং। বাতারোচক হারিত্বং। দীপ্তিজনকত্বং। পিত্ত নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ * ॥ অপিচ। ভল্লাতকং ত্রিষু প্রোক্ত মরুষ্কো হরুষ্করো হগ্নিকঃ। তথৈবাগ্নিমুখী ভল্লী বীরবৃক্ষশ্চশোফহৃৎ॥ ভল্লাতক ফলং পক্বং স্বাদুপাক রসং লঘু। কষায়ং পাচনং স্নিগ্ধং তীক্ষ্ণোষ্ণং ছেদি ভেদনং॥ মেধ্যং বহ্নিকরং হন্তি কফ বাত ব্রণোদরং। কুষ্ঠার্শো গ্রহণী গুল্ম শোফানাহ জ্বর ক্রিমীন্॥ তন্মজ্জা মধুরো বৃষ্যো বৃংহণো বাত পিত্তহা। বৃন্তমারুষ্করং স্বাদু পিত্তঘ্নং কেশ্য মগ্নিকৃৎ॥ ভল্লাতকঃ কষায়োষ্ণঃ শুক্রলো মধুরো লঘুঃ। বাত শ্লেষ্মোদরানাহ কুষ্ঠার্শো গ্রহণী গদান্॥ হন্তি গুল্ম জ্বরং চিত্র বহ্নিমান্দ্য কৃমি ব্রণান্। ইতি ভাবপ্রকাশঃ॥ * ॥ অন্যচ। ভল্লাতক ফলং স্নিগ্ধং ক্রিমি দুর্নাম নাশনং। দন্তস্থৈর্য্যকরং

গ্রাহি কষায়ং মধুরঞ্চ তৎ ॥ ভ
ল্লাতবৃন্তং মধুরং কষায়ং বাতকো-
পনং। ইতি রাজবল্লভঃ ॥

ভল্লাতকী স্ত্রী ভল্লাতকবৃক্ষঃ। ইত্য-
মরঃ ॥

ভল্লিকা স্ত্রী ভল্লাতকঃ। ইতি শব্দ-
চন্দ্রিকা ॥

ভল্লী ত্রি ভল্লাতকঃ। ইতি শব্দ-
রত্নাবলী ॥

ভল্লুকঃ পুং ভালুকঃ। ইত্যমরঃ ॥

ভল্লূকঃ পুং জন্তুবিশেষঃ। ভালুক
ইতি ভাষা। তৎপর্য্যায়ঃ। ঋক্ষঃ ২
ভল্লঃ ৩ সশল্যঃ ৪ দুর্ঘোষঃ ৫ ভল্লু-
কঃ ৬ পৃষ্ঠদৃষ্টিঃ ৭ দ্রাবিষ্টঃ ৮ দীর্ঘ
কেশঃ ৯ চিরায়ুঃ ১০ দুশ্চরঃ ১১
দীর্ঘদর্শী ১২। ইতি রাজনির্ঘণ্টঃ ॥
ভালুকঃ ১৩ ভালূকঃ ১৪ অচ্ছঃ ১৫
ভাল্লুকঃ ১৬ ভীলুকঃ ১৭। ইতি শ-
ব্দরত্নাবলী ॥ * ॥ শ্যোনাক প্রভে-
দঃ ॥ অঙ্কুরঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভবং স্ত্রী ভব্যং। চালতা। ইতি
ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

ভবঃ পুং জন্ম ॥ শিবঃ। ইত্যমরঃ ॥
স চ জলমূর্ত্তিঃ। যথা। ভবায় জল
মূর্ত্তয়ে নমঃ। ইতি পার্থিব শিবলি-
ঙ্গপূজাপ্রযোগঃ ॥ ক্ষেমঃ ॥ সংসারঃ
॥ সত্তা ॥ প্রাপ্তিঃ। ইতি মেদিনী ॥

ভবকঃ পুং আশীর্ব্বাচকঃ। ইতি
সংক্ষিপ্তসারঃ ॥

ভবঘস্মরঃ পুং দাবানলঃ। ইতি
শব্দমালা।

ভবৎ ত্রি যুষ্মদর্থং ॥ বর্ত্তমানার্থং।
ইতি মেদিনী ॥ অত্র অদ্যর্থে ভা
ধাতো র্ডবতু প্রত্যয়েন নিষ্পন্নং। ত-
স্য লিঙ্গত্রয়ে রূপং। ভবান্ ভবতী
ভবৎ ॥ দ্বিতীয়ার্থে ভূধাতোঃ শতৃ
প্রত্যয়েন নিষ্পন্নং। তস্য লিঙ্গত্রয়ে
রূপং ভবন্ ভবন্তী ভবৎ ॥ বাণ-
ভেদে স্ত্রী। ইতি চ মেদিনী ॥

ভবতী স্ত্রী বাণভেদঃ। সতু বিষাক্তঃ
। ইতি শব্দরত্নাবলী ॥ দীপ্তিমতী।
যথা। স্বর্গারোহণবৈজয়ন্তি ভব-
তীং ভাগীরথীং প্রার্থয়ে। ইতি বা-
ল্মীকিকৃত গঙ্গাস্তোত্রং ॥

ভবদারু স্ত্রী দেবদারুবৃক্ষঃ। ইতি
রাজনির্ঘণ্টঃ ॥

ভবদীয়ং ত্রি ভবতইদং। যুষ্মৎস-
ম্বন্ধি। যথা। শ্রুত্বাতিদূরে ভবদীয়
কীর্ত্তিং কর্ণৌ চ তুষ্টৌ নচ চক্ষুষী
মে। তয়ো র্বিবাদং পরিহর্ত্তুমিচ্ছন্
সমাগতো২হং তব দর্শনায়।
ইত্যুদ্ভটঃ ॥

ভবনং ক্লী গৃহং ॥ ভাবঃ। ইতি
মেদিনী ॥

ভবনাশিনী স্ত্রী সরযূনদী। ইতি পুরাণং ॥

ভবনীয়ং ত্রি ভবিতব্যং। ভব্যং। উৎপত্ত্যর্হং। ইতি মুগ্ধবোধব্যাকরণং ॥

ভবন্তঃ পুং কালভেদঃ। সতু বর্ত্তমানঃ ইত্যুণাদিকোষঃ ॥ ভবচ্ছব্দস্য পৃথগ্না বহুবচনান্ত রূপো হপ্যয়ং ॥

ভবন্তিঃ পুং বর্ত্তমানকালঃ। ইত্যুণাদিকোষঃ সংক্ষিপ্তসারোণাদিবৃত্তিশ্চ ॥

ভবভূতিঃ পুং কবিবিশেষঃ। সচ ভোজরাজস্য পণ্ডিতঃ। মালতীমাধবাদি নাটককর্ত্তা চ। তৎপর্য্যায়ঃ। ভূদ্দর্ব্বঃ ২। ইতি জটাধরঃ ॥ মহাদেবস্য ঐশ্বর্য্যঞ্চ ॥

ভবরুদ্ স্ত্রী প্রেতপটহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভবাত্মজা স্ত্রী মনসাদেবী। ইতি শব্দমালা ॥

ভবাদৃক্শ ত্রি যুষ্মৎসদৃশঃ। ভবাভবাদৃশঃ নিব দৃশ্যতে য ইতি ব্যুৎ. ভবাদৃক্ষঃ। পত্ত্যা ভবচ্ছব্দ পূর্ব্বক দৃশধাতোঃ কর্ম্মণি ক্রমেণ ক্বিপ্ টক্ সক্ প্রত্যয়েন নিষ্পন্নঃ। ইতি ব্যাকরণং ॥

ভবানী স্ত্রী ভবস্য ভার্য্যা। দুর্গা। ইত্যমরঃ ॥ এতন্নাম কারণং যথা। রুদ্রো ভবঃ সমাখ্যাতো ভবঃ সংসারসাগরঃ। ভবঃ কামস্তথা সৃষ্টি র্ভবানী পরিকীর্ত্তিতা ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥

ভবানীগুরুঃ পুং হিমালয়পর্ব্বতঃ। ইতি হেমচন্দ্রঃ ॥

ভবাভীষ্টঃ পুং গুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভবাব্ধিঃ পুং সংসাররূপসমুদ্রঃ। যথা। ধ্যেয়ং সদা পরিভবঘ্নমভীষ্টদোহং তীর্থাস্পদং শিব বিরিঞ্চিনুতং শরণ্যং। ভৃত্যার্ত্তিহং প্রণতপাল ভবাব্ধিপোতং বন্দে মহাপুরুষ তে চরণারবিন্দং। ইতি শ্রী ভাগবতে ১১ স্কন্ধে ৫ অধ্যায়ঃ ॥

ভবায়না স্ত্রী গঙ্গা। ইতি শব্দরত্নাবলী ॥

ভবিকং ক্লী মঙ্গলং ॥ তদ্বতি ত্রি। ইত্যমরঃ ॥

ভবিতঃ ত্রি অতীতোৎপত্তিকঃ। ভূতঃ। ইতি জটাধরঃ ॥

ভবিতব্যং ত্রি ভবনীয়ং। ভব্যং। ইতি ভবিষ্যৎকালে কর্ম্মণি ভাবে শক্যার্হ প্রৈষ্যানুজ্ঞা প্রাপ্তকালার্থে চ ভূধাতো স্তব্য প্রত্যয়েন নিষ্পন্নং। ইতি ব্যাকরণং ॥ যথা। ন ভবস্ত্যা-

গ্রহং শোচ্যো নাযং রাজাপরাধ্য
তি। ভবিতব্য মনেনৈব যেনাহং
নিধনং গতঃ॥ ইতি বহ্নিপুরাণং॥

ভবিতব্যতা স্ত্রী ভাগ্যং। ইতি জটা
ধরঃ॥

ভবিতা ত্রি ভবনশীলঃ। ইতি ভরতঃ
॥ সাধু ভবনশীলঃ। ইতি মুকুটঃ॥
তৎপর্য্যায়ঃ। ভূষ্ণুঃ ২ ভবিষ্ণুঃ ৩।
ইত্যমরঃ॥

ভবিনঃ পুং কাব্যকর্ত্তা। ইতি ত্রি-
কাণ্ডশেষঃ॥

ভবিলঃ পুং বিষ্ণুঃ। ইতি ত্রিকাণ্ড-
শেষঃ॥ ভব্যঃ। ইতি সিদ্ধান্তকৌ-
মুদ্যামুণাদিপাদঃ॥

ভবিষ্ণুঃ ত্রি ভবিতা। ইত্যমরঃ॥

ভবিষ্যঃ ত্রি ভবিষ্যৎকালঃ। ইতি
হেমচন্দ্রঃ॥ পুরাণবিশেষে ক্লী।
যথা। চতুর্দ্দশং ভবিষ্যং স্যাত্তথা
পঞ্চশতানি চ। ইতি শ্রীভাগবতে
১২ স্কন্ধে ১৩ অধ্যায়ঃ॥

ভবিষ্যৎ ত্রি কালবিশেষঃ। তস্য
লক্ষণং। বর্ত্তমান প্রাগভাব প্রতি-
যোগিত্বং। ইতি সারমঞ্জরী॥ বর্ত্ত
মানকালোত্তরকালীনোৎপত্তিক
ত্বং। ইতি শিরোমণিকৃতপদার্থটী-
কা খণ্ডনং॥ তৎপর্য্যায়ঃ। অনাগ-
তং ২ শ্বস্তনং ৩ প্রগেতনং ৪ বর্ত্স্যৎ
৫ বর্ত্তিষ্যমাণং ৬ আগামি ৭ ভাবি
৮। ইতি রাজনির্ঘণ্টঃ॥ অদ্যতনে
ভব্যে ডী দূরভব্যে তী। ইতি সাম্প্র-
দায়িকঃ। যথা শ্বো ভবিতা বর্ষান্ত-
রে ভবিষ্যতি। ইতি দুর্গাদাসঃ॥

ভব্যং ক্লী ফলবিশেষঃ। চাল্তা
ইতি ভাষা। তৎপর্য্যায়ঃ। ভব্যং ২
ভবিষ্যং ৩ ভাবনং ৪ বক্ত্রশোধনং ৫
লোমফলং ৬ পিচ্ছিলবীজং ৭।
অস্য গুণাঃ। অম্লত্বং। কটুত্বং। উ-
ষ্ণত্বঞ্চ॥ বালস্য তস্য গুণাঃ। বাত
কফাপহত্বং। পক্বস্য তস্য গুণাঃ।
মধুরাম্লত্বং। রুচিকারিত্বং। শূল
শূলহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
অপিচ। ভব্যং স্বাদু কষায়াম্লং হৃদ্য
মাস্যবিশোধনং। তদেব পক্বং
দোষঘ্নং গুরু গ্রাহি বিষাপহং॥
ইতি রাজবল্লভঃ॥ *॥ অস্থি।
ইতি মেদিনী॥

ভব্যং ত্রি শুভং॥ সত্যং॥ যোগ্যং॥
ভাবি। ইতি মেদিনী শব্দরত্নাবলীচ

ভব্যঃ পুং কর্ম্মরঙ্গবৃক্ষঃ। ইতি মেদি-
নী॥ রসভেদে পুং ক্লী। ইতি শব্দ-
রত্নাবলী॥

ভব্যা স্ত্রী উমা॥ গজপিপ্পলী। ইতি
মেদিনী॥

ভষ বৃক্ষে॥ পিশুনোক্তৌ। ইতি

কবিকল্পদ্রুমঃ ॥ বুক্কঃ অক্কুরাদি কর্ত্তৃক শব্দঃ। ভষতি শ্বা। ভষত্যন্য দোষং খলঃ সূচযতীত্যর্থঃ। ভক্ষনে ইতি প্রাঞ্চঃ। ভষতি শ্বা পান্থং শব্দেন নির্ভর্ত্সযতীত্যর্থঃ। ইতি রমানাথঃ। ইতি দুর্গাদাসঃ ॥

ভষঃ পুং অক্করঃ। ইতি রত্নমালা ॥

ভষকঃ পুং স্ত্রী অক্কুরঃ। ইত্যমরঃ ॥

ভষণং ক্লী বুক্কনং। অক্কুরশব্দঃ। ইতি হেমচন্দ্রঃ ॥

ভষা স্ত্রী স্বর্ণক্ষীরী। ইতি রত্নমালা ॥

ভষী স্ত্রী শুনী। ইতি শব্দরত্নাবলী ॥

ভস র লি দ্যুত্যৌ ॥ ভক্সে। ইতি কবিকল্পদ্রুমঃ ॥ র বৈদিকঃ। লি বভস্তি। ইতি দুর্গাদাসঃ ॥

ভসৎ স্ত্রী কাষ্ঠং ॥ অশ্বমাংসং ॥ জঘনং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

ভসৎ স্ত্রী ভাস্করঃ ॥ যোনিঃ। ইতি মেদিনী ॥ মাংসং ॥ কারণ্ডবপক্ষী ॥ প্লবঃ। ইত্যুণাদিকোষঃ ॥ কালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভসনঃ পুং ভ্রমরঃ। ইতি ভূরিপ্রযোগঃ ॥

ভসন্তঃ পুং কালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভসিতং ক্লী ভস্ম। ইতি হেমচন্দ্রঃ ॥

ভসূচকঃ পুং দৈবজ্ঞঃ। ইতি শব্দরত্নাবলী ॥

ভস্ত্রকা স্ত্রী চর্ম্মপ্রসেবিকা। ইতি শব্দরত্নাবলী ॥

ভস্ত্রা স্ত্রী অগ্নিদীপকচর্ম্মনির্ম্মিতযন্ত্রবিশেষঃ। ভাথী ইতি যাঁতা ইতিচ ভাষা। তৎপর্য্যাযঃ। চর্ম্মপ্রসেবিকা ২। ইত্যমরঃ ॥ চর্ম্মপ্রসেবকঃ ৩। ইতি ভরতঃ ॥ ভস্ত্রাকা ৪ ভস্ত্রকা ৫ ভস্ত্রী ৬। ইতি শব্দরত্নাবলী ॥ ভস্ত্রিকা ৭। ইতি ব্যাকরণং ॥

ভস্ত্রাকা স্ত্রী ভস্ত্রা। ইতি শব্দরত্নাবলী ॥

ভস্ত্রী স্ত্রী ভস্ত্রা। ইতিশব্দরত্নাবলী ॥

ভস্ম ক্লী শিবাঙ্গভূষণং। ছাই ইতি ভাষা। যথা। অস্যাঙ্গ ভূষণং ভস্ম বিভূতি র্ভূতি রস্য তু। ইতি শব্দরত্নাবলী ॥ তদ্ভস্ম কামদেব শরীরজং। যথা। প্রসীদ সর্ব্বভূতেশ ভক্ত্যা ত্বৎ প্রণতা বযং। ইতি স্ম বদতাং তেষা মমরাণাং তদানলঃ ॥ ললাট চক্ষুঃ সম্ভূতো ভস্মাকার্ষী মনোভবং। দগ্ধা কামং তদা বহ্নি র্জ্বালামালাতি দীপিতঃ ॥ সংস্তম্ভিতো ২থ বিধিনা হরং গন্তুং শশাক ন। মহাদেবো ২থ তদ্ভস্ম মনোভব শরীরজং ॥ আদায সর্ব্ব-

গাত্রেষু ভূতিলেপং তদাকরোৎ। লেপশেষাণি ভস্মানি সমাদায তদা হরঃ॥ সগণো হন্তর্দধে কালীং বিহায বিধি সম্মতে। ইতি কালিকাপুরাণে ৪১ অধ্যাযঃ॥ * ॥ ভস্ম মৃক্ষণং সপ্তবিধস্নানান্তর্গতাগ্নেযস্নানং। যথা। আগ্নেযং ভস্মনা স্নানং বাযব্যং গোরজঃ স্মৃতং। ইতি যামলঃ॥ * ॥ শিবপূজাযাং ললাটে তস্য ধারণ মাবশ্যকং। যথা। বিনা ভস্ম ত্রিপুণ্ড্রেণ বিনা রুদ্রাক্ষমালযা। পূজিতো হপি মহাদেবো ন স্যাত্তস্য ফলপ্রদঃ॥ ইত্যাহ্নিকতত্ত্বং॥ * ॥ তেন কাংস্য শুদ্ধি র্যথা। অম্লসাহেমরূপ্যাযঃ কাংস্যং শুধ্যতি ভস্মনা। অম্লৈ স্তাম্রঞ্চ রৈত্যঞ্চ পুনঃ পাকেন মৃণ্মযং॥ ইতি শুদ্ধিতত্ত্বং॥ * ॥ অশ্মরীবিকারঃ। যথা। শর্করা সিকতামেহো ভস্মাখ্যো হশ্মরী বৈকৃতং। অশ্মর্য্যাঃ শর্করাজ্ঞেযা তুল্য ব্যঞ্জন বেদনা। ইতি সুশ্রুতে নিদানস্থানে অশ্মরী নিদানং॥

ভস্মকং ক্লী রোগভেদঃ। ভস্মকীট ইতি খ্যাতঃ॥ বিডঙ্গঃ॥ কলধৌতং। ইতি মেদিনী॥ ভস্মকস্য নিদান সংপ্রাপ্তি পূর্বকং লক্ষণ মাহ। কট্বাদি রুক্ষান্ন ভুজাং নরাণাং ক্ষীণে কফে মারুত পিত্ত বৃদ্ধৌ। অতিপ্রবৃদ্ধঃ পবনান্বিতো হগ্নি র্ভুক্তং ক্ষণাদ্ভস্ম করোতি যস্মাৎ॥ তস্মাদসৌ ভস্মক সংজ্ঞকো হভূদুপেক্ষিতো হযং পচতে চ ধাতূন্॥ ভস্মকস্য সোপদ্রব মরিষ্ট মাহ। তৃট্স্বেদ দাহ মূর্চ্ছাদীন্ কৃত্বৈবাত্যগ্নি সম্ভবান্। পক্বান্ন মাশু ধাত্বাদীন্ স ক্ষিপ্রং নাশযেন্নরং॥ ইতি ভাবপ্রকাশঃ॥

ভস্মকারঃ পুং রজকঃ। ইতি শব্দমালা॥

ভস্মগন্ধা স্ত্রী রেণুকা। ইতি ভাবপ্রকাশঃ॥

ভস্মগন্ধিকা স্ত্রী রেণকাখ্যগন্ধদ্রব্যং। ইতি জটাধরঃ॥

ভস্মগন্ধিনী স্ত্রী রেণুকাখ্যগন্ধদ্রব্যং। ইত্যমরঃ॥

ভস্মগর্ভঃ পুং তিনিশবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ভস্মগর্ভা স্ত্রী কপিলশিংশপা। ইত্যমরঃ॥ রেণুকা নাম গন্ধদ্রব্যং। ইতি জটাধরঃ॥

ভস্মতূলং ক্লী গ্রামকূটঃ॥ পাংশুবর্ষণং॥ হিমং। ইতি মেদিনী॥

ভস্মরোহা স্ত্রী দগ্ধাবৃক্ষঃ। ইতি

রাজনির্ঘণ্টঃ ॥

ভস্মবেধকঃ পুং কর্পূরঃ। ইতি শব্দরত্নাবলী ॥

ভস্মাহ্বয়ঃ পুং কর্পূরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভক্ষ ঞ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ ॥ ঞ ভক্ষতি ভক্ষতে। ইতি দুর্গাদাসঃ ॥

ভক্ষ ক ভক্ষে। ইতি কবিকল্পদ্রুমঃ ॥ ক ভক্ষয়তি। ইতি দুর্গাদাসঃ ॥

ভক্ষকঃ ত্রি খাদকঃ। ভক্ষণপরঃ। তৎপর্য্যায়ঃ। ঘস্মরঃ ২ অদ্মরঃ ৩। ইত্যমরঃ ॥

ভক্ষটকঃ পুং ক্ষুদ্রগোক্ষুরকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভক্ষণং ক্লী দ্রবেতরদ্রব্যগলাধঃকরণং। তৎপর্য্যায়ঃ। ন্যাদঃ ২ স্বদনং ৩ খাদনং ৪ অশনং ৫ নিঘসঃ ৬ বল্ভনং ৭ অভ্যবহারঃ ৮ জগ্ধিঃ ৯ জক্ষণং ১০ লেহঃ ১১ প্রত্যবসানং ১২ ঘসিঃ ১৩ আহারঃ ১৪ প্সানং ১৫ অবস্বাণং ১৬ বিস্বাণং ১৭ ভোজনং ১৮ জেমনং ১৯ অদনং ২০। ইতি হেমচন্দ্রঃ ॥ দ্রব্যবিশেষস্য ভক্ষণ নিষেধো যথা। শণশাকং বৃথা মাংসং করেণ মথিতং দধি। তর্জ্জন্যা দন্তধাবঞ্চ সদ্যো গোমাংস ভক্ষণং।

ইতি কর্ম্মলোচনং ॥

ভক্ষণীয়ং ত্রি ভক্ষ্যদ্রব্যং। ভক্ষণযোগ্যং। ইতি ভক্ষধাতোঃ কর্ম্মণ্যনীয়প্রত্যয়েন নিষ্পন্নং। ইতি ব্যাকরণং ॥

ভক্ষপত্রা স্ত্রী নাগবল্লী। ইতি রাজনির্ঘণ্টঃ ॥

ভক্ষিতং ত্রি কৃতভক্ষণবস্তু। তৎপর্য্যায়ঃ। চর্ব্বিতং ২ লিপ্তং ৩ প্রত্যবসিতং ৪ গিলিতং ৫ খাদিতং ৬ প্সাতং ৭ অভ্যবহৃতং ৮ অন্নং ৯ জগ্ধং ১০ গ্রস্তং ১১ গ্লস্তং ১২ অশিতং ১৩ ভুক্তং ১৪। ইত্যমরঃ ॥ জক্ষিতং ১৫। ইতি শব্দরত্নাবলী ॥

ভক্ষ্যং ত্রি ভক্ষিতব্যং। ভক্ষণীয়ং। যথা। প্রতিপদি কুষ্মাণ্ডং ন ভক্ষ্যং। দশম্যাং কলম্বী ন ভক্ষ্যা। ইতি স্মৃতিসর্ব্বস্বং ॥ অপিচ। মাসমেকং নরো যাতি দ্বৌ মাসৌ মৃগশূকরৌ। অহিরেক দিনং যাতি অদ্য ভক্ষ্যো ধনুর্গুণঃ ॥ ইতি হিতোপদেশঃ ॥

ভক্ষ্যকারঃ ত্রি পিষ্টকবিক্রয়জীবী ॥ পিষ্টকশিল্পী। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। আপূপিকঃ ২ কান্দবিকঃ ৩। ইত্যমরঃ ॥ পূপিকঃ ৪ পূপবিক্রয়ী ৫ মোদকাদিবিক্রয়ী ৬। ইতি শব্দরত্নাবলী ॥

ভক্ষ্যাভক্ষ্যং ক্লী খাদ্যাখাদ্যদ্রব্যং। যথা। ভক্ষ্যাভক্ষ্যান্যনেকানি ব্রাহ্মণস্য বিশেষতঃ। অত্র শিষ্টা যথা ব্রূয় স্তথা কার্য্যবিনির্ণয়ঃ। ইত্যেকাদশীতত্ত্বে শঙ্খ বচনং॥ ❀॥ নারদ উবাচ। ভক্ষ্যং কিম্বাপ্যভক্ষ্যঞ্চ দ্বিজানাং গৃহিণাং প্রভো। যতীনাং বৈষ্ণবানাঞ্চ বিধবা ব্রহ্মচারিণাং॥ কিং কর্ত্তব্য মকর্ত্তব্য মভোগ্যং ভোগ্যমেব চ। সর্ব্বং কথয় সর্ব্বজ্ঞ সর্ব্বেশ সর্ব্বকারণ॥ শ্রীমহেশ্বর উবাচ। কশ্চিত্তপস্বী বিপ্রশ্চ নিরাহারী চিরং মুনিঃ। কশ্চিৎ স মীরণাহারী ফলাহারী চ কশ্চন॥ অন্নাহারী যথা লোকে গৃহী চ গৃহিণী যুতঃ। যেষা নিষ্ঠা চ যা ব্রহ্মন্ রুচীনাং বিবিধা গতিঃ॥ হবিষ্যান্নং ব্রাহ্মণানাং প্রশস্তং গৃহিণাং সদা। নারায়ণোচ্ছিষ্ট নিষ্ট মনিবেদ্য নভক্ষ্যকং॥ অন্নং বিষ্ঠা জলং মূত্রং যদ্বিষ্ণো রনিবেদনং। বিণ্মূত্রং সর্ব্ব পাপোক্ত মন্নঞ্চ হরিবাসরে॥ ব্রাহ্মণঃ কামতো হ্যন্নঞ্চ যো ভুঙ্ক্তে হরিবাসরে। ত্রৈলোক্য জনিতং পাপং সো হপি ভুঙ্ক্তে ন সংশয়ঃ॥ ন ভোক্তব্যং ন ভোক্তব্যং ন ভোক্তব্যঞ্চ নারদ। গৃহিভি ব্রাহ্মণৈ রন্নং সংপ্রাপ্তে হরিবাসরে॥ গৃহী শৈবশ্চ শাক্তশ্চ ব্রাহ্মণো জ্ঞান দুর্ব্বলঃ। প্রযাতি কালসূত্রঞ্চ ভুক্ত্বা চ হরিবাসরে॥ ক্রমিভিঃ শালমানৈশ্চ ভক্ষিত স্তত্র তিষ্ঠতি। বিণ্মূত্র ভক্ষণং কৃত্বা যাবদিন্দ্রা শ্চতুর্দ্দশ॥ জন্মাষ্টমীদিনে রামনবমী দিবসে হরেঃ। শিবরাত্রৌ চ যো ভুঙ্ক্তে সোপি দ্বিগুণ পাতকী॥ উপবাসাসমর্থশ্চেৎ ফল মূল জলং পিবেৎ। নষ্টে শরীরে স ভবেদন্যথা চাত্ম ঘাতকঃ॥ সকৃদ্ভুঙ্ক্তে হবিষ্যান্নং বিষ্ণো নৈবেদ্য মেব চ। ন ভবেৎ প্রত্যবায়ী স চোপবাসফলং লভেৎ॥ একাদশ্যা মনাহারী গৃহী বিপ্রাশ্চ ভারত। তেচ তিষ্ঠন্তি বৈকুণ্ঠে যাবদ্বৈ ব্রহ্মণো বয়ঃ॥ গৃহিণাং শৈব শাক্তানা মিদমুক্তঞ্চ নারদ। বিশেষতো বৈষ্ণবানাং যতীনাং ব্রহ্মচারিণাং॥ নিত্যং নৈবেদ্য ভোজী চ শ্রীকৃষ্ণস্য চ বৈষ্ণবঃ। নিত্যং শতোপবাসানাং জীবন্মুক্তো লভেৎ ফলং॥ বাঞ্ছন্তি তস্য সংস্পর্শং তীর্থানি সর্ব্ব দেবতাঃ। আলাপং দর্শনঞ্চৈব সর্ব্ব পাপ প্রণাশনং॥ দ্বিরিন্নম ন্নং পৃথুকং শুদ্ধং দেশ বিশেষকে। নাত্যন্ত শস্তং বিপ্রাণাং ভক্ষণে চ নিবেদনে॥ অভক্ষ্যঞ্চ

যতীনাঞ্চ বিধবা ব্রহ্মচারিণা‌ং। তাম্বূলঞ্চ যথা ব্রহ্মন্ তথৈব তে বস্তুনী ধ্রুবং॥ তাম্বূলং বিধবাস্ত্রীণাং যতীনাং ব্রহ্মচারিণাং। তপস্বিনাঞ্চ বিপ্রেন্দ্র গোমাংস সদৃশং ধ্রুবং॥ সর্ব্বেষাং ব্রাহ্মণানাঞ্চ অভক্ষ্যং শৃণু নারদ। যদুক্তং সামবেদে চ হরিণা চাহ্নিক ক্রমে॥ তাম্রপাত্রে পয়ঃপানং উচ্ছিষ্টে ঘৃতভোজনং। দুগ্ধং লবণসার্দ্ধঞ্চ সদ্যো গোমাংস ভক্ষণং॥ নারিকেলোদকং কাংস্যে তাম্রপাত্রে স্থিতং মধু। ঐক্ষবং তাম্রপাত্রস্থং সুরাতুল্যং ন সংশয়ঃ॥ উত্থায বামহস্তেন যত্তোয়ং পিবতি দ্বিজঃ। সুরাপী স বিজ্ঞেয়ঃ সর্ব্বধর্ম্ম বহিষ্কৃতঃ॥ অনিবেদ্যং হরে রন্নং ভক্ষ্যশেষঞ্চ নিত্যশঃ। পীতশেষং জলঞ্চৈব গোমাংস সদৃশং মুনে॥ বার্ত্তিঙ্গন ফলঞ্চৈব গোমাংসং কার্ত্তিকে স্মৃতং। মাঘে চ মূলকঞ্চৈব কলম্বী শয়নে তথা॥ শ্বেতবর্ণঞ্চ তালঞ্চ মসূরং মৎস্য এব চ। সর্ব্বেষাং ব্রাহ্মণানাঞ্চ ত্যাজ্যঞ্চ সর্ব্বদেশতঃ॥ মৎস্যাংশ্চ কামতো ভুক্ত্বা চোপবাসং ত্র্যহং বসেৎ। প্রায়শ্চিত্তং ততঃ কৃত্বা শুদ্ধি মাপ্নোতি ব্রাহ্মণঃ॥ প্রতিপৎসু চ কুষ্মাণ্ড ম ভক্ষ্য মর্থনাশনং। দ্বিতীয়ায়াঞ্চ বৃহতী ভোজকো ন স্মরেদ্ধরিং॥ অভক্ষ্যঞ্চ পটোলঞ্চ শত্রুবৃদ্ধি করং পরং। তৃতীযায়া ঞ্চতুর্থ্যাঞ্চ মূলকং ধননাশকং॥ কলঙ্ক কারণঞ্চৈব পঞ্চম্যাং বিল্ব ভক্ষণং। তির্য্যগ্যোনিং প্রাপয়েত্ত ষষ্ঠ্যাঞ্চ নিম্ব ভক্ষণং॥ রোগবৃদ্ধি করঞ্চৈব সপ্তম্যাং তাল ভক্ষণং। নারিকেল ফলং ভক্ষ্য মষ্টম্যাং বুদ্ধিনাশনং॥ তুম্বী নবম্যাং গোমাংসং দশম্যাঞ্চ কলম্বিকা। একাদশ্যাং তথা শিম্বী দ্বাদশ্যাং পূতিকা তথা॥ ত্রয়োদশ্যান্তু বার্ত্তাকী ভক্ষণং পুত্র নাশনং। চতুর্দ্দশ্যাং মাষ ভক্ষং মহাপাপকরং পরং॥ পঞ্চদশ্যাং তথা মাংস মভক্ষ্যং গৃহিণাং মুনে। গৃহিণাং প্রোক্ষিতং মাংসং ভক্ষ্য মন্য দিনে দিনে॥ মাংসঞ্চ রক্তশাকঞ্চ কাংস্যপাত্রে চ ভোজনং। নিষিদ্ধং শয়নে চৈব কূর্ম্মমাংসঞ্চ প্রোক্ষিতং॥ রাত্রৌ চ দধি ভক্তঞ্চ শয়নং সন্ধ্যয়ো র্দ্দিনে। রজস্বলা হবীরান্নঞ্চ পুংশ্চলীনা মভক্ষ্যকং॥ শূদ্রাণাং যাজকানাঞ্চ শূদ্রশ্রাদ্ধান্ন মেব চ। অভক্ষ্যাণাঞ্চ বিপ্রর্ষে যদন্নং বৃষলীপতেঃ॥ ব্রহ্মন্ বার্দ্ধুষিকান্নঞ্চ গণকানানভক্ষ্যকং। অগ্রদানী দ্বিজানাঞ্চ চিকিৎসাকারক-

ন্যং চ ॥ হস্তা চিত্রা হরৌ তৈল মপ্যা-হ্যপ্যাপ্যভক্ষ্যকং। মূলে মৃগে ভাদ্রপদে মাংসং গোমাংস তুল্যকং ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ২৭ অধ্যায়ঃ পাদ্মস্বর্গখণ্ডে ৩১ অধ্যায়শ্চ ॥ * ॥ নন্দ উবাচ। বর্ণানাঞ্চ চতুর্ণাঞ্চ ভক্ষ্যাভক্ষ্যঞ্চ সাম্প্রতং। বিপাকং কর্ম্মণাঞ্চৈব সর্ব্বেষাং প্রাণিনামপি ॥ কথয়স্ব মহাভাগ কারণানাঞ্চ কারণ। ত্বত্তো হন্যং কঞ্চ পৃচ্ছামি নিতান্তং সন্তনীশ্বর ॥ শ্রীভগবানুবাচ। ভক্ষ্যাভক্ষ্যং চতুর্ণাঞ্চ বর্ণানাঞ্চ যথোচিতং। বেদোক্তং শ্রূয়তাং তাত সাবধানং নিশাময় ॥ অয়ঃপাত্রে পয়ঃ পানং গব্যং সিদ্ধান্ন মেব চ। ভৃষ্টাদিকং মধু গুড়ং নারিকেলোদকং তথা ॥ ফলং মূলঞ্চ যৎ কিঞ্চিদভক্ষ্যং মনু রব্রবীৎ। দগ্ধান্নং তপ্ত সৌবীর মভক্ষ্যং ব্রহ্মণা মতং ॥ নারিকেলোদকং কাংস্যে তাম্রপাত্রে স্থিতং মধু। গব্যঞ্চ তাম্র পাত্রস্থং সর্ব্বং মদ্যং ঘৃতং বিনা ॥ তাম্রপাত্রে পয়ঃ পান মুচ্ছিষ্টে ঘৃত ভোজনং। দুগ্ধং স লবণঞ্চৈব সদ্যো গোমাংস ভক্ষণং ॥ অভক্ষ্যং মধুমিশ্রঞ্চ ঘৃতং তৈলং গুড়ং তথা। আর্দ্রকং গুড় সংযুক্ত মভক্ষ্যং শ্রুতি সম্মতং ॥ পীতশেষং জলঞ্চৈব মাঘে চ মূলকং তথা। দ্বির্ভোজনঞ্চ দিবসে সন্ধ্যয়ো র্ভোজনং তথা ॥ ভক্ষ্যঞ্চ রাত্রিশেষে চ প্রাজ্ঞঃ পরিত্যজেৎ। পানীয়ং পায়সং চূর্ণং ঘৃতং লবণমেব চ ॥ স্বস্তিকং লবণঞ্চৈব ক্ষীরং তক্রং তথা মধু। হস্তান্নস্ত গৃহীতঞ্চ সদ্যো গোমাংস ভক্ষণং ॥ কর্পূরং রৌপ্য পাত্রস্থ মভক্ষ্যং শ্রুতি সম্মতং। পরিবেশন কারী চেদ্ভোক্তারং স্পৃশতে যদি ॥ অভক্ষ্যঞ্চ তদন্নঞ্চ সর্ব্বেষামেব সম্মতং। নকুলানাং গণ্ডকানাং মহিষাণাঞ্চ পক্ষিণাং ॥ সর্পানাং শূকরাণাঞ্চ গর্দ্দভানাং বিশেষতঃ। মার্জ্জারাণাং শৃগালানাং কুক্কুরাণাং ব্রজেশ্বর ॥ ব্যাঘ্রাণা মপি সিংহানাং ত্যাজ্যং মাংসং নৃণাং সদা। জলৌকসাঞ্চ নক্রাণাং গোধিকানাং তথৈব চ ॥ গণ্ডকানাং কন্টকীনাং চঞ্চুকানাঞ্চ নিশ্চিতং। গবাঞ্চ চমরীণাঞ্চ কচ্ছো মাংস মভক্ষ্যকং ॥ হস্তিনাং ঘোটকানাঞ্চ নৃণা মেব চ রক্ষসাং। দংশশ্চ মশকশ্চৈব মক্ষিকা চ পিপীলিকা ॥ অন্যেষাঞ্চ নিষিদ্ধানাং লোকে বেদে ব্রজেশ্বর। বানরাণাং ভল্লুকানাং শরভানাং তথৈব চ ॥ নিষিদ্ধ মৃগনাভীনাং গর্দ্দভানাঞ্চ মাংসকং।

অভক্ষ্যং মহিষাণাঞ্চ দুগ্ধং দধি ঘৃতং তথা ॥ স্বস্তিকঞ্চ তথা তক্রং বিপ্রাণাং নবনীতকং ॥ মাংস মুচ্চৈঃশ্রবসকং তস্য দুগ্ধাদিকং তথা ॥ বর্ণানাঞ্চ চতুর্ণাঞ্চাপ্যভক্ষ্যঞ্চ শ্রুতৌ শ্রুতং। অভক্ষ্যমর্দ্দিকঞ্চৈব সর্ব্বেষাঞ্চ রবের্দ্দিনে ॥ পর্য্যুষিতং জলঞ্চান্নং বিপ্রাণাং দুগ্ধমেব চ। বর্ণানাঞ্চ চতুর্ণাঞ্চাবীরান্নস্য চ ভক্ষণং ॥ তদন্নঞ্চ সুরাতুল্যং গোমাংসাধিক মেব চ। অবীরান্নঞ্চ যো ভুঙ্ক্তে ব্রাহ্মণো জ্ঞান দুর্ব্বলঃ ॥ পিতৃ দেবার্চ্চনং তস্য নিষ্ফলং মনুর ব্রবীৎ। ব্রাহ্মণানাং বৈষ্ণবানা মভক্ষ্যং মৎস্যমেব চ ॥ ইতরেষা মভক্ষ্যঞ্চ পঞ্চপর্ব্বসু নিশ্চিতং। পিতৃদেবাবশেষে চ ভক্ষ্যং মাংসং ন দূষিতং ॥ পঞ্চপর্ব্বসু ত্যাজ্যঞ্চ সর্ব্বেষাং মনুরব্রবীৎ। অসংস্কৃতঞ্চ লবণং তৈলঞ্চাভক্ষ্য মেব চ ॥ ভক্ষ্যং পবিত্রং সর্ব্বেষাং ব্যঞ্জনে বহ্নি সংস্কৃতং। একহস্তে ধৃতং তোয মভক্ষ্যং সর্ব্ব সম্মতং ॥ আবিলং কৃমিযুক্তঞ্চাপরিশুদ্ধন্তু নির্ম্মলং। অভক্ষ্যং ব্রাহ্মণানাঞ্চ বৈষ্ণবানাং বিশেষতঃ ॥ অনিবেদ্যং হরে রেব যতীনাং ব্রহ্মচারিণাং। পিপীলিকা নিশ্রিতঞ্চ মধু গব্যং গুড়ং তথা ॥ যৎকিঞ্চিদ্বস্তু বা তাতন ভক্ষ্যঞ্চ শ্রুতৌ শ্রুতং। পক্ষিভক্ষ্যং কীটভক্ষ্যং শুষ্কং পক্বফলন্তথা ॥ কাকভক্ষ্য মভক্ষ্যঞ্চ সর্ব্বেষাং দ্রব্যমেব চ। ঘৃতপক্বং তৈলপক্বং মিষ্টান্নং শূদ্র সংস্কৃতং ॥ অভক্ষ্যং ব্রাহ্মণানাঞ্চ শূদ্রভৃষ্টং চিপীটকং। সর্ব্বেষা মশুচীনাঞ্চ জলমন্নং পরিত্যজেৎ ॥ অশৌচান্তাৎ পরদিনে শুদ্ধমেব ন সংসয়ঃ। বিপাকঃ কর্ম্মণামেব দুষ্করঃ শ্রুতি সম্মতং ॥ ভক্ষ্যাভক্ষ্যঞ্চ কথিতং যথা জ্ঞানং ব্রজেশ্বর ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮৫ অধ্যায়ঃ ॥ * ॥ ভক্ষ্যাভক্ষ্যঞ্চ তে শিষ্য বেদিতব্যং তদন্তরে। করীরস্য বধঃ শস্তঃ ফলান্যৌদুম্বরস্য চ ॥ সদ্যো ভক্ষী ভবেত্তেন অভক্ষ্যা পূতি বাসিকা। ন ভক্ষণীযং বারাহং মাংসং মৎস্যস্য সর্ব্বশঃ ॥ অভক্ষ্যা ব্রাহ্মণৈ হ্যেতে দীক্ষিতৈর্হি ন সংশযঃ ॥ ইতি বারাহে ব্রাহ্মণ দীক্ষাসূত্র নামাধ্যাযঃ ॥

ভক্ষ্যালাবুঃ স্ত্রী রাজালাবুঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভা ল ষ দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ ॥ ল ভাতি। ষ ভা। ইতি দুর্গাদাসঃ ॥

ভা স্ত্রী প্রভা। দীপ্তিঃ। ইত্যমরঃ ॥

ভাঃ পুং সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভাঙ্গটঃ পুং মৎস্যবিশেষঃ। ভেকটী ইতি ভাষা। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। বৃষ্যত্বং। শ্লেষ্মকারিত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ॥

ভাকুটঃ পুং পর্ব্বতভেদঃ। মৎস্যভেদঃ। ইতি মেদিনী॥

ভাকোষঃ পুং সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভাক্তং ত্রি পারিভাষিকং। গৌণং। লাক্ষণিকং। ঔপচারিকং। যথা। নন্বেবং পরত্র সপ্তমে নাস্তি ক্রিয়মাণস্য কথং যাণ্মাসিকত্বং। ইতি চেদ্ভাক্তং। ইতি তিথ্যাদিতত্ত্বং॥ ভক্তসম্বন্ধিনি চ॥

ভাক্তিকঃ ত্রি অন্নেনপোষ্যঃ। ভক্তমস্মৈ দীযতে। ইতি সিদ্ধান্তকৌমুদ্যানুণাদিবৃত্তিঃ॥

ভাগঃ পুং অংশঃ। ইত্যমরঃ॥ রূপ্যার্দ্ধকঃ॥ ভাগ্যং॥ একদেশঃ। ইতি শব্দরত্নাবলী॥ রাশেস্ত্রিংশভাগৈকভাগঃ। যথা। ত্রিংশাংশক স্তথা রাশে র্ভাগ ইত্যভিধীযতে। ইতি তিথ্যাদিতত্ত্বধৃত বিষ্ণুধর্ম্মোত্তরবচনং॥

ভাগধেযং ক্লী ভাগ্যং। ইত্যমরঃ॥

ভাগধেযঃ পুং রাজকরঃ। ইত্যমরঃ॥ দাযাদঃ। ইত্যজযপালঃ॥

ভাগবতং ক্লী অষ্টাদশপুরাণান্তর্গত মহাপুরাণবিশেষঃ। স চ বেদব্যাসকৃত দ্বাদশস্কন্ধ দ্বাত্রিংশৎ ত্রিশতাধ্যায সমন্বিতাষ্টাদশ সহস্রশ্লোক সংখ্যাক ভগবন্মাহাত্ম্যবর্ণন প্রধানকো গ্রন্থঃ। যথোক্তং মৎস্যপুরাণে পুরাণদান প্রস্তাবে। যত্রাধিকৃত্য গাযত্রীং বর্ণ্যতে ধর্ম্ম বিস্তরঃ। বৃত্রাসুর বধোপেতং তদ্ভাগবত মিষ্যতে॥ লিখিত্বা তচ্চ যো দদ্যাদ্ধেম সিংহ সমন্বিতং। প্রৌষ্ঠপদ্যাং পৌর্ণমাস্যাং স যাতি পরমং পদং॥ অষ্টাদশ সহস্রাণি পুরাণং তৎ প্রকীর্ত্তিতং। পুরাণান্তরে চ। গ্রন্থোষ্টাদশ সাহস্রো দ্বাদশস্কন্ধ সম্মিতঃ। হযগ্রীব ব্রহ্মবিদ্যা যত্র বৃত্রবধ স্তথা॥ গাযত্র্যা চ সমারম্ভ স্তদ্বৈ ভাগবতং বিদুরিতি। পদ্মপুরাণে চ অম্বরীষং প্রতি গোতম বচনং। অম্বরীষ শুক প্রোক্তং নিত্যং ভাগবতং শৃণু। পঠস্ব স্বমুখেনাপি যদীচ্ছসি ভবক্ষযমিতি। ইতি শ্রীভাগবত টীকাযাং শ্রীধরস্বামী॥ তত্র প্রথমস্কন্ধে পরীক্ষিন্নারদযো রূপাখ্যানং। বিপ্রশাপাৎ পরীক্ষিতস্য প্রাযোপ-

বংশঃ। শুক পরীক্ষিত সম্বাদশ্চ।১। দ্বিতীয়স্কন্ধে। যোগধারণযোৎক্রান্তিঃ। নারদ ব্রহ্মণোঃ সম্বাদঃ। অবতারানুগীতং। মহদাদিক্রমেণ সৃষ্টিশ্চ। ২। তৃতীয়স্কন্ধে। বিদুরোদ্ধবসম্বাদঃ। ক্ষত্তৃমৈত্রেয়যোঃ সম্বাদঃ। পুরাণ সংহিতা প্রশ্নঃ। মহাপুরুষ সংস্থিতিঃ। প্রাকৃতিকঃ সর্গঃ। বৈকৃতিকাঃ সপ্ত সর্গাঃ। ব্রহ্মাণ্ড সম্ভূতিঃ। বিরাট পুরুষোৎপত্তিঃ। কালস্য স্থূল সূক্ষ্মস্য গতিঃ। পাদ্ম সমুদ্ভবঃ। অম্ভোধেঃ ভুব উদ্ধারণা। হিরণ্যাক্ষ বধঃ। ঊর্দ্ধ তির্য্যগবাক্ সর্গঃ। রুদ্র সর্গঃ। অর্দ্ধনারীনরস্য সর্গঃ। যতঃ স্বায়ম্ভুব মনুঃ স্ত্রীণাং আদ্যাপ্রকৃতিঃ শতরূপা চ। কর্দ্দম প্রজাপতে ধর্ম্মপত্নীনাং সন্তানঃ। ভগবৎ কপিলাবতারঃ। কপিলেন দেবহূতি সম্বাদশ্চ।৩। চতুর্থস্কন্ধে। নব ব্রহ্ম সমুৎপত্তিঃ। দক্ষযজ্ঞবিনাশনং। ধ্রুবচরিতং। পৃথোঃ প্রাচীনবর্হিষশ্চ চরিতং। নারদস্য সম্বাদশ্চ।৪। পঞ্চমস্কন্ধে। প্রিয়ব্রত চরিতং। দ্বীপ সমুদ্রাদ্রিবর্ষ নদ্যুপবর্ণনং। জ্যোতিশ্চক্রস্য সংস্থানং। পাতাল নরক স্থিতিশ্চ।৫। ষষ্ঠস্কন্ধে। দক্ষজন্ম। তৎ পুত্রীণাং সন্ততিঃ। যতঃ দেবাসুর নর তির্য্যক্ খগাদয়ঃ। ত্বাষ্ট্রস্য জন্ম চ।৬। সপ্তম স্কন্ধে। দিতেঃ পুত্রযো নিধনং। প্রহ্লাদচরিতঞ্চ।৭। অষ্টম স্কন্ধে। মন্বন্তরানুচরিতং। গজেন্দ্র বিমোক্ষণং। মন্বন্তরাবতারাঃ। হয়শীর্ষাদযো ঽবতারাঃ। জগৎপতেঃ কৌর্ম্ম মাৎস্য নারসিংহ বামন রূপাণি। ক্ষীরোদ মথনং। দেবাসুর যুদ্ধঞ্চ। ৮। নবম স্কন্ধে। রাজবংশানুকীর্ত্তনং। ইক্ষ্বাকু জন্ম তদ্বংশঃ। সুদ্যুম্ন বংশঃ। ইলোপাখ্যানং। তারোপাখ্যানং। সূর্য্যবংশানুকথনং। শশাদ নৃগ সৌকন্য শর্য্যাতি ককুৎস্থ খট্বাঙ্গ মান্ধাতৃ সৌভরি রামাণাং চরিতং। নিমে রঙ্গ পরিত্যাগঃ। জনকানাং সম্ভবঃ। পরশুরামজন্ম। ভুবো নিঃক্ষেত্রীকরণং। যযাতি নহুষ ভরত শান্তনু তৎ সুত যদূনাং বংশানুকীর্ত্তনঞ্চ। ৯। দশম স্কন্ধে। শ্রীকৃষ্ণস্য বসুদেবগৃহে জন্ম। গোকুলে তস্য বৃদ্ধিঃ। তস্য পূতনা পয়ঃপানং। শকটোচ্চাটনং। তৃণাবর্ত্তবধঃ। বক বৎসযো বধঃ। অঘাসুর বধঃ। ধাত্রা বৎসপালাবগূহনং। ভ্রাত্রাসহ ধেনুকস্য বধঃ। প্রলম্ব বধঃ। গোপালানাং দাবাগ্নেঃ পরিত্রাণং। কালীযদমনং। মহাহে নন্দমোক্ষণং। কন্যানাং ব্রতচর্য্যা। যজ্ঞপত্নী-

ভ্যঃ প্রসাদঃ। বিপ্রাণামনুপালনং।
গোবর্দ্ধনোদ্ধারণং। শক্র সুরভি
কর্ত্তৃক কৃষ্ণস্য যজ্ঞাভিষেকঃ। রা-
ত্রিষু স্ত্রীভিঃ ক্রীড়া। শঙ্খচূড়স্য বধঃ
। কেশিবধঃ। অক্রূরাগমনং। রাম-
কৃষ্ণযোর্মথুরা প্রস্থানং। ব্রজস্ত্রীণাং
বিলাপঃ। মথুরালোকনং। গজ মু-
ষ্টিক চানূর কংসাদীনাং বধঃ। সান্দী-
পনে মৃত পুত্রানয়নং। উদ্ধব রামা-
ভ্যাং সহ হরিণা যদুচক্রস্য প্রিয
করণং। জরাসন্ধ সমানীত বহুসৈন্য-
বধঃ। যবনেন্দ্রস্য ঘাতনং। দ্বশস্থ-
ল্যা নিবেশনং। পারিজাত হরণং।
রুক্মিণীহরণং। বাণেন সহ যুদ্ধং।
প্রাগ্জ্যোতিষপতিং হত্বা কন্যানাং হ-
রণং। চৈদ্য পৌণ্ডুক শাল্ল দন্তবক্র
শম্বর দ্বিবিদ পীঠ মুর পঞ্চজনানাং
মাহাত্ম্যং বধশ্চ। বারাণস্যা দাহঃ
। পাণ্ডবান্ নিমিত্তীকৃত্য ভূমে র্ভা-
রাবতরণঞ্চ। ১০। একাদশস্কন্ধে।
বিপ্রশাপাপদেশেন স্বজন সংহারঃ।
উদ্ধব সম্বাদঃ। উদ্ধবায় আত্মবিদ্যা
কর্ম্ম বিনির্ণয় কথনং। আত্মযোগানু-
ভাবতো মর্ত্য পরিত্যাগশ্চ। ১১।
দ্বাদশস্কন্ধে। যুগ লক্ষণ বৃত্তিঃ। ক-
লৌ নৃণামুপপ্লবঃ। চতুর্বিধ প্রলয়ঃ।
ত্রিবিধোৎপত্তিঃ। পরীক্ষিত দেহ-
ত্যাগঃ। ব্যাসকর্তৃক শাখা প্রণয়-
নং। মার্কণ্ডেয়স্য সৎকথা। সূর্য্যস্য
বিন্যাসশ্চ। ১২। ইতি শ্রীভাগবতে
১২ স্কন্ধে অনুক্রমণিকাধ্যায়ঃ॥
ভাগবতঃ ত্রি ভগবদ্ভক্তঃ। তস্য
লক্ষণং। যথা। সর্ব্বদেবান্ পরিত্য-
জ্য নিত্যং ভগবদাশ্রয়ঃ। রত স্তদী-
য সেবায়াং স ভাগবত উচ্যতে॥
ইতি পাদ্মোত্তরখণ্ডে ৯৯ অধ্যায়ঃ
॥ * ॥ সচ যমদূতৈ স্ত্যাজ্যঃ। যথা
। যে তু ভাগবতা লোকে তচ্চিত্তা
স্তৎ পরায়ণাঃ। পূজয়ন্তি সদা বি-
ষ্ণুং তে চ ত্যাজ্যাঃ সুদূরতঃ॥ ইতি
বহ্নিপুরাণে দূতান্ প্রতি যম বচনং
॥ স্কান্দে শ্রীমার্কণ্ডেয় ভগীরথ স-
ম্বাদে। দশমীশেষ সংযুক্তং দিনং
বৈষ্ণব বল্লভং। নোপাসতে মহী-
পাল তে বৈ ভাগবতা নরাঃ॥ প্রা-
ণাত্যয়ে ন চাশ্নন্তি দিনং প্রাপ্য হরে
র্নরাঃ। কুর্ব্বন্তি জাগরং রাত্রৌ সদা
ভাগবতা হি তে॥ উপোষ্য দ্বাদ-
শীং শুদ্ধাং রাত্রৌ জাগরণান্বিতাং।
অল্পাং তু সাধয়েদ্যস্তু স বৈ ভাগব-
তো বরঃ॥ ভক্তি র্ন বিচ্যুতা যেষাং
ন চ্যুতানি ব্রতানি চ। সুপ্রিয়ঃ শ্রী
পতি র্যেষাং তেস্যু ভাগবতা নরাঃ
॥ সদাচার রতাঃ শিষ্টাঃ, সর্ব্বভূতা-

নুকম্পকাঃ। শুচয় স্ত্যক্ত রাগা যে সদা ভাগবতা হি তে॥ একাদশ-স্কন্ধে। সর্ব্বভূতেষু যঃ পশ্যেদ্ভগবদ্ভাব মাত্মনঃ। ভূতানি ভগবত্যাত্মন্যেষ ভাগবতোত্তমঃ॥ ন যস্য স্বপর ইতি বিত্তেষ্বাত্মনি বা ভিদা। সর্ব্ব ভূত সমঃ শান্তঃ স বৈ ভাগবতোত্তমঃ॥ হরিযোগেশ্বরোত্তরে। গৃহীত্বাপীন্দ্রিয়ৈ রর্থান্ যো ন দ্বেষ্টি ন কাঙ্ক্ষতি। বিষ্ণোর্মায়া মিদং পশ্যন্ স বৈ ভাগবতোত্তমঃ॥ বৃহন্নারদীয়ে। শিবে চ পরমেশানে বিষ্ণৌ চ পরমাত্মনি। সমবুদ্ধ্যা প্রবর্ত্তন্তে তে বৈ ভাগবতোত্তমাঃ॥ স্কান্দে। যেষাং ভাগবতং শাস্ত্রং সদা তিষ্ঠতি সন্নিধৌ। পূজয়ন্তি চ যে নিত্যং তেস্যুর্ভাগবতা নরাঃ॥ যেষাং ভাগবতং শাস্ত্রং জীবিতাদধিকং ভবেৎ। মহাভাগবতাঃ শ্রেষ্ঠা বিষ্ণুনা কথিতা নরাঃ॥ লৈঙ্গে। ভোজনাচ্ছাদনং সর্ব্বং যথা শক্ত্যা দদাতি যঃ। বিষ্ণু ভক্তস্য সততং স বৈ ভাগবতঃ স্মৃতঃ॥ গারুড়ে। যেন সর্ব্বাত্মনা বিষ্ণু ভক্ত্যা ভাবো নিবেশিতঃ। বৈষ্ণবেষু কৃতাত্মত্বান্মহাভাগবতো হি সঃ॥ বৃহন্নারদীয়ে। তুলসীকাননং দৃষ্ট্বা যে নমস্কুর্ব্বতে নরাঃ। তৎ কাষ্ঠাঙ্কিত কর্ণা যে তে বৈ ভাগবতোত্তমাঃ॥ তুলসী গন্ধমাঘ্রায় সন্তোষং কুর্ব্বতে তু যে। তন্মূল মৃদ্ধৃতা যৈশ্চ তে বৈ ভাগবতোত্তমাঃ॥ মৎকথা শ্রবণে যেষাং বর্ত্ততে সাত্ত্বিকী মতিঃ। তদ্ভক্তরি সুভক্তাশ্চ তে বৈ ভাগবতোত্তমাঃ॥ স্কান্দে। মৎকথাং কুরুতে যস্তু মৎকথাঞ্চ শৃণোতি চ। হৃষ্যতে মৎকথায়াঞ্চ স বৈ ভাগবতোত্তমঃ॥ বৃহন্নারদীয়ে। মন্মানসাশ্চ মদ্ভক্তা মদ্ভক্তজন লোলুপাঃ। মন্নাম শ্রবণাসক্তা স্তে বৈ ভাগবতোত্তমাঃ॥ যে হ্যভিনন্দন্তি নামানি হরেঃ শৃণ্বন্তি হর্ষিতাঃ। রোমাঞ্চিত শরীরাশ্চ তে বৈ ভাগবতোত্তমাঃ॥ অন্যেষা মুদয়ং দৃষ্ট্বা যে হ্যভিনন্দন্তি মানবাঃ। হরিনাম পরা যে চ তে বৈ ভাগবতোত্তমাঃ॥ স্কান্দে। যে হর্চয়ন্তি সদা বিষ্ণুং যজ্ঞেশং বরদং হরিং। দেহিনঃ পুণ্যকর্ম্মাণঃ সদা ভাগবতা হি তে॥ লৈঙ্গে। বিষ্ণুক্ষেত্রে শুভান্যেব করোতি স্নেহ সংযুতঃ। প্রতিমাঞ্চ হরে র্নিত্যং পূজয়েৎ প্রযতাত্মবান্॥ বিষ্ণুভক্তঃ স বিজ্ঞেয়ঃ কর্ম্মণা মনসা গিরা। নারায়ণপরো নিত্যং ভূপ ভাগবতো হি সঃ॥ পাদ্মোত্তরখণ্ডে। তাপাদি পঞ্চ সংস্কা-

স্ত্রী নবেজ্যা কর্ম্মকারকঃ। অর্থপঞ্চক বিদ্বিপ্রো মহাভাগবতো হি সঃ ॥ একান্তেন সদা বিষ্ণৌ যস্মাদ্দেবে প-রায়ণাঃ। তস্মাদেকান্তিনঃ প্রোক্তা স্তদ্ভাগবত চেতসঃ ॥ একাদশস্কন্ধে। জ্ঞাত্বা জ্ঞাত্বাথ যে বৈ মাং যাবান্ যশ্চাস্মি যাদৃশঃ। ভজন্ত্যনন্য ভাবেন তে বৈ ভাগবতা মতাঃ ॥ ন কাম কর্ম্ম বীজানাং যস্য চেতসি সম্ভবঃ। বাসুদেবৈক নিলয়ঃ স বৈ ভাগবতোত্তমঃ ॥ স্কান্দে। যস্য কৃচ্ছ্রগতস্যাপি কেশবে রমতে মনঃ। ন বিচ্যুতা চ ভক্তির্বৈ স বৈ ভাগবতো নরঃ ॥ আপন্নস্য যস্যেহ ভক্তি রব্যভিচারিণী। নান্যত্র রমতে চিত্তং স বৈ ভাগবতো নরঃ ॥ হরির্যোগেশ্বরে। বিসৃজতি হৃদয়ং ন যস্য সাক্ষাদ্ধরি রবশাভিহিতোপ্যঘৌঘনাশঃ। প্রণয় রসনয়া ধৃতাঙ্ঘ্রি পদ্মঃ স ভবতি ভাগবত প্রধান উক্তঃ ॥ মধ্যম মাহ তত্রৈব। ঈশ্বরে তদধীনেষু বালিশেষু দ্বিষৎসু চ। প্রেম মৈত্রী কৃপোপেক্ষা যঃ করোতি স মধ্যমঃ ॥ কনিষ্ঠ স্তত্রৈব। অর্চায়ামেব হরয়ে পূজাং যঃ শ্রদ্ধয়েহতে। ন তদ্ভক্তেষু চান্যেষু স ভক্তঃ প্রাকৃতঃ স্মৃতঃ ॥ ইতি শ্রী হরিভক্তিবিলাসে ১০ বিলাসঃ ॥

ভাগিকং ত্রি সবৃদ্ধিকমৃণাদি। সুদী টীকা ইত্যাদি ভাষা। যথা। ভাগো বৃদ্ধ্যাদি রস্মিন্ ভাগ্যং ভাগিকং শতং। ভাগ্যা ভাগিকা বিংশতিঃ। ইতি সিদ্ধান্তকৌমুদী ॥

ভাগিনেয়ঃ পুং ভগিনীপুত্রঃ। তৎপর্য্যায়ঃ। স্বস্রীয়ঃ ২। ইত্যমরঃ ॥ স্বস্রিয়ঃ ৩। ইতি শব্দরত্নাবলী ॥ স চ মুখ্যপ্রতিনিধিঃ। যথা। ঋত্বিক্ পুত্রো গুরু ভ্রাতা ভাগিনেয়ো হথ বিট্পতিঃ। এভি রেব হুতং যত্তু তদ্ধুতং স্বয় মেব হি। ইতি তিথ্যাদিতত্ত্বং ॥ *। তস্যাবশ্যপোষ্যত্বং যথা। পিতৃব্য গুরু দৌহিত্রান্ ভর্ত্তুঃ স্বস্রীয় মাতুলান্। পূজয়েৎ কব্য পূর্ত্তাভ্যাং বৃদ্ধানাথাতিথীন স্ত্রিয়ঃ ॥ ইত্যপুত্রধনাধিকারে দায়ভাগঃ ॥ * ॥ ভাগিনেয দত্তক করণং শূদ্রস্যৈব নতু দ্বিজানাং। যথা। দৌহিত্রো ভাগিনেয়শ্চ শূদ্রৈস্তু ক্রিয়তে সুতঃ। ব্রাহ্মণাদি ত্রয়ে নাস্তি ভাগিনেয়ঃ সুতঃ ক্বচিৎ ॥ ইতি দত্তকচন্দ্রিকায়াং শৌনক বচনং ॥

তন্মরণে মাতুলস্য পক্ষিণ্যং। যথা। পক্ষিণী যোনিসম্বন্ধে বন্ধু ত্র্যেব চ। যোনি সম্বন্ধ মাতৃস্বস্রীয় পিতৃস্বস্রীয় ভাগি-

য়েষু ॥ মাতুলমরণে ভাগিনেয়স্যাপি পক্ষিণ্যশৌচং। ইতিশুদ্ধিতত্ত্বং

ভাগিনেয়ী স্ত্রী ভাগিন্যাঃস্ত্র্যপত্যং। ভাগ্নী ইতি ভাষা। ভগিনীশব্দাৎ স্ত্র্যপত্যার্থে ঢকে যিত্বাদীপ পুংভাবনিয়মা। ইতি ব্যাকরণং ॥

ভাগীরথী স্ত্রী গঙ্গা। ইত্যমরঃ ॥ পৃথিব্যাং তস্যাবতরণং যথা। সূত উবাচ। ততো ভগীরথো রাজা তপঃপারম সুদুষ্করং। নীত্বা সন্তোষয়ামাস উমাকান্তং মহেশ্বরং ॥ ধারণাবানুমত্বা তং জগাম ব্রহ্মণো হন্তিকং। ততো ভগীরথঃ প্রাহ গঙ্গা ব্রহ্মন্ বিসৃজ্যতাং ॥ স তদ্বচস্তস্য সম্মান্য বিবুধপ্রিয়ং। গঙ্গাং প্রস্থাপয়ামাস সা পতেদ্ব্রহ্মণো হস্তিকাৎ ॥ বায়ুনা প্রের্য্যমাণাপি আকাশ পথগা নদী। বিখ্যাতাকাশ গঙ্গেতি তত্র সংসেবিতা গজৈঃ ॥ বিষ্ণোঃ পদং সমাযাতা তস্মাদ্বিষ্ণুপদীতি সা। পূজ্যমানা সুরৈঃ সিদ্ধৈর্মুনি বিদ্যাধরোরগৈঃ ॥ সুরালয় মনুপ্রাপ্তা তস্মাদ্দেবনদী তু সা। তস্মাৎ প্রপতিতা গঙ্গা শম্ভোঃ শিরসি সংস্থিতা ॥ ধৃতৈ কেনৈব তেনাপি শম্ভুনা যোগমায়য়া। দিব্যং বর্ষশতং সাগ্রং পুনরারাধিতেন বৈ ॥ মুক্তা ভগীরথেনৈব মলহন্ত্রী বিনির্গমং। জটা জূটাৎ প্রপাতোর্দ্ধে মেরো তস্মাত্ততো হগমৎ ॥ দেবৈঃ পরিবৃতা গঙ্গা হেমকূটঞ্চ পর্ব্বতং। মন্দরঞ্চৈব কৈলাসং হিমবন্তঞ্চ পর্ব্বতং ॥ তামায়ান্তীং তু রোধায় স্বলীনো নাম দানবঃ। পার্ব্বতং রূপমাস্থায় বর্ষাণাস্তু শতৈ র্দ্বিজাঃ ॥ ততো ভগীরথো রাজা রাধয়ামাস কৌশিকং। স তুষ্টঃ প্রদদৌ মার্গং বাহনন্তং ভগীরথঃ ॥ তমাক্রম্যাগমত্তত্র যত্র রুদ্ধা ভগীরথী। তেন নাগেন তং দৈত্যং সংবিদার্য্য ন সঙ্গতঃ ॥ শতধা তাং সমাধায় মূর্দ্ধ্নৈরাবণো গজঃ। মহীতলং সমাপেদে সযাবন্নাগসাহ্বয়ং ॥ তস্মাদ্যা ঘটনাদ্বিপ্রা অভূন্নাগপুরং বরং। প্লাবয়ন্তী মহীং গঙ্গা জহ্নো রাশ্রম মভ্যগাৎ ॥ তাং দৃষ্ট্বাথ পপৌ সোহপি প্রসৃত্যা জপিতো মুনিঃ জহ্নুনা নাশিতাং দৃষ্ট্বা গঙ্গাং ত্রিপথগাং নদীং ॥ সশোক স্তোষয়ামাস জহ্নুং ভগীরথো মুনিং। মুমোচ কর্ণরন্ধ্রেণ গঙ্গাং স দক্ষিণেন তাং। এতস্মাজ্জাহ্নবী ভূতা সুতা তস্য মুনে স্তথা। ততঃ সা বিবিধান্ দেশান্ প্লাবয়ন্তী

শ্চ তথাশুনান্ ॥ সংপ্লাব্য বারিণা ভূযো জগাম পূর্ব্ব সাগরং। যত্র তত্রোদকং তস্থৌ তস্যাঃ পুণ্য মভুদ্দিজাঃ॥ সুতীর্থং সর্ব্ব মর্ত্যানাং তারণং পাপ নাশনং। ততঃ সম্পূরযামাস সমুদ্রং সর্ব্বতো দিশং॥ প্রপন্ন সাগরৈঃ সর্ব্বং ততঃ পাতাল মাবিশৎ। সাগরাণাং তনো স্তস্মাৎ সংপ্লাব্য বারিণা ততঃ॥ দেবৈঃ সংপূজ্যমানাপি জগাম ব্রহ্মণো হন্তিকং। জগ্মুস্তে সাগরাঃ স্বর্গং ব্রহ্মণোপহতাশ্চ যে॥ রক্ষকা স্তে বিনির্দ্দিষ্টা গঙ্গাযা ব্রহ্মণা স্বযং। ভবন্তি রনিশং নৃণাং কর্ত্তব্যং বিঘ্ন নাশনং॥ সূত উবাচ। এতদ্বঃ কথিতং সর্ব্বং যথাবতরণং দিবঃ। গঙ্গাযাশ্চৈব মাহাত্ম্যং শ্রুযতাং গদতো মম॥ ইত্যাদ্যে বহ্নিপুরাণে গঙ্গাবতরণ নামাধ্যাযঃ॥ * ॥ তস্যা মুখ্য নামানি যথা। বরাহ উবাচ। ধর্ম্মস্তু দ্রবরূপেণ ব্রহ্মণা নির্ম্মিতঃ পুরা। যদ্বৈ গঙ্গেতি বিখ্যাতা শৃণু স্তোত্রং বসুন্ধরে॥ কিন্তে নাম সহস্রৈস্তু মুখ্যা মুখ্যৈঃ সুবিস্তরৈঃ। যানি নামানি মুখ্যানি তানি বক্ষ্যাম্যনুক্রমাৎ॥ গঙ্গা ভাগীরথী পুণ্যা জাহ্নবী সুরনিম্নগা। বিষ্ণুপাদাব্জসম্ভূতা শম্ভোঃ শিরসি সংস্থিতা॥ সুমেরুশৃঙ্গসংস্পৃষ্টা হিমাচলকৃতাশ্রযা। শঙ্খ কুন্দেন্দু ধবলা মহাপাতকনাশিনী॥ নদীশ্বরী ত্রিপথগা বৈষ্ণবী সুরসুপ্রিযা। ধর্ম্মদ্রবী ভোগবতী বিন্ধ্যপাষাণদারিণী॥ ক্ষমাঃ শান্তিঃ প্রজাশান্তিঃ পুণ্যদা পূতিকাশিবা। মহানদী শতমুখী শুক্লা মকর বাহিনী॥ ব্রহ্মহস্তাৎ পরিভ্রষ্টা সৌম্যরূপাতিশোভনা। মুনিভিঃ পূজিতা সর্ব্বৈঃ সর্ব্বৈ দেবৈ র্নমস্কৃতা॥ মহাযজ্ঞমযী দেবী মর্ত্যানা মুপকারিণী। সর্ব্বত্র দুর্ল্লভা গঙ্গা ত্রিভিস্থানৈ র্বিশেষতঃ॥ গঙ্গাদ্বারে প্রযাগে চ গঙ্গাসাগরসঙ্গমে। ইদং স্তোত্রং মযা খ্যাতং পূর্ব্বমুক্তং স্বযম্ভুবা॥ যঃ পঠেৎ প্রাত রুত্থায তস্য নশ্যতি দুর্গতিঃ। যৎপাপং যৌবনে বাল্যে কৌমারে বার্দ্ধকে চ যৎ॥ তৎ সর্ব্বং বিলযং যাতি তোযস্থং লবণং যথা। কীর্ত্তিং প্রীতিং মহালক্ষ্মী মাযুরারোগ্য সন্ততিং॥ দদাতি জাহ্নবী তুষ্টা সর্ব্ব ভাবেন মাধবি। ইতি বারাহে সর্ব্বপাপপ্রশমন গঙ্গাস্তবঃ॥ * ॥ অপিচ। ব্রহ্মোবাচ। শ্রোতুমিচ্ছামি দেবেশ লক্ষ্মীকান্ত জগৎপ্রভো। বিষ্ণো বিষ্ণুপদী স্তোত্রং পাপঘ্নং পুণ্যকারণং॥ শ্রীনারাযণ উবাচ। শিব

সঙ্গীত সংমুগ্ধ শ্রীকৃষ্ণাঙ্গ দ্রবোদ্ভবাং। রাধাঙ্গ দ্রব সংযুক্তাং তাং গঙ্গাং প্রণমাম্যহং ॥ যস্যা জন্ম সৃষ্টে রাদৌ চ গোলোকে রাসমণ্ডলে। সন্নিধানে শঙ্করস্য তাং গঙ্গাং প্রণমাম্যহং ॥ গোপৈঃ গোপীভি রাকীর্ণৈঃ শুভে রাধা মহোৎসবে। কার্ত্তিকী পূর্ণিমা জাতাং তাং গঙ্গাং প্রণমাম্যহং ॥ কোটি যোজন বিস্তীর্ণা দৈর্ঘ্যে সপ্ত গুণা ততঃ। সমাবৃতা যা গোলোকং তাং গঙ্গাং প্রণমাম্যহং ॥ ষষ্টিলক্ষ যোজনা যা ততো দৈর্ঘে চতুর্গুণা। সমাবৃতা যা বৈকু[illegible] তাং গঙ্গাং প্র[illegible]ণমাম্যহং ॥ বিং[illegible] যোজনা যা ততো দৈর্ঘ্যে চতুর্গুণা। আবৃতা ব্রহ্মলোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ ত্রিংশল্লক্ষ যোজনা যা দৈর্ঘ্যে পঞ্চগুণা ততঃ। আবৃতা শিবলোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ লক্ষ যোজন বিস্তীর্ণা দৈর্ঘ্যে সপ্তগুণা ততঃ। আবৃতা ধ্রুব লোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ লক্ষ যোজন বিস্তীর্ণা দৈর্ঘ্যে শতগুণা ততঃ। আবৃতা চন্দ্রলোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ ষষ্টি [illegible] দৈর্ঘ্যে দশগুণা ত[illegible] [illegible]লোকং যা তাং [illegible] ॥ [illegible]ক্ষ যোজন



বিস্তীর্ণা দৈর্ঘ্যে চ ষড়্গুণা ততঃ। আবৃতা সত্য লোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ দশ লক্ষ যোজনা যা দৈর্ঘ্যে পঞ্চগুণা ততঃ। আবৃতা যা তপোলোকং তাং গঙ্গাং প্রণমাম্যহং ॥ সহস্রযোজনাযামা দৈর্ঘ্যে দশগুণা ততঃ। আবৃতা জনলোকং যা তাং গঙ্গাং প্রণমাম্যহং ॥ সহস্র যোজনাযামা দৈর্ঘ্যে সপ্তগুণা ততঃ। আবৃতা যা চ কৈলাসং তাং গঙ্গাং প্রণমাম্যহং ॥ শতযোজন বিস্তীর্ণা দৈর্ঘ্যে দশগুণা ততঃ। মন্দাকিনী যেন্দ্রলোকে তাং গঙ্গাং প্রণমাম্যহং ॥ পাতালে যা ভোগবতী বিস্তীর্ণা দশযোজনা। ততো দশগুণা দৈর্ঘ্যে তাং গঙ্গাং প্রণমাম্যহং ॥ ক্রোশৈক মাত্র বিস্তীর্ণা ততঃ ক্ষীণা চ কুত্রচিৎ। ক্ষিতৌ চালকনন্দা যা তাং গঙ্গাং প্রণমাম্যহং ॥ সত্যে যা ক্ষীরবর্ণা চ ত্রেতাযা মিন্দু সন্নিভা। দ্বাপরে চন্দনাভা চ তাং গঙ্গাং প্রণমাম্যহং ॥ জলপ্রভা কলৌ যা চ নান্যত্র পৃথিবীতলে। স্বর্গে চ নিত্যং ক্ষীরাভা তাং গঙ্গাং প্রণমাম্যহং ॥ যস্যাঃ প্রভাব মতুলং পুরাণে চ শ্রুতৌ শ্রুতং। যা পুণ্যদা পাপহন্ত্রী তাং গঙ্গাং প্রণমাম্যহং ॥ যত্তোয

কণিকাস্পর্শঃ পাপিনাঞ্চ পিতামহ। ব্রহ্মহত্যাদিকং পাপং কোটি জন্মার্জ্জিতং দহেৎ॥ ইত্যেবং কথিতং ব্রহ্মন্ গঙ্গাপদ্যৈকবিংশতিঃ। স্তোত্ররূপঞ্চ পরমং পাপঘ্নং পুণ্যকারকং॥ নিত্যং যো হি পঠেদ্ভক্ত্যা সংপূজ্য চ সুরেশ্বরীং। অশ্বমেধ ফলং নিত্যং লভতে নাত্র সংশয়ঃ॥ অপুত্রো লভতে পুত্রং ভার্য্যাহীনো লভেৎ প্রিয়াং। রোগাৎ প্রমুচ্যতে রোগী বদ্ধো মুচ্যেত বন্ধনাৎ॥ অস্পষ্ট কীর্ত্তিঃ সুযশা মূর্খো ভবতি পণ্ডিতঃ। যঃ পঠেৎ প্রাতরুত্থায় গঙ্গাস্তোত্র মিদং শুভং॥ শুভং ভবেত্ত্ব দুঃস্বপ্নং গঙ্গাস্নান ফলং লভেৎ। ইতি গঙ্গাস্তোত্রং॥ নারায়ণ উবাচ। ভগীরথো হনেন স্তোত্রেণ স্তুত্বা গঙ্গাঞ্চ নারদ। জগাম তাং গৃহীত্বা চ যত্র নষ্টাশ্চ সাগরাঃ॥ বৈকুণ্ঠং তে যযুস্তূর্ণং গঙ্গায়াঃ স্পর্শবায়ুনা। ভগীরথেন সানীতা তেন ভাগীরথী স্মৃতা॥ ইত্যেবং কথিতং সর্ব্বং গঙ্গোপাখ্যান মুত্তমং। পুণ্যদং মোক্ষদং সারং কিং ভূয়ঃ শ্রোতুমিচ্ছসি॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে গঙ্গোপাখ্যানে৮অধ্যায়ঃ॥

ভাণ্ডরিঃ পুং সূত্রিব্যাকরণকর্ত্তৃমুনিবিশেষঃ। তৎপর্য্যায়ঃ শাকটায়নঃ ২। ইতি জটাধরঃ॥

ভাগ্যং ক্লী প্রাক্তনশুভাশুভকর্ম্ম। তৎপর্য্যায়ঃ। দৈবং ২ দিষ্টং ৩ ভাগধেয়ং ৪ নিয়তিঃ ৫ বিধিঃ ৬। ইত্যমরঃ॥ প্রাক্তনকর্ম্ম ৭ ভাগঃ ৮ ভবিতব্যতা ৯। ইতি জটাধরঃ॥ অদৃষ্টং ১০। ইতি শব্দরত্নাবলী॥ ফলোন্মুখী ভূত পূর্ব্ব দৈহিক শুভাশুভং কর্ম্ম। ইতি মলমাসতত্ত্বং॥ ভাগিকে ত্রি। ইতি সিদ্ধান্তকৌমুদী॥ ভাগযোগ্যঞ্চ॥

ভাঙ্গীনং ত্রি ভঙ্গাক্ষেত্রং। তৎপর্য্যায়ঃ। ভাঙ্গ্যং ২। ইত্যমর হেমচন্দ্রৌ॥

ভাজ ত ক পৃথক্কৃত্যাং। ইতি কবিকল্পদ্রুমঃ॥ অবভাজৎ ধনং ভ্রাতবর্গঃ। ইতি দুর্গাদাসঃ॥

ভাজনং ক্লী পাত্রং। ইত্যমরঃ॥ যোগ্যং। ইতি মেদিনী॥ যঃ সম্বাদযতে নিত্যং যো হভিবাদাং স্তিতিক্ষতি। যশ্চ তপ্তো ন তপতি দৃঢ়ং সো হর্থস্য ভাজনং॥ ইতি মৎস্যপুরাণং॥ আঢক পরিমাণং। ইতি বৈদ্যক পরিভাষা॥

ভাজিতং ত্রি পৃথক্কৃতং। বিভক্তং। ইতি ভাজধাতোর্ণ্যন্তাৎ কর্ম্মণি ক্ত

-ত্যেনেনিষ্পন্নং ॥ ভাগে ক্লী ॥

ভাজী স্ত্রী ব্যঞ্জনবিশেষঃ। অন্যত্র ভাজা-ইতি-ক্রীত্য টীকায়াং দুর্গাদাসঃ ॥

ভাজ্যং ত্রি ভাগার্হং। ভাজনীযং। ইতি ভাজধাতোঃ কর্ম্মণি য প্রত্যযেন নিষ্পন্নং ॥

ভাটকঃ পুং ক্লী ব্যবহারার্থংদত্তশকটাদিলভ্যধনং। ভাড়া ইতি ভাষা। ইতি হলায়ুধঃ॥ ॥ অথ গৃহাদিভাট . . । পর ভূমৌ গৃহং কৃত্বা ভাটং . . . . যঃ। স তদ্গৃহীত্বা নি . . . . . দিকং॥ স্তোমং বিনা . . . . পর ভূম্যাবনিচ্ছতঃ। . . . . . . নগৃহ্নীযাৎ কথঞ্চন ॥ . . . নঃ। গৃহবাপ্যাপণাদীনি গৃহীত্বা ভাটকেন যঃ। স্বামিনো নার্পযেদ্যাবত্তাবদ্দাপ্যঃ স ভাটকং ॥ বাপী পরকৃতা প্রতিষ্ঠিতেতি বিবক্ষিতং। হস্ত্যশ্ব গো খরোষ্ট্রাদীন গৃহীত্বা ভাটকেন যঃ ॥ স্বামিনো নার্পযেদ্যাবত্তাবদ্দাপ্যঃ স ভাটকং ॥ বৃদ্ধমনুঃ। যো ভাটযিত্ব শকটং নীত্বা নান্যত্র গচ্ছতি। ভাটং ন দদ্যাদ্দাপ্যঃ স্যাৎ রূঢং বনুঢস্যাপি . . . . শকটং বৃষ নৌকাদে . . . . । অনূঢস্যা বাহি তস্যাপি শকটাদেঃ। ইতি বিবাদচিন্তামণিঃ ॥

ভাণঃ পুং নাটকাদিদশরূপকান্তর্গতরূপকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ তস্য লক্ষণাদি যথা। ভাণঃ স্যাদ্ধূর্ত্ত চরিতো নানাবস্থান্তরাত্মকঃ। একাঙ্ক একএবাত্র নিপুণঃ পণ্ডিতো বিটঃ ॥ রঙ্গে প্রকাশযেৎ স্বেনানুভূত মিতরেণ বা। সম্বোধনোক্তিপ্রত্যুক্তী কুর্য্যাদাকাশ ভাষিতৈঃ॥ সূচযেদ্বীর শৃঙ্গারৌ শৌর্য্য সৌভাগ্য বর্ণনৈঃ। তত্রেতি বৃত্ত মুৎপাদ্যং বৃত্তিঃ প্রাযেণ ভারতী ॥ মুখনির্বাহণে সন্ধী লাস্যাঙ্গানি দশাপি চ। অত্রাকাশ ভাষিত রূপং পর বচন মপি স্বযমেবানুবদন্নুত্তর প্রত্যুত্তরে কুর্য্যাৎ। শৃঙ্গার বীররসৌচ সৌভাগ্য শৌর্য্য বর্ণনযা সূচযেৎ। প্রায গ্রহণাৎ কৌশিক্যপি বৃত্তি র্ভবতি। উদাহরণং লীলামধুকরঃ ॥ ইতি সাহিত্যদর্পণে ৬ পরিচ্ছেদঃ ॥

ভাণ্ডং ক্লী পাত্রং॥ বণিঙ্মূলধনং ॥ ভূষা॥ অশ্ব ভূষা। ইতি মেদিনী ॥ নদীকূলদ্বযমধ্যং। ইতি হেমচন্দ্রঃ ॥ ভণ্ডবৃত্তিঃ। ভাঁড়ামি ইতি ভাষা। ইত্যজযপালঃ ॥ ॥ অরাঢ়দে-

বিক° নষ্ট° ভাণ্ড° দাপ্যস্তু বাহকঃ। প্রস্থান বিঘ্নকৃচ্চৈব প্রদাপ্যো দ্বিগুণা° ভৃতি° ॥ ভাণ্ড° ব্যসন মাগচ্ছেৎ যদি বাহকদোষতঃ। দাপ্যো যৎতত্র নশ্যেত্তু দৈবরাজ কৃতাদৃতে ॥ ইতি মিতাক্ষরাযা° নারদঃ ॥

ভাণ্ডঃ পু° গর্দ্দভাণ্ডবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

ভাণ্ডপুটঃ পু° নাপিতঃ। ইতি জটাধরঃ ॥

ভাণ্ডপুষ্পঃ পু° সর্পবিশেষঃ। তৎপর্য্যাযঃ। কৌক্কুটিকন্দলঃ২। ইতি ত্রিকাণ্ডশেষঃ ॥

ভাণ্ডাগারঃ পু° গৃহবিশেষঃ। ভাঁডারইতি ভাষা। তৎপর্য্যাযঃ। মন্থরঃ২। ইতি শব্দমালা ॥

ভাণ্ডারী পু° ভাণ্ডারাধ্যক্ষঃ। ভাঁডারী ইতি ভাষা। যথা। ক্ষুধিত স্তৃষিতঃ কামী বিদ্যার্থী কৃষিকারকঃ। ভাণ্ডারী চ প্রবাসী চ সপ্ত সুপ্তান্ প্রবোধযেৎ। ইতি ব্যবহার প্রদীপঃ ॥

ভাণ্ডিঃ পু° নাপিতস্যক্ষুরাদ্যাধারঃ। ভাঁড়ি ইতি ভাষা। ইতি ভাণ্ডিবাহ শব্দ দর্শনাৎ ॥

ভাণ্ডিবাহঃ পু° নাপিতঃ। শব্দমালা ॥

ভাণ্ডিলঃ পু° নাপিতঃ। ইতি শব্দমালা ॥

ভাণ্ডীরঃ পু° বটবৃক্ষঃ। ইতি জটাধরঃ ॥ ব্রজমণ্ডলান্তরে ষোড়শবটবন মধ্যে দ্বিতীয বটবন°। যথা। সঙ্কেত বট মাদৌ তু ভাণ্ডীরাখ্য° বট° দ্বয°। ইতি নারাযণভট্ট কৃত ব্রজভক্তিবিলাসঃ ॥

ভাত° ক্লী প্রভাত°। ইতি শব্দমালা ॥ দীপ্তৌ ক্লী ॥ তদ্বতি ত্রি ॥

ভাতিঃ স্ত্রী শোভা। ইতি রাজনির্ঘণ্টঃ ॥

ভাতুঃ পু° সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ দীপ্তঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

ভাদ্রঃ পু° বৈশাখাদিদ্বাদশমাসান্তর্গত পঞ্চমমাসঃ। ভাদ্রপদ নক্ষত্র যুক্তা পৌর্ণমাসী যস্মিন্ মাসে সঃ। তৎপর্য্যাযঃ। নভস্যঃ২ প্রৌষ্ঠপদঃ৩ ভাদ্রপদঃ৪। ইত্যমরঃ ॥ স চ দ্বিবিধঃ। সিংহস্থ রবিকালঃ সৌরঃ ১। সিংহস্থ রব্যারব্ধ শুক্ল প্রতিপদাদি দর্শান্তো মুখ্যচান্দ্রঃ। কৃষ্ণপ্রতিপদাদি পৌর্ণমাস্যন্তো গৌণচান্দ্রঃ২। ইতি মলমাসতত্ত্ব° ॥ * ॥

নানাং। রিপু প্রসাথী জটিলো ইতি-
নর্ম্মা প্রণম্য ভক্ত্যা স ভবেৎ সহায়ঃ॥
ইতি জ্যোতিষপ্রদীপঃ ॥ ❁ ॥ তত্র গোঃ
প্রসবে নারদঃ। ভানৌ সিংহ গতে
চৈব যস্য গৌঃ সম্প্রসূয়তে। মরণং
তস্য নির্দ্দিষ্টং ষড়্ভি মাসৈর্ন সংশয়ঃ
॥ তস্য শান্তিং প্রবক্ষ্যামি যেন সম্প-
দ্যতে শুভং। প্রসূতাং তৎক্ষণাদেব
তাং গাং বিপ্রায় দাপয়েৎ ॥ ততো
হোমং প্রকুর্ব্বীত ঘৃতাক্তৈ রাজসর্ষ
পৈঃ। আহুতীনাং ঘৃতাক্তানা ময়ু-
তং জুহুয়াত্ততঃ ॥ ব্যাহৃতিভিশ্চায়ং
হোমঃ। সোপবাসঃ প্রযত্নেন দদ্যা-
দ্বিপ্রায় দক্ষিণা মিতি। তথা। সিং-
হরাশৌ গতে সূর্য্যে গোঃ প্রসূতি
র্যদা ভবেৎ। পৌষে চ মহিষী সূ-
তে দিবৈ বাশ্বতরী তথা॥ তদানি
ষ্টং ভবেৎ কিঞ্চিৎ তচ্ছান্ত্যৈ শান্তিকং
চরেৎ। অস্য বামেতি সূক্তেন তদ্বি
ষ্ণো রিতি মন্ত্রতঃ॥ জুহুয়াচ্চ তিলা-
জ্যেন শতমষ্টোত্তরাধিকং। মৃত্যুঞ্জ-
য় বিধানেন জুহুয়াচ্চ তথা মৃতং॥ শ্রী
সূক্তেন ততঃ স্নায়াৎ শান্তিসূক্তেন
বা পুনঃ। মধ্যরাত্রৌ নিশীথে বা যদা
গৌঃ ক্রন্দতে তদা ॥ গ্রামে বাস্য
গৃহে বাপি শান্তিঃ পূর্ব্ববদ্দিশেৎ॥
সংক্রমণোত্তরষোড়শ দণ্ডাত্মক পুণ্য
কালাভ্যন্তরে গোঃ প্রসবে বিপ্রসম্প্র-
দানক গো প্রদান পূর্ব্বক শান্তিঃ কা-
র্য্যা ইতি বিশেষঃ। তদতিরিক্ত সিং-
হস্থ রবৌ গোঃ প্রসবে শান্তি মাত্রং
কর্ত্তব্যং ন গোঃ প্রদানং। নির্ণয়সি-
ন্ধুধৃতাদ্ভুতসাগরগ্রন্থীয় বচন জাত
মীমাংসানুসারাদিতি ॥ ❁ ॥ অথ
ভাদ্রকৃত্যং। তত্র জন্মাষ্টমী ব্রত প্রমা-
ণং তিথিতত্ত্বে হনুসন্ধেয়ং। শ্রাবণ-
পৌর্ণমাস্যনন্তরিত ভাদ্রকৃষ্ণাষ্টম্যাং
রাত্রি মধ্যে মুহূর্ত্তাষ্টমী রোহিণীযো-
গরূপ জয়ন্তী লাভে তত্রৈবোপবা-
সঃ। উভয়দিনে চেত্তদা পরদিনে।
জয়ন্ত্যলাভে তু রোহিণী যুক্তাষ্টম্যাং
। উভয়দিনে রোহিণী যুতাষ্টমী লা-
ভে পরদিনে। রোহিণ্যলাভে তু
নিশীথ সম্বন্ধিন্যামষ্টম্যাং। উভয়-
দিনে নিশীথ সম্বন্ধে তদসম্বন্ধে বা
পরদিনে ইতি। তত্র প্রয়োগঃ। পূর্ব্ব
দিনে সংযমং বিধায় তদ্দিনে কৃত
প্রাতঃস্নানাদি রাচান্তঃ। ওঁ সূর্য্যঃ
সোম ইতি পঠিত্বা। ওঁ তদ্বিষ্ণোঃ
পরমং পদ মিত্যাদি মন্ত্রেণ নারা-
য়ণং সংস্মৃত্য ওঁ তৎ সৎ ইত্যুচার্য্য
উদঙ্মুখো দর্ভহস্ত স্তাম্রপাত্রে জল
তিল জলান্যাদায় ওঁ অদ্য ভাদ্রে
মাসি কৃষ্ণে পক্ষে অষ্টম্যাং তিথৌ

অমুকগোত্রঃ শ্রীঅমুকদেবশর্ম্মা বিষ্ণুলোকপ্রাপ্তিকামঃ শ্রীবিষ্ণু প্রীতিকামো বা শ্রীকৃষ্ণজন্মাষ্টমী ব্রতমহং করিষ্যে ইতি সংকল্পয়েৎ। যদ্যপবাস দিনে প্রাতঃ সপ্তমী তদাষ্টম্যাং তিথাবিত্যত্র সপ্তম্যান্তিথাবারভ্য ইতি বক্তব্যং। ততঃ সামগস্তু ওঁ দেবো বো দ্রবিণোদা পূর্ণাং বিবষ্টাসিচং উদ্বা সিঞ্চধ্ব মুপবা পৃণধ্ব মাদিদিবো দেব ওহতে। ইতি পঠেৎ। ওঁ ধর্ম্মায় ধর্ম্মেশ্বরায় ধর্ম্মপতয়ে ধর্ম্মসম্ভবায় গোবিন্দায় নমো নমঃ। ইত্যুচার্য্য। ওঁ বাসুদেবং সমুদ্দিশ্য সর্ব্বপাপ প্রশান্তয়ে। উপবাসং করিষ্যামি কৃষ্ণাষ্টম্যাং নভস্যহং॥ অদ্য কৃষ্ণাষ্টমীং দেবীং নভশ্চন্দ্র স রোহিণীং। অর্চ্চয়িত্বোপবাসেন ভোক্ষ্যে ২হ মপরে ২হনি॥এনসোমোক্ষকামো ২স্মি যদ্গোবিন্দ ত্রিযোনিজং। তন্মে মুঞ্চতু মাং ত্রাহি পতিতং শোকসাগরে॥ আজন্ম মরণং যাবদ্যন্ময়া দুষ্কৃতং কৃতং। তৎ প্রণাশয় গোবিন্দ প্রসীদ পুরুষোত্তম॥ ইতি পঠেৎ। তত আহ্নিকং সমাপ্যার্দ্ধরাত্রে তত্তৎ প্রতিমাসু পটাদিষু বা আবাহন বিসর্জ্জন সহিতং শালগ্রামে ঘটাদিস্থজলে বা আবাহন বিসর্জ্জন রহিতং পূজয়েৎ। ততো ধ্যানং। মাঞ্চাপি বালকং সুপ্তং পর্য্যঙ্কে স্তনপায়িনং। শ্রীবৎসবক্ষঃ পূর্ণাঙ্গং নীলোৎপলদলচ্ছবিং॥ ইতি ধ্যাত্বা শ্রীকৃষ্ণ স্বাগতং ইতি পৃচ্ছেৎ। ইদমাসনং ওঁ কৃষ্ণায নমঃ। ইত্যাসনং দত্ত্বা এতৎ পাদ্যং ওঁ শ্রীকৃষ্ণায নমঃ ওঁ যজ্ঞায যজ্ঞেশ্বরায যজ্ঞপতয়ে যজ্ঞ সম্ভবায গোবিন্দায নমো নমঃ। ইত্যুচার্য্য ইদমর্ঘ্যং ওঁ শ্রীকৃষ্ণায নমঃ। ইদ মাচমনীযং ওঁ শ্রীকৃষ্ণায নমঃ। ততো দধি মধু ঘৃতাক্তং মধুপর্কমানীয এষ মধুপর্ক ওঁ শ্রীকৃষ্ণায নমঃ। ইদ মাচমনীযং ওঁ শ্রীকৃষ্ণায নমঃ। লৌকিক ষষ্ট্যধিক শতত্রয তোলক পরিমিতান্যূনং জলমানীয ওঁ যোগায যোগেশ্বরায যোগপতয়ে যোগসম্ভবায গোবিন্দায নমো নমঃ। ইদং স্নানীয জলং ওঁ শ্রীকৃষ্ণায নমঃ। ইদং বস্ত্রং। ইদমাভরণং। এষ গন্ধঃ ইদং পুষ্পং এষ ধূপঃ এষ দীপঃ ইদং নৈবেদ্যং ওঁ বিশ্বায বিশ্বেশ্বরায বিশ্বপতয়ে বিশ্বসম্ভবায গোবিন্দায নমো নমঃ। ইত্যনেননৈবেদ্যং দদ্যাৎস্থাপযেচ্চ। ততো নমো দেব্যৈ শ্রিয়ৈনমঃ। ইতি মন্ত্রেণ শ্রিযং পূজয়েৎ। ততঃ স্বগৃহ্যোক্ত বিধিনা

সংস্থাপ্য ঘৃত তিলাভ্যাং। ওঁ ধর্ম্মায় ধর্ম্মেশ্বরায়, ধর্ম্মপতয়ে ধর্ম্মসম্ভবায় গোবিন্দায় নমো নমঃ স্বাহা। ইত্যনেনাষ্টোত্তরশত মষ্টাবিংশতি মষ্টৌ বা জুহুয়াৎ। ততো গুড় ঘৃতেন বসোর্দ্ধারাং ভিত্তৌ দদ্যাৎ। ততো নাড়ী ছেদং কারয়েৎ। ওঁ ষষ্ঠ্যৈনম ইতি ষষ্ঠীং পূজয়েৎ। ততো ভগবতঃ শ্রীকৃষ্ণস্য নামকরণান্নপ্রাশন চূড়াকরণোপনয়নোদ্বাহ সংস্কারান্ ভাবয়েৎ। ততঃ প্রণবাদি নমোহন্তেন মন্ত্রেণ পূজয়েৎ। ওঁ দেবক্যৈ নমঃ ওঁ বসুদেবায় যশোদায়ৈ নন্দায় রোহিণ্যৈ চণ্ডিকায়ৈ বলদেবায় দক্ষায় গর্গায় চতুর্ম্মুখায় ইত্যনেন যথাশক্তি পঞ্চোপচারৈঃ পূজয়েৎ। ততঃ শঙ্খেন জল পুষ্প চন্দন জলান্যাদায় ভূমৌ জানুনী পাতয়িত্বা ওঁ ক্ষীরোদার্ণব সংভূত অত্রিনেত্র সমুদ্ভব। গৃহাণার্ঘ্যং শশাঙ্কেদং রোহিণ্যা সহিতো মম॥ ওঁ সোমায় সোমেশ্বরায় সোমপতয়ে সোম সম্ভবায় গোবিন্দায় নমো নমঃ। ইত্যর্ঘ্যং দদ্যাৎ। ততঃ প্রণাম মন্ত্রৌ। ওঁ জ্যোৎস্নায়াঃ পতয়ে তুভ্যং জ্যোতিষাং পতয়ে নমঃ। নমস্তে রোহিণী কান্ত সুধাবাস নমোহস্তুতে॥ নমো মণ্ডল দীপায় শিরোরত্নায় ধূর্জ্জটেঃ। কলাভির্বর্দ্ধমানায় নম শ্চন্দ্রায় চারবে॥ ততশ্চ। অনঘং বামনং শৌরিং বৈকুণ্ঠং পুরুষোত্তমং। বাসুদেবং হৃষীকেশং মাধবং মধুসূদনং॥ বরাহং পুণ্ডরীকাক্ষং নৃসিংহং দৈত্যসূদনং। দামোদরং পদ্মনাভং কেশবং গরুড়ধ্বজং। গোবিন্দ মচ্যুতং দেব মনন্ত মপরাজিতং। অধোক্ষজং জগদ্বীজং স্বর্গস্থিত্যন্তকারিণং॥ অনাদি নিধনং বিষ্ণুং ত্রিলোকেশং ত্রিবিক্রমং। নারায়ণং চতুর্ব্বাহুং শঙ্খ চক্র গদাধরং॥ পীতাম্বরধরং নিত্যং বনমালা বিভূষিতং। শ্রীবৎসাঙ্কং জগৎসেতুং শ্রীকৃষ্ণং শ্রীধরং হরিং॥ প্রপদ্যেহহং সদা দেবং সর্ব্বকাম প্রসিদ্ধয়ে। ইতি স্তবঃ॥ ততঃ প্রণমেৎ। প্রণমামি সদা দেবং বাসুদেবং জগৎপতিং। ত্রাহি মাং সর্ব্বদেবেশ হরে সংসার সাগরাৎ॥ ততঃ প্রার্থয়েৎ। ওঁ ত্রাহি মাং সর্ব্বপাপঘ্ন দুঃখ শোকার্ণবাদ্ধরে। সর্ব্বলোকেশ্বর ত্রাহি পতিতং মাং ভবার্ণবে॥ দেবকীনন্দন শ্রীশ হরে সংসার সাগরাৎ। ত্রাহি মাং সর্ব্বদুঃখঘ্ন রোগ শোকার্ণবাদ্ধরে॥ দুর্গতাং স্ত্রায়সে বিষ্ণো যে স্মরন্তি সকৃৎ সকৃৎ। সোহহং দেবাতি দুর্ব্বৃত্ত ত্রাহি মাং

ঃখ সাগরাৎ॥ পুষ্করাক্ষ নিমগ্নোহং মায়াবিজ্ঞান সাগরে। ত্রাহি মাং দেবদেবেশ ত্বত্তো নান্যোঽস্তি রক্ষিতা ॥ ইতি প্রার্থয়েৎ। যদ্বাল্যে যচ্চ কৌমারে বার্দ্ধকে যচ্চ যৌবনে। তৎ পুণ্যং বৃদ্ধি মাপ্নোতু পাপং হর হলায়ুধ॥ ইতিবদেৎ। ততো নৃত্যগীত বাদিত্র স্তবৈঃ কালং নয়েৎ পরদিনে প্রাতঃ স্নানাদিকং কৃত্বা ভগবন্তং শ্রীকৃষ্ণং যথাবিধি সংপূজ্য দুর্গায়াশ্চ মহোৎসবঃ কার্য্যঃ। ততো ব্রাহ্মণান্ ভোজয়েৎ তেভ্যো দক্ষিণাং দদ্যাৎ সুবর্ণাদি যৎকিঞ্চিদিষ্টতমং শ্রীকৃষ্ণো মে প্রীয়তা মিতি। ওঁ যং দেবং দেবকী দেবী বসুদেবাদজীজনৎ। ভৌমস্য ব্রহ্মণো গুপ্ত্যৈ তস্মৈ ব্রহ্মাত্মনে নমঃ॥ সু ব্রহ্ম বাসুদেবায় গো ব্রাহ্মণ হিতায় চ। শান্তি রস্তু শিবঞ্চাস্তু ইত্যুচার্য্য বিসর্জ্জয়েৎ॥ ততশ্চোপবাস পরদিনে তিথিনক্ষত্রয়ো রবসানে পারণং। যদা তু মহানিশায়াঃ পূর্ব্বমেকতরস্যাবসান মন্যতরস্য মহানিশায়াং তদনন্তরং বা তদেকতরাবসানে পারণং। যদা তু মহানিশায়া মুভয় স্থিতিঃ তদা উৎসবান্তে পারণং কুর্য্যাৎ। তত্র মন্ত্রঃ। ওঁ সর্ব্বায় সর্ব্বেশ্বরায় সর্ব্বপতয়ে সর্ব্ব সম্ভবায় গোবিন্দায় নমো নমঃ। পারণানন্তরস্তু সমাপন মন্ত্রঃ। ওঁ ভূতায় ভূতেশ্বরায় ভূতপতয়ে ভূত সম্ভবায় গোবিন্দায় নমো নমঃ। ইত্যনেন ব্রতং সমাপয়েৎ ॥ * ॥ ভাদ্র শুক্ল পঞ্চমী মধিকৃত্য ভবিষ্যোত্তরে। তথা ভাদ্রপদে মাসি পঞ্চম্যাং শ্রদ্ধয়ান্বিতঃ। যস্ত্বালিখ্য নরো ভক্ত্যা কৃষ্ণবর্ণাদি বর্ণকৈঃ। পূজয়েদ্গন্ধ পুষ্পৈশ্চ সর্পি র্গুগ্গুলু পায়সৈঃ। তস্য তুষ্টিং সমায়ান্তি পন্নগা স্তক্ষকাদয়ঃ। আ সপ্তমাৎ কুলাত্তস্য ন ভয়ং সর্পতো ভবেৎ। তস্মাৎ সর্ব্ব প্রযত্নেন নাগান্ সংপূজয়েন্নরঃ॥ ইত্যনেনালেখ্য নাগপঞ্চমীতি বাচস্পতি মিশ্রাঃ। আলেখ্য নাগাঃ কর্কোটকাদয়ঃ পূর্ব্ব লিখিতাঃ পূজা চ শ্রাবণ পঞ্চমী বিহিতেতি বোধ্যং ॥ * ॥ অথ হরেঃ পার্শ্বপরিবর্ত্তনং। তত্র দ্বাদশ্যাং সন্ধি সময়ে নক্ষত্রাণা মসম্ভবে। আভা কা সিতপক্ষেষু শয়নাবর্ত্তনাদিক মিতি ব্রহ্মপুরাণাৎ॥ ভাদ্র শুক্ল দ্বাদশ্যাং শ্রবণ মধ্য যুক্তায়াং সন্ধ্যা সময়ে দ্বাদশ্যা মৃক্ষাভাবে একাদশ্যাদিষু পাদযোগে তদভাবেঽপি দ্বাদশ্যাং কেবলায়াং বা কৃতাহ্নিকঃ সায়ংসন্ধ্যায়াং দেবং সংপূজ্য। ওঁ বাসু-

দেব জগন্নাথ প্রাপ্তো দ্বাদশী তব। পার্শ্বেন পরিবর্ত্তস্ব সুখং স্বপিহি মাধব॥ ইতি প্রাঞ্জলিঃ পঠেৎ। দ্বুষি সুপ্ত জগন্নাথ জগৎ সুপ্তং ভবেদিতি। প্রবুদ্ধে ত্বয়ি বুধ্যেত জগৎ সর্ব্বং চরাচরং॥ ইত্যনেন পূজয়েৎ॥ *॥ অথ সিংহার্কে চতুর্থ্যাং চন্দ্রদর্শন প্রায়শ্চিত্তং। সিংহার্ক মধিকৃত্য ব্রহ্মপুরাণং। নারায়ণো হভিশপ্তস্তু নিশাকর মরীচিষু। স্থিত শ্চতুর্থ্যাম দ্যাপি মনুষ্যা নাপতেচ সঃ॥ অত শ্চতুর্থ্যাং চন্দ্রস্তু প্রমাদাদ্বীক্ষ্যমানবঃ। পঠেদ্ধাত্রেয়িকা বাক্যং প্রাঙ্মুখো বাপ্যুদঙ্মুখঃ॥ অভিশপ্তো মিথ্যা পবাদ বিবরীভূতঃ। সো হভিশাপঃ। অদ্যাপি মনুষ্যান্ পতেৎ। ততশ্চ প্রাঙ্মুখ উদঙ্মুখো বা কুশ তিল জলান্যাদায় ওঁ অদ্যেত্যাদি সিংহার্ক চতুর্থী চন্দ্রদর্শন জন্য পাপ ক্ষয কামো ধাত্রেয়ী বাক্য মহং পঠিষ্যে। ইতি সঙ্কল্প্য। ওঁ সিংহঃ প্রসেন মবধীৎ সিংহো জাম্ববতা হতঃ। সুকুমারক মারোদী স্তব হ্যেষ স্যমন্তকঃ॥ ইতি বিষ্ণুপুরাণোক্তং ধাত্রেয়ী বাক্যং পঠেৎ॥ *॥ অথাগস্ত্য ব্রতং। তত্র যদ্দিনে কন্যাভত্তাদিনে ব্রতং। উভয়দিনে চেৎ পরদিনে যুগ্মাৎ। ব্রতানুষ্ঠান বিধিস্ত পদ্ধতৌ জ্ঞেয়ঃ॥ *॥ অথাগস্ত্যার্ঘ্য দানং। পুনাগস্ত তিথিতত্ত্বে হনুসন্ধেয়ং। সিংহস্থ রবি কর্ত্তব্যত্বেন সৌর মাসাদরঃ। কন্যার্ক সংক্রান্তি পূর্ব্বদিন ত্রযাভ্যন্তরে কৃত স্নানাদি কৃতাহ্নিক স্তিল কুশ জলান্যাদায ওঁ তৎসদিত্যচার্য্য ওঁ অদ্যেত্যাদি সর্ব্বাভিলষিত সিদ্ধিকামো হগস্ত্য পূজন মহং করিষ্যে ইতি সঙ্কল্প্য শালগ্রামে জলে বা দক্ষিণা মুখঃ। এতৎ পাদ্যং ওঁ অগস্ত্যায নমঃ। সিত পুষ্পাক্ত যুক্তং জলং শঙ্খেন গৃহীত্বা ইদমর্ঘ্যং ওঁ কাশ পুষ্প প্রতীকাশ অগ্নিমারুত সম্ভব। মিত্রাবরুণযোঃ পুত্র কুম্ভযোনে নমো হস্তু তে॥ ওঁ অগস্ত্যায নমঃ। এব মাচমনীয স্নানীয গন্ধ পুষ্প ধূপ দীপ নৈবেদ্যাদিকং দদ্যাৎ। ওঁ আতাপি র্ভক্ষিতো যেন বাতাপী চ মহাসুরঃ। সমুদ্রঃ শোষিতো যেন স মে হগস্ত্যঃ প্রসীদতু॥ ইতি প্রার্থযেৎ॥ ইতি কৃত্যতত্ত্বং॥

ভাদ্রপদঃ পুং ভাদ্রমাসঃ। ইত্যমরঃ॥

ভাদ্রপদা স্ত্রী পূর্ব্বভাদ্রপদানক্ষত্রং॥ উত্তরভাদ্রপদানক্ষত্রং। তৎপর্য্যায়ঃ। প্রোষ্ঠপদা ২। ইত্যমরঃ॥

ভাদ্রমাতুরঃ পুং সতীতনযঃ। সত্যা-

পুনর্জ্জিরে । যুধিষ্ঠিরো ভীমসেনো
হর্জুনো নকুল স্তথা ॥ সহদেবশ্চ
পঞ্চৈতে মহাবল পরাক্রমাঃ । কুরু
পাণ্ডবয়ো বৈরং দৈবযোগাদ্বভূবহ
॥ দুর্য্যোধনেন বীরেণ পাণ্ডবাঃ সমুপ
দ্রুতাঃ। দগ্ধা জতুগৃহে বীরাস্তে মুক্তাঃ
সুধিয়ামলাঃ ॥ তত স্তএক চক্রায়াং
ব্রাহ্মণস্য নিবেশনে । বিপ্রবেশা ম
হাত্মানো নিহত্য বকরাক্ষসং ॥ ততঃ
পাঞ্চাল বিষয়ে দ্রৌপদ্যাস্তে স্বয়ম্বরং
। বিজ্ঞায় বীর্য্য শুল্কাং তাং পাণ্ডবা
উপযেমিরে ॥ দ্রোণ ভীষ্মাবনত্যা চ
ধৃতরাষ্ট্রঃ সমানয়ৎ । অর্দ্ধং রাজ্যং
ততঃ প্রাপ্য ইন্দ্রপ্রস্থে পুরোত্তমে ॥
রাজসূয়ং তত শ্চক্রুঃ সভাং কৃত্বা যত
ব্রতাঃ । অর্জুনোদ্বারবত্যাস্তু সুভদ্রাং
প্রাপ্তবান্ প্রিয়াং ॥ বাসুদেবস্য ভ
গিনীং মিত্রং দেবকিনন্দনং ॥ গাণ্ডী
বং নাম তদ্দিব্যং ত্রিষুলোকেষু বি-
শ্রুতং । অক্ষয়ান্ শায়কাংশ্চৈব তথা-
ভেদ্যঞ্চ দংশনং ॥ স তেন ধনষা বীরঃ
পাণ্ডবো জাতবেদসং । কৃষ্ণ দ্বিতীয
বীভৎসু রতর্পয়ত বীর্য্যবান্ ॥ নৃপা
ন্ দিগ্বিজয়ে জিত্বা রত্নান্যাদায বৈ
দদৌ । যুধিষ্ঠিরায মহতে ভ্রাত্রে নী-
তিবিদে মদা ॥ যুধিষ্ঠিরোহপি ধর্ম্মা-
ত্মা ভ্রাতৃভিঃ পরিবারিতঃ । জিতো



দুর্য্যোধনে নৈব মায়াদ্যুতেন পাপিনা
॥ কর্ণ দুঃশাসন মতে স্থিতেন শকু-
নে র্মতে । অথ দ্বাদশ বর্ষাণি বনেত্তে-
পু র্ম্মহত্তপঃ ॥ স ধৌম্যা দ্রৌপদী স-
ত্যা মুনিবৃন্দাভিসংবৃতাঃ । যযু র্বি-
রাট নগরং গুপ্তরূপেণ সংস্থিতাঃ ॥
বর্ষমেকং মহাপ্রাজ্ঞা গোগৃহাদি ম-
পালয়ন । ততো জ্ঞাতাঃ স্বকং রাষ্ট্রং
প্রার্থয়ামাসু রাদৃতাঃ ॥ পঞ্চগ্রামা-
নর্দ্ধরাজ্যং বীরা দুর্য্যোধনং নৃপং । না-
প্রাপ্তঃ কুরুক্ষেত্রে যুদ্ধঞ্চক্রু র্বলান্বি-
তাঃ ॥ অক্ষৌহিণীভি র্দিব্যাভিঃ স-
প্তভিঃ পরিবারিতাঃ । একাদশভি-
রুদ্যুক্তা স্তে হপি দুর্য্যোধনাদয়ঃ ॥
আসীদ্যুদ্ধং স্বর্গমার্গং দেবাসুর বলো-
পমং । ভীষ্মঃ সেনাপতি রভূদাদৌ
দৌর্য্যোধনে বলে ॥ পাণ্ডবানাং শি-
খণ্ডী চ তয়ো র্যুদ্ধং বভূব হ । অস্ত্রা-
শস্ত্রৈ র্মহাঘোরং দশরাত্রং শরাশ-
নিঃ ॥ শিখণ্ড্যর্জুন বাণৈশ্চ ভীষ্মঃ
শরশিতৈ শ্চিতঃ । উত্তরায়ণ মীক্ষ্যা-
থ ধ্যাত্বা দেবং গদাধরং ॥ উক্ত্বা ধ-
র্ম্মান্ বহূন্ বর্ষাং স্তর্পয়িত্বা পিতৄন
বহূন । আনন্দে তু পদে লীনো বিমু
মুক্ত কিল্বিষে ॥ ততো দ্রোণো য
যোদ্ধং ধৃষ্টদ্যুম্নেন বীর্য্যবান্ । দিনা-
পঞ্চ তদ্যুদ্ধ নাসীৎ পরম দারুণং ॥

য শ্রেষ্ঠে পৃথিবীপালা হতাঃ পার্থাস্ত্র সাগরে। শোর্ব্যমাসাদ্য পুত্রেণ দ্রোণো হর্ষপি স্বর্গমাপ্ন যাৎ॥ ততঃ কর্ণো যযৌ যোদ্ধু মর্জুনেন মহাত্মনা। দিন দ্বয়ং মহদ্যুদ্ধং কৃত্বা পার্থাস্ত্র সাগরে॥ নিমগ্নঃ সূর্য্য লোকস্তু ততঃ প্রাপ স বীর্য্যবান্। ততঃ শল্যো যযৌ যোদ্ধং ধর্ম্মরাজেন ধীমতা॥ দিনার্দ্ধেন হতঃ শল্যো বাণৈ র্জ্বলন সন্নিভৈঃ। দুর্য্যোধনো হথ বেগেন গদামাদায় বীর্য্যবান্॥ অভ্যধাবত বৈ ভীমং কালান্তক যমোপমং। অথ ভীমেন বীরেণ গদয়া বিনিপাতিতঃ॥ অশ্বত্থামা ততো দ্রৌণিঃ সুপ্তং সৈন্যং ততো নিশি। জঘান সা... বীর্য্যেণ পিতু র্বধ মনুস্মরন্। ...ং ভ্রা- নাথ দ্রৌপদেয়াংশ্চ বীর্য্যবান্। দ্রৌপদ্যাং রোদমানায়া মশ্বত্থান্নঃ শিরোমণিং॥ ঐষীকাস্ত্রেণ তং জিত্বা জগ্রাহার্জুন উত্তমং। যুধিষ্ঠিরঃ সমাশ্বাস্য স্ত্রীজনং শোক সঙ্কুলং॥ স্নাত্বা সন্তর্প্য দেবাংশ্চ পিতৄনথ পিতামহান্। আশ্বাসিতো হথ ভীষ্মেণ রাজ্যঞ্চৈবাকরোন্মহৎ॥ বিষ্ণুমীজে হশ্বমেধেন বিধিবদ্দক্ষিণাবতা। রাজ্যে পরিক্ষিতং স্থাপ্য যাদবানাং বিনাশনং॥ শ্রুত্বা তু মৌষলে রাজা জপ্তা নাম সহস্রকং। বিষ্ণোঃ স্বর্গং জগামাথ ভীমাদ্যৈ ভ্রাতৃভি র্যুতঃ॥ ইতি গারুড়ে ১৫০ অধ্যায়ঃ॥ *॥

বর্ষভেদঃ। ইতি মেদিনী॥ তত্তু জম্বুদ্বীপস্য নববর্ষান্তর্গত নবমবর্ষঃ। তদ্বিবরণং যথা। উত্তরং যৎ সমুদ্রস্য হিমাদ্রে শ্চৈব দক্ষিণং। বর্ষং তদ্ভারতং নাম ভারতী যত্র সন্ততিঃ॥ নব যোজন সাহস্রো বিস্তারোহস্য মহামুনে। কর্ম্মভূমি রিয়ং স্বর্গ মপবর্গঞ্চ গচ্ছতাং॥ মহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমানৃক্ষপর্ব্বতঃ। বিন্ধ্যশ্চ পারিপাত্রশ্চ সপ্তাত্র কুলপর্ব্বতাঃ॥ অতঃ সংপ্রাপ্যতে স্বর্গো মুক্তি মস্মাৎ প্রযান্তি চ। তির্য্যক্ত্বং নরকঞ্চাপি যান্ত্যতঃ পুরুষা মুনে॥ ইতঃ স্বর্গশ্চ মোক্ষশ্চ মধ্যঞ্চান্তশ্চ গম্যতে। ন খল্বন্যত্র মর্ত্যানাং কর্ম্মভূমৌ বিধীয়তে॥ ভারতস্যাস্য বর্ষস্য নব ভেদান্নিশাময়। ইন্দ্রদ্বীপঃ কশেরুশ্চ তাম্রপর্ণো গভস্তিমান্॥ নাগদ্বীপ স্তথা সৌম্যো গান্ধর্ব্ব স্তথ বারুণঃ। অয়ন্তু নবম স্তেষাং দ্বীপঃ সাগর সংবৃতঃ॥ যোজনানাং সহস্রন্তু দ্বীপো হয়ং দক্ষিণোত্তরাৎ। পূর্ব্বে কিরাতা যস্যান্তে পশ্চিমে যবনাঃ স্থিতাঃ॥ ব্রাহ্মণাঃ ক্ষত্রিয়া

বৈশ্যা মধ্যে শূদ্রাশ্চ ভাগশঃ। ইজ্যা যুদ্ধ বণিজ্যাদ্যৈ র্বর্ত্তয়ন্তো ব্যবস্থিতাঃ ॥ শতদ্রু শ্চন্দ্রভাগাদ্যা হিমবৎপাদনিঃসৃতাঃ। বেদ স্মৃতি মুখা শ্চান্যাঃ পারিপাত্রোদ্ভবা মুনে ॥ নর্ম্মদা সুরসাদ্যাশ্চ নদ্যো বিন্ধ্য বিনিঃসৃতাঃ। তাপী পয়োষ্ণী নির্বিন্ধ্যা প্রমুখা ঋক্ষ সম্ভবাঃ ॥ গোদাবরী ভীমরথী কৃষ্ণবেণ্যাদিকা স্তথা। সহ্যপাদোদ্ভবা নদ্যঃ স্মৃতাঃ পাপ ভয়াপহাঃ ॥ কৃতমালা তাম্রপর্ণী প্রমুখা মলয়োদ্ভবাঃ। ত্রিসামা ঋষিকুল্যাদ্যা মহেন্দ্রপ্রভবাঃ স্মৃতাঃ ॥ ঋষিকুল্যা কুমার্য্যাদ্যাঃ শুক্তিমৎপাদ সম্ভবাঃ। আসাং নদ্যুপনদ্যশ্চ সন্ত্যন্যাশ্চ সহস্রশঃ॥ তাস্বিমে কুরু পাঞ্চাল মধ্যদেশাদয়ো জনাঃ। পূর্ব্ব দেশাদিকাশ্চৈব কামরূপ নিবাসিনঃ॥ ওড্রাঃ কলিঙ্গা মগধা দাক্ষিণাত্যাশ্চ কৃৎস্নশঃ। তথা ২পরান্তাঃ সৌরাষ্ট্রাঃ শূরাভীরা স্তথা র্বুদাঃ ॥ মারুকা মালবা শ্চৈব পারিপাত্র নিবাসিনঃ। সৌবীরাঃ সৈন্ধবা হূণাঃ শাল্বাঃ শাকল বাসিনঃ॥ মদ্রা রামা স্তথাম্বষ্ঠাঃ পারসীকাদয় স্তথা। আসাং পিবন্তি সলিলং বসন্তি সরিতাং সদা ॥ সমীপতো মহাভাগ হৃষ্ট

পুষ্ট জনাঙ্গনাঃ। চত্বারি ভারতে বর্ষে যুগান্যত্র মহামুনে। কৃতং ত্রেতা দ্বাপরঞ্চ কলি শ্চান্যত্র ন ক্বচিৎ। তপ স্তপ্যন্তি যতয়ো জুহ্বতে চাত্র যজ্বিনঃ ॥ দানানি চাত্র দীয়ন্তে পরলোকার্থ মাদরাৎ। পুরুষৈ র্যজ্ঞপুরুষো জম্বুদ্বীপে সদেজ্যতে ॥ যজ্ঞৈ র্যজ্ঞ পতি র্বিষ্ণু রন্যদ্বীপেষু চান্যথা। তত্রাপি ভারতং শ্রেষ্ঠং জম্বুদ্বীপে মহামুনে॥ যতো হি কর্ম্মভূরেষা ততোন্যা ভোগভূময়ঃ। অত্র জন্ম সহস্রাণাং সহস্রৈরপি সত্তম ॥ কদাচিল্লভতে জন্তু র্মানুষ্যং পুণ্য সঞ্চয়াৎ। গায়ন্তি দেবাঃ কিল গীতকানি ধন্যাস্তু যে ভারতভূমি ভাগে। স্বর্গাপবর্গাস্পদ মার্গ ভূতে ভবন্তি ভূয়ঃ পুরুষাঃ সুরত্বাৎ ॥ কর্ম্মাণ্য সঙ্কল্পিত তৎ ফলানি সংন্যস্য বিষ্ণৌ পরমাত্মরূপে। অবাপ্যতাং কর্ম্ম মহীমনন্তে তস্মিল্লয়ং যেত্বমলাঃ প্রযান্তি ॥ জানীম নৈতৎ ক্বয়ং বিলীনে স্বর্গপ্রদে কর্ম্মণি দেহ বন্ধং। প্রাপ্স্যাম ধন্যাঃ খলু তে মনুষ্যা যে ভারতে নেন্দ্রিয় বিপ্রহীনাঃ॥ নব বর্ষন্তু মৈত্রেয় জম্বুদ্বীপ মিদং ময়া। লক্ষযোজন বিস্তারং সংক্ষেপাৎ কথিতং তব ॥ জম্বুদ্বীপং সমাবৃত্য লক্ষযোজন বিস্তরঃ। মৈত্রেয় বলয়া

কারঃ স্থিতঃ ক্ষারোদধির্বহিঃ॥ ইতি শ্রীবিষ্ণুপুরাণে ২ অংশে ৩ অধ্যায়ঃ ॥ * ॥ অস্মিন্বর্ষে জন্ম কারণং তৎ সাফল্যঞ্চ যথা॥ শতজন্ম তপঃ কৃত্বা জন্মেদং ভারতে লভেৎ। করোতি সফলং জন্ম শ্রুত্বা হরিকথামৃতং ॥ অর্চ্চনং বন্দনং মন্ত্র জপঃ সেবন মেব চ। স্মরণং কীর্ত্তনং শশ্বদ্গুণ শ্রবণ মীপ্সিতং॥ নিবেদনং স্বস্য দাস্যং নবধা ভক্তি লক্ষণং। করোতি সফলং জন্ম কৃত্বৈতানি চ ভারতে ॥ * ॥ অন্য পুণ্যস্থলত্বং কর্ম্মভূমিত্বং পরিমাণঞ্চ যথা। কর্ম্মণাং ফলভোগশ্চ সর্ব্বেষাং সুরসুন্দরি। নৈব স্বর্গে ন পাতালে নান্য দ্বীপে শ্রুতৌ শ্রুতং ॥ কৃত্বা শুভাশুভং কর্ম্ম পুণ্যক্ষেত্রে চ ভারতে। অন্যত্র তৎফলং ভুঙ্ক্তে কর্ম্মী কর্ম্মনিবন্ধনাৎ॥ হিমালযাদা-সমুদ্রং পুণ্যক্ষেত্রঞ্চ ভারতং। শ্রেষ্ঠং সর্ব্বস্থলানাঞ্চ মুনীনাঞ্চ তপঃ স্থলং ॥ লব্ধা তত্র জন্ম জীবী বাঞ্ছিতো বিষ্ণুমাযযা। শশ্বৎ করোতি বিষযং বিহায সেবনং হরেঃ ॥ কৃত্বা তত্র মহৎ পুণ্যং স্বর্গং গচ্ছতি পুণ্যবান্। গৃহীত্বা স্বর্গকন্যাশ্চ চিরং স্বর্গে প্রমোদতে ॥ স্বর্গ মাগচ্ছতি নরো বিহায মানবীং তনুং। ইতি ব্রহ্মবৈবর্ত্ত পুরাণে শ্রীকৃষ্ণ জন্মখণ্ডে ১। ৫৯ অধ্যাযৌ ॥

ভারতঃ পুং নটঃ। ইতি জটাধরঃ ॥ অগ্নিঃ ॥ ইতি ত্রিকাণ্ডশেষঃ ॥ ভরতস্যাপত্যঞ্চ ॥

ভারতবর্ষং ক্লী জম্বুদ্বীপস্যনববর্ষান্তর্গতবর্ষবিশেষঃ। যথা। হিমাহ্বং দক্ষিণং বর্ষং ভরতায দদৌপিতা। তস্মাচ্চ ভারতং বর্ষং তস্য নাম্না মহাত্মনঃ ॥ তস্য নবভাগা যথা। ভারতস্যাস্য বর্ষস্য নবভেদান্নিবোধ মে। সমুদ্রান্তরিতা জ্ঞেযাস্তে ত্বগম্যাঃ পরস্পরং ॥ ইন্দ্রদ্বীপঃ কসেরুশ্চ তাম্রবর্ণো গভস্তিমান্। নাগদ্বীপ স্তথা সৌম্যো গন্ধর্ব্বো বারুণ স্তথা ॥ অযন্তু নবম স্তেষাং দ্বীপঃ সাগর সংবৃতঃ। যোজনানাং সহস্রং বৈ দ্বীপো হযং দক্ষিণোত্তরাৎ ॥ পূর্ব্বে কিরাতা যস্যান্তে পশ্চিমে যবনাঃ স্মৃতাঃ। ব্রাহ্মণাঃ ক্ষত্রিযা বৈশ্যাঃ শূদ্রা শ্চান্তঃ স্থিতা দ্বিজ ॥ ইজ্যা যুদ্ধ বণিজ্যাদ্যৈঃ কর্ম্মভিঃ কৃত পাবনাঃ। তেষাং সংব্যবহারশ্চ এভিঃ কর্ম্মভি রিষ্যতে ॥ স্বর্গাপবর্গ প্রাপ্তিশ্চ পুণ্যং পাপঞ্চ বৈ তথা। মহেন্দ্রো মলযঃ সহ্যঃ শুক্তিমানৃক্ষ পর্ব্বতঃ॥ বিন্ধ্যশ্চ পারি-

পাত্রশ্চ সপ্তৈবাত্র কুলাচলাঃ। তেষাং সহস্রশ শ্চান্যে ভূধরা যে সমীপগাঃ॥ বিস্তারোচ্ছ্রায়িণো রম্যা বিপুলা শ্চিত্রসানবঃ। কোলাহলঃ স বৈভ্রাজো মন্দরো দর্দুরাচলঃ॥ বাতন্ধমো বৈদ্যুতশ্চ মৈনাকঃ সুরস স্তথা। তুঙ্গপ্রস্থো নাগগিরি র্গোধনঃ পাণ্ডুরাচলঃ॥ পুষ্পবীর্য্য জয়ন্তৌ চ রৈবতো হর্বুদ এব চ। ঋষ্যমূকঃ স গোমন্তঃ কূটশৈলঃ কৃতঃ স্মরঃ॥ শ্রী পর্ব্বত শ্চকোরশ্চ শতশো হন্যে হত্র পর্ব্বতাঃ। তৈ র্বিমিশ্রা জনপদা ম্লেচ্ছা শ্চার্য্যাশ্চ ভাগশঃ॥ তৈঃ পীয়ন্তে সরিচ্ছ্রেষ্ঠা যা স্তাঃ সম্যঙ্নিবোধ মে। গঙ্গা সরস্বতী সিন্ধু শ্চন্দ্রভাগা তথাপগা॥ যমুনা চ শতদ্রুশ্চ বিতস্তৈরাবতী কুহূঃ। গোমতী ধূতপাপা চ বাহুদা চ দৃষদ্বতী॥ বিপাশা দেবিকা বঙ্ক্ষু র্বিশালা গণ্ডকী তথা। কৌশিকী চাপরা বিপ্র হিমবৎ পাদনিঃসৃতাঃ॥ বেদ স্মৃতি র্বেতসিনী রাত্রিঘ্নী সিন্ধু রেব চ। বেণা চ স্যন্দনা চৈব সবানীরা মহী তথা॥ পারা চর্ম্মন্বতী লূপী বিদিশা বেত্রবত্যপি। সিপ্রা হ্যবন্তী চ তথা পারিপাত্রাশ্রয়াঃ স্মৃতাঃ॥ শোণো মহানদ শ্চৈব নর্ম্মদা সুরসা ক্রিয়া। মন্দাকিনী দশার্ণা চ চিত্রকূটা তথাপগা॥ চিত্রোৎপলাথ তমসা করতোয়া পিশাচিকা। তথান্যা পিপ্পলা শ্রোণী বিপাশা বঞ্জুলা নদী॥ সরোজ্জ্বলা শুক্তিমতী মঙ্কলী ত্রিদিবা ক্রতুঃ। ঋক্ষপাদ প্রসূতা বৈ তথান্যা বেগবাহিনী॥ শিপ্রা পয়োষ্ণী নির্বিন্ধ্যা তাপী চ নিষধাবতী। বেণা বৈতরণী চৈব শিনীবালী কুমুদ্বতী॥ তোয়া চৈব মহাগৌরী দুর্গা চান্তঃশিবা তথা। বিন্ধ্যপাদ প্রসূতা স্তা নদ্যঃ পুণ্য জলাঃ শুভাঃ॥ গোদাবরী ভীমরথী কৃষ্ণবর্ণা তথাপগা। তুঙ্গভদ্রা সুপ্রয়োগা বাহ্যাকাবের্য্যথাপগা॥ সহ্যপাদ বিনিষ্ক্রান্তা ইমা স্তাঃ সরিদুত্তমাঃ॥ কৃতমালা তাম্রপর্ণী পুষ্যজাত্যুৎপলাবতী। মলয়াদ্রি সমুদ্ভূতা নদ্যঃ শীতজলা স্ত্বিমাঃ॥ পিতৃসোমর্ষি কুল্যা চ ইক্ষুলা ত্রিদিবালয়া। লাঙ্গুলিনী বংশকরা মহেন্দ্র প্রভবাঃ স্মৃতাঃ॥ ঋষিকা চ কুমারী চ মন্দগা মন্দবাসিনী। কৃপা পলাশিনী চৈব শুক্তিমৎ প্রভবাঃ স্মৃতাঃ॥ সর্ব্বাঃ পুণ্যাঃ সরস্বত্যঃ সর্ব্বাগঙ্গাঃ সমুদ্রগাঃ। বিশ্বস্য মাতরঃ সর্ব্বাঃ সর্ব্বাঃ পাপহরাঃ স্মৃতাঃ॥ অন্যাঃ সহস্রশ শ্চোক্তাঃ ক্ষুদ্রনদ্যো দ্বিজোত্তম। প্রাবৃট্

কাশ্মীরাঃ সন্তি সর্ব্বকাল বহাশ্চ যাঃ। মৎস্যাঃ জন্যাঃ জন্যাশ্চ জঙ্গলাঃ কাশিকোশলাঃ ॥ অর্ব্বুদাশ্চ পুলিন্দাশ্চ অসকাশ্চ বৃকৈঃ সহ। মধ্যদেশে জনপদাঃ প্রাধশো হমী প্রকীর্ত্তিতাঃ॥ ৯ ॥ সহ্যস্য চোত্তরেণৈব যত্র গোদাবরী নদী। পৃথিব্যা মপি কৃৎস্নায়াং স প্রদেশো মনোরমঃ ॥ গোবর্দ্ধন পুরং রম্যং ভার্গবস্য মহাত্মনঃ। বাহ্লীকা বাটধানাশ্চ আভীরাঃ কালতোয়কাঃ ॥ অপরান্তাশ্চ শূদ্রাশ্চ পহ্লবা শ্চর্ম্মখণ্ডিকাঃ। গান্ধারা যবনাশ্চৈব সিন্ধু সৌবীর মদ্রকাঃ ॥ শতদ্রুহা ললিত্থাশ্চ পারদাহারমূষিকাঃ। মাঠরা রক্ষহতকাঃ কেকযা দশমানিকাঃ ॥ ক্ষত্রিযোপনিবেশাশ্চ বৈশ্য শূদ্র জলানি চ। কাম্বোজা দরদাশ্চৈব বর্ব্বরা হঙ্গলৌকিকাঃ ॥ নীচা শ্চৈব তুষারাশ্চ পহ্লবা বাহতোদরাঃ। আত্রেযাঃ স ভরদ্বাজাঃ প্রস্থলাশ্চ দশেরকাঃ ॥ লম্পকাঃ সূনকারাশ্চ চূলিকা জাহুড়ৈঃ সহ। অপথা শ্চালিমদ্রাশ্চ কিরাতানাঞ্চ জাতযঃ ॥ তামসা হংসমার্গাশ্চ কাশ্মীরা স্তঙ্গণা স্তথা। চূলিকা হুড়ুকা শ্চৈব ঊর্ণা দার্ব্বা স্তথৈব চ ॥ ৯ ॥ এতে দেশা হ্যুদীচ্যাস্তু প্রাচ্যান্ দেশান্নিবোধ মে। অঙ্গবাকা মুদ্গরকা অন্তর্গিরি বহির্গিরাঃ ॥ তথা প্লবঙ্গা বঙ্গেযা মলদা মলবর্ত্তিকাঃ। ব্রহ্মোত্তরাঃ প্রবিজযা ভার্গবাঙ্গেয মর্দ্দকাঃ ॥ প্রাগ্জ্যোতিষাশ্চ মদ্রাশ্চ বিদেহা স্তাম্রলিপ্তকাঃ। মল্লা মগধ গোমেদাঃ প্রাচ্যা জনপদাঃ স্মৃতাঃ ॥ ৯ ॥ অথাপরে জনপদা দক্ষিণাপথবাসিনঃ। পাণ্ড্যাশ্চ কেরলা শ্চৈব চোলাঃ কুল্যা স্তথৈব চ ॥ সেতুকা মূষিকা শ্চৈব কুমারা বানবাসিকাঃ মহারাষ্ট্রা মাহিষিকাঃ কলিঙ্গা শ্চৈব সর্ব্বশঃ ॥ আভীরাঃ সহচৈষীকা আটব্যাঃ শবরাশ্চ যে। পুলিন্দা বিন্ধ্যমালেযা বৈদর্ভা দণ্ডকৈঃ সহ ॥ পৌরিকা মৌলিকা শ্চৈব অশ্মকা ভোগবর্দ্ধনাঃ। তৈলিকাঃ কুন্তলা অন্ধ্রা উদ্ভিদা নালকারকাঃ ॥ ৯ ॥ দাক্ষিণাত্যা স্ত্বিমে দেশা অপরান্তান্নিবোধ মে। সৌর্পারকাঃ কালনদা দুর্গা স্তালীযকৈঃ সহ ॥ কারস্করা লোহজঙ্ঘা বানেযা রাজভদ্রকাঃ। তোসজাঃ কোশলা শ্চৈব ত্রৈপুরা বিদিশা স্তথা ॥ তুষারা স্তুম্বরা শ্চৈব পাটবো নৈষধৈঃ সহ। পুলিন্দাশ্চ সুশীলাশ্চ রূপসাং তামসৈঃ সহ ॥ তথা কুরুমিনশ্চৈব সর্ব্বে চৈব করস্করাঃ

। নাসিকাখ্যাশ্চ যে চান্যে যে বৈবান্তর নর্ম্মদাঃ ॥ মারুকচ্ছাঃ সমাহেযাঃ সর্ব্বে সারস্বতৈঃ সহ। কচ্ছীযাশ্চ সুরাষ্ট্রাশ্চ আবন্ত্যা শ্চার্ব্বুদৈঃ সহ॥ ইত্যেতে হ্যপরান্তা শ্চ শৃণু বিন্ধ্য নিবাসিনঃ। মলজাশ্চ করূষাশ্চ মেকলা শ্চোৎকলৈঃ সহ॥ উত্তমর্ণা দশার্ণাশ্চ ভোজাঃ কিষ্কিন্ধকৈঃ সহ। অনূপা স্তুণ্ডিকেরাশ্চ বীরহোত্রা হ্যবন্তযঃ॥এতে জনপদাঃ সর্ব্বে বিন্ধ্যপৃষ্ঠ নিবাসিনঃ॥ অতোদেশান্ প্রবক্ষ্যামি পর্ব্বতাশ্রযিণশ্চ যে॥✽॥ নিহারা হংসমার্গাশ্চ হুপথা স্তঙ্গণাঃ খসাঃ। হুৎসাঃ প্রাবরণাশ্চৈব ঊর্ণা দর্ব্বাঃ সহূহুকাঃ॥ ত্রিগর্ত্তা মালবাশ্চৈব কিরাতা স্তামসৈঃসহ। কৃত ত্রেতাদিক শ্চাত্র চতুর্যুগ কৃতো বিধিঃ॥✽॥এতত্তু ভারতং বর্ষং চতুঃসংস্থান সংস্থিতং॥ দক্ষিণে পরতো হ্যস্য পূর্ব্বেণ চ মহোদধিঃ। হিমবানুত্তরেণাস্য কার্ম্মুকস্য যথা গুণঃ॥ তদেতদ্ভারতং বর্ষং সর্ব্ববীজং দ্বিজোত্তম। দেবত্ব মমরেশত্বং দেবত্বং মর্ত্ত্যতাং তথা॥ মৃগ পশ্বম্বরচরা যোনী স্তদ্বৎ সরীসৃপাঃ। স্থাবরাণাঞ্চ সর্ব্বেষামতো ব্রহ্মন্ শুভাশুভৈঃ॥ প্রযান্তি কর্ম্মভূর্ব্রহ্মন্নান্য লোকেষু বিদ্যতে। দেবানামপি বিপ্রর্ষে সদৈবৈষ মনোরথঃ॥ অপি মানুষ মাপ্স্যামো দেবত্বাৎ প্রচ্যুতাঃ ক্ষিতৌ। মনুষ্যাঃ কুরুতে তত্তু যন্ন শক্যং সুরাসুরৈঃ॥ স্বকর্ম্ম নিগড গ্রস্তৈঃ স্বকর্ম্মক্ষপণোৎসুকৈঃ। ন কিঞ্চিৎ ক্রিযতে কর্ম্ম সুখলেশোপবৃংহিতৈঃ॥ ইতি শ্রীমার্কণ্ডেয পুরাণে ভারতখণ্ডবর্ণন নামাধ্যাযঃ॥ ✽॥ অপিচ। ভারতে হ্যপ্যস্মিন্ বর্ষে সরিচ্ছৈলাঃ সন্তি বহবঃ। মলযো মঙ্গলপ্রস্থো মৈনাক স্ত্রিকূট ঋষভঃ কূটকঃ কোল্লঃ সহ্যো দেবগিরি ঋষ্যমূকঃ শ্রীশৈলো বেঙ্কটো মহেন্দ্রো বারিধারো বিন্ধ্যঃ শুক্তিমানৃক্ষ গিরিঃ পারিপাত্রো দ্রোণ শ্চিত্রকূটো গোবর্দ্ধনো রৈবতকঃ ককুভো নীলো গোকামুখ ইন্দ্রকীলঃ কামগিরি রিতি চান্যে শতসহস্রশঃ শৈলা স্তেষাং নিতম্ব প্রভবা নদান্দ্যশ্চ সন্ত্যসংখ্যাতাঃ। এতাসা মপো ভারত্যঃ প্রজানামভিরেব পুনন্তী নামাত্মনা চোপস্পৃশন্তি চন্দ্রবশা তাম্রপর্ণী অবটোদা কৃতমালা বৈহাযসী কাবেরী বেণ্বা পযস্বিনী শর্করাবর্ত্তা তুঙ্গভদ্রা কৃষ্ণবেণ্বা ভীমরথী গোদাবরী নির্ব্বিন্ধ্যা পযোষ্ণী তাপী রেবা সুরসা নর্ম্মদা চর্ম্মণ্বতী

অপ্স্যঃশোণশ্চ নদৌ মহানদী বেদস্মৃতি ঋ র্ষিকুল্যা ত্রিসামা কৌশিকী মন্দাকিনী যমুনা সরস্বতী দৃশদ্বতী গোমতী সরযূ রোঘবতী ষষ্ঠবতী সপ্তবতী সুষোমা শতদ্রু শ্চন্দ্রভাগা মরুদ্বৃধা বিতস্তা অসিক্নী বিশ্বেতি মহানদ্যঃ। অস্মিন্নেব বর্ষে পুরুষৈ র্লব্ধ জন্মভিঃ শুক্ল লোহিত কৃষ্ণবর্ণেন স্বারব্ধেন কর্ম্মণা দিব্য মানুষ নারক গতয়ো বহ্ব্য আত্মন আনুপূর্ব্ব্যেণ সর্বাহ্যেব সর্ব্বেষাং বিধীয়ন্তে। যথা বর্ণ বিধান মপবর্গ শ্চাপি ভবতি।যো হসৌ ভগবতি সর্ব্ব ভূতাত্মনি অনাত্মে হনিরুক্তে হনিল যনে পরমাত্মনি বাসুদেবে হনন্য নিমিত্ত ভক্তি যোগ লক্ষণো নানাগতি নিমিত্তা বিদ্যাগ্রন্থি বন্ধন দ্বারেণ যদাহি মহাপুরুষ পুরুষ প্রসঙ্গঃ। এতদেব হিদেবা গায়ন্তি। অহো বতৈষাং কিমকারি শোভনং প্রসন্ন এবাস্বিদুত স্বযং হরিঃ। যৈ র্জন্মলব্ধং নৃষু ভারতাজিরে মুকুন্দ সেবৌপয়িক স্পৃহা হি নঃ।। কিং দুষ্করৈ র্নঃ ক্রতুভি স্তপো ব্রতৈ র্দানাদিভি র্বা দ্যুজয়েন ফল্গুনা। ন যত্র নারায়ণ পাদপঙ্কজ স্মৃতিঃ প্রমুষ্টাতিশয়েন্দ্রিয়োৎসবাৎ।। কল্পায়ুষাং স্থান জয়াৎ পুনর্ভবাৎ ক্ষণায়ুষাং ভারত ভূজয়ো বরঃ। ক্ষণেন মর্ত্যেন কৃতং মনস্বিনঃ সংন্যস্য সংযান্ত্যভয়ং পদং হরেঃ।। ন যত্র বৈকুণ্ঠ কথা সুধাপগা ন সাধবো ভাগবতা স্তদাশ্রয়াঃ। ন যত্র যজ্ঞেশ মখা মহোৎসবাঃ সুরেশ লোকোপি ন বৈ স সেব্যতাং।। প্রাপ্তানৃজাতি স্ত্বিহ যে চ জন্তবো জ্ঞান ক্রিয়া দ্রব্য কলাপ সম্ভৃতাং। নচেদ্যতেরন্ন পুন র্ভবায়তে ভূযো বনৌকা ইব যান্তি বন্ধনং।। যৈঃ শ্রদ্ধয়া বর্হিষি ভাগশো হবি র্নিরুপ্ত মিষ্টং বিধি মন্ত্র বস্তুতঃ। একঃ পৃথঙ্নামভিরাহুতো মুদা গৃহ্ণাতি পূর্ণঃ স্বয় মাশিষাং প্রভুঃ।। সত্যং দিশত্যর্থিত মর্থিতো নৃণাং নৈবার্থদো যৎ পুন রর্থিতা যতঃ। স্বযং বিধত্তে ভজতা মনিচ্ছতা মিচ্ছাপিধানং নিজ পাদ পল্লবং।। যদ্যত্র নঃ স্বর্গ সুখাবশেষিতং স্বিষ্টস্য সূক্তস্য কৃতস্য শোভনং। তেনাজনাভে স্মৃতি মজ্জন্মনঃ স্যাদ্বর্ষে হরি র্যদ্ভজতাং শং তনোতি।। শ্রীশুকউবাচ। জম্বূদ্বীপস্যচ রাজন্ন্ উপদ্বীপানষ্টৌ হৈক উপদিশন্তি সগরাত্মজৈ রশ্বান্বেষণ ইমাং মহীং পরিতো নিখনদ্ভি রুপকল্পিতান্। তদ্যথা স্বর্ণপ্রস্থ শ্চন্দ্র শুক্ল আবর্ত্তনো রমণকো মন্দ

হরিণঃ পাঞ্চজন্যঃ সিংহলো লঙ্কেতি। এবং ভব ভারতোত্তম জম্বুদ্বীপ বর্ষবিভাগো যথোপদেশ মুপবর্ণিতঃ। ইতি শ্রীভাগবতে মহাপুরাণে ৫ স্কন্ধে দ্বীপ বর্ষ বর্ণনং নাম ১৯ অধ্যায়ঃ॥

ভারতী স্ত্রী বচনং॥ সরস্বতী॥ পক্ষিভেদঃ॥ বৃত্তিভেদঃ। ইতি মেদিনী॥ ব্রাহ্মী। ইতি রাজনির্ঘণ্টঃ॥ *॥ শৃঙ্গারে কৌশিকী বীরে সাত্বত্যারভটী পুনঃ। রসে রৌদ্রে চ বীভৎসে বৃত্তিঃ সর্ব্বত্র ভারতী॥ ভারতী বৃত্তিস্তু সংস্কৃত প্রায়ো বাগ্ব্যাপারো নরাশ্রয়ঃ। ইতি সাহিত্যদর্পণস্য ৬ পরিচ্ছেদঃ॥

ভারদ্বাজং ক্লী অস্থি। ইতি হেমচন্দ্রঃ॥

ভারদ্বাজঃ পুং দ্রোণাচার্য্যঃ॥ ঋষিভেদঃ। ইতি মেদিনী॥ অগস্ত্যমুনিঃ। ইতি শব্দরত্নাবলী॥ মঙ্গলগ্রহঃ। ইতি গ্রহযজ্ঞতত্ত্বং॥ ব্যাঘ্রাটপক্ষী॥ বৃহস্পতিপুত্রঃ। ইতি হেমচন্দ্রঃ॥

ভারদ্বাজী স্ত্রী বনকার্পাসী। ইতি শব্দরত্নাবলী॥

ভারযঃ পুং ভারদ্বাজপক্ষী। ভারুই ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

ভারযষ্টিঃ স্ত্রী ভারবহনদণ্ডঃ। বাঁক ইতি ভাষা। তৎপর্য্যায়ঃ। বিহঙ্গিকা ২। ইত্যমরঃ॥

ভারবং ক্লী ধনুর্গুণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভারবাহঃ পুং ভারিকঃ। ইত্যমরঃ॥

ভারবাহী স্ত্রী নীলী। ইতি রাজনির্ঘণ্টঃ॥

ভারবিঃ পুং কবিবিশেষঃ। স চ কিরাতার্জ্জুনীয়নামকগ্রন্থকর্ত্তা। তৎপর্য্যায়ঃ। শতপুষ্পঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ তস্য গ্রন্থস্য প্রথম শ্লোকো যথা। শ্রিয়ঃ কুরূণাম-ধিপস্য পালনীং প্রজাসু বৃত্তিং য-মযুঙ্ক্ত বেদিতুং। সবর্ণি লিঙ্গী বিদিতঃ সমাযযৌ যুধিষ্ঠিরং দ্বৈতবনে বনেচরঃ॥

ভারবৃক্ষঃ পুং কাক্ষীনামকগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা॥

ভারহরঃ } পুং ভারবাহকঃ। ইতি
ভারহারঃ } শব্দরত্নাবলী॥

ভারিকঃ পুং ভারবাহকঃ। ভারী ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। ভারবাহঃ ২। ইত্যমরঃ॥ ভারহরঃ ৩। ভারহারঃ ৪। ইতি শব্দরত্নাবলী॥

ভারিঃ পুং সিংহঃ। ইতি হেমচন্দ্রঃ॥

ভারিটঃ পুং পক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। শ্যামচটকঃ ২ শৈশিরঃ ৩ কণভক্ষকঃ ৪। ইতি রাজনির্ঘণ্টঃ॥

ভারী পুং ভারবাহকঃ। ইত্যমরটীকায়াং রমানাথঃ॥ ভারযুক্তে ত্রি॥

ভারোহী স্ত্রী ভারবাহিকা। ইতি মুগ্ধবোধব্যাকরণং॥

ভার্গবঃ পুং পরশুরামঃ॥ শুক্রাচার্য্যঃ॥ ধন্বী॥ গজঃ॥ ইতি মেদিনী॥ ভারতবর্ষমধ্যে প্রাচ্যদেশান্তর্গত দেশবিশেষঃ। যথা। ব্রহ্মোত্তরাঃ প্রবিজয়া ভার্গবা জ্ঞেয়মল্লকাঃ। ইত্যাদি মার্কণ্ডেয়পুরাণং॥

ভার্গবপ্রিয়ঃ পুং হীরকঃ। শুক্রাধিষ্ঠাতৃদেবতাকত্বাৎ॥

ভার্গবী স্ত্রী পার্ব্বতী॥ লক্ষ্মীঃ॥ দূর্ব্বা। ইতি মেদিনী॥ নীলদূর্ব্বা॥ ইতি শব্দরত্নাবলী॥ শ্বেতদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

ভার্গী স্ত্রী বৃক্ষবিশেষঃ॥ বামনহাটি ইতি ভাষা। তৎপর্য্যায়ঃ। গর্দ্দভশাখী ২ ফঞ্জী ৩ অঙ্গারবল্লরী ৪ ব্রাহ্মী ৫ ব্রাহ্মণযষ্টিঃ ৬ বাতারিঃ ৭ ভৃঙ্গজা ৮ পদ্মা ৯ যষ্টিঃ ১০ ভারঙ্গী ১১ বাতারিঃ ১২ কামজিৎ ১৩ সুরূপা ১৪ ভৃঙ্গরজা ১৫ শক্রমাতা ১৬। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কাসশ্বাস শোক ব্রণ ক্রিমি দাহ জ্বর নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অন্যৎ ব্রাহ্মণযষ্টিকা শব্দে দ্রষ্টব্যং॥

ভার্দ্বাজী স্ত্রী ভারদ্বাজী। বনকার্পাসী। ইতি শব্দরত্নাবলী॥

ভার্য্যা স্ত্রী বেদবিধানেনোঢা। বিধিপূর্ব্বক বিবাহিতা। তৎপর্য্যায়ঃ। পত্নী ২ পাণিগৃহীতী ৩ দ্বিতীয়া ৪ সহধর্ম্মিণী ৫ জায়া ৬ দারাঃ ৭ সধর্ম্মিণী ৮ ধর্ম্মচারিণী ৯ দারঃ ১০ কলত্রং ১১ কলত্রকং ১২। ইতি শব্দরত্নাবলী॥ অস্যাঃ প্রশংসা যথা। সা ভার্য্যা যা প্রিয়ং ব্রূয়াৎ স পুত্রো যত্র জীবতি। স জীবতি গুণো যস্য ধর্ম্মো যস্য স জীবতি॥ গুণ ধর্ম্ম বিহীনো যো নিষ্ফলং তস্য জীবনং। সা ভার্য্যা যা গৃহে দক্ষা সা ভার্য্যা যা প্রিয়ম্বদা॥ সা ভার্য্যা যা পতিপ্রাণা সা ভার্য্যা যা পতিব্রতা। নিত্যস্নাতা সুগন্ধা চ নিত্যঞ্চ প্রিয়বাদিনী॥ অল্পভুক্ স্বল্পভাষী চ সততং মঙ্গলৈর্যুতা। সততং ধর্ম্ম বহুলা সততঞ্চ পতিপ্রিয়া॥ সততং প্রিয়বক্ত্রী চ সততং ঋতুকামিনী। পিতৃদেব ক্রিয়াযুক্তা সর্ব্ব সৌভাগ্য বর্দ্ধিনী॥ যস্যেদৃশী ভ-

বেদ্ভার্য্যা দেবেন্দ্রো ন স মানুষঃ ।৪।। অস্যা দোষা যথা। যস্য ভার্য্যা বিরূপাক্ষী কশ্মলা কলহপ্রিয়া। উত্তরোত্তরবাদা স্যাৎ সা জরা ন জরা জরা ।। যস্য ভার্য্যাশ্রিতান্যত্র পরবেশ্মাভিকাঙ্ক্ষিণী। কুক্রিয়া ত্যক্তলজ্জা চ সা জরা ন জরা জরা ।। যস্য ভার্য্যা গুণজ্ঞা চ ভর্ত্তার মনুগামিনী। অল্পাল্পেন তু সন্তুষ্টা সা প্রিয়া ন প্রিয়াপ্রিয়া ।। দুষ্টাভার্য্যা শঠং মিত্রং ভৃত্যা শ্চোত্তর দায়কাঃ। সসর্পে চ গৃহে বাসো মৃত্যুরেব ন সংশয়ঃ ।। আপৎসু মিত্রং জানীয়াৎ যুদ্ধে শূরং বনে শুচিং। ভার্য্যাঞ্চ বিভবে ক্ষীণে দুর্ভিক্ষে চ প্রিয়াতিথিং।। ইতি গারুড়ে নীতিসারে ১০৮। ১০৯ অধ্যায়ঃ ।। ৪ ।। বৃহস্পতিরুবাচ। যস্য নাস্তি সতীভার্য্যা গৃহেষু প্রিয়বাদিনী। অরণ্যং তেন গন্তব্যং যথা রণ্যং তথা গৃহং ।। সুশীলা সুন্দরী শান্তা গতা যস্য গৃহোদরাৎ। অরণ্যং তেন গন্তব্যং যথা রণ্যং তথা গৃহং ।। ভাবানুরক্তা বনিতা হৃতা যস্য চ শত্রুণা। অরণ্যং তেন গন্তব্যং যথা রণ্যং তথা গৃহং ।। দৈবেনাপহৃতা যস্য পতিসাধ্যা পতিব্রতা। অরণ্যং তেন গন্তব্যং যথা রণ্যং তথা গৃহং ।। যস্য মাতা গৃহে নাস্তি ভার্য্যা চাপ্রিয়বাদিনী। অরণ্যং তেন গন্তব্যং যথারণ্যং তথা গৃহং ।। প্রিয়া শূন্যং গহং কস্য পূর্ণং স্ত্রী ধন বন্ধুভিঃ। অরণ্যং তেন গন্তব্যং যথা রণ্যং তথা গৃহং ।। ভার্য্যা শূন্যা বন সমাঃ সভার্য্যাশ্চ গৃহা গৃহাঃ। গৃহিণীঞ্চ গৃহং প্রোক্তং ন গৃহং গৃহ মুচ্যতে ।। অশুচিঃস্ত্রীবিহীনশ্চ দৈবে পৈত্রে চ কর্ম্মণি। যদহ্না কুরুতে কর্ম্ম ন তস্য ফল ভাগ্ভবেৎ ।। দাহিকাশক্তিহীনশ্চ যথা মন্দো হুতাশনঃ। প্রভাহীনো যথা সূর্য্যঃ শোভাহীনো যথা শশী।। শক্তিহীনো যথা জীবো যথাত্মা চ তনুং বিনা। বিনাধারং যথা ধেয়ো যথেশঃপ্রকৃতিং বিনা ।। নচ শক্তো যথা যজ্ঞঃ ফলদাং দক্ষিণাং বিনা। কর্ম্মিণে চ ফলং দাতুং সামগ্রী মূলমেব চ ।। বিনা স্বর্ণং স্বর্ণকারো যথা হশক্তঃ স্বকর্ম্মণি। যথা হশক্তঃ কুলালশ্চ মৃত্তিকাঞ্চ বিনা দ্বিজাঃ ।। তথা গৃহী ন শক্তশ্চ সন্ততং সর্ব্ব কর্ম্মণি। ভার্য্যা মূলাশ্চ পুত্রাশ্চ ভার্য্যা মূলা গৃহা স্তথা ।। ভার্য্যা মূলং সুখং শশ্বদ্গৃহস্থানাং গৃহে সদা। ভার্য্যা মূলং সদা হর্ষং ভার্য্যা মূলঞ্চ মঙ্গলং ভার্য্যা মূলশ্চ সংসারো ভার্য্যা মূলঞ্চ সৌরতং। যথা রথশ্চ রথিনাং

গৃহিণীশূন্যং গৃহং ॥ সারথিস্তু যথা তেষাং গৃহস্থানাং তথা প্রিয়া। সর্ব্বরত্নপ্রধানা চ স্ত্রীরত্নং দুষ্কুলাদপি ॥ সা গৃহীতা গৃহস্থৈনৈবেত্যাহ কমলোদ্ভবঃ। যথা জলং বিনা পদ্মং পদ্মং শোভাং বিনা যথা ॥ তথৈব চ গৃহং শশ্বদ্গৃহিণাং গৃহিণীং বিনা। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫৬ অধ্যায়ঃ ॥ * ॥ তস্যা অত্যাজ্যাত্বং যথা। অনপত্যাঞ্চ যুবতীং কুলজাঞ্চ পতিব্রতাং। ত্যক্ত্বা ভবেদ্যঃ সন্ন্যাসী ব্রহ্মচারী যতীতি বা ॥ বাণিজ্যে বা প্রবাসে বা চিরং দূরং প্রযাতি যঃ। তীর্থং বা তপসে বাপি মোক্ষার্থং জন্মখণ্ডিতুং ॥ ন মোক্ষ স্তস্য ভবতি ধর্ম্মস্য স্খলনং ধ্রুবং। অভিশাপেন ভার্য্যায়া নরকঞ্চ পরত্র চ ॥ ইহৈব চ যশোনাশ ইত্যাহ কমলোদ্ভবঃ। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণ জন্মখণ্ডে ১১২ অধ্যায়ঃ ॥ * ॥ বহুভার্য্যস্যৈককস্যা ভজনে দোষাদি যথা। গদতো যৎ তং শ্রুপূর্ব্বং নারদায় পিতুর্মুখে। দক্ষস্য ধর্ম্মশাস্ত্রার্থং তৎ শৃণুষ্ব নিশাপতে ॥ বহুদারঃ পুমান্ যস্তু রাগাদেকাং ভজেৎ স্ত্রিয়ং। স পাপভাক্ স্ত্রীজিতশ্চ তস্যাশৌচং সনাতনং ॥ যদ্দুঃখং জায়তে স্ত্রীণাং স্বাম্য সম্ভোগজং যথা। ন তস্য সদৃশং দুঃখং কিঞ্চিদন্যদ্ধি বিদ্যতে ॥ সতী মৃতুমতীং জায়াং যোনেযাৎ পুরুষাধমঃ। ঋতু ঘস্রেষু শুদ্ধেষু ভ্রূণহা তস্য জায়তে ॥ ভার্য্যা স্যাদ্যাবদাত্রেশী তাবৎ কালং বিরোধকং। তস্যাস্তু সঙ্গমে কিঞ্চিৎ বিহিতঞ্চাপি নাচরেৎ ॥ বহুভার্য্যস্য ভার্য্যাণাং মৃতু মৈথুন নাশনং। ন কিঞ্চিদ্বিদ্যতে কর্ম্ম শাস্ত্রেণাপি যদীরিতং ॥ তোষযেৎ সততং ভার্য্যা বিধিবৎ পাণি পীড়িতাঃ। তাসাং তুষ্ট্যা তু কল্যাণ মকল্যাণ মতো হ্যন্যথা ॥ সন্তুষ্টো ভার্য্যযা ভর্ত্তা ভর্ত্ত্রা ভার্য্যা তথৈব চ। যস্মিন্নেতৎ কুলে নিত্যং কল্যাণং তত্র বৈ ধ্রুবং ॥ যয়া বিরুদ্ধ্যতে স্বামী সৌভাগ্য মদদৃপ্তযা। স পত্নী সঙ্গমং কর্ত্তুং সাস্যাদ্বেশ্যা ভবান্তরে ॥ ইহাপি লোকে হ্যবাচ্যত্ব মধর্ম্মঞ্চাপি বিন্দতি। নচ পিতৃকুলং স্বামি কুলং তস্যাঃ প্রমোদতে ॥ বিরুদ্ধমানে পত্যৌ যৎ সপত্ন্যা বা প্রবর্ত্ততে। অতীব দুঃখং ভবতি তদকল্যাণ কৃত্তযোঃ ॥ ইতি কালিকাপুরাণে ২০ অধ্যায়ঃ ॥ * ॥ রজস্বলা ভার্য্যা অত্যাজ্যা যথা। ন বিনোতীহ যো দারান্ রজসা কলুষীকৃতঃ।

প্রেত পৈত্র্যাহ্নতে জগ্রে রেতসাঞ্চ পিবত্যসৌ ॥ যো জহাতি রজঃ কৃত্বা পিত্র্যং স্বং তেজসা নরঃ। সোশ্নাতি ফলমপেয়ং যো ন দদ্যাদৃতুং পুনঃ॥ যো বিভর্ত্তি স মন্ত্রো বৈ বহূনাং রজসি স্থিতঃ। রেতঃ পিবতি তন্মগ্নো পিতৃভ্যো যো হব্যপিণ্ডদঃ ॥ যো জহাতি হি নির্দ্দোষাং ভার্য্যাঞ্চৈব রজস্বলাং। শুদ্ধিমান্ সংবৃতঃ কৃত্ত গর্ত্তস্য দুরিতং বসেৎ ॥ ইতি বহ্নিপুরাণং ॥ * ॥ তস্যা কাল বিশেষে গমন নিষেধো যথা। ন দিবাপি স্ত্রিয়ং গচ্ছেৎ কদাচিদিচ্ছয়াপি চ। ন পর্ব্বসু ন সন্ধ্যাসু নাদ্যর্ত্তু চতুরাত্রিষু ॥ নোদক্যাং ন দিবাগচ্ছেৎ ন সগর্ব্ভাং ন ব্রতস্থিতাং। অভিগচ্ছেদ বিদ্বান্ য স্তদাযুক্ষয মেব চ ॥ বন্ধ্যাষ্টমে পরিত্যাজ্যা নবমে চ মৃতপ্রজা। একাদশে স্ত্রীজননী সদ্যস্ত্ব প্রিয়বাদিনী ॥ ন বক্তে হভিগমং ঙর্য্যাৎ পাণিগ্রাহী তু যোষিতঃ। ঙর্য্যাচ্চেৎ পিতর স্তস্য পতন্তি রেতসো ভুজঃ॥ ভার্য্যাধীনং সুখং পুংসাং ভার্য্যা ধীনো ধনাগমঃ। ভার্য্যা ধীনা মথোৎপত্তি র্ভার্য্যা ধীনঃ সুখোদয়ঃ ॥ যত্র ভার্য্যা গৃহং তত্র ভার্য্যা ধীনং গৃহে বসেৎ। ন গৃহেণ গৃহস্থঃ স্যাৎ ভার্য্যয়া কথ্যতে গৃহী। ইতি পরাশর স্মৃতিঃ ॥

ভার্য্যাটঃ পুং অন্যার্থং স্বস্ত্রীদাতা। ইতি ত্রিকাণ্ডশেষঃ ॥

ভার্য্যাটিকঃ পুং স্ত্রীজিতঃ ॥ হরিণবিশেষঃ। ইতি মেদিনী ॥

ভার্য্যাপতী পুং পতিপত্ন্যৌ। নিত্য দ্বিবচনান্তো হযং শব্দঃ। তৎপর্য্যায়ঃ। দম্পতী ২ জম্পতী ৩ জায়াপতী ৪। ইত্যমরঃ ॥

ভার্য্যারুঃ পুং শৈলভেদঃ ॥ মৃগভেদঃ ॥ ক্রীড়যা পরভার্য্যায়াং পুত্রোৎপাদকঃ। ইতি মেদিনী ॥

ভার্য্যাবৃক্ষঃ পুং পত্তঙ্গবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভালং ক্লী ভ্রুবোরূর্দ্ধ্ব ভাগঃ। কপাল ইতি ভাষা। তৎপর্য্যায়ঃ। ললাটং ২ অলিকং ৩ গোধি ৪। ইতি রাজনির্ঘণ্টঃ ॥ তেজঃ। ইতি মেদিনী ॥

ভালদর্শনং ক্লী সিন্দূরং। ইতি শব্দচন্দ্রিকা ॥

ভালদৃক্ পুং শিবঃ। ইতি হেমচন্দ্রঃ ॥

ভালাঙ্কঃ পুং করপত্রং ॥ শাকভেদঃ ॥ রোহিতমৎস্যঃ ॥ মহালক্ষণসম্পন্নপুরুষঃ ॥ কচ্ছপঃ ॥ হরঃ। ইতি মেদিনী ॥ ললাটচিহ্নঞ্চ ॥

ভাললোচনঃ পুং শিবঃ। ইতি ভা-
লদৃক্‌শব্দ দর্শনাৎ ॥

ভালুকঃ } পুং উল্লূকঃ। যথা। ভালু-
ভল্লুকঃ } কো ভালুকো ভল্লো২চ্ছভ-
ল্লো ২চ্ছো ২পি ভল্লুকঃ। ইতি ভর-
তধৃত কোষান্তরং ॥

ভাল্লূকঃ } পুং ভল্লকঃ। ইত্যমরটী-
ভাল্লুকঃ } কায়াং ভরতঃ ॥

ভাবঃ পুং নাট্যোক্তৌবিদ্বান্‌॥ মা-
নসবিকারঃ ॥ সত্তা ॥ স্বভাবঃ ॥
অভিপ্রায়ঃ ॥ চেষ্টা ॥ আত্মা ॥
জন্ম। ইত্যমরঃ॥ ক্রিয়া॥ লীলা॥
পদার্থঃ ॥ বিভূতিঃ॥ বুধঃ॥ জন্তুঃ
॥ রত্যাদিঃ। ইতি মেদিনী ॥ গৌ-
রবিতঃ ॥ অভিনয়ান্তরং। ইতি
ত্রিকাণ্ডশেষঃ ॥ ধাত্বর্থঃ ॥ যোনিঃ
॥ উপদেশঃ। ইতি ধরণিঃ ॥ সং-
সারঃ। ইত্যনেকার্থকোষঃ ॥ * ॥
নবগ্রহাণাং শয়নাদি দ্বাদশ চেষ্টাঃ
। যথা। শয়নঞ্চোপবেশশ্চ নেত্র-
পাণিঃ প্রকাশনং। গমনং গমনেচ্ছা
চ সভায়াং বসতি স্তথা ॥ আগ-
মনং ভোজনঞ্চ নৃত্য লিপ্সা চ কৌ-
তুকং নিদ্রা গ্রহাণাং ভাবাশ্চ দ্বা-
দশৈতে প্রকীর্তিতাঃ ॥ * ॥ ভা-
বানয়ন ক্রমো যথা। যদাব্দৌ বি-
দ্যতে খেটস্তেন তং পরিপূরয়েৎ।
পুনরংশেন সংপূর্য্য স্বর্ক্ষং তত্র নিযো-
জয়েৎ ॥ জাতদণ্ডং তথা লগ্ন মেকী-
কৃত্য সদা বুধৈঃ। রবিণা ভাগহারে-
ণ শেষং কার্য্যে নিযোজয়েৎ ॥ অং-
শেন নবসংখ্যয়া। স্বর্ক্ষং গ্রহাণাং জ-
ন্মনক্ষত্রং। তদ্যথা। বিশাখা নল
তোয়ানি বৈষ্ণবং ভগদৈবতং। পুষ্যা
পৌষ্ণো যমঃ সর্পো জন্ম ভান্যর্কতঃ
ক্রমাৎ॥ ঋক্ষো রাশিঃ। যদা মেষে
গ্রহ স্তদা ১ একপূরিত গ্রহ সংখ্যা-
ঙ্কঃ। যদা বৃষে গ্রহ স্তদা ২ দ্বিপূরি-
তো গ্রহ সংখ্যাঙ্কঃ কার্য্যঃ ॥ *
জায়া সুত মৃত্যু তুঙ্গ স্বগৃহ ত্রিকোণ
স্থান স্থিত পাপ গ্রহাণাং নিদ্রা শয়-
ন ভাবয়োঃ ফলং। নিদ্রায়াঞ্চ যদা
পাপো জায়া স্থানে শুভং বদেৎ।
যদি পাপঃ শুভৈ দৃষ্টো নাশুভৈশ্চ
কদাচন॥ যদি বা শত্রুগেহী স্যাচ্ছয়-
নে যদি বেক্ষিতঃ। তদা নারী সমং
তস্য নাশো ভবতি নিশ্চিতং॥ শু-
ভাশুভৈ র্যদা দৃষ্টঃ শুভ গ্রহ সমন্বি-
তঃ। নারী চ ম্রিয়তে তস্য প্রথমা চ
বিশেষতঃ॥ সুত স্থানে স্থিতঃ পা-
পো নিদ্রায়াং শয়নে পিবা। তদা
শুভং ভবেত্তস্য নাত্র কার্য্যা বিচারণা
॥ তুঙ্গ স্থানে স্বগৃহে বা ত্রিকোণে বা
যদা ভবেৎ। অপত্যস্য তদা নাশো

জায়তে নাত্র সংশয়ঃ ॥ শুভগ্রহো যদা তত্র ক্রূরো বা যদি বেক্ষিতঃ। তদা প্রথমাপত্যস্য নাশো ভবতি নিশ্চিতং॥ মৃত্যু স্থানে স্থিতঃ পাপো নিদ্রায়াং শয়নে পিবা। তদাত্মনো হপমৃত্যুঃ স্যাদ্রাজতো হপরতো হপিবা॥ শুভ গ্রহো যদা তত্র মৃত্যু স্থানে হপি সংস্থিতঃ। তদা চ মরণং তস্য মৃত্যুস্থানে বিশেষতঃ॥ পাপ গ্রহৈর্যদা দৃষ্টঃ শুভো বা শত্রুবীক্ষিতঃ। তদা তস্য শিরশ্ছেদো মুনিনা পরিকীর্ত্তিতঃ॥ এবং ক্রমেণ বোদ্ধব্যং গ্রহভাবে সুবুদ্ধিনা। বলাবল বিচারেণ জায়তে চ শুভাশুভং॥ জ্যোতির্বিৎসু চ সর্ব্বেষু পরিহারঃ কৃতো ময়া। শয়নাদিক ভাবেষু জ্ঞাতব্যশ্চোপদেশতঃ॥ একাদশে বা দশমালয়ে বা ধনালয়ে বা যদি বা বিলগ্নে। পাপেন যুক্তো ন শুভগ্রহশ্চেত্তথাপি সিদ্ধিং মহতীং বদন্তি॥ ❀॥ফলং যথা।মন্দাগ্নিঃ পিত্ত শূলী চ জায়তে শয়নে নরঃ। ১। উপবেশে ভবেচ্ছিল্পী শ্যামবর্ণস্তথা নরঃ॥২॥ নেত্র পাণৌ ভবেৎ ক্রূরো জলদোষো ভবেন্নরঃ। ৩। পুণ্যবান্ ধার্ম্মিকশ্চৈব ধনবাংশ্চ প্রকাশনে॥৪॥ গমনে চ রবের্জাতঃ কৃপণো ধনসংযুতঃ। বহুভাষী ক্ষমী শ্রেষ্ঠো [illegible] সদা ভবেৎ॥৫॥ অল্পভোক্তা শীঘ্রগামী দীর্ঘায়ুর্নৃপবল্লভঃ। শূরঃ শ্রীমান্ সুশীলশ্চ গমনেচ্ছা ভবো নরঃ॥৬॥ সভায়াঞ্চ রবের্জাতঃ ধর্ম্মে দাতা ক্ষমী ভবেৎ। দয়ালুঃ পণ্ডিতো ধীমান্ গুণবান্ পণ্ডিতপ্রিয়ঃ॥৭॥ আগমনে ভবেন্মূর্খঃ স্বরূপো ধনবান্ ভবেৎ।৮। ভোজনে ভক্ষকো মাংসলুব্ধো মহাবপুর্ব্বলী॥৯॥ নৃত্যলিপ্সো সুন্দরো বাগ্মী পণ্ডিতস্য গৃহাধিপঃ। ১০। উৎসাহী চ মহাভোগী কৌতুকে চ দিবাকরে॥১১॥ দাতা ভোক্তা প্রিয়ঃ পুত্রকলত্রাণাং ন সংশয়ঃ। লিঙ্গেদেহে করে চৈব গুহে রোগী তথৈব চ। নিদ্রায়াঞ্চ ভবেদ্ভানোঃ ক্রোধনো রক্তনেত্রকঃ॥ ১২॥ ইতি রবেঃ॥ ❀॥ তুঙ্গাতুঙ্গ বলাবলে বা বোধ্যং॥ শয়নে চ বিধৌ ক্রোধী দরিদ্রো বহুলম্পটঃ। ১। উপবেশে মহারোগী ধনবাংশ্চ ভবেন্নরঃ॥ ২॥ নেত্র পাণৌ নেত্ররোগী শ্লীপদী বহুভাষকঃ। ক্রূরঃ খলোত্তি শূরশ্চ জায়তে চ বিধৌ [illegible]॥ প্রকাশনে নিশানাথে ধনবাংশ্চ ভবেন্নরঃ। দক্ষো বুদ্ধিমান্ দাতা চ স্মরদারেষু লম্পটঃ॥ ৪॥ অরোগী বিত্ত-

হায়েন্ধ ক্রুংকর্ম্মা ধনান্বিতঃ। শিরো রোগী দন্তশূলী জায়তে গমনে বিধৌ ॥৫॥ নানামতি র্মহাক্রোধী সম্পদী চ ভবেন্নরঃ। গমনেচ্ছু বিধৌ জাতো ধনহীনো ভবেত্তদা ॥৬॥ দাতা চ ধার্ম্মিকশ্চৈব রাজপাত্রো ভবেৎ সদা। সভায়াঞ্চ বিধৌ নিত্যং জায়তে পুরুষোত্তমঃ ॥ ৭ ॥ নিত্য ক্রোধী মহা দুঃখী ভবেদাগমনে বিধৌ ॥৮॥ ভোজনে চ ভবেল্লব্ধো ভক্ষকশ্চ মহাসুরঃ ॥ ৯ ॥ যো জাতো নৃত্যলিপ্সায়াং গুণবান্ ধার্ম্মিকো ভবেৎ। বহুপাত্রো ধনী দাতা জায়তে নাত্র সংশয়ঃ ॥১০॥ কৌতুকে চ ভবেদ্রোগী নানা বিদ্যাসু তৎপরঃ। উৎসাহী চ মহাক্রোধী জায়তে চ সুনিশ্চিতং ॥ ১১ ॥ নিদ্রায়াং দক্রুরোগী স্যাৎ ক্লেশ পাপ রুজান্বিতঃ। পুত্রশোক মহাদুঃখী নিত্যং ভ্রমতি মেদিনীং ॥ ১২ ॥ ইতি চন্দ্রস্য ॥ ॥ শয়নে চ কুজে জাতো লক্ষ্মী বহু জ্বরঙ্গকঃ। ক্ষণক্রোধী মহাদক্ষঃ কৃপণো জায়তে নরঃ ॥ ১ ॥ উপবেশে যদা ভৌমে জায়তে চ নরা. ধনুর্ব্বান্ ধনবান্ ক্রূরকর্ম্মা চ নিষ্ঠুরো জাতি বর্জ্জিতঃ ॥ ২ ॥ নেত্রপাণৌ চ যো জাতো হর্ক্ষিরোগো ভয়ঙ্করঃ। পুত্র দার ধনৈর্যুক্তো দারিদ্র্যেণৈব দ- হ্যতে ॥ ৩ ॥ প্রকাশনে কুজে জাতো ধনবান্ পণ্ডিতঃ সধীঃ। নারী চ ম্রিয়তে তস্য প্রথমা চ বিশেষতঃ ॥ ৪ ॥ ॥ গমনে চ যদা জাতঃ প্রবাসী নিত্য দুঃখিতঃ। শরীরে চ ভবেদ্রোগঃ কণ্ডুাদি কুষ্ঠ দক্রুকঃ ॥ ৫ ॥ প্রবাসী গমনেচ্ছায়াং গুদরোগী ভবেচ্চ সঃ। ধনহীনঃ কুকর্ম্মা চ জায়তে ক্ষিতিজস্য চ ॥ ৬ ॥ সভায়াঞ্চ যদা জাতো ধার্ম্মিকো বহুসম্পদঃ। গুণবাংশ্চ মহা দাতা শিরোরোগী ভবেজ্জ্বরং ॥ ৭ ॥ কুজস্যাগমনে নিত্যং খঞ্জো ভবতি নান্যথা। কর্ণরোগী পিত্তশূলী জায়তে চ নরাধমঃ ॥ ৮ ॥ ভোজনে ভূমিজস্যাপি যো জাতো মাংসলুব্ধক। বৃহৎকায়ো মহাক্রোধী নিত্যোৎসাহী ধনান্বিতঃ ॥ ৯ ॥ কুজস্য নৃত্যলিপ্সায়াং যো জাতো ধনবান্ ভবেৎ। দাতা ভোক্তা সদা মানী রাজপাত্রো ভবেচ্চ সঃ ॥ ১০ ॥ কৌতুকে ক্ষিতিজস্যাপি জাতো ভবতি পণ্ডিতঃ। নানা ধনেন সংযুক্তো বহুপুত্রো দ্বিভার্য্যকঃ ॥ ১১ ॥ নিদ্রায়াং ভূমিপুত্রস্য যো জাতো মূর্খ এব সঃ। কলহো বান্ধবৈঃ সার্দ্ধং শোক ক্লেশ রুজান্বিতঃ ॥ ১২ ॥ ইতি মঙ্গলস্য ॥ ॥ বুধস্য শয়নে জাতো ধনবান্ ক্ষুধিত

সন্দা। অঙ্গচ্ছেদো ভবেদ্বাপি খঞ্জো ভবতি নান্যথা ॥ ১ ॥ উপবেশে চ যো জাতঃ প্রবাসী জায়তে ধ্রুবং। কবিতা গুণ ধী যুক্তো গৌরবর্ণো মহাশয়ঃ ॥ ২ ॥ নেত্রপাণৌ চ যো জাতঃ শ্লীপদাদি রুজান্বিতঃ। চক্ষুরোগী বিশেষঃ স্যাৎ পুত্রনাশী ভবেদ্ধ্রুবং ॥ ৩ ॥ প্রকাশনে ভবেজ্জাতো রাজ পাত্রো ধনান্বিতঃ। নানা ধনেন সংযুক্তো জায়তে বেদ পারগঃ ॥ ৪ ॥ গমনে যো নরো জাতঃ প্রবাসী নিত্য দুঃখিতঃ। শরীরে ক্ষত মাপ্নোতি নিত্য মৃণী ভবেচ্চ সঃ ॥ ৫ ॥ যো জাতো গমনেচ্ছায়াং লম্পটো দুষ্ট চিত্তকঃ। স্ত্রীবশো দুষ্টভার্য্যশ্চ কামুকো বহু ভাষকঃ ॥ ৬ ॥ সভায়াঞ্চ বুধে জাতো মূর্খো ভবতি পণ্ডিতঃ। ধনবান্ ধার্ম্মিকশ্চৈব চিররোগী ভবেত্তু সঃ ॥ ৭ ॥ ক্রূরঃ খলো হতমূর্খঃ পাপ শীলো ভবেন্নরঃ। বুধস্যাগমনে নিত্যং জায়তে চ নরাধমঃ ॥ ৮ ॥ ভোজনে চ ভবেৎ সৌখ্যং ধনহীনো ভবেন্নরঃ। পরদ্বেষী প্রবাসী চ শোষ গাত্র ব্যথান্বিতঃ ॥ ৯ ॥ যো জাতো নৃত্যলিপ্সায়াং ধনবান্ পণ্ডিতঃ কবিঃ। উৎসাহী চ মহাহৃষ্টো ভুনক্তি সুখ মদ্ভুতং ॥ ১০ ॥ কৌতুকে চ যদা জাতো ভবেৎ সর্ব্ব জনপ্রিয়ো [illegible]রোগী দদ্রুযুক্তো ধনবানল্পসস্যকঃ ॥ ১১ ॥ নিদ্রায়াঞ্চ যদা জাতঃ সর্ব্ব দুঃখৈক পাত্রতাং। নানা ক্লেশ মবাপ্নোতি রোগ শোক যম ক্ষয়ং ॥ ১২ ॥ ইতি বুধস্য ॥ * ॥ ধনবান্ লম্পটঃ শ্যামঃ স্থূলো ব্রণরুজান্বিতঃ। জীবস্য শয়নে জাতো মানবো নাত্র সংশয়ঃ ॥ ১ ॥ উপবেশে গুরো জাতো বহুভাষী চ রোগবান্। পশুঘাতী মহাশিল্পী শ্লীপদী রোগ সংযুতঃ ॥ ২ ॥ নেত্র পাণৌ গুরো জাতঃ কাশরোগী ধনী ভবেৎ। ক্ষতাদি শ্চরণে নিত্যং জায়তে নাত্র সংশয়ঃ ॥ ৩ ॥ গুরোঃ প্রকাশে ধনবান্ লিঙ্গ গুহ্যে রুজান্বিতঃ। দক্ষো লম্পট পাপী চ শ্যাম বর্ণো রুজান্বিতঃ ॥ ৪ ॥ সর্পভীতো গূঢকর্ম্মা সাহসী গমনোন্মুখেঽপর বিত্তেন ধনবান্ পুমান্ ভবতি বাক্পতৌ ॥ ৫ ॥ গুরোশ্চ গমনেচ্ছায়াং জাতো ভবতি মানবঃ। শূলী ধনী প্রবাসী চ সেবা কর্ম্মণি তৎপরঃ ॥ ৬ ॥ বক্তা দাতা চ ধনবান্ রাজ সেবান্বিতো নরঃ। শূলরোগী ভবে[illegible] ভায়াং বাক্পতৌ স্থিতে ॥ ৭ ॥ ধার্ম্মিক তীর্থবিম্মানী ধনী চাগমনে গুরোঃ। পরদারেষু সংলুব্ধো জায়তে

নাত্র সংশয়ঃ ॥ ৮ ॥ ভোজনে বহু ভৈক্ষ্যাঢ্যো মাংসলুব্ধো মহাসুরঃ। কামুকঃ প্রিয়বাক্যশ্চ জায়তে নাত্র সংশয়ঃ ॥ ৯ ॥ নৃত্যলিপ্সে শঠো বাগ্মী ধনবান্ সাত্ত্বিক স্তথা। মহদৈশ্বর্য্য সংযুক্তো জীবস্য চ ভবেন্নরঃ॥১০॥ কৌতুকে চ গুরো র্জাতো ধনবান্ ধার্ম্মিকঃ সদা। নৃত্যোৎসাহী মহৎ সঙ্গো ভুনক্তি সুখমদ্ভুতং ॥ ১১॥ নিদ্রায়াঞ্চৈব যো জাত শ্চক্ষুরোগী ভবেচ্চ সঃ। কৃপণো বহুভাষী চ দুঃখিতো ভ্রমতে মহীং ॥১২॥ ইতি গুরোঃ ॥*॥ শুক্রস্য শয়নে জাতো লম্পটো বহুভাষকঃ। দন্তরোগী মহাক্রোধী নীচো ভবতি নিত্যশঃ ॥ ১ ॥ উপবেশে তথা জাতো বলবান্ দাম্ভিকঃ সদা। নিত্য প্রবাসী রোগী চ জায়তে নীচ সংস্থিতে ॥ ২ ॥ নেত্রপাণৌ ভৃগো র্দুঃখী রোগ শোক সমন্বিতঃ। ধনহীনো মহারোগী মানবঃ স্যান্ন সংশয়ঃ ॥ ৩ ॥ ভৃগোঃ প্রকাশনে জাতো বিদ্যা ধন সমন্বিতঃ। দাতা চ ধার্ম্মিকশ্চৈব কীর্ত্তিমান্ জায়তে নরঃ ॥ ৪ ॥ শুক্রস্য গমনে জাতঃ পাদমূলে কষ্টান্বিতঃ। নিত্যোৎসাহী মহাশিল্পা ভবেৎ ও থ গতো রতঃ ॥ ৫ ॥ গমনেচ্ছৌ যদা জাতো ভ্রাতৃনাশো ভবেদ্ধ্রুবং। মাতা চ ম্রিয়তে তস্য শৈশবে ব্যাধি সংযুতঃ ॥ ৬ ॥ সভায়াঞ্চ ভৃগো র্জাতো রাজপাত্রো মহাধনী। স্থূল শীলো মহাদক্ষঃ কেবলং শূল রোগবান্ ॥ ৭ ॥ ভৃগো রাগমনে জাতো দুঃখিতো বহুলম্পটঃ। দদ্রুরোগী পুত্রশোকী জায়তে চ নরাধমঃ ॥ ৮ ॥ শুক্রস্য ভোজনে জাতো বলবান্ দাম্ভিকঃ সদা। মহাধনী ভবেন্নিত্যং বাণিজ্যেন বিশেষতঃ ॥ ৯ ॥ যো জাতো নৃত্যলিপ্সায়াং স বাগ্মী জায়তে ধ্রুবং। পাণ্ডিত্যং কবিত্বা চৈব বর্দ্ধতে চ দিনে দিনে ॥ যদি চৈব ভবেন্নীচে মূর্খো ভবতি নিশ্চয়ং। তুঙ্গস্থানে বিশেষেণ রাজপাত্রো মহাধনী ॥ কামুকো বহুকান্তশ্চ পরযোষিৎ প্রিয়ঃ সদা। শ্যাম বর্ণ স্তথা মানী যাজ্ঞিকো বহুভাষকঃ ॥ ১০ ॥ শুক্রস্য কৌতুকে জাতো ধনবান্ সাত্ত্বিকঃ সদা। মহাহৃষ্টো মহাবন্ধুঃ কৌতুকী চ ভবেৎ সদা। বহুপুত্র কলত্রশ্চ নানা সুখ সমন্বিতঃ নীচে তদ্বিপরীতঃ স্যাৎ দুঃখ শোক সমন্বিতঃ ॥ ১১ ॥ নিদ্রায়াঞ্চ ভৃগো র্জাতো ভবেদ্রোগী স নিশ্চিতং। নিত্যক্লেশী মহাদুঃখী জায়তে নাত্র সংশয়ঃ। জায়ায়াঞ্চ সুতস্থানে যদি নিদ্রা

ভৃগো ভবেৎ। তদা সর্ব্ব বিনাশঃ স্যাদ্বিদ্বিকুনা পরিকীর্ত্তিতঃ ॥ ১২ ॥ ইতি শুক্রস্য॥৬॥ শয়নে চ শনে র্জাতো লম্পটো বহুভাষকঃ। গুহ্যস্থানে ভবেদ্রোগী কোষ বৃদ্ধিশ্চ জায়তে॥ লগ্নাৎ সপ্তাষ্টমে চৈব শয়নস্থঃ শনৈশ্চরঃ। তদা নিত্য প্রবাসী স্যাচ্ছত্রু ক্ষয়ী ভবেচ্চ সঃ॥ ১॥ উপবেশে যদা জাতঃ শ্লীপদী দদ্রু সংযুতঃ। ধনহীনো ভবেত্তস্য পীড়া ভবতি নিত্যশঃ॥ ২॥ নেত্রপাণৌ যদা জাতো মূর্খো ভবতি পণ্ডিতঃ। ধনবান্ ধার্ম্মিকশ্চৈব দ্বিভার্য্যো বহু ভাষকঃ॥৩॥ প্রকাশনে চ যো জাতো রাজপাত্রো ভবেচ্চ সঃ। নানা গুণেন গুণবান্ ধার্ম্মিকঃ পণ্ডিতঃ শুচিঃ॥ মতান্তরে। জায়াস্থানে চ লগ্নে চ প্রকাশনে যদা শনিঃ। তদা সর্ব্ব বিনাশঃ স্যাজ্জাতি ধ্বংসো ভবেদ্ধ্রুবং॥৪॥ গমনে চ যদা জাতঃ পাদমূলে রুজান্বিতঃ। তীর্থে চ গতিমাম্নিত্যং পুত্র দারৈর্বিবর্জ্জিতঃ॥ ৫॥ যো জাতো গমনেচ্ছায়াং শ্লীপদী রোগ সংযুতঃ। দন্তঘাতী মহাক্রোধী কৃপণঃ পর নিন্দকঃ॥ ৬॥ সভায়াঞ্চ শনৌ জাতঃ পুত্র দার ধনৈ র্যুতঃ। সর্ব্বত্র লভতে বিত্তং নানা রত্ন সমন্বিতং॥ ৭॥ আগমনে যদা জাতো মহাক্রোধী রুজান্বিতঃ। সর্পাদিভিশ্চ সন্দষ্টো ভ্রাতৃনাশী ভবেদ্ধ্রুবং॥ ৮॥ ভোজনে চৈব যো জাতো মন্দাগ্নিশ্চ মহানপি। অর্শোরোগী তথা শূলী চক্ষু রোগী ভবেচ্চ সঃ॥ ৯॥ যো জাতো নৃত্যলিপ্সায়াং নর্ত্তকো বহুভাষকঃ। জীবতো দুঃখিতশ্চৈব প্রবাসী পরসেবকঃ॥ ১০॥ কৌতুকে চ শনে র্জাতো রাজপুত্রো মহাশয়ঃ। দাতা ভোক্তা মহাদক্ষো ধার্ম্মিকঃ পণ্ডিতঃ শুচিঃ॥ ১১॥ নিদ্রায়াঞ্চ শনের্জাতো ধনবান্ পণ্ডিতঃ শুচিঃ। চক্ষুরোগী পিত্তশূলী দ্বিভার্য্যো বহুপুত্রকঃ॥ বিশেষতশ্চ ধর্ম্মস্থে কর্ম্মস্থে চ কদাচন। যদি দৈবাত্তয়ে-র্নিদ্রা নাশো ভবতি নিশ্চিতং॥ কর্ম্মনাশো ধর্ম্মনাশঃ ক্ষুধার্ত্তো দুঃখিতঃ সদা। নিত্য প্রবাসী রোগী চ কার্য্যনাশঃ পদে পদে॥ স্বমিত্র গেহে ষষ্ঠে বা কেন্দ্রে বা স্বগৃহে পুনঃ। তদা সর্ব্বং বিচার্য্যঞ্চ বৈপরীত্যেন চিন্তনং॥ জায়ায়াঞ্চ সুত স্থানে যদি নিদ্রা ভবেৎ পুনঃ। তদা সর্ব্ব [illegible] বিদ্যাদ্বিদ্বিকুনা পরিকীর্ত্তিতং॥ ১২॥ ইতি শনেঃ॥ ৭॥ শয়নে চ যদা রাহো জন্ম যস্য ভবেৎ পুনঃ। তস্য

শ্লেষ্মো নিত্যদুঃখং জায়তে চ ন সংশয়ঃ ॥ ১ ॥ উপবেশে চ যো জাতঃ শ্লীপদী রোগ সংযুতঃ। বহুহানি র্নরেন্দ্রস্য পীড়া ভবতি নিত্যশঃ ॥ ২ ॥ নেত্রপাণৌ যদা জাত শ্চক্ষুরোগী ভবেন্নরং। সর্পাঘাতো মহাভীতি র্বিত্তার্থো বহুভাষকঃ॥৩॥ প্রকাশনে চ যো জাতো ধনবান্ ধার্ম্মিকঃ পুনঃ। নিত্য প্রবাসী চোৎসাহী সাত্ত্বিকো ধার্ম্মিকঃ শুচিঃ॥৪॥ গমনে চৈব যো জাতো নানা রোগৈ র্ধনক্ষয়ঃ। দন্তাঘাতো মহাক্রোধী পিশুনঃ পরনিন্দকঃ ॥৫॥ যো জাতো গমনেচ্ছায়াং বহুপুত্রো মহাধনঃ। পণ্ডিতো গুণবান্ দাতা জায়তে চ নরোত্তমঃ ॥৬॥ সভায়াঞ্চ যদা জাতঃ কৃপণো ধন সংযুতঃ। নানা গুণেন গুণবান্ ধার্ম্মিকঃ পণ্ডিতঃ শুচিঃ॥৭॥ গমনে চ যো জাতো লম্পটো বহু ভাষকঃ। সুহৃদ্বন্ধু বিনাশঃ স্যান্নানা ক্লেশশ্চ জায়তে ॥ ৮ ॥ ভোজনে চ মহাদুষ্টো মন্দাগ্নিশ্চ রুজান্বিতঃ। কৃপণঃ কলহাঢ্যশ্চ দুঃখিতো নিত্য [illegible] যো জাতো নৃত্যলিপ্সা[illegible] ভবতি নান্যথা। পুত্রনাশো [illegible]স্য জায়া নাশো ভবে[illegible] ॥ ১০ ॥ কৌতুকে চ যদা জাতো গুণৈঃ সর্ব্বৈঃ সমন্বিতঃ। নানা ধনেন ধনবান্ রাজসেবাস তৎপরঃ॥ যদি দৈবাদ্ভবেত্তুঙ্গী স্বগৃহী বা কদাচন। তদা সর্ব্বং বৈপরীত্যং জায়তে চ ন সংশয়ঃ॥১১॥ যো জাতো রাহু নিদ্রায়াং দুঃখিতঃ সর্ব্বত স্তথা। নানা স্থানে গতো বাপি ধন পুত্র বিবর্জ্জিতঃ॥ জায়ায়াঞ্চ সুতস্থানে যদি নিদ্রাং বিধুন্তুদঃ। তদা সর্ব্বং বৈপরীত্যং শতজায়া সমন্বিতঃ॥ ১২॥ নানা শাস্ত্রং সমালোক্য ক্রিয়তে গ্রহ সংগ্রহঃ। বলাবল বিচারেণ যুক্ত্যা সঞ্চিন্তয়েদ্বুধঃ॥ ইতি গ্রহাণাং শয়নাদি দ্বাদশভাবস্বিবেকঃ সমাপ্তঃ। ইতি জাতরত্নঃ কোষ্ঠীপ্রদীপশ্চ॥**॥ অথ তন্বাদি দ্বাদশ ভাবাঃ। তে চ নরাণাং জন্মলগ্নাবধিক দ্বাদশ স্থানানি। যথা। সামর্থ্যং তনু কল্যতে সমুদয়ে বিত্তং কুটুম্বং ততো বিক্রান্তিং সহজং তৃতীয় ভবনে যোধঞ্চ সঞ্চিন্তয়েৎ। বন্ধুং বাহ সুখালয়ানপি ততো ধী মন্ত্র পুত্রাং স্ততঃ ষষ্ঠেঽথ ক্ষত বিদ্বিষৌ মদগৃহে কামং স্ত্রিয়ং বর্ত্ম চ॥ রন্ধ্রায়ু র্মৃতয়ো হষ্টমে শুভতপো ভাগ্যানি চিত্তন্ততো নানাজ্ঞাস্পদ কর্ম্মণাং দশম ভে কর্য্যাত্তত শ্চিন্তনং। প্রাপ্ত্যায়াবথ চিন্তয়েত্তব গৃহে খল্পে ত্রু মন্ত্রিব্যয়ৌ

সৌম্য স্বামি যুতীক্ষণে রূপচয স্তেবা°ক্ষতি স্তুন্যথা।। ইতি দ্বাদশ ভাব বিবেকঃ।। * ।। অরাতি ব্রণযোঃ ষষ্ঠে চাষ্টমে মৃত্যুরন্ধ্রযোঃ। ব্যযস্য দ্বাদশ স্থানে বৈপরীত্যেন চিন্তন°।। অরাত্যাদি ভাবাপবাদঃ।। * ।। অথ তন্বাদি দ্বাদশ ভাবস্থ গ্রহ ফল°।। লগ্নে সূর্য্যে হক্ষিরোগী শশিনি বলযুতো রূপবান্ বিত্তযুক্তো ভৌমে ব্যঙ্গঃ সুবাগ্মী শশধর তনযে সর্ব্ব শাস্ত্রার্থ বেত্তা। জীবে দাতা পবিত্রঃ সুকবি রথ গতে ভার্গবে মণ্ডলেশঃ শৌরৌ কণ্ডুতি গাত্র স্তমসি চ নিযত° বঞ্চিতো ধর্ম্মহীনঃ।। ১।। বিত্তেহর্কে চৈব রোগী সতত গদযুতো রাত্রিনাথে ধনাঢ্যো ভৌমে নিত্য° প্রবাসী কৃষি সুত ধনবান্ সোমপুত্রে প্রধানঃ। জীবে লক্ষ্মী প্রমোদী বিলসতি ভৃগুজে দর্পিতঃ স্ত্রীনিকেতঃ সৌরৌ দীনো হতিনিত্য° তমসি চ নিযত°চৌ রিকা বিত্তজীবী।। ২।। ভ্রাতর্য্যর্কে সধর্ম্মঃ স ভবতি নিযত° ভ্রাতৃহা রাত্রিনাথে হি°স্রো ভৌমে হনুজানা° সপদি বধকরো ভূমিকা বৃত্তিজীবী। সৌম্যে সত্যস্য হন্তা ভবতি সুরগুরৌ কাম দেব স্বরূপঃ শুক্রে রাজ্যাধিকারী রবিজ দনুজযো ভ্রাতৃহন্তা ধনাঢ্যঃ।।৩।।

অর্কে বন্ধৌ সুদুঃখী স্বজন পরিবৃতঃ শীতগৌ জানুরোগী ভৌমে ঘ্নগ্রামবাসী ভবতি শশিসুতে ভ্রাতৃপুত্রান্বিতো হপি। জীবে রত্নোপভোগী ত্রিদশরিপুগুরৌ সর্ব্বসৌখ্যাধিকারী সৌরৌ গেহে নিবাসী ভবতি শশিরিপৌ মন্দকর্ম্মা হ্যচেলঃ।। ৪।। পুত্রস্থে হর্কে নরো হসৌ প্রথম সুতহতঃ সি°হরাশৌ সুপুত্রঃ সোমে সর্ব্বাধিকারী ভবতি ধরণিজে পুত্র শোকাকুলো হসৌ। সৌম্যে সুস্থঃ সুদেহঃ প্রচুরধনযুতো দেবপূজ্যে সুপুত্রঃ কন্যাযুক্তো হি শুক্রে রবিজ দনুজযোঃ পুত্র পৌত্রৈ র্বিহীনঃ।। ৫।। ষষ্ঠে হর্কে শত্রুহন্তা রিপুগণ রহিতঃ ক্ষীণচন্দ্রে গতায়ুঃ পূর্ণে শত্রুঞ্চ হন্যাদ্ভবতি ধরণিজে হীন দেহো হতিদীনঃ। সৌম্যে শাস্ত্রার্থ যুক্ত স্ত্রিদশপতি গুরৌ রাজ্য সৌখ্যোপভোগী দৈত্যাচার্য্যে হতিরোগী রবিজ দনুজযোঃ পাপ ভুক্তিত্য দুঃখী ।। ৬।। পত্ন্যা মর্কে চ জাযা পতি রতি বিমুখী শীতরশ্মৌ সুপুত্রঃ সুস্থো বা যাযরো হসৌ ভবতি [illegible] ভার্য্যশ্চ নূন°। সৌম্যে সুস্থঃ সুতো হ ত্রিদশ পতি গুরৌ শাস্ত্রবেত্তা শতাযুঃ শুক্রে পুত্রপ্রমোদী রবিজ দনুজযো

হীনঃ ভার্য্যশ্চ নূনং ॥ ৭ ॥ মৃত্যৌ চার্কে সুমৃত্যুর্ভবতি চ নিযতং শীতরশ্মৌ গতায়ুর্ভূমেঃ পুত্রে সুরোগী শশধরতনযে শূলরোগী বিকর্ম্মা । জীবে তীর্থে চ মৃত্যুর্ভবতি ভৃগুসুতে ধার্ম্মিকস্তীর্থগো হসৌ সৌরৌ শূলী গতায়ুর্ভবতি বিধুরিপৌ যোধযুক্তে গতায়ুঃ ॥ ৮ ॥ ধর্ম্মে চার্কে নরো হসৌ বিবিধ ধনযুতঃ শীতগৌ পুণ্যকর্ম্মা লক্ষ্মীবান্ পুণ্যচেতা ভবতি ধরণিজে দেববিত্তাপহারী । সৌম্যে ধর্ম্ম্যঃ সুশীল স্ত্রিদশপতি গুরৌ রাজতুল্যঃ সুকর্ম্মা শুক্রে তীর্থানুরাগী রবিজ দনুজযোঃ পাপশীলঃ সুদুঃখী ॥ ৯ ॥ কর্ম্মণ্যর্কে প্রতাপী প্রচুর ধনযুতঃ শ্রীপদী ক্রোধদৃষ্টিঃ সোমে শ্লেষ্মান্বিতো হসৌ বিবিধ ধনযুতো ভূমিজে বন্ধুহীনঃ । নিত্যোৎসাহী চ সৌম্যে প্রচুর ধনযুতো দেবপূজ্যে হভিমানী দিব্যস্ত্রীশো হপি শুক্রে নৃপতিসমধনঃ সৌরিদৈত্যে সুখী চ ॥১০॥ আযে চার্কে নরো হসৌ পিতৃধনসহিতঃ শীতগৌ চারুশীলো ভৌমে নিত্যং সরোগী শশধরতনযে সর্ব্বদা ঋদ্ধিযুক্তঃ । জীবে শ্রীমান্ প্রমাতঃ করি তুরগপতি র্ভার্গবে শাস্ত্রবিজ্ঞঃ শূদ্রী রত্নাদিযুক্তো রবিজ দনুজযোঃ ক্রূরকর্ম্মা হচেলঃ ॥ ১১ ॥ অর্কে সংস্থে ব্যযে হসৌ পুত্র ধন রহিতঃ সর্ব্বরোগী সুদুঃখী সোমে খেদান্বিতো হসৌ ভবতি ধরণিজে দ্যূতরক্তো বিবুদ্ধিঃ । সৌম্যে ধর্ম্মার্থকারী দিনকর রহিতে দেবপূজ্যে হভিমানী শুক্রে শাস্ত্রানুরাগী রবিজদনুজযোঃ ক্রূরকর্ম্মা হচেলঃ ॥ ১২ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ * ॥ স্ত্রীণাং যৌবনকালে স্বভাবজাষ্টাবিংশত্যলঙ্কারান্তর্গতা হঙ্গজ প্রথমালঙ্কারঃ । যথা । যৌবনে সত্ত্বজা স্তাসা মষ্টাবিংশতি সংখ্যকাঃ । অলঙ্কারা স্তত্র ভাব হাব হেলা স্ত্রযো হঙ্গজাঃ ॥ তত্র ভাবঃ । নির্ব্বিকারাত্মকে চিত্তে ভাবঃ প্রথম বিক্রিযা । জন্মতঃ প্রভৃতি নির্ব্বিকারে মনসি উদ্বুদ্ধমাত্রো বিকারো ভাবঃ । যথা । সএব সুরভিঃ কালঃ সএব মলযানিলঃ । সৈবেয মবলা কিন্তু মনো হন্যদিব দৃশ্যতে ॥ ইতি সাহিত্যদর্পণে তৃতীয পরিচ্ছেদঃ ॥ * ॥ ভাবস্য লক্ষণান্তরং যথা । শরীরেন্দ্রিয বর্গস্য বিকারাণাং বিধাযকাঃ । ভাবা বিভাব জনিতা শ্চিত্ত বৃত্তয ঈরিতাঃ ॥ পুরাণে নাট্যশাস্ত্রে চ দ্বযোস্তু রতি ভাবযোঃ । সমানার্থ তযা চাত্র দ্বয মৈক্যেন লক্ষ্যতে ॥ * ॥

ভগবদ্ভাবো যথা। শুদ্ধসত্ত্ব বিশেষাত্মা প্রেম সূর্য্যাংশু সাম্যভাক্। রুচিভি শ্চিত্ত মাসৃণ্যকৃদসৌ ভাব উচ্যতে॥ ইতি ভক্তিরসামৃতসিন্ধুঃ॥*॥ পূর্ব্বোক্ত মানসবিকার রূপ ভাবস্য বিবরণং যথা। রজঃ সত্ত্ব তমো ময়শ্চিত্তবিকারো ভাবঃ। চিত্তবৃত্তি বিশেষো ভাব ইত্যন্যে। অতএব মনোবিকারো রত্যাদি ভাব উক্তঃ। ভাবয়তি করোতি রসান্ ভাবঃ অন্। তথাচ ভরতঃ। নানাভিনয় সম্বন্ধান্ ভাবয়ন্তি রসানিমান্। যস্মাত্তস্মাদমী ভাবা বিজ্ঞেয়া নাটকোক্তিষু॥ ভাবাশ্চ ত্রিবিধাঃ স্থায়িনো ব্যভিচারিণঃ সাত্ত্বিকাশ্চ। তত্র স্থায়িনো যথা। রতির্হাসশ্চ শোকশ্চ ক্রোধোৎসাহৌ ভয়ন্তথা। জুগুপ্সা বিস্ময়শ্চেতি স্থায়িভাবাঃ প্রকীর্ত্তিতাঃ॥ ব্যভিচারিণো যথা। নির্ব্বেদ গ্লানি শঙ্কাখ্যা স্তথাসূয়া মদ শ্রমাঃ। আলস্যঞ্চৈব দৈন্যঞ্চ চিন্তা মোহো ধৃতিঃ স্মৃতিঃ। ব্রীড়া চপলতা হর্ষ আবেগো জড়তা তথা। ভরো বিষাদ ঔৎসুক্যং নিদ্রাপস্মার এবচ। স্বপ্নো বিবোধো মর্ষশ্চাপ্যবহিত্থ মথোগ্রতা॥ মতি র্ব্যাধি স্তথোন্মাদ স্তথা মরণমেবচ। ত্রাস শ্চৈব বিতর্কশ্চ বিজ্ঞেয়া ব্যভিচারিণঃ॥ ত্রয়স্ত্রিংশদমী ভাবাঃ প্রযান্তি রস সংস্থিতং। সাত্ত্বিকা যথা। স্বেদঃ স্তম্ভো২থ রোমাঞ্চঃ স্বরভঙ্গো২থ বেপথুঃ। বৈবর্ণ্যমশ্রু প্রলয় ইত্যষ্টৌ সাত্ত্বিকা মতাঃ ইতি॥ রত্যাদয়ঃ স্থায়িনো২ষ্টৌ নির্ব্বেদাদ্যা ব্যভিচারিণ স্ত্রয়স্ত্রিংশৎ স্বেদাদয়ঃ সাত্ত্বিকা অষ্টৌচেতি ঊনপঞ্চাশদ্ভাবাঃ পঞ্চাশদ্ভাবা ইত্যন্যে। ইত্যমরটীকায়াং ভরতঃ॥

ভাবকঃ পুং ভাবঃ। মানসোবিকারঃ। ইতি হলায়ুধঃ॥ সত্তাশ্রয়ে ত্রি; ইতি সংক্ষিপ্তসারঃ॥

ভারতঃ ত্রি ভবদীয়ঃ। শত্রন্ত ভবৎশব্দাদণ প্রত্যয় নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী॥

ভাবৎকঃ ত্রি ভবদীয়ঃ। ভবৎশব্দাৎ ঠক্ প্রত্যয় নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী॥ যথা। ভাবৎ দৃষ্টবৎ স্বেতদস্মাস্বপি সুজীবিত ইতি ভট্টিপঞ্চমসর্গঃ॥

ভাবনং ক্লী ভব্যং। চালতা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥ ভাবনা। ইতি মেদিনী॥

ভাবনা স্ত্রী।ক্লী ধ্যানং॥ পর্য্যালোচঃ॥ অধিবাসনং। ইতি মেদিনী॥*॥ ত্রিবিধা ভাবনা যথা।

বিধা ভাবনা বিপ্র বিশ্বমেতস্মিন্নেয়োঃ ধনে। ব্রহ্মাখ্যা কর্ম্ম সংজ্ঞা চ তথা চৈবোভয়াত্মিকা॥ ব্রহ্ম ভাবাত্মিকা হ্যেকা কর্ম্ম ভাবাত্মিকা পরা। উভয়াত্মিকা তথৈবান্যা ত্রিবিধা ভাব ভাবনা॥ সনন্দনাদয়ো ব্রহ্ম ভাব ভাবনয়া যুতাঃ। কর্ম্ম ভাবনয়া চান্যে দেবাদ্যাঃ স্থাবরা শ্চরাঃ॥ হিরণ্য গর্ব্ভাদিষু চ ব্রহ্মকর্ম্মাত্মিকা দ্বিধা। বোধাধিকার যুক্তেষু বিদ্যতে ভাব ভাবনা॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ॥ *॥ ত্রিবিধ ভাবনাশ্রয় জীবাত্মকত্বাত্তদুপচারেণ ত্রিবিধা ভাবনেত্যুচ্যতে। এতাদ্ধি হরেঃ স্থূলং রূপং। অতঃপর রূপ প্রাপ্ত্যুপায়ত্বাৎ তত্র প্রথমং মনঃ সন্ধার্য্য মিতি ভাবঃ। ভাবনা নাম জ্ঞান বিশেষজা বাসনা। তাং ত্রিবিধা মপি সংজ্ঞা মাদিশতি ব্রহ্মাখ্যেতি। তা মেব বিষয় ত্রৈবিধ্যেন বিবিনক্তি ব্রহ্ম ভাবনাত্মিকেতি। ভাব ভাবনা ভাবো বস্তু তদ্বিষয়া ভাবনা ত্রিবিধা। তত্র ব্রহ্ম ব্রহ্মৈব ভাবয়ানঃ। বয়ং কর্ত্তারঃ। বয়ন্তুভয় মিদমনুসন্দধ্মে হত্যের ত্রিবিধা ভাবনা। ভাবনা যুক্তান্ জীবানুদাহরতি স নন্দনাদয় ইতি দ্বাভ্যাং। ইতি তট্টীকা॥

ভাববৃত্তঃ পুং ব্রহ্মা। ভাবঃ সৃষ্টিঃ তত্র বৃত্তঃ প্রবৃত্তঃ। ইতি সন্ধ্যাব্যাখ্যায়াং স্মৃতিঃ॥

ভাববোধকঃ পুং অনুভাবঃ। ইত্যমরঃ॥ ভাবস্য রত্যাদে র্বোধকঃ সূচকো গুণ ক্রিয়াদি রনুভাবঃ। অনুভাব্যতে প্রতীতি যোগ্যতাং নীয়তে রত্যাদি রনেনেতি অনুভাবঃ ঘঞ্। তত্র রতে রনুভাবাঃ লোচনচাতুর্য্য ভ্রূক্ষেপাদয়ঃ। হাসস্যচ কপোলাঙ্কুঞ্চনা নাসোৎফুল্লনাদয়ো হনুভাবা এবমন্যত্রানুমন্তব্যং কিম্বা ভাবাননুভাবযতীতি অন্ অনুভাবো মুখরাগাদিঃ। ইতি তট্টীকায়াং ভরতঃ॥

ভাবাটঃ পুং ভাবকঃ॥ সাধুঃ॥ নিবেশঃ॥ কামুকঃ॥ নটঃ। ইতি মেদিনী॥

ভাবানুগা ) স্ত্রী ছায়া। ইতি রাজ-
ভাবালীনা ) নির্ঘণ্টঃ॥

ভাবিতঃ ত্রি বাসিতঃ॥ প্রাপ্তঃ। ইতি মেদিনী॥ শুদ্ধঃ॥ চিন্তিতঃ॥ নিশ্চিতঃ। ভূ ক্ শুদ্ধি চিন্তয়ো মিশ্রণে চ ইত্যস্মাৎ ণ্যন্তাৎ ক্তপ্রত্যয় নিষ্পন্নো হয়ং॥

ভাবিত্রং ক্লী ত্রৈলোক্যং। স্বর্গমর্ত্য-পাতালং। ইত্যাদিকোষঃ ॥
ভাবিনী স্ত্রী স্ত্রীবিশেষঃ। ইত্যমরঃ ॥ ভাবঃ শৃঙ্গারচেষ্টাবিশেষো বিদ্যতে ঽস্যাঃ ভাবিনী। ইতি তট্টীকাযাং ভরতঃ ॥ স্ত্রীমাত্রং। ইতি রাজনির্ঘণ্টঃ ॥ বর্ত্তমানপ্রাগভাবপ্রতিযোগিনী চ ॥
ভাবী ত্রি ভবিষ্যৎকালঃ। বর্ত্তমানপ্রাগভাবপ্রতিযোগ্যুৎপত্তিকঃ। যথা। বীর প্রতিপদা নাম তব ভাবী মহোৎসবঃ। ইতি কার্ত্তিক শুক্লপ্রতিপদমধিকৃত্য বলিং প্রতি ভগবদ্বাক্যং। ইতি তিথ্যাদিতত্ত্বং ॥
ভাবুকং ক্লী মঙ্গলং ॥ তদ্বতি ত্রি। ইত্যমরঃ ॥
ভাবুকঃ পুং নাট্যোক্তৌ ভগিনীপতিঃ। ইতি হেমচন্দ্রঃ ॥ রসবিশেষভাবনাচতুরঃ। ইতি শ্রীধরস্বামী। যথা। নিগম কল্পতরোর্গলিতং ফলং শুক মুখাদমৃত দ্রব সংযুতং। পিবত ভাগবতং রসমালযং মুহুরহো রসিকা ভুবি ভাবুকাঃ ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ৩ শ্লোকঃ ॥
ভাবুকঃ ত্রি ভবনাশ্রযঃ। ভবতি যঃ। ইতি কর্ত্তরি ভূধাতো রুক প্রত্যযেন নিষ্পন্নং ॥ লগ্ন পলিত প্রিযান্ধ স্থূল শুভগাঢ্য শব্দোপপদ ভূধাতো রভূততদ্ভাবার্থে কর্ত্তরিবাচ্যে খুকঞ প্রত্যযেন লগ্নম্ভাবুক ইত্যাদি নিয়মঞ্চ ॥
ভাব্যং ক্লী অবশ্যভবিতব্যং। ইতি ভূধাতো রবশ্যম্ভাবার্থে ভাবে ঘ্যণ প্রত্যযেন নিষ্পন্নং। যথা। বিপ্রেণ শুচিনা ভাব্যং। ইতি মুগ্ধবোধ ব্যাকরণং ॥ প্রযোগদর্শনাৎ কর্ত্তরি চ তত্র ত্রি। যথা। কৃতস্য করণং নাস্তি দৈবাধিষ্ঠিত কর্ম্মণঃ। ভাবীত্যবশ্যং যদ্ভাব্যং তত্র ব্রহ্মাপ্যবাধকঃ ॥ ইতি কালিকাপুরাণে ৩৮ অধ্যাযঃ ॥
ভাষ ঋ ঙ বাচি। ইতি কবিকল্পদ্রুমঃ ॥ ঙ ভাষতে। ঋ অবীভষৎ অবভাষৎ। ইতি তট্টীকাযাং দুর্গাদাসঃ ॥
ভাষণং ক্লী কথনং। যথা। সংলাপো ভাষণং মিথঃ। ইত্যমরঃ ॥
ভাষা স্ত্রী রাগিণীবিশেষঃ। ইতি হলাযুধঃ ॥ বাক্যং ॥ বাগ্দেবতা। তৎপর্য্যাযঃ। ব্রাহ্মী ২ ভারতী ৩ গীঃ ৪ বাক্ ৫ বাণী ৬ সরস্বতী ৭ ব্যাহারঃ ৮ উক্তিঃ ৯ লপিতং ১০ ভাষিতং ১১ বচনং ১২ বচঃ ১৩। ইত্যমরঃ ॥ ত্রযোদশ বচনে। পৌ

সপ্তক° বাগধিকৃতাযা° দেবতাযাঞ্চ। ইতিতন্ত্রীকায়া° ভরতঃ॥ ॥ শাস্ত্রীযাষ্টত্রিংশ ভাষা যথা। সংস্কৃতা ১ প্রাকৃতা ২ উদীচী ৩ মহারাষ্ট্রী ৪ মাগধী ৫ মিশ্রার্দ্ধমাগধী ৬ শকাভীরী ৭ শ্রবন্তী ৮ দ্রাবিডী ৯ ওট্রীযা ১০ পাশ্চাত্যা ১১ প্রাচ্যা ১২ বাহ্লিকা ১৩ রন্তিকা ১৪ দাক্ষিণাত্যা ১৫ পৈশাচী ১৬ আবন্তী ১৭ শৌরসেনী ১৮। এতাসা° লক্ষণোদাহরণানি প্রাকৃতলঙ্কেশ্বর ব্যাকরণে দ্রষ্টব্যানি॥ ॥ অথ ভাষাবিভাগঃ। পুরুষাণা মনীচানা° সংস্কৃত° স্যাৎ কৃতাত্মনা°। শৌরসেনী প্রযোক্তব্যা তাদৃশীনাঞ্চ যোষিতা°॥ আসা মেব তু গাথাস্তু মহারাষ্ট্রী° প্রযোজযেৎ। অত্রোক্তা মাগধী ভাষা রাজান্তঃপুরচারিণা°॥ চেটানা° রাজপুত্রাণা° শ্রেষ্ঠিনাঞ্চার্দ্ধমাগধী। প্রাচ্যা বিদূষকাদীনা° ধূর্ত্তানা° স্যাদবন্তিকা॥ যোধ নাগরিকাদীনা° দাক্ষিণাত্যা হি দীব্যতা°। শকারাণা° শকাদীনা° শাকারী° সংপ্রযোজয়েৎ॥ বাহ্লীক ভাষা দিব্যানা° দ্রাবিডী দ্রবিডাদিষু। আভীরেষু তথাভীরী চাণ্ডালী পুক্কসাদিষু। আভীরী শাবরী চাপি কাষ্ঠপত্রোপজীবিষু॥ তথৈবাঙ্গারকারাদৌ পৈশাচী স্যাৎ পিশাচবাক্। চেটীনামপ্যনীচানামপি স্যাৎ শৌরসেনিকা॥ বালানা° ষণ্ডকানাঞ্চ নীচগ্রহবিচারিণা°। উন্মত্তানা মাতুরাণা° সৈব স্যাৎ সংস্কৃত° ক্বচিৎ॥ ঐশ্বর্য্যেণ পুনস্তস্য দারিদ্র্যোপস্কৃতস্য চ। ভিক্ষুবস্কধরাদীনা° প্রাকৃত° সংপ্রযোজযেৎ॥ সংস্কৃত° সংপ্রযোক্তব্য° লিঙ্গিনীষূত্তমাসু চ। দেবী মন্ত্রিসুতা বেশ্যাস্বপি কৈশ্চিত্তথোদিত°॥ যদ্দেশ° নীচ পাত্রন্তু তদ্দেশ° তস্য ভাষিত°। কার্য্যত শ্চোত্তমাদীনা° কার্য্যো ভাষা বিপর্য্যযঃ॥ যোষিৎসখী বাল বেশ্যা কিতবাপ্সরসা° তথা॥ বৈদগ্ধ্যার্থ° প্রদাতব্য° সংস্কৃতঞ্চান্তরান্তরা॥ এষা মুদাহরণান্যাকরেষু বোদ্ধব্যানি। ভাষালক্ষণানি ভাষার্ণবে। ইতি সাহিত্যদর্পণে ৬ পরিচ্ছেদঃ॥ ॥ অথ ভাষা পাদঃ। তত্র ভাষা স্বরূপ মাহতুঃ কাত্যাযন বৃহস্পতী। প্রতিজ্ঞা দোষ নির্ম্মুক্ত° সাধ্য° সৎকারণান্বিত°। নিশ্চিত° লোক সিদ্ধঞ্চ পক্ষ° পক্ষবিদো বিদুঃ॥ স্বল্পাক্ষরঃ প্রভূতার্থো নিঃসন্দিগ্ধো নিরাকুলঃ। বিরোধি কারণৈ র্মুক্তো বিরোধি প্রতিরোধকঃ॥ যদা ত্বেব° বিধঃ পক্ষঃ কথিতঃ

পূর্ব্ববাদিনা। দদ্যাত্তৎ পক্ষ সম্বন্ধং প্রতিবাদী তদোত্তরং ॥ প্রতিজ্ঞা সাধ্যাভিধায়িকা বাক্। তস্যা দোষৈঃ পরস্পর বিরুদ্ধার্থ পদাদিভিস্ত্যক্তং সাধ্যং সাধনার্হাভিমতং পক্ষং বিদুঃ। অন্যথা প্রতিজ্ঞা দোষেণ সাধ্য দোষঃ স্যাৎ। অতএবোক্তং। বচনস্য প্রতিজ্ঞাত্বং তদর্থস্য চ পক্ষতা। অসঙ্করেণ বক্তব্যে ব্যবহারেষু বাদিভিঃ॥ বক্তব্যে পক্ষ প্রতিজ্ঞে পূর্ব্বোক্তে। নারদেনাপি। সারস্তু ব্যবহারাণাং প্রতিজ্ঞা সমুদাহৃতা। তদ্ধানৌ হীযতে বাদীতরং স্তানুত্তরো ভবেৎ॥ উত্তরো বিজয়ী। যদ্যপ্যন্যত্র সাধ্যং তদ্বিশিষ্ট ধর্ম্মাধর্ম্মী পক্ষ ইতি ভেদঃ তথাপ্যত্র বাক্প্রত্যার্য্যর্ণাদি ধর্ম্মবিশেষ বিশিষ্টতয়া ধর্ম্মিণো হধমর্ণ পদৈ রেব সাধ্যত্বাৎ সাধ্য পক্ষযো রভেদাভিধানং। উপসংহারে চ এবং বিধঃ পক্ষ ইতি। মিতাক্ষরাযাস্ত। ভাষা প্রতিজ্ঞা পক্ষ ইতি নার্থান্তর মিত্যুক্তং ভাষার্থ [illegible] ভাষা স্বরূপ প্রপঞ্চ মাহ [illegible] ইতি। [illegible]রাজলঃ পৌর্ব্বা[illegible] [illegible]দ্যাদি শূন্যঃ। তত্র। দৃ[illegible]তে চ ব্যবহারে চ প্রবৃত্তে যত্ত ক[illegible]। যানি পশ্য[illegible] কর্ত্তা

তানি ন পশ্যতি॥ ইতি গৃহ্য সংগৃহ্য বচনাদুদাসীনেভ্যো জ্ঞাত্বা শোধয়েৎ ॥ ❀ ॥ তচ্ছোধনমাহ বৃহস্পতিঃ। ন্যূনাধিকং পূর্ব্বপক্ষং তাবদ্বাদী বিশোধয়েৎ। ন দদ্যাদুত্তরং যাবৎ প্রত্যর্থী সভ্য সন্নিধৌ॥ ❀ ॥ ত[illegible]থন প্রকার মাহ ব্যাসঃ। পাণ্ডুলেখেন ফলকে ভূমৌ বা প্রথমং লিখেৎ। ন্যূনাধিকন্ত সংশোধ্য পশ্চাৎ পত্রে নিবেশযেৎ॥ ফলকং কাষ্ঠাদি পট্টকং। কাত্যাযনঃ। পূর্ব্বপক্ষং স্বভাবোক্তং প্রাড্বিবাকো হথলেখযেৎ। পাণ্ডুলেখেন ফলকে ততঃ পত্রেহভিলেখযেৎ ॥ শোধয়েৎ পূর্ব্বপক্ষন্তু যাবন্না[illegible] দর্শনং। উত্তরেণাবরুদ্ধস্য নিবৃত্তং শোধনং ভবেৎ ॥ অন্যদুক্তং লিখেদ্যো হন্যদর্থি প্রত্যর্থিনাং বচঃ। চৌর[illegible] ধার্ম্মিকঃ পৃথিবীপতিঃ ॥ স্বভাবোক্তমকৃত্রিমং। এতচ্চ [illegible] বিশেষাদিনা সুজ্ঞেযং। অতএব [illegible] নিরস্য ভূতেন ব্যবহারং [illegible]পঃ। ভূতনপ্যনুপন্যস্তং হীয়তে ব্যবহারতঃ॥ ভূতং তত্ত্বার্থ সম্বন্ধ[illegible] ভূতং তত্ত্বার্থ সম্বন্ধং [illegible]দাভিহিতং ছলং। কিন্তু [illegible] বিশেষেণ স্বরূপ[illegible]ভিরুক্তা॥ [illegible] চিত্ত[illegible]

চিত্র্যাৎ পরীক্ষা সাধ্বসাধু বা। সর্ব্বেষ্বর্থ বিবাদেষু বাকছলেনাব-সীদতি॥ পশুস্ত্রী ভূম্যণাদানে শা-স্যো হপ্যর্থান্ন হীয়তে। সর্ব্বেষ্বর্থ -দেষু প্রমাদাভিধানে হপি না-বসীদতি। অত্রোদাহরণং পশুস্ত্রী-ত্যাদি। অর্থ বিবাদ গ্রহণাদনু-ৎত বিবাদেষু প্রমাদাভিধানে প্র-কৃতার্থা দপ্যর্থাদ্ধীযত ইতি গম্য-তে। যথাহমনেন শিরসি পাদেন ভাড়িতঃ ইত্যভিধায কেবলং হ-স্তেন তাড়িতঃ ইতি বদন্ন কেবলং দণ্ড্যঃ পরাজীযতে চ। ততশ্চ ত্ব-মহমৃণং ধারযসি নত্ত ঋণত্বেন গৃ-হীত ভাবজ্ঞন-াদিতি ভাষা শ-। এতচ্চ সংস্কৃত দেশভাষা-ন্যতরেণ যথা বোধং বক্তব্যং লেখ্যং বা। -র্থানামপি বাদি প্রতিবা-দি- দর্শনাৎ। অতএবাধ্যাপনে ... বিস্ত ধর্ম্মোত্তরে। ... ত -ক্যৈর্যঃ শিষ্য -মনক্ষু- দেশভাষাদ্যুপায়ৈশ্চ বোধযেৎ স গুরুঃ স্মৃতঃ॥ ইতি ব্য-বহারতত্ত্বং॥

ভাষাপরিচ্ছেদঃ পুং বিশ্বনাথন্যায পঞ্চাননকৃত ন্যাযগ্রন্থবিশেষঃ। অস্যাযমাদ্য শ্লোকঃ। নূতন-

ব্রজচযে গোপবধূটী দুকূলচৌরায। তস্মৈ নমঃ কৃষ্ণায সংসার মহীরু-হস্য বীজায॥ তস্যাযমন্ত্য শ্লোকঃ। সো হয়ং ক ইতি বুদ্ধিস্তু সাজাত্য মবলম্বতে। তদেবৌষধ মিত্যাদৌ সজাতীযে হপি দর্শনাৎ॥ অস্য টীকা সিদ্ধান্তমুক্তাবলী॥

ভাষাপাদঃ পুং চতুষ্পাদ্ব্যবহারান্ত-র্গত প্রথমপাদঃ। তস্য লক্ষণং যথা। অর্থ বদ্ধর্ম্ম সংযুক্তং পরিপূর্ণ মনা-কুলং। সাধ্যবদ্বাচক পদং প্রকৃতা-র্থানুবন্ধি চ॥ প্রসিদ্ধ মবিরুদ্ধঞ্চ নিশ্চিতং সাধন ক্ষমং। সংক্ষিপ্তং নিখিলার্থঞ্চ দেশ কালা বিরোধি চ॥ বর্ষর্ত্তু মাস পক্ষাহো বেলা দেশ প্রদেশ বৎ। স্থানাবসথ সাধ্যা-খ্যা জাত্যাকার বযো যুতং॥ সাধ্য প্রমাণ সংখ্যা বদাত্ম প্রত্যর্থি নাম চ। পরাত্ম পূর্ব্বজানেক রাজ নাম-ভি রঙ্কিতং॥ ক্ষমা লিঙ্গাত্ম পী-ডাবৎ কথিতা হর্ত্ দাযকং। যদা বেদযতে রাজ্ঞে তদ্ভাষেত্যভিধী যতে॥ ইতি মিতাক্ষরাযাং ব্যব-হারাধ্যাযঃ॥ অস্য বিবরণং ভাষা শব্দে দ্রষ্টব্যং॥

ভাষিতং ক্লী -নং। ইত্যমরঃ॥ কথিত ...

ভাষ্যং ক্লী চূর্ণিঃ। ইতি স্বামী ॥ সূত্রবিবরণগ্রন্থঃ। তস্য লক্ষণং। সূত্রার্থো বর্ণ্যতে যত্র পদৈঃ সূত্রানুসারিভিঃ। স্বপদানি চ বর্ণ্যন্তে ভাষ্যং ভাষ্যবিদো বিদুঃ॥ ইতি লিঙ্গাদিসংগ্রহ টীকায়াং ভরতঃ॥ সূত্রোক্তার্থপ্রপঞ্চকং। ইতি হেমচন্দ্রঃ॥ গৃহবিশেষঃ। ইতি মাধবীতি মথুরেশঃ॥ কথনীয়ে ত্রি ॥

ভাষ্যকারঃ পুং মহাভাষ্যকর্ত্তামুনিঃ। তৎপর্য্যায়ঃ। গোনর্দ্দীয়ঃ২ পতঞ্জলিঃ৩ চূর্ণিকৃৎ৪। ইতি ত্রিকাণ্ডশেষঃ॥ অহঞ্চ ভাষ্যকারশ্চ কুশাগ্রীয় ধিয়া বুভৌ। নৈব শব্দাম্বুধেঃ পারং কিমন্যে জড়বুদ্ধয়ঃ॥ ইতি দুর্গাসিংহঃ॥

ভাস ঋ ঙ ভাসি। দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ঋ অবীভসৎ অবভাসৎ। ঙ ভাসতে। ইতি দুর্গাদাসঃ॥

ভাস্ স্ত্রী প্রভা। অস্যশব্দস্য প্রথমান্তরূপং ভাঃ। ইত্যমরঃ॥ ময়ূখঃ। ইতি মেদিনী ॥ ইচ্ছা। ইতি ধরণিঃ॥

ভাসঃ পুং দীপ্তিঃ॥ গোষ্ঠং॥ কুক্কুটঃ॥ গৃধ্রঃ। ইতি বিশ্বঃ॥ স্বনামখ্যাত পক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। শকুন্তঃ২। ইতি হেমচন্দ্রঃ॥

ভাসঃ ক্লী দীপ্তিঃ। ইতি দ্বিরূপকোষঃ

ভাসন্তঃ পুং সূর্য্যঃ॥ চন্দ্রঃ। ইত্যুণাদিকোষঃ॥ ভাসপক্ষী। ইতি মেদিনী॥ নক্ষত্রং। ইতি হেমচন্দ্রঃ

ভাসন্তঃ ত্রি সুন্দরাকারঃ। ইতি মেদিনী॥

ভাসন্তী স্ত্রী নক্ষত্রং। ইত্যুণাদিকোষঃ

ভাসুঃ পুং সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভাসুরং ক্লী কুষ্ঠৌষধং। ইতি জটাধরঃ॥

ভাসুরঃ পুং স্ফটিকঃ। ইতি ত্রিকাণ্ডশেষঃ॥ বীরঃ। ইতি ধরণিঃ॥ কর্ত্তরি ঘুর প্রত্যয নিষ্পন্নত্বেন দীপ্তিযুক্তে ত্রি॥

ভাসুরপুষ্পা স্ত্রী বৃশ্চিকালী। ইতি রাজনির্ঘণ্টঃ॥

ভাস্করং ক্লী সুবর্ণং। ইতি রাজনির্ঘণ্টঃ

ভাস্করঃ পুং সূর্য্যঃ॥ অগ্নিঃ। ইতি মেদিনী॥ বীরঃ। ইতি ধরণিঃ॥ অর্কবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ ভাস্করাচার্য্যঃ। স চ সিদ্ধান্তশিরোমণ্যাদি জ্যোতির্গ্রন্থকর্ত্তা॥

ভাস্করপ্রিয়ঃ পুং পদ্মরাগমণিঃ। চনি ইতি ভাষা। ইতি কেচিৎ॥

ভাস্করেষ্টা স্ত্রী আদিত্যভক্তা। ইতি

রাজনির্ঘণ্টঃ ॥

ভাস্বরং ক্লী অষ্ঠীষধং। ইতি শব্দচন্দ্রিকা ॥

ভাস্বরঃ পুং দিনং। ইতি রাজনির্ঘণ্টঃ ॥ সূর্য্যঃ। ইতি কেচিৎ ॥ দীপ্তিযুক্তে ত্রি। ইতি মুগ্ধবোধব্যাকরণং ॥

ভাস্বান্ পুং সূর্য্যঃ ॥ অকবৃক্ষঃ। ইত্যমরঃ ॥ দীপ্তিঃ। ইতি হেমচন্দ্রঃ ॥ বীরঃ। ইতি মেদিনী ॥ দীপ্তিবিশিষ্টে ত্রি ॥

ভিণ্ডঃ } পুং ভিণ্ডা ক্ষুপঃ। ইতি
ভিণ্ডকঃ } রাজনির্ঘণ্টঃ ॥

ভিণ্ডা স্ত্রী ক্ষুপবিশেষঃ। ভিণ্ডী ইতি খ্যাতা। তৎপর্য্যায়ঃ। ভিণ্ডীতকঃ ২ ভিণ্ডঃ ৩ ভিণ্ডকঃ ৪ ক্ষেত্রসম্ভবঃ ৫ চতুষ্পদঃ ৬ চতুষ্পুণ্ড্রঃ ৭ সুশাকঃ ৮ অস্রপত্রকঃ ৯ বৃত্তপর্ণঃ ১০ বৃত্তবীজঃ ১১। অস্যাগুণাঃ। অম্লরসত্বং। উষ্ণত্বং। গ্রাহিত্বং। রুচিকরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভিণ্ডীতকঃ পুং ভিণ্ডা বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভিত্তং ক্লী খণ্ডং। ইত্যমরঃ ॥

ভিত্তিঃ স্ত্রী গৃহাদেমৃদিষ্টকাদিনির্ম্মিতিঃ। ভীৎ ইতি দেয়াল ইতি ভিৎ ইতি চ খ্যাতা। তৎপর্য্যায়ঃ। কুড্যং ২। ইত্যমরঃ ॥ ভিত্তিকা ৩ কুড্যং ৪ কুড্যকং ৫। ইতি শব্দরত্নাবলী ॥ প্রভেদঃ ॥ সম্বিভাগঃ ॥ অবকাশঃ। ইতি বিশ্বঃ ॥ প্রদেশঃ। ইতি শব্দরত্নাবলী ॥

ভিত্তিকা স্ত্রী কুড্যং। ইতি শব্দরত্নাবলী ॥ পল্লী। ইতি হেমচন্দ্রঃ ॥

ভিত্তিচৌরঃ পুং চৌরবিশেষঃ। সিঁদালচোর ইতি ভাষা। তৎপর্য্যায়ঃ। খানিলঃ ২ কুড্যচ্ছিৎ ৩। ইতি শব্দরত্নাবলী ॥

ভিত্তিপাতনঃ পুং মহামূষকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভিৎ স্ত্রী প্রভেদঃ। ইতি জটাধরঃ ॥ ভেদকর্ত্তরি ত্রি ॥

ভিদ ইর ঔ এধ ভিদি। ইতি কবিকল্পদ্রুমঃ ॥ ভিৎকিযদবয়ববিদারণং। এ ধ ভিনত্তি ভিন্তে কূলং নদী। ঔ ভেত্তা। ইর অভিদৎ অভৈৎসীৎ। ইতি দুর্গাদাসঃ ॥

ভিদকং ক্লী বজ্রং ॥ খড়্গে পুং। ইত্যুণাদিকোষঃ ॥

ভিদা স্ত্রী বস্ত্রাদের্বিদারণং। চেরা ইতি ভাষা। তৎপর্য্যায়ঃ। বিদরঃ ২ স্ফুটনং ৩। ইত্যমরঃ ॥ ধন্যাকং। ইতি শব্দচন্দ্রিকা ॥ ভেদঃ। যথা। প্রায়শ্চিত্তস্য পূর্ব্বাহ্ন কৃত্যং বাল্যভিদা তথা। ইতি প্রায়শ্চিত্ততত্ত্বং ॥

ভিদিঃ পুং বজ্রং। ইতি দ্বিরূপ কোষঃ॥

ভিদিরং ক্লী বজ্রং। ইত্যমরটীকায়াং ভরতঃ ত্রিকাণ্ডশেষশ্চ॥

ভিদুঃ পুং বজ্রং। ইতি ত্রিকাণ্ডশেষঃ॥

ভিদুরং ক্লী বজ্রং। ইত্যমরঃ॥ প্লক্ষ বৃক্ষে পুং। ইতি রাজনির্ঘণ্টঃ॥

ভিদ্যঃ পুং নদঃ। ইতি হেমচন্দ্রঃ মুগ্ধবোধ ব্যাকরণঞ্চ॥

ভিদ্রঃ পুং ক্লী বজ্রং। ইতি ত্রিকাণ্ডশেষঃ উণাদিকোষশ্চ॥

ভিন্দিপালঃ পুং হস্তপ্রমাণকাণ্ডঃ। নালিকাস্ত্র মিতি খ্যাতং। ইতি ভরতঃ॥ হস্তক্ষেপ্যলগুড়ঃ। ইতি স্বামী॥ তৎপর্য্যায়ঃ। সৃগঃ ২। ইত্যমরঃ॥

ভিন্নঃ ত্রি ভেদবিশিষ্টঃ। ভাঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। দারিতঃ ২ ভেদিতঃ ৩। ইত্যমরঃ॥ বিদারিতঃ ৪। ইতি শব্দরত্নাবলী॥ সঙ্গতঃ॥ অন্যঃ॥ ফুল্লঃ। ইতি মেদিনী॥ ক্ষতরোগবিশেষঃ। তল্লক্ষণং যথা। শক্তি কুন্তেষু খড়্গাগ্র বিষাণৈরাশয়ো হতঃ। যৎ কিঞ্চিৎ প্রস্রবেত্তদ্ধি ভিন্ন মিত্যভিধীয়তে॥ আশয়ঃ কোষ্ঠঃ॥ তস্যৌষধং যথা। ছিন্নে ভিন্নে তথা বিদ্ধে ক্ষতে বাসৃগতি স্রবেৎ। রক্তক্ষয়াত্তত্র রুজঃ করোতি পবনো ভৃশং॥ স্নেহপান প্রতীয়েক লেপাং স্তত্রোপনাহনং। স্ত্রবীত স্নেহ বস্তিঞ্চ মারুতঘ্নৌষধৈ ভিষক্॥ খড়্গাদি ছিন্ন গাত্রস্য তৎকালং পূরিতো ব্রণঃ। গাঙ্গেরুকী মূলরসৈঃ সদ্যঃ স্যাদ্গত বেদনঃ॥ কষায মধুরাঃ শীতাঃ ক্রিয়াঃ সর্ব্বাঃ প্রযোজয়েৎ। সদ্যোব্রণানাং সপ্তাহাৎ পশ্চাৎ পূর্ব্বোক্ত মাচরেৎ॥ আমাশয়স্থে রুধিরে বিদধ্যাদ্বমনং নরঃ। তস্মিন্ পক্বাশয়স্থে তু গৃহ্নীয়াৎ সবিরেচনং॥ ক্বাথো বংশাত্বগেরণ্ড শ্বদংষ্ট্রাশ্মভিদা কৃতঃ। হিঙ্গু সৈন্ধব সংযুক্তঃ কোষ্ঠস্থং স্রাবযেদসৃক্॥ যব কোল কুলত্থানাং নিঃস্নেহেন রসেন চ। ভুঞ্জীতান্নং যবাগূং বা পিবেৎ সৈন্ধব সংযুতাং॥ জাতী নিম্ব পটোল পত্র কটুকা দার্ব্বী নিশা শারিবা মঞ্জিষ্ঠাভয তিক্ত তুত্থ মধুকৈ র্নক্তাহ্ব বীজৈঃ সমৈঃ। সর্পিঃ সিদ্ধমনেন সূক্ষ্ম বদনা মর্ম্মাশ্রিতাঃ স্রাবিণো গম্ভীরাঃ সরুজো ব্রণাঃ সগতিকাঃ শুদ্ধ্যন্তি রোহন্তি চ॥ বৃদ্ধৈর্দ্যোপদেশে ন পারম্পর্য্যোপদেশতঃ। জাতী-ঘৃতে তু সংসিদ্ধে দেয়ং সিক্থকং বুধৈঃ॥ জাত্যাদিঘৃতং।

ইতি ভাবপ্রকাশঃ ॥

ভিন্নকঃ পুং বৌদ্ধঃ। যথা। ভিন্নকঃ ক্ষপণো ভ্রীকৌ বৌদ্ধো বৈনাযিকঃ স্মৃতঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

ভিন্নগাত্রিকা স্ত্রী কর্কটী। ইতি শব্দচন্দ্রিকা ॥

ভিন্নভিন্নাত্মা পুং চণকঃ। ইতি শব্দচন্দ্রিকা ॥

ভিন্নযোজনী স্ত্রী পাষাণভেদকবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥

ভিন্নার্থকঃ ত্রি অন্যঃ। ইত্যমরঃ ॥

ভিযা স্ত্রী ভযং। ইতি হেমচন্দ্রঃ ॥

ভিরিণ্টিকা স্ত্রী শ্বেতগুঞ্জা। ইতি রাজনির্ঘণ্টঃ ॥

ভিল্লঃ পুং ম্লেচ্ছজাতিবিশেষঃ। ভীল ইতি ভাষা। যথা। মালা ভিল্লাঃ কিরাতাশ্চ সর্ব্বেপি ম্লেচ্ছ জাতযঃ। ইতি হেমচন্দ্রঃ ॥ অপিচ। রজক শ্চর্ম্মকারশ্চ নটো বরুড এব চ। কৈবর্ত্ত মেদ ভিল্লাশ্চ সপ্তৈতে অন্ত্যজাঃ স্মৃতাঃ। ইতি প্রাযশ্চিত্তত্ত্বং ॥ স চ ব্রাহ্মণ কন্যাযাং তীবর্য্যাজ্জাতঃ। যথা। পুলিন্দ মেদ ভিল্লাশ্চ পুল্লো মল্লশ্চ ধাবকঃ। জন্দকারো ডোখলো বা মৃতপো হড্ডিপ স্তথা ॥ এতে বৈ তীবরাজ্জাতাঃ কন্যাযাং ব্রাহ্মণস্য চ ॥

ইতি পরাশরপদ্ধতিঃ ॥

ভিল্লগবী স্ত্রী গবযী। ইতি রাজনির্ঘণ্টঃ ॥

ভিল্লতরুঃ পুং লোধ্রঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভিল্লী স্ত্রী লোধ্রঃ। ইতিরাজনির্ঘণ্টঃ ॥

ভিষ রুগ্জযে। সৌত্রধাতুরযং। ইতি কবিকল্পদ্রুমঃ ॥ ভিষক্ ভেষজং। ইতি দুর্গাদাসঃ ॥

ভিষক্ পুং বৈদ্যঃ। ইত্যমরঃ ॥ দণ্ডনীযভিষগ্যথা। অজ্ঞাতৌষধিমন্ত্রস্তু যশ্চ ব্যাধে রতত্ত্ববিৎ। রোগিভ্যো হর্থং সমাদত্তে স দণ্ড্য শ্চৌরবদ্ভিষক্ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ তস্যান্নস্যাভোজ্যত্বং যথা। শূদ্রান্নং ব্রাহ্মণো ভুক্ত্বা তথা রঙ্গাবতারিণঃ। চিকিৎসকস্য ক্রূরস্য তথা স্ত্রী মৃগজীবিনাং ॥ শৌণ্ডিকান্নং সূতিকান্নং ভুক্ত্বা মাসং ব্রতী ভবেৎ। ব্রতী যাবকেন। তত্র ধেনুদ্বযং। ইতি প্রাযশ্চিত্ত বিবেকঃ ॥ অপিচ। পূযং চিকিৎসকস্যান্নং পুংশ্চল্যাস্তন্ন মিন্দ্রিযং। বিষ্ঠা বার্দ্ধুষিকস্যান্নং শস্ত্রবিক্রযিণো মলং ॥ ইতি মানবে ৪ অধ্যাযঃ ॥

ভিষক্প্রিযা স্ত্রী গুডূচী। ইতি রাজনির্ঘণ্টঃ ॥

ভিষগ্জিতং ক্লী ঔষধং। ইতি ত্রিকাণ্ডশেষঃ ॥

ভিষগ্ভদ্রা স্ত্রী ভদ্রদন্তিকা। ইতি রাজনির্ঘণ্টঃ ॥

ভিষঙ্মাতা স্ত্রী বাসকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভিস্সটা স্ত্রী দগ্ধান্নং। ইত্যমরঃ ॥ অস্য রূপান্তরং। ভিস্সিটা। ভিস্মটা। ভিস্মিটা। ভিস্মিকা। ইতি তট্টীকা সারসুন্দরী ॥

ভিস্সা স্ত্রী অন্নং। ইত্যমরঃ ॥

ভিস্সিটা স্ত্রী দগ্ধান্নং। ইত্যমর টীকা সারসুন্দরী ॥

ভিক্ষ ঙ লাভার্থলোভোক্তিক্লিশি। ইতি কবিকল্পদ্রুমঃ ॥ অর্থো যাচনং। লোভাদুক্তির্লোভোক্তিঃ। ঙ ভিক্ষতে ভূমিং নৃপাৎ পণ্ডিতঃ। লভত ইত্যর্থঃ। ভিক্ষতে দাতারং ধনং ভিক্ষুঃ। যাচত ইত্যর্থঃ। ভিক্ষতে দাতারং দীনঃ লোভাদ্বদতীত্যর্থঃ। ভিক্ষতে জনঃ ক্লিশ্যতীত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

ভিক্ষা স্ত্রী লাভযাচনং। চাওয়া ইতি মাগা ইতি চ ভাষা। তৎপর্য্যায়ঃ। যাচ্ঞা ২ অর্থনা ৩ অর্দ্দনা ৪। ইত্যমরঃ ॥ প্রার্থনং ৫ যাচনা ৬। ইতি শব্দরত্নাবলী ॥ সেবা ॥ ভৃতিঃ। ইতি নানার্থে অমরঃ ॥ ভিক্ষিতবস্তু। ইতি মেদিনী ॥ * ॥ উপনীতস্য ভিক্ষাবিধির্যথা। ভিক্ষামাহৃত্য শিষ্টানাং গৃহেভ্যঃ প্রযতোঽন্বহং। নিবেদ্য গুরবেঽশ্নীয়াদ্বাগ্যতস্তদনুজ্ঞয়া ॥ ভবৎপূর্ব্বঞ্চরেদ্ভৈক্ষমুপবীতো দ্বিজোত্তমঃ। ভবন্মধ্যন্তু রাজন্যো বৈশ্যস্তু ভবদুত্তরং ॥ মাতরং বা স্বসারং বা মাতুর্ব্বা ভগিনীং নিজাং। ভিক্ষেত ভিক্ষাং প্রথমং যাচৈনং নাবমানয়েৎ ॥ সজাতীয়গৃহেষ্বেব সার্ব্ববর্ণিকমেব বা। ভৈক্ষস্যাচরণং প্রোক্তং পতিতাদিবিবর্জ্জিতং। বেদযজ্ঞৈরহীনানাং প্রশস্তানাং স্বকর্ম্মসু। ব্রহ্মচার্য্যাহরেদ্ভৈক্ষং গৃহেভ্যঃ প্রযতোঽন্বহং ॥ গুরোঃ কুলে ন ভিক্ষেত ন জ্ঞাতিকুলবন্ধুষু। অলাভে ত্বন্যগেহানাং পূর্ব্বং পূর্ব্বং বিবর্জ্জয়েৎ ॥ সর্ব্বং বাপি চরেদ্গ্রামং পূর্ব্বোক্তানামসম্ভবে। নিয়ম্য প্রযতো বাচং দিশস্ত্বনবলোকয়ন্ ॥ সমাহৃত্য তু তদ্ভৈক্ষং যাবদর্থমমায়য়া। ভুঞ্জীত প্রযতো নিত্যং বাগ্যতোঽনন্যমানসঃ ॥ ভৈক্ষেণ বর্ত্তয়েন্নিত্যং নৈকান্নাদী ভবেদ্ব্রতী। ভৈক্ষেণ ব্রতিনো বৃত্তিরুপবাসসমা স্মৃতা ॥ ইতি কূর্ম্মপুরাণে উপরিভাগে ১২

অধ্যায়ঃ ॥ * ॥ সায়ং প্রাত র্ভিক্ষাটনাভাবো যথা। কারয়িত্বা তু কর্ম্মাণি কাঙ্ক্ষন্‌পশ্চাদ্বঞ্চয়েৎ। সায়ং প্রাত গৃহ দ্বারান্ ভিক্ষার্থং নাবঘট্টয়েৎ ॥ ইতি তত্রৈব ১৫ অধ্যায়ঃ ॥ * ॥ সা ত্রিবিধা যথা। হন্তকার মথাগ্রং বা ভিক্ষাং বা শক্তিতো দ্বিজঃ। দদ্যাদতিথয়ে নিত্যং বুদ্ধ্যেত পরমেশ্বরং ॥ ভিক্ষা মাহু গ্রাস মাত্র মগ্রন্তস্মাচ্চতুর্গুণং। পুষ্কলং হন্তকারান্তং তচ্চতুর্গুণ মচ্যতে ॥ গোদোহ মাত্রং কালং বৈ প্রতীক্ষে দতিথিঃ স্বয়ং। অভ্যাগতান্ যথা শক্তি পূজয়েদতিথিং যথা ॥ ভিক্ষাং বৈ ভিক্ষবে দদ্যাদ্বিধিবদ্ব্রহ্ম চারিণে। দদ্যাদন্নং যথা শক্তি ত্বর্থিভ্যো লোভ বর্জিতঃ॥ সর্বেষা মপ্যলাভে তু অন্নং গোভ্যো নিবেদয়েৎ। ইতি তত্রৈব ১৭ অধ্যায়ঃ ॥

ভিক্ষাকঃ পুং ভিক্ষুকঃ। ইতি সিদ্ধান্তকৌমুদী ॥

ভিক্ষাকী স্ত্রী ভিক্ষুকী। ইতি মুগ্ধবোধব্যাকরণং ॥

ভিক্ষাচরঃ পুং স্ত্রী ভিক্ষুকঃ। ইতি সিদ্ধান্তকৌমুদী ॥

ভিক্ষাটনং ক্লী ভিক্ষার্থগমনং। যথা। অর্দ্ধং দানববৈরিণা গিরিজয়াপ্যর্দ্ধং হরস্যাহৃতং দেবেত্থং জগতীতলে স্মরহরাভাবঃ সমুন্মীলতি। গঙ্গা বারিধি মম্বরং শশিকলা নাগাধিপঃ স্মাতলং সর্বজ্ঞত্ব মধীশ্বরত্ব মগমৎ ত্বাং মাঞ্চ ভিক্ষাটনং ॥ ইত্যুদ্ভটঃ ॥

ভিক্ষাশিত্বং ক্লী পৈশুন্যং। ইতি হারাবলী ॥

ভিক্ষাশী ত্রি ভিক্ষুকঃ। ইত্যাদিকোষঃ ॥ যথা। ভিক্ষাশী বিচরেদ্ গ্রামং বন্যৈর্যদি ন জীবতি। ইতি প্রায়শ্চিত্তবিবেকঃ ॥

ভিক্ষুঃ পুং ব্রহ্মচার্য্যাদ্যাশ্রম চতুষ্টয়ান্তর্গত চতুর্থাশ্রমী। আশ্রম শব্দো হয়ং ধর্ম্মিপরো ধর্ম্মপরশ্চ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। পরিব্রাট্ ২ কর্ম্মন্দী ৩ পারাশরী ৪ মস্করী ৫। ইত্যমরঃ ॥ পরিব্রাজকঃ ৬ পরাশরী ৭ ব্রজকঃ ৮। ইতি শব্দরত্নাবলী ॥ তস্য ধর্ম্মো যথা। ভিক্ষো ধর্ম্মং প্রবক্ষ্যামি তন্নিবোধত সত্তমাঃ। বনাদ্গৃহাদ্বা কৃত্বেষ্টিং সর্ব্ববেদ সদক্ষিণাং ॥ প্রাজাপত্যাং তদন্তে তু অগ্নিনারোপ্য চাত্মনি। সর্ব্বভূতহিতঃ শান্ত ত্রিদণ্ডী সকমণ্ডলুঃ ॥ সর্ব্বারামং পরিব্রজ্য ভিক্ষার্থী

গ্রাম নাশ্রয়েৎ। অপ্রমত্ত শ্চরেদ্ভৈ ক্ষ্যং সায়াহ্নে নাতি লক্ষিতঃ॥ রহিতে ভিক্ষুকৈ গ্রামে যাত্রা মাত্র মলোলুপঃ। ভবেৎ পরমহংসো বা একদণ্ডী যমাদি কৃৎ॥ সিদ্ধযোগ স্ত্যজন্ দেহ মমৃতত্ত্ব মিহাপ্নু যাৎ। যোগ মভ্যস্য মিতভুক্ পরাং সিদ্ধি মবাপ্নু যাৎ॥ দাতাতিথিপ্রিয়ো জ্ঞানী গৃহী শ্রাদ্ধে ঽপি মুচ্যতে। ইতি গারুড়ে ১০৩ অধ্যায়ঃ॥ *॥ অপিচ। চতুর্থ শ্চাশ্রমো ভিক্ষোঃ প্রোচ্যতে যো মনীষিভিঃ। তস্য স্বরূপং গদতো মমশ্রোতুং নৃপার্হসি॥ পুত্র দ্রব্য কলত্রেষু ত্যক্ত স্নেহো নরাধিপ। চতুর্থ মাশ্রম স্থানং গচ্ছেন্নি ধূর্ত মৎসরঃ॥ ত্রৈবর্ণিকাং স্ত্যজেৎ সর্ব্বা নারম্ভানবনীপতে। মিত্রাদিষু সমো মৈত্রঃ সমস্তেষ্বেব জন্তুষ॥ জরায়ুজাণ্ডজাদীনাং বাঙ্মনঃ কর্ম্মভিঃ ক্বচিৎ। যুক্তঃ ক্কর্ব্বীত নদ্রোহং সর্ব্ব সঙ্গাংশ্চ বর্জ্জয়েৎ॥ একরাত্র স্থিতি গ্রামে পঞ্চরাত্র স্থিতিঃ পুরে। তথা তিষ্ঠেদ্যথা প্রীতি র্দ্বেষো বা নাস্য জায়তে॥ প্রাণ যাত্রা নিমিত্তঞ্চ ব্যঙ্গারে ভুক্তবজ্জনে। কালে প্রশস্ত বর্ণানাং ভিক্ষার্থে পর্য্যটেদ্গৃহান্॥ কামঃক্রোধস্তথা দর্পমোহ লোভাদয়শ্চ যে। তাংস্তু দোষান পরিত্যজ্য পরিব্রাণ্নির্মমো ভবেৎ॥ অভয়ং সর্ব্ব সত্ত্বেভ্যো দত্ত্বা যশ্চরতে মুনিঃ। ন তস্য সর্ব্ব ভূতেভ্যো ভয মুৎপদ্যতে ক্বচিৎ॥ কৃত্বাগ্নিহোত্রং স্বশরীর সংস্থং শারীর মগ্নিঞ্চ মুখে জুহোতি। বিপ্রস্তু ভৈক্ষোপগতৈ র্হবির্ভি শ্চিতাগ্নিনা স ব্রজতিস্ম লোকান্॥ মোক্ষাশ্রমং য শ্চরতে যথোক্তং শুচিঃ সুসঙ্কল্পিত বুদ্ধি যুক্তিঃ। অনিন্ধনংজ্যোতি রিব প্রশান্তং স ব্রহ্মলোকং শ্রযতি দ্বিজাতিঃ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে ৯ অধ্যাযঃ॥ *॥ সন্ন্যাসভেদঃ। ইতি জটাধরঃ॥ শ্রাদ্ধী ক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥ কোকিলাক্ষঃ। ইতি ভাবপ্রকাশঃ॥

ভিক্ষুকঃ পুং স্ত্রী ভিক্ষোপজীবী। তৎপর্য্যাযঃ। মার্গণঃ২ যাচনকঃ৩ বনীযকঃ ৪ যাচকঃ ৫। ইতি জটাধরঃ॥ অর্থী ৬। ইত্যমরঃ॥

ভিক্ষুসংঘাটী স্ত্রী চীবরং। ইতি হেমচন্দ্রঃ॥

ভী ঞি লি ভীত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ঞি ভীতো ঽস্তি। লিবিভেতি। ইতি দুর্গাদাসঃ॥

ভী গ গি ভৃত্যাঞ্চ। ইতি কবিকল্প-

ক্রমঃ॥ গ ভীমাতি। গি ভিমাতি। ভীমঃ ভীমিঃ। গিনৈব ক্র্যাদিত্ব সিদ্ধৌ সম্প্রত্যয় প্বাদিত্ব বিকল্পার্থং চকারাৎ ভীত্যাঞ্চ। ইতি দুর্গাদাসঃ॥

ভীঃ স্ত্রী ভয়ং। ইত্যমরঃ॥

ভীতং ক্লী ভয়ং॥ ভয়যুক্তে ত্রি॥ ইতি মেদিনী॥

ভীতিঃ স্ত্রী ভয়ং। ইত্যমরঃ॥ কম্প। ইতি বিশ্বঃ॥

ভীমং ত্রি ভয়হেতুঃ। তৎপর্য্যায়ঃ। ভৈরবং ২ দারুণং ৩ ভীষণং ৪ ভীষ্মং ৫ ঘোরং ৬ ভয়ানকং ৭ ভয়ঙ্করং ৮ প্রতিভয়ং ৯। ইত্যমরঃ॥

ভীমঃ পুং ভয়ানকরসঃ। যথা। ভয়ানকো ভবস্থায়িভাবঃ কালাধিদৈবতঃ। স্ত্রী নীচ প্রকৃতিঃ কৃষ্ণো মত স্তত্ত্ব বিশারদৈঃ॥ ইত্যমরটীকায়াং ভরতঃ॥ শিবঃ॥ মধ্যমপাণ্ডবঃ॥ অম্লবেতসঃ। ইতি মেদিনী॥ মহাদেবস্যাষ্টমূর্ত্ত্যন্তর্গতাকাশমূর্ত্তিঃ। যথা। ভীমায় আকাশ মূর্ত্তয়ে নমঃ। ইতি তিথ্যাদিতত্ত্বে শিবপূজাপ্রয়োগঃ॥

ভীমনাদঃ পুং সিংহঃ। ইতি শব্দচন্দ্রিকা॥

ভীমরথঃ পুং তামসমনুবংশজাতা সুরবিশেষঃ। স চ কূর্ম্মরূপিণা হরিণা হতঃ। যথা। হরিণা কূর্ম্মরূপেণ হতো ভীমরথো ঽসুরঃ॥ ইতি গারুড়ে গয়ামাহাত্ম্যে ৮৬ অধ্যায়ঃ॥

ভীমরথী স্ত্রী জনানামবস্থাবিশেষঃ। যথা। সপ্ত সপ্ততিকে বর্ষে সপ্তমে মাসি সপ্তমী। রাত্রি ভীমরথী নাম নরাণাং দুরতিক্রমা॥ ইতি শব্দমালা॥ অপিচ। সপ্ত সপ্ততি বর্ষাণাং সপ্তমে মাসি সপ্তমী। রাত্রি ভীমরথী নাম নরাণা মতি দুস্তরা॥ তা মতীত্য নরো যো হসৌ দিনানি যানি জীবতি। ক্রতুভিস্তানি তুল্যানি সুবর্ণ শত দক্ষিণৈঃ॥ গতিঃ প্রদক্ষিণং বিষ্ণো র্জল্পনং মন্ত্র ভাষণং। ধ্যানং নিদ্রা সুধা চাম্নং ভীমরথ্যাঃ ফল শ্রুতিঃ॥ ইতি বৈদ্যকং॥ *॥ নদীভেদঃ। যথা। মলাপহা ভীমরথী চ ঘণ্টগা পথ্যা চ কৃষ্ণা জল সাম্যগা গুণৈঃ। ইতি রাজনির্ঘণ্টঃ॥

ভীমবিক্রান্তঃ পুং সিংহঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ভয়ানকবিক্রমবিশিষ্টে ত্রি॥

ভীমশাসনঃ পুং যমঃ। ইতি শব্দরত্নাবলী॥

ভীমসেনঃ পুং মধ্যমপাণ্ডবঃ। স তু কুন্তীগর্ব্ভে পবনাজ্জাতঃ। তৎপর্য্যায়ঃ। ভীমঃ২ বীরবেণুঃ৩ বৃকোদরঃ ৪ বকজিৎ ৫ কীচকজিৎ ৬ কিম্মীরজিৎ ৭ জরাসন্ধজিৎ ৮ হিড়িম্বজিৎ ৯ কটব্রণঃ ১০ নাগবলঃ ১১ গুণাকরঃ ১২। ইতি শব্দরত্নাবলী ॥ তস্য জন্ম বিবরণং যথা। ধার্ম্মিকন্তং সুতং লব্ধা পাণ্ডু স্তাং পুনরব্রবীৎ। প্রাহুঃ ক্ষাত্রং বলং জ্যেষ্ঠং বলজ্যেষ্ঠং সুতং বৃণু ॥ ততস্তথোক্তা ভর্ত্রা তু বায়ুমেবাজুহাব সা। তস্মাজ্জজ্ঞে মহাবাহু ভীমো ভীম পরাক্রমঃ ॥ তমপ্যতি বলং জাতং বাগুবাচাশরীরিণী। সর্ব্বেষাং বলিনাং শ্রেষ্ঠো জাতোহয় মিতি ভারত ॥ ইদমত্যদ্ভুত ঞ্চাসী জ্জাতমাত্রে বৃকোদরে। যদঙ্কাৎ পতিতো মাতুঃ শিলাংগাত্রে রচূর্ণয়ৎ ॥ কুন্তী ব্যাঘ্র ভয়োদ্বিগ্না সহসোৎপতিতা কিল। নান্ববুধ্যত তং সুপ্তমুৎসঙ্গে স্বে বৃকোদরং ॥ বজ্রসংহননঃ সোহথ কুমারো ন্যপতদ্গিরৌ। পততা তেন শতধা শিলা গাত্রে বিচূর্ণিতা ॥ ইতি মহাভারতে আদিপর্ব্বণি পাণ্ডবোৎপত্তিনামাধ্যায়ঃ ॥ * ॥ কর্পূরভেদঃ। যথা। পোতাসো ভীমসেন স্তদনুশিতকরঃ শঙ্করাবাস সংজ্ঞঃ পাংশুঃ পিণ্ডোহবুসারস্তদনু হিমযুতা বালুকা জূটিকা চ। পশ্চাদস্যা স্তুষার স্তুপরি সহিমঃ শীতলঃ পত্রিকাখ্যা কর্পূরস্যেতি ভেদা গুণ রস মহসা বৈসদৃশ্যেন দৃশ্যাঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

ভীমহাসং ক্লী ইন্দুতুলং। বুড়িরসুতা ইতি ভাষা। ইতি শব্দরত্নাবলী ॥ গ্রীষ্মহাসমপি পাঠঃ ॥

ভীমা স্ত্রী দুর্গা। ইতি শব্দরত্নাবলী ॥ রোচনাখ্য গন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥ কশা। ইতিশব্দমালা ॥

ভীমাদেবী স্ত্রী দুর্গা। যথা। পুনশ্চাহং যদা ভীমং রূপং কৃত্বা হিমাচলে। রক্ষাংসি ক্ষযিষ্যামি মুনীনাং ত্রাণ কারণাৎ ॥ তদা মাং মুনযঃ সর্ব্বে স্তোষ্যন্ত্যা নম্রমূর্ত্তযঃ। ভীমাদেবীতি বিখ্যাতং তন্মে নাম ভবিষ্যতি ॥ ইতি মার্কণ্ডেয় পুরাণে দেবীমাহাত্ম্যং ॥

ভীমৈকাদশী স্ত্রী ভৈমী। সা চ মাঘ শুক্লৈকাদশী। ভীমদ্বাদশীত্বেনখ্যাতা চ। যথা। মৎস্য উবাচ। পুরা রথন্তরে কল্পে পার্থ পৃষ্টো মহাত্মনা। মন্দরস্থো মহাদেবঃ পিণাকী ব্রহ্মণা

স্বযং ॥ ব্রহ্মোবাচ। কথ মারোগ্য নৈর্গর্ম্য মুনন্ত মমরেশ্বর। স্বল্পেন তপসা দেব ভবেন্মোক্ষো ঽথ বা নৃণাং ॥ কিমজ্ঞাতং মযা দেব ত্বৎ প্রসাদাদধোক্ষজ। স্বল্পকেনাপি তপসা মহৎ ফল মিহোচ্যতে ॥ মৎস্য উবাচ। ইতি পৃষ্টঃ স বিশ্বাত্মা ব্রহ্মণা লোক ভাবনঃ। উমাপতি রুবাচেদং মনসঃ প্রীতিকারকং ॥ ঈশ্বর উবাচ। অস্মাদ্রথন্তরাৎ কল্পাৎ ত্রযোবিংশতিমো যদা। বারাহো ভবিতা কল্প স্তস্য মন্বন্তরে শুভে ॥ বৈবস্বতাখ্যে সংজাতে সপ্তমে সপ্তলোক ধৃক্। দ্বাপরাখ্যং যুগং তস্মিন্ সপ্তবিংশতিমে তদা ॥ তস্যান্তে স মহানীলো বাসুদেবো জনার্দ্দনঃ। ভারাবতরণার্থায ত্রিধা বিষ্ণু র্ভবিষ্যতি ॥ দ্বৈপাযনো মুনি স্তদ্বদ্রৌহিণেযো ঽথ কেশবঃ। কংসাদি দর্প মথনঃ কেশবঃ শোক নাশনঃ ॥ পুরী দ্বারবতী নাম সাম্প্রতং যা কুশস্থলী। দিব্যানুভাব সংযুক্তা মধিবাসায শার্ঙ্গিণঃ ॥ ত্বষ্টা মমাজ্ঞযা ব্রহ্মন্ করিষ্যতি জগৎ পতেঃ। তস্যাং কদাচিদাসীনঃ সভাযামমিতদ্যুতিঃ ॥ ভার্য্যাভি র্বৃষ্ণিভিঃ সার্দ্ধং ভূভৃদ্ভি র্ভূরি দক্ষিণৈঃ। কুরুভি র্দেবগন্ধর্বৈ রভিতঃ



কৈটভার্দ্দনঃ ॥ প্রবৃত্তাসু পুরাণীষু ধর্ম্ম সম্বন্ধিনীষু চ। কথাস ভীমসেনেন পরিপৃষ্টঃ প্রতাপবান্ ॥ ত্বযা পৃষ্টস্য ধর্ম্মস্য রহস্যস্যাস্য ভেদকৃৎ। ভবিতা স তদা ব্রহ্মন্ কর্ত্তা চৈব বৃকোদরঃ ॥ প্রবর্ত্তকো ঽস্য ধর্ম্মস্য পাণ্ডুসূনু র্মহাবলঃ। যস্য তীক্ষ্ণো বৃকো নাম জঠরে হব্যবাহনঃ ॥ মযা দত্তঃ স ধর্ম্মাত্মা তেন চাসৌ বৃকোদরঃ। অতীবাগ্নাদশীলশ্চ নাগাযুত বলো মহান্ ॥ ভবিষ্যত্যজরঃ সাক্ষাৎ কন্দর্প ইব বদ্ধিমান্। ধার্ম্মিকস্যাপ্যশক্তস্য তীব্রাগ্নিত্বাদুপোষণে ॥ ইদং ব্রত মশেষাণাং ব্রতানা মধিকং যতঃ। কথযিষ্যতি বিশ্বাত্মা বাসুদেবো জগদ্গুরুঃ ॥ অশেষ যজ্ঞ ফলদ মশেষাঘ বিনাশনং। অশেষ দুষ্ট শমন মশেষ সুর পূজনং ॥ পবিত্রাণাং পবিত্রঞ্চ মঙ্গলানাঞ্চ মঙ্গলং। ভবিষ্যঞ্চ ভবিষ্যাণাং পুরাণানাং পুরাতনং ॥ বাসুদেব উবাচ। যদ্যষ্টমী চতুর্দ্দশ্যাং দ্বাদশীষ্বথ ভারত। অন্যেষ্বপি দিনর্ক্ষেষু ন শক্ত স্তমুপোষিতুং ॥ ততঃ পুণ্যা মিমাং ভীমতিথিং পাপ প্রণাশিনীং। উপোষ্য বিধিনানেন গচ্ছেদ্বিষ্ণোঃ পরং পদং ॥ মাঘমাসস্য দশমী যদা

শুক্লা ভবেত্তদা। ঘৃতেনাভ্যঞ্জনং কৃত্বা তিলৈঃ স্নানং সমাচরেৎ ॥ তথৈব বিষ্ণুমভ্যর্চ্চ্য নমো নারায়ণায় চ। কৃষ্ণায় পাদৌ সংপূজ্য শিরঃ সর্ব্বাত্মনেতি চ ॥ বৈকুণ্ঠায়েতি বৈকণ্ঠ মুরঃ শ্রীবৎসধারিণে। শঙ্খিনে চক্রিণে তদ্বদ্গদিনে বরদায় বৈ ॥ সর্ব্বে নারায়ণস্যৈবং সংপূজ্যা বাহবঃ ক্রমাৎ। দামোদরায়েত্যুদরং মেঢ্রং পঞ্চশরায় বৈ ॥ ঊরূ সৌভাগ্যনাথায় জানুনী ভূতধারিণে। নমো নীলায় বৈ জঙ্ঘে পাদৌ বিশ্বসৃজে পুনঃ ॥ নমো দেব্যৈ নমঃ শান্ত্যৈ নমো লক্ষ্ম্যৈ নমঃ শ্রিয়ৈ। নমঃ পুষ্ট্যৈ নম স্তুষ্ট্যৈ বৃষ্ট্যৈ হৃষ্ট্যৈ তথা শ্রিয়ৈ ॥ নমো বিহঙ্গনাথায় বায়ুবেগায় পক্ষিণে। বিষ প্রমাথিনে নিত্যং গরুড়ঞ্চাভিপূজয়েৎ ॥ এবং সংপূজ্য গোবিন্দ মুমাপতি বিনায়কৌ। গন্ধৈ র্মাল্যৈ স্তথা ধূপৈ র্ভক্ষৈ র্নানা বিধৈ স্তথা ॥ গব্যেন পয়সা সিদ্ধাং কৃশরা মথ বাগ্যতঃ। সর্পিষা সহ ভুক্ত্বা চ গত্বা শতপদং বুধঃ ॥ ন্যগ্রোধদন্তধবন মথ বা খাদিরং বুধঃ। গৃহীত্বা ধাবয়েদ্দন্তা নাচান্তঃ প্রাগুদঙ্মুখঃ ॥ ব্রূয়াৎ সায়ন্তনীং কৃত্বা সন্ধ্যা মস্ত মিতে রবৌ। নমো নারায়ণায়েতি ত্বামহং শরণং গতঃ ॥ একাদশ্যাং নিরাহারঃ সমভ্যর্চ্চ্য চ কেশবং। রাত্রিঞ্চ সকলাং স্থিত্বা স্নানঞ্চ পয়সাপি চ ॥ সর্পিষা বিশ্বদহনং হুত্বা ব্রাহ্মণ পুঙ্গবৈঃ। সহৈব পুণ্ডরীকাক্ষ দ্বাদশ্যাং ক্ষীর ভোজনং ॥ করিষ্যামি যতাত্মাহং নির্ব্বিঘ্নেনাস্তু তচ্চ মে। এবমুক্ত্বা স্বপেদ্ভূমাবিতিহাস কথাং পুনঃ ॥ * ॥ শ্রুত্বা প্রভাতে সংজাতে নদীং গত্বা বিশাম্পতে। স্নানং কৃত্বা মৃদা তদ্বৎ পাষণ্ডানভিবর্জয়েৎ ॥ উপাস্য সন্ধ্যাং বিধিবৎ কৃত্বা চ পিতৃ তর্পণং। প্রণম্য চ হৃষীকেশ মমলঞ্চাপ্যনীশ্বরং ॥ গৃহস্য পুরতো ভক্ত্যা মণ্ডপং কারয়েদ্বুধঃ। দশ হস্ত মথাষ্টৌ বা করান্ অর্য্যাদ্বিশাম্পতে ॥ চতুর্হস্তাং শুভাং অর্য্যাদ্বেদী মরিনিসূদন। চতুর্হস্ত প্রমাণঞ্চ বিন্যসেত্তত্র তোরণং ॥ আরোপ্য কলসং তত্র দিক্পালান্ পূজয়েত্ততঃ। মাস মাত্রেণ সংপূর্ণ মধঃ কৃষ্ণাজিনে স্থিতঃ ॥ তস্য ধারাঞ্চ শিরসা ধারয়েৎ সকলাং নিশাং। ধারাভি র্ভূরিভি র্ভূরি ফলং বেদবিদো বিদুঃ ॥ যস্মাত্তস্মাৎ অরুশ্রেষ্ঠ ধারা ধার্য্যাঃ স্ব শক্তিতঃ। তথৈব বিষ্ণোঃ শিরসি ক্ষীরধারাঃ প্রপাতয়েৎ ॥ অরত্নি মাত্রং অণ্ডঞ্চ কৃত্বা তত্র ত্রি মেখলং।

যোনি বক্কুঞ্চ তং কৃত্বা ব্রাহ্মণে র্যব সর্পিষা ।। তিলাংশ্চ বিষ্ণু দৈবত্যৈ র্মন্ত্রৈ স্তেকাগ্নি বত্তদা । কৃত্বা চ বৈষ্ণবং সম্যক্ চরুং গোক্ষীর সংযুতং ।। নিষ্পাবার্দ্ধ প্রমাণাং বৈ ধারা মাজ্যস্য পাতয়েৎ । জলকুম্ভান্ মহাবীর স্থাপয়িত্বা ত্রয়োদশ ।। ভক্ষৈ র্নানা বিধৈ র্যুক্তান্ সিতবস্ত্রৈ রলঙ্কৃতান্ । যুতানৌডুম্বরৈঃ পাত্রৈঃ পঞ্চরত্ন সমন্বিতান্ ।। চতুর্ভি র্ব্রহ্মচৈ হোম স্তত্র কার্য্য উদঙ্মুখৈঃ । রুদ্রজাপ শ্চতুর্ভিশ্চ যজুর্ব্বেদ পরায়ণৈঃ ।। বৈষ্ণবানি চ সামানি চতুরঃ সামবেদিনঃ । অরিষ্ট বর্গ সহিতান্যভিতঃ পরিপাঠয়েৎ ।। এবং দ্বাদশ তান্ বিপ্রান্ বস্ত্র মাল্যানুলেপনৈঃ । পূজয়েদঙ্গুলীয়ৈশ্চ কটকৈ হেম সূত্রকৈঃ ।। বাসোভিঃ শয়নীয়ৈশ্চ বিত্তশাঠ্য বিবর্জিতঃ । এবং ক্ষপাতিবাহ্যা বৈ গীত মঙ্গল নিস্বনৈঃ ।। উপাধ্যায়স্য চ পুন র্দ্বিগুণং সর্ব্বমেব তু ।*।। ততঃ প্রভাতে বিমলে সমুত্থায় ত্রয়োদশ । গা বৈ দদ্যাৎ কুরুশ্রেষ্ঠ সৌবর্ণ মুখ সংযুতাঃ ।। পয়স্বিনীঃ শীলবতীঃ কাংস্য দোহন সংযুতাঃ । রৌপ্যখুরাঃ সবস্ত্রাশ্চ চন্দনেনাভিষেচিতাঃ ।। তাংস্তু ভোজ্যং ততো ভক্ত্যা ভক্ষ্য ভোজ্যেন তর্পিতান্ । কৃত্বাথ ব্রাহ্মণান্ সর্ব্বানন্নৈ র্নানা বিধৈ স্তথা ।। ভুক্ত্বা চাক্ষার লবণমাত্মনা চ বিসর্জয়েৎ । অনুগম্য পদান্যষ্টৌ পুত্র ভার্য্যা সমন্বিতঃ ।। প্রীয়তামত্র দেবেশঃ কেশবঃ ক্লেশনাশনঃ । শিবস্য হৃদয়ে বিষ্ণু র্বিষ্ণোশ্চ হৃদয়ে শিবঃ ।। যথান্তরং ন পশ্যামি তথা মে স্বস্তি চায়ুষঃ । এব মুচ্চার্য্য তান্ কুম্ভান্ গাশ্চৈব শয়নানি চ ।। বাসাংসি চৈব সর্ব্বেষাং গৃহাণি প্রাপয়েদ্বুধঃ । অভাবে বহুশয্যানামেকা মপি সু সংস্কৃতাং ।। শয্যাং দদ্যাদ্‌গুরৌ ভীম সর্ব্বোপস্কর সংযুতাং । ইতিহাস পুরাণানি বাচয়িত্বাতিবাহয়েৎ ।। তদ্দিনং নরশার্দূল য ইচ্ছেদ্বিপুলাং শ্রিয়ং । তস্মাত্ত্বং সত্ত্ব মালম্ব্য ভীমসেন বিমৎসরঃ ।। কুরু ব্রত মিদং সম্যক্ স্নেহাদ্দ্বাক্য মীরিতং । ত্বয়া কৃত মিদং বীর ত্বন্নামাখ্যং ভবিষ্যতি ।। সা ভীমদ্বাদশী হ্যেষা সর্ব্বপাপ-হরা শুভা । যাতু কল্যাণিনী নাম পুরা কল্পেষু পঠ্যতে ।। * ।। ত্বমাদি কর্ত্তা ভব সৌকরে ৎস্মিন্ কল্পে মহাবীর বর প্রধান। যস্যাঃ স্মরণ কীর্ত্তনমপ্যশেষং বিনষ্টপাপ স্ত্রিদশাধিপঃ স্যাৎ ।। দৃষ্ট্বা চ যা নপ্সরসা মপীশা

বেশ্যা কৃতা মন্য ভবান্তরেষু। আভীরকন্যেতি মতুমলেন সৈবোৰ্ব্বশী সম্প্রতি নাকপৃষ্ঠে॥ জাতাপি সা বৈশ্য মলোদ্ভবাপি পলোম কন্যা পুরুহূত পত্নী। তত্রাপি তস্যাঃ পরিচারিকেয়ং মম প্রিয়া সম্প্রতি সত্যভামা॥ স্নাতঃ পুরা মণ্ডল মেষ তদ্বত্তেজোময়ং দেব শরীর মাপ। অস্যাঞ্চ কল্যাণ তিথৌ বিবস্বান্ সহস্র ধারেণ সহস্র রশ্মিঃ॥ ইদমেব কৃতং মহেন্দ্র মুখ্যৈ র্বসুভিশ্চৈব পুরা সুরাদিভিশ্চ। ফল মত্র ন শক্যতে হভিবক্তুং যদি জিহ্বা যুত কোটয়ো মুখেস্যুঃ॥ কলিকল্মষ বিদারণী মনন্তা মিতি কথয়িষ্যতি যাদবেন্দ্র সুনঃ। অপিনরক গতান্ পিতৃন শেষানল মুদ্ধর্তু মিহৈব যঃ করোতি॥ য ইম মনঘং শৃণোতি চাভিভক্ত্যা পরিপঠতীহ পরোপকার হেতোঃ। তিথি মিহ সকলার্থভাগ্ভরেন্দ্র স্তব চরণেন স সাম্যতা মুপৈতি॥ কল্যাণিনী নাম পুরা বভূব যা দ্বাদশী মাঘদিনে হভিপূজ্যা। সা পাণ্ডুপুত্রেণ কৃতা ভবিষ্যত্যনন্ত পুণ্যানঘ ভীম পুর্ব্বা॥ ইতি মৎস্যপুরাণে ভবিষ্যদ্ভূতোদ্দেশে ভীমদ্বাদশীনাম ৬৫ অধ্যায়ঃ॥

ভীরুঃ ত্রি ভয়শীলঃ। তৎপর্য্যায়ঃ। ত্রস্নুঃ ২ ভীরুকঃ ৩ ভীলুকঃ ৪। ইত্যমরঃ॥ ভীলুঃ ৫। ইতি শব্দরত্নাবলী॥

ভীরুঃ স্ত্রী ভয়শীলাস্ত্রী। ভয়প্রকৃতিকা। ইত্যমরভরতৌ॥ শতাবরী। ইতি ধরণিঃ অমরশ্চ॥ কণ্টকারী। ইতি শব্দচন্দ্রিকা॥ শতপাদিকা। ইতি শব্দরত্নাবলী॥ অজা॥ ছায়া॥ স্ত্রী। ইতি রাজনির্ঘণ্টঃ॥

ভীরুঃ পুং শৃগালঃ। ইতি শব্দমালা॥ ব্যাঘ্রঃ। ইতি রাজনির্ঘণ্টঃ॥ ইক্ষুভেদঃ। ইতিরত্নমালা॥ অস্যগুণাঃ। শ্লেষ্মকারিত্বং। স্বাদুত্বং। অবিদাহিত্বং। গুরুত্বঞ্চ। ইতিরাজবল্লভঃ॥

ভীরুকং ক্লী বনং ইতিশব্দরত্নাবলী॥

ভীরুকঃ পুং পেচকঃ। ইতি শব্দরত্নাবলী॥ ইক্ষুভেদঃ। ভোররী ইতি হিন্দীভাষা। অস্য গুণাঃ। বাত পিত্ত প্রশমনো মধুরো রস পাকযোঃ। সুশীতো বৃংহণো বল্যঃ পৌণ্ডুকো ভীরুক স্তথা॥ ইতি ভাবপ্রকাশঃ॥

ভীরুকঃ ত্রি ভয়যুক্তঃ। ইত্যমরঃ॥ কাতরঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভীরুপত্রী স্ত্রী শতমূলী। ইত্যমরঃ॥

ভারুহংস্কঃ পুং মৃগঃ। ইতি জটাধরঃ॥

ভীরুঃ স্ত্রী ভয়শীলানারী। ইত্যমরটীকায়াং ভরতঃ॥

ভীরুভূষণা স্ত্রী গুঞ্জা। ইতি রাজনির্ঘণ্টঃ॥

ভীলুঃ ত্রি ভীরুঃ। ভয়শীলঃ। ইতি শব্দরত্নাবলী॥

ভীলুকঃ ত্রি ভীরুঃ। ইত্যমরঃ॥ ভল্লুকঃ। ইতি শব্দরত্নাবলী॥

ভীষণঃ পুং ভয়ানকরসঃ। ইত্যমর টীকায়াং ভরতঃ মেদিনী চ॥ জন্দুরুকঃ॥ কপোতঃ। হিন্তালঃ। ইতি রাজনির্ঘণ্টঃ॥ শিবঃ। ইতি শব্দরত্নাবলী॥ শল্লকী। ইতি মেদিনী॥

ভীষণঃ ত্রি গাঢ়ঃ॥ দারুণঃ। ইতি মেদিনী॥

ভীষ্মং ত্রি ভয়ানকং। ইত্যমরঃ॥

ভীষ্মঃ পুং ভয়ানকরসঃ। ইত্যমরটীকায়াং ভরতঃ॥ শিবঃ॥ রাক্ষসঃ। ইতি হেমচন্দ্রঃ॥ গাঙ্গেয়ঃ। স চ সান্তনু রাজচক্রবর্ত্তিনো গঙ্গা ভার্য্যায়াং জাতঃ। স পরমধর্ম্মাত্মা মহাবীরঃ। যেন পিতুর্দাসকন্যা বিবাহার্থং পিতৃরাজ্যং ত্যক্তং বঃ স্বস্য বিবাহং ত্যক্ত্বা ঊর্দ্ধরেতা জাতঃ। ইতি শ্রীভাগবতং॥ তস্যোৎপত্তি র্যথা। অথ তামষ্টমে জাতে পুত্রে প্রহসন্তী মিব। উবাচ রাজা দুঃখার্ত্তঃ পরীপ্সন্ সুত মাত্মনঃ॥ মাবধীঃ কাসি কস্যাসি কিঞ্চ হংসি সুতানিতি। পুত্রঘ্নি সু মহৎ পাপং সংপ্রাপ্তং তে সুগর্হিতে॥ স্ত্র্যুবাচ। পুত্রকাম ন তেহস্মি পুত্রং পত্রবতাং বর। জীর্ণস্তু মম বাসো হয়ং যথা স সময়ঃ কৃতঃ॥ অহং গঙ্গা জহ্নু সুতা মহর্ষিগণ সেবিতা। দেবকার্য্যার্থ সিদ্ধ্যর্থ মুষিতাহং ত্বয়া সহ॥ অষ্টৌ যে বসবো দেবা মহাভাগা মহৌজসঃ। বশিষ্ঠ শাপ দোষেণ মানুষত্ব মপাগতাঃ॥ তেষাং জনয়িতা নান্য স্তৃদ্‌তে ভুবি বিদ্যতে। মদ্বিধা মানুষী ধাত্রী লোকে নাস্তি কদাচন॥ তেষাঞ্চ জননী হেতো র্মানুষত্ব মুপাগতা। জনয়িত্বা বসূনষ্টৌ জিতা লোকাস্ত্বয়া ক্ষয়াঃ॥ দেবানাং সময়স্তেষ বসূনাং সংশ্রুতো ময়া। জাতং জাতং মোক্ষয়িষ্যে জন্মতো মানুষাদিতি॥ তত্তে শাপাদ্বি নির্মুক্তা আপবস্য মহাত্মনঃ। স্বস্তিতে হস্তু গমিষ্যামি পুত্রং পাহি মহাব্রতং॥ এষ পর্য্যায় বাসো মে বসূনাং সন্নিধৌ কৃতঃ। মৎ প্রসূতং বিজানীহি গঙ্গাদত্ত মিমং সুতং॥

ইত্যাদিপর্ব্বণি ভীষ্মোৎপত্তিনাম ১০০ অধ্যায়ঃ ॥

ভীষ্মজননী স্ত্রী গঙ্গা। ইতি রাজ নির্ঘণ্টঃ ॥

ভীষ্মপঞ্চকং ক্লী কার্ত্তিকশুক্লপক্ষীয়ৈকাদশ্যাদি পূর্ণিমান্ত পঞ্চতিথি কর্ত্তব্য ব্রতবিশেষঃ। যথা। শ্রীনারদ উবাচ। ভগবন্ যৎত্বয়া প্রোক্তং ভীষ্মস্য চ দিনং মহৎ। মাহাত্ম্যং শ্রোতুমিচ্ছামি তস্য মে কথয় প্রভো ॥ কথং স্নানঞ্চ কিং দানং কো-বিধিঃ কস্য পূজনং। কিং ফলং কেন বা কারি তন্মে কথয় বিস্তরাৎ ॥ ব্রহ্মোবাচ। তদ্ভীষ্মপঞ্চকস্যেদং মাহাত্ম্যং বিধি পূর্ব্বকং। বক্ষ্যামি ফল সংযুক্তং যেনেদঞ্চকৃতং পুরা ॥ অযোধ্যা নগরী যা চ কলি কল্মষ নাশিনী। বৈষ্ণবী স্বর্গ রম্যা চ কলিকল্মষ নাশিনী ॥ হস্ত্যশ্ব রথ পত্ত্যাঢ্যা বিষ্ণুচক্র প্রতিষ্ঠিতা। তস্যামাসীন্নর বরঃ সূর্য্যবংশোদ্ভবো মুনে ॥ অতিথি নাম দেবর্ষে ধর্ম্মাত্মা নৈক যজ্ঞ কৃৎ। তেন দত্তং পুরা রাজ্ঞা কৃতং যজ্ঞ মনুত্তমং ॥ ভার্য্যয়া চন্দ্র ভাবিন্যা সার্দ্ধং ভীষ্মস্য পঞ্চকং। চিকীর্ষুঃ পরিপপ্রচ্ছ বশিষ্ঠং তদ্বিধিং দ্বিজ ॥ * ॥ বশিষ্ঠ উবাচ। শৃণু রাজন্ প্রবক্ষ্যামি ব্রতং সৌভাগ্য দায়কং। রহস্যং ভীষ্ম পঞ্চাখ্যং বিষ্ণু তুষ্টি প্রদায়কং ॥ কার্ত্তিকে মাসি রাজেন্দ্র প্রারভ্যৈকাদশী তিথিং। যাবৎ পঞ্চদশী রম্যা ভবিতা চন্দ্র পূর্ণিতা ॥ পঞ্চ ভীষ্ম নিতি খ্যাতং তিথয়ঃ পুণ্যদাঃ স্মৃতাঃ। প্রাতঃকালে সমুত্থায় শৌচং কৃত্বা যথা বিধি ॥ স্নাত্বা স ভার্য্যঃ পুরুষো নদ্যাদৌ বিমলে জলে। তর্পয়েদ্ভীষ্ম বর্ম্মাণং কুরুবংশ পিতামহং ॥ পিতৃভি স্তিলযুক্তৈশ্চ জলাঞ্জলিভি রুদ্ধৃতৈঃ। বৈয়াঘ্রপদ্য গোত্রায় সাঙ্কৃতি প্রবরায় চ ॥ তিলতোয়াঞ্জলিং তস্মৈ প্রযচ্ছেদ্ধর্ম্মকর্ম্মণে। সন্তর্প্য কৌরব শ্রেষ্ঠং অর্ঘ্যাদাচমনং ততঃ ॥ অর্চয়িত্বা বিধানেন চন্দনাদিভি রাবৃতঃ। অর্ঘ্যং দদ্যাদ্ধতাত্মা চ মন্ত্রেণানেন ভূপতে ॥ বসূনামবতারায় শান্তনো রাত্মজায় চ। অর্ঘ্যং দদামি ভীষ্মায় আজন্ম ব্রহ্মচারিণে ॥ ইত্থং সমাপয়েদ্বৎস ভীষ্মপঞ্চবিধিং নরঃ। নিয়মেনোপবাসেন পঞ্চগব্যেন বা পুনঃ ॥ পয়ো মূল ফলাহারৈ র্হবিষ্যৈ র্নানা বিধৈ রপি। নরো বাপ্যদি বা নারী মুক্ত পাপো দিবং ব্রজেৎ ॥ ভুক্তে স বিপুলান্ ভোগান্ কার্ত্তিক

ন তৎজ্ঞান্ধ যঃ আত্মাহংশক্তো নযেৎ ॥ পঞ্চ ভীষ্মাখ্যং হরি পূর্ণতং ॥ শ্রু ত্বৈতদ্বিষ্ণু ভক্তো সৌ ভক্ত্যা স্বচলয়া সহ। দম্পতী চ যথা ভীষ্মং লক্ষ্মা তৌ তু মহাফলং। স্বল্পানাসেন বিপ্রেন্দ্র কৃতং তাভ্যাং হি তৎপুরা। প্রাপ্তং রাজ্যং মহীমেহাং সমুদ্র বলয়ান্বিতাং ॥ প্রভুজ্য প্রচুরান্ কামান্ বৃত্তকামৌ যথা মনে। দিব্যাম্বরাভরণৌ তৌ দিব্য মাল্যানুলেপিতৌ ॥ দিব্যদেহ বিমানেন সর্ব্বকিন্নর সেবিতৌ। অপ্সরা গীত নৃত্যেন স্তুতৌ দেবমহর্ষিভিঃ ॥ সম্প্রাপ্তৌ বিষ্ণুলোকঞ্চ ভীষ্মপঞ্চ ব্রতান্মুনে। ব্রহ্মোবাচ। ইত্যেতৎ কথিতং বৎস মাহাত্ম্যং কার্ত্তিকোদ্ভবং। ভীষ্মপঞ্চক মাহাত্ম্যং সেতিহাসং পুরাতনং ॥ তৎ সর্ব্বং কুরু বিপ্রেন্দ্র যদি তে ভক্তি রচ্যুতে। নিশ্চলঃ কায় মনসা বচসা সুমনী ভব ॥*॥ শৃণ্বন্তি মর্ত্যাশ্চ পঠন্তি যে বৈ ভূখণ্ড মধ্যে ভগবদ্গুণান্মুনে। মতিঞ্চ লব্ধ্বা ভগবত্য শেষতঃ কথা মুপেন্দ্রস্য পুরং প্রযান্তি ॥ কলিমল মপহৃত্য প্রাণিনো দেব দেবং সুভগ সকল ভোগান্ ভোজয়িত্বা চ যান্তি। হরিপুর নগরেশে গীত বাদ্যৈ বিশালে বিহিত সকল কৃত্যা স্তোষয়ন্তে হরিং যে ॥ এতৎ কার্ত্তিক মাহাত্ম্যং ভক্ত্যা যঃ শৃণুয়ান্নরঃ। সর্ব্ব পাপ বিনির্ম্মুক্তঃ স কৃষ্ণে লভতে রতিং ॥ ইতি পাদ্মোত্তরখণ্ডে কার্ত্তিক মাহাত্ম্যে ১৩২ অধ্যায়ঃ ॥*॥ অপিচ। সদা হরের্ব্রতং শ্রেষ্ঠং ততঃ স্যাদ্দক্ষিণায়নে। চাতুর্ম্মাস্যে ততস্তস্মাৎ কার্ত্তিকে ভীষ্মপঞ্চকং ॥ ততঃ শ্রেষ্ঠ তমং শুক্ল একাদশ্যাং সমাচরেৎ। স্নায়াত্রিকালং পিত্রাদীন্ যবাদ্যৈ রর্চ্চয়েদ্ধরিং ॥ যজেন্মৌনী ঘৃতাদ্যৈস্তু পঞ্চগব্যেন বারিভিঃ। স্নাপয়িত্বাথ কর্পূর মুখৈশ্চৈবানুলেপয়েৎ ॥ ঘৃতাক্ত গুগ্গুলো ধূপং দ্বিজঃ পঞ্চদিনং দহেৎ। নৈবেদ্যং পরমান্নন্তু জপেদষ্টোত্তরং শতং ॥ ওঁ নমো বাসুদেবায় ঘৃত ব্রীহি তিলোদকং। ষডক্ষরেণ মন্ত্রেণ স্বাহান্তেন তু হোময়েৎ ॥ প্রথমে হহ্নি হরেঃ পাদৌ যজেৎ পদ্মৈ র্দ্বিতীয়কে। বিল্বপত্রৈ র্জানুদেশং নাভিং ভৃঙ্গেণ চাপরে ॥ স্কন্ধৌ বিল্বৈ র্জবাভিশ্চ পঞ্চমে হহ্নি শিরোর্চ্চয়েৎ ॥ মালত্যা ভূমিশায়ী স্যাদ্দোময়ং প্রাশয়েৎ ক্রমাৎ ॥ গোমূত্র ক্ষীর দধি চ পঞ্চমে পঞ্চগব্যকং। নক্তং ন্যায়াৎ পঞ্চদশ্যাং ব্রতী স্যাদ্ভুক্তি মুক্তি ভাক্ ॥

ইতি গারুড়ে ভীষ্মপঞ্চাদি ব্রতং নাম ১২৩ অধ্যায়ঃ ॥

ভীষ্মরত্নং ক্লী হিমালযোত্তরদেশজাত শুক্লবর্ণপ্রস্তরবিশেষঃ। তস্যোৎপত্ত্যাদি যথা। সূত উবাচ। হিমবত্যুত্তরে দেশে বীর্য্যং পতিতং সুরদ্বিষ স্তস্য। সম্প্রাপ্ত মুত্তমানা মাকরতাং ভীষ্মরত্নানাং ॥ শুক্লাঃ শঙ্খাব্জ নিভাঃ শ্যোনাক সন্নিভাঃ প্রভাবন্তঃ। প্রভবন্তি তত স্তরুণা বজ্রনিভা ভীষ্ম পাষাণাঃ॥ হিমাদ্রি প্রতিবদ্ধং শুদ্ধমপি শুদ্ধয়া বিধত্তে যঃ। ভীষ্মমণিং গ্রীবাদিষু সসম্পদং সর্ব্বদা লভতে ॥ গুণযুক্তস্য তস্যৈব ধারণান্মুনিপুঙ্গব। বিষাণি তানি নশ্যন্তি সর্ব্বাণ্যেব মহীতলে ॥ বিষমানা বাধন্তে যে তমরণ্য নিবাসিনঃ সমীপে হপি। দ্বীপি বৃক শরভ কুঞ্জর সিংহ ব্যাঘ্রাদযো হিংস্রাঃ ॥ তস্যোৎকবলিত কৃতিনো ভবন্তি ভযং ন চাপি সমুপস্থিতং। ভীষ্মমণি গুণযুক্তঃ সম্যক্ সংপ্রাপ্তাঙ্গলি ত্রিতযঃ পিতৃতর্পণে পিতৃণাং তৃপ্তি র্বহু বার্ষিকী ভবতি ॥ শাম্যন্ত্যভূতান্যপি সর্পাণ্ডজাখু বৃশ্চিক বিষাণি। সলিলাগ্নি বৈরি তস্কর ভয়ানি ভীমানি নশ্যন্তি ॥ সৈবল বলাহকাভং পরুষং পীতপ্রভং প্রভাহীনং ॥ মলিন দ্যুতিং বিবর্ণং দূরাৎ পরিবর্জযেৎ প্রাজ্ঞঃ। মূল্যং প্রকল্প্যমেষাং বিবুধবরৈ র্দেশকাল বিজ্ঞানাৎ ॥ দূরে ভূতানাং বহু কিঞ্চিন্নিকট প্রসূতানাং। ইতি গারুড়ে ভীষ্মরত্ন পরীক্ষা নাম ৭৬ অধ্যাযঃ ॥

ভীষ্মসূঃ স্ত্রী গঙ্গা। ইত্যমরঃ ॥

ভীষ্মাষ্টমী স্ত্রী মাঘশুক্লাষ্টমী। তত্র ভীষ্মস্য তর্পণাদিকং কর্ত্তব্যং যথা। ভবিষ্যোত্তরে। শুক্লাষ্টম্যান্তু মাঘস্য দদ্যাদ্ভীষ্মায যো জলং। সম্বৎসর কৃতং পাপং তৎ ক্ষণাদেব নশ্যতি ॥ ধবল ধৃতা স্মৃতিঃ। অষ্টম্যান্তু সিতেপক্ষে ভীষ্মায তু তিলোদকং। অমন্ত্র বিধি দদ্যুঃ সর্ব্বে বর্ণা দ্বিজাতযঃ ॥ সর্ব্বে বর্ণা ইত্যুপাদানাৎ ব্রাহ্মণ শূদ্রযো রপ্যবিকারঃ। দ্বিজাতয ইতি সম্বোধনং। স্মৃতিরত্নাকরে বিষ্ণুধর্ম্মোত্তরং। মধ্যাহ্ন ব্যাপিনী গ্রাহ্যা শ্রাদ্ধে ভীষ্মাষ্টমী তিথিঃ। স্নানে চ তর্পণে দানে গ্রাহ্যা সূর্য্যোদযী পরা ॥ যদা কদাচিৎ জম্ভাংশং গতাসূর্য্যো দযী পরা। পূর্ব্বস্যা মেব কর্ত্তব্যং তর্পণং শ্রাদ্ধ মেব চ ॥ যদৈকস্মিন্

ভবেন্মোপি কদা... করী দ্বয়ং। ভীষ্মাষ্টমী দ্বন্দ্ব ... তদা গ্রাহ্যা পরা তিথিঃ॥ ব্রাহ্মণস্ত্বন্য বর্ণানাং স্বঃ করোত্যৌর্দ্ধদৈহিকং। তদ্বর্ণ ত্বনসৌযাতি ইহলোকে পরত্র চ॥ ইতিমরীচিবচনন্তু ভীষ্মকৃত্যেতরপরং। তথাচ স্মৃতিঃ। ব্রাহ্মণাদ্যাস্তু যে বর্ণা দদ্যু ভীষ্মায়নো জলং। স ম্বৎসর কৃতং পণ্যং তৎক্ষণাদেব নশ্যতি॥ অসবর্ণ জলদান নিষেধস্তু প্রকরণ বলাদপি ভ্রাত্রাদি বিষয ইতি শ্রীদত্তঃ তর্পণমন্ত্রস্তু। বৈয়াঘ্রপদ্য গোত্রায় সাংকৃতি প্রবরায চ। অপুত্রায দদাম্যেতৎ সলিলং ভীষ্ম বর্ম্মণে॥ ভীষ্মঃ শান্তনবো বীরঃ সত্যবাদী জিতেন্দ্রিয়ঃ। আভি রদ্ভি রবাপ্নোতু পুত্র পৌত্রোচিতাং ক্রিযাং॥ ইত্যাশংসা মন্ত্রঃ। পুত্র পৌত্রোচিতা মিত্যভিধানাৎ পিতৃ ... ত্যা। ব্রাহ্মণঃ পিতৃতর্পণানন্তরং ক্ষত্রিয়স্তু তৎ পূর্ব্বং তর্পযেৎ। ইতি সম্বৎসর প্রদীপাদয়ঃ॥ ইতি তিথ্যাদিতত্ত্বং॥

ভুক্তং ত্রি ভক্ষিতং। ইত্যমরঃ॥ ভক্ষণে ক্লী। ইতি ...ং ও শব্দ ...॥

ভুক্তসমুজ্ঝিতং ত্রি পূর্ব্বং ভুক্তং ... শেষং পশ্চাৎ সমুজ্ঝিতং ত্যক্তং।

তৎপর্য্যাযঃ। ফেলা ২। ইত্যমরঃ॥ পিণ্ডং ৩ ফেলিঃ ৪। ইতি ভরত ধৃত রভসঃ॥

ভুক্তিঃ স্ত্রী ভোজনং। ইতি শব্দরত্নাবলী॥ ভোগঃ। যথা। ভুক্তিস্ত্রি পরুষী সিদ্ধেদপরেবাং ন সংশযঃ। অনিবৃত্তে সপিণ্ডত্বে সঙ্কল্যানাং ন সিদ্ধ্যতি॥ আহর্ত্তা শোধযেদ্ভুক্তি মাগমঞ্চাপি সংসদি। তৎসুতো ভুক্তিমেবৈকাং পৌত্রাদিষু ন কিঞ্চন॥ ইতি দাযতত্ত্বং॥ রবি ভুক্তি যথা। সার্দ্ধ সপ্ত রসে মেষে বসুঃ সার্দ্ধো ঘটে বৃষে। দশৈশ নক্রে দ্বন্দ্বে পলানি প্রতিবাসরং॥ স্ত্রীর সিংহ প্রমদা তুলালি কার্ম্মুকেষু চ। পলান্যেকাদশ তথা রবিভুক্তিং প্রচক্ষতে॥ ইতি জ্যোতী রত্নমালা॥

ভুক্তিপ্রদঃ পুং মুদ্গঃ। ইতি রাজনির্ঘণ্টঃ॥ ভোগদাতরি ত্রি॥

ভুগ্নঃ ত্রি রোগাদিনা কুটিলীকৃতঃ। তৎপর্য্যাযঃ। রুগ্নঃ ২। ইত্যমরঃ॥ বক্রঃ। ইতি ভজধাত্বর্থদর্শনাৎ॥

ভুজ ও শ ঔ বক্রণে। ইতি কবিকল্পদ্রুমঃ॥ বক্রণ মিতি বক্রং করোতীতি ক্রো ... ও ভুগ্নঃ। ... ... বা ... ঔ ... ।

ইতি দুর্গাদাসঃ ॥

ভুজ ধ ঔ ত্রাণে॥ ভক্ষে। ইতিকবিকল্পদ্রুমঃ॥ ধ ভনক্তি। ঔ অভৌক্ষীৎ। ত্রাণং পালনং উপভোগশ্চ তস্মাৎ পালনে পরস্মৈপদং। ইতি বোধ্যং। ভুনক্তি পৃথিবীং রাজা পালয়তীত্যর্থঃ। উপভোগে তু বৃদ্ধো জনো দুঃখশতানি ভুঙ্ক্তে ইতি। দিবং মরুত্বানিব ভোক্ষ্যতে মহীমিতি রঘুঃ। এবং সুখমুপভুঙ্ক্তে ইত্যাদি চ বোধ্যং। ভুজো হশনে ইত্যত্র ভক্ষণ মাত্রস্য গ্রহণেপি উপভোগস্য ভক্ষণজন্য তৃপ্তিজনকত্ব বিবক্ষয়া সিদ্ধি রিতি বিদ্যানিবাসঃ। ইতি দুর্গাদাসঃ ॥

ভুজঃ পুং স্ত্রী ভুজ্যতে অনেন সঃ। তৎপর্য্যায়ঃ। বাহুঃ ২ প্রবেষ্টঃ ৩ দোঃ ৪। ইত্যমরঃ॥ করঃ। ইতি মেদিনী॥ তস্য শুভাশুভ লক্ষণং যথা। কক্ষা চাপ্বদলা শ্রেষ্ঠা সুগন্ধিন্যূদ্ধ্ব রোমিকা। অন্যথা অর্থহীনানা মসৌ নিঃস্বস্য রোমশৌ॥ নির্ম্মাংসৌ চৈব ভগ্নাস্নৌ শ্লিষ্টৌ চ বিপুলৌ ভুজৌ। আজানুলম্বিনৌ বাহূ বৃত্তৌ পীনৌ নৃপেশ্বরে॥ নিঃস্বানাং রোমশৌ হ্রস্বৌ শ্রেষ্ঠৌ করিকর প্রভৌ। ইতি গারুড়ে ৬৬ অধ্যায়ঃ॥ গ্রহস্পষ্টী করণার্থং রাশিত্রয়াদূন কেন্দ্র গ্রহাদিঃ। রাশিত্রয়াদধিক নবপর্য্যন্ত ষড়ন্তরিতাবশেষঃ। নবরাশিভ্যো ঽধিকং চেৎ তদা দ্বাদশ রাশিভ্যঃ শোধ্যশ্চ ভুজঃ স্যাৎ। যথা। দো স্ত্রিভোনং ত্রিভোদ্ধ্বং বিশেষ্যং রসৈ শ্চক্রতো ঽঙ্কাধিকং স্যাদ্ভুজোনং ত্রিভং। কোটি রেকৈকরং ত্রিত্রিভৈঃ স্যাৎ পদং সূর্য্য মন্দোচ্চ মষ্টাদুযোংশা ভবেৎ। ইতি গ্রহলাঘবং॥ ক্ষেত্রস্য পরিমাণবিশেষঃ। যথা। কোটিশ্চতুষ্টয়ং যত্র দোস্ত্রয়ং তত্র কা শ্রুতিঃ। কোটিং দোঃ কর্ণতঃ কোটি শ্রুতিভ্যাঞ্চ ভুজং বদ॥ ইষ্টো বাহু র্যঃ স্যাত্তৎস্পর্দ্ধিন্যাং দিশীতরো বাহুঃ। ত্র্যস্রে চতুরস্রে বা সা কোটিঃ কীর্ত্তিতা তজ্জ্ঞৈঃ॥ তৎ কৃত্যো র্যোগ পদং কর্ণঃ দোঃ কর্ণ বর্গযো র্বিবরাৎ। মূলং কোটিঃ তচ্ছ্রুতি কৃত্যো রন্তরাৎ পদং বাহুঃ॥ ইতি লীলাবত্যাং ক্ষেত্রব্যবহারঃ॥

ভুজকোটরঃ পুং কক্ষঃ। ইতি হেমচন্দ্রঃ॥

ভুজগঃ পুং সর্পঃ। ইত্যমরঃ॥

ভুজগদারণঃ পুং গরুড়ঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভুজগান্তকঃ পুং গরুড়ঃ। ইতি রাজনির্ঘণ্টঃ॥

ভুজগাভোজী পুং ময়ূরঃ। ইতি রাজনির্ঘণ্টঃ॥

ভুজগাশনঃ পুং গরুড়ঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভুজঙ্গঃ পুং সর্পঃ॥ বিঙ্গঃ। ইত্যমরঃ মেদিনী চ॥

ভুজঙ্গঘাতিনী স্ত্রী বৃক্ষবিশেষঃ। কঙ্কালিকা ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। স্বরিঃ ২ সর্পাক্ষী ৩ ক্ষুৎকরী ৪ স্পৃহা ৫। ইতি শব্দচন্দ্রিকা॥ সর্পনাশিনী চ॥

ভুজঙ্গজিহ্বা স্ত্রী মহাসমঙ্গা। ইতি রাজনির্ঘণ্টঃ॥ সর্পরসনা চ॥

ভুজঙ্গপ্রযাতং ক্লী দ্বাদশাক্ষরপাদচ্ছন্দঃ। যথা। যদাদ্যঞ্চতুর্থং তথা সপ্তমঞ্চৈবথৈবাক্ষরং হ্রস্ব মেকাদশাদ্যং। শরচ্চন্দ্র বিদ্বেষি বক্ত্রারবিন্দে তদুক্তং কবীন্দ্রৈ ভুজঙ্গপ্রযাতং॥ ইতি কালিদাসকৃতশ্রুতবোধঃ

ভুজঙ্গভুক্ পুং গরুড়ঃ। ইতি শব্দরত্নাবলী॥ ময়ূরঃ। ইত্যমরঃ॥

ভুজঙ্গভোজী পুং রাজসর্পঃ। ইতি হেমচন্দ্রঃ॥

ভুজঙ্গমঃ পুং সর্পঃ। ইত্যমরঃ॥ সীসকে ক্লী। ইতি রাজনির্ঘণ্টঃ॥

ভুজঙ্গলতা স্ত্রী নাগবল্লী। ইতি রাজনির্ঘণ্টঃ॥

ভুজঙ্গহা পুং গরুড়ঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভুজঙ্গাখ্যঃ পুং নাগকেশরঃ। ইতি শব্দমালা॥ সর্পনামকে ত্রি॥

ভুজঙ্গাক্ষী স্ত্রী রাস্না। ইত্যমরঃ॥

ভুজশিরঃ ক্লী স্কন্ধঃ। ইত্যমরঃ॥

ভুজা স্ত্রী বাহুঃ॥ করঃ। ইতি মেদিনী॥

ভুজাকণ্টঃ পুং হস্তনখঃ। ইতি হেমচন্দ্রঃ॥

ভুজাদলঃ পুং হস্তঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভুজান্তরং ক্লী ক্রোড়ং। ইত্যমরঃ॥ হস্তপুভেদশ্চ॥

ভুজিঃ পুং বহ্নিঃ। ইত্যুণাদিকোষঃ॥

ভুজিষ্যঃ পুং স্বতন্ত্রঃ। হস্তসূত্রং॥ দাসঃ। ইতি মেদিনী॥ রোগঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভুজিষ্যা স্ত্রী দাসী॥ গণিকা। ইতি মেদিনী॥

ভুজ্যুঃ পুং ভোজনং। ইত্যুণাদিকোষঃ॥ ভাজনং॥ অগ্নিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভুঞ্জন্ ত্রি ভোগকর্ত্তা। ভুজধাতোঃ শতৃপ্রত্যয নিষ্পন্নো২য়ং॥

ভুঞ্জানঃ পুং ভোগকর্ত্তা। ভুজধাতোঃ কর্ত্তরি শান প্রত্যয় নিষ্পন্নো হয়ং। যথা। ভুঞ্জানো বর্দ্ধয়েৎ পাপ মসত্যং সংসদি ব্রুবন্। ইতি প্রায়শ্চিত্ততত্ত্বং॥

ভুরিক স্ত্রী পৃথিবী। ইত্যুণাদিকোষঃ॥

ভুবনং ক্লী জগৎ॥ সলিলং॥ গগনং॥ জনঃ। ইতি মেদিনী॥ চতুর্দ্দশ ভুবনানি যথা। চতুর্দ্দশ বিধংহ্যেতস্তুতসর্গং প্রকীর্ত্তিতং। ভূ র্ভুবঃ স্ব র্মহশ্চৈব জনশ্চ তপএব চ॥ সত্য লোকশ্চ সপ্তৈতে লোকাস্তু পরিকীর্ত্তিতাঃ। জম্বুঃ শাকঃ কুশঃ ক্রৌঞ্চঃ শাল্মলো মেদ পুষ্করঃ॥ সপ্তদ্বীপাঃ প্রধানানি হ্যুপদ্বীপৈস্তু সংযুতাঃ। লবণঃ ক্ষীর সংজ্ঞশ্চ ঘৃতোদো দধি সংজ্ঞকঃ॥ সুরোদেক্ষুর সোদৌ চ স্বাদূদঃ সপ্তমো ভবেৎ। চত্বারঃ সাগরাঃ খ্যাতাঃ পুষ্করিণ্যশ্চ তাঃ স্মৃতাঃ॥ উত্তরাঃ কুরবো রম্যং বর্ষং হৈমবতং তথা। ভদ্রাশ্বং কেতুমালঞ্চ তথা বর্ষ মিলাবৃতং॥ ভারতং হরিবর্ষঞ্চ তথা কিংপুরুষাবৃতং। এতান্যষ্টৌ তু বর্ষাণি পুণ্যানি কথিতানি তু। ইন্দ্রদ্যুম্নঃ কাসেরুশ্চ তাম্রপর্ণো গভস্তিমান্। নাগবীথী তথা সৌম্যো গন্ধর্ব্বো বারুণ স্তথা॥ সাগরাখ্যস্তু নবমো ভেদো ভারত বার্ষিকঃ। ইদন্তু ভারতং বর্ষং কর্ম্মভূমি রিতি স্মৃতং॥ শেষাণি দ্বীপবর্ষাণি ভোগস্থানানি সন্ত্যপি। ভাগীরথী পাবনী চ হ্রদিনী হ্লাদিনী তথা॥ সীতা বঙ্ক্ষুশ্চ সিন্ধুশ্চ সপ্তগঙ্গাঃ প্রকীর্ত্তিতাঃ॥ সুপ্রভা কাঞ্চনী চৈব বিশালা সুমনো হ্রদাঃ॥ সরস্বত্যোঘনাদা চ সুবেণু র্বিমলোদকা। এতা গঙ্গাস্তু বিখ্যাতাঃ সপ্তপুণ্যপ্রদাঃ শুভাঃ॥ হিমবান্ হেমকূটশ্চ নিষধো নীল পর্ব্বতঃ। শ্বেতশ্চ শৃঙ্গবান্মেরু র্মাল্যবান্ গন্ধমাদনঃ॥ মহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমানৃক্ষবানপি। বিন্ধ্যশ্চ পারিপাত্রশ্চ কৈলাসো মন্দর স্তথা॥ লোকালোকো মহাংস্তেষু তথৈবোত্তরমানসঃ। এতে বিংশতি বিখ্যাতাঃ পর্ব্বতাস্তুভূষাংবরাঃ॥ অতলং সুতলঞ্চৈব বিতলঞ্চ গভস্তিমৎ। মহাতলং রসাতলং পাতালং সপ্তমং স্মৃতং॥ কৃষ্ণভৌমং শিলাভৌমং পাতালং নীলমৃত্তিকং। রক্ত পীত শ্বেত কৃষ্ণ ভৌমানি চ ভবন্ত্যপি॥ পাতালানাঞ্চ সপ্তানাং লোকানাঞ্চ মহত্ত্বং

শুষিরং তানি কথ্যন্তে ভুবনানি চতুর্দ্দশ ॥ ইতি বহ্নিপুরাণং ॥

ভুবনকোষঃ পুং ভূগোলঃ । অস্য বিবরণং শ্রীভাগবতে পঞ্চমস্কন্ধে ১৬ । ১৭ । ১৮ অধ্যায়ে দ্রষ্টব্যং ॥

ভুবন্যুঃ পুং সূর্য্যঃ ॥ বহ্নিঃ ॥ চন্দ্রঃ । ইতি মেদিনী ॥ প্রভুঃ । ইত্যুণাদিকোষঃ ॥

ভুবর্লোকঃ পুং ভূরাদিসপ্তলোকান্তর্গতদ্বিতীয়লোকঃ । যথা । ভূমি সূর্য্যান্তরং যচ্চ সিদ্ধাদি মুনি সেবিতং । ভুবর্লোকস্তু সোপ্যুক্তো দ্বিতীয়ো মুনি সত্তম ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৭ অধ্যায়ঃ ॥

ভুবঃ ব্য আকাশং । ইতিহেমচন্দ্রঃ ॥

ভুবিঃ স্ত্রী সমুদ্রঃ । ইত্যুণাদিকোষঃ ॥

ভূ কঙ প্রাপ্তৌ । ইতি কবিকল্পদ্রুমঃ ॥ কঙ ভাবয়তে । ইতিদুর্গাদাসঃ ॥

ভূ ঞ প্রাপ্তৌ । ইতি কবিকল্পদ্রুমঃ ॥ ঞ ভবতি ভবতে ধনং ধীরঃ । ভবত্যেব সত্তায়াং প্রাপ্তি সম্পন্ন জন্মস্বিতি ভট্টমল্লঃ ॥ ভবতে দুরিতক্ষয়ং যথোক্ত ক্রতুভি র্ভাবয়তে চ নাকলোক মিতি হলায়ুধঃ ॥ কেচিদনুং ভূবাদ্যাত্মনেপদিনং মত্বা প্রাপ্তৌ পরস্মৈপদং সত্তার্থে স্যেবানেকার্থত্বাৎ সমাধত্তে । ইতি দুর্গাদাসঃ ॥

ভূ ক শুদ্ধি চিন্তয়োঃ ॥ মিশ্রণে । ইতি কবিকল্পদ্রুমঃ ॥ ক তৃণ বভাবয়তি দ্বিষঃ সর্ব্বান্ । ভবো হর্থাঃ । ইতি দুর্গাদাসঃ ॥

ভূ সত্তায়াং । ইতি কবিকল্পদ্রুমঃ ॥ সত্তেহ দ্বিবিধা । উৎপত্তি র্বিদ্যমানতা চ । ভবতি মনুষ্যো হথবা বিষ্ণুঃ । ইতি দুর্গাদাসঃ ॥

ভূ ব্য রসাতলং । ইতি হেমচন্দ্রঃ ॥

ভূঃ স্ত্রী পৃথিবী । ইত্যমরঃ ॥ স্থানমাত্রং । ইতি মেদিনী ॥ যজ্ঞাগ্নিঃ । ইতি জটাধরঃ ॥

ভূকং ক্লী ছিদ্রং ॥ কালঃ । ইতি মেদিনী ॥

ভূকঃ পুং অন্ধকারঃ । ইতি শব্দমালা ॥

ভূকদম্বঃ পুং অলম্বুষবৃক্ষঃ । কোকসিম ইতি ভাষা । ইতি রত্নমালা ॥

ভূকদম্বকঃ পুং যবানী । ইতি রাজনির্ঘণ্টঃ ॥

ভূকন্দঃ পুং মহাশ্রাবণিকা । থুলকুড়ী ইতি ভাষা । ইতিরাজনির্ঘণ্টঃ

ভূকর্বুদারকঃ পুং বৃক্ষবিশেষঃ । ছোটালসোড়া ইতি হিন্দী ভাষা । তৎপর্য্যায়ঃ । ক্ষুদ্রশ্লেষ্মান্তকঃ ২ ভূশেলুঃ ৩ লঘুশেলুঃ ৪ লঘুপিচ্ছিলঃ ৫ লঘুশীতঃ ৬ সূক্ষ্মফলঃ ৭ লঘুভূত-

ক্রমঃ ৮ ভূকর্বদারঃ ৯। অস্য গুণাঃ। মধুরত্বং। ক্রিমি শূল নাশিত্বং। বাতপ্রকোপনত্বং। কিঞ্চিৎশীতত্বং। স্বর্ণমারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভূকম্পঃ পুং ভূমিকম্পনং। সচ অদ্ভুতবিশেষঃ। যথা অদ্ভুতসাগরে। মেষে বৃশ্চিক ভে গজঃ প্রচলতি ব্যাসাদিভিঃ কথ্যতে চাপে মীন জলীর ভেচ বৃষভে সত্যং চলেৎ কচ্ছপঃ। যুকে অন্তুধরে মৃগেন্দ্র মিথুনে কন্যা মৃগে পন্নগ স্তেষা মেকতমো যদি প্রচলতি ক্ষৌণী তদা কম্পতে ॥ কচ্ছপে মরণং জ্ঞেয়ং মরণঞ্চাপি পন্নগে। সর্ব্বত্র সুখদঞ্চৈব পৃথিব্যাং চলিতে গজে॥ প্রথিত নরেশ্বর মরণং ব্যসনান্যাগ্নেয় মারুতযোঃ। ক্ষুদ্ভয় মতি বৃষ্টিভিরুপপীড্যন্তে জনাশ্চাপি। ত্রি চতুর্থ পঞ্চম দিনে মাসে পক্ষে ত্রিপক্ষকে। ভবতি যদা ভূকম্পঃ প্রধান নৃপনাশনং কুরুতে॥ সচ ভূমিজোৎপাত বিশেষঃ। যথা। চর স্থির ভবং ভৌমং ভূকম্পা মপি ভূমিজং। জলাশয়ানাং বৈকৃত্যং ভৌম মদপি কীর্ত্তিতং॥ ভৌমং স্বাপ্য ফলং জ্ঞেয়ং চিরেণ পরিপচ্যতে। ইতি জ্যোতিস্তত্ত্বং॥

ভূকলঃ পুং দুর্বিনীতাশ্বঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূকশ্যপঃ পুং বসুদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভূকাকঃ পুং স্বল্পকঙ্কঃ॥ ক্রৌঞ্চঃ॥ নীলকপোতঃ। ইতিশব্দরত্নাবলী।

ভূকুম্ভী স্ত্রী ভূপাটলী। ইতি রাজনির্ঘণ্টঃ॥

ভূকুষ্মাণ্ডী স্ত্রী বিদারী। ইতি রাজনির্ঘণ্টঃ॥

ভূকেশঃ পুং শৈবলঃ॥ বটঃ। ইতি মেদিনী॥

ভূকেশা স্ত্রী রাক্ষসী। ইতি শব্দরত্নাবলী॥

ভূকেশী স্ত্রী অবল্গুজঃ। ইতি মেদিনী॥

ভূখর্জ্জুরী স্ত্রী ক্ষুদ্রখর্জ্জুরী। তৎপর্য্যায়ঃ। ভূযুক্তা ২ বসুধাখর্জ্জুরিকা ৩ ভূমিখর্জ্জুরী ৪। অস্যা গুণাঃ। মধুরত্বং। শিশিরত্বং। দাহ পিত্তহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ভূগরং ক্লী বিষং। ইতি রাজনির্ঘণ্টঃ

ভূগর্ভঃ পুং ভবভূতিঃ। সচ মালতীমাধবাদিনাটককর্ত্তা। ইতি জটাধরঃ॥

ভূগোলঃ পুং ভুবনকোষঃ। তস্যবিবরণং

যথা। প্রকৃতেস্তু মহান্ জাতোঽহঙ্কারো মহতঃ পুনঃ। তন্মাত্রাণি হ্যহঙ্কারাৎ শব্দঃ স্পর্শো ঽথ রূপকং ॥ রসো গন্ধশ্চ পঞ্চৈব গুণা নাম প্রকীর্ত্তিতাঃ। পঞ্চেমানি মহাভাগ মহাভূতানি সংগ্রহাৎ ॥ তেভ্য এব প্রজাতানি সর্ব্বাণি গুণবন্তি চ। ভূমি রাপ স্তথা বায়ু রগ্নি রাকাশ মেব চ ॥ গুণোত্তরাণি সর্ব্বাণি তেষাং ভূমিঃ প্রধানতঃ। শব্দঃ স্পর্শশ্চ রূপঞ্চ রসো গন্ধশ্চ পঞ্চমঃ॥ ভূম্যাবেতে গুণাঃ প্রোক্তা হ্রসন্তি পরতঃ ক্রমাৎ। চত্বারো ঽপ্সু গুণা ব্রহ্মন্ গন্ধ স্তত্র ন বর্ত্ততে ॥ শব্দঃ স্পর্শশ্চ রূপঞ্চ ত্রয এব হি তেজসি। শব্দঃ স্পর্শো ঽথ বায়োস্তু আকাশে শব্দ এব হি ॥ এতে পঞ্চ গুণাঃ প্রোক্তা মহাভূতেষ পঞ্চসু। বর্ত্তন্তে সর্ব্বভূতেষু যেষু লোকাঃ প্রতিষ্ঠিতাঃ ॥ অন্যো ঽন্যং নাতি বর্ত্তন্তে সম্যগ্বর্ত্তি বৈ তদা। যদা তু বিষমং ভাবমবিশন্তি পরস্পরং॥ তদা দেহ বিয়োগঃ স্যাদ্দেহিনাং নান্যথা দ্বিজ। আনুপূর্ব্ব্যা বিনশ্যন্তি জায়ন্তে চাপি সর্ব্বশঃ ॥ সর্ব্বাণ্যপরিমেযাণি তদেষাং রূপ মৈশ্বরং। তত্র তত্র হি দৃশ্যন্তে ধাতবঃ পঞ্চভৌতিকাঃ ॥ তেষাং মনুষ্যা স্তর্কেণ প্রমাণানি প্রচক্ষতে। অচিন্ত্যাঃ খলু যে ভাবা ন তাং স্তর্কেণ যোজয়েৎ ॥ প্রকৃতিভ্যঃ পরং যত্তু তদচিন্ত্যস্য লক্ষণং। *। জম্বুদ্বীপং প্রবক্ষ্যামি বাৎস্যায়ন মহামুনে॥ পরিমণ্ডলো মহাভাগ দ্বীপো ঽসৌ চক্রবৎ স্থিতঃ। নদী গিরি প্রতিচ্ছন্নো বিবিধৈঃ পত্তনৈ রপি ॥ বনৈ র্জনপদৈ র্বৃক্ষৈ স্তথা পুষ্প ফলোপগৈঃ। লবণেন সমুদ্রেণ সমন্তাৎ পরিবারিতঃ ॥ প্রাগায়তা মহাভাগ ষডেতে রত্নপর্ব্বতাঃ। অবগাঢা হ্যুভয়তঃ সাগরৌ পূর্ব্ব পশ্চিমৌ ॥ হিমবান্ হেমকূটশ্চ নিষধশ্চ নগোত্তমঃ। নীলঃ শ্বেতঃ শৃঙ্গবাংশ্চ রত্নধাতু বিচিত্রিতাঃ ॥ অযুতানি যোজনানি উচ্ছ্রায়া স্তেষু কীর্ত্তিতাঃ। পৃথুত্বে চ দ্বিসাহস্রযোজনা স্তে চ পর্ব্বতাঃ ॥ তেষামন্তর বিষ্কম্ভো নব সাহস্রযোজনঃ। বর্ষে বর্ষে প্রমাণন্তু বর্ষাণি ত্রীণি দক্ষিণে ॥ তত্র পুণ্যা জনপদা স্তেষু বর্ষেষু তাপস। বসন্তি তেষু সর্ব্বাণি সত্ত্বানি বিবিধানি চ ॥ দক্ষিণে ভারতং বর্ষ মুত্তরে লবণোদধেঃ। কৈলাদেব মহাভাগ তস্য সীমা হিমালয়ঃ ॥ ততঃ কিংপুরুষং বর্ষং হেমকূটাদধ স্ততঃ। হরিবর্ষং ততো জ্ঞেয়ং

নিষধো ঽবধি রুচ্যতে ॥ এব মেবো-
ত্তরে ত্রীণি বর্ষাণি চ তপোধন। শ্বেত-
বর্ষং সিন্ধু কূলাৎ শৃঙ্গবানবধিঃ স্মৃতঃ
॥ হিরণ্ময়ং ততো বর্ষং শ্বেতাবধি নি-
গদ্যতে। রম্যকঞ্চ ততো বর্ষং নীল
স্তস্যাবধিঃ স্মৃতঃ ॥ দক্ষিণেন তু নী-
লস্য নিষধস্যোত্তরেণ তু। প্রাগায়-
তো মহাভাগ মাল্যবান্নাম পর্ব্বতঃ
॥ পশ্চিমে তু তথৈবাস্তে পর্ব্বতো গ-
ন্ধমাদনঃ। পূর্ব্বে সমুদ্রকূলাত্তু ভদ্রা-
শ্বং নাম বর্ষকং ॥ মাল্যবানবধি স্ত-
স্য কেতুমালঞ্চ পশ্চিমে। গন্ধমাদ-
ন সীমান্তং নবসাহস্র যোজনং ॥ ❀ ॥
পরিমণ্ডল স্তযোর্মধ্যে মেরুঃ কনক
পর্ব্বতঃ। আদিত্য তরুণাভাসো বি-
ধূম ইব পাবকঃ ॥ লক্ষযোজন উচ্ছা-
যো মূর্দ্ধ্নি দ্বাবিংশএব চ। যোজনানাং
সহস্রাণি মূলে চাপি তু ষোড়শ ॥
বিস্তৃতঃ স মহাভাগ ভূমিষ্ঠং মূলম-
স্য তু। প্রবিষ্ট মস্ত ভূম্যাং বৈ ষোড-
শৈব সহস্রকং ॥ ঊর্দ্ধ্ব মস্তশ্চ তির্য্য-
ক্ চ লোকানা বৃত্য তিষ্ঠতি। তস্য
চেলাবৃতং বর্ষং সর্ব্বতঃ পরিকীর্ত্তিতং
॥ বিহগঃ সুমুখো যস্তু সুপর্ণস্যাত্মজঃ
কিল। স বৈ বিচিন্তয়ামাস সৌবর্ণান্
প্রেক্ষ্য বায়সান্ ॥ মেরু রুত্তম মধ্যা-
না নবরাণাঞ্চ পক্ষিণাং। অবিশেষ

করো যস্মাত্তস্মাদেনং ত্যজাম্যহং ॥
তমাদিত্যোঽনুপর্য্যেতি সততং জ্যো-
তিষাং বরঃ। চন্দ্রমাশ্চ সনক্ষত্রো
বায়ুশ্চৈব প্রদক্ষিণং ॥ স পর্ব্বতো ম-
হাভাগ দিব্য পুষ্প সমন্বিতঃ। ভব-
নৈরাবৃতঃ সর্ব্বৈ র্জাম্বুনদ ময়ৈঃ শুভৈঃ
॥ তত্র দেবগণা ব্রহ্মন্ গন্ধর্ব্বাসুর রা-
ক্ষসাঃ। অপ্সরোগণ সংযুক্তাঃ শৈলে
ক্রীড়ন্তি সর্ব্বদা ॥ অবষ্টম্ভ করা স্তস্য
মন্দরো মেরু মন্দরঃ। সুপার্শ্বঃ কুমু-
দশ্চেতি চতুর্দ্দিক্ষু স্থিতা দ্বিজ ॥ অযুত
যোজনোন্নাহা স্তাবদ্বিস্তার সংযুতাঃ
। চতুর্ষ্বেতেষু ধর্ম্মজ্ঞ চূত জম্বু কদম্ব-
কাঃ ॥ ন্যগ্রোধ শ্চাপি চত্বারঃ পাদ-
পা ব্রাহ্মণর্ষভ। সহস্রযোজনোন্নাহা
স্তাবদ্বিটপ বিস্তৃতাঃ ॥ কেতু ভূতাঃ
পর্ব্বতানাং বিশালাঃ শতযোজনং।
হ্রদাশ্চ তত্র চত্বারঃ পয়ো মধ্বিক্ষু বা-
রিদাঃ ॥ দেবোদ্যানানি চত্বারি দ্বে-
চৈত্ররথ নন্দনে। সর্ব্বতো ভদ্র মিত্যে-
বং তথা বৈভ্রাজকং বনং ॥ তেষু দেব
স্ত্রিয়ো নিত্যং বিহরন্তি সুরৈঃ সহ।
গন্ধর্ব্বাঃ কিন্নরাশ্চৈব তথান্যে সিদ্ধ
চারণাঃ ॥ গায়ন্তো মধুরং দিব্যং
স্ত্রীভিঃ ক্রীড়ন্তি তাপস। চূতো যো
মন্দরোৎসঙ্গে ঽযুত যোজন মুচ্ছ্রি-
তঃ ॥ ফলান্যমৃতকল্পানি পতন্ত্যস্য

সুদূরতঃ। তেষাং বিশীর্য্যমাণানা রসেনাজনি যা নদী॥ অরুণোদা নাম সৈব বহতে মন্দরাচলাৎ। যজ্জল স্পর্শমাত্রেণ ভবানী শিবযো র্গণাঃ॥ স্ব দেহ সৌরভেণাপি সমন্তাদ্দশ যোজনং। সুগন্ধযন্তি বাতেন বাৎ- স্যায়ন তদদ্ভুতং॥ এবং জম্বূফলানা- ঞ্চপাততাং মেরু মন্দরে। হস্তিকায প্রমাণানাং রসৈ র্জাতা মহানদী॥ সৈব জম্বূনদী নাম দক্ষিণেন ইলাবৃতং। তীরযো রুভযো রেব জম্বূরস প- রিপ্লুতা॥ মৃত্তিকৈব সুবর্ণং স্যাৎ বায্যর্ক কিরণানুযাৎ। তত্র জাম্বূনদং হেম নানা ভরণ সংজ্ঞিতং॥ দেবো- পদেব গন্ধর্বা ধারযন্তি সহ স্ত্রিযা। যো বৈ মহাকদম্বশ্চ সুপার্শ্বোপরি- তাপস॥ তৎ কোটরেভ্যঃ পঞ্চৈব মধুধারাঃ স্রবন্তি বৈ। পঞ্চাযাম প রীণাহাঃ পশ্চিমেন ইলাবৃতং॥ যা সাং রসাংশ্চ ভুঞ্জানাঃ সুমুখোদ্গার বাযুনা। সুগন্ধযন্তি ধর্মজ্ঞ সমন্তাৎ শতযোজনং॥ কুমুদাগ্র নিরূঢো যঃ শতবল্যো বটো মহান্। স্কন্ধেভ্য স্তস্য নদ্যস্তু উত্তরেণ ইলাবৃতং॥ পং যস্বিনী দধিহ্রদা ঘৃতকুল্যা মধুস্রবাঃ। গুড়স্রবেতি পঞ্চৈব যাসাং রস নিষেবণাৎ॥ বলী পলিত দৌর্গন্ধ্য জরা দোষো ন বিদ্যতে। কুরঙ্গ কু- ররঃ শঙ্খঃ কুসুম্ভঃ শিখর স্তথা॥ বৈ- কঙ্কশ্চ ত্রিকূটশ্চ পর্বতৌ রুচকর্ষভৌ। পতঙ্গ নিষধৌ নাগ সিতিবাস ত্রি- কূটকাঃ॥ হংস বৈদূর্য্য কপিলা দ্বৌ কালঞ্জর জারুধী। গিরযো মূল দেশে তু সুমেরোঃ পরিকল্পিতাঃ॥ জঠরো দেবকূটশ্চ দ্বৌ নগৌ মেরু পূর্বতঃ। অষ্টাদশ সহস্রাণি যোজ- নান্যুদগাযতৌ॥ পৃথু তুঙ্গৌ দ্বিসা- হস্র যোজনং তাপসর্ষভ। পবনঃ পারিপাত্রশ্চ মেরোঃ পশ্চিমতঃ স্থি- তৌ॥ তথা প্রমাণৌ কৈলাস করবী- রৌ তু দক্ষিণে। প্রাগাযতাবুত্তরেণ ত্রিশৃঙ্গ মকরৌ তথা॥ অষ্টাভি রেভি গিরিভি র্ভাতি কাঞ্চন পর্বতঃ। মে- রো মূর্দ্ধনি বিপ্রাগ্র্য মধ্যে বিশ্ব সৃজঃ পুরী॥ চতুরস্রা শাতকৌম্ভী যোজ- নাযুত বিস্তৃতা। দিকপালানাং তথা পূর্য্যঃ পূর্বাদিষু যথা ক্রমং॥ ব্রহ্মপু- র্য্যাশ্চতুর্থেন ভাগেন পরিকল্পিতা। তত্র ব্রহ্মা চ রুদ্রশ্চ শক্রশ্চাপি সু- রেশ্বরঃ॥ সমেত্য বিবিধৈ র্যজ্ঞৈ র্য- জন্তে ভূরি দক্ষিণৈঃ। তুম্বুরু নারদ- শ্চৈব বিশ্বাবসু র্হাহা হূহুঃ॥ অভিগ- ম্যা মরশ্রেষ্ঠং স্তুবন্তি বিবিধৈঃ স্তবৈঃ। সপ্তর্ষযো মহাত্মানঃ কশ্যপশ্চ প্র-

জাগর্ত্তিঃ ॥ তত্র গচ্ছন্তি ভদ্রং তে সদা
পর্ব্বণি পর্ব্বণি। তস্যৈব মূর্দ্ধন্যুশনা
কাব্যো দৈত্যৈর্মহীয়তে ॥ তস্য হি-
মানি রত্নানি তস্যেমে রত্ন পর্ব্বতাঃ।
তস্মাৎ কুবেরো ভগবাং শ্চতুর্থং ভা-
গমশ্নুতে ॥ ততঃ কলাংশং বিসৃজন্য
মনুষ্যেভ্যঃ প্রযচ্ছতি। পার্শ্বে তস্যো
ত্তরে দিব্যং সর্ব্বর্ত্তু কুসুমান্বিতং ॥
কর্ণিকার বনং রম্যং শিলাজাল স
মুদ্গতং। তত্র সাক্ষান্মহাদেবো ভীমৈ
র্ভূতৈঃ সমাবৃতঃ ॥ পার্ব্বত্যা সহ
দেবেশো রমতে ভূত ভাবনঃ। কর্ণি-
কার ময়ীং মালাং দধদাপাদলম্বি
নীং ॥ তস্য শৈলস্য শিখরাৎ ক্ষী-
র ধারা মহানদী। বিশ্বরূপা পরি-
মিতা ভীম নির্ঘাত নিস্বনা ॥ পুণ্যা
পুণ্যতমৈর্জুষ্টা গঙ্গা ভাগীরথী শু-
ভা। তাং ধারয়মাস তদা দুর্দ্ধরাং
পর্ব্বতৈরপি ॥ শতং বর্ষ সহস্রাণাং
শিরসৈব পিনাকধৃক্। মেরোস্তু শি-
খরাদ্দেবী ভিদ্যমানা চতুর্বিধা ॥
সীতা চালকনন্দেতি বঙ্ক্ষু ভদ্রেতি
কীর্ত্তিতা। সীতা তু ব্রহ্মসদনাৎ
কেশরাদি মহাচলান ॥ অতিক্রম্য
প্রস্রবন্তী গন্ধমাদন মূর্দ্ধস। পতিত্বা
দ্বিজ বর্যঙ্ক ভদ্রাশ্বং পুনতী ক্রমাৎ ॥
প্রাচ্যাং দিশি মহাভাগ প্রবিষ্টা ল

বণোদধিং। মাল্যবচ্ছিখরাদ্বঙ্ক্ষুঃ প-
তিত্বা কেতুমালকে ॥ প্রতীচ্যাং দি-
শি বিপ্রেন্দ্র প্রবিবেশ সরিৎপতিং।
ভদ্রা চোত্তরতো মেরু শিখরাৎ প-
তিত্বা গিরীন্ ॥ অতিক্রম্য শঙ্খবন্তঃ
শৃঙ্গাদ্বেগেন পাতুকা। উত্তরাংশ্চ
কুরূন্ প্রাপ্য প্রবিষ্টা লবণোদং ॥
তথৈবালকনন্দা চ পতন্তী গিরি মূ-
র্দ্ধস। হিমালয়ং বিনির্ভিদ্য ভারতং
বর্ষ মেত্য চ ॥ লবণাম্বুধি মভ্যেতি
দক্ষিণস্যাং দিশি দ্বিজ। মেরোস্তু
পশ্চিমে পার্শ্বে কেতুমালো মহান্
তে ॥ আযুর্দশ সহস্রাণি বর্ষাণাং তত্র
মানবে। সুবর্ণ বর্ণাশ্চ নরাঃ স্ত্রিয়শ্চা
প্সরসোপমাঃ ॥ বীত রোগ শোক
ভয়া নিত্যমানন্দ বর্দ্ধিনঃ। ভারতে
মানবা স্তত্র প্রতপ্ত কনক প্রভাঃ ॥ ৯ ॥
গন্ধমাদন শৃঙ্গেষ কুবেরঃ সহ রাক্ষ-
সৈঃ। অপ্সরো গণ গন্ধর্ব্বৈ র্মোদতে
গুহ্যকাধিপঃ ॥ গন্ধমাদন পার্শ্বেতু
গণ্ডশৈলাঃ সহস্রশঃ। একাদশ স-
হস্রাণি বর্ষাণাং পরমায়ুষঃ ॥ তত্র
হৃষ্টা নরাঃ সর্ব্বে বল বীর্য্য পরাক্রমাঃ
। স্ত্রিয়শ্চোৎপল পত্রাভাঃ সর্ব্বাঃ সু
প্রিয় দর্শনাঃ ॥ ৯ ॥ উত্তরাঃ কুরব
শ্চৈব ভারতঞ্চ মহামতে। ধনুঃ সং-
স্থে মহাভাগ দ্বিবর্ষে দক্ষিণোত্তরে ॥

ইলাবৃতং মধ্যমন্তু পঞ্চবর্ষাণি চৈব ॥ ইহ ত্রয়োত্তর মেতেভ্যো বর্ষ মুচ্যতে গুণৈঃ ॥ অপরেষু চ বর্ষেষু ভারতং বিনা। আয়ুঃ পুংসাং দশ বর্ষ সহস্রকং ॥ এবং মহাভাগ পৃথিবী পর্ব তৈ স্থিতা। ইতি পদ্মপুরাণে ভূমিখণ্ডে ভূগোল বর্ণনে ১২৮ অধ্যায়ঃ ॥ ❀ ॥ শেষ উবাচ। নবস্বেতেষু বর্ষেষু ভগবান্ ভক্ত ভাবনঃ। অনুগ্রহায় লোকানামাস্তে মায়া বপুর্দ্ধরঃ॥ ইলাবৃতে তু ভগবান্ ভবএকঃ মহোমনা। আস্তে স্ত্রিয়ার নিরতো নান্য স্তত্র পুমান্ স্থিতঃ ॥ ভবানী শাপতো ব্রহ্মন প্রবেশম কদাচন। যত্র প্রবিষ্টো মোহেন সুতো বৈবস্বতস্য বৈ ॥ ইলঃ স্ত্রী ভাব মাপন্নো যস্যাং জাতঃ পুরূরবাঃ। তত্র সঙ্কর্ষণং দেবং কলাং বিষ্ণো র্মহাত্মনঃ ॥ ভবো ভবান্যা সহিতঃ স্তৌতি ভক্তি সমন্বিতঃ।❀। ভদ্রাশ্বে দ্বিজ বর্ষে তু হয়শীর্ষাকৃতি র্হরিঃ॥বসতে বর্ষ পুরুষা স্তং স্তবন্তি জগদ্গুরুং। ❀। হরিবর্ষে তু ভগবান্নরসিংহ বপুর্দ্ধরঃ॥ স্তুয়তে দৈত্যপতিনা প্রহ্লাদেন মহাত্মনা। ❀। কেতুমালে চ ভগবান্ কামদেব স্বরূপবান্ ॥ প্রজাপতে র্দুহিতৃভিঃ সহৈব রময়া মুদা। স্তুয়তে পরয়া ভক্ত্যা জগন্মোহন রূপধৃক্ ।❀। রম্যকে ভগবানাস্তে মৎস্যরূপী দয়াপরঃ। মনু র্বৈবস্বত স্তঞ্চ স্তৌতি ভক্ত্যা কৃতৈঃ স্তবৈঃ ॥ ❀ ॥ হিরণ্ময়ে তু ভগবানাস্তে কূর্ম্ম তনুং দধৎ। পিতৃণাম্ রাজ স্তং স্তৌতি ভক্ত্যা পরময়া বৃতঃ ॥ ❀ ॥ কুরুবর্ষে চ ভগবান বরাহঃ সেব্যতে জনৈঃ। তং দেবী যঃ ক্ষিতিঃ স্তৌতি তদ্বর্ষ পতিভিঃ সহ ।❀। বর্ষে কিংপুরুষে ব্রহ্মন ভগবানাদিপুরুষঃ। সীতয়া বিহরন্নাস্তে সততং লক্ষ্মণাগ্রজঃ ॥ তঞ্চ কিংপুরুষৈঃ সার্দ্ধং ভক্ত্যা মারুত নন্দনঃ। পার্ষিসেনেন চ সহ স্তৌতি ভক্ত্যা বিভাবিতঃ॥ ❀ ॥ ভারতে চ তথা বর্ষে নরনারায়ণাবৃষী। নারদঃ স্তৌতি ভগবান্ ভগবন্তৌ কৃতানতিঃ ॥ ❀ ॥ দ্বীপে হস্মিন বহবঃ সন্তি গিরয়ঃ সরিত স্তথা। দেশাশ্চ বহবো ব্রহ্মং স্তাং স্তে বক্ষ্যাম্যনুক্রমাৎ ॥ মেরো রুত্তরতঃ সর্ব্বান পর্য্যায়েন ব্রবীম্যহং। দক্ষিণেন তু নীলস্য মেরোঃ পার্শ্বে তথোত্তরে ॥ উত্তরাঃ কুরবো নাম পুণ্যাঃ সিদ্ধ নিষেবিতাঃ। তত্র বৃক্ষা মধুফলা নিত্যং পুষ্প ফলোপগাঃ ॥ সুগন্ধীনি চ পুষ্পাণি ফলানি ...

চ। সর্ব্বে কামদুঘা বৃক্ষা লতাঃ কাম পুষ্পূরিকাঃ॥ অপরে ক্ষীরিণো নাম তরবো মুনিপুঙ্গব। যে স্রবন্তি সদা ক্ষীরং রসৈ রমৃত সন্নিভং॥ বস্ত্রাণি চ প্রসূয়ন্তে ফলেম্বাভরণানি চ। সর্ব্বা মণিময়ী ভূমিঃ সূক্ষ্মহাটক বালুকা॥ সর্ব্বত্র সুখদা নিত্যং পঙ্ক শর্কর বর্জ্জিতা। স্বর্গভোগাবশেষেণ জায়ন্তে তত্র মানবাঃ॥ শুক্লাভিজন সম্পন্নাঃ সর্ব্বে চারু মুখাম্বুজাঃ। মিথুনানি চ জায়ন্তে স্ত্রিয়ঃ সর সুতোপমাঃ॥ তেষান্তে ক্ষীরিণাং ক্ষীরং পিবন্ত্যমৃত সন্নিভং। মিথুনং জায়তে কালে সমন্তাচ্চ প্রবর্দ্ধতে॥ তুল্য রূপ গুণোপেতং তুল্য বেশ বয স্তথা। নিরাময়া নিরাবাধাঃ সদানন্দ বিবর্ত্তিনঃ॥ একাদশ সহস্রাণি তত্র বর্ষাণি বৈ জনাঃ। জীবন্তি তে মহাভাগ ন চান্যোন্যং হনন্তি চ॥ ভারুণ্ডা নাম শকুনা স্তীক্ষ্ণতুণ্ডা মহাবলাঃ। তাস্মিহরন্তী হ মৃতান দরীষু প্রক্ষিপন্তি চ॥ উত্তরাঃ কুরবো ব্রহ্মন্ ব্যাখ্যাতা স্তে সমাসতঃ।॥ হিরণ্ময়ে রম্যকে চ এষ ধর্ম্মঃ প্রকীর্ত্তিতঃ॥ মেরোঃ পার্শ্বে মহং পূর্ব্বং বর্ষ্যে ব্রহ্মন্ যথা তথং। ভদ্রাশ্বে ভদ্রশ্বা নাম তত্র ব্রহ্মন্ মহীপতিঃ॥ ভদ্রসাল বনং যত্র কালাম্রশ্চ মহাদ্রুমঃ। কালাম্রো নাম বৃক্ষো হ্যসৌ সিদ্ধ চারণ সেবিতঃ॥ যোজনৈক সমুৎসেধো নিত্য পুষ্প ফলঃ শুভঃ। তত্র তে পুরুষাঃ শ্বেতা স্তেজো যুক্তা মহাবলাঃ॥ কুমুদাভাঃ স্ত্রিয়

চারুনাসাঃ সুলোচনাঃ। চন্দ্রাভ চারুরূপাশ্চ পূর্ণেন্দু সদৃশাননাঃ॥ নৃত্য গীত কলাভিজ্ঞা শ্চন্দ্রশীতল কান্তয়ঃ। দশ বর্ষ সহস্রাণি তত্রায়ু র্ব্রাহ্মণর্ষভ॥ কালাম্র রস পানেন নিত্যং সুস্থির যৌবনাঃ। দক্ষিণেন তু নীলস্য নিষধস্যোত্তরেণ তু॥ সুদর্শনো নাম মহান্ জম্বূবৃক্ষঃ সনাতনঃ। সর্ব্বকাম ফলঃ পুণ্যঃ সিদ্ধ চারণ সেবিতঃ॥ দ্বীপ খ্যাতিকরঃ শ্রীমান্ সহস্র যোজনোচ্ছ্রিতঃ। অরত্নীনাং সহস্রঞ্চ শতানি দশ পঞ্চ চ॥ পরিণাহস্তু বৃক্ষস্য রসানাং রসভেদিনাং। তরুণাদিত্য বর্ণাশ্চ জায়ন্তে তত্র মানবাঃ॥ * ॥ তথা মাল্যবতঃ শৃঙ্গে দৃশ্যতে হব্যবাহনঃ। নাম্না সম্বর্ত্তকো নাম কালাগ্নিঃ প্রলয়ে হন্তকৃৎ॥ তথা মাল্য বতঃ শৃঙ্গে পূর্ব্বে পূর্ব্বানুগণ্ডিকাঃ। যোজনানাং সহস্রাণি পঞ্চষণ্মাল্যবান্ দ্বিজ॥ মহারজত সঙ্কাশা জায়ন্তে তত্র মানবাঃ। ব্রহ্মলোক চ্যুতাঃ সর্ব্বে জায়ন্তে তত্র

বৈ নরাঃ ॥ তপ স্তপ্যন্তি তে তীব্রং ভবন্তি হ্যুর্দ্ধরেতসঃ । রক্ষণার্থন্ত ভূতানাং ন বিশন্তি দিবাকরং॥ ষষ্টিস্তানি সহস্রাণি ষষ্টিরেব শতানি চ। অরুণস্যাগ্রতো যান্তি পরিবার্য্য দিবাকরং ॥ ষষ্টিং বর্ষ সহস্রাণি ষষ্টিমেব শতানি চ । আদিত্য তপ্তাস্তে সর্ব্বে বিশন্তি শশি মণ্ডলং॥ইতি পাদ্মে ভূমিখণ্ডে ভূগোলে ১২৯ অধ্যায়ঃ ॥ ॥ শেষ উবাচ। দক্ষিণেন তু শ্বেতস্য নিষধস্যোত্তরেণ তু। বর্ষং রম্যকং নাম জায়ন্তে তত্র মানবাঃ ॥ শুক্লাভিজন সম্পন্নাঃ সর্ব্বে সুপ্রিয় দর্শনাঃ। দশবর্ষ সহস্রাণি শতানি দশ পঞ্চ চ॥ জীবন্তি তে মহাভাগ নিত্যং মুদিত মানসাঃ।॥ দক্ষিণেন তু নীলস্য নিষধস্যোত্তরেণ তু॥ বর্ষং হিরণ্ময়ং নাম তত্র হৈমবতী নদী। যত্র চায়ং মহাভাগ পক্ষিরাট্ পতগোত্তমঃ॥ যক্ষানুগাশ্চ বহবো ধনিনশ্চ মহাবলাঃ। একাদশ সহস্রাণি বর্ষাণাং তে মহামতে॥ আয়ুঃ প্রমাণং জীবন্তি শতানি দশ পঞ্চ চ। শৃঙ্গাণি চ বিচিত্রাণি ত্রীণ্যেব ব্রাহ্মণর্ষভ॥ একং মণিময়ং তত্র দ্বিতীয়ং রৌক্মমদ্ভুতং। সর্ব্ব রত্নময়ঞ্চৈব তৃতীয়ং তত্র শোভতে॥ যত্র স্বয়ম্প্রভা দেবী নিত্যং বসতি শাণ্ডিলী। হেমকূটস্তু সুমহান্ কৈলাশো নাম পর্ব্বতঃ॥ যত্র বৈ পবনো রাজা গুহ্যকৈঃ সহ মোদতে। অস্ত্যুত্তরেণ কৈলাশং মৈনাকং পর্ব্বতং প্রতি॥ হিরণ্য শৃঙ্গঃ সুমহান্ দিব্যো মণিময়ো গিরিঃ। তস্য পার্শ্বে মহদ্দিব্যং শুভ্রকাঞ্চন বালুকং॥ রম্যং বিন্দু সরো নাম যত্র রাজা ভগীরথঃ। দৃষ্ট্বা পুণ্যাপগাং গঙ্গা মুবাস বহুলাঃ সমাঃ॥ যূপা মণি ময়া স্তত্র চৈত্যাশ্চাপি হিরণ্ময়াঃ। তত্রেষ্ট্বা তু গতঃ সিদ্ধিং সহস্রাক্ষো মহাযশাঃ॥ সৃষ্টা ভূতপতি র্যত্র সর্ব্বলোকৈঃ সনাতনঃ। উপাস্যতে তীগ্মতেজা যত্র ভূতৈঃ সমন্ততঃ॥ নরনারায়ণৌ ব্রহ্মা মনুঃ স্থাণুশ্চ পঞ্চমঃ। তত্র দিব্যা ত্রিপথগা প্রথমন্তু প্রতিষ্ঠিতা॥ ব্রহ্মলোকাদপক্রান্তা সপ্তধা প্রতিপদ্যতে। বস্বোকসা বা নলিনী পাবনী চ সরস্বতী॥ জম্বূনদী চ সীতা চ গঙ্গা সিন্ধুশ্চ সপ্তমী। অচিন্ত্যা দিব্য সঙ্কাশা প্রভাবৈশ্চ সমন্বিতা॥ উপাসতে যত্র সত্রং সহস্র যুগপর্য্যয়ে। দৃশ্যাদৃশ্যা চ ভবতি তত্র তত্র সরস্বতী॥ এতা দিব্যাঃ সপ্তগঙ্গা স্ত্রিষু লোকেষু বিশ্রুতাঃ। রক্ষাংসি বৈ হিমবতি

হেমকূটে তু গুহ্যকাঃ॥ সর্পা নাগাশ্চ নিষধে গোকর্ণঞ্চ তপোবনং। দেবাসুরাণাং সর্ব্বেষাং শ্বেতপর্ব্বত উচ্যতে॥ গন্ধর্ব্বা নিষধে নিত্যং নীলে ব্রহ্মর্ষয় স্তথা। শৃঙ্গবাংশ্চ মহাভাগ দেবানাং প্রতিসঞ্চরঃ॥ ইত্যেতানি মহাভাগ সপ্তবর্ষাণ্যনুক্রমাৎ। ভূতান্যপি নিবিষ্টানি গতিমন্তি ধ্রুবাণি চ॥ তেষা মৃদ্ধি র্ব্বহু বিধা দৃশ্যতে দৈব মানুষী। অশক্যা পরিসংখ্যাতুং শ্রদ্ধেয়া ত্ বুভুৎসনা॥ ইলাবৃতে তু ভগবান্ ভবান্যা সহ মোদতে। ইত্যেব মষ্টৌ বর্ষাণি কথিতানি তবানঘ॥ *॥ কর্ম্ম ক্ষেত্রং মহা পুণ্যং ভারতং শৃণু সাম্প্রতং। প্রিয় নিন্দস্য দেবস্য মনো বৈবস্বতস্য চ॥ পৃথোস্তু ব্রহ্মন বৈণ্যস্য তথেক্ষ্বাকো র্মহাত্মনঃ। যযাতে রম্বরীশস্য মান্ধাতু র্নহুষস্য চ॥ তথৈব মুচুকুন্দস্য শিবে রৌশীনরস্য চ। সোনকস্য চ রাজর্ষে র্গাধেশ্চৈব মহাত্মনঃ॥ ঋষভস্য তথৈলস্য দিলীপস্য মহাত্মনঃ। কুশিকস্য চ ধর্ম্মজ্ঞ নৃগস্য নৃপতে স্তথা॥ অন্যেষাঞ্চ মহাভাগ ক্ষত্রিয়াণাং বলীয়সাং। শৃণু মে গদতো ব্রহ্মন্ সর্ব্ব পাপ প্রণাশনং॥ মহেন্দ্রো মলয়ঃ সহ্যঃ শুক্তিমান্ক্ষবানপি। বিন্ধ্যশ্চ পারিপাত্রশ্চ সপ্তৈতে কুল পর্ব্বতাঃ॥ তেষাং সহস্রশো ব্রহ্মন্ গিরযস্তু সমীপতঃ। ধাত চিত্রাঃ সত্ত্ববন্তো মহান্ত শ্চিত্রসানবঃ॥ আর্য্যা ম্লেচ্ছাশ্চ ধর্ম্মজ্ঞ তৈ র্মিশ্রাঃ পুরুষা দ্বিজ। *। নদীং পিবন্তি বিপুলাং গঙ্গাং সিন্ধুং সরস্বতীং॥ শতদ্রুং চন্দ্রভাগাঞ্চ বিপাশাং স্থূল বালুকাং। গোদাবরীং নর্ম্মদাঞ্চ যমুনাঞ্চ মহানদীং॥ দৃশদ্বতীং বিপাসাঞ্চ বালুকাং সরিতাম্বরাং। নদীং বেত্রবর্ত্তীঞ্চৈব পযোষ্ণীং দেবিকামপি॥ বেদস্মৃতিং বেদশিনীং চিত্রসেনাঞ্চ নিম্নগাং। করীষিণীং চিত্রবহাং কৃষ্ণবেণ্বাং সুপুণ্যদাং॥ ইরাবতীং বিতস্তাঞ্চ ত্রিদিবা নিষ্কলাং কৃমিং। গোমতীং ধূতপাপাঞ্চ নিচিতাং লোহিতারণীং॥ কোশিকীং ত্রিদিবাং কৃত্যাং সরয্ঞ্চ মহামতে। চর্ম্মণ্বতীং বেত্রবতীং চন্দনাঞ্চ মহানদীং॥ রহস্যাং শতকুম্ভাঞ্চ হস্তি সোনাং দিশন্তথা। শরাবতীং পযোষ্ণীঞ্চ বাজিনীং পুরমালিনীং॥ পূর্ব্বাভি রামাং ধীরাঞ্চ বাপীং শীতবলী মপি। পলাশিনীং পাপহরাং সুপ্রযোগাং মহামতে॥ কাবেরী শুক্তিকাঞ্চাপি বেণ্বাং ভীমরথী মপি। রহস্যাং শতকুম্ভাঞ্চ

ক্ষীরা মহানদী ॥ পলাশিনী পাপহরা হেমা ঘৃতবতী তথা। মরুতী প্রবরা মেলা মহেন্দ্রা পাটলাবতী ॥ পুরাবতী মনুষ্কাঞ্চ জলধারা মহানদী। সদানীরা মধুষ্যাঞ্চ তথা চীরবতী নপি ॥ করীষিণী মণিকীঞ্চ বিপুলা সহিরণ্ময়ী। সদাকান্তা শিবাঞ্চৈব পঙ্কীঞ্চ মহানদী ॥ বিপ্রা বীরকরাঞ্চাপি বিশ্বামিত্রা কপিঞ্জলা। বসু সুবস্ত্রা গৌরীঞ্চ জবেরা মম্বুবাহিনী ॥ রথচিত্রা জ্যোতিরথা তুঙ্গবেণ্বা মহানদী। বৈলন্দী পিঞ্জলাঞ্চৈব তুঙ্গবেণ্বা মহানদী ॥ বিদিশা কৃষ্ণবেণ্বাঞ্চ হবিঃস্রাবা মহাপগা। সন্ধ্যা সমাসা বেদাশ্বা ভারদ্বাজীঞ্চ নিম্নগা ॥ শীব্রাঞ্চ পিচ্ছিলাঞ্চৈব কৌশিকী নিম্নগামপি। দুর্গা মন্ত্রশিলাঞ্চৈব ব্রহ্মমেধ্যা দৃশদ্বতী ॥ পরোক্ষামথ রোহীঞ্চ সামান্যা বরুণাসসি। সুরসা তপসা দাসী পর্ণাসাঞ্চ মহানদী ॥ মালবী বৃষভা ভাসা ব্রহ্মমেধ্যা বৃহদ্বতী। এতা শ্চান্যাশ্চ বহ্ব্যো বৈ মহানদ্যো দ্বিজর্ষভ ॥ সদা নিরাময়াকৃষ্ণা মন্দগা মন্দবাহিনী। চিত্রোপলা চিত্ররথা দুর্গাপি পাপহারিণী ॥ ব্রহ্মাণী চ মহাগৌরী কোষা চাপি মহানদী। শুক্তিমতী মনঙ্গা চ মঞ্জুলা বাহিনী তথা ॥ অগারী ঋষিজল্যা চ নদীমন্দাকিনী তথা। সুপর্ণা চ তথা গঙ্গা নারিষা চ সরস্বতী ॥ লৌহিত্য করতোষা চ তথৈব বৃষকাহ্বয়া। বিশ্বস্য মাতর শ্চৈতাঃ সর্বা শ্চৈব মহাফলাঃ ॥ তথা নদ্যস্ত্বপ্রকাশাঃ শতশশ্চ সহস্রশঃ। ইত্যেতাঃ সরিতো ব্রহ্মন্ সমাখ্যাতা স্তবানঘ ॥ * ॥ বক্ষ্যামি পর্বতাংশ্চাপি ভারতে সন্তি যে দ্বিজ। মলয়ো মঙ্গলপ্রস্থো মৈনাক শ্চত্রিকূটকঃ ॥ ঋষভঃ কূটকঃ কোল্লঃ সহ্যো দেবগিরি স্তথা। শ্রীশৈলো ঋষ্যমূকশ্চ শুক্তিমানৃক্ষ এব চ ॥ দ্রোণশ্চ পারিপাত্রশ্চ রৈবতঃ ককুভ স্তথা। গোবর্দ্ধন শ্চিত্রকূটো নীলো গোকর্ণ এব চ ॥ কোকামুখ ইন্দ্রকীল স্তথা কামগিরি দ্বিজ। * । অতঃপরং জনপদান্ বক্ষ্যামি দ্বিজসত্তম ॥ বিখ্যাতাঃ কুরুপাঞ্চালাঃ শাল্বা মাদ্রেয় জাঙ্গলাঃ। মৎস্যাঃ কুশট্টা মৌদ্গল্যা ভোজাঃ সিন্ধু কুলিন্দকাঃ ॥ সূরসেনাঃ পুলিন্দাশ্চ কুন্তয়ঃ কেশি কোশলাঃ। পাঞ্চালাঃ কৌশলাশ্চৈব বোধা মালা স্তথৈব চ ॥ চেদি মৎস্য করূষাশ্চ নৈকপৃষ্ঠা

যুগন্ধরাঃ। উত্তমাশ্চ দশার্ণাশ্চ কাশযো হপরকাশযঃ ॥ কুন্তযো হবন্তযশ্চৈব মলজা বিজযা স্তথা। আধিরাজ্যাঃ সঙ্গউাশ্চ চক্র বক্রাতযঃ শদাঃ॥ মানবাস্যোপবাহাশ্চ যকৃল্লোমান এব চ। বাহ্লীকা বাটধানাশ্চ শঙ্কলা শর্ম্ম চণ্ডকাঃ ॥ মল্লাঃ সুদেষ্ণাঃ প্রহ্লাদা মহিষাঃ শশিকা স্তথা। অপরান্তাঃ পরান্তাশ্চ আভীরাঃ কালতোযকাঃ॥ অটবী শিখরাশ্চৈব মেরুভূতাশ্চ মারিষ। উপাবিষ্ণানুবিষ্ণাশ্চ জঙ্গলাঃ কুরুবর্ণকাঃ ॥ কুউাঃ পরান্তা মাহেযা মাগধা মালবজ্জটাঃ। অন্ধ্রাশ্চ বহবো ব্রহ্মন্ কক্ষাঃ সামুদ্র নিষ্কুটাঃ॥ বহির্গির্য্যোঙ্গমলদা অন্তর্গির্য্য স্তথৈব চ। সহ্যুত্তরাঃ প্রাবৃষেযাঃ সুদেষ্টা যামুনা স্তথা॥ শকা নিষাদা নিষধা ভার্গবাশ্চ দ্বিজর্ষভ। পুণ্ড্রা ভোগাঃ কিরাতাশ্চ তথৈবানর্ত্ত নৈর্ঋতাঃ॥ তীরগ্রহাঃ সূরসেনাঃ কুন্তলাঃ কুশলা স্তথা। তিলভাবা মসাবাশ্চ গান্ধারা দর্শকা স্তথা॥ কাশ্মীরাঃ সিন্ধুসৌবীরা ইভিকা কন্যকা গণাঃ। অভীসাহা কুলূতাশ্চ মধুমত্তাঃ কুন্দকাঃ॥ রত্নবটাশ্চধর্ম্মজ্ঞসৌচলা বাহ্লিকা স্তথা। দর্বীবরা লবা দর্ব্বাঃ সুদামানঃ সুমল্লিকাঃ॥ বন্ধবোদশাঃ পার্শ্বরোমাণঃ কুশিকা স্তথা। রত্নবউাশ্চ ধর্ম্মজ্ঞ বাড গামরথোরগাঃ॥ রক্ষ্মাঃ করীষকাশ্চাপি কুলিন্দোপেত্যকা স্তথা। কচ্ছা গোপালকচ্ছাশ্চ মূষিকা বানবাসিকাঃ॥ কিরাতা বর্ব্বরাঃ সিদ্ধাঃ পার্ব্বতীযাশ্চ মারিষ। ওড্র ম্লেচ্ছাঃ কুসৈরিন্ধ্রা বৈদেহা স্তামলিপ্তকাঃ॥ তথা পরে জনপদা দক্ষিণা ব্রাহ্মণর্ষভ। দ্রবিড়াঃ কেরলাঃ প্রাচ্যা বিকল্প মূষকা স্তথা॥ কোবেউকা স্তথা চোলাঃ সৌহৃদা মলকা মলাঃ। ধ্বজিন্যুৎসবসংকেতা কোঙ্ক বেঙ্কট মালবাঃ॥ দণ্ডকাঃ কোরকাঃ প্রাচ্যাঃ কুঙ্গরাঙ্গারমারিকাঃ। তথৈব বিন্ধ্য চুলিকা ত্রিগর্ত্তাঃ সাল্ল সেনযঃ॥ সমঙ্গাঃ কবকাশ্চৈ তথৈবাপরবর্ত্তকাঃ। মূষকা স্তনবালাশ্চ পুলিন্দা বর্ব্বরৈঃ সহ॥ মুনিবাটাঃ শিবাটাশ্চ সরা বেগবশা স্তথা। বিদর্ভা কুন্দিকাঃ কাকজনাশ্চ ব্রাহ্মণর্ষভ॥ যবনাশ্চ শকাম্ভোজা স্তঙ্গনাঃ পরতঙ্গনাঃ। সকৃদ্বহাঃ কুলত্থাশ্চ দারুণা ম্লেচ্ছজাতযঃ॥ উত্তরাশ্চাপরে ম্লেচ্ছা হূনাঃ পারসিকৈঃ সহ। তথৈব চ মলা শচীনা দশার্ণা দশনালিকাঃ॥ অঙ্গ বঙ্গ

কলিঙ্গাশ্চ পহ্লবা গিরিগহ্বরাঃ। থাসীকা শ্চান্তচারাশ্চ বৈশ্য শূদ্রকুলানি চ॥ শূদ্রাভীরাশ্চ দরদা যেচান্যে ম্লেচ্ছ ভূনযঃ। আত্রেযাশ্চ ভরদ্বাজা স্তথৈব স্তনপোষকাঃ॥ দ্রেষকাশ্চ কুলিঙ্গাশ্চ কিরাতানাঞ্চ জাতযঃ। তোমরা হন্যমানাশ্চ তথৈব করভঞ্জকাঃ॥ এতে চান্যে জনপদাঃ প্রাচ্যোদীচ্যা স্তথৈব চ। উদ্দেশেন মযা দেশা স্তব সংকীর্ত্তিতা দ্বিজ॥ বর্ষে তু ভারতে ব্রহ্মন্ ত্রিবর্গস্য ফলং ভবেৎ। দুহ্যতে কামধুগ্ধেনু র্ভূমিঃ সম্যগনুষ্ঠিতা॥ তস্মিন্ শুভাশুভং কর্ম্ম যথোক্ত ফলদংনৃণাং। অন্যানি যানি বর্ষাণি ভনিস্বর্গাণি তানি বৈ॥ ভারতে বিহিতং কর্ম্ম যাগ ধ্যানাদি লক্ষণং। ফলং ভুনয তে সম্যক্ বিকর্ম্ম নরকাণ্যপি॥ তত্র সিদ্ধা নরা ব্রহ্মন্ তপসা রাধনেন চ। প্রযান্তি পরমংলোক মপবর্গঞ্চ মারিষ॥ কৃতংত্রেতা দ্বাপরঞ্চ কলিশ্চ ব্রাহ্মণর্ষভ। ভারতে তু ক্রমেণৈবং ভবন্তি হি যুগানি বৈ॥ চত্বারি চ সহস্রাণি বর্ষাণাং ব্রাহ্মণর্ষভ। আযুঃ সংখ্যা কৃতযুগে সংখ্যাতা ভারতে দ্বিজ॥ ত্রীণ্যেব তু সহস্রাণি ত্রেতাযাং ভারতে নৃণাং। দ্বেসহস্রে দ্বাপরে তু শত মেকং কলৌ স্মৃতং॥ তত্রাপি চ স্থিতি র্নাস্তি কলৌ ব্রাহ্মণ সত্তম। গর্ভস্থাশ্চ ম্রিযন্তে চ তথা জাতা ম্রিযন্তি চ॥ মহাবলা মহাসত্ত্বা জ্ঞানিনো ধর্ম্ম তৎপরাঃ। তপস্বিনো ধ্যান নিষ্ঠাঃ কৃতে জাযন্তি মানবাঃ॥ ত্রেতাযাং সর্ব্ব বর্ণাশ্চ স্বধর্ম্ম নিরতাঃ সদা। দ্বাপরে চ মহাভাগ ক্রূরাশ্চ পরহিংসকাঃ॥ লুব্ধা শ্চানৃতিকাশ্চৈব ক্রোধনা দুষ্কৃতে রতাঃ। কলৌ খলু ভবিষ্যন্তি ভারতে তাপস প্রজাঃ॥ সর্ব্বেষা মপি বর্ষাণাং ভারতং প্রবরং দ্বিজ। সিধ্যন্তি মানবা হ্যত্র হরিভক্তি পরাযণাঃ॥ প্রাযো ভাগবতাঃ সর্ব্বে ভারতে দ্বিজ সত্তম। নানা রূপাণি তীর্থানি ফলদানি নৃণামপি॥ জম্বূদ্বীপো মযা প্রোক্তো লক্ষযোজন বিস্তৃতঃ। সমানেন প্রমাণেন বেষ্টিতো লবণাম্ভসা॥ অষ্টাবত্র উপদ্বীপা মুনিভিঃ পরিকীর্ত্তিতাঃ। সিন্ধুমধ্যে মহাভাগ নানাবিধ জনাশ্রিতাঃ॥ নামানি তেষাং বক্ষ্যামি শৃণু বাৎস্যাযন দ্বিজ। সাগরস্য সুতৈ রশ্বান্বেষণে পরিতো মহীং॥ খনদ্ভিঃ কল্পিতা বিপ্র দ্বীপা অষ্টৌ মহার্ণবে। স্বর্ণপ্রস্থ শ্চন্দ্রশুক্লঃ সিংহলাবর্ত্তনৌ

তথা ॥ পঞ্চজন্য স্তথা মন্দহরিণো রমণকাহ্বয়ঃ। লঙ্কেতি কথিতা বিপ্র জম্বুদ্বীপস্য তে হস্তরা॥ ইতি পাদ্মে ভূমিখণ্ডে ভূগোল বর্ণনে ১৩০ অধ্যায়ঃ॥ ॥ শেষ উবাচ। প্লক্ষদ্বীপং প্রবক্ষ্যামি শৃণু বাৎস্যায়ন দ্বিজ। যন্মানং জম্বুদ্বীপস্য তথৈব লবণোদধেঃ॥ ততো দ্বিগুণ মানো হসৌ প্লক্ষদ্বীপো মহামতে। যম্বদ্বীপস্য চ যথা বেষ্টনং লবণাম্ভসা॥ সমানেন প্রমাণেন পুরঃ পরিখয়া যথা। পরিখায়া উপবনং যথা ভবতি বেষ্টনং॥ প্লক্ষদ্বীপ স্তথৈবাসৌ সংবেষ্ট্য লবণোদধিং। দ্বিলক্ষ যোজনাযামো বর্ত্তডে দ্বিজ সত্তম॥ তত্র জম্বু প্রমাণোস্তি দ্বীপ খ্যাতিকর স্তরুঃ। প্লক্ষো নাম মহাভাগ স্বর্ণবর্ণো হগ্নিধাম চ॥ তত্র বর্ষাণি সপ্তৈব সুভদ্রং যবসং শিবং। অমৃতাক্ষম শান্তানি ক্রমাদভয় মিত্যপি॥ সপ্তৈব সীমা গিরয়ো নদ্যঃ সপ্ত চ কীর্ত্তিতাঃ। মণিকূটো বজ্রকূটো জ্যোতিষ্মানিন্দ্রসেনকঃ॥ হিরণ্যষ্ঠীবো মেঘমালঃ সুপর্ণঃ সেতুশৈলকা। অরুণনৃমণা চৈব সাবিত্র্য সিবসী তথা॥ সত্যম্ভরা সুপ্রভা চ বাৎস্যায়ন ধৃতম্ভরা। এ[illegible] দর্শনাদেব পাব নাঃ॥ বর্ণানাং ব্রাহ্মণাদীনাং তত্র নর্ন্না-মান্যনুক্রমাৎ। হংসশ্চৈব পতঙ্গশ্চ শ্চোর্দ্ধায়ণশ্চ তৃতীযকঃ॥ সত্যাঙ্গ শ্চ চতুর্থো বৈ সর্বে ধর্ম্মার্থকোবিদাঃ। অন্যেচ পর্ব্বতা স্তত্র নদ্যশ্চৈব মহাফলাঃ॥ প্রাগাযতো মহা[illegible] মলযো নাম পর্ব্বতঃ। ততো মেঘাঃ প্রবর্ত্তন্তে প্রভবন্তি চ সর্ব্বতঃ॥ ততঃ পরেণ বিপ্রেন্দ্র জলধারস্ত পর্ব্বতঃ। তস্মাদগৃহ্নাতি বৈ তোয়ং বাসবঃ পৃথিবী কৃতে॥ বর্ষাসু হি ততো বৃষ্টি স্ততঃ সস্য সমুদ্ভবঃ। রৈবতো নাম তত্রাথ গিরি র্যত্র প্রতিষ্ঠিতঃ॥ রৈবতী নাম নক্ষত্রং দৃশ্যতে দিবি নোদিতা। উত্তরেণ তু তস্যাথ শ্যামো নাম গিরি র্মহান্॥ প্রাংশুঃ শ্রীমান্মহামেঘ প্রভযোজ্বল বিগ্রহঃ। যস্য শ্রিযা শ্যামবর্ণাঃ প্রজা স্তত্র মহামতে॥ অতঃপরং মহাভাগ দুর্গো নাম মহাগিরিঃ। কেশরী কেশর যুতো যস্মাদ্বাতঃ প্রবর্ত্ততে॥ প্লক্ষো নাম মহাদ্বীপো যত্র পূজ্যস্ত শঙ্করঃ। তত্র গচ্ছন্তি সিদ্ধাশ্চ চারণা দৈবতানি চ॥ ধার্ম্মিকাশ্চ প্রজা ব্রহ্মন্ জরা মৃত্যু বিবর্জ্জিতাঃ। দীর্ঘাযুষঃ সত্যপরা বর্ত্তন্তে ভোগ বর্দ্ধিতাঃ॥ নদ্যশ্চান্যা মহাপুণ্যা গঙ্গা চ বহুধা মতা। মহা

মণিভদ্রা সীতাসী বেণিকা তথা ॥ সুকুমারী কুমারী চ বঙ্কু বর্দ্ধনিকা তথা। সহস্রাণাং শতান্যেবং নদ্যঃ সংখ্যা ন শক্যতে ॥ তত্র পুণ্যা জনপদা শ্চত্বারো লোক সম্মতাঃ। মগাশ্চ মশ গাশ্চৈব মানসা মন্দগা স্তথা ॥ মৃগা ব্রাহ্মণভূয়িষ্ঠাঃ স্বকর্ম্ম নিরতা দ্বিজ। মশকেষু তু রাজন্যা ধার্ম্মিকাঃ সর্ব্বকামদাঃ ॥ মানসে চ মহাভাগ বৈশ্য ধর্ম্ম নিষেবিণঃ। মন্দগেষু তথা শূদ্রাঃ শূরা ধর্ম্মার্থ নিশ্চিতাঃ ॥ ন তত্র রাজা বিপ্রেন্দ্র নদণ্ডো নচ দণ্ড্যতা। সধর্ম্মে ণৈব তে সর্ব্বে রক্ষন্তি চ পরস্পরং ॥ ॥ প্লক্ষদ্বীপ সমানেন সমুদ্রেণ বৃতো বহিঃ। ইক্ষুরস নামেনৈব নানারত্নবতা দ্বিজ॥ শাল্মলোপি তথা দ্বীপঃ প্লক্ষাদ্দ্বিগুণ মানতঃ। চতুর্লক্ষ যোজনেন সুরোদেনাবৃতো মহান্॥ যত্র বৈ শাল্মলী নাম দ্বিলক্ষযোজনোচ্ছ্রিতা।দ্বীপ খ্যাতিকরো বৃক্ষঃ সুপর্ণেন কৃতালয়ঃ॥ তত্র বর্ষাণি সপ্তৈব কথ্যন্তে হত্র সুরোচনং। সৌমনস্যং রমণকং দেববর্ষ মিতি ক্রমাৎ ॥ পারিভদ্র মাপ্যায়ন মভিজ্ঞাত মিতি দ্বিজ। সেতু শৈলাশ্চ সপ্তৈ সুরসঃ শতশৃঙ্গকঃ॥ বামদেবশ্চ কুন্দশ্চ কুমুদঃ পুষ্পবর্ষকঃ। সহস্রশ্রুতি রিতি কুক্ষন্ নদ্যঃ সপ্তৈব কীর্ত্তিতাঃ॥ অনুমতিঃ সিনীবালী নন্দা রাকা সরস্বতী। রজনী চ কুহূশ্চৈব মহানদ্যঃ সুপুণ্যদাঃ ॥ তত্র বিপ্রাদযো বর্ণা ক্রমান্নামানি বিভ্রতি। আদ্যঃ শ্রুতধরো বর্ণ স্ততো বীর্য্যধরঃ স্মৃতঃ॥ বসুন্ধর স্তৃতীয়স্তু চতুর্থস্তু ইষুন্ধরঃ। সর্ব্বেতে সোম নাম্নানং ভগবন্তং যজন্তি হি॥ সুরোদং পরিবেষ্ট্যো হথ ততো দ্বিগুণ মানকঃ। ॥ কুশ দ্বীপো ঘৃতোদেন সমানেনাবৃতো দ্বিজ ॥ কুশস্তম্বো মহাংস্তত্র দ্বীপ খ্যাতিং করোতি চ। জাজ্বল্যমানো দীপ্তৈব মহাজ্বলনরাশিবৎ॥ তত্র বর্ষাণি সপ্তৈব সমানানি প্রমাণতঃ। বসুদানং দৃঢ রুচি র্নাভিগুপ্তং মহাস্তে॥ সত্যব্রতং বিপ্র নাম দেব নামেতি সপ্তমং। সপ্তৈব সীমাগিরয়ঃ কীর্ত্তিতা দ্বিজ সত্তম॥ বক্রশ্চৈব চতুঃ শৃঙ্গঃ কপিল শ্চিত্রকূটকঃ। দেবানীক ঊর্দ্ধরোমা দ্রবিণশ্চেতি সপ্তমঃ ॥ মহানদ্যশ্চ সপ্তৈব সর্ব্বপাপপ্রণাশনাঃ। রস কুল্যা মধুকুল্যা মিত্রবিন্দা চ মানদ॥ শ্রুতবিন্দা দেবগর্ব্বা মন্ত্রমালা ঘৃতচ্যুতা। তত্র বিপ্রাদযো বর্ণা নামান্তর ভৃতো দ্বিজ॥ কুশলঃ প্রথমো বর্ণঃ কোবিদস্তু দ্বিতীয়কঃ। অতি

মুক্ত স্তৃতীযস্তু চতুর্থঃ জলকঃ স্মৃতঃ ॥ তে সর্ব্বে জ্ঞান সম্পন্না জাতবেদ স্বরূপিণঃ ॥ ভজন্তে ভগবন্তং বৈ কর্ম্ম কৌশলযাজিনঃ॥ * ॥ ঘৃতোদাচ্চ তথা দ্বীপো দ্বিগুণঃ ক্রৌঞ্চ সংজ্ঞকঃ। ক্ষীরোদেন সমানেন বেষ্টিতো ব্রাহ্মণর্ষভ ॥ ক্রৌঞ্চো নাম গিরি যত্র দ্বীপ খ্যাতিকরো মহান্। মহাসেন শরাঘাত কৃতচ্ছিদ্রো মহামতে॥ ক্ষীরোদেনাভিষিক্তশ্চ সততং বীচি সঞ্চযৈঃ। বর্ষাণি তত্র সপ্তেব তেষাং নামানি মে শৃণু ॥ আম্রো মধুরুহো মেঘপৃষ্ঠশ্চাপি বনস্পতিঃ। লোহিতার্ণঃ সুধামাচ ভ্রাজিষ্ঠশ্চাপি সপ্তমং ॥ গিরযশ্চাপি সপ্তেব বর্ষসীমা করাদ্বিজ। শুক্লোহথ বর্দ্ধমানশ্চ ভোজন উপবর্হণঃ ॥ নন্দনো নন্দনশ্চৈব সর্ব্বতোভদ্র ইত্যপি। সপ্ত তত্র মহানদ্যঃ পাবনা ব্রাহ্মণর্ষভ ॥ অভযা চামৃতৌঘা চ তৃপ্তিরূপবতী তথা। তীর্থবত্যার্য্যকা শুক্রা পবিত্রবত্যপি স্মৃতা॥ বিপ্রাদয স্তথা বর্ণাঃ খ্যাতা নামান্তরেণ তু। পুরুষঃ প্রথমো বর্ণো দ্বিতীযো ঋষভঃ স্মৃতঃ॥ তৃতীযো দ্রবিণো নাম দেব সংজ্ঞ শ্চতুর্থকঃ। মূর্ত্তিং জলমযীং বিষ্ণো র্ধ্যাযন্তি চ যজন্তি চ ॥ * ॥ এবং পরস্তাৎ ক্ষীরোদাৎ শাকদ্বীপো দ্বিজর্ষভ। আগামেন হি না-বিজ্ঞেযো দ্বাত্রিংশল্লক্ষযোজনঃ ॥ দধিমণ্ডোদকেনৈব সমানেন স সিন্ধুনা। পরীতো ভাতি তত্রাস্তি শাকোনাম মহীরুহঃ॥ দ্বীপখ্যাতিকরঃ শ্রীমান্ বাসযন্ দ্বীপমেব তং। বর্ষাণি তত্র সপ্তেব পুরোজব মনোজবৌ ॥ ধূম্রানীকো বেপমানো বিশ্বাধারশ্চ মারিষ। বহুরূপ শ্চিত্ররেফো গিরযোপি চ সপ্তৈব ॥ ঈশান উরুশৃঙ্গশ্চ বলভদ্রো মহানসঃ। শতকেশব নামা চ সহস্র স্রোত এব চ॥ দেবপালোপি সপ্তেতে বর্ষসীমা প্রবর্ত্তকাঃ। নদ্যঃ সপ্তেব বিখ্যাতা আযুর্দ্দাপ্যনঘা দ্বিজ ॥ সহস্রস্রুতিঃ পঞ্চনদী নির্ম্মিতি রপরাজিতা। বিখ্যাতোভয সৃষ্টিশ্চ মহাপুণ্যা মহাফলাঃ ॥ বিপ্রাদয স্তথা বর্ণা খ্যাতা নামান্তরেণ তু। আদ্যো ঋতব্রতো নাম তত্ত্বঃ সত্যব্রত স্মৃতঃ ॥ দানব্রতান ব্রতৌ চ তৃতীযশ্চ চতুর্থকঃ। ভগবন্তং বাযুরূপং ভজন্তে চ যজন্তি চ ॥ * ॥ তথৈব দধিমণ্ডোদাৎ পরস্তাৎ পুষ্করো মহান্। দ্বিগুণেন প্রমাণেন দ্বীপঃ স্বাদূদকেন তু ॥ পরিবীতঃ সমানেন সিন্ধুনা ব্রাহ্মণর্ষভ। যত্র পুষ্কর মত্যুচ্চং জ্বলজ্জ্বলন সন্নিভং ॥

দ্বীপখ্যাতি কর° পত্র সহস্রাযুত ॥ শোভিত°। যদাহু রাসন° বিশ্বসৃজস্তস্য প্রজাপতেঃ ॥ দ্বীপমধ্যে স্থবধিগিরি রেক এব মহানতে। স মানসোত্তরো নাম প্রাকার ইব বেষ্টকঃ ॥ তস্য পূর্বাপরৌ পার্শ্বৌ দেবর্ষে তত্র মারিষ। সিন্ধো র্বেষ্টন মত্রৈক° গিরে র্বেষ্টনক° পর°॥ রমণক° ধাতকঞ্চ দ্বে বর্ষে নামতঃ স্মৃতে। মান° তস্য গিরে র্বিপ্রাযুত যোজন মুচ্ছ্রিত° ॥ তাবদেব তথাযাম স্তস্যোপরি পুরাণি চ। চত্বারি লোকপালানা মিন্দ্রাদীনা° দ্বিজর্ষভ ॥ যঃ পরিক্রমমাণস্য মেরু° বিপ্র বিবস্বতঃ। মূর্দ্ধা বিভর্ত্তি শৈলেন্দ্র শ্চক্র° সম্ব সরাত্মক°॥ অধ্যাসতে চ দ্বৌ পার্শ্বৌ প্রজা স্তস্য মহাবলাঃ। তত্র স°জ্ঞান্তর° নাস্তি বর্ণানা° ব্রাহ্মণর্ষভ ॥ স্বাদূদকস্য পরতো লোকালোকাচলো মহান্। লোকস্য চাপ্যলোকস্য মধ্যে গিরি রবস্থিতঃ॥ প্রাকার ইব স°বেষ্ট্য লোকান্ সর্বান্মহানতে। লোকালোকাচলো নাম তেনাসৌ পরিকীর্ত্তিতঃ॥ মানসোত্তর মের্বো স্তু অন্তরে যাবতী মহী। তাবতী কাঞ্চনী ভূমি র্লোকালোকাৎ পরে দ্বিজ॥ যত্র প্রণিহিত° বস্তু কথঞ্চিন্নোপলভ্যতে। সৌবর্ণী কান্তি স্বদ্দীপ্তা সর্ব্ব বর্ণ প্রমাথিনী ॥ অতঃ সর্বাণি সত্ত্বানি তা° ভূমি° বর্জয়ন্তি হি। লোকালোকো গিরি র্যস্তু লোকান্তে বর্ত্ততে মহান্ ॥ আবৃণোতি স তেজা°সি সূর্য্যাদীনা মপি দ্বিজ। তমতিক্রম্য জ্যোতী°ষি ক্ষমন্তে ন প্রবর্ত্তিত°॥ তাবদস্মাহবান্ ব্রহ্মযাদেন চ তাদৃশঃ। আযাম বিস্তরে পৃথ্বী পঞ্চাশৎকোটি যোজনা॥ তস্যা শ্চতুর্থ ভাগো হয়° লোকালোকাচলো গিরিঃ। তস্যোপরিষ্টাচ্চত্বারো গজেন্দ্রাঃ সুমহাবলাঃ॥ নিযুক্তা ব্রহ্মণা ভূমি° করৈ রাকৃষ্য স°স্থিতাঃ। ভগবানপি তত্রৈব বিষ্বক্সেনাদিভি র্বৃতঃ॥ পার্শ্বদপ্রবরৈ র্ব্রহ্মন্ ভূজৈ র্বহুভি রুচ্ছ্রিতৈঃ। ধারয়ন্ জগতী মাস্তে আকল্প মপি মারিষ॥ যো হন্ত বিস্তার এতস্যা ভূম্যা স্তে পরিবর্ণিতঃ। তাবতী ভূরলোকাখ্যা সাদ্ধ্য সন্তমসাবৃতা॥ ততো যোগেশ্বর গতি র্যোগিনা° প্রাপ্য মুত্তম°। স্থান° ভগবতঃ সাক্ষাৎ শ্বেতদ্বীপ ইতীর্য্যতে ॥ ইতি তে কথিত° ব্রহ্মন্ ভূগোলস্যোপবর্ণন°। ব্যাস উবাচ। য ইদ° শৃণুযাৎ সূত ভূগোলস্যানুবর্ণন°॥ প্রদক্ষিণীকৃতা তেন সশৈল

যন কাননা। স সাগরা চ সদ্বীপা স বর্ষা চ বসুন্ধরা ॥ ইতি শ্রীপদ্মপুরাণে ভূমিখণ্ডে ভূগোল বর্ণনং নাম ১৩১ অধ্যায়ঃ ॥ ❀ ॥ জ্যোতিষশাস্ত্রোক্ত ভূগোলং যথা। সিদ্ধিং সাধ্য মুপৈতি যৎ স্মরণতঃ ক্ষিপ্রং প্রসাদাত্তথা যস্যা শ্চিত্র পদাস্বলংকৃতিরলং লালিত্য লীলাবতী। নৃত্যন্তী মুখরঙ্গগেব কৃতিনাং স্যাদ্ভারতী ভারতী। তং তাঞ্চ প্রণিপত্য গোল মমলং বালাববোধং ব্রুবে ॥ ❀ ॥ গোলগ্রন্থ কথনে কারণ মাহ। মধ্যাদ্যং দ্যুসদাং যদত্র গণিতং তস্যোপপত্তিং বিনা প্রৌঢিং প্রৌঢ সভাসু নৈতি গণকো নিঃসংশযো ন স্বযং। গোলে সা বিমলা করামলকবৎ প্রত্যক্ষতো দৃশ্যতে। তস্মাদস্ম্যুপপত্তি বোধ বিষযে গোল প্রবন্ধোদ্যতঃ ॥ ❀ ॥ অথ গোল প্রশংসযা গোলানভিজ্ঞ গণকোপহাস মাহ। ভোজ্যং যথা সর্ব রসং বিনাজ্যং রাজ্যং যথা রাজ বিবর্জ্জিতঞ্চ সভা নভাতীব সুবক্তৃ হীনা গোলানভিজ্ঞো গণক স্তথৈব ॥ বাদী ব্যাকরণং বিনৈব বিদুষাং ধৃষ্টঃ প্রবিষ্টঃ সভাং জল্পন্নল্পমতিঃ স্মযাৎ পটুবটু ভ্রূভঙ্গ বক্রোক্তিভিঃ। হ্রীতঃ সন্নুপহাস মেতি গণকো গোলানভিজ্ঞস্তথা জ্যোতির্বিৎ সদসি প্রগল্ভগণক প্রশ্ন প্রপঞ্চোক্তিভিঃ ॥ ❀ ॥ অথ গোল স্বরূপ মাহ। দৃষ্টান্ত এবাবনিভ গ্রহাণাং সংস্থান মান প্রতিপাদনার্থং। গোলঃ স্মৃতঃ ক্ষেত্র বিশেষ এব প্রাজ্ঞৈরতঃ স্যাদ্গণিতেন গম্যঃ ॥ ❀ ॥ অথ গণিত প্রশংসা মাহ। জ্যোতিঃ শাস্ত্রফলং পুরাণ গণকৈ রাদেশ ইত্যুচ্যতে নূনং লগ্নবলাশ্রিতঃ পুন রযং তৎ স্পষ্ট খেটাশ্রযং। তে গোলাশ্রযিণো হন্তরেণ গণিতং গোলোপি ন জ্ঞাযতে তস্মাৎ যো গণিতং ন বেত্তি স কথং গোলাদিকং জ্ঞাস্যতি ॥ ❀ ॥ অথ জ্যোতিষশাস্ত্র শ্রবণাধিকারি লক্ষণমাহ। দ্বিবিধ গণিত মুক্তং ব্যক্ত মব্যক্ত সংজ্ঞং তদবগমন নিষ্ঠঃ শব্দশাস্ত্রে পটিষ্ঠঃ। যদি ভবতি তদেদং জ্যোতিষং ভূরি ভেদং প্রপঠিত মধিকারী সো হন্যথা নাধিকারী ॥ ❀ ॥ ব্যাকরণ বর্ণন মাহ। যো বেদ বেদ বদনং সদনং হি সম্যগ্ব্রাহ্ম্যং সবেদ মপি বেদ কিমন্য শাস্ত্রং। যস্মাদতঃ প্রথম মেতদধীত্য ধীমান্ শাস্ত্রান্তরস্য ভবতি শ্রবণে হধিকারী ॥ ❀ ॥ অথ গোলস্বরূপস্য প্রবৃত্ত্য-

র্থে মন্যোক্ত প্রকারেণাহ। গোলং শ্রোতুং তব যদি মতি ভাস্করীয়ং শৃণু ত্বং নো সংক্ষিপ্তো নচ বহুবৃথা বিস্তরঃ শাস্ত্রতত্ত্বং। লীলাগম্যঃ সুললিত পদঃ প্রশ্নরম্যঃ স যস্মাদ্বিদ্বন্ বিদ্বৎ সদসি পঠতাং পণ্ডিতোক্তিং ব্যনক্তি॥ ❋ ॥ অথ ভূসংস্থানং প্রশ্ন শ্লোক দ্বযেনাহ। ভূমন্ডচক্র চক্রান্ত র্গগণে গগণেচরৈঃ। বৃতা ধৃতা ধরা কেন যেন নেয নিযাদধঃ॥ কিমাকারা কিযন্মানা নানা শাস্ত্র বিচারণাৎ। কীদৃগ্দ্বীপ জলাদ্রীন্দ্র সমুদ্রৈ মুদ্রিতোচ্যতাং॥ ❋ ॥ অথ গ্রহস্ফুটী করণোপপত্তি প্রশ্নং শ্লোকদ্বযেনাহ। সংসিদ্ধো দ্যুগণাদ্যুগাদি ভগণৈঃ খেটোনুপাতেন যঃ স্যাত্তস্যা স্ফুটতা কথং কথমভূৎ স্পষ্টীকৃতি নৈকধা। কিং দেশান্তর মুদ্রমান্তর মহো বাহ্বন্তরং কিঞ্চরং কিঞ্চোচ্চং মৃদু চঞ্চলঞ্চ তদিদং কস্তাত পাতঃ স্মৃতঃ॥ কিং কেন্দ্রং কিমু কেন্দ্রজং কিমু চলং কিম্বা চলং তৎ ফলং কস্মাত্তৎ সহিতঃ স্ততশ্চ রহিতঃ খেট স্ফুটো জাযতে॥ কিং দৃক্কর্ম্ম তথোদযাস্ত সমযে দ্বেধা বিদধ্যু র্বুধাঃ। সর্ব্বং মে বিমলং বদামল মলং গোলং বিজানাসি চেৎ॥ ❋ ॥ অথ ত্রিপ্রশ্নোদিত দিনমান ভেদ প্রশ্নং শ্লোক দ্বযেনাহ॥ মহদহঃ কিমহো রজনী তনু র্দিনমণৌ গগণকোত্তর গোলগে। ননু তনু র্দিবসো মহতী নিশা বদ বিচক্ষণ দক্ষিণ দিগ্গতে॥ ভবতি কিং দ্যুনিশং দ্যুনিবাসিনাং দ্যুমণি বর্ষ মিতঞ্চ সুরদ্বিষাং। পিতৃষ কিং শশি মাসমিতং তথা যুগ সহস্র যুগং দ্রুহিণস্য কিং॥ ❋ ॥ অথ রাশ্যুদয মান কাল ভেদ প্রশ্নঞ্চাহ। ভবলযস্য কিলার্ক লবাঃ সমাঃ কিমসমৈঃ সমযৈঃ খলু রাশযঃ। সমুপযান্ত্যুদযং কিমু গোলবিম্ববিষযে ত্বখিলে ত্বপি তে সমাঃ॥ ❋ ॥ অথ দ্যুজ্যা স্তজ্যাদি সংস্থান প্রশ্নং বৃত্তার্দ্ধেনাহ। দ্যুজ্যা স্তজ্যা হ্পম সম নরাগ্রাক্ষ লম্বাদিকানাং বিদ্বন্ গোলে বিবতি হি যথা দর্শযক্ষেত্র সংস্থাং। অথ চন্দ্রার্ক গ্রহণযো দিক্কাল ভেদাদ্যুপপত্তি প্রশ্নান্ শ্লোকোত্তরার্দ্ধেনাহ। তিথ্যন্তে চেৎ গ্রহ উডুপতেঃ কিম্ন ভানো স্তদানীং ইন্দোঃ প্রাচ্যাং ভবতি হি রবেঃ প্রগ্রহঃ কিং প্রতীচ্যাং॥ লম্বনং বদ কিং কাচ নতি ম্নতিমতাং বর। তৎ সংস্কৃতি স্তিথৌ বাণে কিং তে সিদ্ধে স্তুতঃ স্তুতঃ॥ ❋ ॥ অথ শৃ-

জ্যোম্নতো চন্দ্রস্য শুক্লস্য ক্ষয বৃদ্ধি প্রশ্নমাহ। শুক্লস্য দ্বিজ রাজ এষ মহসো হান্যাঃ স্বর্বৃত্তঃ স্বতঃ সদ্বৃত্ত ভূগতোপ্যহো ভুনবশাদ্দোষাতিগ- স্বাদিব। সংপ্রাপ্যাথ পুন স্তর্দা তনু মত স্তস্যাশুযে নৈব কিং শুক্লস্য ক্র- মশ স্তথৈব মহসো বৃদ্ধ্যেতি সদ্বৃত্ত তাং॥ ✻ ॥ অথ প্রথম প্রশ্নস্য পৃ- থিবী সংস্থানোপপত্তে রুত্তরং বিব- ক্ষুরাদি সর্গে পৃথিব্যাদীনাং তত্ত্বানা- মাদি তত্ত্বং নিখিল জগজ্জনৈক বী- জং পরং ব্রহ্ম মনসা প্রণিপত্যাদৌ তাবৎ তজ্জয মাহ। যস্মাৎ ক্ষব্ধ প্রকৃতি পুরুষাভ্যাং মহানস্য গর্ত্তে হহংকারো ভূৎ খক শিখি জলো র্ব্য- স্ততঃ সংহতেশ্চ। ব্রহ্মাণ্ডং যজ্জঠরগ মহীপৃষ্ঠ নিষ্ঠো বিরিঞ্চি র্বিশ্বং শশ্বৎ সৃজতি পরমং ব্রহ্ম তত্তত্ত্ব মাদ্যং॥ ✻॥ অথ ভূমেঃ স্বরূপ মাহ। ভূমেঃ পিণ্ডঃ শশাঙ্ক জ্ঞ কবি রবি স্বজে জ্যার্কি নক্ষত্র কক্ষা বৃত্তৈ র্বৃত্তো বৃতঃ সন্মৃদনিল সলিল ব্যোম তেজোম- যো হযং। নান্যাধারঃ স্বশক্ত্যা বি- যতি চ নিযতং তিষ্ঠতীহাস্য পৃষ্ঠে নিষ্ঠং বিশ্বঞ্চ শশ্বৎ সদনুজ মনুজা দিত্যদৈত্যং সমন্তাৎ॥ সর্ব্বতঃ প র্বতারান গ্রাম চৈত্য চয়ৈ শ্চিতঃ। কদম্ব স্বসুম গ্রন্থিঃ কেশর প্রকরৈ রিব॥ ✻ ॥ অথ পুরাণেষু ভূমেরাধার পরম্পরা যা পঠিতা তাং নিরাকর্ত্তু মাহ। মূর্ত্তো ধর্ত্তা চেদ্ধরিত্র্যা স্তদন্য স্তস্যাপ্যান্যো হপ্যেব মত্রা নবস্থা॥ অন্ত্যে কল্প্যা চেৎ স্বশক্তিঃ কিমাদ্যে কিং নো ভূমিঃ সাষ্ট মূর্ত্তেশ্চ মূর্ত্তিঃ ॥ ✻॥ অ[illegible] ভূমেঃ স্বশক্তি রিত্যা শঙ্কাং প[illegible]। যথো- ষ্ণতার্কানলযোশ্চ শীততা বিধৌ দ্রু- তিঃ কে কঠিনত্ব মশ্মনি। মরুচ্চলো ভূরচলা স্বভাবতো যতো বিচিত্রাঃ খলু বস্তু শক্তয়ঃ॥ আকৃষ্ট শক্তিশ্চ মহী তযা যৎ খস্থং গুরু স্বাভিমুখং স্বশক্ত্যা। আকৃষ্যতে তৎ পততীব ভাতি সমে সমন্তাৎ স্বরিযং যত্তঃ খে॥ ✻॥ অথ বৌদ্ধানাং যুক্তিমাহ। ভ পঞ্জরস্য ভ্রমণাবলোকাদাধা- র শূন্যা স্বরিতি প্রতীতিঃ। খস্থং ন দৃষ্টং গুরু চ ক্ষমাতঃ খে হধঃ প্রযা- তীতি বদন্তি বৌদ্ধাঃ॥ দ্বৌ দ্বৌ র- বীন্দু ভগণৌ চ তদ্বদেকান্তরৌ তাবু- দযং ব্রজেতাং। যদব্রুবংশ্চব মনর্থবা- দান্ ব্রবীম্যত স্তান্ প্রতিযুক্তি যুক্তং ॥ ✻ ॥ অথ তেষাং যুক্তি ভঙ্গমাহ। ভূঃ খে হধঃ খলু যাতীতি বুদ্ধি বৌদ্ধ মুধা কথং। যাতাযাতঞ্চ দৃষ্ট্বাপি খে

স্যৎ ক্ষিপ্তং গুরু ক্ষিতিং ॥ * ॥ অথ জিনানাং যুক্তি ভঙ্গ মাহ। কিংগণ্যংতব বৈগুণ্যং দ্বৈগুণ্যং যো বৃথা কৃথাঃ। ভার্কেন্দূনাং বিলোক্যাহ্ন। ধ্রুবমৎস্যপরিভ্রমং ॥ * ॥ ভূগোলস্য সমতাং নিরাকর্তুমাহ। যদি সমা মুকুরোদর সন্নিভা ভগবতী ধরণী তরণিঃ ক্ষিতেঃ। উপরি দূরগতোপি পরিভ্রমন্ কিমু নরৈ রমরৈ রিব নেক্ষতে ॥ যদি নিশা জনকঃ কনকাচলঃ কিমু তদন্তরগঃ স ন দৃশ্যতে। উদগয়ং ননু মেরু রথাংশুমান্ কথমুদেতি স দক্ষিণ ভাগতঃ ॥ * ॥ অথ প্রত্যক্ষ বিরোধ শঙ্কাং নিরস্যন্নাহ। সমো যতঃ স্যাৎ পরিধেঃ শতাংশঃ পৃথ্বী চ পৃথ্বী নিতরাং তনীয়ান্। নরশ্চ তৎপৃষ্ঠ গতস্য কৃৎস্না সমেব তস্য প্রতিভাত্যতঃ সা ॥ * ॥ প্রোক্তস্য ভূপরিধি প্রমাণস্য উপপত্তি মাহ। পুরান্তরং চেদিদমুত্তরং স্যাৎ তদক্ষ বিশ্লেষ লবৈ স্তদা কিং। চক্রাংশকৈ রিত্যনুপাত যুক্ত্যা যুক্তং নিরুক্তং পরিধেঃ প্রমাণং ॥ * ॥ তদেব দৃটীকরণমাহ। নিরক্ষ দেশাৎ ক্ষিতিষোড়শাংশে ভবেদবন্তী গণিতেন যস্মাৎ। তদন্তরং ষোড়শ সংগুণং স্যাদ্ভূমান মস্মাদ্বহু কিং তদুক্তং ॥ শৃঙ্গোন্নতি গ্রহযুতি গ্রহণোদয়াস্ত ছায়াদিকং পরিধিনা ঘটতে ঽমুনা হি। নান্যেন তেন জগু রুক্তমহী প্রমাণ প্রামাণ্য মন্বয়যুজা ব্যতিরেককেণ ॥ * ॥ অথ ভূগোলে পুর নিবেশ মাহ। লঙ্কা কু মধ্যে যমকোটি রস্যাঃ প্রাক্ পশ্চিমে রোমকপত্তনঞ্চ। অধ স্ততঃ সিদ্ধপুরং সুমেরুঃ সৌম্যেথ যাম্যে বড়বানলশ্চ। কুবৃত্ত পাদান্তরিতানি তানি স্থানানি ষড় গোলবিদো বদন্তি। বসন্তি মেরৌ সুরসিদ্ধ সংঘা ঊর্দ্ধে চ সর্ব্বে নরকাঃ সদৈত্যাঃ ॥ যো যত্র তিষ্ঠত্যবনীতলস্থ মাত্মান মস্যা উপরি স্থিতঞ্চ। স মন্যতে ঽতঃ কু চতুর্থ সংস্থা মিথশ্চ তে তির্য্যগিবামনন্তি ॥ অধঃ শিরস্কা কুদলান্তরস্থা ছায়া মনষ্যা ইব নীরতীরে। অনাকুলা স্তির্য্যগধঃ স্থিতাশ্চ তিষ্ঠন্তি তে তত্র বয়ং যথাত্র ॥ * ॥ অথ দ্বীপানাং সমুদ্রাণাঞ্চ সংস্থান মাহ। ভূমেরর্দ্ধং ক্ষারসিন্ধো রুদক্স্থং জম্বুদ্বীপং প্রাহু রাচার্য্য বর্য্যাঃ। অর্দ্ধে ঽন্যস্মিন্ দ্বীপ ষট্কস্য যাম্যে ক্ষার ক্ষীরাদ্য ম্বুধীনাং নিবেশঃ ॥ লবণ জল মতো দধি দুগ্ধ সিন্ধুশ্চ তস্মাদমৃত মমৃত রশ্মিঃ শ্রীশ্চ যস্মাদ্বভূব। নহিত্ত

চরণপদ্মঃ পদ্মজন্মাদি দেবৈ র্বসতি ।। সকল বাসো বাসুদেবশ্চ যত্র ।। দধ্নো ঘৃতস্যেক্ষুরসস্য তস্মান্মদ্যস্য চ স্বাদুজলস্য চাম্ব্যঃ। স্বাদূদকান্ত র্বডবানলো হসৌ পাতাল লোকাঃ পৃথিবীপুটানি ।। চঞ্চৎ ফণা মণিগণাংশু কৃত প্রকাশা এতেষ সাসুরগণাঃ ফণিনো বসন্তি। দীব্যন্তি দিব্য রমণী রমণীয দেহৈঃ সিদ্ধাশ্চ তত্র হি লসৎকনকাব ভাসৈঃ ।। শাকং ততঃ শাল্মল মত্র কৌশং ক্রৌঞ্চঞ্চ গোমেদক পুষ্করে চ। দ্বযো র্দ্বযো রন্তর মেক মেকং সমুদ্রযো র্দ্বীপ মুদাহরন্তি ।। ❀ ।। অথ জম্বূদ্বীপ মধ্যে গিরি নিবেশ বশেন নবখণ্ডান্যাহ। লঙ্কা দেশাদ্ধিমগিরি রুদক্ হেমকূটশ্চ তস্মাত্তস্মাচ্চান্যো নিষধ ইতি তে সিন্ধু পর্য্যন্ত দৈর্ঘ্যাঃ। এবং সিদ্ধাদুদগপি পুরাৎ শৃঙ্গবচ্ছুক্ল নীলা বর্ষাণ্যেষাং ত্রঃণ্ড রিহ বুধা অন্তরে দ্রৌণিদেশান্ ।। ভারত বর্ষ মিদং হ্যুদগস্মাৎ কিন্নর বর্ষ মতো হরিবর্ষং। সিদ্ধপুরাচ্চ তথা কুরু তস্মাদ্বিদ্ধি হিরণ্ময রম্যক বর্ষে ।। মাল্যবাংশ্চ যমকোটি পত্তনাদ্রোমকাচ্চ কিল গন্ধমাদনঃ। নীল শৈল নিষধাবধী চ তৌ অন্তরাল মনযো রিলাবৃতং ।। মাল্যবজ্জলধি মধ্যবর্ত্তি যত্তত্তু ভদ্রতুরগং জগুর্বুধাঃ। গন্ধ শৈল জলরাশি মধ্যগং কেতুমালক মিলা কলাবিদঃ ।। নিষধ নীল সুগন্ধ সুমাল্যকৈ রল মিলাবৃত মাবৃত মাবভৌ। অমর কেলি রুলায সমাকুলং রুচির কাঞ্চন চিত্র মহীতলং ।। ❀ ।। অথ মেরু সংস্থান মাহ। ইহ হি মেরু গিরিঃ কিল মধ্যগঃ কনক রত্নময স্ত্রিদশালযঃ। দ্রুহিণজন্ম ভুপদ্মজ কর্ণিকেতি চ পুরাণবিদঃ সমবর্ণযন্ ।। বিষ্কম্ভ শৈলাঃ খলু মন্দরোস্য সুগন্ধ শৈলো বিপুলঃ সুপার্শ্বঃ। তেষু ক্রমাৎ সন্তি চ কেতুবৃক্ষাঃ কদম্ব জম্বূ বট পিপ্পলাখ্যাঃ ।। জম্বুফলামল গলদ্রসতঃ প্রবৃত্তা জাম্বূনদী রসযুতা মৃদভূৎ সুবর্ণং। জাম্বূনদং হি তদতঃ সুর সিদ্ধ সংঘাঃ শশ্বৎ পিবন্ত্যমৃতপান পরাঙ্মুখাস্তে ।। বনং তথা চিত্ররথং বিচিত্রং তেষ্বপ্সরো নন্দন নন্দনঞ্চ। ধৃত্যাহ্বযং যৎ ধৃতিকৃৎ সুরাণাং ভ্রাজিষ্ণু বৈভ্রাজ মিতি প্রসিদ্ধং ।। সরাংস্যথৈতেষ্বরুণঞ্চ মানসং মহাহ্রদং শ্বেতজলং যথা ক্রমং। সরঃসু রামা রমণ প্রমালসাঃ সুরা রমন্তে জলকেলি লালসাঃ।। সদ্রত্ন কাঞ্চনময়ং শিখর ত্রযঞ্চ মেরৌ মুরারি ক পুরারি

পুরাণি তেষু। তেষামধঃ শতমথ জ্বলনান্তকানাং রক্ষোম্বুপানিল শশীশ পুরাণি চাষ্টৌ॥ ॥ তত্র অন্য বিশেষ মাহ। বিষ্ণুপদী বিষ্ণুপদাৎ প্রচ্যুতা মেরৌ চতুর্দ্ধাসীৎ বিষ্কম্ভাচল মস্তক শস্তসরঃ সংগতা গতা বিগতি॥ সীতাখ্যা ভদ্রাশ্বং সালকনন্দা চ ভারতং বর্ষং। চক্ষুশ্চ কেতুমালং ভদ্রাখ্যা চোত্তরান কুরূন্ যাতা॥ যা কর্ণিতাভিলসিতা দৃষ্টা স্পৃষ্টাবগাহিতা পীতা। উক্তা স্মৃতা বা পুনাতি বহুধাপি পাপিনঃ পুরুষান্॥ যাং চলিতে দলিতাখিল বন্ধো গচ্ছতি বল্লতিতৎ পিতৃসংঘঃ। প্রাপ্ত তটৌ বিজিতান্তক দূতো যাতি নরো নিরযাৎ সুরলোকং॥ ॥ অথ ভারতবর্ষ মধ্যে নবখণ্ডানি সপ্তকুলাচলাংশ্চাহ॥ ঐন্দ্রং কসেরু স কলং কিল তাম্রপর্ণ মন্যদ্গভস্তিমদতশ্চ কুমারিকাখ্যং। নাগঞ্চ সৌম্যমিহ বারুণ মন্ত্যখণ্ডং গান্ধর্ব সংজ্ঞমিতি ভারতবর্ষ মধ্যে॥ বর্ণ ব্যবস্থিতি রিহৈব কুমারিকাখ্যে শেষেষু চান্ত্যজজনা নিবসন্তি সর্ব্বে। মাহেন্দ্র শুক্তি মলয র্ক্ষক পারিপাত্রাঃ সহ্যঃ সবিন্ধ্য ইহ সপ্ত কুলাচলাখ্যাঃ॥ ॥ অথ লোক ব্যবস্থা মাহ। ভূর্লোকাখ্যো দক্ষিণে ব্যক্ষদেশাদস্মাৎ সৌম্যো হ্যং ভুবঃ স্বশ্চ মেরুঃ। অভ্যঃ পুণ্যৈঃ খে মহঃ স্যাজ্জনোতো হ্যনল্পানল্পৈঃ স্বৈ স্তপঃ সত্যমন্ত্যঃ॥ ॥ দিগ্ব্যবস্থা মাহ। লঙ্কাপুরে হর্কস্য যদোদয়ঃ স্যাত্তদা দিনার্দ্ধং যমকোটি পুর্য্যাং। অধঃ স্ততঃ সিদ্ধপুরে হস্তকালঃ স্যাদ্রোমকে রাত্রিদলং তদৈব॥ যত্রোদিতো হর্কঃ কিল তত্র পূর্ব্বা তত্রাপরা যত্র গতঃ স চাস্তং। তন্মৎস্যতোন্যে চ ততোখিলানা মুদক্ স্থিতো মেরু রিতি প্রসিদ্ধং॥ ॥ অথ বিশেষ মাহ। অথোজ্জয়িন্যাঃ কুচতুর্থভাগে প্রাচ্যাং দিশিস্যাদ্যমকোটি রেব। ততশ্চ পশ্চাম্ ভবেদবন্তী লঙ্কৈব তস্যাঃ ককুভি প্রতীচ্যাং॥ তথৈব সর্বত্র যতো হি যৎ স্যাৎ প্রাচ্যাং তত স্তম ভবেৎ প্রতীচ্যাং। নিরক্ষ দেশাদিতরত্র তস্মাৎ প্রাচী প্রতীচ্যৌ চ বিচিত্র সংস্থে॥ ॥ অথ ভচক্র ভ্রমণ ব্যবস্থা মাহ। নিরক্ষ দেশে ক্ষিতি মণ্ডলোপগৌ ধ্রুবৌ নরঃ পশ্যতি দক্ষিণোত্তরৌ। তদাশ্রিতং খে জলযন্ত্র বত্তথা ভ্রমদ্ভচক্রং নিজ মস্তকোপরি॥ উদগ্দিশং যাতি যথা যথা নর স্তথা তথা খামত মৃক্ষ মণ্ড-

লং। উদগ্ভুবং পশ্যতি চোন্নতং ক্ষি- তে স্তরন্তরে যোজনজাঃ পলাংশকাঃ ॥ যোজন সংখ্যা ভাংশৈ ৩৬০ গুণি তা ভূ পরিধি হৃতা ৪৯৬৭ ভবন্ত্যং- শাঃ। ভূমৌ কক্ষায়াং বা ভাগেভ্যো যোজনানি চ ব্যস্তং ॥ ※ ॥ অথ দেব দৈত্যানাং প্রবক্ষ সংস্থান মাহ। সৌম্যং ধ্রুবং মেরুগতাঃ খ মধ্যে যা- ম্যঞ্চ দৈত্যা নিজ মস্তকোর্দ্ধে। স- ব্যাপসব্যং ভ্রমদৃক্ষ চক্রং বিলোক- যন্তি ক্ষিতিজ প্রসক্তং॥ ※ ॥ উত্তর গোলে ক্ষিতিজাদূর্দ্ধ্বং পরিতো ভ্রমন্ত মাদিত্যং। সব্যং ত্রিদশাঃ সততং পশ্যন্ত্যসুরা অপসব্যং যাম্যে ॥ দ্ব ন্দ্বান্ত মারোহতি যৈঃ ক্রমেণ তৈরেব বৈত্ত রবরোহতী নঃ। যত্রৈব দৃষ্টঃ প্রথমং স দেবৈ স্তত্রৈব তিষ্ঠন্নবিলো- ক্যতে কিং॥ দিনং সুরাণা মযনং য- দুত্তরং নিশেতরৎ সাংহিতিকৈঃ প্র- কীর্ত্তিতং। দিনোন্মুখে হর্কে দিনমেব তন্মতং নিশা তথা তৎ ফল কীর্ত্তনা- য়বৈ॥ বিধূর্দ্ধ ভাগে পিতরো বসন্তঃ স্বাধঃ সুধা দীধিতি মামনন্তি। পশ্য- ন্তি তে হ্যং নিজ মস্তকোর্দ্ধে দর্শে যতো হস্মাদ্যুদলং তদৈষাং ॥ কৃষ্ণে দলে পঞ্চদলে হভ্যুদেতি শুক্লে হস্ত মেত্য তএব সিদ্ধং। ভার্দ্ধান্তরত্বান্ন বিধো রধঃস্থং তস্মাত্মিশীথঃ খলু- পৌর্ণমাস্যাং ॥ যদতি দূরগতো দ্রু- হিণঃ ক্ষিতেঃ সতত মাপুলযং রবি মীক্ষিতে। ভবতি তাবদযং শয়ি- তস্য তদ্দ্যুগ সহস্র যুগং দ্যু নিশং বিধেঃ ॥ ※ ॥ অথ ভূ পরিধি মানং প্রাক্কথিত মপি বিশেষার্থ মাহ। প্রোক্তো যোজন সংখ্যয়া ভূ পরিধিঃ সপ্তাঙ্গ নন্দাব্ধয ৪৯৬৭ স্তদ্ব্যাসঃ ভূ ভুজঙ্গ শাযক ভুবঃ সিদ্ধাংশকে নাধিকঃ ১৫৮১। ২৪ পৃষ্ঠ ক্ষেত্র ফলং যথা যুগ গুণ ত্রিংশচ্ছরাষ্টাদ্রবো ৭৮ ৫৩০৩৪ ভূমেঃ কন্দুক জালবৎ ভূপ- রিধি ব্যাসাহতেঃ প্রস্ফুটং ॥ ※ ॥ ভূ পৃষ্ঠ ফলস্য সংপ্রোক্তস্য দূষণ মাহ। দৃষ্টং কন্দুক পৃষ্ঠ জাল বদিদং গোলে ফলং তল্লিতং লল্লেনাস্য শতাংশ কোপি ন ভবেদযস্মাৎ ফলং বাস্তবং। তৎ প্রত্যক্ষ বিরুদ্ধ মদ্ধত মিদং নৈবান্ত বা চাস্থকা হে প্রৌঢা গণকা বিচারযত তন্মধ্যস্থ বুদ্ধ্যা ভৃশং ॥ ※ ॥ অথ সদ্যুক্তি মাহ। তৎ প- রিধ্যে বিষ্কম্ভং যুক্তং কৃত্বা ত্রৈলোং- ক্যং। ত্রৈলোক্যং ছায়ে গোলঃ কিঞ্চিত্ত্রস্থং শিষ্যং॥ গোল ক্ষেত্র ফলাত্তদাগ্নস্ত্র ক্ষেত্র ফলং মর্তঃ। সার্দ্ধ দ্বিগুণিতাসন্নং তাং বোপরে

দলে ॥ এবং পঞ্চ গুণাৎ ক্ষেত্র ফলাৎ পৃষ্ঠফলং খলু। নাধিকং জায়তে তেন পরিধিঘ্নং হতঃ কৃতং ॥ বৃত্তক্ষেত্র ফলং যস্মাৎ পরিধিঘ্নং ন যুক্তিমৎ। দুষ্টৈর্বাদির্গণিতস্যাস্য দুষ্টং ভূপৃষ্ঠজং ফলং ॥ ❀ ॥ অথান্যথা প্রতিপাদ্যতে। গোলস্য পরিধিঃ কল্প্যো বেদঘ্ন জ্যা মিতে র্মিতঃ। মুখ বৃত্তাগ্রে থাভি র্বদ্ধদামলকে স্থিতঃ ॥ দৃশ্যন্তে বপ্রকা স্তদ্বৎ প্রাগুক্ত পরিধে র্মিতাৎ। উদ্ধ্বাধঃ কৃত রেখাভি র্গোলে বপ্রান প্রকল্পয়েৎ॥ তত্রৈক বপ্রকক্ষেত্র ফলং খণ্ডৈঃ প্রসাধ্যতে। সর্ব জ্যৈক্যং ত্রিভজ্যার্দ্ধ হীনং ত্রিজ্যার্দ্ধ ভাজিতং ॥ এবং বপ্রকলং তৎ স্যাদ্গোল ব্যাস সমং যতঃ। পরিধি ব্যাস ঘাতোভো গোলপৃষ্ঠ ফলং স্ফুটং ॥ ❀ ॥ অথ ভূমেঃ প্রলয় ভেদান্ প্রলয়ঞ্চাহ। বৃদ্ধি র্বিধে রহ্নি ভুবঃ সমন্তাৎ স্যাদ্ যোজনং ভূ ভব ভূতি পূর্ব্বৈঃ। ব্রাহ্ম্যে লয়ে যোজন মাত্র বৃদ্ধে র্নাশো ভুবঃ প্রাকৃতিকে হখিলায়াঃ॥ দিনে দিনে যন্মৃগতে হি ভূতৈ দৈনন্দিনং তং প্রলয়ং বদন্তি। ব্রাহ্মং লয়ং ব্রহ্মদিনান্ত কালে ভূতানি যদ্ ব্রহ্মতনুং ব্রজন্তি ॥ ব্রহ্মাত্যয়ে যৎ প্রকৃতিং প্রযান্তি, অস্মাৎস্মৃতঃ প্রাকৃতিকং কৃতীন্দ্রঃ। লীনান্যতঃ কর্ম্মপুটান্তরত্বাৎ পৃথক্ ক্রিয়ন্তে প্রকৃতে র্বিকারৈঃ ॥ জ্ঞানাগ্নি দগ্ধা খিল পুণ্য পাপা মনঃ সমাধায় হরৌ পরেশে। যদ্যোগিনো যান্তি নিবৃত্তি নস্মাদাত্যন্তিকং চেতি লয শ্চতুর্দ্ধা ॥ ❀ ॥ অথ ব্রহ্মাণ্ড গোলমাহ। ভূ ভূধর ত্রিদশ দানব মানবাদ্যা নে যাশ্চ ধিষ্ণ্য গগণেচর চক্র কক্ষাঃ। লোক ব্যবস্থিতি রূপর্য্যুপরি প্রদিষ্টা ব্রহ্মাণ্ড ভাণ্ড জঠরে তদিদং সমস্তং ॥ ❀ ॥ অথান্যোদিতং ব্রহ্মাণ্ড মানং পূর্ব্বোক্ত মপি প্রসঙ্গাদনুবদন্তিস্ম। কোটিঘ্নৈ র্নখ নন্দ ষট্‌ক নখ ভূ ভূভৃদ্ভুজঙ্গেন্দুভি র্জ্জ্যোতিঃশাস্ত্র বিদো বদন্তি নভসঃ কক্ষা মিমাং যোজনৈঃ ১৮৭১২০৬৯২০০০০০০০০। তদ্ ব্রহ্মাণ্ড কটাহ সম্পুট তটে কেচিজ্জগু র্বেষ্টনং কেচিৎ প্রোচু রদৃশ্য দৃশ্যক গিরিং পৌরাণিকাঃ সূরয়ঃ ॥ করতল কলিতামলক বদমলং সকলং বিদন্তি যে গোলং। দিনকর কর নিকর নিহত তমসো নভসঃ পরিধি কথিতস্তৈঃ ॥ ব্রহ্মাণ্ড মেতন্মিত মস্তু নো বা কল্পে গ্রহঃ ক্রামতি যোজনানি। যাবন্তি পূর্ব্বৈ রিহ তৎ প্রমাণং প্রোক্তং খ কক্ষাখ্য মিদং মতং নঃ॥ ইতি সিদ্ধান্তশিরোমণৌ গোলাধ্যা-

যে ভূবনকোষঃ সমাপ্তঃ ॥ ॥

ভূচ্ছায়ং ক্লী স্ত্রী অন্ধকারঃ। ইতি শব্দমালা ॥

ভূজন্তুঃ পুং ভূনাগঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূজম্বূঃ স্ত্রী গোধূমঃ॥ বিকঙ্কতফলং। ইতি মেদিনী ॥ ভূমিজম্বূঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূতং ক্লী যুক্তং। ন্যায়ং ॥ ক্ষ্মাদিঃ। পৃথিব্যপ্ তেজো বায়্বাকাশ পঞ্চকং ॥ ঋতং। সত্যং ॥ ইত্যমর ভরতৌ ॥ পিশাচাদি ॥ জন্তুঃ। ইতি মেদিনী শব্দরত্নাবল্যৌ ॥ বস্তুতত্ত্বানুসরণং। যথা। ছলং নিরস্য ভূতেন ব্যবহারান্নয়েন্নৃপঃ। ভূতমপ্যনুপন্যস্তং হীয়তে ব্যবহারতঃ॥ ছলং প্রমাদাভিহিতং। নিরস্য পরিত্যজ্য। ভূতেন বস্তুতত্ত্বানুসরণেন। ব্যবহারান্নয়েদন্তং নৃপঃ। যস্মাদ্ভূতমপি বস্তুতত্ত্বমপি অনুপন্যস্তমনভিহিতং হীয়তে হানিমুপগচ্ছতি ব্যবহারতো ব্যবহারেণ সাক্ষ্যাদিভিঃ। তস্মাৎ ভূতানুসরণং কর্ত্তব্যং। যথার্থি প্রত্যর্থিনৌ সত্যমেব বদত স্তথা সভ্যৈঃ সভাপতিনা বর্ত্তিতব্যং সামাদিভি রুপায়ৈ স্তথা সতি সাক্ষ্যাদি নিরপেক্ষৈরেব নির্ণয়ো ভবতীতি। অথ সর্ব্বথাপি ভূতানুসরণং ন শক্যতে কর্ত্তুং তথা সতি সাক্ষ্যাদিভি র্নির্ণয়ঃ কার্য্য ইত্যনুকল্পঃ। যথোক্তং। ভূতছলানুসারিত্বাদ্দ্বিগতিঃ সমুদাহৃতা। ভূতন্তত্ত্বার্থযুক্তং যৎ প্রমাদাভিহিতং ছলমিতি। তত্র ভূতানুসারী ব্যবহারো মুখ্যঃ ছলানুসারীত্বনুকল্পঃ। ইতি মিতাক্ষরায়াং ব্যবহারাধ্যায়ঃ ॥

ভূতং ত্রি প্রাণী। জন্তুঃ॥ অতীতং। বৃত্তং ॥ সমং। সদৃশং ॥ ইত্যমর ভরতৌ ॥ প্রাপ্তং ॥ সত্যং। ইতি মেদিনী শব্দরত্নাবল্যৌ ॥ ভূতকালস্য পর্য্যায়ো যথা। বৃত্তং ২ অতীতং ৩ হ্যস্তনং ৪ নিভৃতং ৫ গতং ৬। ইতি রাজনির্ঘণ্টঃ॥ উত্তরপদস্থ এব ভূত শব্দঃ সমার্থ ইতি শাব্দিকাঃ। যথা দেব ভূতো হয়ং। ইতি ভরতঃ ॥

ভূতঃ পুং দেবযোনি বিশেষঃ। স চ অধোমুখোর্দ্ধমুখাদিঃ পিশাচভেদো রুদ্রানুচরো বালগ্রহঃ। ইত্যমর ভরতৌ ॥ কুমারঃ। ইতি মেদিনী ॥ যোগীন্দ্রঃ। ইতি শব্দরত্নাবলী ॥ কৃষ্ণচতুর্দ্দশী। ইতি ত্রিকাণ্ডশেষঃ ॥ * ॥ ভূতনাশকৌষধং যথা।

শ্বেতাপরাজিতামূলং পিষ্টং তণ্ডুল বারিণা। তেন নস্য প্রদানং স্যাদ্ভূত বৃন্দস্য বিদ্রুবং॥ অগস্ত্য পুষ্পনস্যো বৈ সমরীচশ্চ ভূতহৃৎ। ভুজঙ্গ বর্ম্ম বৈ হিঙ্গু নিম্ব পত্রাণি বৈ যবাঃ॥ গৌরসর্ষপ এভিঃ স্যাল্লেপো ভূতহরঃ কৃতঃ। গোরোচনা মরীচানি পিপ্পলী সৈন্ধবং মধু॥ অঞ্জনং কৃত মেভিঃ স্যাদ্‌গৃহ ভূতহরং শিব। অপিচ। বচা ত্রিকটুকঞ্চৈব করঞ্জং দেবদারু চ। মঞ্জিষ্ঠা ত্রিফলা শ্বেতা শিরীষো রজনীদ্বয়ং॥ প্রিয়ঙ্গু নিম্ব ত্রিকটু গোমূত্রেণাবঘর্ষিতং। নস্য মালেপনঞ্চৈব স্নান মুদ্বর্ত্তনং তথা॥ অপস্মার বিষোন্মাদ শোষালক্ষ্মী জ্বরাপহং। ভূতেভ্যশ্চ ভয়ং হন্তি রাজদ্বারে চ শাসনং॥ ইতি গারুড়ে ১৯২। ১৯৯ অধ্যায়ঃ॥*॥ শম্ভুগণভূতা যথা। হৃতে বরাহস্য গণে ভর্গ নাসাদ্যতে গণাঃ। চতুর্ভাগাঃ স্বযং ভূত্বা ভূতং কর্ম্মেতি বৈ স্মৃতঃ॥ ভূতত্ব মভবত্তেষাং চতুর্ভাগবতাং তদা। বচনাৎ পদ্মজাতস্য ভূত গ্রামাস্ততো মতাঃ॥ যো লোক বিদিতঃ পূর্ব্বং ভূত গ্রাম শ্চতুর্বিধঃ। যত স্তেভ্যো হধিকা যত্নে স্তদ্ভূতগ্রাম উচ্যতে॥ ইতি বঃ সর্ব্ব মাখ্যাতং ভূতাঃ শম্ভুগণা যথা। ইতি কালিকাপুরাণে ২৯ অধ্যাযঃ॥

ভূতকেশঃ পুং স্বনামখ্যাততৃণং। তৎপর্য্যাযঃ। গোলোমী ২। ইত্যমরঃ॥ ভূতকেশী ৩ অল্পকেশী ৪ কেশী ৫। ইতি রত্নমালা॥ ভূতানাং কেশ ইব ভূতকেশঃ ক্লীবঞ্চেতি কেচিৎ স্ত্রী চেত্যন্যে। অথ দ্বযো ভূতকেশো গোলোমী ভূতকেশিকেতি বাচস্পতিঃ। ইতি ভরতঃ॥

ভূতকেশী স্ত্রী ভূতকেশঃ। ইতি রত্নমালা॥ শেফালিকা॥ নীলসিন্দুবারঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূতক্রান্তিঃ স্ত্রী ভূতাবেশঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূতগন্ধা স্ত্রী মুরানামগন্ধদ্রব্যং। ইতি জটাধরঃ॥

ভূতঘ্নঃ পুং উষ্ট্রঃ। ইতি হেমচন্দ্রঃ॥ লশুনঃ॥ ভূর্জবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ ভূতনাশকে ত্রি॥

ভূতঘ্নী স্ত্রী তুলসী। ইতি রাজনির্ঘণ্টঃ॥ মুণ্ডিতিকা। ইতি রত্নমালা॥

ভূতচতুর্দ্দশী স্ত্রী গৌণকার্ত্তিককৃষ্ণচতুর্দ্দশী। সা এব যমচতুর্দ্দশী। তৎকৃত্যং যথা। পাদ্মে। চতুর্দ্দশ্যাং

ধর্ম্মরাজ পূজা কার্য্যা প্রযত্নতঃ। স্নান মাবশ্যকং কার্য্যং নরৈ র্নরক ভীরুভিঃ॥ অরুণোদয়তো হন্যত্র রিক্তায়াং স্নাতি যো নরঃ। তস্যাব্দিক ভবো ধর্ম্মো নশ্যত্যেব ন সংশয়ঃ॥ স্কান্দে চ তত্রৈব। কার্ত্তিকে কৃষ্ণপক্ষে তু চতুর্দ্দশ্যাং বিধূদয়ে। অবশ্য মেব কর্ত্তব্যং স্নানং নরক ভীরুভিঃ॥ কিঞ্চ পাদ্মে তত্রৈব। ততশ্চ তর্পণং কার্য্যং ধর্ম্মরাজস্য নামভিঃ। জীবৎ পিতা ন কুর্বীত তর্পণং যম ভীষ্মযোঃ॥ যজ্ঞোপবীতিনা কার্য্যং প্রাচীনাবীতিনা তথা। দেবত্বঞ্চ পিতৃত্বঞ্চ যমস্যাস্তে দ্বিরূপতা॥ নক্তং যম চতুর্দ্দশ্যাং যঃ কুর্য্যাচ্ছিব সন্নিধৌ। ন তৎ ক্রতুশতেনাপি প্রাপ্যতে পুণ্যমীদৃশং॥ কুমারী বটুকান্ পূজ্য তথা শৈব তপোধনান্। রাজসূয় ফলং তেন প্রাপ্যতে নাত্র সংশয়ঃ॥ কার্ত্তিকে ভৌম বারেণ চিত্রা কৃষ্ণা চতুর্দ্দশী। তস্যাং ভূতেশ মভ্যর্চ্য গচ্ছে চ্ছিবপুরং নরঃ॥ কিঞ্চ। অমাবাস্যা শ্চতুর্দ্দশ্যাঃ প্রদোষে দীপ দানতঃ। যমমার্গান্ধকারেভ্যো মুচ্যতে কার্ত্তিকে নরঃ॥ ইতি শ্রীহরিভক্তিবিলাসঃ॥ ক্ক॥ অপিচ। লৈঙ্গে

। কার্ত্তিকে কৃষ্ণপক্ষে চ চতুর্দ্দশ্যাং দিনোদয়ে। অবশ্য মেব কর্ত্তব্যং স্নানং নরক ভীরুভিঃ॥ অপামার্গ পল্লবঞ্চ ভ্রাময়েচ্ছিরসোপরি। ততশ্চ তর্পণং কার্য্যং ধর্ম্মরাজস্য নামভিঃ॥ নরকায় প্রদাতব্যো দীপঃ সংপূজ্য দেবতাঃ। নরকায় নরক নিবৃত্তয়ে। অর্থো হভিধেয়ে রৈ বস্তু প্রয়োজন নিবৃত্তিষু। ইতি নিবৃত্তাবপি তাদর্থ্য ইত্যনেন চতুর্থী বিধানাৎ। অপামার্গ ভ্রামণ মন্ত্রঃ। শীতলোষ্ঠ সমাযুক্ত সকণ্টক দলান্বিত। হর পাপ মপামার্গ ভ্রাম্যমাণঃ পুনঃ পুনঃ॥ ততঃ প্রদোষ সময়ে দীপান্ দদ্যাৎ প্রযত্নতঃ। ব্রহ্ম বিষ্ণু শিবাদীনাং ভবনেষু মঠেষু চ॥ ভবিষ্যে। কার্ত্তিকে ভৌমবারে চ চিত্রা কৃষ্ণ চতুর্দ্দশী। তস্যা মারাধিতঃ স্থাণু নয়েচ্ছিবপুরং ধ্রুবং॥ যাং কাঞ্চিৎ সরিতং প্রাপ্য কৃষ্ণপক্ষে চতুর্দ্দশীং। যমনাম্নাং বিশেষেণ নিয়ত স্তর্পয়েদ্যমান্॥ যমায় ধর্ম্মরাজায় মৃত্যবে চান্তকায় চ। বৈবস্বতায় কালায় সর্ব্বভূতক্ষয়ায় চ। ঔডুম্বরায় দধ্নায় নীলায় পরমেষ্ঠিনে। বৃকোদরায় চিত্রায় চিত্রগুপ্তায় বৈ নমঃ॥ একৈকস্য তিলৈ র্মিশ্রাং স্ত্রীং স্তু দদ্যাজ্জলাঞ্জলীন্।

সম্বৎসরং কৃতং পাপং তৎক্ষণা দেব নশ্যতি ॥ * ॥ আচারাদত্র চতুর্দ্দশ শাক ভক্ষণং কর্ত্তব্যং। তত্র নির্ণয়ামৃতং। ওলং কেমুক বাস্তুকং সর্ষপং কালশঞ্চ নিম্বং জয়াং শালিঞ্চী হিলমোচিকাঞ্চ পটকং শৌলঞ্চং গুড়ূচী তথা। ভণ্টাকীং শুনিষণ্ণকং শিবদিনে খাদন্তি যে মানবাঃ প্রেতত্বং নচ যান্তি কার্ত্তিক দিনে কৃষ্ণে চ ভূতে তিথৌ ॥ জয়াং জয়ন্তীং পটুকং পটোলং শৌলঞ্চং শুলফা ইতি খ্যাতং শুনিষণ্ণকং শুষণিয়া ইতি খ্যাতং। ইতি তিথ্যাদিতত্ত্বং ॥

ভূতজটা স্ত্রী জটামাংসী। ইতি শব্দমালা ॥ গন্ধমাংসী। ইতি রাজনির্ঘণ্টঃ ॥

ভূতদ্রাবী পুং ভূতাঙ্কুশবৃক্ষঃ ॥ রক্তকরবীরঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূতদ্রুমঃ পুং শ্লেষ্মান্তকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূতধাত্রী স্ত্রী পৃথিবী। ইতি ত্রিকাণ্ডশেষঃ ॥

ভূতনাথঃ পুং শিবঃ। ইতি শব্দরত্নাবলী ॥

ভূতনায়িকা স্ত্রী দুর্গা। ইতি হেমচন্দ্রঃ ॥

ভূতনাশনং ক্লী রুদ্রাক্ষং। ইতি রাজনির্ঘণ্টঃ ॥

ভূতনাশনঃ পুং ভল্লাতকঃ। ইতি রত্নমালা ॥ সর্ষপঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূতপত্রী স্ত্রী তুলসী। ইতি রাজনির্ঘণ্টঃ ॥

ভূতপুষ্পঃ পুং শ্যোনাকবৃক্ষঃ। ইতি রত্নমালা ॥

ভূতপূর্ণিমা স্ত্রী আশ্বিনীপূর্ণিমা। তৎপর্য্যায়ঃ। শারদী ২ কৌমুদী ৩ অশ্বযুজী ৪ শতপর্ব্বা ৫ রঙ্গভূতিঃ ৬ কোজাগরা ৭। ইতি শব্দরত্নাবলী॥

ভূতভাবনঃ পুং বিষ্ণুঃ। ইতি মহাভারতোক্তং তস্য সহস্রনামান্তর্গত নাম ॥ বটুকভৈরবঃ। ইতি বিশ্বসারতন্ত্রোক্ত তস্যাষ্টোত্তরশতনামান্তর্গতনাম ॥

ভূতভৃৎ পুং বিষ্ণুঃ। যথা। ভূতকৃৎ ভূতভৃদ্ভাবো ভূতাত্মা ভূতভাবনঃ। ইতি তস্য সহস্রনাম স্তোত্রং ॥

ভূতমারী স্ত্রী চীড়ানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

ভূতযজ্ঞঃ পুং ভূতবলিঃ। স তু পঞ্চ মহাযজ্ঞান্তর্গত বলিবৈশ্যদেব কর্ম্মণী। যথা। ভূতেভ্যো বলি হরণং ভূত যজ্ঞঃ। ইতি হারীতসূত্রং ॥

অস্যানুষ্ঠানং বলিশব্দে দ্রষ্টব্যং ॥

ভূতলিকা স্ত্রী পৃক্কা। ইতি রাজনিঘণ্টঃ ॥

ভূতবাসঃ পুং কলিদ্রুমঃ। ইত্যমরঃ ॥

ভূতবিক্রিয়া স্ত্রী অপস্মাররোগঃ। ইতি রাজনিঘণ্টঃ ॥

ভূতবৃক্ষঃ পুং শ্যোণাকবৃক্ষঃ ॥ শ্যোনাকবৃক্ষঃ। ইতি মেদিনী ॥

ভূতবেশী স্ত্রী শ্বেতশেফালিকা। ইত্যমরঃ ॥

ভূতব্রহ্মা পুং দেবলঃ। ইতি শব্দমালা ॥

ভূতশুদ্ধিঃ স্ত্রী পূজাদৌ বীজবিশেষ দ্বারা বামকুক্ষি স্থিত পাপপুরুষ দহন পূর্ব্বক শরীর শোধনং। তৎপ্রযোগো যথা। রমিতি জলধারয়া বহ্নি প্রাকারং বিচিন্ত্য স্বাঙ্কে উত্তানৌ করৌ কৃত্বা সোহ মিতি জীবাত্মানং হৃদয়স্থং দীপ কলিকাকারং মূলাধারস্থ কুলকুণ্ডলিন্যা সহ সুসুম্না বর্ত্মনা মূলাধার স্বাধিষ্ঠান মণিপূরানাহত বিশুদ্ধাজ্ঞাখ্য ষট্ চক্রাণি ভিত্ত্বা শিরোবস্থিতাধোমুখ সহস্রদল কমল কর্ণিকান্তর্গত পরমাত্মনি সংযোজ্য তত্রৈব পৃথিব্যপ্ তেজো বায্বাকাশ গন্ধ রস রূপ স্পর্শ শব্দ নাসিকা জিহ্বা চক্ষু ত্বক্ শ্রোত্র বাক্ পাণি পাদ পায়ূপস্থ প্রকৃতি মনো বুদ্ধ্যহঙ্কার রূপ চতুর্ব্বিংশতি তত্ত্বানি লীনানি বিভাব্য যমিতি বায়ু বীজং ধূম্রবর্ণং বামনাসাপুটে বিচিন্ত্য তস্য ষোড়শবার জপেন বায়ুনা দেহ মাপূর্য্য নাসাপুটৌ ধৃত্বা তস্য চতুঃষষ্টি বার জপেন কুম্ভকং কৃত্বা বামকুক্ষিস্থ কৃষ্ণবর্ণ পাপপুরুষেণ সহ দেহং সংশোষ্য তস্য দ্বাত্রিংশদ্বার জপেন দক্ষিণ নাসয়া বায়ুং রেচয়েৎ। দক্ষিণ নাসাপুটে রমিতি বহ্নি বীজং রক্তবর্ণং ধ্যাত্বা তস্য ষোড়শ বার জপেন বায়ুনা দেহ মাপূর্য্য নাসাপুটৌ ধৃত্বা তস্য চতুঃষষ্টি বার জপেন কুম্ভকং কৃত্বা পাপপুরুষেণ সহ দেহং মূলাধারোত্থিত বহ্নিনা দগ্ধ্বা তস্য দ্বাত্রিংশদ্বার জপেন বামনাসয়া ভস্মনা সহ বায়ুং রেচয়েৎ। ঠ মিতি চন্দ্রবীজং শুক্লবর্ণং বামনাসায়াং ধ্যাত্বা তস্য ষোড়শ বার জপেন ললাটে চন্দ্রং নীত্বা নাসাপুটৌ ধৃত্বা ব মিতি বরুণ বীজস্য চতুঃষষ্টি বার জপেন তস্মাল্ললাটস্থ চন্দ্রাদ্গলিত সুধয়া মাতৃকা বর্ণাত্মিকয়া সমস্ত দেহং বিরচর্য্য ল মিতি পৃথ্বীবীজস্য দ্বাত্রিংশদ্বার জপেন দেহং সুদৃঢ়ং

বিচিন্ত্য দক্ষিণেন বায়ুং রেচয়েৎ ।। মাত্রা সংখ্যয়া বা। *। তদুক্তং গৌতমীয়ে। সুসুম্না বর্ত্মনা সোহ মিতি মন্ত্রেণ যোজয়েৎ। সহস্রারে শিবস্থানে পরমাত্মনি দেশিকঃ।। ধূম্রবর্ণং ততো বায়ু বীজং যদ্বিন্দু লাঞ্ছিতং। পূরয়েদিড়য়া বায়ুং সুধীঃ ষোড়শ মাত্রয়া।। মাত্রয়া তু চতুঃষষ্ট্যা কুম্ভয়েচ্চ সুসুম্নয়া। দ্বাত্রিংশন্মাত্রয়া মন্ত্রী রেচয়েৎ পিঙ্গলাখ্যয়া।। পূরয়েদনয়া চৈব সঞ্চিন্ত্য নীলমারুতং। রক্তবর্ণং বহ্নিবীজং ত্রিকোণং স্বস্তিকান্বিতং।। তেন পূরক যোগেন মাত্রয়া ষোড়শাখ্যয়া। চতুঃষষ্ট্যা মাত্রয়া চ নির্দ্দহেৎ কুম্ভকেন চ ।। বামপার্শ্বস্থিতং পাপপুরুষং কজ্জল প্রভং। ব্রহ্মহত্যা শিরস্কঞ্চ স্বর্ণস্তেয় ভুজদ্বয়ং ।। সুরাপান হৃদাযুক্তং গুরুতল্প কটিদ্বয়ং। তৎ সংসর্গি পদদ্বন্দ্ব মঙ্গ প্রত্যঙ্গ পাতকং ।। উপপাতক রোমাণং রক্ত শ্মশ্রু বিলোচনং। খড়্গ চর্ম্ম ধরং ক্রুদ্ধ মেবং কুক্ষৌ বিচিন্তয়েৎ।। মূলাধারোত্থিতেনৈব বহ্নিনা নির্দ্দহেচ্চ তং। এবং সংদহ্য পরিতো দ্বাত্রিংশন্মাত্রয়া ততঃ ।। ভস্মনা সহিতং মন্ত্রী রেচয়েদিড়য়া পুনঃ। বামনাড্যাং চন্দ্রবীজং অর্দ্ধেন্দুযুত সপ্রভং।। ভালেন্দুরাজে সংযোজ্য ততঃ ষোড়শ মাত্রয়া। সুসুম্নয়া চতুঃষষ্টি মাত্রয়া তোয় বীজকং ।। ধ্যাত্বামৃতময়ীং বৃষ্টিং পঞ্চাশদ্বর্ণরূপিণীং । তয়া দেহং বিচিন্ত্যৈবং মনসা পিঙ্গলাধ্বনা ।। দ্বাত্রিংশন্মাত্রয়া মন্ত্রী লং বীজেন দৃঢ়ং নয়েৎ । স্বস্থানে হংস মন্ত্রেণ পুন স্তেনৈব বর্ত্মনা ।। জীবং তত্ত্বানি চানীয় স্বস্থানে স্থাপয়েত্ততঃ। ইতি কৃত্বা ভূতশুদ্ধিং মাতৃকান্যাস মাচরেৎ ।। * ।। সংক্ষেপ ভূতশুদ্ধি যথা। পুরশ্চরণচন্দ্রিকায়াং। অথবান্য প্রকারেণ ভূতশুদ্ধি র্বিধীয়তে। ধর্ম্ম কন্দ সমুদ্ভূতং জ্ঞান নাল সুশোভনং ।। ঐশ্বর্য্যাষ্ট দলোপেতং পরং বৈরাগ্য কর্ণিকং। স্বীয় হৃৎকমলে ধ্যায়েৎ প্রণবেন বিকাসিতং।। কৃত্বা তৎকর্ণিকা সংস্থং প্রদীপ কলিকা নিভং। জীবাত্মানং হৃদি ধ্যাত্বা মূলে সঞ্চিন্ত্য কুণ্ডলীং ।। সুসম্না বর্ত্মনাত্মানং পরমাত্মনি যোজয়েৎ। ইতি তন্ত্রসারঃ ।।

ভূতসঞ্চারঃ পুং ভূতোন্মাদরোগঃ। তৎপর্য্যায়ঃ। আবেশঃ ২ ভূতক্রান্তিঃ ৩ গ্রহাগমঃ ৪। ইতি রাজনির্ঘণ্টঃ ।।

ভূতসঞ্চারী স্ত্রী দাবানলঃ। ইতি শব্দমালা ॥

ভূতসর্গং স্ত্রী ভূতসৃষ্টিঃ। যথা। ব্রাহ্মং প্রাজাপতীযঞ্চ সৌম্য মন্দ্রুস্তথৈব চ। গান্ধর্ব্ব মথ কৌবেরং রক্ষঃ পৈশাচ মানুষং॥ স্থাবরং পাশবং মার্গং সার্পং শাকুনিকন্তথা। চতুর্দ্দশ বিধং হ্যেতদ্ভূত সর্গং প্রকীর্ত্তিতং॥ ইতি বহ্নিপুরাণং॥

ভূতসারঃ পুং শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূতহন্ত্রী স্ত্রী বন্ধ্যাকর্কোটকী॥ নীলদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

ভূতহরঃ পুং গুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূতহারি ন স্ত্রী দেবদারু। ইতি রাজনির্ঘণ্টঃ॥

ভূতা স্ত্রী কৃষ্ণচতুর্দ্দশী। যথা। স্কান্দে। ব্রহ্মাণ্ডোদর মধ্যে তু যানি তীর্থানি সন্তি বৈ। পূজিতানি ভবন্তীহ ভূতাযাং পারণে কৃতে॥ অপিচ। শিবরাত্রিব্রতে ভূতাং কামবিদ্ধাং বিবর্জয়েৎ। ইতি তিথ্যাদিতত্ত্বং॥

ভূতাঙ্কুশঃ পুং স্বনামখ্যাতবৃক্ষঃ। তৎপর্য্যায়ঃ। ক্ষবকঃ ২ ক্ষুরকঃ ৩ তীক্ষ্ণঃ ৪ ক্রূরঃ ৫ ক্ষবঃ ৬ রাজোদ্বেদনসংজ্ঞঃ ৭ ভূতদ্রাবী ৮ গ্রহাহ্বযঃ ৯। অস্য গুণাঃ। তীব্রগন্ধত্বং। উৎকটত্বং। উষ্ণত্বং। কটুত্বং। ভূতগ্রহাদি দোষ গ্রত্বং। কফ বাতনিকৃন্তনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ভূতাত্মা ন পুং দেহঃ॥ পরমেষ্ঠী। ইতি মেদিনী॥ শিবঃ॥ বুদ্ধং। ইতি শব্দরত্নাবলী॥ বিষ্ণুঃ। যথা। ভূতকৃৎ ভূতভৃৎভাবো ভূতাত্মা ভূতভাবনঃ। ইতি মহাভারতে দানধর্ম্মঃ॥

ভূতারি ক্লী হিঙ্গু। ইতি রাজনির্ঘণ্টঃ

ভূতার্ত্তঃ ত্রি ভূতাবিষ্টঃ। ইতি হেমচন্দ্রঃ॥

ভূতালী স্ত্রী ভূপাটলী॥ মুষলী। ইতি রাজনির্ঘণ্টঃ॥

ভূতাবাসঃ পুং বিভীতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ বিষ্ণুঃ। যথা। ভূতাবাসো বাসুদেবঃ সর্ব্বাসুনিলযো লযঃ। ইতি মহাভারতে দানধর্ম্মঃ॥

ভূতাবিষ্টঃ ত্রি পিশাচগ্রস্তঃ। তন্নাশক চক্রং যথা। পঞ্চরেখাঃ সমুল্লিখ্য তির্য্যগূর্দ্ধ্ব ক্রমেণ হি। পদানি যদ্দশাপাদ্য ত্র্যেকমাদ্যে মুনৌ ত্রনং॥ নবমে সপ্ত দদ্যাত্ত্ব বাণং পঞ্চদশে তথা। দ্বিতীযেষ্টাবষ্টমে বহ্নি দিশি দ্বৌ ষোড়শে শ্রুতিঃ॥ একা-

দিনা স্নানং জ্ঞেয় মিচ্ছাঙ্কার্দ্ধং ত্রিকোণকে। তদ্বা দ্বাত্রিংশদাদিঃ স্যাচ্চতুষ্কোষ্ঠেষু সর্ব্বতঃ ॥ দর্শনাদ্ধারণাত্তাসাং শুভং স্যাদেষু কর্ম্মসু। দ্বাত্রিংশৎ প্রসবে নার্য্যাশ্চতুস্ত্রিংশন্নমে নৃণাং ॥ ভূতাবিষ্টেষু পঞ্চাশম্মৃতাপত্যাসু বৈ শতং। দ্বাসপ্ততিস্তু বন্ধ্যানাং চতুঃষষ্টী রণাধ্বনি ॥ বিষে বিংশো ধান্যকীটে স্বষ্টাবিংশতি রেব চ। চতুরষ্টৌচ বালানাং রোদনে পরিকীর্ত্তিতাঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥

| | | | |
|---|---|---|---|
| ১ | ৮ | ১৮ | ২৩ |
| ২০ | ২১ | ৩ | ৬ |
| ৭ | ২ | ২৪ | ১৭ |
| ২২ | ১৯ | ৫ | ৪ |
| ৫০ | ৫০ | ৫০ | ৫০ |

ভূতাবিষ্টঃ ত্রি ভূতক্রান্তঃ। ভূতাদিনা রোগগ্রস্তঃ। যথা। ভূতাবিষ্টেষু পঞ্চাশন্মৃতাপত্যাসু বৈ শতং। ইত্যাদি জ্যোতিস্তত্ত্বং ॥

ভূতাবেশঃ পুং ভূতসঞ্চারঃ। ভূতে পাওয়া ইতি ভাষা। অস্য পর্য্যায়া আবেশ শব্দে দ্রষ্টব্যাঃ ॥

ভূতিঃ স্ত্রী মহাদেবস্যাণিমাদ্যষ্টপ্রকার বৈভবং। ইত্যমরঃ ॥ শম্ভুধৃতভস্ম। ইত্যমরটীকায়াং ভরতঃ ॥ ভস্ম ॥ সম্পত্তিঃ ॥ হস্তিশৃঙ্গারঃ। ইতি মেদিনী ॥ জাতিঃ। ইতি বিশ্বঃ ॥ বৃদ্ধিনামৌষধং ॥ রোহিষতৃণং ॥ ভূতৃণং। ইতি রাজনির্ঘণ্টঃ ॥ উৎপত্তিঃ ॥ সত্তা। ইতি ভূ ধাতোর্ভাবে ক্তি প্রত্যয়েন নিষ্পন্নং ॥

ভূতিকং ক্লী ভূনিম্বঃ ॥ কত্তৃণং ॥ ইত্যমরঃ ॥ কটফলং ॥ যমানী ॥ ঘনসারঃ। ইতি হেমচন্দ্রঃ ॥

ভূতিকঃ পুং যমানী। ইতি রত্নমালা রাজনির্ঘণ্টৌ ॥

ভূতিকামঃ পুং রাজমন্ত্রী ॥ বৃহস্পতিঃ। ইতি কেচিৎ ॥ ঐশ্বর্য্যাভিলাষিণি ত্রি। যথা। বায়ব্যং শ্বেতমালভেত ভূতিকামঃ। ইত্যধিকরণমালায়াং দ্বিতীয়পাদে কাম্যপশুকাণ্ডে বিধ্যর্থবাদ বোধিকা শ্রুতিঃ ॥

ভূতিকীলঃ পুং ভূখাতঃ। খানা ইতি ভাষা। ইতি শব্দমালা ॥

ভূতিগর্ভঃ পুং ভবভূতিকবিঃ। ইতি ভূরিপ্রয়োগঃ ॥

ভূতিনিধানং ক্লী ধনিষ্ঠানক্ষত্রং। ইতি জটাধরঃ ॥

ভূতিমান্ ত্রি ঐশ্বর্য্যযুক্তঃ। ভূতিরস্ত্যস্যইত্যর্থেমতুপ্প্রত্যয়েননিষ্পন্নঃ ॥

ভূতীকং ক্লী ভূনিম্বঃ ॥ যমানী ॥ ভূস্তৃণং ॥ কত্তৃণং। ইতি মেদিনী ॥

ভূতৃণং স্ত্রী গন্ধতৃণং। গন্ধখড ইতি ভাষা। তৎপর্য্যায়ঃ। গন্ধখেডং ২ রৌহিষং ৩ গোনযপ্রিয়ং ৪। ইতি রত্নমালা॥ পটং ৫ রামকর্পূরং ৬ সস্তৃণং ৭ শরং ৮ শ্যামকং ৯ ধ্যামকং ১০ পৌরং ১১ দেবজগ্ধকং ১২। ইতি রত্নমালান্তরং॥

ভূতৃণঃ পুং ভূস্তৃণং। সুগন্ধরোহিষ ইতি পরিমলদগঙ্গনি ইতি চ অন্ধ্রদেশে প্রসিদ্ধঃ। তৎপর্য্যায়ঃ। রোহিষঃ ২ ভূতিঃ ৩ ভূতিকঃ ৪ জম্বুকঃ ৫ মালাতৃণঃ ৬ সমালম্বী ৭ ছত্রঃ ৮ অতিছত্রকঃ ৯ গুহ্যবীজঃ ১০ সুগন্ধঃ ১১ গুচ্ছালঃ ১২ পুংস্ত্ববিগ্রহঃ ১৩ বধিরঃ ১৪ অতিগন্ধঃ ১৫ শৃঙ্গরোহঃ ১৬ করেন্দুকঃ ১৭। অস্যগুণাঃ। কটুত্বং। তিক্তত্বং। বাতসমূহ ভূতগ্রহাবেশ দারুণ বিষদোষ নাশিত্বঞ্চ। ইতিরাজনির্ঘণ্টঃ

ভূতেশঃ পুং শিবঃ। ইত্যমরঃ॥

ভূত্তমং ক্লী সুবর্ণং। ইতি হেমচন্দ্রঃ॥

ভূদরীভবা স্ত্রী আখুকর্ণী। ইতি ভাবপ্রকাশঃ॥

ভূদারঃ পুং শূকরঃ। ইত্যমরঃ॥

ভূদেবঃ পুং ব্রাহ্মণঃ। ইত্যমরঃ॥

ভূধনঃ পুং রাজা। ভূরেবধনং যস্য সঃ। ইতি কেচিৎ॥

ভূধরঃ পুং পর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥ যন্ত্রভেদঃ। যথা। জল কচ্ছপ পাতাল দোলা ভূধর বালুকাঃ। বকাদ্যা যন্ত্রভেদাঃস্যুর্বজ্রাঙ্ক্রাদ্যাশ্চ মূষকাঃ॥ ইতি শব্দচন্দ্রিকা॥

ভূধাত্রী স্ত্রী ভূম্যামলকী। ইতি রাজনির্ঘণ্টঃ॥ বটুকভৈরবঃ। ইতি বিশ্বসারতন্ত্রে তস্য শতনামস্তোত্রং॥

ভূধ্রঃ পুং পর্ব্বতঃ। ইতি হেমচন্দ্রঃ॥

ভূনাগঃ পুং উপরসবিশেষঃ। তৎপর্য্যায়ঃ। ক্ষিতিনাগঃ ২ ভূজন্তুঃ ৩ রক্তজন্তুকঃ ৪ ক্ষিতিজঃ ৫ ক্ষিতিজন্তুঃ ৬ রক্ততুণ্ডকঃ ৭। অস্যগুণাঃ। বজ্রমারকত্বং। নানা বিজ্ঞানকারকত্বং। রসজারণত্বং। তৎসত্ত্বস্য বিষাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ভূনিম্বঃ পুং ক্ষুপবিশেষঃ। চিরাতা ইতি ভাষা। তৎপর্য্যায়ঃ। অনার্য্যতিক্তঃ ২ কৈরাতঃ ৩ রামসেনকঃ ৪ কিরাততিক্তঃ ৫ হৈমঃ ৬ কাণ্ডতিক্তঃ ৭ কিরাতকঃ ৮। ইতি রাজনির্ঘণ্টঃ॥ কটুতিক্তঃ ৯। ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। বাতিকত্বং। তিক্তত্বং। কফ পিত্ত জ্বরাপহত্বং। ব্রণ সংরোপণত্বং। পথ্যত্বং। কুষ্ঠ কণ্ডূতি শোফ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ।

কিরাতকোন্যো নেপালঃ সোর্দ্ধতিক্তো জ্বরান্তকঃ। কিরাতঃ সারকো রূক্ষঃ শীতল স্তিক্তকো লঘুঃ॥ সন্নিপাত জ্বর শ্বাস কফ পিত্তাস্রদাহনুৎ। কাস শোষ তৃষা কুষ্ঠ জ্বর ব্রণ কৃমি প্রণুৎ॥ ইতি ভাবপ্রকাশঃ॥ অস্য গুণ পর্য্যায়ান্তরে কিরাততিক্ত শব্দে দ্রষ্টব্যে॥

ভূনীপঃ পুং ভূমিকদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূনেতা পুং রাজা। ইতি কেচিৎ॥

ভূপঃ পুং রাজা। ইত্যমরঃ॥ অর্থলোভেন প্রজাদণ্ডকরণে তস্য পাপং যথা। অর্থলোভেন যো ভূপঃ প্রজাদণ্ডং করোতি চ। বৃশ্চিকানাঞ্চ কুণ্ডে স তল্লোমাব্দং বসেদ্ধ্রুবং॥ ততো বৃশ্চিক জাতিশ্চ সপ্তজন্মসু ভারতে। ততো নর শ্চাঙ্গহীনো ব্যাধী শুদ্ধো ভবেন্নরঃ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ॥

ভূপতিঃ পুং বটুকভৈরবঃ। যথা। ভূধরো ভূধরাধীশো ভূপতি র্ভূধরাত্মকঃ। ইতি বিশ্বসারতন্ত্রোক্ত ভৈরবস্তোত্রং॥ রাজা। যথা। ভূপুত্রী যস্য পত্নী স তু ভবতি কথং ভূপতী রামচন্দ্রঃ। ইতি রামায়ণে কেকয়ীবাক্যং॥ ঋষভৌষধং। ইতি রাজনির্ঘণ্টঃ॥

ভূপদঃ পুং বৃক্ষঃ। ইতি শব্দচন্দ্রিকা

ভূপদী স্ত্রী মল্লিকা। ইত্যমরঃ॥

ভূপলাশঃ পুং বৃক্ষভেদঃ। বিশালী ইতি ভাষা। যথা। অক্ষোড়কঃ সুকল্কশ্চ ভূপলাশো বিশল্যকৃৎ। ইতি রত্নমালা॥

ভূপাটলী স্ত্রী বৃক্ষবিশেষঃ। ভূয়াতনি ইতি লেনবাদবী ইতিচ হিন্দী ভাষা। তৎপর্য্যায়ঃ। ভূঙ্গস্থী ২ ভূতালী ৩ রক্তপুষ্পিকা ৪। অস্যা গুণাঃ। কটুত্বং। উষ্ণত্বং। পারদে প্রযোজকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

ভূপালঃ পুং রাজা। ইতি শব্দমালা

ভূপুত্রী স্ত্রী সীতা। ইতি শব্দরত্নাবলী॥

ভূপেষ্টঃ পুং রাজাদনীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

ভূভর্ত্তা পুং পৃথিবীপতিঃ। ইতি সিদ্ধান্তকৌমুদ্যাং তৎপুরুষসমাসঃ॥

ভূভুক্ পুং রাজা। ইতি জটাধরঃ॥

ভূভৃৎ পুং রাজা॥ পর্ব্বতঃ। ইতি মেদিনী॥

ভূময়ী স্ত্রী ছায়া। সাতু সূর্য্যপত্নী। ইতি ত্রিকাণ্ডশেষঃ॥ মৃদাত্মকে ত্রি

ভূমা পুং বহুত্বং। যথা। ভূয়া ভূ

ভূযিষ্ঠাঃ। বহোরিযম্বিমন্ ইষ্ঠান্তস্য এতে নিপাত্যন্তে। ইতি মুগ্ধবোধ ব্যাকরণং॥ ঈযসো যস্ ঈযস্বাদৌ বহো ভূরাদেশঃ। ঈযস্বিম্নো রাদি লোপঃ। ইষ্ঠে যকারাগমশ্চ নিপাত্যন্তে। অতিশযেনবহুঃ ভূযান। বহোর্ভাবঃ ভূমা। অতিশযেন বহুঃ ভূযিষ্ঠঃ। ইতি তট্টীকাযাং দুর্গাদাসঃ॥ বহুত্ববিশিষ্টঃ। তত্র বাচ্যলিঙ্গঃ। যথা। ভূমঃ ভূমা। ইতি প্রভূতশব্দ পর্য্যাযে অমরটীকাযাং রমানাথঃ॥ ॥ বিরাটপুরুষঃ। যথা। যত্র নান্যৎ পশ্যতি নান্যৎ শৃণোতি নান্যদ্বিজানাতি স ভূমা যো ভূমা তদমৃতং। ইত্যাদি শ্রুতিভ্যো ব্রহ্মনিত্যত্বং সত্ত্ব শুদ্ধস্য প্রতিভাতি। ইতিবেদান্তসারটীকা॥

ভূমিঃ স্ত্রী পৃথিবী॥ স্থানমাত্রং। ইতি মেদিনী॥ জিহ্বা। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ যোগিনামবস্থাবিশেষঃ। যথা। নিরুদ্ধে চেতসি পুরা সবিকল্প সমাধিনা। নির্বিকল্প সমাধিস্তু ভবেদত্র ত্রিভূমিকঃ॥ ব্যুত্তিষ্ঠতে স্বত স্ত্বাদ্যে দ্বিতীযে পরবোধিতঃ। অন্তে ব্যুত্তিষ্ঠতে নৈব সদা ভবতি তন্ময়ঃ॥ এবং প্রাগ্‌ভূমি [illegible]দ্ধাবপ্যুত্তরোত্তর ভূমযে। বিধেযা ভগবদ্ভক্তি স্তাং বিনা সা ন সিধ্যতি॥ ইতি গীতা গূঢ়াথদীপিকাযাং মধুসূদন সরস্বতী॥ ॥ ভূমেঃ পর্য্যাযাদযঃ পৃথিবী শব্দে দ্রষ্টব্যাঃ॥ অস্যা গুণাঃ। ভূমেঃ স্থৈর্য্যং গুরুত্বঞ্চ কাঠিন্যং প্রসবার্থতা। গন্ধো গুরুত্বং শক্তিশ্চ সংঘাতঃ স্থাপনা ধৃতিঃ॥ ইতি মহাভারতে মোক্ষধর্ম্মঃ॥ অস্যার্থঃ। স্থৈর্য্য মচাঞ্চল্যং ১। গুরুত্বং পতন প্রতিযোগী গুণঃ ২। কাঠিন্যং ৩। প্রসবার্থতা ধান্যাদ্যুৎপত্তি স্তদর্থতা ৪। গন্ধঃ ৫। গুরুত্বং পিণ্ডপুষ্টিঃ ৬। শক্তিঃ গন্ধগ্রহণসামর্থ্যং ৭। সংঘাতঃ শ্লিষ্টাবযবত্বং ৮। স্থাপনা মনুষ্যাদ্যাশ্রযত্বং ৯। ধৃতিঃ পাঞ্চভৌতিকে মনসি যো ধৃত্যংশঃ। ইতি তট্টীকা॥ ॥ ভূমি দান মাহাত্ম্যং যথা। সর্ব্বেষা মেব দানানাং ভূমি দান মনুত্তমং। যো দদাতি মহীং রাজন্ বিপ্রাযাকিঞ্চনায বৈ॥ অঙ্গুষ্ঠ মাত্র মথবা স ভবেৎ পৃথিবীপতিঃ। ন ভূমিদানসদৃশং পবিত্র মিহ বিদ্যতে॥ ভূমিং যঃ প্রতিগৃহ্লাতি ভূমিং যশ্চ প্রযচ্ছতি। উভৌ তৌ পুণ্য নাপন্নৌ নিযতং স্বর্গগামিনৌ॥ যৎ কিঞ্চিদ্ভূমিদানন্তু সর্ব্বদানোত্তমোত্তমং।

মহীপত্তে নরঃ কোপি ভূমিদো ভূমির্মাপ্নুযাৎ ॥ ভূমিদান সমং দানং নাস্ত্যত্র পৃথিবী তলে । তস্মাদল্প মল্পঞ্চৈব ভুক্তি মুক্তি সুখপ্রদং ॥ যথা তথা প্রকারেণ ভূমিদাতা তু ভূমিপঃ । সুখী স্যাৎ সর্ব্বকালেষু চান্তে স্বর্গ মবাপ্নুযাৎ ॥ বৃহদল্পতরং বাপি ভূমিদানং মহত্তমং । যঃ কশ্চিদ্ব্রাহ্মণে দত্ত্বা ভবতীহ মহীপতিঃ ॥ সর্ব্বথা সর্ব্বদা দেয়া ধরিত্রী ব্রাহ্মণস্য তু । প্রাণান্তে নৈব ন ক্বাপি হরণীয়া জনৈ রপি ॥ কৃত্বা খাতাদিকং কর্ম্ম বিপ্র ভূমিং নরো বলাৎ । করোতি যদি রাজেন্দ্র তৎ সর্ব্বং নিষ্ফলং ভবেৎ ॥ ব্রাহ্মণাদ্দান গ্রহণং বিনানুজ্ঞাঞ্চ পার্থিব । তথা তৎ পরিতোষঞ্চ তত্তমূল্যাদিকং বিনা ॥ বিপ্র ভূমৌ ভূসুরোপি দৈবং পৈত্রং তথাধ্বরং । হরি সদ্ম তথা রাম প্রাসাদ মণ্ডপং গৃহং ॥ খাতাদি খননং সেতু বন্ধনং ভবনং গবাং । সধান্য ফল মূলাদি শাকাদি ক্ষেত্র মেব চ ॥ পঞ্চান্ন বপনং পুষ্পোদ্যানং বৃক্ষাদি রোপণং । স বটাশ্বত্থ তুলসী ধাত্রী বিল্বাদি রোপণং ॥ নিত্যং নৈমিত্তিকং কাম্যং স্নান সন্ধ্যাদিকং তথা । পঞ্চ যজ্ঞং তথেষ্টার্চ্চাদিক মেতত্ত্ব চাপরং ॥ শ্রীকৃষ্ণ সেবনং ভক্তি ভক্তি ষোড়শ পূর্ব্বকং । কা কথা বেতরেষান্ত ন স্বর্য্যাৎ পারমার্থিকঃ ॥ যঃ কর্ম্ম ফলকামেপ্সু র্ন করোত্যত্র কর্ম্ম চ । স্বকৃতে মত্ততা মোহাদজ্ঞানাদ্বা ভ্রমাদিতঃ ॥ নৃপতে স্বর্ব্বতো মে তৎ সর্ব্বং স্যান্নিষ্ফলং ধ্রুবং । যদ্ভূমি রথবা তস্য সংপূর্ণং ফল মেব চ ॥ অতো লোকে হি ধর্ম্মাত্মা জ্ঞানী চ সর্ব্ব ধর্ম্মবিৎ । বিবেকী ধর্ম্মশাস্ত্রজ্ঞঃ পুরাণাগম বেদবিৎ ॥ বেদান্তজ্ঞো মুনিঃ সাধুঃ কার্য্যাদি র্ব্বা মহীপতে । ন স্বর্য্যাদ্ভূমি হরণং ব্রাহ্মণীহর কল্মষং ॥ ইতি পাদ্মোত্তরখণ্ডে ৪৯ অধ্যায়ঃ ॥*॥ অপিচ । বৃহস্পতিঃ । ষষ্টিং বর্ষ সহস্রাণি স্বর্গে তিষ্ঠতি ভূমিদঃ । উচ্ছেত্তা চানুমন্তা চ তাবন্তি নরকে বসেৎ ॥ তথা । ভূমিং দত্ত্বা তু যঃ পত্রং স্বর্য্যাচ্চন্দ্রার্ক কালিকং । অনাচ্ছেদ্য মনাহার্য্যং দান লেখ্যন্ত তদ্বিদুঃ ॥ মহাভারতে । অপি পাপকৃতো রাজ্ঞঃ প্রতিগৃহ্নন্তি সাধবঃ । পৃথিবীং নান্যদিচ্ছন্তি পাবনীং জননীং যথা ॥ নামা ২স্যাঃ প্রিয়দত্তেতি গুহ্যং দেব্যাঃ সনাতনং । দানে বাপ্যথ বাদানে নামাস্যাঃ পরমং প্রিয়ং ॥ দানাদান কালে যৎ প্রিয়দত্তা

নান্যাস্যাঃ পরমং প্রিয় মিত্যুক্তং তে ন প্রিয়দত্তা মিত্যচ্ছার্য্য দাতব্যা প্রতিগৃহীতব্যা চ॥ ভূমেঃ পূজায়াং দানবাক্যে চ প্রিয়দত্তেতি বিশেষণং। ভূমি বিষ্ণু দেবতাকা। ষষ্টি বর্ষ সহস্রাবচ্ছিন্ন স্বর্গবাসঃ ফলং। প্রতিগৃহে তদ্ভূমেঃ প্রদক্ষিণ মাত্রং। ভূমে রসন্নিধানে তামুদ্দিশ্য প্রদক্ষিণং। ইতি শুদ্ধিতত্ত্বং ॥ ❀ ॥ আদ্রা দ্যপাদগে রবৌ ভূমী রজোযুক্তা ভবতি তৎকালে পাঠাদি নিষেধো যথা জ্যোতিষে। রজোযুক্ স্বাম্বুবাচী চ রৌদ্রাদ্যপাদগে রবৌ। তস্যাং প্যাঠো বীজবাপো নাহিভী দুগ্ধপানতঃ॥ রজোযুক্তা ঋতুমতী পৃথ্বী। জ্যোতিষে। যস্মিন্ বারে সহস্রাংশু র্যৎকালে মিথুনং ব্রজেৎ। অম্বুবাচী ভবেন্নিত্যং পুন স্তৎ কাল বারয়োঃ॥ মৎস্যসূক্তে। ধরণ্যা মৃতু মত্যাঞ্চ ভূমিকম্পে তথৈব চ। অন্তরাগমনে চৈব বিদ্যাং নৈব পঠেদ্বুধঃ॥ ইতি তিথ্যাদিতত্ত্বং ॥ ❀ ॥ ন স্বাধ্যায়ং বষট্কারং ন দেব পিতৃ পূজনং। হলানাং যোজনঞ্চৈব বীজানাং বপনং তথা॥ দিন ত্রয়ং ন কুর্বীত যাবৎ পৃথ্বী রজস্বলা। যতিনো ব্রতিন শ্চৈব বিধবা চ দ্বিজ স্তথা॥ অম্বুবাচী দিনেনৈব পাকং কৃত্বা ন ভক্ষয়েৎ। স্বপাকং পরপাকং বা অম্বুবাচী দিনে তথা॥ ভক্ষণং নৈব কুর্বীত চাণ্ডালান্ন সমং স্মৃতং। ইতি রাজমার্ত্তণ্ডঃ॥ ❀ ॥ অশুদ্ধাং ভূমি মাহ দেবলঃ। সা অমেধ্যা মলিনা দুষ্টা এতন্মিশ্রতযান্যতমা ভবতি। অত্রামেধ্যা যথা। প্রসূতে গ যত্র ম্রিয়তে যত্র মানুষঃ। চাণ্ডালৈ রুষিতং যত্র যত্র বিন্যস্যতে শবঃ॥ বিণ্মূত্রোপহতং যত্তু কুণপো যত্র দৃশ্যতে। এবং কশ্মল ভূয়িষ্ঠা ভূ রমেধ্যেতি লক্ষ্যতে॥ কুণপঃ শবঃ॥ দুষ্টা যথা। কৃমি কীট পদক্ষেপৈ র্দূষিতা যত্র মেদিনী। দুপ্লাপকর্ষণৈঃ ক্ষিপ্তে র্বান্তৈশ্চ দুষ্টতাং ব্রজেৎ॥ দুপ্লা ঘনীভূত শ্লেষ্মা॥ মলিনা যথা। নখ দন্ত তনূজ ত্বক্ তুষ পাংশু রজো মলৈঃ। ভস্ম পঙ্ক তৃণৈ র্বাপি প্রচ্ছন্না মলিনা ভবেৎ॥ ❀ ॥ তাসাঞ্চ শুদ্ধি মাহ। দহনং খননং ভূমে রুপলেপন বাপনে। পর্য্যন্য বর্ষণঞ্চৈব শৌচং পঞ্চবিধং স্মৃতং॥ বাপনং মৃদন্তরেণ পূরণং। অত্রামেধ্যায়া শ্চতুষ্কং পঞ্চকং বা। দুষ্টায়াঃ দ্বিকং ত্রিকং বা॥ মলিনায়াঃ দহনাদীনা মেকধা শোধন মাহ দেবলঃ। পঞ্চধা বা চতুর্ধা বা ভূ রমেধ্যা বিশুধ্যতি। দ্বিধা দুষ্টা

ত্রিধা যদপি শুধ্যতে মলিনৈকধা ॥ অন্যপঞ্চপ্রকারমাহ মনুঃ। সম্মার্জনেনাঞ্জনেন সেকেনোল্লেখনেন চ। গবাঞ্চ পরিবাসেন ভূমিঃ শুদ্ধ্যতি পঞ্চধা ॥ সম্মার্জনং তৃণাদ্যপনয়নং। অঞ্জনং গোময়েনোপলেপনং। সেকো জলেন প্রক্ষালনং। উল্লিখনং তক্ষণং। পরিবাসো গবোপস্থাপনং। অত্র সেক পরিবাসযো র্নির্লেপ স্থাপন বিষযত্বং। অন্যেবা মমেধ্য লিপ্ত বিষযত্বং। ব্রহ্মপুরাণে। গ্রামাদ্দণ্ড শতং ত্যক্ত্বা নগরাচ্চ চতুর্গুণং। ভূমেঃ সর্ব্বত্র শুদ্ধিঃ স্যাদত্র লোকো ন বিদ্যতে ॥ দণ্ডং চতুর্হস্তঃ। নগরং মহাগ্রামঃ। ইতি গোপাল পঞ্চানন কৃত শুদ্ধিনির্ণযঃ ॥ * ॥ ভূমৌ বর্ণ লেখনাদি নিষেধো যথা। ন ভূমৌ বিলিখেদ্বর্ণং মন্ত্রং ন পুস্তকং লিখেৎ। ন মুক্ত্বা পুস্তকং স্থাপ্যং ন মুক্ত মাহরেত্তু তৎ ॥ ভূকম্পে গ্রহণে চৈব অক্ষরং বাথ পুস্তকং। ভূমৌ তিষ্ঠতি দেবেশি জন্ম জন্মসু মূর্খতা ॥ তদা ভবতি দেবেশি তস্মাত্তৎ পরিবর্জযেৎ ॥ ইতি যোগিনীতন্ত্রে তৃতীয ভাগে ৭ পটলঃ ॥

ভূমিকদম্বঃ পুং কদম্ববিশেষঃ। তৎ পর্য্যাযঃ। ভূনীপঃ ২ ভূমিজঃ ৩ ভৃঙ্গবল্লভঃ ৪ লঘুপুষ্পঃ ৫ বৃত্তপুষ্পঃ ৬ বিষঘ্নঃ ৭ ব্রণহারকঃ ৮। অস্য গুণাঃ। ত্রি কদম্বাঃ কটূষ্ণাশ্চ বৃষ্যা দোষহরা হিমাঃ। কষায তিক্তাঃ পিত্তঘ্না বীর্য্য বৃদ্ধিকরাঃ পরাঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

ভূমিকা স্ত্রী রচনা ॥ বেশান্তরপরিগ্রহঃ। ইতি মেদিনী ॥ পাত্রাণি নাট্যে ঽধিকৃতা স্তত্তদ্বেশাস্তু ভূমিকাঃ। ইতি হেমচন্দ্রঃ ॥

ভূমিখর্জ্জুরিকা স্ত্রী ক্ষুদ্রখর্জ্জুরী। তৎ পর্য্যাযঃ। স্বাদ্বী ২ দুরারোহা ৩ মৃদুচ্ছদা ৪। অস্যা ভেদাঃ গুণাশ্চ। ভূমিখর্জ্জুরিকা স্বাদ্বী দুরারোহা মৃদুচ্ছদা। অথ স্কন্ধফলা কাককর্কটী স্বাদুমস্তকা ॥ পিণ্ডখর্জ্জুরিকা ত্বন্যা সা দেশে পশ্চিমে ভবেৎ। খর্জ্জুরী গোস্তনাকারা পরাদ্দ্বীপাদিহাগতা ॥ জাযন্তে পশ্চিমে দেশে সা ছোহোরেতি কীর্ত্তিতা। খর্জ্জুরীত্রিতযং শীতং মধুরং রসপাকযোঃ ॥ স্নিগ্ধং রুচিকরং হৃদ্যং ক্ষত ক্ষয হরং গুরু। তর্পণং রক্তপিত্তঘ্নং পুষ্টি বিষ্টম্ভি শুক্রদং ॥ কোষ্ঠ মারুত কৃদ্বল্যং বান্ত বাত কফাপহং। জ্বরাভিঘাত ক্ষুৎ তৃষ্ণা কাশ শ্বাস নিবারণং ॥ মদং মূর্চ্ছা মরুৎ পিত্ত

মধ্যোদ্ভূত গদান্তকৃৎ। মহতী-
ভ্যাং গুণৈরল্পা স্বল্পখর্জ্জুরিকা স্মৃতা
॥ খর্জ্জুরী তরুতোয়ন্তু মদ পিত্ত
করংভবেৎ। বাত শ্লেষ্মহরং রুচ্যং
দীপনং বল শুক্র কৃৎ॥ ইতি ভাব-
প্রকাশঃ ॥

ভূমিখর্জ্জুরী স্ত্রী ভূমিখর্জ্জুরিকা। ইতি
রাজনির্ঘণ্টঃ ॥ অস্যা গুণপর্য্যাযাঃ
ভূখর্জ্জুরীশব্দে দ্রষ্টব্যাঃ ॥

ভূমিচম্পকঃ পুং পুষ্পবৃক্ষবিশেষঃ।
ভুঁইচাঁপা ইতি ভাষা। তৎপর্য্যা-
যঃ। তাম্রপুষ্পঃ২সন্ধিবন্ধঃ৩ক্ষযনঃ
৪। ইতি শব্দচন্দ্রিকা॥ অস্য মূলং
ব্রণপাক কারকং ॥

ভূমিজং ক্লী গৌরসুবর্ণং। ইতি রাজ-
নির্ঘণ্টঃ ॥

ভূমিজঃ পুং মঙ্গলগ্রহঃ॥ নরকরাজঃ
। ইতি মেদিনী॥ ভূমিকদম্বঃ ॥ ম
নুষ্যঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূমিজগুগ্গুলঃ পুং আশাপুরগুগ্গুলুঃ।
তৎপর্য্যাযঃ।দৈত্যমেদজঃ২ দুর্গা-
হ্বঃ৩ আশাপুরসম্ভবঃ৪ মজ্জারঃ
৫ মেদজঃ৬ মহিষাসুরসম্ভবঃ৭।
অস্য গুণাঃ। তিক্তত্বং। কটুত্বং।
উষ্ণত্বং। কফ বাত নাশিত্বং। উমা-
প্রিযত্বং। ভূতঘ্নত্বং। মেধ্যত্বং। সৌ-
রভ্যদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভূমিজম্বুঃ স্ত্রী ক্ষুদ্রজম্বুঃ। তৎপর্য্যাযঃ
নাদেযিকা ২ নাদেযী ৩ ভূজম্বুঃ ৪
ভূমিজম্বুকা ৫। ইতি শব্দরত্নাবলী
॥ কাকজম্বুঃ৬ শীতপল্লবা৭। ইতি
রত্নমালা॥ নাদেযিকা চ নাদেযী
ভূজম্বূ র্ভূমিজম্বুকা। ভূমিজম্বু ল-
তাযাং স্যাৎ কেচিত্তু ভূমিচম্পকে
॥ ইতি শব্দরত্নাবলী ॥

ভূমিজম্বূঃ স্ত্রী ভূজম্বুঃ। ক্ষুদ্রজম্বুঃ।
তৎপর্য্যাযঃ। হ্রস্বফলা২ ভৃঙ্গবল্ল-
ভা৩ হ্রস্বা৪ ভূজম্বুঃ৫ ভ্রমরেষ্টা৬
পিকভক্ষা৭ কাষ্ঠজম্বূঃ৮। অস্যা
গুণাঃ। কষাযত্বং। মধুরত্বং। শ্লেষ্ম-
পিত্তনাশিত্বং। রুচ্যত্বং। সংগ্রাহি-
ত্বং। হৃৎ কণ্ঠদোষ নাশিত্বং। বীর্য্য
পুষ্টিদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভূমিজম্বুকা স্ত্রী ভূমিজম্বুঃ। ইত্য-
মরঃ ॥

ভূমিজা স্ত্রী সীতা। ইতি ত্রিকাণ্ড-
শেষঃ মেদিনী চ ॥

ভূমিজীবী পুং বৈশ্যঃ। ইতি শব্দ-
রত্নাবলী ॥

ভূমিদেবঃ পুং ব্রাহ্মণঃ। ইতি হলা-
যুধঃ ॥

ভূমিপঃ পুং রাজা। ইতি জটাধরঃ ॥

ভূমিপক্ষঃ পুং বাতাশ্বঃ। ইতি
হারাবলী ॥

চিঃ পুং তালবৃক্ষঃ। ইতি হারাবলী ॥

ভূমিমণ্ডঃ পুং অষ্টপাদিকা। মদন মালীতি হাপরমালী ইতিচ ভাষা। ইতি রত্নমালা ॥

ভূমিমণ্ডপভূষণা স্ত্রী মাধবীলতা। ইতি রাজনির্ঘণ্টঃ ॥

ভূমিরক্ষকঃ পুং বাতাশ্বঃ। ইতি ভূরিপ্রয়োগঃ ॥

ভূমিলাভঃ পুং মৃত্যুঃ। ইতি ভূরি প্রয়োগঃ ॥ ভূমিপ্রাপ্তিশ্চ ॥

ভূমিলেপনং ক্লী গোময়ং। ইতি হেমচন্দ্রঃ ॥ ভূমের্লেপশ্চ ॥

ভূমিবর্দ্ধনঃ পুং ক্লী শবঃ। ইতি হেমচন্দ্রঃ ॥

ভূমিসম্ভবা স্ত্রী সীতা। ইতি জটাধরঃ ॥

ভূমিস্পৃক্ পুং মানুষঃ ॥ বৈশ্যঃ। ইতি মেদিনী ॥ চৌরবিশেষঃ ॥ অন্ধঃ ॥ খঞ্জঃ। ইতিশব্দরত্নাবলী ॥

ভূমী স্ত্রী ভূমিঃ। ইতি ভরত দ্বিরূপকোষঃ ॥

ভূমীন্দ্রঃ পুং রাজা। ইতি শব্দরত্নাবলী ॥

ভূমীরুহঃ পুং বৃক্ষঃ। যথা। দীপ্তাপি যুতা যথা বিরহিণী শ্বাসা স্তথা বাসরা যামিন্য শ্চপলা যথা জলবধূদৃষ্টিঃ সরোষা প্রিয়ে। ছায়া বাঞ্ছ্য তমা নবোঢ বনিতা বাণীব ভূমীরুহা নিষ্পন্দাঃ সুচিরাদ্যথা মিলিতয়ো র্যূনো র্মিথো দৃষ্টয়ঃ ॥ ইত্যুদ্ভটঃ শ্লোকঃ ॥

ভূমীসহঃ পুং বৃক্ষবিশেষঃ। ভুঁইসহ ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। দারদাতুঃ ২ বরদাতুঃ ৩ খরচ্ছদঃ ৪। অস্য গুণাঃ। শিশিরত্বং। রক্ত পিত্ত প্রসাদনত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

ভূম্যামলকী স্ত্রী ক্ষুপবিশেষঃ। ভুঁইআমলা ইতি ভাষা। তৎপর্য্যায়ঃ। বহুপত্রী ২ জড়া ৩ অধ্যণ্ডা ৪ তালিঃ ৫ তামলকী ৬ অজটা ৭ সূক্ষ্মফলা ৮ ক্ষেত্রামলকী ৯। ইতি রত্নমালা ॥ বিতুন্নকঃ ১০ ঝটা ১১ অমলা ১২ অজ্ঝটা ১৩ তালী ১৪ শিবা ১৫। ইত্যমরঃ ॥ ঝাটা ১৬ মলা ১৭ ঝাটামলা ১৮ অমলাজ্ঝটা ১৯। ইত্যমরটীকায়াং ভরতঃ ॥ ভূম্যামলকিকা ২০ শিবামলকী ২১ বহুপত্রা ২২ বহুফলা ২৩ বহুবীর্য্যা ২৪ ভূধাত্রী ২৫। অস্যাগুণাঃ। বাত কারিত্বং। তিক্তত্বং। কষায়ত্বং। মধুরত্বং। হিমত্বং। পিপাসাকাস পিত্তাসৃক্ কফ পাণ্ডু ক্ষত-

নাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

ভূম্যামলী স্ত্রী ভূম্যামলকী। ভূঁই আঁবলা ইতি হিন্দীভাষা। ভূঁইআমলা ইতি বঙ্গভাষা। তৎপর্য্যায়ঃ। তমালী ২ তালী ৩ তমালিকা ৪ উচ্চটা ৫ দৃঢ়পাদী ৬ বিতুন্না ৭ বিতুন্নিকা ৮ ভূধাত্রী ৯ চারটী ১০ বৃষ্যা ১১ বিষঘ্নী ১২ বহুপত্রিকা ১৩ বহুবীর্য্যা ১৪ অহিভয়দা ১৫ বিশ্বপর্ণী ১৬ হিমালয়া ১৭ অজ্ঝটা ১৮ বীরা ১৯। অস্যা গুণাঃ। কষায়ত্বং। অম্লত্বং। পিত্ত মেহ দাহ নাশিত্বং। শিশিরত্বং। মূত্ররোগার্ত্তিশমনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভূম্যাহল্যং ক্লী ক্ষুপবিশেষঃ। ভুঁইতথড় ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। হংসকেতু ২ মার্কণ্ডীয়ং ৩ মহৌষধং ৪। অস্য গুণাঃ। তিক্তত্বং। কটুত্বং। জ্বর হংসাম সিধ্ম নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

ভূয়ঃ[ন] ব্য পুনরর্থং। ইতি শব্দরত্নাবলী ॥

ভূয়ান্[স] ত্রি বহুতরঃ। ইতি মেদিনী ॥

ভূয়িষ্ঠং ত্রি প্রচুরঃ। ইত্যমরঃ ॥

ভূরুক্তা স্ত্রী ভূমিখর্জ্জূরী। ইতি রাজনির্ঘণ্টঃ ॥

ভূরি ক্লী স্বর্ণং। ইত্যমরঃ ॥

ভূরিঃ পুং বিষ্ণুঃ ॥ ব্রহ্মা ॥ শিবঃ ॥ ইতি মেদিনী ॥ বাসবঃ। ইতি শব্দরত্নাবলী ॥ প্রচুরে ত্রি। ইত্যমরঃ ॥

ভূরিক্ স্ত্রী পৃথিবী। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

ভূরিগন্ধা স্ত্রী মুরানামগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিগমঃ পুং গর্দ্দভঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিদাবা[ন] পুং ভূরিদদাতিযঃ। প্রচুরদাতা। ইতি মুগ্ধবোধব্যাকরণং ॥

ভূরিদুগ্ধা স্ত্রী বৃশ্চিকালী। ইতিরাজনির্ঘণ্টঃ ॥

ভূরিপত্রঃ পুং উখর্বলতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিপলিতদা স্ত্রী পাণ্ডুরফলী। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিপুষ্পা স্ত্রী শতপুষ্পা। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিপ্রেমা[ন] পুং চক্রবাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিফেনা স্ত্রী সপ্তলাবৃক্ষঃ। চামারকসা ইতি ভাষা। ইত্যমরঃ ॥

ভূরিমল্লী স্ত্রী অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিমায়ঃ পুং স্ত্রী শৃগালঃ।

ইত্যমরঃ ॥

ভূরিবলা স্ত্রী অতিবলা। ইতি রাজনির্ঘণ্টঃ ॥

ভূরিশঃ ব্যং বহুশঃ। বহ্বল্পার্থাৎ-কারকাচ্ছস্ বেতি কারক ভূরি শব্দাৎ চশস্ প্রত্যয় নিষ্পন্নো ২যং শব্দঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

ভূরিশ্রবা পুং চন্দ্রবংশীয় সোমদত্ত রাজপুত্রঃ। সতু অর্জ্জুনেন হতঃ। ইতি মহাভারতং ॥

ভূরুণ্ডী স্ত্রী শ্রীহস্তিনীবৃক্ষঃ। হাতি শুঁড়া ইতি ভাষা। ইত্যমরঃ ॥

ভূরুহঃ পুং বৃক্ষঃ। ইতি শব্দমালা ॥

ভূর্জঃ পুং স্বনামখ্যাত বৃক্ষবিশেষঃ। ভোজপত্র ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। বল্কদ্রুঃ২ ভর্জঃ ৩ সচর্ম্মা ৪ ভূর্জপত্রকঃ ৫ চিত্রত্বক ৬ বিন্দুপত্রঃ ৭ রক্ষাপত্রঃ ৮ বিচিত্রকঃ ৯ ভূতঘ্নঃ ১০ মৃদুপত্রঃ ১১ শৈলেন্দ্রস্থঃ ১২। ইতি রাজনির্ঘণ্টঃ ॥ ভূর্জপত্রঃ ১৩ চর্ম্মী ১৪ বহুলবল্কলঃ ১৫। ইতি ভাবপ্রকাশঃ ॥ ছত্রপত্রঃ ১৬ শিবঃ ১৭ স্থিরচ্ছদঃ ১৮। ইতি রত্নমালা ॥ মৃদুত্বক্ ১৯। ইত্যমরঃ ॥ পত্রপুষ্পকঃ ২০। ইতি ভরতধৃত মধুঃ ॥ ভূজঃ ২১ বহুপটঃ ২২ বহুত্বক্‌ঃ ২৩ মৃদুত্বচঃ ২৪। ইতি ভরতধৃত স্বামী ॥ অস্য গুণাঃ। বলকারিত্বং। কফ রক্ত নাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ কটুত্বং। কষায়ত্বং। উষ্ণত্বং। ভূতরক্ষাকরত্বং। ত্রিদোষ শমনত্বং। পথ্যত্বং। দুষ্ট কৌটিল্য নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ কর্ণরোগ পিত্ত রাক্ষস মেদ বিষ - - - - - - - ভাবপ্রকাশঃ ॥

ভূর্জকণ্ঠকঃ পুং বর্ণসঙ্করজাতিবিশেষঃ। ইতি জটাধরঃ ॥

ভূর্জপত্রঃ পুং ভূর্জবৃক্ষঃ। ইতি রত্নমালা ॥

ভূর্ণিঃ স্ত্রী পৃথিবী ॥ মরুভূমিঃ। ইত্যুণাদিকোষঃ ॥

ভূর্লোকঃ পুং অন্তরীক্ষাদধোলোকঃ। মর্ত্ত্যলোকঃ। তস্য লক্ষণং যথা। পাদগম্যঞ্চ যৎ কিঞ্চিৎ বস্ত্বস্তি পৃথিবীময়ং। স ভূর্লোকঃ সমাখ্যাতো বিস্তারো ২স্য ময়োদিতঃ ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৫ অধ্যায়ঃ ॥ চরণ সঞ্চার যোগ্যং গিরি শিখরাদি যাবৎ তাবদৎ সেধো ভূর্লোক ইত্যর্থঃ। বিস্তারো ময়োদিতঃ সর্ব্বতো লোকালোকাবধি পঞ্চবিংশতি কোটি প্রমাণঃ। ইতি তট্টীকায়াং স্বামী ॥ অস্য বিবরণং তত্রৈব দ্বিতীয়াদি চতুর্থাধ্যায়েষু

ভূগোলশব্দে দ্রষ্টব্যং ॥

ভূপগ্রা স্ত্রী শঙ্খপুষ্পী। ইতি রাজনির্ঘণ্টঃ ॥

ভূলতা স্ত্রী কিঞ্চুলুকঃ। ইতি হেমচন্দ্রঃ ॥

ভূবদরী স্ত্রী ক্ষুদ্রকোলী। ঝড়বের ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। ক্ষিতিবদরী ২ বল্লীবদরী ৩ বদরবল্লী ৪ বহুফলিকা ৫ লম্বুবদরী ৬ বদরফলী ৭ সূক্ষ্মবদরী ৮। অস্যা গুণাঃ। মধুরাম্লত্বং। কফ বাত বিকার হারিত্বং। পথ্যত্বং। দীপনত্বং। পাচনত্বং। কিঞ্চিৎ পিত্তাস্রু কারিত্বং। রুচ্যত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ

ভূশয়ঃ পুং নঙ্গলগোধাদিঃ। বিলশায়িত্বাৎ। এতেষাং মাংস গুণাঃ। গুরুত্বং। উষ্ণত্বং। মধুরত্বং। স্নিগ্ধত্বং। বায়ুনাশিত্বং। শুক্রকারিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ বিষ্ণুঃ। যথা। ভূশয়ো ভূষণো ভূতি র্বিশোকঃ শোকনাশনঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং ॥

ভূশলুঃ পুং ভুকবুর্দারকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভূষ কি ভূষণে। ইতি কবিকল্পদ্রুমঃ ॥ কি ভূষয়তি ভূষতি হারো জনং। ইতি দুর্গাদাসঃ ॥

ভূষণং ক্লী অলঙ্কারঃ। ইতি হেমচন্দ্রঃ ॥ দেবদেয় ভূষণাদি যথা। ভোগ্য ভূষোত্তমং নিত্যং ভূষণানি শৃণুষ্বমে। কিরীটঞ্চ শিরোরত্নং কুণ্ডলঞ্চ ললাটিকা ॥ তালপত্রঞ্চ হারশ্চ গ্রৈবেয়ক মথোর্ম্মিকা। প্রালম্বিকা রত্নসূত্র মুক্তঙ্গোথঙ্কমালিকা ॥ পার্শ্বদ্যোতো নখদ্যোতো হ্যঙ্গুলীচ্ছাদক স্তথা। কটিলগ্নং মাণবকো মূর্দ্ধতারা ললন্তিকা ॥ অঙ্গদো বাহুবলয়ঃ শিখাভূষণ মিঙ্গিকা। প্রাগণ্ডবন্ধং তদ্ভ্রাশং নাভিপূরো হথ মালিকা ॥ সপ্তকী শৃঙ্খলঞ্চৈব দন্তপত্রঞ্চ বর্ণকঃ। উরু সূত্রঞ্চ নীবী চ মুষ্টিবন্ধং প্রকীর্ণকং ॥ পাদাঙ্গদং হংসকঞ্চ নূপুরং ক্ষুদ্রঘণ্টিকা। সুখপট্ট মিতি প্রোক্তা অলঙ্কারাঃ সুশোভনাঃ ॥ চত্বারিংশদমী প্রোক্তা লোকে বেদে চ সৌখ্যদাঃ। অলঙ্কারাঃ প্রদানেন চতুর্বর্গ প্রদায়কাঃ ॥ এতেষাং পূজনং কৃত্বা প্রদদ্যাদিষ্ট সিদ্ধয়ে। তেষাং দৈবত মুচ্চার্য্য পূজয়েত্তু বিচক্ষণঃ ॥ শিরোগতানি চাদদ্যাৎ সৌবর্ণানি তু সর্ব্বদা। চূড়ারত্নাদিকানীহ ভূষণানি তু ভৈরব ॥ গ্রৈবেয়কাদি হংসান্তং সৌবর্ণং রাজতঞ্চ বা। নিবে-

দযেত্তু দেবেভ্যো নান্য তৈজস মন্ত্র-
কং ॥ রীতি বঙ্গাদি সংজাতং পাত্রো
পকরণাদিকং। দদ্যাদাবস বর্জন্ত ভূ
ষণং ন কদাচন ॥ ঘন্টা চামর ভৃঙ্গা-
দি পাত্রোপকরণাদিকং। তদ্ভূষণা-
ন্তরে দদ্যাদ্যস্মাত্তদুপভূষণং ॥ সর্ব্বং
তাম্রময়ং দদ্যাদ্যৎ কিঞ্চিদ্ভূষণাদি-
কং। সর্বত্র স্বর্ণবত্তাম্র মর্ঘ্যপাত্রে
ততোধিকং ॥ পূজার্ঘ্যপাত্রং নৈবে-
দ্যাধারপাত্রঞ্চ পানকং। ঔডুম্বরং
সদা বিষ্ণোঃ প্রীতিদং তোষদং তদা
॥ তাম্রে দেবাঃ প্রমোদন্তে তাম্রে দে-
বাঃ সদা স্থিতাঃ। সর্ব্ব প্রীতিকরং
তাম্রং তস্মাত্তাম্রং প্রযোজয়েৎ ॥ স্বো-
পযোগে নরঃ কুর্য্যাদ্দেবানামপি
ভৈরব। গ্রীবোর্দ্ধ দেশে রৌপ্যন্তু ন
কদাচিচ্চ ভূষণং ॥ প্রাকারঃ পানপা-
ত্রঞ্চ গেণ্ডুকং গৃহমেব চ। পর্য্যঙ্কাদি
যদন্যচ্চ সর্ব্বং তদুপভূষণং ॥ অযোম-
য মৃতে কাংস্য মৃত যদ্ভূষণং ভবেৎ
। স্বর্ণ রৌপ্যস্য চাভাবে বুধঃ কাযে
নিযোজযেৎ ॥ এতেষাং ভূষণাদীনাং
যদ্দাতুং শক্যতে নরৈঃ। তত্তদ্দদ্যাৎ
সম্ভবে তু সর্ব্বমেব প্রদাপযেৎ ॥ চ-
তুর্ব্বর্গপ্রদং নিত্যং ভূষণং সর্ব্ব সৌখ্য
দং। তুষ্টি পুষ্টি প্রীতিকরং যথা শ
-ক্তীষ্টদে সৃজেৎ ॥ ইদং তে ভূষণং
প্রোক্তং সর্ব্ব দেবস্য তুষ্টিদং। ইতি
কালিকাপুরাণে ৬৮ অধ্যাযঃ ॥ * ॥
অথালঙ্কারযুক্তিঃ। তদ্ধারণ দিন মু-
চ্যতে। রেবত্যশ্বি ধনিষ্ঠাসু হস্তাদি-
স্বপি পঞ্চসু। গুরু শুক্র বুধস্যাহ্নি
বস্ত্রালঙ্কার ধারণং ॥ অনিষ্টেষ্বপি
নির্দ্দিষ্টং বস্ত্রালঙ্কার ধারণং। উদ্বা-
হে রাজ সম্মানে ব্রাহ্মণানাঞ্চ সম্মতে
॥ শিরস্ত্রং মুকুটং হারঃ কুণ্ডলঞ্চাঙ্গ-
দন্তথা। কঙ্কণং বালকঞ্চৈব মেখলা-
ষ্টাবিতি ক্রমাৎ ॥ প্রধান ভূষণান্যষ্টু
যথা স্বং যাতি নিশ্চযঃ। পদ্মরাগশ্চ
বজ্রঞ্চ বিজনো গোবিদ স্তথা ॥ মুক্তা
বৈদূর্য্য নীলঞ্চ যথা মরকতং ক্রমাৎ।
আদিত্যাদি দশাজানাং সর্ব্ব সম্পত্তি
দাযকাঃ ॥ সুবর্ণেনাপি ঘটনা সর্ব্বে-
ষা মুপযুজ্যতে। প্রধান ভূষণেষ্বেব
মপ্রযানে ন নির্ণযঃ ॥ প্রধান ভূষণং
প্রাযঃ শিরসো হৃভিধীযতে। তস্য
প্রধান ভূতত্বাদিত্যাহ ভৃগুনন্দনঃ ॥
সুখদা মণযঃ শুদ্ধা দুঃখদা দোষশা-
লিনঃ ॥ ইতি যুক্তি কল্পতরুঃ ॥ * ॥
তদ্ধারণ ফলং যথা। ভূষণং ভূষযে-
দঙ্গং যথা যোগ্য বিধানতঃ। শুচি
সৌভাগ্য সন্তোষ দাযকং কাঞ্চনং
স্মৃতং। গ্রহ দৃষ্টিহরং পুষ্টিকরং দুঃখ
প্রণাশনং ॥ পাপ দৌর্ভাগ্য শমনং

রত্নাভরণ ধারণং। মাণিক্যং তরণেঃ সুজাত্যমমলং মুক্তাফলং শীতগো মাহেয়স্য চ বিদ্রুমো নিগদিতঃ সৌম্যস্য গারুত্মতং। দেবেজ্যস্য চ পুষ্পরাগ মসুরাচার্য্যস্য বজ্রং শনে নীলং নির্ম্মল মন্যযোশ্চ গদিতে গোমেদ বৈদূর্য্যকে॥ বাসঃ সুগন্ধ রত্নানাং ধারণং প্রীতিবর্দ্ধনং। রক্ষোঘ্ন মর্থ্য মোজস্যং সৌভাগ্যকরমুত্তমং॥ ইতি ভাবপ্রকাশঃ॥

ভূষণঃ পুং বিষ্ণুঃ। যথা। ভূশযো ভূষণো ভূতি র্বিশোকঃ শোকনাশনঃ। ইতি তস্য সহস্রনামস্তোত্রং॥

ভূষা স্ত্রী অলঙ্ক্রিয়া। ইত্যমরঃ॥

ভূষিতঃ ত্রি অলঙ্কৃতঃ। ইত্যমরঃ॥

ভূষ্ণুঃ ত্রি ভবনশীলঃ। তৎপর্য্যায়ঃ। ভবিষ্ণুঃ২ ভবিতা ৩। ইত্যমরঃ॥ সাধুভবনশীলঃ। ইতি তট্টীকায়াং রায়মুকুটঃ॥

ভূসুতঃ পুং মঙ্গলগ্রহঃ। ইতি শব্দমালা॥ সীতায়াং স্ত্রী॥

ভূস্তৃণং ক্লী ভূতৃণং। ইত্যমরঃ॥ অস্য পর্য্যায গুণা যথা। গুহ্যবীজঞ্চ ভূতীকং সুগন্ধং গোমযপ্রিয়ং। ভূস্তৃণস্তু ভবেচ্ছত্রা মালাতৃণক মিত্যপি॥ ভূস্তৃণং কটুকং তিক্তং তীক্ষ্ণোষ্ণং রোচনং লঘু। বিদাহি দীপনং রূক্ষ মনেত্র্যং মুখশোধনং॥ অর্দ্ধষ্যং বহুবিট্কঞ্চ পিত্ত রক্ত প্রদূষণং॥ ইতি ভাবপ্রকাশঃ॥

ভূস্পৃক্ পুং মনুষ্যঃ। ইতি হেমচন্দ্রঃ॥

ভূস্বর্গঃ পুং সুমেরুপর্ব্বতঃ। ইতি জটাধরঃ॥

ভৃক্ষিৎ পুং শূকরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভৃ লি টু ড় ঞ) ভৃতিপুষ্ট্যোঃ। ইতি
ভৃ ঞ ) কবিকল্পদ্রুমঃ॥ ভৃতি র্ভরণং পুষ্টিঃ পোষণং। লি ঞ বিভর্ত্তি শশিনং শম্ভু র্বিভৃতে জনকঃ সুতঃ। টু ভরথুঃ। ড় ভৃত্রিমং। ভ্বাদিপক্ষে ভৃতিঃ পূরণং। ঞ ভরতি হস্তমভিজ্জনঃ। ভরতে। ইতি দুর্গাদাসঃ॥

ভৃঙ্গংশঃ পুং ) ভ্রুঙ্গংশঃ। স্ত্রীবেশধা-
ভৃঙ্গংসঃ পুং ) রীনটপরুষঃ। ইত্যমরটীকায়াং রমানাথঃ॥

ভৃঙ্গংসকঃ পুং ভ্রুঙ্গংশঃ। ইতি শব্দরত্নাবলী॥

ভৃঙ্গটিঃ স্ত্রী ভ্রুঙ্গটিঃ। যথা রচিত ভৃঙ্গটি বন্ধং নন্দিনা দ্বারি রুদ্ধে। ইতি ভরতধৃত হরবিলাসঃ॥

ভৃঙ্গটী স্ত্রী ভ্রুঙ্গটিঃ। ইত্যমরটীকায়াং ভরতঃ॥ ভৃঙ্গটী কুটিলানণো। ইতি মার্কণ্ডেয়পুরাণে দেবী

মাহাত্ম্যঞ্চ ॥

ভৃগুঃ পুং মুনিবিশেষঃ। সতু ব্রহ্মণ স্তুচোজাতঃ। অস্য ভার্য্যা কর্দ্দম মুনিকন্যা খ্যাতিঃ। পুত্রঃ ধাতা বিধাতা চ। কন্যা শ্রীঃ। ইতি শ্রী ভাগবতং। অপিচ। মুনয়ঊচুঃ। কথিতস্তে যদা সর্গঃ পৃষ্টঃ সূত ত্বয়া ধুনা। ভৃগু সর্গাৎ প্রভৃত্যেষ সর্গো নঃ কথ্যতাং পুনঃ॥ সূত উবাচ। ভৃগোঃ খ্যাত্যাং সমুৎপন্না শ্রীঃপূর্ব মুদধেঃ পুনঃ। তথা ধাতা বিধাতা চ তস্যাং জাতৌ ভৃগোঃ সুতৌ॥ আয়তি র্নিয়তি শ্চৈব মেরু কন্যে মহাপ্রভোঃ। ধাতু র্বিধাতু স্তে ভার্য্যে যযো র্জাতৌ সুতাবুভৌ॥ প্রাণশ্চৈব মৃকণ্ডুশ্চ মার্কণ্ডেযো মৃকণ্ডুতঃ। ততো বেদশিরা যজ্ঞে প্রাণস্য দ্যুতিমান্ সুতঃ॥ ততো বংশো মুনি শ্রেষ্ঠা বিস্তরং ভার্গবো গতঃ। ইত্যাদ্যে বহ্নিপুরাণে বন্ন-সর্গ নামাধ্যাযঃ॥ ॥ শিবঃ॥ শুক্রগুহঃ॥ ইতি মেদিনী॥ সানুঃ॥ যমদগ্নিঃ। ইতি হেমচন্দ্রঃ॥ নিরবলম্বন পর্বতাদিপার্শ্বঃ। আরড়ি ইতি খ্যাতং। যস্মাৎপতনে অবস্থান,ক্রিয়া বিশেষো নাস্তি। অতএব ভৃগুপতন মিত্যাদি প্রযোগো দৃশ্যতে। ইতি ভরতঃ॥ তৎপর্য্যাযঃ। প্রপাতঃ ২ অতটঃ ৩। ইত্যমরঃ॥

ভৃগুপতিঃ পুং পরশুরামঃ। ইতি শব্দরত্নাবলী॥

ভৃগুসুতঃ পুং শুক্রঃ। ইতি শব্দরত্নাবলী॥ পরশুরামশ্চ॥

ভৃগূলাপতিঃ পুং পরশুরামঃ। ইতি শব্দরত্নাবলী॥ ভৃগূণাম্পতি রিত্যপিপাঠঃ॥

ভৃঙ্গং ক্লী ত্বচং। গুডত্বক্ ইতি খ্যাতং। ইত্যমরঃ॥ অভ্রকং। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গঃ পুং ভ্রমরঃ॥ কলিঙ্গপক্ষী। ফিঁঙ্গা ইতি ভাষা। ইত্যমরঃ॥ অস্য পর্য্যাযা ধূম্যাট শব্দে দ্রষ্টব্যাঃ। অস্য মাংস গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। কফ শুক্র বিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ষিঙ্গঃ॥ ভৃঙ্গরাজঃ। ইতি মেদিনী॥ ভৃঙ্গারঃ॥ ভৃঙ্গরোলঃ। ইতি শব্দরত্নাবলী॥

ভৃঙ্গকঃ পুং রাজবাসনপক্ষী। যথা। অথ ভৃঙ্গো ভৃঙ্গরাজো ভৃঙ্গকো রাজবাসনঃ। ইতি শব্দরত্নাবলী॥

ভৃঙ্গজং ক্লী অগুরু। ইতি রত্নমালা॥

ভৃঙ্গজা স্ত্রী ভার্গী। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গপর্ণিকা স্ত্রী সূক্ষ্মৈলা। ইতি শব্দচন্দ্রিকা॥

ভৃঙ্গপ্রিয়া স্ত্রী মাধবীলতা। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গমূলিকা স্ত্রী ভ্রমরচ্ছল্লী। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গরজঃ পুং ভৃঙ্গরাজঃ। ইতি ভাবপ্রকাশঃ॥

ভৃঙ্গরজাঃ(স) পুং ভৃঙ্গরাজঃ। ইত্যমর-টীকায়াং ভরতঃ॥

ভৃঙ্গরাজঃ পুং ক্ষুপবিশেষঃ। কেসুরিয়া ইতি বঙ্গভাষা। ভেগরিয়া ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। কেশরাজঃ ২ ভৃঙ্গঃ ৩ পতঙ্গঃ ৪ মার্কবঃ ৫। ইতি রত্নমালা॥ ভৃঙ্গাহ্বঃ ৬ কেশরঞ্জনঃ ৭ পিতৃপ্রিয়ঃ ৮ অঙ্গারকঃ ৯ কেশ্যঃ ১০ কুন্তলবর্দ্ধনঃ ১১। অস্য গুণাঃ। তিক্তত্বং। উষ্ণত্বং। চক্ষুষ্যত্বং। কেশরঞ্জনত্বং। কফাম শোফ শ্বিত্র নাশিত্বং। তত্র নীলো রসায়নঃ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। ভৃঙ্গরাজো ভৃঙ্গরজো মার্কবো ভৃঙ্গ এবচ। ভৃঙ্গারকঃ কেশরাজো ভৃঙ্গারঃ কেশরঞ্জনঃ॥ ভৃঙ্গরাজঃ কটুস্তিক্তো রূক্ষোষ্ণঃ কফবাতনুৎ। কেশ্যস্ত্বচ্যঃ কৃমি শ্বাস কাস শোথাময়াপহঃ॥ দন্ত্যো রসায়নো বল্যঃ কুষ্ঠ নেত্র শিরোর্ত্তিজিৎ। ইতি ভাবপ্রকাশঃ॥ ক্লী॥ পক্ষিবিশেষঃ॥ ভ্রমরঃ। ইতি মেদিনী॥ যজ্ঞভেদঃ। ইতি ধরণিঃ॥

ভৃঙ্গরিটিঃ পুং
ভৃঙ্গরীটিঃ পুং } শিবদ্বারপালঃ। ইতি ভূরিপ্রয়োগঃ॥

ভৃঙ্গরোলঃ পুং কীটবিশেষঃ। ভীমরুল ইতি ভাষা। তৎপর্য্যায়ঃ। বিষসৃক্কা ২ বরোলঃ ৩ তৃণষট্পদঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

ভৃঙ্গবল্লভঃ পুং ধারাকদম্বঃ॥ ভূমিকদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গবল্লভা স্ত্রী ভূমিজম্বুঃ। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গসোদরঃ পুং কেশরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভৃঙ্গানন্দা স্ত্রী যূথিকা। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গাভীষ্টঃ পুং আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ তদাম্রফলযোঃ স্ত্রী॥

ভৃঙ্গারং ক্লী লবঙ্গং॥ স্বর্ণং। ইতি রাজনির্ঘণ্টঃ॥

ভৃঙ্গারঃ পুং স্বর্ণঘটিতবারিপাত্রং। তৎপর্য্যায়ঃ। কনকালুকা ২। ইত্যমরঃ॥ গুড়ুকঃ ৩ গড়ুকঃ ৪। ইতি শব্দরত্নাবলী॥ ভৃঙ্গরাজঃ ৫। ইতি জটাধরঃ॥ ক্লী॥ অথ ভৃঙ্গারোদ্দেশঃ।

রাজ্ঞো হভিষেক পাত্রং যদ্ভৃঙ্গার ইতি তন্মতং। তদষ্টধা তস্য মান মাকৃতি শ্চাপি চাষ্টধা ॥ সৌবর্ণং রাজতং ভৌমং তাম্রং স্ফাটিক মেব চ। চান্দনং লৌহজং শার্ঙ্গ মেতদষ্টবিধং মতং ॥ ভানু দিগ্বসু সপ্তাষ্ট রুদ্র লোক সুরোন্মিতাঃ। অষ্টাবষ্টৌ সমাখ্যাতা আযাম পরিণাহযোঃ ॥ দ্বি চতু র্বাণ বেদাব্ধি বাণ সপ্তাত্ম বৃত্তিতা। যথা ক্রমং সমুদ্দিষ্ট মাদিত্যাদি দশা। ভবাং ॥ পদ্মরাগ স্তথা বজ্রং বৈদূর্য্যং মৌক্তিক স্তথা। নীলং মারকতঞ্চৈব মুক্তা চ সপ্ত কীর্ত্তিতাঃ ॥ ভৃঙ্গার সপ্তকে ন্যাস্যা ন ভৌমো মণি মর্হতি। কানকং মৃণ্ময়ং বাপি সর্ব্বেষা মুপযুজ্যতে ॥ কানকস্তু ক্ষিতীশানাং মৃণ্ময়ং সার্ব্ব যৌগিকং। শঙ্খ পদ্মেন্দু কহ্লারং প্রত্যস্রং বিন্যসেৎ ক্রমাৎ ॥ চতুর্বিধানাং ভূপানাং চান্দ্রঃ সর্ব্বত্র শস্যতে। শ্বেতং রক্তং তথা পীতং কৃষ্ণং চন্দন মুচ্যতে ॥ এতেষাং সলিলৈঃ সেক শ্চতর্ণাং স্যান্মহীভুজাং। মল্লী পদ্মঞ্চ নীলঞ্চ তথা কৃষ্ণাপরাজিতা। এষাং পুষ্পাণি কেশেষু চতুর্জ্জাতি মহীভুজাং। হীরকং পদ্মরাগশ্চ বৈদূর্য্যং নীল মেব চ ॥ চত্বারো মণযো ধেযা শ্চতুর্ণাং সেচনাম্ভসি ॥ ইত্থং নিশ্চিত্য যঃ স্বর্য্যান্নৃপতিঃ সেক মাত্মনঃ। স চিরাযু র্ভবেদ্ভোগী ইতোন্য স্ত্বন্যথাচরন্ ॥ ইতি যুক্তিকল্পতরৌ ভৃঙ্গারোদ্দেশঃ ॥

ভৃঙ্গারিঃ স্ত্রী কেবিকাপুষ্পং। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গারিকা স্ত্রী ঝিল্লিকা। যথা। ঝিল্লীকা ঝিল্লিকা বর্ষকরী ভৃঙ্গারিকা চ সা। ইতি হেমচন্দ্রঃ ॥

ভৃঙ্গারী স্ত্রী ঝিল্লী। ইত্যমরঃ ॥

ভৃঙ্গাহ্বঃ পুং জীবকঃ ॥ ভৃঙ্গরাজঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গাহ্বা স্ত্রী ভ্রমরচ্ছল্লী। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গিঃ পুং ভৃঙ্গী। যথা। প্রাপ্য গণাধিপত্যং ত্বং নাম্না ভৃঙ্গি রিতি স্মৃতঃ। ইতি বামনপুরাণে ৩৫ অধ্যাযঃ ॥

ভৃঙ্গিণী স্ত্রী বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গী স্ত্রী অতিবিষা। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গী[ন্] পুং বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ শিবদ্বারপালবিশেষঃ। তৎপর্য্যাযঃ। ভৃঙ্গেরিটিঃ ২ ভৃঙ্গরিটিঃ ৩ শলঃ ৪ নাডীদেহঃ ৫ অস্থিবিগ্রহঃ ৬। ইতি ত্রিকাণ্ডশেষঃ ॥

ভঙ্গরিটিঃ ৭। ইতি ভূরিপ্রযোগঃ ॥ তস্য জন্ম কারণং যথা। ঈশ্বর উবাচ। রতিমাত্রেণ নোমায়াং মৎ পুত্রঃ সংভবিষ্যতি। মহামৈথুন সংত্যাগাৎ স্যাদপুত্রী চ পার্ব্বতী ॥ তস্মাদহন্তু দেবানাং বচনাদ্ব্রহ্মণ স্তথা। ত্যক্ষ্যে মহামৈথুনন্তু কিন্ত্বেকং অকৃতা নরাঃ ॥ যেন মে সুমহত্তেজো মহামৈথুন কারণং। ধার্য্যং তেজস্বিনং দেব নানযন্তমরাস্ত তং ॥ যো নিষ্কম্পো নির্ব্বিকারো ত্রম্রা তেজো গ্রহীষ্যতি। তস্মে বদন্ত ত্রিদশা স্ত্যক্ষ্যে তেজঃ শরীরজং ॥ শ্রীঔর্ব্ব উবাচ। বৃষধ্বজ বচঃ শ্রুত্বা দেবা ব্রহ্মপুরোগমাঃ। হরতেজো গ্রহায়াথ বীতিহোত্রং যযু স্ত্রিয়া ॥ অথ ব্রহ্মাণমানস্ত্য তথানুজ্ঞাপ্য পাবকং। নেন্দ্রা দেবগণাঃ সর্ব্বে হর মূচু রিদং বচঃ ॥ শ্রীদেবাঊচুঃ। এষ বৈশ্বানরঃ মান্ ভূরিতেজোময়ো বলী। মহা মৈথুন বীজন্তু তত্তেজঃ সংগ্রহীষ্যতি ॥ ইত্যুক্ত্বা ত্রিদশাঃ সর্ব্বে বীতিহোত্রং পুরঃ স্থিতং। তস্মৈ নিদেশযামাসুঃ শম্ভবে সর্ব্ব হেতবে ॥ ততঃ যড ঙ্গং স্বংরেতো ব্যাদিতে দহনাননে। উৎসসর্জ মহাবাহু র্মহামৈথুন কারণং ॥ অগ্নৌ বুৎসৃজ্যমানস্য তেজসঃ শশভৃদ্ভৃতঃ। অণুদ্বয মতিব্রহ্ম গিরিপৃষ্ঠে পপাত হ ॥ তযোঃ কারণাদ্যোঃ সদ্যঃ সম্ভূতৌ শঙ্করাত্মজৌ। একো ভৃঙ্গ সমঃ কৃষ্ণো ভিন্নাঞ্জন নিভো হপরঃ ॥ ভৃঙ্গী তস্য তদা ব্রহ্মা নাম ভৃঙ্গীতি চাকরোৎ। মহাকৃষ্ণৈক রূপস্য মহাকালেতি লোকভৃৎ ॥ তত স্তৌ লালযামাস শঙ্করঃ পুনঃ থোৎকরৈঃ। অপর্ণযা চাপি তথা ক্রমাত্তাবভিবর্দ্ধিতৌ ॥ প্রবৃদ্ধৌ তৌ মহাত্মানৌ হরোমা প্রতিপালিতৌ। ক্রমাদ্গণেশৌ কৃত্বা তৌ হরো দ্বারি ন্যযোজযৎ ॥ ইতি কালিকাপুরাণে ৪৫ অধ্যাযঃ ॥ * ॥ তস্য বানরমুখত্ব কারণং তৎশাপেন হরপার্ষত্যো মনুষ্য জন্মগ্রহণঞ্চ যথা। যদা সা নর্ম্মণে যাতা গৌরী স্মরহরান্তিকং। ভৃঙ্গী ভৃঙ্গি মহাকালৌ দ্বাঃস্থৌ দ্বারি প্রতিষ্ঠিতৌ ॥ নর্ম্মাবসানে সা দেবী মুক্ত ধম্মিল্ল বন্ধনা। নিঃসৃতা রতি সঙ্কেত শালাযা জলজাননা ॥ তাং নিঃসরন্তীং সহসা তথা ভূতা মনিন্দিতাং। অযোগ্যাং বীক্ষিতং চান্যৈ র্বৃষধ্বজ রতে প্রিযং ॥ দদর্শতু র্মহাত্মানৌ নাতিহৃষ্টাত্ম মানসৌ। ভৃঙ্গী চাপি মহাকালঃ প্রাপ্তকালশ্চ কোপতঃ ॥ দৃষ্ট্বা তৌ মাতরং দীনৌ তদা

ভূতাবধোমুখৌ। চিন্তাঞ্চ জগ্মতু স্তৌ-
গ্রং নিশশ্বসতু ক্তত্তম॥ তৌ পশ্য-
ন্তৌ তদা দেবী দদর্শ হিমবৎসুতা।
চুকোপ চ তদাপর্ণা বাক্যঞ্চৈতদুবা-
চ হ॥ এবমুক্তান্ত মাং কস্মাদসম্বন্ধা
ন্নপশ্যতাং। ভবন্তৌ তনযৌ শুদ্ধৌ
স্ত্রী মর্য্যাদা বিবর্জিতৌ॥ তস্মাদিমা-
মমর্য্যাদাং ভবন্তৌ নিরপত্রপৌ।
অন্বর্থতাং ততো ভূগান্তবতো জন্ম
মানুষে॥ মানুষীং যোনি মাসাদ্য
মমাবেক্ষণ দোষতঃ। ভবিষ্যতো
ভবন্তৌ তু শাখামৃগ মুখৌ ভুবি
॥*॥ তৌ প্রাপ্ত দুঃখৌ তু তদা বি-
মনস্কৌ হরাত্মজৌ। শাপং তস্যা ন
সেহাতে প্রোচতু শ্চেদ মদ্রিজাং॥
নিযোজিতৌ যথা দ্বারি মহেশেন ত্ব-
যা সহ। তথা নিযোগং ন্বন্তৌ তি-
ষ্ঠাবো দ্বারি সংযতৌ। হঠান্নিঃসরণং
গেহাত্তবৈব নহি যুজ্যতে॥ তস্মাত্তত্র
প্রতীকারং শৃণ মাতর নিন্দিতে। ত্বং
মানুবী ক্ষিতৌ ভূয়া হরো ভবতু মা-
নুষঃ॥ মানুষস্য হরস্যাবাং জাযা-
যাং হর তেজসা॥ ভবত্যাশ্চাপি মা-
নুষ্যা ভবিষ্যাব স্তথোদরে॥ অথ কা-
লে ব্যতীতে তু সর্ব্বজ্ঞো বৃষভধ্বজঃ
তদ্ভাবি কর্ম্ম জ্ঞাত্বৈব মানুষো হ্যভ-
বৎ স্বযং॥ ব্রহ্মণো দক্ষিণাঙ্গুষ্ঠাদ-
ক্ষো ব্রহ্মসুতো হ্যভবৎ। অদিতি স্তৎ
সুতা জাতা ততঃ পূষাস্বযোহভবৎ
॥ পূষ্ণঃ পুত্রো হ্যভবৎ পৌষ্যঃ সর্ব্ব
শাস্ত্রার্থ পারগঃ। যস্য তুল্যো নৃপো
ভূমৌ ন ভূতো ন ভবিষ্যতি॥ স পু-
ত্রহীনো রাজা ভূৎ পৌষ্যো নৃপতি
সত্তমঃ। শেষে বযসি সংপ্রাপ্তে ভা-
র্য্যাভি স্তিসৃভিঃ সহ॥ পৌষ্যঃ পর-
মযা ভক্ত্যা ব্রহ্মাণং পর্য্যতোষযৎ।
তস্য প্রসন্নো ভগবান্ ব্রহ্মা লোক
পিতামহঃ॥ ব্রহ্মোবাচ। শৃণু পৌষ্য
যথা ভাবী পুত্র স্তব ন্বলোদ্বহঃ। ত-
দহং তে বদিষ্যামি তার্য্যাভি স্তৎ
সমাচর॥ ইদং ফলং গৃহাণ ত্বং মযা-
দত্তং নৃপোত্তম। অজীর্ণং বহুলে কা-
লে প্রাপ্তেপি সুরসং সদা॥ ফল মে-
তৎ সমাদায যাবৎ সংবৎসর দ্বযং
। আরাধয মহাদেবং সুপ্রসন্নো ভ-
বিষ্যতি॥ যথা সংভাষতে ভর্গঃ ফ-
ল মেতত্তথা ভবান্। করিষ্যতি ফ-
লং রাজন্ ভার্য্যাভি স্তিসৃভিঃ সহ॥
ইত্যুক্ত্বা প্রযযৌ ব্রহ্মা রাজাপি স-
হ ভীরুভিঃ। হরং যষ্টুং সমারেভে
ভক্ত্যা পরমযা যুতঃ॥ স তু বর্ষ দ্বযে
হতীতে মহাদেবো জগৎপতিঃ।
পৌষ্যস্য নৃপতেঃ সম্যক্ প্রসাদা-
র্থ সিদ্ধযে॥ ততঃ পুত্রার্থিনং ভূপং

প্রসন্নো বৃষভধ্বজঃ। ব্রহ্মদত্ত ফলং হস্তে কৃত্বেদং তমুবাচ হ॥ ঈশ্বরউবাচ। ইদং ফলং ব্রহ্মদত্তং বিভজ্য নৃপতে ত্রিধা। ভোজয়ে স্তাঃ স্ব জায়াস্তং প্রহৃষ্টঃ সুহৃষ্মানসঃ॥ একস্যা জঠরে শীর্ষং ভার্য্যায়াস্তে ভবিষ্যতি। অপরস্যা স্তথা জঙ্ঘৌ মধ্যভাগো ভবিষ্যতি॥ অধোনাভ্যাস্তুযো ভাগঃ সোহপরস্যাং ভবিষ্যতি। ততঃ খণ্ডত্রয়ং ভূপ যথা স্থানং পৃথক্ পৃথক্॥ যোজয়িষ্যসি পশ্চাত্তে পুত্র একো ভবিষ্যতি। ততঃ ফলে স্বয়ং দেবঃ প্রবিবেশ বৃষধ্বজঃ। তৎ ক্ষণাৎ তৎফলং ভুক্তং ত্রি ভাগং স্বয়মেব হি। ততঃসমুচিতে কালে প্রাপ্তে তাভিস্তু ভক্ষিতং॥ তৎ ফলং নৃপশার্দূল গর্ব্ভা শ্চাপ্যাহিতাঃ শুভাঃ। সম্পূর্ণে গর্ব্ভকালে তু গর্ব্ভেভ্যঃ সমজায়ত॥ খণ্ডত্রয়ং পৃথক্ রাজা যথা ভর্গেণ ভাষিতং। তচ্চ খণ্ডত্রয়ং পৌষ্যো যথা স্থানং নিযোজ্য চ॥ একং শিশুং চকারাশু তত্র পুত্রো ব্যজায়ত। তস্য শীর্ষে তদা রাজন্ সহজেন্দু কলা শুভা॥ তস্য নামাকরোদ্রাজা ব্রাহ্মণৈঃ স্বৈঃ পুরোহিতৈঃ। চন্দ্রশেখর ইত্যেবং কান্ত্যা চন্দ্র সমপ্রভঃ॥ এবং ত্রিসূণা মন্মানাং গর্ব্ভে জাতো

হতো হরঃ। অত ত্র্যম্বক নামা ভূৎ পৃথিতোলোক দেবয়োঃ॥ ইতি কালিকাপুরাণে ৪৬ অধ্যায়ঃ॥ * ॥ অবতীর্ণে মহাদেবে পৌষ্য জায়াসু স্বেচ্ছয়া। মানুষেণ প্রমাণেন তেন সম্বৎসরদ্বয়ে॥ গিরিজাপি কক্ৎস্থস্য রাজ্ঞো ভার্য্যা ব্যজায়ত॥ * ॥ ইক্ষ্বাকুবংশজো রাজা কক্ৎস্থো নাম ধার্ম্মিকঃ। তস্য ভার্য্যা মহাভাগা ভর্গদেবস্য পুত্রিকা॥ সা মনোম্মথিনী নাম্না প্রজিতা পতিবল্লভা। পুত্রী ন বিদ্যতে তস্যা স্তদর্থং সা গৃহান্তরে॥ নিভৃতং স্থণ্ডিলং কৃত্বা চণ্ডিকাং সমপূজয়ৎ। পূজ্যমানা মহাদেবী চণ্ডিকা রাজভার্য্যযা। পার্ব্বত্যপি স্বয়ং তস্যা গর্ব্ভে কালে বিবেশ হ॥ সা মনোম্মথিনীদেবী সুসুবে তনয়াং শুভাং। তাং দৃষ্ট্বা হার সংযুক্তাং সরজ্জ্যোৎস্নোপমাং শুভাং॥ কক্ৎস্থো ভার্য্যযা সার্দ্ধ মত্যন্ত মুদিতো ঽভবৎ। তেনৈব হারচিহ্নেন তস্যাং তারাবতীতিবৈ॥ নাম্না কক্ৎস্থ পিতা কালে যথোক্তে নৃপ সত্তম। তস্যাস্তু যৌবনোদ্ভেদং দৃষ্ট্বা রাজা সুতৈঃ সহ॥ কক্ৎস্থঃ কারযামাস সময়ে হথ স্বয়ম্বরং। স্বয়ং সা পার্ব্বতী দেবী বব্রে চ চন্দ্রশেখরং॥

ইতি স্বয়ং মহাদেবো মানুষীং যোনিমাশ্রিতঃ। পার্ব্বতী চ স্বয়ং জাতা নরযোনা বনিন্দিতা ॥ যথা "ভৃঙ্গী মহাকালং এতযো রভবৎ সুতঃ। তথা ত্বং শৃণু রাজেন্দ্র কথয়ামি সমুদ্ভবং ॥ অথোময়া সমং দেবো বিয়তা চন্দ্রশেখরঃ। আজগাম তদা গচ্ছন্ প্রাসাদং প্রতি তং নৃপ ॥ দদৃশে হথ চরন্তীং তা মুমায়াঃ সদৃশীং গুণৈঃ। সর্ব্বলক্ষণসম্পূর্ণাং মাধবস্যেব মাধবীং ॥ তাং দৃষ্ট্বা ন্যগদদ্দেবীং গৌরীং বৃষভকেতনঃ। ইয়ং তে মানুষী মূর্ত্তিঃ প্রিয়ে তারাবতীতি সা। ভৃঙ্গী মহাকালৌ তে জন্মনে নিমিত্তা স্বয়ং। ভর্ত্তো হ্যনন্য কান্তো হহং নান্যাং গন্তুমিহোৎসহে ॥ ত্বমিদানীং স্বয়ং চাস্যাং মূর্ত্ত্যাং প্রবিশ্য ভাবিনি। তত উৎপাদয়িষ্যামি মহাকালঞ্চ ভৃঙ্গিণং ॥ শ্রীদেব্যুবাচ। মমৈব মানুষী মূর্ত্তিরিয়ং বৃষভকেতন। বিশামি তে হত্র বচনাদুৎপাদয় সুতদ্বয়ং ॥ প্রবিবেশ ততো দেবী স্বয়ং তারাবতীতনৌ। মহাদেবোহপি তস্যান্তকামার্থং সমুপস্থিতঃ ॥ ততঃ সাপর্ণাবিষ্টা দেবী তারাবতী সতী। কামুকানং মহাদেবং স্বয়মেবাভবন্মুদা ॥ কামাসানে তস্যান্তু সদ্যো

জাতং সুতদ্বয়ং। অভবন্নৃপশার্দূল তথা শাখামৃগাননং ॥ তত স্তযো র্নাম চক্রে নারদো বচনান্নৃপ। জ্যেষ্ঠো ভৈরব নামাভূৎ ভীরোঃ পুত্রো ভয়ঙ্করঃ ॥ বেতাল সদৃশঃ কৃষ্ণো বেতালো হভূত্তথা পরঃ। ইতি চক্রে তযো র্নাম দেবর্ষি ব্রহ্মণঃ সুতঃ ॥ অন্যাংশ্চ সর্ব্ব সংস্কারান্নারদো মুনিসত্তমঃ। চকার ক্রমশো বাক্যাচ্চন্দ্রশেখর ভক্ততঃ ॥ ইতি কালিকাপুরাণে ৪৭। ৪৮। ৪৯ অধ্যায়েভ্যঃ সংকলিতং ॥*॥ তস্য জন্মনঃ প্রকারান্তরং যথা। বেণউবাচ। প্রপদ্যেদেব মীশানং ত্বামজং চন্দ্রভূষণং। মহাদেবং মহাত্মানং বিশ্বস্য জগতঃ পতিং ॥ অথৈনং মনুনীন্দ্রেণ ত্রৈলোক্যাধিপতি র্ভবঃ। আশ্বাসনকরঞ্চান্যবাক্যমিদবাক্য মুক্তবান্ ॥ অহো তুষ্টো হস্মি তে রাজংস্তবেনানেন সুব্রত। বহুনাত্র কিমুক্তেন মৎসমীপে বসিষ্যসি ॥ উষিত্বা সুচিরং কালং মম গাত্রোদ্ভবঃ পুনঃ। অসুরো হ্যন্ধকো নাম ভবিষ্যসি সুরান্তকৃৎ ॥ হিরণ্যাক্ষ গৃহে জন্ম প্রাপ্য বৃদ্ধিং গমিষ্যসি। পূর্ব্বাধর্ম্মেণ ঘোরেণ বেদনিন্দা কৃতেন চ ॥ সাভিলাসো জগন্মাতু ভবিষ্যসি যদা তদা। দেহং

শূলেন হত্বাতে পাতযিষ্যামি সাম্প্রতং ॥ তত্রাপ্যকল্মষো ভূতঃ স্তুত্বা মাং ভক্তিতঃ পুনঃ। প্রাপ্তা গণাধিপত্যং ত্বং নাম্না ভৃঙ্গিরিতি স্মৃতঃ॥ মৎসন্নিধানে স্থিত্বা ত্বং ততঃ সিদ্ধিং গমিষ্যসি ॥ * ॥ ততঃ কালান্তরে অন্ধক কৃত স্তবানন্তরং মহাদেব বাক্যং যথা। সিদ্ধো ঽসি দানবপতে পরিতুষ্টোঽস্মি তে ঽন্ধক। বরং বরয ভদ্রং তে যমিচ্ছসি বিনাম্বিকাং ॥ অন্ধক উবাচ। অম্বিকা জননী মহ্যং ভগবাং স্ত্র্যম্বকঃ পিতা। বন্দামি চরণৌ মাতু র্বন্দনীযা মমাম্বিকা ॥ বরদোঽসি যদীশান তম্মাতু বিলযং মম। শারীরং মানসং বাগ্জং দুষ্কৃতং দুর্বিচিন্তিতং ॥ তথা মে দানবো ভাবো অপযাতু মহেশ্বর। স্থিরা তু তব ভক্তিস্ত বরমেতং প্রযচ্ছ মে॥ মহেশ্বর উবাচ। এবং ভবতু দৈত্যেন্দ্র পাপং তে যাতু সংক্ষযং। মুক্তোঽসি দৈত্যভাবাচ্চ ভৃঙ্গীগণপতি ভব ॥ ইত্যেব মুক্ত্বা বরদঃ শূলাগ্রাদবতার্য্য তং। নিম্মাজ্য নিজ হস্তেন চক্রে নিব্রণ মন্ধকং ॥ ততঃ স্ব দেহগো দেবান্ ব্রহ্মাদীনা জুহাব সঃ। তে নিশ্চেরু মহাত্মানো নমস্যন্ত ত্রিলোচনং॥ গণান্ সনন্দী চাহূয় সন্নিবেশ্য তদগ্রতঃ। ভৃঙ্গিণং দর্শযামাস ব্রবন্নেষো ঽন্ধকেতি হি ॥ তে দৃষ্ট্বা দানবপতিং সংশুষ্কং পিশিতং রিপুং। গণাধিপত্য মাপন্নং প্রসশংসু র্বৃষধ্বজং ॥ ইতি বামন পুরাণে ৪৪। ৪৫। ৬৭ অধ্যাযেভ্যঃ সংকলিতং ॥

ভৃঙ্গীফলঃ পুং আম্রাতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভৃঙ্গীশঃ পুং মহাদেবঃ। ইতি শব্দরত্নাবলী ॥

ভৃঙ্গেরিটিঃ পুং ভৃঙ্গী। ইতি ত্রিকাণ্ডশেষঃ ॥

ভৃঙ্গেষ্টা স্ত্রী ঘৃতকুমারী॥ ভার্গী ॥ তরুণী ॥ কাকজম্বুঃ। ইতি রাজনিঘণ্টঃ ॥

ভৃজ ঈ ঙ ভর্জনে। ইতি কবিকল্পদ্রুমঃ ॥ ভর্জনং পাকবিশেষঃ। ঈ ভৃক্তঃ। ঙ ভর্জতে তণ্ডুলান্ জনঃ। ইতি দুর্গাদাসঃ ॥

ভৃজ্জনঃ পুং অম্বরীষঃ। ভাজনাখোলা ইতি ভাষা। ইত্যুণাদিকোষঃ।

ভৃতঃ ত্রি ভরণীযঃ। ইত্যাহ্নিকতত্ত্বং ॥ পুষ্টঃ। ইতি ভৃ ধাতোঃ কর্ম্মণি ক্ত প্রত্যযেন নিষ্পন্নং ॥

ভৃতকঃ পুং বেতনোপজীবিকর্ম্মকর্ত্তা। তৎপর্য্যাযঃ। ভৃতভুক্ ২ কর্ম্মকর ৩ বৈতনিকঃ ৪। ইত্যমরঃ ॥

জ্ঞাতা সেনাধ্যক্ষো বিধীয়তে ॥ ইঙ্গিতাকার তত্ত্বজ্ঞো বলবান্ প্রিয়দর্শনঃ। অপ্রমাদী প্রমাথী চ প্রতীহারঃ স উচ্যতে॥ মেধাবী বাক্পটুঃ প্রাজ্ঞঃ সত্যবাদী জিতেন্দ্রিয়ঃ। সর্ব্বশাস্ত্র সমালোকী হ্যেষ সাধুঃ সলেখকঃ॥ বুদ্ধিমান্ মতিমাংশ্চৈব পরচিত্তোপলক্ষকঃ। ক্রূরো যথোক্তবাদীচ এষ দূতো বিধীয়তে ॥ সমস্ত কৃত শাস্ত্রজ্ঞঃ পণ্ডিতো হ্থ জিতেন্দ্রিয়ঃ। শৌর্য্য বীর্য্য গুণোপেতো ধর্ম্মাধ্যক্ষো বিধীয়তে॥ পিতৃ পৈতামহো দক্ষঃ শাস্ত্রজ্ঞঃ সত্যবাচকঃ। শৌচযুক্তঃ সদাকারী সূপকারঃ স উচ্যতে ॥ আয়ুর্ব্বেদ কৃতাভ্যাসঃ সর্ব্বজ্ঞঃ প্রিয়দর্শনঃ। আর্য্যশীল গুণোপেতো বৈদ্য এষ বিধীয়তে ॥ বেদ বেদাঙ্গ তত্ত্বজ্ঞো জপ হোম পরায়ণঃ। আশীর্ব্বাদ পরো নিত্য মেষ রাজপুরোহিতঃ ॥ ইতি গারুড়ে ১১২ অধ্যায়ঃ ॥

ভৃত্যা স্ত্রী বেতনং। ইত্যমরঃ ॥

ভৃমিঃ পুং বায়ুবিশেষঃ। ঘূরণাবাতাস ইতি ভাষা॥ জলাদিভ্রমণং। ইত্যাদিকোষঃ ॥

ভৃশ ইর য উ অধঃপতে। ইতি কবিকল্পদ্রুমঃ॥ ইর অভৃশৎ অভ-

ভৃতিঃ স্ত্রী বেতনং। ইত্যমরঃ॥ মূল্যং ॥ ভরণং। ইতি মেদিনী ॥ ভৃতির্বেতনং কৃতকর্ম্মণেদত্তং। তত্তু সপ্তবিধ দত্তান্তর্গত দত্ত বিশেষঃ। যথা নারদেনচ। দত্তং সপ্তবিধং প্রোক্তমদত্তং ষোড়শাত্মক মিতি প্রতিপাদ্য দত্তাদত্তয়োঃ স্বরূপং বিবৃতং। পণ্যমূল্যং ভৃতি স্তুষ্ট্যা স্নেহাৎ প্রত্যুপকারতঃ। স্ত্রীশুল্কানুগ্রহার্থঞ্চ দত্তং দান বিদো বিদুঃ ॥ ইতি মিতাক্ষরা ॥

ভৃতিভুক্ পুং ভৃতকঃ। ইত্যমরঃ॥

ভৃত্যঃ পুং দাসঃ। ইত্যমরঃ॥ তস্য লক্ষণং যথা। সূতউবাচ। ভৃত্যা বহুবিধা জ্ঞেয়া উত্তমাধম মধ্যমাঃ। নিয়োক্তব্যাযথার্থেষু ত্রিবিধেষ্বেব কর্ম্মসু ॥ ভৃত্য পরীক্ষণং বক্ষ্যে যস্য যস্য হি যোগুণঃ। তমিমং সংপ্রবক্ষ্যামি যদ্যদা কথিতানি চ॥ যথা চতুর্ভিঃ কনকং পরীক্ষতে তুলাঘর্ষণচ্ছেদন তাপনেন। তথা চতুর্ভি র্ভৃতকং পরীক্ষতে শ্রুতেন শীলেন কুলেন কর্ম্মণা॥ কুল শীল গুণোপেতঃ সত্য ধর্ম্ম পরায়ণঃ। রূপেণ সুপ্রসন্নশ্চ রাজ্যাধ্যক্ষো বিধীয়তে॥ মূল্য রূপ পরীক্ষাকৃদ্ভবেদ্রত্নপরীক্ষকঃ। বলাবল পরি-

ণী৫। পৃষাদিত্বান্নিত্যং উ ইত্যন্যে। য ভৃশ্যতি ভৃশ্যত্যরি পতাকিনীতি হলাযুধঃ। উ ভর্শিত্বা ভৃষ্ট্বা। ইতি দুর্গাদাসঃ॥

ভৃশং ক্লী অতিশয়ঃ॥ তদ্বতি ত্রি। ইত্যমরঃ॥

ভৃশম্ ব্য প্রকর্ষার্থঃ॥ মুহুরর্থঃ॥ শোভনং। ইতি শব্দরত্নাবলী॥

ভৃষদ্ পুং পাষাণঃ। ইতি শব্দরত্নাবলী॥

ভৃষ্টঃ ত্রি জলোপসেকংবিনা পক্কঃ। ভাজা ইতি ভাষা। ইতি হেমচন্দ্রঃ

ভৃষ্টতণ্ডুলঃ পুং ভর্জনবিশিষ্টধান্যনিকরঃ। চাল ভাজা ইতি ভাষা। অস্য গুণাঃ। সুগন্ধিঃ কফহা রুক্ষঃ পিত্তলো ভৃষ্টতণ্ডুলঃ। ইতি রাজবল্লভঃ॥

ভৃষ্টযবঃ পুং ভর্জনবিশিষ্টযবঃ। যব ভাজা ইতি ভাষা। তৎপর্য্যায়ঃ। ধানাঃ ২। ইত্যমরঃ॥ বাউকং ৩। ইতি শব্দচন্দ্রিকা॥ অস্য গুণা ধানা শব্দে দ্রষ্টব্যাঃ॥

ভৃষ্টান্নং ক্লী ভৃষ্টতণ্ডুলঃ। মুড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। অন্বহরং ২ ন্যাক্যং ৩। ইতি শব্দচন্দ্রিকা॥

ভৃষ্টিঃ স্ত্রী ভর্জনং॥ শূন্যবাটিকা। ইতি মেদিনী॥

ভৄ গি ভৃতৌ॥ ভৃজি॥ ভর্ত্সে। ইতি কবিকল্পদ্রুমঃ॥ গি ভৃণাতি ভূর্ণঃ ভূর্ণিঃ। ভৃজি ভর্জনে। ইতিদুর্গাদাসঃ॥

ভেকঃ পুং জন্তুবিশেষঃ। ব্যাঙ্ ইতি ভাষা। তৎপর্য্যায়ঃ। মণ্ডূকঃ ২ বর্ষাভূঃ ৩ শালূরঃ ৪ প্লবঃ ৫ দর্দুরঃ ৬। ইত্যমরঃ॥ বৃষ্টিভূঃ ৭ সালূরঃ ৮। ইতি তট্টীকা॥ প্লবঙ্গমঃ ৯ ব্যঙ্গঃ ১০ প্লবগঃ ১১ শল্লঃ ১২ নন্দনঃ ১৩ গূঢবর্চ্চাঃ ১৪ অজিহ্বঃ ১৫ জিহ্মমোহনঃ ১৬। ইতি শব্দরত্নাবলী॥ নন্দকঃ ১৭ কৃতালয়ঃ ১৮ রেকঃ ১৯। ইতি ত্রিকাণ্ডশেষঃ॥ মণ্ডুঃ২০ হরিঃ২১ লূলূকঃ ২২ কুটিং পুস্তকে লূলূকোঽপি পাঠঃ। শালূকঃ ২৩ টিরবঃ ২৪। অস্যমাংসগুণাঃ। সদ্যোবলকরত্বং। শূন্যতৃড়দাহ প্রমেহক্ষয়ঘ্নত্বং ছর্দ্দি নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ মেঘঃ। ইতিমেদিনী॥

ভেকটঃ পুং মৎস্যভেদঃ। যথা। তুল্যৌ ভেকট বেকটৌ। ইতি দ্বিরূপকোষঃ॥

ভেকনিঃ পুং মৎস্যবিশেষঃ। ভাঙ্গন ইতি ভাষা। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। বল্যত্বং। শ্লেষ্মকরত্বং। শুক্রবৃদ্ধিঃ। ইতি রাজবল্লভঃ॥ ভেকলি ইত্যপি পাঠঃ॥

ভেকপর্ণী স্ত্রী মণ্ডুকপর্ণী। ইতি কেচিৎ॥

ভেকভুক্ পুং সর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভেকী স্ত্রী ভেকপ্রিয়া। তৎপর্য্যায়ঃ। শিলী ২ গণ্ডুপদী ৩ বর্ষাম্বী ৪। ইত্যমরঃ॥ অন্যেপীবন্ত ভেকপর্য্যায়া এতদ্বাচকাঃ॥ মণ্ডূকপর্ণী বৃক্ষঃ। ইতি রত্নমালা॥

ভেড়ঃ পুং মেষঃ। অস্য ভাষা ভেড়া। ইতি হেমচন্দ্রঃ॥

ভেড়ী স্ত্রী ভেড়ভার্য্যা। অবীঃ। অস্যা দুগ্ধগুণাঃ। আবিকং লবণং স্বাদু স্নিগ্ধোষ্ণঞ্চাশ্মরী প্রণুৎ। অহৃদ্যং তর্পণং কেশ্যং শুক্রপিত্তকফপ্রদং॥ গুরু কাসেঽনিলোদ্ভূতে কেবলে চানিলে বরং। ইতি ভাবপ্রকাশঃ॥

ভেত্তা ত্রি ভেদকর্ত্তা। যথা। জলাল পাণি বিজ্ঞেয়ঃ সেতুভেত্তা সমীপতঃ। ইতি ব্যবহারতত্ত্বং॥

ভেদঃ পুং শত্রুবশীকরণোপায়চতুষ্টয়ান্তর্গত তৃতীয়োপায়ঃ। তৎপর্য্যায়ঃ। উপজাপঃ ২। ইত্যমরঃ॥ পরতো বিশ্লেষ্য আত্মসাৎ করণং ভেদঃ। ইতি ভরতঃ॥ তদ্বিশেষো যথা। মৎস্য উবাচ। পরস্পরন্তু যে দুষ্টাঃ ক্রুদ্ধা ভীতাবমানিতাঃ। তেষাং ভেদং প্রযুঞ্জীত ভেদ সাধ্যা হি তে মতাঃ॥ যে তু যেনৈব দোষেণ পরস্মাদ্বাপরাধ্যতি। তে তু তদ্দোষ পাকেন ভেদনীয়া ভৃশং ততঃ॥ আত্মীয়ং দর্শয়েদ্দোষং পরস্মাদ্দর্শয়েদ্ভয়ং। এবং হি দর্শয়েদ্ভিন্নং যথাবদ্বশ মানয়েৎ॥ সংহতা হি বিনা ভেদং শক্রেণাপি সুদুঃসহাঃ। ভেদমেব প্রশংসন্তি তস্মান্নয় বিশারদাঃ॥ স্বমুখে নাশয়েদ্ভেদং ভেদং পরমুখেণ চ। পরীক্ষ্য সাধু মন্যন্তে ভেদং পরমুখাৎ শ্রুতং॥ ভেদ্যাঃ স্বকার্য্য মুদ্দিশ্য কুশলৈ র্যে হি ভেদিতাঃ। ভেদিতা স্তে বিনির্দ্দিষ্টা নৈব রাজার্থ বাদিভিঃ॥ অন্তঃ কোপো বহিঃকোপো যত্র স্যাতাং মহীক্ষিতাং অন্তঃকোপো মহাং স্তত্র নাশকঃ পৃথিবীক্ষিতাং॥ সামন্তকোপো বাহ্যস্ত কোপঃ প্রোক্তো মনীষিভিঃ। মহিষী যবরাজাভ্যাং তথা সেনাপতি দ্বিজঃ॥ অমাত্যা মন্ত্রিণ শ্চৈব রাজপুত্রা স্তথৈব চ। অন্তঃকোপো বিনির্দ্দিষ্টো দারুণঃ পৃথিবীক্ষিতাং॥ বাহ্যকোপে সমুৎপন্নে সুমহত্যপি পার্থিবঃ। শুদ্ধান্তস্ত মহাভাগ শীঘ্রমেব জয়ী ভবেৎ॥ অপি শক্র সমো রাজা অন্তঃকোপেন নশ্যতি।

অন্তঃকোপে সমুৎপন্নে তস্মাদুক্ষেপ্যাহীক্ষিতাং ॥ পরতঃ কোপ মুৎপাদ্য ভেদেন বিজিগীষুণা। জ্ঞাতীনাং ভেদনং কার্য্যং পরেষাং বিজিগীষুণা॥ রক্ষ্যশ্চৈব প্রযত্নেন জ্ঞাতিভেদ স্তথাত্মনঃ। জ্ঞাতয়ঃ পরিতপ্যন্তে সততং পরিতপ্য যং॥ তথাপি তেষাং কর্ত্তব্যং সুগম্ভীরেণ চেতসা। গ্রহণং দান মানাভ্যাং ভেদ স্তেভ্যো ভয়ঙ্করঃ॥ ন জ্ঞাতিরনুগৃহ্লাতি ন জ্ঞাতি র্দগ্ধু মিচ্ছতি। জ্ঞাতিভি র্ভেদনীযাস্তু রিপব স্তেন পার্থিবৈঃ॥ ভিন্না হি শক্যা রিপবঃ প্রভূতাঃ স্বল্পেন সৈন্যেন নিহন্তু মাজৌ। সুসংহতানাং হি ততস্তু ভেদং কার্য্যং রিপূণাং নয়শাস্ত্রবিদ্ভিঃ॥ ইতি মাৎসে রাজধর্ম্মে ১৯৭ অধ্যায়ঃ॥ *॥ দ্বৈধঃ॥ বিশেষঃ॥ বিদারণং। ইতি মেদিনী॥ বিরেকঃ। যথা। কাশে ধূম স্তুষাণাং বলবতি মরুতে স্বেদ ভেদোপবাসা বহ্নের্মন্দে চ পিষ্টং সপিশিত মনিশং বারিপানং কফার্ত্তৌ। ইতি হাস্যার্ণবনাটকং॥

ভেদকঃ ত্রি বিদারকঃ॥ বিরেচকৌষধাদিঃ॥ পৃথক্কারকঃ। যথা। ভেদযতি অন্যপদার্থং পৃথক্করোতীতি ভেদকং নাম্না শিবঃ গোত্রো গার্গ্যঃ। ইতি কারকটীকায়াং দুর্গাদাসঃ॥ অপিচ। ভেদ্যভেদকযোঃ শ্লিষ্টং সম্বন্ধো হন্যোন্য মিষ্যতে। দ্বিষ্ঠো যদ্যপি সম্বন্ধঃ ষষ্ঠ্যুৎপত্তিস্তু ভেদকাৎ॥ ইতি কলাপটীকাধৃত ভর্তৃহরিকারিকা॥

ভেদনং ক্লী হিঙ্গু। ইতি রাজনির্ঘণ্টঃ॥ বিদারণং। ইতি ভিদধাতো র্ভাবে হনট্ প্রত্যযেন নিষ্পন্নং॥

ভেদনঃ পুং অম্লবেতসঃ॥ শূকরঃ। ইতি রাজনির্ঘণ্টঃ॥

ভেদিতঃ ত্রি ভিন্নঃ। দারিতঃ। ইত্যমরঃ॥

ভেদী পুং অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥ ভেদকর্ত্তরি তদ্বিশিষ্টে চ ত্রি॥

ভেদুরং ক্লী ভিদুরং। বজ্রং। ইতি দ্বিরূপকোষঃ॥

ভেরঃ পুং পটহঃ॥ ভেরী॥ দুন্দুভিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভেরিঃ স্ত্রী বৃহড্ঢক্কা। তৎপর্য্যাযঃ। আনকঃ ২ দুন্দুভিঃ ৩। ইত্যমরঃ॥ ভেরী ৪ আনকদুন্দুভিঃ ৫ আনকদুন্দুভী ৬। ইতি তট্টীকাযাং ভরতঃ॥

ভেরী স্ত্রী ভেরিঃ। ইত্যমর টীকাযাং

ভ্রতঃ ॥ বরাহ উবাচ । ভেরী শব্দমকৃত্বা তু যস্তু মাং প্রতিবোধয়েৎ । বধিরো জায়তে ভূমে জন্মৈকঞ্চ ন সংশয়ঃ ॥ তস্য বক্ষ্যামি সুশ্রোণি প্রায়শ্চিত্তং মম প্রিয়ং । কিল্বিষাদ্যেন মুচ্যেত ভেরীতাড়নমোহিতঃ ॥ যস্য কস্যচিন্মাসস্য শুক্লপক্ষে তু দ্বাদশীং ।আকাশশয়নং কৃত্বা শীঘ্রং মুচ্যেত কিল্বিষাৎ ॥ য এতেন বিধানেন বসুধে কর্ম্মকারয়েৎ । অপরাধং ন গচ্ছেত মমলোকান্ গচ্ছতি ॥ ইতি বরাহপুরাণে ভেরীতাড়নাপরাধ প্রায়শ্চিত্তং ॥

ভেরুণ্ডং ক্লী গর্ভধারণং ॥ ভয়ানকে ত্রি । ইতি শব্দরত্নাবলী ॥

ভেরুণ্ডা স্ত্রী দেবতাবিশেষঃ ॥ যক্ষিণীভেদঃ । ইতি মেদিনী ॥ সা দেবতা কালী । যথা । ত্রিকোণনিলয়া নিত্যা পরমামৃতরঞ্জিতা । মহাবিদ্যেশ্বরী শ্বেতা ভেরুণ্ডা জলসুন্দরী ॥ ইতি কালীকুলসর্ব্বস্বে শ্রীশিবপরশুরাম সম্বাদে আদ্যায়াঃ সহস্রনাম স্তোত্রং ॥

ভেলং ত্রি ভীরুঃ ॥ মূর্খঃ । ইতি মেদিনী ॥ চঞ্চলঃ । ইতি শব্দরত্নাবলী ॥

ভেলুঃ পুং প্লবঃ ॥ মুনিবিশেষঃ । ইতি মেদিনী ॥ ভেলকং । ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

ভেলকঃ পুং ক্লী নদ্যাদিতরণসাধনবস্তু । ভেলা ইতি ভাষা । তৎপর্য্যায়ঃ । প্লবঃ ২ কোলঃ ৩ উড়ুকং ৪ উড়ুকং ৫ তরণঃ ৬ তারণঃ ৭ তারকঃ ৮ । ইতি শব্দরত্নাবলী ॥ তরীষঃ ৯ । ইতি জটাধরঃ ॥

ভেষ ঋ ঞ ভয়ে । ইতি কবিকল্পদ্রুমঃ ॥ ঋ অবিভেষৎ । ঞ ভেষতি ভেষতে বিভেষে । ইতি দুর্গাদাসঃ ॥

ভেষজং ক্লী ঔষধং । ইত্যমরঃ ॥ অথ ভেষজ ভক্ষণ সময়াঃ । ভৈষজ্য মভ্যবহরেৎ প্রভাতে প্রায়শো বুধঃ । কষায়াংস্তু বিশেষেণ তত্র ভেদস্তু দর্শিতঃ ॥ জ্ঞেয়ঃ পঞ্চবিধঃ কালো ভৈষজ্য গ্রহণে নৃণাং । কিঞ্চিৎ সূর্য্যোদয়ে জাতে তথা দিবসভোজনে॥ সায়ন্তনে ভোজনে চ মুহুশ্চাপি তথা নিশি । * । তত্র প্রথমঃ কালঃ । প্রায়ঃ পিত্ত কফোদ্রেকে বিরেক বমনার্থযোঃ । লেখনার্থে চ ভৈষজ্যং প্রভাতে নাম মাহরেৎ ॥ * ॥ অথ দ্বিতীয়ঃ কালঃ । ভৈষজ্যং বিগুণে হপানে ভোজনাগ্রে প্রশস্যতে । অরুচৌ চিত্রভোজ্যৈশ্চ মিশ্রং রুচির মাহরেৎ ॥ সমান

বাতে বিগুণে মন্দেহগ্নৌ বহ্নিদীপনং। দদ্যাদ্ভোজন মধ্যে চ ভৈষজ্যং প্রশমো ভিষক্॥ ব্যানকোপে তু ভৈষজ্যং ভোজনান্তে সমাহরেৎ। হিক্কা ক্ষেপক কম্পেষু পূর্ব্বমন্তে চ ভোজনাৎ॥ ✽॥ অথ তৃতীয়ঃ কালঃ। উদানে কুপিতে বাতে স্বরভঙ্গাদি কারিণি। গ্রাস গ্রাসান্তিকং দেয়ং ভৈষজ্যং সাধ্য ভোজনে॥ প্রাণে প্রদুষ্টে সাধ্যস্য ভুক্তস্যান্তে প্রদীয়তে। ঔষধং প্রায়শো ধীরৈঃ কালো হয়ং স্যাৎ তৃতীয়কঃ॥✽॥ অথ চতুর্থঃ কালঃ। মুহুর্মুহুশ্চ তৃট্ ছর্দ্দি হিক্কা শ্বাস গদেষু চ। সান্নঞ্চ ভেষজং দদ্যাদিতি কাল চতুর্থকঃ॥ ✽॥ অথ পঞ্চমঃ কালঃ। ঊর্দ্ধ্বজত্রু বিকারেষু লেখনে বৃংহণে তথা। পাচনে শমনে দেয় মনন্তং ভেষজং নিশি॥ ইতি পঞ্চমঃ কালঃ॥ ✽॥ নিরন্নস্য ভেষজস্য গুণমাহ। বীর্য্যাধিকং ভবতি ভেষজমন্নহীনং হন্যাত্তদাময মসংশয মাশু চৈব॥ তদ্বাল বৃদ্ধ যুবতী মৃদুভিশ্চ পীতং গ্লানিং পরাং নয়তি চাশু বলক্ষয়ঞ্চ॥ ✽॥ সান্নস্য ভেষজস্য গুণমাহ। শীঘ্রং বিপাক মুপপাত্তি বলং ন হিংস্যাদন্নাবৃতং নচ মুহু র্বদনান্নিরেতি। এতদ্ধিতং স্থবির বাল কৃশাঙ্গনাভ্যঃ প্রাগ্ভোজনাদ্বদশিতং কিল তচ্চ তদ্বৎ॥ তদ্বৎ অন্নাবৃতং ভেষজমিতি শেষঃ॥ ঔষধ শেষে ভুক্তং ভোজন শেষে যদৌষধং পীতং। ন করোতি গদোপশমং প্রকোপয়ত্যন্যরোগাংশ্চ॥ পীত মিত্যুপ লক্ষণং লীঢাদি চ॥ অনুলোমো হনিলঃ স্বাস্থ্যং ক্ষুত্তৃষ্ণাসু মনঃ স্নতঃ। লঘুত্ব মিন্দ্রিয়োদ্গার শুদ্ধি জীর্ণৌ ষধাকৃতিঃ॥ ক্লমো দাহো হঙ্গসদনং ভ্রম মূর্চ্ছা শিরোরুজাঃ। অরতি র্বলহানিশ্চ সাবশেষৌষধাকৃতিঃ॥ ✽॥ অথ ভেষজ ভক্ষণ বিধি মাহ চরকঃ। দেবান্ গুরুং স্তথা বিপ্রান্ পূজয়িত্বা প্রণম্য চ। আশিষশ্চ সমাদায় শ্রদ্ধয়া ভেষজং ভজেৎ॥ রসায়ন নিবর্ষীণাং দেবানামিব চামৃতং। সুধেবোত্তম নাগানাং ভৈষজ্য মিদমস্ত তে॥ ব্রহ্ম দক্ষাশ্বি রুদ্রেন্দ্র ভূ চন্দ্রার্কানিলানলাঃ। ঋষয়ঃ সৌষধি গ্রামা ভূমিদেবাশ্চ পান্তু বঃ॥ ইত্যাদ্যাশিষঃ॥ ঔষধং হেম রজত মৃদ্ভাজন পরিস্থিতং। পিবেদাত্মজনস্যাগে প্রসন্ন বদনেক্ষণঃ॥ প্রশান্তস্তুপবিশ্যাথ পীত্বা পাত্র মধোমুখং নিঃক্ষিপ্যাচম্য সলিলং তাম্বুলাদ্যুপ-

যেৎজয়েৎ ॥ ❀ ॥ অথ ভেষজানাং বিধাদানি। স্বরসশ্চ তথা কল্কঃ ক্বাথশ্চ হিম ফাণ্টকৌ। জ্ঞেযাঃ কষায়াঃ পঞ্চৈতে লঘবঃসুঃ যথোত্তরং ॥ তত্রাদৌ স্বরস বিধিঃ। আহতাত্তৎক্ষণাকৃষ্টাৎ দ্রব্যাৎ ক্ষুণ্ণাৎ সমুদ্ভবে। বস্ত্রনিষ্পীড়িতো যশ্চ স্বরসো রস উচ্যতে ॥ ❀ ॥ অথ কল্ক বিধিঃ। দ্রব্যমাদ্রং শিলা পিষ্টং শুষ্কং বা সজলং ভবেৎ। প্রক্ষিপ্য গালযেদ্বস্ত্রে তন্মানং কর্ষ সম্মিতং ॥ কল্কে মধু ঘৃতং তৈলং দেয়ং দ্বিগুণ মাত্রযা। সিতাং গুড়ং সমং দদ্যাদ্দ্রবা দেযা শ্চতুর্গুণাঃ ॥❀॥ অথ ক্বাথ বিধিঃ। পানীযং ষোড়শ গুণং ক্ষুণ্ণে দ্রব্য পলে ক্ষিপেৎ। মৃৎপাত্রে ক্বাথযেদ্ গ্রাহ্য মষ্টমাংশাবশেষিতং ॥ কর্ষাদৌ তু পলং যাবদ্দদ্যাৎ ষোড়শিকং জলং। ষোড়শিকং ষোড়শগুণং ॥ ❀ ॥ অথ হিম বিধিঃ। ক্ষুণ্ণং দ্রব্য পলং সম্যক্ ষড়্ভির্নীরপলৈঃ প্লুতং। নিশোষিতং হিমঃ স স্যাত্তথা শীত কষাযকঃ ॥❀॥ অথ ফাণ্ট বিধিঃ। ক্ষুণ্ণ দ্রব্য পলে সম্যক্ জলমুষ্ণং বিনিঃক্ষিপেৎ। মৃৎপাত্রে কুডবোন্মানং ততস্তু স্রাবযেৎ পুটাৎ ॥ স স্যাৎ চূর্ণ দ্রবঃ ফাণ্ট স্তন্মানং দ্বিপলোন্মিতং। ক্ষৌদ্রং সিতা গুড়াদীংস্তু কর্ষমাত্রান্ বিনিঃক্ষিপেৎ ॥ ❀ ॥ অথ তণ্ডুলজল। কণ্ডিতং তণ্ডুল পলং জলে হষ্ট গুণিতে ক্ষিপেৎ। ভাব যিত্বা জলং গ্রাহ্যং দেযং সর্ব্বত্র কর্ম্মসু ॥ ❀ ॥ অথ মন্থবিধিঃ। জলে চতুঃপলে শীতে ক্ষুণ্ণং দ্রব্য পলং ক্ষিপেৎ। মৃৎপাত্রে মন্থযেৎ সম্যক্ তস্মাচ্চ দ্বিপলং পিবেৎ ॥ ❀ ॥ অথ চূর্ণ বিধিঃ। অত্যন্ত শুষ্কং যদ্দ্রব্যং সুপিষ্টং বস্ত্রগালিতং। তৎ স্যাচ্চূর্ণং রজঃ ক্ষোদ স্তন্মাত্রা কর্ষ সম্মিতা ॥ চূর্ণে গুড়ঃ সমো দেযঃ শর্করা দ্বিগুণা মতা। চূর্ণেষু ভর্জ্জিতং হিঙ্গু দেযং নোৎক্লেদ কৃদ্ভবেৎ ॥❀॥ অথ ভাবনা বিধিঃ। দ্রবেণ যাবতা সম্যক্ চূর্ণং সর্ব্বং প্লুতং ভবেৎ। ভাবনাযাঃ প্রমাণন্তু চূর্ণে প্রোক্তং ভিষগ্বরৈঃ ॥ ❀ ॥ অথ পুটপাক বিধিঃ। পুট পক্বস্য কল্কস্য স্বরসো গৃহ্যতে যতঃ। অতস্তু পুটপাকানাং যুক্তি রত্রোচ্যতে মযা ॥ পুটপাকস্য পাকোঽযং লেপস্যাঙ্গার বর্ণতা। লেপঞ্চ দ্ব্যঙ্গুলং স্থূলং কুর্য্যাদ্বাঙ্গুষ্ঠ মাত্রকং ॥ কাশ্মরী বট জম্বাদি পত্রৈ র্বেষ্টন মুত্তমং। পলমাত্রো রসো গ্রাহ্যঃ কর্ষমাত্রং মধু ক্ষিপেৎ ॥ কল্কচূর্ণ দ্রবাদ্যাস্তু দেযাঃ কোল মিতা বুধৈঃ ॥ ❀ ॥

অথোষ্ণোদক বিধিঃ। অষ্টমেনাংশ শেষেণ চতুর্থেনার্দ্ধকেন বা। অথবা ক্বাথনেনৈব সিদ্ধমুষ্ণোদকং বদেৎ॥ ❋ ॥ অথ ক্ষীরপাক বিধিঃ। ক্ষীর মষ্ট গুণং দ্রব্যাৎ ক্ষীরান্নীরং চতুর্গুণং। ক্ষীরাবশেষং তৎপীতং শূলমামোদ্ভবং জয়েৎ॥ ❋ ॥ অথাবলেহ বিধিঃ। ক্বাথাদে র্যৎ পুনঃ পাকাৎ ঘনত্বং সা রস ক্রিয়া। সোবলেহশ্চ লেহশ্চ তন্মাত্রা স্যাৎ পলোন্মিতা ॥ ❋ ॥ অথ বটিকা বিধিঃ। বটিকা অথ কথ্যন্তে তন্নাম বটিকা বটী। মোদকো গুটিকা পিণ্ডী গুড়ো বর্ত্তি স্তথোচ্যতে॥ লেহ বৎ সাধ্যতে বহ্নৌ গুড়ো বা শর্করাথ বা। গুগ্গুলুর্বা ক্ষিপেত্তত্র চূর্ণং তন্নির্ম্মিতা বটী॥ ❋ ॥ অথ সন্ধান বিধিঃ। দ্রবেষু চিরকালস্থং দ্রব্যং যৎ সন্ধিতং ভবেৎ। আসবারিষ্ট ভেদৈ স্তৎ প্রোচ্যতে ভেষজোচিতং॥ ❋ ॥ অথ ধাতূনাং শোধন মারণ বিধিঃ। তত্র শোধন বিধিঃ। পত্তলীকৃত্য পত্রাণি হেম্নো বহ্নৌ প্রতাপয়েৎ। নিষিঞ্চেত্তপ্ত তপ্তানি তৈলে তক্রে চ কাঞ্জিকে॥ গোমূত্রে চ কুলত্থানাং কষায়ে ত্রিধা ত্রিধা। এবং হেম্নঃ পরেষাঞ্চ ধাতূনাং শোধনং ভবেৎ॥ ❋ ॥ অথ

স্বর্ণস্য মারণ বিধিঃ। স্বর্ণস্য দ্বিগুণং সূত মম্লেন সহ মর্দ্দয়েৎ। তদ্গোলক সমং গন্ধং নিদধ্যাদধরোত্তরং॥ গোলকঞ্চ ততো রুদ্ধা সরাব দৃঢ় সংপুটে। ত্রিংশদ্বনোপলৈ র্দদ্যাৎ পুটা ন্যেবং চতুর্দ্দশ॥ নিরুত্থং জায়তে ভস্ম গন্ধো দেয়ঃ পুনঃ পুনঃ॥ ❋ ॥ অথ স্নেহপান বিধিঃ। স্নেহ শ্চতুর্বিধঃ প্রোক্তো ঘৃতং তৈলং বসা তথা। মজ্জা চ তং পিবেন্মর্ত্যঃ কিঞ্চিদভ্যুদিতে রবৌ॥ ❋ ॥ অথ পঞ্চকর্ম্মাণি। প্রথমং বমনং পশ্চাদ্বিরেক শ্চানুবাসনং। এতানি পঞ্চকর্ম্মাণি নিরুহেণোত্তরং তথা॥ ❋ ॥ অথ ফল বর্ত্তি বিধিঃ। ঘৃতাভ্যক্তে গুদে ক্ষিপ্তা শ্লক্ষ্ণা স্বাঙ্গুষ্ঠ সন্নিভা। মল প্রবর্ত্তিনী বর্ত্তিঃ ফলবর্ত্তিশ্চ সা স্মৃতা॥ ❋ ॥ অথ নস্যগ্রহণ বিধিঃ। নস্যং তৎ কথ্যতে ধীরৈ র্নাসা গ্রাহ্যং যদৌষধং। নাবনং নস্ত কর্ম্মেতি তস্য নাম দ্বয়ং মতং॥ ❋ ॥ অথ ধূমপান বিধিঃ। ধূমস্ত ষড়্বিধঃ প্রোক্তঃ শমনো বৃংহণ স্তথা। রেচনঃ কাসহা চৈব বামনো ব্রণধূপনঃ॥ ❋ ॥ অথ গণ্ডূষ কবল প্রতিসারণ বিধিঃ। তত্র গণ্ডূষঃ। স্নেহ ক্ষীর কষায়াদি দ্রবৈঃ সম্পূর্ণ মাননং। আপূর্য্য স্থীয়তে তার্বদ্ধি

গণ্ডূষ ধারণে ॥ ❀ ॥ অথ কবলঃ । বাত পিত্ত কফঘ্নস্য দ্রব্যস্য কবলং মুখে । অর্দ্ধে নিঃক্ষিপ্য সংচর্ব্য নিষ্ঠীবেৎ কবলে বিধিঃ ॥ ❀ ॥ অথ প্রতিসারণং । দন্ত জিহ্বা মুখানাং যচ্চূর্ণ কল্কাবলেহকৈঃ । শনৈ র্ঘর্ষণ মঙ্গুল্যা ত্তদুক্তং প্রতিসারণং ॥ ❀ ॥ অথ স্বেদ বিধিঃ । স্বেদ শ্চতুর্বিধঃ প্রোক্ত স্তাপোষ্ম স্বেদ সংজ্ঞিতঃ । উপনাহো দ্রবঃ স্বেদঃ সর্ব্বে বাতার্ত্তি হারিণঃ ॥ ❀ ॥ অথ কর্ণপূরণ বিধিঃ । স্বেদযেৎ কর্ণ দেশন্তু কিঞ্চিত্তু পার্শ্ব শাযিনঃ । মূত্রৈঃ স্নেহৈ রসৈ র্ক্বৈঃ কোষ্ণৈঃ শ্রোত্রং প্রপূরযেৎ ॥ কর্ণঞ্চ পূরিতং রক্ষেচ্ছতং পঞ্চশতানি বা । সহস্রং বাপি মাত্রাণাং শ্রোত্র কণ্ঠ শিরোগদেঃ ॥ রসাদ্যৈঃ পূরণং কর্ণে ভোজনাৎ প্রাক্ প্রশস্যতে । তৈলাদ্যৈঃ পূরণং কর্ণে ভাস্করে হস্ত মুপাগতে ॥ ❀ ॥ অথালেপ বিধিঃ । অথালেপস্য নামানি লেপ লেপন লিপ্তযঃ । দোষঘ্নো বিষহা বর্ণ্যঃ স চ লেপ স্ত্রিধা মতঃ ॥ ন রাত্রৌ লেপনং ক্র্যাৎ শুষ্যমাণং ন ধারযেৎ । ❀ ॥ অথ শোণিত স্রাবণ বিধিঃ । শোণিতং স্রাবযেজ্জন্তো রাময়ং প্রসমীক্ষ্য চ । প্রস্থং প্রস্থার্দ্ধ মথবা প্রস্থার্দ্ধ মথাপিবা ॥ শরৎকালে স্বভাবেন শোণিতং স্রাবযেন্নরঃ । ত্বগ্দোষ গ্রন্থি শোথাদ্যান স্যু রুধির পাতনাৎ ॥ ❀ ॥ অথাশ্চ্যোতন বিধিঃ । ক্বাথ ক্ষৌদ্রাসব স্নেহ বিন্দূনাং যত্তু পাতনং । দ্ব্যঙ্গুলোন্মীলিতে নেত্রে প্রোক্ত মাশ্চ্যোতনং হিতং ॥ ❀ ॥ অথ বিডালক বিধিঃ । বিডালকো বহি র্লেপো নেত্রে পক্ষ্ম বিবর্জ্জিতে । তস্য মাত্রা পরিজ্ঞেযা মুখালেপ বিধান বৎ ॥ ❀ ॥ অথ তর্পণ বিধিঃ । বাতাতপ রজো হীনে বেশ্মন্যুত্তান শাযিনঃ । আধারৌ মাষ চূর্ণেন ক্লিন্নেন পরিমণ্ডিতৌ ॥ সমৌ দৃঢাবসম্বাধৌ কর্ত্তব্যৌ নেত্র কোষযোঃ । পূরযেদ্ঘৃত মণ্ডেন বিলীনেন সুখোদকে ॥ ❀ ॥ অথাঞ্জন বিধিঃ । অথ সম্যগদোষস্য প্রাপ্ত মঞ্জন মাচরেৎ । অঞ্জনং ক্রিযতে নেত্রে তদ্দ্রব্যঞ্চাঞ্জনং মতং ॥ ❀ ॥ অথ প্রত্যঞ্জন বিধিঃ । গত দোষ মপেতাশ্রু প্রপশ্যেৎ সম্যগম্বুসা । প্রক্ষাল্যাক্ষি যথা দোষং কার্য্যং প্রত্যঞ্জনং ততঃ ॥ ইতি ভাবপ্রকাশঃ ॥ ❀ ॥ অথ ভেষজ করণ ভক্ষণ দিনং । তত্র তিথযঃ রিক্তভিন্নাঃ শোভনাঃ । বারাঃ রবি সোম বুধ বৃহস্পতি শুক্রাণাং

। নক্ষত্রাণি পূর্বফল্গুনী পূর্বাষাঢ়া পূর্বভাদ্রপদমঘা ভরণ্যশ্লেষা বিশাখদ্রা ভিন্নানি। জন্মর্ক্ষঞ্চ নিষিদ্ধং। লগ্নানি মিথুন কন্যা ধনু মীন সংজ্ঞকানি। তত্র গুরু বুধ চন্দ্র শুক্রেষু সৎসু প্রশস্তানি। ইতি জ্যোতিষ তত্ত্বং ॥

ভেষজাঙ্গং ক্লী অনুপানং। ইতি শব্দ চন্দ্রিকা ॥

ভৈমী স্ত্রী ভীমৈকাদশী। যথা। অথ ভৈমী। বিষ্ণুধর্ম্মোত্তরে। মৃগশীর্ষে শশধরে মাঘে মাসি প্রজাপতে। একাদশ্যাং সিতে পক্ষে সোপবাসো জিতেন্দ্রিয়ঃ॥ দ্বাদশ্যাং ষট্তিলাচারং কৃত্বা পাপাৎ প্রমুচ্যতে। তিলস্নায়ী তিলোদ্বর্ত্তী তিলহোমী তিলোদকী॥ তিলস্য দাতা ভোক্তা চ ষট্তিলী নাবসীদতি। মৎস্যপুরাণে। যদ্যষ্টম্যাং চতুর্দ্দশ্যাং দ্বাদশ্যামথ ভারত। অন্যেষ্বপি দিনর্ক্ষেষু ন শক্তস্ত্বমুপোষিতুং ॥ ততঃ পুণ্যামিমাং ভীম তিথিং পাপ প্রণাশিনীং। উপোষ্য বিধিনানেন গচ্ছ বিষ্ণোঃ পরং পদং॥ ভীমতিথিং ভৈমীত্বেন খ্যাতাং একাদশীং ॥ ইত্যেকাদশীতত্ত্বং ॥ * ॥ অপিচ। পিতামহ উবাচ। মাঘমাসে শুক্লপক্ষে সূর্য্যর্ক্ষেণ যুতা প্রিয়া। একাদশী তথা সৈষা ভীমেন সমুপোষিতা॥ আশ্চর্য্যন্তু ব্রতং কৃত্বা পিতৃণামনৃণো ভবেৎ। ভীম দ্বাদশীতি বিখ্যাতা প্রাণিনাং পুণ্যবর্দ্ধিনী॥ নক্ষত্রেণ বিনাপ্যেষা ব্রহ্মহত্যাদি নাশয়েৎ। বিনিহন্তি মহাপাপং যথা পো বিষয়ং যথা॥ স্বপ্রস্তু জলং যদ্বৎ জ্ঞভার্য্যা চ পতিং যথা। অধর্ম্মঞ্চ যথা ধর্ম্মং সমন্ত্রী চ যথা নৃপং॥ অজ্ঞানেন যথা জ্ঞানং শৌচঞ্চাশৌচতা যথা। অশ্রদ্ধয়া যথা শ্রাদ্ধং সত্যঞ্চৈবানৃতৈর্যথা॥ হিমং যথোষ্ণ মার্ত্তণ্ড...খ্যার্থে সঞ্চয়ঃ। যথা প্রকীর্ত্তনাদ্দানং তপো বৈ বিস্ময়াদ্যথা॥ অশিক্ষয়া যথা পুত্রো গাবো দূরগতে যথা। ক্রোধেন চ যথা শান্তং যথা বিত্তমবর্জ্জনাৎ॥ যথা সমীহনাজ্জ্ঞানং ফলানাঞ্চ যতবুতাঃ। তথৈব পাপনাশায় প্রোক্তেয়ং দ্বাদশী শুভা॥ ব্রহ্মহত্যা সুরাপানং স্তেয়ং গুর্ব্বঙ্গনাগমঃ। যগপাদুপজাতানি নহি হন্তি ত্রিপুষ্করং॥ ন চাপি নৈমিষক্ষেত্রং কুরুক্ষেত্রং প্রভাসকং। কালিন্দী যমুনা গঙ্গা ন রেবা ন সরস্বতী॥ নচৈব সর্ব্বতীর্থানি একাদশ্যাঃ সমানি চ। ন দানং ন জপো হোমো ন চান্যৎ সুকৃতং

র্চেৎ ॥ একতঃ পৃথিবী দান মেক ভো হরিবাসরঃ। ততোপ্যেকা মহাপুণ্যা ইযমেকাদশী পরা ॥ অস্মিন্ বরাহবপুষঃ কৃত্বা দেহস্তু হাটকং। ঘটোপরি নবে পাত্রে কৃত্বা বৈ তাম্র ভাজনে ॥ সর্ব্ববীজস্তুতে বিপ্রাঃ সিত বস্ত্রাবগুণ্ঠিতে। সহিরণ্যে সুদীপাদ্যৈঃ কৃত্বা পূজাং প্রযত্নতঃ ॥ বরাহায নমঃ পাদৌ ক্রোড়াকৃতে নমঃ কটিং। নাভিং গম্ভীর ঘোরায উরঃ শ্রী বৎসধারিণে ॥ বাহুং সহস্র শিরসে গ্রীবাং সর্ব্বেশ্বরায চ। মুখং সর্ব্বা ... প্রভবায চ ॥ কেশাঃ শতময়খায় পূজ্যা দেবস্য ... পূজয়িত্বা তু কৃত্বা ... নিশি ॥ ... পুরাণং দেবস্য মাহাত্ম্য প্রতিপাদকং। প্রাতর্বিপ্রায় ... দাচকায় শুভায চ কনক ক্রোড় সহিতং সন্নিবেদ্য ... । পশ্চাচ্চ পারণং কুর্য্যাস্নাতি তৃপ্তঃ সুহৃদ্‌বৃতঃ ॥ এবং কৃত্বা নরো বিপ্রা ন ভূযঃ স্তনপো ভবেৎ। উপোষ্যৈকাদশীং পুণ্যাং মুচ্যতে বৈ ঋণ ত্রযাৎ ॥ মনোভিলষিতাবাপ্তিঃ কল্পা সর্ব্বব্রতাদিকং। ইতি গারুডে একাদশী মাহাত্ম্যে ১২৭ অধ্যাযঃ ॥

ভৈরবং ত্রি ভযানকং। ইত্যমরঃ॥ অস্য পর্য্যাযাঃ ভযঙ্কর শব্দে দ্রষ্টব্যাঃ ॥

ভৈরবঃ পুং শঙ্করঃ। ইতি মেদিনী॥ ভযানকরসঃ। ইত্যমর টীকাযাং ভরতঃ ॥ নদবিশেষঃ। ইতি শব্দরত্নাবলী॥ রাগভেদঃ। ইতি হেমচন্দ্রঃ ॥*॥ অষ্ট ভৈরবানামুৎপত্তি র্যথা। দৈত্যাধিপঃ সমুৎপত্য হরোরসি গদাং ক্ষিপৎ। সংস্থিতস্তু মহাযোগী সর্ব্বাধারঃ প্রজাপতিঃ॥ গদাপাতক্ষতাদ্ভূরি চতুর্ধাসৃগথাপতৎ। পূর্ব্বধারা সমুদ্ভূতো ভৈরবো হগ্নি সমপ্রভঃ॥ বিদ্যারাজেতি বিখ্যাতঃ পদ্মমালা বিভূষিতঃ। তথা দক্ষিণধারোত্থো ভৈরবঃ প্রেতমাস্থিতঃ॥ কামরাজেতি বিখ্যাতঃ কৃষ্ণাঞ্জন সমপ্রভঃ। নাগরাজেতি বিখ্যাতশ্চক্রমালা বিভূষিতঃ॥ ক্ষতজাক্রধিরাজ্জাতো ভৈরবঃ শূল ভূষিতঃ। সচ্ছন্দরাজেতি বিখ্যাত ইন্দ্রাযুধ সমপ্রভঃ॥ ভূবিষ্ঠাক্রধিরাজ্জাতো ভৈরবঃ ফল ভূষিতঃ। খ্যাতো লম্বিত রাজেতি শোভাঞ্জন সমপ্রভঃ॥ ততো ভূদ্দেবরাজেতি ভৈরবঃ ক্ষতজাদথ। উগ্ররাজো বভূবাথ ক্ষতজাদ্ভৈরবো হপরঃ॥ এবং হি

সপ্তরূপো হসৌ কথ্যতে ভৈরবো মুনে। বিঘ্নরাজো হষ্টমঃ প্রোক্তো ভৈরবাষ্টক মুচ্যতে ॥ ইতি বামনপুরাণে অন্ধকবর প্রদানে ভৈরব প্রাদুর্ভাবে ৬৭ অধ্যায়ঃ॥ * ॥ শারদীয় দুর্গা পূজায়াং অষ্টৌ পূজ্য ভৈরবা যথা। আদৌ মহাভৈরবঞ্চ সংহারভৈরব স্তথা। অসিতাঙ্গ ভৈরবঞ্চ রুরুং ভৈরব মেব চ ॥ ততঃ কালং ভৈরবঞ্চ ক্রোধভৈরবমেব চ। তাম্রচূড়ং চন্দ্রচূড়ং অন্তে চ ভৈরব দ্বয়ং ॥ এতান্ সংপূজ্য মধ্যে চ নবশক্তীশ্চ পূজয়েৎ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে দুর্গোপাখ্যানে ৬১ অধ্যায়ঃ ॥ তাম্রচূড় চন্দ্রচূড়য়োঃ স্থানে কপালভৈরব রুদ্র ভৈরবৌ জ্ঞেয়ৌ। ইতি তত্রৈব গণপতিখণ্ডে ৪১ অধ্যায়ঃ॥ * ॥ অপিচ। অসিতাঙ্গো রুরু শ্চণ্ডঃ ক্রোধ উন্মত্ত সংজ্ঞকঃ। কপালী ভীষণ শ্চৈব সংহার শ্চাষ্টমঃ স্মৃতঃ॥ ইতি তন্ত্রসারঃ ॥ * ॥ শিবগণাধিপ ভৈরবো যথা। নন্দী ভৃঙ্গী মহাকালো বেতালো ভৈরব স্তথা। অঙ্গং ভূত্বা মহেশস্য বীতভীতা স্তপোধনাঃ॥ যে মানুষ শরীরেণ প্রাপিরে তপসো বলাৎ। গণানামাধিপত্যন্ত তে জানন্তি হরং পরং ॥ ইতি কালিকাপুরাণে ৪৪ অধ্যায়ঃ ॥ * ॥ করবীরপুররাজ চন্দ্রশেখরপত্নী তারাবতী গর্ব্ভে মহাদেবাজ্জাত পুত্রঃ। স চ পুনঃ ভৃঙ্গী বভূব পার্ব্বতী শাপাৎ বানরমুখো ভূত্বা ভৈরব ইতি নাম্নাখ্যাতঃ। যথা। প্রবিবেশ ততো দেবী স্বয়ং তারাবতী তনৌ। মহাদেবো হপি তস্যাস্তু কামার্থং সমুপস্থিতঃ॥ কামাবসানে তস্যান্তু সদ্যোজাতং সুতদ্বয়ং। অভবন্নৃপশার্দূল তথা শাখামৃগাননং॥ তত স্তয়ো নাম চক্রে নারদো বচনান্নৃপ। জ্যেষ্ঠো ভৈরব নামা ভূৎ ভীরোঃ পুত্রো ভয়ঙ্করঃ॥ বেতাল সদৃশঃ কৃষ্ণো বেতালো হভূত্তথা হপরঃ॥ ইতি কালিকাপুরাণে ৪৯ অধ্যায়ঃ ॥ * ॥ অপিচ। যো হসৌ ভৃঙ্গী হরসুতো মহাকালোপি ভগজঃ। তাবেব গৌরী শাপেন সম্ভূয নর যোনিজৌ॥ বেতাল ভৈরবৌ জাতৌ পৃথিব্যাং নৃপ বেশ্মনি। যথা ভৃঙ্গি মহাকালাবুৎপন্নৌ প্রাক্ তথা শৃণু॥ যো হসৌ মহাভৈরবাখ্যঃ স কায়ঃ শারভো হরঃ। ভৈরবঃ পৃথগেবায়ং গণাধ্যক্ষো হরাত্মজঃ ॥ ইতি কালিকাপুরাণে ৪৫ অধ্যায়ঃ ॥ * ॥ দুর্জয়াখ্য গিরিস্থ ভৈরবো যথা। তন্মধ্যে ভৈরবোদেবো ভগ সঙ্গম সম্ভবঃ। দুর্জয়া-

ন্যে বরাগিরৌ স্বর্গস্যোপম ভূমিগঃ॥ যোঽসৌ শরভ রূপস্য মধ্য খণ্ডাদি ভৈরবঃ। সএব ভৈরবাখ্যো হয়ং পঞ্চবক্ত্রস্য মন্ত্রকৈঃ॥ সংপূজ্য তত্র মতিমান্ স যাতি শিব লোকতাং। ইতি কালিকাপুরাণে ৮১ অধ্যায়ঃ॥ *॥ ভৈরবস্য মন্ত্রো যথা। কেবলঃ সপরো হাদিঃ ষষ্ঠস্বর সমন্বিতঃ। চন্দ্রবিন্দু সমাযুক্তং হয়গ্রীবস্য বীজকং॥ ভৈরবং পাণ্ডুনাথস্তু বনমালি স্বরূপিণং। বারাহেণ তু বীজেন পূজয়েত্তু বিধানতঃ॥ সপরৌ দ্বাবনুস্বার বিসর্গাভ্যাং সমন্বিতৌ। মহা ভৈরব মন্ত্রো হয়ং ভৈরবং তেন পূজয়েৎ॥ ইতি কালিকাপুরাণে ৬২ অধ্যায়ঃ॥ *॥ অস্য ধ্যানং যথা। ভৈরবঃ পাণ্ডুনাথশ্চ রক্ত গৌর শ্চতুর্ভুজঃ। গদাং পদ্মঞ্চ শক্তিঞ্চ চক্রঞ্চাপি করেণ চ॥ বিভ্রদ্দেব্যাঃ পুরো ভাগে পূজ্যো হয়ং বিষ্ণু রূপধৃক্। ইতি তত্রৈব ৬০ অধ্যায়ঃ॥ *॥ অস্য গায়ত্রী যথা। মহাভৈরব বিদ্মহে কেলিরূপায় ধীমহি। তন্নঃ কামো ভৈরবস্তু দেবী নিত্যং প্রচোদয়াৎ॥ এষা ভৈরব রূপস্য গায়ত্রী মে প্রতিষ্ঠিতা। যথেষ্ট মাংস মদ্যাদি ভোজনায় ময়া ধৃতঃ॥ মহাভৈরব রূপো হয়ং তথা স্ত্রী রতি সঙ্গমে। অযন্তু বাম্য ভাবেন পূজ্যো মদ্যাদিভিঃ সদা॥ ইতি কালিকাপুরাণে ৭৭ অধ্যায়ঃ॥ *॥ অথ মহাবিদ্যাদীনাং ভৈরব নিরূপণং যথা। শিব উবাচ। শৃণু চার্ব্বঙ্গি শুভগে কালিকায়াশ্চ ভৈরবং। মহাকালং দক্ষিণায়া দক্ষ ভাগে প্রপূজয়েৎ॥ মহাকালেন বৈ সার্দ্ধং দক্ষিণা রমতে সদা। তারায়া দক্ষিণে ভাগে অক্ষোভ্যং পরিপূজয়েৎ॥ সমুদ্র মথনে দেবি কালকূটং সমুত্থিতং। সর্ব্বে দেবাঃ সদারাশ্চ মহাক্ষোভ মবাপ্নুয়ুঃ॥ ক্ষোভাদি রহিতং যস্মাৎ পীতং হালাহলং বিষং। অতএব মহেশানি অক্ষোভ্যঃ পরিকীর্ত্তিতঃ॥ তেন সার্দ্ধং মহামায়া তারিণী রমতে সদা। মহাত্রিপুরসুন্দর্য্যা দক্ষিণে পূজয়েৎ শিবং॥ পঞ্চবক্ত্রং ত্রিনেত্রঞ্চ প্রতিবক্ত্রে সুরেশ্বরি। তেন সার্দ্ধং মহাদেবী সদা কাম কুতূহলা॥ অতএব মহেশানি পঞ্চমীতি প্রকীর্ত্তিতা। শ্রীমদ্ভুবনসুন্দর্য্যা দক্ষিণে ত্র্যম্বকং যজেৎ॥ স্বর্গে মর্ত্ত্যে চ পাতালে যা চাদ্যা ভুবনেশ্বরী। এতয়া রমতে তেন ত্র্যম্বক স্তেন কথ্যতে॥ সশক্তিশ্চ সমাখ্যাতঃ সর্ব্বতন্ত্রে প্রপূজিতঃ। ভৈ-

গ্রব্যা দক্ষিণে ভাগে দক্ষিণা মূর্ত্তি সংজ্ঞক॰॥ পূজয়েৎ পরয়ত্নেন পঞ্চবক্ত্র॰ তমেব হি। ছিন্নমস্তা দক্ষিণাংশে কবন্ধ॰ পূজয়েৎ শিব॰॥ কবন্ধ পূজনাদ্দেবি সর্ব্বসিদ্ধীশ্বরো ভবেৎ। ধূমাবতী মহাবিদ্যা বিধবা রূপ ধারিণী॥ বগলায়া দক্ষভাগে এক বক্ত্র॰ প্রপূজয়েৎ। মহারুদ্রেতি বিখ্যাত॰ জগৎ সংহার কারক॰॥ মাতঙ্গী দক্ষিণাংশে চ মতঙ্গ॰ পূজয়েৎ শিব॰। তমেব দক্ষিণামূর্ত্তি॰ জগদানন্দ কারক॰॥ কমলায়া দক্ষিণাংশে বিষ্ণুরূপ॰ সদাশিব॰। পূজয়েৎ পরমেশানি স সিদ্ধো নাত্র সংশয়ঃ॥ পূজয়েদন্নপূর্ণায়া দক্ষিণাংশে চ রূপক॰। মহামোক্ষপ্রদ॰ দেব॰ দশবক্ত্র॰ মহেশ্বর॰॥ দুর্গায়া দক্ষিণে দেশে নারদ॰ পরিপূজয়েৎ। নকারঃ সৃষ্টিকর্ত্তা চ দকারঃ পালকঃ সদা॥ রেফঃ সংহার রূপত্বান্নারদঃ পরিকীর্ত্তিতঃ। অন্যাসু সর্ব্ববিদ্যাসু ঋষির্যঃ পরিকীর্ত্তিতঃ॥ সএব তস্যা ভর্ত্তা চ দক্ষভাগে প্রপূজয়েৎ। ইতি তোড়লতন্ত্রে প্রথম পটলঃ॥*॥ অথ ভৈরব রাগস্য বিবরণ॰। হনুমন্মতে ষড্রাগ মধ্যে প্রথম রাগঃ। মহাদেব মুখান্নির্গতঃ। অস্য জাতিঃ ঔড়বঃ। অর্থাৎ

ধৈবত নিষাদ ষড়্জ গান্ধার মধ্যমমিতি পঞ্চস্বর মিলিতঃ। অস্য গ্রহঃ ধৈবত স্বরঃ। শরদৃতৌ প্রাতঃকালে অস্য গান সময়ঃ। রাগমালায়া॰ অস্যাকারঃ মহাদেবাকারবৎ। অর্থাৎ সুন্দরসন্ন্যাসী। ভস্ম মুক্ষিতবদনঃ। জটা মস্তকঃ। জটাপতদ্গঙ্গাজলঃ। কঙ্কণ ভূষিত হস্তঃ। ললাটার্দ্ধচন্দ্রঃ। ত্রিনেত্রঃ। সর্প বেষ্টিত স্কন্ধ বাহুঃ। ভাল তিলকঃ। স্কন্ধস্থ হস্তিচর্ম্মা। অথ বা দ্বীপিচর্ম্মোপবিষ্টঃ। গলমুণ্ড মালঃ। ত্রিশূলহস্তঃ। অথবা সম্মুখ পোথিত ত্রিশূলঃ। পার্শ্বস্থ বৃষশ্চ। অস্য রাগিণ্যঃ পঞ্চ। যথা। ভৈরবী বৈরাটী মধুমাধবী সিন্ধবী বঙ্গালী চ। অস্যাষ্টৌ পুত্রাঃ। যথা হর্ষঃ তিলকঃ পুরীয়ঃ মাধবঃ সুহঃ বলনেহ মধুঃ পঞ্চমশ্চ॥ কল্লানাথমতে তু ভৈরব শ্চতুর্থরাগঃ। অস্য রাগিণ্যঃ ষট্। যথা। ভৈরবী গুর্জ্জরী ভাষা বিলাবলী কর্ণাটী রগতংসা বড়হংসীতি চ কেচিৎ। এতন্মতে পূর্ব্ববৎ অষ্টৌ পুত্রাঃ। কিন্তু তিলক পুরীয পঞ্চম সুহ স্থানেষু দেবশাখ ললিত মালকৌশ বিলাবলা লিখিতাঃ॥ সোমেশ্বর মতে হপি রাগিণ্যঃ ষট্ যথা। ভৈরবী গুর্জ্জরী রেবা গুণক্রী

বঙ্গালী বহুলী চ। তন্মতে রাগি-ণ্যা সহাস্য গানসময়ো গ্রীষ্মর্তুঃ॥ ভরতমতে তু অস্য রাগিণ্যঃ পঞ্চ যথা। মধুমাধবী ললিতা বরারী বাহাকলী ভৈরবী চ। তন্মতেপি অস্যাষ্টৌ পুত্রাঃ। যথা। দেবশাখঃ ললিতঃ হর্ষঃ বিলাবলঃ মাধবঃ ব-ঙ্গালঃ বিভাসঃ পঞ্চমশ্চ। এষা মষ্টৌ ভার্য্যা যথা। সুহা বিলাবলী সোরঠী জম্ভারী অন্দাহী বহুল গুজ্জরী পটমঞ্জরী মিরবী চ। ইতি সঙ্গীতশাস্ত্রং॥ মতান্তরে ভৈরব রাগস্য ভার্য্যা যথা। বঙ্গালী ভৈ-রবী বরারী মধ্যমা মধুমাধবী সি-ন্ধবী চ। তৎপুত্রা যথা। কোশক অজযপালঃ শ্যামঃ খরতাপঃ শু-ন্ধঃ ঢোলশ্চ। তৎপুত্রবধ্বো যথা। অষ্টী রেবা বহুলা মোহিনী রামু-লী সুহা চ। অত্র শোভা ইতি সাধু পাঠঃ। ইতি নাদপুরাণং॥

ভৈরবী স্ত্রী চামুণ্ডা। যথা। চামুণ্ডা চর্চিকা চর্ম্মমুণ্ডা মার্জারকর্ণিকা। ক-র্ণমোটী মহাগন্ধা ভৈরবী চ কপা-লিনী॥ ইতি হেমচন্দ্রঃ॥ ভৈরবী বিশেষা যথা। ত্রিপুরভৈরবী ১ স-ম্পৎপুদাভৈরবী ২ কৌলেশভৈর-বী ৩ সকলসিদ্ধিদাভৈরবী ৪ ভয়-বিধ্বংসিনী ভৈরবী ৫ চৈতন্যভৈরবী ৬ কামেশ্বরীভৈরবী ৭ ষট্‌কুটাভৈর-বী ৮ নিত্যাভৈরবী ৯ রুদ্রভৈরবী ১০ ভুবনেশ্বরীভৈরবী ১১ ত্রিপুরবালা-ভৈরবী ১২ নবকূটাভৈরবী ১৩ অন্ন-পূর্ণাভৈরবী ১৪। আসাং মন্ত্রা যথা। অথ ত্রিপুরভৈরবী। বিয়দ্ভৃগুহুতাশ-স্থো ভৌতিকো বিন্দুশেখরঃ। বিয়ত্ত-দাদি কেন্দ্রাগ্নি স্থিতং বামাক্ষি বি-ন্দুমৎ॥ আকাশ ভৃগু বহ্নিস্থো ম-নুঃ সর্গেন্দু খণ্ডবান্। পঞ্চকূটাত্মিকা বিদ্যা বেদ্যা ত্রিপুরভৈরবী॥ ১॥ অথ সম্পৎপুদাভৈরবী। যথা সৌ ত্রিপুরাবালা তথা ত্রিপুরভৈরবী। সম্পৎপুদা নাম তস্যাঃ শৃণু নির্ম্মল মানসে॥ শিবচন্দ্রৌ বহ্নিসংস্থৌবা-গ্ভবং তদনন্তরং। কামরাজং তথা দে-বি শিবচন্দ্রান্বিতং ততঃ॥ পৃথ্বীবী-জান্ত বহ্ন্যাঢ্যং তার্তীয়ং শৃণু বল্লভে। শক্তিবীজে মহেশানি শিববহ্নী নি-যোজযেৎ॥ জমার্য্যাঃ পরমেশানি হিত্বা সর্গন্তু বৈন্দবং। ত্রিপুরাভৈর-বীদেবী মহাসম্পৎপুদা প্রিয়ে॥২॥ অথ কৌলেশভৈরবী। সম্পৎপুদা-ভৈরবীবদ্বিদ্ধি কৌলেশভৈরবীং। হসাদ্যা সৈব দেবেশি ত্রিষু বীজেষু পার্ব্বতি॥ ইয়ন্ত স হ রাদ্যা স্যাৎ

পূজা ধ্যানাদিকং তথা। ৩॥ অথ সকলসিদ্ধিদা ভৈরবী। এতস্যা এব বিদ্যায়া আদ্যন্তে রেফ বর্জিতে। তদেযং পরমেশানি নাম্না সকলসিদ্ধিদা॥ সম্পৎপ্রদাভৈরবীবৎ ধ্যান পূজাদিকং তথা॥৪॥ অথ ভয়বিধ্বংসিনীভৈরবী। সম্পৎপ্রদাভৈরবী আদ্যন্তে রেফ রহিতা চেত্তদা ভয়বিধ্বংসিনীভৈরবী ভবতি। দক্ষিণা মূর্ত্তৌ তথা দর্শনাৎ। পূজাদিকন্তু সম্পৎপ্রদাবৎ॥ ৫॥ অথ চৈতন্যভৈরবী। বাগ্ভবং বীজমুচ্চার্য্য জীব প্রাণ সমন্বিতং। সকলা ভুবনেশানী দ্বিতীয়ং বীজমুদ্ধৃতং॥ জীবং প্রাণং বহ্নিসংস্থং শক্র স্বর সমন্বিতং। বিসর্গাঢ্যং মহেশানি বিদ্যা ত্রৈলোক্যমাতৃকা॥ ঋষ্যাদিন্যাসঃ। শিরসি দক্ষিণামূর্ত্তয়ে ঋষয়ে নমঃ। মুখে পঙ্ক্তিছন্দসে নমঃ। হৃদি চৈতন্য ভৈরব্যৈ দেবতায়ৈ নম। ৬॥ অথ কামেশ্বরীভৈরবী। কামেশ্বরী চ কর্প্পূর্ণা পূর্ব্ব সিংহাসনে স্থিতা। এতস্যা এ বিদ্যায়া বীজদ্বয় মুদাহৃতং॥ তদন্তে পরমেশানি নিত্যক্লিন্নে মদদ্রবে। এতস্যা এব তার্ত্তীয়ং রুদ্রার্ণা পরমেশ্বরি॥ ৭॥ অথ ষট্কূটা ভৈরবী। ডাকিনী রাকিনী বীজে লাকিনী কাকিনী যুগং। সহাকিনী বীজে আহৃত্য সুরসুন্দরি॥ আদ্য নৈকার সংযুক্ত মন্যদীকার মণ্ডিতং। শক্র স্বরান্বিতং দেবি তার্ত্তীয়ং বীজমালিখেৎ॥ বিন্দু নাদ কলাক্রান্তং ত্রিতয়ং শৈলসম্ভবে। ৮॥ অথ নিত্যাভৈরবী। এতস্যা এব বিদ্যাযাঃ ষড়্বর্ণান ক্রমশঃ স্থিতান্। বিপরীতান বদ প্রৌঢে বিদ্যেযং ভোগ মোক্ষদা॥ ন্যাস পূজাদিকং সর্ব্বমস্যাঃ পূর্ব্ববদাচরেৎ। ৯॥ অথ রুদ্রভৈরবী। শিবচন্দ্রৌ মাদনান্তং কান্তং বহ্নিসমন্বিতং। শক্তি ভিন্নং বিন্দু নাদ কলাঢ্যং বাগ্ভবং প্রিয়ে॥ সম্পৎপ্রদায়া ভৈরব্যাঃ কামরাজং তদেব হি। সদাশিবস্য বীজন্তু মহাসিংহাসনস্য চ॥ এষা বিদ্যা মহেশানি বর্ণিতুং নৈব শক্যতে। ১০॥ অথ ভুবনেশ্বরী ভৈরবী। হসাদ্যং বাগ্ভবক্ষাদ্যং হসকান্তে সুরেশ্বরি। ভূবীজং ভুবনেশানী দ্বিতীয়ং বীজমুদ্ধৃতং॥ শিবচন্দ্রৌ মহেশানি ভুবনেশী চ ভৈরবী। ১১॥ অথ ত্রিপুরবালাভৈরবী। অধরো বিন্দু নামাদ্যং ব্রহ্মেন্দুস্থঃ শশী যুতঃ। দ্বিতীয়ং ভৃগু সর্গাঢ্যো মন স্তার্ত্তীয় মীরিতং॥ এষা বালেতি বিখ্যাতা ত্রৈলোক্য বশকারিণী। ১২॥ অথ নবকূটাবালা। বালাবী-

জ এব দেবি কূট ত্রয়ং নবাক্ষরী। বিষৎ কূট ত্রয়ং দেবি ভৈরব্যা নবকূটকং॥ ১৩॥ অথান্নপূর্ণাভৈরবী। প্রণবং ভুবনেশানী শ্রীবীজং কামবীজকং। হৃদন্তে ভগবত্যন্তে মাহেশ্বরি পদং ততঃ। অন্নপূর্ণেঠ যুগলং বিদ্যেয়ং বিংশদক্ষরী॥ ১৪॥ ইতি তন্ত্রসারে ভৈরবীমন্ত্র পরিচ্ছেদঃ॥

**ভৈরবী** স্ত্রী রাগিণীবিশেষঃ। সা চ ভৈরব রাগস্য পত্নী। যথা। ভৈরবী কৌশিকী চৈব ভাষা বেলাবলী তথা। বঙ্গালী চেতি রাগিণ্যো ভৈরবস্যৈব বল্লভাঃ॥ মতান্তরে মালবরাগস্য পত্নী। যথা। ধানসী মালসী চৈব রামকীরী চ সিন্ধুড়া। আশাবরী ভৈরবী চ মালবস্য প্রিয়া ইমাঃ॥ অস্যা ধ্যানং যথা। সরোবরস্থা স্ফটিকস্য মন্দিরে সরোরুহৈঃ শঙ্কর মর্চ্চয়ন্তী। তাল প্রযোগ প্রতিবদ্ধ গীতি গৌরীতনুর্নারদ ভৈরবীয়ং॥ অস্যা গানসময়ঃ পূর্ব্বাহ্ন কালঃ। যথা। বিভাষা ললিতা চৈব কামোদা পঠমঞ্জরী। রামকীরী রামকেলী বেলোয়ারী চ গুজ্জরী॥ দেশকারী চ শুভগা পঞ্চমী চ গড়াতুড়ী। ভৈরবী চাথ কৌমারী রাগিণ্যো দশ পঞ্চ চ॥ এতাঃ পূর্ব্বাহ্ন কালে তু গীয়ন্তে গায়নোত্তমৈঃ। ইতি সঙ্গীতদামোদরঃ॥ *॥ হনুমন্মতে এষা সম্পূর্ণজাতিঃ। অস্যাঃ সপ্তস্বর বিন্যাস ক্রমঃ মধ্যম পঞ্চম ধৈবত নিষাদ ষড্জ ঋষভ গান্ধারান্তঃ। অস্যা গ্রহং মধ্যম স্বরঃ। শরদৃতৌ প্রভাতে অস্যা গানসময়ঃ। রাগমালায়াং অস্যাঃ স্বরূপং। অল্পবয়স্কা। সুরূপা। সুনেত্রা। বিস্তারবদনা। পিঙ্গলকেশা। কোমলাঙ্গী রক্তবর্ণা। শ্বেতবসনা। গলশোভিত চম্পকমালা। প্রফুল্লপদ্মযুক্ত পর্ব্বত গুহায়াং শিবপূজাপরায়ণা। তত্র মঞ্জীরবাদকা গায়ন্তি চ॥ *॥ কল্লনাথ সোমেশ্বর ভরতমতেষ্বেবং॥

**ভৈষজং** ক্লী লাবকপক্ষী। ইতি জটাধরঃ॥ ভেষজঞ্চ॥

**ভৈষজ্যং** ক্লী ঔষধং। ইত্যমরঃ॥

**ভৈক্ষং** ক্লী ভিক্ষাসমূহঃ। ইত্যমরঃ॥ অপিচ। ভিক্ষাশন মনুদ্যোগাৎ প্রাক্কেনাপ্যনিমন্ত্রিতং। অযাচিতন্তু তদ্ভৈক্ষং ভোক্তব্যং মনুরব্রবীৎ। ইতি প্রায়শ্চিত্ততত্ত্বধৃত উশনসো বচনং॥

**ভৈক্ষজীবিকা** স্ত্রী ভিক্ষয়া জীবনোপায়ঃ। তৎপর্য্যায়ঃ। পৈণ্ডিন্যং ২

। ইতি ত্রিকাণ্ডশেষঃ ॥

ভৈক্ষভুক্ ত্রি ভৈক্ষাশী। ভিক্ষাশী। ভৈক্ষং ভুনক্তি যঃ। ইতি কর্ত্তরি ক্বিপ্ প্রত্যয়েন নিষ্পন্নঃ ॥

ভোঃ ব্য সম্বোধনং। তৎপর্য্যায়ঃ। প্যাট্ ২ পাট্ ৩ অঙ্গ ৪ হে ৫ হৈ ৬ ।ইত্যমরঃ॥ হংহো ৭ হং ৮ হো ৯ অরে ১০ অযে ১১ অযি ১২। ইতি ভরতঃ॥ প্রশ্নঃ॥ বিষাদঃ। ইতি শব্দরত্নাবলী ॥

ভোক্তব্যং ত্রি ভোজনীয়ং। ভোজ্যং। যথা। যত্নেন ভগিনী হস্তাদ্ভোক্তব্যং পুষ্টিবর্দ্ধনং। ইতি তিথ্যাদিতত্ত্বং॥ অলাবূ বর্ত্তুলাকারা বার্ত্তাকী দুগ্ধবর্ণিকা। প্রাণান্তে ঽপি ন ভোক্তব্যা দুগ্ধবর্ণা কলম্বিকা ॥ ইতি কর্ম্মলোচনঞ্চ ॥

ভোক্তা ত্রি ভোজনকর্ত্তা। যথা। যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তাব্যযাত্মা হরিরীশ্বরোঽত্র।ইতি শ্রাদ্ধপ্রযোগতত্ত্বং॥ সুখাদিভোগকর্ত্তা যথা কর্ত্তা চ দেহী ভোক্তা চ আত্মা ভোজয়িতা সদা। ভোগো বিভব ভেদশ্চ নিষ্কৃতি মুক্তি রেব চ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৩ অধ্যায়ঃ॥

ভোক্তা পুং বিষ্ণুঃ। যথা। ভ্রাজিষ্ণুর্ভোজনং ভোক্তা সহিষ্ণুর্জগদাদিজঃ। ইতি মহাভারতে তস্য সহস্র নাম স্তোত্রং॥ ভর্ত্তা। ইতি হেমচন্দ্রঃ॥

ভোগঃ পুং সুখং॥ স্ত্র্যাদিভৃতিঃ। পণ্যস্ত্রীণাং ভৃতি র্ভাড়িঃ। আদিনা হস্ত্যশ্বাদি কর্ম্মকরাণাঞ্চ ভৃতিঃ॥ সর্পস্যফটা॥ সর্পশরীরং ॥ ইত্যমর ভরতৌ॥ ধনং॥ পালনং॥ অভ্যবহারঃ। ইতি মেদিনী॥ সর্পঃ॥ দেহঃ॥ মানং। ইতি শব্দরত্নাবলী॥ *॥ পুণ্য পাপ জনন যোগ্যকালঃ। যথা। অতীতা নাগতো ভোগো নাড্যঃ পঞ্চদশ স্মৃতঃ। ইতি তিথ্যাদিতত্ত্বে সংক্রান্তি প্রকরণং॥ *॥ ভূম্যাদীনাং ভোগো যথা। ত্রিপুরুষ ভোগ মাহ ব্যাসঃ। প্রপিতামহেন যদ্ভুক্তং তৎ পুত্রেণ বিনা চ তং। তৌ বিনা যস্য পিত্রা চ তস্য ভোগ স্ত্রিপৌরুষঃ। পিতাপিতামহো যস্য জীবেচ্চ প্রপিতামহঃ। ত্রয়াণাং জীবতাং ভোগো বিজ্ঞেয় স্ত্বেক পুরুষঃ॥ নারদঃ। তথারূঢ় বিবাদস্য প্রেতস্য ব্যবহারিণঃ। পুত্রেণ সো ঽর্থঃ সংশোধ্যো ন তং ভোগো নিবর্ত্তযেৎ ॥ ইতি ব্যবহারতত্ত্বং॥

বিভবস্তৈবঃ। যথা। কর্ত্তা চ দেহী ভোক্তা চ আত্মা ভোজযিতা সদা। ভোগো বিভবভেদশ্চ নিষ্কৃতি মুক্তিরেব চ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৩ অধ্যায়ঃ॥

ভোগগৃহং ক্লী বাসগৃহং। যথা। বাসাগারং ভোগগৃহং কন্যাপত্ত্র্যাট নিষ্কুটাঃ। ইতি হেমচন্দ্রঃ॥

ভোগদেহঃ পুং স্বর্গ নরক ভোগার্থং সূক্ষ্মশরীরং। যথা। কৃতে সপিণ্ডী করণে নরঃ সংবৎসরাৎ পরং। প্রেতদেহং পরিত্যজ্য ভোগদেহং প্রপদ্যতে॥ ইতি শুদ্ধিতত্ত্বং॥ অপিচ। শূন্যদেহ বিবরণং কথযামি যথাগমং। পৃথিবী বায়ুরাকাশস্তেজস্তোযমিতি স্ফুটং॥ দেহিনাং দেহবীজঞ্চ সৃষ্টঃ সৃষ্টিবিধৌ পরং। পৃথিব্যাদি পঞ্চভূতৈর্যো দেহো নির্ম্মিতো ভবেৎ॥ স কৃত্রিমো নশ্বরশ্চ ভস্মসাচ্চ ভবেদিহ। বৃদ্ধাঙ্গুষ্ঠ প্রমাণঞ্চ যো জীব পুরুষঃ কৃতঃ॥ বিভর্ত্তি সূক্ষ্মদেহন্তং তদ্রূপং ভোগ হেতবে। স দেহো ন ভবেদ্ভস্ম জ্বলদগ্নৌ যমালয়ে॥ জলে ন নষ্টো দেহী বা প্রহারে সুচিরে কৃতে। ন শস্ত্রে চ ন চাস্ত্রে চ ন তীক্ষ্ণ কণ্টকে তথা॥ তপ্তদ্রবে তপ্তলোহে তপ্তপাষাণ এব চ। প্রতপ্ত প্রতিমাশ্লেষে হপ্যত্যূর্দ্ধ পতনেহপি চ॥ নচ দগ্ধো ন ভগ্নশ্চ ভুঙক্তে সন্তাপ মেব চ। কথিতং দেহবৃত্তান্ত কারণঞ্চ যথাগমং॥ ইতি ব্রহ্মবৈবর্ত্তেপ্রকৃতিখণ্ডে ২৯অধ্যাযঃ

ভোগপালঃ পুং অশ্বরক্ষকঃ। ইতি শব্দমালা॥ ভোগরক্ষকে ত্রি॥

ভোগপিশাচিকা স্ত্রী ক্ষুধা। ইতি হারাবলী॥

ভোগভূমিঃ স্ত্রী সুখস্থানং॥ ভারতবর্ষাতিরিক্তবর্ষং। যথা। তত্রাপি ভারতং শ্রেষ্ঠং জম্বুদ্বীপে মহামুনে। যতো হি কর্ম্মভূরেষা ততো হন্যা ভোগভূময়ঃ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৩ অধ্যাযঃ॥

ভোগবতী স্ত্রী পাতালগঙ্গা॥ নাগপুরী। ইতি মেদিনী॥

ভোগবান্ পুং সর্পঃ॥ ইতি মেদিনী॥ নাট্যং॥ গানং। ইতি ত্রিকাণ্ডশেষঃ॥ ভোগবিশিষ্টে ত্রি॥

ভোগসদ্ম ক্লী বাসগৃহং। যথা। গর্ভাগারং বাসগৃহং ভোগসদ্মাপবাধকং। ইতি শব্দরত্নাবলী॥

ভোগাহ্বং ক্লী ধান্যং। ইতি রাজনির্ঘণ্টঃ॥

ভোগাবলী স্ত্রী স্তুতিপাঠকস্য স্তুতিঃ। ইতি জটাধরঃ॥ নাগপুরী। ইতি

হেমচন্দ্রঃ ॥
ভোগাবাসঃ পুং বাসগৃহং। ইতি হারাবলী ॥
ভোগিকঃ পুং অশ্বরক্ষকঃ। ইতি শব্দমালা ॥
ভোগিকান্তঃ পুং বায়ুঃ। ইতি ত্রিকাণ্ডশেষঃ ॥
ভোগিনী স্ত্রী মহিষীভিন্ননৃপপত্নী। ইত্যমরঃ ॥
ভোগিবল্লভং ক্লী চন্দনং। ইতি রাজনির্ঘণ্টঃ ॥
ভোগী ন পুং সর্পঃ। ইত্যমরঃ ॥ গ্রামপাত্রঃ ॥ নৃপঃ। ইতি মেদিনী ॥ নাপিতঃ ॥ ইতি বিশ্বঃ ॥ বৈয়াবৃত্তিকরঃ। ইতি হেমচন্দ্রঃ ॥
ভোগীন্দ্রঃ } পুং অনন্তদেবঃ। ইতি
ভোগীশঃ } শব্দরত্নাবলী ॥
ভোগ্যং ক্লী ধনং ॥ ধান্যং। ইতি রাজনির্ঘণ্টঃ ॥ ভোগার্হে ত্রি ॥ আধিভেদঃ। যথাহ নারদঃ। বিশ্রম্ভহেতূ দ্বাবত্র প্রতিভূরাধিরেব চ। অধিক্রিয়ত ইত্যাধিঃ স বিজ্ঞেয়ো দ্বিলক্ষণঃ ॥ কৃতকালোপনেয়শ্চ যাবদ্দেয়োদ্যত স্তথা। স পুন র্দ্বিবিধঃ প্রোক্তো গোপ্যো ভোগ্য স্তথৈব চ ॥ গোপ্যো রক্ষণীয়ঃ। ভোগ্যস্যার্থঃ ফলভোগ্যপদে দ্রষ্টব্যঃ। তদন্যথা। কালে কাল কৃতো নশ্যেৎ ফলভোগ্যো ন নশ্যতি। ফলং ভোগ্যং যস্যাসৌ ফলভোগ্যঃ ক্ষেত্রারামাদিঃ স ন কদাচিদপি নশ্যতি। ইতি মিতাক্ষরায়াং ব্যবহারাধ্যায়ঃ ॥
ভোগ্যা স্ত্রী বেশ্যা। ইতি রাজনির্ঘণ্টঃ ॥ ভোগ্যা ভূঃ। ইতি বোপদেবঃ ॥
ভোজঃ পুং স্বনামখ্যাতদেশঃ। ভোজপুর ইতি ভাষা। তৎপর্য্যায়ঃ। ভোজকটঃ ২। ইতি শব্দরত্নাবলী ॥ ধারানগরস্য রাজবিশেষঃ। তস্য বৃত্তান্তো যথা। ধারা নাম নগর্য্যাং সিন্ধল সংজ্ঞো রাজা আসীৎ তস্য রাজ্ঞী সাবিত্রী তয়ো র্বৃদ্ধাবস্থায়াং ভোজ নাম পুত্রো জাতঃ স যদা পঞ্চবর্ষবয়স্ক স্তদা তৎপিতা আত্ম মরণ কালং বিদিত্বা ভ্রাত্রে মুঞ্জায় রাজ্যং দদৌ তদুৎসঙ্গে ভোজঞ্চ মুমোচ। ততো রাজ্ঞি পরলোকং প্রাপ্তে কিয়ৎকালানন্তরং সভায়াং কশ্চিদ্বুদ্ধিসাগর জ্যোতির্বিদাগত্য মুঞ্জং প্রাহ রাজন্ ভোজস্য ভাগ্যোদয়ং বক্তুং বিরিঞ্চি রপি ন সমর্থঃ কোহং বরাক উদরম্ভরি ব্রাহ্মণঃ তথাপি বদামি ভো-

জ মিতঃ প্রেষয । ততো রাজাজ্ঞয়া
ভোজে হধ্যযনশালাং প্রাপ্তে আহ
স্বথা। পঞ্চাশৎ পঞ্চবর্ষাণি সপ্তমাসা
দিনত্রয়ং । ভোজরাজেন ভোক্তব্যং
স গৌড়ং দক্ষিণাপথং ॥ ইতি শ্রুত্বা
মুঞ্জরাজো হচিন্তযৎ যদি রাজলক্ষ্মী
র্ভোজং গমিষ্যতি ততো হহং জীব-
ন্নপি মৃতঃ । ততো রাজা মন্ত্রয়িত্বা
বঙ্গালাধীশ্বরং মহাবলং বৎসরাজ
মাহূয় নির্জনে তং প্রাহ বৎসরাজ
ত্বযা ভোজ স্ত্রিভুবনেশ্বরী বিপিনে
হন্তব্যঃ । বৎসরাজঃ ভোজ মমায়ো-
পাধ্যায মাহূয প্রাহ বিপ্র ভোজ
মানয । ততো বিদিতবৃত্তান্তো ভোজঃ
কুপিতঃ প্রাহ আঃ পাপ রাজ্ঞঃ কু-
মারং বহির্নেতুং তব কা শক্তিঃ
ততো বাম চরণপাদুকামাদায ভো-
জেন ভালদেশে হতো বৎসরাজঃ
প্রাহ ভোজকুমার বযং রাজাদেশ
কারিণঃ । ইত্যুক্ত্বা বথার্থং বলাৎ
বৎসরাজেন নিশাযাং বিপিনে ভো-
জে নীতে বৎসরাজস্য ভ্রাত্রা ভো-
জস্য বধোদ্যম সমযে এক এব সুহৃ
দ্ধর্ম্মো নিধনেপ্যনুযাতি যঃ । শরী-
রেণ সমং নাশং সর্ব্ব মন্যচ্চ গচ্ছতি ॥
ইত্যুক্তং নিশম্য বৎসরাজো বৈরা-
গ্য মাপন্নো ভোজং ক্ষমস্বেত্যুক্ত্বা
প্রণম্য তং রথে নিবেশ্য গৃহমাগত্য
ভূমি গৃহান্তরে ভোজং রক্ষিত্বা কৃত্রি-
মং ভোজ মস্তকং কারযিত্বা রাজান
মাগত্য নত্বা প্রাহ শ্রীমতা যদাদিষ্টং
তন্মযা কৃতং । রাজপুত্র বধং জ্ঞাত্বা
রাজা তং প্রাহ বৎসরাজ পুত্রেণ খড়্গ
প্রহারাবসরে কিমপি উক্তং। বৎস-
রাজঃ প্রাহ দেব কিমপি পত্রং প্রে-
ষিত মস্তি তদিদং গৃহাণ শিরশ্চ
দর্শয়তি । ততো ভোজমস্তকং দৃষ্ট্বা
রাজা রুরোদ । মান্ধাতেতি মহীপ-
তিঃ কৃতযুগে হলঙ্কার ভূতো গতঃ
সেতুর্যেন মহোদধৌ বিরচিতঃ ক্বাসৌ
দশাস্যান্তকঃ । অন্যে চাপি যুধিষ্ঠির
প্রভৃতযো যাবদ্ভবান্ ভূপতে নৈকে-
নাপি সমং গতা বসুমতী মন্যে ত্বযা
যাস্যতি ॥ ইতি ভোজকৃত শ্লোকং
পঠিত্বা পপাত চ। ততো রাজা পণ্ডি-
ত মানীয মযা পুত্রো হতঃ প্রাযশ্চি
ত্ত মুচ্যতা মিত্যুবাচ । ততস্তে উচুঃ
রাজন্ সবাসা বহ্নি মাবিশ । ততো
রাজ্ঞো বহ্নি প্রবেশে নিশ্চিতে সতি
তদ্বার্ত্তাং শ্রুত্বা নৃপদ্বার মাগত্য বৎ-
সরাজো বুদ্ধিসাগরং প্রাহ তাত ম-
যা ভোজো ন মারিতঃ বুদ্ধিসাগরশ্চ
তস্য কর্ণে কিমপি কথযতি। ততো
বৎসরাজো নিষ্ক্রান্তঃ। তত স্তন্মুহূর্ত্তেন

সাক্ষান্মহেশ্বর ইব একঃ কাপালিক আগতঃ। তং বীক্ষ্য বুদ্ধিসাগরঃ প্রাহ যোগিন্ ত্বত আগম্যতে কাপালিকে ত্বয়ি জগচ্চমৎকারী কলাবিশেষ শ্চৌষধি বিশেষো বা অস্তি। ততো রাজাপ্যাহ ময়া সহসা হতং পুত্রং রক্ষ। কাপালিকঃ প্রাহ রাজন্ মাভৈষীঃ পুত্র স্তে নাথ প্রসাদেন ন মরিষ্যতি প্রাত স্তব গৃহং স্বয়মেব সমেষ্যতি পরং শ্মশান ভূমৌ বুদ্ধিসাগরমন্ত্রিণা সহ হোমদ্রব্যং প্রেষয়। কাপালিকেন যদুক্তং তৎ সর্ব্বং রাজ্ঞা সম্পাদ্য বুদ্ধিসাগরঃ প্রেষিতঃ ততশ্চ রাত্রৌ গূঢ়তয়া বৎসরাজ গৃহাদ্ভোজ স্তত্র নদী পুলিনং নীতঃ যোগিনা ভোজস্তমারো জীবিত ইতি কিংবদন্তী সর্ব্বতোপ্যজায়ত। ততঃ পৌরামাত্যৈঃ পরিবৃতো ভোজো রাজভবন মাগতঃ। তত স্তমালিঙ্গ্য রুদন্তং মুঞ্জং নিবার্য্য ভোজঃ স্তৌতি। ততো রাজা লজ্জাবনত গ্রীবঃ সন্ নিজ সিংহাসনে ভোজমুপবেশ্য রাজ্যং দত্ত্বা বনং গতঃ। ততো মুঞ্জে বনং প্রাপ্তে বুদ্ধিসাগরং মুখ্যামাত্যং বিধায় ভোজঃ স্বং রাজ্য সুখং বুভুজে। ততো রাজসভায়াং সহস্রশো বুধবরা দিগ্ভ্যঃ সমাজগ্মুঃ ততো রাজা অমাত্য মাহ। লক্ষং মহাকবে র্দেয়ং তদর্দ্ধং বিবুধস্য চ। দেয়ং গ্রাম্যকবে র্বৎস তস্যা প্যর্দ্ধং ত্বয়াম্বহ মিতি। ততঃ ক্রমেণ বররুচি সুবন্ধু বাণামর রামদেব হরিবংশ শঙ্কর কলিঙ্গ কর্পূর বিনায়ক মদন বিদ্যাবিনোদ কোকিল তারেন্দ্র প্রমুখাঃ সর্ব্বশাস্ত্র বিচক্ষণাঃ সর্ব্বজ্ঞা ইব রাজসভা মহর্নিশ মলঙ্কুর্ব্বন্তি। কিয়ৎকালানন্তরং কালিদাসকবৌ সমাগতে তেন সার্দ্ধং রাজ্ঞঃ পরমা প্রীতিরজায়ত। অন্যে বিদ্বাংসঃ কালিদাসং বেশ্যালম্পটং বিদিত্বা সর্ব্ব ভাবেন বৈরঞ্চক্রুঃ ন কশ্চিৎ সভায়াং স্পৃশতি ন কোপি বদতি। কিন্তু ভোজনৃপতি স্তেন সার্দ্ধং পরমপ্রীতো বভূব। অন্যেষাং পণ্ডিতানামাগমনং তেষাং পদ্যানি সমস্যাপূরণানি তেভ্যো বহুলক্ষ মুদ্রাদানাদি বর্ণনঞ্চ গ্রন্থশেষ পর্য্যন্ত মস্তি। তদ্গ্রন্থ বিস্তরভয়ান্ন লিখিতং। ইতি ভোজপ্রবন্ধ পুস্তকাৎ সঙ্কলিতং॥ *॥ ঐন্দ্রজালিক বিদ্যাং ভোজবিদ্যাং বদন্তি॥

ভোজকটঃ পুং ভোজদেশঃ। ইতি শব্দরত্নাবলী॥

ভোজনং ক্লী কঠিনদ্রব্যস্য গলাধঃক-
রণং। তৎপর্য্যায়ঃ। জগ্ধিঃ ২ জেম
নং ৩ লেপঃ ৪ আহারঃ ৫ নিঘসঃ ৬
ন্যাদঃ ৭। ইত্যমরঃ॥ জমনং ৮
বিঘসঃ ৯। ইতি তট্টীকা॥ অভ্য
বহারঃ ১০ প্রত্যবসানং ১১ অশনং
১২ স্বদনং ১৩ নিগরঃ ১৪। ইতি রাজ
নির্ঘণ্টঃ॥ * ॥ অথ ভোজনগুণবি
ধানাদি। ভোজনাগ্রে সদা পথ্যং
জিহ্বাকণ্ঠবিশোধনং। অগ্নিসন্দী-
পনং হৃদ্যং লবণার্দ্রকভক্ষণং॥
আয়ুর্ঘৃতে গুড়ে রোগা মৃত্যুর্মীনো
বিদাহিষু। আরোগ্যং কটুতিক্তেষু
বলং মাংসে পয়ঃসু চ॥ অন্নাদষ্ট
গুণং পিষ্টং পিষ্টাদষ্টগুণং পয়ঃ।
পয়সোঽষ্টগুণং মাংসং মাংসাদষ্ট
গুণং ঘৃতং॥ ঘৃতাদষ্টগুণং তৈলং
মর্দ্দনান্নচ ভক্ষণাৎ। আহারঃ
প্রীণনঃ সদ্যো বলকৃদ্দেহধারণঃ
॥ * ॥ আয়ুষ্যং প্রাঙ্মুখো ভুঙ্‌ক্তে য-
শস্যং দক্ষিণামুখঃ। শ্রিয়ং প্রত্য
ঙ্মুখো ভুঙ্‌ক্তে ঋতং ভুঙ্‌ক্তে হ্যুদঙ্মুখঃ॥
অন্নেন রশ্নেন ভাগৌ দ্বাবেকং পা-
নেন পূরয়েৎ। বায়োঃ সঞ্চারণার্থ
ঞ্চ চতুর্থমবশেষয়েৎ। * ॥ দন্তে
চাবগতং চান্নং শৌচেনৈবাহরেজ্জ
লৈঃ। জ্যাদনির্গতং তদ্ধি মুখস্যা

নিষ্টগন্ধতাং॥ * ॥ ভুক্ত্বা পাণিতলং
ঘৃষ্ট্বা চক্ষুষা যদি দীয়তে। অচিরে-
ণৈব তদ্বারি তিমিরাণি ব্যপোহতি
॥ ভুক্ত্বাচম্য করং বামং দত্ত্বা অঙ্কে
ততঃ পঠেৎ। ভুক্তং মহেন্দ্রহস্তেন
বৈশ্বানরমুখেন চ॥ গরুড়স্য চ ক-
ণ্ঠেন সমুদ্রস্য চ বহ্নিনা। বাতাপি
র্ভক্ষিতো যেন পীতো যেন মহো-
দধিঃ। যন্ময়া খাদিতং পীতং ত-
দগস্ত্যো জরিষ্যতি॥ পঠিত্বৈতৎ
সুখাসীনঃ ক্ষণং তিষ্ঠেদনাকুলঃ॥
ভুক্ত্বা পাদশতং গত্বা বামপার্শ্বেন
সংবিশেৎ। এবং হ্যধোগতং চান্নং
সুখং তিষ্ঠতি জীর্য্যতি॥ ভুক্ত্বোপ-
বিশতস্তুন্দং শয়ানস্য বপুর্ভবেৎ।
আয়ুশ্চক্রমমাণস্য মৃত্যুর্ধাবতি
ধাবতঃ। ইতি রাজবল্লভঃ॥ * ॥
অপিচ। ততো ভোজনবেলায়াং স্বী-
য়্যাম্মঙ্গলদর্শনং। তস্য প্রদক্ষিণং
নিত্যমায়ুর্ধর্ম্মবিবর্দ্ধনং॥ লোকে
ঽস্মিন্ মঙ্গলান্যষ্টৌ ব্রাহ্মণো গৌর্হু-
তাশনঃ। হিরণ্যং সর্পিরাদিত্য আ-
পো রাজা তথাষ্টমঃ॥ পাদকারো-
হণং অর্য্যাৎ পূর্ব্বং ভোজনতঃ পরং
। পাদরোগহরং বৃষ্যং চক্ষুষ্যং চা-
য়ুষে হিতং॥ * ॥ শরীরে জায়তে
নিত্যং বাঞ্ছা নৃণাং চতুর্বিধা। বুভুক্ষা

চ পিপাসা চ সুষুপ্সা সুরতস্পৃহা ॥ ভোজনেচ্ছাবিঘাতাৎ স্যাদঙ্গমর্দ্দো হরুচিঃ শ্রমঃ। তন্দ্রা লোচনদৌর্ব্বল্যং ধাতুদাহো বলক্ষয়ঃ ॥ বিঘাতেন পিপাসায়াঃ শোষঃ কণ্ঠাস্যয়ো র্ভবেৎ। শ্রবণস্যাবরোধশ্চ রক্তশোষো হৃদি ব্যথা ॥ নিদ্রাবিঘাততো জৃম্ভা শিরোলোচনগৌরবং। অঙ্গমর্দ্দ স্তথা তন্দ্রা স্যাদন্নাপাক এব চ ॥ বুভুক্ষিতো নযো হশ্নাতি তস্যাহারেন্ধন ক্ষয়াৎ। মন্দীভবতি কাযাগ্নি র্যথা চাগ্নি নিরিন্ধনঃ ॥ আহারং পচতি শিখী দোষানাহারঃ পচতি। দোষক্ষয়ে চ ধাতূন্ পচতি ধাতুক্ষয়ে প্রাণান্ ॥ * ॥ আহারঃ প্রীণনঃ সদ্যো বলকৃদ্দেহ ধারণঃ। স্মৃত্যায়ুঃ শক্তি বর্ণৌজঃ সত্ত্ব শোভা বিবর্দ্ধনঃ ॥ যথোক্ত গুণ সম্পন্ন মুপসেবেত ভোজনং। বিচার্য্য দোষ কালাদীন্ কালযো রুভযোরপি ॥ উভযোঃ কালযোঃ প্রাতঃ সাযঞ্চ ॥ তথাচ। সাযং প্রাত মনুষ্যাণা মশনং শ্রুতি বোধিতং। নান্তরা ভোজনং হর্য্যাদগ্নিহোত্র সমো বিধিঃ ॥ প্রাতঃ প্রথম যামাদুপরি দ্বিতীয যামাদর্ব্বাক্। তথাচ। যাম মধ্যে ন ভোক্তব্যং যামযুগ্মং ন লঙ্ঘযেৎ। যাম মধ্যে রসোৎপত্তি র্যাম যুগ্মাদ্বলক্ষয়ঃ ॥ অন্যচ্চ। ক্ষুৎ সম্ভবাত পক্বেষু রসদোষ মলেষু চ। কালে বা যদি বাকালে সো হন্নকাল উদাহৃতঃ ॥ * ॥ রসাদীনাং পাকং জ্ঞাতুমাহ। উদ্গার শুদ্ধি রুৎসাহো বেগোৎসর্গো যথোচিতঃ। লঘুতা ক্ষুৎ পিপাসা চ যদা কালঃ স ভোজনে ॥ * ॥ স্থানমাহ। আহারং বিজনে হর্য্যান্নির্হারমপি সর্ব্বদা। উভাভ্যাং লক্ষ্ম্যপেতঃ স্যাৎ প্রকাশে হীযতে শ্রিযা ॥ নির্হারো মলমূত্রোৎসর্গঃ। অন্যচ্চ। আহার নিহার বিহার যোগাঃ সদৈব সদ্ভি বিজনে বিধেযা ইতি ॥ * ॥ ভোজনে যেষাং দৃষ্টি র্নিবারণীযা তানাহ। হীন দীন ক্ষুধার্ত্তানাং পাপ ষণ্ডৈণ রোগিণাং। হুক্কুটাদি শুনাং দৃষ্টি র্ভোজনে নৈব শোভনা ॥ * ॥ যেষাং দৃষ্টিঃ শুভদা তানাহ। পিতৃমাতৃ সুহৃদ্বৈদ্যাপাপকৃদ্ধংস বর্হিণাং। সারসস্য চকোরস্য ভোজনে দৃষ্টিরুত্তমা ॥ * ॥ কথঞ্চিদ্দুষ্ট দৃষ্টিপাতে তদ্দোষ শান্তযে ব্রহ্মাদীন্ স্মরেৎ। তদ্যথা। অন্নং ব্রহ্ম রসো বিষ্ণু র্ভোক্তা দেবো মহেশ্বরঃ। ইতি স্মৃত্বিন্তু ভুঞ্জানো দৃষ্টিদোষো ন বাধতে ॥ অঞ্জনা গর্ভ সম্ভূতং কুমারং ব্রহ্মচা-

রিণং দৃষ্টি দোষ বিনাশায় হনুনন্তং ॥ স্মরাম্যহং ॥ ❀ ॥ ভাজন মাহ। দোষ হৃদ্দৃষ্টিদং পথ্যং হৈমং ভোজন ভাজনং। রৌপ্যং ভবন্তি চক্ষুষ্যং পিত্তহৃৎ কফ বাতকৃৎ ॥ কাংস্যং বুদ্ধিপ্রদং রুচ্যং রক্তপিত্ত প্রসাদনং। পৈত্তলং বাত কৃদ্রুক্ষ মুষ্ণং কৃমি কফ প্রণুৎ ॥ আযসে কান্তপাত্রে চ ভোজনং সিদ্ধিকারকং। শোথ পাণ্ডু হরং বল্যং কামলাপহ মুত্তমং ॥ শৈলজে মৃন্ময়ে পাত্রে ভোজনং শ্রীনিবারণং। দারুভবে বিশেষেণ রুচিদং শ্লেষ্মকারি চ ॥ পাত্রং পত্রময়ং রুচ্যং দীপনং বিষ পাপনুৎ। ❀। জলপাত্রন্তু তাম্রস্য তদভাবে মৃদোহিতং ॥ পবিত্রং শীতলং পাত্রং ঘটিতং স্ফটিকেন যৎ। কাচেন রচিতং তদ্বত্তথা বৈদূর্য্য সম্ভবং ॥ ❀ ॥ ভোজনাগ্রে সদা পথ্যং লবণার্দ্রক ভক্ষণং। অগ্নি সন্দীপনং রুচ্যং জিহ্বা কণ্ঠ বিশোধনং ॥ লবণং সৈন্ধবং জ্ঞেয়ং। আর্দ্রকন্তু কটুকমপি ন পিত্ত বিরোধি মধুরপাকিত্বাৎ ॥ ❀ ॥ অশ্নীয়াত্তন্মনা ভূত্বা পূর্ব্বন্তু মধুরং রসং। মধ্যে২ম্ল লবণৌ পশ্চাৎ কটু তিক্ত কষায়কান্ ॥ ফলান্যাদৌ সমশ্নীয়াৎ দাড়িমাদীনি বুদ্ধিমান্। বিনা মোচাফলং তদ্বদ্বর্জ্জনীয়া চ কর্কটী ॥ মৃণাল বিস শালূক কন্দেক্ষু প্রভৃতীনপি। পূর্ব্বমেব হি ভোজ্যানি নতু ভুক্ত্বা কদাচন ॥ গুরু পিষ্টময়ং দ্রব্যং তণ্ডুলান্ পৃথুকানপি। ন জাত ভুক্তবান্ খাদেন্মাত্রাং খাদেদ্বুভুক্ষিতঃ ॥ ঘৃতপূর্ব্বং সমশ্নীয়াৎ কঠিনং প্রাক্ ততো মৃদু। অন্তে পুন দ্রবাশী তু বলারোগ্যে ন মুঞ্চতি ॥ অযমর্থঃ। প্রাক্ ঘৃত পূর্ব্বং কঠিনং সমশ্নীয়াৎ। যথা কাশ্যাদিবাসিনঃ প্রথমং সব্যঞ্জনাং ঘৃত পূর্ব্বাং রোটিকাং ভুঞ্জতে। ততো মৃদুসপূপাদিক মোদনং ভুঞ্জতে। অন্তে পুন দ্রবাশী ভোজনান্তে দধি তক্র দুগ্ধাদি ভুঞ্জতে। যস্মাৎ স্বাদুতরং তদ্ধি বিদধ্যাদুত্তরোত্তরং। ভুক্ত্বা যৎ প্রার্থ্যতে ভূয়স্তদুক্তং স্বাদু ভোজনং ॥ স্বাদুত্বস্য গুণমাহ। সৌমনস্যং বলং পুষ্টি মুৎসাহং রসনাসুখং। স্বাদ সংজনয়ত্যন্ন মস্বাদু চ বিপর্য্যযং ॥ অত্যুষ্ণান্নং বলং হন্তি শীতং শুষ্কঞ্চ দুর্জ্জরং। অতিক্লিন্নং গ্লানিকরং যুক্তি যুক্তং হি ভোজনং ॥ অতিদ্রুতাশিতাহারো গুণান্ দোষান্ বিন্দতি। ভোজ্যং শীত মহৃদ্যঞ্চ স্যাদ্বিলম্বিত মশ্নতঃ ॥ ❀ ॥ গুরু ত্রিবিধং তন্নিবারযন্নাহ

। মন্দানলো নরো দ্রব্যং মাত্রা গুরু বিবর্জ্জয়েৎ । স্বভাবতশ্চ গুরুয স্তথা সংস্কারতো গুরু ॥ মাত্রা গুরুস্তু মদ্গাদি মাসাদিঃ প্রকৃত্যে গুরুঃ। সংস্কার গুরু পিষ্টান্নং প্রোক্ত মিত্যুপলক্ষণং ॥ * ॥ আহারং ষড়্বিধং চূষ্যং পেযং লেহ্যং তথৈব চ । ভোজ্যং ভক্ষ্যং তথা চর্ব্ব্যং । গুরু বিদ্যাদ্যথোত্তরং ॥ চূষ্যং ইক্ষু দাড়িমাদি । পেযং পানক শর্করোদকাদি ॥ লেহ্যং রসালা কৃথিতাদি । কৃথিতা কটী ইতি লোকে । ভোজ্যং ভক্ত সূপাদি । ভক্ষ্যং লড্ডুক মণ্ডকাদি । চর্ব্ব্যং চিপিট চণকাদি ॥*॥ স্বভাব গুরু সংস্কার গুরুণোঃ স্বভাবলঘুনশ্চ ভক্ষ্যস্য ভোজন পরিমাণমাহ । গুরুণামর্দ্ধ সৌহিত্যং লঘূনাং তৃপ্তি রিষ্যতে । অযমর্থঃ । মাষ পিষ্টান্নাদিভি রর্দ্ধং সৌহিত্যং কর্ত্তব্যং মদ্গাদিভিঃ স্বাভাবিক্যা মাত্রশ্চাপি ন মাত্রাগুরুরিষ্যতে । দ্রবঃ পেযাদি । দ্রবোত্তরঃ তক্রাদ্যধিক ওদনাদি মাত্রাতো হধিকোপি মাত্রাগুরু র্ন মন্তব্যঃ । পেযস্য সর্ব্বতো লঘুত্বাৎ । উক্তঞ্চ সুশ্রুতেন । পেয লেহ্যাদ্যভক্ষাণাং গুরু বিদ্যাদ্যথোত্তরমিতি । পেযং পযআদি । লেহ্যং রসালাদি । অদ্যং ওদন সূপাদি । ভক্ষ্যং মোদকাদি । দ্রবাঢ্যমপি শুষ্কন্তু সম্যগেবোপপদ্যতে । বিশুষ্ক মন্নমভ্যস্তং নপাকং সাধু গচ্ছতি ॥ অযমর্থঃ । শুষ্ক মপি শ্রোতোরোধকরমপি দ্রবাঢ্যং সম্যক্ পাকং যাতি ॥ কেবলস্য শুষ্কস্যান্নস্য দোষমাহ । বিশুষ্ক মন্নমিত্যাদি ॥*॥ অপক্বং তৎ কিং ভবতীত্যপেক্ষাযা মাহ । পিণ্ডীকৃত মসংক্লিন্নং বিদাহ মুপগচ্ছতি । পিণ্ডীকৃতং অষ্ঠীলাবদ্ভূতং । অসংক্লিন্নং অসম্যগার্দ্রং । বিদাহ মুপগচ্ছতি বিদগ্ধং ভবতীত্যর্থঃ ॥ * ॥ শুষ্কাদীনাং বৈগুণ্যমাহ । শুষ্কং বিরুদ্ধং বিষ্টম্ভি বহ্নিব্যাপাদনাবহেৎ । শুষ্কং চিপিটাদি । বিরুদ্ধং ক্ষীর মৎস্যাদি । বিষ্টম্ভি চণক মসূরাদি বহ্নিমান্দ্যং কুর্য্যাৎ ॥ ন ভুক্ত্বা ন রদৈশ্ছিত্ত্বা ন নিশাযাং নবা বহুন্ । ন জলান্তরিতান্নদ্বিঃ শক্তুনদ্যান্নকেবলান্॥ পুনর্দ্দানং পৃথক্ পানং সামিষং পযসা নিশি । দন্তচ্ছেদন মুষ্ণঞ্চ সপ্তশক্তুষু বর্জযেৎ ॥*॥ বিষমাশনস্য লক্ষণ মাহ । বহু স্তোক মকালে বা জ্ঞেযং তদ্বিষমাশনং । বহুলাল্পস্য ভক্ষিতস্য

দোষমাহ। আলস্য গৌরবাটোপ শব্দাংশ্চ জঁষ্ণুতে হধিকং। হীনমাত্রং তনোঃ কার্শ্যং করোতিতি চ বল ক্ষয়ং ॥ অধিকং অন্নং ॥✱॥ অকালে ভুক্তস্য দোষমাহ। অপ্রাপ্তকালো ভুঞ্জানোপ্যসমর্থতনু র্নরঃ। তাং স্তান্ ব্যাধীনবাপ্নোতি মরণঞ্চাধিগচ্ছতি ॥ অপ্রাপ্তকালঃ কালাদর্তি প্রাক্ ভুঞ্জানো হসমর্থ শরীরো ভবতি। তথা সতি তাং স্তান্ ব্যাধীন্ শিরো ব্যথা বিসূচিকা হলসক বিলম্বিকাদীন্ প্রাপ্নোতি। তেষা মাধিক্যে মরণ মপি প্রাপ্নোতীত্যর্থঃ ॥ কালে হতীতে হগ্নো জন্তো র্বায়ুনাপহতে হনলে। কৃচ্ছ্রাদ্বিপচ্যতে ভুক্তং ন স্যাদ্ভোক্তুং পুনঃস্পৃহা ॥✱॥ অন্নে ভাগদ্বয়ং ভোজ্যে স্তৃতীয়ং বারি পূরয়েৎ। বায়োঃ সঞ্চরণার্থায় চতুর্থ মবশেষয়েৎ ॥ রসেনান্নস্য রসনা প্রথমেনোপতর্পিতা। ন তথা স্বাদু মাপ্নোতি ততঃ সেচ্যাম্বুনান্তরা ॥ অত্যম্বু পানান্ন বিপচ্যতে হন্ন মনম্বু পানাচ্চ সএব দোষঃ। তস্মান্নরো বহ্নি বিবৃদ্ধনায় মুহুর্মুহু র্বারি পিবেদভূরি ॥ ভুক্তস্যাদৌ জলং পীতং কার্শ্য মন্দাগ্নি দোষ কৃৎ। মধ্যে হগ্নি দীপনং শ্রেষ্ঠ মন্তে স্থৌল্য কফ প্রদং ॥ অন্যচ্চ। সম স্থূল কৃশা ভুক্ত মধ্যান্ত প্রথমাম্বুপাঃ। ইতি বাগ্‌ভটঃ। ভুক্তং ভোজনং। তৃষিতস্তু নচাশ্নীয়াৎ ক্ষুধিতো ন পিবেজ্জলং। তৃষিতস্তু ভবেদ্গুল্মী ক্ষুধিতস্তু জলোদরী ॥✱॥ নন্ন শিষ্টা ভোজনান্তে দুগ্ধং পিবন্তি তৎ কথ মুচিতং। যত স্ত্রিধা বিভক্তস্য ভোজন কালস্য প্রথমো ভাগো বাতস্য দ্বিতীয়ঃ পিত্তস্য তৃতীয়ঃ কফস্য। অতত্র বাহ। অশ্নীযাত্তন্মনা ভুক্ত্বা পূর্বন্তু মধুরং রসং। মধ্যে হম্ললবণৌ পশ্চাৎ কটু তিক্ত কষায়কান্ ॥ অস্যায়মভিপ্রায়ঃ। ভোজনে পূর্বং ভুক্তো মধুরো রসো বুভুক্ষিতস্য বাত পিত্তযোঃ শমকো ভবতি। ভোজনমধ্যে ভুক্তাবম্ললবণৌ পিত্তাশয়ে চ বহ্নি বৃদ্ধিং কুরুতঃ। ভোজনান্ত্য সময়ে ভুক্তাঃ কটু তিক্ত কষায়া রসাঃ কফং শময়ন্তীতি। অতো ভোজনাবসান সময়স্য কফ কালত্বাত্তত্র কথং শ্লেষ্ম জনকং দুগ্ধং পাতু মুচিতং ভবতি। যত উক্তং। দুগ্ধং স্বাদুরসং স্নিগ্ধ মোজস্যং ধাতু বর্দ্ধনং। বাত পিত্ত হরং বৃষ্যং শ্লেষ্মলং গুরু শীতল মিতি ॥ উচ্যতে। বিদাহীন্যন্ন পানানি যানি ভুঙক্তে হি মানবঃ। তদ্বিদাহ প্রশান্ত্যর্থং ভোজ-

নান্তে পয়ঃ পিবেৎ ॥ অতএব ব্রহ্ম পুরাণে। অর্থ্যাৎ ক্ষীরান্ন মাহারং দধ্যন্নং ন কদাচনেতি॥ লবণাম্ল কটু ক্ষানি বিদাহীন্যতি যানি তু। ত দ্দোষং হর্ত্তু মাহারং মধুরেণ সমা পয়েৎ॥ ভোজনাবসান সময়ে দুগ্ধা দি মধুর ভোজনেনৈব বৰ্দ্ধিত কফে লবণাম্ল কটু ভোজন জনিতাং পিত্ত স্য বৃদ্ধিং নাশয়তি পিত্তবৃদ্ধি নাশ নেন কফস্যাপি বৃদ্ধি রূপক্ষীণা ভ বতি ক্ষীণ কফ বৃদ্ধি রগ্নিমান্দ্যাদীন্ ব্যাধীন্ উৎপাদয়িতুং ন শক্নোতি ॥ * ॥ এবং ভক্ত্বা সমাচামেৎ ব্রহ্ম গ্রহণ পূর্ব্বকং। ভোজনে দন্তলগ্নানি নিহৃত্যাচমনঞ্চরেৎ॥ দন্তলগ্ন মনি হার্য্যং লেপং মন্যেত দন্তবৎ। ন তত্র বহুশঃ কুর্য্যাদ্যত্ন নিহরণং প্রতি। * ॥ আচম্য জলযুক্তাভ্যাং পাণিভ্যাং চক্ষুষী স্পৃশেৎ। ভক্ত্বা পাণিতলে ঘৃষ্ট্বা চক্ষুষো যদি দীয়তে॥ অচিরে ণৈব তদ্বারি তিমিরাণি ব্যপোহতি। ভুক্ত্বা চ সংস্মরেন্নিত্য মগস্ত্যাদীন্ সুখাবহান্॥ বিষ্ণু রাজ্ঞা তথৈবাম্নং পরিণামশ্চ বৈ যথা। সত্যেন তেন যদ্ভুক্তং জীর্য্যত্যন্ন মিদং তথা॥ অ গস্তি রগ্নি র্বড়বানলশ্চ ভুক্তং মমান্নং জরয়ত্বশেষং। সুখঞ্চ মেতৎ পরি

ণাম সম্ভবং যচ্ছত্বরোগং মম চাস্ত দেহে॥ অঙ্গারক মগস্তিঞ্চ পাবকং সূর্য্য মশ্বিনৌ। যশ্চৈতান্ সংস্মরে ন্নিত্যং ভুক্তং তস্যাশু জীর্য্যতি॥ ই ত্যুচ্চার্য্য স্বহস্তেন পরিমার্জ্য তথো দরং। অনায়াস প্রদায়ীনি কুর্য্যাৎ কর্ম্মাণ্যতন্দ্রিতঃ॥ অতন্দ্রিতঃ জাগ্র স্তিষ্ঠেন্ন তু স্বপ্যাৎ। ভুক্তবতস্য তু স্বপ্নান্মন্দাগ্নিঃ অপিতঃ কফ ইতি ব চনাৎ॥ জীর্ণে হন্নে বৰ্দ্ধতে বায়ু র্বিদ গ্ধে পিত্ত মেধতে। ভুক্ত মাত্রে কফ শ্চাপি ক্রমো হয়ং ভোজনোপরি॥ বিদগ্ধে কিঞ্চিৎ পক্বে পিত্ত মেধতে কিঞ্চিদপক্বে কফঃ॥ * ॥ ভুক্তমাত্রে সংজাতকফস্য প্রতীকারমাহ। ধূমে নাপোহ্য হৃদ্যৈর্ব্বা কষায কটু তিক্ত কৈঃ। পূগ কর্পূর কস্তুরী লবঙ্গ সুম নঃ ফলৈঃ॥ ফলৈঃ কটু কষায়ৈ র্ব্বা মুখ বৈশদ্য কারিভিঃ। তাম্বূলপত্র সহিতৈঃ সুগন্ধৈ র্ব্বা বিচক্ষণঃ॥ ধূ মেন অগুর্ব্বাদি ধূমেন। অপোহ্য ক ফং দূরীকৃত্য। কষায কটু তিক্তকৈঃ ফলৈঃ কর্পূর কস্তুরী লবঙ্গাদিভিঃ। পূগৈঃ ক্রমুকৈঃ সুমনঃ ফলৈঃ জাতী ফলৈঃ। ফলৈঃ এলাহরীতক্যাদি ফলৈঃ ॥ রতে সুপ্তোত্থিতে স্নাতে ভুক্তে বান্তে চ সঙ্গরে। সভায়াং বিদুষাং রাজ্ঞাং

অথ তাম্বুল ভক্ষণং ॥ * ॥ ভুক্ত্বা শতপদী গচ্ছেচ্ছনৈ স্তেন তু জায়তে। অন্ন সংঘাত শৈথিল্যং গ্রীবা জানু কটীসুখং ॥ ভুক্ত্বোপবিশত স্তুন্দং শয়ানস্য তু পুষ্টতা। আয়ু শ্চংক্রমমানস্য মৃত্যু র্ধাবতি ধাবতঃ ॥ চংক্রমমানস্য পদশতং শনৈ র্গচ্ছতঃ। ॥ * ॥ শয়ানস্তৌ সমুত্তান স্তান্ দ্বিঃ পার্শ্বে তু দক্ষিণে। ততঃ স্তদ্দ্বিগুণান্ বামে পশ্চাৎ সুপ্যাদ্যথা সুখং। বামদিশায়া মনলো নাভে রূর্দ্ধো হস্তি জন্তুনাং তস্মাত্তু বামপার্শ্বে শয়ীত ভুক্ত প্রপাকার্থং ॥ ত্রিদোষ শমনী খট্বা তূলী বাত কফা পহা। ভূশয্যা বৃংহণী বৃষ্যা কাষ্ঠ পট্টী তু বাতুলা ॥ ইতি ভাবপ্রকাশঃ ॥ ** ॥ অন্যচ্চ। স্নাতো যথা বৎ কৃত্বা চ দেবর্ষি পিতৃ তর্পণং। প্রশস্ত রত্ন পাণিস্তু ভুঞ্জীত প্রযতো গৃহী ॥ কৃতে জপ্যে হুতে বহ্নৌ শুদ্ধবস্ত্র ধরো নৃপ। দত্ত্বা হতিথিভ্যো বিপ্রেভ্যো গুরুভ্যঃ সংশ্রিতায় তু ॥ পুণ্য গন্ধধরঃ শস্ত মাল্যধারী নরেশ্বর। নৈকবস্ত্র ধরো হথার্দ্র পাণিপাদো নরেশ্বর ॥ বিশুদ্ধ বদনং প্রীতো ভুঞ্জীত ন বিদিঙ্মুখঃ। প্রাঙ্মুখোদঙ্মুখো বাপি নচৈবান্য মনা নরঃ ॥ * ॥ অন্নং প্রশস্তং পথ্যঞ্চ প্রোক্ষিতং প্রোক্ষণোদকৈঃ। ন জুগুপ্সিতাহৃতঞ্চৈব জুগুপ্সাবদসংস্কৃতং ॥ দত্ত্বা তু ভক্তং শিষ্যেভ্যঃ ক্ষুধিতেভ্য স্তথা গৃহী। প্রশস্ত শুদ্ধপাত্রেষু ভুঞ্জীতাকুপিতো নৃপ ॥ নাসন্দী সংস্থিতে পাত্রে নাদেশে চ নরেশ্বর। নাকালে নাতিসঙ্কীর্ণে দত্ত্বাগ্রঞ্চ নরো হগ্নয়ে ॥ আসন্দী দারুময ত্রিপদী ॥ মন্ত্রাভিমন্ত্রিতং শস্তং নচ পর্য্যুষিতং নৃপ। অন্যত্র ফল মাংসেভ্যঃ শুষ্ক শাকাদিকা স্তথা ॥ তদ্বদ্ধরিতকেভ্যশ্চ গুড়পক্বেভ্য এব চ। ভুঞ্জীতোদ্ধৃত সারাণি ন কদাচিন্নরেশ্বর ॥ হরিতকেভ্যঃ অপক্বলেহ্যাদিভ্যঃ ॥ * ॥ নাশেষং পুরুষো হশ্নীয়াদন্যত্র জগতীপতে। মধ্বম্বু দধি সর্পিভ্যঃ শক্তুভ্যশ্চ বিবেকবান্ ॥ অশ্নীযাত্তন্ময়ো ভূত্বা পূর্ব্বন্তু মধুরং রসং। লবণাম্লে তথা মধ্যে কটু তিক্তাদিকাং স্ততঃ ॥ প্রাক্ দ্রবং পুরুষো হশ্নীয়ান্মধ্যে চ কঠিনাশনং। অন্তে পুনর্দ্রবাশী তু বলারোগ্যে ন মুঞ্চতি ॥ অনিন্দ্যং ভক্ষয়েদিত্থং বাগ্যতো হন্ন মকুৎসয়ন্। পঞ্চগ্রাসং মহামৌনং প্রাণাদ্যাপ্যায়নাদি তৎ ॥ * ॥ ভুক্ত্বা সম্যগথাচম্য প্রাঙ্মুখোদঙ্মুখোপি বা। যথা বৎ পুন রাচামেৎ পাণী

প্রক্ষাল্য মূলতঃ ॥ স্বস্থঃ প্রশান্ত চিত্তশ্চ কৃতাসন পরিগ্রহঃ। অভীষ্টদেবতানাঞ্চ কুর্ব্বীত স্মরণং নরঃ ॥ অগ্নিরাপ্যায়যত্ত্বন্নং পার্থিবং পবনেরিতঃ। দত্তাবকাশং নভসা জরয়ত্ত্বস্তু মে সুখং ॥ অন্নং বলায় মে ভূমে রপামগ্ন্যনিলস্য চ। ভবত্বেতৎ পরিণতৌ মমাস্ত্বব্যাহতং সুখং ॥ প্রাণাপান সমানানা মুদান ব্যানয়ো স্তথা। অন্নং পুষ্টি করঞ্চাস্ত মমাস্ত্বব্যাহতং সুখং ॥ অগস্তি রগ্নি র্বড়বানলশ্চ ভুক্তং ময়ান্নং জরয়ত্বশেষং। সুখঞ্চ মেতৎ পরিণাম সম্ভবং যচ্ছত্বরোগং মম চাস্ত দেহে ॥ বিষ্ণুঃ সমস্তেন্দ্রিয় দেহ দেহি প্রধানভূতো ভগবান্ যথৈকঃ। সত্যেন তেনান্ন মশেষ মেতদারোগ্যদং মে পরিণাম মেতু ॥ বিষ্ণু রত্তা তথৈবান্নং পরিণামশ্চ বৈ তথা। সত্যেন তেন মে ভুক্তং জীর্য্যত্বন্ন মিদং তথা ॥ ইত্যুচ্চার্য্য স্বহস্তেন পরিমৃজ্য তথোদরং। অনায়াস প্রদায়ীনি কুর্য্যাৎ কর্ম্মাণ্যতন্দ্রিতঃ ॥ সচ্ছাস্ত্রাদি বিনোদেন সন্মার্গাদবিরোধিনা। দিনং নয়েত্ততঃ সন্ধ্যা মুপতিষ্ঠেৎ সমাহিতঃ ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে ১১ অধ্যায়ঃ ॥ * ॥ অপরঞ্চ। ভুঞ্জীত প্রযতো নিত্যং বাগ্যতো হনন্যমানসঃ। ভৈক্ষেণ বর্ত্তয়েন্নিত্যং নৈকান্নাদী ভবেদ্ব্রতী ॥ ভৈক্ষেণ বৃত্তিনো বৃত্তি রুপবাস সমাস্মৃতা। পূজয়েদশনং নিত্য মদ্যাচ্চৈন মকুৎসয়ন্ ॥ দৃষ্ট্বা হৃষ্যেৎ প্রসীদেচ্চ প্রতিনন্দেচ্চ সর্ব্বশঃ। অনারোগ্য মনায়ুষ্য মস্বর্গ্যঞ্চাতিভোজনং। অপুণ্যং লোকবিদ্বিষ্টং তস্মাত্তৎ পরিবর্জ্জয়েৎ। প্রাঙ্মুখো হন্নানি ভুঞ্জীত সূর্য্যাভিমুখ এব বা ॥ নাদ্যাদুদঙ্মুখো নিত্যং বিধিরেষ সনাতনঃ। প্রক্ষাল্য পাণী পাদৌ চ ভুঞ্জানো দ্বি রুপস্পৃশেৎ ॥ শুচৌ দেশে সমাসীনো ভুক্ত্বা চ দ্বিরুপস্পৃশেৎ। নাশ্নীয়াদ্ভার্য্যয়া সার্দ্ধং নৈনামীক্ষেত মেহতীং ॥ ন ভক্ষয়েদভক্ষাণি নাপেয়ং বা পিবেদ্দ্বিজঃ। অভক্ষ্যান্নস্ত ভক্তশব্দে দ্রষ্টব্যং ॥ * ॥ ভুঞ্জীত বন্ধুভিঃ সার্দ্ধং বাগ্যতো হন্ন মকুৎসয়ন্। অকৃত্বা তু দ্বিজঃ পঞ্চ মহাযজ্ঞান্ দ্বিজোত্তম। ভুঞ্জীত চেদমূঢ়াত্মা তির্য্যগ্যোনিং স গচ্ছতি ॥ বেদাভ্যাসো হন্বহং শক্ত্যা মহাযজ্ঞ ক্রিয়াক্ষমা। নাশয়ত্যাশু পাপানি দেবানামর্চ্চনং তথা ॥ যো মোহাদথবালস্যাদকৃত্বা দেবতার্চ্চনং। ভুঙ্ক্তে স যাতি নরকান্ শূকরেষ্বভিজায়তে ॥ তস্মাৎ সর্ব্ব প্রযত্নেন

কৃত্বা কর্ম্মাণি বৈ দ্বিজঃ। ভুঞ্জীত স্বজ-
নৈঃ সার্দ্ধং সযাতি পরমাং গতিং॥
ইতি কৌর্ম্মে উপরিভাগে ১৭ অধ্যায়ঃ
॥ *॥ ব্যাস উবাচ। প্রাঙ্মুখোঽন্নানি
ভুঞ্জীত সূর্য্যাভিমুখ এব বা। আসীন
স্ত্বাসনে শুদ্ধে ভূম্যাং পাদৌ নিধায
তু॥ আয়ুষ্যং প্রাঙ্মুখো ভুঙ্ক্তে যশস্যং
দক্ষিণামুখঃ। শ্রিযং প্রত্যঙ্মুখো ভু-
ঙ্ক্তে ঋতং ভুঙ্ক্তে উদঙ্মুখঃ॥ পঞ্চার্দ্রো
ভোজনং কুর্য্যাদ্ভূমৌ পাত্রং নিধায
তু। উপবাসেন তত্তুল্যং মনুরাহ প্র-
জাপতিঃ॥ উপলিপ্তে শুচৌ দেশে
পাদৌ প্রক্ষাল্য বৈ করৌ। আচম্যা-
র্দ্রাননোঽক্রোধঃ পঞ্চার্দ্রো ভোজনং
চরেৎ॥ মহাব্যাহৃতিকং ভিন্নং প-
রিষিঞ্চেদকেন তু। অমৃতোপস্তরণ
মসীত্যাপোশান ক্রিযাঞ্চরেৎ ॥
স্বাহা প্রণব সংযুক্তাং প্রাণাযান্নাহু
তিন্ততঃ। অপানায ততঃ কৃত্বা ব্যা-
নায তদনন্তরং॥ উদানায ততঃ কু-
র্য্যাৎ সমানাযেতি পঞ্চমীং। বিজ্ঞা
য তত্ত্বমেতেষাং জুহুযাদাত্মনি দ্বিজঃ
॥ শেষমন্নং যথাকামং ভুঞ্জীত ব্য-
ঞ্জনৈ র্যুতং। ধ্যাত্বা তন্মনসা দেব
মাত্মানং বৈ প্রজাপতিং॥ অমৃতা-
পিধানমসীত্যুপরিষ্টাদপঃ পিবেৎ।
আচান্তঃ পুন রাচামেদাযং গৌরী-
তি মন্ত্রতঃ॥ দ্রুপদাং বা ত্রিরাবর্ত্ত্য
সর্ব্বপাপ প্রণাশনীং। প্রাণানাং গ্রন্থি
রসীত্যালভেদ্ধৃদযন্ততঃ॥ আচম্যা-
ঙ্গুষ্ঠ মাত্রেতি পাদাঙ্গুষ্ঠেঽথ দক্ষিণে
। নিঃস্রাবযেদ্ধস্তজলং মূর্দ্ধহস্তঃ সমা-
হিতঃ॥ হুত্বানু মন্ত্রণং কুর্য্যাৎ স-
ন্ধ্যাযা মিতি মন্ত্রতঃ। অথাক্ষরেণ
স্বাত্মানং যোজযেদ্ব্রাহ্মণো হৃতিহি॥
সর্ব্বেষা মেব যোগানা মাত্মযোগঃ
পরঃ স্মৃতঃ। যোঽনেন বিধিনা কুর্য্যাৎ
স যাতি ব্রহ্মণঃ ক্ষযং॥ *॥ যজ্ঞো-
পবীতী ভুঞ্জীত স্রগ্গন্ধালঙ্কৃতো নরঃ।
সাযং প্রাত র্নান্তরা বৈ সন্ধ্যাযান্তু
বিশেষতঃ॥ নাদ্যাৎ সূর্য্যগ্রহাৎ
পূর্ব্ব মহ্নি সাযং শশিগ্রহাৎ॥ গ্রহ-
কালে তু নাশ্নীযাৎ স্নাত্বাশ্নীযাত্তু
মুক্তযোঃ। মুক্তে শশিনি ভুঞ্জীত
যদি ন স্যান্মহানিশা॥ অমুক্তযো
রস্তং গতযোঃ স্নাত্বা দৃষ্ট্বা পরেঽহ-
নি। নাশ্নীযাৎ প্রেক্ষমাণানা মপ্রদা-
যৈব দুর্ম্মতিঃ॥ না যজ্ঞ শিষ্টাদন্যদ্বা
ন ক্রুদ্ধো নান্যমানসঃ॥*॥ আত্মার্থং
ভোজনং যস্য রত্যর্থং যস্য মৈথুনং।
বৃত্ত্যর্থং যস্য চাধীতং নিষ্ফলং তস্য
জীবিতং॥ যদ্ভুঙ্ক্তে বেষ্টিত শিরা যচ্চ
ভুঙ্ক্তে উদঙ্মুখঃ। সোপানৎকশ্চ য
দ্ভুঙ্ক্তে সর্ব্বং বিদ্যাত্তদাসুরং॥ নার্দ্ধ

ন্ন॥এৰ ন মধ্যাহ্নে নাজীর্ণে নার্দ্রবস্ত্রধৃক্। নচ ভিন্নাসনগতো ন শয়ানঃ স্থিতোপিবা॥ন ভিন্নভাজনে চৈব ন ভূম্যাং নচ পাণিষু। নোচ্ছিষ্টো ঘৃত মাদদ্যান্ন মূর্দ্ধানং স্পৃশেদপি॥ ন ব্রহ্ম কীর্ত্তয়েদ্বাপি ন নিঃশেষং ন ভার্য্যয়া। নান্ধকারে চ নাকাশে নচ দেবালয়াদিষু॥ নৈকবস্ত্রস্ত ভুঞ্জীত নচ যানস্থিতো২পিবা। ন পাদুকানুগতো বা ন হসন বিলপন্নহি॥ ভুক্তৈবং সুখমাস্থায় তদন্নং পরিণাময়েৎ। ইতি কূর্ম্ম উপরিভাগে ১৮ অধ্যায়ঃ॥ ॥ অপরঞ্চ। দত্ত্বা চ হুত্বা পিতৃ দেবতাভ্যো ভুক্ত্বাতিথীন্ ভৃত্যজনাবশিষ্টং। তুষ্টঃ শুচিঃ শ্রদ্ধধানোত্তি যো২ন্নং তস্যামৃতং স্যাৎ সগুনান্ ভনক্তি॥ সায়ং প্রাত র্মনুষ্যাণা মশনং দেব নির্ম্মিতং। বৈদিকেলৌকিকে২গ্নৌ তু প্রত্যক্ষে জাঠরে তথা॥ উপলিপ্তে সমে দেশে শুচিঃ শ্রদ্ধাসমন্বিতঃ। পাত্রেষ্বর্থানুরূপেষু পুত্র শিষ্যাদিভি র্বৃতঃ॥ সুসংস্কৃতং হিতং স্নিগ্ধং ভুঞ্জীতান্ন মঙ্গৎ সয়ন্। যব গোধূম শাল্যাঢ্যং নাংস শাকাদিভি র্যুতং॥ কট্বম্ল লবণৈ স্তিক্তৈ র্ব্যঞ্জনৈশ্চ সুগন্ধিভিঃ। ভক্ষ্য প্রকারান্ বিবিধান্ কন্দ মূল ফলানি চ॥

পাত্রং ভূমৌ প্রতিষ্ঠাপ্য যো ভুঙ্‌ক্তে বাগ্যতঃ শুচিঃ। ভোজনে ভোজনে চৈব ত্রিরাত্র ফল মশ্নুতে॥ যত্নেন ধারয়েদ্বিপ্রঃ পবিত্রং দক্ষিণে করে। ভুঞ্জানস্তু বিশেষেণ অন্নদোষৈ র্ন লিপ্যতে॥ ॥ যাতুধানাঃ পিশাচাশ্চ অসুরা রাক্ষসা তথা। ঘ্নন্তি কেবল মন্নস্য মণ্ডলস্য বিবর্জ্জনাৎ॥ আদিত্যা বসবো রুদ্রা ব্রহ্মা চৈব পিতামহঃ। মণ্ডলান্যুপজীবন্তি তস্মাৎ কুর্ব্বীত মণ্ডলং॥ চতুষ্কোণং দ্বিজাগ্রস্য ত্রিকোণং ক্ষত্রিযস্য তু। দ্বিকোণাকৃতি বৈশ্যস্য শূদ্রস্য বর্ত্তুলং সদা॥ ন লৌহে মৃন্ময়ে পাত্রে ভিন্নে ২শ্নীযাৎ কটে ২ম্বরে। আপঃ পুনন্তিতি মন্ত্রেণ ভুবস্যাস্তীর্য্য সমাসনং॥ ॥ প্রবা দেয়া রিত্যুপবিশ্য পাত্রং প্রক্ষাল্য মূর্দ্ধানং দিবো ধরিতি মিতিপাত্রমভিমন্ত্র্য ভূম্যা বৃত্ত্বা যনেতি ভূমৌ পাত্রং প্রতিষ্ঠাপয়েৎ। অহতবাসাঃ শুক্লবাসা বা পবিত্রাত্মা ক্ষান্তাত্মা প্রাঙ্মুখ আসীনঃ পাণী প্রক্ষাল্য কর্ণদ্যাতারন্নিগদ্যেতি ... পূর্ব্বং ভক্তমো... ত্যন্নাদ্য নাহ্রিযমাণং প্রতিপন্তয়েৎ। ওজোসীত্যাদিনা প্রতিগৃহ্য অহমস্যগ্নি রশ্নীত্যাভ্যা মভিমন্ত্রয়েৎ।

তদ্রব্যোত জাঠরাগ্নিরন্তরস্থং প্রবো- ধয়েৎ। ভূতপতয়ে নমঃ ভুবনপতয়ে নমঃ ভূতানাং পতয়ে নমঃ ইতি নম- স্কারান্তে বলিত্রয়ং ভূমৌ দদ্যাৎ। অথাত্রৈবাত্মানং চিন্তয়েৎ।✽। প্রাণ- স্য হৃদয়ং স্থান মপানস্য গুদং স্মৃতং। সমানো নাভিদেশে তু উদানঃ ক- ণ্ঠমাশ্রিতঃ॥ প্রকৃষ্টং স তু বিজ্ঞেয়ো ব্যানঃ সর্ব্বাঙ্গ সন্ধিষু। রাজীব সদৃ- শঃ প্রাণো হৃদয়ে নিত্য সংস্থিতঃ॥ তস্যাধস্তাদপানস্ত স বৈ গোক্ষীর সন্নিভঃ। নাভ্যামধ্যে সমানস্ত বিদ্যুজ্জ্বালা সমপ্রভঃ॥ প্রাণস্যো- পর্য্যুদানস্ত ইন্দ্রনীল সমপ্রভঃ। উ- ভাভ্যা মথ শাখাভ্যা মথবাপ্যেক শাখয়া॥ অশূন্যংপাত্রংজর্ব্বীতএবং হানি র্ন জায়তে। অন্তশ্চরসি ভূ- তেষু গুহায়াং বিশ্বতো মুখ॥ ত্বং য- জ্ঞ স্ত্বং বষট্‌কার স্ত্বং বিষ্ণোঃ পরমং পদং।✽। অমৃতোপস্তরণ মসীত্যপঃ স্পৃশ্যোপস্থায় বাচং নিযচ্ছেৎ। ন্য- স্তং মহাব্যাহৃতিভি রদ্ভিঃ প্রদক্ষিণং পরিষিচ্য সব্যেন পাণিনা পাত্র ম- বিমুঞ্চন্ন মৃতোপস্তরণ মসীতি পুর- স্তাদপঃ পীত্বা পঞ্চভি স্তৈঃ প্রাণা- হুতী র্জুহোতি। প্রাণে নিবিষ্টো ঽম্- তং জুহোমি শিবোমা বিশা প্রদাহায়

প্রাণায় স্বাহা। অপানে নিবিষ্টো ঽমৃতং জুহোমি শিবোমা বিশা প্র- দাহায়াপানায় স্বাহা। ব্যানে নি- বিষ্টো ঽমৃতং জুহোমি শিবোমা বি- শা প্রদাহায় সমানায় স্বাহা। ইতি তূষ্ণীং ভূয়ো ব্রতয়েৎ। প্রজাপতিং ম- নসা ধ্যায়েৎ।✽। প্রাণায় স্বাহেতি প্রাণ স্তৃপ্যতি। প্রাণে তৃপ্যতি চক্ষু স্তৃপ্যতি। চক্ষুষি তৃপ্যতি আদিত্য স্তৃপ্যতি। আদিত্যে তৃপ্যতি দ্যৌ স্তৃপ্যতি। দিবিতৃপ্যন্ত্যাং যৎকি- ঞ্চিদ্দ্যৌশ্চাদিত্যশ্চাধিতিষ্ঠত স্তত্তৃ- প্যতি তস্যানুতৃপ্তিং অনুতৃপ্যতি॥ ব্যানায় স্বাহেতি ব্যান স্তৃপ্যতি। ব্যানে তৃপ্যতি শ্রোত্রং তৃপ্যতি। শ্রোত্রে তৃপ্যতি চন্দ্রমা স্তৃপ্যতি। চন্দ্রমসি তৃপ্যতি দিশ স্তৃপ্যন্তি। দিক্ষু তৃপ্যন্তীষু যৎকিঞ্চিদ্দিশঃ খং চন্দ্রমাশ্চাধিতিষ্ঠন্তি। তত্তৃপ্যতি ত- স্যানুতৃপ্তিং অনু তৃপ্যতি প্রজয়া প- শুভি রন্নাদ্যেন তেজসা ব্রহ্মবর্চ্চসে- নেতি॥ অপানায় স্বাহেত্যপান স্তৃ- প্যতি। অপানে তৃপ্যতি বাক্ তৃ- প্যতি। বাচি তৃপ্যন্ত্যাং অগ্নি স্তৃপ্য- তি। অগ্নৌ তৃপ্যতি পৃথিবী তৃপ্যতি। পৃথিব্যাং তৃপ্যন্ত্যাং যৎকিঞ্চিৎ পৃথিবী বাগ্নিশ্চাধিতিষ্ঠত স্তত্তৃপ্যতি

তস্যানুতৃপ্তিং অনুতৃপ্যতি। তৃপ্যতি প্রজয়া পশুভি রন্নাদ্যেন তেজসা ব্রহ্ম বর্চসেনেতি॥ সমানায় স্বাহেতি সমান স্তৃপ্যতি। সমানে তৃপ্যতি মন স্তৃপ্যতি। মনসি তৃপ্যতি পর্য্যন্য স্তৃপ্যতি। পর্য্যন্যে তৃপ্যতি বিদ্যুত্তৃপ্যতি। বিদ্যুতি তৃপ্যন্ত্যাং যৎকিঞ্চিদ্বিদ্যুৎপর্য্যন্য শ্চাধিতিষ্ঠত স্তত্তৃপ্যতি তস্যানুতৃপ্তিং অনুতৃপ্যতি প্রজয়া পশুভি রন্নাদ্যেন তেজসা ব্রহ্মবর্চসেনেতি॥ উদানায় স্বাহেতি উদান স্তৃপ্যতি। উদানে তৃপ্যতি বায়ু স্তৃপ্যতি। বায়ৌ তৃপ্যতিআকাশ স্তৃপ্যতি। আকাশে তৃপ্যতি যৎকিঞ্চিদ্বায়ু শ্চাকাশ শ্চাধিতিষ্ঠত স্তত্তৃপ্যতি। তস্যানুতৃপ্তি মনুতৃপ্যতি প্রজয়া পশুভি রন্নাদ্যেন তেজসা ব্রহ্মবর্চসেনেতি॥ *॥ ভুক্তে ত্বন্নে কেচিৎ কাঙ্ক্ষন্তি ভুক্তশেষং ভুবি ক্ষিপেৎ। কেচিৎ কাঙ্ক্ষন্ত্যনাজীবাঃ কেচিৎ কর্ম্মবশানুগাঃ॥ ভুঞ্জন্তু মম চোৎসৃষ্টং পাত্রে বাথ ভুবি স্থিতে। অমৃতাপিধানমসীত্যুপরিষ্টাৎপয়ঃ পিবেৎ॥ অন্থি পূর্ব্বোপরিষ্টাচ্চ বস্ত্র প্রাণস্য নির্ণয়েৎ। ভুক্ত্বা পীত্বাচ যঃ কশ্চিৎ শূন্যং পাত্রং সমুৎসৃজেৎ॥ স পুনঃ ক্ষুৎপিপাসার্ত্তো ভবেজ্জন্মনি জন্মনি। অমৃতাপিধানমসীত্যুপরিষ্টাদপঃ পিবেৎ॥*॥ অপঃ পীত্বা চান্তঃ প্রাণ স্থানান্যভিঃ স্পৃশতি। প্রাণানাং গ্রন্থিরসীতি হৃদয় মালভ্য জপতি। প্রাণানাং গ্রন্থিরসি ইতি প্রাণদেশং। বিষ্ণোর্জঠর মসীতি নাভিদেশং। যো দেবানামধিপাতীতি পুনরপি হৃদয়দেশ মালভ্য জপতি। সাবিত্রীঞ্চানুভাষ্য ত্রিরাপো রূপানাং রসভুক্ তত্রাত্মা কর্ম্মেষ্টিঃ প্রীয়তাং বিশ্বভুগিতি ধ্যায়েদব্যক্তং পুরুষং॥*॥ আহিতাগ্নি রনড্বাংশ্চ ব্রহ্মচারী চ তে ত্রয়ঃ। অশ্নন্ত এব সিদ্ধ্যন্তি নৈষাং সিদ্ধি রনশ্নতাং॥ গৃহস্থো ব্রহ্মচারী চ যো হনশ্নংস্তু তপশ্চরেৎ। প্রাণাগ্নিহোত্র লোপেন অবকীর্ণী ভবেত্তু সঃ॥ অন্তরা প্রাতরাশঞ্চ সায়মাশন্তথৈব চ। সদোপবাসী ভবতি যো ন ভুঙ্ক্তে কদাচন॥ প্রাণাগ্নিহোত্র মন্ত্রাণাং নিরুদ্ধে ভোজনে জপেৎ। ত্রেধাগ্নিহোত্র মন্ত্রাংস্তু দ্রব্যালাভেন তর্পয়েৎ॥ যথাহি তুল মৈষীক মগ্নিপ্রোতং প্রদূয়তে। তদ্বৎ সর্ব্বাণি পাপানি নির্দহন্ত্যাত্মযাজিনঃ॥ যথেহ ক্ষুধিতা বালা মাতর পর্য্যুপাসতে। এবং সর্ব্বাণি ভূতানি অগ্নিহোত্র মুপাসত ইতি॥ *

...ন্যান্য নিষেধন্তু প্রবক্ষ্যাম্যনুপূর্ব্বশঃ। নোচ্ছিষ্টো ভক্ষয়েৎ কিঞ্চিন্ন গচ্ছন্ বা কদাচন॥ খট্টারূঢ়ো ন ভুঞ্জীত ন পাণিস্থং কদাচন। চন্দ্রসূর্য্যোপরাগে চ গ্রস্তাস্তে চন্দ্রসূর্য্যয়োঃ॥ গোব্রাহ্মণোপবাসেন ন বাজীর্ণে তু ভোজনে। নিশীথে নৈকবাসাস্তু ন লগ্নোচ্ছিষ্ট ভাজনে॥ ন রাত্রৌ তিল সম্বন্ধং দধি শক্তূন্নমাক্ষিকং॥ কোবিদার বটাশ্বত্থ ফলানি ন কদাচন। চণকঞ্চ কৌসুম্ভং করমথিতঞ্চ যদ্দধি॥ বেদ্যা বহিঃ পুরোডাশং তুল্যং গোমাংসভক্ষণে। নোচ্ছিষ্টেন ঘৃতং গ্রাহ্যং শক্তূন্ বাপদ্গতোপি সন্। পলাণ্ডুং লশুনং বাপি ভুঞ্জং স্তৎপাপমাপ্নুয়াৎ॥ নানাদ্রু মুখ পাণিস্তু চন্দ্রং তারার্কমীক্ষয়েৎ। ভুঞ্জন্ স্বর্ব্বন্ স্বমূর্দ্ধানং স্পৃশেদ্ব্রহ্ম ন কীর্ত্তয়েৎ॥ নার্দ্রবাসাঃ শিরঃ ক্লিন্নঃ সোপানৎকো নিরাসনঃ। শয়ানঃ প্রৌঢ়পাদশ্চ কৃত্বা চৈবাবসক্থিকং॥ নাশ্নীয়ান্ন পিবেচ্চৈব কৃত্বা পর্য্যস্তিকাং নরঃ। পাদ প্রসারণং কৃত্বা নচ বেষ্টিত মস্তকঃ॥ নচ শ্রাদ্ধস্য যাচ্ছিষ্টং গৃহে পর্য্যুষিতঞ্চ যৎ। দম্পত্যো ভুক্তশেষন্তু ন ভুঞ্জীত কদাচন॥ নাতিচরিত্র মশ্নীয়াৎ ভুক্ত্বা শেষং বিবর্জ্জয়েৎ। ন ভক্ষয়েত্তু নিঃশেষ মন্যত্র দধি সর্পিষোঃ॥ পয়সো মধু শক্তূনাং তিলানা মোদনস্য চ। নচৈকো মিষ্ট মশ্নীয়ান্ন বহূনাঞ্চ পশ্যতাং॥ বহুবস্তু ন ভুঞ্জন্তি তথা চৈকস্য পশ্যতঃ। ওষ্ঠৌ চ ন লিহেৎ পাণিং নাঙ্গুলিং পাত্র মেব চ॥ শূন্যালয়েগ্নিশালায়াং দেবাগারে তথৈব চ। আয়ুর্নিরস্যতে তস্য মিষ্টৈকস্য বুভুক্ষিতঃ॥ অদত্ত্বা গোগ্নি বিপ্রেভ্যঃ ঙ্গমারামানুযায়িষু। একো হ্যং মিষ্ট মশ্নাতি ততো হন্যো নাস্ত্য হপুণ্যকৃৎ॥ সম্বেক পঙ্ক্ত্যাং বিষমং দদাতি স্নেহাদ্ভয়াদ্বা যদি বার্থ হেতোঃ। বেদেষু দৃষ্টা ঋষিভিস্তু গীতাং তাং ব্রহ্মহত্যাং মুনয়ো বদন্তি॥ একপংক্ত্যুপবিষ্টানাং দুষ্কৃতানাং দুরাত্মনাং। সর্ব্বেষাং তৎ সমং তাবদ্যাবৎ পঙ্ক্তির্ন ভিদ্যতে॥ এবং যো ব্রাহ্মণো ভুঙ্ক্তে সন্তর্প্য পিতৃ দেবতাঃ। স দ্বে জন্মে সমুদ্ধৃত্য ব্রহ্ম সাযুজ্য মাপ্নুয়াৎ॥ ইতি বহ্নি পুরাণে ভোজন বিধানং॥ **॥ ত্রিবিধ ভোজনং যথা। উচ্ছিষ্ট মবশিষ্টং বা পথ্যং পূত মভীপ্সিতং। ভক্তানাং ভোজনং বিষ্ণো নৈবেদ্যং সাত্ত্বিকং মতং॥ ইন্দ্রিয় প্রীতিজননং শুক্র শোণিত বর্দ্ধনং।

ভোজনং রাজনং শুদ্ধ মায়ুরারোগ্য বর্দ্ধনং ॥ অতঃপরং তামসানাং কট্বম্লোষ্ণা বিদাহিকং। পূতি পর্য্যুষিতং জ্ঞেয়ং ভোজনং তামস প্রিয়ং ॥ ইতি কল্কিপুরাণে ২৫ অধ্যায়ঃ ॥ ❋ ॥ শ্রাদ্ধাদিষু নিমন্ত্রিতস্যান্যত্র ভোজনে দোষো যথা। নিমন্ত্রিতো হ্যন্যতো ভুঙ্ক্তে শ্রাদ্ধে দৈবে স পৈতৃকে। স ছিদ্রো নরকে বাসং লভতে নাত্র সংশয়ঃ ॥ ❋ ॥ দেবতাদিষ্বভুক্তবৎসু ভোজনে দোষো যথা। দেবতা পিতৃমর্ত্ত্যেষু মহৎসু ব্রাহ্মণেষু চ। অভুক্তবৎসু যে হশ্নন্তি বাল পিত্রগ্নি মাতৃষু ॥ দুষ্টাস্তে প্রমনিচয়ে নিপাত্যন্তে হধমা হধমাঃ। শুনীমুখাশ্চ জায়ন্তে ক্ষুধার্ত্তাঃ কিরি বিগ্রহাঃ ॥ ❋ ॥ একপঙক্ত্যপবিষ্টাশ্চ সমুত্থায় প্রযান্তি যে। বিভোজনং রাক্ষসেন্দ্র নরকন্তে প্রযান্তি হি ॥ ❋ ॥ এক সার্থং প্রযাতঞ্চ তথান্যঞ্চার্থিতং নরাঃ। অসংবিভজ্য ভুঞ্জন্তি তে যান্তি শ্লেষ্মভোজনং ॥ ❋ ॥ পায়সং কৃশরং মাংসং বৃথা ভুক্তঞ্চ যৈ র্নরৈঃ। তেষামগোগুড়া সুপ্তাঃ ক্ষিপ্যন্তে বদনে হভুতাঃ ॥ ইতি বামনপুরাণে ১২ অধ্যায়ঃ ॥ ❋ ॥ ঔষধাতিরিক্ত কিঞ্চিদ্ভোজনবতো নিত্য নৈমিত্তিক ক্রিয়া নিষেধো যথা। দ্রব্যে ভুক্তে ত্বৌষধে চ নৈব ভুক্ত্বা চ কিঞ্চন। কর্ম্ম ন্বর্য্যাম্নয়ো নিত্যং সূতকে মৃতকে তথা ॥ পত্রং পুষ্পঞ্চ তাম্বূলং ভেষজত্বেন কল্পিতং। কণাদি পিপ্পল্যন্তঞ্চ ফলং ভুক্ত্বা নচাচরেৎ ॥ জলস্যাপি নরশ্রেষ্ঠ ভোজনাদ্ভেষজাদৃতে। নিত্য ক্রিয়া নিবর্ত্তেত সহ নৈমিত্তিকৈঃ সদা ॥ ইতি কালিকাপুরাণে ৫৪ অধ্যায়ঃ ॥ ❋ ॥ ভোজনে পাক বিধৌ দিঙ্নিয়মো যথা। পূর্ব্বাশাভিমুখো ভুত্বা উত্তরাশা মুখেন বা। পচেদন্নঞ্চ মধ্যাহ্নে সায়াহ্নে চ বিবর্জয়েৎ ॥ আগ্নেয়াশাভিমুখে পক্ত্বা অনৃতান্নং বিজানীহি। পূর্ব্বামুখো ধর্ম্মকামঃ শোকহানিশ্চ দক্ষিণে ॥ শ্রীকামশ্চোত্তরমুখে পতিকামশ্চ পশ্চিমে। ঐশান্যাভিমুখে পক্ত্বা দরিদ্রো জায়তে নরঃ ॥ ❋ ॥ পাক পাত্র নিরূপণং যথা। যদা তু আয়সে পাত্রে পক্ত্বা অশ্নাতি বৈ দ্বিজঃ। স পাপিষ্ঠো হপি ভুঙ্ক্তেন্নং রৌরবে পরিপচ্যতে ॥ তাম্রে পক্ত্বা চক্ষুর্হানি র্মণৌ ভবতি বৈ ক্ষণং। পিতৃভ্যাং পক্বমন্নঞ্চ পিতৃভ্যো যশস্বিনি ॥ পুণ্ডরীকস্য যজ্ঞস্য লভতে ফল মীপ্সিতং। বাতুলেন তু যৎপক্বং ভগিন্যা চ কনিষ্ঠয়া

। অসুরেন্দ্রেণ যৎপক্কং শোণিতং তু তদপি স্মৃতং ॥ অভক্তেন চ যৎপক্কং স্ত্রিয়া পক্কং তথৈব চ । পক্কপাত্রে চ যৎপক্কং তৎসর্ব্বং নিষ্ফলং ভবেৎ ॥ * ॥ পাককাষ্ঠ নিরূপণং যথা । উড়ুম্বরেণ কাষ্ঠেন কদম্বস্য দলেন চ । শালেন করমর্দ্দেন উদরাবর্ত্তকেন চ ॥ পক্কান্নং নৈব ভুঞ্জীত ভুক্ত্বা রাত্রিমুপাবসেৎ ॥ * ॥ নিষিদ্ধান্নং যথা । গর্হিতান্ন মবীরান্নং ভুক্ত্বা চান্দ্রায়ণঞ্চরেৎ । অপুত্রা যা তু বনিতা নাশ্নীয়াদেব তদ্গৃহে ॥ শালকাষ্ঠস্য পক্কান্নং শিরীষকস্য চৈব হি । কালতণ্ডাতকস্যৈব বজ্রবারণকস্য চ ॥ ভেরণ্ড শাল্মলৈর্বাপি পক্কান্নং গর্হিতং স্মৃতং ॥ * ॥ পাকপাত্র ত্যাগকালো যথা । যদা মৃন্ময়পাত্রে তু পক্কং বৈ সার্ব্বকালিকং । মাসে পক্ষে তথাষ্টাসু তৎপাত্রং বিসৃজেদ্গৃহী ॥ ধনুঃপাকে তথা সিংহে মীনে চৈব বরাননে ॥ যঃ কুর্য্যাদ্ভোজনং দেবি কৃচ্ছ্রেণৈব বিশুদ্ধ্যতি ॥ * ॥ পাকার্থ জল দানং যথা । একদা তু জলং দদ্যাৎ দ্বিবারং ন প্রদাপয়েৎ । ত্রিভাগং পূরয়েৎপাত্রং পশ্চাত্তোয়ং ন দাপয়েৎ ॥ * ॥ ভোজন স্থানাদি যথা । উপলিপ্তে শুচৌ দেশে পাদৌ প্রক্ষাল্য বাগ্যতঃ । প্রাঙ্মুখোন্নানি ভুঞ্জীত শুচিঃ পীঠ মবস্থিতঃ ॥ * ॥ পীঠনিরূপণং যথা । সার্দ্ধহস্তে চতুষ্কোণে সহকার বিনির্ম্মিতে । চান্দ্রদারুময়ে প্রাদেশোচ্চে সংযুতে ॥ বরুণাসনে ভবেদ্বৃদ্ধি ভদ্রকে শ্রিয়মাপ্নুয়াৎ । চান্দ্রে ধন বিবৃদ্ধিঃ স্যাদ্ধর্ম্ম বৃদ্ধিস্তু ভদ্রকে ॥ শালাসনে কশেরুকে কিংশুকে মরণং ভবেৎ । * । ভোজনে দীপ নিরূপণং যথা । ঘৃতদীপ্ত্যা যজ্ঞফলং তৈলে ধেনু ফলং লভেৎ ॥ * ॥ ভোজনে চাণ্ডালাদি দৃষ্টি নিষেধো যথা । যদা ভোজন কালে তু চাণ্ডালৈঃ পতিতৈস্তথা । শ্ব কুক্কুট বরাহৈশ্চ ম্লেচ্ছৈশ্চ অন্ত্যজৈরপি ॥ অন্নং বাপ্যথ পানং বা দৃষ্টমাত্রং পরিত্যজেৎ । * । রজস্বলায়াঃ সংস্পৃষ্টো বাচং শ্রুত্বা প্রমাদতঃ ॥ ব্রতস্থো বর্জয়েদ্দেবি অন্নতে প্রোক্ষণঞ্চরেৎ । * । দেবালয়ে তথা তীর্থে সিদ্ধক্ষেত্রে চ শঙ্করি ॥ ব্রাহ্মণানাং সমাজে তু ভুক্ত্বা ক্রতু ফলং লভেৎ । * । আচান্তো ভোজনং কুর্য্যাদনামায়াং হিরণ্য যুক্ ॥ সুবর্ণেন স্পৃষ্টেদন্নং তদন্নঞ্চামৃতং বিদুঃ । রজঃ স্পৃষ্টং যদন্নঞ্চ ভুক্ত্বা ভবতি কিল্বিষী ॥ গোম্রকেন স্পৃষ্টেদন্ন মন্নং বিষ্ঠাসমং

ভবেৎ। বৈদূর্য্যেণ মাণিক্যেন স্ফাটি-
কেন স্পৃশেদপি ॥ স্বর্ণেন সংস্পৃশেদ
ন্নং তদন্নং শুচিতাং নিযাৎ। * । ভো
জনে দিঙ্নিযমো যথা । আযুষ্যং
প্রাঙ্মুখো ভুঙ্ক্তে রাত্রৌ চৈব উদঙ্মুখঃ
॥ যশস্বী দক্ষিণে চৈব পশ্চিমে তু
বিবর্জযেৎ। * । ভোজনে মণ্ডলানি
যথা। মণ্ডলং ভোজনে কালে চতু
ষ্কোণং দ্বিজস্য চ ॥ ক্ষত্রিযস্য ভবে-
দ্দৈর্ঘং বৈশ্যস্য অর্দ্ধপৃষ্ঠকং । স্ত্রীশূ
দ্রাণাং ভবেদ্বৃত্তং শকটাকারমেব বা
॥ * ॥ অথ ভোজনকালঃ । সাযং
প্রাত র্দ্বিজাতীনামশনং দেব নির্ম্মি
তং ।নিত্যং নহি তমস্বিন্যাং সার্দ্ধ প্র-
হরযামান্তঃ ॥ রাত্রৌ যামত্রযান্তে চ
সন্ধ্যযো র্ন কদাচন। অকাল ভোজ
নং কৃত্বা প্রাণাযামেন শুদ্ধ্যতি ॥ অ
হো রাত্রেশ্চ সন্ধ্যাযাং ভুক্ত্বা কৃচ্ছ্রং
সমাচরেৎ। * । মোদকাদি ভক্ষণা-
নন্তর মন্ন ভোজন বিধি র্যথা। মোদ-
কং কন্দুপক্বঞ্চ গব্যাঢ্যং ঘৃত সংযুতং
॥ পুনঃপুন র্ভোজনে চ পুনরন্নং ন দু-
ষ্যতি । ত্রিসন্ধ্যং ভুক্তবান্ যস্তু নস
স্বার্থং দ্বিজঃ কচিৎ ॥ ভুক্ত্বা রাত্রি
মুপগমে কৃচ্ছ্রেণৈকেন শুদ্ধ্যতি । * ।
কোলং হরিদ্রা সৌবীরং মরীচং জা
তি কোষকং ॥ পুষ্টিপর্ণাদিকং সর্ব্বং
গন্ধদ্রব্যং তথৌষধিঃ । পুনস্তু মেযা
মামান্নং স্বিন্নঞ্চাপি ন দূষ্যতি॥ * ॥
কুটুম্ব ভরণার্থায পাকং পশ্চান্নিবে-
দযেৎ। বৈশ্বদেবান্ন মুদ্ধৃত্য ভোজ-
যেন্ন বিচারযেৎ ॥ * ॥ নাশ্নীযাৎ
কেবলং রাত্রৌ বিল্বঞ্চৈব তথা দধি।
অঙ্কেন তৃণগুচ্ছেন কাষ্ঠখণ্ডেন বহ্নি-
না ॥ পঙ্ক্তিভেদং ততঃ কুর্য্যাৎ প-
শ্চাদ্ভুঞ্জীত বাগ্যতঃ। হস্তদত্তং ঘৃত-
মন্নঞ্চ শূদ্রাদত্তং ন ভক্ষযেৎ ॥ * ॥
ঘৃতং তৈলঞ্চ লবণং পানীযং পাযসং
দধি। রবিবারে তথা ষষ্ঠ্যাং ভৌম-
বারে দিনক্ষযে ॥ পর্ব্বকালে চ দ্বাদ-
শ্যাং দ্বিজ স্তিক্তং ন ভক্ষযেৎ । * ।
ন বামেন পিবেত্তোযং ন রসং তক্র
মেব চ। ভেকাখু শিশু মার্জারৈ স্তথা
পারাবতৈরপি । কলবিঙ্কৈঃ পন্নগৈ-
শ্চ পাকে স্পৃষ্টেপি সুন্দরি ॥ গোধ্ব-
যা বনমার্জারৈঃ পাকং ন বিসৃজেৎ ক্ব-
চিৎ।*। স্বর্ণরৌপ্যমযে পাত্রে পাষা-
ণে বৃক্ষপত্রকে ॥ সকৃদ্ভুক্ত্বা তু দেবে-
শি পরাকস্য ফলং লভেৎ । পূর্ব্বা-
যাং স্বর্ণপাত্রে চ ভোজনং যঃ সমাচ-
রেৎ ॥ পুণ্ডরীকাশ্বমেধস্য লভতে
ফলমীপ্সিতং । * । স্বর্ণপাত্রে পশ্চি-
মাযাং উত্তরাভিমুখেন বা ॥ তদ-
ন্নং শৌকরং মাংসং ভুক্ত্বা চান্দ্রাযণ

ক্ষরেৎ।। সর্বকামঃ স্বর্ণপাত্রে যশস্বী খর্পরেষু চ। পদ্মপত্রে ভবেৎ পুষ্টি হবিষ্যাশী তু পুণ্যবান্।। ক্ষয়ী ভবতি তাম্রে চ কাচপাত্রে দরিদ্রতা। তুতপত্রে ভবেদায়ুঃ কদলে কীর্ত্তিমাপ্নুয়াৎ।। মধুপত্রে চ রোগঃ স্যাদ্বটপত্রে তু বৈষ্ণবঃ। শালপত্রে ভবেৎ কামী পনসে চৈব স্বর্গতিঃ।। নিশাপত্রে পুরোহে চ পুনঃ সংস্কার মর্হতি।। ইতি মৎস্যসূক্ত তন্ত্রে ৪২ পটলঃ।। ❋❋।। অথ স্মৃত্যুক্ত ভোজনবিধিঃ। বহিঃ প্রক্ষালিতপাণিপাদবদনো রত্নপাণি দ্বিবাসা দ্বিরাচান্তো গোময়োপলিপ্তে প্রাবৃতে দেশে শুদ্ধঃ শুদ্ধপীঠাসনোপবিষ্টো ধর্মবৃদ্ধিকামঃ প্রাঙ্মুখ উদঙ্মুখো বা যশস্কামো জীবৎপিতৃমাতৃকেতরো দক্ষিণামুখো ধনকামঃ প্রত্যঙ্মুখো ভূমিস্পৃষ্টদক্ষিণপাদ আসনারূঢ় সব্যপাদো হস্তজানু করো দক্ষিণদিক্কৃতপানীয়পাত্রো দক্ষিণাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা লৌহ তাম্র মৃণ্ময় ভবাদি দষ্ট ভগ্নকাংস্য কদল্যাদিপত্রপৃষ্ঠ পদ্ম পলাশ পত্রেতর পাত্রং বিধায় প্রক্ষাল্য চ আত্মানং পাত্রঞ্চ দক্ষিণ ক্রমেণ জলেন বেষ্টয়িত্বা তদুপরি লৌহেতরপাত্রান্তরেণ হস্তাভ্যাং প্র-

তি সিদ্ধেতর মন্নাদিকং স্থাপয়িত্বা হন্নং দৃষ্ট্বা প্রহৃষ্যেৎ। অস্মাকং নিত্য মেবা হস্ত ইত্যভিলপ্য সংপ্রোক্ষ্য আচারাচ্চতুষ্কোণ মণ্ডলাভ্যন্তরে জল লিখিত চক্রোপরি ওঁ নারায়ণায় নম ইত্যন্নং সজলং মধ্যে দদ্যাৎ। তৎপার্শ্বে ওঁ ভূবঃপতয়ে স্বাহা ওঁ ভুবনপতয়ে স্বাহা ওঁ ভূতানাং পতয়ে স্বাহা ইতি বলি চতুষ্টয়ং দদ্যাৎ। তদিদং সোপকরণ মন্নং ওঁ বিষ্ণবে নম ইত্যুৎসৃজ্য তদগ্রং কিঞ্চিৎ ওঁ বিশ্বকর্মনায় নম ইতি দত্ত্বা অন্নোপরি বিষ্ণু নির্মাল্য তুলসীপত্রং প্রক্ষিপ্য বিষ্ণুপাদোদকং পুরা ন গৃহীতঞ্চেদিদানীং ওঁ কৃষ্ণ কৃষ্ণ মহাবাহো ভক্তানামার্ত্তিনাশন। সর্বপাপ প্রশমনং পাদোদকং প্রযচ্ছ মে।। ইতি গৃহীত্বা ইষ্টদেবতানাম পরেরিতং শ্রুত্বা স্বয়ং ত্রিরুচ্চার্য্য বা ওঁ অমৃতোপস্তরণমসি স্বাহা ইত্যনেন পীত্বা ওঁ অকাল মৃত্যু হরণং সর্বব্যাধি বিনাশনং। বিষ্ণোঃ পাদোদকং পুণ্যং শিরসা ধারয়াম্যহং।। ইত্যনেন পাদোদক শেষং শিরসি দধ্যাৎ। ওঁ উচ্ছিষ্ট ভোজিন স্তস্য বয় মুচ্ছিষ্ট কাঙ্ক্ষিণঃ। যেন লীলাবরাহেণ হিরণ্যাক্ষো নি-

পাতিতঃ। ইত্যুক্ত্বা অঙ্গুষ্ঠানামিকাভ্যাং ঘৃত প্লুত স্তোক মন্ন মাদায় মহামৌনী সাঙ্গুষ্ঠ সর্ব্বাঙ্গুলিভি র্বা ওঁ প্রাণায় স্বাহা ইত্যনেন মুখে দত্ত্বা অদন্তচ্ছিন্নং নিগিরেৎ। এবং ওঁ অপানায় স্বাহা ওঁ সমানায় স্বাহা ওঁ উদানায় স্বাহা ওঁ ব্যানায় স্বাহা। ততো বীর্য্যকামো মৌনী ভুঞ্জীত। ততঃ প্রথমং দ্রব যুক্ত মধুরং মধ্যে কঠিনাম্ল লবণানি অন্তে দ্রব যুক্ত কটু তিক্তানি যথা লাভং ক্ষীরান্তং সাঙ্গুষ্ঠৈ র্দক্ষ কর সর্ব্বাঙ্গুলিভি রনতিতৃপ্তং ভুঞ্জীত। পশ্চাদধিকং জলাদিকং ন পাতব্যং। জল ক্ষীর দধি ঘৃত মধ শাক শক্তু মাংসেতর দ্রব্যাণাং শেষং রক্ষণীয়ং। ভোজনে স্পর্শে তু মাংস ভোজনে করং প্রক্ষাল্য তদভোজনে তু করমপ্রক্ষাল্যৈব সামেন হস্তেন জলং গৃহীত্বা ওঁ অমৃতাপিধানমসি স্বাহা ইতি জলগণ্ডূষং গৃহীত্বা সাম্বং তজ্জলশেষং ওঁ রৌরবে ২পুণ্যনিলয়ে পদ্মার্ব্বুদ নিবাসিনাং। উচ্ছিষ্ট ভাগিনা মন্ন মক্ষয্য মুপতিষ্ঠতা মিতি ভূমৌ নিক্ষিপেৎ। ভোজনকালে তু বিড়াল কৰ্ম্মক স্পর্শত্যাগঃ। বিড়াল কর্ত্তৃক স্পর্শে ন দোষঃ। ততঃ স্থানান্তরং ন

গচ্ছেৎ। পরাবৃত্ত্য মৃদ্ভি র্মুখ হস্ত লেপ মপনীয় তৃণাদিনা জিহ্বা ঘর্ষণ যোগ্যং দন্তেভ্যো গৃহীত রসদ্রব্যং রক্তপাত ক্ষতাদিকং বিনা অপনয়েৎ। যত্নে কৃতে যদি ন নিঃসরতি তদা ন দোষঃ। ততো জিহ্বাঞ্চ স ঘৃষ্য জল গণ্ডূষৈ র্মুখাভ্যন্তরং সংশোধ্য পাণী পাদৌ চ প্রক্ষাল্য আসনস্থ এব ভূমৌ পাদৌ দত্ত্বা দ্বিরাচম্য মুখং তুলসীপত্রাদিনা সংশোধ্য দক্ষিণ পাদাঙ্গুষ্ঠে দক্ষিণ হস্তেন ওঁ অঙ্গুষ্ঠমাত্র পুরুষো হ্যঙ্গুষ্ঠঞ্চ সমাশ্রিতঃ। ঈশঃ সর্ব্বস্য জগতঃ প্রভুঃ প্রীণাতু বিশ্বভুক্। ইতি মন্ত্রেণ জলং দদ্যাৎ। ততো মহীমার্জ্জনাভাবে অশুচিত্বাদবিলম্ব মেব ভোজন পাত্র মুদ্ধৃত্য তৎ স্থান মুচ্ছিষ্ট মপনীয় গোময়োদকাভ্যাং সংমৃজ্য সিঞ্চেৎ। সুস্থঃ প্রশান্ত চিত্ত আসনে উপবিশ্যা ভীষ্টদেবতা নাম স্মৃত্বা ওঁ অগ্নিরাপ্যায়য়ত্বন্নং পার্থিবং পবনেরিতঃ। দত্তাবকাশো নভসা জরয়ত্বস্তু মে সুখং। অন্নং বলায় মে ভূমে রপামগ্ন্যনিলস্য চ। ভবত্বেতৎ পরিণতো মমাস্ত্বব্যাহতং সুখং। প্রাণাপান সমানানা মুদান ব্যানয়ো স্তথা। অন্নং তুষ্টিকরঞ্চাস্তু মমাস্ত্বব্যাহতং সুখং। অগস্তি

স্বগ্নি র্বড়বানলশ্চ ভুক্তং মন্নান্নং জর
যত্বশেষং। সুখং নবৈতৎ পরিণাম
সম্ভবং যচ্ছত্বরোগং মম চাস্তু দেহে
॥ বিষ্ণুঃ সমস্তেন্দ্রিয় দেহ দেহি প্র
ধান ভূতো ভগবান্ যথৈকঃ। সত্যেন
তেনান্ন মশেষ মেতদারোগ্যদং মে
পরিণাম মেতু॥ বিষ্ণুরত্তা তথৈবান্নং
পরিণামশ্চ বৈ যথা। সত্যেন তেন
মদ্ভুক্তং জীর্য্যত্বন্ন মিদং তথা। ইত্যু
চার্য্য বামহস্তেনোদরং পরিমৃজেৎ
। ততঃ পাদ শত বৃজনানন্তরং বাম
পার্শ্বেন কিঞ্চিৎ কালং শয়িতব্যং।
ভতস্তাম্বূলাদি মুখবাস দ্রব্যং ভো
ক্তব্যং। ইত্যাহ্নিকাচারে পঞ্চম যা-
মার্দ্ধকৃত্যং॥ ✱✱॥ অথ ভোজনাদি
দান ফলং। ভোজনাচ্ছাদনং দত্ত্বা দ
ত্ত্বা চোপানহৌ দ্বিজঃ। স স্বর্গলোকং
সংভুক্ত্য সর্ব্বকামো হত্র জায়তে॥
বিদ্যাং ভক্ত্যা প্রযচ্ছেদ্যঃ পরং ব্রহ্মণ্য
হসৌ বিশেৎ। বিদ্যার্থিনে চ বিপ্রায়
যোদদ্যাদ্ভোজনং নরঃ॥ অন্নং প্রা
ণো জলং প্রাণঃ প্রাণশ্চৌষধ মুচ্যতে
। তস্মাদৌষধ দানেন দত্তাঃস্যু র
সবো দ্বিজাঃ॥ ইতি পরাশরস্মৃতিঃ
॥ ✱✱॥ ভোজনে প্রতিষেধো যথা।
তাম্রপাত্রে পয়ঃ পান মুচ্ছিষ্টে ঘৃত
ভোজনং। দুগ্ধে চ লবণং দদ্যাৎ স-

দ্যো গোমাংস ভক্ষণং॥ যঃ শূদ্রেণ
সমাহৃতো ভোজনং কুরুতে দ্বিজঃ।
সুরাপশ্চ স বিজ্ঞেয়ঃ সর্ব্বধর্ম্ম বহিস্কৃ
তঃ॥ স্নানং রজকতীর্থেষু ভোজনং
গণিকালয়ে। শয়নং পূর্ব্বপাদে চ ব্রহ্ম
হত্যা দিনে দিনে॥ ইতি কর্ম্মলোচনং
॥ ✱✱॥ অথ শিশূনাং প্রথমান্ন ভো-
জনদিনাদি। যথা যমঃ। ততো হন্ন
প্রাশনং মাসি ষষ্ঠে কার্য্যং যথা বিধি
। অষ্টমে বাথ কর্ত্তব্যং যদ্বেষ্টং মঙ্গলং
কুলে॥ ষষ্ঠ ইতি মুখ্যঃ কল্পঃ প্রাগু-
ক্তন্যায়াৎ। কৃত্যচিন্তামণৌ। অন্নস্য
প্রাশনং প্রোক্তং মাসি ষষ্ঠে হষ্টমে
বুধৈঃ। স্ত্রীণাস্তু পঞ্চমে মাসি সপ্তমে
প্রজগৌ মুনিঃ॥ ✱॥ দ্বাদশী সপ্তমী
নন্দা রিক্তাসু পঞ্চ পর্ব্বসু। বল মায়ু
র্যশো হন্যাৎ শিশূনামন্ন ভোজনং॥
ভুজবল ভীমে। ষষ্ঠে মাসি নিশাকরে
শুভকরে স্বিক্তেতরে বৈ তিথৌ সৌ-
ম্যাদিত্য সিতেন্দু জীব দিবসে প-
ক্ষে চ কৃষ্ণেতরে। প্রাজেশাদিতি
পৌষ্ণ বৈষ্ণব যুগে হস্তাদি ষট্কোত্ত-
রৈঃ রাগ্নেয়াপ্লুতি পিত্রৈভশ্চ নিতরা
মন্নাদি ভক্ষে শুভং। যুগৈরিতি প্রা-
জেশাদৌ প্রত্যেকং সম্বধ্যতে অত্রা-
পি তিথ্যঙ্গাদি বিদ্ধর্ক্ষং বিবর্জয়েৎ
। বৃষ দ্বন্দ্ব ধনু মীন কন্যা লগ্নে হস্ম

ভক্ষণং। ত্রিকোণাষ্টক যুকান্ত্য গুহা যদ্বত্তথা ফলং॥ দৃষ্টঃ শশধরো লগ্নাৎ ষষ্ঠাষ্টস্থো হস্ম ভক্ষণে। মার্কণ্ডেয় পুরাণং। দেবতা পুরত স্তস্য পিতু রঙ্কগতস্য চ। অলঙ্কৃতস্য দাতব্য মন্নং পাত্রে চ কাঞ্চনে॥ মধ্বাজ্য কণকোপেতং প্রাশযেৎ পাযসন্ততঃ। কৃত প্রাশন মুৎসঙ্গে মাতুর্বালস্ত তং ত্যজেৎ॥ দেবাগ্রতো হথ বিন্যস্য শিল্প ভাণ্ডানি সর্ব্বশঃ। শাস্ত্রাণি চৈব শস্ত্রাণি ততঃ পশ্যেত্তু লক্ষণং॥ প্রথমং যৎ স্পৃশেদ্বালঃ শিল্প ভাণ্ডং স্বযং তথা। জীবিকা তস্য বালস্য তেনৈব তু ভবিষ্যতি॥ সোমবাক্সে দোষ মাহ ভোজরাজঃ। বাচালো বলবান্ দিনে দিনপতে রত্যন্ত দীপ্তানলো দেহী হীন হুতাশনঃ শিশিরগৌ কৌজে রুজা পীড়িতঃ। বৌধে ভোগ সুখোদযী প্রথম ভুক্তীবে চিরাযুঃ সুখী শুক্রে সৌখ্য বলান্বিতো হভি সুভগো মন্দে চ মন্দানলঃ॥ ইতি জ্যোতিস্তত্ত্বং॥

ভোজপতিঃ পুং কংসরাজঃ। যথা। মল্লানামশনির্নৃণাং নরবরঃ স্ত্রীণাং স্মরো মূর্ত্তিমান্ গোপানাং স্বজনো হসতাং ক্ষিতিভুজাং শাস্তা স্বপিত্রোঃ শিশুঃ। মৃত্যু র্ভোজপতে র্বিরাড বিদুষাং তত্ত্বং পরং যোগিনাং বৃষ্ণীনাং পরদেবতেতি বিদিতো রঙ্গং গতঃ সাগ্রজঃ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৪৩ অধ্যাযঃ॥

ভোজপুরং ক্লী স্বনামখ্যাতদেশঃ। আজি রভুঙ্ভোজপুরে সাক মসুর বরৈঃ। হরে রেবাপারে সবলো নূনং তে লঘীযাংসঃ॥ ইতি বিদগ্ধমুখমণ্ডনং॥

ভোজযিতা ত্রি ভোজনকারযিতা॥ ভোগপ্রযোজকঃ। যথা। কর্ত্তা চ দেহী ভোক্তা চ আত্মা ভোজযিতা সদা। ভোগো বিভব ভেদশ্চ নিষ্কৃতি মুক্তি রেব চ॥ ইতি ব্রহ্মবৈবর্ত্তেপ্রকৃতিখণ্ডে ২৩ অধ্যাযঃ॥

ভোজাধিপঃ পুং কংসরাজঃ। ইতি শব্দরত্নাবলী॥

ভোজ্যং ত্রি ভোজনীযদ্রব্যং। যথা। ভোজ্যং ভোজনশক্তিশ্চ রতিশক্তি র্বরাঃ স্ত্রিযঃ। বিভবো দানশক্তিশ্চ নাল্পস্য তপসঃ ফলং॥ ইতি চাণক্যং॥ অপিচ। আহারং যদ্বিধং চূষ্যং পেযং লেহ্যং তথৈব চ। ভোজ্যং ভক্ষ্যং তথা চর্ব্ব্যং গুরু বিদ্যাদ্যথোত্তরং॥ চূষ্যং ইক্ষুদণ্ডাদি। পেযং পানক শর্করোদকাদি।

লেহ্যং রসালা ক্বথিতাদি। ভোজ্যং ভক্ত সূপাদি। ভক্ষ্যং লড্ডুক মণ্ডকাদি। চর্ব্ব্যং চিপিট চণকাদি। ইতি ভাবপ্রকাশঃ॥ *॥ শ্রাদ্ধস্যান্তে ভোজ্য দানস্যেতিকর্ত্তব্যতা যথা। ওঁ অদ্যামুকে মাসি অমুকে পক্ষে অমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেব শর্ম্মণ একোদ্দিষ্ট বিধিক সাম্বৎসরিক শ্রাদ্ধ বাসরে অমুক গোত্রস্য পিতুরমুক দেব শর্ম্মণো ঽক্ষয় স্বর্গকাম ইদং সঘৃত সবস্ত্রোপকরণান্নাম ভোজ্য মর্চ্চিতং শ্রীবিষ্ণুদৈবতং যথা সম্ভব গোত্র নাম্নে ব্রাহ্মণায়াহং দদানি। ততো দক্ষিণা। ওঁ অদ্যেত্যাদি কৃতৈতৎ সঘৃত সবস্ত্রোপকরণান্নাম ভোজ্য দান কর্ম্মণঃ সাঙ্গতার্থং দক্ষিণা মিদং কাঞ্চন মূল্যং শ্রীবিষ্ণুদৈবতং যথা সম্ভব গোত্র নাম্নে ব্রাহ্মণায়াহং দদানি। কৃতৈতৎ সঘৃত সবস্ত্রোপকরণান্নাম ভোজ্য দান কর্ম্মাচ্ছিদ্রমস্তু। ইতি শ্রাদ্ধপ্রয়োগতত্ত্বং॥

ভোজ্যসম্ভবঃ পুং শরীরস্থরসধাতুঃ। ইতি শব্দচন্দ্রিকা॥

ভোটাঙ্গঃ পুং দেশবিশেষঃ। ভোটান্ ইতি ভাষা। ইতি শব্দরত্নাবলী॥

ভোভো অব্য সম্বোধনং। ইতি হলায়ুধঃ॥

ভোলিঃ পুং উষ্ট্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভৌতঃ পুং দেবলঃ। ইতি শব্দমালা॥ ভূতযজ্ঞঃ। বলিকর্ম্ম। যথা। হোমো দৈবো বলি ভৌতো নৃযজ্ঞো ঽতিথি পূজনং। ইত্যাহ্নিকতত্ত্বং॥

ভৌতিকং ক্লী মুক্তা। ইতি রাজনির্ঘণ্টঃ॥ ভূতসম্বন্ধিনি ত্রি॥

ভৌতিকঃ পুং মহাদেবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ভৌতী স্ত্রী রাত্রিঃ। ইতি হেমচন্দ্রঃ॥

ভৌত্যঃ পুং ভূতিমুনিপুত্রশ্চতুর্দ্দশো মনুঃ। যথা। মার্কণ্ডেয় উবাচ। অতঃপরন্তু ভৌত্যস্য ত্বমুৎপত্তিং নিশাময়। দেবানৃষীং স্তথা পুত্রাং স্তথৈব বসুধাধিপান্॥ বভূবাঙ্গিরসঃ পুত্রো ভূতি র্নামাতি কোপনঃ। তস্য ভ্রাতা সুবর্চা ভূদ্‌যজ্ঞে তেন নিমন্ত্রিতঃ॥ যিযাসুঃ শান্তি নামানং শিষ্য মাহ মহামুনিঃ। সন্দোহ্য কং সদাচার মুদারং মুনি সত্তমং। ভূতি রুবাচ। অহং যজ্ঞ গমিষ্যামি ভ্রাতুঃ শান্তে সুবর্চসঃ। তেনাহূত স্ত্বয়া চেহ যৎ কর্ত্তব্য

জাগর্ত্ত তৎ। অতিজাগরণং বহ্নে রুক্ষা কার্য্যং মমাশ্রমে ॥ তথা তথা প্রযত্নেন যথাগ্নি র্ন শমং ব্রজেৎ। ইত্যাস্তপ্তে তথেত্যুক্তঃ স তু শিষ্যেণ শান্তিনা ॥ জগাম যজ্ঞং তং ভ্রাতু রাহূতঃ সন্ যবীয়সা। প্রশান্ত স্তাবদনলো যো হসৌ ভূতি পরিগ্রহঃ॥ তং দৃষ্ট্বা সো হনলং শান্তং শান্তি রত স্তু দুঃখিতঃ। ভীতশ্চ ভূতে র্ব হুধা চিন্তয়ন্ স মহাদ্যুতিঃ ॥ মার্কণ্ডেয় উবাচ। বহুধৈবং বিচিন্ত্যাসৌ ভীত স্তস্য তদা গুরোঃ। যযৌ মতিমতাং শ্রেষ্ঠঃ শরণং জাতবেদসং ॥ স চকার তত স্তোত্রং সপ্তার্চ্চের্যতমানসঃ। ভূত্বৈক চিত্তো মেদিন্যাং ন্যস্ত জানুঃ কৃতাঞ্জলিঃ ॥ স এবং সংস্তুত স্তেন ভগবান্ হব্যবাহনঃ। জ্বালামালাবৃত তনু স্তস্যাসী প্রতো মুনে ॥ পরিতুষ্টো হস্মি তে বিপ্র ভক্ত্যা যত্তে স্তুতিঃ কৃতা। বরং দদামি ভবতঃ প্রার্থ্যতাং যত্তবেপ্সিতং ॥ ভগবন্ কৃত কৃত্যো স্মি যত্ত্বাং পশ্যামি রূপিণং। তথাপি ভক্তি নম্রস্য ভগবন্ শ্রূয়তাং মম ॥ ময়াপরাধাৎ সংত্যক্তং যত্তে হধিষ্ণ্যং বিভাবসো। তত্রাধিষ্ঠিত সোদ্য পূর্ব্ববৎ পশ্যতাং দ্বিজঃ ॥ তথান্যদপি মে দেব প্রসাদং তত্রুষে যদি। পুত্রো বিশিষ্টো ভবতু নিরপত্যস্য মে গুরোঃ ॥ যথা চ মৈত্রীং তনয়ে স করিষ্যতি মে গুরুঃ। তথা সমস্ত সত্ত্বেষু ভবত্বস্য মনো মৃদু ॥ অগ্নিরুবাচ। গুরো রর্থং ত্বয়া ব্রহ্মন্ যাচিতং যদ্বর দ্বয়ং। নাত্মার্থে তেন মে প্রীতি স্তুগ্যতীব মহামুনে ॥ ভবিষ্যত্যেতদখিলং গুরো যৎ প্রার্থিতং ত্বয়া। মৈত্রী সমস্ত ভূতেষু পুত্র স্তস্য ভবিষ্যতি ॥ মন্বন্তরাধিপঃ পুত্রো ভৌত্যো নাম ভবিষ্যতি। মহাবলো মহাবীর্য্যো মহাপ্রাজ্ঞো গুরো স্তব ॥ ইত্যুক্ত্বা ভগবানগ্নিঃ পশ্যত স্তস্য বৈ মুনে। বভূবাদর্শনঃ সদ্যঃ প্রদীপো নির্বতো যথা ॥ এতস্মিন্নন্তরে সোপি শুক্র স্তস্য মহাত্মনঃ। ভ্রাত যবীয়সো যজ্ঞাদাজগাম স্বমাশ্রমং ॥ তস্যাগতস্য শিষ্যো হসৌ চক্রে পাদাভিবন্দনং। গৃহীতাসন পূজশ্চ তমাহ স তদা গুরুঃ ॥ বৎসাতিহার্দ্দং ত্বয়ি মে তথান্যেষ্বপি জন্তুষু। ন বেদ্মি কিন্নিদং ত্বক্ষেদ্বৎ-নৈতৎ কথয়াশু মে ॥ ততঃ স শান্তি স্তৎ সর্ব্ব মাচার্য্যায় মহাত্মনে। অগ্নি নাশাদিকং বিপ্র সমাচষ্ট যথা তথং ॥ তৎ শ্রুত্বা স পরিষ্বজ্য স্নেহার্দ্র নয়নো গুরুঃ। শিষ্যায় প্রদদৌ বে-

দান্ সাঙ্গোপাঙ্গান্ মহাত্মনে ॥ ভৌত্যো নাম মনু স্তস্য পুত্রো ভূতে ব্রহ্মাযত । তস্য মন্বন্তরে দেবা-নৃষীন্ ভূপাংশ্চ মে শৃণু ॥ ❀ ॥ ভবিষ্যস্য ভবিষ্যাংস্ত গদতো মম বিস্তরাৎ । দেবেন্দ্রো যশ্চ ভবিতা তস্য বিখ্যাত কর্ম্মণঃ ॥ চাক্ষুষাশ্চ কনিষ্ঠাশ্চ পবিত্রা ভ্রাজিরা স্তথা । ব্রজো বৃকাশ্চ ইত্যেতে পঞ্চ দেবগণাঃ স্মৃতাঃ ॥ শুচিরিন্দ্র স্তথা তেষাং ত্রিদশানাং ভবিষ্যতি । মহাবলো মহাবীর্য্যঃ সর্ব্বৈ রিন্দ্র গুণৈর্যুতঃ ॥ অগ্নীধ্র শ্চাগ্নিবাহুশ্চ শুচির্যুক্তো হথ মাধবঃ । শুক্রো জিতশ্চ সপ্তৈতে তদা সপ্তর্যযঃ স্মৃতাঃ ॥ গুরু গভীরো বুধ্নশ্চ ভরশ্চানুগ এব চ । স্ত্রীমানী চ প্রবীরশ্চ বিষ্ণুঃ সংক্রন্দন স্তথা ॥ তেজস্বী সুবল শ্চৈব ভৌত্যস্যৈতে মনোঃ সুতাঃ । চতুর্দ্দশং ময়ৈতত্তে মন্বন্তর মুদাহৃতং ॥ ইতি মার্কণ্ডেয়পুরাণে মন্বন্তরানুবর্ণন নামাধ্যায়ঃ ॥

ভৌমঃ পুং মঙ্গলগ্রহঃ ॥ নরকরাজঃ ॥ ভূমিভবে ত্রি । ইতি মেদিনী ॥ অম্বরঃ । ইতি ধরণিঃ ॥ রক্তপুনর্নবা । ইতি রাজনির্ঘণ্টঃ ॥

ভৌমজলং ক্লী ভূমিসম্বন্ধিসলিলং । তচ্চত্রিবিধং যথা । ভৌম মম্ভো নিগদিতং প্রথমং ত্রিবিধং বুধৈঃ । জাঙ্গলং পরমানূপং ততঃ সাধারণং ক্রমাৎ ॥ তেষাং লক্ষণানি গুণাশ্চ । অল্পোদকো হল্পবৃক্ষশ্চ পিত্তরক্তাময়ান্বিতঃ । দেশো হনূপ ইতি খ্যাত আনূপং তদ্ভবং জলং ॥ মিশ্র চিহ্নস্ত যো দেশঃ সহি সাধারণঃ স্মৃতঃ । তস্মিন্ দেশে যদুদকং তত্ত সাধারণং স্মৃতং ॥ জাঙ্গলং সলিলং রুক্ষং লবণং লঘু তত্তনু । বহ্নিকৃৎ কফহৃৎ পথ্যং বিকারান্ হরুতে বহূন্ ॥ আনূপং বার্য্যভিষ্যন্দি স্বাদু স্নিগ্ধং ঘনং গুরু । বহ্নিহৃৎ কফ কৃন্নিত্যং বিকারান্ হরুতে বহূন্ ॥ সাধারণন্তু মধুরং দীপনং শীতলং লঘু ॥ তর্পণং রোচনং তৃষ্ণা দাহ দোষ ত্রয় প্রণুৎ ॥ ❀ ॥ অথ ভৌমানামেব নাদেয়াদীনাং লক্ষণানি গুণাশ্চ । তত্র নাদেয়স্য লক্ষণং গুণাশ্চ । নদ্যা নদস্য বা নীরং নাদেয় মিতি কীর্ত্তিতং । নাদেয় মুদকং রুক্ষং বাতলং লঘু দীপনং । অনভিষ্যন্দি বিশদং কটুকং কফ পিত্তনুৎ ॥ নদ্যঃ শীঘ্র বহা লঘ্বঃ সর্ব্বা যাশ্চামলোদকাঃ ॥ গুর্ব্যঃ শৈবল সংছন্না মন্দগাঃ কলুষাশ্চ যাঃ । নদী সর স্তড়াগস্থে কূপ প্রস্র-

বণাদিজে ॥ উদকে দেশ ভেদেন গুণান্ দোষাংশ্চ লক্ষয়েৎ। ইতি ভাবপ্রকাশঃ ॥
ভৌমনঃ পুং বিশ্বকর্ম্মা। ইতিপুরাণং॥
ভৌমরত্নং ক্লী প্রবালং। ইতি রাজনির্ঘণ্টঃ॥
ভৌমিকঃ ত্রি ভূম্যধিকারী। ভূমিমধিকরোতি যঃ। ইত্যর্থে ষ্ণিক প্রত্যয়েন নিষ্পন্নঃ॥
ভৌমী স্ত্রী সীতা। ইতি শব্দরত্নাবলী॥
ভৌরিকঃ পুং কনকাধ্যক্ষঃ। ইত্যমরঃ॥
ভ্যস ঙ ভয়ে। ইতি কবিকল্পদ্রুমঃ॥ অন্তঃস্থাদ্যযুক্তঃ। ঙ ভ্যসতে। ইতি দুর্গাদাসঃ॥
ভ্রুংশঃ পুং স্ত্রীবেশধারীনর্ত্তকপুরুষঃ। ইত্যমর টীকা॥
ভ্রুংসঃ পুং স্ত্রীবেশধারীনর্ত্তকপুরুষঃ। তৎপর্য্যায়ঃ। ভ্রুংসঃ ২। ভ্রুংসঃ ৩। ইত্যমরঃ॥ ভৃংসঃ ৪ ভংশঃ ৫। ইতি তট্টীকা॥
ভ্রূকুটিঃ স্ত্রী ক্রোধাদিনা ভ্রুবঃ কৌটিল্যং। ইত্যমরঃ॥ অস্যা রূপান্তরাণি। ভ্রুকুটিঃ। ভ্রূকুটিঃ। ভৃকুটিঃ ভ্রূকুটী। ভ্রুকুটী। ভ্রূকুটী। ভৃকুটী ইতি ভরতঃ॥

ভ্রণ শব্দে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ভ্রণতি। ইতিদুর্গাদাসঃ॥
ভ্রম্ . ইর চালে। ইতি কবিকল্পদ্রুমঃ॥ ইর অভ্রমৎ অভ্রমীৎ। ইতি দুর্গাদাসঃ॥
ভ্রম ভ য চালে। ইতি কবিকল্পদ্রুমঃ॥ ভ য ভ্রাম্যতি। ইতি দুর্গাদাসঃ॥
ভ্রম উ ঋ ণ চালে। ইতি কবিকল্পদ্রুমঃ॥ উ ভ্রমিত্বা ভ্রান্ত্বা। ঋ ভ্রামঃ ভ্রমঃ। জ্বলাদিত্বান্ন প্রত্যয়েপি জন বধ ইত্যাদিনা হ্রস্বে ভ্রম ইত্যেব। তেন জ্বলাদাবস্য পাঠো নিষ্ফল ইতি ধাতুপ্রদীপাদয়ঃ। বস্তুতস্তু। জ্বলাদি পাঠ সামর্থ্যান্ন হ্রস্বঃ॥ ণ ভ্রেমতুঃ বভ্রমতুঃ। য ভ্রম্যতি ভ্রমতি। চাল ইহ পাদবিহরণং। ন জানে কো হেতু ভ্রমতি বিপিনে ভিক্ষুক ইব। ভ্রেমুঃ শিলোচ্চয়ান্ ভীমানিত্যত্র গত্যর্থ বিবক্ষয়া সকর্ম্মকত্বং। ইতি দুর্গাদাসঃ॥
ভ্রমঃ পুং মিথ্যাজ্ঞানং। তৎপর্য্যায়ঃ। ভ্রান্তিঃ ২ মিথ্যামতিঃ ৩। ইত্যমরঃ॥ অম্বুনির্গমঃ॥ কুন্দঃ॥ ভ্রমণং। ইতি মেদিনী॥ *॥ ন্যায়মতে ভ্রমস্য নামান্তরং অপ্রমা ভ্রমো দ্বিবিধঃ। বিপর্য্যাসঃ সংশয়শ্চ। আদ্যো যথা। দেহে আত্মবুদ্ধিঃ।

শঙ্খাদৌ পীততা মতিঃ। সা নিশ্চয রূপা ॥ দ্বিতীয়ো যথা। কিংস্বিৎ নরো বা স্থাণুর্ব্বা ইত্যাদি বুদ্ধিঃ। তস্য কারণং। পিত্ত দূরত্ব মোহ ভযাদি নানাবিধ দোষঃ। যথা। অপ্রমা চ প্রমা চেতি জ্ঞানং দ্বিবিধ মুচ্যতে। তৎ শূন্যে তন্মতি র্যা স্যাদপ্রমা সা নিরূপিতা ॥ তৎ প্রপঞ্চো বিপর্য্যাসঃ সংশযো২পি প্রকীর্ত্তিতঃ। আদ্যো দেহে আত্ম বুদ্ধিঃ শঙ্খাদৌ পীততা মতিঃ ॥ ভবেন্নিশ্চয রূপা সা সংশযো২থ প্রদর্শ্যতে। কিংস্বিন্নরো বা স্থাণুর্ব্বেত্যাদি বুদ্ধিস্তু সংশযঃ ॥ তদভাবা প্রকারা ধী স্তৎ প্রকারা তু নিশ্চযঃ। স সংশযো ভবেদ্যা ধী রেকত্রা ভাব ভাবযোঃ ॥ সাধারণাদি ধর্ম্মস্য জ্ঞানং সংশয কারণং। দোষো২প্রমাযা জনকঃ প্রমাযাস্তু গুণো ভবেৎ ॥ পিত্ত দূরত্বাদি রূপো দোষো নানাবিধঃ স্মৃতঃ। ইতি ভাষাপরিচ্ছেদঃ ॥

ভ্রমণং ক্লী গমনবিশেষঃ। পর্য্যটনং। হস্ত্যশ্ব রথ দোলাদি দ্বারা ভ্রমণ গুণাঃ। বাত কোপনত্বং। অঙ্গস্থৈর্য্য করত্বং। বলাগ্নি বিবর্দ্ধনত্বঞ্চ। ইতি রাজবল্লভঃ ॥

ভ্রমণী স্ত্রী কারণ্ডিকা ॥ অধীশিতুঃ ক্রীড়াটব্যা। ইতি মেদিনী ॥

ভ্রমৎকুটী স্ত্রী তৃণাদিছত্রং। তৎ পর্য্যাযঃ। কাবারী ২ জঙ্গমকুটী ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

ভ্রমরঃ পুং কীটবিশেষঃ। তৎপর্য্যাযঃ। মধুব্রতঃ ১ মধুকরঃ ২ মধুলিট্ ৩ মধুপঃ ৪ অলী ৫ দ্বিরেফঃ ৬ পুষ্পলিট্ ৭ ভৃঙ্গঃ ৮ ষট্পদঃ ৯ অলিঃ ১০। ইত্যমরঃ ॥ কলালাপঃ ১১ শিলীমুখঃ ১২ পুষ্পন্ধযঃ ১৩ মধুকৃৎ ১৪ দ্বিপঃ ১৫ ভসরঃ ১৬ চঞ্চরীকঃ ১৭ সুকাণ্ডী ১৮ মধুলোলুপঃ ১৯ ইন্দিন্দিরঃ ২০ মধুমারকঃ ২১। ইতি রাজনির্ঘণ্টঃ ॥ মধুপরঃ ২২ লম্বঃ ২৩ পুষ্পকীটঃ ২৪ মধুসূদনঃ ২৫ ভৃঙ্গরাজঃ ২৬ মধুলেহী ২৭ রেণুবাসঃ ২৮। ইতি শব্দরত্নাবলী ॥ কামুকঃ। ইতি মেদিনী ॥

ভ্রমরকঃ পুং ললাটলম্বিতচূর্ণকুন্তলঃ। ইত্যমরঃ ॥ ভৃঙ্গঃ ॥ বালসূষিকঃ। ইতি মেদিনী ॥ অম্বুভ্রমঃ। ইতি বিশ্বঃ ॥

ভ্রমরকীটঃ পুং কীটবিশেষঃ। কুমুরেপোকা ইতি ভাষা। যথা। জীবমুক্তিস্তু তদ্বিদ্বান্ সর্ব্বোপাধি গুণাংস্ত্যজেৎ। সচ্চিদানন্দ ধর্ম্মত্বাদ্ভজে

ভ্রমরকীট বৎ ॥ ইত্যাত্মবোধঃ ॥

ভ্রমরচ্ছল্লী স্ত্রী লতাবিশেষঃ। তৎপর্য্যায়ঃ। ভৃঙ্গাহ্বা ২ ভ্রমরা ৩ ভৃঙ্গমূলিকা ৪। অস্যা গুণাঃ। ভৃঙ্গচ্ছল্লী চ কটুকা তিক্তা দীপন রোচনী। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরপ্রিয়ঃ পুং ধারাকদম্বঃ। ইতি রত্নমালা ॥

ভ্রমরমারী স্ত্রী মালবদেশপ্রসিদ্ধপুষ্পবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। ভ্রমরারিঃ ২ ভৃঙ্গারিঃ ৩ ভৃঙ্গমারী ৪ মাংসপুষ্পিকা ৫ দৃষ্টারিঃ ৬ ভ্রমরী ৭ যষ্টিলতা ৮। অস্যা গুণাঃ। তিক্তত্বং। পিত্ত শ্লেষ্ম জ্বর নাশিত্বং। শোফ কণ্ডূতি দুষ্ট ব্রণদোষ ত্রিদোষ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ

ভ্রমরা স্ত্রী ভ্রমরচ্ছল্লী। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরাতিথিঃ পুং চম্পকঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরানন্দঃ পুং বকুলঃ॥ অতিমুক্তকঃ॥ রক্তাম্লানঃ। ইতি রাজনির্ঘণ্টঃ

ভ্রমরালকঃ পুং ললাটস্থিতচূর্ণকুন্তলঃ। তৎপর্য্যায়ঃ। ভ্রমরকঃ ২ কুন্তলঃ ৩। ইতি হেমচন্দ্রঃ ॥

ভ্রমরী স্ত্রী জতুকা ॥ পুত্রদাত্রী ॥ ষট্পদী। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরেষ্টঃ পুং শ্যোনাকপ্রভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরেষ্টা স্ত্রী ভার্গী ॥ ভূমিজম্বূঃ। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমরোৎসবা স্ত্রী মাধবী। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রমাসক্তঃ পুং শস্ত্রমার্জ্জকঃ। ইতি হেমচন্দ্রঃ ॥

ভ্রমিঃ স্ত্রী ভ্রমণং। তৎপর্য্যায়ঃ। ভ্রমঃ ২। ইত্যমরঃ॥ ভ্রমী ৩। ইতি ভরতঃ ॥

ভ্রমী ত্রি ভ্রমবিশিষ্টঃ। ভ্রমো বিদ্যতে অস্যেতি অস্ত্যর্থে ইন্প্রত্যয়েন নিষ্পন্নঃ ॥

ভ্রুশ য উ অধঃপতনে। ইতি কবিকল্পদ্রুমঃ॥ য ভ্রুশ্যতি। উ ভ্রংশিত্বা ভ্রষ্ট্বা। ইতি দুর্গাদাসঃ ॥

ভ্রষ্টং ত্রি চ্যুতং। অস্যপর্য্যায়াগমিত্ত শব্দে দ্রষ্টব্যাঃ ॥ ❀ ॥ অথাভ্রষ্টস্তীর্থযাত্রাস্তু গচ্ছেৎ সত্যাদ্ভ্রষ্টো রৌরবং বৈ ব্রজেচ্চ। যোগভ্রষ্টঃ সত্যধৃতিঞ্চ গচ্ছেৎ রাজ্যাদ্ভ্রষ্টো মৃগয়াং বৈ ব্রজেচ্চ ॥ ইতি গারুড়ে নীতিসারে ১০৯ অধ্যায়ঃ ॥

ভ্রস্জ ঔ এ শ পাকে। ইতি কবিকল্পদ্রুমঃ ॥ রেফযুক্তাদি দন্ত্যোপধঃ। ক্বিপি সংযোগাদি লোপে ভৃট্।

পাক ইহ ভর্জন। এ শ ভৃজ্জতি ভৃজ্জতে মৎস্যং সূপকারঃ। ঔ অভ্রাক্ষীৎ। ইতি দুর্গাদাসঃ॥

ভ্রাজ ঙ ণ ঋটু ভাসি। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ঙ ভ্রাজতে ণ ভ্রেজে ব ভ্রাজে। অনুবন্ধ বলাৎ সংযোগাদিত্বেপ্যাকারস্যাপ্যেত্বং। ঋ অবিভ্রজৎ অবভ্রাজৎ। টু ভ্রাজথুঃ। ইতি দুর্গাদাসঃ॥

ভ্রাজকং ক্লী পিত্তং। ইতি শব্দচন্দ্রিকা॥

ভ্রাজিষ্ণুঃ ত্রি অলঙ্কারাদিনাদীপ্তিযুক্তঃ। ইত্যমরঃ॥ বিষ্ণৌ পুং। যথা। ভ্রাজিষ্ণু র্ভোজনং ভোক্তা সহিষ্ণু র্জগদাদিজঃ। ইতি তস্য সহস্রনামস্তং॥

ভ্রাতরৌ পুং ভ্রাতৃভগিন্যৌ। নিত্য-দ্বিবচনান্তো২য়ং। ইত্যমরঃ॥

ভ্রাতা পুং একগর্ভজাতঃ। ভাই ইতি ভাষা। তৎপর্য্যায়ঃ। সহোদরঃ২ সমানোদর্য্যঃ৩ সোদর্য্যঃ৪ সগর্ভঃ ৫ সহজঃ৬ সোদরঃ৭। ইতি হেমচন্দ্রঃ॥ পিতরি মৃতে জ্যেষ্ঠ ভ্রাতুঃ পিতৃতুল্যত্বং যথা। জ্যেষ্ঠো ভ্রাতা পিতাতুল্যো মৃতে পিতরি শৌনক। সর্বেষাং স পিতা হি স্যাৎ সর্বেষা মনুপালকঃ॥ কনিষ্ঠ স্তেষু সর্বেষু সমত্বেনানুবর্ত্ততে। সমোপভোগ জীবেষু যথৈব তনয স্তথা॥ ইতি গারুড়ে ১১৪ অধ্যায়ঃ॥ * ॥ তস্য ভার্য্যা হরণে তস্মৈ দায়াদানে চ দোষো যথা। ভ্রাতৃজায়াপহারী চ মাতৃগামী ভবেন্নরঃ। তস্মাদুর্ব্বীর্য্য পাপী চ বিষ্ঠায়াং জায়তে কৃমিঃ॥ বর্ষকোটি সহস্রাণি তত্র স্থিত্বা চ পাতকী। ততো ভবেন্মহা পাপী বর্ষ কোটি সহস্রকং॥ পুংশ্চলী যোনি গর্ভে চ কৃমিশ্চৈব পুরন্দর। গৃধ্রঃ কোটি সহস্রাণি শতজন্মানি শূকরঃ॥ ভ্রাতৃজায়াপহরণাৎ শতজন্মানি শূকরঃ। * ॥ যো দদাতি ন দায়ঞ্চ বলিষ্ঠো দুর্ব্বলায় চ। স যাতি কুম্ভীপাকঞ্চ যাবচ্চন্দ্র দিবাকরৌ॥ নাভুক্তং ক্ষীয়তে কর্ম্ম কল্পকোটি শতৈরপি। অবশ্য মেব ভোক্তব্যং কৃতং কর্ম্ম শুভাশুভং॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫৬ অধ্যায়ঃ॥ * ॥ ভ্রাতুরন্বেষণে ভ্রাতা ন গচ্ছেৎ। যথা। নারদ উবাচ। হে হর্য্যশ্বা মহাবীর্য্যাঃ প্রজা যূয়ং করিষ্যথ। ঈদৃশো লক্ষ্যতে যত্নো ভবতাং শ্রূয়তা মিদং॥ বালিশা বত যূয়ং যেনাস্যা জানীত বৈ ভবঃ। অন্ত রূর্দ্ধং মধ শ্চৈব কথং স্রক্ষ্যথ বৈ প্রজাঃ॥ ঊর্দ্ধং তির্য্য-

গন্ধৈশ্চৈব যদাপ্রতিহতা গতিঃ। তদা কস্মাদ্ভুবো নান্তং সর্ব্বে দ্রক্ষ্যথ বালিশাঃ॥ তে তু তদ্বচনং শ্রুত্বা প্রযাতাঃ সর্ব্বতো দিশং। অদ্যাপি ন নিবর্ত্তন্তে সমুদ্রেভ্য ইবাপগাঃ॥ হর্য্যশ্বেম্বথ নষ্টেষু দক্ষঃ প্রাচেতসঃ পুনঃ। বৈরিণ্যামথ পুত্রাণাং সহস্রমসৃজদ্বিভুঃ॥ বিবর্দ্ধযিষব স্তে তু সবলাশ্বাঃ প্রজাঃ পুনঃ। পূর্ব্বোক্তং বচনং ব্রহ্মন্নারদেন প্রচোদিতাঃ॥ অন্যোন্য মূচুস্তে সর্ব্বে সম্যগাহ মহামুনিঃ। ভ্রাতৄণাং পদবী চৈব গন্তব্যা নাত্র সংশয়ঃ॥ জ্ঞাত্বা প্রমাণং পৃথ্ব্যাস্তু প্রজাঃ স্রক্ষ্যামহে পুনঃ। তেপি তেনৈব মার্গেণ প্রযাতাঃ সর্ব্বতো দিশং॥ অদ্যাপি ন নিবর্ত্তন্তে সমুদ্রেভ্য ইবাপগাঃ। ততঃ প্রভৃতি বৈ ভ্রাতা ভ্রাতুরন্বেষণে দ্বিজ॥ প্রযাতো নশ্যতি তথা তন্নকার্য্যং বিজানতা। ইতি বিষ্ণুপুরাণে ১ অংশে ১৫ অধ্যায়ঃ॥ *॥ অপিচ। ততঃ প্রভৃতি ন ভ্রাতুঃ কনীয়ান্ মার্গমিচ্ছতি। অন্বিষন্ দুঃখ মাপ্নোতি তেন তং পরিবর্জয়েৎ॥ ইতি মাৎস্যে ৫ অধ্যায়ঃ॥ *॥ জ্যেষ্ঠ ভ্রাত্রাদে র্গুরুত্বং যথা। উপাধ্যায়ঃ পিতা জ্যেষ্ঠো ভ্রাতা চৈব মহীপতিঃ। মাতুলঃ শ্বশুর স্ত্রাতা মাতামহ পিতামহৌ॥ বন্ধু র্জ্যেষ্ঠঃ পিতৃব্যশ্চ পুংস্যেতে গুরবঃ স্মৃতাঃ। ইতি কৌর্ম্মে উপরিভাগে ১১ অধ্যায়ঃ॥ *॥ বিভক্তানাং তেষাং ধর্ম্ম বৃদ্ধি র্যথা। ব্যাসঃ। ভ্রাতৄণাং জীবতোঃ পিত্রোঃ সহবাসো বিধীযতে। তদভাবে বিভক্তানাং ধর্ম্ম স্তেষাং বিবর্দ্ধতে॥ ভ্রাতৄণাং যস্তু নেহেত ধনং শক্তঃ স্বকর্ম্মণা। স নির্ভাজ্যঃ স্বকাদংশাৎ কিঞ্চিদ্দত্ত্বোপজীবনং॥ *॥ জ্যেষ্ঠ ভ্রাতৃ প্রশংসা যথা। বিভৃযাদ্বেচ্ছতঃ সর্ব্বান্ জ্যেষ্ঠো ভ্রাতা যথা পিতা। ভ্রাতা শক্তঃ কনিষ্ঠো বা শক্ত্যপেক্ষা জলে স্থিতিঃ॥ কুটুম্বার্থেষু চোদ্যুক্ত স্তৎ কার্য্যং কুরুতে তু যঃ। স ভ্রাতৃভি র্বৃংহণীযো গ্রাসাচ্ছাদন বাহনৈঃ॥ অন্যোন্য ভেদো ভ্রাতৄণাং সুহৃদাং বা বলান্তক। ভবত্যা নন্দকৃদ্দেব দ্বিষতাং নাত্র সংশয়ঃ॥ *॥ ভ্রাতৃ সংস্কারস্যাবশ্যকত্বং যথা। নারদঃ। যেষান্তু ন কৃতাঃ পিত্রা সংস্কার বিধযঃ ক্রমাৎ। কর্ত্তব্যা ভ্রাতৃভি স্তেষাং পৈতৃকাদেব তদ্ধনাৎ॥ অবিদ্যমানে পিত্রর্থে স্বাংশাদুদ্ধৃত্য বা পুনঃ। অবশ্য কার্য্যাঃ সংস্কারা ভ্রাতৃভিঃ পূর্ব্ব সংস্কৃতৈঃ॥ *॥ বিভক্তানাং তেষাং সাক্ষিত্বাদি যথা।

সাক্ষিত্বং প্রাতিভাব্যঞ্চ দানং গ্র হণমেব চ। বিভক্তা ভ্রাতরঃ কুর্য্যুর্নাবিভক্তাঃ পরস্পরং ॥ ইতি দায়তত্ত্বং ॥

ভ্রাতৃকঃ ত্রি ভ্রাতৃযোগ্যঃ। ইতি সিদ্ধান্তকৌমুদী ॥

ভ্রাতৃজঃ পুং স্ত্রী ভ্রাতুরপত্যং। তৎপর্য্যায়ঃ। ভ্রাত্রীয়ঃ ২। ইত্যমরঃ ॥ ভ্রাতৃব্যঃ ৩ ভ্রাতৃপুত্রঃ ৪। ইতি শব্দরত্নাবলী ॥

ভ্রাতৃজায়া স্ত্রী ভ্রাতৃভার্য্যা। তৎপর্য্যায়ঃ। প্রজাবতী ২। ইত্যমরঃ ॥

ভ্রাতৃপত্নী স্ত্রী ভ্রাতৃজায়া। ইতি শব্দরত্নাবলী ॥

ভ্রাতৃপুত্রঃ পুং স্ত্রী ভ্রাতৃজঃ। ভাইপো ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

ভ্রাতৃভগিন্যৌ স্ত্রী ভ্রাতরৌ। দ্বিবচনান্তোয়ং। ইত্যমরঃ ॥

ভ্রাতৃব্যঃ পুং ভ্রাতৃপুত্রঃ ॥ শত্রুঃ। ইতি হেমচন্দ্রঃ ॥

ভ্রাতৃশ্বশুরঃ পুং পতিজ্যেষ্ঠভ্রাতা। ভাশুর ইতি ভাষা। তৎপর্য্যায়ঃ। শ্বশুরকঃ ২। ইতি শব্দরত্নাবলী ॥ ভ্রাতুঃপত্ন্যাঃ পিতা চ ॥

ভ্রাত্রীয়ঃ পুং ভ্রাতৃপুত্রঃ। ইত্যমরঃ ॥ ভ্রাতৃসম্বন্ধিনি ত্রি ॥

ভ্রান্তঃ ত্রি ভ্রমণযুক্তঃ ॥ ভ্রান্তিবিশিষ্টঃ। ভ্রমধাতোঃ কর্ত্তরি ক্ত প্রত্যয়েন নিষ্পন্নঃ ॥ ভ্রমণে ক্লী। যথা। ভ্রান্ত দেশ মনেক দুর্গবিষমং প্রাপ্তং ন কিঞ্চিৎ ফলং। ইতি বাভট পশুপতিভ্যাং ব্যাখ্যাতং ॥

ভ্রান্তঃ পুং রাজধুস্তূরঃ ॥ মত্তহস্তী। ইতি রাজনির্ঘণ্টঃ ॥

ভ্রান্তিঃ স্ত্রী ভ্রমঃ। ইত্যমরঃ ॥ সা তু নরাণাং ষষ্ঠমাসে জায়তে। যথা। ষাণ্মাসিকে তু সংপ্রাপ্তে ভ্রান্তিঃ সংজায়তে যতঃ। ধাত্রাক্ষরাণি সৃষ্টানি পত্রারূঢান্যতঃ পুরা ॥ ইতি জ্যোতিস্তত্ত্বং ॥ ভ্রমণং। ইতি মেদিনী ॥ অনবস্থিতিঃ। ইতি বিশ্বঃ ॥

ভ্রান্তিহরঃ পুং মন্ত্রী। ইতি শব্দমালা ॥ ভ্রমনাশকে ত্রি ॥

ভ্রামকঃ পুং শৃগালঃ ॥ ধূর্ত্তঃ ॥ সূর্য্যাবর্ত্তঃ ॥ প্রস্তরভেদঃ। চুম্বকপাতর ইতি ভাষা। ইতি মেদিনী ॥ ভ্রমজনকে ত্রি ॥

ভ্রামরং ক্লী মধু। ইতি মেদিনী ॥ তত্তু ভ্রমরজমধু। তস্য গুণাঃ। পিচ্ছিলত্বং। রুক্ষত্বং। মধুরত্বং। মুখজাড্যনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। পৈচ্ছিল্যাৎ স্বাদু ভূয়স্ত্বাৎ ভ্রামরং গুরু কীর্ত্তিতং। ইতি রাজবল্লভঃ ॥ অন্যচ। কিঞ্চিৎ

সুগন্ধঃ প্রসিদ্ধেভ্যঃ পুষ্পেভ্যোহনিভির্বিচিতং। নির্ম্মলং স্ফটিকাভং যত্তন্মধু ভ্রামরং স্মৃতং॥ ভ্রামরং রক্তপিত্তঘ্নং মূত্রজাড্যকরং গুরু। স্বাদুপাকমভিষ্যন্দি বিশেষাৎ পিচ্ছিলং হিমং॥ ইতি ভাবপ্রকাশঃ॥ নৃত্যবিশেষঃ। তৎপর্য্যায়ঃ। রাসঃ২ মণ্ডলনৃত্যং৩ হল্লীসং৪। ইতি শব্দমালা॥ ভ্রমর সম্বন্ধিনি ত্রি। যথা। তদাহং ভ্রামরং রূপং কৃত্বা সংখ্যেয়ষট্পদং। ইতি দেবীমাহাত্ম্যং॥

ভ্রামরঃ পুং প্রস্তরভেদঃ। চুম্বকপাতর ইতি ভাষা। ইতি মেদিনী॥

ভ্রামরী স্ত্রী পার্ব্বতী। ইতি ত্রিকাণ্ডশেষঃ॥ অপিচ। যদারুণাক্ষস্ত্রৈলোক্যে মহাবাধাং করিষ্যতি। তদাহং ভ্রামরং রূপং কৃত্বা সংখ্যেয় ষট্পদং॥ ত্রৈলোক্যস্য হিতার্থায় বধিষ্যামি মহাসুরং। ভ্রামরীতি চ মাং লোকা স্তদা স্তোষ্যন্তি সর্ব্বতঃ॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যে নারায়ণীস্তুতিঃ॥

ভ্রাশ ঋ ঙ ণ টু ⎫ ভাসি। ইতি কবি
ভ্রাশ য ঙ ⎭ কল্পদ্রুমঃ॥ য ঙ ভ্রাশ্যতে। ঋ অবভ্রাশৎ। স্বমতে অনাদেশ্ঠ্যাঙি ভ্রস্ব বিকল্পনেপি সপ্তম স্বরানুবন্ধো হন্যেষা মনুরোধাৎ। ণ ভ্রেশে বভ্রাশে। টু ভ্রাশথুঃ। ঙ ভ্রাশতে। ভাসি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

ভ্রাষ্ট্রং ক্লী আকাশং॥ অম্বরীষং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

ভ্রাষ্ট্রঃ পুং যত্র কলায চণকাদিকং ভৃজ্যতে সঃ। ভাজনাখোলা ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। অম্বরীষং২। ইত্যমরঃ॥

ভ্রাস য ঙ ⎫ ভাসি। ইতি কবি
ভ্রাস ঋ ঙ ণ টু ⎭ কল্পদ্রুমঃ॥ য ঙ ভ্রাস্যতে। ঙ ভ্রাসতে। ঋ অবভ্রাসৎ। ণ ভ্রেসে বভ্রাসে। টু ভ্রাসথুঃ। ইতি দুর্গাদাসঃ॥

ভ্রূকুংসঃ পুং স্ত্রীবেশধারিনর্ত্তকপুরুষঃ। ইত্যমরঃ॥

ভ্রূকুটিঃ ⎫ স্ত্রী ক্রোধাদিনা ভ্রুবঃ কৌ-
ভ্রূকুটী ⎭ টিল্যং। ইত্যমরঃ॥

ভ্রূঃ স্ত্রী দৃগ্যোমূর্দ্ধভাগঃ। তৎপর্য্যায়ঃ। চিল্লিকা ২ নয়নোর্দ্ধভাগরোমরাজী ৩। ইতি রাজনির্ঘণ্টঃ॥ তল্লক্ষণং যথা। বিশালোন্নতা সুখিনি দরিদ্রা বিষম ভ্রুবঃ। ধনী দীর্ঘা সংসক্ত ভ্রূ বালেন্দুন্নত সদ্ভ্রুবঃ। আঢ্যা নিম্নশ্চ খণ্ডভ্রূর্মধ্যাশ্চ বিনত ভ্রুবঃ। ইতি গারুড়ে ৬৬ অধ্যায়ঃ॥ ক্ষ॥ অত্র ষট্চক্রান্তর্গতাজ্ঞাখ্য চক্র

স্তি। তত্র হ ক্ষ বর্ণ দ্বয় যুক্ত দ্বি দল পদ্মাকারং। তন্মধ্যে মন স্তিষ্ঠতি। যথা। আজ্ঞানামাম্বুজং তদ্ধিমকর সদৃশং ধ্যান ধাম প্রকাশং হক্ষাভ্যাং বৈ কলাভ্যাং পুবিলসিত বপু র্নেত্র পত্রং সুশুভ্রং। তন্মধ্যে হাকিনী সা শশিসম ধবলা বক্ত্র ষট্কং দধানা বিদ্যাং মুদ্রাং কপালং ডমরু জপবটীং বিভ্রতী শুদ্ধ চিত্তা।। এতৎ পদ্মান্তরালে নিবসতি চ মনঃ সূক্ষ্মরূপং প্রসিদ্ধং। ইতি শ্রীতত্ত্বচিন্তামণৌষষ্ঠপ্রকাশঃ।।

ভ্রূকুংসঃ পুং স্ত্রীবেশধারিনর্ত্তকপুরুষঃ। ইত্যমরঃ।।

ভ্রূকুটিঃ স্ত্রী ক্রোধাদিনা ভ্রুবঃকৌটিল্যং। ইত্যমরঃ।।

ভ্রূণ কও আশা বিশঙ্কযোঃ। ইতি কবিকল্পদ্রুমঃ।। রেফযুক্ত ষষ্ঠস্বরী। ক ও ভ্রূণযতে ভদ্রং লোকঃ আশা বিষযং করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ।।

ভ্রূণঃ পুং বালকঃ।। স্ত্রীগর্ভঃ। ইত্যমরঃ।।*।।অথ গর্ভাধান দিনং। রজো দর্শনাবধি ষোড়শদিন পর্য্যন্তং ঋতুকালঃ। তত্রাদ্যাশ্চিতস্রো নিশাঃ পরিত্যজ্য চতুর্দ্দশ্যষ্টমী অমাবাস্যা পূর্ণিমা সূর্য্যসংক্রান্তিঃ পর্ব্বাণ্যেতানি পরিত্যজ্য চ অন্যাস রাত্রিষু চন্দ্রাদি শোভনে কালে ভার্য্যা মুপগচ্ছেৎ। যুগ্মরাত্রিষু গমনে পুত্রো ভবেৎ। অযুগ্মরাত্রিষু গমনে কন্যা ভবেৎ। তত্র প্রশস্ত নক্ষত্রাণি পুষ্যঃ হস্তা মৃগশিরা আর্দ্রা পুনর্ব্বসুঃ পূর্ব্বাষাঢ়া উত্তরাষাঢ়া শ্রবণা পূর্ব্ব ভাদ্রপদুত্তর ভাদ্রপৎ। তত্র নিষিদ্ধ নক্ষত্রাণি জ্যেষ্ঠাশ্লেষা মঘা মূলো রেবতী কৃত্তিকাশ্বিনী উত্তরফল্গুনী। তত্র তিথযঃ নন্দা ভদ্রাঃ প্রশস্তাঃ। রিক্তা নিষিদ্ধাঃ। তত্র রবি মঙ্গল বৃহস্পতি বারাঃ প্রশস্তাঃ। ইতি সমযপ্রদীপঃ।।

ভ্রূণহত্যা স্ত্রী গর্ব্ভস্থবালকহননং। যথা। ত্রি বিবাহং কৃতং যেন ন করোতি চতুর্থকং। কুলানি পাতযেৎ সপ্ত ভ্রূণহত্যা ব্রতঞ্চরেৎ। ইত্যুদ্বাহতত্ত্বং।।

ভ্রূণহা ত্রি গর্ব্ভস্থবালকহন্তা। ভ্রূণং হন্তি ইতি ভ্রূণশব্দোপপদ হনধাতো ক্বিপ্রত্যযেন নিষ্পন্নঃ। ইতি সংক্ষিপ্তসারব্যাকরণং।। তস্য প্রাযশ্চিত্তং। তত্র পুংস্ত্বেন জ্ঞাতে পুংবধ প্রাযশ্চিত্তং স্ত্রীত্বেন জ্ঞাতে স্ত্রীবধ প্রাযশ্চিত্তং। অবিজ্ঞাতে তু পুংবধ প্রাযশ্চিত্ত মাহ মনুঃ। হত্বা গ

ভ্রূণবিজ্ঞাত মেতদেব ব্রতঞ্চরেৎ। গর্ভহা চ যথা বর্ণং তথাত্রেয়ীনিসূদনঃ ॥ ইতি প্রায়শ্চিত্তবিবেকঃ ॥

ভ্রূভঙ্গঃ পুং ভ্রুবঃকৌটিল্যং। যথা। ক্ষুদ্রাঃ সন্ত্রাসমেতে বিজহত হরয়ো ভিন্নশক্রেভ কুম্ভা যুষ্মদ্দেহেষু লজ্জাং দধতি পরমমী শায়কা নিষ্পতন্তঃ। সৌমিত্রে তিষ্ঠ পাত্রং ত্বমপি নহি রুষাং নন্বহং মেঘনাদঃ কিঞ্চিদ্ভ্রূভঙ্গ লীলা নিয়মিত জলধিং রামমন্বেষয়ামি ॥ ইতি কাব্যপ্রকাশঃ ॥

ভ্রেজ ঋ ঙ ভাসি। ইতি কবিকল্পদ্রুমঃ ॥ রেফযুক্তঃ। ঋ অবিভ্রেজৎ। ঙ বিভ্রেজে। ইতি দুর্গাদাসঃ ॥

ভ্রেষ ঋ ঞ চলে ॥ ভয়ে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তঃ। ঋ অবিভ্রেষৎ। ঞ ভ্রেষতি ভ্রেষতে ধর্ম্মাৎ খলঃ। বিভ্রেষে। ইতি দুর্গাদাসঃ ॥

ভ্রেষঃ পুং যথোচিতাদ্ভ্রংশঃ। ইত্যমরঃ ॥ চলনং। ইতি ভ্রেষধাত্বর্থ দর্শনাৎ ॥

ভ্রেষণং ক্লী চলনং। ইতি ভ্রেষধাতো র্ভাবে ল্যুট্ প্রত্যয়েন নিষ্পন্নং ॥

ভ্লক্ষ ঞ ভক্ষণে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তঃস্থতৃতীয়োপধঃ। ঞ ভ্লক্ষতি ভ্লক্ষতে। ল স্থানে সপ্তমস্বর ইতি দুর্গসিংহঃ। ইতি দুর্গাদাসঃ ॥

## ম

ম মকারঃ। স তু পঞ্চবিংশতিতম ব্যঞ্জন বর্ণঃ। অস্যোচ্চারণ স্থানমোষ্ঠঃ। ইতি ব্যাকরণং॥ অস্য স্বরূপং যথা। মকারং শৃণু চার্ব্বঙ্গি স্বয়ং পরম কুণ্ডলী। তরুণাদিত্যসঙ্কাশং চতুর্ব্বর্গ প্রদায়কং ॥ পঞ্চদেবময়ং বর্ণং পঞ্চপ্রাণময়ং সদা। ইতি কামধেনুতন্ত্রং ॥ ৯ ॥ অস্য লেখন প্রকারঃ। ঊর্দ্ধাধঃ ক্রমতো রেখা চতুষ্কোণময়ী শুভা। নারায়ণেশ্বিধয়স্তাসু তিষ্ঠন্তি নিত্যশঃ ॥ মাত্রা কুণ্ডলিনী জ্ঞেয়া ধ্যানমস্য প্রচক্ষ্যতে। ইতি বর্ণোদ্ধারতন্ত্রং ॥ তস্য নামানি। মঃ কালী ক্লেশিতঃ কালো মহাকালো মহান্তকঃ। বৈকুণ্ঠো বসুধা চন্দ্রী রবিঃ পুরুষরাজকঃ ॥ কালভদ্রো জয়া মেধা বিশ্বদা দীপ্তসংজ্ঞকঃ। জঠরঞ্চ ভ্রমা মানং লক্ষ্মী মাতোপ্রবন্ধনৌ ॥ বিষং শিবো মহাবীরঃ শশিপ্রভা জনেশ্বরঃ। পুনস্তঃ প্রিয়সূক্ষ্মঃ সর্ব্বাঙ্গো বহ্নিমণ্ডলং ॥ মাতৃকামালিনী বিন্দুঃ শ্রবণা ভরথো বিষৎ ॥ ৩৬ ॥ ইতি তন্ত্রোক্ত বর্ণাভিধানং ॥

ঙ্গঃ পুং শিবঃ ॥ চন্দ্রমাঃ ॥ ব্রহ্মা । ইত্যেকাক্ষরকোষঃ ॥ যমঃ ॥ সময়ঃ ॥ বিষং ॥ মধুসূদনঃ । ইতি মেদিনী ॥

মক ই উ ভূষে ॥ গতৌ । ইতি কবিকল্পদ্রুমঃ ॥ ই মঙ্ক্যতে । উ মঙ্ক্তে হারো জনং । গত্যর্থো ঽপ্যয় [illegible] রামঃ । ইতি দুর্গাদাসঃ ॥

[illegible] জলজন্তুবিশেষঃ। ইত্যমরঃ । [illegible] ইতি গঙ্গায়া বাহনত্বেন [illegible] কিন্নর সুন্দরী ॥ যথা । [illegible] শুভ্রবর্ণাং ত্রিনে [illegible] যুক্ত গঙ্গা ধ্যানং॥ স চ কামদেবস্য ধ্বজচিহ্নং । মকরধ্বজ ইত্যমরকোষ দর্শনাৎ ॥ মেষাদি দ্বাদশ রাশ্যন্তর্গত দশম রাশিঃ॥ তৎপর্য্যায়ঃ । আকোকেরঃ ২ । অস্যাধিষ্ঠাতৃদেবতা নৃগান্য মকরঃ। উত্তরাষাঢাযাঃ শেষপাদত্রয়ং শ্রবণা সমুদায়ঃ ধনিষ্ঠায়াঃ পূর্ব্বার্দ্ধং এতন্নবপাদেন ভবতি । স চ পৃষ্ঠোদয়ঃ ভূমিরাশিঃ অর্দ্ধশব্দকরঃ দক্ষিণ দিক্ স্বামী পিঙ্গলবর্ণঃ রুক্ষঃ ভূমিচারী শীতলস্বভাবঃ অল্পসন্তানঃ অল্পস্ত্রীসঙ্গঃ বাতপ্রকৃতিঃ বৈশ্যবর্ণঃ শ্লথাঙ্গশ্চ । অত্র জাতস্য ফলং । সদানন্দঃ । পিতৃমাতৃভক্তঃ । শ্রবণা মকর জাতশ্চেৎ বহু বিবাহঃ । ইতি জাতকাদযঃ ॥ * ॥ অথ রবিযুক্ত মকর জাত ফলং । সদাটনো মিত্রগণো বিপক্ষতাং প্রযাতি নূনং ধন বর্জিতঃ স্যাৎ । যদ্যক্ষরশ্মির্মকরোপগঃ স্যাৎ প্রসূতিকালে স তু ভাগ্যহীনঃ ॥ * ॥ অথ চন্দ্রযুক্ত মকর জাত ফলং । কলিত শীতভয়ঃ কিল গীতবিত্তম কৃষা সহিতো মদনাতুরঃ । নিজকুলোত্তম বৃত্তিকরঃ পরং হিমকরে মকরে পুরুষো ভবেৎ ॥ * ॥ অথ মঙ্গল যুক্ত মকর জাত ফলং । পরাক্রম প্রাপ্ত বরঃ প্রতিষ্ঠঃ সদঙ্গনা প্রাপ্তি বরাঙ্গনঃ স্যাৎ । শ্রিযা সমেতো মকরে মহীজে প্রসূতিকালে জলপালকশ্চ ॥ * ॥ অথ বুধগৃহ স্থিত মকর জাত ফলং । রিপুভয়েন যুতঃ জনতি নরঃ স্মর বিহীন নরঃ পর কর্ম্মঠঃ । মকরগে সতি শীতকরাত্মজে ব্যসনতঃ স নতঃ পুরুষো ভবেৎ ॥ * ॥ অথ গুর্ব্বাশ্রিত মকর জাত ফলং । ন মনোরথ সিদ্ধি মুপৈতি নরো বচসা নধিপে মকরোপগতে । ভয যুক্ জনতিঃ পর কর্ম্মরতো বহুতোষ যুতো মদনাপহতঃ ॥ * ॥ অথ শুক্রাশ্রিত মকর জাত ফলং । অতি রতি র্জননে

ত্বজনে নৃণাং ব্যয়ভয়ং কৃশতা বহু চিন্তয়া। ভৃগুসুতে মৃগরাশিগতে সদা কবিজনে বিজনেপি মতির্ভবেৎ ॥ ✱ ॥ অথ শনিগৃহ স্থিত মকর জাত ফলং। মকরোপগতঃ খলু ভানুসুতঃ কৃপয়া সহিতো নৃপ মান যুতঃ। বর গন্ধ বিভূষণ ভূষিত গাত্র স্তরুণী রমণঃ পঙ্কজনেত্রঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

মকরঙ্গুলং ক্লী মকরাকৃতিকর্ণভূষণং। যথা। বনমালা নিবীতাঙ্গো লসৎ শ্রীবৎস কৌস্তুভঃ। মহা-কিরীট কটকঃ স্ফুরন্মকরঙ্গুলঃ ॥ ইতিশ্রীভাগবতে ৬ স্কন্ধে ৪ অধ্যায়ঃ ॥ স্ফুরতী মকরঙ্গুলে যস্য সঃ। ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

মকরকেতনঃ পুং কন্দর্পঃ। ইতি মীনকেতন শব্দ টীকায়াং ভরতেন সঙ্কেতিতং ॥

মকরধ্বজঃ পুং কামদেবঃ। ইত্যমরঃ ॥ রসসিন্দূরবিশেষঃ। তস্য নামান্তরং চন্দ্রোদয়ঃ। তস্য করণ প্রকারো যথা। পলং মৃদু স্বর্ণ দলং রসেন্দ্রং পলাষ্টকং ষোড়শ গন্ধকস্য। শোণৈঃ সুকার্পাস ভব প্রসূনৈঃ সর্ব্বং বিমর্দ্দ্যাথ কুমারিকাদ্ভিঃ ॥ তৎ কাচ কুম্ভে নিহিতং সুগাঢে মৃৎকর্প টৈ স্তদ্দিবসত্রয়ঞ্চ। পচেৎ ক্রমাগ্নৌ সিকতাখ্য যন্ত্রে ততো রজঃ পল্লব রাগ রম্যং ॥ নিগৃহ্য চৈতস্য পলং পলানি চত্বারি কর্পূর রজ স্তথৈব। জাতীফলং সোষণ মিন্দুপুষ্পং কস্তূরিকায়া ইহ শাণ একঃ ॥ চন্দ্রোদয়ো হ্যং কথিতো হস্য মাষো ভুক্তো হহিবল্লী দল মধ্যবর্ত্তী। ✱। অস্য গুণাঃ। মদোম্মদানাং প্রমদা শতানাং গর্ব্বাধিকত্বং শ্লথয়ত্যকাণ্ডে ॥ ঘৃতং ঘনীভূত মতীব দুগ্ধং মৃদূনি মাংসানি সমণ্ডকানি। মাংসানি মিষ্টানি ভবন্তি পথ্যমানন্দদায়ীন্যপরাণি চাত্র ॥ বলী পলিত্ত নাশন স্তনুভৃতাং বয়স্তম্ভনঃ সমস্ত গদ খণ্ডনঃ প্রচুর যোগ পঞ্চাননঃ। গৃহেষু রসরাড়য়ং ভবতি যস্য চন্দ্রোদয়ঃ স পঞ্চশর দর্পিতো মৃগদৃশাং ভবেদ্বল্লভঃ ॥ ইন্দুপুষ্পং লবঙ্গং। উক্ত পরিমাণ লক্ষণ মুপলক্ষণং। দাক্ষিণাত্যাঃ শোণ কার্পাস পুষ্পদ্রব মেব গৃহ্ন্তি। পাশ্চাত্যাঃ নির্ দ্রুতং পুষ্পৈনৈব যাবদাদ্রত্বং মর্দ্দয়ন্তি। উভয়থৈব নিষ্পত্তে রদোষঃ। তথৈবেতি সর্ব্বত্রান্বয়ঃ। ✱। শাস্ত্রান্তরাদ্বিশেষো লিখ্যতে। রতি কালে রতান্তে চ পুনঃ সেব্যো রসোত্তমঃ।

স্থাবরং জঙ্গম বিষং জঙ্গমং বিষ বারি বা। ন বিকারায ভবতি সাধকেন্দ্রস্য বৎসরান্ ॥ মৃত্যুঞ্জয়ো যথাভ্যাসাৎ মৃত্যুং জযতি দেহিনঃ। তথাযং সাধকেন্দ্রস্য জরা মরণ নাশনঃ ॥ শাস্ত্রান্তরে মকরধ্বজো নাম। ইতি চন্দ্রোদযঃ। ইতি রসেন্দ্রচিন্তামণিঃ ॥

মকরন্দঃ পুং পুষ্পরসঃ। ইত্যমরঃ ॥ কুন্দপুষ্পবৃক্ষঃ ॥ কিঞ্জল্কে ক্লী। ইতি রাজনির্ঘণ্টঃ ॥

মকরন্দবতী স্ত্রী পাটলাপুষ্পং। ইতি শব্দচন্দ্রিকা ॥ মধুবিশিষ্টা চ ॥

মকরব্যূহঃ পুং মকরাকারসৈন্যবিন্যাসঃ। ইতি মহাভারতং ॥

মকরাকরঃ পুং সমুদ্রঃ। ইতি হেমচন্দ্রঃ ॥

মকরাকারঃ পুং ষড়গ্রন্থঃ। কাঁটাকরঞ্জ ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥ মকরমৎস্যাকৃতিশ্চ ॥

মকরাঙ্কঃ পুং কামদেবঃ ॥ সমুদ্রঃ। ইত্যজযপালঃ ॥

মকরালযঃ পুং সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মকরী ন পুং সমুদ্রঃ। মকরো ঽস্যাস্তীতি ব্যুৎপত্ত্যা ইন প্রত্যয নিষ্পন্নো ঽযং ॥

মঙ্গটং ক্লী মুঙ্গটং। ইতি ভরতধৃতদ্বিরূপকোষঃ ॥

মঙ্গতিঃ স্ত্রী শূদ্রশাসনং। ইতি ত্রিকাণ্ডশেষঃ ॥

মঙ্গরঃ পুং জলালদণ্ডঃ ॥ বঙ্গলঃ ॥ কোরকঃ ॥ আদর্শঃ। ইতি হেমচন্দ্রঃ ॥

মঙ্গলঃ পুং ক্লী বঙ্গলঃ ॥ মুদ্গঃ। ইতি শব্দরত্নাবলী ॥

মঙ্গষ্ঠকঃ পুং বনজাতমুদ্গঃ। মোটে ইতি হিন্দীভাষা। মুগানি ইতি বঙ্গভাষা। তৎপর্য্যাযঃ। মযষ্টঃ ২ বনমুদ্গঃ ৩ কৃমীলকঃ ৪ অমৃতঃ ৫ অরণ্যমুদ্গঃ ৬ বল্লীমুদ্গঃ ৭। অস্য গুণাঃ। কষাযত্বং। মধুরত্বং। রক্তপিত্ত জ্বর দাহ হরত্বং। পথ্যত্বং। রুচিকারিত্বং। সর্ব্বদোষ জয কারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ মঙ্গষ্টো বাতলো গ্রাহী কফ পিত্তহরো লঘুঃ। বাস্তি জিহ্মধুরঃ পাকে কৃমি কৃজ্জ্বর নাশনঃ ॥ ইতি ভাবপ্রকাশঃ ॥

মঙ্গষ্ঠঃ পুং ব্রীহিভেদঃ। মস্থরে ত্রি। ইতি মেদিনী ॥

মঙ্গষ্ঠকঃ পং বনমুদ্গঃ। ইতি ভরতঃ ॥

মকূলকঃ পুং মুকূলকঃ। দন্তীবৃক্ষঃ। ইত্যমরটীকাযাং রমানাথঃ ॥

মক্ক ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥

কোপধঃ। ঙ মক্কতে। ইতি দুর্গা-
দাসঃ ॥
মক্কল্লঃ পুং শূলরোগবিশেষঃ। যথা
। সূতায়া হৃচ্ছিরোবস্তিশূলং মক্কল্ল
সংজ্ঞিতং। যবক্ষারং পিবেত্তত্র ম-
স্তুনোষ্ণোদকেন বা॥ ইতি চক্রপাণি
দত্তঃ ॥
মক্কুলং ক্লী শিলাজতু। ইতি শব্দ-
রত্নাবলী ॥
মক্কোলঃ পুং খটিকা। যথা। মক্কো-
লো বর্ণলেখা চ কঠিনী কক্কটী খটী
। ইতি শৈলবর্গে ত্রিকাণ্ডশেষঃ ॥
মখ ই সর্পণে। ইতি কবিকল্পদ্রুমঃ ॥
ই মঙ্খ্যতে। ইতি দুর্গাদাসঃ ॥
মখ সর্পণে। ইতি কবিকল্পদ্রুমঃ ॥
মখঃ পুং যজ্ঞঃ। ইত্যমরঃ ॥
মখত্রাতা পুং রামঃ। যথা। রাবণা-
রির্মখত্রাতা সীতায়াঃ পতিরি-
ত্যপি। ইতি শব্দরত্নাবলী ॥
মখবহ্নিঃ পুং যজ্ঞাগ্নিঃ। ইতি জটা-
ধরঃ ॥
মখানলঃ পুং যজ্ঞাগ্নিঃ। তৎপর্য্যায়ঃ।
মহাবীরঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥
মখান্নং ক্লী খাদ্যবীজভেদঃ। মাখানা
ইতি ভাষা। তৎপর্য্যায়ঃ। পদ্ম-
বীজাভং ২ পানীয়ফলং ৩। মখান্নং
পদ্মবীজস্য গুণৈস্তুল্যং বিনির্দ্দি-
শেৎ। ইতি ভাবপ্রকাশঃ ॥
মখাসুহৃদ্ পুং শিবঃ। মখস্য দক্ষ-
যজ্ঞস্য অসুহৃৎ শত্রুঃ। ইতি হেম-
চন্দ্রঃ ॥
মগ ই সর্পণে। ইতি কবিকল্পদ্রুমঃ ॥
ই মঙ্গ্যতে। ইতি দুর্গাদাসঃ ॥
মগধঃ পুং কীকটদেশঃ। অধুনা
বেহারাখ্যদেশস্য দক্ষিণভাগঃ ॥
তদ্দেশস্থে পুং ভূম্নি। ইতি শব্দরত্না-
বলী ॥ বন্দী। ইতি হেমচন্দ্রঃ ॥
মগধা স্ত্রী পিপ্পলী। ইতি রত্নমালা ॥
মগধেশ্বরঃ পুং জরাসন্ধরাজঃ। ইতি
হেমচন্দ্রঃ॥ মগধদেশাধিপমাত্রঞ্চ
মগধোদ্ভবা স্ত্রী পিপ্পলী। ইতি রাজ-
নির্ঘণ্টঃ ॥ মগধদেশজাতে ত্রি ॥
মগ্নঃ ত্রি স্নাতঃ। জলান্তঃপ্রবিষ্টঃ।
ডোবা ইতি ভাষা। মস্জধাতোঃ
কর্ত্তরি ক্ত প্রত্যয়েন নিষ্পন্নঃ ॥
মঘ ই ঙ কৈতবাঘ্যর্থযোঃ। ইতি
কবিকল্পদ্রুমঃ॥ কৈতব মিহ কিতব
ক্রিয়া অক্ষক্রীড়নাদিঃ। ই মঙ্ঘ্যতে
ঙ মঙ্ঘতে অক্ষৈঃ কিতবঃ। অঘ্যর্থো
গতি নিন্দারম্ভ জবাঃ। কৈতব জ-
বযো রেবায়মিতি কেচিৎ। ইতি
দুর্গাদাসঃ ॥
মঘ ই ভূষে। ইতি কবিকল্পদ্রুমঃ ॥
ই মঙ্ঘ্যতে। ইতি দুর্গাদাসঃ ॥

মঘঃ পুং দ্বীপবিশেষঃ। ইতি মেদিনী॥ ॥ দেশবিশেষঃ। স তু মগনামক ম্লেচ্ছানাং স্থানং॥ পুষ্পবিশেষে স্ত্রী। ইতি শব্দরত্নাবলী॥

মঘবতী স্ত্রী ইন্দ্রাণী। ইতি মুগ্ধবোধ ব্যাকরণং॥

মঘবা পুং ইন্দ্রঃ। ইত্যমরঃ॥ জিনানাং দ্বাদশ চক্রবর্ত্ত্যন্তর্গত চক্রবর্ত্তি বিশেষঃ। ইতি হেমচন্দ্রঃ॥

মঘবান্ পুং ইন্দ্রঃ। ইত্যমরটীকায়াং রমানাথঃ ব্যাকরণঞ্চ॥

মঘা স্ত্রী ঔষধবিশেষঃ। ইতি ধরণিঃ॥ অশ্বিন্যাদিসপ্তবিংশতি নক্ষত্রান্তর্গত দশম নক্ষত্রং। তত্তু লাঙ্গলাকৃতি পঞ্চতারাত্মকং। গৃহাকৃতি ইতি কেচিৎ। অস্যাধিষ্ঠাতৃদেবতা পিতৃগণঃ। যথা। লাঙ্গলাকৃতিনি পঞ্চতারকে চারুকেশি পিতৃভে শিরোগতে। নীল নীরজ বিনিন্দি লোচনে বৃশ্চিকাদ্বিগলিতং কলাশতং॥ ১। ৪০। ইতি কালিদাস কৃত রাত্রিলগ্ন নিরূপণং॥ তত্র জাত ফলং। কঠোরচিত্তঃ পিতৃ মাতৃ ভক্ত স্তীব্রভাব স্ত্বনবদ্যবিদ্যঃ। চেজ্জন্মভং যস্য মঘানঘঃ স্যান্মতিঃ সদারাতি বিনাশদক্ষা॥ ইতি কোষ্ঠীপ্রদীপঃ॥ মঘা শব্দো বহুবচনান্তো ঽপি দৃশ্যতে। যথা। কৃষ্ণপক্ষে ত্রয়োদশ্যাং মঘাস্বিন্দুঃ করে রবিঃ। যদা তদা গজচ্ছায়া শ্রাদ্ধে পুণ্যৈরবাপ্যতে॥ অপিচ। নবোদকে নবান্নে চ গৃহপ্রচ্ছাদনে তথা। পিতরঃ স্পৃহয়ন্ত্যন্ন মষ্টকাসু মঘাসু চ॥ ইতি তিথ্যাদিতত্ত্বং॥ একবচনান্ত প্রয়োগো যথা। মঘায়াং পিণ্ডদানেন জ্যেষ্ঠপুত্রো বিনশ্যতি। ইতি মলমাসতত্ত্বং॥

মঘাত্রয়োদশী স্ত্রী মঘানক্ষত্রযুক্তভাদ্রকৃষ্ণত্রয়োদশী। যথা। প্রৌষ্ঠপদ্যূর্দ্ধং কৃষ্ণত্রয়োদশ্যাং মঘাযুক্তায়াং অনিষিদ্ধ যৎকিঞ্চিদ্দ্রব্যেণ শ্রাদ্ধমাবশ্যকং। শঙ্খাদি বিধিবাক্যেষু নক্ষত্র বিশিষ্ট শ্রুতেঃ। ততশ্চ কেবল ত্রয়োদশী কেবল মঘা শ্রাদ্ধার্থবাদা অপি কৃপ্ত বিশিষ্ট বিধিপ্রাপ্ত কর্ম্মণো নিত্যত্ব বোধকা ন তু কেবল বিধ্যন্তর কল্পকা গৌরবাৎ। তথা চ শঙ্খঃ। প্রৌষ্ঠপদ্যামতীতায়াং মঘা যুক্তাং ত্রয়োদশীং প্রাপ্য শ্রাদ্ধং হি কর্ত্তব্যং মধুনা পায়সেন চ॥ মনুঃ। যৎকিঞ্চিন্মধুনা মিশ্রং প্রদদ্যাত্ত ত্রয়োদশীং। তদপ্যক্ষয় মেবস্যাদ্বর্ষাস চ মঘাসু চ॥ বিষ্ণুধর্ম্মোত্তরে। প্রৌষ্ঠপদ্যা

মতীতাযা· তথা কৃষ্ণা ত্রযোদশী ।
এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানা-
হ প্রজাপতিঃ ।। শাতাতপঃ । পিত-
রঃ স্পৃহযন্ত্যন্ন মষ্টকাসু মঘাসু চাত-
স্মাদ্দদ্যাৎ সদোদ্যুক্তো বিদ্বৎসু ব্রা-
হ্মণেষু চ ।। অত্রান্ন মাত্র শ্রুতেঃ মনু
বচনে যৎকিঞ্চিৎ শ্রুতেশ্চ শস্ত্রোক্ত
পাযসঃ ফলাতিশযার্থঃ গুণ বিশে-
ষে ফল বিশেষঃ স্যাদিতি ন্যাযাৎ।
ব্যক্তং বিষ্ণুধর্ম্মোত্তরে । মঘা যুক্তা চ
তত্রাপি শস্তা রাজং স্ত্রযোদশী । ত-
ত্রাক্ষযং ভবেৎ শ্রাদ্ধং মধুনা পায-
সেন চ ।। তত্র অগ্রযুক্ কৃষ্ণপক্ষে ।
অত্র যৎ শ্রাদ্ধং তন্মধুযোগেন পায-
স যোগেন বা অক্ষযং ভবেৎ । অত
এব মনুবচনে যৎকিঞ্চিন্মধুনা মিশ্র
মিত্যনেন মধুনাত্র যুক্তত্ব মুক্তং । অ-
তোঽত্র সুতরাং শূদ্রস্যাধিকারঃ ।।
অত্র গজচ্ছাযা যোগে ফলাতিশযঃ ।
তথা কৃত্যচিন্তামণৌ স্মৃতিঃ । কৃষ্ণ
পক্ষে ত্রযোদশ্যাং মঘাস্বিন্দুঃ করে
রবিঃ । যদা তদা গজচ্ছাযা শ্রাদ্ধে পু-
ণ্যৈ রবাপ্যতে ।। করে হস্তা নক্ষত্রে ।
কন্যা দশমাংশোপরি সপাদত্রযো
বিংশাংশ ইতি যাবৎ ।।✻।। অবিভ-
ক্তানামপ্যত্র পৃথক্ শ্রাদ্ধ মাবশ্যকং
। যথা শ্রাদ্ধচিন্তামণৌ স্মৃতিঃ । বিভ-
ক্তা অবিভক্তা বা কুর্য্যুঃ শ্রাদ্ধ মদৈ-
বিকং । মঘাসু চ ততোঽন্যত্র নাধি-
কারঃ পৃথগ্বিনা ।। অদৈবিকং প্র-
ত্যাব্দিকৈকোদ্দিষ্টং । অন্যত্র কৃষ্ণ-
পক্ষাদৌ নাধিকারঃ ন নিত্যাধি-
কারঃ ।। সপিণ্ডীকরণান্তানি যানি
শ্রাদ্ধানিষোড়শ । পৃথঙ্নৈব সুতাঃ
কুর্য্যুঃ পৃথগ্ দ্রব্যা অপি ক্বচি দি-
ত্যত্রাপিনা সমুচ্চিতস্যাপৃথগ্ দ্র-
ব্যস্য পুংসঃ সপিণ্ডীকরণান্তানী-
তি বিশেষণাত্তদুত্তর শ্রাদ্ধানাং পৃ-
থক্ত্বমপি প্রতীযতে ।। ✻ ।। মঘা
ত্রযোদশী নিমিত্তক শ্রাদ্ধে পুত্র-
বতা পিণ্ডা ন দেযাঃ । ভৌজঙ্গী
তিথি মাসাদ্য যাবচন্দ্রার্ক সঙ্গমং
। তত্রাপি মহতীপূজা কর্ত্তব্যা পি-
তৃ দৈবতে ।। ঋক্ষে পিণ্ড প্রদানন্তু
জ্যেষ্ঠপুত্রী বিবর্জযেদিতি দেবী-
পুরাণাৎ । ভৌজঙ্গা পঞ্চমী । চ
ন্দ্রার্ক সঙ্গমো ঽমাবাস্যা । পিতৃ
দৈবতে ঋক্ষে মঘাযাং । শাতাত-
পঃ। পিণ্ডনির্ব্বাপ রহিতং যত্তু শ্রা-
দ্ধং বিধীযতে। স্বধা বাচন লোপো।
ঽত্র বিকিরস্তু ন লুপ্যতে।। অক্ষয্যং
দক্ষিণা স্বস্তি সৌমনস্যং যথা স্থিতি
। ইতি তিথ্যাদিতত্ত্বং ।।
মঘাভবঃ পুং শুক্রগ্রহঃ। ইতি হেম-

চন্দ্র ॥ মঘানক্ষত্রজাতে ত্রি ॥

মঘাভূঃ পুং শুক্রাচার্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মঘী স্ত্রী ধান্যভেদঃ। ইতি মেদিনী॥

মঘোনী স্ত্রী ইন্দ্রাণী। ইতি মুগ্ধবোধ ব্যাকরণং ॥

মঙ্কুরঃ পুং মুকুরঃ। ইত্যমরটীকাযাং ভরতঃ ॥

মঙ্ক্তা ত্রি স্নানকর্ত্তা। ইতি মস্জধাতোঃ কর্ত্তরি তৃন্ প্রত্যযেন নিষ্পন্নং ॥

মঙ্গঃ পুং নৌকাশিরঃ। ইতি হেমচন্দ্রঃ ॥

মঙ্গলং ক্লী অভিপ্রেতার্থসিদ্ধিঃ। ইতি তিথ্যাদিতত্ত্বং ॥ তদ্বতি ত্রি। ইত্যমরঃ ॥ তৎপর্য্যাযঃ। ভাবুকং ২ ভব্যং ৩ কল্যাণং ৪ ভবিকং ৫ শুভং ৬ ক্ষেমং ৭ প্রশস্তং ৮ ভদ্রং ৯ শ্বশ্রেযসং ১০ শিবং ১১ অরিষ্টং ১২ কুশলং ১৩ রিষ্টং ১৪ মদ্রং ১৫ শস্তং ১৬। ইতি শব্দরত্নাবলী॥ সর্ব্বার্থরক্ষণং। ইতি মেদিনী॥ * ॥ মঙ্গল লক্ষণং যথা। প্রশস্তাচরণং নিত্যং অপ্রশস্ত বিবর্জ্জনং। এতদ্ধি মঙ্গলং প্রোক্তং ঋষিভি স্তত্ত্বদর্শিভিঃ॥ ইত্যেকাদশীতত্ত্বং ॥*॥ মঙ্গলজনকদ্রব্যাণি। যথা। পূর্ণকুম্ভং দ্বিজং বেশ্যাং শুক্লধান্যঞ্চ দর্পণং। দধ্যাজ্যং মধু লাজঞ্চ পুষ্পং দূর্ব্বাক্ষতং সিতং॥ বৃষং গজেন্দ্রং তুরগং জ্বলদগ্নিং সুবর্ণকং। পূর্ণঞ্চ পরিপক্বানি ফলানি বিবিধানি চ ॥ পতিপুত্রবতীং নারীং প্রদীপং মণিমুক্তকং। মুক্তাং প্রসূনমালাঞ্চ সদ্যোমাংসঞ্চ চন্দনং ॥ দদর্শৈতানি বস্তূনি মঙ্গলানি পুরো মুনে। শৃগালং নকুলং চাসং শবং বামে শুভাবহং ॥ রাজহংসং মযূরঞ্চ খঞ্জন শুকং পিকং। পারাবতং শঙ্খচিল্লং চক্রবাকঞ্চ মঙ্গলং। কৃষ্ণসারঞ্চ সুরভীং চমরীং শ্বেতচামরং ॥ ধেনুং বৎস প্রযুক্তাঞ্চ পতাকাং দক্ষিণে শুভাং। নানাপ্রকার বাদ্যঞ্চ শুশ্রাব মঙ্গল ধ্বনিং ॥ হরিশব্দস্য সঙ্গীতং ঘণ্টা। শঙ্খধ্বনি স্তথা। দৃষ্ট্বা শ্রুত্বা স জগাম হর্ষেণ তাত মন্দিরং ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে কার্ত্তিকাগমনং নাম ১৬ অধ্যাযঃ॥ * ॥ অপি চ। দদর্শ বর্ত্মন্যেবঞ্চ মঙ্গলার্হং শুভপ্রদং। বাঞ্ছা ফলপ্রদং রম্যং পুরো মঙ্গল সূচকং ॥ বামে শবং শিবাং পূর্ণকুম্ভং নকুলমেব চ। পতিপুত্রবতীং সাধ্বীং দিব্যাভরণ ভূষিতাং ॥ শুক্লপুষ্পঞ্চ মাল্যঞ্চ ধান্যঞ্চ খঞ্জনং শুভং। দক্ষিণে জ্বলদগ্নিঞ্চ বিপ্রঞ্চ বৃষভং গজং ॥ বৎস প্রযুক্তাং

ধেনুঞ্চ শ্বেতাশ্বং রাজহংসকং। বেশ্যাঞ্চ পুষ্পমালাঞ্চ পতাকাং দধি পায়সং॥ মণিং সুবর্ণং রজতং মুক্তা মাণিক্যমীপ্সিতং। সদ্যোমাংসং চন্দনঞ্চ মাধ্বীকং ঘৃতমুত্তমং॥ কৃষ্ণসারং ফলং লাজান্ সিদ্ধান্নং দর্পণন্তথা। বিচিত্রিতং বিশালঞ্চ সুদীপ্তাং প্রতিমাস্তথা॥ ক্ষণং দদর্শ দেবং তং পঞ্চবক্ত্রং ত্রিলোচনং। শুদ্ধস্ফটিক সঙ্কাশং নাগরাজৈর্বিরাজিতং॥ শুক্লোৎপলং পদ্মবনং শঙ্খচিল্লঞ্চ কোরকং। মার্জারং পর্ব্বতং মেঘং ময়ূর শুক সারসং॥ শঙ্খ কোকিল বাদ্যানাং ধ্বনিং শুশ্রাব মঙ্গলং। বিচিত্রং কৃষ্ণসঙ্গীতং হরিশব্দং জয়ধ্বনিং॥ এবং ভূতং শুভং দৃষ্ট্বা শ্রুত্বা প্রহৃষ্ট মানসঃ। প্রবিবেশ হরিং স্মৃত্বা পুণ্যং বৃন্দাবনং বনং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৭০ অধ্যায়ঃ॥ * ॥ অন্যচ। লোকেস্মিন্ মঙ্গলান্যষ্টৌ ব্রাহ্মণো গৌ হুতাশনঃ। হিরণ্যং সর্পি রাদিত্য আপো রাজা তথাষ্টমঃ॥ এতানি শততং পশ্যেন্নমস্যেদর্চ্চয়েত্ততঃ। প্রদক্ষিণন্তু কুর্ব্বীত তথাচায়ুর্ন হীয়তে॥ দূর্ব্বা দধি সর্পি রথোদকুম্ভং ধেনুং সবৎসাং বৃষভং সুবর্ণং। মৃন্ময়ং স্বস্তিক মক্ষতানি লাজা মধু ব্রাহ্মণ কন্যকাশ্চ॥ শ্বেতানি পুষ্পাণি তথা শমীঞ্চ হুতাশনং চন্দন মর্কবিম্বং। অশ্বত্থ বৃক্ষঞ্চ সমালভেত ততশ্চ কুর্য্যাদ্দ্বিজজাতিধর্ম্মং॥ ইতি মৎস্যসূক্ত মহাতন্ত্রে ৪৬ পটলঃ॥ * ॥ বর্ণভেদে মঙ্গল প্রশ্নভেদো যথা। ব্রাহ্মণান্ কুশলং পৃচ্ছেৎ ক্ষত্রবন্ধু মনাময়ং। বৈশ্যং ক্ষেমং সমাগম্য শূদ্রমারোগ্য মেব তু॥ ইতি কৌর্ম্মে উপরিভাগে ১১ অধ্যায়ঃ॥

মঙ্গলঃ পুং গ্রহবিশেষঃ। তৎপর্য্যায়ঃ। অঙ্গারকঃ ২ ভৌমঃ ৩ কুজঃ ৪ বক্রঃ ৫ মহীসুতঃ ৬ ঋণান্তকঃ ৭ লোহিতাঙ্গঃ ৮ খোল্মুখঃ ৯ ঋণান্তকঃ ১০। ইতি শব্দরত্নাবলী॥ আরঃ ১১ ক্রূরদৃক্ ১২ আবনেয়ঃ ১৩। ইতি জ্যোতিষতত্ত্বং॥ স চ রক্তগৌর মিশ্রিত বর্ণঃ। দক্ষিণদিক্ পুরুষ ক্ষত্রিয়জাতি সামবেদ তমোগুণ তিক্তরস মেষরাশি প্রবালাবন্তিদেশানামধিপতিঃ। মেষবাহনঃ। চতুরঙ্গুলপ্রমাণঃ। আরক্ত মাল্যবসনঃ। ভরদ্বাজমুনি সন্তানঃ। চতুর্ভুজঃ। শক্তি বরাভয় গদাধারী। সূর্য্যাভিমুখঃ। অস্যাধিদেবতা কার্ত্তিকেয়ঃ। প্রত্যধিদেবতা পৃথিবী। সতু পিত্ত প্রকৃতিঃ।

যুবা ক্রূরঃ। বনচারী। মধ্যাহ্নকালে প্রবলঃ। গৈরিকাদিধাতুস্বামী। চতুষ্পদানাং প্রভুঃ। চতুষ্কোণাকৃতিঃ। স্বর্ণকারাদীনাং স্বামী। জ্বলিত ভূমিচারী। কিঞ্চিদঙ্গহীনঃ। কটুরসপ্রিয়ঃ। তাম্রবর্ণ রক্তদ্রব্যস্বামী চ। ইতি গ্রহযাগতত্ত্ব লঘুজাতকাদয়ঃ ॥*॥ অস্যোৎপত্তি র্যথা। উপেন্দ্র বীজাৎ পৃথ্ব্যাস্ত মঙ্গলঃ সমজায়ত। বসুন্ধরায়াং বলবান্ তন্মে ব্যাখ্যাতুমর্হসি॥ সৌতি রুবাচ। উপেন্দ্র রূপ মালোক্য কামার্ত্তা চ বসুন্ধরা। বিধায় সুন্দরী বেশ মক্ষতা প্রৌঢযৌবনা॥ সস্মিতা তস্য তল্পে চ সহসা সমুপস্থিতা। সুরম্যাং মালতী মালাং দদৌ তস্মৈ বরাননা॥ উপেন্দ্রস্তমনোজ্ঞা জ্ঞাত্বা কামী মন্মথ পীড়িতঃ। নানা প্রকার শৃঙ্গারং চকার চ তয়া সহ॥ তদঙ্গ সঙ্গমাসক্তা মূর্চ্ছাং প্রাপ সতী তদা। মৃতেব নিদ্রিতা বা সৌ বীর্য্যাধানে হরি কৃতে॥ বিহায তত্র রহসি জগাম পুরুষোত্তমঃ। উর্ব্বশী পথি গচ্ছন্তী বোধয়ামাস তাং মুনে॥ সা চ পপ্রচ্ছ বৃত্তান্তং কথয়ামাস ভূশ্চ তাং। বীর্য্যং সম্বরণং কর্ত্তুং সা চাশক্তা চ দুর্ব্বলা॥ প্রবালস্যাকরে ত্রস্তা বীর্য্যন্যাসং চকার সা। তেন প্রবালবর্ণশ্চ কুমারঃ সমজায়ত॥ তেজসা সূর্য্য সদৃশো নারায়ণ সুতো মহান্। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥ * ॥ অপিচ। ততো হঙ্গারক লোকো হি বসত্যত্র মহীসুতঃ। উৎপত্তিঞ্চাস্য বক্ষ্যামি যথায়ং ভূসুতো হভবৎ॥ পুরা হি ভ্রমতো বিষ্ণোঃ স্বেদবিন্দুঃ পপাত হ। মহ্যাং স্ততঃ কুমারো হসৌ লোহিতাঙ্গো মহীতলাৎ॥ জাতঃ স্নেহেন মেদিন্যা বর্দ্ধিতঃ পৃথিবীপতে। তপসারাধ্য ব্রহ্মাণং গ্রহত্ব মুপসেদিবান্॥ ইতি পাদ্মে স্বর্গখণ্ডে ১১ অধ্যায়ঃ ॥ * ॥ অপরঞ্চ। পুরা দক্ষ বিনাশায কুপিতস্য ত্রিশূলিনঃ। অপতজ্জীম বক্ত্রস্য স্বেদবিন্দু র্ললাটজঃ॥ ভিত্ত্বা সমস্ত পাতালানদহৎ সপ্ত সাগরান্। অনেকবক্ত্র নয়নো জ্বলজ্জ্বলন ভীষণঃ॥ বীরভদ্র ইতি খ্যাতঃ করপাদায়ুতৈর্যুতঃ। কৃত্বা স যজ্ঞ মথনং পুন র্ভূতল সম্ভবঃ॥ ত্রিজগন্নির্দ্দহন্ ভূযঃ শিবেন বিনিবারিতঃ। কৃতং ত্বযা বীরভদ্র দক্ষযজ্ঞ বিনাশনং॥ ইদানীমল মেতেন লোক দাহেন কর্ম্মণা। শান্তি প্রদানাৎ সর্ব্বেষাং গ্রহাণাং প্রথমো ভব॥ প্রেক্ষিষ্যন্তি জনাঃ পূজাং করিষ্যন্তি মতং মম। অঙ্গারক

ইতি খ্যাতিং গমিষ্যতি ধরাত্মজ ॥ দেবলোকে দ্বিতীয়ঞ্চ তব রূপং ভবিষ্যতি। যে চ ত্বাং পূজয়িষ্যন্তি চতুর্থ্যাং ত্বদ্দিনে নরাঃ ॥ রূপ মারোগ্য মৈশ্বর্য্যং তেম্বনন্তং ভবিষ্যতি। এব মুক্ত স্তদা শান্তি মগমৎ কামরূপ ধৃক্ ॥ সংজাত স্তৎক্ষণাদ্রাজন্ গ্রহত্ব মগমৎ পুনঃ। ইতি মৎস্যপুরাণে অঙ্গারকব্রতং নাম ৬৮ অধ্যায়ঃ ॥ * ॥ কল্পভেদে অন্ধকাসুরবধ কালে তস্যোৎপত্তি র্যথা। যো ভূম্যাং ন্যপতদ্বিপ্র স্বেদবিন্দুঃ শিবাননাৎ। তস্মাদঙ্গার পুঞ্জাভো বালকঃ সম জায়ত ॥ স বাল স্তৃষিতো হত্যর্থং পপৌ রুধির মান্ধকং। কন্যাচোৎস্বেদ সংজাতা সাসৃগ্বিলিলিহে হ্যদ্ভুতা ॥ তত স্তা মাহ বালার্ক প্রভাং ভৈরব মূর্ত্তিমান্। শঙ্করো বরদো লোক শ্রেয়ার্থায বচো মহৎ ॥ ত্বাং পূজয়িষ্যন্তি সুরা ঋষয়ঃ পিতর স্তথা। যক্ষ বিদ্যাধরাশ্চৈব মানবাশ্চ শুভঙ্করি ॥ ত্বাং স্তোষ্যন্তি সদা দেবি বলি পুষ্পোৎকরৈঃ করৈঃ। চর্চ্চিকেতি শুভং নাম যস্মাদ্রুধির চর্চ্চিতা ॥ ইত্যেব মুক্তা বরদেন চর্চ্চিকা ভূতানুযাতা হরিচর্ম্মবাসিনী। মহীং জগন্তাদ্বিচচার সুন্দরী স্থলং গতা হৈঙ্গুল মাদ্য মুত্তমং ॥ তস্যাং গতায়াং বরদঃ স্কন্দস্য প্রাদাদ্বরং সর্ব্ব বরোত্তমং যতঃ। গ্রহাধিপত্যং জগতঃ শুভাশুভং ভবিষ্যতি ত্বদ্বশগং মহাত্মন্ ॥ ইতি বামনপুরাণে ৬৭ অধ্যায়ঃ ॥ * ॥ অস্য স্তোত্রং যথা। ধরণী গর্ব্ভ সংভূতং বিদ্যুৎ পুঞ্জ সমপ্রভং। কুমারং শক্তি হস্তঞ্চ লোহিতাঙ্গং নমাম্যহং ॥ ইতি ব্যাসোক্ত নবগ্রহ স্তোত্রান্তর্গতং ॥ * ॥ ঋণপরিশোধনার্থ স্তোত্রং যথা। মঙ্গলো ভূমিপুত্রশ্চ ঋণহন্তা ধনপ্রদঃ। স্থিরাসনো মহাকায়ঃ সর্ব্বকর্ম্মাবিরোধকঃ ॥ লোহিতো লোহিতাক্ষশ্চ সামগানাং কৃপাকরঃ। ধরাত্মজঃ কুজো ভৌমো ভূমিজো ভূমিনন্দনঃ ॥ অঙ্গারকো যমশ্চৈব সর্ব্বরোগাপহারকঃ। বৃষ্টিকর্ত্তা চ হর্ত্তা চ সর্ব্বকাম ফলপ্রদঃ ॥ এতানি কুজনামানি প্রাত রুত্থায যঃ পঠেৎ। ঋণং ন জায়তে তস্য ধনমাপ্নোতি পুষ্কলং ॥ রক্ত পুষ্পৈশ্চ গন্ধৈশ্চ ধূপ দীপাদিভি স্তথা। মঙ্গলং পূজয়েদ্ভক্ত্যা মঙ্গলে হহনি সর্ব্বদা ॥ ঋণরেখাঃ প্রকর্ত্তব্যা অঙ্গারেণ সদা বুধৈঃ। প্রোঞ্ছয়েদ্বামপাদেন ঋণং তস্য বিনশ্যতি ॥ মঙ্গলায নমস্তুভ্যং নমস্তে ঋণহারিণে। পুত্র

পৌত্র প্রদাত্রে চ মঙ্গলায নমোন্নমঃ ॥ ঋণার্থে ত্বং প্রপন্নোহং মঋণং কুরু মে বিভো। এতৎ কৃত্বা ন সন্দেহো ঋণং হৃত্বা ধনী ভবেৎ ॥ ইতি স্কন্দপুরাণং ॥ * ॥ মঙ্গলবারে জাতস্য ফলং যথা। উগ্রঃ প্রতাপী ক্ষিতিপালমন্ত্রী রণপ্রিয়ো বক্রবচাঃ সরোষঃ। সন্ত্রাসিতঃ শূরগণ প্রণেতা কুজস্যবারে প্রভবো মনুষ্যঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥

মঙ্গলচণ্ডিকা স্ত্রী মঙ্গলচণ্ডী। যথা কালিকাপুরাণে। যৈসা ললিতকান্তাখ্যা দেবী মঙ্গলচণ্ডিকা। বরদাভয় হস্তা চ দ্বিভুজা গৌর দেহিকা॥ রক্তপদ্মাসনস্থা চ রত্নাঙ্গ ভূষণ মণ্ডিতা। রক্তকৌষেয বস্ত্রা চ স্মিতবক্ত্রা শুভাননা ॥ নবযৌবন সম্পন্না চার্বঙ্গী ললিতপ্রভা। উমযা ভাসিতং মন্ত্রং যৎপূর্ব্বন্তেক মক্ষরং ॥ মন্ত্রমস্যাস্ত তজ্জ্ঞেযং তেন দেবীং প্রপূজযেৎ। এক মক্ষরং শক্তিবীজরূপং। অষ্টম্যাঞ্চ নবম্যাঞ্চ পূজা কার্য্যা বিবৃদ্ধযে ॥ পটেষু প্রতিমাযাং বা ঘটে মঙ্গলচণ্ডিকাং। যঃ পূজযেদ্ভৌমদিনে শুভৈর্দূর্ব্বাঙ্কুরৈঃ শুভাং॥ সততং সাধকঃ সোপি কাম মিষ্ট মবাপ্নুযাৎ ॥ * ॥ মঙ্গলবারে কৃষ্ণাষ্টমী চতুর্দ্দশ্যৌচেৎ পুণ্যতরা ভবতি। যথা। শনৈশ্চরস্য বারেণ বারেণাঙ্গারকস্য চ। কৃষ্ণাষ্টমী চতুর্দ্দশ্যৌ পুণ্যাৎ পুণ্যতরে স্মৃতে ॥ * ॥ মঙ্গলবারে শুক্লা চতুর্থী চেদক্ষযা ভবতি। যথা। সোমবারেপ্যমাবাস্যা আদিত্যাহে চ সপ্তমী। চতুর্থ্যঙ্গারকে বারে ত্বষ্টমী চ বৃহস্পতৌ॥ অত্র যৎ ক্রিযতে পাপ মথবা ধর্ম্ম সঞ্চযঃ। ষষ্টিবর্ষ সহস্রাণি প্রতিজন্ম তদক্ষযং॥ ইতি তিথ্যাদিতত্ত্বং ॥

মঙ্গলচণ্ডী স্ত্রী দুর্গা। যথা। নারাযণ উবাচ। কথিতং ষষ্ঠ্যুপাখ্যানং ব্রহ্মপুত্র যথাগমং। দেবী মঙ্গলচণ্ডী যা তদাখ্যানং নিশামষ॥ তস্যাঃ পূজাদিকং সর্ব্বং ধর্ম্ম বক্ত্রেণ যৎ শ্রুতং। শ্রুতি সম্মত মেবেষ্টং সর্ব্বেষাং বিদুষামপি ॥ দক্ষাযাং বর্ত্ততে চণ্ডী কল্যাণেষু চ মঙ্গলং। মঙ্গলেষু চ যা দক্ষা সা চ মঙ্গলচণ্ডিকা ॥ পূজ্যাযাং বর্ত্ততে চণ্ডী মঙ্গলে হপি মহীসুতঃ। মঙ্গলাভীষ্ট দেবী যা সা বা মঙ্গলচণ্ডিকা ॥ মঙ্গলো মনুবংশ শ্চ সপ্তদ্বীপ ধরাপতিঃ। তস্য পূজ্যাভীষ্টদেবী তেন মঙ্গলচণ্ডিকা ॥ মূর্ত্তিভেদেন সা

দুর্গা মূলপ্রকৃতি রীশ্বরী। কৃপারূ-
পা হ্যতিপ্রত্যক্ষা যোষিতা মিষ্টদে-
বতা ॥ প্রথমে পূজিতা সা চ শ-
ঙ্করেণ পুরঃ পুরা। ত্রিপুরস্য বধে
ঘোরে বিষ্ণুনা প্রেরিতেন চ ॥ ব্রহ্মন্
ব্রহ্মোপদেশেন দুর্গপ্রস্থেন সঙ্কটে।
আকাশাৎ পতিতে যানে দৈত্যেন
পাতিতে রুষা ॥ ব্রহ্মবিষ্ণূপদিষ্টশ্চ
দুর্গাং তুষ্টাব শঙ্করঃ। সা চ মঙ্গল
চণ্ডী চ বভূব রূপভেদতঃ ॥ উবাচ
পুরতঃ শম্ভো। র্ভযং নাস্তীতি তে বি-
ভো। ভগবান্ বৃষরূপশ্চ সর্ব্বেশশ্চ
বভূবহ ॥ যুদ্ধ শক্তি স্বরূপাহং ভ
বিষ্যামি তদাজ্ঞয়া। মযা হ্মনা চ
হরিণা সহায়েন বৃষধ্বজ ॥ জহি দৈ
ত্যঞ্চ শত্রুঞ্চ সুরাণাং পদঘাতকং।
ইত্যুক্ত্বান্তর্হিতা দেবী শম্ভোঃ শক্তি
র্বভূব সা ॥ বিষ্ণুদত্তেন শস্ত্রেণ জঘা
ন তমুমাপতিঃ। মুনীন্দ্র পতিতে
দৈত্যে সর্ব্বে দেবা মহর্ষযঃ ॥ তুষ্টুবুঃ
শঙ্করং দেবং ভক্তি নম্রাত্মকন্ধরাঃ।
সদ্যঃ শিরসি শম্ভোশ্চ পুষ্পবৃষ্টি র্ব
ভূব চ ॥ ব্রহ্মা বিষ্ণুশ্চ সন্তুষ্টৌ দদৌ
তস্মৈ শুভাশিষং। ব্রহ্ম বিষ্ণূপদিষ্টশ্চ
সুস্নাতঃ শঙ্করঃ শুচিঃ ॥ পূজযামাস
তাং শক্তিং দেবীং মঙ্গলচণ্ডিকাং।
পাদ্যার্ঘ্যাচমনৈর্বৈশ্চ বলিভি র্বিবি-
ধৈ রপি ॥ পুষ্প চন্দন নৈবেদ্যৈ
র্ভক্ষ্যা নানা বিধৈঃ শুনে। ছাগৈ র্মে-
ষৈশ্চ মহিষৈ র্গবৈ র্মাযাতিভি স্তথা
॥ বস্ত্রালঙ্কার মাল্যৈশ্চ পাযসৈঃ
পিষ্টকৈ রপি। মধুভিশ্চ সুধাভিশ্চ
পক্বৈ র্নানাবিধৈঃ ফলৈঃ ॥ সঙ্গীত
নর্ত্তনৈ বাদ্যৈ রুৎসবৈঃ কৃষ্ণ কীর্ত্ত-
নৈঃ। ধ্যাত্বা মধ্যন্দিনোক্তেন ধ্যানে-
ন ভক্তি পূর্ব্বকং ॥ দদৌ দ্রব্যাণি মূ-
লেন মন্ত্রেণৈব চ নারদ। ওঁ হ্রীং শ্রীং
ক্লীং সর্ব্ব পূজ্যে দেবি মঙ্গল চণ্ডিকে ॥
হুং হুং ফট্ স্বাহেত্যেবঞ্চাপ্যেকবিংশ-
শাক্ষরো মনুঃ। পূজ্যঃ কল্পতরুশ্চৈব
ভক্তানাং সর্ব্বকামদঃ ॥ দশলক্ষ জ-
পেনৈব মন্ত্র সিদ্ধি র্ভবেন্নৃণাং। মন্ত্র
সিদ্ধি র্ভবেদ্যস্য স বিষ্ণুঃ সর্ব্বকামদঃ
॥ ধ্যানঞ্চ শ্রূযতাং ব্রহ্মন্ বেদোক্তং
সর্ব্ব সম্মতং। দেবীং ষোড়শ বর্ষীযাং
শশ্বৎ সুস্থির যৌবনাং ॥ সর্ব্বরূপ
গুণাঢ্যাঞ্চ কোমলাঙ্গীং মনোহরাং।
শ্বেত চম্পক বর্ণাভাং চন্দ্রকোটি সম
প্রভাং ॥ বহ্নি শুদ্ধাংশুকাধানাং রত্ন
ভূষণ ভূষিতাং। বিভ্রতীং কবরী ভা-
রং মল্লিকামাল্য ভূষিতং ॥ বিম্বো-
ষ্ঠাং সুদতীং শুদ্ধাং শশ্বৎ পদ্ম নি-
ভাননাং। ঈষদ্ধাস্য প্রসন্নাস্যাং সু-
নীলোৎপল লোচনাং ॥ জগদ্ধাত্রীঞ্চ

দাত্রীঞ্চ সর্ব্বেভ্যঃ সর্ব্ব সম্পদাং ॥ সংসার সাগরে ঘোরে পোতরূপাং বরাং ভজে ॥ দেব্যাশ্চ ধ্যান মিত্যেবং স্তবনং শ্রূয়তাং মুনে। প্রযাতাং সঙ্কটপ্রস্থে যেন তুষ্টাব শঙ্করঃ ॥ শ্রীশঙ্কর উবাচ। রক্ষ রক্ষ জগন্মাত র্দেবি মঙ্গলচণ্ডিকে। হারিকে বিপদাং রাশিং হর্ষ মঙ্গলদায়িকে ॥ হর্ষ মঙ্গল দক্ষে চ হর্ষ মঙ্গলচণ্ডিকে। শুভে মঙ্গল দক্ষে চ শুভা- মঙ্গলচণ্ডিকে ॥ মঙ্গলে মঙ্গলার্হে চ সর্ব্ব মঙ্গল মঙ্গলে। সতাং মঙ্গলদে দেবি সর্ব্বেষাং মঙ্গলালয়ে ॥ পূজ্যে মঙ্গলবারে চ মঙ্গলাভীষ্ট দেবতে। পূজ্যে মঙ্গলভূপস্য মনুবংশস্য সন্ততং ॥ মঙ্গলাধিষ্ঠাতৃ দেবি মঙ্গলানাঞ্চ মঙ্গলে। সংসার মঙ্গলাধারে মোক্ষ মঙ্গলদায়িনি ॥ সারে চ মঙ্গলাধারে পারে চ সর্ব্বকর্ম্মণাং। প্রতি মঙ্গলবারে চ পূজ্যে চ মঙ্গলপ্রদে ॥ স্তোত্রেণানেন শম্ভুশ্চ স্তুত্বা মঙ্গলচণ্ডিকাং। প্রতি মঙ্গলবারে চ পূজাং কৃত্বা গতঃ শিবঃ ॥ দেব্যাশ্চ মঙ্গলং স্তোত্রং যঃ শৃণোতি সমাহিতঃ। তন্মঙ্গলং ভবেৎ শশ্বন্ন ভবেত্তদমঙ্গলং ॥ প্রথমে পূজিতা দেবী শিবেন সর্ব্বমঙ্গলা। দ্বিতীয়ে পূজিতা দেবী মঙ্গলেন গ্রহেণ চ ॥ তৃতীয়ে পূজিতা ভদ্রা মঙ্গলেন নৃপেণ চ। চতুর্থে মঙ্গলে বারে সুন্দরীভিশ্চ পূজিতা ॥ পঞ্চমে মঙ্গলাকাঙ্ক্ষৈ নরৈ মঙ্গলচণ্ডিকা। পূজিতা প্রতিবিশ্বেষু বিশ্বেশ পূজিতা সদা ॥ ততঃ সর্ব্বত্র সংপূজ্যা সা বভূব সুরেশ্বরী। দেবাদিভিশ্চ মুনিভি মনুভি র্মানবৈ র্মুনে ॥ বদ্ধতে তৎ পুত্র পৌত্রো মঙ্গলঞ্চ দিনে দিনে। ইতি ব্রহ্মবৈবর্ত্তে মহাপুরাণে প্রকৃতিখণ্ডে নারদে নারদীয়ে মঙ্গলচণ্ডিকোপাখ্যানং তৎস্তোত্র কথনং নাম ৪১ অধ্যায়ঃ ॥

মঙ্গলছায়ঃ পুং প্লক্ষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মঙ্গলপাঠকঃ পুং বন্দী। ইতি হেমচন্দ্রঃ ॥

মঙ্গলপ্রদা স্ত্রী হরিদ্রা। ইতি কেচিৎ ॥ মঙ্গলদাতরি ত্রি ॥

মঙ্গলা স্ত্রী পার্ব্বতী ॥ শুক্লদূর্ব্বা ॥ পতিব্রতা। ইতি শব্দরত্নাবলী ॥ করঞ্জভেদঃ। ইতি শব্দচন্দ্রিকা ॥ বৃত্ত্যার্হন্মাতৃবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ হরিদ্রা ॥ নীলদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

মঙ্গলাষ্টক স্ত্রী অষ্টকভুষ্টান্তর্গতা-

গুরু বিশেষঃ। যথা। মঙ্গল্যা মল্লিকাগন্ধা মঙ্গলাগুরু বাচকাঃ। মঙ্গল্যা গুরু শিশিরা গন্ধাঢ্যা যোগবাহিকা ॥ ইতি রাজনির্ঘণ্টঃ ॥

মঙ্গল্যং ক্লী দধি। ইতি মেদিনী ॥ চন্দনং ॥ মঙ্গল্যাগুরু ॥ স্বর্ণং ॥ সিন্দূরং। ইতি রাজনির্ঘণ্টঃ ॥

মঙ্গল্যং ত্রি শিবকরং। ইতি মেদিনী ॥ রুচিরং। ইতি হেমচন্দ্রঃ॥ সাধুঃ। ইতি ধরণিঃ ॥

মঙ্গল্যঃ পুং ত্রায়মাণা ॥ অশ্বত্থঃ ॥ বিল্বঃ॥ মসূরকঃ। ইতি মেদিনী ॥ জীবকঃ ॥ নারিকেলঃ ॥ কপিত্থঃ ॥ রীঠাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

মঙ্গল্যকঃ পুং মসূরঃ। ইত্যমরঃ ॥

মঙ্গল্যকুসুমা স্ত্রী শঙ্খপুষ্পী। ইতি ভাবপ্রকাশঃ ॥

মঙ্গল্যনামধেয়া স্ত্রী জীবন্তী। ইতি জটাধরঃ ॥

মঙ্গল্যা স্ত্রী মল্লিকাগন্ধাগুরু। ইত্যমরঃ ॥ শমী ॥ অধঃপুষ্পী ॥ সিতদূর্ব্বা ॥ শুক্লবচা ॥ রোচনা। ইতি মেদিনী ॥ প্রিয়ঙ্গুঃ॥ শঙ্খপুষ্পী। ইতি হেমচন্দ্রঃ॥ মাষপর্ণী ॥ জীবন্তী ॥ ঋদ্ধিঃ ॥ বচা ॥ হরিদ্রা ॥ চীড়া। ইতি রাজনির্ঘণ্টঃ ॥ দূর্ব্বা। ইতি রত্নমালা ॥ দুর্গা। যথা। শোভনানি চ শ্রেষ্ঠানি যা দেবী দদতে হরে। ভক্তানা মার্ত্তিহরণি মঙ্গল্যা তেন সা স্মৃতা ॥ ইতি দেবীপুরাণে ৪৪ অধ্যায়ঃ ॥

মঙ্গিনী স্ত্রী নৌকা। ইতি হেমচন্দ্রঃ॥

মঙ্ক্ষণং ক্লী জঙ্ঘাত্রাণং। ইতি হারাবলী ॥

মঙ্ক্ষু বং দ্রুতং। ইত্যমরঃ ॥ ভৃশার্থং। ইতি মেদিনী ॥

মঙ্ক্ষুণং ক্লী জঙ্ঘাত্রাণং। ইতি ত্রিকাণ্ডশেষঃ ॥

মচ ই ঙ উচ্ছ্রায ধৃত্যর্চ্চা ভাঃসু। ইতি কবিকল্পদ্রুমঃ ॥ ই মঞ্চ্যতে। ঙ মঞ্চতে। উচ্ছ্রায উচ্চীভাবঃ। ইতি দুর্গাদাসঃ ॥

মচ ঙ র্ষ কল্কনে ॥ দম্ভে ॥ শাঠ্যে। ইতি কবিকল্পদ্রুমঃ ॥ কল্কন মিতি কল্কং করোতীতি ণৌ রূপং চূর্ণীকরণ মিত্যর্থঃ। ঙ মচতে তণ্ডুলং শিলা। চকারাৎ মচি ঙ। ইতি দুর্গাদাসঃ ॥

মচর্চিকা স্ত্রী প্রশস্তং। ইত্যমরঃ ॥

মচ্ছঃ পুং মৎস্যঃ। ইতি শব্দরত্নাবলী ॥

মজ্জকৃৎ ক্লী অস্থি। ইতি হেমচন্দ্রঃ॥

মজ্জনং ক্লী স্নানং। ইতি জটাধরঃ ॥ মজ্জা। ইতি শব্দচন্দ্রিকা ॥

মজ্জসমুদ্ভবং ক্লী শুক্রং। ইতি হেমচন্দ্রঃ ॥

মজ্জা পুং বৃক্ষাদেরুত্তমস্থিরভাগঃ। সার ইতি খ্যাতঃ। ইত্যমরভরতৌ॥ ফল মজ্জ গুণো যথা। যস্য যস্য ফলস্যেহ বীর্য্যং ভবতি যাদৃশং। তস্য তস্যৈব বীর্য্যেণ মজ্জানমভিনির্দ্দিশেৎ॥ ইতি রাজবল্লভঃ॥ * ॥ অস্থি মধ্যস্থস্নেহবিশেষঃ। তৎপর্য্যায়ঃ। কৌশিকঃ ২ শুক্রকরঃ ৩ অস্থিস্নেহঃ ৪ অস্থিসম্ভবঃ ৫। ইতি হেমচন্দ্রঃ॥ অস্থিসারঃ ৬ তেজঃ ৭ বীজং ৮ অস্থিজং ৯ জীবনং ১০ দেহসারঃ ১১। ইতি রাজনির্ঘণ্টঃ॥ অথ মজ্জ স্বরূপমাহ। অস্থি যৎ স্বাগ্নিনা পক্বং তস্য সারো দ্রবো ঘনঃ। যঃ স্বেদবৎ পৃথগ্ভূতঃ স মজ্জেত্যভিধীয়তে॥ অথ মজ্জ স্থানমাহ। স্থূলাস্থিষু বিশেষেণ মজ্জা ত্বভ্যন্তরে স্থিতঃ। ইতি ভাবপ্রকাশঃ॥ অস্য গুণাঃ। বল শুক্র রস শ্লেষ্ম মেদো মজ্জ বিবর্দ্ধনঃ। মজ্জা বিশেষতো হস্থ্নাঞ্চ বলকৃৎ স্নেহনেহিতঃ॥ ইতি চরকঃ॥ মজ্জা শব্দ আবন্তোপি। যথা। শশাতর্সী মূলক শিগ্রু সিদ্ধৈঃ পিয়াল মজ্জা সহিতৈস্ত্রিতি সুশ্রুতঃ। দ্বয়মেবাহ ত্রিকাণ্ডে ভাগুরিঃ॥ লজ্জাবদাস্তবন্মজ্জা মাংসসারাস্থিসারযোরিতি। ইত্যমরটীকায়াং ভরতঃ॥

মজ্জা স্ত্রী অস্থিসারঃ। ইত্যমরটীকায়াং ভরতঃ॥ অস্যাগুণাঃ। বাতনাশিত্বং। বল পিত্ত কফ প্রদত্বং। মাংস তুল্য গন্ধ রূপত্বঞ্চ॥ অস্থীরমহিষ মজ্জা গুণাঃ। মধুরত্বং। বৃংহণত্বং। বল্যত্বঞ্চ॥ মজ্জসত্ত্ব গুণৌ যথা। শৈত্যং। উষ্ণত্বঞ্চ। ইতি রাজবল্লভঃ॥

মজ্জাজঃ পুং ভূমিজগুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥

মজ্জারসঃ পুং শুক্রং। ইতি রাজনির্ঘণ্টঃ॥

মজ্জাসারং ক্লী জাতীফলং। ইতি রাজনির্ঘণ্টঃ॥

মজ্জুষা স্ত্রী মঞ্জুষা। ইত্যমরটীকায়াং রায়মুকুটঃ॥

মঞ্চঃ পুং খট্বা। ইত্যমরঃ॥ কর্ণবংশঃ। মাচা ইতি ভাষা। ইতি হারাবলী॥ উচ্চমণ্ডপবিশেষঃ। যথা। দোলায়মানং গোবিন্দং মঞ্চস্থং মধুসূদনং। রথস্থং বামনং দৃষ্ট্বা পুনর্জন্ম ন বিদ্যতে॥ ইতি পুরাণং॥

মঞ্চকঃ পুং খট্বা। ইতি হেমচন্দ্রঃ॥ ইন্দ্রকোষঃ। উচ্চমণ্ডপঃ। ইতি

ত্রিকাণ্ডশেষঃ ॥

মঞ্চমাশুনঃ পুং নৎস্বণঃ। ইতি রাজনির্ঘণ্টঃ ॥

মঞ্চমণ্ডপঃ পুং শস্যরক্ষার্থস্বটির‍ং। টং ইতি ভাষা। তৎপর্য্যাযঃ। স্ব-দুঙ্গঃ২। ইতি হারাবলী ॥

মঞ্জরং ক্লী নক্তা ॥ তিলকবৃক্ষঃ ॥ বল্লী। ইতি শব্দরত্নাবলী ॥

মঞ্জরিঃ স্ত্রী বল্লরিঃ। ইত্যমরঃ ॥ বল্লতে বৃণোতি তরুং বল্লরিঃ বলমি বল্লউ স্তুতৌ নাম্নীতি অরিঃ। মঞ্জু মনো জ্ঞতাং রাতীতি মঞ্জরিঃ পূর্ব্বেণ ডিঃ মনীযাদিত্বাদুকারস্য অকারঃ পাছোণাদীতি ঈপি মঞ্জরী বল্লরী চ। বল্লরি মঞ্জরি দ্বযো রিতি শাব্দিকঃ ॥ বল্লি মুঞ্জি শাত্র। মঞ্জরি মঞ্জরী নঞ্জি মঞ্জরং ত্রিষু বল্লরী। বল্লরং ত্রিষু বল্লিশ্চ বল্লরিঃ প এনালিকেতি হড্ডচন্দ্রঃ ॥ লতানাত্রে ঽপি বল্লরিঃ। অতো বাহুবল্লরীতি প্রযোগ ইতি মুকুটাদযঃ। বল্লরী মঞ্জর্য্যো র্ভেদমপ্যাহুঃ। যথা।

ভিনব নির্গতা আবতা সন্দনারা সঙ্গসুনা অঙ্গনুমা চ মঞ্জরিঃ।

যথা চূতমঞ্জরিঃ কদলীমঞ্জরিঃ বল্লরিঃ পুন শ্চিরভূতাপি। যথা তাম্বুলবল্লরিঃ গুবাকবল্লরি রিতি

হ্বযসেন নবে চিরন্তনে ঽপীতি কৃষ্ণসাঞ্জৌ। ইতি ভরতঃ ॥

মঞ্জরী স্ত্রী মুক্তা ॥ তিলকবৃক্ষঃ ॥ লতা। ইতি শব্দরত্নাবলী ॥ মঞ্জরিঃ। ইত্যমর টীকাযাং ভরতঃ ॥ তুলসী। ইতি রাজনির্ঘণ্টঃ ॥

মঞ্জরীনম্রঃ পুং বেতসবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মঞ্জা স্ত্রী ছাগী। ইতি ত্রিকাণ্ডশেষঃ ॥ মঞ্জরী। ইতি হেমচন্দ্রঃ ॥

মঞ্জিঃ পুং মঞ্জরী। ইতি ত্রিকাণ্ডশেষঃ ॥

মঞ্জিকা স্ত্রী বেশ্যা। ইতি হারাবলী

মঞ্জিফলা স্ত্রী কদলী। ইতি ত্রিকাণ্ডশেষঃ ॥

মঞ্জিষ্ঠা স্ত্রী স্বনামখ্যাতরক্তবর্ণলতাবিশেষঃ। মজীঠ ইতি হিন্দী ভাষা। তৎপর্য্যাযঃ। বিকসা ২ জিঙ্গী ৩ সমঙ্গা ৪ কালমেষিকা ৫ মণ্ডূকপর্ণী ৬ ভণ্ডীরী ৭ ভণ্ডী ৮ যোজনবল্লী ৯। ইত্যমরঃ ॥ কালমেষী ১০ কালা ১১ জিঙ্গিঃ ১২ ভণ্ডিরী ১৩ ভণ্ডিকা ১৪ ভণ্ডিঃ ১৫। ইতি শব্দরত্নাবলী ॥ হরিণী ১৬ রক্তা ১৭ গৌরী ১৮ যোজনবল্লিকা ১৯ বপ্রা ২০ রোহিণী ২১ চিত্রলতা ২২ চিত্রা ২৩ চিত্রাঙ্গী ২৪ জননী ২৫ বিজযা

২৬ মঞ্জুষা ২৭ রক্তযষ্টিকা ২৮ ক্ষেত্রী ২৯ রাগাঢ্যা ৩০ কালভাণ্ডিকা ৩১ অরুণা ৩২ জ্বরহন্ত্রী ৩৩ ছত্রা ৩৪ নাগকুমারিকা ৩৫ ভণ্ডীরলতিকা ৩৬ রাগাঙ্গী ৩৭ বস্ত্রভূষণা ৩৮। অস্যা গুণাঃ। মধুরত্বং। কষায়ত্বং। উষ্ণত্বং। গুরুত্বং। ব্রণমেহ জ্বরশ্লেষ্ম বিষ নেত্রামঘ নাশিত্বঞ্চ। সা চতুর্ব্বিধা। চোলঃ ১ যোজনী ২ কৌন্তী ৩ সিংহলী চ ৪। ইতি রাজনির্ঘণ্টঃ॥ অষ্ঠ স্বরভঙ্গ শোথ নাশিত্বং। বর্ণাগ্নিকারিত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপিচ। মঞ্জিষ্ঠা মধুরা তিক্তা কষায়া স্বর্ণ বর্ণ কৃৎ। গুরুকা বিষ শ্লেষ্মাস্রী শোথ যোন্যক্ষি কর্ণরুক্। রক্তাতীসার কুষ্ঠাস্র বিসর্প ব্রণ মেহ নুৎ॥ ইতি ভাবপ্রকাশঃ॥

মঞ্জী স্ত্রী মঞ্জরী। ইতি হেমচন্দ্রঃ ত্রিকাণ্ডশেষশ্চ॥

মঞ্জীরঃ পুং ক্লী নূপুরঃ। ইত্যমরঃ॥ মঞ্জীরো হংস্রী স নূপুরঃ। ইতি রভসঃ॥

মঞ্জীরঃ পুং মন্থানদণ্ডরজ্জুবন্ধনাথ স্তম্ভঃ। তৎপর্য্যায়ঃ। বিষ্কম্ভঃ ২ কুটরঃ ৩। ইতি হেমচন্দ্রঃ॥

মঞ্জু ত্রি মনোজ্ঞং ইত্যমরঃ॥

মঞ্জুকেশী পুং শ্রীকৃষ্ণঃ। ইতি হলায়ুধঃ॥ সুন্দরকেশ বিশিষ্টে ত্রি॥

মঞ্জুগমনা স্ত্রী হংসী। ইতি রাজনির্ঘণ্টঃ॥ সুন্দরগামিনি ত্রি॥

মঞ্জুঘোষঃ পুং পূর্ব্বজিনভেদঃ। ইতি ত্রিকাণ্ডশেষঃ॥ উপাস্যদেবতাবিশেষঃ। অস্য মন্ত্রাদি যথা। জাড্যৌঘ তিমিরধ্বংসী সংসারার্ণব তারকঃ। শ্রীমঞ্জুঘোষো জয়তাং সাধকানাং সুখাবহঃ॥ তত্রাগমোক্তঃ। মাতৃকাদি সমুদ্ধৃত্য বহ্নিবীজং সমুদ্ধরেৎ। বামাংসং কূর্ম্মসংজ্ঞঞ্চ ততো মেষেশ মুদ্ধরেৎ॥ মীনেশঞ্চ ততঃ কুর্য্যাৎ বামনেত্রেন্দু সংযুতং। ষড়ক্ষরো মনুঃ প্রোক্তো মঞ্জুঘোষস্য শম্ভুনা॥ ইয়ন্তু দীপনী প্রোক্তা মূলমন্ত্রস্তু কথ্যতে। অঙ্কুশং শক্তিবীজঞ্চ রমাবীজং ততঃ প্রিয়ে॥ বীজত্রয়াত্মকো মন্ত্রো জাড্যৌঘ ধ্বান্ত নাশনঃ। শক্তিবীজং রমাবীজং কামবীজং তথা প্রিয়ে॥ বিদ্যা শ্রুতিধরী প্রোক্তা এষা বর্ণত্রয়াত্মিকা। হকারো বহ্নিনারূঢ়া বামনেত্রেন্দু ভূষিতঃ॥ প্রোক্তা সার্দ্ধন্তু বিদ্যেয়ং একবর্ণাত্মিকা প্রিয়ে সিদ্ধঃ সাধ্যঃ সুসিদ্ধো বা সাধকস্য রিপুশ্চ বা॥ তদা মন্ত্রো ভবেদ্ভক্ত্যা শুভদো বুদ্ধিদো ভবেৎ।

মধ্যাহ্নে সলিলে চৈব ভোজনে ভাজনে তথা ॥ গোময়ে তু বহির্দেশে মৈথুনে রমণী ভগে। গোষ্ঠে চ নিশি গোমুণ্ডে যন্ত্রং ডমরু সন্নিভং ॥ বিলিখ্য মন্ত্রবর্ণাংশ্চ ত্রিশ ঊর্দ্ধে অধ স্তথা। লিখেচ্চন্দন লেখন্যা প্রযত্নাৎ সাধকোত্তমঃ ॥ উচাটনে লিখেন্মন্ত্রং গোচর্ম্মণি বিশেষতঃ। সলিলে বিজয়ী নিত্যং ভোজনে চ মহেশ্বরঃ ॥ গোময়ে বাবদূকঃ স্যাৎ কোটে সর্ব্বজ্ঞতাং ব্রজেৎ। ভগে শ্রুতিধরো নিত্যং গোমুণ্ডে চ মহাকবিঃ॥ গোমূত্রং বদরী মূলং চন্দনং পাংশুমেব চ। একীকৃত্যাষ্টধা জপ্ত্বা তিলকং ধারয়েৎ সদা॥ নমস্কৃত্য বরং শ্রেষ্ঠং প্রার্থয়েদ্ভক্তি তৎপরঃ। বরং প্রাপ্য চ তস্মাদ্বৈ বিহরেত্তু যথা সুখং ॥ নান্য দেবার্চ্চনং স্নানং প্রণবোচারণং ন তু। বস্ত্রাঞ্চলেন দন্তানাং শোধনং লবণেন বা ॥ রাত্রিবাসো ন মুঞ্চেত ন শুচিঃ স্যাৎ কদাচন। এবং কৃত্বা প্রযত্নেন জ্ঞাত্বা গুরু মুখাৎ সুধীঃ॥ মাসেকেন কবীন্দ্রঃ স্যাৎ দ্বিমাসেনৈব ঈশ্বরঃ। ত্রিভি র্মাসৈ র্ভবেন্মর্ত্ত্যঃ সর্ব্বশাস্ত্র বিশারদঃ॥ পুত্রার্থী লভতে পুত্রং ধনার্থী বিপুলং ধনং। আয়ু রারোগ্য কামস্তু সর্ব্বান্ কামান বাপ্নুয়াৎ ॥ ততঃ করাঙ্গন্যাসৌ। ক্ষাং শাং অঙ্গুষ্ঠাভ্যাং নমঃ। ইত্যাদি এবং হৃদয়াদিষু। তথা চ তন্ত্রে। সম্বর্ত্তকো বকেশশ্চ দ্বৌ বর্ণৌ কথিতৌ প্রিয়ে। ষড্দীর্ঘভাগ্ভ্যা মেতাভ্যাং ষডঙ্গানি সমাচরেৎ॥ সম্বর্ত্তঃ ক্ষকারঃ বকেশঃ শকারঃ॥ ॥ধ্যানং। শশধর মিব শুভ্রং খড়্গ পুস্তাঙ্ক পাণিং সুরুচির মতি শান্তং পঞ্চচূড়ং কুমারং। পৃথুতর বরমুখ্যং পদ্মপত্রায়তাক্ষং কুমতি দহন দক্ষং মঞ্জুঘোষং নমামি॥ পীঠ পূজা। ততঃ স্বর্য্যাদাধারাদ্যাদি শক্তিতঃ। ভূত প্রেতাদিভিঃ স্বর্য্যাৎ পীঠাসন মনন্তরং॥ জ্ঞানাত্রে নমঃ পাদ্যং বুদ্ধিকর্ত্রে তথাচমং। জাড্য নাশায় গন্ধঃ স্যাদর্ঘ্যঃ স্যাদ্দক্ষপায় বৈ॥ সর্ব্বসিদ্ধিপ্রদায়েতি পুষ্পং দদ্যাদ্বিচক্ষণঃ। অন্দপুষ্পং সমাদায় ভৈরবান্ পূজয়েত্ততঃ ॥ অসিতাঙ্গো রুরু শ্চণ্ডঃ ক্রোধ উন্মত্ত সংজ্ঞকঃ। কপালী ভীষণশ্চৈব সংহার শ্চাষ্টমঃ স্মৃতঃ॥ ততো ধূপাদিকং দত্ত্বা প্রসূনানি বিসর্জ্জয়েৎ। তৈঃ পুষ্পৈঃ পূজয়েদষ্টৌ যক্ষিণীশ্চ বিশেষতঃ॥ সুরাদি সুন্দরী চৈব মনোহারিণ্যনন্তরং। কনকাবতী তথা, কামেশ্বরী চ রতিকর্য্যথ ॥ পদ্মিনী

চ নটী চৈব অনুরাগিণ্যনন্তরং। পূজ্য এতাস্তু যোগিন্যো হৃল্লেখা বীজ পূর্ব্বিকাঃ॥ এবং সংপূজ্য দেবেশং লক্ষ ষট্‌কং জপেন্মনুং। ঘৃতাক্ত কুন্দপুষ্পৈশ্চ একাদশ শতানি চ॥ জুহুযাদেধিতে বহ্নৌ কান্তারে পিতৃবেশ্মনি। এবং সিদ্ধ মনুর্মন্ত্রী মহাযোগীশ্বরো ভবেৎ॥ ইতি তন্ত্রসারঃ॥ প্রকারান্তরং কঙ্কুটাদি তন্ত্রে দৃষ্টব্যং॥

মঞ্জুপাঠকঃ পুং শুকপক্ষী। ইতি রাজনির্ঘণ্টঃ॥ সুন্দরপাঠকর্ত্তরি ত্রি॥

মঞ্জুপ্রাণঃ পুং ব্রহ্মা। ইতিজটাধরঃ॥

মঞ্জুভদ্রঃ পুং জিনবিশেষঃ। তৎপর্য্যায়ঃ। মঞ্জুশ্রীঃ২ জ্ঞানদর্পণঃ৩ মঞ্জুঘোষঃ৪ কুমারঃ৫ অষ্টারচক্রবান্ ৬ স্থিরচক্রঃ ৭ বজ্রধরঃ ৮ প্রজ্ঞাকায়ঃ ৯ বাদিরাট্ ১০ নীলোৎপলী ১১ মহারাজঃ ১২ নীলঃ ১৩ শার্দ্দূলবাহনঃ ১৪ ধিযাম্পতিঃ ১৫ পূর্ব্বজিনঃ ১৬ খড়্গী ১৭ দণ্ডী ১৮ বিভূষণঃ ১৯ বালব্রতঃ ২০ পঞ্চচীরঃ ২১ সিংহকেলিঃ ২২ শিখাধরঃ ২৩ বাগীশ্বরঃ ২৪। ইতিত্রিকাণ্ডশেষঃ॥

মঞ্জুলং ক্লী জলাকুঞ্জং॥ নিকুঞ্জং। ইতিমেদিনী॥ শবলঃ। ইতি হি

মঞ্জুলঃ পুং জলরঙ্কপক্ষী। ইতি মেদিনী॥ সুন্দরে ত্রি। ইত্যমরঃ॥

মঞ্জুশ্রীঃ পুং মঞ্জুঘোষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মঞ্জুষা স্ত্রী মঞ্জুষা। পেটরা ইতি ভাষা। যথা। মঞ্জুষাপি চ মঞ্জুষা পেটা চ পেটিকেত্যপি। ইতি শব্দরত্নাবলী॥

মঞ্জুষা স্ত্রী পিটকঃ। ইত্যমরঃ॥ পাষাণঃ। ইত্যুণাদিকোষঃ॥ মঞ্জিষ্ঠা। ইতি রাজনির্ঘণ্টঃ॥

মট সাদে। ইতি কবিকল্পদ্রুমঃ॥ সৌত্রধাতুরযং॥ অস্য প্রয়োগঃ। মটচঃ। ইতি দুর্গাদাসঃ॥

মটচী স্ত্রী পাষাণবৃষ্টিঃ॥ রক্তবর্ণ ক্ষুদ্রপক্ষীবিশেষঃ। ইতিগোবিন্দভাষ্যধৃত ছান্দোগ্যঃ॥

মটস্ফটিঃ পুং দর্পারম্ভঃ। ইতি জটাধরঃ॥

মটুকং ক্লী গৃহস্যশিরোভাগঃ। মট্কা ইতি ভাষা। ইতি কেচিৎ॥

মঠ বাসমদ্দর্ষোঃ। ইতি কবিকল্পদ্রুমঃ॥ মঠতি। বাসো নিবাসঃ। মর্দ্দঃ কৈশ্চিন্মন্যতে। ইতি দুর্গাদাসঃ॥

মঠ ক্ইঙ আধ্যানে। ইতি কবিকল্পদ্রুমঃ॥ ই মণ্ঠ্যতে। আধ্যানং স্মৃৎকে ইত্যত্র ব্যাখ্যাতং। ইতি

দুর্গাদাসঃ ॥
মঠঃ পুং ছাত্রাদিনিলয়ঃ। ইত্যমরঃ॥ মঠন্তি বসন্তি ছাত্রাদয়ো যত্র মঠঃ। মঠ বাস মদ্দয়োঃ অল্। ছত্র শীলা বিদ্যার্থিন শ্ছাত্রাঃ। ছত্রেণ গুরুসেবা লক্ষ্যতে গুরুদোষছাদনাৎ ছত্রং তচ্ছীলত্বাৎ ছাত্রঃ বিকার সংঘেতি ষ্ণঃ। আদিনা পরিব্রাজক ক্ষপণকাদীনাং গৃহঃ। ছাত্রাদীনাং নিলযো গৃহং ছাত্রাদিনিলযঃ। অর্থ কথন মেতৎ। নামাপ্যেতদিতি কেচিৎ। ছাত্রশালা প্রতিশ্রবশ্চাত্রৈব। ইতি ভরতঃ॥ গন্ধীরথঃ। ইতি হারাবলী ॥ * ॥ অথ মঠাদিপ্রতিষ্ঠাপ্রয়োগঃ। যদি তদ্দিনে প্রতিমাদি প্রতিষ্ঠা ক্রিয়তে তদা তন্ত্রেণ বৃদ্ধিশ্রাদ্ধাদিকং বিধায দেবপ্রতিষ্ঠাতত্ত্বোক্ত বিধিনা দেব প্রতিষ্ঠাং বিধায গৃহ প্রতিষ্ঠা কর্ত্তব্যা। যদি গৃহ প্রতিষ্ঠা মাত্রং তদা প্রাতঃকৃত নিত্যক্রিযঃ প্রক্ষালিতপাণিপাদ আচান্তঃ প্রাঙ্মুখ উদঙ্মুখো বা কুশযুক্তাসনে উপবিশ্য ব্রাহ্মণ ত্রযং গন্ধাদিনা পরিতোষ্য অস্মিন্ বিষ্ণুবেশ্ম প্রতিষ্ঠা কর্ম্মণি ওঁ পুণ্যাহং ভবন্তো হধিব্রুবন্ত ইতি ত্রিঃ শ্রাবযেৎ। ওঁ পুণ্যাহ মিতি ত্রি স্তৈ রুক্তে অস্মিন্ বিষ্ণুবেশ্ম প্রতিষ্ঠা কর্ম্মণি স্বস্তি ভবন্তো হধিব্রুবন্ত ইতি ত্রিঃ শ্রাবযেৎ ওঁ স্বস্তীতি ত্রি স্তৈরুক্তে। অস্মিন বিষ্ণুবেশ্ম প্রতিষ্ঠা কর্ম্মণি ওঁ ঋদ্ধিং ভবন্তো হধিব্রুবন্ত ইতি ত্রিঃ শ্রাবযেৎ। ওঁ ঋদ্ধ্যতামিতি ত্রি র্ব্রূযুঃ। যজুর্ব্বেদিনা ওঁ স্বস্তিন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তিনঃ পূষা বিশ্ববেদাঃ স্বস্তিন স্তার্ক্ষ্যো অরিষ্টনেমিঃ স্বস্তিনো বৃহস্পতি র্দ্দধাত। ইত্যনেনাক্ষতান্ ক্ষিপেৎ। সামগানান্ত। ওঁ অস্তি সোমো হযং সুতঃ পিবন্তস্য মরুতঃ। উতস্বরাজো অশ্বিনা। অস্তি সোমো অযং সুতঃ। পিবন্তস্য মরুতো হাই। উতস্বরাজো বা। হাইনো হাই। ইতি গীযমানেনাক্ষতান্ ক্ষিপেৎ। গানাশক্তৌ ত্রিধা ঋচং বাচযেৎ। ততঃ সূর্য্যঃসোমো যমঃ কালঃ সন্ধ্যে ভূতান্যহঃ ক্ষপা পবনো দিক্পতি ভূমি রাকাশং খচরামরাঃ। ব্রাহ্মং শাসনমাস্থায কল্পধ্বমিহ স্বন্নিধিং॥ ইতি পঠিত্বা। তত ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরযঃ। দিবীব চক্ষুরা ততম্। ইতি বিষ্ণুং স্মৃত্বা নারাযণং নমস্কৃত্য ওঁ তৎ সদিত্যচার্য্য কুশত্রয জল ফল পুষ্পান্যাদায ওঁ অদ্যামুকে মাস্যমুক পক্ষে হমুক তিথৌ অমুক গোত্রঃ

শ্রীঅমুক দেব শর্ম্মা এতত্তৃণ কাষ্ঠাদিনয় বেশ্ম পরমাণু সমসংখ্য বর্ষ সহস্রাবচ্ছিন্ন স্বর্গলোক মহিতত্বকামঃ শ্রীবিষ্ণু প্রীতিকামো বিষ্ণুলোক প্রাপ্তিকামো বা বিষ্ণুবেশ্ম প্রতিষ্ঠামহং করিষ্যে। ইতি সংকল্পয়েৎ। ইষ্টকাদিময়ে তু এতদিষ্টকাদি ময় বেশ্ম পরমাণু সম সংখ্য বর্ষ সহস্র দশগুণ কালাবচ্ছিন্ন স্বর্গলোক মহিতত্বকাম ইতি বিশেষঃ। পাষাণ বেশ্মনি তু তদ্দশগুণ কালাবচ্ছিন্ন স্বর্গলোকেতি বিশেষঃ। দেবতান্তর গৃহ প্রতিষ্ঠায়াস্ত তদূহেন প্রয়োগঃ॥ ততঃ সংকল্পসূক্তং পঠেৎ। সামবেদোক্তং তদ্যথা। ওঁ দেবোবো দ্রবিণোদাঃপূর্ণাং বিবষ্ট্যাসিচং। উদ্বাসিঞ্চধ্ব মুপবা পৃণধ্ব মাদিদ্বোদেব ওহতে॥ যজুর্ব্বেদোক্তং যথা। ওঁ যজ্জাগ্রতো দূরমুদৈতু দৈবং তদুসুপ্তস্য তথৈবেতি। দূরঙ্গমং জ্যোতিষাং জ্যোতিরেকং তন্মেমনঃ শিব সঙ্কল্প মস্তু॥ ততঃ সগণাধিপ গৌর্য্যাদি ষোড়শ মাতৃকা পূজা বসোর্ধারা সম্পাতনা যুষ্য মন্ত্র জপাভ্যুদয়িক শ্রাদ্ধাদি কর্ত্তব্যানি॥ আয়ুষ্য মন্ত্রো যথা। ওঁ আয়ুর্ব্বিশ্বায়ু র্বিশ্বং বিশ্ব মায়ু রশি। মহি প্রজাস্ত্বষ্টারাধিনিধে হ্মে শতং জীবেম শরদো বয়স্তে॥ ওঁ আয়ুষো মে পবস্ব বর্চসো মে পবস্ব বিদুঃ পৃথিব্যা দিবো জনিত্র্যা শৃণ্বন্ত্যাপোধঃ ক্ষরন্তী সোমোহোদ্গায মমায়ুষে মম ব্রহ্মবর্চসায যজমানস্যর্দ্ধ্যা অমুকস্য রাজ্যায॥ ॥ তত্র বিষ্ণুবেশ্ম প্রতিষ্ঠাভ্যুদয়ার্থ মিতি বাক্যে বিশেষঃ। এবমন্য বেশ্মনি। ততউত্তরাভিমুখং ব্রাহ্মণ মুপবেশ্য তৎসমীপে আসন মানীয প্রাঙ্মুখো যজমানঃ প্রাঞ্জলি র্বদেৎ। ওঁ সাধু ভবানাস্তাং। ওঁ সাধ্বহমাসে ইতি প্রতিবচনং দত্বা তদাসনে উদঙ্মুখ উপবিশতি। ততো যজমানঃ ওঁ অর্চ্চযিষ্যামো ভবন্তং ইতি বদেৎ। ওঁ অর্চ্চযেতি প্রতিবচনং। ততো গন্ধ পুষ্প তাম্বূলালঙ্কারৈ রভ্যর্চ্চ্য দক্ষিণং জানু স্পৃষ্ট্বা ওঁ অদ্যেত্যাদি অমুকগোত্র মমুকপ্রবর মমুকদেবশর্ম্মাণং ভবন্তং অস্মিন্ সঙ্কল্পিত বিষ্ণুবেশ্ম প্রতিষ্ঠা কর্ম্মাঙ্গভূত হোম কর্ম্মণি ব্রহ্মকর্ম্মকরণায গন্ধপুষ্প তাম্বূলালঙ্কার বস্ত্রৈ রহং বৃণে। ওঁ বৃতো হস্মীতি প্রতিবচনং। যথাবিহিতং ব্রহ্মকর্ম্ম কুরু। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনং। স্বযং হোমাসামর্থ্যে হোতুর্ব্বরণ মপি তথৈব কার্য্যং। ত ত্রধারং

ক্তেন আচার্য্যস্যাপি তথৈব কার্য্যং । শক্তেন সদস্যস্যাপি । গুরো র্ব্বরণে তু সংকল্পিতে হস্মিন্ বিষ্ণুবেশ্ম প্রতিষ্ঠা কর্ম্মণীতি বক্তব্যং।৯। ততো যজমানঃ গুরোঃ পাদৌ ধৃত্বা পঠেৎ। নারায়ণ স্বরূপ স্তং সংসারাত্রাহি মাং প্রভো। ত্বৎ প্রসাদাৎ গুরো যজ্ঞং প্রাপ্নোমি মনোবাঞ্ছিতং ॥ ত্রাহি নাথ প্রপন্নং মাং ভীতং সংসার সাগরাৎ। দেবতা স্থাপনে হ্যদ্য মম শান্তিং কুরু প্রভো ॥ ততো গুরুঃ। ওঁ উত্তিষ্ঠ বৎস ভদ্রন্তে মৎ প্রসাদাত্ত্বযানঘ। প্রাপ্তব্যং ধর্ম্ম কামার্থং দুষ্প্রাপং যৎ সুরাসুরৈঃ॥ ৯॥ ততো গুরুঃ। ওঁ পাবমানীঃ স্বস্ত্যযনীঃ সুদুঘাহি ঘৃতশ্চ্যুতঃ। ঋষিভিঃ শম্ভৃতো রসো ব্রাহ্মণে স্বমৃতং হিতং। ইতি পাবমানী সূক্তং। অসপত্নং পুরস্তান্নঃ শিবং দক্ষিণতঃ কৃধি। অভয়ং সততং পশ্চাৎ ভদ্র মুত্তরতো গৃহে। ইতি শাঙ্গন সূক্তং। ওঁ রক্ষো হনো বল গহনঃ প্রোক্ষামি বৈষ্ণবান্ রক্ষো হনো বল গহনো হবনযামি বৈষ্ণবান্ রক্ষো হনো বল গহনো হবস্তনামি বৈষ্ণবান্। রক্ষো হনৌ বলগহনাবুপদধামি বৈষ্ণবী। রক্ষোহনৌ বল গহনৌ পর্য্যুহামি বৈষ্ণবমসি বৈষ্ণ

বাঃস্থঃ। ইতি রক্ষাসূক্তং। ইতি পঠিত্বা বেতালাশ্চ পিশাচাশ্চ রাক্ষসাশ্চ সরীসৃপাঃ। অপসর্পন্তু তে ভূতা যে ভূতা ভুবি সংস্থিতাঃ॥ বিনাযকা বিঘ্নকর্ত্তা মহোগ্রা যজ্ঞদ্বিষো যে পিশিতাশনাশ্চ। সিদ্ধার্থ কৈর্ব্বজ্র সমান কল্পৈ র্ময়া নিরস্তা বিদিশঃ প্রযান্তু। ইতি শ্বেতসর্ষপান্ বিকীর্য্য স্বৈ স্বৈ র্ম্ম ন্ত্রৈ পঞ্চগব্যং শোধয়েৎ।৯। তৎ শোধন মন্ত্রা যথা। ওঁ তৎ সবিতু র্ব্বরেণ্যং ভর্গোদেবস্য ধীমহি ধিযো যোনঃ প্রচোদযাৎ। ইতি গোমূত্রং। ওঁ গন্ধদ্বারাং দুরাধর্ষাং নিত্যপুষ্টাং করীষিণীং। ঈশ্বরীং সর্ব্বভূতানাং তামিহোপহ্বযে শ্রিযং॥ ইতি গোমযং। ওঁ আপ্যাযস্ব সমেতু তে বিশ্বতঃসোমবৃষ্ণ্যং ভবাবাজস্যসঙ্গথে। ইতিদুগ্ধং। ওঁ দধিক্রাব্ণো অকারিষং জিষ্ণো রশ্বস্য বাজিনঃ। সুর ভিনো মুখাকরৎ প্রণআয়ূংসি তারিষৎ। ইতিদধি। ওঁ তেজোসি শুক্রমস্যমৃতমসি ধামনামাসি প্রিযন্দেবানা মনাধৃষ্টং দেবযজনমসি। ইতিঘৃতং। ওঁ দেবস্যত্বা সবিতুঃপ্রসবেশ্বিনো বাহুভ্যাং পূষ্ণো হস্তা ভ্যাং হস্তমাদদে। ইতি কুশোদকং।৯॥ ওঁ বেদ্যা বেদিঃ সমাপ্যতে বর্হিষা বর্হি রিন্দ্রিযং। যূপেন

যূপ আপ্যতে প্রণীতো অগ্নি রগ্নিনা। ইতি মন্ত্রেণবেদীং সংপ্রোক্ষ্য পঞ্চঘটান্ ঘটং ২া পুন ক্রমেণ সংস্থাপ্য। *। ঘটস্থাপন মন্ত্র যথা। সামগানাং। ওঁ মহিত্রীণা মবোস্তদ্যক্ষং মিত্রস্যার্য্যম্নঃ দুরাধর্ষং বরুণস্য। ইতি ভূমেঃ। ওঁ ধানাবন্তং করম্ভিন মপূপবন্ত মুক্থিনং ইন্দ্রপ্রাত র্জুষস্বনঃ। ইতি ধান্যস্য। ওঁ আবিশংকলসং সুতো বিশ্বা অর্ষন্নভি শ্রিয় ইন্দু রিন্দ্রায ধীযতে। ইতি কলসস্য। ওঁ অযমূর্জাবতো বৃক্ষ উম্বীব ফলিনীভব। পর্ণং বনস্পতে নুত্বা নুত্বাচ সূযতাংরযি। ইতি পল্লবস্য। ওঁ আনোমিত্রাবরুণা ঘৃতে গর্ব্যতি মুক্ষতং মধ্বারজাং সিসুক্রতু। ইতি জলস্য। ওঁ ইন্দ্রমরো নেমধিতা হবন্তে যৎ পার্য্যা যনযতে ধিযস্তাঃ সুরো নৃযাতাশ্রুবসশ্চ কাম আগোমতি ব্রজে ভজাত্বন্নঃ। ইতি ফলস্য। ওঁ সিন্ধো রুচ্ছাসে পতযন্ত মুক্ষণং হিরণ্যপাবাঃপশু মাশু গিভ্রুতে। ইতি সিন্ধুরস্য। ওঁ ত্রাবতঃ পুরুবসো বয মিন্দ্র প্রণেতঃ স্মসি স্থাতর্হরীণাং। ইতি স্থিরীকরণস্য॥ ওঁ পবমানো ব্যশ্নবদ্রশ্মিভি র্বাজসাতমঃ। দধাস্তোত্রে সুবীর্য্যং। ইতি পবমানস্য॥ *॥ যজুষাং। ওঁ ধ্রুবসি ভুবনস্য

দিতি রসি বিশ্বস্য ধাযা বিশ্বস্য ভুবণধত্রীং। পৃথিবীং যচ্ছ পৃথিবীং দৃংহ পৃথিবীং মাহিংসীঃ। ইতি ভূমেঃ। ওঁ ধান্যমসি ধিনুহি দেবান্ ধিনুহি যজ্ঞং ধিনুহি যজ্ঞ পতিং ধিনুহি মাং যজ্ঞন্যং। ইতি ধান্যস্য। ওঁ আজিঘ্র কলস মহ্যাত্বা বিশন্ত্বিন্দবঃ পুনরূর্জা নিবর্ত্তস্বসানঃ। সহস্রং ধুক্ষোরু ধারা পযস্বতী মাবিশতাদ্রযি। ইতি ঘটস্য। ওঁ বরুণস্যোত্তম্ভন মসি বরুণস্য স্কম্ভঃ সর্জনীস্থঃ বরুণস্য ঋত সদন্যসি বরুণস্য ঋত সদনমসি বরুণস্য ঋত সদনী মাসীদ। ইতি জলস্য। ওঁ ধন্বনাগা ধন্বনা জিজ্ঞযেমধন্বনাতীব্রাঃ সমদোজযেম। ধনুঃশত্রোরপকামং কৃণোতুধন্বনাসর্ব্বাঃপ্রতিশো জযেম। ইতি পল্লবস্য। ওঁ যাঃ ফলিনী র্যাঅফলা অপুষ্পা যাশ্চপুষ্পিণীঃ বৃহস্পতি প্রসূতাস্তানোমুঞ্চন্তঁহসঃ ইতি ফলস্য। ওঁ সর্ব্বতীর্থমযংবারি সর্ব্বদেব সমন্বিতং। ইমং ঘটং সমারুহ্য তিষ্ঠ দেবগণৈঃসহ। ইতি জলং দদ্যাৎ। ওঁ স্থিরো ভব বিড্বঙ্গ আশুর্ভব বাজ্যর্ব্বন্ পৃথুর্ভব সুসদস্ত্বমগ্নেঃ পুরীষবাহনঃ। ইতি স্থিরীকরণস্য। ওঁ সিন্ধোরিব প্রাধ্বনে শূঘনাসো বাত প্রমিযঃ। পতযন্তি যহ্বা ঘৃতস্যধারা অরুষো ণ

বাজী কাষ্ঠা ভিন্দন্নূর্ম্মিভিঃ পিন্বমানঃ। ইতি সিন্দূরস্য। ওঁ শ্রীশ্চতে লক্ষ্মীশ্চ পত্ন্যৌ বহোরাত্রে পার্শ্বে নক্ষত্রাণি রূপং অশ্বিনৌ ব্যাপ্তং ইষ্টম্মনিষাণ সর্ব্বলোকং মনীষাণ। ইতি পুষ্পস্য। *। ততঃ ফল পুষ্প যুতং বিতানং ওঁ বিমান এষ দিবো মধ্য আস্ত আপ প্রবা রোদসী অন্তরীক্ষং। সবি স্বাচী রভিচষ্টে ঘৃতাচীরন্তরা পূর্ব্বমপরঞ্চ কেতুং॥ সামগানান্ত। ওঁ উদ্ধ্ব উষুন উতযে তিষ্ঠাদে বোন সবিতা উদ্ধ্বো বাজস্য সনিতা যদঞ্জিভি র্ব্বা ঘদ্ভি র্বিহ্বযা মহে। ইতিমন্ত্রেণ বধ্নীযাৎ। *। ওঁ হিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ পতিরেক আসীৎ। সদাধার পৃথিবীং দ্যামুতেমাং কস্মৈ দেবায হবিষা বিধেম। ইতি মন্ত্রেণ মণ্ডল মধ্যে সুবর্ণ পদ্মং দত্ত্বা স্বর্ণ শলাকযা দলান্যুৎকীর্য্য মণ্ডল মধ্যে রাজতীং প্রতিমাং ওঁ সুত্রামানং পৃথিবীং দ্যামনেহসং সুশর্ম্মান মদিতিং সুপ্রণিতিং। দৈবীং নাবং স্বরিত্রামা নাগসমস্রুবন্তী মারুহে মানুস্তযে। ইতি মন্ত্রেণ নিঃক্ষিপ্য ঘটেষু দেবান্ পূজযেৎ। *। প্রথম ঘটে গণেশং সূর্য্যং দ্বিতীযঘটে শিবং দুর্গাং তৃতীয ঘটে বিষ্ণুং লক্ষ্মীং সরস্বতীং চতুর্থে অগ্নিং বাস্তপুরুষং ক্ষেত্রপালান্ কার্ত্তিকেয মশ্বিনীকুমারৌ পঞ্চমে গ্রহান্ লোকপালাংশ্চ স্বৈস্বৈ র্ম্মন্ত্রৈ র্নামাহ্বং পূজযেৎ। *। ততো গুরুর্দেবং প্রতিমাযাং শালগ্রামে বা যথোক্তবিধিনা স্নাপযেৎ। ওঁ ভদ্রং কর্ণেভিঃ শৃণুযাম দেবা ভদ্রং পশ্যেমাক্ষভি র্যজত্রাঃ। স্থিরৈ রঙ্গৈস্তুষ্টবাংসস্তনূভি র্ব্যশেম দেবহিতং যদাযুঃ। ইতি মন্ত্রেণ নিবেশ্য ওঁ এতোন্বিন্দ্রং স্তবানঃ শুদ্ধং শুদ্ধেন সাম্না। শুদ্ধৈরুক্থৈ র্ব্বা বৃধ্বাং সংশুদ্ধ আশীর্ব্বান্মমত্তু। ইতি মন্ত্রেণ শুদ্ধোদকেন স্নাপযেৎ। ওঁ ঘৃত বতীতি ঘৃতেনাভ্যজ্য। ওঁ অতো দেবা অবন্ত নো যতো বিষ্ণু র্বিচক্রমে। পৃথিব্যাঃ সপ্তধামভি। ইতি মসূর চূর্ণেনোদ্বর্ত্ত্য। ওঁ সপ্তস্তে অগ্নে সমিধঃ সপ্তজিহ্বাঃ সপ্ত ঋষযঃ সপ্তধাম প্রিযাণি সপ্তহোত্রাঃ সপ্তধাত্বা যজন্তি। সপ্তযোনীরাপৃণস্বা ঘৃতেন। ইতি উষ্ণোদকেন ক্ষালযেৎ। ওঁ দ্রুপদাদিব মুমুচানঃ স্বিন্নঃ স্নাতো মলাদিব পূতং পবিত্রেণেবাজ্যমাপঃ শুন্ধন্তু মৈনসঃ ইতি চন্দনেনানুলিপ্য ওঁ আপো হিষ্ঠামযোভুবঃ স্তান উর্জ্জে দধাতনঃ মহে রণায চক্ষসে। ইতি নারীতোযেন স্নাপযেৎ। ওঁ শন্নোদেবী রভিষ্টয আপো ভবন্ত পীতযে

শংযোরভি সুবন্ত নঃ। ইতি তীর্থমৃৎ কলসেন স্নাপয়িত্বা গায়ত্র্যা গন্ধযুক্ত জলেন স্নাপযেৎ। ওঁ হিরণ্য বর্ণাঃ শুচয়ঃ পাবকাঃ যা সুজাতঃ কশ্যপো যা স্বিন্দ্রঃ। অগ্নীবা গর্ভন্দধিরে বিরূপাস্তান্ আপঃ শংস্যোনা ভবন্তু। ইতি পঞ্চমৃত্তিকযা। ওঁ ইমংমে গঙ্গে যমুনে সরস্বতি শুতুদ্রি স্তোমম্ সচতা পরুষ্ণ্যা। আসিক্ন্যা মরুদ্‌বৃধে বিতস্ত যা জীকীযে শৃণুহ্যা সুষোময়া ইতি মন্ত্রেণ সিকতা জলেন। ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সুরয়ঃ। দিবীব চক্ষুরাততম্। ইতি বল্মীক তোযেন। ওঁ যা ওষধীঃ সোমরাজ্ঞী [illegible] পৃথিবী মনু। তাসত্ব মস্মিন্নাসনে ২ চ্ছিদ্রং শর্ম্ম যচ্ছত। ইতি সর্বৌষধিজলেন। ওঁ যজ্ঞা যজ্ঞাবো অগ্নযে গিরা গিরা চ দক্ষসে। প্রপ্রবয়মমৃতঞ্জাতবেদসং প্রিয়ং মিত্রম্নশংসিষং। ইতি কষায়যুক্ত জলেন। পঞ্চগব্যেন স্বৈঃ স্বৈঃ মন্ত্রৈঃ সেচযেৎ। ওঁ পযঃ পৃথিব্যাং পযওষধীষু পযো দিব্যন্তরিক্ষেপযোধাং। পযস্বতী প্রদিশঃ সন্তু মহ্যং সম্মা সৃজামি পযসা ঘৃতেন সম্মাসৃজাম্যপ ইত্যা ইতি পঞ্চগব্যেন। ওঁ তস্মাদ্যজ্ঞাৎ সর্ব্বহুত ঋচঃ সামানি জজ্ঞিরে। ছন্দাংসি জজ্ঞিরে তস্মাদ্‌যজুস্তস্মাদজাযত। ইতি পঞ্চামৃতেন। ওঁ যাঃ ফলিনীতি ফলোদকেন। ওঁ সহস্র শীর্ষেতি বক্ষ্যমাণ মন্ত্রেণ সহস্রধারযা। ওঁ এতো বিন্দু নিতি পূর্ব্বোক্ত মন্ত্রেণ তুলসী চন্দন যুক্ত জলেন। ওঁ যাস রাজা বরুণো যাতি মধ্যে সত্যানৃতে অবপশ্যঞ্জনানাং। মধুশ্চ্যুতঃ শুচযো যাঃ পাবকা স্তা আপোদেবী রিহমামবন্ত। ইত্যনেন বেদাদি চতুষ্টযেন। তদ্যথা ওঁ অগ্নিমীলেপুরোহিতং যজ্ঞস্য দেবমৃত্বিজং হোতারং রত্নধাতমম্। ১। ওঁ ইষেত্বোর্জেত্বা বাযবস্থ দেবোবঃ সবিতা প্রার্পযতু শ্রেষ্ঠতমায কর্ম্মণে। ২। ওঁ অগ্ন আযাহি বীতযে গৃণানো হব্যদাতযে নিহোতা সৎসি বর্হিষি। ৩। ওঁ শন্নোদেবী রভিষ্টযে শন্নো ভবন্তু পীতযে শংযোরভি স্রবন্ত নঃ। ৪। বক্ষ্যমাণ পুরুষসূক্তেন চ একাশীতি ঘটৈঃ স্নাপযেৎ। অশক্তৌ অষ্টাবিংশতি ঘটৈ রষ্টঘটৈর্বা স্নাপযিত্বা ধৌতবাসসা জলাপনীয যথোপচারৈঃ সংপূজ্য মণ্ডলে আধার শক্ত্যাদীনি পূজযেৎ। [illegible]। ওঁ আধারশক্তযে নমঃ। এবং সর্ব্বত্র প্রণবাদি নমো হন্তেন। প্রকৃত্যৈ কূর্ম্মায অনন্তায পৃথিব্যৈ ক্ষীরসমু-

ম্নায রত্নদীপায রত্নোজ্জ্বল সহিত| মহানন্দিপায কল্পবৃক্ষায রত্ন বেদিকায়ৈ রত্নসিংহাসনায। আ-গ্নেয্যাং ধর্ম্মায নৈর্ঋত্যাং জ্ঞানায বায়ব্যাং বৈরাগ্যায ঐশান্যাং ঐশ্ব-র্য্যায পূর্ব্বস্যাং অধর্ম্মায পশ্চিমায়াং অবৈরাগ্যায উত্তরস্যাং অনৈশ্বর্য্যা-য। মধ্যে অং অর্কমণ্ডলায উং সো-মমণ্ডলায মং বহ্নিমণ্ডলায। সং সত্ত্বায রং রজসে তং তমসে। আং আত্মনে অং অন্তরাত্মনে পং পরমা-ত্মনে হ্রীং জ্ঞানাত্মনে। পূর্ব্বাদিকেশ-রেষু প্রাদক্ষিণ্যেন ওঁ বিমলায়ৈ নমঃ। এবং উৎকর্ষিণ্যৈ জ্ঞানায়ৈ ক্রিযা-য়ৈ যোগায়ৈ প্রহ্বে সত্যায়ৈ ঈশা-নায়ৈ। কর্ণিকাযাং অনুগ্রহায়ৈ। ক-র্ণিকোপরি ওঁ নমো ভগবতে বিষ্ণবে সর্ব্ব ভূতাত্মনে বাসুদেবায সর্ব্বাত্ম সংযোগ যোগপীঠাত্মনে নমঃ। ❀। ততো মণ্ডলে দেবং সংস্থাপ্য পৌ-রাণিক মন্ত্রেণ পুরুষসূক্তেন বা ষো-ডশোপচারৈঃ পূজযেৎ। তদ্যথা। ওঁ সহস্র শীর্ষা পুরুষঃ সহস্রাক্ষঃ স-হস্রপাৎ। স ভূমিং সর্ব্বতো বৃত্বা অত্যতিষ্ঠদ্দশাঙ্গুলং ১। সর্ব্বতঃ স্থানে বিশ্বতঃ বৃত্বা স্থানে স্পৃত্বা ই-ত্যপি পাঠঃ। ইতি পঠিত্বা ভগবন্

বিষ্ণো ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইহ স-ন্নিরুদ্ধস্ব মম পূজাং গৃহাণ। ততো যথাবিধ্যাসনমানীয বহ্নির্নিবরুণ-বীজেনার্ঘ্যাম্ভসা সংপ্রোক্ষ্যাসন ম-ভ্যর্চ্চ্য ওঁ পুরুষ এবেদং সর্ব্বং যদ্ভূ-তং যচ্চ ভাব্যং উতামৃতত্বস্যেশানো যদন্নেনাতিরোহতি ২। ইতি পঠিত্বা ইদ মমুকাসনং ওঁ নমো ভগবতে বাসুদেবায শ্রীবিষ্ণবে নমঃ। এবং সর্ব্বত্র দানে। ওঁ ভগবন্ বিষ্ণো স্বা-গতং। ইতি স্বাগত প্রশ্নঃ। তত স্তাম্র পাত্রস্থং পদ্ম শ্যামাক দূর্ব্বাপরা-জিতাদি যুক্তং জলং গৃহীত্বা ওঁ এ-তাবানস্য মহিমাতো জ্যাযাংশ্চ পু-রুষঃ পাদোস্য বিশ্বা ভূতানি ত্রি-পাদস্যামৃতং দিবি ৩। ইতি পঠিত্বা ইদং পাদ্যং পূর্ব্বমন্ত্রেন পাদযো-র্দ্দদ্যাৎ। ততো গন্ধ পুষ্পাক্ষত যব কুশাগ্র তিল সর্ষপ দূর্ব্বাযুক্ত জলং শঙ্খাদি পাত্রে কৃত্বা ওঁ ত্রিপাদূর্দ্ধ্ব উ-দৈৎ পুরুষঃ পাদো হস্যেহা ভবৎ পুনঃ। ততো বিশ্বঙ্ব্যক্রামৎ শাস-নানশনে অভি ৪। ততঃ স্থানে তস্মা-দিত্যপি পাঠঃ। ইতি পঠিত্বা সাম-গানামিদ মর্ঘ্য মন্যেষ্মা মেষো ২র্ঘঃ ইতি শিরসি দদ্যাৎ। জাতী লবঙ্গ কক্কোল যক্ত কেবলং বা পাত্রস্থং জ-

জং গৃহীত্বা ওঁ ততো বিরাড়জায়ত বিরাজো অধিপূরুষঃ স জাতো অত্য রিচ্যত পশ্চাদ্ভূমি মথো পুরঃ৫। ইতি পঠিত্বা ইদমাচমনীয়ং ওঁ নমো ভগবতে বাসুদেবায় শ্রীবিষ্ণবে স্বধা ইতি দদ্যাৎ। ততঃ কাংস্যপাত্রস্থং দধি মধু ঘৃতাত্মকং কাংস্যেন পিহিতং মধুপর্কং গৃহীত্বা ওঁ তস্মাদ্যজ্ঞাৎ সর্ব্বহুতঃ সম্ভৃতং পৃষদাজ্যং পশূংস্তাংশ্চক্রে বায়ব্যানারণ্যা গ্রাম্যাশ্চ যে ৬। ইতি পঠিত্বা এষ মধুপর্কঃ ওঁ নমো ভগবতে বাসুদেবায় শ্রীবিষ্ণবে স্বাহা ইতি দদ্যাৎ। ততঃ পূর্ব্বমন্ত্রং পঠিত্বা পুনরাচমনীয়ঞ্চ দদ্যাৎ। কর্পূর বাসিত জলং গৃহীত্বা ওঁ তস্মাদ্যজ্ঞাৎ সর্ব্বহুত ঋচঃ সামানি জজ্ঞিরে ছন্দাংসি জজ্ঞিরে তস্মাদ্যজুস্তস্মাদজায়ত ৭। ইতি পঠিত্বা ইদং স্নানীয় জলং মূলেন দদ্যাৎ। পূর্ব্ববৎ পুনরাচমনীয়ং দত্ত্বা বস্ত্রং গৃহীত্বা ওঁ তস্মাদশ্বা অজায়ন্ত যে কেচো ভয়াদতঃ গাবোহ জজ্ঞিরে তস্মাত্তস্মাজ্জাতা অজাবয়ঃ ৮। ইতি পঠিত্বা ইদং বস্ত্রং মূলেন দদ্যাৎ। এবমুত্তরীয়বস্ত্রং যজ্ঞোপবীতং পূর্ব্ববদাচমনীয়ং দত্ত্বা আভরণং গৃহীত্বা ওঁ তং যজ্ঞং বর্হিষি প্রৌক্ষন পুরুষং জাতমগ্রতঃ। তেন দেবা অযজন্ত সাধ্যা ঋষয়শ্চ যে ৯। ইতি পঠিত্বা মূলেন দদ্যাৎ। ওঁ যৎ পুরুষং ব্যদধুঃ কতিধা ব্যকল্পয়ন্ মুখং কি মস্যাসীৎ কিং বাহূ কিমূরু পাদা উচ্যেতে ১০। ঋগ্বেদস্যাশ্বলায়ন শাখায়ান্তু মুখং কিমস্যকৌ বাহূ কাবূরূ পাদা উচ্যেতে ইতি ভেদঃ। ইতি পঠিত্বা মূলেন গন্ধং দদ্যাৎ। ওঁ ব্রাহ্মণো ঽস্য মুখমাসীৎ বাহূ রাজন্যঃ কৃতঃ। উরূ তদস্য যদ্বৈশ্যঃ পদ্ভ্যাং শূদ্রো অজায়ত ১১। ইতি পঠিত্বা মূলেন পুষ্পং দদ্যাৎ। ওঁ চন্দ্রমা মনসো জাত শ্চক্ষোঃ সূর্য্যো অজায়ত। শ্রোত্রাদ্বায়ুশ্চ প্রাণশ্চ মুখাদগ্নি রজায়ত ১২। মুখাদিন্দ্রশ্চাগ্নিশ্চ প্রাণাদ্বায়ু রজায়ত ইতি চ পাঠঃ। ইতি পঠিত্বা মূলেন ধূপং দদ্যাৎ। ওঁ না ভ্যা আসীদন্তরিক্ষং শীর্ষ্ণো দ্যৌঃ সমবর্ত্তত। পদ্ভ্যাং ভূমি দিশঃ শ্রোত্রাত্তথা লোকান্ কল্পয়ন ১৩। ইতি পঠিত্বা মূলেন দীপং দদ্যাৎ। ততো নৈবেদ্যোপরি মৎস্য মুদ্রয়া মূলমন্ত্রং দশধা জপ্ত্বাভ্যর্চ্য ধেনুমুদ্রাং প্রদর্শ্য ওঁ যৎ পুরুষেণ হবিষা দেবা যজ্ঞ মতন্বত। বসন্তো ঽস্যাসীদাজ্যং গ্রীষ্ম ইধ্মঃ শরদ্ধবিঃ ১৪। ইতি পঠিত্বা নৈবেদ্যং মূলেন

দদ্যাৎ। ওঁ সপ্তাস্যাসন্ পরিধয় স্ত্রিঃ সপ্ত সমিধঃ কৃতাঃ। দেবা যদ্যজ্ঞং তন্বানা অবধ্নন্ পুরুষং পশুং ১৫। ইতি পঠিত্বা কর্পূরাদি বাসিতং পানীয়ং তাম্বূলং পুনরাচমনীয়ং দর্পণঞ্চ দদ্যাৎ। ওঁ যজ্ঞেন যজ্ঞমযজন্ত দেবা স্তানি ধর্ম্মাণি প্রথমান্যাসন্। তেহ নাকং মহিমানঃ সচন্ত যত্র পূর্ব্বে সাধ্যাঃ সন্তি দেবাঃ ১৬। ইতি পঠিত্বাঞ্জলি ত্রয়ং পুষ্পং দত্বা আবরণানি সংপূজ্য মূলমন্ত্রং যথাশক্তি জপ্ত্বা প্রণমেৎ। *। ঋগ্বেদস্যাশ্বলায়ন শাখাযাস্তু যৎ পুরুষেণ হবিষা ইত্যাদিনা স্নানীয়ং ৬ তং যজ্ঞং বর্হিষীত্যাদিনা বস্ত্রং ৭ তস্মাৎ যজ্ঞাৎ সর্ব্বহুতঃ সংভৃত মিত্যাদিনা যজ্ঞোপবীতং ৮ তস্মাৎ যজ্ঞাৎ সর্ব্বহুত ঋচঃ সামানীত্যাদিনা চন্দনং ৯ তস্মাদশ্বা অজায়ন্ত ইত্যাদিনা পুষ্পং ১০ যৎ পুরুষং ব্যদধু রিত্যাদিনা ধূপং ১১ ব্রাহ্মণোস্য মুখমাসীদিত্যাদিনা দীপং ১২ চন্দ্রমা মনসো জাত ইত্যাদিনা নৈবেদ্যং ১৩ নাভ্যা আসীদন্তরিক্ষমিত্যাদিনা তাম্বুলং ১৪ সপ্তাস্যাসন্ পরিধয় ইত্যাদিনা নীরাজনং ১৫ ইতি ভেদঃ অন্যৎ সমানং। *। ততো গুরুঃ মণ্ডপ পশ্চিমে উপবিশ্য মণ্ডপ স্থণ্ডিলে বা ব্রাহ্ম বিধিনা তদজ্ঞানে স্বগৃহোক্ত বিধিনা সাহস নামান মগ্নিং সংস্থাপ্য ব্রহ্মস্থাপনানন্তরং অভিষেকার্থং ঐশান্যাং নব ব্রণ মশ্যামং বহি র্দধ্যক্ষত ভূমিতং চূতাশ্বত্থ ন্যগ্রোধোডুম্বর প্লক্ষ পল্লবচ্ছন্ন মুখং ফল বস্ত্র যুতং অন্তঃ ক্ষিপ্ত পঞ্চরত্নং নির্ম্মল জলপূর্ণং দৃঢ় কলসং অক্ষতানামুপরি ওঁ আজিঘ্র কলস মিত্যাদি মন্ত্রেণ স্থাপয়েৎ। তত্র বরুণস্যোত্তম্ভ নমসীতি বরুণং ন্যসেৎ। ওঁ গঙ্গাদ্যাঃ সরিতঃ সর্ব্বাঃ সমুদ্রাশ্চ সরাংসি চ। সর্ব্বে সমুদ্রাঃ সরিত স্তীর্থানি জলদানদাঃ। আযান্তু যজমানস্য দুরিতক্ষয় কারকাঃ। ইতি তীর্থানি চ ন্যসেৎ। তত্রৈব কলসে অশ্বস্থানাদ্গজস্থানাৎ বল্মীকাৎ সঙ্গমাৎ হ্রদাৎ গোষ্ঠাৎ রথ্যায়া আনীয় সপ্ত মৃদঃ ক্ষিপেৎ। সর্ব্বৌষধীশ্চ। *। ততশ্চরুশ্রপণং কুর্য্যাৎ। অগ্নে রুত্তরে দ্ব্যঙ্গুল বিস্তারাগ্রাং প্রাদেশপরিমিতোডুম্বর নির্ম্মিত দর্ব্বীং অর্দ্ধাঙ্গুষ্ঠ বিস্তারাগ্রাং প্রাদেশ পরিমিতোডুম্বর নির্ম্মিতমেক্ষণং চরুস্থালী আজ্যস্থালী উদূখল মুষলে স্রুবং পূর্ণহোমার্থং স্রুচং সমিধং আজ্যাদীনি উদগগ্রাণি প্রাক্ প্রাক্ বিন্যস্য যাগ ক্রমেণাসাদয়েৎ।

সংস্থাপ্য যবান্ ব্রীহীন্ বা তদভাবে তণ্ডুলান্ শূর্পে নিধায় । সামগঃ । ওঁ বিষ্ণবে ত্বা জুষ্টং নির্ব্বপামি । ইতি যবাদি প্রভৃতি মেকাং চরুস্থাল্যাং কৃত্বা উদূখল মধ্যে স্থাপয়েৎ । যজুর্ব্বেদী তু ওঁ বিষ্ণবে ত্বা জুষ্টং গৃহ্লামি ওঁ বিষ্ণবে ত্বা জুষ্টং নির্ব্বপামি চমসস্থ জলেন ওঁ বিষ্ণবে ত্বা জুষ্টং প্রোক্ষামীতি ত্রযং কুর্য্যাৎ । ঋগ্বেদী তু ওঁ বিষ্ণবে ত্বা জুষ্টং নির্ব্বপামি ওঁ বিষ্ণবে ত্বা জুষ্টং প্রোক্ষামীতি নির্ব্বাপ প্রোক্ষণ মাত্রং । যস্য গৃহ প্রতিষ্ঠা তস্যাদৌ জুষ্ট গ্রহণং । এবং সর্ব্বত্র । এবমগ্ন্যাদিষু । ওঁ অগ্নযে ত্বা জুষ্টং নির্ব্বপামি এবং বাযবে সূর্য্যায দ্বিঃ বিষ্ণবে দ্বিঃ অগ্নযে বাযবে পুনরগ্নযে বরুণায পুনরপি অগ্নযে সূর্য্যায প্রজাপতযে অন্তরীক্ষায দ্যবে ব্রহ্মণে পৃথিব্যৈ মহারাজায সোমায ইন্দ্রায অগ্নযে যমায নৈর্ঋতায বরুণায বাযবে কুবেরায ঈশানায ব্রহ্মণে অনন্তায আদিত্যায সোমায মঙ্গলায বুধায বৃহস্পতযে শুক্রায শনৈশ্চরায রাহবে কেতুভ্য ইত্থং নব ত্রিংশৎ প্রসৃতীঃ স্থাপযেৎ । দ্বি স্তর্য্যাং উপরি কৃত দক্ষিণ বাম মুষ্টিভ্যাং মুষলেনাবহত্য শূর্পেণ প্রস্ফোটযেৎ । এবমপর বারদ্বয় মবহত্য শূর্পেণ প্রস্ফোটযেৎ । তথা কর্ত্তব্যং যথা বার ত্রযেণ তণ্ডুল নিষ্পত্তি র্ভবতি । তদশক্তৌ সংস্কারমাত্রার্থং তণ্ডুলেষ্বেবং । তত তণ্ডুলান্ ত্রিঃ প্রক্ষাল্য চরুস্থাল্যা মমন্ত্রকং কৃতোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য তত্র তণ্ডুলান্ নিধায কপিলাযা দুগ্ধং নিঃক্ষিপ্য তদভাবে অন্য ধেনো দুগ্ধং নিঃক্ষিপ্য দর্ব্ব্যাং প্রাগাদি প্রদক্ষিণ মীষদ্দর্ব্ব মবঘট্টযং স্তথা পচেৎ যথা দাহ কাঠিন্যাতিশৈথিল্য মণ্ডগালন রহিতো হস্তকৃষ্ম পক্ব শ্চরু র্ভবতি । জ্বলদুল্মুকেন স্থালী মধ্যস্থং চরুং দৃষ্ট্বা ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সুরযঃ দিবীব চক্ষু রাততমিত্যনেন মন্ত্রেণ ওঁমিত্যনেনচ ঘৃতেন সিক্ত্বা দর্ব্ব্যা দক্ষিণাবর্ত্তেন সংমিশ্রযেৎ । ততো বহ্নে রুত্তরতো হবতার্য্য পুনর্জ্বলদুল্মুকেন স্থালী মধ্যস্থং দৃষ্ট্বা পুন র্ঘৃতেনাভিঘারযেৎ । * । ততঃ পর্য্যুক্ষণান্তাং কুশণ্ডিকাং সমাপ্য সমমণস্ত কাম্য কর্ম্মাঙ্গত্বেন তপশ্চ তেজশ্চ শ্রদ্ধাচ হ্রীশ্চ সত্যঞ্চা ক্রোধশ্চ ত্যাগশ্চ ধৃতিশ্চ ধর্ম্মশ্চ সত্ত্বঞ্চ বাক্‌চ মনশ্চাত্মা চ ব্রহ্মচ তানি প্রপদ্যেতানি মামবন্তু । ইতি জপিত্বা

বিরূপাক্ষ জপং কুর্য্যাৎ। ততঃ শুক্র
ক্রে কর্ম্মণি ওঁ পিঙ্গভ্রূ শ্মশ্রু কেশাক্ষঃ
পীনাঙ্গ জঠরোরুণঃ। ছাগস্থঃ সাক্ষ
সূত্রো হগ্নিঃ সপ্তার্চিঃ শক্তিধারকঃ ॥
ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা বিষ্ণবে
প্রাপ্রতিষ্ঠা কর্ম্মণি অগ্নের্ত্বং সাহস না
মাসীতি নাম কৃত্বা বাহ্য সংপূজ্য প্রা-
দেশ প্রমাণাং ঘৃতাক্তাং সমিধং তুষ্ণী
মগ্নৌ হুত্বা মেক্ষণেন চরুং গৃহীত্বা ওঁ
তদ্বিষ্ণো রিত্যাদি স্বাহান্তেন জুহুযাৎ
সর্ব্বত্র সামগানাং মন্ত্রান্তে দেবতো-
দ্দেশো নাস্তি। অন্যেষাং ইদং বিষ্ণ
বে ইতি। ওঁ ভূঃ স্বাহা ইদমগ্নয়ে ওঁ
ভুবঃ স্বাহা ইদং বাযবে ওঁ স্বঃ স্বাহা
ইদং সূর্য্যায ওঁ ভূর্ভুবঃ স্বঃ তৎ সবি
তু র্ব্বরেণ্যং ভর্গো দেবস্য ধীমহি।
ধিযো যো নঃ প্রচোদযাৎ স্বাহা ই
দং সূর্য্যায। ওঁ তদ্বিপ্রাসো বিপন্য-
বো জাগৃবাংসঃ সমিন্ধতে বিষ্ণো র্যৎ
পরমং পদং স্বাহা ইদং বিষ্ণবে। ওঁ
বিশ্বত শ্চক্ষুরুত বিশ্বতো মুখো বি
শ্বতো বাহুরুত বিশ্বতস্পাৎ সংবা
হুভ্যাং ধমতি সংপতত্রৈ র্দ্যাবা ভূ
মী জনযন্ দেবএকঃ স্বাহা ইদং বি
ষ্ণবে। ওঁ অগ্নিমীলে পুরোহিতং য
জ্ঞস্য দেব মৃত্বিজং হোতারং রত্ন ধা
তমং স্বাহা ইদমগ্নয়ে। ওঁ ইষেত্বো
র্জ্জেত্বা বাযবস্থ দেবো বঃ সবিতা প্রা-
র্পযতু শ্রেষ্ঠতমায কর্ম্মণে স্বাহা ই-
দং বাযবে। ওঁ অগ্ন আযাহি বীতযে
গৃণানো হব্যদাতয়ে নিহোতা সৎ
সি বর্হিষি স্বাহা ইদমগ্নয়ে। ওঁ শ-
ন্নো দেবী রভীষ্টয়ে শন্নোভবন্তু পী-
তযে শংযো রভিস্রবন্তু নঃ স্বাহা
ইদং বরুণায। ওঁ ভূ রগ্নয়ে স্বাহা ওঁ
সূর্য্যায স্বাহা ওঁ প্রজাপতয়ে স্বাহা
ওঁ অন্তরীক্ষায স্বাহা ওঁ দ্যৌঃ স্বাহা
ওঁ ব্রহ্মণে স্বাহা ওঁ পৃথিব্যৈ স্বাহা
ওঁ মহারাজায স্বাহা এয়পি সাম-
গেতরৈ স্তত্তদ্দেবতোদ্দেশঃ পশ্চাৎ
কার্য্যঃ। ওঁ সোমং রাজানং বরুণ
মগ্নি মন্বা রভামহে আদিত্যং বি-
ষ্ণুং সূর্য্যং ব্রহ্মাণঞ্চ বৃহস্পতিং স্বাহা
ইদং সোমায। *। ততো দিক্পাল
হোমঃ। ওঁ ত্রাতার মিন্দ্র মবিতা-
র মিন্দ্রং হবে হবে সুহবং সূর মিন্দ্রং
হ্বযামি শক্রং পুরুহূত মিন্দ্রং স্বস্তি-
নো মঘবা ধাত্বিন্দ্রঃ স্বাহা ইদমিন্দ্রা
য। ওঁ অগ্নিং দূতং বৃণীমহে হোতা-
রং বিশ্ববেদসং অস্য যজ্ঞস্য সুক্রতুং
স্বাহা ইদমগ্নয়ে। ওঁ নাকে সুপর্ণ
মুপযৎ পতন্তং হৃদাবেনন্তো অভ্যচ-
ক্ষত ত্বা হিরণ্য পক্ষং বরুণস্য দূতং
যমস্য যোনৌ শকুনং ভুরণ্যং স্বাহা

ইদং যমায। ওঁ বেথ্যা হি নিঋতী- না বজ্রহস্তঃ পরিব্রজং অহরহঃ স্রি- ন্ধু পরিপদঃ মিব স্বাহা ইদং নিঋ- তায। ওঁ ধৃতবতী ভবনানাং মভি শ্রিযোর্ব্বী পৃথ্বী মধুদুযে সুপেশসা- দ্যাবা পৃথিবী বরুণস্য ধর্ম্মণা বিষ্ক- ভিতে অজরে ভূরিরেতসা স্বাহা ইদং বরুণায। ওঁ বাত আবাতু ভেষজং শম্ভুময়ো ভুনো হৃদে প্রণ আযূংষি- তারিষৎ স্বাহা ইদং বাযবে। ওঁ সোমং রাজানং বরুণমগ্নি মন্বারভা- মহে আদিত্যং বিষ্ণুং সূর্য্যং ব্রহ্মাণঞ্চ বৃহস্পতিং স্বাহা ইদং সোমায। ওঁ অভিত্বা শূরণোনুমো হদুগ্ধা ইব ধেনবঃ। ঈশান মস্য জগতঃ স্বদৃশ মীশান মিন্দ্র তস্থুষঃ স্বাহা ইদমী- শানায। ওঁ ব্রহ্মযজ্ঞানং প্রথমং পুরস্তাদ্বিসী মতঃ সুরুচো বেণ আবঃ। সুবধ্ন্যা উপমা অস্য বিষ্টাঃ সত- শ্চ যোনি মসতশ্চ বিবঃ স্বাহা ইদং ব্রহ্মণে। ওঁ চর্ষণীধৃতং মঘবান মুক্- থ্যা মিন্দ্রং গিরো বৃহতী রভ্যনূযত বাবৃধানং পুরুহূতং সুবৃক্তিভি রম- র্ত্ত্যং জরমানং দিবে দিবে স্বাহা। ইদমনন্তায। ইতি সামগো জুহুযাৎ। তত্তদ্দেবতোদ্দেশস্ত্ব ন কর্ত্তব্যঃ। ত- স্তদ্দেবতা প্রকাশাদেব দেবতা বি- শেষা উক্তাঃ। *। যজুর্ব্বেদীতু। ওঁ ত্রাতার মিন্দ্র মবিতার মিন্দ্রগুঁ হবে হবে সুহবগুঁ সূরমিন্দ্রং হুবেনু শক্রং পুরুহূত মিন্দ্রগুঁ স্বস্তিনো মঘবা ধা- ত্বিন্দ্রঃ স্বাহা ইদ মিন্দ্রায। ওঁ বৈ- শ্বানরো ন উতয আপ্রযাতু পরাবতঃ অগ্নিরুকথেন বাহসা উপযাম গৃহী- তোসি বৈশ্বানরায ধ্রুবতে যোনি র্ব্বৈশ্বানরায ত্বা স্বাহা ইদমগ্নয়ে। ওঁ অসিযমো হস্যাদিত্যো হর্ব্বন- সি ত্রিতো গুহ্যেন ব্রতেন অসি সো- মেন সমযাবিপৃক্ত আহু স্তে ত্রীণি দিবি বন্ধনানি স্বাহা ইদং যমায। ওঁ য স্তে দেবী নির্ঋতি রাববন্ধ পা- শং গ্রীবাসু বিশৃত্যং তস্তে বিষাম্যা- যুষো নমধ্যা দথৈতং পিতুমদ্ধি প্রসূ- তঃ। নমো ভূত্যৈ এদঞ্চকার স্বাহা। ইদং নির্ঋতয়ে ॥ শাখান্তরেতু ওঁ যস্তে দেবী নিঋতি রাববন্ধ দাস গ্রী- বা স্ববিচ শুর্ত্ত্যং ইদন্তে তদ্বিষ্যাম্যা- যুষো নমধ্যাদথা জীবঃ পিতু মদ্ধি প্রমুক্ত স্বাহা ইদং নিঋতয়ে। ওঁ বরুণস্যোত্তম্ভন মসি বরুণস্য স্কম্ভ সর্জনীস্থঃ বরুণস্য ঋত সদন্যসি বরু- ণস্য ঋত সদন মসি বরুণস্য ঋত- সদনী মাসীদ স্বাহা ইদং বরুণায। ওঁ বাতো বাবো মনো বা গন্ধর্ব্বাঃ

সপ্তবিংশতি স্তে হগ্রে সমযুঞ্জঙুঁ স্তে
হস্মিন্ যবমা দধুঃ স্বাহা ইদং বাযবে
। ওঁ হবিদঙ্গবনন্তো যবক্ষিদ্ব্যথা
দান্ত্যনুপূর্ব্বং বিযূয়ং । ইহে হৈষাং
কৃণুহি ভোজনানি যে বর্হিষো নম উ-
ক্তিং নজগ্মুঃ স্বাহা ইদং কুবেরায। ওঁ
তমীশানং জগতস্তস্থুষস্পতিং ধিয়ং
জিন্নমবসে হূমহে বয়ং। পূষাণো যথা
বেদসামসদ্বৃধে রক্ষিতা পাযু রদব্ধ
স্বস্তয়ে স্বাহা ইদমীশানায। ওঁ আ-
ব্রহ্মন্ ব্রাহ্মণো ব্রহ্মবর্চসী জাযতা মা-
রাষ্ট্রে রাজন্য শূর ইষব্যোতি ব্যাধী
মহারথো জাযতাং ইদং ব্রহ্মণে। ওঁ
নমো হস্ত সর্পেভ্যো যেকেচ পৃথিবী
মনু যে অন্তরীক্ষে যে দিবিতেভ্যঃ স-
র্পেভ্যো নমঃ স্বাহা ইদমনন্তায। ❁।
ঋগ্বেদী তু। ওঁ ত্রাতার মিন্দ্র মবিতার
মিন্দ্রং হবে হবে সুহবং শূরমিন্দ্রং হ্ব-
যামি শক্রং পুরুহূত মিন্দ্রং স্বস্তি নো-
মঘবা ধাত্বিন্দ্রঃ স্বাহা ইদমিন্দ্রায।
ওঁ অগ্নিং দূতং পুরোদধে হব্যবাহ
মুপব্রুবে দেবা আসাদযাদিহ স্বাহা
ইদমগ্নয়ে। ওঁ যমায সোমং সুনুত
যমায জুহুতা হবিঃ যমং হ যজ্ঞো
গচ্ছত্যগ্নি দূতো অরংকৃতঃ স্বাহা ই-
দং যমায। ওঁ এষতে নির্ঋতে ভাগ-
স্তং জুষস্ব স্বাহা অগ্নিনেত্রেভ্যো দে-
বেভ্যঃ পুরঃ সদ্ভ্যঃ স্বাহা যমনেত্রে-
ভ্যো দক্ষিণা সদ্ভ্যঃ বিশ্বদেব নেত্রে-
ভ্যঃ দেবেভ্যঃ স্বাহা পশ্চাৎ সদ্ভ্যঃ
স্বাহা মিত্রাবরুণ নেত্রেভ্যো দেবা
মাদাবয্য উষর্বা সদ্ভ্যঃ স্বাহা সোম
নেত্রেভ্যো দেবেভ্য উপবিশদ্ভ্যো
দুরঃ সদ্ভ্যঃ স্বাহা ইদং নির্ঋতায।
আশ্বলাযন শাখাযান্ত ওঁমোষুণঃ
পরাপরা নির্ঋতি দুর্হণাবধীত্। প-
দীষ্ট তৃষ্ণযাসহ স্বাহা ইদং নৈর্ঋতায
। ওঁ তত্ত্বাযামি ব্রহ্মণা বন্দমানস্ত-
দাশাস্তে যজমানো হবির্ভিঃ। অহে-
ড মানো বরুণে হবোধ্যুরুশং সমা-
নআযুঃ প্রমোষী স্বাহা ইদং বরুণায
। ওঁ বাতো বাবো মনো বা গন্ধর্ব্বাঃ
সপ্তবিংশতি স্তেগ্রে হশ্বমযুঞ্জং স্তে
হস্মিন্ যবমাদধুঃ স্বাহা। ইদং ব-
যবে । আশ্বলাযন শাখাযান্ত ওঁ
তব বায বৃতস্যতে ত্বষ্টু র্জামাতর-
দ্ভুত । অবাংস্যা বৃণীমহে স্বাহা
ইদং বাযবে। ওঁ হবিদঙ্গযবমন্তো
যবক্ষিদ্ব্যথা দান্ত্যনুপূর্ব্বং বিযূয ইহে
হৈষাং কৃণুহি ভোজনানি যে বর্হি-
ষো নমো বৃক্তিং নজগ্মুঃ স্বাহা ইদং
কুবেরায। ওঁতমীশানং জগত স্তস্থু-
ষস্পতিং ধিয়ং জিন্ন মবসে হূমহে
বয়ং পূষাণো যথা বেদ সা নসদ্বৃধে

রক্ষিতা পায় রদব্ধ স্বস্তয়ে স্বাহা॥ ইদমীশানায়। ওঁ ব্রহ্মজজ্ঞানং প্রথমং পুরস্তাদ্বিষীমত সুরুচো বেন আবঃ স্ববুধ্ন্যা উপমা অস্য বিষ্ঠা সতশ্চ যোনি মসতশ্চ বিবঃ স্বাহা ইদং ব্রহ্মণে। ওঁ নমো হস্তু সর্পেভ্যো যেকেচ পৃথিবী মনু যে হন্তরীক্ষে যে দিবি তেভ্যঃ সর্পেভ্যো নমঃ স্বাহা ইদমনন্তায়। *। ততো নবগ্রহ হোমঃ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ হিরণ্যযেন সবিতা রথেনা দেবো যাতি ভুবনানি পশ্যন্ স্বাহা। ওঁ আপ্যায়স্ব সমেত তে বিশ্বতঃ সোমবৃষ্ণ্যং ভবাবাজস্য সঙ্গথে স্বাহা। ওঁ অগ্নি মূর্দ্ধা দিবঃ কক্সৎপতিঃ পৃথিব্যা অযং অপাং রেতাংসি জিন্নতি স্বাহা। ওঁ অগ্নে বিবস্ব দুষসশ্চিত্রং রাধোহমর্ত্ত্য আদাশুষে জাতবেদো বহা ত্বমদ্যা দেবাং উষর্বুধঃ স্বাহা। ওঁ বৃহস্পতে পরিদীয়া রথেন রক্ষোহা মিত্রাং অপবাধ মানঃ প্রভঞ্জৎসেনা প্রমৃণো যুধা যজন্নস্মাক মেধ্যবিতা রথানাং স্বাহা। ওঁ শুক্রন্তে হন্যদ্ যজতন্তে অন্যদ্বিষুরূপে অহনী দ্যৌ রিবাসি বিশ্বা হি মায়া অবসি স্বধাবন্ ভদ্রাতে পূষন্নিহ রাতিরস্তু স্বাহা। ওঁ শন্নোদেবী রভীষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযো রভিস্রবন্তু নঃ স্বাহা। ওঁ কয়ান শ্চিত্র আভুব দূতী সদা বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা স্বাহা। ওঁ কেতুং কৃন্বন্নকেতবে পেশো মর্য্যা অপেশসে সমুসদ্ভি রজায়থাঃ স্বাহা। *। যজুর্ব্বেদী তু। ওঁ আকৃষ্ণেনেত্যাদি ইদং সূর্য্যায়। ওঁ ইমং দেবা অসপত্নং সুবন্ধং মহতে ক্ষত্রায় মহতে জ্যৈষ্ঠায় ইম মমু মমুষ্য পুত্র মমুষ্যাঃ পুত্র মস্যৈ বিশে স্বাহা। ইদং সোমায়। ওঁ অগ্নি মূর্দ্ধা দিবঃ কক্সৎপতিঃ পৃথিব্যা অযং অপাংসি রেতাংসি জিন্নতি স্বাহা। ইদং মঙ্গলায়। ওঁ উদ্বুধ্য স্বাগ্নে প্রতিজাগৃহি ত্ব মিষ্টাপূর্ত্তে সংসৃজেথাময়ঞ্চ। অস্মিন্ সধস্থে অধ্যুত্তরস্মিন বিশ্বে দেবা যজমানশ্চ সীদত স্বাহা। ইদং বুধায়। ওঁ বৃহস্পতে অতি যদর্য্যো অর্হাদ্যমদ্বিভাতি ক্রতুমজ্জনেষু। যদ্দীদয় চ্ছবস ঋত প্রজাত তদস্মাসু দ্রবিণং ধেহি চিত্রং স্বাহা। ইদং বৃহস্পতয়ে। ওঁ অন্নাৎ পরিস্রুতো রসং ব্রহ্মণা ব্যপিবৎ ক্ষত্রং পযঃ সোমং প্রজাপতিঃ। ঋতেন সত্য মিন্দ্রিয় বিপানং শুক্রমন্ধসঃ। ইন্দ্রস্যেন্দ্রিয় মিদং পযোমৃতং মধু স্বাহা।

ইদং শূরায়। ওঁ শম্নোদেবীরভীষ্টয়ে আপো ভবন্তু পীতয়ে শংযো রভি স্রবন্তু নঃ স্বাহা। ইদং শনৈশ্চরায়। ওঁ কাণ্ডাৎ কাণ্ডাৎ প্ররোহন্তী পরুষঃ পরুষঃ পরি এবানো দূর্ব্বে প্রতনু সহস্রেণ শতেন চ স্বাহা। ইদং রাহবে। ওঁ কেতুং কৃন্বন্নকেতবে পেষো মর্য্যা অপেশসে। সমুসদ্ভি রজায়থাঃ স্বাহা। ইদং কেতুভ্যঃ॥ ঋগ্বেদীতু এভিরেব মন্ত্রৈ র্জুহুয়াৎ। *। ততো মেক্ষণ মাগৌ প্রক্ষিপেৎ। এবং চরু হোমং সমাপ্য চরুশেষেণ দিগ্ভ্যো বলিন্দদ্যাৎ। তদ্যথা। এষ পায়স বলিঃ ওঁ প্রাচ্যৈ দিশে নমঃ। এবমাগ্নেয্যৈ অবাচ্যৈ নৈঋ তৈ্য প্রতীচ্যৈ বায়ব্যৈ উদীচ্যৈ ঐশান্যৈ উর্দ্ধ দিশে অধোদিশে। *। ততো ঘৃতাক্ত পলাশ সমিধা অষ্টোত্তরশতং জুহুয়াদনেন মন্ত্রেণ। ওঁ তদ্বিষ্ণোরিত্যাদি স্বাহা ইদং বিষ্ণবে। ততঃ পূর্ব্বোক্তে শচরুহোমমন্ত্রৈ স্তত্তদ্দেবতাভ্যঃ পুনরেবাজ্যাহুতী র্জুহুয়াৎ। তত আজ্যেন পুরুষসূক্ত নবভি র্ম্মন্ত্রৈঃ সামগো জুহুয়াৎ। যথা। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে স্বাহা ১। ওঁ প্রক্ষস্য বিষ্ণোরুরুবস্য নূনসঃ প্রণবোচবিদথা জাতবেদসঃ বৈশ্বানরায় মতি র্নব্যসি শুচিঃ সোম ইব পবতে চারু রগ্নয়ে স্বাহা ২। ওঁ প্রকাব্য মুশনেব ব্রুবাণো দেবো দেবানাং জনিমা বিবক্তি মহিব্রতঃ শুচিবন্ধুঃ পাবকঃ পদা বরাহো ত্যেতি রেভন্ স্বাহা ৩। ওঁ সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ। স ভূমিং সর্ব্বতো বৃত্বা অত্যতিষ্ঠদ্দশাঙ্গুলং স্বাহা ৪। ওঁ ত্রিপাদূর্দ্ধ মুদৈৎ পুরুষঃ পাদো ঽস্যেহা ভবৎ পুনঃ। ততো বিশ্বং ব্যক্রামৎ শাসনানশনে অভি স্বাহা ৫। ওঁ পুরুষ এবেদং সর্ব্বং যদ্ভূতং যচ্চ ভব্যং উতামৃত ত্বস্যেশানো যদন্নেনাতিরোহতি স্বাহা ৬। ওঁ এতাবানস্য মহিমাতো জ্যায়াংশ্চ পুরুষঃ পাদো ঽস্য বিশ্বা ভূতানি ত্রিপাদস্যা মৃতং দিবি স্বাহা ৭। ওঁ ততো বিরাডজায়ত বিরাজো অধিপূরুষঃ। স জাতো অত্যরিচ্যত পশ্চাদ্ভূমি মথো পুরঃ স্বাহা। ৮। ওঁ কয়ান শ্চিত্র আভুব দূতী সদা বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা স্বাহা ৯। *। যজুর্ব্বেদীতু। ষোড়শোপচারপূজোক্ত পুরুষসূক্ত ষোড়শ মন্ত্রৈ রাজ্যেন ষোড়শাহুতী র্জুহুয়াৎ। ঋগ্বেদিনামপ্যেবং॥ *॥

হুত আজ্যমিশ্রিতান্ তিলান্ গৃহীত্বা ওঁ ইরাবতী ধেনুমতীহি ভূতং সুযবসিনী মন বেদশস্যা ব্যস্তভ্না রোদসী বিষ্ণুরেতে দাধর্ত্ত পৃথিবী মভিতো মযূখৈঃ স্বাহা। ইদং বিষ্ণবে। ইতি সকৃজ্জুহুযাৎ। ওঁ ব্রহ্মানুযাযিভ্যঃ স্বাহা। ওঁ বিষ্ণুযাযিভ্যঃ স্বাহা। ওঁ ঈশানানুযাযিভ্যঃ স্বাহা। এবং পূর্ব্বোক্তে নবগ্রহ মন্ত্রে দশদিক্পালমন্ত্রৈশ্চ সকৃৎ সকৃৎ জুহুযাৎ। এবং পর্ব্বতেভ্যঃ স্বাহা। ওঁ নদীভ্যঃ স্বাহা। ওঁ সমুদ্রেভ্যঃ স্বাহা। এবং তিলহোমং সমাপ্য স্রুবেণ মহাব্যাহৃতিভিরাজ্যং জুহুযাৎ। *। ততঃ প্রাযশ্চিত্ত হোম সঙ্কল্পং কৃত্বা ওঁ অগ্নেত্বং বিধুনামাসীতি নাম কৃত্বা আবাহ্য পূজযিত্বা পরিভাষা সিদ্ধং স্বশাখোক্তং প্রাযশ্চিত্ত হোমাদি কৃত্বা পূর্ণাহুত্যাং মৃডনামানমগ্নিং পূজযিত্বা ঘৃতপূর্ণস্রুচা উত্থায যজমানেনান্বারব্ধঃ ওঁ তদ্বিষ্ণোঃ পরম মিত্যাদি বৌষট্ ইত্যাচার্য্য পূর্ণাহুতি ত্রযং দদ্যাৎ। তত আচারাৎ ঐশান্যাং পৃথিব্যাং শীতলা ভব ইত্যাচার্য্য দুগ্ধাদি ক্ষিপ্ত্বা স্রুব লগ্ন ভস্মনা ওঁ কশ্যপস্য ত্র্যাযুষং ইতি শিরসি। ওঁ যমদগ্নে ত্র্যাযুষং কণ্ঠে। ওঁ যদ্দেবানাং ত্র্যাযুষং বাহুমূলযোঃ। ওঁ তন্মে হস্ত ত্র্যাযুষং হৃদি। অন্য কর্ত্তৃক পক্ষে তত্তস্তে হস্ত ত্র্যাযুষ মিতি বিশেষঃ। ততো যজমানঃ পঞ্চগব্যং চরুশেষঞ্চ প্রাশ্য স্নাত্বা বা পূর্ণপাত্রাদিকাং দক্ষিণাং ব্রহ্মণে দদ্যাৎ ততো হেমযুক্তং সবস্ত্র তিল পাত্রং অলঙ্কৃতগবীং তন্মূল্যং বা এতদ্ধোম কর্ম্ম প্রতিষ্ঠার্থ মাচার্য্যায দদ্যাৎ। অন্য হোতৃ পক্ষে হোত্রে দদ্যাৎ। এতৎ কৃত কর্ম্মণা প্রীযতাং ভগবান্ বিষ্ণু রিতি বিষ্ণবে সমর্পযেৎ। *। ততঃ প্রাসাদ সংমুখে ওঁ উত্তিষ্ঠ ব্রহ্মণস্পতে দেবা যজ্ঞস্তে মহে উপপ্রযান্ত মরুতঃ সুদানব ইন্দ্রঃ প্রাশূর্ভবাসচা ইতি মন্ত্রেণ দেবতামানীয বিষ্ণুগৃহস্য সংমুখে গরুডং শিব গৃহস্য বৃষং দুর্গা গৃহস্য সিংহং স্থাপযেৎ ততো গন্ধ মাল্য বস্ত্রাদিনা স্থপতিং পরিতোষ্য ওঁ ইদং বিষ্ণুর্বিচক্রমে ইত্যাদি পঠিত্বা ওঁ চক্রায নম ইতি চক্রং সংপূজ্য গৃহোপরি যথা যোগ্যং চক্রাদিকং বিন্যস্য গৃহং বস্ত্রেণাচ্ছাদ্য গৃহদ্বারানুরূপং তোরণং বিধায গৃহানুরূপ ঘণ্টা চামর কিঙ্কিণী জাল বর্হি পত্রোপেতং সবস্ত্র যষ্টি সমেতং ধ্বজং গৃহস্যৈশান-

কোণে বায়ুকোণে বা স্থাপয়েৎ। ...। ততো বিষ্ণুং শালগ্রামাদৌ যথার্হং গৃহ সমীপে নীত্বা পঞ্চবিংশতি ঘটৈ নারিকেলোদকৈঃ পঞ্চগব্য পঞ্চামৃতৈ তীর্থোদকৈঃ স্নানং কারয়িত্বা ষোড়শোপচারাদিভিঃ পূজয়েৎ। বক্ষ্যমাণ মন্ত্রাণাং পৌরাণিকত্বেন শূদ্রাণামপ্যধিকারঃ। অত্রার্ঘ্য পাত্রাম্ভসা প্রোক্ষিতং আসনং গৃহীত্বা ইদমাসনং ওঁ সর্ব্বান্তর্যামিনে দেব সর্ব্ব বীজ ময়ং তত্ত্বং আত্মস্থায পরং শুদ্ধ মাসনং কল্পয়াম্যহং ॥ ওঁ বিষ্ণবে নম ইতি মূলেন দদ্যাৎ ১। ততঃ কৃতাঞ্জলিঃ। ওঁ যস্য দর্শন মিচ্ছন্তি দেবাঃ স্বাভীষ্টসিদ্ধয়ে। তস্মৈ তে পরমেশায স্বাগতং স্বাগতঞ্চ মে ॥ কৃতার্থোঽনুগৃহীতোঽস্মি সফলং জীবিতং মম। আগতো দেব দেবেশ সুস্বাগত মিদং বপুঃ॥ বিষ্ণো স্বাগত মিতি স্বাগত প্রশ্নঃ ২। তাম্রপাত্রস্থং শ্যামাক দূর্ব্বা পদ্মাপরাজিতা যুক্ত জলং গৃহীত্বা। ওঁ যদ্ভক্তিলেশ সম্পর্কাৎ পরমানন্দ সম্ভবঃ। তস্মৈ তে চরণাব্জায পাদ্যং শুদ্ধায কল্পযে॥ ইত্যুচ্চার্য্য মূলেন পাদযোর্দদ্যাৎ ৩। ইদমাসন মিতীব মন্ত্রস্য পূর্ব্বস্মেভং পাদ্য মিতি প্রযোজ্য মেব মুত্তরত্রযথা যোগ্য মূহ্যেথঃ। গন্ধ পুষ্পাক্ষত যব কুশাগ্র তিল শ্বেতসর্ষপ দূর্ব্বাত্মক মর্ঘ্যং শঙ্খস্থং গৃহীত্বা। ওঁ তাপত্রয় হরং দিব্যং পরমানন্দ লক্ষণং। তাপত্রয় বিনির্ম্মুক্তং তবার্ঘ্যং কল্পয়াম্যহং ॥ ইতি মূলেন শিরসি দদ্যাৎ ৪। জাতী লবঙ্গ কক্কোল যুক্তং কেবলং বা জলং গৃহীত্বা। ওঁ দেবানামপি দেবায দেবানাং দেবতাত্মনে। আচামং কল্পয়ামীশ শুদ্ধানাং শুদ্ধি হেতবে॥ ইতি মূলেন দদ্যাৎ ৫। কাংস্যস্থং দধি মধু ঘৃতাত্মকং কাংস্যপিহিতং মধুপর্কং গৃহীত্বা। ওঁ সর্ব্বকল্মষহীনায পরিপূর্ণ সুধাত্মনে। মধুপর্ক মিমং দেবকল্পযামি প্রসীদ মে॥ ইতি মূলেন দদ্যাৎ ৬। পুনরাচমনীযং গৃহীত্বা। ওঁ উচ্ছিষ্টোপ্যশুচি র্ব্বাপি যস্য স্মরণমাত্রতঃ। শুদ্ধি মাপ্নোতি তস্মৈ তে পুনরাচমনীযকং॥ ইতি মূলেন দদ্যাৎ ৭। লৌকিক ষষ্ট্যধিক শতত্রয তোলকান্যূনং তীর্থজলং গৃহীত্বা। ওঁ পরমানন্দবোধাব্ধি নিমগ্ন নিজমূর্ত্তযে। সাঙ্গোপাঙ্গ মিদং স্নানং কল্পযাম্যহ মীশ তে॥ ওঁ তদ্বিষ্ণো রিতি মূলেন দদ্যাৎ ৮। পূর্ব্বরীত্যা পুনরাচমনীযঞ্চ দদ্যাৎ। অর্ঘ্যাম্ভসা

প্রোক্ষিতং বস্ত্রং গৃহীত্বা। ওঁ মায়া চিত্র পট চ্ছন্ন নিজ গুহ্যোরুতেজসে। নিরাবরণ বিজ্ঞায় বাস স্তে কল্পয়াম্যহং ॥ ইতি মূলেন দদ্যাৎ। ৯। উত্তরীযবস্ত্রং গৃহীত্বা। ও যমাশ্রিত্য মহামায়া জগৎ সংমোহিনী সদা। তস্মৈ তে পরমেশায কল্পযাম্যুত্তরীযকং ॥ ইতি মূলেন দদ্যাৎ ৯। ততঃ পূর্ব্ববৎ পুনরাচমনীযঞ্চ দদ্যাৎ। সুবর্ণাদ্যাভরণ মর্ঘ্যাম্ভসা প্রোক্ষ্য। ওঁ স্বভাব সুন্দরাঙ্গায নানাশক্ত্যাশ্রযায তে। ভূষণানি বিচিত্রাণি কল্পযাম্যমরার্চ্চিত ॥ ইতি মূলেন দদ্যাৎ ১০। প্রোক্ষিতং গন্ধং গৃহীত্বা। ওঁ পরমানন্দ সৌরভ্য পরিপূর্ণ দিগন্তর। গৃহাণ পরমং গন্ধং কৃপযা পরমেশ্বর ॥ ইতি মূলেন দদ্যাৎ ১১। তত্তদ্দেবতা প্রিয পুষ্পমাদায। ওঁ তুরীয বন সম্ভূতং নানা গুণ মনোহরং। আনন্দ সৌরভং পুষ্পং গৃহ্যতাং পরমেশ্বর ॥ ইতি মূলেন দদ্যাৎ ১২। ধূপং প্রোক্ষ্য ঘণ্টাং সংপূজ্য। ওঁ বনস্পতি রসো দিব্যো গন্ধাঢ্যঃ সুমনোহরঃ। আঘ্রেযঃ সর্ব্বদেবানাং ধূপো হ্যং প্রতিগৃহ্যতাং ॥ ইত্যুচ্চার্য্য বামহস্তেন ঘণ্টাং বাদযন্ মূলেন দদ্যাৎ ১৩।

ততো ঘৃতাদি প্রদীপমাদায। ওঁ সুপ্রকাশো মহাদীপঃ সর্ব্বতস্তিমিরাপহঃ। সবাহ্যাভ্যন্তরং জ্যোতির্দীপো হ্যং প্রতিগৃহ্যতাং ॥ ইতি মূলেন দদ্যাৎ ১৪। প্রোক্ষিত নানাবিধ নৈবেদ্যোপরি মৎস্যমুদ্রযা মূলং দশধা জপ্ত্বা ২ভ্যর্চ্য ধেনুমুদ্রযামৃতীকৃত্য। ওঁ সৎপাত্র সিদ্ধং সুহবি র্বিবিধানেক ভক্ষণং। নিবেদযামি দেবেশ সানুগায গৃহাণ তৎ ॥ ইতি মূলেন দদ্যাৎ ১৫। জলমাদায ওঁ সমস্ত দেবদেবেশ সর্ব্বতৃপ্তিকরং পরং। অখণ্ডানন্দ সম্পূর্ণ গৃহাণ জলমুত্তমং ॥ ইতি মূলেন দদ্যাৎ ১৫। পূর্ব্ববৎ পুনরাচমনীযঞ্চ। তাম্বূলং গৃহীত্বা। ওঁ তাম্বূলং দেবদেবেশ কর্পূরাদি সুবাসিতং। কল্পযামি তবেশান বদনাম্ভোজ ভূষণং ॥ ইতি মূলেন দদ্যাৎ ১৫। তত স্তত্তদ্দেবতা নমস্কারমন্ত্রে র্বন্দনং কুর্য্যাৎ। ১৬। উপচার দ্রব্যাধারদানে সাধারণেনো ল্লেখঃ পৃথক্ পৃথক্ তদ্দানং। *। তত ওঁ বিষ্ণবে নমঃ ইতি ত্রিঃ সংপূজ্য ঘণ্টাবিতান তোরণ যুক্তং বস্ত্রাদিচ্ছাদিতং বেশ্ম প্রোক্ষ্য ওঁ বিষ্ণবে নম ইতি ত্রিঃ সংপূজ্য ওঁতদ্বিষ্ণো রিত্যনেন বিষ্ণুং স্মৃত্বা ওঁ তৎ সদিত্যুচ্চার্য্য বাম

হস্তেন ধৃত্বা জল তিল জলাদ্যাদা য অদ্যেত্যাদি অমুকগোত্রঃ শ্রীঅমুক দেব শর্ম্মা এতত্তৃণ কাষ্ঠাদি ময়বেশ্মপরমাণু সমসংখ্যবর্ষ সহস্রাবচ্ছিন্ন স্বর্গলোক মহিতত্ত্ব কামো বিষ্ণু প্রীতিকামো বা এতত্তৃণ কাষ্ঠাদিময়বেশ্ম বিষ্ণুদৈবতং বিষ্ণবে তুভ্যমহং সম্প্রদদে। ইত্যুৎসৃজেৎ। ইষ্টকাদিময়ে তু এতদিষ্টকাদিময় বেশ্ম পরমাণু সমসংখ্য বর্ষসহস্র দশগুণ কালাবচ্ছিন্ন স্বর্গলোক মহিতত্ত্ব কাম এতদিষ্টকাদীতি বিশেষঃ। এতৎ প্রতিষ্ঠার্থং সুবর্ণং তন্মূল্যং বা দক্ষিণাং বিষ্ণবে দদ্যাৎ। পশ্চাদাচার্য্যাদৌ প্রতিপত্তিঃ। *। ততো দেবং স্বয়ং গৃহীত্বা গৃহ প্রদক্ষিণং কারয়িত্বা ওঁ ভদ্রং কর্ণেভিঃ শৃণুযাম দেবা ভদ্রং পশ্যেমাক্ষিভি র্যজত্রাঃ স্থিরৈ রঙ্গৈ স্তুষ্টুবাংস স্তনূভি র্ব্যসেম দেবহিতং যদায়ুঃ। ইত্যনেনাভিমন্ত্রিতং দেবং গৃহং প্রবেশয়েৎ। ওঁ দেবস্যত্বাসবিতুঃ প্রসবেঽশ্বিনো র্বাহুভ্যাং পূষ্ণো হস্তাভ্যাং হস্তমাদদে ইতি মন্ত্রেণ পিণ্ডিকোপরিন্যসেৎ। ওঁ স্থিরো ভব বীড়ঙ্গ আশু র্ভব বাজ্যর্বন্ পৃথু র্ভব সুসদস্ত্বমগ্নে পুরীষবাহনঃ। ইত্যনেন স্থিরীকুর্য্যাৎ।

পর দেবং সংপূজ্য যথাশক্তি চামর ঘণ্টা বিতান গো হিরণ্য গ্রাম বাদ্যভাণ্ডাদিকং দদ্যাৎ। ততওঁ যাবচ্চন্দ্রাধরো দেবো যাবত্তিষ্ঠতি মেদিনী। তাবদত্র জগন্নাথ সন্নিধী ভব কেশব॥ ইতি মন্ত্রং পঠেৎ। ততো ধ্বজং সমীপং গত্বা সংপ্রোক্ষ্য তমারোপয়েদনেন মন্ত্রেণ ওঁ এহ্যেহি ভগবন্নীশ্বর বিনির্ম্মিত উপরিচর বায়ুমার্গানুসারিন্ শ্রীকর শ্রীনিবাস রিপুধ্বংসকর সুজনাধিলয় সর্ব্বদেবতাসংযুত কুরু শান্তিং স্বস্ত্যয়নঞ্চ মে ভবতু সর্ব্ব বিঘ্নান্ হর হর স্বাহা ওঁ ধ্বজায নম ইতি ধ্বজং সংপূজ্য ওঁ বিষ্ণবে নম ইতি ত্রিরভ্যর্চ্য ধ্বজং সংপ্রোক্ষ্য বামহস্তেন স্পৃষ্ট্বা অদ্যেত্যাদি অমুক গোত্রঃ শ্রীঅমুক দেবশর্ম্মা মহাপাতকাদি বহুপাপক্ষযকামো বিষ্ণুপ্রীতিকামো বা বিষ্ণুবেশ্মনি ইমং ধ্বজং বিষ্ণুদৈবতং বিষ্ণবে তুভ্যমহং সম্প্রদদে। ইত্যুৎসৃজ্য এতৎ প্রতিষ্ঠার্থং দক্ষিণাং বিষ্ণবে দদ্যাৎ। পশ্চাদাচার্য্যাদৌ প্রতিপত্তিঃ। ততো গরুড়স্তম্ভং সমারোপ্য ওঁ সুপর্ণোঽসি গরুত্মাং স্ত্রিবৃত্তে শিরো গায়ত্র্যং চক্ষু র্বৃহদ্রথন্তরে পক্ষৌ স্তোম আত্মা ছন্দাংস্যঙ্গানি যজুং-

ষি নাম সামতে তনূর্বামদেব্যং য-
জ্ঞায়জ্ঞিয়ং পুচ্ছং ধিষ্ণ্যাশ্চ শফাঃ
সুপর্ণো ২সি গরুত্মান্দিবং গচ্ছ স্বঃ
পত ॥ যজুর্বেদী তু । ওঁ সুপর্ণো
২সি গরুত্মান্ ত্রিবৃত্তে শিরো গায়ত্রং
চক্ষুস্তোম আত্মা সামতে তনূর্বাম
দেব্যং বৃহদ্রথন্তরে পক্ষৌ যজ্ঞায-
জ্ঞিয়ং পুচ্ছং ছন্দাংস্যঙ্গানি ধিষ্ণিয়াঃ
শফাঃ যজূংষি নাম । সুপর্ণোসি
গরুত্মান্দিবং গচ্ছ স্বঃপত ইতি
পঠিত্বা । ওঁ গরুডায় নম ইতি ত্রিঃ
সংপূজ্য ওঁ নমস্তে পতগশ্রেষ্ঠ প-
ন্নগান্তকর প্রভো । ত্বৎ প্রসাদাস্ম
হ্যাবাহো মোদেয়ং দিবি দেববৎ ॥
যথা ত্বং সংপুটকরঃ সতত নতক-
ন্ধরঃ । তথৈব পুরতো বিষ্ণোস্ত্বৎ
প্রসাদাদ্ভবাম্যহং ॥ ইতি পুটাঞ্জ-
লিঃ প্রার্থয়েৎ । * । ততঃ পিষ্ট প্র-
দীপাদিনা নির্মঞ্ছনং কুর্য্যাৎ । ততো
বিংশান্যূন ব্রাহ্মণেভ্যো ভোজ্যানি দ-
দ্যাৎ । দীনানাথ কৃপণ বধিরেভ্যো
যথাশক্তি দদ্যাৎ । ততঃ প্রীয়তাং
পুণ্ডরীকাক্ষ সর্ব্বযজ্ঞেশ্বরো হরিঃ ।
তস্মিংস্তুষ্টে জগত্তুষ্টং প্রীণিতে প্রীণি
তং জগৎ ॥ ততো নৃত্য গীত বাদিত্রং
নির্ঘোষৈর্মহোৎসবং কৃত্বা অচ্ছিদ্রাব
ধারণং কৃত্বা বৈগুণ্য সমাধানার্থং ত-

দ্বিষো রিতি বিষ্ণুং স্মরেৎ । * । এবং
কূপাদি মঠাদি প্রতিষ্ঠায়াং আসনা-
দিকন্তু তত্তন্মন্ত্রং বিহায় কেবলং প্র-
ণবাদি নমোন্তেন তত্তন্নাম্না দত্ত্বা যথা
যোগ্যং তত্তৎ কর্ম্মশেষং সমাপ-
য়েৎ । * । এবং গোপথাদি প্রতিষ্ঠায়াং
তৎ সমীপে বেদিকাং কৃত্বা তত্তৎ
ফলকামো বিষ্ণুপ্রীতিকামো বা ত-
ত্তৎ প্রতিষ্ঠাং করিষ্যে ইতি সঙ্কল্প্য
বৃদ্ধিশ্রাদ্ধাদিকং বিধায় প্রাগুক্ত বি-
ধিনাগ্নিস্থাপনাদি এতৎ কর্ম্মণা প্রী-
য়তাং ভগবান্ বিষ্ণু রিত্যন্তং কর্ম্ম
কৃত্বা কূপাদিবৎ সর্ব্বভূতেভ্য উৎ
সৃজ্য দক্ষিণাং দদ্যাৎ । * । নিয়ম
ব্রতাদি প্রতিষ্ঠায়ান্তু বিষ্ণুরিত্যন্তং ক-
র্ম্মকৃত্বা ব্রতানুষ্ঠানং কৃত্বা দক্ষিণাদি-
কং কুর্য্যাৎ । * । ততো ঘটস্থ জলেন
যজমান মভিষিঞ্চেৎ । তদ্যথা । ও সুরা
স্ত্বা মভিষিঞ্চন্তু ব্রহ্ম বিষ্ণু মহেশ্বরাঃ
। বাসুদেবো জগন্নাথ স্তথা সঙ্কর্ষণো
বিভুঃ ॥ প্রদ্যুম্ন শ্চানিরুদ্ধশ্চ ভবন্তু
বিজয়ায় তে । আখণ্ডলো ২গ্নি র্ভগ-
বান্ যমো বৈ নৈঋত স্তথা ॥ বরুণঃ
পবনশ্চৈব ধনাধ্যক্ষ স্তথা শিবঃ ।
ব্রহ্মণা সহিতঃ শেষো দিক্পালাঃ
পান্তু তে সদা ॥ কীর্ত্তি র্লক্ষ্মী ধৃতি
র্মেধা পুষ্টিঃ শ্রদ্ধা ক্ষমা মতিঃ । বুদ্ধি

লজ্জা বপুঃ শান্তি স্তুষ্টিঃ পুষ্টিশ্চ মাতরঃ ॥ এতা ত্বা মভিষিঞ্চন্তু দেবপত্ন্যঃ সমাগতাঃ। আদিত্য শ্চন্দ্রমা ভৌমো বুধ জীব সিতার্ক জাঃ॥ গ্রহা স্ত্বা মভিষিঞ্চন্তু রাহুঃ কেতুশ্চ তর্পিতাঃ। দেব দানব গন্ধর্ব্বা যক্ষ রাক্ষস পন্নগাঃ ॥ ঋষযো মুনযো গাবো দেব মাতর এবচ। দেবপত্ন্যো হ্রুধরা নাগা দৈত্যাশ্চাপ্সরসাং গণাঃ ॥ অস্ত্রাণি সর্ব্ব শাস্ত্রাণি রাজানো বাহনানি চ। ঔষধানি বিচিত্রাণি কালস্যাবযবাশ্চ যে॥ সরিতঃসাগরাঃ শৈলা স্তীর্থানি জলদা নদাঃ। এতা স্ত্বা মভিষিঞ্চন্তু ধর্ম্ম কামার্থ সিদ্ধয়ে ॥*॥ ইতি মঠাদি প্রতিষ্ঠাপ্রযোগ তত্ত্বং সমাপ্তং ॥

মঠরঃ পুং মুনিবিশেষঃ। ইত্যুণাদি কোষঃ॥

মঠি ই ক মোদে। ইতি কবিকল্পদ্রুমঃ॥ ই মণ্ঠযতি। ইতি দুর্গাদাসঃ॥

মড ই কি ভূষে। ইতি কবিকল্পদ্রুমঃ ॥ মণ্ডযতি মণ্ডতি হারো জনং। ই মণ্ড্যতে। ইতি দুর্গাদাসঃ॥

মড ই ড বিভাগে॥ বেষ্টে। ইতি কবিকল্পদ্রুমঃ॥ ই মণ্ড্যতে ড মণ্ডতে। ইতি দুর্গাদাসঃ॥

মডকঃ পুং শস্যভেদঃ। মেড়ুযা ইতি ভাষা। ইতি জটাধরঃ॥

মড্ডুঃ পুং বাদ্যবিশেষঃ। ইত্যমরঃ॥ চুচুক ইতি খ্যাতঃ। বিপুলোর্ডমরু মড্ডু রিতি কোষঃ॥ মড ইতি রৌতি ইতি মড্ডুঃ পূর্ব্ববদ্রৌতের্ড্ড মনীষাদিত্বাদ্রেফস্য ডত্বং। মজ্জন্তি শব্দা অত্রেতি মজ্জে র্নিপাতো বা। ইতি ভরতঃ॥

মড্ডুকঃ পুং মড্ডুবাদ্যং। ইতি ত্রিকাণ্ডশেষঃ॥

মণ কূজে। ইতি কবিকল্পদ্রুমঃ॥ মণতি। কূজে হব্যক্ত শব্দে। ইতি দুর্গাদাসঃ॥

মণিঃ পুং স্ত্রী অশ্মজাতিঃ॥ মুক্তাদিকং। তৎপর্য্যাযঃ। রত্নং ২ মণী ৩। ইত্যমরঃ॥ অস্যগুণাঃ। মণি রত্নং সরং শীতং কষাযং স্বাদু লেখনং। চক্ষুষ্যং ধারণাত্তচ্চ পাপালক্ষ্মী বিনাশনং॥ ইতি রাজবল্লভঃ ॥ অজাগাঃ কণ্ঠস্থিত স্তনঃ॥ লিঙ্গাগ্রং॥ অলিঞ্জরঃ। ইতি মেদিনী॥ যোন্যগ্রভাগঃ। ইতি শব্দরত্নাবলী॥ নাগবিশেষঃ। ইতি জটাধরঃ॥ মণিবন্ধঃ। ইতি হেমচন্দ্রঃ॥

মণিকং ক্লী অলিঞ্জরঃ। ইত্যমরঃ॥

মণিকর্ণিকা স্ত্রী কাশীস্থতীর্থবিশেষঃ। তদুৎপত্তি র্যথা। বিষ্ণুং প্রতি শিব বাক্যং। ত্বদীয়স্যাস্য তপসো মহোপচয় দর্শনাৎ। যন্মযান্দোলিতো মৌলি রহি শ্রবণভূষণঃ। তদান্দোলনতঃ কর্ণাৎ পপাত মণিকর্ণিকা॥ মণিভিঃ খচিতা রম্যা ততোঽস্তু মণিকর্ণিকা। চক্র পুষ্করিণী তীর্থং পুরা খ্যাত মিদং শুভং॥ ত্বযা চক্রেণ খননাচ্ছঙ্খ চক্র গদাধর। মম কর্ণাৎ পপাতেযং যদা চ মণিকর্ণিকা॥ তদা প্রভৃতি লোকেত্র খ্যাতাস্তু মণিকর্ণিকা। শ্রীবিষ্ণুরুবাচ। মুক্তাঙ্গগুন পাতেন তবাদ্রিভনযা প্রিযং। তীর্থানাং পরমং তীর্থং মুক্তিক্ষেত্র মিহাস্তুবৈ॥ কাশতেঽত্র যতো জ্যোতি স্তদনাখ্যেয মীশ্বর। অতো নামাপরঞ্চাস্তু কাশীতি প্রথিতং বিভো॥ অন্যং বরং বরে দেব দেযঃ সোপ্যবিচারিতং। সভেপরোপকারার্থং জগদ্রক্ষা মণে শিব॥ আ ব্রহ্ম স্তম্ব পর্য্যন্তং যৎ কিঞ্চিজ্জন্তু সংজ্ঞিতং। চতুর্ষ্ভূতগ্রামেষু কাশ্যাং তন্মুক্তি মাপ্নুযাতি॥ তস্মিং তীর্থবরে শম্ভো মণিশ্রবণভূষণে। সন্ধ্যাং স্নানং জপং হোমং বেদাধ্যযন মুত্তমং॥ তর্পণং পিণ্ডানঞ্চ দেবতানাঞ্চ পূজনং। গো ভূ তিল হিরণ্যাশ্ব দীপান্নাম্বর ভূষণং॥ কন্যাদানং প্রযত্নেন সপ্ততন্তূননেকশঃ। ব্রতোৎসর্গং বৃষোৎসর্গং লিঙ্গাদি স্থাপনং তথা॥ করোতি যো মহাপ্রাজ্ঞো জ্ঞাত্বাযুঃ ক্ষণ গত্বরং। বিপত্তিং বিপুলাঞ্চাপি সম্পত্তি মতি ভঙ্গুরাং॥ অক্ষযা মুক্তিরেকাস্তু বিপাক স্তস্য কর্ম্মণঃ। অন্যচাপি শুভং কর্ম্ম যদ্দত্তং শ্রদ্ধযা হুতং॥ বিনাত্মঘাত মীশান ত্যক্ত্বা প্রাযোপবেশনং। নৈঃশ্রেযস্যাঃ শ্রিযো হেতু স্তস্ত্ব জগদীশ্বর॥ নানুশোচতি নাখ্যাতি কৃত্বা কালান্তরে ঽপি যৎ। তদিহাক্ষযতামেতু তস্যেশ ত্বদনুগ্রহাৎ॥ তব প্রসাদাত্তস্যেহ সর্ব মক্ষয মস্তু তৎ। যদস্তি যদ্ভবিষ্যচ্চ যদ্ভূতঞ্চ সদাশিব॥ তস্মাদেতচ্চ সর্ব্বস্মাৎ ক্ষেত্রমস্তু শুভোদযং। ইতি কাশীখণ্ডে মণিকর্ণিকাখ্যানং নাম ২৬ অধ্যাযঃ॥

মণিকাননং ক্লী কণ্ঠঃ। ইতি শব্দরত্নাবলী॥ রত্নবনঞ্চ॥

মণিকারঃ পুং মণিনির্ম্মিতালঙ্কারাদিকর্ত্তা। জৌহরি ইতি ভাষা। তৎপর্য্যাযঃ। বৈকটিকঃ২। ইতি হেমচন্দ্রঃ॥ ন্যাযচিন্তামণিকর্ত্তা চ॥

মণিকূটঃ পুং পর্ব্বতবিশেষঃ। যথা।
মণিকূটস্যাথ গিরেগন্ধমাদনকস্য চ। মধ্যে সুবতি লৌহিত্যো ব্রহ্মপুত্রঃ সমাহিতঃ॥ হত্বা জ্বরং তথা বিষ্ণু স্তত্র বাস নথাকরোৎ। নর দেবাসুরাদীনাং যথা ভবতি বৈ হিতং॥ জ্বরেণাপীড়িত তনু র্জ্বরং হত্বা মহাসুরং। সর্ব্বলোক হিতার্থায় সো হ্যগদস্নান মাচয়েৎ॥ অগদস্নান সংভূতং সংজাতঞ্চ মহাসরঃ। তস্যস্বয়ং নাম চক্রে হয়গ্রীবোহপুনর্ভবং॥ ন পুন র্জায়তে যম্মাৎ ততঃ স্নাত্বা নরোত্তমঃ। অপুনর্ভব সংজ্ঞং তৎসরস্তু পরিকীর্ত্তিতং॥ মণিকূটাচলে বিষ্ণু র্হয়গ্রীব স্বরূপ ধৃক্। সচ ব্যাস পুরাণেন বিস্তারেণৈব সংস্থিতঃ॥ ইতি কালিকাপুরাণে ৮০ অধ্যায়ঃ॥

মণিখনিঃ পুং মণেরাকরঃ। যথা। মণেঃখনিঃ। ইতি মুগ্ধবোধব্যাকরণং॥

মণিগ্রীবঃ পুং কুবেরপুত্রঃ। ইতি শব্দরত্নাবলী॥ রত্নকঙ্করে ত্রি॥

মণিচ্ছিদ্রা স্ত্রী মেদানামৌষধং॥ ঋষভাখ্যৌষধং। ইতি মেদিনী॥

মণিতং ক্লী মৈথুনকালীনবাক্যং। তৎপর্য্যায়ঃ। রতকূজিতং২। ইতি হেমচন্দ্রঃ॥

মণিতারকঃ পুং সারসপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

মণিদ্বীপঃ পুং ক্লী ক্ষীরসমুদ্রমধ্যে পদ্মরাগাদিমণিময়ান্তরীপঃ। স চ ত্রিপুরসুন্দরী বাসস্থানং। যথা। সুধাসিন্ধো র্মধ্যে সুরবিটপিবাটী পরিসরে মণিদ্বীপে নীপোপবনবতি চিন্তামণি গৃহে। শিবাকারে মঞ্চে পরমশিব পর্য্যঙ্ক নিলয়াং ভজন্তিত্বাং ধন্যাঃ কতিচন চিদানন্দলহরীং॥ ইত্যানন্দলহরী॥

মণিপর্ব্বতঃ পুং গিরিবিশেষঃ। যথা। ততো হভ্যযাদ্গিরিশ্রেষ্ঠ মভিতো মণিপর্ব্বতং। তত্র পুণ্যা বভু র্বাতা হ্যভবং শ্চামলাঃ প্রভাঃ॥ মণীনাং হেমবর্ণানা মভিভূয় দিবাকরং। তত্র বৈদূর্য্য বর্ণানি দদর্শ মধুসূদনঃ॥ সতোরণ পতাকানি দ্বারাণি শিখরাণি চ। বিদ্যুদ্গ্রথিত মেঘাভঃ প্রবভৌ মণিপর্ব্বতঃ॥ হেম চিত্র বিতানৈশ্চ প্রাসাদৈ রূপশোভিতঃ। তত্র তা হেমবর্ণাভা দদর্শ মধুসূদনঃ॥ গন্ধর্ব্বাসুর মুখ্যানাং প্রিয়া দুহিতর স্তথা। দদর্শ পৃথুল শ্রোণীঃ সংরুদ্ধা গিরি কন্দরে॥ নরকেণ সমানীতা রক্ষ্যমাণাঃ সমন্ত-

তঃ। ইতি মহাভারতে, হরিবংশে নরকবধাধ্যায়ঃ ॥

মণিপূরং ক্লী ষট্‌চক্রান্তর্গত নাভিমধ্যস্থ তৃতীয়চক্রং। যথা। তদূর্দ্ধে নাভিদেশে তু মণিপূরং মহৎপ্রভং। মেঘাভং বিদ্যুদাভঞ্চ বহুতেজোময়ং ততঃ॥ মণি বদ্ভিন্নং তৎপদ্মং মণিপূরং তথোচ্যতে। দশভিশ্চ দলৈর্যুক্তং ডাদি ফান্তাক্ষরান্বিতং॥ শিবেনাধিষ্ঠিতং পদ্মং বিশ্বালোকন কারণং। ইতিতন্ত্রং॥ তৎস্বাধিষ্ঠান পদ্মস্যোর্দ্ধ দেশে তিষ্ঠতি। যথা। এতৎ পদ্মস্যোর্দ্ধ দেশে মহাপদ্মং সুদুর্লভং। দশপত্রং নীলবর্ণং সজলং ঘোর রূপকং॥ ডাদি ফান্তৈঃ সচন্দ্রৈশ্চ পঙ্কজঞ্চাতি শোভনং। তন্মধ্যে বীজকোষে নিবসতি সততং বহ্নিবীজং সুসিদ্ধং। বাহ্যে তত্রৈ পুরাখ্যং নব তপন নিভং স্বস্তিকং তত্রিভাগে॥ স্বর্ণকাখ্য মিদং দেবি সর্ব্বদেব প্রপূজিতং। সাকারং বহ্নি বীজঞ্চ সদৈব মেষ বাহনং॥ রুদ্রালয়ংহি তত্রৈব মহামোহস্য নাশনং। ভদ্রকালী মহাবিদ্যা বামভাগে সুশোভিতা॥ ইতি নির্ব্বাণতন্ত্রে ৬ পটলঃ॥ তত্র দেবতীর্থং যথা। মণিপূরে দেবতীর্থং পঙ্কজণ্ডং সরোবরং। তত্র শ্রীকাননাতীর্থং স্নাতি যো মুক্তি মিচ্ছতি॥ ইতি রুদ্রযামলঃ॥ স্বনামখ্যাতদেশশ্চ॥

মণিবন্ধঃ পুং প্রকোষ্ঠপাণ্যোঃ সন্ধিস্থানং। কব্জা ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ॥ সচ করস্যাদিভাগঃ। তৎপর্য্যায়ঃ। মণিঃ২। ইতি হেমচন্দ্রঃ॥ করগুল্ফঃ৩ করগুল্ফকঃ ৪। ইতি শব্দরত্নাবলী॥ তস্য শুভাশুভ লক্ষণং যথা। মণিবন্ধৈ র্নিগূঢৈশ্চ সুশ্লিষ্ট শুভসন্ধিভিঃ। নৃপা হীনৈঃ করচ্ছেদ মশব্দৈর্ধন বর্জ্জিতাঃ॥ ইতি গারুড়ে ৬৬ অধ্যায়ঃ॥

মণিভদ্রঃ পুং জিনানাং পূর্ব্বযক্ষ বিশেষঃ। তৎপর্য্যায়ঃ। জম্ভলঃ ২ পূর্ব্বযক্ষঃ ৩ জলেন্দ্রঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

মণিভূমিঃ স্ত্রী রত্নস্যখনিঃ। তৎপর্য্যায়ঃ। কুট্টিমং ২। ইতি শব্দরত্নাবলী॥

মণিমণ্ডপঃ পুং রত্নময়গৃহং। যথা। মধ্যে সুধাব্ধি মণিমণ্ডপ রত্নবেদী সিংহাসনোপরিগতাং পরিপীতবর্ণাং। পীতাম্বরাভরণমাল্য বিভূষিতাঙ্গীং দেবীং নমামি ধৃত মুদ্গর বৈরিজিহ্বাং॥ ইতি রুদ্রযামলে

বগলাস্তোত্রং ॥

মণিমন্থং ক্লী সৈন্ধবলবণং। ইতি রাজনির্ঘণ্টঃ॥ পর্ব্বতবিশেষঃ। ইতি মণিমন্থশব্দ টীকায়াং ভরতঃ॥

মণিমান্ ত্রি মণিবিশিষ্টঃ। রত্নভূষিতঃ। মণিরস্তীতি মতুপ্প্রত্যয়েন নিষ্পন্নঃ॥

মণিমালা স্ত্রী হারঃ॥ দন্তক্ষতবিশেষঃ। ইতি মেদিনী॥ লক্ষ্মীঃ। ইতি শব্দরত্নাবলী॥ দীপ্তিঃ। ইতি শব্দমালা॥

মণিরাগং ক্লী হিঙ্গুলং। ইতি রাজনির্ঘণ্টঃ॥ মণের্ব্বর্ণে পুং॥

মণিবঃ পুং নাগবিশেষঃ। মণিশব্দাদস্ত্যর্থে ব প্রত্যয়েন নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী॥

মণিবীজঃ পুং দাড়িমবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মণিসরঃ পুং মুক্তাহারঃ। যথা। ঘটয়তি সঘনে কুচযুগ গগণে মৃগমদ রুচি রুষিতে। মণিসর মমলং তারক পটলং নখ দশ শশি ভূষিতে॥ ইতি গীতগোবিন্দে ৭ সর্গঃ॥

মণী স্ত্রী মণিঃ। ইতি ভরত দ্বিরূপ কোষঃ॥

মণীচকং ক্লী চন্দ্রবর্ণরূপ্যং। তৎপর্য্যায়ঃ। ইন্দুকান্তঃ২। ইতি ত্রিকাণ্ডশেষঃ॥

মণীচকঃ পুং মৎস্যরঙ্গপক্ষী। যথা। ঝম্পাশী মৎস্যরঙ্গঃ স্যাজ্জলমদ্গু র্মণীচকঃ। ইতি হারাবলী॥

মণীব ব্য মণিতুল্যং। মণিশব্দেন সহ ইব শব্দস্য ষষ্ঠী তৎপুরুষ সমাসঃ॥ প্রথমা দ্বিবচনান্ত মণিশব্দাৎ ইবার্থ ব শব্দেন বা শব্দেনাপ্যেবং রূপং। যথা। মণীবোষ্ট্রস্য। তি ত ইবার্থে ব শব্দো বা শব্দো বা বোধ্যঃ। ইতি সিদ্ধান্তকৌমুদী॥

মণীবকং ক্লী পুষ্পং। ইতিহেমচন্দ্রঃ॥

মণ্টপী স্ত্রী ক্ষুদ্রোপোদকী। ইতি রাজনির্ঘণ্টঃ॥

মণ্ঠঃ পুং বটকবিশেষঃ। মাঁড়া ইতি হিন্দীভাষা। যথা। সমিতাং মর্দ্দয়েদাজ্যৈ র্জলেনাপি চ সম্নয়েৎ। অস্যাস্তু বটকং কৃত্বা পচেৎ সর্পিষি নীরসং॥ এলা লবঙ্গ কর্পূর মরিচাদ্যৈ রলঙ্কৃতে। মজ্জয়িত্বা সিতাপাকে তত শুষ্কং সমুদ্ধরেৎ॥ অয়ং প্রকারঃ সংসিদ্ধো মণ্ঠ ইত্যভিধীয়তে। অস্য গুণাঃ। মণ্ঠস্তু বৃংহণো বৃষ্যো বল্যঃ সুমধুরো গুরুঃ। পিত্তানিল হরো রুচ্যো দীপ্তাগ্নীনাং সুপূজিতঃ॥ প্রকারান্তরং যথা। সমিতা শর্করা সর্পি র্নির্ম্মিতা

অপরেঽপি যে । প্রকারা অমুনা তু
ল্যাস্তেঽপি চৈতদ্গুণাঃ স্মৃতাঃ ॥
ইতি রাজনির্ঘণ্টঃ ॥
মণ্ডং ক্লীং পুং সর্ব্বেষামন্নদধ্যাদীনা-
মগ্ররসঃ । মাঁড় ইতি মাত্ ইতিচ
ভাষা । ইত্যমর ভরতৌ ॥ সারঃ ॥
পিচ্ছং । ইতি মেদিনী ॥
মণ্ডং ক্লী মস্তু । ইতি মেদিনী ॥
মণ্ডঃ পুং এরণ্ডবৃক্ষঃ ॥ শাকভেদঃ ।
ইতি মেদিনী ॥ মস্তু ॥ ভূষা ॥
সারঃ ॥ পিচ্ছং । ইতি হেমচন্দ্রঃ ॥
দর্দুরঃ ॥ ভক্তাদিভবরসঃ । তস্য
লক্ষণং । ভক্তৈর্ব্বিনা দ্রবো মণ্ডঃ
পেয়ং ভক্তসমন্বিতং । ইতি রাজ-
নির্ঘণ্টঃ ॥ * ॥ অথ মণ্ডস্য লক্ষণং
বিধির্গুণাশ্চ । তণ্ডুলানাং সুসিদ্ধা-
নাং চতুর্দ্দশ গুণে জলে । রসঃ সি-
ক্থৈর্ব্বিরহিতো মণ্ড ইত্যভিধীয-
তে ॥ শুণ্ঠী সৈন্ধব সংযুক্তো দীপনঃ
পাচনশ্চ সঃ । অন্নস্য সম্যক্ সি-
দ্ধ্যাত্র জ্ঞেয়া মণ্ডস্য সিদ্ধতা ॥ পে-
যা যূষ যবাগূনাং বিলেপী ভক্তযো-
রপি । তস্য গুণাঃ । মণ্ডো গ্রাহী
লঘুঃ শীতো দীপনো ধাতুসাম্য-
কৃৎ । জ্বরঘ্ন স্তর্পণো বল্যঃ পিত্ত
শ্লেষ্ম শ্রমাপহঃ ॥ ইতি ভাবপ্রকা-
শঃ ॥ * ॥ অপিচ । ক্ষুদ্বোধনো ক-
স্তি বিশোধনশ্চ প্রাণপ্রদঃ শোণি-
ত বদ্ধনশ্চ । জ্বরাপহারী কফ পি-
ত্তহন্তা বায়ুং জয়েদষ্ট গুণো হি মণ্ডঃ
॥ * ॥ লাজমণ্ডো ঽগ্নিজননো দাহ
তৃষ্ণা নিবারণঃ । জরাতীসার শম-
নো ঽশেষদোষান পাচনঃ ॥ * ॥
বাট্যমণ্ডো ঽগ্নিজননঃ শূলানাহ বি-
নাশনঃ পাচনো দীপনো হৃদ্যঃ পি-
ত্ত শ্লেষ্মানিলাপহঃ ॥ বাট্যমণ্ডো
ভৃষ্ট যবমণ্ডঃ । ইতি রাজবল্লভঃ ॥
মণ্ডকঃ পুং পিষ্টকবিশেষঃ মাঁড়াইতি
হিন্দীভাষা । যথা । গোধূমা ধবলা
ধৌতাঃ কুট্টিতাঃ শোষিতা স্ততঃ ।
প্রোক্ষিতা যন্ত্র নিষ্পিষ্টা শ্চালিতাঃ
সমিতাঃ স্মৃতাঃ ॥ বারিণা কোম-
লাং কৃত্বা সমিতাং সাধু মর্দ্দয়েৎ ।
হস্তচালেন যা তস্যা লোপ্ত্রী সম্য-
ক্ প্রসারয়েৎ । অধোমুখ ঘটস্যো-
তদ্বিস্তৃতং প্রক্ষিপেদ্বহিঃ ॥ মৃদুনা
বহ্নিনা সাধ্যঃ সিদ্ধো মণ্ডক উচ্য-
তে । লোপ্ত্রী লেচী ইতি লোকে ॥
দুগ্ধেন সাজ্য খণ্ডেন মণ্ডকং ভ-
ক্ষয়েন্নরঃ । অথবা সিদ্ধ মাংসেন
সতক্র বটকেন বা ॥ তস্য গুণাঃ ।
মণ্ডকো বৃংহণো বৃষ্যো বল্যো রুচি
করো ভৃশং । পাকে ঽপি মধুরো-
গ্রাহী লঘু র্দোষত্রয়াপহঃ ॥ ইতি

ভাবপ্রকাশঃ ॥ * ॥ গীতাঙ্গবিশেষঃ। যথা। জয়প্রিয়ঃ কলাপশ্চ কমলঃ সুন্দরস্তথা। মঙ্গলো বল্লভশ্চেতি মণ্ডনাঃ ষট্ প্রকীর্ত্তিতাঃ ॥ জয়প্রিয়ো হংসতালে লঘুমধ্যে সদা গুরুঃ। ঊনবিংশত্যক্ষরৈর্যুক্তো রসে বীরে স বর্ত্ততে ॥ লঘুর্গুরু লঘু যত্র হংসতালঃ স উচ্যতে। ১। কলাপো রঙ্গতালেন যুক্তো রৌদ্র রসে হি সঃ। দ্বাবিংশত্যক্ষরৈর্যুক্তো লঘুরাদৌ গুরু দ্বয়ং॥ লঘুরাদৌ গুরু দ্বন্দ্বং রঙ্গতাল ইতীরিতঃ। ২। লঘু দ্বন্দ্বং গুরুশ্চৈকো হংসিলোহত্র সগণাত্মকঃ। পঞ্চবিংশত্যক্ষরৈঃ স্যাৎ কমলঃ শান্ত হাস্যয়োঃ ॥৩॥ গুরু রেকো লঘু দ্বন্দ্বং ত্রিপুটে ভগণাত্মকে। অষ্টাবিংশত্যক্ষরৈস্তু শৃঙ্গারে সুন্দরে মতঃ ॥ ৪ ॥ আদৌ গুরু লঘু মধ্যে প্লুতোহন্তে ভৃঙ্গতালকে। একবিংশত্যক্ষরৈস্তু বীরে মঙ্গল মণ্ডকঃ ॥ ৫ ॥ যডনিতা প্রকে তালে গলসাগলগাত্মকে। চতুস্ত্রিংশদক্ষরো হযং বল্লভো রৌদ্রকে রসে ॥ ৬ ॥ ইতি সঙ্গীতদামোদরঃ ॥

মণ্ডনং ক্লী ভূষণং ॥ অলঙ্করিষ্ণৌ ত্রি। ইতি মেদিনী ॥ চতুর্ধা মণ্ডনং বাসো ভূষা মাল্যানুলেপনৈঃ। ইতি মহাভারতে মোক্ষধর্মঃ ॥

মণ্ডপঃ পং ক্লী জনবিশ্রামগৃহং। তৎপর্য্যায়ঃ। জনাশ্রয়ঃ ২। ইত্যমরঃ॥ দেবাদিদত্তবেশ্ম। ইতি শব্দরত্নাবলী ॥ মণ্ডপানকর্ত্তরি ত্রি ॥

মণ্ডপা স্ত্রী নিয়াবী। ইতি রাজনির্ঘণ্টঃ ॥

মণ্ডযন্তঃ পুং অন্নং ॥ বধূসংঘঃ ॥ নটঃ ॥ অলঙ্কারঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

মণ্ডয়ন্তী স্ত্রী যোষিৎ। ইতি ত্রিকাণ্ডশেষঃ ॥

মণ্ডরী স্ত্রী ঘর্ঘরী। ইতি হারাবলী

মণ্ডলং ক্লী চন্দ্রসূর্য্যযোর্বহির্বেষ্টনং। চন্দ্রসূর্য্যযো রুৎপাতজ রশ্মিমণ্ডলং। যথা। বাতেন মণ্ডলী ভূতাঃ সূর্য্যাচন্দ্রমসোঃ করাঃ। মালাভা ব্যোম্নি তন্বন্তে পরিবেশঃ প্রকীর্ত্তিতঃ ॥ ইতি সাহসাঙ্কঃ ॥ তৎপর্য্যায়ঃ। পরিবেশঃ ২ পরিধিঃ ৩ উপসূর্য্যকং ৪। ইত্যমরঃ ॥ পরিবেষঃ মূর্দ্ধন্যান্তোহপি। যথা। পুংলিঙ্গঃ পরিবেষঃ স্যাৎ পরিধৌ পরিবেষণে। ইতি মূর্দ্ধন্যান্তে রুদ্রঃ ॥ সূর্য্যমুপগতং উপসূর্য্যং স্বার্থে কঃ উপসূর্য্যকং। চন্দ্রপক্ষে উপসূর্য্য মিব উপসূর্য্যকং

ইবার্থে কঃ। ইতি ভরতঃ ॥ * ॥ চক্রবালং। ইত্যমরঃ ॥ তত্তু মণ্ডলাকারেণ পরিণতং সমূহ মাত্রং॥ মণ্ডলাকার দিক্ সমূহঃ। ইতি মাধবী ॥ চক্রস্যেব বালো বলন মস্য চক্রবালং বলে ঘঞি বালঃ মনীষাদিত্বাৎ লস্য ডত্বে চক্রবাডঞ্চ। কিম্বা চক্রেণ চক্রাকারেণ বাডতে চক্রবাডং বাডৃড আপ্লাবে অল্। ইতি ভরতঃ ॥ * ॥ কোঠরোগঃ॥দেশঃ। দ্বাদশরাজকং। ইতিমেদিনী ॥ স চ দেশঃ সমন্তাদ্বিংশতিযোজনং চত্বারিংশদ্যোজনং বা। ইতি কেচিৎ ॥ গোলং। ইত্যনেকার্থ কোষঃ॥চক্রং। ইতি ত্রিকাণ্ডশেষঃ ॥ সংঘাতঃ। ইতি হেমচন্দ্রঃ ॥ নথাঘাতং। ইতি শব্দমালা ॥ ধন্বিনাং স্থান পঞ্চকান্তর্গত স্থিতি বিশেষঃ। যথা। মণ্ডলাকার পাদাভ্যাং মণ্ডলং স্থান মীরিতং। ইতি শব্দরত্নাবলী ॥ ব্যাঘনখাখ্য গন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥ ব্যূহবিশেষঃ। যথা। তির্য্যগ্‌বৃত্তিশ্চ দণ্ডঃ স্যাদ্ভোগো ন্বাবৃত্তিরেব চ। মণ্ডলং সর্ব্বতো বৃত্তিঃ পৃথগ্‌বৃত্তি রসংহতঃ ॥ ইতি ভরত ধৃত কামন্দকিঃ ॥ * ॥ গ্রহাদীনাং মণ্ডল সংস্থানং তৎপরিমাণঞ্চ যথা। সর্ব্বেষান্তু গ্রহাণাং বৈ অধস্তাচ্চরতে রবিঃ। রবে রূদ্ধং স্থিতঃ সোমঃ সোমান্নক্ষত্র মণ্ডলং ॥ নক্ষত্রেভ্যো বুধ স্তূর্দ্ধং বুধাদূর্দ্ধন্তু ভার্গবঃ। তস্মাদঙ্গারকশ্চোর্দ্ধং তস্য চোর্দ্ধং বৃহস্পতিঃ ॥ তস্মাৎ শনৈশ্চর শ্চোর্দ্ধং তস্যোর্দ্ধ মৃষিমণ্ডলং। ঋষিভ্যশ্চ ধ্রুব শ্চোর্দ্ধ মাযান্তং ত্রিদিবং ধ্রুবে। আদিত্যনিলযো রাহুঃ কদাচিৎ সোম মার্গতঃ ॥ সূর্য্য মণ্ডল সংস্থন্ত নিত্যং কেতুঃ প্রসর্পতি। নবযোজন সহস্রাণি বিস্তারো ভাস্করস্য তু। বিস্তারাত্রিগুণঞ্চাস্য পরিণাহে তু মণ্ডলং। দ্বিগুণঃ সূর্য্য বিস্তারাদ্বিস্তারঃ শশিনঃ স্মৃতঃ ॥ দ্বিগুণং মণ্ডলঞ্চাস্য যথৈব সবিতু স্তথা। চন্দ্রতঃ ষোড়শো ভাগো ভার্গবস্য বিধীযতে॥ ভার্গবাৎ পাদহীনস্তু বিজ্ঞেযো বৈ বৃহস্পতিঃ। বৃহস্পতেঃ পাদহীনৌ বক্র সৌরাবুদাহৃতৌ ॥ বিস্তার মণ্ডলাভ্যান্তু পাদহীন স্তযো র্ব্বুধঃ। বুধ তুল্যানি ঋক্ষাণি সর্ব্বে হ্রস্বানি যানি তু ॥যোজনার্দ্ধ প্রমাণানি তেভ্যো হ্রস্বং ন বিদ্যতে। রাহুঃ সূর্য্য প্রমাণস্তু কদাচিৎ সোম সম্মিতঃ ॥ তস্মাৎ গ্রহ প্রমাণস্তু কেতু স্তু নিযতঃ স্মৃতঃ। ইতিদেবীপুরাণে গ্রহগতি নামাধ্যাযঃ ॥ * ॥ কৃত্রিম মণ্ডল বিধির্যথা।

চতুর্হস্তং সমারভ্য যাবদ্ধস্ত শতং ॥ ভবেৎ । মণ্ডলং তত্র কর্ত্তব্য মত উদ্ধং ন কারয়েৎ ॥ বিমলং বিজয়ং ভদ্রং বিমানং শুভদং শিবং । বর্দ্ধমানঞ্চ দৈবঞ্চ লতাঙ্কং কামদায়কং ॥ রুচকং স্বস্তিকাখ্যঞ্চ দ্বিদশং ইতি মণ্ডলাঃ। সিতাদি হরিতান্তাশ্চ রজাঃ কার্য্যাঃ সুশোভনাঃ ॥ শালি ষষ্টিক কৌসুম্ভ রজনী হরিপত্রজাঃ । মণি বিদ্রুম রাগাশ্চ ভস্মনা অভিমন্ত্রিতাঃ ॥ সিতসর্ষপ ধূপাঢ্যা রজাঃ কৃত্বা তু পাতয়েৎ । অস্ত্ররাজং ন্যসেন্মন্ত্রী সম্ভবেতি পদং লিখা ॥ সমোত্থানং শুভং কৃত্বাগোময়েনোপলেপিতং । চন্দনাগুরু কর্পূর ক্ষোদ ধূপাধিবাসিতং ॥ ভূভাগং সুমিতং সিদ্ধং পূর্ব্ব পশ্চিম কোত্তরং । যাম্যং স্বস্তিক মৎস্যাদ্যৈঃ সূত্রৈ বৌর্ণাগু পত্রজৈঃ ॥ পদ্মপত্রাষ্টকং মধ্যে দ্বিগুণং ত্রিগুণং লিখা । দ্বারাণি সমসূত্রাণি কর্ণিকা কেশরোজ্জ্বলং ॥ পদ্মং তথাবশেষাণি স্বস্তিকান্যুৎপলানি চ । সব্যাবলম্ব হস্তস্ত রজঃপাতং সমাচরেৎ ॥ মধ্যমানামিকাঙ্গুষ্ঠৈ রুপরিষ্টান্মথেপ্সয়া । অধোমুখাঙ্গুলিং কৃত্বা পাতয়েত্তু বিচক্ষণঃ ॥ সমাশ্রয়া তু কর্ত্তব্যা হবিচ্ছিন্না পুষ্টি বর্জ্জিতা ॥ অঙ্গুষ্ঠ পর্ব্ব নৈপুণ্যা সমা কার্য্যা বিজানতা ॥ সংসক্তং বিষমং স্থূলং বিচ্ছিন্নং কৃষরাবৃতং । পর্য্যন্ত সর্পিতং হ্রস্ব মালিখেন্ন কদাচন ॥ সংসক্তে কলহং বিদ্যাদ্বক্র রেখে তু বিগ্রহং । অতিস্থানে ভবেদ্ব্যাধি র্নিত্যং পীড়া বিনিশ্চিতে ॥ বিন্দুভি র্ভয মাপ্নোতি শত্রপক্ষায়সংশয়ঃ । কৃষাযাঞ্চার্থহানিঃ স্যাৎ বিচ্ছিন্নে মরণং ধ্রুবং ॥ বিয়োগাত্তু ভবেত্তস্য ইষ্টদ্রব্য সুতস্য বা । অবিদিত্বা লিখেদ্যস্তু মণ্ডলস্তু যথেপ্সয়া ॥ সর্ব্ব দোষানবাপ্নোতি যে দোষাঃ পূর্ব্ব ভাষিত । ইতি দেবীপুরাণে পুষ্পাভিষেকচিন্তানামাধ্যায়ঃ ॥ * ॥ সূর্য্য মণ্ডল দেবানাং স্থিতি র্যথা। আরাধয়ন্ পূজয়ন্ দেবং জপেচ্চ রবি মণ্ডলে । আদিত্য মণ্ডলে দেবং ধ্যাত্বা বিষ্ণুমুপৈতি তং ॥ * ॥ ভোজন মণ্ডলং যথা । যাতুধানাঃ পিশাচাশ্চ অসুরা রাক্ষসা স্তথা । ঘ্নন্তি কেবল মন্নস্য মণ্ডলস্য বিবর্জনাৎ ॥ আদিত্যা বসবো রুদ্রা ব্রহ্মা চৈব পিতামহঃ । মণ্ডলান্যুপজীবন্তি তস্মাৎ কুর্ব্বন্তি মণ্ডলং ॥ চতুঃকোণং দ্বিজাগ্রস্য ত্রিকোণং ক্ষত্রিয়স্য তু । দ্বিকোণাকৃতি বৈশ্যস্য শূদ্রস্য বর্ত্তুলং সদা ॥ ইত্যাদ্যে বহ্নিপুরাণে

আহ্নিকতপোনামাধ্যায়ঃ ॥

মণ্ডলং ত্রি বিম্বং। ইত্যমরঃ॥ দ্বে চন্দ্রস্য শরীরে উপচারাদাদিত্যস্যাপি। বেতি শোভতে বিম্বং বীলকান্তিগত্যাদৌ নাম্নীতি ডিম্বঃ। বিম্বতি জাতি বিম্বঃ। সৌত্রো ধ্বয়মিতি স্বামী। মণ্ডয়তি মণ্ডলং নাম্নীতি অলঃ স্ত্রিয়াং নদাদিত্বাৎ মণ্ডলী চ। ইতি ভরতঃ ॥

মণ্ডলঃ পুং অঙ্কুরঃ। ইতি মেদিনী ॥ সর্পবিশেষঃ। ইতি বিশ্বঃ ॥

মণ্ডলকং ক্লী বিম্বং ॥ অষ্ঠভেদঃ ॥ দণ্ডং। ইতি মেদিনী॥ মণ্ডলাকারব্যুহঃ। ইতি জটাধরঃ ॥

মণ্ডলকঃ পুং অঙ্কুরঃ। ইতি ধরণিঃ॥

মণ্ডলনৃত্যং ক্লী মণ্ডলাকারনৃত্যং। তৎপর্য্যায়ঃ। হল্লীষঃ ২। ইতি শব্দমালা ॥

মণ্ডলপত্রিকা স্ত্রী রক্তপুনর্নবা। ইতি রাজনির্ঘণ্টঃ ॥

মণ্ডলাগ্রঃ পুং খড়্গঃ। ইত্যমরঃ ॥

মণ্ডলাধিতং ক্লী বর্ত্তুলং। ইতি শব্দরত্নাবলী ॥

মণ্ডলাধীশঃ পুং মণ্ডলেশ্বরঃ। তৎপর্য্যায়ঃ। মধ্যমঃ ২। ইতি হেমচন্দ্রঃ ॥

মণ্ডলী পুং সর্পঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ বিড়ালঃ। ইতি শব্দমালা ॥ জাহকঃ। খট্টাশ ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥ বটবৃক্ষঃ ॥ গোনাশ সর্পঃ। ইতি রাজনির্ঘণ্টঃ ॥

মণ্ডলী স্ত্রী দূর্ব্বা। ইতি হারাবলী ॥

মণ্ডলেশঃ পুং মণ্ডলেশ্বরঃ। তৎপর্য্যায়ঃ। একজন্মা ২ জনাগহঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥

মণ্ডলেশ্বরঃ পুং ভূম্যেকদেশাধিপঃ। অন্যো ভূম্যেক দেশাধিপো মণ্ডলেশ্বরঃ স্যাৎ। মণ্ডলস্য অরি মিত্রাদিরূপস্য দেশস্য ঈশ্বরো মণ্ডলেশ্বরঃ। একদেশাধিপ ইত্যর্থঃ। স্যান্মণ্ডলং দ্বাদশরাজকে চ দেশে চ বিম্বে চ কদম্বকে চ। ইতি বিশ্বঃ। ইত্যমরটীকায়াং ভরতঃ ॥ তস্য লক্ষণান্তরং। চতুর্যোজন পর্য্যন্ত মধিকারং নৃপস্য চ। যো রাজা তৎশতগুণঃ স এব মণ্ডলেশ্বরঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮৬ অধ্যায়ঃ ॥

মণ্ডহারকঃ পুং শৌণ্ডিকঃ। ইত্যমরঃ ॥

মণ্ডা স্ত্রী সুরা। ইতি হারাবলী ॥ আমলকী। ইতি মেদিনী ॥

মণ্ডিতঃ পুং বৌদ্ধগণাধিপবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ ভূষিতে ত্রি।

ইত্যমরঃ ॥

মণ্ডূকঃ পুং ভেকঃ। ইত্যমরঃ ॥ শোণকঃ ॥ মুনিবিশেষঃ। ইতি মেদিনী ॥ গাঢতেজাঃ। ইতি শব্দরত্নাবলী ॥ বন্ধবিশেষে স্ত্রী। ইতি বিশ্বঃ ॥

মণ্ডূকপর্ণঃ পুং শ্যোনাকবৃক্ষঃ। ইত্যমরঃ ॥ শোণকঃ। ইতি মেদিনী ॥

মণ্ডূকপর্ণী স্ত্রী মঞ্জিষ্ঠা ॥ ব্রাহ্মণী। ইতি মেদিনী ॥ আদিত্যভক্তা। ইতি রাজনির্ঘণ্টঃ ॥ ওষধিবিশেষঃ। থুলকুড়ি ইতি ভাষা। তৎপর্য্যায়ঃ। ভেকী ২ মণ্ডূকী ৩ মূলপর্ণী ৪। ইতি রত্নমালা ॥ মণ্ডূকপর্ণিকা ৫। অস্যা গুণাঃ। মণ্ডূকপর্ণিকা লঘ্বী স্বাদুপাকা সরা হিমা ॥ পাঠান্তরং। মণ্ডূকপর্ণিকা লঘ্বী রুক্ষা বাত বিব ন্ধনুৎ। ইতি রাজবল্লভঃ ॥

মণ্ডূকমাতা স্ত্রী ব্রাহ্মী। ইতি রাজনির্ঘণ্টঃ ॥ ভেকমাতা চ ॥

মণ্ডূকা স্ত্রী মঞ্জিষ্ঠা। যথা। মণ্ডূকা চ লতাং ষ্টি হৈমপুষ্পী চ ভণ্ডিরী। ইতি শব্দমালা ॥

মণ্ডূকী স্ত্রী মণ্ডূকপর্ণী। ইতি মেদিনী ॥ আদিত্যভক্তা ॥ ব্রাহ্মী। ইতি রাজনির্ঘণ্টঃ ॥ ক্ষুপবিশেষঃ। থুলকুড়া ইতি ভাষা। ইতি রত্নমালা ॥ ধৃষ্টযোষিৎ। ইতি শব্দরত্নাবলী ॥ মণ্ডূকপত্নী। ইতি ব্যাকরণং ॥

মণ্ডূরং ক্লী পুং লৌহমলং। তৎপর্য্যায়ঃ। শিঙ্ঘাণং ২। ইত্যমরঃ ॥ সিংহানং ৩ সিংহাণং ৪ ॥ মণ্ডূরলোহং বেষ্টতে অগ্নিদাহে লোহাদ্বিভজতে বা মণ্ডয়তি ভূষয়তি ঔষধত্বাদ্রোগিণ মিতি বা মণ্ডূরং কিমড়ি ভূষে মড়িড় বিভাগে বেষ্টে নাম্নীতি উরঃ। ইতি তট্টীকায়াং ভরতঃ ॥ অস্য গুণঃ। লৌহগুণতুল্যঃ। শতবর্ষোর্দ্ধং মণ্ডূর মুত্তমং। অশীতি বর্ষীযং মধ্যমং। ষষ্টি বর্ষীয মধমং। অতো ন্যূনং বিষতুল্যং। যথা। যল্লোহং যদ্গুণং প্রোক্তং তৎ কিট্টেঽপি তদ্গুণং। শতোর্দ্ধ মুত্তমং কিট্ট মধ্যঞ্চাশীতিবার্ষিকং ॥ অধমং ষষ্টিবর্ষীযং ততো হীনং বিষোপমং। ইতি রসেন্দ্রচিন্তামণিঃ ॥

মণ্ডোদকং ক্লী চিত্ররাগঃ। বিচিত্রবর্ণঃ ॥ আতর্পণং। আলিম্পনা। ইতি মেদিনী ॥

মৎ ব্য অনহমহং। অত্র ত্বং ভবতি ত্বদ্ভবতি অনহ্ মহং মদ্ভবতীতি সংক্ষিপ্তসারে ব্যাকরণং ॥ অস্মৎ

শব্দাচ্চি প্রত্যয়ে কৃতে তল্লুকি অ স্মচ্ছব্দস্য মদাদেশাদ্মিস্মন্ম্। ইতি তট্টীকায়াং গোয়ীচন্দ্রঃ ॥

মতং ক্লী সম্মতং । তৎপর্য্যায়ঃ । ছন্দঃ ২ অভিপ্রায়ঃ ৩ আকূতং ৪ ভাবঃ ৫ আশয়ঃ ৬ । ইতি হেমচন্দ্রঃ ॥

মতঃ ত্রি সম্মতঃ ॥ জ্ঞাতঃ । ইতি মেদিনী ॥ অর্চিতঃ । ইতি হেমচন্দ্রঃ ॥

মতঙ্গঃ পুং মুনিভেদঃ ॥ মেঘঃ । ইত্যাদিকোষঃ ॥

মতঙ্গজঃ পুং হস্তী । ইত্যমরঃ ॥

মতল্লিকা স্ত্রী প্রশস্তং । ইত্যমরঃ ॥

মতিঃ স্ত্রী বুদ্ধিঃ । ইত্যমরঃ ॥ ইচ্ছা ॥ স্মৃতিঃ । ইতি মেদিনী ॥ আর্য্যং ॥ শাকভেদঃ । ইত্যজয়পালঃ ॥ * ॥ বিপ্রেন্দ্র কা প্রশংসেয়ং জন্মতে ব্রহ্মমানসে । যস্য যত্র জলে জন্ম তন্মতি স্তাদৃশী ভবেৎ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১ অধ্যায়ঃ ॥ * ॥ মতিকরৌষধং যথা । পাঠা দ্বে জীরকে জষ্ঠ মথগন্ধাজমোদকং । বচা ত্রিকটুকঞ্চৈব লবণং চূর্ণ মুত্তমং ॥ ব্রাহ্মীরসে ভাবিতঞ্চ সর্পির্মধু সমন্বিতং । সপ্তাহ ভক্ষিতং জন্ত্যাস্মদৈশ্বর্য্যং মতিং পরাং ॥ ইতি গারুড়ে ১৯৮ অধ্যায়ঃ ॥

মতিদা স্ত্রী জ্যোতিষ্মতী ॥ শিমুড়ীক্ষুপঃ । ইতি রাজনির্ঘণ্টঃ ॥

মতিভ্রমঃ পুং } বুদ্ধিভ্রংসঃ । তৎপর্য্যায়ঃ । ভ্রমঃ ৩ মিথ্যামতিঃ ৪ ভ্রান্তিঃ ৫ । ইতি শব্দরত্নাবলী ॥
মতিভ্রান্তিঃ স্ত্রী }

মতিবিভ্রমঃ পুং উন্মাদরোগঃ । ইতি রাজনির্ঘণ্টঃ ॥

মতিষ্ঠঃ ত্রি অতিশয়বুদ্ধিমান্ । ইতি মুগ্ধবোধব্যাকরণং ॥

মৎকঃ পুং মৎকুণঃ । ইতি শব্দমালা ॥ মৎসম্বন্ধিনি ত্রি । ইতি ব্যাকরণং ॥

মৎকুণঃ পুং কীটবিশেষঃ । ছারপোকা ইতি ভাষা । তৎপর্য্যায়ঃ । রক্তপায়ী ২ রক্তাঙ্গঃ ৩ নক্তঞ্চারুযঃ ৪ । ইতি রাজনির্ঘণ্টঃ ॥ উদ্দংশঃ ৫ । নির্বিষাণহস্তী ॥ নিঃশ্মশ্রুপুরুষঃ । মাঙ্গন্দ্যা ইতি ভাষা ॥ নারিকেলঃ । ইতি মেদিনী ॥ জঙ্ঘাত্রাণং । ইতি হেমচন্দ্রঃ ॥

মৎকুণা স্ত্রী অজাতলোমভগং । ইতি শব্দরত্নাবলী ॥

মৎকুণারিঃ পুং ইন্দ্রাশনঃ । সিদ্ধি ইতি ভাষা । ইতি শব্দমালা ॥

মত্তঃ পুং ক্ষরন্মদহস্তী । মাতওয়াল্যা

হাতী ইতি ভাষা। তৎপর্য্যায়ঃ। প্রভিন্নঃ২ গর্জ্জিতঃ ৩। ইত্যমরঃ॥ ধুস্তূরঃ॥ কোকিলঃ॥ মহিষঃ। ইতি রাজনির্ঘণ্টঃ॥

মত্তঃ ত্রি হৃষ্টঃ॥ মত্ততাবিশিষ্টঃ। তৎপর্য্যায়ঃ। শৌণ্ডঃ ২ উৎকটঃ ৩ ক্ষীবঃ ৪। ইত্যমরঃ॥

মত্তকাশিনী) স্ত্রী উত্তমস্ত্রী। ইত্যমরঃ
মত্তকাসিনী)। মত্ত ইব ক্ষীব ইব কসতি গচ্ছতি মত্তকাসিনী কসজগতৌ গ্রহাদিত্বাণ্ণিন্ দন্ত্যমধ্যা॥ নত্তো কাশতে ভাতি মত্তকাশিনী তালব্যমধ্যাপি। ইতি ভরতঃ॥

মত্তকীশঃ পুং হস্তী। ইতি শব্দমালা॥

মত্তরঃ পুং মমাধিকঃ। মত্তো ইতি শবঃ। অস্মদ শব্দাৎ উতরপ্ প্রত্যযেন নিয়মঃ। ইতি সিদ্ধান্তকৌমুদী॥

মত্তবারণং ক্লী প্রাসাদবীথীনাংবরণ্ডঃ। কোঠারবারাণ্ডা ইতি ভাষা॥ অপাশ্রয়ঃ। প্রাঙ্গনাবরণং। ইতি হেমচন্দ্রঃ বিশ্বশ্চ॥ প্রাসাদ বীথীনাং স্বগুরুক্ষ বৃতিঃ। সন্দবৃক্ষবৃতি ইতি পাঠঃ। ইতিমেদিনী॥ পূগচূর্ণঃ। ইতি শব্দমালা॥

মত্তবারণঃ পুং প্রক্লিন্নকটগজ্ঞরঃ। মত্তহস্তী। ইতি মেদিনী হেমচন্দ্রশ্চ॥

মত্তা স্ত্রী মদিরা। ইতি রাজনির্ঘণ্টঃ

মত্তালম্বঃ পুং প্রাঙ্গনাবরণং। তৎপর্য্যায়ঃ। অপাশ্রয়ঃ ২ প্রগ্রীবঃ ৩ মত্তবারণং ৪। ইতি হেমচন্দ্রঃ॥

মত্তেভগমনা স্ত্রী স্ত্রীবিশেষঃ। মত্তগজগামিনী। ইতি হেমচন্দ্রঃ॥

মত্যং ক্লী দাত্রাদীনাংমুষ্টিঃ। তৎপর্য্যায়ঃ। বণ্টঃ২। ইতিহেমচন্দ্রঃ॥

মত্র ইউক গুপ্তোক্তৌ। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যবর্গাদ্যোপধঃ। ইক উ ইতি প্রুবং মন্ত্রযতে নৃপো ওযমিতি মুরারিঃ॥ মন্ত্রইত্যনেনৈবেষ্ট সিদ্ধে ইদনুবন্ধো বেদেযূচ্চারণ ভেদাথঃ। ইতি দুর্গাদাসঃ॥

মৎসঃ পুং মৎস্যঃ। ইত্যুণাদিকোষঃ॥

মৎসগণ্টঃ পুং ব্যঞ্জনবিশেষঃ। মৎস্যঘণ্ট ইতি খ্যাতঃ। তৎপর্য্যায়ঃ। গলগ্রহঃ২। ইতি শব্দচন্দ্রিকা॥

মৎসরঃ পুং অন্যশুভদ্বেষঃ। ইত্যমরঃ॥ ক্রোধঃ। ইতি মেদিনী॥

মৎসরঃ ত্রি অসহ্যপরসম্পত্তিঃ। মাৎসর্য্যযুক্তঃ॥ কৃপণঃ। ইত্যমরমেদিনীকরৌ॥ আত্মাধিক্যকারবিশেষঃ। যথা। নিন্দন্তি মাং সদা-

লোকা ধিগস্তু মম জীবনং। ইত্যাস্থানি ভবেদন্যস্তু ধিক্কারঃ সচ মৎসরঃ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ১৬ অধ্যায়ঃ॥

মৎসরা স্ত্রী মক্ষিকা। ইতি মেদিনী

মৎসরী পুং অন্যশুভদ্বেষ্টা। তৎপর্য্যায়ঃ। কর্ণেজপঃ ২ দুর্জনঃ ৩ পিশুনঃ ৪ সূচকঃ ৫ নীচঃ ৬ দ্বিজিহ্বঃ ৭ খলঃ ৮। ইতি হেমচন্দ্রঃ॥

মৎস্যঃ পুং স্ত্রী জলজন্তুবিশেষঃ। মাচ্ ইতি ভাষা। তৎপর্য্যায়ঃ। পৃথুরোমা ২ ঝষঃ ৩ মীনঃ ৪ বৈসারিণঃ ৫ অণ্ডজঃ ৬ বিসারঃ ৭ শকলী ৮। ইত্যমরঃ॥ শল্কলী ৯ ঝষঃ ১০ আত্মাশী ১১ সম্বরঃ ১২ মূকঃ ১৩ জলেশয়ঃ ১৪ কণ্টকী ১৫ শল্কী ১৬ মচ্ছঃ ১৭ অনিমিষঃ ১৮। ইতি শব্দরত্নাবলী॥ তস্য গুণাঃ। বৃংহণত্বং। গুরুত্বং। শুক্র বর্দ্ধনত্বং। বল্যত্বং। স্নিগ্ধত্বং। উষ্ণত্বং। মধুরত্বং। কফ পিত্ত করত্বং। ব্যায়ামাধ্বরত দীপ্তাগ্নীনাং পূজিতত্বং। বাতরোগ হরত্বঞ্চ॥ *॥ বৃহন্মৎস্য গুণাঃ। গুরুত্বং। শুক্রলত্বং। মলবদ্ধকারিত্বঞ্চ॥ *॥ ক্ষুদ্রমৎস্য গুণাঃ। লঘুত্বং। গ্রাহিত্বং। গ্রহণীরোগে হিতত্বঞ্চ॥ *॥ কৃষ্ণমৎস্য গুণাঃ। লঘুত্বং। স্নিগ্ধত্বং। বাতঘ্নত্বং। বহ্নিবর্দ্ধনত্বঞ্চ॥ *॥ পাণ্ডুর মৎস্যগুণাঃ। দোষলত্বং। স্নিগ্ধত্বং। গুরুত্বং। মলভেদিত্বঞ্চ॥ *॥ কৃথিত মৎস্যস্য অর্থাৎ পূতিমৎস্যস্য গুণঃ। দোষলত্বং॥ *॥ শুষ্কমৎস্য গুণৌ। বিষ্টম্ভিত্বং। দুর্জরত্বঞ্চ॥ *॥ লবণ ভাবিত মৎস্য গুণাঃ। কফ পিত্ত করত্বং। সারকত্বঞ্চ॥ *॥ সামুদ্র মৎস্য গুণাঃ। লঘুত্বং। বৃষ্যত্বং। মধুরত্বং। স্বল্পমলকারিত্বঞ্চ॥ সামুদ্রা গুরবো বৃষ্যাঃ স্নিগ্ধোষ্ণা বাত নাশনাঃ। ইতি পাঠান্তরং॥ *॥ নাদেয মৎস্য গুণাঃ। শ্লেষ্মলত্বং। বৃষ্যত্বং। মধুরত্বং। অল্প মলভেদকত্বঞ্চ॥ *॥ সর স্তড়াগ ভব মৎস্য গুণৌ। স্নিগ্ধত্বং। স্বাদুরসত্বঞ্চ॥ *॥ মহাহ্রদ ভব মৎস্যাঃ বলিনঃ। অল্পজল ভবাঃ অবলাঃ॥ *॥ দগ্ধমৎস্য গুণাঃ। গুরুত্বং। বৃষ্যত্বং। বৃংহণত্বং। বল বর্দ্ধনত্বঞ্চ॥ *॥ তৈল লবণ যুক্ত দগ্ধমৎস্যগুণঃ। ক্ষীণশুক্র ভগ্ন জর্জরিত নিত্যস্ত্রীসেবি ক্ষীণতেজসাং হিত কারিত্বং॥ *॥ পলাল বেষ্টিত কর্দম লেপিতাঙ্গার দগ্ধ সলবণ বেশবার পুরস্কৃত সার্দ্রক কটুতৈল সন্তোলিত মৎস্য গুণাঃ। স্বাদুত্বং। কফ বাত-

হরত্বং । শুক্রলত্বং । বল বর্দ্ধনত্বঞ্চ ॥ * ॥ শাকমৎস্যাখ্যব্যঞ্জন গুণাঃ । হৃদ্যত্বং । বৃষ্যত্বং । পুষ্টিদত্বঞ্চ ॥ * ॥ মৎস্য ঘণ্ট গুণাঃ । বলকরত্বং । বাত হরত্বং । অতিশয় রোচনত্বঞ্চ ॥ * ॥ শিরসি খণ্ডকেশধারি মৎস্যগুণাঃ । মুখপ্রিয়ত্বং । হৃদ্যত্বং । পংস্তম্ভাতকত্বঞ্চ । ইতিরাজবল্লভঃ ॥ * ॥ অপিচ । নিঃশল্কা নিন্দিতা মৎস্যাঃ সর্ব্বে শল্কযুতা হিতাঃ । বপুঃ স্থৈর্য্যকরা বীর্য্য বল পুষ্টি বিবর্দ্ধনাঃ ॥ * ॥ কূপ স্বল্পাজল নির্ঝর তড়াগ বাপী জলেষু যে মৎস্যাঃ । তে হ্রতিজড়া নাদেয়া যথোত্তরং লঘুতরাস্তু নাদেয়াঃ ॥ * ॥ ক্ষারাম্বু মৎস্যা গুরবো বিদাহিনো বিষ্টম্ভিনা স্তে লবণার্ণবাদিজাঃ । নামাশ্রিতাঃ স্বাদুজল হিতা অপি জ্ঞেয়া জড়া স্তে হপি তথাশ্রিতা ইমে ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ অথ ক্ষুদ্র মৎস্য গুণাঃ । ক্ষুদ্রমৎস্যাঃ স্বাদুরসা দোষ ত্রয় বিনাশনাঃ । লঘুপাকা রুচিকরাঃ সর্ব্বদা তে হিতা মতাঃ ॥ * ॥ অথাতিক্ষুদ্রমৎস্য গুণাঃ । অতি সূক্ষ্মাঃ পুংস্ত্বহরা রুচ্যাঃ কাসানিলাপহাঃ । * ॥ অথ মৎস্যাণ্ড গুণাঃ । মৎস্যগর্ভো ভৃশং বৃষ্যঃ স্নিগ্ধঃ পুষ্টিকরো গুরুঃ । কফ মেদপ্রদো বল্যো গ্লানি কৃন্মেহ নাশনঃ ॥ * ॥ অথ শুষ্কমৎস্য গুণাঃ । শুষ্কমৎস্যা ন বল্যাঃ স্যুর্দুর্জরা বিড়্বিবন্ধিনঃ । * ॥ অথ দগ্ধ মৎস্যগুণাঃ । দগ্ধমৎস্যো গুণৈঃ শ্রেষ্ঠঃ পুষ্টি কৃদ্বল বর্দ্ধনঃ । * ॥ অথ কূপজাদি মৎস্য গুণাঃ । কূপমৎস্যাঃ শুক্র মূত্র কণ্ঠ শ্লেষ্ম বিবর্দ্ধনাঃ । সরোজা মধুরা স্নিগ্ধা বল্যা বাত বিনাশনাঃ ॥ * ॥ নাদেয়া বৃংহণা মৎস্যা গুরবো হনিল নাশনাঃ । রক্ত পিত্তকরা বৃষ্যাঃ স্নিগ্ধোষ্ণাঃ স্বল্প বর্চ্চসঃ ॥ * ॥ চৌণ্ড্যাঃ পিত্ত হরাঃ স্নিগ্ধা মধুরা লঘবো হিমাঃ । তাড়াগা গুরবো বৃষ্যাঃ শীতলা বল মূত্রদাঃ ॥ তাড়াগ বন্নির্ঝরজা বলায়ু র্মতি দৃক্করাঃ । * ॥ অথ ঋতু বিশেষে মৎস্য বিশেষগুণঃ । হেমন্তে কূপজা মৎস্যাঃ শিশিরে সারসা হিতাঃ । বসন্তেতে তু নাদেয়া গ্রীষ্মে চৌণ্ড্য সমুদ্ভবাঃ ॥ তড়াগ জাতা বর্ষাসু তাস্বপথ্যা নদীভবাঃ । নির্ঝরাঃ শরদি শ্রেষ্ঠা বিশেষো হ্যযমুদাহৃতঃ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ মৎস্যোৎপত্তি কারণং যথা । ততস্তু মিত্রাবরুণৌ ভ্রাতরৌ ব্রহ্মচারিণৌ । তস্তু দেশং গতৌ দেবৌ বিচরন্তৌ যদৃচ্ছয়া ॥ তাভ্যাং তত্র তদা

দৃষ্টা উর্ব্বশী তু বরাপ্সরাঃ । তপস্বী
সুহিতান্যাভিঃ সখীভিঃ সা বরান
না ॥ সুস্বরেণ হি গীতেন উর্ব্বশ্যা মধু
রেণচ । ঈক্ষিতৌ চ কটাক্ষেণ স্কন্দ
তু স্তাবুভাবপি ॥ তয়োর্দ্ধ্যা পতিতং
রেতঃ কমলে হথ স্থলে জলে । কম
লে হথ বশিষ্ঠস্তু জাতো হি মুনি স
ত্তমঃ ॥ স্থলে ত্বগস্ত্যঃ সম্ভূতো জলে
মৎস্যো মহামতে । ইতি নারসিংহ
পুরাণে ৬ অধ্যায়ঃ ॥ * ॥ মৎস্য
ভক্ষণ নিষেধো যথা । যো যস্য
মাংস মশ্নাতি স তন্মাংসাদ উচ্যতে
। মৎস্যাদঃ সর্ব্বমাংসাদ স্তস্মান্মৎ-
স্যান্ বিবর্জয়েৎ ॥ ইতি মানবে ৫
অধ্যায়ঃ ॥ * ॥ জল স্থল চরা যে চ
প্রাণিন স্তান্মৃতানপি । ন ভক্ষেন্মা-
নবো জ্ঞানী হন্তা তেষাং ভবেন্নহি ॥
হত্বা হত্বা তু মৎস্যাশী সর্ব্বেষাং
যো বিশেষতঃ । মাংসাদঃ প্রাণিনাং
সো হপি তস্মান্মৎস্যং পরিত্যজেৎ
॥ ইতি পাদ্মোত্তরখণ্ডে ১০৫ অধ্যা-
য়ঃ ॥ * ॥ বর্জনীয় মৎস্যা যথা ।
শৃণু দেবি প্রবক্ষ্যামি মাংসভেদাম্নি
বোধ মে । নাদেয়ং তিক্তকমঠং পশু
শৃঙ্গিণমেব চ ॥ গোমীনং চক্রশল্কং
বড়ালং রাঘবং তথা । বামীনং চল
কুণ্ঠং সচক্রং চেঙ্গমেব চ ॥ ভূবিল

ঞ্চানিকুম্ভঞ্চ গাঙ্গেযানি বিবর্জ্জয়েৎ
॥ ইতি মৎস্যসূক্ত মহাতন্ত্রং । * ॥
রবিবারে মৎস্য ভক্ষণ নিষেধো যথা
। আমিষং রক্তশাকঞ্চ যো ভুঙ্‌ক্তে চ
রবে দিনে । সপ্তজন্ম ভবেৎ কুষ্ঠী দ-
রিদ্রশ্চোপজায়তে ॥ ইতি ভবিষ্য-
পুরাণং ॥ মাষ মামিষ মাংসঞ্চ মসূ
রং নিম্বপত্রকং । ভক্ষয়েদ্যো রবের্ব্বারে
সপ্তজন্মান্যপুত্রকঃ ॥ ইতি তিথ্যা-
দিতত্ত্বং ॥ * ॥ কার্ত্তিকে মৎস্য ভ-
ক্ষণ নিষেধো যথা । ন মাৎস্যং ভক্ষ-
য়েন্মাংসং ন কৌর্ম্মং নান্যদেব হি । চ-
ণ্ডালো জায়তে রাজন্ কার্ত্তিকে মাং-
স ভক্ষণাৎ ॥ ইতি নারদীয়পুরাণং
॥ * ॥ মাঘ বৈশাখয়ো র্হবিষ্য ব্রহ্ম-
চর্য্য বিধানাৎ মৎস্যভক্ষণং নিতরাং
নিষিদ্ধমিতি কৃত্যতত্ত্বদর্শনাৎ । * ॥
জন্মতিথৌ মৎস্য ভক্ষণ নিষেধো
যথা । আমিষং কলহং হিংসাং বর্ষ-
বৃদ্ধৌ বিবর্জয়েৎ । অপিচ । ভুঙ্‌ক্তে যস্তু
নিরামিষং সহি ভবেজ্জন্মান্তরে প-
ণ্ডিতঃ । ইতি তিথ্যাদিতত্ত্বং ॥ * ॥
শৈবস্য মৎস্য ভক্ষণ নিষেধো যথা
। ক্ব মদ্যং ক্ব শিবে ভক্তিঃ ক্ব মাংসং ক্ব
শিবার্চনং । মৎস্য মাংস রতানাং বৈ
দূরে তিষ্ঠতি শঙ্করঃ ॥ ইতি কাশী-
খণ্ডং ॥ * ॥ না ভক্ষ্যং নৈবেদ্যার্থে

তক্ষেস্বজ্ঞা মহিষী ক্ষীরং বর্জয়েৎ ॥ পঞ্চনখ মৎস্য বরাহ মাংসানি চ। ইত্যাহ্নিকতত্ত্বধৃত বিষ্ণুসূত্রং ॥ ❀ ॥ বিন্ধ্য পর্ব্বতস্য পশ্চিমে মৎস্যভক্ষণ নিষেধো যথা। বিন্ধ্যস্য পশ্চিমে ভাগে মৎস্যভুক্ পতিতোনরঃ। ইতি পুরাণং ॥ ❀ ॥ কামতো মৎস্য ভক্ষণ প্রায়শ্চিত্তং যথা। মৎস্যাংস্তু কামতো জগ্ধা সোপবাস স্ত্র্যহং বসেৎ। অজ্ঞানত স্তদর্দ্ধং। ইতি প্রায়শ্চিত্তবিবেকঃ ॥ ❀ ॥ মৎস্য ভক্ষণ প্রতিপ্রসবো যথা। মৎস্যান্ সশল্কান্ ভুঞ্জীত মাংসং রৌরব মেব চ। নিবেদ্য দেবতাভ্যশ্চ ব্রাহ্মণেভ্যশ্চ নান্যথা ॥ সফরং সিংহতুণ্ডঞ্চ তথা পাঠীন রোহিতৌ। মৎস্যা স্ত্বেতে সমুদ্দিষ্টা ভক্ষণায় তপোধনৈঃ ॥ প্রোক্ষিতং ভক্ষয়েদেষাং মাংসঞ্চ দ্বিজকাম্যয়া। যথা বিধি নিযুক্তশ্চ প্রাণানামপি চাত্যয়ে ॥ ইতি কৌর্ম্মে উপরিভাগে ১৬ অধ্যায়ঃ ॥ অপিচ। পাঠীন রোহিতাবাদ্যৌ নিযুক্তৌ হব্য কব্যযোঃ। রাজীবান্ সিংহতুণ্ডাংশ্চ সশল্কাংশ্চৈব সর্ব্বশঃ ॥ ইতি মানবে ৫ অধ্যায়ঃ ॥ ❀ ॥ অনিবেদ্য ন ভোক্তব্যং মৎস্যং মাংসঞ্চ যদ্ভবেৎ। অন্নং বিষ্ঠা পয়ো মূত্রং যদ্বিষ্ণো রনিবেদিতং ॥ ইত্যাহ্নিকতত্ত্বং ॥ ❀ ॥ প্রেতশ্রাদ্ধে মৎস্যদান বিধি যথা। সপিণ্ডীকরণং যাবৎ প্রেতশ্রাদ্ধন্তু ষোড়শং। পক্বান্নেনৈব কর্ত্তব্যং সামিষেণ দ্বিজাতিভিঃ ॥ ইতি শ্রাদ্ধতত্ত্বধৃত কামধেনু বচনং ॥

মৎস্যঃ পুং মীনবিশেষঃ ॥ বিরাটদেশঃ ॥ নারায়ণঃ। ইতি হেমচন্দ্রঃ ॥ দেশবিশেষে বহুবচনান্তঃ। ইতি মেদিনী ॥ দ্বাদশরাশিঃ। যথা। মৎস্যৌ ঘটী নৃ মিথুনং সগদং সবীণং। ইত্যাদি জ্যোতিস্তত্ত্বং ॥ ❀ ॥ অষ্টাদশ পুরাণান্তর্গত পুরাণ বিশেষঃ। যথা। পুণ্যং পবিত্র মায়ুষ্য মিদানীং শৃণুত দ্বিজাঃ। মাৎস্যং পুরাণ মখিলং যজ্জগাদ গদাধরঃ ॥ ইতি মৎস্যপুরাণে ১ অধ্যায়ঃ ॥ ❀ ॥ দশাবতারান্তর্গত প্রথমাবতারঃ। যথা। সূত উবাচ। পুরা রাজা মনু র্নাম চীর্ণবান্ বিপুলং তপঃ। পুত্রে রাজ্যং সমারোপ্য ক্ষমাবান্ রবিনন্দনঃ ॥ মলয়স্যৈকদেশে তু সর্ব্বাত্মগুণ সংযুতঃ। সমদুঃখ সুখো বীরঃ প্রাপ্তবান্ যোগ মুত্তমং ॥ বভূব বরদ শ্চাস্য বর্ষাযুত শতে গতে। বরং বৃণীষ্ব প্রোবাচ প্রীতঃ স কমলাসনঃ ॥ এব মুক্তো হ ব্রবীদ্রাজা

প্রণম্য স পিতামহং । একমেবাহ-
মিচ্ছামি ত্বত্তো বর মনুত্তমং ॥ ভূত
গ্রামস্য সর্ব্বস্য স্থাবরস্য চরস্য চ ।
ভবিতা রক্ষণে যানং প্রলযে সমুপ
স্থিতে ॥এব মস্ত্বিতি বিশ্বাত্মা তত্রৈ
বান্তরধীযত । পুষ্পবৃষ্টিশ্চ মহতী
খাত্ পপাত সুরাপিতা ॥ কদাচি-
দাশ্রমে তস্য কুর্ব্বতঃ পিতৃ তর্পণং ।
পপাত পাণ্যো রুপরি শফরী জল
সংযুতঃ ॥ দৃষ্ট্বা তচ্ছফরী রূপং স দয়া
লু মহীপতিঃ । রক্ষণাযাকরোদ্যত্নং
স তস্মিন্ করকোদরে ॥ অহোরাত্রে-
ণ চৈকেন ষোড়শাঙ্গুল বিস্তৃতঃ । সো
হভবন্মৎস্য রূপেণ পাহি পাহীতি
চাব্রবীৎ ॥ স তমাদায মণিকে প্রা-
ক্ষিপজ্জলচারিণং । তত্রাপি চৈকরা-
ত্রেণ হস্তত্রয মবর্দ্ধত ॥ পুনঃ প্রাহা
র্ত্তনাদেন সহস্রকিরণাত্মজং । স মৎ-
স্যঃ পাহি পাহীতি ত্বা মহং শরণং
গতঃ ॥ ততঃ স কূপে তং মৎস্যং
প্রাহিণোদ্রবিনন্দনঃ । যদা ন মাতি
তত্রাপি কূপে মৎস্যঃ সরোবরে ॥
ক্ষিপ্তো হসৌ পৃথুতা মাগাৎ পুন
র্যোজন সম্মিতঃ ৷ তত্রাপ্যাহ পুন
র্দীনঃ পাহি পাহি নৃপোত্তম ॥ ত-
তঃ স মনুনা ক্ষিপ্তো গঙ্গাযা মপ্য-
বর্দ্ধত । যদা তদা সমুদ্রে তং প্রাক্ষি-
পন্মেদিনীপতিঃ ॥ যদা সমুদ্র মখি-
লং ব্যপ্যাসৌ সমুপস্থিতঃ । তদা-
প্রাহ মনু র্ভীতঃ কোপি ত্ব মসুরেশ্ব-
রঃ ॥ অথবা বাসুদেব স্ত্ব মন্য ঈদৃক্
কথং ভবেৎ । যোজনাযত বিংশত্যা
কস্য তুল্যং ভবেদ্বপুঃ ॥ জ্ঞাত স্ত্বং
মৎস্য রূপেণ মাংক্ষেদযসি কেশব ।
হৃষীকেশ জগন্নাথ জগদ্ধাম নমো
হস্তুতে ॥এব মুক্তঃ স ভগবান্ মৎস্য
রূপী জনার্দ্দনঃ । সাধু সাধ্বিতি চো-
বাচ সম্যক জ্ঞাত স্ত্বযানঘ ॥ অচিরে-
ণৈব কালেন মেদিনী মেদিনীপতে ।
ভবিষ্যতি জলে মগ্না সশৈল বন কা-
ননা ॥নৌ রিযং সর্ব্ব দেবানাং নিকা-
যেন বিনির্ম্মিতা । মহাজীবনিকাযস্য
রক্ষণার্থং মহীপতে ॥ স্বেদাণ্ডজো-
দ্ভিজো যে বৈ যে চ জীবা জরাযুজাঃ ।
অস্যাং নিধায সর্ব্বাং স্তাননাথান্
পাহি সুব্রত ॥ যুগান্ত বাতাভিহতা
যদা ভবতি নৌ নৃপ । শৃঙ্গে হস্মিন্
মম রাজেন্দ্র তদেমাং সংযমিষ্যসি ॥
ততো লযান্তে সর্ব্বস্য স্থাবরস্য চর-
স্য চ । প্রজাপতি স্ত্বং ভবিতা জগত
পৃথিবীপতে ॥ এবং কৃতযুগস্যাদৌ
সর্ব্বজ্ঞো ধৃতিমান্ নৃপঃ । মন্বন্তরাধিপ
শ্চৈব দেব পূজ্যো ভবিষ্যসি ॥ ইতি
মৎস্যপুরাণে মনু বিষ্ণুসংবাদে প্রথ-

নে সর্গে প্রথমোধ্যায়ঃ ॥ বিস্তারস্তু শ্রীভাগবতে ৮স্কন্ধে২৪অধ্যায়ে দ্রষ্টব্যঃ॥ঞ্চ॥তস্য মন্ত্র ধ্যান পূজাদি যথা ।শঙ্কর উবাচ।এক ত্রবা ভবন্মৎস্যাবতারঃ কল্প আদিমে । তস্য মন্ত্রং প্রবক্ষ্যামি ভক্তি মুক্তি প্রদায়কং ॥ তারো নমো ভগবতে মং মৎস্যায় র ন্নাং বদেৎ । দ্বাদশাক্ষর মন্ত্রো হয়ং মনি ব্রহ্মা সমীরিতঃ ॥ গায়ত্রীছন্দ উদিতং দেবতা মীনবিগ্রহঃ । ভগবান শর্ব্বরীনাথো বীজং শ্রী প্রঞ্চকীলকং ॥ নাভ্যধো রোহিত সম আকণ্ঠঞ্চ নরাকৃতিঃ । ঘনশ্যাম শ্চতুর্ব্বাহুঃ শঙ্খ চক্র গদাধরঃ ॥ শৃঙ্গীনৎস্য নিভোমৃদ্ধা লক্ষ্মী বক্ষো বিরাজিতঃ। পদ্মচিহ্নিত সর্ব্বাঙ্গঃ সুন্দর শ্চারুলোচনঃ॥ জপেদ্দ্বাদশ সাহস্রং ত্রিমধ্বাক্তে স্তিলৈ হুনেৎ । প্রত্যহং তদ্দশাংশেন বৈশাখে কার্ত্তিকে তথা মাসে চ নাগশীর্ষে চ হবিষ্যাশী জিতেন্দ্রিয়ঃ ॥ আরভ্য ভাদ্র বহুল মষ্ট বা ষোড়শাহকং । লক্ষ্মী মনুং জপেন্নিত্য মিদঞ্চাপি কলাশতং ॥ তথৈব হোমঃ কর্ত্তব্য স্তথান্য দিবসেষু তু । জপেদ্দ্বাদশ শতং তিল তণ্ডুল চন্দনৈঃ ॥আজ্য স্তথা শতাষ্টৌ চ তর্পয়েচ্চ তথা প্রিয়ং । রক্তোৎপলৈ র্ব্বা পদ্মৈ র্ব্বা নানাত্যর্থৈঃ সুগন্ধিভিঃ ॥ এবং কৃতে বর্ষমেকং মন্ত্রঃ সিদ্ধিঃ প্রজায়তে । নিত্যং দ্বাদশ বিপ্রাংশ্চ শ্রীরূপাঞ্চ সুবাসিনীং।ভোজয়েৎ পূজনঞ্চাস্য চরেদ্বৌ ব্যাশয়েৎ সদা । ষট্‌পত্র কর্ণিকায়াঞ্চ শ্রীযুতং দেব মর্চ্চয়েৎ ॥ ষট্‌পত্রেষ ষড়ঙ্গানি যজেদ্বাহ্যে চতুর্দ্দলে । মণ্ডূকং মকরং কূর্ম্মং শিশুমারঞ্চ পূর্ব্বতঃ ॥ ভদ্বাহ্যে হ্যষ্টদলে পূজ্যাঃ ক্ষারাদ্যাঃ সপ্তসিন্ধবঃ ।তদ্বাহ্যেহর্কদলে পূজ্যা বাসুক্যাদ্যাঃ ফণীশ্বরাঃ ॥ তস্য বাহ্যে শক্রদলে রত্নানি তু চতুর্দ্দশ । সমুদ্রজানি পূজ্যানি লক্ষ্মী কৌস্তুভকানি চ ॥ গঙ্গাদ্যাঃ ষোড়শ ততো মহানদ্যঃ প্রপূজয়েৎ । তত শ্চাষ্টদলে বেদান্ পবেদ সমন্বিতান্॥ দিগীশাংশ্চ তদস্ত্রাণি নবাবরণ পূজনং । এবং সিদ্ধ মনু মন্ত্রী জায়তে সিদ্ধি ভাজনং॥ এতদুক্ত শতং মন্ত্রং জপেদষ্টোত্তরং শতং । তদ্দেবতা দিনে সিদ্ধঃ পুস্তকাদেব জায়তে ॥ অঙ্গঠিত প্রযোগেষু ন পুন স্তস্য সংস্কৃতিঃ । এতৎ পল্লবিত মন্ত্রা মম সিদ্ধ্যন্তি পার্ব্বতি ॥ এতৎ সংপুটিতাঃ সর্ব্বে বৈদিকাঃ সিদ্ধিদাঃ কলৌ অনেন গ্রথিতা জপ্তাঃ কলেশ্চ সদ্য সিদ্ধিদাঃ ॥

ইতি মেরুতন্ত্রে ২৬ পুটলশঃ ॥

মৎস্যকরণ্ডিকা স্ত্রী মৎস্যরক্ষণপাত্রং। খালুই ইতি ভাষা। তৎপর্য্যায়ঃ। মৎস্যধানী ২ জবেণী ৩। ইতি জটাধরঃ ॥

মৎস্যগন্ধা স্ত্রী লাঙ্গলীবৃক্ষঃ। স চ জলপিপ্পলী। ইতি জটাধরঃ রাজনির্ঘণ্টশ্চ ॥ ব্যাসমাতা। ইতি মহাভারতং ॥

মৎস্যঘণ্টঃ পুং স্বনামখ্যাতমৎস্যব্যঞ্জনং। তৎপর্য্যায়ঃ। গলগুহঃ ২। ইতি শব্দচন্দ্রিকা ॥

মৎস্যজালং ক্লী আনায়ঃ। মাচধরা জাল ইতি ভাষা। ইতিহেমচন্দ্রঃ॥

মৎস্যণ্ডিকা স্ত্রী শর্করাবিশেষঃ। মিছিরি ইতি ভাষা। যথা। লসীকা ফাণিত গুড় খণ্ড মৎস্যণ্ডিকাসিতাঃ। নির্ম্মলা লঘবো জ্ঞেয়াঃ শীতবীর্য্যা যথোত্তরং ॥ যথা যথৈষাং বৈমল্যং ভবেচ্ছৈত্যং তথা তথা ॥ ইতি রাজবল্লভঃ ॥ * ॥ রাব ইতি হিন্দীভাষা। তস্যলক্ষণং যথা। ইক্ষোঃ রসো যঃ সংপক্বো ঘনঃ কিঞ্চিদ্দ্রবান্বিতঃ। মন্দং মৎস্যন্দতে যস্মান্মৎস্যণ্ডীতি নিগদ্যতে ॥ অস্যা গুণাঃ। মৎস্যণ্ডী ভেদিনী বল্যা লঘ্বী পিত্তানিলাপহা। মধুরা বৃংহণী বৃষ্যা রক্তদোষাপহা স্মৃতা ॥ ইতি ভাবপ্রকাশঃ ॥

মৎস্যণ্ডী স্ত্রী খণ্ডবিকারঃ। ইত্যমরঃ॥ ইক্ষুবিশেষস্য রসপাকে খণ্ডযোগ্যে সারভূতে যা গুড়িকাকারা জায়তে সা মৎস্যণ্ডী। খণ্ডশালূকং মিছিরী ইতি খ্যাতে নবাত্ ইতি খ্যাতাপি মৎস্যণ্ডীতি কেচিৎ। মৎস্যাণ্ডাকারত্বাৎ মৎস্যণ্ডী মনীষাদিত্বাদলুক্ নদাদিত্বাদীপ্ মৎস্য মনিতি মৎস্যণ্ডী অন প্রাণনে ডঃ ইত্যন্যে। মদং স্যন্দতে মৎস্যণ্ডীতি কেচিৎ। ইতি ভরতঃ

মৎস্যধানী স্ত্রী মৎস্যরক্ষার্থপাত্রং। খারুযী ইতি খালুই ইতিচ ভাষা। তৎপর্য্যায়ঃ। জবেণী ২। ইত্যমরঃ ॥ মৎস্যকরণ্ডিকা ৩ খারযিকা ৪ মৎস্যবন্ধনী ৫ জবেণিঃ ৬ জবেণা ৭ জপিনী ৮ জপিনিঃ ৯। ইতি ভরতঃ॥ সা স্বল্পা চেৎ জপিনী ভবেৎ। ইতি শব্দরত্নাবলী ॥

মৎস্যনাশকঃ পুং জররপক্ষী। ইতি ভুরিপ্রয়োগঃ ॥ মৎস্যনাশকত্তরি ত্রি ॥

মৎস্যনাশনঃ পুং জররপক্ষী। ইতি হেমচন্দ্রঃ ॥

মৎস্যপিত্তা স্ত্রী কটুরোহিণী।

ইত্যমরঃ ॥

মৎস্যবন্ধী পুং ধীবরঃ। যথা। কৈবর্ত্তো ধীবরো দাসো মৎস্যবন্ধী চ জালিকঃ। ইতি হলায়ধঃ ॥

মৎস্যবন্ধিনী স্ত্রী মৎস্যধানী। ইতি হলায়ুধঃ ॥

মৎস্যরঙ্কঃ পুং মৎস্যরঙ্গপক্ষী। ইতি ভূরিপ্রয়োগঃ ॥

মৎস্যরঙ্গঃ পুং পক্ষিবিশেষঃ। মাচরাঙ্গা ইতি ভাষা। তৎপর্য্যায়ঃ। ঝাপাশী ২ জলমদ্গুঃ ৩ মণীচকঃ ৪ । ইতি হারাবলী ॥ মৎস্যাশনঃ ৫ মীনরঙ্কুঃ ৬ মৎস্যরঙ্কঃ ৭ সুচিত্রকঃ ৮। ইতি শব্দরত্নাবলী ॥

মৎস্যরাজঃ পুং রোহিতমৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ বিরাটরাজঃ। ইতি মহাভারতং ॥

মৎস্যবিন্না স্ত্রী কটুকা। ইতি বৈদ্যকং ॥

মৎস্যবেধনং ক্লী বড়িশং। ইত্যমরঃ

মৎস্যবেধনী স্ত্রী মদ্গুপক্ষী। ইতি জটাধরঃ ॥ বড়িশং। ইতি শব্দরত্নাবলী ॥

মৎস্যসন্তানিকঃ পুং মৎস্যব্যঞ্জনবিশেষঃ। যথা। দগ্ধো হঙ্গারে সলবণো বেশবারৈরুপস্কৃতঃ। সার্দ্রকঃ কটুতৈলেন মৎস্যসন্তানিকো ভবেৎ ॥ ইতি শব্দচন্দ্রিকা ॥

মৎস্যাঙ্গী স্ত্রী হিলমোচিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

মৎস্যাদনী স্ত্রী জলপিপ্পলী। ইতি রাজনির্ঘণ্টঃ ॥

মৎস্যাশনঃ পুং মৎস্যরঙ্গপক্ষী। ইতি ত্রিকাণ্ডশেষঃ ॥ মৎস্যভক্ষকে ত্রি ॥

মৎস্যাক্ষী স্ত্রী ব্রাহ্মী। ইত্যমরঃ ॥ সা চ সোমলতাখ্যা। ব্রহ্মীশাকে ইতি কেচিৎ। ইতি ভরতঃ। যথা। ব্রাহ্মী বয়স্থা মৎস্যাক্ষী মীনাক্ষী সোমবল্লরী। মৎস্যাক্ষী শিশিরা রুচ্যা ব্রণদোষ ক্ষয়াপহা ॥ ইতি রাজনির্ঘণ্টঃ ॥ গণ্ডদূর্ব্বা। ইতিরাজনির্ঘণ্টঃ ॥ হিলমোচিকা ॥ ব্রহ্মী শাকঃ। ইতি রত্নমালা ॥

মৎস্যী স্ত্রী স্ত্রীমৎস্যজাতিঃ। ইতি মুগ্ধবোধ ব্যাকরণং ॥

মৎস্যোদরী স্ত্রী সত্যবতী। সা চ ব্যাসমাতা। ইতি জটাধরঃ ॥ কাশীস্থ তীর্থ বিশেষঃ। যথা। কৈলাসাদ্রেঃ সমাযাতাঃ সপ্তকোটি মিতাঃ প্রভো। দুর্গাণি তৈঃ কৃতানীহ সপ্তবর্গ সমানি চ। স দ্বারাণি স যন্ত্রাণি কবাট বিকটানি চ ॥ কোটি কোটি ভিটান্যানি সর্ব্বর্দ্ধি সহি-

তান্যপি। ততঃ শৈলং মহাদুর্গং তৈস্তু কাশী পরিতঃ কৃতং ॥ পরিখাশ্চ কৃতা নিন্দা মৎস্যোদর্য্যা জলাবিলা। মৎস্যোদরী দ্বিধা জাতা বহিরন্তশ্চরা পুনঃ ॥ তস্য তীর্থং মহৎ খ্যাতং মিলিতং গাঙ্গবারিণি। যদা সংহার মার্গেণ গঙ্গাম্ভঃ পূরয়েদিহ ॥ তদা মৎস্যোদরী তীর্থং লভ্যতে পুণ্যগৌরবাৎ। সূর্য্যাচন্দ্রমসোঃ পর্ব্ব তদা কোটিগুণং শতং ॥ সর্ব্ব পর্ব্বাণি তত্রৈব সর্ব্ব তীর্থানি তত্র বৈ। তত্রৈব সর্ব্ব লিঙ্গানি গঙ্গা মৎস্যোদরী যতঃ ॥ মৎস্যোদর্য্যাঞ্চ যে স্নাতা যত্র কুত্রাপি মানবাঃ। কৃত পিণ্ড প্রদানা স্তে ন মাতু র্জঠরে শয়াঃ ॥ অবিমুক্ত মিদং ক্ষেত্রং মৎস্যাকারত্ব মাপ্তবাৎ। পরিতঃ স্বর্ধুনী বারি সংসারে পরিবীক্ষতে ॥ মৎস্যোদর্য্যাং কৃত স্নানা যে নরা স্তে নরোত্তমাঃ। কৃত্বাপি বহুপাপানি নেক্ষন্তে ভাস্করেঃ পুরীং ॥ কিং স্নাত্বা বহু তীর্থেষু কিং তপ্ত্বা দুষ্করং তপঃ। যদি মৎস্যোদরীং স্নাতাঃ জন্তো গর্ভভয়ং ততঃ ॥ যত্র যত্র হি লিঙ্গানি নৃ দেবর্ষি কৃতান্যপি। তত্র মৎস্যোদরীং প্রাপ্য সুস্নাতো মোক্ষ ভাজনং ॥ [illegible]তীর্থান্যনেকানি ভূর্ভুবঃ স্বর্গ তান্যপি। ন সমানি পরং তানি কোট্যংশেনাপি নিশ্চিতং ॥ ইত্থং তীর্থং কৃতং তেন বিভো কৈলাস বাসিনা। গণাধিপেন সুমহৎ সুমহোদর কর্ম্মণা ॥ ইতি কাশীখণ্ডে ৬৯ অধ্যায়ঃ ॥

মথ জ এ পাকে। ইতি কবিকল্পদ্রুমঃ ॥ জ মস্তঃ মথঃ। এ অমথীৎ। ইতি দুর্গাদাসঃ ॥

মথ ই জল্পে। ইতি কবিকল্পদ্রুমঃ ॥ ই মন্থ্যতে। অন্থো বধ ক্লেশো। ইতি দুর্গাদাসঃ ॥

মথনং ক্লী বিলোড়নং। মওনা ইতি ভাষা। যথা। হা হং নন্দনভিঃ খেদং মথনং ক্ষীরবারিধেঃ। কিং তত্র পরমাণুর্ব্বৈ যত্র মজ্জতি মন্দরঃ ॥ ইতি শ্রীধরস্বামী ॥

মথনঃ পুং গণিকারিকাবৃক্ষঃ। ইতি রত্নমালা ॥

মথিতং ক্লী নির্জ্জলঘোলং। ইত্যমরঃ ॥ অস্য গুণাঃ। কফপিত্ত নাশকত্বং। রোচনত্বং। ধাতুপুষ্টিদত্বঞ্চ। ইতি রাজবল্লভঃ ॥ বিলোড়িতে ত্রি ॥

মথুরা স্ত্রী স্বনামখ্যাতপুরী। অধুনা আগরা ইতি খ্যাতস্যাগ্রনস্য নগরং। তৎপর্য্যায়ঃ। মধুপুং ২। ইতি ত্রিকাণ্ডশেষঃ ॥ মধুপুরী ৩

মথুরা৪। ইতি শব্দরত্নাবলী॥ সা চ মোক্ষদায়কতীর্থং। যথা। অযোধ্যা মথুরা মায়া কাশী কাঞ্চী অবন্তিকা। পুরী দ্বারবতী চৈব সপ্তৈতা মোক্ষদা যিকাঃ॥ অযোধ্যা রামনগরী মথুরা কৃষ্ণ পালিতা। এতাস্তু পৃথিবী মধ্যে ন গণ্যন্তে কদাচন॥ শ্রীরামধনু রগুহ্যা অযোধ্যা সা মহাপুরী। মথুরা কেশবোৎসৃষ্ট সুদর্শন বিধারিতা॥ ইত্যাদি ভূতশুদ্ধিতন্ত্রং॥ *॥ তত্র বিষ্ণু দর্শন মাহাত্ম্যং যথা। যজ্জ্যৈষ্ঠ শুক্ল দ্বাদশ্যাং স্নাত্বা বৈ যমুনাজলে। মথুরায়াং হরিং দৃষ্ট্বা প্রাপ্নোতি পরমাং গতিং॥ যমুনা সলিলে স্নাতঃ পুরুষো মুনিসত্তম। জ্যেষ্ঠা মূলামলে পক্ষে দ্বাদশ্যা মুপবাসকৃৎ॥ সমভ্যর্চ্যাচ্যুতং সম্যক্ মথুরায়াং সমাহিতঃ॥ অশ্বমেধস্য যজ্ঞস্য প্রাপ্নোত্যবিকলং ফলং॥ কশ্চিদস্মৎ কুলে জাতঃ কালিন্দী সলিলাপ্লুতঃ। অর্চ্চয়িষ্যতি গোবিন্দং মথুরায়া মুপোষিতঃ॥ জ্যেষ্ঠা মূল সিতে পক্ষে যেনৈবং বয়মপ্যত। পরামৃদ্ধি মবাপ্স্যান স্তারিতাঃ স্বকুলোদ্ভবৈঃ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৮ অধ্যায়ঃ॥*॥ অস্যা মাহাত্ম্যং যথা। বরাহ উবাচ। ন বিদ্যতে চ পাতালে নান্ত রীক্ষে ন মানুষে। সমস্তং মথুরায়াঃ হি প্রিয়ং মম বসুন্ধরে॥ সূতউবাচ। তচ্ছ্রুত্বা বচনং তস্য প্রণম্য শিরসা তদা। পুণ্যানাং পরমং পুণ্যং পৃথ্বী বচনমব্রবীৎ॥ পৃথিব্যুবাচ। পুষ্করং নৈমিষং চৈব পুরী বারাণসী তথা। এতা হিত্বা মহাভাগ মথুরাং কিং প্রশংসসি॥ বারাহ উবাচ। শৃণু কার্ত্স্নেন বসুধে কথ্যমানং মযানঘে। মথুরেতি চ বিখ্যাতং নাস্তি ক্ষেত্রং পরং মম॥ সা রম্যা চ সুশস্তা চ জন্মভূমিঃ প্রিয়া মম। শৃণু দেবি যথা স্তৌমি মথুরাং পাপহারিণীং॥ তন্নিবাসী নরো যাতি মোক্ষং নাস্ত্যত্র সংশয়ঃ। মহামাঘ্যাং প্রয়াগে তু যৎ ফলং লভতে নরঃ॥ তৎফলং লভতে দেবি মথুরায়াং দিনে দিনে। কার্ত্তিক্যাঞ্চৈব যৎ পুণ্যং পুষ্করে তু বসুন্ধরে॥ তৎ ফলং লভতে দেবি মথুরায়াং দিনে দিনে। পূর্ণে বর্ষ সহস্রে তু বারাণস্যান্তু যৎ ফলং। তৎ ফলং লভতে দেবি মথুরায়াং ক্ষণেন হি॥ মথুরাঞ্চ পরিত্যজ্য যোহন্যত্র কুরুতে রতিং। মূঢ়ো ভ্রমতি সংসারে মোহিতো মায়যা মম॥ যঃ শৃণোতি বরারোহে মাথুরং মম মণ্ডলং। অন্যেনোচ্চারিতং শ্রুণ্বন্ ...

হপি পাপৈঃ প্রমুচ্যতে ॥ পৃথিব্যাং যানি তীর্থানি আসমুদ্র সরাংসি চ। মথুরায়াং গমিষ্যন্তি সুপ্তে চৈব জনার্দ্দনে ॥ মথুরাং সমনুপ্রাপ্য শ্রাদ্ধং কৃত্বা যথা বিধি। তৃপ্তিং যান্তীহ পিতরো যাবৎ স্থিত্যগুজন্মনঃ ॥ যে বসন্তি মহাভাগে মথুরা মিতরে জনাঃ। তেপি যান্তি পরাংসিদ্ধিং মৎ প্রসাদান্ন সংশয়ঃ ॥ জন্মান্তকে শৌকরেৎ মথুরায়াং বিশেষতঃ। বিনা সাংখ্যেন যোগেন মুচ্যতে নাত্র সংশয়ঃ ॥ মথুরায়াং মহাপুর্য্যাং যে ব সন্তি শুচিব্রতাঃ। বলিভিক্ষাপ্রদাতারো যে বা তে নরবিগ্রহাঃ ॥ ভবিষ্যামি বরারোহে দ্বাপরে যুগ সংস্থিতে। যযাতি ভূপবংশাচ্চ ক্ষত্রিয়ঃ জলবদ্ধনঃ ॥ ভবিষ্যামি বরারোহে মথুরায়াং ন সংশয়ঃ। মূর্ত্তিং চতুর্ব্বিধাং কৃত্বা স্থাস্যামি ঋষিভিঃ স্তুতঃ ॥ স্থাস্যামি বৎসর শতং যুদ্ধেষু কৃত নিশ্চয়ঃ। একা চন্দন সঙ্কাশা দ্বিতীয়া কনকপ্রভা ॥ অশোক সদৃশা চান্যা অন্যাচোৎপল সন্নিভা। তত্র গুহ্যানি নামানি ভবিষ্যন্তি মম প্রিয়ে ॥ পুণ্যানি চ পবিত্রাণি সংসার ছেদনানি চ। যত্রাহং ঘাতয়িষ্যামি ধাত্রিং শান্ত বসুন্ধরে ॥ দৈত্যান্ ঘোরান্ মহাভাগে কংশাদীন্ ঘোরদর্শনান্। যমুনা যত্র সুবহা নিত্যং সন্নিহিতা ধ্রুবং ॥ বৈবস্বতস্বসা রম্যা যমুনা যত্র বিশ্রুতা। তাং নদীং যমুনাং গঙ্গাং প্রযাগে সঙ্গ বিশ্রুতাং ॥ গঙ্গা শতগুণা পুণ্যা মথুরে মম মণ্ডলে। যমুনা বিশ্রুতা দেবি নাত্র কার্য্যা বিচারণা ॥ তত্র তীর্থানি গুহ্যানি ভবিষ্যন্তি মমানঘে ॥ যেষু স্নানপরো দেবি মম লোকে মহীয়তে। অথাত্র মুঞ্চতে প্রাণান্ মম কর্ম্ম পরায়ণঃ ॥ ন জায়তে স মর্ত্যেষু জায়তে চ চতুর্ভুজঃ। অবিমুক্তে নরঃ স্নাতো মুক্তিং প্রাপ্নোত্যসংশয়ং ॥ তথাত্র মুঞ্চতে প্রাণান্মমলোকং স গচ্ছতি। বিশ্রান্তি সংজ্ঞকং নাম তীর্থং ত্রৈলোক্য বিশ্রুতং ॥ যস্মিন্ স্নাতো নরো দেবি মমলোকে মহীয়তে। সর্ব্বতীর্থেষু যৎস্নানং সর্ব্বতীর্থেষু যৎফলং ॥ তৎ ফলং লভতে দেবি দৃষ্ট্বা দেবং গতশ্রমং। নচ যজ্ঞৈর্ন তপসা ন ধ্যানৈর্নচ সংযমৈঃ ॥ তৎ ফলং লভতে দেবি স্নাতো বিশ্রান্তি সংজ্ঞকে। কালত্রয়ন্তু বন্দে যঃ পশ্যতি গতশ্রমং ॥ কৃত্বা প্রদক্ষিণং দেবং তু বিষ্ণুলোকং স গচ্ছতি। অস্তি চান্যৎপরং গুহ্যং সর্ব্ব সংসার মোক্ষণং ॥ যস্মিন্ স্নাতো

নরো দেবি মম লোকে মহীয়তে। প্রযাগং নাম তীর্থন্তু দেবানামপি দুর্লভং ॥ তস্মিন স্নাতো নরো দেবি অগ্নিষ্টোম ফলং লভেৎ। ইন্দ্রলোকং সমাসাদ্য নরো বৈ তত্র মোদতে॥ অথাত্র মুঞ্চতে প্রাণান্ মম লোকং স গচ্ছতি। তথা কনখলং তীর্থং নাম গুহ্যং পরং মম ॥ স্নান মাত্রেণ তত্রাপি নাক পৃষ্ঠে স মোদতে। অস্তি ক্ষেত্রং পরং গুহ্যং তিন্দুকং নাম নামতঃ॥ তস্মিন স্নাতো নরো দেবি মম লোকে মহীয়তে। অস্মিং স্তীর্থে পুরা বৃত্তং তচ্ছৃণুষ্ব বসুন্ধরে॥ পাঞ্চাল বিষয়ে দেবি কাম্পিল্যঞ্চ পুরোত্তমং। ধন ধান্য সমাযুক্তং ব্রহ্মদত্তেন পালিতং॥ তস্মিংস্তু বসতে দেবি তিন্দুকো নাম নামতঃ। তস্মিংস্তু বসত স্তস্য নাপিতস্য পুরোত্তমে॥ কালেন মহতা তস্য অটুম্বং ক্ষয় মাগতং। ক্ষীণে অটুম্বে তু তদা সুভৃশং দুঃখ পীড়িতঃ॥ সর্ব্বসঙ্গ পরিত্যাগী যো গচ্ছন্মথুরা পুরীং। ব্রাহ্মণাবসথে সোপি বর্ত্তমানো বসুন্ধরে॥ তস্য কর্ম্ম শতং কৃত্বা স্নাত্বৈব যমুনাং নদীং। তত্র স্নানঞ্চ কুরুতে নিত্য কালং দৃঢ়ব্রতঃ॥ ততঃ কালেন মহতা পঞ্চত্বং সমুপাগতঃ। তস্য তীর্থ প্রভাবেন জাতো মহৌ ব্রাহ্মণোত্তমঃ॥ তস্মিন্ বরগৃহে দেবি ব্রাহ্মণো যোগিনাং বরঃ। জাতিস্মরো মহাপ্রাজ্ঞো বিষ্ণুভক্তো বসুন্ধরে॥ তস্য তীর্থ প্রভাবেন প্রাপ্তা মুক্তিঃ সুদুর্লভা। ততঃ পরং সূর্য্য তীর্থং সর্ব্বপাপ প্রমোচনং। বৈরোচনেন বলিনা সূর্য্য স্তারাধিতঃ পুরা॥ ভ্রষ্টরাজ্যেন বলিনা ধনকামেন বৈ পুরা॥ ঊর্দ্ধ্ববাহু নিরাহার স্তপ্তবানুত্তমং তপঃ। সাগ্রং সম্বৎসরং দেবি ততঃ কাল মবাপ্নুয়াৎ॥ তস্য প্রসন্নো ভগবান দ্যুমণিঃ প্রত্যভাষত। কিং কারণং বলে ব্রূহি তপস্যসি মহত্তপঃ॥ বলিরুবাচ। ভ্রষ্টরাজ্যোস্মি দেবেশ পাতালে নিবসাম্যহং। বিত্তেনাপি বিহীনস্য অটুম্ব ভরণং কুতঃ॥ মার্ত্তণ্ডস্তস্য বৈ সূর্য্যো দদৌ চিন্তামণিং ততঃ। চিন্তামণিং সমাসাদ্য পাতাল মগমত্তদা॥ তস্মিংস্তীর্থে নরঃ স্নাত্বা সর্ব্বপাপৈঃ প্রমুচ্যতে। তত্রাপি মুঞ্চতে প্রাণান্ মম লোকং স গচ্ছতি॥ আদিত্যে হ্যহনি সংক্রান্তৌ গ্রহণে চন্দ্র সূর্য্যয়োঃ। তস্মিন স্নাতো নরো দেবি রাজসূয় ফলং লভেৎ॥ যত্র ধ্রুবেণ সন্তপ্তং ইচ্ছয়া পরমং তপঃ। অত্র বৈ স্নান মাত্রেণ ধ্রুব লোকে মহীয়তে॥ তত্রাপি মুঞ্চতে

প্ৰাণান্মম লোকে মহীযতে। ধ্রুবতী-র্থে চ বসুধে যঃ শ্রাদ্ধং কুরুতে নরঃ॥ পিতৃংস্তারয়তে সর্ব্বান্ পিতৃপক্ষে বিশেষতঃ॥ দক্ষিণে ধ্রুবতীর্থস্য তীর্থরাজং প্রকীর্ত্তিতং॥ তস্মিংস্নাতো নরো দেবি মম লোকে মহীযতে। তত্রাথ মুঞ্চতে প্ৰাণান্মমলোকং স গচ্ছতি॥ তদ্দক্ষিণে মহাদেবি ঋষিতীর্থং পরং মম তত্র স্নাতো নরো দেবি ঋষি লোকং প্রপদ্যতে॥ অথাত্র মুঞ্চতে প্রাণান্মম লোকে মহীযতে। দক্ষিণে ঋষিতীর্থস্য মোক্ষতীর্থং পরং মম॥ স্নান মাত্রেণ বসুধে মোক্ষং প্রাপ্নোতি মানবঃ। তত্রাথ মুঞ্চতে প্রাণান্মম লোকে মহীযতে॥ তত্রৈব কোটি তীর্থং হি তীর্থানামপি দুর্লভং। তত্র স্নানেন দানেন মম লোকে মহীযতে॥ কোটি তীর্থে নরঃ স্নাতঃ সন্তর্প্য পিতৃ দেবতাঃ। তারিতাঃ পিতরস্তেন তথৈব প্রপিতামহাঃ॥ কোটি তীর্থে নরঃ স্নাতো ব্রহ্মলোকে মহীযতে। তত্রৈব বাযতীর্থন্তু পিতৃণামপি দুর্লভং। পিণ্ডং দদ্যাত্তু বসুধে পিতৃলোকং স গচ্ছতি॥ গয়া পিণ্ড প্রদানেন যৎ ফলং লভতে নরঃ॥ তৎ ফলং লভতে দেবি জ্যৈষ্ঠে দানান্ন সংশয়ঃ॥ দ্বাদশৈতানি তীর্থানি দেবানাং দুর্লভানি চ। স্নানং দানং জপো হোমঃ সহস্র গুণিতং ভবেৎ॥ এষাং স্মরণ মাত্রেণ সর্ব্বপাপৈঃ প্রমুচ্যতে। শ্রুত্বা তীর্থস্য মাহাত্ম্যং সর্ব্বান্ কামানবাপ্নুযাৎ॥ ইত্যাদি বরাহপুরাণে মথুরাতীর্থ প্রভাবঃ॥ *॥ ইতঃ প্রভৃতি সপ্তবিংশাধ্যাযেষু মথুরামাহাত্ম্যং জ্ঞেযং॥

মথুরেশঃ পুং শ্রীকৃষ্ণঃ। ইতি শব্দরত্নাবলী॥

মথূরা স্ত্রী মথুরা। ইতি দ্বিরূপকোষঃ॥

মদ ঈ ভয ইর ঞি হর্ষে। ইতি কবিকল্পদ্রুমঃ॥ ঈ ঞি মত্তোঽস্তি। ভয মাদ্যতি। ইর অমদৎ অমাদীৎ। অস্মাৎ প্রষাদিত্বাৎ নিত্যং ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ॥

মদ ম গর্ব্বে॥ গ্লেপনে। ইতি কবিকল্পদ্রুমঃ॥ গর্ব্বো হহঙ্কারঃ গ্লেপনং দৈন্যং। ম মদযতি নীচং সম্পত্তিঃ। মদযতি শত্রুং শূরঃ। ইতি দুর্গাদাসঃ॥

মদ ক ঙ তৃপ্তিযোগে। ইতি কবিকল্পদ্রুমঃ॥ ক ঙ মনোমাদযতে যস্য শাস্ত্রাভ্যাস রসাযনাৎ। ইতি দুর্গাদাসঃ॥

মদ ই ঙ স্বপ্নে॥ জাড্যে॥ মন্দে॥

মোদে ॥ স্তুতৌ ॥ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ই মন্দ্যতে। উ মন্দতে জনঃ স্বপিতি জড়ো ভবতি মাদ্যতি মোদতে স্তৌতি গচ্ছতি বা ইত্যর্থঃ। ইতি দুর্গাদাসঃ ॥

মদঃ পুং হস্তিগণ্ডজলং। তৎপর্য্যায়ঃ। দানং ২॥ হর্ষঃ। তৎপর্য্যায়ঃ। আমোদঃ ২। ইত্যমরঃ ॥ রেতঃ। কস্তুরী ॥ গর্ব্বঃ। ইতি মেদিনী ॥ মদ্যং॥ ক্ষৈব্যং। মত্ততেতি যাবৎ। ইতি হেমচন্দ্রঃ ॥ মদঃ ॥ কল্যাণবস্তু। ইতি ধরণিঃ ॥ ❀ ॥ মদ লক্ষণং যথা। অহং মহাত্মা ধনবান্ মত্তুল্যঃ কো হস্তি ভূতলে। ইতি যজ্জায়তে চিত্তং মদঃ প্রোক্তঃ স কোবিদৈঃ ॥ ইতি পাদ্মে ক্রিয়াযোগসারে ১৬ অধ্যায়ঃ ॥ ❀ ॥ তস্যোৎপত্তির্যথা। বদ্ধে মোহঃ সমভবদহঙ্কারাদভূন্মদঃ। ইতি মাৎস্যে ৩ অধ্যায়ঃ ॥

মদকটঃ পুং ষণ্ডঃ। ষাঁড় ইতি ভাষা। যথা। ইত্বরো গোপিতঃ ষণ্ডো বৃষো মদকটো হলঃ। ইতি হেমচন্দ্রঃ ॥

মদকলঃ পুং মত্তহস্তী। তৎপর্য্যায়ঃ। মদোৎকটঃ ২। ইত্যমরঃ ॥ অব্যক্তপ্রলাপী। ইতি শব্দরত্নাবলী ॥

মদাব্যক্তবাচিনি ত্রি। ইতি মেদিনী ॥

মদগন্ধঃ পুং সপ্তচ্ছদবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদগন্ধা স্ত্রী মদিরা ॥ অতসী। ইতি রাজনির্ঘণ্টঃ ॥

মদঘ্নী স্ত্রী পূতিকা। ইতি জটাধরঃ ॥

মদনঃ পুং কামদেবঃ। ইত্যমরঃ ॥ তস্য নাম্নাং ব্যুৎপত্তি যথা। ঋষয় ঊচুঃ। যস্মাৎ প্রমথ্য চেতস্ত্বং জাতো ঽস্মাকং তথা বিধেঃ। তস্মান্মন্মথ নাম্না ত্বং লোকে গেয়ো ভবিষ্যসি ॥ জগৎসু কামরূপস্তু ত্বৎ সমো নহি বিদ্যতে। অতস্ত্বং কাম নাম্নাপি খ্যাতো ভব মনোভব ॥ মদনাম্মদনাখ্যস্ত্বং শম্ভো দর্পাৎ সদর্পকঃ। তথা কন্দর্প নাম্নাপি লোকে খ্যাতো ভবিষ্যসি ॥ ইতি কালিকাপুরাণে ২ অধ্যায়ঃ ॥ ❀ ॥ ব্রহ্ম্যস্তস্যোৎপত্তি র্যথা। প্রহৃষ্টমানসঃ পুত্রং কন্যৈকাঞ্চ সসর্জ্জহ। কৃষ্টস্য কামিনঃ পুত্রঃ কামদেবো বভূব হ ॥ কন্যা ষোড়শবর্ষীযা রত্নভূষণ ভূষিতা। উবাচ পুত্রং স বিধিঃ সদীপ্তং পুরতঃ স্থিতং ॥ দুর্নিবার্য্যং মৎকলাংশং স্বাত্মারামং মনোহরং। ব্রহ্মোবাচ। স্ত্রী পুংসোঃ ক্রীড়নার্থায় মুদাত্বঞ্চ বিনির্ম্মিতঃ। হৃদি

যোগেন সর্ব্বস্যাধিষ্ঠানং করিষ্যসি ॥ সম্মোহনং সমুদ্বেগ বীজং স্তম্ভিত কারণং। উন্মত্ত বীজং জলন-শশ্বৎ চেতন হারকং ॥ পুষ্পৈস্তাভ্যয়া দগ্ধ স্তান্ সর্ব্বান্ সম্মোহনং কুরু। দুর্নিবার্য্যো মম বরাদ্ভব বৎস ভবেয় চ ॥ বাণান্দত্ত্বৈব মুক্তা চ প্রহৃষ্টশ্চ জগদ্বিধিঃ। দৃষ্ট্বা বাচং দুষ্করং বরং দাতুং সমুদ্যতঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩১ অধ্যায়ঃ ॥ ॥ বসন্তঃ ॥ ধস্তুরঃ ॥ সিক্থকং। ইতি মেদিনী ॥ বৃক্ষভেদঃ। ময়না ইতি ভাষা। তৎপর্য্যায়ঃ। পিচুকঃ ২ মুচুকুন্দঃ ৩ কণ্টকী ৪। ইতি রত্নমালা ॥ পিণ্ডীতকঃ ৫ মরুবকঃ ৬ শ্বসনঃ ৭ করহাটকঃ ৮ শল্যঃ ৯। ইত্যমরঃ ॥ ভ্রমরঃ। ইতি জটাধরঃ ॥ মাবঃ। ইতি হেমচন্দ্রঃ ॥ খদিরবৃক্ষঃ ॥ ইতি শব্দচন্দ্রিকা ॥ মঙ্কোঠবৃক্ষঃ ॥ বঙ্গলবৃক্ষঃ ॥ বৃক্ষবিশেষঃ। ময়নফল ইতি ভাষা। তৎপর্য্যায়ঃ। শল্যঃ ২ কৈটর্য্যঃ ৩ পিণ্ডঃ ৪ ধারাফলঃ ৫ তগরঃ ৬ করহাটঃ ৭ পিণ্ডীতকঃ ৮ শ্বসনঃ ৯ মরুবকঃ ১০। অস্য গুণাঃ। বমিকারকত্বং। তিক্তত্বং। উষ্ণবীর্য্যত্বং। লেখনত্বং। লঘুত্বং। রুক্ষত্বং। দুষ্টকফানাহশোফগুল্মব্রণাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ আলিঙ্গনবিশেষঃ। তল্লক্ষণং নায়কো নায়িকায়াঃ কণ্ঠে হস্তং দত্ত্বা দ্বিতীয়হস্তং তস্যা মধ্যদেশে কৃত্বা যদাশ্লিষতি। ইতি কামশাস্ত্রং ॥

মদনকঃ পুং দমনকবৃক্ষঃ। ইতি রত্নমালা ॥

মদনকাকুরবঃ পুং পারাবতঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদনগোপালঃ পুং শ্রীকৃষ্ণঃ। যথা বন্দে মদন গোপালং কৈশোরাকার মদ্ভুতং। ইতি পাদ্মে পাতাল খণ্ডে ৯ অধ্যায়ঃ ॥

মদনচতুর্দশী স্ত্রী চৈত্রশুক্লচতুর্দ্দশী। যথা। অথ মদনচতুর্দ্দশী তত্র মদনস্য পূজা কার্য্যা। স্কন্দপুরাণ সৌরাগময়োঃ। মধুমাসে তু সংপ্রাপ্তে শুক্লপক্ষে চতুর্দ্দশী। প্রোক্তা মদন ভঞ্জীতি সিদ্ধিদা ত মহোৎসবে ॥ পূজয়িষ্যন্তি যে মর্ত্ত্যা স্তদঙ্গ ভব পল্লবৈঃ। তে যান্তি পরমং স্থানং মদনস্য প্রভাবতঃ ॥ চৈত্রে মাসি চতুর্দ্দশ্যাং মদনস্য মহোৎসবঃ। জুগুপ্সিতোক্তিভি স্তত্রগীতবাদ্যাদিভি র্নৃণাং ॥ ভগবাং স্তুষ্যতে কামঃ পুত্র পৌত্র সমৃদ্ধিদঃ। বলিং প্রতি ভগবদ্বাক্যং। ন স্নানমস্তি যে পর

মাদনং মানবাধমাঃ। তেষাং পুণ্যং ফলং দত্তং মযা তে চৈত্রমাসিকং ॥ দেবলঃ। চৈত্র শুক্লচতুর্দ্দশ্যাং যঃ স্নাযাচ্ছিব সন্নিধৌ। পিশাচত্বং ন তস্য স্যাৎ গঙ্গাযাঞ্চ বিশেষতঃ ॥ ইতি তিথিতত্ত্বং ॥

মদনত্রযোদশী স্ত্রী চৈত্রশুক্লত্রযোদশী। তত্র মদনস্য ব্রতং কর্ত্তব্যং। যথা ভবিষ্যে। চৈত্র শুক্লত্রযোদশ্যাং মদনং দমনাত্মকং। কৃত্বা সংপূজ্য বিধিবদ্বীজযেদ্ব্যজনেন তু ॥ তত্র সন্তুক্ষিতঃ কামঃ পুত্র পৌত্র বিবর্দ্ধনঃ। কামদেব ত্রযোদশ্যাং পূজনীযো যথা বিধি ॥ রতি প্রীতি সমাযুক্তো হ্যশোক মণি ভূষিতঃ। দমনো দমনকবৃক্ষঃ সন্তুক্ষিতঃ প্রীণিতঃ। কামদেব ধ্যানন্তু। চাপেষু ধৃক্ কামদেবো রূপবান্ বিশ্বমোহনঃ। তত্র স্তুতি মন্ত্রঃ। পুষ্পধন্বন্ নম স্তেস্তু নমস্তে মীনকেতন। মুনীনাং লোকপালানাং ধৈর্য্য চ্যুতি কৃতে নমঃ ॥ মাধবাত্মজ কন্দর্প সম্বরারে রতিপ্রিয। নমস্তুভ্যং জিতাশেষ ভুবনায মনোভবে ॥ আধযো মম নশ্যন্তু ব্যাধযশ্চ শরীরজাঃ। সম্পদ্যতা মভীষ্টং মে সম্পদঃ সন্তু মে স্থিরাঃ ॥ নমো মারায কামায দেব দেবস্য মূর্ত্তযে। ব্রহ্ম বিষ্ণু শিবেন্দ্রাণাং মনঃক্ষোভকরায চ ॥ এবং যঃ কুরুতে পূজামনঙ্গস্য মহাত্মনঃ। ভবন্তি নাপদ স্তস্য তস্মিন্নব্দে কদাচন ॥ ইতি তিথিতত্ত্বং ॥

মদনদ্বাদশী স্ত্রী চৈত্রশুক্লদ্বাদশী। অত্র মদন ব্রতং কার্য্যং। যথা ঋষয ঊচুঃ। শ্রোতুমিচ্ছামহে সূত মদন দ্বাদশী ব্রতং। সূতানেকোনপঞ্চাশৎ যেন লেভে দিতিঃ পুনঃ ॥ সূত উবাচ। যদ্বশিষ্ঠাদিভিঃ পূর্ব্বং দিতেঃ কথিত মুত্তমং। বিস্তরেণ তদেবেদং মৎসকাশান্নিবোধত ॥ চৈত্রে মাসি সিতে পক্ষে দ্বাদশ্যাং নিযতব্রতঃ। স্থাপযেদব্রণং কুম্ভং সিত তণ্ডুল পূরিতং ॥ নানা ফল যুতং তদ্বদিক্ষুদণ্ড সমন্বিতং। সিত বস্ত্র যুগচ্ছন্নং সিত চন্দন চর্চ্চিতং ॥ নানা ভক্ষ্যফলোপেতং সহিরন্যঞ্চ শক্তিতঃ। তাম্রপাত্রং গুড়োপেতং তস্যোপরি নিবেদযেৎ ॥ তস্মাদুপরি কামন্তু কদলীদল সংস্থিতং। কুর্য্যাচ্ছর্করযোপেতাং রতিং তস্য চ বামতঃ ॥ গন্ধ ধূপং ততো দদ্যাৎ গীত-বাদ্যঞ্চ কারযেৎ। তদভাবে কথাং কুর্য্যাৎ কামকেশবযো নরঃ ॥ কাম নাম্না হরে রর্চাং স্নাপযেদ্গন্ধ

বারিণা। শুক্লপুষ্পাক্ষত তিলৈরর্চ্চয়ে ন্মধুসূদনং। কামায়ৈ পাদৌ সংপূজ্য জংঘে সৌভাগ্যদায় চ। উরূ স্মরায়েতি পুনর্মন্মথায়েতি বৈ কটিং॥ স্বচ্ছোদরায়েত্যুদরং অনঙ্গায়েত্যুরো হরেঃ। মুখং পদ্মমুখায়েতি বাহূ পঞ্চশরায় বৈ॥ নমঃ সর্ব্বাত্মনে মৌলিমর্চ্চয়েদিতি কেশবং। ততঃ প্রভাতে তং কুম্ভং ব্রাহ্মণায় নিবেদয়েৎ॥ ব্রাহ্মণান্ ভোজয়েদ্ভক্ত্যা স্বশক্ত্যা লবণান্বিতে। ভুক্ত্বাথ দক্ষিণাং দদ্যাদিমং মন্ত্রমুদীরয়েৎ॥ প্রীয়তামত্র ভগবান্ কামরূপী জনার্দ্দনঃ। হৃদয়ে সর্ব্বভূতানাং য আনন্দো বিধীয়তে॥ অনেন বিধিনা সর্ব্বং মাসি মাসি সমাচরেৎ। উপবাসী ত্রয়োদশ্যাং অর্চ্চয়েদ্বিষ্ণুমব্যয়ং॥ ফলমেকঞ্চ সংপ্রাশ্য দ্বাদশ্যাং ভূতলে স্বপেৎ। ততস্ত্রয়োদশে মাসি ঘৃতং ধেনুসমন্বিতং॥ শয্যাং দদ্যাদনঙ্গায় সর্ব্বোপস্কর সংযুতাং। কাঞ্চনং কামদেবঞ্চ শুক্লাং গাঞ্চ পয়স্বিনীং॥ বাসোভির্দ্বিজদাম্পত্যং পূজ্য শক্ত্যা বিভূষণৈঃ। শয্যাং গবাদিকং দদ্যাৎ প্রীয়তামিত্যুদীরয়েৎ॥ হোমং শুক্লৈস্তিলৈঃ কুর্য্যাৎ কামনামানি কীর্ত্তয়ন্। গব্যেন সর্পিষা চৈব পায়সেন চ ধর্ম্মবিৎ॥ বিপ্রেভ্যো ভোজনং দদ্যাদ্বিত্তশাঠ্যবিবর্জ্জিতঃ। ইক্ষুদণ্ডানথো দদ্যাৎ পুষ্পমালাশ্চ শক্তিতঃ॥ যঃ কুর্য্যাদ্বিধিনানেন মদনদ্বাদশীমিমাং। সর্ব্বপাপবিনির্ম্মুক্তঃ প্রাপ্নোতি হরিসাম্যতাং॥ ইহ লোকে বরান্ পুত্রান্ সৌভাগ্যঞ্চ সমশ্নুতে। ইতি মৎস্যপুরাণে ৭ অধ্যায়ঃ॥

মদনপাঠকঃ পুং কোকিলঃ। ইতি রাজনির্ঘণ্টঃ॥

মদনমোহনঃ পুং শ্রীকৃষ্ণঃ। যথা। বন্দে মদনগোপালং কৈশোরাকারমদ্ভুতং। যমাহুর্যৌবনোদ্ভিন্নং শ্রীমন্মদনমোহনং॥ ইতি পাদ্মে পাতালখণ্ডে ৯ অধ্যায়ঃ॥

মদনশলাকা স্ত্রী কামোদ্দীপকৌষধং॥ সারিকাপক্ষী। ইতি মেদিনী॥ কোকিলা। ইতি শব্দরত্নাবলী॥

মদনসারিকা স্ত্রী পক্ষিভেদঃ। সালিক ইতি ভাষা। তৎপর্য্যায়ঃ। শলাকা ২ সারিকা ৩ চিত্রলোচনা ৪ গণপী ৫। ইতি জটাধরঃ॥

মদনা স্ত্রী সুরা। ইতি হেমচন্দ্রঃ॥

মদনাঙ্কুশঃ পুং লিঙ্গং। ইতি ত্রিকাণ্ডশেষঃ॥ নখং। ইতি কামাঙ্কুশশব্দদর্শনাৎ। যথা। কামাঙ্কুশঃ

স্খলিত কান্তি মতঙ্গজেন্দ্র। ইতি শ্রুতবোধে কালিদাসঃ ॥

মদনাগুরুঃ পুং কোদ্রবঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদনাঙ্কুশঃ পুং ভগং। ইতি শব্দচন্দ্রিকা ॥

মদনায়ুধঃ পুং কামবৃদ্ধিক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদনালয়ঃ পুং ভগং। মদনপর্য্যায়ক শব্দোত্তর গৃহপর্য্যায়কশব্দেন ভগস্যোক্তত্বাৎ। যথা। স্বপুষ্পৈ রাকীর্ণং কুসুমধনুষো মন্দির মহো পুরো ধ্যায়ন্ ধ্যায়ন্ যদি জপতি ভক্ত স্তব মনুং। ইতি কর্পূর স্তবঃ ॥ জন্ম লগ্নাবধি সপ্তম স্থানং। তত্তু জায়াস্থানং। যথা। সূর্য্যাদুচ্চান্ ক্রিয বৃষ মৃগ স্ত্রী কুলীরান্ত্য যুকে দিগ্বহ্নী-ন্দ্র ব্রয তিথি শরান্ সপ্তবিংশাংশ্চ বিংশান। অংশানেতান্ বদতি যবন শ্চাস্ত্য তুঙ্গান্ সতুঙ্গান্ তানেবাংশান্ মদনভবনেষ্বাহ নীচান্ সুনীচান্ ॥ ইতি দীপিকায়াং মদনভবন শব্দ দর্শনাৎ ॥

মদনাবস্থা স্ত্রী কামাবস্থা। সাতু উদ্বেগরূপা। বিরহ ইতি যাবৎ। যথা। ততঃ প্রবিশতি মদনাবস্থো রাজা নিঃশ্বস্য। জানে তপসো বীর্য্যং সা বালা পরবতীতি মে বিদিতং। নচ নিম্নাদিব সলিলং নিবর্ত্ততে ততো মে হৃদযং ॥ ইত্যভিজ্ঞানশকুন্তলায়াং ৩ অঙ্কঃ ॥ মদনাবস্থ ইতি রাজ্ঞো হত্র উদ্বেগরূপা পঞ্চমী কামাবস্থা। যদাহ ভরতঃ। উদ্বেগঃ পঞ্চমঃ প্রোক্ত ইতি। ন চিত্তমিতি কেনোপাযেন মম শকুন্তলালাভো ভবিষ্যতি। ইতিভট্টীকা ॥

মদনী স্ত্রী সুরা। ইতি হারাবলী ॥ কস্তুরী ॥ অতিমুক্তকঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদনেচ্ছাফলঃ পুং বন্ধরসালঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদনোৎসবঃ পুং উৎসববিশেষঃ। হোলাকা ইতি খ্যাতা। তৎপর্য্যায়ঃ। সুবসন্তকঃ ২। ইতি হারাবলী ॥

মদনোৎসবা স্ত্রী স্বর্গবেশ্যা। ইতি শব্দরত্নাবলী ॥

মদপ্রযোগঃ পুং করিণাংমদোদ্গমঃ। তৎপর্য্যায়ঃ। ব্যস্তারং ২। ইতি ত্রিকাণ্ডশেষঃ ॥

মদভঞ্জিনী স্ত্রী শতমূলী। ইতি শব্দচন্দ্রিকা ॥

মদযন্তিকা স্ত্রী মল্লিকা। ইতি শব্দরত্নাবলী ॥

মদয়ন্তী স্ত্রী বনমল্লিকা। কাট্মল্লিকা ইতি ভাষা। ইতি রত্নমালা ॥ মল্লিকা। ইতি রাজনির্ঘণ্টঃ ॥

মদয়িত্নু ক্লী মদ্যং। ইতি মেদিনী ॥

মদয়িত্নুঃ পুং কামদেবঃ॥ শৌণ্ডিকঃ। ইতি শব্দরত্নাবলী ॥ মদযুক্তঃ। ইতি মেদিনী ॥ মেঘঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মদবিক্ষিপ্তঃ পুং মত্তহস্তী। ইতি শব্দচন্দ্রিকা ॥

মদশাকঃ পুং উপোদকী। ইতি রাজনির্ঘণ্টঃ ॥

মদসারঃ পুং তূলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদহস্তিনী স্ত্রী মহাকরঞ্জঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদহেতুঃ পুং ধাতকী। ইতি বৈদ্যক ॥ মত্ততাকারণঞ্চ ॥

মদস্থলং ক্লী মদস্থানং। যথা। অবদংশঃ সুরাপানং শুণ্ডাপানং মদস্থলং। ইতি শব্দরত্নাবলী ॥

মদস্থানং ক্লী মদ্যপানস্থানং। তৎপর্য্যায়ঃ। শুণ্ডাপানং ২। ইত্যমরঃ॥

মদাঢ্যঃ পুং তালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ মদযুক্তে ত্রি ॥

মদাঢ্যা স্ত্রী লোহিতঝিণ্টী। ইতি শব্দচন্দ্রিকা ॥

মদাতঙ্কঃ পুং মদাত্যয়রোগঃ। ইতি রাজনির্ঘণ্টঃ ॥

মদাত্যয়ঃ পুং মদ্যপানাদিজন্যরোগবিশেষঃ। তৎপর্য্যায়ঃ। মদাতঙ্কঃ ২ পানাত্যয়ঃ ৩ মদব্যাধিঃ ৪ মদঃ ৫। ইতি রাজনির্ঘণ্টঃ ॥ অথ মদাত্যয়াদীনাং নিদানান্যাহ। বিষস্য যে গুণা দৃষ্টাঃ সন্নিপাত প্রকোপনাঃ। তএব মদ্যে দৃশ্যন্তে বিষে তু বলবত্তরাঃ॥ তস্মাদবিধিপীতেন তথা মাত্রাধিকেন চ। যুক্তেন চাহিতৈ রম্যে রকালে সেবিতেন চ ॥ মদ্যেন খলু জায়ন্তে মদাত্যয় মুখা গদাঃ। *। অবিধি পূর্ব্বক্তং মদ্যং বিকারান্তর মপ্যুৎপাদযতীত্যাহ। নির্ভক্ত মেকান্তত এব মদ্যং নিষেব্যমানং মনুজেন নিত্যং। উৎপাদযেৎ কষ্টতমান্ বিকারানুৎপাদযেচ্চাপি শরীরভেদং ॥ একান্ততো নৈরন্তর্য্যেণ বিকারান্ মদাত্যয়াদীন্। শরীরস্য ভেদং নাশং ॥ * ॥ মদাত্যয়াদীনাং হেত্বন্তরমপ্যাহ। ক্রুদ্ধেন ভীতেন পিপাসিতেন শোকাভিতপ্তেন বুভুক্ষিতেন। ব্যায়াম ভারাধ্ব পরিক্ষতেন বেগাবরোধাভিহতেন বাপি ॥ অত্যম্ল রুক্ষাবতত্যোদরেণ সাজীর্ণ

ছুক্তেন তথা হবলেন। উষ্ণাভিতপ্তেন চ সেব্যমানং করোতি মদ্যং বিবিধান্ বিকারান্ ॥ ✱ ॥ তানেব বিকারান্ বিবৃণোতি। পানাত্যযং পরমদং পানাজীর্ণ মথাপি বা। ✱। পান বিভ্রমান্ বিবৃণোতি। পান বিভ্রম মুগ্রঞ্চ তেষাং বক্ষ্যামি লক্ষণং ।✱। তত্র মদাত্যযস্য সামান্যং লক্ষণ মাহ। শরীর দুঃখং বলবৎ প্রমোহো হৃদয ব্যথা। অরুচিঃ প্রততং তৃষ্ণা জ্বরঃ শীতোষ্ণ লক্ষণঃ॥ শিরঃ পার্শ্বাস্থি সন্ধীনাং বেদনা বিদ্ধতে যথা। জাযতেতি বলাৎ জৃম্ভা স্ফুরণং বেপনং শ্রমঃ॥ উরো বিবন্ধঃ কাসশ্চ শ্বাসো হিক্কা প্রজাগরঃ। শরীরকম্পঃ কর্ণাক্ষি মুখরোগা ত্রিকগ্রহঃ॥ ছর্দি বিড্ভেদ উৎক্লেশা বাত পিত্ত কফাত্মকঃ। ভ্রমঃ প্রলাপো রূপাণা মস তাঞ্চৈব দর্শনং॥ তৃণ ভস্ম লতা পর্ণ পাংশুভি শ্চাবপূরিতং। প্রধর্ষণং বিহঙ্গৈশ্চ ভ্রান্ত চেতাঃ স মন্যতে। ব্যাকুলানা মশস্তানাং স্বপ্নানাং দর্শনানি চ। মদাত্যযস্য রূপাণি সর্বাণ্যেতানি লক্ষযেৎ॥ ✱ ॥ অথ মদাত্যযস্য বাতিকস্য নিদান মাহ। স্ত্রী শোক ভয ভারাধ্ব কর্মভি র্যো হতি কর্ষিতঃ। রুক্ষাল্প প্রমিতাশী চ যঃ পিবত্যতিমাত্রশঃ। রূক্ষং পরিণতং মদ্যং নিশি নিদ্রাং নিহন্তি চ। করোতি তস্য তচ্ছীঘ্রং বাত প্রাযং মদাত্যযং॥ তৎ মদ্যং ॥ ✱ ॥ অথ তস্য লক্ষণ মাহ। হিক্কা শ্বাস শিরঃকম্প পার্শ্বশূল প্রজাগরৈঃ। বিদ্যাদ্বহু প্রলাপশ্চ বাত প্রাযং মদাত্যযং ॥ ✱ ॥ অথ পৈত্তিকস্য নিদানমাহ। তীক্ষ্ণোষ্ণং মদ্য মম্লঞ্চ যোতিমাত্রং নিষেবতে। অম্লোষ্ণ তীক্ষ্ণ ভোজী চ ক্রোধনো গ্ন্যাতপপ্রিযঃ॥ তস্যোপজাযতে তীব্রঃ পিত্তপ্রাযো মদাত্যযঃ॥ ✱ ॥ অথ তস্য লক্ষণ মাহ। তৃষ্ণা দাহ জ্বর স্বেদ মোহাতীসার বিভ্রমৈঃ। বিদ্যাদ্ধরিত বর্ণস্য পিত্ত প্রাযং মদাত্যযং॥ ✱ ॥ অথ শ্লৈষ্মিকস্য মদাত্যযস্য নিদান মাহ। মধুর স্নিগ্ধ গুর্বাশী যঃ পিবত্যতি মাত্রযা॥ অব্যাযাম দিবাস্বপ্ন শয্যাশন সুখে রতঃ। মদাত্যযং কফ প্রাযং স নরো লভতে ধ্রুবং ॥✱॥ অথ তস্য লক্ষণ মাহ। ছর্দ্যরোচক হৃল্লাস তন্দ্রা স্তৈমিত্য গৌরবৈঃ। বিদ্যাচ্ছীত পরীতস্য কফ প্রাযং মদাত্যযং ॥ ✱ ॥ অথ সান্নিপাতিকস্য মদাত্যযস্য নিদানং লক্ষণঞ্চাহ। ত্রিদোষ হেতুভিঃ সর্বৈঃ সর্বৈর্লিঙ্গৈ

র্মদাত্যাঃ। ॥ অথ পরমদ মাহ। শ্লেষ্মাহূর্যোঙ্গ গুরুতা বিরসাস্যতা চ বিণ্মূত্রসক্তি রথ তন্দ্রি রুরোচকশ্চ। লিঙ্গং পরস্য তু মদস্য বদন্তি তজ্জ্ঞা স্তৃষ্ণা রুজা শিরসি সন্ধিষু চাপি ভেদঃ॥ তন্দ্রি স্তন্দ্রা॥ ॥ পানাজীর্ণ মাহ। আধ্মান মুগ্র মথ বোদ্গিরণং বিদাহঃ পানে ত্বজীর্ণমুপগচ্ছতি লক্ষণানি। উদ্গিরণং বান্তিঃ উদ্গারো বা। পীযত ইতি পানং মদ্যং॥ ॥ পানবিভ্রম মাহ। হৃদ্গাত্রতোদ কফসংস্রব কণ্ঠধূম মূর্চ্ছা বমী জ্বর শিরোরুজন প্রদেহাঃ। দ্বেষঃ সুরান্ন বিকৃতেষু চ তেষু তেষু তং পানবিভ্রম মুবন্ত্যখিলেষু ধীরাঃ॥ কণ্ঠধূমঃ কণ্ঠাদ্ধূমনির্গম ইব। প্রদেহঃ কফেন লিপ্তাস্যতা। দ্বেষঃ সুরান্নবিকৃতেষু সুরাবিকারেষু অন্ন বিকারেষু চ দ্বেষঃ। অখিলেষু মদ্য বিকারেষু॥ ॥ অসাধ্যানাং মদাত্যযাদীনাং লক্ষণ মাহ। দীনোত্তরোষ্ঠ মতি শীত মমন্দ দাহং। তৈল প্রভাস্য মতিপান হতং ত্যজেত্তু। জিহ্বোষ্ঠ দন্ত মসিত ত্বথবাপি নীলং। পীতে চ যস্য নযনে রুধির প্রভে চ॥ হিক্কা জ্বরো বমথু বেপথু পার্শ্বশূলাঃ। কাস ভ্রমাবপি চ পানহতং ত্যজেত্তং॥ ॥ অথ মদাত্যযাদীনাং চিকিৎসা। মদোত্থানান্তু রোগাণাং মদ্য মেব হি ভেষজং। যথা দহন দগ্ধানাং দহন স্বেদনং হিতং॥ মিথ্যা বিহীন মদ্যেন যো ব্যাধি রুপজাযতে। সমেনৈব নিপীতেন মদ্যেন স হি শাম্যতি॥ ॥ বীজপূরক বৃক্ষাম্ল কোল দাড়িম সংযুতং। যবানী হপুষাজাজী শৃঙ্গবেরাবচূর্ণিতং॥ সস্নেহৈঃ শক্তুভি র্যুক্ত মবদংশৈ শিচরোত্থিতং। দদ্যাৎ সলবণং মদ্যং পৈষ্টিকং বাত শান্তযে॥ ॥ মদ্যং সৌবর্চল ব্যোষ যুক্তং কিঞ্চিজ্জলান্বিতং। জীর্ণ মদ্যায দাতব্যং বাত পানাত্যযাপহং॥ ॥ চব্যং সৌবর্চ্চলং হিঙ্গু পূরকং বিশ্বদীপ্যকং। চূর্ণং মদ্যেন পাতব্যং পানাত্যয রুজাপহং॥ ॥ লাব তিত্তিরি দক্ষাণাং রসৈশ্চ শিখিনা মপি। পক্ষিণাং মৃগ মৎস্যানা মানূপানাং তথোদকৈঃ॥ স্নিগ্ধোষ্ণ লবণাম্লৈশ্চ বেসবারৈ র্মুখপ্রিয়ৈঃ। স্নিগ্ধৈ র্গোধূমিকৈ রন্নৈ র্বাত মদ্যাত্যযং জযেৎ॥ ॥ নারীণাং যৌবনোষ্ণানাং নির্দযৈ রুপগূহনৈঃ। শ্রোণ্যুরুস্তন ভারৈশ্চ সংরোধোষ্ম সুখপ্রদৈঃ॥ শযনাচ্ছাদনৈ রুষ্ণৈ রুষ্ণৈ শ্চান্তগৃহৈঃ সুখৈঃ। উৎপন্নো

স্নাকুভাৎ শীঘ্রং প্রশাম্যতি মদাত্যয়ঃ॥*॥ পিত্তপানাত্যয়েযোজ্যাঃ সর্ব্বতশ্চ ক্রিয়া হিমাঃ। সিতা মাক্ষিক সংযক্তং মদ্য মর্দ্ধোদকং পিবেৎ ॥ মদ্যং খর্জ্জুর মৃদ্বীকা পরুষক রসৈর্যুতং। সদাড়িম রসং শীতং সক্তুভি শ্চাবচূর্ণিতং ॥ সশর্করং বা মাধ্বীকং সংযুক্ত মথবা পয়ং। দদ্যাদ্বহূদকং কালে পাতুং পিত্তমদাত্যয়ে ॥ * ॥ শশান কপিঞ্জলাণেনান্ লাবানসিতপুচ্ছকান্। মধুরাম্লান্ প্রযুঞ্জীত ভোজনে শালি ষষ্টিকান্ ॥ পটোল যূষ মিশ্রং বা ছাগলং কল্পয়েদ্রসং। সতীলং মুদ্গ মিশ্রং বা দাড়িমামলকান্বিতং ॥ দ্রাক্ষামলক খর্জ্জুর পরুষক রসেন চ। কল্পয়েৎ তর্পণান্ যূষান্ রসাংশ্চ বিবিধাত্মকান্ ॥ শীতানি চান্নপানানি শীতশয্যাসনানি চ। শীত বাত জল স্পর্শাঃ শীতান্যুপবনানি চ॥ ক্ষৌম পদ্মোৎপলানাঞ্চ মণীনাং মৌক্তিকস্য চ চন্দনোদক শীতানাং স্পর্শাঃ শচন্দ্রাংশু শীতলাঃ॥ রুক্ষ তর্পণ সংযুক্তং যবানী ব্যোষ সংযুতং। যব গোধূম কং চাস রুক্ষ যূষণং ভোজয়েৎ ॥ জলশ্যামাঙ্ক শুষ্কাণাং মূলকানাং রসেন বা॥ প্র ... সংযুক্তং রবাং বা পুরাপযেৎ ॥ * ॥ ছাগমাংস রসং রুক্ষ মম্লং বা জাঙ্গলং রসং। ব্যোষ যূষং মনাগম্লং পিবেৎ কফ মদাত্যয়ে ॥ স্থাল্যামথ কপালে বা ভৃষ্টং কৃত্বা তু নীরসং। কট্বম্ল লবণং মাংসং খাদেৎ কফ মদাত্যয়ে ॥ পাচকদ্রব্য যুক্তেন মদ্যেনোল্লেখনং মতং। মদাত্যয়ে কফোদ্ভূতে লঙ্ঘনঞ্চ যথা বলং॥ * ॥ যদিদং কর্ম্ম নির্দ্দিষ্টং বাত পিত্ত কফান্ প্রতি। সর্ব্বজে সর্ব্বমেবেদং প্রযোক্তব্যং চিকিৎসকৈঃ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ গরুড়পুরাণোক্ত মদাত্যয় নিদানাদিকং তত্রৈব ১৬০ অধ্যায়ে দ্রষ্টব্যং ॥

মদাম্নাতঃ পুং গজঢক্কা। হাতীরউপরের ডঙ্কা ইতি ভাষা। ইতি হারাবলী ॥

মদাম্বরঃ পুং মত্তহস্তী। ইতি ত্রিকাণ্ডশেষঃ ॥

মদারঃ পুং হস্তী॥ ধূর্ত্তঃ। ইতি বিশ্বঃ ॥ শূকরঃ॥ কামুকঃ॥ গন্ধভেদঃ ॥ মত্তহস্তী ॥ নৃপভেদঃ। ইত্যুণাদিকোষঃ ॥

মদাম্মদঃ পুং ফলকমৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মদালাপী পুং কোকিলঃ। ইতি

শব্দমালা ॥

মদাম্বুঃ পুং কস্তুরী। ইতি ত্রিকাণ্ড শেষঃ ॥

মদিরঃ পুং রক্তখদিরঃ। ইতি শব্দচন্দ্রিকা ॥

মদিরা স্ত্রী মস্তথঞ্জনঃ। ইতি শব্দরত্নাবলী ॥ মাদকদ্রব্যবিশেষঃ। মদ্ ইতি ভাষা। তৎপর্য্যায়ঃ। সুরা ২ হলিপ্রিয়া ৩ হালা ৪ পরিশ্রুৎ ৬ বরুণাত্মজা ৭ গন্ধোত্তমা ৮ প্রসন্না ৯ ইরা ১০ কাদম্বরী ১১ পরিশ্রুতা ১২ কশ্যং ১৩ মদ্যং ১৪। ইত্যমরঃ ॥ মানিকা ১৫। ইতি শব্দরত্নাবলী ॥ কপিশী ১৬ গন্ধমাদনী ১৭ মাধবী ১৮ কত্তোযং ১৯ মদঃ ২০ কাপিশাযনং ২১। ইতি জটাধরঃ ॥ বারুণী ২২ মত্তা ২৩ সীতা ২৪ চপলা ২৫ কামিনী ২৬ প্রিয়া ২৭ মদগন্ধা ২৮ মাধ্বীকং ২৯ মধু ৩০ সন্ধানং ৩১ আসবঃ ৩২ অমৃতা ৩৩ বীরা ৩৪ মেধাবী ৩৫ মদনী ৩৬ সুপ্রতিভা ৩৭ মনোজ্ঞা ৩৮ বিধাতা ৩৯ মোদিনী ৪০ হলী ৪১ গুণারিষ্টং ৪২ সরকঃ ৪৩ মধূলিকা ৪৪ মদোৎকটা ৪৫ মহানন্দা ৪৬। ইতি রাজনির্ঘণ্টঃ ॥ সীধুঃ ৪৭ মৈরেয়ং ৪৮ বলবল্লভা ৪৯। ইতি ভাবপ্রকাশঃ ॥ কারণং ৫০ তত্ত্বং ৫১। ইতি কৈবল্যতন্ত্রং ॥ মদিষ্ঠা ৫২ পরিপ্লুতা ৫৩ কল্পং ৫৪ স্বাদুরসা ৫৫ শুণ্ডা ৫৬ হারহূরং ৫৭ মাদ্বীকং ৫৮ মদনা ৫৯ দেবসৃষ্টা ৬০ কাপিশং ৬১ অব্ধিজা ৬২। ইতি হেমচন্দ্রঃ ॥ * ॥ সা দ্বাদশ বিধা যথা। মাদ্বীকং পানসং দ্রাক্ষং খার্জ্জুরং তাল মৈক্ষবং। মৈরেযং মাক্ষিকং টাঙ্কং মধূকং নারিকেলজং ॥ মুখ্য মন্ন বিকারোত্থং মদ্যানি দ্বাদশৈব চ। ইতি জটাধরঃ ॥ * ॥ অস্যাঃ সামান্য গুণাঃ। সুমধুরাম্লত্বং। কফমারুতনাশনত্বং। লঘুত্বং। পুষ্টিকরত্বং। হৃদ্যত্বং। সারকত্বং। মদাবহত্বঞ্চ ॥ * ॥ ধাতকীরস গুড়াদি কৃতা মদিরা গৌড়ী। তদ্গুণা যথা। তীক্ষ্ণত্বং। উষ্ণত্বং। মধুরত্বং। বাত নাশিত্বং। পিত্ত বল কারিত্বং। দীপনত্বং। পথ্যত্বং। কান্তি তৃপ্তি কারিত্বঞ্চ ॥ * ॥ পুষ্পদ্রবাদি মধুসারময়ী মদিরা মাধ্বী। তদ্গুণা যথা। মধুরত্বং। নাত্যুষ্ণত্বং। পিত্ত বাত নাশিত্বং। পাণ্ডু কামল গুল্মার্শঃপ্রমেহ শমনত্বঞ্চ ॥ * ॥ বিবিধধান্যজাতা মদিরা পৈষ্টী। তদ্গুণা যথা। কটুত্বং। অম্লত্বং। তীক্ষ্ণত্বং। গৌড়ীসমত্বং। বাতহরত্বং। কফ

করত্বং। ঈষৎ পিত্ত করত্বং। মোহনত্বঞ্চ ॥ * ॥ তালাদিরসনির্য্যাসকৃতা মদিরা সৈন্ধী হালা চ। তদ্গুণা যথা। শীতত্বং। কষায়ত্বং। অম্লত্বং। পিত্ত হরত্বং। বাতদাতৃত্বঞ্চ ॥ * ॥ সর্ব্ব তৃণ বৃক্ষ নির্য্যাস রূপ মদিরা গুণাঃ। শীতলত্বং। গুরুত্বং। মোহনত্বং। বলদত্বং। হৃদ্যত্বং। তৃষ্ণা সন্তাপ নাশকত্বঞ্চ ॥ * ॥ নানাদ্রব্যকদম্বকৃতা মদিরা কাদম্বরী। তদ্গুণা যথা। সুমধুরত্বং। পিত্ত শ্রম হরত্বং। মদকারিত্বঞ্চ ॥ * ॥ ঐক্ষব মদিরা গুণৌ। শিশিরত্বং। মদোৎকটত্বঞ্চ ॥ * ॥ যব ধান্যকৃত মদিরা গুণৌ। গুরুত্বং। বিষ্টম্ভ দায়কত্বঞ্চ ॥ * ॥ শর্করা ধাতকী তোয় কৃত মদিরা গুণৌ। শীতত্বং। মনোহরত্বঞ্চ ॥ * ॥ শার্কর মদ্য গুণাঃ। বৃষ্যত্বং। দীপনত্বং। মোহনত্বঞ্চ। ইতি নানা মদ্য গুণাঃ ॥ * ॥ ঋতুবিশেষে পেয় মদিরা যথা। গৌড়ী তু শিশিরে পেয়া পৈষ্টী হেমন্তবর্ষয়োঃ। শরদ্গ্রীষ্ম বসন্তেষু মাধ্বী গ্রাহ্যা নচান্যথা ॥ * ॥ কাদম্বরী শর্করাদিমদ্যং সুশীতলং বৃষ্য করং মদাঢ্যং। মাধ্বী সমং স্যাৎ তৃণ বৃক্ষ জাতং মদ্যং সুশীতং গুরু তর্পণঞ্চ ॥ * ॥ অন্যচ্চ। স্বকৃতে পানং মদ্যং

সন্তাপ শোধদং। অম্লদোষ মদাত্যয়াদি কারকং মূর্চ্ছনঞ্চ তৎ ॥ * ॥ নব জীর্ণ মদ্যয়োর্গুণাঃ। মদ্যং নবং সর্ব্ব বিকার হেতু সর্ব্বস্তু বাতাদিক দোষ দায়ি। জীর্ণন্তু সর্ব্বং সকলাময়ঘ্নং হর্ষপ্রদং বৃষ্য করঞ্চ দীপনং ॥ * ॥ অন্যচ্চ। পর্য্যুষিত মম্লমেলন মম্লং বা পিচ্ছিলং বিগন্ধকং। দোষাবহ মবিশেষাৎ মদ্যং হৃদ্যং বিবর্জ্জয়েৎ ॥ মদ্য প্রয়োগং স্মরন্তি শূদ্রাদিষু মহান্তিষু। দ্বিজৈস্ত্রিভিস্তু ন গ্রাহ্যং যদ্যপ্যজ্জীবনেন্মৃতং ॥ ইতি মদ্য বর্জ্জ্যাবর্জ্যং ॥ * ॥ অন্যে দ্বাদশধা মদ্য ভেদানাহু র্মনীষিণঃ। উক্তস্যান্ত র্ভবন্তীতি নান্যেষাং পৃথগীরিতং ॥ ইতি রাজনির্ঘণ্টে মদ্য প্রকরণং ॥ * ॥ অথ মতান্তরে ম[illegible]স্য লক্ষণং গুণাশ্চ। পেয়ং মদ্যং [illegible] লৌকৈ স্তন্মদ্য মভিধীয়তে। [illegible]ষ্টং সুরা সীধু রাসবাদ্য মনেকধা। [illegible] মদ্যং সর্ব্বং ভবেদুষ্ণং পিত্তকৃৎ বাত নাশনং। ভেদনং শীঘ্রপাকঞ্চ রূক্ষং কফ হরং পরং। অম্লঞ্চ দীপনং রুচ্যং পাচনং চাশুকারি চ। তীক্ষ্ণং সূক্ষ্মঞ্চ বিশদং ব্যবায়ি চ বিকাশি চ ॥ * ॥ অথারোহণ লক্ষণং গুণাশ্চ। পক্কৌষধাম্বু সিদ্ধং যন্মদ্যং তৎস্যাদরি-

ষ্টক°। অরিষ্ট° মদ্য মিতি লোকে।। যথা দ্রাক্ষারিষ্ট°। দশমূলারিষ্ট°। বব্বুলারিষ্ট মিতি। অরিষ্ট° লঘুপাকেন সর্ব্ব° তচ্চ গুণাধিক°। অরিষ্টস্য গুণা জ্ঞেয়া বীজ দ্রব্য গুণৈঃ সমাঃ ॥ * ॥ অথ সুরায়া লক্ষণ° গুণাশ্চ। শালি ষষ্টিক পিষ্টাদি কৃত° মদ্য° সুরা স্মৃতা। সুরা গুর্ব্বী বল স্তন্য পুষ্টি মেদঃ কফ প্রদা ॥ গ্রাহিণী শোথ গুল্মার্শো গ্রহণী মূত্র কৃচ্ছনুৎ। *। অথ সুরাভেদো বারুণী তস্যা লক্ষণ° গুণাশ্চ। পুনর্ণবা শিলা পিষ্টৈ র্বিহিতা বারুণী স্মৃতা। স°হিতৈ স্তাল খর্জ্জুর রসৈর্যা সাপি বারুণী ॥ সুরা বদ্বারুণী লঘ্বী পীনসাধ্মান শূলনুৎ। সুরাতো ভেদার্থ° লঘ্বী তি।*।। অথ সীধু দ্বয়স্য লক্ষণ° গুণাশ্চ। ...পক্বৈ রসৈঃ সিদ্ধঃ সীধুঃ পক্বরসশ্চ সঃ ...বৈ স্তৈরেব যঃ সীধুঃ স.. শীতরসঃ স্মৃতঃ ॥ সীধুঃ প..রস.. ..ঃ স্বরা গ্নি বল বর্ণ কৃৎ। বাত পিত্ত করো হৃদ্যঃ স্নেহনো রোচনো হরেৎ ॥ বিবন্ধ মেদঃ শোকার্শঃ শোফোদর কফামযান্। তস্মাদল্প গুণঃ সীত রসঃ স°লেখনঃ স্মৃতঃ ॥ * ॥ অথাসবস্য লক্ষণ° গুণাশ্চ। যৎ পক্বৌষধাম্বুভ্যা° সিদ্ধ° মদ্য° স আসবঃ ॥ আসবস্য গুণা জ্ঞেয়া বীজ দ্রব্যগুণৈঃ সমাঃ ॥ * ॥ অথ নব পুরাণ মদ্য গুণাঃ। মদ্য° নব মভিষ্যন্দি ত্রিদোষ জনক° সর°। অহৃদ্য° বৃ°হণ° দাহি দুর্গন্ধ° বিশদ° গুরু ॥ জীর্ণ° তদেব রোচিষ্ণু কৃমি শ্লেষ্মানিলাপহ°। হৃদ্য° সুগন্ধি গুণবল্লঘু স্রোতো বিশোধন° ॥ * ॥ অথ সাত্ত্বিকানা° মদ্য° পিবতা° চেষ্টা বিশেষাঃ। সাত্ত্বিকে গীত হাস্যাদি রাজসে সাহসাদিক°। তামসে নিন্দ্যকর্ম্মাণি নিদ্রাঞ্চ মদিরা চরেৎ ॥ আচরেৎ স্বর্য্যাৎ। বিধিনা মাত্রয়া কালে হিতৈ রন্নৈ র্যথা বল°। প্রহৃষ্টো যঃ পিবেন্মদ্য° তস্য স্যাদমৃত° যথা ॥ কিন্তু মদ্য° স্বভাবেন যথৈবান্ন° তথা স্মৃত°। অযুক্তি যুক্ত° রোগায় যুক্তি যুক্ত° যথামৃত° ॥ * ॥ অথ মদ্য গন্ধনাশনোপায়ঃ। মুস্তৈলবালগদ জীরক ধান্যৈলা যশ্চর্ব্বয়ন্ সদসি বাচ মভিব্যনক্তি। স্বাভাবিক° মুখজ মুজ্ঝতি পূতিগন্ধ° গন্ধঞ্চ মদ্য লশুনাদি ভবঞ্চ নূন° ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ অপিচ। প্রকৃত্যা মদ্য মত্যুষ্ণ মম্লঞ্চোষ্ণ° বিপাকতঃ। সর্ব্বসামান্যত স্তস্য বিশেষ উপদেক্ষ্যতে॥ কৃশানা° সক্ত-

মূত্রাণাং গ্রহণ্যর্শো বিকারিণাং। সুরা প্রশস্তা বাতেষু রক্তপিত্ত ক্ষযেষুচ॥ প্রসন্না গুল্ম বাতার্শো বিবন্ধানাহ নাশিনী। শূল প্রবাহিকাটোপ কফ বাতার্শসাংহিতা॥*॥ জগলো গ্রাহি রুক্ষোষ্ণঃ শোথঘ্নো ভক্ত পাচনঃ। শোথার্শো গ্রহণী দোষান্ হন্ত্যরিষ্টঃ কফাময়ান্॥ অরিষ্টো মদ্যবিশেষঃ॥*॥ প্রাযশো হভিনবং মদ্যং গুরু দোষসমীরিতং। স্রোতসাং শোধনং জীর্ণং দীপনং লঘু রোচনং॥ হর্ষণং প্রীণনং বল্যং মদ্যং শোক শ্রমাপহং। প্রাগল্ভ্য প্রতিভা পুষ্টি বীর্য্য তুষ্টি স্বরপ্রদং॥ ইতি রাজবল্লভঃ॥*॥ অন্যৎ মদ্যশব্দে দ্রষ্টব্যং॥

মদিরাগৃহং ক্লী মদ্যস্যগৃহং। মদ্যসন্ধানগৃহং। তৎপর্য্যায়ঃ। গঞ্জা ২। ইত্যমরঃ॥ গঞ্জো ৩। যথা। ভাণ্ডাগারে বিদুর্গঞ্জং খনৌ খঞ্জা সুরাগৃহে। মদ্যভাণ্ডে স্মৃতা গঞ্জা গুঞ্জাস্যাৎ কাকচিঞ্চিকা॥ ইতি ভরত ধৃত হট্টচন্দ্রঃ॥

মদিরাসখঃ পুং আম্রবৃক্ষঃ। ইতি জটাধরঃ॥

মদিরাক্ষী স্ত্রী মদিরাবদক্ষিণী যস্যাঃসা। মত্তলোচনা। যথা। অবিদিত সুখ দুঃখং নির্গুণং বস্তু কিঞ্চিজ্জড় মতি রিহ কশ্চিন্মোক্ষ ইত্যাচচক্ষে। মমতু মত মনঙ্গ স্মের তারুণ্য ঘূর্ণন্মদ কল মদিরাক্ষী নীবিমোক্ষো হি মোক্ষঃ॥ ইত্যুদ্ভটঃ॥

মদিষ্ঠা স্ত্রী মদিরা। ইতি হেমচন্দ্রঃ॥

মদী স্ত্রী চষকবস্তু। ইতি নানার্থে হেমচন্দ্রঃ॥ কৃষকবস্তু। ইতি বৈশ্য বর্গে জটাধরঃ॥

মদীয়ং ত্রি মমইদং। আমার ইতি ভাষা। অস্মচ্ছব্দাদীয প্রত্যযে এক বচনার্থে মদাদেশেন নিষ্পন্ন মিদং। ইতি মুগ্ধবোধব্যাকরণং॥

মদোৎকটঃ পুং মত্তহস্তী। ইত্যমরঃ॥

মদোৎকটা স্ত্রী মদিরা। ইতি রাজনির্ঘণ্টঃ॥

মদোদ্ধতঃ ত্রি মত্তঃ। ইতি জটাধরঃ॥

মদোদগ্রা স্ত্রী নারী। ইতি শব্দমালা॥

মদ্গুঃ পুং পক্ষিবিশেষঃ। পানিকৌড়ি ইতি ভাষা। ইত্যমরঃ॥ অস্য মাংস গুণাঃ। বায়ুনাশিত্বং। স্নিগ্ধত্বং। ভেদকত্বং। শুক্রকারিত্বং। রক্ত পিত্ত নাশিত্বং। শীতত্বঞ্চ। ইতি রাজবল্লভঃ॥

মদ্গুরঃ পুং মৎস্যবিশেষঃ। মাগুর ইতি ভাষা। ইত্যমরঃ॥ অস্য গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। সংগ্রাহিত্বং। শুক্রলত্বং। গুরুত্বঞ্চ। ইতি রাজবল্লভঃ॥

মদ্গুরকঃ পুং মদ্গুরমৎস্যঃ। ইতি শব্দরত্নাবলী॥

মদ্গুরসী স্ত্রী শৃঙ্গীমৎস্যঃ। ইতি শব্দরত্নাবলী॥

মদ্যং ক্লী সুরা। ইত্যমরঃ॥ অস্য গুণ পর্য্যায়ৌ মদিরা শব্দে দ্রষ্টব্যৌ॥*॥ তৎ দ্বাদশবিধং যথা পুলস্ত্যঃ। পানসং দ্রাক্ষ মাধুকং খার্জ্জুরং তাল মৈক্ষবং। মাধ্বীকং টাঙ্ক মাধ্বীকং মৈরেয়ং নারিকেলজং॥ সমানানি বিজানীয়ান্মদ্যান্যেকাদশৈব তু। দ্বাদশন্তু সুরামদ্যং সর্ব্বেষা মধমং স্মৃতং॥*॥ অনেন একাদশানাং সুরাত্বং নিষেধয়তি মদ্য শব্দো মদহেতু দ্রব্য বচনঃ অস্মাদেব বচনাৎ নতু মদ্যমাত্রং সুরা শব্দার্থঃ। তথা বৃহস্পতিঃ। গৌড়ীং মাধ্বীং সুরাং পৈষ্টীং পীত্বা বিপ্রঃ সমাচরেৎ। তপ্তকৃচ্ছং পরাকঞ্চ চান্দ্রায়ণ মনুক্রমাৎ॥ ত্রযাণাং সুরাত্বে ক্রমেণ প্রায়শ্চিত্তত্রযং নস্যাৎ। তথা ভবিষ্যে। সুরা তু পৈষ্টী মুখ্যোক্তা ন তস্যাস্ত্বিতরে সমে। পৈষ্টীতি তণ্ডুল বিকার মাত্রোপলক্ষণং ইতরে গৌড়ী মাধ্ব্যৌ অতো গুড় বিকার এব সুরাশব্দস্য মুখ্যত্বাৎ ত্রিবিধা সুরেতি গৌড়ী মাধ্ব্যো গৌণ সুরাত্বজ্ঞাপনার্থং। তেন এতৎ পানেপি মহাপাতকত্ব মতিদিশতি যথৈ বৈকা তথা সর্ব্বা ইতি পৈষ্ট্যাং পূর্ব্ব প্রসিদ্ধিং দর্শযতি। যথা পৈষ্টী সুরা তথা সর্ব্বা গৌড়ী মাধ্বী চেতি পূর্ব্ববচনোক্তা তু পৈষ্টী দৃষ্টান্তত্বেনাত্র দর্শিতা। নপাতব্যা দ্বিজোত্তমৈ রিতি ব্রাহ্মণৈ রিত্যর্থঃ। ত্রৈবর্ণিক পরত্বে উত্তম পদানর্থক্যাৎ বহুবচনানর্থক্যপরীহারার্থ মুত্তম প্রাতিপদিকানর্থক্য মযুক্তং অতো ব্রাহ্মণস্য ত্রিবিধৈব সুরা মহাপাতকহেতুঃ। ক্ষত্রিয বৈশ্যযোস্তু সুরা বৈ মলমন্নানা মিতি বচনেন পৈষ্ট্যেব ইতি স্থিতং। অতএব একা মাধ্বী চ গৌড়ী চ পৈষ্টী চ ত্রিবিধা সুরা। দ্বিজাতিভি র্নপাতব্যা কদাচিদপি কর্হিচিৎ॥ ইতি যমবচনে দ্বিজাতি পদং ব্রাহ্মণ পরমেব। অতএব ত্রিবিধ সুরাপানে ন ক্ষত্রিয়াদীনাং মহাপাতকং।*। তাবদস্তু দোষাভাব মেবাহ বৃদ্ধ যাজ্ঞবল্ক্যঃ।

ক্ষমাদপিহি রাজন্যো বৈশ্যো বা পিকথঞ্চন। মদ্য মেব সুরাং পীত্বা ন দোষং প্রতিপদ্যতে॥ তদেবং পৈষ্টী নিষেধ স্ত্রৈবর্ণিকানাং গৌড়ী মাধ্বী নিষেধস্তু ব্রাহ্মণানা মেব ॥ ❀ ॥ তজ্জাতেঃ স্ত্রীণা মপি সুরাপান নিষেধঃ। তথা ভবিষ্যে। তস্মান্ন পেয়ং বিপ্রেণ সুরা মদ্যং কথঞ্চন। ব্রাহ্মণ্যাপি ন পেয়া বৈ সুরা পাপ ভয়াবহা॥ যা ব্রাহ্মণী সুরাপী স্যা ন্ন তাং দেবাঃ পতিলোকং নয়ন্তি ইতি শ্রুতিঃ॥ পতত্যর্দ্ধং শরীরেণ ভার্য্যাং যস্য সুরাং পিবেৎ। পতিতার্দ্ধ শরীরস্য নিষ্কৃতি র্নোপপদ্যতে॥ নচৈবং ক্ষত্রিয় বৈশ্য স্ত্রীণাম নিষেধঃ। ব্রাহ্মণী পদস্য নিষিদ্ধ সুরা পান কর্ত্তৃ ভার্য্যোপলক্ষণত্বাৎ ভার্য্যা যস্য সুরাং পিবেদিতি সামান্য শ্রবণাচ্চ॥ ❀ ॥ পানঞ্চ দ্রবীভূতস্যাভ্যবহারঃ। স চ কণ্ঠদেশাদধো নয়নং নতু বক্তৃমাত্র প্রবেশঃ। নিষ্ঠীবনার্থং কপোল ধারণে পান শব্দ প্রসঙ্গাৎ। যচ্চোক্তং। জিঘ্রন্নহি সুরাং কশ্চিৎ পিবতীত্যভিধীয়তে। যাবন্ন ক্রিয়তে বক্তে গণ্ডূষস্য প্রবেশনং॥ অত্র গণ্ডূষ প্রমাণং অবিবক্ষিতং। গণ্ডূষাদ্ধ পানেপি লোকে পান শব্দ প্রযোগাৎ। অতএব মুখ প্রবেশনং অত্রাবিবক্ষিতং কিন্তু মুখ প্রবেশে কণ্ঠাদধো নয়নং ভবতি অত স্তদেবোপলক্ষয়তি অতএব ওষ্ঠমাত্র লেপে ন পান নিষ্পত্তিঃ। অত স্তত্রোক্তমাত্রস্পর্শ প্রায়শ্চিত্তং ॥ ❀ ॥ অথ সুরাপান প্রায়শ্চিত্তং। তত্র মনুঃ। সুরাং পীত্বা দ্বিজো মোহাদগ্নি বর্ণাং সুরাং পিবেৎ। তযা সকাযে নির্দগ্ধে মুচ্যতে কিল্বিষাত্ততঃ॥ গোমূত্র মগ্নিবর্ণম্বা পিবেদুদক মেব বা। পযো ঘৃতং বামরণাৎ গোসকৃদ্রস মেব বা। অগ্নিবর্ণাং অগ্নি সমস্পর্শাং। পযো ঘৃতং গোরেব আদার্দ্ধস্তেচ গোঃ কীর্ত্তনাৎ। মোহ শব্দো হত্র বুদ্ধি পরঃ॥ দেবলঃ। সুরাপানে ব্রাহ্মণো ক্বপ্য তাম্র সীসকানামন্যতম মগ্নি বর্ণং পীত্বা শরীরত্যাগাৎ পূযতে। ক্বপ্যাদযো হত্র দ্রবীভূতাঃ পীত্বেতি নির্দ্দেশাৎ। স্বযমশক্তাবন্যৈ রস্য মুখে সেচনীযা। যথা গোতমঃ। সুরাপস্য ব্রাহ্মণস্য উষ্ণামাসিঞ্চেযুঃ সুরামাস্য মৃতঃ শুধ্যেত। অতএব নসেচকানাং বধো বিহিতত্বাৎ স্বযং পান মিব। এতচ্চ মরণ প্রাযশ্চিত্তং কামকৃতে। যথা বৃহস্পতিঃ। সুরাপানেকামকৃতে জ্বলন্তীং তাং বিনিঃ-

ক্ষিপেৎ। মুখে স হি বিনির্দ্দগ্ধো মৃতঃ শুদ্ধিমবাপ্নুযাৎ॥ কথঞ্চিদিতি সকৃদিত্যর্থঃ। অঙ্গিরাঃ। সুরাপানং সকৃৎ কৃত্বা যো২গ্নিবর্ণাং সুরাং পিবেৎ। স পাবযেদথাত্মান মিহলোকে পরত্র চ॥ ভবিষ্যে। মতি পূর্ব্বং সুরাপানে প্রাণান্তিক মুদাহৃতং। পৈষ্টীপানে তু ঋষিভি র্নেতরাসাং কথঞ্চন॥ শঙ্খেনাপি মহাবাহো প্রাযশ্চিত্ত মুদাহৃতং। সুরাযাঃ কামতঃ পানে মথ্যাযাঃ প্রাণ নাশনং॥ পুনঃ পুনঃ পৈষ্টী বিষযত্বাভিধানং ত্রিবিধা সুরা মুখ্যা ইতি ভ্রমনিরাসার্থং। কথঞ্চন সকৃদিত্যর্থঃ। ✽। ইতরাসাং অন্যাসাং গৌড়ী মাধ্বী প্রভৃতীনাং জ্ঞানতঃ সকৃৎ পানে মরণান্তিকং ন ভবতি গৌড়ী মাধ্ব্যোস্তু জ্ঞানতো ২ভ্যস্ত পানে গৌড়ী মাধ্বী ব্যতিরিক্তাযান্তু সুরাযা অত্যন্তাভ্যস্তপানে মরণ মুক্তং ভবিষ্যে। গৌড়ী মাধ্ব্যোস্তথাভ্যাসে প্রাণান্তিক মুদাহৃতং। অভ্যাসে ত্বসুরাযাস্তু তামেবাগ্নিনিভাং পিবেৎ॥ তথেতি জ্ঞানত ইত্যর্থঃ। অতএব অসকৃৎ জ্ঞানতঃ পীত্বা বারুণীং পততি দ্বিজঃ। মরণং তস্য নির্দ্দিষ্টং প্রাযশ্চিত্তং বিধীযতে॥ ইতি যমবচন মপি এতদ্বিষযমেব অত্রাভ্যাসে মরণ বিধানাৎ দ্বিতীয বার এব মরণং কার্য্যং গৌড়ী মাধ্ব্যোঃ কামতঃ সকৃৎপানে ভবিষ্যে। অসুরা মদ্যপানে তু কৃতে বিপ্রস্তু কামতঃ। চান্দ্রাযণং সমভ্যস্যেৎ শুদ্ধিকামঃ স্বশুদ্ধযে॥ যদ্বাস্মিন্নেব বিষযে মানবীযং প্রকল্পযেৎ। কণান্ বা ভক্ষযেদব্দং পিণ্যাকং বা সকৃন্নিশি॥ সুরাপানাপনুত্যর্থং বাল বাসা জটী ধ্বজী। পিণ্যাকং খলিং। ✽। উত্তপ্ত সুরাপানং আযসেন পাত্রেণ ইত্যাহ যমঃ। আযসে ভাজনে তপ্তাং ব্রাহ্মণো বারুণীং পিবেৎ। গোবাল চীরবাসসা তৎ কর্ত্তব্যং আহ উশনা। গোবাল চীরবাসাঃ সুরাপঃ সুরামগ্নি বর্ণাং পীত্বা পূতো ভবতি। ✽। অজ্ঞানতঃ সকৃৎ পৈষ্টীপানে ব্রাহ্মণস্য দ্বাদশবার্ষিকং। যথা ব্রহ্মহত্যা ব্রতানুবৃত্তৌ যমঃ। চরেদ্বা মেহব্দে-বোভো সুরাপ গুরুতল্পগৌ। সগোত্রাদূষকশ্চৈব সুবর্ণস্তেয কৃন্নরঃ॥ ✽॥ ভবিষ্যে। অকামতঃ সুরাং পীত্বা পৈষ্টীং মৎঙ্গল নন্দন। কৃচ্ছ্রাতিকৃচ্ছ্রৌ কৃত্বা বৈ পুনঃ সংস্কারতঃ শুচিঃ॥ কণান্ বা ভক্ষযেদব্দং পিণ্যাকং বা সকৃন্নিশি। সুরাপানাপনুত্যর্থং বাল বাসা জটী ধ্বজী॥ ✽॥ সুরাপান মাত্রা

পানেয রোগস্য রোগিণো হ্যজ্ঞানতঃ পান বিষয মিদং ইত্যুক্তং ভবিষ্যে। যথা তথাপ্যস্মিন্নেব বিষযে বাশিষ্ঠং পরিকীর্ত্তিতং। যদি রোগে ভবেদ্দস্থো নেতরস্য কদাচন॥ কৃচ্ছ্রশ্চাত্র সুরশ্রেষ্ঠ তপ্তকৃচ্ছ্র উদাহৃতঃ। কৃচ্ছ্রাতিকৃচ্ছ্রাবিত্যত্র কৃচ্ছ্রপদং ন প্রাজাপত্যপরং কিন্তু তপ্তকৃচ্ছ্রপরং।*। অজ্ঞানতো গৌড়ী মাধ্ব্যোঃ সকৃৎপানে উক্তং ভবিষ্যপুরাণে। সকৃৎ পীত্বা তথা গৌড়ী মজ্ঞানাৎ সুর সত্তম। কৃচ্ছ্রাতিকৃচ্ছ্রৌ বিহিতৌ ঘৃত প্রাশন মেব চ॥ অজ্ঞানাভ্যাসে তত্রৈবোক্তং। গৌড়ী মজ্ঞানতঃ পীত্বা ব্রাহ্মণো ব্রাহ্মণপ্রিয়। তপ্তকৃচ্ছ্রন্তু বৈ কৃত্বা পুনঃসংস্কারতঃ শুচিঃ॥ মাধ্বীং পীত্বা [illegible] অজ্ঞানাৎ [illegible] সত্তমঃ। [illegible] [illegible] [illegible]॥ রেভো[illegible] গৌড়ী মাধ্ব্যো শ্চ প্রাশনে। ক্রব্যাদ পশু বিষ্ঠানাং সংস্কারাচ্ছুদ্ধি রিষ্যতে॥ প্রাণান্তিকে চ পাদহানে রসম্ভবাৎ ক্ষত্রিয় বৈশ্যযোরপি যথোক্তং মরণান্তিকং প্রায়শ্চিত্ত মেব। দ্বাদশ বার্ষিকাদৌ পাদপাদ হানি রভক্ষ ভক্ষণে ক্ষত্রিয়াদীনাং হ্রাস দর্শনাৎ। বিপ্রে তু সকলং দেয়ং পাদোনং ক্ষত্রিয়ে মতং।

বৈশ্যেহর্দ্ধং পাদ শেষন্ত শূদ্রজাতিষু শস্যতে॥ *॥ পানসাদি মদ্যপানে তু কামনা কৃতানেক সমযাভ্যস্তে প্রাণান্তিকং যুক্তং ব্রাহ্মণস্য কামনযা সকৃৎ কৃতে তু পরাশরঃ। অগম্যাগমনে চৈব মদ্য গোমাংস ভক্ষণে। শুদ্ধ্যৈ চান্দ্রাযণং কুর্য্যাৎ নদীং গত্বা সমুদ্রগাং॥ চান্দ্রাযণে ততশ্চীর্ণে কুর্য্যাদ্ব্রাহ্মণভোজনং। অনডুৎ সহিতাং গাঞ্চ দদ্যাদ্বিপ্রায দক্ষিণাং॥ অকামতঃ সকৃৎপানে বিষ্ণুঃ। পীত্বা প্রমাদতো মদ্য মতিকৃচ্ছ্রং চরেদ্দ্বিজঃ। কারযেৎ পুনঃ সংস্কারং ভক্ত্যা বিপ্রাংশ্চ ভোজযেৎ॥ কামতো হ্যকামতশ্চাভ্যাসে প্রভাবৃত্তি নাহ যমঃ। গোঘ্ন বদ্বিহিতঃ কল্প শ্চান্দ্রাযণমথাপি বা। অভ্যাসে তু ভবো ভূণ স্ততঃ শুদ্ধি মবাপ্নু যাৎ॥ অপর্য্যুষিতপানসাদ্যেকাদশবিধ মদ্যপানে ত্রিরাত্রং। পানসং দ্রাক্ষ মাধ্বকমিত্যাদ্যভিধায পুলস্ত্যঃ। দ্রাক্ষেক্ষু টঙ্ক খর্জ্জুর পনসাদেশ্চ যো রসঃ। সদ্যোজাতস্ত তং পীত্বা ত্র্যহাৎ শুদ্ধেৎ দ্বিজোত্তমঃ॥ *॥ পুযোজকাদীনাং পাদপাদ হানি র্দ্রষ্টব্যা॥ বাল বৃদ্ধ স্ত্রীণামর্দ্ধাদিকং প্রাযশ্চিত্তং। ইতি প্রাযশ্চিত্তবিবেকঃ॥ *॥

অথ পুরাণে ব্রাহ্মণস্য মদ্যপানাদি নিষেধো যথা। অগ্নেয় ক্কাপ্যপেয়ঞ্চ তথৈবাস্পৃশ্যমেব চ। দ্বিজাতীনাম নালোচ্যং নিত্যং মদ্য মিতি স্থিতং ॥ তস্মাৎ সর্ব্বং প্রযত্নেন মদ্যং নিত্যং বিবর্জ্জয়েৎ। পীত্বা পততি কর্ম্মভ্য স্তুসম্ভাষ্যো দ্বিজোত্তমঃ ॥ ভক্ষবিভ্রাণ্যভক্ষাণি পীত্বাপেযান্যপি দ্বিজঃ। নাধিকারী ভবেত্তাবদ্যাবত্তম্ন জহাত্যধঃ ॥ তস্মাৎ পরিহরেন্নিত্য মভক্ষাণি প্রযত্নতঃ। অপেয়ানি চ বিপ্রো বৈ পীত্বা তস্যাতি রৌরবং ॥ ইতি শ্রীকূর্ম্মপুরাণে উপরি ভাগে ১৬ অধ্যায়ঃ ॥ * ॥ মদ্যপস্য বিষ্ণো ক্রপর্সর্গাদি দোষাদি যথা। বরাহ উবাচ। মদ্যং পীত্বা বরারোহে যস্তু মামুপসর্পতি। তত্র দোষং প্রবক্ষ্যামি শৃণু সুন্দরি তত্ত্বতঃ। দত্ত্বা বর্ষ সহস্রাণি দরিদ্রো জায়তে পুনঃ। ততো ভবেৎ স পূতাত্মা মদ্ভক্তশ্চ ন সংশয়ঃ ॥ যস্তু ভাগবতো ভূত্বা কাম রাগেণ মোহিতঃ। দীক্ষিতো পিবতে মদ্যং প্রায়শ্চিত্তং ন বিদ্যতে ॥ অন্যচ্চ তে প্রবক্ষ্যামি তচ্ছৃণু বসুন্ধরে। অগ্নিবর্ণাং সুরাং পীত্বা তেন মুচ্যেত কিল্বিষাৎ ॥ এতঞ্চেবাপরাধানি যেন মুচ্যন্তি কিল্বিষাৎ। য এতেন বিধানেন প্রায়শ্চিত্তং সমাচরেৎ ॥ ন স লিপ্যতি পাপেন সংসারঞ্চ ন গচ্ছতি ॥ ইতি বরাহপুরাণে মদ্যপানাপরাধ প্রায়শ্চিত্তং ॥ * ॥ অপিচ। অগম্যাগমনং কৃত্বা মদ্য গোমাংস ভক্ষণং। শুদ্ধ্যেচ্চান্দ্রায়ণাদ্বিপ্রঃ প্রাজাপত্যেন ভূমিপঃ ॥ বৈশ্যঃ সান্তপনাচ্ছূদ্রঃ পঞ্চাহোভি র্ব্বিশুদ্ধ্যতি। ইতি গারুড়ে ২২ অধ্যায়ঃ ॥ এতদ্গৌড়ী মাধ্ব্যোঃ কামতঃ সকৃৎ পান বিষয়ং মিতি প্রায়শ্চিত্ত বিবেক দর্শনাৎ ॥ * ॥ দ্বিজস্য পূজাদৌ মদ্যদান বিধ্যনুকল্প নিষেধা যথা। মদিরাং পৃষ্ঠতো দদ্যাৎ অন্যৎ পানস্তু বামতঃ। অবশ্যং বিহিতং যত্র মদ্যং তত্র দ্বিজঃ পুনঃ ॥ নারিকেল জলং কাংস্যে তাম্রে চ বিসৃজেন্মধু। নাপদ্যপি দ্বিজো মদ্যং কদাচিৎ বিসৃজেদপি ॥ ঋতে পুষ্পা সবাদুক্তাদ্যঙ্গনাদ্বা বিশেষতঃ। রাজপুত্র স্তথা মর্ত্ত্যঃ সচিবঃ সৌপ্তিকাদযঃ ॥ দদ্যু র্নরবলিং ভূপ সমত্যা বিভবায চ। ভূপালানমতে মদ্যং দদৎ পাপ মবাপ্নুয়াৎ ॥ ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ ॥ * ॥ অথ ব্রাহ্মণস্য মদ্যপাননিষেধকশুক্র শাপো যথা। বৈশম্পায়ন উবাচ।

সুরাপানাদ্বঞ্চনাং প্রাপ্য বিদ্বান্ স জ্ঞানাশং-প্রাপ্য চৈবাতি ঘোরং। দৃষ্ট্বা কচঞ্চাপি তথাভিরূপং পীতং তথা সুরয়া মোহিতেন ॥ সমন্যু কথায় মহানুভাব স্তদোশনা বিপ্র হিতং চিকীর্ষুঃ॥ কাব্যঃ স্বয়ং বাক্য মিদং জগাদ সুরাপানং প্রতি বৈ জাত শঙ্কঃ ॥ যো ব্রাহ্মণো হদ্য প্রভৃতীহ কশ্চিৎ মোহাৎ সুরাং পাস্যতি মন্দবুদ্ধিঃ। অপেত ধর্ম্মো ব্রহ্মহা চৈব স স্যাদস্মিল্লোকে গর্হিতঃ স্যাৎ পরে চ ॥ ময়া চেমাং বিপ্রধর্ম্মোক্ত সীমাং মর্য্যাদাং বৈ স্থাপিতাং সর্ব্বলোকে। সন্তো বিপ্রাঃ শুশ্রুবাংসো গুরূণাং দেবা লোকাশ্চোপ শৃণ্বন্তু সর্ব্বে॥ ইতি মহাভারতে আদিপর্ব্বণি ৭৯ অধ্যায়ঃ ॥ ❀ ॥ অথ তন্ত্রে মদ্যপান নিষেধো যথা। নারিকেলঞ্চ খার্জ্জুরং পনসঞ্চ তথৈব চ। ঐক্ষবং মধুকং টাঙ্কং তালঞ্চৈব চ মাক্ষিকং ॥ দ্রাক্ষন্ত দশমং জ্ঞেয়ং গৌড়ং চৈকাদশং স্মৃতং। পৈষ্টীন্ত দ্বাদশং প্রোক্তং সর্ব্বেষা মধমং স্মৃতং ॥ মধ্যমং মধূকং গৌড়ং শ্রেষ্ঠঞ্চোত্তম মিষ্যতে এতৎ দ্বাদশকং মদ্যং অপাতব্যং দ্বিজৈঃ ক্বচিৎ ॥ ক্ষত্রিয়াদিঃ পিবেৎ সর্ব্বং পৈষ্টমেকন্তু বর্জ্জয়েৎ। সুরাং পীত্বা দ্বিজো মোহাৎ কামাৎ ... দি নিশ্চিতাং॥ ত্রৈবার্ষিকং ব্রতং অযত্যাদীষন্মিশ্রে তু বার্ষিকং। তক্রাদি নিশ্চিতাং কিঞ্চিৎ সুরাং পীত্বা হ্যকামতঃ ॥ কৃচ্ছ্রাব্দ পাদ মচর্য্য পুনঃ সংস্কার মর্হতি। মুখ প্রবেশ মাত্রন্তু প্রায়শ্চিত্তার্দ্ধ মাচরেৎ ॥ অনুপনীতো দেবেশি ব্রতং ত্রৈবার্ষিকং চরেৎ। চতুর্থ কালাহারী স্যাদ্ব্রহ্মচর্য্য মথাপিবা ॥ আ পঞ্চ বর্ষং বৃদ্ধস্য জ্ঞানাদর্দ্ধং বিনির্দ্দিশেৎ। শূদ্রস্য চ বিশেষেণ অতিকৃচ্ছ্র দ্বয়ং চরেৎ॥ স্বজাতি সাধিতে তস্মিন্ তদর্দ্ধং ব্রত মাচরেৎ। পৈষ্টীপানে ব্রাহ্মণস্য মরণান্তিক মুচ্যতে ॥ মাধ্বী গৌড়ী সুরাপানে দ্বাদশাব্দং বিধীয়তে। ইতরেষান্তু পানেন শুদ্ধি শ্চান্দ্রায়ণেন তু ॥ রাজন্য বৈশ্যয়ো শ্চাপি গৌড়ী মাধ্বী ন শস্যতে। মোহাৎ ক্ষত্রশ্চ বৈশ্যশ্চ পীত্বা কৃচ্ছ্র দ্বয়ং চরেৎ ॥ শূদ্রোপি গৌড়ীং পৈষ্টীঞ্চ ন পিবেদ্ধীন সংস্কৃতাং। কামাৎ পীত্বা সুরাং বিপ্রো মরণান্তিক মাচরেৎ॥ চরেচান্দ্রায়ণং জ্ঞানাৎ ক্ষত্রিয়ো বৈশ্য এব চ। পৈষ্টীপানে তু শূদ্রস্য প্রাজাপত্যং বিনির্দ্দিশেৎ॥ জ্ঞানাদভ্যাস যোগে তু চান্দ্রায়ণত্রয়ং স্মৃতং। নারিকেলং তথা

ত্তানাদ্বিশ্চাদ্দাযণেনন্তু। স্ক্রিয়শ্চৈব বৈশ্যশ্চ প্রাণাযামেন শুব্যতি ॥ ॥ অপক্বং পনসঞ্চৈব আম্রঞ্চ বদরং তথা। স্থাপযিত্বা ঘটে নিত্যং দদ্যাদান পযঃ পলং ॥ ত্রৈলোক্য বিজযাঞ্চৈব মাতুলঙ্গং তথৈবচ। সপ্তমেহনি ততো দদ্যাৎ সন্ধানাৎ সম্ভ্রমীরিতং ॥ দধি মধু ঘৃতঞ্চাপি মাঞ্জিষ্ঠং তিক্তকং তথা। অনুপানে তু দেবেশি দ্রাক্ষ মদ্যং সুনিশ্চিতং ॥ বিড়ঙ্গং শালবো মূলং । মধুনা সহসংস্থাপ্য শেষপাকং সমাচরেৎ॥ পিপ্পলী লবণং দত্ত্বা মধুনা মদ্যমীরিতং। পানসং পক্ব খর্জ্জুরং আদ্রং সোমলতা রসং ॥ একীকৃত্যাগ্নি সন্ধানাৎ খার্জ্জুরং মদ্য মীরিতং। পক্ব তালং দন্তিশাকং কঙ্গভঞ্চ তথৈব চ ॥ এতৈ রেব সুসন্ধানাৎ তাল মদ্যং প্রকীর্ত্তিতং। ইক্ষুদণ্ডং মরীচঞ্চ বদরঞ্চ তথা দধি ॥ শেষে তু লবণং দত্ত্বা ইক্ষু মদ্যং প্রকীর্ত্তিতং। নবং মধু তথা বিল্বং পক্বং শর্করযা সহ ॥ সন্ধানাজ্জাযতে মদ্যং মাধ্বীকং শরতো রসং। শতাবরী টঙ্কমূলং লক্ষ্মণং পদ্মমেব চ ॥ মধুনা সহ সন্ধানাৎ টঙ্কনাধ্বীক মীরিতং। মালূর মূলং বদরী শর্করা চ তথৈব চ ॥ এষা মেকত্র সন্ধানাৎ মৈরেযং মদ্য মীরিতং। ইন্দুজিহ্বা পক্বধাত্রী নারিকেল জলন্তথা। কদলী ফল সন্ধানান্মদ্যং তন্নারিকেলজং ॥ দধি ত্রৈলোক্যবিজযা তথৈব চ করীকণা গুড়েন সহ সন্ধানাৎ গৌড়ীমদ্যং প্রকীর্ত্তিতং ॥ শস্কুলী মর্দ্দ সিদ্ধান্ন মুক্ষোদক সমন্বিতং। বহ্নৌ সন্তাপযেৎ কিঞ্চিৎ স্থাপযিত্বা দিন দ্বযং ॥ শেষেহনি তু সংপ্রাপ্তে জীবনং তত্র নিঃক্ষিপেৎ। শৃঙ্গবেরং মরীচঞ্চ মাতুলঙ্গং তথৈব চ ॥ এতেষামেব সন্ধানাৎ পৈষ্টী মদ্যং প্রকীর্ত্তিতং। ইতি শ্রীমৎস্যসূক্তে মহাতন্ত্রে চতুর্ব্বিংশতিসাহস্রে ৩৬ পটলঃ ॥ ॥ অপিচ। সিদ্ধমন্ত্রী ভবেদ্বীরো ন বীরো মদ্যপানতঃ। কলৌ তু ভারতে বর্ষে লোকা ভারত বাসিনঃ ॥ গৃহে গৃহে সুরাং পীত্বা বর্ণভ্রষ্টা ভবন্তি হি। ইতি উৎপত্তিতন্ত্রে ৬৪ পটলঃ ॥ ॥ দিব্য বীর মযো ভাবঃ কলৌ নাস্তি কদাচন। কেবলং পশুভাবেন মন্ত্রসিদ্ধি র্ভবেন্নৃণাং ॥ ইতি মহানির্ব্বাণতন্ত্রং ॥ ॥ শ্রীক্রমে। ন[illegible]ব্রাহ্মণো মদ্যং [illegible]হাদেবৈ কথঞ্চন। ব্রামকামো [illegible]ক্ষণো হি মদ্যং মা[illegible] ভক্ষযেৎ॥

ভৈরবতন্ত্রে। নারিকেলোদকং কাংস্যে তাম্রে গব্যং তথা মধু। রাজন্যবৈশ্যয়োর্দেয়ং ন দ্বিজস্য কদাচন॥ এবং প্রদানে মাত্রেণ হীনায়ুর্ব্রাহ্মণো ভবেৎ। ইতি আগমতত্ত্ববিলাসঃ॥ * ॥ স্মৃতৌ কলৌ মদ্যপানাদি নিষেধো যথা। যাজ্ঞবল্ক্যদীপকলিকাধৃতং ব্রহ্মপুরাণং। নরাশ্বমেধৌ মদ্যঞ্চ কলৌ বর্জ্জ্যা দ্বিজাতিভিঃ। নিষেধবিষয়ম্পাষ্টয়তি উশনা। মদ্যমদেয়মপেয়মনিগ্রাহ্যং। অনিগ্রাহ্যমস্বীকার্য্যমিতি কল্পতরুঃ। কালিকাপুরাণেপি। স্বগাত্ররুধিরং দত্ত্বা আত্মহত্যামবাপ্নুয়াৎ। মদ্যং দত্ত্বা ব্রাহ্মণস্তু ব্রাহ্মণ্যাদেব হীয়তে॥ স্মৃতিঃ। তাম্রে চেক্ষুরসো মদ্যং পানসো যবচূর্ণকং। গব্যঞ্চ তাম্রপাত্রস্থং মদ্যতুল্যং ঘৃতং বিনা॥ অতো মদ্যপ্রতিনিধিদানমপি ন যুক্তং। ইতি তিথ্যাদিতত্ত্বং॥ * ॥ মদ্যতুল্যং যথা। নারিকেলোদকং কাংস্যে তাম্রপাত্রে স্থিতং মধু। গব্যঞ্চ তাম্রপাত্রস্থং মদ্যতুল্যং ঘৃতং বিনা॥ ইতি কর্ম্মলোচনং॥ * ॥ অথ মদ্যপানানুষ্ঠেয়ং কৌলানাং মদ্যপানবিধির্লিখ্যতে। কুলাচাররতো বীরো নির্ম্মলস্বী সদা ভবেৎ। সম্বিদাসেবনং কুর্য্যাৎ সোমপানং মহেশ্বরি॥ সর্ব্বথা দীক্ষিতে দোষে বীর শোচাহ্নতমানসঃ। দিব্যস্তু দেবতা প্রায শ্চন্দনাগুরু লেপনৈঃ॥ স্রক্চন্দনগন্ধৈশ্চ সুদিগ্ধো নাত্র সংশয়ঃ। ভস্মাঙ্গধূসরো বীর উন্মত্তবদ্বিচেষ্টিতঃ॥ সুরাপানরতো নিত্যং বলিপূজাপরায়ণঃ। নরশ্ছাগশ্চ মহিষো মেষঃ শূকর এব চ॥ শশকঃ শল্লকী গোধা পক্ষী কূর্ম্মা দশ স্মৃতাঃ। বানরশ্চ খরশ্চৈব গজাশ্বাদি বিহঙ্গমাঃ॥ ইত্যাদৈস্তু বলেদানৈঃ পূজয়েৎ স্বেষ্টদেবতাং। নিত্যং নৈমিত্তিকং কাম্যং কুর্য্যাচ্চ দিনে দিনে॥ অলিবারে অলঙ্কে চ তিথৌ চ অলকে তথা। ভৈরব্যাঃ কল্পিতং চক্রং সংস্থাপ্য পূর্ব্ববৎ প্রিয়ে॥ সুরাণাং শোধনং কুর্য্যাদন্যথা বৎ পরমেশ্বরি। প্রবৃত্তে ভৈরবীচক্রে সর্ব্বে বর্ণা দ্বিজোত্তমাঃ॥ নিবৃত্তে ভৈরবীচক্রে সর্ব্বে বর্ণাঃ পৃথক্ পৃথক্। বিজয়াঞ্চানুকল্পঞ্চ দ্বিজো দদ্যাদ্যুগে যুগে॥ ইতি উৎপত্তিতন্ত্রে ৬৩ পটলঃ॥ দ্রব্যাভাবে চানুকল্পৈঃ পূজয়েৎ পরদেবতাং। সুরাভাবে চ গোক্ষীরং দ্বিজো দদ্যাদ্যুগে যুগে॥ ইতি নিরুত্তরতন্ত্রে ৫ পটলঃ॥ * ॥ অ-

অজ্ঞাত্বা সুরাং পীত্বা ব্রাহ্মণো ব্রহ্মহা ভবেৎ। সংস্কৃতান্তু সুরাং পীত্বা ব্রাহ্মণো জ্বলদগ্নিবৎ ॥ সৌত্রামণ্যাং কুলাচারে ব্রাহ্মণঃ প্রপিবেৎ সুরাং। অন্যত্র কামতঃ পীত্বা ব্রাহ্মণ্যাদেব হীয়তে ॥ ইতি উৎপত্তিতন্ত্রং ॥ * ॥ ব্রাহ্মণস্য মহামোক্ষং মদ্যপানে প্রিয়ম্বদে। ব্রাহ্মণঃ পরমেশানি যদি পানাদিকং চরেৎ ॥ তৎক্ষণাৎ শিবরূপো হসৌ সত্যং সত্যং হি শৈলজে। তোয়ে তোয়ং যথা লীনং তৈজসং তৈজসে যথা ॥ ঘটে ভগ্নে যথা কাশং বায়ৌ বায়ু যথা প্রিয়ে। তথৈব মদ্য পানেন ব্রাহ্মণো ব্রহ্মণি প্রিয়ে ॥ লীয়তে নাত্র সন্দেহঃ পরমাত্মনি শৈলজে। সাযুজ্যাদি মহামোক্ষং নিমজ্জং ক্ষত্রিয়াদিষু ॥ মদ্যপানং বিনা দেবি তত্ত্বজ্ঞানং ন লভ্যতে। অতএব হি বিপ্রস্তু মদ্য পানং সমাচরেৎ ॥ বেদমাতা জপেনৈব ব্রাহ্মণো নহি শৈলজে। ব্রহ্মজ্ঞানং যদা দেবি তদা ব্রাহ্মণ উচ্যতে ॥ দেবানামমৃতং ব্রহ্ম তদেব লৌকিকী সুরা। সুরত্বং ভোগমাত্রেণ সুরা তেন প্রকীর্ত্তিতা ॥ মন্ত্রত্রয়ং সদা পাঠ্যং ব্রহ্মশাপাদি মোচনং। প্রজপ্যাত্তু হি সৈনৈব তদা ব্রহ্মময়ী সুরা ॥ হবি রারোপ মাত্রেণ বহ্নি দীপ্তো যথা ভবেৎ। শাপ মোচন মাত্রেণ সুরা মুক্তি প্রদায়িনী ॥ অতএব হি দেবেশি ব্রাহ্মণঃ পানমাচরেৎ। স ব্রাহ্মণঃ স বেদজ্ঞঃ সোহগ্নিহোত্রী স দীক্ষিতঃ ॥ বহু কিং কথ্যতে দেবি স এব নির্গুণাত্মকঃ। মুক্তি মার্গমিদং দেবি গোপ্তব্যং পশুসঙ্কটে ॥ প্রকাশাৎ সিদ্ধি হানিঃ স্যান্নিন্দনীয়ো নচান্যথা। ইতি মাতৃকাভেদতন্ত্রে ৩ পটলঃ ॥ * ॥ কুলস্ত্রী সেবনং কুর্য্যাৎ সর্ব্বথা পরমেশ্বরি। রমতে যুবতীং রম্যাং কামোন্মত্ত বিলাসিনীং ॥ নটীং কাপালিকাং বেশ্যাং হাড়িপানাং বরাঙ্গনাং। শূদ্রাণীং ম্লেচ্ছরমণীং জবনীং পরমেশ্বরি ॥ মাতৃযোনি বিচারো হস্তি মাতৃযোনিং বিনা প্রিয়ে। কুলাচার পরো বীরঃ কুল পূজাপরায়ণঃ ॥ ভগ লিঙ্গ সমাযোগাদাকৃষ্য জপ মাচরেৎ। নিশ্চলস্তু ভবেচ্চিত্তং কোটিসূর্য্য গ্রহেণ কিং ॥ চঞ্চল চিত্তে ভবেদ্ব্যাধি নিশ্চলে নিশ্চলং যথা। শবানাং সাধনং দেবি ... মুণ্ডনং। চিতায়াঃ সাধনং দেবি সিদ্ধিরস্তি কলৌ যুগে। ইত্যুৎপত্তিতন্ত্রং ॥ * ॥ কৌলিকা তারিণী ... গৃহীত্বা মদ্য

সেবনং। ন করোতি নরো যস্তু স কলৌ পতিতো ভবেৎ ॥ বৈদিকে তান্ত্রিকে চৈব জপ হোম বহিষ্কৃতঃ। অব্রাহ্মণঃ সএবোক্তঃ সএব হস্তিমূর্খকঃ ॥ শুনী মূত্র সমং তস্য তর্পণং যৎ পিতৃষ্বপি। কালী তারা মনুং প্রাপ্য বীরাচারং করোতি ন। শূদ্রত্বং তচ্ছরীরেণ প্রাপ্নুযাৎ স নচান্যথা ॥ ইতি কামাখ্যা তন্ত্রে ৫ পটলঃ ॥*॥ মদ্যশোধন প্রকারো যথা। শিব উবাচ। শৃণু পার্বতি বক্ষ্যামি তেষাং বৈ শোধন ক্রিয়াং। পদ্মাসনেন সংবিশ্য করপুটং সমাচরেৎ ॥ বামে গুরুমনস্কৃত্য দক্ষিণে গণপতিং স্মরেৎ। মধ্যে দেবীং নমস্কৃত্য প্রাণায়াম ত্রয়ঞ্চরেৎ ॥ শরীরে মাতৃকাং ন্যস্য ঋষ্যাদিন্যাস মাচরেৎ। স্বকল্পোক্ত বিধানেন ষডঙ্গন্যাস মাচরেৎ ॥ পশ্চাদ্ভূমৌ ত্রিকোণং বা ষট্কোণং বা মহেশ্বরি। বিলিখ্য মণ্ডলং শুদ্ধং তস্যোপরি ঘটং ন্যসেৎ ॥ বহুধা প্রোক্ষণং কৃত্বা ফট্কারেণ পুনঃপুনঃ। তত স্তস্মিন্ কারণন্তু মূলেনৈব চ স্থাপয়েৎ ॥ মাতৃকার্ণেন দেবেশি বিপরীতেন চৈব হি। পুনঃ ফট্কার মন্ত্রেণ প্রোক্ষণং কারয়েৎ সুধীঃ ॥ ততো [illegible] শক্তিবীজং চতুর্দশ স্বরান্বিতং। নাদ বিন্দু যুতং কৃত্বা তস্যোপরি শতং জপেৎ ॥ ততো মূলং জপেন্মন্ত্রং মায়াবীজং ততঃ পরং। ধেনুং যোনিং গালিনীঞ্চ ত্রিখণ্ডং মীন সংজ্ঞকং ॥ দর্শয়িত্বা স্বরারোহে ঘটং ধৃত্বা পঠেন্মনুং ॥ ওঁ একমেব পরং ব্রহ্ম স্থূল সূক্ষ্ম ময়ং ধ্রুবং। কচোদ্ভবাং ব্রহ্মহত্যাং তেন তে নাশয়াম্যহং ॥ * ॥ ওঁ সূর্য্য মণ্ডল সম্ভূতে বরুণালয সম্ভবে। অমাবীজময়ে দেবি শুক্রশাপাদ্বিমুচ্যতাং ॥ ওঁ বেদানাং প্রণবো বীজং ব্রহ্মানন্দ ময়ং যদি। তেন সত্যেন তে দেবি ব্রহ্মহত্যাং ব্যপোহতু ॥ ওঁ হ্রীং ষডঙ্গ যুক্তঞ্চ বকারং বিন্দু সংযুতং। এবং সকারকঞ্চাপি বর্ণাক্ষর সমন্বিতং ॥ জপ্ত্বা মন্ত্রী ততো ধ্যায়েৎ স্ব মন্ত্রাংশুল সুন্দরি। আনন্দ ভৈরবং ধ্যায়েদ্যথা তন্ত্রানুসারতঃ ॥ রক্তবর্ণং চতুর্বাহুং ত্রিনেত্রং বরদং শিবং। জটাজূট ধরং দেবং বাসুকী কণ্ঠ ভূষিতং ॥ ডমরুঞ্চ কপালঞ্চ মুদ্গরং পাশ মুত্তমং। ধারিণং তং যজেদ্দেবং ব্যাঘ্রাম্বরং শিবং ॥ এবং ধ্যাত্বা মহেশানি তস্য মধ্যে প্রপূজযেৎ। মায়াবীজং ততো হুং ফট্ মন্ত্রেণানেন সংত্যজেৎ ॥ তত স্তস্মিন্মহেশানি

ভ্যুব্রহ্ম ভৈরবীং স্মরেৎ। আনন্দভৈরবীং দেবীং স্মরাভয করাং করাং॥ ঘোররূপাং বরারোহাং ত্রিনেত্রাং রক্তবাসসং। রক্তবর্ণাং মহারৌদ্রীং সহস্রভৈরবান্বিতাং॥ ব্রহ্ম বিষ্ণু মহেশাদ্যৈঃ স্তূয়মানাং শিবাং ভজে। ইতি ধ্যাত্বা মহেশানি তেনৈব মনুনা যজেৎ॥ ততো বৈক্যং বিভাব্যৈব গায়ত্রীং দশধা জপেৎ। ভৈরবং চেন্তমধ্যোক্ত্বা বিদ্মহে তদনন্তরং॥ সুধা দেব্যৈ ততঃ পশ্চাদ্ধীমহীতি ততো বদেৎ। তন্নো দেবী ততঃ পশ্চাত্তন্ত্রে চ প্রচোদয়াৎ॥ ইতি তে কথিতা দেবী গায়ত্রী পরমাক্ষরী। অনয়াঃ স্মরণ মাত্রেণ দ্রব্য শুদ্ধিশ্চ জায়তে॥ তস্য প্রসাদাদীশোহহং সত্যং সত্যং ন সংশয়ঃ। তস্য মধ্যে মূল মন্ত্রং বিল্বপত্রে লিখেৎ সুধীঃ॥ রক্তবস্ত্রেণ সংপূজ্য মধ্যাং মন্ত্রেণ গোপয়েৎ॥ ॥ ধর্ম্মার্থ কাম মোক্ষাণাং বিধানাঞ্চ পার্ব্বতি। সাধ্যানাং কারণং যস্মাৎ কারণং পরিকীর্তিতং॥ তস্মাচ্চ মহেশানি ... কারণং হি তৎ। ... বীরকার্য্যে ... নির্ব্বি ... তস্য। ... মুক্তি প্রদায়কং॥ নির্ব্বিকল্পো মহেশানি মুক্তিভাগী ন সংশয়ঃ। সবিকল্পো বরারোহে রৌরবং যাতি নিশ্চিতং॥ ইতি কৈবল্যতন্ত্রে ২ পটলঃ॥ ॥ এতানি শ্রুতি স্মৃতি বিরুদ্ধত্বান্মোহনার্থানি শিষ্টৈঃ কদাচিদপি নাচরণীয়ানি॥

মদ্যক্রমঃ পুং নাড়বৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মদ্যপঙ্কঃ পুং সুরাকল্কঃ। মেধা ইতি ভাষা। তৎপর্য্যায়ঃ। মেদকঃ ২ জগলঃ ৩। ইতি হেমচন্দ্রঃ॥

মদ্যপাসনং ক্লী পানকচিকভক্ষ্যং। তৎপর্য্যায়ঃ। উপদংশঃ ২ অবদংশঃ ৩ চক্ষং ৪। ইতি হেমচন্দ্রঃ॥

মদ্যপুষ্পা স্ত্রী ধাতকী। ইতি রাজনির্ঘণ্টঃ॥

মদ্যমণ্ডঃ পুং মদ্যফেনঃ। তৎপর্য্যায়ঃ। কারোত্তমঃ ২। ইতি হেমচন্দ্রঃ॥ কারোত্তরঃ ৩ সুরামণ্ডঃ ৪। ইত্যমরঃ॥

মদ্যবাসিনী স্ত্রী ধাতকীবৃক্ষঃ। ইতি রত্নমালা রাজনির্ঘণ্টৌ॥

মদ্যবীজং ক্লী মদ্যপ্রকৃতদ্রব্যং। ... ইতি ভাষা। তৎপর্য্যায়ঃ। কিণ্বং ২ নগ্নহূঃ ৩ নগ্নহুঃ। ইতি হেমচন্দ্রঃ॥

মদ্যসন্ধানং ক্লী সুরাসজ্জীকরণং। বংশাঙ্কুরফলাদীন্ বহুকালং সন্ধায় যৎ ক্রিয়তে তৎ। তৎপর্য্যায়ঃ। আসুতিঃ২ আসবঃ ৩ অভিষবঃ ৪। ইতি হেমচন্দ্রঃ॥

মদ্যামোদঃ পুং বকুলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মদ্রঃ পুং দেশবিশেষঃ॥ হর্ষঃ। ইত্যুণাদিকোষঃ॥ তদ্দেশ বিবরণং যথা। বৈরাট পাণ্ড্যযো র্মধ্যে পূর্ব্ব দক্ষ ক্রমেণ তু। মদ্রদেশঃ সমাখ্যাতো মাদ্রীহা তত্র তিষ্ঠতি॥ ইতি শক্তিসঙ্গমতন্ত্রে ৭ পটলঃ॥

মদ্রকঃ ত্রি মদ্রদেশভবঃ। ইতি সিদ্ধান্তকৌমুদী॥

মদ্রকারঃ ত্রি মদ্রঙ্করঃ। যথা ক্ষেম প্রিয় মদ্রাৎ কঃর্ব্বেতি মুগ্ধবোধ ব্যাকরণং॥

মদ্রঙ্করঃ ত্রি মঙ্গলকারকঃ। যথা। ক্ষেমঙ্করোঽরিষ্টতাতিঃ স্যান্মদ্রঙ্কর শঙ্করৌ। ইতি ত্রিকাণ্ডশেষঃ॥

মদ্রসুতা স্ত্রী মদ্ররাজকন্যা। সা পাণ্ডুরাজস্য দ্বিতীয়া ভার্য্যা নকুলসহ দেব জননী চ ইতি শব্দরত্নাবলী॥

মদ্বর্গীণঃ | মদ্বর্গীয়ঃ | মদ্বর্গ্যঃ ( ত্রি অস্মৎসম্বন্ধী। ইতি সিদ্ধান্তকৌমুদী॥

মধ্বা পুং শিবঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

মধু ক্লী মদ্যং॥ ক্ষীরং॥ জলং। ইতি বিশ্বঃ হেমচন্দ্রশ্চ॥ রসভেদঃ। মধুররস ইতি যাবৎ। ইতি শব্দরত্নাবলী॥ পুষ্পরসঃ। ফুলের মৌ ইতি ভাষা। তৎপর্য্যায়ঃ। মকরন্দঃ২। ইত্যমরঃ॥ মরন্দঃ ৩ মরন্দকঃ ৪। ইতি শব্দরত্নাবলী॥ ক্ষুদ্রাভি র্মক্ষিকাভিঃ কৃতং। মৌ ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষৌদ্রং ২ মাক্ষিকং ৩। ইত্যমরঃ॥ মাক্ষীকং ৪ কুসুমাসবং ৫ পুষ্পাসবং ৬ পবিত্রং ৭ পিত্র্যং ৮ পুষ্পরসাহ্বয়ং ৯। ইতি রাজনির্ঘণ্টঃ॥ মাধ্বীকং ১০ সারঘং ১১ মক্ষিকাবান্তং ১২ বরটীবান্তং ১৩ ভৃঙ্গবান্তং ১৪ পুষ্পরসোদ্ভবং ১৫। ইতি ভাবপ্রকাশঃ॥ অস্য সামান্যগুণাঃ। শীতত্বং। মৃদুত্বং। স্বাদুত্বং। ত্রিদোষ ব্রণ নাশিত্বং। কষায়ানুরসত্বং। রুক্ষত্বং। চক্ষুষ্যত্বং। শ্বাস কাস নাশিত্বঞ্চ॥ *॥ তদষ্টবিধং যথা। পৌত্তিকং ১ ভ্রামরং ২ক্ষৌদ্রং ৩ মাক্ষিকং ৪ ছাত্রং ৫ আর্ঘ্যং ৬ ঔদ্দালকং ৭ দালং ৮। এতেষাং লক্ষণানি যথা। পিঙ্গলা মক্ষিকাস্তেষাং মহত্যল্পা চ সা দ্বিধা।

মহত্তী পুত্তিকা নাম্নী স্বল্পা ক্ষুদ্রেতি কথ্যতে ॥ মধ্যমা মক্ষিকা নীলা মাক্ষিকেত্যভিধীয়তে। পুত্তিকা ভ্রমর ক্ষুদ্রা মক্ষিকা সম্ভবং মধু॥পৌত্তিকাদ্যুচ্যতে ছাত্রং বরটীছত্র সম্ভবং। তপোবনে জরৎকারো মধু তত্তদ্ভবং॥ ঔদ্দালকস্তু বল্মীকক্রারি কীট বিনির্ম্মিতং। দাল মিত্যভিনির্দ্দিষ্টং বৃক্ষকোটর কীটজং ॥ ✽ ॥ এতেষাং বর্ণা যথা। মাক্ষিকং তৈলবর্ণং স্যাৎ ঘৃতবর্ণন্তু পৌত্তিকং। ক্ষৌদ্রং কপিলবর্ণং স্যাচ্ছ্বেতং ভ্রামর মচ্যতে ॥ ✽ ॥ এতেষাং গুণা যথা। পৌত্তিকং তেষু বীর্য্যোষ্ণং ক্ষয়ায়ানুরসান্বয়াৎ। বাতাসৃক্ পিত্ত কৃদ্ভেদি বিদাহি মদকৃন্মধু॥ পৈচ্ছিল্যাৎ স্বাদু ভূয়স্ত্বাদ্ভ্রামরং গুরু কীর্ত্তিতং। ক্ষৌদ্রং বিশেষতো জ্ঞেয়ং শীতলং লঘু লেখনং॥ তস্মা লঘুতরং রুক্ষং মাক্ষিকং প্রবরং স্মৃতং। শ্বাসাদিষু চ রোগেষু প্রশস্তং তদ্বিশেষতঃ॥ ছাত্রং শ্বিত্রি ক্রিমিহরং রক্ত পিত্ত হরং গুরু। অর্ঘ্যং চক্ষুষ্য মায়ুষ্যং কফ পিত্তানবাতজিৎ ॥ ঔদ্দালকং কষায়োষ্ণং কটুষ্ণং বিষাপহং। দালং কফহরং রুক্ষং দীপনং ছর্দ্দি মেহনুৎ ॥ উষ্ণ মুষ্ণার্ত্তশ্চ হন্যান্মধু বিষান্বয়াৎ। মধুনৈক্যং বিরুধ্যন্তে বহুজবিদ্বীর্য্যসংজ্ঞিতং ॥ উষ্ণৈঃ রৌদ্রৈঃ করণৈঃ উষ্ণং মধু উষ্ণার্ত্তং রৌদ্রপীড়িতং জনং বিষান্বয়াৎ বিষতুল্যত্বাৎ হন্যাৎ ॥ ✽ ॥ নব পুরাণ মধু গুণাঃ। বৃংহনীয়ং মধু নবং বাত শ্লেষ্ম হরং পরং। পুরাণং লঘু সংগ্রাহি নির্দ্দোষং স্থৌল্য নাশনং ॥ দোষ ত্রয় হরং পক্ব মাম মম্লং ত্রিদোষ কৃৎ ॥ অত্র কেচিন্মধুনো হগ্নি সংযোগাভাবাৎ কালপক্বতা মাহুঃ॥ ✽ ॥ মধুজাত শর্করা গুণাঃ। মধুজা শর্করা রুক্ষা তৃষ্ণা ছর্দ্দ্যতিসারজিৎ। ইতি রাজবল্লভে মধুবর্গঃ ॥ ✽ ✽ ॥ অপিচ। মাক্ষিকং ভ্রামরং ক্ষৌদ্রং পৌত্তিকং ছাত্রকং তথা। আর্ঘ্য মৌদ্দালকং দাল মিত্যষ্টৌ মধুজাতয়ঃ ॥ ✽ ॥ নানা পুষ্প রসাহারাঃ কপিলা বন মক্ষিকাঃ। যাঃ স্থূলা স্তাভি কৃতং যৎ মধু মাক্ষিক মুচ্যতে ॥ ✽ যে স্নিগ্ধাঞ্জনগোলাভাঃ পুষ্পাসব পরায়ণাঃ। ভ্রমরৈর্জনিতং তৈস্তু ভ্রামরং মধু ভন্যতে ॥ ✽ ॥ পিঙ্গলা মক্ষিকাঃ সূক্ষ্মাঃ ক্ষুদ্রা ইতি হি বিশ্রুতাঃ। তাভিঃ কৃৎপাদিতং যত্তু তৎ ক্ষৌদ্রং নিষ্ঠ কথ্যতে ॥ ✽ ॥ মহত্যো মক্ষিকাঃ

পিঙ্গাঃ পুত্তিকা ইতি কীর্ত্তিতাঃ। তজ্জাতং মধু ধীমদ্ভিঃ পৌত্তিকং স-মুদাহৃতং ॥ * ॥ ছত্রাকারন্ত পটলং সরঘাঃ পীত পিঙ্গলাঃ। যে স্রবন্তি তদুৎপন্নং মধু ছাত্রক মীরিতং ॥ * ॥ নক্ষিকা স্তীক্ষ্ণ তুণ্ডা যাঃ পীতবর্ণ ষট্পদ সন্নিভাঃ। তাভ্যুত্তং যদর্ঘ্যা র্ঘং তদার্ঘ্যং মধু ভন্যতে ॥ * ॥ উ-দ্দালাঃ কপিলাঃ কীটা ভূমে বল্মী-কনাঃ স্মৃতাঃ। বল্মীকান্ত স্তদুৎপন্ন মৌদ্দালকনুদীর্য্যতে ॥ * ॥ ইন্দ্রনী-ল দলাকারাঃ সূক্ষ্মা শ্চিন্বন্তি মক্ষি-কাঃ। বদ্ধং কোটরান্ত স্তদ্ধ দাল মিদং ক্রমাৎ ॥ * ॥ ইত্যেতস্যাষ্টধা ভেদৈ রুৎপত্তিঃ কথিতা ক্রমাৎ। অথ বক্ষ্যাম্যহং স্বেষাং বর্ণ বীর্য্যা-দিকং ক্রমাৎ ॥ তদ্যথা। মাক্ষিকং তৈল বর্ণং স্যাৎ শ্বেতং ভ্রামর মুচ্য-তে। ক্ষৌদ্রন্ত কপিলা ভাসং পৌ-ত্তিকং ঘৃত সন্নিভং ॥ আপীত বর্ণং ছত্রং স্যাৎ পিঙ্গলঞ্চার্ঘ্য নামকং। ঔদ্দালং স্বর্ণ সাদৃশ্যং ... পীত মুচ্যতে ॥ * ॥ মাক্ষিকং ... লসহ ... দোষ শব্দরত্নাবলী ... ... বাতং ... মুখ ... জিৎ ॥ ... দুঃ শীতং চক্ষুষ্যং পিচ্ছিলং পি-ত্ত বাতহৃৎ। পৌত্তিকং মধু রুক্ষোষ্ণং

কৃমস্য পিত্ত দাহহৃৎ ॥ বিত্র মেহ কৃমিঘ্নঞ্চ বিদ্যাচ্ছাত্রং গুণোত্তরং। আর্ঘ্যং মধ্বতি চক্ষুষ্যং কফ পিত্তাদি দোষহৃৎ ॥ ঔদ্দাল স্তু স্বষ্টাদি দো-ষঘ্নং সর্ব্ব সিদ্ধিদং। দালং কটু কষা-য়াম্লং মধুরং পিত্তদাবি চ ॥ * ॥ নবং ... ভবেৎ স্থৌল্যং নাতিশ্লেষ্ম হরং পরং। দেহ স্থৌল্যাপহং গ্রাহি পু-রাণং মধু লেখনং ॥ * ॥ পক্বং দোষ ত্রয়ঘ্নং মধু বিবিধ রুজা জাড্য জিহ্বা-মযাদি ধ্বংসং ধত্তে চ রুচ্যং বল মতি ধৃতিদং বীর্য্য বৃদ্ধিং বিধত্তে ॥ * ॥ আমঞ্চেদাম শূল্মাময পবন রুজা পিত্ত দাহাস্র দোষ নাশং ন্যূনং বি-শোষং জনয়তি নয়তি ক্লৃপ্ত মপ্যগ্নি বৃদ্ধেঃ ॥ * ॥ ব্রণ শোধন সন্ধানে ব্রণ সংরোপণাদিষু। সাধারণ গমধুক্ত তত্তুল্যা মধুশর্করাঃ ॥ * ॥ উষ্ণং সহোষ্ণং কালে বা মধুষ্ণং মথাপি-বা। আনং মধু মনুষ্যাণাং বিষব-ত্তাপ দায়কং ॥ * ॥ কীটাদি যুক্ত মন্ন দূষিতং বহু পর্য্য ষিতকং মধু ন-ভঃ। কাষ্ঠকোটর গতঞ্চ মেচকং ভক্ত দেহজনিতঞ্চ দোষকৃৎ ॥ * ॥ সত্ত্বং নিহত্য মধুপাত্ত নপাম্য হংশাং ভা-বৃন্বিনং মধু রসাদন যোগ যোগ্যং। হিক্কা শ্বাস কুষ্ঠ মেশোফ কফ ব্রণাদি

দোষাপহং ভবতি দোষদ মন্যথা-
চৈত্ং॥ * ॥ মাধ্বীসিতা মধুৎপন্না
মধুজা মধুশর্করা। মাক্ষীকশর্করা
চৈষা। ক্ষৌদ্রজা ক্ষৌদ্র শর্করা॥ যদ্গুণ
যন্মধু প্রোক্তং তদ্গুণা তস্য শর্করাঃ।
বিশেষাদ্বল বৃষ্যা চ তর্পণং ক্ষীণ
দেহিনাং॥ ইতি রাজনির্ঘণ্টঃ॥ * ॥
মতান্তরে মধু গুণাঃ। মধু শীতং লঘু
স্বাদু রুক্ষং গ্রাহি বিলেখনং। চক্ষুষ্যং
দীপনং স্বর্য্যং ব্রণ শোধন রোপণং॥
সৌকুমার্য্যকরং সূক্ষ্মং পরং স্রোতো
বিশোধনং। কষায়ানুরসং হ্লাদি প্র
সাদ জনকং পরং॥ বল্যং মেধাকরং
বৃষ্যং বিশদং রোচনং হরেৎ। কুষ্ঠার্শঃ
কাস পিত্তাস্র কফ মেহ ক্লম ক্রিমীন্
॥ মেদ তৃষ্ণা বমি শ্বাস হিক্কাতীসা-
র বিড্গ্রহান্। দাহ ক্ষত ক্ষয়াং-
স্তত্তু যোগবাহ্যল্প বাতলং॥ * ॥
অথ মধুভেদাঃ॥ মাক্ষিকং ভ্রামরং
ক্ষৌদ্রং পৌত্তিকং ছাত্র মিত্যপি।
আর্ঘ্য মৌদ্দালকং দাল মিত্যষ্টৌ
মধু জাতয়ঃ॥ * ॥ অথ তেষাং ল
ক্ষণানি গুণাশ্চ। তত্র মাক্ষিকস্য।
মক্ষিকাঃ পিঙ্গবর্ণাস্তু মহত্যো মধু
মক্ষিকাঃ। তাভিঃ কৃতং তৈলবর্ণং
মাক্ষিকং তৎ প্রচক্ষতে॥ মাক্ষিকং
মধুষু শ্রেষ্ঠং নেত্রাময় হরং লঘু। কাম-
লার্শঃ ক্ষত শ্বাস কাশ ক্ষয় বিনা-
শনং॥ * ॥ অথ ভ্রামরস্য। কিঞ্চিৎ
সূক্ষ্মৈঃ প্রসিদ্ধেভ্যঃ পুত্রেভ্যো অলি
ভিঃ শ্চিতং। নির্মলং স্ফটিকাভং যত্ত-
ন্মধু ভ্রামরং স্মৃতং॥ ভ্রামরং রক্তপি-
ত্তঘ্নং মূত্রজাড্যকরং গুরু। স্বাদুপাক
মভিষ্যন্দি বিশেষাৎ পিচ্ছিলং হি-
মং॥ * ॥ অথ ক্ষৌদ্রস্য। মক্ষি-
কাঃ কপিলাঃ সূক্ষ্মাঃ ক্ষুদ্রাখ্যা স্তৎ
কৃতং মধু। মুনিভিঃ ক্ষৌদ্র মিত্যুক্তং
তদ্বর্ণাৎ কপিলং ভবেৎ॥ গুণৈর্মা-
ক্ষিকবৎ ক্ষৌদ্রং বিশেষান্মেহ না-
শনং। * । অথ পৌত্তিকস্য। যাঃ
কৃষ্ণা মশকোপমা লঘুতরাঃ প্রায়ো
মহাপিণ্ডিতং। বৃক্ষাণান্তক কোটরা-
ন্তরগতাঃ পুষ্পাসবং সর্বতে॥ তা স্ত-
জ্জ্ঞৈ রিহ পুত্তিকা নিগদিতা স্তা-
ভিঃ কৃতং সর্পিষা। তুল্যং যন্মধু ত-
দ্বনেচরজনৈঃ সংকীর্ত্তিতং পৌত্তিকং
॥ পৌত্তিকং মধু রুক্ষোষ্ণং পিত্ত দা-
হাস্রবাতকৃৎ। বিদাহি মেহ কৃচ্ছ্র-
বিক্ষত শোষি চ॥ * ॥
ভৃঙ্গা বরটাঃ কপিলাঃ
পিঙ্গলা হিমবতো বনে। ছ-
ত্রাকারং ভ্রদ্রুজং ছাত্রং মধু
স্মৃতং॥ ছাত্রং কপিল পীতং স্যাৎ
পিচ্ছিলং শীতলং গুরু। স্বাদুপাক

ক্রিমি শ্বিত্র রক্তপিত্ত প্রমেহজিৎ ॥ ভ্রম তৃড় মোহ বিষহৃৎ তর্পণঞ্চ গুণাধিকং । * । অথার্ঘ্যস্য । মধুক বৃক্ষা নির্য্যাসং জরৎকাষ্ঠাম্বুমোদ্ভবাঃ । সুবন্ত্যার্ঘ্যং তদা খ্যাতং শ্বেতকং মালবে পুনঃ ॥ তীক্ষ্ণ তুণ্ডাস্তু যাঃ পীতাঃ মক্ষিকাঃ ষট্পদোপমাঃ । অর্ঘ্যা স্তাস্তৎ কৃতং যত্তদার্ঘ্য মিত্যপরে জগুঃ ॥ আর্ঘ্যং মধ্বতি চক্ষুষ্যং কফ পিত্তহরং পরং । কষায়ং কটুকং পাকে তিক্তঞ্চ বল পুষ্টিকৃৎ ॥ * ॥ অথৌদ্দালকস্য । প্রায়ো বল্মীক মধ্যস্থাঃ কপিলাঃ স্বল্প কীটকাঃ । কুর্ব্বন্তি কপিলং স্বল্পং তৎস্যাদৌদ্দালকং মধু ॥ ঔদ্দালকং রুচিকরং স্বর্য্যং কুষ্ঠ বিষাপহং । কষায় মুষ্ণ মম্লঞ্চ কটুপাকঞ্চ পিত্তকৃৎ ॥ * ॥ অথ দালস্য । সংস্রুত্য পতিতং পুষ্পাৎ যত্তু পত্রোপরি স্থিতং । মধুরাম্ল কষায়ঞ্চ তদ্দালং মধু কীর্ত্তিতং ॥ দালং মধু লঘু প্রোক্তং দীপনীয়ং কফাপহং । কষায়ানুরসং রুক্ষং রুচ্যং ছর্দ্দি [illegible] ॥ অধিকং মধুরং [illegible] সহ ভারিকং । লঘু [illegible] শব্দরত্নাবলী [illegible] তুলিতং ॥ * ॥ অথ ন[illegible] মধু গুণাঃ ॥ নবং মধু ভবেৎ পুষ্ট্যৈ নাতি শ্লেষ্ম হরং সরং । পুরাণং গ্রাহকং রুক্ষং মেদোঘ্ন মতি লেখনং ॥ * ॥ মধুনঃ শর্করায়াশ্চ গুড়স্যাপি বিশেষতঃ । একসংবৎসরাতীতে পুরাণত্বং স্মৃতং বুধৈঃ ॥ * ॥ অথ মধুনঃ শীতস্য গুণাধিক্য মুষ্ণতায়াং নিষেধঃ । বিষ পত্রাদপি রসং সবিষা ভ্রমরাদয়ঃ । গৃহীত্বা মধু কুর্ব্বন্তি তচ্ছীতং গুণবন্মধু ॥ বিষান্বয়াত্তদুষ্ণন্তু দ্রব্যেণোষ্ণেন বা সহ । উষ্ণার্ত্তস্যোষ্ণকালে চ মৃতং বিষসমং মধু ॥ ইতি ভাবপ্রকাশঃ ॥

মধুঃ পুং মধুদ্রুমঃ । মউলগাছ ইতি ভাষা ॥ বসন্তর্ত্তুঃ ॥ দৈত্যভেদঃ । যং হত্বা বিষ্ণুর্মধুসূদনো হভূৎ ॥ চৈত্র মাসঃ । ইতি মেদিনী ॥ অশোকবৃক্ষঃ । ইতি হেমচন্দ্রঃ ॥ যষ্টিমধু । ইতি শব্দরত্নাবলী ॥ অসুরবিশেষঃ । সচ শত্রুঘ্নেনহতঃ । যস্য নাম্না মথুরা মধুপুরীতি খ্যাতা ॥

মধুঃ স্ত্রী জীবন্তীবৃক্ষঃ । ইত্যমরঃ ॥

মধুকং ক্লী যষ্টিমধুকা । ইত্যমরঃ ॥ ত্রপু । ইতি হেমচন্দ্রঃ ॥

মধুকঃ পুং বন্দিভেদঃ ॥ যষ্ট্যাহ্বঃ ॥ বিহগান্তরঃ । ইতি বিশ্বঃ ॥

মধুকণ্ঠঃ পুং কোকিলঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মধুকরঃ পুং ভ্রমরঃ । ইত্যমরঃ ॥

কামী। ইতি ধরণিঃ॥ ভৃঙ্গরাজ-
বৃক্ষঃ। ইতি শব্দমালা॥
মধুকর্কটিকা স্ত্রী মধুরজম্বীরবিশেষঃ
। মউকড়ী ইতি ভাষা। তৎপর্য্যা-
য়ঃ। জন্ধা ২। ইতি শব্দচন্দ্রিকা॥
মধুখর্জুরিকা। ইতি রাজনির্ঘণ্টঃ॥
মধুককটী স্ত্রী মধুবীজপূরঃ। ইতি
রাজনির্ঘণ্টঃ॥
মধুকা স্ত্রী মধুযষ্টিকা। ইত্যমরঃ॥
মধুপর্ণী বৃক্ষঃ। ইতি মেদিনী॥
কৃষ্ণবর্ণকঙ্গুনী। ইতি হেমচন্দ্রঃ॥
মধুজম্বুটিকা } স্ত্রী জম্বীরবিশেষঃ।
মধুজম্বুটী } মধুর ইতি মহুর
ইতিচ ভাষা। তৎপর্য্যায়ঃ। মাতু-
লুঙ্গা ২ সুগন্ধা ৩ গিরিজা ৪ পূতি-
পুষ্পিকা ৫ অত্যম্লা ৬ দেবদূতী ৭।
ইতি রত্নমালা॥ অস্যা গুণাঃ।
শীতত্বং। শ্লেষ্মলত্বং। আস্যপ্র-
সাদনত্বং। রুচ্যত্বং। স্বাদুত্বং। গুরু-
ত্বং। স্নিগ্ধত্বং। বাতপিত্ত বিনাশি-
ত্বঞ্চ। ইতি রাজবল্লভঃ॥
মধুকৃৎ পুং ভ্রমরঃ। ইতি হেমচন্দ্রঃ
মধুকেশটঃ পুং ভ্রমরঃ। ইতি ত্রিকা-
ণ্ডশেষঃ॥
মধুকৈটভৌ পুং অসুরবিশেষৌ।
তযো রুৎপত্ত্যাদি যথা। দৈন
ন্দিনে তু প্রলয়ে প্রসুপ্তে গরুড়ধ্বজে

তস্য শ্রবণ বিড়্জাতা বসুরৌ মধু-
কৈটভৌ॥ কূর্ম্মপৃষ্ঠ গতা পৃথ্বী বি-
লীনেবা ভবজ্জলৈঃ। তাং বীশীর্ণাং
যোগনিদ্রা মহামায়া ব্যলোকয়ৎ॥
তাং বৈ দৃঢ়তরাং কর্ত্তুং পৃথ্বীং প্রতি-
দেশ্বরী। উপায়ং চিন্তয়ামাস কথং
পৃথ্বী ভবেদ্দৃঢ়া॥ ইদানী মাদ্যবৎ
পৃথ্বী প্রবৃত্তা কোমলা জলৈঃ। সৃষ্টি-
কালে জনান্ বোঢ়ুং কথং শক্তা ভ-
বিষ্যতি॥ ইতি সঞ্চিন্ত্য সা মাতা
জগতাং সৃষ্টিকারিণী। উপগম্য তদা
বিষ্ণুমাসসাদ সুনিদ্রিতং। তস্ত সুপ্তং
সমাসাদ্য জগন্নাথং জগৎপতিং।
বামহস্ত কনিষ্ঠাগ্রং তস্য কর্ণে ন্যবে-
শয়ৎ॥ নিবেশ্য নখরাগ্রেণ প্রোচ্ছ্য-
ত্য শ্রাবণং মলং। চূর্ণীচকার সা
দেবী যোগনিদ্রা জগৎপ্রসূঃ॥ তৎ
কর্ণমল চূর্ণেভ্যো মধু নামাসুরো ভ-
বৎ। ততো দক্ষিণ হস্তস্য কনিষ্ঠা-
গ্রস্ত দক্ষিণে॥ কর্ণে ন্যবেশযদ্দেবী
তস্মাদপ্যদ্ভুতং মলং। তচ্চাপি ক্ষো-
দং [illegible]শাখাগুঞ্জন তু॥ ত-
র্দনিতং [illegible]ভা নাম বলবানসু-
রো[illegible]॥ পিঙ্গল[illegible]পদ্মঃ স চ পানার্থং
যস্মাদ্বৃদ্ধি[illegible]মধু॥ অত স্তস্য ম-
হাদেবী মধু নামাকরোত্তদা। উৎ-
পন্নঃ কীট বজ্জাতি মহামায়া করো-

যতঃ ॥ অত স্তং কৈটভাখ্যস্ত স্ব। দেবী তদাকরোৎ। তাবুবাচ মহ মায়া যুধ্যতাং হরিণা সহ ॥ যুবামৌ শুদ্ধযৈবাত্র ভবন্তৌ নিহনিষ্যতি। যদা যুবাং প্রভাষেথে আবাং বিষ্ণো বধানত্তৌ ॥ তদৈবায়ং যুবাং হং নান্যথা হরি রপ্যথ। মহামায়ামোহিতৌ তৌ বিষ্ণুগাত্রে তদা মুহুঃ ॥ ভ্রমমাণৌ দদৃশতু র্নাভিপদ্ম স্থিতং বিধিং। তমূচতু স্তৌ ধাতারং হনিষ্যাবো হদ্য নানিতং ॥ ত্বং জাগরয় বৈকুণ্ঠং যদি জীবিতু মিচ্ছসি। ততো ব্রহ্মা মহামায়াং যোগনিদ্রাং জগৎপ্রসূং ॥ প্রসাদয়ামাস তদা স্তুতিভি র্নতিভি র্ভিয়া। চিরং স্তুতাথ সা দেবী ব্রহ্মণা জগদাত্মনা ॥ প্রসন্না ভবদত্যর্থ মুবাচ চ যথা বিধিং। কিমর্থং সংস্তুতা চাহং কিং করিষ্যাম্যহং তব ॥ তদ্বদত্বং মহাভাগ করিষ্যাম্যহ মদ্যতে। তত স্তেন মহামায়া প্রোক্তা ধাত্রা মহাত্মনা ॥ প্রবোধয় জগন্নাথং যাবন্নো মাং হনিষ্যতঃ। তাবা হযেতৌ দুর্দ্ধর্ষা বর্ণানো মর্ণ সহ ॥ ॥ ইত্যুক্তা সা তদা দৈবাবলী শোদাত্মনা। বোধয়ামাস বৈকুণ্ঠং মোহয়ামাস তৌ তদা ॥ ততঃ প্রবুদ্ধঃ কৃষ্ণঃ স দদর্শ ভয়শালিনং। ব্রহ্মাণং ॥

কাণ্ডশেষঃ ॥

মধুদূতী স্ত্রী পাটলাবৃক্ষঃ। ইতি শব্দাংভাবপ্রকাশ ॥

মধুদ্রুঃ পং স্বর্বর ... তু বীরা বমধুকৈটভৌ ॥ অনন্তো হপি যোগেণ তামোধর্ত্তুং ক্ষমো হভবৎ। যুধ্যমানান্মহাবীরান্ বৈকুণ্ঠ মধুকৈটভান্ ॥ অথ ব্রহ্মা শিলারূপাং স্থিতি শক্তিং তদাকরোৎ। অর্দ্ধ যোজন বিস্তীর্ণাং সার্দ্ধ যোজন মায়তাং ॥ তস্যাং শিলায়াং বৈকুণ্ঠো যুযুধে নৃপ সত্তম। সহ তাভ্যাং শিলা সা তু প্রবিবেশ জলান্তরং ॥ তস্যাস্ত শক্ত্যাং মগ্নায়াং তোয়েষু যুযুধে হরিঃ। পঞ্চবর্ষ সহস্রাণি বাহুযুদ্ধে র্নিরন্তরং ॥ যদা নৈবাশকত্তাস্তৌ বিষ্ণু জগতাং পতিঃ। পরাং চিন্তাং তদা বাপ বিধাতাপি ভয়াকুতঃ ॥ তত স্তাবেব তং বিষ্ণু মূচতু র্বলদর্পিতৌ। পুনঃ পুন স্তৌ গর্জন্তৌ মহামায়া বিমোহিতৌ ॥ তষ্টৌস্ব স্তুমিযদ্ধেন বরং বরয় মাধব। ভবেষ্টং সংপ্রদাস্যাবঃ সত্য মেতদ্বরাধুনা ॥ তযো স্তদ্বচনং শ্রুত্বা ভগবান্ গরুড়ধ্বজঃ। উবাচ তৌ যুবাং বধ্যৌ ভবেতাং মে মহাবলৌ ॥ ইতি মেহি বরং মহ্যং দাতব্যং যদি বিদ্যতে। তৌ তদা প্রাহ যুষ্মত্তো যোগ্যো নৌ

তস্যা দন্তাঃ কলনযাঃ মৃতাঃ । দ-
ভয়োমধয়া দেবী রৌপ্যক্ষুর বিভূ

॥ বৃহ্মাণং মোক্ষ । সুর্ব লক্ষণ সংযুক্তা
-নংজ্ঞযা। বৃহ্মশক্তি শিলাং ...রি তি
দ্ধৃত্য ধীযতাং যথা॥ তত্র স্থিত্বা ...বং।
ধারে হনিষ্যামি মহাবলৌ। ততো ভূ
বৃহ্মা হ্যহশ্চৈব উদ্দধার শিলা...
॥ তস্যা মধ্যে পুর্ব ভাগে হ্যহং পর্ব্বত
রূপধৃক্। উদ্ধে স্থিত্বা শিলাং ভি-
ত্ত্বা প্রবিবেশ সনাতনং ॥ ঐশান্যা
মভবৎ কূর্ম্মঃ পর্বত শ্চাগৃহীৎ শি-
লাং। বাযব্যাঞ্চ তথানন্তো নৈর্ঋত্যা
ঞ্চ সুরেশ্বরী ॥ মহামাযা জগদ্ধাত্রী
শৈলরূপ প্রধারিণী। আগ্নেয্যাঞ্চ স্ব-
যং বিষ্ণুরেক রূপেণ সংস্থিতঃ॥ বৃহ্ম
শক্তি শিলাং গৃহ্ন্ ভগবান্ পর-
মেশ্বরঃ। মধ্যে বৃহ্মা ত্বহশ্চৈব বরাহ
শ্চ তথা পরঃ॥ ততো বরাহ পৃষ্ঠস্য
চরমে জগতাং পতিঃ। স্থিত্বা শিলা
মবষ্টভ্য বৃহ্মশক্তি মধোগতাং॥ বা-
মে স্বজঘনে যত্নাদারোপ্য শিরসী ত-
যোঃ। জগদাধার ভূতঃ স সর্ব্ব যত্নেন
সংযুতঃ ॥ সর্ব্বৈ র্ব শৈলৈঃ সমাক্রম্য
তিষ্ঠেদ স পৃথক্ পৃথক্। মধুকৈটভ
যোঃ সম্যক্ বীরযোঃ পৃথিবী মৃতে॥
তস্যাচাক্রম্য সংস্থানাদ্বৃহ্মশক্তিরধো

গতা। ম্রিযমানাপি দেবৌঘৈ র্যত্না-
দপি মুহুর্মুহুঃ॥ তত স্তযোস্তু মৃত-
যোঃ শরীরে জগতাং পতিঃ। বৃহ্ম
শক্তিং সমুদ্ধৃত্য ন্যধাত্তস্যাং প্-
যত্নতঃ॥ উদ্ধৃতাযাং পৃথিব্যান্তু ত-
ন্মধ্যে মেদো বিলেপনৈঃ। সুদৃঢা মক-
রোৎ পৃথ্বীং ক্লেদিতাং তোয রাশি-
ভিঃ॥ মেদো বিলেপিতা যস্মাদ্দীয-
তে মেদিনীতি সা। অদ্যাপি পৃথি-
বী দেবী দেব মানুষ রাক্ষসৈঃ॥
ইতিকালিকাপুরাণে ৬১ অধ্যাযঃ॥

মধুকোষঃ পুং মধুমক্ষিকাকৃতকো-
ষঃ। মৌচাক্ ইতি ভাষা। তৎ-
পর্য্যাযঃ। মধুক্রমঃ ২। ইতি শব্দ-
চন্দ্রিকা॥ ছাগমুক্ত ইতি মাংসা
শিনো বদন্তি॥

মধুক্রমঃ পুং পুনঃ২ নর্ম্মধুপানক্রমঃ।
তৎ পর্য্যাযঃ। মধুবারা ২। ইত্য-
মরঃ॥ মধুকোষঃ। ইতি শব্দ-
চন্দ্রিকা॥

মধুখর্জ্জূরিকা স্ত্রী খর্জ্জূরবিশেষঃ।
তৎ পর্য্যাযঃ। মধুকর্কটিকা ২ কো-
...টিকা ৩ কণ্টকিনী ৪ মধুফ-
লিকা ... ভূ... ৬ মধুরখর্জ্জুরী
৭ ...॥ পিঙ্গল... অস্যা গুণাঃ।
মধুরত্বং। বৃষ্যত্বং। সন্তাপ পিত্ত-
শান্তি কারিত্বং। শিশিরত্বং। জক্ষ-

কর্ত্তৃত্বং। বহুবীর্য্য বিবর্দ্ধনত্বঞ্চ ইতি রাজনির্ঘণ্টঃ॥

মধুগায়নঃ পুং কোকিলঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুগুঞ্জনঃ পুং শোভাঞ্জনবৃক্ষঃ। ইতি শব্দমালা॥

মধুঘোষঃ পুং কোকিলঃ। ইতি শব্দমালা॥

মধুচ্ছদা স্ত্রী ময়ূরশিখা। ইতি ভাবপ্রকাশঃ॥

মধুজং ক্লী শিক্থকং। ইতি রাজনির্ঘণ্টঃ॥

মধুজম্বীরঃ পুং মধুরজম্বীরঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুজা স্ত্রী পৃথিবী। ইতি শব্দচন্দ্রিকা॥ সিতা। তৎপর্য্যায়ঃ। মহাশ্বেতা২ ইতিত্রিকাণ্ডশেষঃ॥

মধুজিৎ পুং বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥

মধুতৃণং ক্লী ইক্ষুঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মধুতৃণঃ পুং ইক্ষুঃ। ইতি রাজনির্ঘণ্টঃ

মধুত্রয়ং ক্লী মধুরত্রয়ং। ইতি রাজনির্ঘণ্টঃ॥

মধুদীপঃ পুং কামদেবঃ। ইতি হেমচন্দ্রঃ॥

মধুদূতঃ পুং আম্রবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মধুদ্রুমঃ পুং রক্তশিগ্রুঃ। ইতি শব্দরত্নাবলী॥

মধুদ্রুমঃ পুং বৃক্ষবিশেষঃ। মৌলগাছ ইতি ভাষা। তৎপর্য্যায়ঃ। মধূকঃ ২ গুড়পুষ্পঃ ৩। ইত্যমরঃ॥

মধুধাতুঃ পুং মাক্ষিকং। ইতি রাজনির্ঘণ্টঃ॥

মধুধূলিঃ স্ত্রী খণ্ডঃ। খাঁড় ইতি ভাষা। ইতি হেমচন্দ্রঃ॥

মধুধেনুঃ স্ত্রী দানার্থমধ্বাদিনির্ম্মিত সবৎসাগৌঃ। যথা। হোতোবাচ। মধুধেনুং প্রবক্ষ্যামি সর্ব্বপাতকনাশিনীং। অনুলিপ্তে মহীপৃষ্ঠে কৃষ্ণাজিন কুশোত্তরে॥ ধেনুং মধুময়ীং কৃত্বা সংপূর্ণাং ঘটষোড়শীং। চতুর্থেন তথাংশেন বৎসকং পরিকল্পয়েৎ॥ সৌবর্ণন্তু মুখং কৃত্বা শৃঙ্গাণ্যগুরু চন্দনৈঃ। পৃষ্ঠং তাম্রময়ং কৃত্বা সাস্নাং পট্টময়ীং তথা॥ পদানিক্ষুময়ান্ কৃত্বা সিতকম্বল কম্বলাং। মুখং গুড়ময়ং কৃত্বা জিহ্বাং শর্করয়া তথা॥ ওষ্ঠৌ পুষ্পময়ৌ

তস্য। দত্তাঃ কলনযাঃ স্মৃতাঃ। দ-
র্ভরোমধরা দেবী রৌপ্যক্ষুর বিভূ
ষিতা॥ প্রশস্তপত্রশ্রবণা প্রমাণাৎ॥
পরিত স্তনং। সর্ব লক্ষণ সংযুক্তা
সপ্তধান্যান্বিতা তথা॥ চত্বারি তি
লপাত্রাণি চতুর্দ্দিক্ষ্বপি স্থাপয়েৎ।
ছাদিতাং বস্ত্রযুগ্মেন ঘণ্টাভরণভূ
ষিতাং॥ কাংস্যোপদোহনাং শুভ্রাং
গন্ধপুষ্পৈস্তু ধূপিতাং। অযনে বি
ষুবে পুণ্যে ব্যতীপাতে দিনক্ষযে॥
সংক্রান্ত্যা মুপরাগে চ সর্বকালং য
দৃচ্ছয়া। দ্রব্য ব্রাহ্মণ সম্পত্তিং দৃষ্ট্বা
তাস্তু প্রদাপয়েৎ॥ ব্রাহ্মণায দরি
দ্রায শ্রোত্রিয়াযাহিতাগ্নয়ে। আর্য্যা
বর্ত্তে সমুৎপন্নে বেদ বেদাঙ্গ পার
গে॥ তাদৃশায় প্রদাতব্যা মধুধেনু
র্নরোত্তম। পূর্ব্বদেশে। নবিষ্টস্তু গন্ধ
ধূপাদি পূজিতং॥ আচ্ছাদ্য বস্ত্রযু
গ্মেন মুদ্রিকা কর্ণপত্রকৈঃ। স্বশক্ত্যা
দক্ষিণাং দত্ত্বা বিত্তশাঠ্য বিবর্জ্জিতঃ
॥ জলপূর্ব্বন্তু কর্ত্তব্যং পশ্চাদ্দানং স
মর্পযেৎ। রসজ্ঞা সর্ব দেবানাং সর্ব
ভূত হিতে রতা॥ প্রীযন্তাং পিতৃ
দেবাশ্চ মধুধেনো নমোস্তুতে। এব
মুচ্চার্য্য তাং ধেনুং ব্রাহ্মণায নিবে
দযেৎ॥ অহং গৃহ্নামি ত্বাং দেবি
কুটুম্বার্থে বিশেষতঃ। কামং কাম

দুঘে কামাং মধুধেনো নমোহস্তুতে॥
মধুবাতেতি মন্ত্রেণ দদ্যাদাশু ত্রিকে
ণতু। দত্ত্বা ধেনুং মহারাজ ছত্রকো-
পানহৌ তথা॥ এবং যঃ কুরুতে ভ-
ক্ত্যা মধুধেনুং নরাধিপ। দত্ত্বা দানং
পাযসেন মধুনা চ দিনং নযেৎ॥
ব্রাহ্মণোহপি ত্রিরাত্রন্তু মধুপাযস
সংযুতং। এবং কৃতে তু যৎপুণ্যং
তন্মিবোধ নরাধিপ॥ যত্র নদ্যো
মধুবহা যত্র পাযস কর্দ্দমাঃ। ঋষ-
যো মুনযঃ সিদ্ধা স্তত্র গচ্ছন্তি ধেনুদাঃ
॥ তত্র ভোগানথো ভুক্ত্বা ব্রহ্মলোকে
স তিষ্ঠতি। ক্রীড়িত্বা সুচিরং কালং
পুন র্মর্ত্য মুপাগতঃ। স ভুক্ত্বা বি-
পুলান্ ভোগান্ বিষ্ণুলোকং স গ-
চ্ছতি॥ দশপূর্বান্ দশপরানাত্মা-
নঞ্চৈক বিংশতিং। নযতে বিষ্ণুসা-
যুজ্যং মধুধেনু প্রসাদতঃ॥ য ইদং
শৃণুযা ভক্ত্যা শ্রাবযেদ্বাপি মানবঃ
। সর্বপাপ বিনির্মুক্তো বিষ্ণুলো-
কংস গচ্ছতি॥ ইত্যাদি বরাহ পু-
রাণে শ্বেতোপাখ্যানে মধুধেন
মাহাত্ম্যং॥

মধুনারিকেরক, পুং মধুনারিকেলঃ।
এরনারিকেল ইতি কোঙ্কণ প্রসি
দ্ধঃ। মোহানারল ইতিচ খ্যাতঃ।
তৎপর্য্যাযঃ। মাক্ষীকফলঃ ২ মধু-

ফলঃ ৩ অসিতজফলঃ ৪ মাক্ষিক ফলঃ ৫ মৃদুফলঃ ৬ বহুকূর্চঃ ৭ হ্রস্ব ফলঃ ৮। অস্য গুণাঃ। মধুরত্বং। শিশিরত্বং। দাহ তৃষ্ণার্ত্তি পিত্ত হারিত্বং। বল পুষ্টি শ্রেষ্ঠকান্তি কারিত্বং। বীর্য্য বিবর্দ্ধনত্বং। রুচ্যত্বঞ্চ॥ অপিচ। মাধ্বীকং নারিকেরং ফলমতি মধুরং দুর্জরং জন্তুকারি স্নিগ্ধং বাতাতিসার ভ্রম শমন মথ ধ্বংসনং বহ্নিদীপ্তেঃ। আম শ্লেষ্ম প্রকোপং জনয়তি জরুতে চারুকান্তিং বলঞ্চ স্থৈর্য্যং দেহস্য ধত্তে ঘন মদন কলা বর্দ্ধনং পিত্তনাশং॥ ইতি রাজনির্ঘণ্টঃ॥

মধুনী স্ত্রী ক্ষুপাবিশেষঃ। নাকডহাতা ইতি মাকড়চাউলী ইতি চ ভাষা। তৎপর্য্যায়ঃ। ঘৃতমণ্ডা ২ বায়সোলী ৩ স্বাঙ্গুলা ৪। ইতি রত্নমালা॥

মধুনেতা পুং ভ্রমরঃ। ইতি শব্দচন্দ্রিকা॥

মধুপঃ পুং ভ্রমরঃ। ইত্যমরঃ॥

মধুপর্কং ক্লী দধিসংযুক্তমধু। তৎপর্য্যায়ঃ। মহোদয়ঃ ২। ইতি হেমচন্দ্রঃ॥ অপিচ। মধুপর্কং দধি মধু ঘৃত মপিহিতং কাংস্যেনেতি। অপিহিত মাচ্ছাদিতং। ইত্যেকাদশীতত্ত্বে কাত্যায়নসূত্রং॥

মধুপর্কঃ পুং ষোড়শোপচারপূজান্তর্গত ষষ্ঠোপচারঃ। তৎপ্রমাণং যথা। দধি সর্পি র্জলং ক্ষৌদ্রং সিতৈত আভিস্তু পঞ্চভিঃ। প্রোচ্যতে মধুপর্কস্তু সর্ব্বদেবৌঘ তুষ্টয়ে॥ অশক্তস্তু সর্ব্বতঃ স্বল্পং সিতা দধি ঘৃতং স্মৃতং। সর্ব্বেষা মধিকং ক্ষৌদ্রং মধুপর্কে প্রযোজয়েৎ॥ তদদ্যাৎ কাংস্যপাত্রেণ রৌপ্য শ্বেত ভবেন বা। জ্যোতিষ্টোমাশ্বমেধাদৌ পূর্ব্বে চেষ্টে প্রপূজনে॥ মধুপর্কঃ প্রতিষ্ঠো হয়ং সর্ব্বদেবৌঘ তুষ্টিদঃ। ধর্ম্মার্থ কাম মোক্ষাণাং সাধকঃ পরিকীর্ত্তিতঃ॥ মধুপর্কঃ সৌখ্যভোগ্য তুষ্টি পুষ্টি প্রদায়কঃ। ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ॥ *॥ অপিচ। আজ্যং দধি মধুমিশ্রং মধুপর্কং বিদু র্বুধাঃ। ইতি তন্ত্রসারঃ॥ *॥ তদ্দানে মুদ্রা যথা। সংযুক্তানামিকাঙ্গুষ্ঠা তিস্রো হন্যাঃ সংপ্রসারিতাঃ। মধুপর্কে চ সা মুদ্রা বিদ্বদ্ভিঃ পরিকীর্ত্তিতা॥ ইতি হরিভক্তিবিলাসঃ॥

মধুপর্ণিকা স্ত্রী গম্ভারী॥ নীলীবৃক্ষঃ। ইত্যমরঃ॥ বরাহক্রান্তা॥ ইতি শব্দচন্দ্রিকা॥ গুড়ূচী॥

সুদর্শনা। ইতি রাজনির্ঘণ্টঃ ॥

মধুপর্ণী স্ত্রী গুড়ূচী। ইত্যমরঃ ॥ গম্ভারীবৃক্ষঃ ॥ নীলীবৃক্ষঃ। ইতি মেদিনী ॥ মধুবীজপূরঃ। ইতি রাজনির্ঘণ্টঃ ॥

মধুপাকা স্ত্রী ষড়ভুজা। ইতি রাজনির্ঘণ্টঃ ॥

মধুপায়ী পুং ভ্রমরঃ। ইত্যমরটীকায়াং রায়মুকুটঃ ॥ মধুপানকর্ত্তরি ত্রি ॥

মধুপালিকা স্ত্রী গম্ভারী। ইতি শব্দমালা ॥

মধুপীলুঃ পুং মহাপীলুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মধুপুরী স্ত্রী মথুরা। ইতি শব্দরত্নাবলী ॥

মধুপুষ্পঃ পুং মধুদ্রুমঃ। ইতি রত্নমালা ॥ শিরীষবৃক্ষঃ ॥ অশোকবৃক্ষঃ ॥ বঙ্গলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মধুপুষ্পা স্ত্রী দন্তীবৃক্ষঃ ॥ নাগদন্তীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মধুপ্রিয়ঃ পুং বলরামঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ ভূমিজম্বুঃ। যথা। নাদেয়ী স্ত্রী নাগরঙ্গ স্তুরঙ্গগন্ধো মধুপ্রিয়ঃ। ইতি জটাধরঃ ॥

মধুফলঃ পুং মধুনারিকেলঃ। ইতি রাজনির্ঘণ্টঃ ॥ বিকঙ্কতবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

মধুফলিকা স্ত্রী মধুখর্জ্জুরিকা। ইতি রাজনির্ঘণ্টঃ ॥

মধুবহুলা স্ত্রী বাসন্তীলতা। ইতি রাজনির্ঘণ্টঃ ॥

মধুভিৎ পুং বিষ্ণুঃ। ইতি শব্দরত্নাবলী ॥

মধুমজ্জা পুং আখোটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মধুমতী স্ত্রী কাশ্মরীবৃক্ষঃ ॥ নদীবিশেষঃ। তস্যা জলগুণাঃ। চন্দ্রভাগগুণসামান্যং জলং কিঞ্চ মাধুমত মগ্নিদীপনং। ইতি রাজনির্ঘণ্টঃ ॥ উপাস্যনায়িকাবিশেষঃ। যথা। তথা মধুমতী সিদ্ধি র্জায়তে নাত্র সংশয়ঃ। দেবচেটী শত শতং তস্য বশ্যা ভবন্তিহি ॥ স্বর্গে মর্ত্যে চ পাতালে স যত্র গন্তু মিচ্ছতি। তত্রৈব চেটিকাঃ সর্ব্বা নয়ন্তি নাত্র সংশয়ঃ। ইতি কৃকলাসদীপিকায়াং ৩ পটলঃ ॥

মধুমথনঃ পুং বিষ্ণুঃ। ইতি হলায়ুধঃ ॥

মধুমল্লী স্ত্রী মালতী। ইতি শব্দমালা ॥

মধুমস্তকং ক্লী পিষ্টকবিশেষঃ। যথা।

। মধু তৈল ঘৃতে মধ্যে বেষ্টিতাঃ সমিতাশ্চ যাঃ। মধুমস্তক মুদ্দিষ্টং তস্যাখ্যা পরিমার্জনং॥ ইতি শব্দচন্দ্রিকা॥ অস্য গুণাঃ পিষ্টশব্দে দ্রষ্টব্যাঃ॥

মধুমক্ষিকা স্ত্রী কীটবিশেষঃ। মৌমাছী ইতি ভাষা। তৎপর্য্যায়ঃ। সরঘা ২। ইত্যমরঃ॥

মধুমাধ্বীকং ক্লী মদ্যং। ইত্যমরটীকায়াং ভরতঃ॥

মধুমারকঃ পুং ভ্রমরঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুমূলং ক্লী আলুকং। মৌআলু। ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

মধুযষ্টিঃ স্ত্রী ইক্ষুঃ। ইতি শব্দচন্দ্রিকা॥

মধুযষ্টিকা স্ত্রী যষ্টিমধু। তৎপর্য্যায়ঃ। মধুকং ২ ক্লীতকং ৩ যষ্টিমধুকা ৪। ইত্যমরঃ॥ মধুযষ্টী ৫। ইতি ভরতঃ॥

মধুযষ্টী স্ত্রী মধুযষ্টিকা। ইতি শব্দমালা॥

মধুরং ক্লী বঙ্গং। ইতি রাজনির্ঘণ্টঃ॥ বিষং। ইতি মেদিনী॥

মধুরঃ পুং মিষ্টরসঃ। সচ ইক্ষ্বাদৌ লক্ষ্যতে। ইত্যমরঃ। তৎপর্য্যায়ঃ। গৌল্যঃ ২। ইতি রাজনির্ঘণ্টঃ॥ রসজ্যেষ্ঠঃ ৩ গুল্যঃ ৪ স্বাদুঃ ৫ মধুলকঃ ৬। ইতি হেমচন্দ্রঃ॥ তস্য গুণাঃ। প্রীণনত্বং। সর্ব্বত্বং। বৃংহণত্বং। বায়ু পিত্ত নাশিত্বং। রসায়নত্বং। গুরুত্বং। স্নিগ্ধত্বং। চক্ষুষ্যত্ব তর্পণত্বং। সরত্বঞ্চ॥ অন্যচ্চ। রসো মধুরকঃ শীতো ধাতু স্তন্য বল প্রদঃ। চক্ষুষ্যো বাত পিত্তঘ্নঃ স্থৈর্য্যাৎ স্থৌল্য কফ ক্রমীন্॥ সোতিযুক্তো জ্বর শ্বাস গল গণ্ডাদি রোগ কৃৎ। ইতি রাজবল্লভঃ॥ অপিচ। মধুরস্তু রস শ্চিনোতি কেশান্ বপুষঃ স্থৈর্য্য বলোজ বীর্য্যদায়ী। অতিসেবনতঃ প্রমেহ শৈত্য জড়তা মান্দ্য মুখান্ করোতি দোষান্॥ ইতি রাজনির্ঘণ্টঃ॥ জীবকঃ॥ রক্তশিগ্রুঃ॥ রাজাম্রঃ॥ রক্তেক্ষুঃ॥ গুড়ঃ॥ শালিঃ। ইতিচ রাজনির্ঘণ্টঃ॥

মধুরঃ ত্রি মধুররসবিশিষ্টঃ। স্বাদুঃ॥ প্রিয়ঃ। ইতি মেদিনী॥ পারিভাষিক মধুরাণি যথা। বিদগ্ধোক্তিঃ। প্রিয়াধর ক্ষৌদ্রাদিঃ। শশী। স্ত্রিবঃ॥ বাল্যোক্তিঃ। ইতি কবিকল্পলতা॥

মধুরকঃ পুং জীবকবৃক্ষঃ। ইত্যমরঃ॥

মধুরকণ্টকঃ স্ত্রী মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। কজ্জলী ২ কজ্জলা ৩

অনন্তা ৪ মাধ্বী ৫। ইতি শব্দরত্না-বলী॥

মধুরজম্বীরঃ পুং মধুজম্বীরঃ। তৎপর্য্যায়ঃ। মধুজম্ভঃ ২ মধুজম্ভলঃ ৩ রসদ্রাবী ৪ শর্করকঃ ৫ পিত্তদ্রাবী ৬। অস্য গুণাঃ॥ মধুরত্বং। শিশিরত্বং। কফপিত্তশোফশূলনাশিত্বং। তর্পণত্বং। বৃষ্যত্বং। পুষ্টিকারকত্বঞ্চ॥ ইতি রাজনির্ঘণ্টঃ॥

মধুরত্বচঃ পুং ধববৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মধুরত্রয়ং ক্লী সিতামাক্ষিকং সর্পিশ্চ। ইতি রাজনির্ঘণ্টঃ॥

মধুরত্রিফলা স্ত্রী দ্রাক্ষাফলং কাশ্মর্য্যফলং খর্জ্জুরীফলঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মধুরনিস্বনা স্ত্রী মধুরস্বরযুক্তানারী। ইতি ত্রিকাণ্ডশেষঃ॥

মধুরফলঃ পুং রাজবদরঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুরবল্লী স্ত্রী মধুবীজপুরঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুরসঃ পুং ইক্ষুঃ। ইতি শব্দমালা॥ তালঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুরসা স্ত্রী মূর্ব্বা। ইত্যমরঃ॥ দ্রাক্ষা॥ দুগ্ধিকা। ইতি মেদিনী॥ গম্ভারী। ইতি ভাবপ্রকাশঃ॥

মধুরস্রবা স্ত্রী পিণ্ডখর্জ্জুরী। ইতি রাজনির্ঘণ্টঃ॥

মধুরা স্ত্রী শতপুষ্পা॥ মিশ্রেয়া॥ মথুরানগরী॥ মধুকর্কটিকা॥ মেদা॥ মধূলী। মধুযষ্টিকা। ইতি মেদিনী॥ কাকোলী॥ শতাবরী॥ বৃহজ্জীবন্তী॥ পালক্যশাকং। ইতি রাজনির্ঘণ্টঃ॥

মধুরাম্রকঃ পুং আম্রাতকঃ। ইতি শব্দচন্দ্রিকা॥

মধুরাম্লফলঃ পুং রেফলঃ। তৎপর্য্যায়ঃ। আরঃ ২। ইতি রত্নমালা॥

মধুরালাপা স্ত্রী শারিকা। ইতি রাজনির্ঘণ্টঃ॥

মধুরালাবুনী স্ত্রী রাজালাবুঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুরিকা স্ত্রী ক্ষুপবিশেষঃ। মৌরী ইতি ভাষা। তৎপর্য্যায়ঃ। শালেয়ঃ ২ শীতশিবঃ ৩ ছত্রা ৪ নিশা ৫ মিশ্রেয়া ৬। ইত্যমরঃ॥ সালেয়ঃ ৭ মিসিঃ ৮ মিসী ৯ মিশিঃ ১০। ইতি তট্টীকা॥ অবাক্‌পুষ্পী ১১ মঙ্গল্যা ১২ মধুরা ১৩। ইতি রত্নমালা॥ মধুরী ১৪। ইতি শব্দরত্নাবলী॥ অস্যা গুণাঃ। রোচকত্বং। শুক্রকারিত্বং। দাহরক্তপিত্তনাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

মধুরিপুঃ পুং বিষ্ণুঃ। ইত্যমরঃ॥

মধুরেণুঃ পুং কটভীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুরোদকঃ পুং জলসমুদ্রঃ॥ সতু স্বাদূদকময়ঃ পুষ্করদ্বীপবেষ্টিতঃ সপ্তসমুদ্রাণাং শেষসমুদ্রঃ। ইতি জটাধরঃ॥

মধুলং ক্লী মদ্যং। ইতি শব্দচন্দ্রিকা॥

মধুলগ্নঃ পুং রক্তশোভাঞ্জনঃ। ইতি রত্নমালা॥

মধুলতা স্ত্রী শূলীতৃণং। ইতি রাজনির্ঘণ্টঃ॥

মধুলিকা স্ত্রী রাজিকা। ইতি রাজনির্ঘণ্টঃ॥

মধুলিট্ পুং ভ্রমরঃ। ইত্যমরঃ॥

মধুলেহী পুং ভ্রমরঃ। ইতি শব্দরত্নাবলী॥

মধুলোলুপঃ পুং ভ্রমরঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুবনং ক্লী মথুরায়াং বনবিশেষঃ যথা। তদ্ভাত গচ্ছ ভদ্রং তে যমুনায়াস্তটং শুচি। পুণ্যং মধুবনং যত্র সান্নিধ্যং নিত্যদা হরেঃ॥ ইতি শ্রীভাগবতে ৪ স্কন্ধে ৮ অধ্যায়ঃ॥ কিষ্কিন্ধায়াং সুগ্রীবস্য বনবিশেষঃ। ইতি রামায়ণে কিষ্কিন্ধাকাণ্ডং॥

মধুবনঃ পুং কোকিলঃ। ইতি শব্দচন্দ্রিকা॥

মধুবল্লী স্ত্রী যষ্টীমধু॥ ক্লীতনকং। ইতি রাজনির্ঘণ্টঃ॥

মধুবারঃ পুং মধুক্রমঃ। ইত্যমরঃ॥ মুহু পুনঃ পুনর্মদ্যপান পরিপাটী। ইতি ভট্টীকায়াং ভরতঃ॥

মধুবীজঃ পুং দাড়িমঃ। ইতি রাজনির্ঘণ্টঃ॥

মধুবীজপূরঃ পুং মধুকর্কটিকা। মীঠা বিজৌরা ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। মধুপর্ণী ২ মধুরকর্কটী ৩ মধুরবল্লী ৪ মধুকর্কটী ৫ মধুরফলা ৬ মহাফলা ৭ বর্দ্ধমানা ৮। অস্য গুণাঃ। মধুরত্বং। শিশিরত্বং। দাহনাশিত্বং। ত্রিদোষশমনত্বং। রুচ্যত্বং। পথ্যত্বং। গুরুত্বং। দুর্জরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মধুব্রতঃ পুং ভ্রমরঃ। ইত্যমরঃ॥

মধুশর্করা স্ত্রী মধুজাতশর্করা। সিতাখণ্ড ইতি ভাষা। যথা। মাধ্বী সিতা মধূৎপন্না মধুজা মধুশর্করা। মাক্ষীকশর্করা চৈষা ক্ষৌদ্রজা ক্ষৌদ্রশর্করা॥ যদ্গুণং যন্মধু প্রোক্তং তদ্গুণা তস্য শর্করা। বিশেষাদ্বলবৃষ্যা চ তর্পণং ক্ষীণদেহিনাং॥ ইতি রাজনির্ঘণ্টঃ॥

মধুশাখঃ পুং মধুষ্ঠীলঃ। ইতি

শব্দচন্দ্রিকা ॥

মধুশিগ্রুঃ পুং রক্তশোভাঞ্জনবৃক্ষঃ । ইত্যমরঃ ॥

মধুশেষং ক্লী সিক্থকং । ইতি রাজনির্ঘণ্টঃ ॥

মধুশ্রেণী স্ত্রী মূর্ব্বা । ইত্যমরঃ ॥

মধুশ্বাসা স্ত্রী জীবন্তীবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

মধুষ্ঠীলঃ পুং মধূকবৃক্ষঃ । ইত্যমরঃ ॥

মধুসখঃ পুং কামদেবঃ । ইতি হলায়ুধঃ ॥

মধুসারথিঃ পুং কামদেবঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মধুসিক্থকঃ পুং স্থাবরবিষভেদঃ । ইতি হেমচন্দ্রঃ ॥

মধুসুহৃৎ পুং কামদেবঃ । ইতি কেচিৎ ॥

মধুসূদনঃ পুং ভ্রমরঃ । ইতি জটাধরঃ ॥ শ্রীকৃষ্ণঃ । ইত্যমরটীকায়াং ভরতঃ ॥ তস্য ব্যুৎপত্তি র্যথা । সূদনং মধুদৈত্যস্য যস্মাৎ স মধুসূদনঃ । ইতি সন্তো বদন্তীশং বৈদৈভিন্নার্থ নীপ্সিতং ॥ মধু ক্লীবঞ্চ মাধ্বীকে কৃতকর্ম্ম শুভাশুভে । ভক্তানাং কর্ম্মণাঞ্চৈব সূদনং মধুসূদনঃ ॥ পরিনামাশুভং কর্ম্ম ভ্রান্তানাং মধুরং মধু । করোতি সদনং যো হি স এব মধুসূদনঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১০ অধ্যায়ঃ ॥ তস্য স্মরণ ফলং । মহাবিপত্তৌ সংসারে যঃ স্মরেন্মধুসূদনং । বিপত্তৌ তস্য সম্পত্তি র্ভবেদিত্যাহ শঙ্কর ॥ তত্রৈব প্রকৃতিখণ্ডে ৩৪ অধ্যায়ঃ ॥

মধুসূদনী স্ত্রী পালঙ্কীশাকং । ইতি হেমচন্দ্রঃ ॥

মধুস্রবঃ পুং মধূকবৃক্ষঃ ॥ মোরটলতা । ইতি রাজনির্ঘণ্টঃ ॥

মধুস্রবা স্ত্রী মধুযষ্টিকা । ইতি জটাধরঃ ॥ জীবন্তী । ইতি শব্দচন্দ্রিকা ॥ মূর্ব্বা ॥ হংসপদী । ইতি রাজনির্ঘণ্টঃ ॥

মধুস্রবাঃ পুং মধুবৃক্ষঃ । ইতি জটাধরঃ ॥

মধুস্বরঃ পুং কোকিলঃ । ইতি শব্দরত্নাবলী ॥

মধুহা পুং বিষ্ণুঃ । ইতি হেমচন্দ্রঃ ॥

মধুক্ষীরঃ পুং খর্জ্জুরবৃক্ষঃ । ইতি হারাবলী ॥

মধূকং ক্লী যষ্টীমধু । ইতি রাজনির্ঘণ্টঃ ॥

মধূকঃ পুং বৃক্ষবিশেষঃ । মহুল ইতি মৌল ইতি মহুয়া ইতিচ ভাষা । তৎপর্য্যায়ঃ । গুড়পুষ্পঃ ২ মধুদ্রুমঃ ৩ বানপ্রস্থঃ ৪ মধুষ্ঠীলঃ ৫

। ইত্যমরঃ ॥ মধুকঃ ৬ মধুঃ ৭ মধু পুষ্পঃ ৮ । ইতি শব্দরত্নাবলী ॥ মধুস্রবঃ ৯ । ইতি জটাধরঃ ॥ মধুবৃক্ষঃ ১০ রোধপুষ্পঃ ১১ মাধবঃ ১২ । অস্য গুণাঃ । মধুরত্বং । শীতত্বং । পিত্ত দাহ শ্রমাপহত্বং । বাতলত্বং । জন্তুদোষঘ্নত্বং । বীর্য্য পুষ্টি বিবর্দ্ধনত্বঞ্চ ॥ অস্য পুষ্পগুণাঃ । মধুরত্বং । বৃষ্যত্বং । হৃদ্যত্বং । হিমত্বং । পিত্ত বিদাহ কারিত্বঞ্চ ॥ অস্য ফলগুণাঃ । বাতাময পিত্ত নাশিত্বং ॥ জ্ঞেযং মধূকদ্বয মেব মেতৎ । ইতি রাজনির্ঘণ্টঃ ॥ ॥ অপিচ । মধূকপুষ্পং মধুরং শীতলং গুরু বৃংহণং । বল শুক্র করং প্রোক্তং বাত পিত্ত বিনাশনং । ফলং শীতং গুরু স্বাদু শুক্রলং বাত পিত্তনুৎ । অহৃদ্যং হন্তি তৃষ্ণাস্র দাহ শ্বাস ক্ষত ক্ষযান্ ॥ ইতি ভাবপ্রকাশঃ ॥ ॥ অপরঞ্চ । মধূক পুষ্পঞ্চাহৃদ্যং তর্পণং বৃংহণং পরং । মধূকস্য ফলং পক্বং বাত পিত্ত প্রণাশনং ॥ তন্মজ্জ গুণাস্তৎফল গুণবৎ । যথা । যস্য যস্য ফলস্যেব বীর্য্যং ভবতি যাদৃশং । তস্য তস্যৈব বীর্য্যেণ মজ্জানমপি নির্দ্দিশেৎ ॥ তস্য গুণাঃ । মধূক মজ্জ ... রো

পণং । ইতি রাজবল্লভঃ ॥

মধূচ্ছিষ্টং ক্লী মধ্ববশিষ্টং । মোম ইতি ভাষা । তৎপর্য্যাযঃ । সিক্থকং ২ । ইত্যমরঃ ॥ শিক্থকং ৩ শিক্থং ৪ । ইতি শব্দরত্নাবলী ॥

মধূত্থিতং ক্লী সিক্থকং । ইতি রাজনির্ঘণ্টঃ ॥

মধূৎসবঃ পুং চৈত্রীপূর্ণিমা । ইতি জটাধরঃ ॥

মধূপঘ্নং ক্লী মথুরা । ইতি হেমচন্দ্রঃ

মধূপঘ্নঃ পুং মথুরা । ইতি জটাধরঃ

মধূলঃ পুং জলজ গিরিজ মধূকবৃক্ষৌ । ইতি জটাধরঃ ॥

মধূলকঃ পুং জলজমধূকবৃক্ষঃ । তৎপর্য্যাযঃ । দীর্ঘপত্রকঃ ২ । ইতি জটাধরঃ ॥ গৌরশাকঃ ৩ মধূলঃ ৪ স্বল্পপত্রকঃ ৫ । ইতি রত্নমালা ॥ স্যাম্মধূকে তু জলজে গিরিজেঽপি মধূলকঃ । ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ । মধূক গুণ তুল্যাঃ ॥ মধুররসঃ । ইতি হেমচন্দ্রঃ ॥ তদ্বতি ত্রি ॥

মধূলিকা স্ত্রী মূর্ব্বা । ইত্যমরঃ ॥

মধূলী স্ত্রী ক্লীতনকং ॥ মধুকর্কটী ॥ আম্রঃ । ইতি রাজনির্ঘণ্টঃ ॥

মধ্যং ক্লী দশান্ত্যসংখ্যা । শতসাগর সংখ্যা । ইতি হেমচন্দ্রঃ ॥ অবসানং

। তৎপর্য্যায়ঃ। বিরাম্নঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ মন্দত্ব শীঘ্রত্বো-ভয়েতরত্ব যুক্ত নৃত্য বিষয়ক গমন বিশেষঃ। ইতি ভরতঃ॥ লয়বিশেষঃ। ইতি মধুঃ॥ মধ্যমাবৃত্তিঃ। ইতি সাঞ্জঃ॥ যথা। বিলম্বিতং দ্রুতং মধ্যং তত্ত্বমোঘো ঘনং ক্রমাৎ। ইত্যমরঃ॥

মধ্যঃ পুং ক্লী দেহমধ্যভাগঃ। মাজা ইতি ভাষা। তৎপর্য্যায়ঃ। মধ্যমং ২ অবলগ্নং ৩। ইত্যমরঃ॥ বিলগ্নং ৪। ইতি মেদিনী॥

মধ্যঃ পুং-গ্রহস্ফুটসাধকাঙ্কবিশেষঃ। স চ অহর্গণজাতদেশান্তরাদি সংস্কার রহিতাঙ্করূপগ্রহঃ। ইতি জ্যোতিষং॥

মধ্যঃ ত্রি ন্যায্যঃ॥ অন্তরঃ॥ অধমঃ। ইতি শব্দরত্নাবলী॥ মধ্যমঃ। যথা। উত্তমাধম মধ্যানি বুদ্ধা কার্য্যাণি পার্থিবঃ। উত্তমাধম মধ্যেষু পুরুষেষু নিয়োজয়েৎ॥ ইতি মাৎস্যে ৮৯ অধ্যায়ঃ॥

মধ্যগন্ধঃ পুং আম্রবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মধ্যতঃ ব্য মধ্যাৎ॥ মধ্যে। ইতি সিদ্ধান্তকৌমুদী॥ স্যাদেঃ স্থানে তসাদয়ো যে আদেশাস্তেষাং মধ্যতস্ত্ব মধ্যতস্ত্ব মিতি প্রাঞ্চঃ। তেন স্বতঃ স্বতঃ আগতং কৌতস্কুতং। ইত্যত্রাব্যয়ত্বাৎটি লোপঃ। ইতি দুর্গাদাসঃ॥

মধ্যদেশঃ পুং দেশবিশেষঃ। তৎপর্য্যায়ঃ। মধ্যমঃ ২। ইত্যমরঃ॥ তস্য সীমা যথা। হিমবদ্বিন্ধ্যয়ো র্মধ্যং যঃ প্রাগ্বিনশনাদপি। প্রত্যগেব প্রযাগাচ্চ মধ্যদেশঃ প্রকীর্ত্তিতঃ॥ ইতি মনুস্মৃতিঃ॥ বিনশনং তীর্থভেদঃ। মধ্যাযতি স্মরতীতি কেসতি মধ্যো দকারবানিতি সাঞ্জে॥ মনো ধশেতি য প্রত্যযে নস্য ধেসতি চতুর্থমাত্রবানিতি রূপরত্নাকরঃ। ইতি তট্টীকাযাং ভরতঃ॥

মধ্যদেশ্যঃ ত্রি মধ্যদেশোদ্ভবঃ। যথা। শকাশ্চৈব সংসসকা মধ্যদেশ্যা জনাস্ত্বিমে। ইতি বামনপুরাণে ১৩ অধ্যায়ঃ॥

মধ্যন্দিনঃ পুং বন্ধূকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মধ্যপঞ্চমূলকং ক্লী পঞ্চমূলপাচনবিশেষঃ। যথা। বলা পুনর্নবৈরণ্ড সূর্পপর্ণী দ্বয়েন তু। একত্র যোজিতৈরেব স্যান্মধ্যং পঞ্চমূলকং॥ ইতি রাজনির্ঘণ্টঃ॥

মধ্যম° স্ত্রী পুং দেহমধ্যভাগঃ। ইত্যমরঃ॥

মধ্যমঃ পুং সপ্তস্বরাণাং মধ্যে পঞ্চম স্বরঃ। ইত্যমরঃ॥ গানশাস্ত্রমতে চতুর্থ স্বরঃ। সতু ক্রৌঞ্চস্বরতুল্যঃ। অস্যোচ্চারণ স্থানং বক্ষঃ ব্যাকরণ মতে অধরঃ। অস্য বিপ্রবর্ণঃ। অস্য সংজ্ঞা অন্তরঃ। অর্থাৎ চতুঃ স্বর মিলিতঃ। তস্য তানা শ্চতুর্বিংশতিঃ তেষাং প্রত্যেকং দ্বাত্রিংশদ্ভেদেন ৭৬৮ তানা ভবন্তি। ইতি সংগীতশাস্ত্রং॥ উপপতিভেদঃ। তস্য লক্ষণং। প্রিয়ায়াঃ প্রকোপে যঃ প্রকোপ মনুরাগং বা ন প্রকটয়তি চেষ্টয়া মনোভাবং গৃহ্লাতি স মধ্যমঃ। যথা। আস্যং যদ্যপি হাস্য বর্জ্জিতমিদং লাস্যেন হীনং বচো নেত্রে শোণ সরোজকান্তি রুচিরে ক্বাপি ক্ষণং স্থীয়তে। মালায়াঃ করণোদ্যমে মকরিকারম্ভঃ স্তচাস্তোজযো ধূপঃ দ্রস্তল ধোরণীষু সুতনোঃ সাযন্তনো দৃশ্যতে॥ ইতি রসমঞ্জরী॥ মধ্যদেশঃ। ইত্যমরঃ॥ গ্রহাণাং সাময়িক সংজ্ঞাবিশেষঃ। যথা দ্যুচর চক্রহতো দিন সঞ্চয়ঃ কৃহ হতো ভগণাদি কলং গ্রহঃ। দশশিরঃ পুর মধ্যম ভাস্কর ক্ষিতিজ সন্নিধিগে সতি মধ্যমঃ॥ ইতি সিদ্ধান্তশিরোমণিঃ॥ মৃগভেদঃ॥ রাগভেদঃ। ইতি ধরণিঃ॥

মধ্যমঃ ত্রি মধ্যস্থঃ। ইতি মেদিনী॥ তৎপর্য্যায়ঃ। মাধ্যমং ২ মধ্যমীয়ং ৩ মাধ্যন্দিনং ৪। ইতি হেমচন্দ্রঃ॥

মধ্যমপাণ্ডবঃ পুং অর্জুনঃ। ইতি জটাধরঃ॥

মধ্যমলোকঃ পুং পৃথিবী। ইতি ত্রিকাণ্ডশেষঃ॥

মধ্যমভৃতকঃ পুং কৃষীবলভৃতকঃ। কৃষাণ ইতি ভাষা। যথা। উত্তমশ্চায়ুধীয়ো হত্র মধ্যমস্তু কৃষীবলঃ। অধমো ভারবাহী স্যাদিত্যেষ ত্রিবিধো ভৃতঃ॥ ইতি মিতাক্ষরা॥

মধ্যমসংগ্রহঃ পুং স্ত্রীসংগ্রহণাখ্য বিবাদবিশেষঃ। সতু গন্ধ মাল্য বস্ত্র ভূষাদি প্রেরণরূপঃ। যথা। প্রথম সাহসাদি দণ্ডপ্রাপ্ত্যর্থং ত্রেধা তৎ স্বরূপং ব্যাসেন বিবৃতং। ত্রিবিধং তৎ সমাখ্যাতং প্রথমং মধ্যমোত্তমং। অদেশ কাল ভাষাভি নির্জ্জনে চ পরস্ত্রিয়াঃ॥ কটাক্ষাবেক্ষণং হাস্যং প্রথমং সাহসং

স্মৃতং ॥ প্রেষণং গন্ধ মাল্যানাং ধূপ ভূষণ বাসসাং । প্রলোভনঞ্চান্ন পানৈ র্মধ্যমং সমুদাহৃতং ॥ সহাসনং বিবিক্তেষু পরস্পর মপাশ্রয়ঃ । কেশাকেশি গ্রহশ্চৈব সম্যক্ সংগ্রহণং স্মৃতং ॥ ইতি মিতাক্ষরায়াং স্ত্রীসংগ্রহণপ্রকরণং ॥

মধ্যমসাহসং ক্লী বলদর্পিতেন বাসঃ পাত্রপানাদীনাং ভঙ্গাক্ষেপোপমর্দ্দাদিরূপং সহসা ক্রিয়মাণংকর্ম্ম। যথা। ফল মূলোদকাদীনাং ক্ষেত্রোপকরণস্য চ। ভঙ্গাক্ষেপোপমর্দ্দাদ্যৈঃ প্রথমং সাহসং স্মৃতং ॥ বাসঃপশ্বন্ন পানানাং গৃহোপকরণস্য চ। এতেনৈব প্রকারেণ মধ্যমং সাহসং স্মৃতং ॥ ইতি মিতাক্ষরা ॥

মধ্যমসাহসঃ পুং দণ্ডবিশেষঃ। সতু পঞ্চশতপণ রূপঃ। যথা। পণানাং দ্বেশতে সার্দ্ধে প্রথমঃ সাহসঃ স্মৃতঃ। মধ্যমঃ পঞ্চ বিজ্ঞেয়ঃ সহস্রন্ত্বেব চোত্তমঃ ॥ লোভাৎ সহস্রং দণ্ডন্ত মোহাৎ পূর্বন্ত সাহসং। ভয়াদ্বা মধ্যমৌ দণ্ডৌ মৈত্রাৎ পূর্ব্বং চতুর্গুণং ॥ ইতি মানবে সাক্ষিপ্রকরণে ৮ অধ্যায়ঃ ॥

মধ্যমা স্ত্রী দৃষ্টরজস্কানারী ॥ কর্ণিকা ॥ অঙ্গুলিভেদঃ ॥ ত্র্যক্ষরছন্দঃ। ইতি মেদিনী ॥ হৃদয়োত্থিতবুদ্ধিযুত নাদরূপবর্ণঃ। যথা। পশ্চাৎপশ্যন্ত্যথ হৃদযগো বুদ্ধিযুঙ্ মধ্যমাখ্যঃ। ইত্যলঙ্কারকৌস্তভঃ॥ স্বীযাদ্যন্তর্গত নাযিকাভেদঃ। তস্যা লক্ষণং। হিতাহিত কারিণ্যপি প্রিযতমে হিতাহিত কারিণী যা সা। অস্যাস্তু ব্যবহারানুসারিণী চেষ্টা। ইতি রসমঞ্জরী ॥

মধ্যমিকা স্ত্রী দৃষ্টরজস্কানারী। ইতি শব্দরত্নাবলী ॥

মধ্যমীযং ত্রি মধ্যমং। ইতি হেমচন্দ্রঃ ॥

মধ্যমেশ্বরঃ পুং কাশীস্থশিবলিঙ্গবিশেষঃ। যথা। ধন্যাস্তু খলু তে বিপ্রা মন্দাকিন্যাং কৃতোদকাঃ। অর্চ্চযন্তি মহাদেবং মধ্যমেশ্বর মীশ্বরং ॥ স্নানং দানং তপঃ শ্রাদ্ধং পিণ্ড নির্ব্বাপণং ত্বিহ। একৈকশঃ কৃতং বিপ্রাঃ পুনত্যাসপ্তমং কুলং ॥ সন্নিহিত্যা অপস্পৃশ্য রাহুগ্রস্তে নিশাকরে। যৎফলং লভতে মর্ত্ত্যস্তস্মাদ্দশ গুণং ত্বিহ ॥ এবমুক্ত্বা মহাযোগী মধ্যমেশান্তিকে প্রভুঃ। উবাস সুচিরং কালং পূজয়ন্ বৈ মহেশ্বরং ॥ ইতি কৌর্ম্মে ৩১ অধ্যায়ঃ

মধ্যযবঃ পুং ষট্শ্বেতসর্ষপপরিমাণং। ইতি কেচিৎ॥

মধ্যরাত্রঃ পুং নিশীথঃ। অর্দ্ধরাত্রঃ। ইতি হলায়ুধঃ॥

মধ্যলোকঃ পুং পৃথিবী। মর্ত্যলোক ইতি যাবৎ। বক্ষ্যমাণ শব্দার্থ দর্শনাৎ॥

মধ্যলোকেশঃ পুং রাজা। ইতি হেমচন্দ্রঃ॥

মধ্যস্থঃ ত্রি মধ্যস্থায়ী। তৎপর্য্যায়ঃ। নিসৃষ্টঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ উভয়পক্ষহীনঃ। যথা। শ্রুত্বা যুদ্ধোদ্যমং রামঃ কৃষ্ণাং সহ পাণ্ডবৈঃ। তীর্থাভিষেক ব্যাজেন মধ্যস্থঃ প্রযযৌ কিল॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৭৮ অধ্যায়ঃ॥ স্বার্থাবিরোধেন পরার্থঘটকঃ। যথা। তে তে সৎপুরুষাঃ পরার্থঘটকাঃ স্বার্থস্য বাধেন যে মধ্যস্থাঃ পরকীয় কার্য্যজনকাঃ স্বার্থাবিরোধেন যে। তেহমী মানুষ রাক্ষসাঃ পরহিতং যৈঃ স্বার্থতো হন্যতে যে তু ঘ্নন্তি নিরর্থকং পরহিতং তে কে ন জানীমহে॥ ইতি প্রাঞ্চঃ॥

মধ্যস্থলং ক্লী কটিদেশঃ। যথা। অঙ্গৌ মরিচসম্মিতৌ মুরজমধ্য মধ্যস্থলী অহো তিমিরমঞ্জরী সহচরী নরী নৃত্যতে। ইত্যুদ্ভটঃ॥

মধ্যা স্ত্রী মধ্যমাঙ্গুলিঃ। ইতি হেমচন্দ্রঃ॥ নায়িকাবিশেষঃ। অস্যা লক্ষণং। সমান লজ্জা মদনা। এবৈষৈব চাতিপ্রশংসাদতিবিশুদ্ধনবোঢা। অস্যা শ্চেষ্টা। সাগসি প্রেয়সি ধৈর্য্যে বক্রোক্তি রধৈর্য্যে পরুষ বাক্। যথা। স্বাপে প্রিয়ানন বিলোকন হানিরেব স্বাপচ্যুতৌ প্রিয় করগ্রহণ প্রসঙ্গঃ। ইত্থং সরোরুহমুখী পরিচিন্তয়ন্তী স্বাপং বিধাতুমপি হাতুমপি প্রপেদে॥ মধ্যা প্রগল্ভে মানাবস্থায়াং প্রত্যেকং ত্রিবিধে। ধীরা অধীরা ধীরাধীরা চেতি। ইতি রসমঞ্জরী॥

মধ্যাহ্নঃ পুং ত্রিধাবিভক্তদিনমধ্যভাগঃ। স চ দশদণ্ডাৎ পরং দশদণ্ডরূপঃ। ইতি শ্রুত্যুক্তঃ অমরোক্তশ্চ॥ পঞ্চধা বিভক্ত দিন তৃতীয়ভাগঃ। স তু দ্বাদশদণ্ডাৎ পরং ষড়্দণ্ডাত্মকঃ। ইতি স্মার্ত্তধৃত মৎস্যপুরাণং॥ এষ নিয়ম স্ত্রিংশদ্দণ্ড দিনাভিপ্রায়েণ ন্যূনাধিকে ন্যূনাধিক কালো জ্ঞেয়ঃ॥ *॥ মধ্যাহ্নকৃত্যং যথা। ততো মধ্যাহ্ন সময়ে স্নানার্থং মৃদমাহরেৎ। পুষ্পাক্ষতং কুশ তিলান্ গোময়ং শুদ্ধ

সেব চ॥ নদীষু দেবখাতেষু তড়াগেষু সরিৎসু চ। স্নানং সমাচরেন্নিত্যং গর্ত্ত প্রস্রবণেষু চ॥ পরকীয নিপানেষু ন স্নাযাদ্বৈ কদাচন। পঞ্চ পিণ্ডান্ সমুদ্ধৃত্য স্নাযাদ্বা সম্ভবে পুনঃ॥ মৃদেকযা শিরঃ ক্ষাল্যং দ্বাভ্যাং নাভে স্তথোপরি। অধশ্চ তিসৃভিঃ কার্য্যং পাদৌ ষড়্ভি স্তথৈব চ॥ মৃত্তিকা চ সমুদ্দিষ্টা ত্বাদ্রা মলক মানিকা। গোমযস্য প্রমাণন্তত্তেনাঙ্গং লেপযেত্ততঃ॥ লেপযিত্বাথ তীরস্থ স্তল্লিঙ্গৈরেব মন্ত্রতঃ। প্রক্ষাল্যাচম্য বিধিবত্ততঃ স্নাযাৎ সমাহিতঃ॥ অভিমন্ত্র্য জলং মন্ত্রৈ স্তল্লিঙ্গৈ র্ব্বারুণৈঃ শুভৈঃ। ভাবপূত স্তদব্যক্তং ধ্যাযন্ বৈ বিষ্ণু মব্যযং॥ আপো নারাযণোদ্ভূতা স্তা এবাস্যাযনং পুনঃ। তস্মান্নারাযণং দেবং স্নান কালে স্মরেদ্বুধঃ॥ প্রেক্ষ্য সোঙ্কার মাদিত্যং ত্রি র্নিমজ্জেজ্জলাশযে। পুনঃ পুন রথাচামেন্মন্ত্রেণানেন মন্ত্রবিৎ॥ অন্তশ্চরসি ভূতেষু গুহাযাং বিশ্বতো মুখঃ। ত্বং যজ্ঞ স্ত্বং বষট্ কার আপো জ্যোতী রসো ঽমৃতং॥ দ্বিবারম্বা ত্রি রভ্যস্যেৎ ব্যাহৃতি প্রণবান্বিতাং। সাবিত্রীং বা জপেদ্বিদ্বাং স্তথা চৈবাঘমর্ষণং॥ ততঃ সমার্জ্জনং কুর্য্যাদাপোহিষ্ঠা মযো ভুবঃ। ইদমাপঃ প্রবহত ব্যাহৃতিভি স্তথৈব চ॥ ততো ঽভিমন্ত্র্য তত্তীর্থ মাপোহিষ্ঠাদি মন্ত্রকৈঃ। অন্তর্জলে ত্রিরাবর্ত্ত্য সর্ব্বপাপাৎ প্রমুচ্যতে॥ অপঃ পাণৌ সমাদায জপ্ত্বা বৈ মার্জ্জনে কৃতে। বিন্যস্য মূর্দ্ধ্নি তত্তোযং মুচ্যতে সর্ব্বপাতকৈঃ॥ যথাশ্বমেধঃ ক্রতুরাট্ সর্ব্বপাপাপনোদনঃ। তথাঘমর্ষণং সূক্তং সর্ব্বপাপাপনোদনং॥ অথোপতিষ্ঠেদাদিত্যং মূর্দ্ধ্নি পুষ্পান্বিতাঞ্জলিং। প্রক্ষিপ্যালোকযন্দেব মদৃশ্যং বৈদিকৈঃ পরং॥ উদুত্যং চিত্রং দেবানা মিত্যাদিভি রনন্যধীঃ। হংসঃ শুচিষদেতেন সাবিত্র্যা চ বিশেষতঃ॥ অন্যৈশ্চ বৈদিকৈ র্মন্ত্রৈঃ সৌরৈঃ পাপ প্রণাশনৈঃ। সাবিত্রীং বৈ জপেৎ পশ্চাজ্জপ যজ্ঞঃ স বৈ স্মৃতঃ॥ বিবিধানি পবিত্রাণি গুহ্য বিদ্যাস্তথৈব চ। শত রুদ্রিয মথর্ব্বশিরঃ সৌরমন্ত্রাংশ্চ শক্তিতঃ॥ প্রাক্ কূলেষু সমাসীনঃ কুশেষু প্রাঙ্মুখঃ শুচিঃ। তিষ্ঠংশ্চেদীক্ষমাণো ঽর্কং জাপ্যং কুর্য্যাৎ সমাহিতঃ॥ স্ফাটিকেন্দ্রাক্ষ রুদ্রাক্ষ পুত্রজীব সমুদ্ভবৈঃ। কর্ত্তব্যা অক্ষমালা বা উত্তরাদুত্তমা স্মৃতা॥ জপকালে ন

ভাষেত নান্যানি প্রেক্ষযেদুধঃ। ন কম্পযেচ্ছিরোগ্রীবান্দন্তান্নৈব প্রকাশযেৎ ॥ গুহ্যকা রাক্ষসাঃ সিদ্ধা হরন্তি প্রসভন্তুযাৎ। একান্তেষু শুভে দেশে তস্মাজ্জপ্যং সমাচরেৎ ॥ চণ্ডালাশৌচি পতিতান্ দৃষ্ট্বাচম্য পুন র্জপেৎ। তৈরেব ভাষণং কৃত্বা স্নাত্বা চৈব জপেদ্বুধঃ ॥ আচম্য প্রযতো নিত্যং জপেদশুচি দর্শনে। সৌরান্ মন্ত্রান্ শক্তিতো বৈ পাবমানীস্তু কামতঃ ॥ যদি স্যাৎ ক্লিন্নবাসো বৈ বারিমধ্যগতো জপেৎ। অন্যথা ত শুচৌ ভূম্যাং দর্ভেষু স সমাহিতঃ ॥ প্রদক্ষিণং সমাবৃত্য নমস্কৃত্বা ততঃ ক্ষিতৌ। আচম্য চ যথা শাস্ত্রং শক্ত্যা স্বাধ্যায মাচরেৎ ॥ ততঃ সন্তর্পযেদ্দেবানৃষীন্ পিতৃগণান্ ক্রমাৎ। আদাবোঙ্কার মুচ্চার্য্য নমো হন্তে তপযামি চ ॥ দেবান্ ব্রহ্মঋষীংশ্চৈব তর্পযেদক্ষতোদকৈঃ। তিলোদকৈঃ পিতৃন্ ভক্ত্যা স্বসূত্রোক্ত বিধানতঃ ॥ অন্বারব্ধেন সব্যেন পাণিনা দক্ষিণেন চ। দেবর্ষীংস্তর্পযেদ্ধীমানুদকাঞ্জলিভিঃ পিতৃন ॥ যজ্ঞোপবীতী দেবানাং নিবীতী ঋষি তর্পণং। প্রাচীনাবীতী পৈত্র্যে তু স্বেন তীর্থেন ভাবতঃ ॥ নাপীড্য স্নান বস্ত্রং বৈ সমাচম্য চ বাগ্যতঃ। স্বৈ র্মন্ত্রৈ রর্চযেদ্দেবান্ পুষ্পৈঃ পত্রৈ রথাম্বুভিঃ ॥ ব্রহ্মাণং শঙ্করং সূর্য্যং তথৈব মধুসূদনং। অন্যাংশ্চাভিমতান্দেবান্ ভক্ত্যা চাক্রোধনো ত্বরঃ ॥ প্রদদ্যাদ্বাথ পুষ্পাণি সূক্তেন পৌরুষেণ তু। আপো বা দেবতাঃ সর্ব্বা স্তেন সম্যক্ সমর্চিতাঃ ॥ নমস্কারেণ পুষ্পাণি বিন্যসেদ্বৈ পৃথক্ পৃথক্। ন বিষ্ণ্বারাধনাৎ পুণ্যং বিদ্যতে কর্ম্ম বৈদিকং ॥ তস্মাদনাদি মধ্যান্তং নিত্য মারাধযেদ্ধরিং ॥ তদ্বিষ্ণো রিতি মন্ত্রেণ সূক্তেন পুরুষেণ তু ॥ নৈতাভ্যাং সদৃশো মন্ত্রো বেদেষূক্ত শ্চতুর্ষ্বপি। নিবেদযেৎ স্বমাত্মানং বিষ্ণাবমল তেজসি ॥ তদাত্মা তন্মনাঃ শান্ত স্তদ্বিষ্ণো রিতি মন্ত্রতঃ। অথবা দেব মীশানং ভগবন্তং সনাতনং ॥ আরাধযেন্মহাদেবং ভাব পূতো মহেশ্বরং। মন্ত্রেণ রুদ্রগাযত্র্যা প্রণবেনাথ বা পুনঃ ॥ ঈশানে নাথ বা রুদ্রৈস্ত্র্যম্বকেন সমাহিতঃ। পুষ্পৈঃ পত্রৈ রথাদ্ভিশ্চ চন্দনাদ্যৈ র্মহেশ্বরং ॥ অথোনমঃ শিবাযেতি মন্ত্রেণানেন যোজযেৎ। নমস্কুর্য্যান্মহাদেব মৃতং সত্য মিতীশ্বরং ॥ নিবেদযীত স্বাত্মানং যো ব্রহ্মাণ মিতীশ্বরে।

প্রদক্ষিণং দ্বিজঃ কুর্য্যাৎ পঞ্চ ব্রাহ্মণ বৈ জপন্ ॥ ধ্যায়েত্তং দেবমীশানং ব্যোম মধ্য গতং শিবং। অথাবলোকয়েদর্কং হংসঃ শুচিষদিত্যৃচা ॥ কুর্য্যাৎ পঞ্চ মহাযজ্ঞান্ গৃহং কৃত্বা সমাহিতঃ। দেবযজ্ঞং পিতৃযজ্ঞং ঋষিযজ্ঞং তথৈব চ। মানুষ্যঞ্চ ব্রহ্ম যজ্ঞঞ্চ পঞ্চযজ্ঞান্ প্রচক্ষতে ॥ যদি স্যাত্তর্পণাদর্ব্বাক্ ব্রহ্মযজ্ঞঃ কৃতো ন হি। কৃত্বা মনুষ্যযজ্ঞং বৈ ততঃ স্বাধ্যায় মাচরেৎ ॥ অগ্নেঃ পশ্চিমতো দেশে ভূতযজ্ঞান্ত এব বা। কুশাসন মুপাসীনঃ কুশপাণিঃ সমাহিতঃ ॥ শালাগ্নৌ লৌকিকাগ্নৌ বা জলে ভূম্যাং যথাপিবা। বৈশ্বদেব নিমিত্তং বৈ দেবযজ্ঞঃ স বৈ স্মৃতঃ ॥ যদি স্যাল্লৌকিকে পক্বং ততো হন্নং তত্র হূয়তে। শালাগ্নৌ তত্র দেবান্নং বিধি রেষ সনাতনঃ ॥ দেবেভ্যস্তু হুতান্নদদ্যাৎ শেষান্ ভূতবলিং হরেৎ। ভূতযজ্ঞঃ স বৈ জ্ঞেয়ো ভূতিদঃ সর্ব্বদেহিনাং॥ শ্বভ্যশ্চ শ্বপচেভ্যশ্চ বয়োভ্যো নিত্যমেব চ। দদ্যাদ্ভূমৌ বলিং ত্বন্নং পক্ষিভ্যো হথ দ্বিজোত্তমঃ ॥ সায়ং চান্নস্য সিদ্ধস্য কুর্য্যাদেব মতন্দ্রিতঃ। ভূতযজ্ঞঃ স্বয়ং নিত্যং সায়ং প্রাত র্বিধীয়তে ॥

একন্তু ভোজয়েদ্বিপ্রং পিতৄনুদ্দিশ্য সত্তমং। অথবান্নং যথাশক্তি কিঞ্চিদন্নং সমাহিতঃ ॥ বেদতত্ত্বার্থবিদুষে দ্বিজায়ৈবোপপাদয়েৎ। পূজয়েদতিথিং নিত্যং নমস্যেদর্চ্চয়েদ্দ্বিজং ॥ মনোবাক্কর্ম্মভিঃ শান্ত মাগতং স্বগৃহন্তুতং। হন্তকার মথাগ্রং বা ভিক্ষাং বা শক্তিতো দ্বিজঃ ॥ দদ্যাদতিথয়ে নিত্যং বুদ্ধা তং পরমেশ্বরং। ভিক্ষা মাহু গ্রাস মাত্র মগ্রং স্যাচ্চতুর্গুণং ॥ পুষ্কলং হন্তকারন্তু তচ্চতুর্গুণমুচ্যতে। গোদোহ মাত্রং কালং বৈ প্রতীক্ষ্যো হ্যতিথিঃ স্বয়ং ॥ অভ্যাগতান্ যথা শক্তি পূজয়েদতিথিং যথা। ভিক্ষাং বৈ ভিক্ষবে দদ্যাদ্বিধিবদ্ব্রহ্মচারিণে ॥ দদ্যাদন্নং যথা শক্তি ত্বর্থিভ্যো লোভবর্জ্জিতঃ। সর্ব্বেষা মপ্যলাভে ত্বন্নং গোভ্যো নিবেদয়েৎ ॥ ভুঞ্জীত বন্ধুভিঃ সার্দ্ধং বাগ্যতো হন্ন মকুৎসয়ন্। অকৃত্বা তু দ্বিজঃ পঞ্চ মহাযজ্ঞান্ দ্বিজোত্তমাঃ ॥ ভুঞ্জীত চেৎ সুমূঢাত্মা তির্য্যগ্যোনিং স গচ্ছতি। বেদাভ্যাসো হন্বহং শক্ত্যা মহাযজ্ঞ ক্রিয়াক্ষমাঃ ॥ নাশয়ন্ত্যাশু পাপানি দেবানামর্চ্চনং তথা। যো মোহাদথবালস্যাদকৃত্বা দেবতার্চ্চনং ॥ ভুঙ্ক্তে স যাতি নরকান্

প্রক্রমেণভিধাবতে। তস্মাৎ সর্ব্ব প্রযত্নেন কৃত্বা কর্ম্মাণি বৈ দ্বিজঃ॥ তুষ্ণীং তদ্ব্রতৈঃ সাদ্ধং সর্যাতিপ রন্নাং গতিং। ইতি কৌর্ম্মে উপরি ভাগে ১৭ অধ্যায়ঃ॥৯॥ অত্র ভোজনবিধি ভোজনশব্দে দ্রষ্টব্যঃ॥

মধুলঃ পুং মধুযারঃ। ইতি শব্দ চন্দ্রিকা॥

মধ্বালু ক্লী মূলবিশেষঃ। মৌআলু ইতি ভাষা। অস্য গুণাঃ। রক্ত পিত্তনাশিত্বং। গুরুত্বং। স্বাদুত্বং। শীতত্বং। স্তন্য শুক্র কারিত্বঞ্চ। ইতি রাজবল্লভঃ॥

মধ্বালকং ক্লী কন্দবিশেষঃ। মৌআলু ইতি ভাষা। ইতি শব্দ চন্দ্রিকা॥

মধ্বাসবঃ পুং মধুরূপল্লকৃতমদ্যং। তৎপর্য্যায়ঃ। মাধ্বীকঃ ২ মধু ৩ মাধ্বীকং ৪। ইত্যমরঃ।

মধ্বাসবনিকঃ পুং শৌণ্ডিকঃ। ইতি শব্দমালা॥

মধ্বিজা স্ত্রী মদিরা। ইতি হেমচন্দ্রঃ

মন অর্চ্চে॥ গর্ব্বে। ইতি কবিকল্প দ্রুমঃ॥ মনতি। ইতি দুর্গাদাসঃ॥

মন ক ঙ গর্ব্বকে। ইতি কবিকল্পদ্রুমঃ॥ কঙ মানযতে। গর্ব্বকো হহঙ্কারঃ॥

মন স্তম্ভনে। ইতিপ্রাঞ্চঃ। মানযতে শত্রুং বলী তন্ত্রা... । ইতি রমানাথঃ। ইতি দুর্গাদাসঃ॥

মন দ ঙ বোধে। ইতি কবিকল্পদ্রুমঃ॥ দ ঙ মনুতে। ইতি দুর্গাদাসঃ॥

মন য ঔ ঙ-বোধে। ইতি কবিকল্পদ্রুমঃ॥ য ঙ মন্যতে। ঔ অমংস্ত। ইতি দুর্গাদাসঃ॥

মন ত ক ধৃত্যৌ। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যনোপধঃ মনয়তি। দুর্গাদাসঃ॥

মনঃ পুং জটামাংসী। ইতি শব্দ-চন্দ্রিকা॥

মনঃ ক্লী জ্ঞানেন্দ্রিয়বিশেষঃ। তত্তু বুদ্ধীন্দ্রিয়াণাং মধ্যং প্রধানং শ্রীকৃষ্ণ বিভূতিশ্চ। যথা। ইন্দ্রিয়াণাং মন-শ্চাস্মি ভূতানামস্মি চেতনা। ইতি ভগবদ্গীতা॥ ... মনসে নাসি জাতে। ইতি মুগ্ধবোধঃ॥ তৎপর্য্যায়ঃ। চিত্তং ২ চেতঃ ৩ হৃদয়ং ৪ স্বান্তং ৫ হৃৎ ৬ মানসং ৭। ইত্যমরঃ॥ অনঙ্গকং ৮ অঙ্গং ৯। ইতি শব্দরত্নাবলী॥ অপিচ। মনো মহান্ মতি ব্রহ্মা পুর্ব্বুদ্ধিঃ খ্যাতি রীশ্বরঃ। প্রজ্ঞা সম্বিৎ চিতিশ্চৈব স্মৃতিশ্চ পরিপঠ্যতে॥ পর্য্যায বাচকাঃ শব্দা মনসঃ পরিকীর্ত্তিতাঃ॥ ইতি মহাভারতে মোক্ষধর্ম্মঃ॥৯॥

ন্যাগমতে মন [illegible] পরত্বং। অপরত্বং। সংখ্যা। প[illegible]তিঃ। পৃথক্ত্বং। সংযোগঃ। বিভাগঃ। বেগশ্চ॥ মনোগ্রাহ্যানি যথা। সুখং। দুঃখং। ইচ্ছা। দ্বেষঃ। মতিঃ। যত্নশ্চ॥ ইদং পরমাণু স্বরূপং। শিরোমণি মতে বায়বীয পরমাণুরূপং। যথা। পরাপরত্বং সংখ্যাদ্যাঃ পঞ্চ বেগশ্চ মানসে। মনোগ্রাহ্যং সুখং দুঃখ মিচ্ছা দ্বেষো মতিঃ কৃতিঃ॥ অযৌগপদ্যাজ্জ্ঞানানাং তস্যাণুত্ব মিহেষ্যতে। ইতি ভাষাপরিচ্ছেদঃ॥ জন্য জ্ঞানসামান্যং প্রতিত্ব মনোযোগঃ কারণং। যথা। ত্বচো যোগো মনসা জ্ঞান কারণং। ইত্যপি তত্রৈব॥❋॥ [illegible] যথা। ধৈর্য্যোপপত্তি [illegible] ক্ষমা। সদ [illegible] নব বৈ গুণাঃ॥ ইতি মোক্ষধর্ম্মঃ। অস্য ব্যাখ্যা। ধৈর্য্যং ১ উপপত্তিঃ ঊহাপোহকৌশলং ২ ব্যক্তিঃ স্মরণং ৩ বিসর্গঃ বিপরীতসর্গো ভ্রান্তিঃ ৪ কল্পনা মনোরথবৃত্তিঃ ৫ ক্ষমা ৬ সৎ বৈরাগ্যাদি ৭ অসৎ রাগদ্বেষাদি ৮ আশুতা অস্থিরত্বং ৯। ইতি তট্টীকা॥❋॥ অস্য চাতুর্বিধ্যং যথা। মনো বুদ্ধি রহঙ্কার শ্চিত্তং করণমান্তরং। সং[illegible]

[illegible]শ্চয়ো গর্ব্বঃ স্মরণং বিষয়া[illegible] [illegible]তি বেদান্তঃ॥❋॥ তস্য অধ্যাত্মত্বাদি যথা। অধ্যাত্মং মন ইত্যাহুঃ পঞ্চভূতাত্মধারকং। অধিভূতঞ্চ সংকল্প শ্চন্দ্রমা শ্চাধিদৈবতং॥ ইতি মহাভারতে আশ্বমেধিক পর্ব্ব॥❋॥ তস্য স্বরূপং যথা। অনিরূপ্য মদৃশ্যঞ্চ জ্ঞানভেদং মনঃ স্মৃতং॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৩ অধ্যায়ঃ॥❋॥ তস্য প্রাশস্ত্যাপ্রাশস্ত্যানুতাপ স্থানি যথা। জনানাং হৃদযং সদ্যঃ সুব্যক্তং বচনেনবৈ। শিষ্যে কলত্রে কন্যাযাং দৌহিত্রে বান্ধবেপি চ॥ পত্রে পৌত্রে চ বচসি প্রতাপে যশসি শ্রিয়াং। বন্ধো বারিণি বিদ্যাযাং জ্ঞাযতে হৃদয়ং নৃণাং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১ অধ্যায়ঃ॥❋॥ তস্য বন্ধমোক্ষহেতুত্বং যথা। মন এব মনুষ্যাণাং কারণং বন্ধমোক্ষযোঃ। বন্ধস্য বিষযাসঙ্গি মুক্তে র্নির্বিষয়ং তথা॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ॥

মনআপঃ ত্রি মনোজ্ঞঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মনঃশিলঃ পুং মনঃশিলা। যথা। টঙ্কে র্মনঃশিল গুহৈ র্ব্বিদার্য্যমানা

। ইত্যমর টীকায়াং ভরতঃ ॥

মনঃশিলা স্ত্রী রক্তবর্ণধাতুবিশেষঃ । মনছাল ইতি ভাষা । সাতু লক্ষ্মীবীর্য্যং । ইতি বৈদ্যকং ॥ তৎপর্য্যায়ঃ । কুনটী ২ মনোজ্ঞা ৩ নাগজিহ্বিকা ৪ । ইত্যমরঃ ॥ নৈপালী ৫ শিলা ৬ । ইতি রত্নমালা ॥ মনোহ্বা ৭ নেপালিকা ৮ মনোগুপ্তা ৯ কল্যাণিকা ১০ রোগশিলা ১১ । ইতি রাজনির্ঘণ্টঃ ॥ গোলা ১২ দিব্যৌষধিঃ ১৩ । ইতি ভাবপ্রকাশঃ ॥ অস্যা গুণাঃ । কটুত্বং । স্নিগ্ধত্বং । লেখনত্বং । বিষ ভূতাবেশ ভয়োন্মাদ নাশিত্বং । বশ্যকারিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥ অপিচ । তিক্তত্বং । কফ নাশিত্বং । সারকত্বং । ছর্দ্দি কারিত্বং । কুষ্ঠ জ্বর পাণ্ডু কাস শ্বাস নাশিত্বং । শুক্র মঙ্গল কারিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ অন্যচ্চ । মনঃশিলা গুরু র্বর্ণ্যা সরোষ্ণা লেখনী কটুঃ । তিক্তা স্নিগ্ধা বিষ শ্বাস কাস ভূত কফাস্রনুৎ । মনঃশিলা মন্দবলং করোতি জন্তুং ধ্রুবং শোধন মন্তরেণ ॥ মলানুবন্ধং কিল মূত্ররোধং সশর্করং কৃচ্ছ্র গদঞ্চ কুর্য্যাৎ । ইতি ভাবপ্রকাশঃ ॥

মননং ক্লী বুদ্ধিঃ । ইতি রাজনির্ঘণ্টঃ ॥

মনসা স্ত্রী দেবীবিশেষঃ । তৎপর্য্যায়ঃ । কদ্রুঃ ২ মনসাদেবী ৩ বিষহরী ৪ । ইতি জটাধরঃ ॥ অস্যাঃ প্রণাম মন্ত্রঃ । আস্তীকস্য মুনে র্মাতা ভগিনী বাসুকে স্তথা । জরৎকারু মুনেঃপত্নী মনসাদেবি নমোস্তু তে ॥ ইতি তস্যাঃ পূজাপদ্ধতিঃ ॥ তস্যা নাম্নাং ব্যুৎপত্তি র্যথা । শ্রীনারায়ণ উবাচ । শ্রুতং মনসাখ্যানং যৎ শ্রুতং ধর্ম্ম বক্তুতঃ । কন্যা সা চ ভগবতী কশ্যপস্য চ মানসী ॥ তেনেয়ং মনসাদেবী মনসা যা চ দীব্যতি । মনসা ধ্যায়তে যা বা পরমাত্মানমীশ্বরী ॥ তেন সা মনসাদেবী যোগেন তেন দীব্যতি । আত্মারামা চ সা দেবী বৈষ্ণবী সিদ্ধযোগিনী ॥ ত্রিযুগঞ্চ তপ স্তপ্ত্বা কৃষ্ণস্য পরমাত্মনঃ । জরৎকারু শরীরঞ্চ দৃষ্ট্বা যৎ ক্ষণ মীশ্বরঃ ॥ গোপীপতি র্নাম চক্রে জরৎকারু রিতি প্রভুঃ । বাঞ্ছিতঞ্চ দদৌ তস্যৈ কৃপয়া চ কৃপানিধিঃ ॥ পূজাঞ্চ কারয়ামাস চকার চ পুনঃ পুনঃ । স্বর্গে চ নাগলোকে চ পৃথিব্যাং ব্রহ্মলোকতঃ ॥ ভৃশং জগৎ সুগৌরী সা সুন্দরী চ মনোহরা । জগদ্গৌরীতি বিখ্যাতা তেন সা পূজিতা সতী ॥ শিবশিষ্যা চ সা

দেবী তেন শৈবীতি কীর্ত্তিতা। বিষ্ণুভক্তাতীব শশ্বদ্বৈষ্ণবী তেন নারদ॥ নাগানাং প্রাণ রক্ষিত্রী যজ্ঞে জন্মেজয়স্য চ। নাগেশ্বরীতি বিখ্যাতা সা নাগ ভগিনীতি চ॥ বিষং সংহর্ত্তুমীশা সা তেন বিষহরীতি সা। সিদ্ধং যোগং হরাৎ প্রাপ তেনাতি সিদ্ধযোগিনী॥ মহাজ্ঞানঞ্চ গোপাঞ্চ মৃতসঞ্জীবনীং পরাং। মহাজ্ঞানযুতাং তাঞ্চ প্রবদন্তি মনীষিণঃ॥ আস্তীকস্য মুনীন্দ্রস্য মাতা সা চ তপস্বিনঃ। আস্তীকমাতা বিখ্যাতা জগৎসু সুপ্রতিষ্ঠিতা॥ প্রিয়া মুনেজরৎকারো মুনীন্দ্রস্য মহাত্মনঃ। যোগিনো বিশ্বপূজ্যস্য জরৎকারু প্রিয়া ততঃ॥ ॥ ওঁ নমো মনসায়ৈ॥ জরৎকারু জগদ্গৌরী মনসা সিদ্ধযোগিনী। বৈষ্ণবী নাগভগিনী শৈবী নাগেশ্বরী তথা॥ জরৎকারু প্রিয়াস্তীক মাতা বিষহরীতি চ। মহাজ্ঞানযুতা চৈব সা দেবী বিশ্বপূজিতা॥ দ্বাদশৈতানি নামানি পূজাকালে চ যঃ পঠেৎ। তস্য নাগভয়ং নাস্তি তস্য বংশোদ্ভবস্য চ॥ নাগভীতে চ শয়নে নাগগ্রস্তে চ মন্দিরে। নাগক্ষতে মহাদুর্গে নাগবেষ্টিত বিগ্রহে॥ ইদং স্তোত্রং পঠিত্বা তু মুচ্যতে নাত্র সংশয়ঃ। নিত্যং পঠেদ্যস্তং দৃষ্ট্বা নাগবর্গঃ পলায়তে॥ দশলক্ষ জপেনৈব স্তোত্র সিদ্ধি ভবেন্নৃণাং। স্তোত্র সিদ্ধি ভবেদ্যস্য স বিষং ভোক্তুমীশ্বরঃ॥ নাগৌঘ ভূষণং কৃত্বা স ভবেন্নাগবাহনঃ। নাগাসনো নাগতল্পো মহাসিদ্ধো ভবেন্নরঃ॥ ইতি ব্রহ্মবৈবর্ত্তে মহাপুরাণে প্রকৃতিখণ্ডে নারায়ণ নারদীয়ে মনসোপাখ্যানে মনসা স্তোত্রং নাম দ্বিচত্বারিংশোঽধ্যায়ঃ॥ ॥ তস্যাঃ পূজা মন্ত্রাদি যথা। শ্রীনারায়ণ উবাচ। পূজাবিধানং স্তোত্রঞ্চ শ্রূয়তাং মুনিপুঙ্গব। ধ্যানঞ্চ সামবেদোক্তং দেবী পূজাবিধানকং॥ শ্বেত চম্পক বর্ণাভাং রত্ন ভূষণ ভূষিতাং। বহ্নি শুদ্ধাংশুকাধানাং নাগযজ্ঞোপবীতিনীং॥ মহাজ্ঞান যুতাঞ্চৈব প্রবরাং জ্ঞানিনাং সতাং। সিদ্ধাধিষ্ঠাতৃদেবীঞ্চ সিদ্ধাং সিদ্ধিপ্রদাং ভজে॥ ইতি ধ্যাত্বা তু তাং দেবীং মূলেনৈব প্রপূজয়েৎ। নৈবেদ্যৈর্বিবিধৈর্দীপৈঃ পুষ্প ধূপানুলেপনৈঃ॥ মূলমন্ত্রশ্চ বেদোক্তো ভক্তানাং বাঞ্ছিত প্রদঃ। মূল কল্পতরু নাম সুসিদ্ধো দ্বাদশাক্ষরঃ॥ ওঁ হ্রীং শ্রীং ক্লীং ঐং মনসা দেব্যৈ স্বাহা। পঞ্চলক্ষ জপেনৈব

মন্ত্র সিদ্ধি ভর্বেন্মুণাং ॥ মন্ত্রসিদ্ধি ভবেদ্যস্য স সিদ্ধো জগতীতলে। সুধাসমং বিষং তস্য ধন্বন্তরি সমো ভবেৎ ॥ বৃদ্ধাষাঢ় সংক্রান্ত্যাং সুহীশাখাসু যত্নতঃ। আবাহ্য দেবী মীশানাং পূজয়েদ্যো হি ভক্তিতঃ॥ পঞ্চম্যাং মনসাখ্যায়াং দেব্যৈ দদ্যাচ্চ যো বলিং। ধনবান্ পুত্রবাংশ্চৈব কীর্ত্তিমাংশ্চ ভবেদ্ধ্রুবং ॥ পূজা বিধানং কথিতং তদাখ্যানং নিশামঘ। কথয়ামি মহাভাগ যৎশ্রুতং ধর্মবক্তৃতঃ॥ * ॥ তস্যা জন্ম কারণং যথা। পুরা নাগ ভয়াক্রান্তা বভূব মানবা ভুবি। যান্ যান্ খাদন্তি নাগাশ্চ তে ন জীবন্তি মানবাঃ॥ মন্ত্রাংশ্চ সস্জে ভীতঃ কশ্যপো ব্রহ্মণার্থিতঃ। বেদবীজানুসারেণ চোপদেশেন ব্রহ্মণঃ॥ মন্ত্রাধিষ্ঠাতৃ দেবীন্তাং মনসা সসৃজে ততঃ। তপসা মনসা তেন বভূব মনসা চ সা॥ * ॥ তস্যাস্ত পস্যাদি যথা। কুমারী সা চ সম্ভূয় জগাম শঙ্করালয়ং। ভক্ত্যা সংপূজ্য কৈলাশে তুষ্টাব চন্দ্রশেখরং॥ দিব্যং বর্ষ সহস্রঞ্চ তংসিষেবে মুনেঃ সুতা। আশুতোষো মহেশশ্চ তাঞ্চ তুষ্টো বভূবহ॥ মহাজ্ঞানং দদৌ তস্যৈ পাঠয়ামাস সাম চ। কৃষ্ণমন্ত্রং কল্পতরুং দদাবষ্টাক্ষরং মুনে॥ লক্ষ্মী মায়া কামবীজং ঙেন্তং কৃষ্ণপদন্তথা। ত্রৈলোক্য মঙ্গলং নাম কবচং পূজনক্রমং॥ সর্ব্ব পূজ্যঞ্চ স্তবনং ধ্যানং ভুবনপাবনং। পুরশ্চর্য্যা ক্রমঞ্চাপি বেদোক্তং সর্ব্বসম্মতং॥ প্রাপ্য মৃত্যুঞ্জয়াজ জ্ঞানং পরং মৃত্যুঞ্জয়ং সতী। জগাম তপসে সাধ্বী পুষ্করং শঙ্করাজ্ঞয়া॥ ত্রিযুগঞ্চ তপস্তপ্ত্বা কৃষ্ণস্য পরমাত্মনঃ। সিদ্ধা বভূব সা দেবী দদর্শ পুরতঃ প্রভুং॥ দৃষ্ট্বা কৃশাঙ্গীং বালাঞ্চ কৃপয়া চ কৃপানিধিঃ। পূজাঞ্চ কারয়ামাস চকার চ স্বয়ং হরিঃ॥ বরঞ্চ প্রদদৌ তস্যৈ পূজিতেতি ভবে ভব। বরং দত্বা চ কল্যাণ্যৈ সদ্যশ্চান্তরধে বিভুঃ॥ প্রথমে পূজিতা সা চ কৃষ্ণেন পরমাত্মনা। দ্বিতীয়ে শঙ্করেণৈব কশ্যপেন সুরেণ চ॥ মনুনা মুনিনা চৈব নাগেন মানবাদিনা। বভূব পূজিতা সা চ ত্রিষু লোকেষু সুব্রতা॥ * ॥ তস্যা বিবাহঃ স্বামি কর্ত্তৃক ত্যাগশ্চ যথা। জরৎকারু মুনীন্দ্রায় কশ্যপস্তাং দদৌ পুরা। অযাচিতো মুনিশ্রেষ্ঠো জগ্রাহ ব্রাহ্মণাজ্ঞয়া॥ কৃত্বোদ্বাহং মহাযোগী বিশ্রান্তস্তপসা চিরং। সুষ্বাপ দেব্যা জঘনে বটমূলে চ পুষ্করে॥ নিদ্রাং

জগাম চ মুনিঃ সুত্বা নিদ্রেশ মীশ্বরং। জগামাস্ত' দিনকরঃ সায়ং কাল উপস্থিতঃ॥ সংচিন্ত্য মনসা তত্র মনসা সা পতিষ্ঠিতা॥ ধর্মলোপ ভয়েনৈব চক্রারম্নেলক্ষনং সতী॥ অকৃত্বা পশ্চিমাং সন্ধ্যাং নিত্যাঞ্চৈব দ্বিজন্মনাং। ব্রহ্মহত্যাদিকং পাপং ল ভিষ্যতি পতি র্মম॥ নোপতিষ্ঠতি যঃ পূর্ব্বাং নোপাস্তে যস্তু পশ্চিমাং। সচ এবাশুচি নিত্যং ব্রহ্মহত্যাদিকং লভেৎ॥ বেদোক্ত মপি সংচিন্ত্য বোধযামাস তং মুনিং। স চ বুদ্ধা মুনিশ্রেষ্ঠ শ্চুকোপ তাং দৃশা মুনিঃ॥ জরৎকারু রুবাচ। কথং মে সুব্রতে সাধ্বি নিদ্রাভঙ্গঃ কৃত স্ত্বয়া॥ ব্রথং ব্রতাদিকং তস্যা যা ভর্ত্তুশ্চাপকারিণী। তপ শ্চানশনঞ্চৈব ব্রতং দানাদিকঞ্চ যৎ॥ ভর্ত্তু রপ্রিয়কারিণ্যাঃ সর্ব্বং ভবতি নিস্ফলং। যযা প্রিয়ঃ পূজিতশ্চ শ্রীকৃষ্ণঃ পূজিত স্তয়া। পতিব্রতা ব্রতাথঞ্চ পতিরূপী হরিঃ স্বয়ং। সর্ব্বদানং সর্ব্বযজ্ঞঃ সর্ব্ব তীর্থ নিষেবনং॥ সর্ব্বং ব্রতং তপঃ সর্ব্বমুপবাসাদিকঞ্চ যৎ। সর্ব্ব ধর্ম্মঞ্চ সত্যঞ্চ সর্ব্বদেব প্রপূজনং॥ তৎ সর্ব্বং স্বামি সেবায়াঃ কলাং নার্হন্তি ষোড়শীং। সুপুণ্যে ভারতে বর্ষে প-

তিসেবাং করোতি যা। বৈকুণ্ঠং স্বামিনা সার্দ্ধং সা যাতি ব্রহ্মণঃ শতং। বিপ্রিয়ং কুরুতে ভর্ত্তু র্বিপ্রিয়ং বদতি প্রিয়ং॥ অসৎকুল প্রজাতায়া তৎ ফলং শ্রূয়তাং সতি। কুম্ভীপাকং ব্রজেৎ সাচ যাবচন্দ্র দিবাকরৌ॥ ততো ভবতি চাণ্ডালী পতি পুত্র বিবর্জিতা। ইত্যুক্ত্বা চ মুনিশ্রেষ্ঠো বভূব স্ফুরিতাধরঃ॥ চকম্পে মনসা সাধ্বী ভযেনোবাচ তং পতিং। মনসোবাচ। সন্ধ্যালোপ ভযেনৈব নিদ্রাভঙ্গঃ কৃত স্তব॥ কুরু শান্তিং মহাভাগ দুষ্টায়া মম সুব্রত। শৃঙ্গারাহার নিদ্রাণাং যশ্চ ভঙ্গং করোতি চ॥ স ব্রজেৎ কালসূত্রঞ্চ স্বামিনশ্চ বিশেষতঃ। ইত্যুক্ত্বা মনসাদেবী স্বামিন শ্চরণাম্বুজে॥ পপাত ভক্ত্যা ভীতাচ রুরোদচ পুনঃ পুনঃ। কুপিতঞ্চ মুনিং দৃষ্ট্বা শ্রীসূর্য্যং শপ্তু মুদ্যতং॥ তত্রাজগাম ভগবান্ সন্ধ্যয়া সহ নারদ। তত্রাগত্য মুনিশ্রেষ্ঠ মুবাচ ভাস্করঃ স্বয়ং॥ বিনযেন চ ভীতশ্চ তয়া সহ যথোচিতং। শ্রীসূর্য্য উবাচ। সূর্য্যাস্ত সময়ং দৃষ্ট্বা সাধ্বী ধর্ম্মভযেন চ॥ বোধযামাস ত্বাং বিপ্র নাহং নাস্তং গত স্তদা। ক্ষমস্ব ভগবন্ ব্রহ্মন্মাং শপ্তুং নোচিতং মুনে॥ ব্রাহ্মণা-

নাঞ্চ হৃদস্য নবনীত সমং তদা। তেষাং ক্ষণার্দ্ধং ক্রোধশ্চ ততো ভস্ম ভবেজ্জগৎ।। পুনঃ সৃষ্টং দ্বিজঃ শক্তো নতেজস্বী দ্বিজাৎপরঃ। ব্রাহ্মণো ব্রহ্মণো বংশঃ প্রজ্বলন্ ব্রহ্মতেজসা।। শ্রীকৃষ্ণং ভাবযেন্নিত্যং ব্রহ্মজ্যোতিঃ সনাতনং। সূর্য্যস্য বচনং শ্রুত্বা দ্বিজঃ শান্তো বভূবহ।। সূর্য্যো জগাম স্ব স্থানং গৃহীত্বা ব্রাহ্মণাশিষং। তত্যাজ মনসাং বিপ্রঃ প্রতিজ্ঞা পালনায চ।। রুদন্তী শোকযুক্তা চ হৃদযেন বিদূযতা। সা সস্মার গুরুং শম্ভু মিষ্টদেবং হরিং বিধিং।। কশ্যপং জন্মদাতারং বিপত্তৌ ভযকর্ষিতা। তত্রাজগাম ভগবান্ গোপীশঃ শম্ভুরেব চ।। বিধিশ্চ কশ্যপশ্চৈব মনসা পরিচিন্তিতঃ। দৃষ্ট্বা বিপ্রো হভীষ্ট দেবং নির্গুণং প্রকৃতেঃ পরং।। তুষ্টাব পরবা ভক্ত্যা প্রণনাম মুহু র্মুহুঃ। নমস্চকার শম্ভুঞ্চ ব্রহ্মাণং কশ্যপন্তদা।। কথনাগমনং দেবা ইতি প্রশ্নং চকার সঃ। ব্রহ্মা তদ্বচনং শ্রুত্বা সহসা সমযোচিতং।। সমুবাচ নমস্কৃত্য হৃষীকেশ পদাম্বুজং। ব্রহ্মোবাচ। যদি ত্যক্তা ধর্ম্মপত্নী ধর্ম্মিষ্ঠা মনসা সতী।। কুরুষ্বাস্যাং সুতোৎপত্তিং স্বস্য পালনায বৈ। সতী বা ব্রহ্মচারী বা ভিক্ষু র্বনচরোপি বা।। জাযাযাঞ্চ সুতোৎপত্তিং কৃত্বা পশ্চাৎ ত্যজেন্মুনে। অকৃত্বা ত সুতোৎপত্তিং বৈরাগী য স্ত্যজেৎপ্রিযাং।। স্রবত্তপ~~স্তস্য পুণ্যঞ্চ~~ চালন্যাঞ্চ যথা জলং। *। তস্যাঃ পুত্রোৎপত্তি র্যথা। ব্রহ্মণো বচনং শ্রুত্বা জরৎকারু র্মনীশ্বরঃ। চকার তন্নাভিস্পর্শং যোগেন মন্ত্র পূর্ব্বকং। তস্যৈ শুভাশিষং দত্ত্বা যযু দেবা মুদান্বিতাঃ।। মদান্বিতা চ মনসা জরৎকারু মুদান্বিতঃ। মুনেঃ কর স্পর্শ মাত্রাৎ সদ্যো গর্ভো বভূবহ।। মনসা যা মুনিশ্রেষ্ঠ মুনিশ্রেষ্ঠ উবাচ তাং জরৎকারু রুবাচ। গর্ভেণানেন মনসে তব পুত্রো ভবিষ্যতি।। জিতেন্দ্রিযাণাং প্রবরো ধার্ম্মিকো বৈষ্ণবাগ্রণীঃ। তেজস্বী চ তপস্বী চ যশস্বী চ গুণান্বিতঃ।। বরো বেদবিদাঞ্চৈব জ্ঞানিনাং যোগিনা স্তথা। সচ পুত্রো বিষ্ণুভক্তো ধার্ম্মিকঃ কুলমুদ্ধরেৎ।। নৃত্যন্তি পিতরঃ সর্ব্বে যজ্জন্ম মাত্রতো মুদা। পতিব্রতা সুশীলাযা সা প্রিযা প্রিযবাদিনী।। ধর্ম্মিষ্ঠা পুত্রমাতা চ কুলজা কুলপালিকা। হরিভক্তিপ্রদো বন্ধু স্তমিষ্টং তৎ সুখপ্রদং।। যো বন্ধচ্ছিৎ সচ পিতা হরে-

র্বত্ম প্রদর্শকং। সা গর্ভধারিণী যা চ গর্ভবাস বিমোচনী ॥ বিষ্ণুমন্ত্রপ্রদাতা চ স গুরু বিষ্ণু ভক্তিদঃ। গুরোশ্চ জ্ঞানোদ্গিরণাত্তজ্জ্ঞানং কৃষ্ণ ভাবনং। আব্রহ্ম স্তম্ব পর্য্যন্তং যতো বিশ্বং চরাচরং। আবির্ভূতং তিরোভূত কিং বা জ্ঞানং তদন্যতঃ॥ বেদজং যোগজং যদ্যত্তৎ সারং হরিসেবনং। তত্ত্বানাং সারভূতঞ্চ হরেরন্যদ্বিড়ম্বনং॥ দত্তং জ্ঞানং ময়া তুভ্যং স স্বামী জ্ঞানদো হি যঃ। জ্ঞানাৎ প্রমুচ্যতে বন্ধাৎ স রিপুর্যো হি বন্ধদঃ॥ বিষ্ণুভক্তি যুতং জ্ঞানং ন দদাতি হি যো গুরুঃ। স রিপুঃ শিষ্য ঘাতী চ যতো বন্ধান্ন মোচয়েৎ॥ জননী গর্ভজাৎ ক্লেশাদ্যম তাড়নজাত্তথা। ন মোচয়েদ্যঃ স কথং গুরু স্তাতো হি বান্ধবঃ॥ পরমানন্দ রূপঞ্চ কৃষ্ণমার্গমনশ্বরং ন দর্শয়েদ্যঃ স কথং কীদৃশো বান্ধবো নৃণাং॥ ভজ সাধ্বি পরং ব্রহ্মাচ্যুতং কৃষ্ণঞ্চ নির্গুণং। নির্ম্মূলঞ্চ পুরা কর্ম্ম ভজেদ্যৎ সেবয়া ধ্রুবং॥ ময়া ছলেন ত্বং ত্যক্তা ক্ষম দেবি মম প্রিয়ে। ক্ষমাযুতানাং সাধ্বীনাং সত্ত্বাৎ ক্রোধো ন বিদ্যতে॥ পুষ্করং তপসে যামি গচ্ছ দেবি যথা সুখং। শ্রীকৃষ্ণচরণাম্ভোজ ধ্যান বিচ্ছেদ কাতরঃ॥ ধনাদিষু স্ত্রিয়াং প্রীতিং প্রবৃত্তি বর্জ্জ্য গচ্ছতাং। শ্রীকৃষ্ণচরণাম্ভোজে নিস্পৃহাণাং মনোরথাঃ॥ ✻॥ জরৎকারু বচঃ শ্রুত্বা মনসা শোক কাতরা। সা সাশ্রুনেত্রা বিনয়াদুবাচ প্রাণবল্লভং॥ মনসোবাচ। দোষেনাহং ত্বয়া ত্যক্তা নিদ্রাভঙ্গেন তে প্রভো। যত্র স্মরামি ত্বাং বন্ধো তত্র মামাগমিষ্যতি॥ বন্ধুভেদঃ ক্লেশতমঃ পুত্রভেদ স্ততঃপরঃ। প্রাণেশ ভেদঃ প্রাণানাং বিচ্ছেদাৎ সর্ব্বতঃ পরঃ॥ পতিঃ পতিব্রতানান্তু শতপুত্রাধিকঃ স্মৃতঃ। সর্ব্বস্মাত্তু প্রিয়ঃ স্ত্রীণাং প্রিয় স্তেনোচ্যতে বুধৈঃ। পুত্রে যথৈক পুত্রাণাং বৈষ্ণবানাং যথা হরৌ॥ নেত্রে যথৈক নেত্রাণাং তৃষিতানাং যথা জলে। ক্ষুধিতানাং যথান্নে চ কামুকানাং যথা স্ত্রিয়াং॥ যথা পরস্বে চৌরাণাং যথা জারে জযোষিতাং। বিদুষাঞ্চ যথা শাস্ত্রে বাণিজ্যে বণিজাং যথা। তথা শশ্বন্মনঃ কান্তে সাধ্বীনাং যোষিতাং প্রভো॥ ইত্যুক্ত্বা মনসাদেবী পপাত স্বামিনঃ পাদে। ক্ষণং চকার ক্রোড়ে তাং কৃপয়া স কৃপানিধিঃ॥ নেত্রোদকেন মনসাং স্নাপয়ামাস তাং মুনিঃ। সাশ্রুণা চ মুনেঃ ক্রোড়ং সিষেচ ভেদকাতরা॥ তদা জ্ঞানেন তৌ দ্বৌ চ

বিশোকৌ চ বভূবতুঃ। স্মারং স্মারং পদাম্ভোজং কৃষ্ণস্য পরমাত্মনঃ ॥ জগাম তপসে বিপ্রঃ স্বকান্তাং সম্বোধ্য চ। জগাম মনসা শম্ভোঃ কৈলাসং মন্দিরং গুরোঃ॥॥ পার্ব্বতী বোধয়ামাস মনসাং শোক কর্ষিতাং। শিব শ্চাতীব জ্ঞানেন শিবেন চ শিবালয়ে ॥ সুপ্রশস্তদিনে সাধ্বী সুসুবে মঙ্গল ক্ষণে। নারায়ণাংশং পুত্রঞ্চ জ্ঞানিনাং যোগিনাং গুরুং ॥ গর্ভস্থিতো মহাজ্ঞানং শ্রুত্বা শঙ্কর বক্তুতঃ। স বভূব চ যোগীন্দ্রো যোগিনাং জ্ঞানিনাং গুরুঃ ॥ জাতকং কারয়ামাস বাচয়ামাস মঙ্গলং। বেদাংশ্চ পাঠয়ামাস শিবায় চ শিবঃ শিশোঃ॥ রত্ন ত্রিকোটি লক্ষঞ্চ ব্রাহ্মণেভ্যো দদৌ শিবঃ। পার্ব্বতী চ গবাং লক্ষং রত্নানি বিবিধানি চ ॥ শম্ভুশ্চ চতুরো বেদান্ বেদাঙ্গানীতরাং স্তথা। বালকং পাঠয়ামাস জ্ঞানং মৃত্যুঞ্জয়ং পরং ॥ ভক্তি রস্তি স্বকান্তে চাভীষ্টদেবে গুরৌ হরে। যস্যাস্তে তেন তৎপুত্রো বভূবাস্তীক এব চ ॥ জগাম তপসে বিষ্ণোঃ পুষ্কং শঙ্করাজ্ঞয়া। সংপ্রাপ্য চ মহামন্ত্রং ততশ্চ পরমাত্মনঃ ॥ দিব্যং বর্ষ ত্রিলক্ষঞ্চ তপস্তপ্তা তপোধনঃ। আজগাম মহাযোগী নমস্কর্তুং শিবং প্রভুং ॥ শঙ্করঞ্চ নমস্কৃত্য কৃত্বা চ বালকং পরঃ। সাচাজগাম মনসা কশ্যপস্যাশ্রমং পিতুঃ ॥ তাং স পুত্রাং সুতাং দৃষ্ট্বা মুদং প্রাপ প্রজাপতিঃ। শতলক্ষঞ্চ রত্নানাং ব্রাহ্মণেভ্যো দদৌ মুনে ॥ ব্রাহ্মণান্ ভোজয়ামাস সো ৎসংখ্যান্ শ্রেয়সে শিশোঃ। অদিতিশ্চ দিতিশ্চান্যা মুদং প্রাপুঃ পরস্তথা ॥ সা সপুত্রা চ সুচিরং তস্থৌ তাতালয়ে তদা। তদীয়ং পুনরাখ্যানং বক্ষ্যামি তন্নিশাময় ॥ ॥ তস্যা মাহাত্ম্যং যথা। অথাভিমন্যু তনয়ে ব্রহ্মশাপঃ পরীক্ষিতে। বভূব সহসা ব্রহ্মন দৈবদোষেণ কর্ম্মণা ॥ সপ্তাহে সমতীতে তু তক্ষক স্ত্বাঞ্চ ভোক্ষ্যতে। শশাপ শৃঙ্গী নৃপতিং কৌশিক্যাশ্চ জলেন চ ॥ রাজা শ্রুত্বা তৎ প্রবৃত্তিং গঙ্গাদ্বারং জগাম সঃ। তত্র তস্থৌ চ সপ্তাহং শুশ্রাব ধর্ম্মসংহিতাং ॥ সপ্তাহে সমতীতে তু গচ্ছন্তং তক্ষকং পথি। ধন্বন্তরি নৃপং ভোক্তুং দদর্শ গামুকো নৃপং ॥ তয়ো র্বভূব সম্বাদঃ সুপ্রীতিশ্চ পরস্পরং। ধন্বন্তরি র্মণিং প্রাপ তক্ষকঃ স্বেচ্ছয়া দদৌ ॥ স যযৌ তং গৃহীত্বা চ তুষ্টঃ প্রহৃষ্ট মানসঃ।

তক্ষকো ভক্ষয়ামাস নৃপঞ্চ মঞ্চক স্থিতং ॥ রাজা জগাম বৈকুণ্ঠং স্মারং স্মারং হরিং গুরুং। সৎকারং কারয়ামাস পিতু র্জন্মেজয়ঃ শুচা ॥ রাজা চকার যজ্ঞঞ্চ সর্পসত্রং ততো মুনে। প্রাণাং স্তত্যাজ সর্পাণাং সমূহো ব্রহ্ম তেজসা ॥ স তক্ষকশ্চ ভীতশ্চ মহেন্দ্রং শরণং যযৌ। সেন্দ্রঞ্চ তক্ষকং হন্তুং বিপ্রবর্গঃ সমুদ্যতঃ ॥ অথ দেবাশ্চ মুনয শ্চাযযু র্মনসান্তিকং। তান্তুষ্টাব মহেন্দ্রশ্চ ভযকাতর বিহ্বলঃ ॥ তত আস্তীক আগত্য যজ্ঞঞ্চ মাতু রাজ্ঞযা। মহেন্দ্র তক্ষক প্রাণান্ যযাচে ভূমিপং বরং ॥ দদৌ বরং নৃপশ্রেষ্ঠঃ কৃপযা ব্রাহ্মণাজ্ঞযা। যজ্ঞং সমাপ্য বিপ্রেভ্যো দক্ষিণাঞ্চ দদৌ মুদা ॥ বিপ্রাশ্চ মুনযো দেবা গত্বা চ মনসান্তিকং। মনসাং পূজযামাসু স্তুষ্টুবুশ্চ পৃথক্ পৃথক্ ॥ শক্রঃ সম্ভৃত সম্ভারো ভক্তি যুক্তঃ সদা শুচিঃ। মনসাং পূজযামাস তুষ্টাব পরমাদরং ॥ দত্ত্বা ষোড়শোপচারং বলিঞ্চ তৎপ্রিযন্তদা। প্রদদৌ পরিতুষ্টশ্চ ব্রহ্ম বিষ্ণু শিবাজ্ঞযা ॥ সংপূজ্য মনসাদেবীং প্রযযুঃ স্বালযঞ্চ তে। ইত্যেবং কথিতং সর্বং কিং ভূযঃ শ্রোতুমিচ্ছসি ॥ * ॥ ইন্দ্রকৃত মনসা পূজা স্তোত্রে যথা। নারদ উবাচ। কেন তুষ্টাব স্তোত্রেণ মহেন্দ্রো মনসাং সতীং। পূজা বিধি ক্রমং তস্যাঃ শ্রোতুমিচ্ছামি তত্ত্বতঃ ॥ শ্রীনারাযণ উবাচ। সুস্নাতঃ শুচিরাচান্তো ধৃত্বা ধৌতে চ বাসসী। রত্ন সিংহাসনে দেবীং বাসযামাস ভক্তিতঃ ॥ স্বর্গগঙ্গাজলেনৈব বহুজ মুস্থিতেন চ। স্নাপযামাস মনসাং মহেন্দ্রো বেদ মন্ত্রতঃ ॥ বাসসী বাসযামাস বহ্নি শুদ্ধে মনোহরে। সর্বাঙ্গে চন্দনং দত্ত্বা পাদ্যার্ঘ্যং ভক্তি সংযুতঃ ॥ গণেশঞ্চ দিনেশঞ্চ বহ্নিং বিষ্ণুং শিবং শিবাং। সংপূজ্যাদৌ দেব ষট্কং পূজযামাস তাং সতীং ॥ ওঁ হ্রীং শ্রীং মনসাদেব্যৈ স্বাহেত্যেবঞ্চ মন্ত্রতঃ। দশাক্ষরেণ মূলেন দদৌ সর্বং যথোচিতং ॥ দত্ত্বা ষোড়শোপচারং দুর্লভং দুর্লভাং হরিঃ। ভক্ত্যা চ পূজযামাস ব্রহ্মণা প্রেরিতো মুদা ॥ বাদ্যং নানা প্রকারঞ্চ বাদযামাস তত্র বৈ। বভূব পুষ্প বৃষ্টিশ্চ নভসো মনসোপরি ॥ দেব বিপ্রাজ্ঞযা তত্র ব্রহ্ম বিষ্ণু শিবাজ্ঞযা। তুষ্টাব সাশ্রুনেত্রশ্চ পুলকাঞ্চিত বিগ্রহঃ ॥ মহেন্দ্র উবাচ। দেবিং ত্বাং স্তোতুমিচ্ছামি সাধ্বীনাং প্রবরাং

বরা°। পরাৎপরাঞ্চ পরমা° নহি স্তোতু° ক্ষমো হধুনা ॥ স্তোত্রাণা° লক্ষণ° বেদে স্বভাবাখ্যান তৎ পর°। ন ক্ষমঃ প্রকৃত° বক্তু° গুণানা° তব সুব্রতে ॥ শুদ্ধ সত্ত্ব স্বরূপাত্ব° কোপ হিংসা বিবর্জ্জিতা। নচ শপ্তো মুনি স্তেন ত্যক্তযা চ ত্বযা যতঃ ॥ ত্ব° মযা পূজিতা সাধ্বী জননী চ যথা হদিতিঃ। দযা রূপা চ ভগিনী ক্ষমা রূপা যথা প্রসূঃ ॥ ত্বযা মে রক্ষিতাঃ প্রাণাঃ পুত্রদারা সুরেশ্বরি। অহ° করোমি ত্বা° পূজ্যা° প্রীতিশ্চ বর্দ্ধতে সদা ॥ নিত্যা যদ্যপি ত্ব° পূজ্যা ভবে হত্র জগদম্বিকে। তথাপি তব পূজাঞ্চ বর্দ্ধযামি চ সর্ব্বতঃ ॥ যে ত্বা মাষাঢ সংক্রান্ত্যা° পূজযিষ্যন্তি ভক্তিতঃ। পঞ্চম্যা° মনসাখ্যাযা মীশা° ত্বা° বা দিনে দিনে ॥ পুত্র পৌত্রাদয স্তেষা° বর্দ্ধন্তে চ ধনানি চ। যশস্বিনঃ কীর্ত্তিমন্তো বিদ্যাবন্তো গুণান্বিতাঃ ॥ যে ত্বা° ন পূজযিষ্যন্তি নিন্দন্ত্যজ্ঞানতো জনাঃ। লক্ষ্মীহীনা ভবিষ্যন্তি তেষা° নাগভয° সদা ॥ ত্ব° স্বয° স্বর্গ লক্ষ্মীশ্চ বৈকুণ্ঠে কমলালযা। নারাযণাংশো ভগবান্ জরৎকারু মুনীশ্বরঃ ॥ তপসা তেজসা ত্বাঞ্চ মনসা সসৃজে পিতা। অস্মাক° রক্ষণাযৈব তেন ত্ব° মনসাভিধা ॥ মনসাদেবিতু° শক্তা স্বাত্মনা সিদ্ধযোগিনী। তেন ত্ব° মনসাদেবী পূজিতা বন্দিতা ভবে ॥ যা° ভক্ত্যা মনসা দেবাঃ পূজযন্ত্যনিশ° ভৃশ°। তেন ত্বা° মনসা° দেবী° প্রবদন্তি পুরাবিদঃ ॥ সত্ত্ব রূপা চ দেবি ত্ব° শশ্বৎ সত্ত্ব নিষেবযা। যোহি য° ভাবযেন্নিত্য° স ত° প্রাপ্নোতি তৎসমঃ ॥ ইন্দ্রশ্চ মনসা° জ্ঞাত্বা গৃহীত্বা ভগিনীঞ্চ তা°। প্রজগাম স্বভবন° ভূষা বাসঃ পরিচ্ছদা° ॥ পুত্রেণ সার্দ্ধ° সা দেবী চির° তস্থৌ পিতুর্গৃহে। ভ্রাতৃভিঃ পূজিতা শশ্বন্মান্যা বন্দ্যা চ সর্ব্বতঃ ॥ গোলোকাৎ সুরভী ব্রহ্মন্ তত্রাগত্য সুপূজিতা°। তা° স্নাপযিত্বা ক্ষীরেণ পূজযামাস সাদর° ॥ জ্ঞানঞ্চ কথযামাস গোপ্য° সর্ব্ব° সুদুর্লভ°। তযা দেব্যা পূজিতা সা স্বর্লোকঞ্চ পুনর্যযৌ ॥ ইদ° স্তোত্র° পুণ্যবীজ° তা° সংপূজ্য চ যঃ পঠেৎ। তস্য নাগ ভয° নাস্তি তস্য বংশোদ্ভবস্য চ ॥ বিষ° ভবেৎ সধ্যাতুল্য° সিদ্ধ স্তোত্রো যদা ভবেৎ। পঞ্চলক্ষ জপে নৈব সিদ্ধ স্তোত্রো ভবেন্নরঃ ॥ সর্পশাযী ভবেৎ সোপি নিশ্চিত° সর্প

বাহনঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪৩ অধ্যায়ঃ ॥ * ॥ ধন্বন্তরিকৃত মনসা ধ্যান পূজাদি যথা। ধন্বন্তরিরুবাচ। ইহাগচ্ছ জগদ্গৌরি গৃহাণ মম পূজনং। পূজ্যা ত্বং ত্রিষু লোকেষু পরা কশ্যপকন্যকে ॥ ত্বয়া জিতং জগৎ সর্ব্বং দেবি বিষ্ণুস্বরূপয়া। তেন তে হস্ত্র প্রযোগশ্চ ন কৃতো রণ ভূমিষু ॥ ইত্যুক্ত্বা সংযতো ভূত্বা ভক্তি নম্রাত্মকন্ধরঃ। গৃহীত্বা শুক্লসুমনং ধ্যানং কর্ত্তুং সমুদ্যতঃ। চারুচম্পক বর্ণাভাং সর্ব্বাঙ্গ সুমনোহরাং। ঈষদ্ধাস্য প্রসন্নাস্যাং শোভিতাং সূক্ষ্মবাসসা ॥ কবরী ভার শোভাঢ্যাং রত্নাভরণ ভূষিতাং। সর্ব্বাভয়প্রদাং দেবীং ভক্তানুগ্রহ কাতরাং ॥ সর্ব্ববিদ্যাপ্রদাং শান্তাং সর্ব্ববিদ্যা বিশারদাং। নাগেন্দ্রবাহিনীং দেবীং ভজে নাগেশ্বরীং পরাং ॥ ধ্যাত্বৈবং কুসুমং দত্ত্বা নানাদ্রব্য সমন্বিতং। দত্ত্বা ষোড়শোপচারং পূজয়ামাস তাং প্রিয়ে ॥ স্তোত্রঞ্চকার ভক্ত্যা চ পুলকাঞ্চিত বিগ্রহঃ। পুটাঞ্জলিযুতো ভূত্বা ভক্তি নম্রাত্মকন্ধরঃ ॥ * ॥ ধন্বন্তরিরুবাচ। নমঃ সিদ্ধিস্বরূপায়ৈ সিদ্ধিদায়ৈ নমো নমঃ। নমঃ কশ্যপকন্যায়ৈ বরদায়ৈ নমো নমঃ ॥ নমঃ শঙ্করকন্যায়ৈ শঙ্করায়ৈ নমো নমঃ। নমস্তে নাগবাহিন্যৈ নাগেশ্বর্য্যৈ নমো নমঃ ॥ নমো নাগভগিন্যৈ চ যোগিন্যৈ চ নমো নমঃ। নমো হস্তীক জনন্যৈ চ জনন্যৈ জগতাং নমঃ ॥ নমো জরৎকারু নাম্নে জরৎকারুস্ত্রিয়ৈ নমঃ ॥ নমশ্চিরং তপস্বিন্যৈ সুখদায়ৈ নমো নমঃ ॥ নমস্তপঃস্বরূপায়ৈ ফলদায়ৈ নমো নমঃ ॥ সুশীলায়ৈ চ সাধ্ব্যৈ চ শান্তায়ৈ তে নমো নমঃ ॥ ইত্যেবং স্তুত্বা ভক্ত্যা চ প্রণনাম পুনঃ পুনঃ। তুষ্টা দেবী বরং দত্ত্বা স্বপুরং স্বালয়ং যযৌ ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ধন্বন্তরি দর্পভঙ্গে মনসাবিজয়ো নাম ৫১ অধ্যায়ঃ ॥

মনসাদেবী স্ত্রী মনসা। ইতি জটাধরঃ ॥ অস্যা বিবরণং পূর্ব্বশব্দে দ্রষ্টব্যং ॥

মনসিজঃ পুং কামদেবঃ। ইত্যমরঃ ॥ মনোজাতে ত্রি ॥

মনসিশয়ঃ পুং কামদেবঃ। ইতি হলায়ুধঃ ॥

মনস্কারঃ পুং মনসঃ সুখাদিঃ। তৎপর্য্যায়ঃ। চিত্তাভোগঃ ২। ইত্যমরঃ ॥ দ্বে মনসঃ সুখাদৌ তৎপর-

স্ত্রে একস্মিন বিষয়ে মনসঃ পুনঃ পুনঃ প্রবৃত্তি রাভোগঃ। আভোগ স্তাৎপর্য্য মিতি সর্ব্বানন্দঃ। ইত্যন্যে। ব্যাপার ইত্যপরে। বাঞ্ছিতবস্তু প্রাপ্ত্যা চিত্তস্য নিরাকাঙ্ক্ষতা। আভোগঃপরিপূর্ণতেতি পরে। অনাগত চিন্তনাদি রূপো মনস্কার ইত্যপরে। মনসো মনসিবা কারো নিশ্চযো মনস্কারঃ সেতুকথেতি সঃ। মনসি করণং মনসিকারঃ ইত্যপি দৃশ্যতে অত্র বাহুলস্যাৎ সপ্তম্যা অলুক্। ইতি ভর্ত্তা মাথাং ভরতঃ॥

মনস্তাপঃ পুং মনঃপীড়া। যথা। মনস্তাপং ন কুর্ব্বীত আপদং প্রাপ্য পার্থিবঃ। সমবুদ্ধিঃ প্রসন্নাত্মা সুখ দুঃখে সমো ভবেৎ॥ ইতি গারুড়ে ১১১ অধ্যায়ঃ॥ অনুতাপঃ। যথা। ব্রাহ্মণেন যদা দৈবাৎ ছিন্নং যজ্ঞোপবীতকং। মনস্তাপেন শুদ্ধিঃস্যা দাপস্তম্বোহব্রবীন্মুনিঃ॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥

মনস্তালঃ পুং দুর্গায়াঃসিংহঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মনস্থঃ ত্রি মনঃস্থিতবস্তু। যথা। আজন্মং মন্মনস্থং যদপি মনাগনো মধ্যতঃ ক্বাপি নাভূৎ। তত্তে পণ্য প্রতাপাদিহ শরদি সতঃ সিদ্ধমা ভূৎ সুখেন। ইত্যুদ্ভটঃ॥

মনস্বিনী স্ত্রী প্রশস্তমনাঃ স্ত্রী। যথা। মনস্বিনী মানবিঘাত দক্ষং তদেব জাতং বচনং স্মরস্য। ইতি কুমারসম্ভবে॥

মনস্বী পুং শরভঃ। ইতি রাজনির্ঘণ্টঃ॥ প্রশস্তমনোযুক্তে ত্রি। যথা। মনস্বি গর্হিতঃ পন্থাঃ সমারোঢ়ুমসাম্প্রতং। ইতি কারকটীকায়াং দুর্গাদাসঃ॥

মনাক্ অব্য অল্পং। ইত্যমরঃ॥ মন্দঃ। ইতি মেদিনী॥

মনাকা স্ত্রী হস্তিনী। ইত্যুণাদিকোষঃ॥

মনাক্করং ক্লী নঙ্গল্যা। নল্লিকাগন্ধযুক্তাগুরু। ইতি শব্দচন্দ্রিকা॥ ঈষৎকারকে ত্রি॥

মনাগী স্ত্রী মনোঃপত্নী। ইতি জটাধরঃ॥

মনাবী স্ত্রী মনুপত্নী। ইতি মুগ্ধবোধ ব্যাকরণং॥

মনিতং ত্রি জ্ঞাতং। ইত্যমরঃ॥

মনীকং ক্লী অঞ্জনং। ইত্যুণাদিকোষঃ

মনীষা স্ত্রী বুদ্ধিঃ। ইত্যমরঃ॥

মনীষী পুং পণ্ডিতঃ। ইত্যমরঃ॥ বুদ্ধিযুক্তে ত্রি॥

মনুঃ স্ত্রী পৃক্কা। ইতি রাজনির্ঘণ্টঃ॥

মনুপত্নী । ইতি স্ত্রী পুংলিঙ্গ সংগ্রহে অমরঃ ॥

মনুঃ পুং ব্রহ্মণঃপুত্রঃ । স চ প্রজাপতি র্ধর্ম্মশাস্ত্রবক্তা চ । ইতি লিঙ্গাদি সংগ্রহে অমরঃ ॥ মনুষ্যঃ । ইতি শব্দরত্নাবলী ॥ জিনভেদঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ মন্ত্রঃ । ইতি জটাধরঃ ॥ * ॥ প্রতিকল্পে চতুর্দ্দশ মনবো ভবন্তি তেষাং নামানি যথা । স্বায়ম্ভুবঃ ১ স্বারোচিষঃ ২ উত্তমঃ ৩ তামসঃ ৪ রৈবতঃ ৫ চাক্ষুষঃ ৬ এতে গতাঃ । বৈবস্বতঃ ৭ বর্ত্তমানো হ্যং । সাবর্ণিঃ ৮ দক্ষসাবর্ণিঃ ৯ ব্রহ্মসাবর্ণিঃ ১০ ধর্ম্মসাবর্ণিঃ ১১ রুদ্রসাবর্ণিঃ ১২ দেবসাবর্ণিঃ ১৩ ইন্দ্রসাবর্ণিঃ ১৪ এতে ভবিষ্যন্তি । ইতি শ্রীভাগবতে ৮ স্কন্ধে ১ অধ্যায়ঃ ॥ * ॥ এতেষামুৎপত্তির্যথা । আদ্যো মনু র্ব্রহ্মপুত্রঃ শতরূপাপতি র্ব্রতী । ধর্ম্মিষ্ঠানাং বরিষ্ঠশ্চ গরিষ্ঠো মনুষু প্রভুঃ ॥ স্বায়ম্ভুবঃ শম্ভুশিষ্যো বিষ্ণুব্রতপরায়ণঃ । জীবন্মুক্তো মহাজ্ঞানী ভবতুঃ প্রপিতামহঃ ॥ সংপ্রাপ কৃষ্ণদাস্যঞ্চ গোলোকঞ্চ জগাম সঃ । দৃষ্ট্বা মুক্তং স্বপুত্রঞ্চ প্রহৃষ্টশ্চ প্রজাপতিঃ ॥ তুষ্টাব শঙ্করং তুষ্টঃ সসৃজে মনুমন্যকং । স চ স্বয়ম্ভু পুত্রশ্চ পুত্রঃ স্বায়ম্ভুবো মনুঃ ॥ স্বারোচিষো মনুশ্চৈব দ্বিতীয়ো বহ্নিনন্দনঃ । রাজা বদান্যো ধর্ম্মিষ্ঠঃ স্বায়ম্ভুব সমো মহান্ ॥ প্রিয়ব্রত সুতাবন্যৌ দ্বৌ মনূ ধর্ম্মিণাং বরৌ । তৌ তৃতীয় চতুর্থৌ চ বৈষ্ণবৌ তামসোত্তমৌ ॥ তৌ চ শঙ্কর শিষ্যৌ চ কৃষ্ণভক্তিপরায়ণৌ । ধর্ম্মিষ্ঠানাং বরিষ্ঠশ্চ রৈবতঃ পঞ্চমো মনুঃ ॥ ষষ্ঠশ্চ চাক্ষুষো জ্ঞেয়ো বিষ্ণুভক্তিপরায়ণঃ । শ্রাদ্ধদেবঃ সূর্য্যসুতো বৈষ্ণবঃ সপ্তমো মনুঃ ॥ সাবর্ণিঃ সূর্য্যতনয়ো বৈষ্ণবো মনুরষ্টমঃ । নবমো দক্ষসাবর্ণি র্বিষ্ণুব্রতপরায়ণঃ ॥ দশমো ব্রহ্মসাবর্ণি র্ব্রহ্মজ্ঞানবিশারদঃ ॥ ততশ্চ ধর্ম্মসাবর্ণি র্মনুরেকাদশঃ স্মৃতঃ ॥ ধর্ম্মিষ্ঠশ্চ বরিষ্ঠশ্চ বৈষ্ণবানাং সদা ব্রতী । জ্ঞানী চ রুদ্রসাবর্ণি র্মনুশ্চ দ্বাদশঃ স্মৃতঃ ॥ ধর্ম্মাত্মা দেবসাবর্ণি র্মনুরেব ত্রয়োদশঃ । চতুর্দ্দশো মহাজ্ঞানী চেন্দ্রসাবর্ণিরেব চ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ ॥ * ॥ অপিচ । স্বায়ম্ভুবঃ ১ । স চ গায়ত্র্যাং ব্রহ্মণো জাতঃ । অস্য পুত্রাঃ দশ । আগ্নীধ্রঃ । অগ্নিবাহুঃ । রিফুঃ । সবলঃ । জ্যোতিষ্মান্ । দ্যুতিমান্ । হব্যঃ । মেধাঃ । মেধাতিথিঃ । বসুশ্চ ॥

স্বারোচিষঃ ২। অস্য পুত্রা শ্চত্বারঃ। নভঃ। নভস্যঃ। প্রসৃতিঃ। ভানবশ্চ॥ ঔত্তমিঃ ৩। অস্য পুত্রাঃ দশ। ঈষঃ। ঊর্জ্জঃ। তূর্জ্জঃ। শুচিঃ। শুক্রঃ। মধঃ। মাধবঃ। নভস্যঃ। নভঃ। সহশ্চ॥ তামসঃ ৪। তস্য পুত্রাঃ দশ। অকল্মষঃ। তপোধন্বী। তপোমূলঃ। তপোধনঃ। তপোরতিঃ। তপস্যঃ। তপোদ্যুতিঃ। পরন্তপঃ। তপোভাগী। তপোযোগী চ॥ রৈবতঃ ৫। তস্য পুত্রাঃ দশ। অরুণঃ। তত্ত্বদর্শী। বিত্তবান্। হব্যপঃ। কপিঃ। মুক্তঃ। নিরুৎসুকঃ। সত্ত্বঃ। নির্ম্মোহঃ। প্রকাশকশ্চ॥ চাক্ষুষঃ ৬। সচ ধ্রুবপৌত্রাৎ রিপুঞ্জয়াৎ ব্রহ্মদৌহিত্র্যাং বীরণ কন্যায়াং বৈরিণ্যাং জাতঃ। তস্য ভার্য্যা নড়ুলা। তস্য পুত্রাঃ দশ। উরুঃ। পুরুঃ। শতদ্যুম্নঃ। তপস্বী। সত্যবাক্। কবিঃ। অগ্নিষ্টপ্। অতিরাত্রঃ। স্বচ্ছন্দঃ। অভিমন্যুশ্চ॥ বৈবস্বতঃ ৭। সচ সূর্য্যাৎ সংজ্ঞায়াং জাতঃ। তস্য পুত্রাঃ দশ। ইলঃ। ইক্ষ্বাকুঃ। নৃশনাভঃ। অরিষ্টঃ। রিষ্টঃ। নরিষ্যন্তঃ। করূষঃ। শর্য্যাতিঃ। পৃষধ্রঃ। নাভাগশ্চ॥ সাবর্ণিঃ ৮। স চ সূর্য্যাৎ ছায়ায়াং জাতঃ। তস্য পুত্রাঃ দশ। ধৃতিঃ। বরীয়ান্। যবসঃ। সুবর্ণঃ। বৃষ্টিঃ। চরিষ্ণুঃ। ঈড্যঃ। সুমতিঃ। বসুঃ। শুভ্রশ্চ॥ রৌচ্যঃ ৯। অসৌ রুচেঃ প্রজাপতেঃ পুত্রঃ॥ ভৌত্যঃ ১০। অসৌ ভূতিনামক প্রজাপতেঃ পুত্রঃ॥ মেরুসাবর্ণিঃ ১১। অসৌ ব্রহ্মণঃ পুত্রঃ॥ ঋতুঃ ১২॥ ঋতুধামা ১৩॥ বিষ্বক্সেনঃ ১৪॥ ইতি মাৎস্যে নবমাধ্যায়াবধি একবিংশত্যধ্যায় পর্য্যন্তং॥

মনজঃ পুং মনুষ্যঃ। ইত্যমরঃ॥

মনজী স্ত্রী মানুষী। ইতি জটাধরঃ॥

মনুভূঃ পুং মনুষ্যঃ। ইতি শব্দচন্দ্রিকা॥

মনুরাট্ পুং কুবেরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মনুষী স্ত্রী মানুষী। ইতি শব্দরত্নাবলী॥

মনুষ্যঃ পুং মনোরপত্যং। তৎপর্য্যায়ঃ। মানুষঃ ২ মর্ত্ত্যঃ ৩ মনুজঃ ৪ মানবঃ ৫ নরঃ ৬। ইত্যমরঃ॥ ভূমিজঃ ৭ দ্বিপদঃ ৮ চেতনঃ ৯ ভূস্পৃক্ ১০। ইতি রাজনির্ঘণ্টঃ॥ মনুঃ ১১ পঞ্চজনঃ ১২ পুরুষঃ ১৩ পুরুষঃ ১৪ পুমান্ ১৫ না ১৬। ইতি শব্দরত্নাবলী॥ মর্ত্তঃ ১৭ বিট্ ১৮। ইতি জটাধরঃ॥ *॥ স তু অর্ব্বাক্স্রোতঃ ব্রহ্মণো নবমঃ সর্গঃ একবিধশ্চ।

যথা। অর্ব্বাক্স্রোতস্তু নবমঃ ক্ষত্ত রেকবিধো নৃণাং। রজোধিকাঃ কর্ম্মপরা দুঃখে চ সুখমানিনঃ॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১০ অধ্যায়ঃ॥ ॥ অপিচ। তস্যাপি ধ্যায়তঃ সর্গং সত্যাভিধ্যায়িনস্ততঃ। প্রাদুর্ব্বভূব চাব্যক্তাদর্ব্বাকস্রোতস্তু সাধকঃ॥ যস্মাদর্ব্বাক প্রবর্ত্তন্তে ততোঽর্ব্বাকস্রোতসস্তু তে। তেচ প্রকাশবহুলাস্তমোদ্রিক্ত রজোধিকাঃ॥ তস্মাত্তে দুঃখ বহুলা ভূয়ো ভূয়শ্চ কারিণঃ। প্রকাশা বহিরন্তশ্চ মনুষ্যাঃ সাধকাস্তু তে॥ ইতি বহ্নিপুরাণে সর্গকথন নামাধ্যায়ঃ॥ ॥ মনুষ্য জন্ম মুক্তি কারণং যথা। বিমুক্তি হেতুকান্যা তু নরযোনিঃ কৃতাত্মনাং। নানুশ্চন্তি হি সংসারে বিভ্রান্ত মনসো গতাঃ॥ জীবা মানুষ্যতাং মন্যে জন্মনা নমুতৈরপি। তদীদৃক্ দুর্লভং প্রাপ্য মুক্তি দ্বারং বিচেতসঃ॥ পতন্তি ভূয়ঃ সংসারে বিষ্ণুমায়া বিমোহিতাঃ। সুদুস্তরাপি দুঃসাধ্যা মায়া কৃষ্ণস্য মোহনী॥ ইতি তত্রৈব শুদ্ধিব্রত নামাধ্যায়ঃ॥ ॥ মনুষ্যাণাং পিতা মাতা ভ্রাতাচ হরির্যথা। বিশেষতো মনুষ্যাণাং পিতা মাতা জনার্দ্দনঃ। ভ্রাতা চ সর্ব্বলোকানাং বাৎসল্য গুণসাগরঃ॥ ইতি পাদ্মোত্তরখণ্ডে ৭৮ অধ্যায়ঃ॥ ॥ স ত্রিবিধো যথা। যজন্তে সাত্ত্বিকা দেবান্ যক্ষ রক্ষাংসি রাজসাঃ। প্রেতান্ ভূতগণাংশ্চান্যে যজন্তে তামসা জনাঃ॥ ইতি শ্রীভগবদ্গীতায়াং ১৭ অধ্যায়ঃ॥ ঊর্দ্ধং গচ্ছন্তি সত্ত্বস্থা মধ্যে তিষ্ঠন্তি রাজসাঃ। জঘন্য গুণবৃত্তিস্থা অধোগচ্ছন্তি তামসাঃ॥ ইতি তত্রৈব ১৪ অধ্যায়ঃ॥

মনুষ্যধর্ম্মা পুং কুবেরঃ। ইত্যমরঃ॥

মনুষ্যযজ্ঞঃ পুং অতিথিপূজনং। ইতি দায়ভাগ দর্শনাৎ॥

মনুষ্যা স্ত্রী মানবস্ত্রীজাতিঃ। তৎপর্য্যায়ঃ। মানুষী ২ নারী ৩ মানবী ৪। ইতি শব্দরত্নাবলী॥ মর্ত্ত্যা ৫ মনুজী ৬ নরী ৭। ইতি জটাধরঃ॥

মনোগুপ্তা স্ত্রী মনঃশিলা। ইত্যমরঃ

মনোজন্মা পুং কন্দর্পঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মনোজবঃ পুং বিষ্ণুঃ। যথা। মনোজব স্তীর্থকরো বসুরেতা বসুপ্রদঃ। ইতি মহাভারতে দানধর্ম্মে সহস্রনাম স্তোত্রং॥

মনোজবঃ ত্রি পিতৃতুল্যঃ। তৎপর্য্যায়ঃ। পিতৃসন্নিভঃ ২। ইত্যমর॥ অতিশয়বেগবান্॥ মনসো

বেগে পুং। ইতি ব্যাকরণং ॥

মনোজবসঃ ত্রি পিতৃসন্নিভঃ। ইত্যমরটীকায়াং স্বামী ॥

মনোজবা স্ত্রী অগ্নিজিহ্বাবৃক্ষঃ। ইতি জটাধরঃ ॥

মনোজবৃদ্ধিঃ পুং কামবৃদ্ধিক্ষুপ ইতি রাজনির্ঘণ্টঃ ॥

মনোজ্ঞং ক্লী সরলকাষ্ঠং। ইতি রত্নমালা ॥

মনোজ্ঞং ত্রি মনোহরং। তৎপর্য্যায়ঃ ।সুন্দরং ২ রুচিরং ৩ চারু ৪ সুষমং ৫ সাধু ৬ শোভনং ৭ কান্তং ৮ মনোরমং ৯ রুচ্যং ১০ মঞ্জু ১১ মঞ্জুলং ১২। ইত্যমরঃ ॥ মনোহরং ১৩ বন্ধুরং ১৪ বন্ধুরং ১৫ পেশলং ১৬ পেষলং ১৭ সুষমং ১৮ বামং ১৯ রুচ্যং ২০ অভিরামং ২১ নন্দিতং ২২। ইতি শব্দরত্নাবলী ॥

মনোজ্ঞা স্ত্রী মনঃশিলা। ইতি রত্নমালা ॥ রাজপুত্রী। ইতি জটাধরঃ ॥ বন্ধ্যাকর্কোটকী ॥ আবর্ত্তকী ॥ স্থূলজীরকঃ ॥ জাতী ॥ মদিরা। ইতি রাজনির্ঘণ্টঃ ॥

মনোভবঃ পুং কন্দর্পঃ। ইতি হলায়ুধঃ ॥

মনোভূঃ পুং কামদেবঃ। ইতি শব্দরত্নাবলী ॥

মনোযোনিঃ পুং কামদেবঃ। ইতি হেমচন্দ্রঃ ॥

মনোরথঃ পুং ইচ্ছা। ইত্যমরঃ ॥

মনোরমং ত্রি মনোজ্ঞং। ইত্যমরঃ ॥

মনোরমা স্ত্রী গোরোচনা। ইতি রাজনির্ঘণ্টঃ ॥ বুদ্ধশক্তিবিশেষঃ। তৎপর্য্যায়ঃ। তারা ২ মহাশ্রীঃ ৩ ওঙ্কারা ৪ স্বাহা ৫ শ্রীঃ ৬ তারিণী ৭ জয়া ৮ অনন্তা ৯ শিবা ১০ লোকেশ্বরাত্মজা ১১ খদূরবাসিনী ১২ ভদ্রা ১৩ বৈশ্যা ১৪ নীলসরস্বতী ১৫ শঙ্খিনী ১৬ মহাতারা ১৭ বসুধারা ১৮ ধনন্দদা ১৯ ত্রিলোচনা ২০ লোচনা ২১। ইতি ত্রিকাণ্ডশেষঃ ॥ রুচিভার্য্যা। তস্যা নামান্তরং মালিনী। সা বরুণপুত্রপুষ্করৌরসেন প্রম্লোচাপ্সরো গর্ভজা রৌচ্যমনুমাতা চ। যথা। তত স্তস্মান্নদী মধ্যাৎ সমুত্তস্থৌ মনোরমা। প্রম্লোচা নাম তন্বঙ্গী তৎ সমীপে বরাপ্সরা ॥ সাচোবাচ মহাত্মানং রুচিং সুমধুরাক্ষরং। প্রসাদবনতা সুভ্রূঃ প্রম্লোচা বৈ বরাপ্সরাঃ ॥ অতীব রূপিণী কন্যা মৎসুতা তপতাং বর। জাতা বরুণপুত্রেণ পুষ্করেণ মহাত্মনা ॥ তাং গৃহাণ ময়া দত্তাং ভার্য্যার্থং বরবর্ণিনীং। মনু র্মহামতি

ভুস্যাং সমং পুং স্যতি তে সুতঃ ॥ মার্কণ্ডেয় উবাচ। তথেতি তেন চাপ্যুক্তা তস্মাত্তোযাদ্বপুষ্মতীং ॥ উজ্জহার ততঃ কন্যাং মালিনীং নাম নামতঃ ॥ নদ্যাশ্চ পুলিনে তস্মিন্ স মুনি মুনিসত্তম। জগ্রাহ পাণিং বিধিবৎ সমানায্য মহামুনীন্ ॥ তস্যাং তস্য সুতো জজ্ঞে মহাবীর্য্যো মহামতিঃ। রৌচ্যো হ্ভবৎ পিতুর্নাম্না খ্যাতো হত্র বসুধাতলে ॥ ইতি মার্কণ্ডেয়পুরাণে রৌচ্য মন্বন্তরাখ্যানং ॥

মনোহতঃ ত্রি প্রতিহতঃ। ইত্যমরঃ॥

মনোহরং ত্রি মনোজ্ঞং। ইতি শব্দরত্নাবলী ॥ মনদাক্ষ পুং ॥ সুবর্ণে ক্লী। ইতি রাজনির্ঘণ্টঃ ॥

মনোহরা স্ত্রী জাতী ॥ স্বর্ণজূথী। ইতি রাজনির্ঘণ্টঃ ॥

মনোহর্ত্তা ত্রি মনোহরণকর্ত্তা। যথা। ব্যসনং তে হ্পনেষ্যানি ত্রিলোক্যাং যদি ভাব্যতে। তমানেষ্যে বরং যস্তে মনোহর্ত্তা তমাদিশ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ৬২ অধ্যায়ঃ ॥

মনোহারি ত্রি মনোহরং। ইত্যমর টীকায়াং স্বামী ॥ তথাহি। গাঙ্গং বারি মনোহারি মুরারি চরণচ্যুতং। ত্রিপুরারি শিরশ্চারি পাপহারি পুনাতু মাং ॥ ইতি বাল্মীকিকৃত গঙ্গাস্তোত্রং ॥

মনোহ্বা স্ত্রী মনঃশিলা। ইত্যমরঃ ॥

মন্তব্যং ত্রি মননীয়ং। ভাব্যং। যথা। আত্মা বা অরে দ্রষ্টব্যঃ শ্রোতব্যো মন্তব্যো নিদিধ্যাসিতব্যঃ। ইত্যাদি ছান্দোগ্যোপনিষৎ ॥

মন্তা পুং মন্ত্রী। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

মন্তুঃ পুং অপরাধঃ ॥ মনুষ্যঃ ॥ প্রজাপতিঃ। ইতি মেদিনী ॥ দ্বাত্রিংশদপরাধা যথা। ভগবদ্ভক্তানাংক্ষত্রিযসিদ্ধান্নভোজনং ১ অনিসিদ্ধদিনে দন্তধাবনমকৃত্বা বিষ্ণোরূপসর্পণং ২ মৈথুনং কৃত্বা অস্নাত্বা বিষ্ণোরূপসর্পণং ৩ মৃতং নরং স্পৃষ্ট্বা অস্নাত্বা বিষ্ণুকর্ম্মকরণং ৪ রজস্বলাং স্পৃষ্ট্বা অস্নাত্বা বিষ্ণুগৃহ প্রবেশনং ৫ মানবং শবং স্পৃষ্ট্বা অস্নাত্বা বিষ্ণুসন্নিধাববস্থানং ৬ বিষ্ণুং স্পৃশতঃ পায়ুবায়ু প্রযোগঃ ৭ বিষ্ণোঃ কর্ম্মস্বরতঃ পুরীষত্যাগঃ ৮ বিষ্ণুশাস্ত্রমনাদৃত্য শাস্ত্রান্তরপ্রশংসা ৯ অতিমলিনবাসঃ পরিধায় বিষ্ণুকর্ম্মাচরণং ১০ অবিধানেনাচম্য বিষ্ণোরূপস্পর্শনং ১১ বিষ্ণোরপরাধং কৃত্বা

বিষ্ণোরুপসর্পণং ১২ ক্রুদ্ধস্য বিষ্ণুস্পর্শনং ১৩ নিষিদ্ধপুষ্পেণ বিষ্ণোরর্চ্চনং ১৪ রক্তং বাসঃ পরিধায় বিষ্ণোরুপসর্পণং ১৫ অন্ধকারে দীপেন বিনা বিষ্ণোস্পর্শনং ১৬ কৃষ্ণং বস্ত্রং পরিধায় বিষ্ণোঃ কর্ম্মাচরণং ১৭ বায়সোদ্ধৃতবস্ত্রং পরিধায় বিষ্ণোঃ কর্ম্মাচরণং ১৮ বিষ্ণবে অন্নরোচ্ছিষ্টদানং ১৯ বরাহমাংসং ভুক্ত্বা বিষ্ণোরুপসর্পণং ২০ জালপাদশরীরমাংসং ভুক্ত্বা বিষ্ণোরুপসর্পণং ২১ দীপং স্পৃষ্ট্বা হস্তমপ্রক্ষাল্য বিষ্ণোঃ স্পর্শনং কর্ম্মাচরণং বা ২২ শ্মশানং গত্বা অস্নাত্বা বিষ্ণোরুপসর্পণং ২৩ পিণ্যাকং ভুক্ত্বা বিষ্ণোরুপসর্পণং ২৪ বিষ্ণবে বরাহমাংসনিবেদনং ২৫ মদ্যমাদায় স্পৃষ্ট্বা পীত্বা বা বিষ্ণুগৃহপ্রবেশনং ২৬ পরকীয়েনাশুচিনা বা বস্ত্রেণ পরিহিতেন বিষ্ণুকর্ম্মাচরণং ২৭ বিষ্ণবে নবান্নমপ্রদায় তদ্ভোজনং ২৮ গন্ধপুষ্পে অপ্রদায় ধূপদীপদানং ২৯ উপানহাবারুহ্য বিষ্ণুস্থানপ্রবেশনং ৩০ ভেরীশব্দেন বিনা বিষ্ণোঃ প্রবোধনং ৩১ অজীর্ণে সতি বিষ্ণোরুপসর্পণং ৩২। এতদপ্যপলক্ষণং তথাচ নরসিংহপুরাণে। অপরাধসহস্রাণি অপরাধশতানি চ। পদ্মনৈবেদ্যনৈবেদ্যেশঃ ক্ষমতে হেলয়ার্চ্চিতঃ॥ ইত্যাহ্নিকাচারতত্ত্বে চতুর্থযামার্দ্ধকৃত্যং॥ * ॥ অপিচ। বরাহ উবাচ। ভুক্ত্বা তু পরকীয়ান্নং তৎপরস্তন্নিবর্ত্তনঃ। প্রথমশ্চাপরাধো হয়ং ধর্ম্মবিঘ্নায় বৈ ভবেৎ॥ অভুক্ত্বা দন্তকাষ্ঠানি যস্তু মামুপসর্পতি। দ্বিতীয়শ্চাপরাধস্তু কর্ম্মবিঘ্নায় বিদ্যতে॥ গত্বা মৈথুনসংযোগে যো হনুমাং স্পৃশতে নরঃ। তৃতীয়মপরাধো হয়ং কল্পানি বসন্ধরে॥ দৃষ্ট্বা রজস্বলাং নারীং মমাকং যঃ প্রপদ্যতে। চতুর্থমপরাধন্তু দৃষ্টৈনৈব ক্ষমাম্যহং॥ স্পৃষ্ট্বা তু মৃতকং [illegible] তু অসংস্কারকৃতন্তু [illegible]। [illegible] অপরাধং ন ক্ষমামি বসুন্ধরে॥ দৃষ্ট্বা তু মৃতকং [illegible] মাং। ষষ্ঠকঞ্চাপরাধন্তু ন ক্ষমামি বসুন্ধরে॥ নাদেবার্চ্চন কালে তু পুরীষং যস্য গচ্ছতি। সপ্তমঞ্চাপরাধন্তু কল্পানি বসুন্ধরে॥ বস্তু নীলেন বস্ত্রেণ প্রাবৃতো মাং প্রপদ্যতে। অষ্টমঞ্চাপরাধন্তু কল্পানি বসুন্ধরে॥ নামেবার্চ্চন কালে তু যস্তু মিথ্যাং প্রভাষতে। নবমঞ্চাপরাধন্ন ক্ষমামি বসুন্ধরে॥ অবিধানেন মাং স্পৃশ্য যস্তু মাং প্রতিপদ্যতে। দশমঞ্চাপরাধন্তু মম চাপ্রিয়কারকং॥ ক্রুদ্ধস্তু যানি কর্ম্মাণি কুরুতে কর্ম্মকারকঃ।

একাদশাপরাধন্তু কল্পযামি বসুন্ধরে ॥ অকর্ম্মণ্যানি পুষ্পাণি যস্তু মামপকল্পযেৎ। দ্বাদশঞ্চাপরাধন্তু কল্পযামি বসুন্ধরে ॥ যস্তু রক্তেন বস্ত্রেণ কৌসুম্ভেনোপগচ্ছতি। ত্রযোদশাপরাধন্তু কল্পযামি বসুন্ধরে ॥ অন্তকালেঽপি মাং দেবি যঃ স্পৃশেচ্চ কদাচন। চতুর্দ্দশাপরাধন্তু কল্পযামি বসুন্ধরে ॥ যস্তু কৃষ্ণেন বস্ত্রেণ মম কর্ম্মাণি কারযেৎ। পঞ্চদশাপরাধানি কল্পযামি বরাননে ॥ অধৌতেন চ বস্ত্রেণ যস্তু মামুপকল্পতে। ষোড়শন্ত্বপরাধানাং কল্পযামি বরাননে ॥ স্বযমন্নন্তু যো দদ্যাদজ্ঞানাত চ মাধবি। সপ্তদশাপরাধন্তু কল্পযামি বসুন্ধরে ॥ যস্তু মৎস্যানি মাংসানি ভক্ষযিত্বা বরাননে। অষ্টাদশাপরাধানি অনুজানানি মাধবি ॥ জালপাদং ভক্ষযিত্বা যস্তু মামুপসর্পতি। একোনবিংশাপরাধং প্রতিজানামি সুন্দরি ॥ যস্তু মে দীপকং স্পৃষ্ট্বা যো মাং স্পৃশতি মাধবি। বিংশকঞ্চাপরাধানাং কল্পযামি বরাননে ॥ শ্মশানং যস্তু বৈ গত্বা যো মামেবাভিগচ্ছতি। একবিংশাপরাধানি কল্পযামি বসুন্ধরে ॥ পিণ্যাকং ভক্ষযিত্বা তু যো মামেবোপচক্রমে। দ্বাবিংশত্যাপরাধানাং তা-



ন্যহং চোপকল্পযে ॥ যস্তু বারাহমাংসানি প্রাপণেনোপপাদযেৎ। অপরাধং ত্রযোবিংশং কল্পযামি বসুন্ধরে ॥ সুরাং পীত্বাপি যো মর্ত্ত্যঃ কদাচিদপসর্পতি। অপরাধং চতুর্বিংশং কল্পযামি বসুন্ধরে ॥ যঃ কুসুম্ভঞ্চ মে শাকং ভক্ষযিত্বোপচক্রমে। অপরাধং পঞ্চবিংশং কল্পযামি বসুন্ধরে ॥ পরপ্রাবরণেনৈব যস্তু মামুপসর্পতি। অপরাধেষু ষড়্বিংশং কল্পযামি বরাননে ॥ নবান্নং যস্তু ভক্ষেত ন স দেবান্ পিতৄন্ যজেৎ। সপ্তবিংশাপরাধানি কল্পযামি গুণান্বিতে ॥ উপানহৌ চ প্রপদে তথা মেবোপচক্রমে। অষ্টাবিংশাপরাধানি কল্পযামি গুণান্বিতে ॥ শরীরং মণ্ডযিত্বা তু যো মা নাপ্নোতি মাধবি। একোনত্রিংশমপরাধং স স্বর্গেষু ন গচ্ছতি ॥ অজীর্ণেন সমাবিষ্টো যস্তু মামভিগচ্ছতি। ত্রিংশকঞ্চাপরাধানাং কল্পযামি বসুন্ধরে ॥ গন্ধপুষ্পাণ্যদত্ত্বা তু যস্তু ধূপং প্রগচ্ছতি। একত্রিংশাপরাধন্তু কল্পযামি যশস্বিনি ॥ বিনা ভেয্যাদি শব্দেন দ্বারস্যোদ্ঘাটনং মম। মহাপরাধং বিদ্যেত তদ্দ্বাত্রিংশাপরাধকং ॥ ইতি বারাহে দ্বাত্রিংশদপরাধাধ্যাযঃ ॥

মন্ত্রঃ পুং বেদভেদঃ। স চ মন্ত্র স্ব-
রূপভাগঃ ॥ গুপ্তিবাদঃ। স তু র-
হসি কর্ত্তব্যাবধারণং মন্ত্রণেতি-
খ্যাতং। ইত্যমর ভরতৌ ॥ দেবা-
দীনাংসাধনং। ইতি মেদিনী ॥*॥
তন্মন্ত্রাদ্যহষডক্ষীণং যৎ তৃতীয়া-
দ্যহগোচরং। রহস্যালোচনং ম-
ন্ত্রো রহশ্ছন্ন মুপহ্বরং॥ ইতিহেম-
চন্দ্রঃ ॥ * ॥ মন্ত্রব্যাখ্যাকৃদ্দেকন
বত্যবয়ো যথা। এতে মন্ত্র কৃতঃ
সর্ব্বে কৃৎস্নশস্তু নিবোধত। ভৃগুঃ
কাশ্যঃ পুচেতাশ্চ দধীচো হ্যাত্ম
বানপি ॥ ঔর্ব্বো ঽথ জমদগ্নিশ্চ
বিদঃ সারস্বতস্তথা। আর্ষ্টিষেণো
যুধনশ্চ বীতহব্যঃ সবেধসঃ॥ বৈ-
ণ্যঃ পৃথু দ্দিবোদাসো বধ্যশ্বো
গৃৎস শৌনকঃ। একোনবিংশতি
হ্যেতে ভৃগবো মন্ত্র কৃত্তমাঃ॥১৯॥
অঙ্গিরা বেধসাশ্চৈব ভরদ্বাজো ন
ভাস্করঃ। তথা মৃগধরো গর্দ্দঃ সি
তিঃ সুকৃতিরেব চ॥ গুববীতশ্চ মা-
ন্ধাতা অম্বরীষ স্তথৈব চ। যুবনাশ্বঃ
পুরুকুৎসঃ সুমদদ্যুঃ সদস্যবান্॥
অজমীঢো হ্যদার্য্যশ্চ তক্ষকঃ কবি
রেব চ। পৃষদশ্বো বিরূপশ্চ কণ্ব
শ্চৈবাথ মুদ্গলঃ॥ উতথ্যশ্চ শর-
দ্বাংশ্চ তথা বাজিশ্রবা অপি।

অযস্যোথ সুচিত্তিশ্চ বামদেব স্ত-
থৈব চ॥ ঔশিজো বৃহচ্ছক্তিশ্চ ঋষি
দীর্ঘতপা অপি। কাক্ষীবাংশ্চ ত্রয়-
স্ত্রিংশৎ স্মৃতা হ্যাঙ্গিরসা বরাঃ॥৩৩
॥ এতে মন্ত্রকৃতঃ সর্ব্বে কাশ্যপাংস্তু
নিবোধত। কাশ্যপঃ সহবৎসারো
নিধ্রুবো নিত্য এব চ॥ অসিতো দেব-
লশ্চৈব ষডেতে ব্রহ্মবাদিনঃ॥৬॥ অত্রি
র্বদ্ধস্বনশ্চৈব শ্যাবাশ্বো ঽথ গবিষ্ঠিরঃ
॥ বর্ণাভক্কো ঋষিঃ সিদ্ধ স্তথা পূর্ব্বা-
তিথিশ্চ যঃ॥ ইত্যেতে অত্রয়ঃ প্রো-
ক্তা মন্ত্র কৃৎ সুমহযশঃ॥৪॥ বশি
ষ্ঠশ্চৈব শক্তিশ্চ তৃতীয়শ্চ পরাশরঃ
। ততস্তু ইন্দ্রপ্রমতিঃ পঞ্চমস্তু ভরদ্ব-
সুঃ॥ ষষ্ঠস্তু মিত্রাবরুণিঃ সপ্তমঃ কু-
ণ্ডিন স্তথা। ইত্যেতে সপ্ত বিজ্ঞেয়া
বাশিষ্ঠা ব্রহ্মবাদিনঃ॥৭॥ বিশ্বামি-
ত্রশ্চ গাথেয়ো দেবরাত স্তথোদ্দলঃ।
তথা বিদ্বান মধুচ্ছন্দাঋষিশ্চান্যোঘ-
মর্ষণঃ॥ অষ্টকোলোহিতশ্চৈব ভূত-
কীলশ্চ তাবুভৌ। দেবশ্রবা দেবরা-
তঃ পুরাণশ্চ ধনঞ্জয়ঃ॥ শিশিরশ্চ
মহাতেজাঃ সালঙ্কায়ন এব চ। ত্র-
য়োদশৈতে বিজ্ঞেয়া ব্রহ্মিষ্ঠাঃ কৌশি-
কা বরাঃ॥১৩॥ অগস্ত্যো ঽথ দৃঢ়দ্যুম্ন
ইন্দ্রবাহু স্তথৈব চ। ব্রহ্মিষ্ঠাগস্ত্যয়া-
হ্যেতে ত্রয়ঃ পরম কীর্ত্তয়ঃ॥৩॥ মনু-

বৈবস্বতশ্চৈব ইলো রাজা পুরূরবাঃ। ক্ষত্রিয়াণাং বরাশ্চৈতে বিজ্ঞেয়া মনুবাদিনঃ॥ ৩॥ ভনন্দশ্চৈব ভৎসশ্চ বৎসল শ্চৈব তে ত্রয়ঃ। এতে মন্ত্রকৃতো জ্ঞেয়া বৈশ্যানাং প্রবরাঃ স্মৃতাঃ॥ ৩॥ ইত্যেকনবতিঃ প্রোক্তা মন্ত্রা বৈশ্চ বহিষ্কৃতাঃ। ব্রাহ্মণাঃ ক্ষত্রিয়া বৈশ্যা ঋষিপুত্রা স্তথা স্মৃতাঃ॥ ঋষীণাঞ্চ সুতাশ্চৈতে ঋষিপুত্রাঃ শ্রুতর্ষয়ঃ। ইতি মাৎস্যে ১২১ অধ্যায়ঃ॥*॥ কৃষ্ণমন্ত্র মাহাত্ম্যং যথা। তাবন্নিবদ্ধঃ সংসার কারাগারে বিধেজনঃ। ন যাবৎ কৃষ্ণমন্ত্রঞ্চ প্রাপ্নোতি গুরুবক্ত্রতঃ॥ কৃতকর্ম্ম ভোগ রূপ নিগড়োচ্ছেদকারণং। মায়াজালোচ্ছেদকর মাশাপাশ নিকৃন্তনং॥ গোলোকমার্গ সোপানং নিস্তার বীজ কারণং। ভক্ত্যঙ্কুর স্বরূপঞ্চ নিত্যং বৃদ্ধমনশ্বরং॥ সারঞ্চ সর্ব্বতপসাং যোগানাঞ্চ তথৈব চ। সিদ্ধীনাং বেদপাঠানাং ব্রতাদীনাঞ্চ নিশ্চিতং॥ দানানাং তীর্থ স্নানানাং যজ্ঞাদীনাং পুরন্দর। জপানা মুপবাসানা মিত্যাহ কমলোদ্ভবঃ॥ পুংসাং লক্ষং পিতৃণাঞ্চ শতং মাতামহস্য চ। পূর্ব্বং পরঞ্চ তৎ সংখ্যং পিতরং মাতরং গুরুং॥ সহোদরং কলত্রঞ্চ বন্ধুশিষ্যঞ্চ কিঙ্করং। সমুদ্ধরেচ্চ শ্বশ্রূং কন্যাঞ্চ তৎসুতং॥ আত্মানঞ্চ সতীর্থঞ্চ গুরুপত্নীং গুরোঃ সুতং। উদ্ধরেদ্বলবান্ ভক্তো মন্ত্রগ্রহণ মাত্রতঃ॥ মন্ত্রগ্রহণ মাত্রেণ জীবন্মুক্তো ভবেন্নরঃ। তৎস্পর্শ পূত তীর্থৌঘঃ সদ্যঃ পূতা বসুন্ধরা॥ অনেক জন্ম পর্য্যন্তং দীক্ষাহীনো ভবেন্নরঃ। তদান্য দেব মন্ত্রঞ্চ লভতে পণ্য শেষতঃ॥*॥ সপ্তজন্মোপদেবানাং কৃত্বা সেবাং স্বকর্ম্মতঃ। লভতে চ রবের্মন্ত্রং সাক্ষিণঃ সর্ব্ব কর্ম্মণাং॥ জন্মত্রয়ং ভাস্করঞ্চ নিষেব্য মানবঃ শুচিঃ। লভেদ্গণেশ মন্ত্রঞ্চ সর্ব্ববিঘ্ন হরং পরং॥ জন্মত্রয়ং তং নিষেব্য নির্ব্বিঘ্নশ্চ ভবেন্নরঃ। বিঘ্নেশস্য প্রসাদেন দিব্যজ্ঞানং লভেন্নরঃ॥ তদা জ্ঞান প্রদীপেন সমালোচ্য মহামতিঃ। অজ্ঞানান্ধতমো হিত্বা মহামায়াং ভজেন্নরঃ॥ বিষ্ণুমায়াঞ্চ প্রকৃতিং দুর্গাং দুর্গতিনাশিনীং। সিদ্ধিদাং সিদ্ধিরূপাঞ্চ পরমাং সিদ্ধযোগিনীং॥ বাণীরূপাঞ্চ পদ্মাঞ্চ ভদ্রাং কৃষ্ণপ্রিয়াত্মিকাং। নানা রূপাং তাং নিষেব্য জন্মনাং শতকং নরঃ॥ তৎ প্রসাদাদ্ভবেৎ জ্ঞানী জ্ঞানানন্দং ততো ভজেৎ। কৃষ্ণজ্ঞানাধিদেবঞ্চ মহাজ্ঞানং স-


নাতনং॥ শিবং শিবস্বরূপঞ্চ শিবদং শিবকারণং। পরমানন্দ রূপঞ্চ পরমানন্দদায়িনং॥ সুখদং মোক্ষদঞ্চৈব দাতারং সর্ব্বসম্পদাং। অমরত্বপ্রদঞ্চৈব দীর্ঘায়ুষ্টপ্রদং পরং॥ ইন্দ্রত্বঞ্চ মনুত্বঞ্চ দাতুং শক্তঞ্চ লীলয়া। রাজেন্দ্রত্বপ্রদঞ্চৈব জ্ঞানদং হরিভক্তিদং॥ জন্মত্রয়ং সমারাধ্য চাশুতোষ প্রসাদতঃ। সর্ব্বদস্য বরেণৈব নির্ম্মলং জ্ঞান মালভেৎ॥ নির্ম্মল জ্ঞানদীপেন সুপ্রদীপেন তত্ত্ববিৎ। ব্রহ্মাদি তৃণপর্য্যন্তং সর্ব্বং মিথ্যৈব পশ্যতি॥ দয়ানিধেঃ প্রসাদেন শঙ্করস্য মহাত্মনঃ বরদস্য বরেণৈব হরিভক্তিং লভেৎ ধ্রুবং॥ তদা তদ্ভক্ত সংসর্গাৎ কৃষ্ণমন্ত্রং লভেৎ ধ্রুবং। তদা নিবৃত্তি মাপ্নোতি সারাৎসারাং পরাৎপরাং॥ যত্র দেহে লভেন্মন্ত্রং তদ্দেহাবধি ভারতে। তৎপাঞ্চভৌতিকং ত্যক্ত্বা বিভর্ত্তি দিব্যরূপকং॥ করোতি দাস্যং গোলোকে বৈকুণ্ঠে বা হরেঃ পদে। পরমানন্দ সংযুক্তো মোহাদিষু বিবর্জ্জিতঃ॥ ন বিদ্যতে পুনর্জন্ম পুনরাগমনং সুর। পনশ্চ ন পিবেৎ ক্ষীরং ধৃত্বা মাতৃস্তনং পরং॥ বিষ্ণুমন্ত্রোপাসকানাং গঙ্গাদি তীর্থ সেবিনাং। স্বধর্ম্মিণাঞ্চ ভিক্ষূণাং পুনর্জ্জন্ম ন বিদ্যতে॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডেঃ ৫ অধ্যায়ঃ॥ শিবমন্ত্রা যথা। প্রথমং শৃণু তন্মন্ত্রং ততো হৃদ্ধ্যানগোচরং। ততঃ ক্রমস্তু পূজায়াঃ ক্রমাদ্বিত্তং নরর্ষভৌ॥ সমস্তানাং স্বরাণাস্তু দীর্ঘাঃ শেষাঃ সবিন্দুকাঃ। ষণ্ডক্ শূন্যাঃ সার্দ্ধচন্দ্রা উপান্তে বাভিসংহিতাঃ॥ এভিঃ পঞ্চাক্ষরৈ মন্ত্রং পঞ্চবক্ত্রস্য কীর্ত্তিতং। ক্রমাৎ সম্মদ সন্দোহ মাদ গৌরব সংজ্ঞকাঃ॥ প্রাসাদস্তু ভবেৎ শেষঃ পঞ্চমন্ত্রাঃ প্রকীর্ত্তিতাঃ। একৈকেন তথৈবেকং বক্ত্রং মন্ত্রেণ পূজয়েৎ॥ একং সমুদিতং কৃত্বা পঞ্চভির্ব্বা প্রপূজয়েৎ। প্রাসাদেনাথ বা পঞ্চবক্ত্রং দেবং প্রপূজয়েৎ॥ সম্মদাদিষু মন্ত্রেষু প্রাসাদস্তু প্রশস্যতে। শম্ভোঃ প্রসাদনেনৈব যস্মাদ্বৃত্তস্তু মন্ত্রকঃ॥ তেন প্রাসাদ সংজ্ঞো হয়ং কথ্যতে মুনিপুঙ্গবৈঃ। তস্মাৎ সর্ব্বেষু মন্ত্রেষু প্রাসাদঃ প্রীতিদঃ প্রভোঃ॥ আমোদকারকঃ শম্ভো র্মন্ত্রঃ সম্মদ উচ্যতে। মনঃ প্রপূরকশ্চাপি সন্দোহঃ পরিকীর্ত্তিতঃ॥ আকর্ষকো ভবেন্মাদো গুরুত্বাদ্গৌরবাহ্বয়ঃ। এতদ্দ্ব্যস্তং সমস্তঞ্চ মন্ত্রং শম্ভোঃ প্রকীর্ত্তিতং॥ পঞ্চাক্ষরঞ্চ যন্মন্ত্রং পঞ্চ-

বক্তুন্য কীর্ত্তিতং। যুবাংত্তেনৈব মন্ত্রেণ আরাধ্যাভণীশ্বরং॥ ইতি কালিকা পুরাণে ৫০ অধ্যায়ে বেতাল ভৈরবৌ প্রতি বশিষ্ঠ বাক্য॥*॥ মন্ত্রস্য ত্রিবিধ জপো যথা। বাচিকশ্চ উপাংশুশ্চ মানসশ্চ ত্রিধা স্মৃতঃ। ত্রয়াণাং জপ যজ্ঞানাং শ্রেয়ান্ স্যাদুত্তরোত্তরঃ॥ যদুচ্চ নীচ স্বরিতৈঃ স্পষ্ট শব্দ বদক্ষরৈঃ। মন্ত্রমুচ্চারয়েদ্ব্যক্তং জপ যজ্ঞঃ স বাচিকঃ॥ শনৈ রুচ্চারয়েন্মন্ত্র মীষদোষ্ঠৌ প্রচালয়ন্। কিঞ্চিৎ শব্দং স্বয়ং বিদ্যাদুপাংশুঃ স জপঃ স্মৃতঃ॥ ধিয়া যদক্ষর শ্রেণ্যা বর্ণাদ্বর্ণং পদাৎ পদং। শব্দার্থ চিন্তনাভ্যাস স উক্তো মানসোজপঃ॥ তেন স্বরাদি সহিত বর্ণোচ্চারণবান্ বাচিকঃ। স্বয়ং শব্দগ্রহণ মাত্র যোগ্য কিঞ্চিচ্ছব্দবানুপাংশুঃ। জিহ্বোষ্ঠ চালন মন্তরেণ বর্ণানুসন্ধানাত্মকো মানসঃ।*॥ বাচিকেপ্যুচ্চৈ র্জপ নিষেধমাহ শঙ্খঃ। নোচ্চৈ র্জপ্যং বুধঃ কুর্য্যাৎ সাবিত্র্যাস্তু বিশেষতঃ। যোগি যাজ্ঞবল্ক্যঃ। ন চংক্রমন্ ন বিহসন্ ন পার্শ্ব মবলোকয়ন্। নোপাশ্রিতো ন জল্পংশ্চ ন প্রাবৃতশিরা স্তথা॥ ন পদা পাদ মাক্রম্য নবৈ বহিঃ করৌ স্মৃতৌ। নৈবং বিধং জপং কুর্য্যাৎ নচ সংশ্রাবয়েজ্জপং॥ উত্তিষ্ঠন্ বীক্ষ্যমাণো হর্ক মাসীনঃ প্রাঙ্মুখো জপেৎ। প্রাক্ কুশেষ্বেব মাসীনো বসানো বাসসী শুভে॥ বৃদ্ধমনুঃ। যদি স্যাৎ ক্লিন্নবাসা বৈ বারি মধ্যগতো জপেৎ। অন্যথা তু শুচৌ ভূম্যাং কুশোপরি সমাহিতঃ॥ ব্যাসঃ। জপকালে ন ভাষেত ব্রত হোমাদিকেষু চ। এতেষ্বেবাবশক্তস্তু যদ্যাগচ্ছেৎ দ্বিজোত্তমঃ॥ অভিবাদ্য ততো বিপ্রং যোগ ক্ষেমঞ্চ কীর্ত্তয়েৎ। যোগি যাজ্ঞবল্ক্যঃ। যদি বাগ্যম লোপঃ স্যাৎ জপাদিষু কদাচন। ব্যাহরেদ্বৈষ্ণবং মন্ত্রং স্মরেদ্বা বিষ্ণুমব্যয়ং॥ গোতমঃ। ক্রোধং মোহং ক্ষুতং নিদ্রাং নিষ্ঠীবন বিজৃম্ভিতং। দর্শনং বনিতানাঞ্চ বর্জ্জয়েজ্জপ কর্ম্মণি॥ আচামেৎ সম্ভবে চৈষাং স্মরেদ্বিষ্ণুং সুরার্চ্চিতং। বৌধায়নঃ। নাভেরধশ্চ সংস্পর্শং কর্ম্মকালে বিবর্জ্জয়েৎ। ইত্যাহ্নিকাচারতত্ত্বং॥*॥ মন্ত্র শব্দস্য ব্যুৎপত্তি র্যথা। মননাত্রায়তে যস্মাত্তস্মান্মন্ত্রঃ প্রকীর্ত্তিতঃ॥*॥ মন্ত্র দীক্ষা রহিতানাং দোষো যথা মৎস্যসূক্তে। অদীক্ষিতানাং মর্ত্যানাং দোষং শৃণু বরাননে। অন্নং বিষ্ঠা সমং তস্য জলং মূত্র

সমং স্মৃতং ॥ তৎ কৃতং তস্য বা শ্রাদ্ধং সর্ব্বং যাতি হ্যধোগতিং ॥ ✽ ॥ শূদ্রস্য মন্ত্রবিশেষ নিষেধ মাহ তন্ত্রে। প্রণবাদ্যং ন দাতব্যং মন্ত্রং শূদ্রায় সর্ব্বথা। আত্মমন্ত্রং গুরোর্মন্ত্রং মন্ত্রং চাজপ সংজ্ঞকং ॥ স্বাহা প্রণব সংযুক্তং শূদ্রে মন্ত্রং দদদ্দ্বিজঃ। শূদ্রো নিরয় নাপ্নোতি ব্রাহ্মণো যাত্যধোগতিং ॥ স্মৃতি রপি। সাবিত্রীং প্রণবং যজু লক্ষ্মীং স্ত্রীশূদ্রযোর্নেচ্ছন্তি। সাবিত্রীং প্রণবং যজু র্লক্ষ্মীং স্ত্রীশূদ্রো যদি জানীয়াৎ স মৃতো হ্যধো গচ্ছতি ॥ বিশেষ মাহ বারাহীয়ে। গোপালস্য মনুর্দেয়ো মহেশস্য তু পাদজে। তৎ পত্ন্যাশ্চাপি সূর্য্যস্য গণেশস্য মনু স্তথা ॥ এষাং দীক্ষাধিকারী স্যাদন্যথা পাপ ভাগ্ভবেৎ। ✽ ॥ মন্ত্র দীক্ষা প্রশংসা যথা। গোবিন্দবৃন্দাবনে। অদীক্ষিতস্য মরণে প্রেতত্বং নচ মুক্তি। নবরত্নেশ্বরে। সর্ব্বাসামপি দীক্ষাণাং মুক্তিঃ ফল মখণ্ডিতং। অবিরোধাদ্ভবন্ত্যেব প্রাসঙ্গিক্যস্তু ভক্তয়ঃ ॥ তথা। উপপাতক লক্ষাণি মহাপাতক কোটয়ঃ। ক্ষণাদ্দহতি দেবেশি দীক্ষা হি বিধিনা কৃতা ॥ ✽ ॥ অত্রাপ্যনুকূল মন্ত্রং দীক্ষেত। স্বতার রাশি কোষ্ঠানাং অনুকূলান্ ভজেন্মনূন্। বারাহীয়ে। ভরিচক্রং রাশিচক্রং নামচক্রং তথৈব চ। অত্র চেৎ সগুণো মন্ত্রো নান্যচ্চক্রং বিচারয়েৎ॥ ইতিপ্রাধান্যতয়া বোধ্যং। তথাচ। ধনিমন্ত্রস্তু গৃহ্নীয়াদনুকূল স্তথৈব চ ।✽। ইত্যাদি দর্শনাত্তত্তৎ চক্রবিচারস্য আবশ্যকত্বাৎ প্রথমং তন্নিবধ্যতে। সিদ্ধসারস্বতে। তত্র নৃসিংহার্ক বরাহাণাং প্রাসাদ প্রণবস্য চ। সংপিণ্ডাক্ষর মন্ত্রাণাং সিদ্ধাদীন্নৈব শোধয়েৎ ॥ স্বপ্নলব্ধে স্ত্রিয়া দত্তে মালামন্ত্রে চ ত্র্যক্ষরে। বৈদিকেষু চ মন্ত্রেষু সিদ্ধাদীন্নৈব শোধয়েৎ ॥ মালামন্ত্রস্তু বারাহীয়ে। বিংশত্যর্ণাধিকা মন্ত্রা মালামন্ত্রাশ্চ কীর্ত্তিতাঃ। নপংসকস্য মন্ত্রস্য সিদ্ধাদীন্নৈব শোধয়েৎ॥ হংসস্যাষ্টাক্ষরস্যাপি তথা পঞ্চাক্ষরস্য চ। এক দ্বিত্র্যাদি বীজস্য সিদ্ধাদীন্নৈব শোধয়েৎ ॥ তথা একাক্ষরস্য মন্ত্রস্য মালা মন্ত্রস্য পার্ব্বতি। বৈদিকস্য চ মন্ত্রস্য সিদ্ধাদীন্নৈব শোধয়েৎ ॥ তথা চামুণ্ডাতন্ত্রে। কালী তারা মহাবিদ্যা ষোড়শী ভুবনেশ্বরী। ভৈরবী ছিন্নমস্তা চ বিদ্যা ধূমাবতী তথা॥ বগলা সিদ্ধবিদ্যা চ মাতঙ্গী

কামাত্মিকা। এতা দশমহাবিদ্যাঃ ॥ সিদ্ধবিদ্যাঃ প্রকীর্ত্তিতাঃ ॥ নাত্র সিদ্ধাদ্যপেক্ষাস্তি ন নক্ষত্র বিচারণা। কালাদি শোধনং নাস্তি নচামিত্রাদি দূষণং ॥ সিদ্ধবিদ্যা তথা নাত্র যুগ সেবা পরিশ্রমঃ। নাস্তি কিঞ্চিন্মহাদেবি দুঃখসাধ্যং কথঞ্চন ॥ * ॥ পৃথিব্যাং পূর্ণফলপ্রদা মহাবিদ্যা যথা। মালিনীবিজয়ে। অথ বক্ষ্যাম্যহং যা যা মহাবিদ্যা মহীতলে। দোষজালৈ রসংস্পৃষ্টা স্তাঃ সর্ব্বা হি ফলৈঃ সহ ॥ কালী নীলা মহাদুর্গা ত্বরিতা ছিন্নমস্তকা। বাগ্বাদিনী চান্নপূর্ণা তথা প্রত্যঙ্গিরা পুনঃ ॥ কামাখ্যা বাসলী বালা মাতঙ্গী শৈলবাসিনী। ইত্যাদ্যাঃ সকলা বিদ্যাঃ কলৌ পূর্ণফলপ্রদাঃ ॥ সিদ্ধমন্ত্রে তথা নাত্র যুগসেবা পরিশ্রমঃ। তথা চৈতা মহাবিদ্যাঃ কলিদোষাম্নবাধিতাঃ। ইত্যাদি বচনাদেষু বিচারো নাস্তি। বস্তুতস্তু ইদং প্রশংসাপরং। সর্ব্বত্র বিচারস্যাবশ্যকত্বং। দূরদৃষ্টবশাৎ কদাচিদ্বৈরি মন্ত্রস্য স্বপ্নাদৌ প্রাপ্ত্যা তত্তদ্দোষস্য দৃষ্টত্বাৎ। ইতি তত্ত্ব সাম্প্রদায়িকাঃ ॥ * ॥ মন্ত্রোদ্ধারার্থ ষট্চক্র প্রমাণানি চক্রশব্দে দ্রষ্টব্যানি। তেষাং লেখনপ্রকারা যথা।

হলাহলচক্রং




অকথহচক্রং

| | | | | |
|---|---|---|---|---|
| অ ক থ হ | উ ঙ প | | আ খ দ | ঊ চ ফ |
| ও ড ব | ৯ ঝ ম | | ঔ ঢ শ | ঌ ঞ য |
| | | | | |
| ঈ ঘ ন | ৠ জ ভ | | ই গ ধ | ঋ ছ ব |
| অঃ ত স | ঐ ঠ ল | | অং ণ ষ | এ ট র |


মন্ত্র

## অকডমচক্রং



মন্ত্র

## রাশিচক্রং



## নক্ষত্রচক্রং

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| অ আ<br>১<br>দেবঃ | ই<br>২<br>মানুষঃ | ই উ ঊ<br>৩<br>রাক্ষসঃ | ঋ ৠ ঌঃ<br>৪<br>মানুষঃ | এ<br>৫<br>দেবঃ | ঐ<br>৬<br>মানুষঃ | ও ঔ<br>৭<br>দেবঃ | ক<br>৮<br>দেবঃ | খ গ<br>৯<br>রাক্ষসঃ |
| ঘ ঙ<br>১০<br>রাক্ষসঃ | চ<br>১১<br>মানুষঃ | ছ জ<br>১২<br>মানুষঃ | ঝ ঞ<br>১৩<br>দেবঃ | ট ঠ<br>১৪<br>রাক্ষসঃ | ড<br>১৫<br>দেবঃ | ঢ ণ<br>১৬<br>রাক্ষসঃ | ত থ দ<br>১৭<br>দেবঃ | ধ<br>১৮<br>রাক্ষসঃ |
| ন প ফ<br>১৯<br>রাক্ষসঃ | ব<br>২০<br>মানুষঃ | ভ<br>২১<br>মানুষঃ | ম<br>২২<br>দেবঃ | য র<br>২৩<br>রাক্ষসঃ | ল<br>২৪<br>রাক্ষসঃ | ব শ<br>২৫<br>মানুষঃ | ষ স হ<br>২৬<br>মানুষঃ | অং অঃ<br>লক্ষ২৭<br>দেবঃ |

ঋণিধনিচক্রং

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| ৬ | ৬ | ৬ | ০ | ৩ | ৪ | ৪ | ০ | ০ | ০ | ৩ |
| অ আ | ই ঈ | উ ঊ | ঋ ৠ | ঌ ৡ | এ | ঐ | ও | ঔ | অং | অঃ |
| ক | খ | গ | ঘ | ঙ | চ | ছ | জ | ঝ | ঞ | ট |
| ঠ | ড | ঢ | ণ | ত | থ | দ | ধ | ন | প | ফ |
| ব | ভ | ম | য | র | ল | ব | শ | ষ | স | হ |
| ২ | ২ | ৫ | ০ | ০ | ২ | ১ | ০ | ৪ | ৪ | ১ |

দেবতাভেদে চক্রবিচারস্যাবশ্যকত্ব নাই. বারাহীতন্ত্রে জামলাদৌ চ । তারশুদ্ধি বৈষ্ণবানাং কোষ্ঠশুদ্ধিঃ শিবস্য চ। রাশিশুদ্ধি স্ত্রৈপুরে চ গোপালে হকডমঃ স্মৃতঃ ॥ অকডমো বাননে চ গণেশে চ তথৈব চ । কোষ্ঠচক্রং বরাহস্য মহালক্ষ্ম্যাঃ স্তলাঙ্গনং ॥ নামাদিচক্রে সর্ব্বেষাং ভূতচক্রে তথৈব চ । ত্রৈপুরং তারচক্রে তু শুদ্ধমন্ত্রং জপেদ্বুধঃ॥ তথা। বৈষ্ণবং রাশি সংশুদ্ধং শৈবঞ্চাকডমং স্মৃতং। কালিকায়াশ্চ তারায়া স্তারচক্রং শুভাবহং ॥ চণ্ডিকায়া স্তারকোষ্ঠে গোপালে হকডমঃ স্মৃতঃ । হরচক্রে সর্ব্বমন্ত্রং ধনাধিক্যে নচাশুয়েৎ ॥ ঋণাধিক্যে শুভং বিদ্যাৎ ধনাধিক্যে চ নোবিধিং । দোষান্ সংশোধ্য গৃহ্নীয়ান্মধ্যদেশোদ্ভবস্য চ॥ মন্ত্র স্তু ণী শুভফলোহপ্যশুভো ধনী চ তুল্যং যদা সম ফলঃ কথিতো মুনীন্দ্রৈঃ । অন্যত্রাপি । শূন্যে মৃত্যু মবাপ্নোতি ধনে চ বিফলং ভবেৎ । ঋণে চ প্রাপ্তিমাত্রেণ সর্ব্বসিদ্ধিস্তু জায়তে ॥ ✽ ॥ অথ মন্ত্রাণাং দশসংস্কারাঃ । গৌতমীয়ে । জননং জীবনং পশ্চাত্তাড়নং বোধনন্তথা । অথাভিষেকো বিমলীকরণাপ্যায়নে পুনঃ ॥ তর্পণং দীপনং গুপ্ত র্দশৈতা মন্ত্র সংস্ক্রিয়াঃ । স্বর্ণাদিপাত্রে সংলিখ্য মাতৃকা যন্ত্র মুত্তমং ॥ কাশ্মীর চন্দ:

নেনাপি ভস্মনা বাথ সুব্রত। কাশ্মীরং শক্তি সংস্কারে চন্দনং বৈষ্ণবে মনৌ ॥ শৈবে ভস্ম সমাখ্যাতং মাতৃকা যন্ত্রলেখনে। মন্ত্রাণাং মাতৃকা যন্ত্রাদুদ্ধারো জননং স্মৃতং॥ পংক্তি ক্রমেণ বিধিনা মুনিভিস্তত্র নিশ্চিতং॥১॥ ব্যোমেন্দ্রৌ রসনার্ণ কর্ণিক মচাং দ্বন্দ্বৈঃ স্ফুরৎকেশরং বর্গোল্লাসি বসুচ্ছদং বসুধা ভীগেহেন সংবেষ্টিতং। আশা বশ্বিষু লান্ত লাঙ্গলি যুজা ক্ষৌণী পুরেণাবৃতং যন্ত্রং বর্ণতনোঃ পরং নিগদিতং সৌভাগ্য সম্পৎ করং ॥ যন্ত্রস্য দিক্ষু বং বিদিক্ষু ঠং লিখেৎ। তথা চ গৌতমীয়ে। কাদি মান্তাঃ পঞ্চ বর্গা দিক্ষু পূর্বাদিতো ন্যসেৎ। যাদি বান্তাঃ শাদি হান্তা লক্ষ মীশে প্রবিন্যসেৎ ॥ চতুরস্রং চতুর্দ্বারং দিক্ষু বং ঠং বিদিক্ষু চ। ইতি মাতৃকাযন্ত্রং ॥*॥ প্রণবান্তরিতান্ কৃত্বা মন্ত্রবর্ণান্ জপেৎ সুধীঃ। প্রত্যেকং শতবারন্তু জীবনং তদুদাহৃতং ॥ ২ ॥ মন্ত্রবর্ণান্ সমালিখ্য তাড়য়েচ্চন্দনাম্ভসা। প্রত্যেকং বায়ুবীজেন পূর্ববত্তাড়নং মতং ॥ ৩ ॥ বিলিখ্য মন্ত্রবর্ণাংস্তু প্রসূনৈঃ করবীরজৈঃ। তন্মন্ত্রবর্ণ সংখ্যাকৈ হন্যাদ্রেফেণ বোধনং ॥ ৪ ॥ তত্তন্ত্রোক্ত বিধিনা অভিষেকঃ প্রকীর্ত্তিতঃ। তন্ত্রান্তরে। মন্ত্রস্য চামুকংবর্ণ মভিষিঞ্চামি কূর্চ্চতঃ। ইতি বচনাৎ প্রত্যেক মভিষিঞ্চেৎ। অশ্বত্থ পল্লবৈঃ সিঞ্চেৎ মন্ত্রী মন্ত্রার্ণ সংখ্যয়া ॥৫॥ সঞ্চিন্ত্য মনসা মন্ত্রং সুষুম্না মূল মধ্যতঃ ॥ জ্যোতি র্মন্ত্রেণ বিধিবৎ দহেন্মল ত্রয়ং যতী। তারং ব্যোমাগ্নি মনুযুক্ দণ্ডী জ্যোতি র্মনুর্মতঃ ॥ তারং প্রণবঃ ব্যোম হকারঃ অগ্নী রেফঃ মনুরৌকারঃ দণ্ডী অনুস্বারঃ ॥৬॥ স্বর্ণেন কুশতোয়েন পুষ্পতোয়েন বা তথা। তেন মন্ত্রেণ বিধিবদাপ্যায়ন বিধিঃ স্মৃতঃ॥৭॥ মন্ত্রেণ বারিণা মন্ত্রে তর্পণং তর্পণং মতং। মধুনা শক্তি মন্ত্রেষু বৈষ্ণবে চন্দনজ্জলৈঃ ॥ শৈবে ঘৃতেন দুগ্ধেন তর্পণং সম্যগীরিতং। অভিষেকেপি তথা ॥ ৮॥ তার মায়া রমাযোগো মনো দীপন মুচ্যতে। ৯। জপ্যমানস্য মন্ত্রস্য গোপনং ত্বপ্রকাশনং॥১০॥ সংস্কারা দশ সংপ্রোক্তাঃ সর্বতন্ত্রেষু গোপিতাঃ। যান্ কৃত্বা সম্প্রদায়েন মন্ত্রী বাঞ্ছিত মাপ্নুয়াৎ ॥*॥ মলত্রয় মিতি আনবং মায়িকং কার্ম্মঞ্চ। প্রপঞ্চসারে। মায়িকং নাম যোষোত্থং পৌরুষং কার্ম্মণং মলং। আনব্যং তৎদ্বয়ং প্রোক্তং নিষিদ্ধং ত্রিমলং ত্রয়ং ॥

ম নবং অনবং তস্য ভাবঃ আনব্যং মৃদ্ধত্ব মিত্যর্থঃ ।। তার মায়া রমা যোগ ইতি। তার মায়া রমাবীজ পুটিতং মন্ত্র মষ্টোত্তর শতং জপেৎ ইত্যর্থঃ । তথাচ বিশ্বসারে । তার মায়া রমাবীজ পুটিতেন মনুং জপেৎ । শতমষ্টোত্তরঞ্চৈব দীপয়েৎ সাধকোত্তমঃ ॥ ❋ ॥ অথ দুর্গামন্ত্রঃ । অথ দুর্গা মনুং বক্ষ্যে দৃষ্টাদৃষ্ট ফল প্রদং । মায়াদ্রিঃ কর্ণবিন্দ্বাঢ্যো ভূয়ো হসৌ সর্গবান্ ভবেৎ ॥ পঞ্চান্তকঃ প্রতিষ্ঠাবান্ মারুতোভৌতিকাসনঃ । তারাদি হৃদয়ান্তো হয়ং মন্ত্রো বস্বক্ষরাত্মকঃ ।। অদ্রি র্দকারঃ । কর্ণ উকারঃ । পঞ্চান্তকো গকারঃ । প্রতিষ্ঠা আকারঃ । মারুতো যকারঃ । ভৌতিক ঐকারঃ । ওঁ হ্রীঁ দুং দুর্গায়ৈ নমঃ ॥ ❋ ॥ অথ বিষ্ণু মন্ত্রঃ । তারং নমঃ পদং ব্রূয়াৎ নরৌ দীর্ঘসমন্বিতৌ । পবনা পায মন্ত্রো হয়ং প্রোক্তো বস্বক্ষরঃ পরঃ ॥ ওঁ নমো নারায়ণায ॥ ❋ ॥ অথ শিবমন্ত্রঃ । সান্ত মৌকার সংযুক্তং বিন্দু ভূষিত মস্তকং । প্রাসাদাখ্যো মনুঃ প্রোক্তো ভজতাং কামদো মনুঃ ॥ হৌঁ ॥ ❋ ॥ অথ গণেশমন্ত্রঃ । পঞ্চান্তকং শশিধরং বীজং গণপতে র্বিদুঃ । পঞ্চান্তকো গকারঃ । গঁ । ❋ ॥ অথ সূর্য্য মন্ত্রঃ । তারো ঘৃণি র্ভৃগুঃ পশ্চাদ্বামকর্ণ বিভূষিতঃ । বহ্ন্যাসনো মরুৎ শেষঃ সনেত্রো হৃদি স্ত্যপশ্চিমঃ ॥ অষ্টাক্ষরো মনুঃ প্রোক্তো ভানো রভিমতঃ পরঃ । ওঁ ঘৃণি সূর্য্য আদিত্য ॥ ❋ ॥ পঞ্চদেবতানামেক একো মন্ত্রো লিখিতঃ । এতাসামন্যাসাঞ্চান্য মন্ত্রা গ্রন্থ বিস্তার ভয়ান্ন লিখিতাঃ ॥ ❋ ॥ কলাবাগমোক্ত মন্ত্র জপ বিধি র্যথা । আগমোক্ত বিধানেন কলৌ মন্ত্রং জপেৎ সুধীঃ । নহি দেবাঃ প্রসীদন্তি কলৌ চান্য বিধানতঃ ॥ তথা । কৃতে শ্রুত্যুক্ত মার্গঃ স্যাৎ ত্রেতায়াং স্মৃতি সম্ভবঃ । দ্বাপরে তু পুরাণোক্তঃ কলাবাগম সম্ভবঃ ॥ মন্ত্রার্ণা দেবতাঃ প্রোক্তা দেবতা গুরু রূপিণী । তেষাং ভিদা ন কর্ত্তব্যা যদীচ্ছেচ্ছুভ মাত্মনঃ ॥ ❋ ॥ পিত্রাদিতো মন্ত্রগ্রহণ নিষেধো যথা । পিতু র্মন্ত্রং ন গৃহ্ণীয়াৎ তথা মাতামহস্য চ । সোদরস্য কনিষ্ঠস্য বৈরিপক্ষাশ্রিতস্য চ ॥ ন পত্নীং দীক্ষয়েদ্ভর্ত্তা ন পিতা দীক্ষয়েৎ সুতাং । ন পুত্রঞ্চ তথা ভ্রাতা ভ্রাতরং নচ দীক্ষয়েৎ ॥ সিদ্ধমন্ত্রো যদি পতি স্তদা পত্নীং স দীক্ষয়েৎ । শক্তিত্বেন বরা-

রোহে নচ সা কন্যকা ভবেৎ ॥ তথা গণেশবিমর্ষিণ্যাং। যতে দীক্ষা পিতৃ দীক্ষা দীক্ষা চ বনবাসিনঃ। বিবিক্তাশ্রমিণাং দীক্ষা ন সা কল্যাণ দায়িকা ॥ ইত্যাদি নিষেধ বচনাদেভ্যো মন্ত্রং ন গৃহ্নীয়াদিত্যর্থঃ। ইতি তন্ত্রসারঃ ॥

মন্ত্রকৃৎ পুং মন্ত্রী। মন্ত্রণাকারকঃ। ইতি সিদ্ধান্তকৌমুদী ॥

মন্ত্রগণ্ডকঃ পুং বিদ্যা। ইতি হারাবলী ॥

মন্ত্রগূঢ়ঃ পুং চরঃ। ইতি শব্দরত্নাব ॥

মন্ত্রগৃহং ক্লী মন্ত্রণাগারং। অন্যপুনাণং মন্ত্রণাশব্দে দ্রষ্টব্যং ॥

মন্ত্রজা স্ত্রী মন্ত্রশক্তিঃ। ইতি পুরাণং

মন্ত্রজিহ্বঃ পুং অগ্নিঃ। ইতি হেমচন্দ্রঃ ॥

মন্ত্রজ্ঞঃ পুং চরঃ। ইতি হলায়ুধঃ ॥ মন্ত্রজ্ঞাতরি ত্রি ॥

মন্ত্রণং ক্লী মন্ত্রণা। মন্ত্রধাতো র্ভাবে অনট প্রত্যয়েন নিষ্পন্নং ॥

মন্ত্রণা স্ত্রী রহস্যকর্ত্তব্যাবধারণং। ইতি মন্ত্র শব্দ টীকায়াং ভরতঃ ॥ মন্ত্রঃ। যথা। বাদীমূকতি রঙ্কতি ক্ষিতিপতি বৈশ্বানরঃ শীতভতি ক্রোধী শাম্যতি দুর্জ্জনঃ সুজনতি ক্ষিপ্রানুগঃ খঞ্জতি গর্ব্বী খর্ব্বতি সর্ব্ববিচ্চ জড়তি ত্বন্মন্ত্রণা যন্ত্রিতঃ শ্রীনিত্যে বগলামুখি প্রতিদিনং কল্যাণি তুভ্যং নমঃ ॥ ইতি তন্ত্রসারে বগলাস্তোত্রং ॥*॥ মন্ত্রণায়াং বর্জ্জনীয়াদি যথা। মন্ত্রে পঞ্চাঙ্গতা শক্তি ষাড়্গুণ্যোপায় সিদ্ধয়ঃ। উদয়া শ্চিন্তনীয়াশ্চ চৈস্থৈর্য্যোন্নত্যাদি সূক্ষ্মগঃ ॥ ইতি কবিকল্পলতা ॥ * ॥ ব্যক্তিত্রয়াদি কৃত মন্ত্রণানাং দোষো যথা। ষট্‌কর্ণো ভিদ্যতে মন্ত্র শ্চতুষ্কর্ণশ্চ ধার্য্যতে। দ্বিকর্ণস্য তু মন্ত্রস্য ব্রহ্মাপ্যন্তং ন বুধ্যতে ॥ ইতি গারুড়ে ১১৪ অধ্যায়ঃ ॥*॥ রাজ্ঞা বিদ্যাদি গুণযুক্ত বিপ্রা মন্ত্রিণঃ কার্য্যাঃ। যথা। মন্ত্রিণস্তু নৃপঃ কুর্য্যাদ্বিপ্রান্ বিদ্যাবিশারদান্। বিশুদ্ধাংশ্চ কুলীনাংশ্চ ধর্ম্মার্থ কুশলানৃজূন ॥ মন্ত্রয়েত্তৈঃ সমং কালে নাত্যর্থং বহুভি শ্চরেৎ। একৈকেনৈব কর্ত্তব্যং মন্ত্রস্য তু বিনিশ্চয়ং ॥ ব্যস্তৈ শ্চৈব সমস্তৈশ্চ বান্যস্য ব্যপদেশতঃ। স্বয়ং বৃত্তং মন্ত্রগৃহং স্থল আরুহ্য মন্ত্রয়েৎ ॥ অরণ্যে নিঃশলাকে বা ন যামিন্যাং কদাচন। শিশূন্ শাখামৃগান্ পণ্ডান্ শুকান্ বৈশারিকাং স্তথা ॥ বর্জয়েন্মন্ত্রগেহেষু মনুষ্যানন্ধতাং স্তথা। দূষণং মন্ত্র

ভেদৈর্নৃপানাং যত্র জায়তে॥ ন তৎ সম্যক্ সমাধাতুং শক্ষ নৃপ শতৈরপি। ইতি কালিকাপুরাণে ৮৫ তমোধ্যায়ঃ॥ * ॥ অথ মন্ত্র নির্ণয়ঃ। মন্ত্র মূলং যতো রাজ্যং ততো মন্ত্রং সুরক্ষিতং। কুর্য্যাদ্রাজা সদা মন্ত্রান্ কর্ম্মণা মাফলোদযাৎ॥ অর্থানর্থৌ হি যত্রোভৌ সংশয়শ্চ পরীক্ষ্যতে। স মন্ত্র ইতি বিজ্ঞেয়ঃ শেষাশ্চ খলু বিভ্রমাঃ॥ একমেব বিষং হন্তি শস্ত্রেণৈকশ্চ বধ্যতে। সরাষ্ট্রং সম্পদং হন্তি রাজানং মন্ত্র বিপ্লবঃ॥ করিষ্যন্ন প্রভাষেত কৃতান্যেব তু দর্শয়েৎ। ধর্ম্মার্থ কাম কার্য্যাণি কৃতো মন্ত্রো ন ভিদ্যতে॥ গিরিপৃষ্ঠমুপারুহ্য প্রাসাদম্বা রহোগতঃ। অরণ্যে নিঃশলাকে বা তত্র মন্ত্রো বিধীযতে॥ তত্র সাম প্রযোক্তব্যং কার্য্যেষু গুণবৎস্বপি। দানং লুব্ধেহপি ভেদশ্চ শঙ্কিতেস্বপি নিশ্চয়ঃ॥ জড় মূকান্ধ বধিরান্ তির্য্যগ্যোনীন্ বযোধিকান্। স্ত্রীম্লেচ্ছ ব্যাধিত ব্যঙ্গান্ মন্ত্রকালে নিবেশয়েৎ॥ ইতি সম্পাতঃ প্রোক্তা রাজনীতি রিযং মযা। যত্রি বর্গা বিরুদ্ধং স্যাদ্রাজনীতি স্তদুচ্যতে॥ ইতি যুক্তিকল্পতরৌ নীতিযুক্তিঃ॥

মন্ত্রতঃ ব্য মন্ত্রাৎ। ইতি সিদ্ধান্তকৌমুদী॥

মন্ত্রদাতা ত্রি মন্ত্রদানকর্ত্তা। গুরুঃ। যথা। সর্ব্বেষাঞ্চ গুরূণাঞ্চ জন্মদাতা পরো গুরুঃ। পিতুঃ শতগুণৈ র্মাতা পূজ্যা বন্দ্যা গরীযসী॥ বিদ্যাদাতা মন্ত্রদাতা জ্ঞানদো হরিভক্তিদঃ। পূজ্যো বন্দ্যশ্চ সেব্যশ্চ মাতুঃ শতগুণৈ গুরুঃ॥ মন্ত্র মুদ্গিরণেনৈব গুরু রিত্যুচ্যতে বুধৈঃ। অন্যো বন্দ্যো গুরু রয মন্য শ্চারোপিতো গুরুঃ॥ অজ্ঞান তিমিরান্ধস্য জ্ঞানাঞ্জন শলাকযা। চক্ষুরুন্মীলিতং যেন তস্মৈ শ্রীগুরবে নমঃ॥ অদীক্ষিতস্য মূর্খস্য নিষ্কৃতি র্নাস্তি নিশ্চিতং। সর্ব্বকর্ম্মস্বনর্হস্য নরকে তৎ পশোঃ স্থিতিঃ॥ জন্মদাতান্নদাতা বা নাতান্যে গুরব স্তথা। পারং কর্ত্তুং ন শক্তা স্তে ঘোরে সংসারসাগরে॥ বিদ্যা মন্ত্র জ্ঞানদাতা নিপুণঃ পার কর্ম্মণি। ন শক্তঃ শিষ্য মুদ্ধর্ত্তু মীশ্বর শ্চেশ্বরো হপরঃ॥ গুরু বিষ্ণু গুরু ব্রহ্মা গুরু র্দেবো মহেশ্বরঃ। গুরু র্ধর্ম্মো গুরুঃ শেষঃ সর্ব্বাত্মা নিগুণো গুরুঃ॥ সর্ব্বতীর্থাশ্রমশ্চৈব সর্ব্বদেবাশ্রযো গুরুঃ। সর্ব্ববেদ স্বরূপশ্চ গুরুরূপী

হরিঃ স্বয়ং ॥ অভীষ্টদেবে রুষ্টে চ গুরুঃ শক্তো হি রক্ষিতুং । গুরৌ রুষ্টে ঽভীষ্টদেবো নহি শক্তশ্চ রক্ষিতুং ॥ সর্ব্বে গ্রহাশ্চ যং রুষ্টা যং রুষ্টা দেব ব্রাহ্মণাঃ । তমেব রুষ্টো ভবতি গুরুরেব হি দৈবতঃ ॥ ন গুরোশ্চ প্রিয়শ্চাত্মা ন গুরোশ্চ প্রিয়ঃ সুতঃ । ধনং প্রিয়ং নচ গুরো নচ ভার্য্যা প্রিয়া তথা ॥ ন গুরোশ্চ পরো ধর্ম্মো ন গুরোশ্চ পরন্তপঃ । ন গুরোশ্চ পরং সত্যং ন পণ্যঞ্চ গুরোঃ পরং ॥ গুরোঃ পরো ন শাস্তা চ নহি বন্ধু গুরোঃ পরঃ । দেবো রাজা চ শাস্তা-চ শিষ্যাণাঞ্চ সদা গুরুঃ ॥ যাবৎ শক্তো দাতুমন্নং তাবৎ শাস্তা তদন্নদঃ । গুরুঃ শাস্তা চ শিষ্যাণাং প্রতি জন্মনি জন্মনি ॥ মন্ত্রো বিদ্যা গুরু দেবঃ সর্ব্বলক্ষো যথা পতিঃ । প্রতি জন্ম নিবন্ধেন সর্ব্বেষা মুপরিস্থিতাঃ ॥ পিতা গুরুশ্চ বন্দ্যশ্চ যত্র জন্মনি জন্মদঃ । গুরবোন্যে তথা মাতা গুরুশ্চ প্রতি জন্মনি ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে শচীকৃত গুরু স্তোত্র কথনং নাম ৫৯ অধ্যায়ঃ ॥*॥ অপিচ । মান্যঃ পূজ্যশ্চ সর্ব্বেভ্যঃ সর্ব্বেষাং জনকো ভবেৎ । অহো যস্য প্রসাদেন সর্ব্বান্ পশ্যতি মানবঃ ॥ জনকো ঽন্নদাতা চ রক্ষণাচ্চ পিতা নৃণাং । ততো বিস্তীর্ণকরণাৎ কলয়া স প্রজাপতিঃ ॥ পিতুঃ শতগুণৈর্মাতা পোষণাদ্গর্ভ ধারণাৎ । বন্দ্যা পূজ্যা চ মান্যা চ প্রসূরূপা বসুন্ধরা ॥ মাতুঃ শতগুণৈ র্বন্দ্যঃ পূজ্যো মান্যো ঽন্নদায়কঃ । যদ্বিনা নশ্বরো দেহো বিষ্ণুশ্চ কলয়ান্নদঃ ॥ অন্নদাতুঃ শতগুণো ভীষ্টদেবঃ পরঃ স্মৃতঃ । গুরু স্তস্মাচ্ছতগুণো বিদ্যা মন্ত্র প্রদায়কঃ ॥ অজ্ঞান তিমিরাচ্ছন্নং জ্ঞানদীপেন চক্ষুষা । যঃ সর্ব্বার্থং দর্শয়তি তৎপরঃ কোপি বান্ধবঃ ॥ গুরু দত্তেন মন্ত্রেণ তপসেষ্ট সুরং লভেৎ । সর্ব্বজ্ঞত্বং সর্ব্বসিদ্ধিং তৎপরঃ কোপি বান্ধবঃ ॥ সর্ব্বং জয়তি সর্ব্বত্র বিদ্যয়া গুরুদত্তয়া । তস্মাৎ পূজ্যো হি জগতি কো বা বন্ধু স্ততো ঽধিকঃ ॥ বিদ্যান্ধো বা ধনান্ধো বা যো মূঢো ন ভজেদ্গুরুং । সোঽশুচি স্তীর্থ স্নাতো ঽপি নাধিকারী চ কর্ম্মসু ॥ পিতরং মাতরং ভার্য্যাং গুরুপত্নীং গুরুং পরং । যো ন পুষ্ণাতি কাপট্যাৎ স মহাপাতকী শিব ॥ গুরু ব্রহ্মা গুরু বিষ্ণু গুরু দেবো মহেশ্বরঃ । গুরুরেব পরং ব্রহ্ম গুরু র্ভাস্কর রূপধৃক্ । গুরুশ্চন্দ্র স্তথেন্দ্রশ্চ বায়ুশ্চ বরুণো ঽনলঃ । সর্ব্ব

রূপো হি ভগবান্ পরমাত্মা স্বয়ং ॥ গুরুঃ ॥ নাস্তি বেদাৎ পরং শাস্ত্রং নহি কৃষ্ণাৎ পরঃ সুরঃ। নাস্তি গঙ্গাসমং তীর্থং ন পুষ্পং তুলসীপরং ॥ ক্ষমাবতী ভূপরা ন পুত্রান্নাস্তি পরঃ প্রিয়ঃ। নচ দৈবাৎ পরঃ শক্তো ব্রতং নৈকাদশীং বিনা ॥ শালগ্রামাৎ পরো যন্ত্রো ন ক্ষেত্রং ভারতাৎ পরং। পরং পুণ্যস্থলানাঞ্চ পুণ্যং বৃন্দাবনং যথা ॥ মোক্ষদানাং যথা কাশী বৈষ্ণবানাং যথা শিবঃ। ন পার্ব্বতী পরা সাধ্বী ন গণেশাৎ পরো বশী ॥ ন চ বিদ্যা সমো বন্ধুর্নাস্তি কশ্চিদ্গুরোঃ পরঃ। বিদ্যাদাতঃ পুত্রদারৌ তৎসমৌ নাত্র সংশয়ঃ ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণে গণপতিখণ্ডে ৪৪ অধ্যায়ঃ ॥

মন্ত্রদীধিতিঃ পুং বহ্নিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মন্ত্রপূতঃ ত্রি মন্ত্রেণপবিত্রীকৃতঃ। যথা। ব্রহ্মাণী মন্ত্রপূতেন তোয়েনান্যে নিরাকৃতাঃ। ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং ॥

মন্ত্রপূতাত্মা ন পুং গরুড়ঃ। ইতি ধরণিঃ ॥

মন্ত্রবিৎ দ পুং চরঃ। ইতি হেমচন্দ্রঃ ॥ মন্ত্রজ্ঞাতরি ত্র ॥

মন্ত্রস্পৃক্ শ ত্রি মন্ত্রকরণকস্পর্শকর্ত্তা। মন্ত্রেণ স্পৃশতি। ইতি সিদ্ধান্তকৌমুদী ॥

মন্ত্রিতঃ ত্রি মন্ত্রেণসংস্কৃতঃ। অভিমন্ত্রিতঃ। মন্ত্রো২স্য জাতঃ। ইতি মন্ত্রধাতোঃ ক্ত প্রত্যয়েন মন্ত্র শব্দাৎ ইত প্রত্যয়েন চ নিষ্পন্নঃ ॥

মন্ত্রী ন পুং মন্ত্রজ্ঞাতকর্ত্তব্যনিশ্চয়কর্ত্তা। তৎপর্য্যায়ঃ। ধীসচিবঃ ২ অমাত্যঃ ৩। ইত্যমরঃ ॥ সচিবঃ ৪ ধীসখঃ ৫ সামবায়িকঃ ৬। ইতি হেমচন্দ্রঃ ॥ তস্য লক্ষণং যথা। মন্ত্রী ভক্তঃ শুচিঃ শূরো ২নুকূতো বুদ্ধিমান্ ক্ষমী। আন্বীক্ষিক্যাদিসংশলঃ পরিচ্ছেদী সুদেশজঃ ॥ ইতি কবিকল্পলতা ॥ * ॥ বহুভির্ন ব্রুয়েৎ কাৰ্য্যং রাজা মন্ত্রং পৃথক্ পৃথক্। মন্ত্রিণামপি নোজ্যাৎ মন্ত্রী মন্ত্রপ্রকাশনং ॥ ন ক্বচিৎ কস্য বিশ্বাসো ভবতীহ সদা নৃণাং। নিশ্চয়শ্চ সদা মন্ত্রে কার্য্য একেন সূরিণা ॥ ভবেদ্বা নিশ্চয়াবাপ্তিঃ পরবুদ্ধ্যুপজীবনাৎ। একস্যৈব মহীভর্ত্তুর্ভূয়ঃ কাৰ্য্যো বিনিশ্চয়ঃ ॥ ইতি মৎস্যপুরাণে ১৮৯ অধ্যায়ঃ ॥

মন্থ মন্থে ॥ গাহে। ইতি কবিকল্পদ্রুমঃ ॥ মন্থতি। মন্থঃ কৈশ্চিন্মন-

ন্যতে। ইতি দুর্গাদাসঃ ॥

মন্থ গ গাহে। ইতি কবিকল্পদ্রুমঃ॥ গাহো বিলোডনং। গ মথ্নাতি দধি বল্লবী। মথং মমন্থ স হয়ং। ইতি দুর্গাদাসঃ ॥

মন্থঃ পুং মন্থদণ্ডকঃ। ইত্যমরঃ॥ সাক্তবঃ॥ দিবাকরঃ। ইতিমেদিনী ॥সাক্তবো যথা। সক্তুভিঃ সর্পিষা-ভ্যক্তৈঃ শীতবারি পরিপ্লুতৈঃ। নাত্যচ্ছো নাতিসান্দ্রশ্চ মন্থ ইত্য-ভিধীযতে ॥ ইতি রাজনির্ঘণ্টঃ॥ পেযবিশেষঃ। তস্য বিধি যথা। জলে চতুর্গুণে শীতে ক্ষুণ্ণং দ্রব্যং প লং ক্ষিপেৎ। মৃৎপাত্রে মন্থযেৎ সম্যক্ তস্মাচ্চ দ্বিপলং পিবেৎ॥ ক্ষুণ্ণং চূর্ণীকৃতং। মন্থযেৎ মৃদ্বীযাৎ। ইতি ভাবপ্রকাশঃ॥ মারণং। ইতি ত্রিকাণ্ডশেষঃ॥ নেত্রমলং। ইতি ধরণিঃ॥ নেত্রাময়ঃ। ইতি বিশ্বঃ॥ অংশুঃ। ইতি শব্দরত্না-বলী॥ মন্থনং॥ বিলোডনং। ইতি মন্থধাত্বর্থদর্শনাৎ ॥

মন্থজং ক্লী নবনীতং। ইতি রত্নমালা॥

মন্থদণ্ডকঃ পুং মন্থানদণ্ডঃ। ছাঁচুনী ইতি ঘোলমৌনী ইতি খড়েন্ ইতি চ ভাষা। তৎপর্য্যাযঃ। বৈশাখঃ ২ মন্থঃ ৩ মন্থানঃ ৪ মন্থাঃ ৫। ইত্যমরঃ॥ কম্বহর্ষকঃ ৬ মন্থনঃ ৭ তক্রাটঃ ৮। ইতি শব্দরত্নাবলী॥ তক্রাটঃ ৯। ইতি জটাধরঃ॥

মন্থনং ক্লী বিলোডনং। অন্থনং। ইতি মন্থধাতোর্ভাবে অনট্ প্রত্যযেন নিষ্পন্নং॥

মন্থনঃ পুং মন্থানদণ্ডঃ। ইতি শব্দ-রত্নাবলী॥

মন্থনঘটী স্ত্রী দধিমন্থনপাত্রং। যথা। কলসী মন্থনঘটী মন্থনী চাপি গর্গ-রী। ইতি জটাধরঃ॥

মন্থরং ক্লী কুসুম্ভী। ইতি মেদিনী॥

মন্থরঃ পুং কোষঃ॥ ফলং॥ বাধঃ॥ মন্থানঃ॥ ইতি মেদিনী॥ সূচক ইতি বিশ্বঃ॥ মন্দগামিযোদ্ধা। ইতি ক্ষত্রিযবর্গে অমরঃ॥ কোপঃ। ইত্যজযঃ॥

মন্থরঃ ত্রি মন্দঃ॥ পৃথুঃ॥ বক্রঃ। ইতি মেদিনী॥ জড়ঃ॥ ইতি শব্দ-রত্নাবলী॥ নীচঃ॥ ইতি হেমচন্দ্রঃ

মন্থরা স্ত্রী কৈকেয্যাদাসী। যথা। রামাভিষেকে বিঘ্নার্থং যতস্ব ব্রহ্ম বাক্যতঃ। মন্থরাং প্রবিশস্বাদৌ কৈকেযীঞ্চ ততঃপরং॥ ইত্যধ্যাত্ম-রামাযণেঅযোধ্যাকাণ্ডে২অধ্যাযঃ

মন্থরুঃ পুং চামরবাতঃ। তৎপর্য্যাযঃ। অটৈরুঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥

মন্থশৈলঃ পুং মন্দরপর্ব্বতঃ। ইতি জটাধরঃ॥

মন্থা স্ত্রী মেথিকা। ইতি রাজনির্ঘণ্টঃ

মন্থ্নঃ পুং মন্থানদণ্ডঃ। ইত্যমরঃ॥

মন্থানঃ পুং মন্থদণ্ডকঃ। ইত্যমরঃ॥ আরগ্বধঃ। ইতি রাজনির্ঘণ্টঃ॥

মন্থানকঃ পুং তৃণভেদঃ। তৎপর্য্যায়ঃ। হরিতঃ২ দৃঢমূলঃ৩ তৃণাদ্ধিপঃ৪। অস্য গুণাঃ। স্নিগ্ধত্বং। দোগ্ধ্রীণাং প্রিয়ত্বং। মধুরত্বং। বহুবীর্য্যদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মন্থিনী স্ত্রী দধিমন্থনপাত্রং। তৎপর্য্যায়ঃ। গগরী২ কলসী৩। ইতি হেমচন্দ্রঃ॥

মন্থোদধিঃ পুং ক্ষীরসমুদ্রঃ। ইতি কেচিৎ॥

মন্দঃ পুং শনিঃ॥ হস্তিজাতিবিশেষঃ। ইতি মেদিনী॥ যমঃ। ইতি ত্রিকাণ্ডশেষঃ॥ প্রলয়ঃ। ইত্যজয়ঃ

মন্দঃ ত্রি অভীক্ষ্ণঃ॥ মূর্খঃ॥ স্বৈরঃ॥ অভাগ্যঃ॥ রোগী॥ অল্পঃ। ইতি মেদিনী॥ মদরতঃ॥ খলঃ। ইতি হেমচন্দ্রঃ॥

মন্দগঃ ত্রি মৃদুগামী। যথা। মন্দগানি শনি জ্ঞানি বৃষ-হংস-গজত্রিযঃ। ইতি কবিকল্পলতা॥

মন্দগামী ত্রি মৃদুগমনশীলঃ। তৎপর্য্যায়ঃ। মন্থরঃ২। ইত্যমরঃ॥

মন্দজননী স্ত্রী শনৈশ্চরমাতা। সূর্য্যপত্নী। ইতি ত্রিকাণ্ডশেষঃ॥

মন্দটঃ পুং পারিভদ্রবৃক্ষঃ। ইতি শব্দরত্নাবলী॥

মন্দতা স্ত্রী আলস্যং। ইতি রাজনির্ঘণ্টঃ॥ মন্দত্বঞ্চ॥

মন্দনং ক্লী স্তোত্রং। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

মন্দরঃ পুং মন্থশৈলঃ॥ মন্দারপাদপঃ। ইতি মেদিনী॥ স্বর্গঃ॥ হারভেদঃ। ইতি হেমচন্দ্রঃ॥ মুকুরঃ। ইতি শব্দরত্নাবলী॥

মন্দরঃ ত্রি বহুলঃ॥ মন্দঃ। ইতি মেদিনী॥

মন্দসানঃ পুং অগ্নিঃ॥ প্রাণঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ নিদ্রা। ইত্যুণাদিকোষঃ॥

মন্দসানুঃ পুং স্বপ্নঃ॥ জীবঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

মন্দা স্ত্রী সংক্রান্তিবিশেষঃ। সা উত্তরফল্গুন্যুত্তরাষাঢোত্তরভাদ্রপদারোহিণী নক্ষত্রেষু রবিসংক্রান্তিশ্চেত্তদা ভবতি। তস্যাঃ সন্নিহিত দণ্ডত্রয়স্য পুণ্যতমত্বং। যথা। মন্দা মন্দাকিনী ধ্বাংক্ষী ঘোরা চৈব মহোদরী। রাক্ষসী মিশ্রিতা প্রো-

ক্তা সংক্রান্তিঃ সপ্তধা নৃপ ॥ নন্দা ধ্রুবেষু বিজ্ঞেয়া মৃদৌ মন্দাকিনী তথা । ক্ষিপ্রে ধ্বাঙ্ক্ষী বিজানীযা দ্যুগ্রে ঘোরা প্রকীর্ত্তিতা ॥ চরে মহোদরী জ্ঞেয়া ক্রূরে ঋক্ষৈস্তু রাক্ষসী । মিশ্রিতা চৈব বিজ্ঞেয়া মিশ্রে ঋক্ষৈস্তু সংক্রমঃ ॥ ইত্যেতৈ র্দ্বাদশম্বেব সংক্রান্তিষু ধ্রুবাদি নক্ষত্র যোগাৎ মন্দাদি রূপতয়া সপ্তধা ভিন্নাসু ত্রি চতুঃ পঞ্চ সপ্তাষ্ট নব দ্বাদশ এবচ । ক্রমেণ ঘটিকা হেতাস্বৎ পুণ্যং পারমার্থিক মিতি দেবীপুরাণ এব ত্রি চতুরাদি ঘটিকানাং পুণ্যত্ব মুক্তং । ইতি তিথ্যাদিতত্ত্বং ॥

মন্দাকং স্ত্রী স্তবনং । ইত্যণাদি কোষঃ ॥

মন্দাকিনী স্ত্রী স্বর্গগঙ্গা । তৎপর্য্যায়ঃ । বিয়দ্গঙ্গা ২ স্বর্নদী ৩ সুরদীর্ঘিকা ৪ । ইত্যমরঃ ॥ স্বর্গঙ্গা ৫ দেবভূতিঃ ৬ স্বর্গপদ্মা ৭ সুরেশ্বরী ৮ । ইতি শব্দরত্নাবলী ॥ তস্যা বিবরণং যথা । প্রধান ধারা যা স্বর্গে সা চ মন্দাকিনী স্মৃতা । যোজনাযুত বিস্তীর্ণা প্রস্থেন যোজনা স্মৃতা ॥ ক্ষীরতুল্য জলা শশ্বদত্যুত্তুঙ্গ তরঙ্গিণী ॥ বৈকুণ্ঠাদ্ব্রহ্মলোকঞ্চ ততঃ স্বর্গং সমাগতা ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে জাহ্নবী জন্মপ্রস্তাবে ৩৪ অধ্যায়ঃ ॥ * ॥ সংক্রান্তিবিশেষঃ । অস্য প্রমাণং নন্দা শব্দে দ্রষ্টব্যং ॥

মন্দাক্রান্তা স্ত্রী ছন্দোবিশেষঃ । যথা । চত্বারঃ প্রাক্ সতনু গুরবো দ্বৌ দশৈকাদশৌ চেন্মধ্যে বর্ণৌ স্তদনু কমুদামোদিনি ব্রাদশান্তৌ । তদ্বচ্চান্ত্যৌ যুগ রসহয়ৈর্যত্র কান্তে বিরামো মন্দাক্রান্তাং প্রবর কবয স্তন্বি তাং সংগিরন্তে ॥ ইতি শ্রুতবোধঃ ॥

মন্দাগ্নিঃ পুং কফদ্বারাল্পজঠরানলঃ । তস্য নিদানাদি যথা । মন্দ স্তীক্ষ্ণো২থ বিষমঃ সমশ্চেতি চতুর্ব্বিধঃ । কফপিত্তানিলাধিক্যাত্তৎসাম্যাজ্জাঠরো২নলঃ ॥ বিষমো বাতজান্রোগাং স্তীক্ষ্ণঃ পিত্ত সমুদ্ভবান । করোত্যগ্নি স্তথা মন্দো বিকারান্ কফ সম্ভবান্ ॥ সমা সমাগ্নে রশিতা মাত্রা সম্যগ্বিপচ্যতে । অল্পাপি নৈব মন্দাগ্নে বিষমাগ্নেস্তু দেহিনঃ ॥ কদাচিৎ পচ্যতে সম্যক্ কদাচিচ্চ ন পচ্যতে । ইতি মাধবকরঃ ॥ * ॥ তস্যৌষধং যথা । চিত্রকস্যাষ্ট ভাগানি শৃঙ্গবেরস্যচ ষোডশ । শুণ্ঠ্যাশ্চত্বারি ভাগানি মরীচানাং

দ্রবং তথা ॥ পিপ্পলী পিপ্পলীমূলং বিড়ঙ্গানাং চতুষ্টয়ং। অষ্টৌমূষলি ভাগাশ্চ ত্রিফলায়া শ্চতুষ্টয়ং ॥ দ্বিগুণেন গুড়েনৈষাং মোদকানি হি কারয়েৎ। তদ্ভক্ষণ মজীর্ণংহি পাণ্ডুরোগঞ্চ কামলাং ॥ অতিশোণিত মন্দাগ্নিপ্লীহাদ্যঞ্চ নিবারয়েৎ। ইতি গারুড়ে ১৯৮ অধ্যায়ঃ ॥ * ॥ অথ জঠরাগ্নি বিকারাধিকারঃ। তত্র সন্নিকৃষ্ট নিদান পূর্ব্বকান্ উদরাগ্নি বিকারানাহ। কফ পিত্তানিলাধিক্যাত্তৎ সাম্যাজ্জাঠরো হনলঃ। মন্দ স্তীক্ষ্ণো হথ বিষমঃ সমশ্চেতি চতুর্বিধঃ ॥ তত্র মন্দস্যাগ্নে লক্ষণমাহ। স্বল্পাপি নৈব মন্দাগ্নে মাত্রা ভুক্তাপি পচ্যতে। ছর্দ্দি দাহঃ প্রসেকঃ স্যাচ্ছিরো গৌরব জাঠরং ॥ মন্দাগ্নি জন্যান্বিকারানাহ। মন্দো হগ্নি র্দেহিনাং জর্য্যাদ্বিকারান্ কফসম্ভবান্। * । অথ চিকিৎসা। হরীতকী তথা শুণ্ঠী ভক্ষ্যমাণা গুড়েন বা। সৈন্ধবেন যুতা বা স্যাৎ সাতত্যে নাগ্নি দীপনী ॥ ১ ॥ গুড়েন শুণ্ঠী মথবোপকুল্যাং পথ্যা তৃতীয়া মথ দাড়িমং বা। আমেষ্বজীর্ণেষু গুদাময়েষু বর্চো বিবন্ধেষু চ নিত্য মদ্যাৎ ॥২॥ ত্র্যোষং দন্তি ত্রিবৃচ্চিত্রং কৃষ্ণামূলং বিচূর্ণিতং। তচ্চূর্ণং গুড় সংমিশ্রং ভক্ষয়েৎ প্রাত রুত্থিতঃ ॥ এতদ্গুড়াষ্টকং নাম বলবর্ণাগ্নি বর্দ্ধনং। শোথোদাবর্ত্ত শূলঘ্নং প্লীহ পাণ্ড্বাময়াপহং ॥ সর্ব্বচূর্ণ সমো গুড়ো দেয়ঃ। গুড়াষ্টকং ॥ ৩ ॥ দহনাজমোদ সৈন্ধব নাগর মরিচানি চাম্ল তক্রেণ। সপ্তাহাদগ্নি করং পাণ্ড্বর্শো নাশনং পরমং ॥ ৪ ॥ বৈশ্বানরঃক্ষারঃ। সামুদ্রলবণং গ্রাহ্য মষ্ট কর্ষমিতং বুধৈঃ। সৌবর্চ্চলং পঞ্চ কর্ষং বিড় সৈন্ধব ধান্যকং ॥ পিপ্পলী পিপ্পলীমূলং পত্রকং কৃষ্ণজীরকং। তালীসং কেশরং চব্য মম্লবেতসকং তথা ॥ দ্বি কর্ষ মাত্রান্যেতানি প্রত্যেকং কারয়েদ্বুধঃ। ৫ ॥ মরিচং জীরকং বিশ্বমেকৈকং কর্ষমাত্রকং ॥ দাড়িমং স্যাচ্চতুষ্কর্ষং ত্বগেলে বার্দ্ধ কর্ষকে। এতচ্চূর্ণীকৃতং সর্ব্বং লবণং ভাস্করাভিধং ॥ ভক্ষয়েচ্ছাণ মানং তৎ তক্র মস্তক কাঞ্জিকৈঃ। বাত শ্লেষ্ম ভবং গুল্মং প্লীহান মুদরং ক্ষয়ং ॥ অর্শাংসি গ্রহণী কুষ্ঠং বিবন্ধঞ্চ ভগন্দরং। শূলং শোথং শ্বাস কাসাবামদোষঞ্চ হৃদ্রুজং ॥ অশ্মরীং শর্করাঞ্চাপি পাণ্ডুরোগং কৃমীনপি। মন্দাগ্নিং নাশয়েদেতদ্দীপনং পাচনং পরং ॥ হিতায় সর্ব্বলোকানাং ভাস্করেণ

ভদীরিতং। হন্যাৎ সর্ব্বাণ্যজীর্ণানি ভুক্তমাত্র মসংশয়ং॥ নিম্বুরসাদিকং দত্ত্বা গুটিকা মপেয়্যকে হরন্তি ॥৬॥ টঙ্কনং রসগন্ধৌ চ সমং ভাগং ত্রয়ং বিষাৎ। কপর্দ্দঃ সর্জ্জিকা ক্ষারো মাগধী বিশ্ব ভেষজং॥ পৃথক পৃথক্ কর্ষমাত্রং বসুভাগ মিহোষণং। জম্বীরাম্লে দিনং ঘৃষ্টং ভবেদগ্নি হ্মারকঃ॥ বিশুচী শূল বাতাদি বহ্নিমান্দ্য প্রশান্তয়ে। ক্ষারো যবক্ষারঃ। অগ্নি হ্মারো রসো বিশুচ্যাদ্যজীর্ণে॥ ৭॥ পারদামৃত লবঙ্গ গন্ধকং ভাগ যুগ্ম মরিচেন মিশ্রিতং। তত্র জাতিফল মর্দ্ধভাগিকং তিন্তিড়ী ফল রসেন মর্দ্দিতং। বহ্নিমান্দ্য দশবক্ত্র নাশনো রামবাণ ইতি বিশ্রুতো রসঃ॥ সংগ্রহ গ্রহণি হ্মন্ত্রকর্ণকং সাম বাত খরদূষণং জয়েৎ। দীযতে তু চণকানুমানতঃ সদ্যএব জঠরাগ্নি দীপনঃ॥ রোচকঃ কফ হ্মলান্তকারকঃ শ্বাসকাস বমি জন্তু নাশনঃ। ৮॥ পারদভাগঃ ১ বিষভাগঃ ১ লবঙ্গভাগঃ ১ গন্ধকভাগঃ ১ মরিচভাগঃ ২ জাতীফলভাগঃ ॥০ রামবাণোরসোঽজীর্ণে। ইতি ভাব প্রকাশঃ॥

মন্দায়ুঃ ত্রি অল্পায়ুঃ। যথা। মন্দস্য মন্দপ্রজ্ঞস্য বযো মন্দায়ুষশ্চ বৈ। নিদ্রয়া হ্রিযতেনক্তং দিবাচ ব্যর্থ কর্ম্মভিঃ॥ ইতি শ্রীভাগবতে ১ স্কন্ধঃ॥

মন্দারঃ পুং স্বর্গীযপঞ্চবৃক্ষান্তর্গতদেবতরুবিশেষঃ। যথা। পঞ্চৈতে দেবতরবো মন্দারঃ পারিজাতকঃ। সন্তানঃ কল্পবৃক্ষশ্চ পুংসি বা হরিচন্দন মিতি॥ পারিভদ্রবৃক্ষঃ। পালিতামাদার ইতি ভাষা। যথা। পারিভদ্রে নিম্ব তরু র্ম্মন্দারঃ পারিজাতক ইতি॥ অর্ক বৃক্ষঃ। আকন্দ ইতি ভাষা। যথা। অর্কাহ্ব বসুকাস্ফোত গণরূপ বিকীরণাঃ। মন্দার শ্চার্কপর্ণে ঽত্র শুক্লে ঽলর্ক প্রতাপসৌ॥ ইতি চামরঃ॥ হস্ত ॥ ধূর্ত্তঃ। ইতি মেদিনী॥ তীর্থবিশেষঃ। যথা। বরাহ উবাচ। শৃণু সুন্দরি যত্নেন যন্মাং ত্বং পরিপৃচ্ছসি। কথয়িষ্যামি তে গুহ্যং মন্দারস্য মহাক্রিযাং॥ ক্রীড়মানো ঽস্ম্যহং তত্র দৃষ্ট্বা মন্দার পুষ্পিতং। মন্দার পুষ্পমাদায মনোজ্ঞং ন্যস্য বৈ হৃদি॥ তত্রৈকাদশ হ্মগুানি নিঃসৃতানি গিরৌ ধরে। বিন্ধ্যে চ মৎ প্রভাবেন মন্দারশ্চ মহাদ্রুমঃ॥ স্থিতোঽহং তত্র সুভগে ভক্তানুগ্রহ কাম্যযা॥ দর্শনীযতমং স্থানং মনোজ্ঞং তু

শিলাতলং ॥ যত্র তিষ্ঠাম্যহং দেবি
মন্দারদ্রুম মাস্থিতঃ । বিস্ময়ং শৃণু
সুশ্রোণি মন্দারেঽস্মিন্ দ্রুমে তথা
॥ দ্বাদশ্যাঞ্চ চতুর্দ্দশ্যাং স পুষ্প্যতি
দ্রুমোত্তমঃ । তত্র মধ্যাহ্ন বেলায়াং
বীক্ষ্যমাণো জনৈস্ততঃ ॥ ততোঽন্য
দিন মাসাদ্য দৃশ্যতে ন কদাচন । ত-
স্মিন্ মন্দার কুণ্ডে তু একভক্তোষি-
তো নরঃ ॥ স্নানং করোতি শুদ্ধাত্মা
স গচ্ছেৎ পরমাং গতিং । অথ প্রাণা-
ন্ প্রমুচ্যেত কুণ্ডে মন্দার সংস্থিতে
॥ তপঃ কৃত্বা বরারোহে মম লোকা-
য গচ্ছতি । তস্য চোত্তর পার্শ্বে তু
প্রাপণং নাম তং গিরিং । তিস্রো ধা-
রাঃ পতন্ত্যত্র দক্ষিণাং দিশ মাস্থি-
তাঃ ॥ স্নান কুণ্ড মিতি খ্যাতং ত-
স্মিন্ ক্ষেত্রে পরং মম । দক্ষিণে পত-
তে ধারা শ্রবতে চোত্তরামুখং ॥ তত্র
স্নাতো বরারোহে একরাত্রোষিতো-
নরঃ । মোদতে দক্ষিণে শৃঙ্গে তস্মিন্
মেরৌ শিলোচ্চয়ে ॥ তত্রাথ মুঞ্চতে
প্রাণান্ মম কর্ম্ম পরায়ণঃ । সর্ব্ব
সঙ্গং পরিত্যজ্য মম লোকং প্রপদ্য-
তে ॥ নাক পৃষ্ঠং সমাসাদ্য মোদতে
দৈবতৈঃ সহ । তথাত্র মুঞ্চতে প্রাণা-
ন্ কৃত কৃত্যঃ সুনিশ্চিতঃ ॥ তারয়ি-
ত্বা কুলং সর্ব্বং মম লোকং প্রপদ্যতে
। তস্য দক্ষিণ পূর্ব্বেণ সম স্রোতো
বরাঙ্গনে ॥ পততে বিন্ধ্য শৃঙ্গেষু
অগাধশ্চ মহাহ্রদঃ । তত্র স্নানন্তু যঃ
কুর্য্যাদেক ভক্তোষিতো নরঃ । মো-
দতে পূর্ব্বপার্শ্বে তু তস্মিন্মেরৌ শি-
লোচ্চয়ে ॥ অথাত্র মুঞ্চতে প্রাণান্
মম চিত্ত ব্যবস্থিতঃ । ছিত্ত্বা বৈ সর্ব্ব
সংসারং মমলোকায গচ্ছতি ॥ মন্দা-
রস্য তু পূর্ব্বেণ গুহ্যং কোটর সংস্থি-
তং । যত্র ধারা পতত্যেকা মুষলেন
সমন্বিতা ॥ তত্র স্নানং প্রকুর্ব্বীত প-
ঞ্চভক্তোষিতো নরঃ । মোদতে পূর্ব্ব-
পার্শ্বে তু তস্মিন্ মেরৌ শিলোচ্চয়ে ।
তত্রাথ মুঞ্চতে প্রাণান্ কৃত্বা কর্ম্ম সু
দুষ্করং । মেরুশৃঙ্গং সমুৎসৃজ্য মম-
লোকঞ্চ গচ্ছতি ॥ তস্য দক্ষিণ পা-
র্শ্বে তু গুহ্যং বিন্ধ্য বিনিঃসৃতং । পঞ্চ-
ধারাঃ পতন্ত্যত্র মুষলেন সমন্বিতাঃ
॥ তত্র স্নানন্তু কুর্ব্বীত অহোরাত্রো-
ষিতো নরঃ । মোদতে দক্ষিণে শৃঙ্গে
মহামেরৌ শিলোচ্চয়ে ॥ অথাত্র মু-
ঞ্চতে প্রাণান্ কৃত্বা কর্ম্ম সুদুষ্করং ।
মেরু শৃঙ্গং পরিত্যজ্য মম লোকং
প্রপদ্যতে ॥ দক্ষিণে পশ্চিমে ভাগে
মন্দারস্য যশস্বিনি । তত্র ধারা প-
তত্যেকা আদিত্য সম তেজসা ॥
তত্র স্নানন্তু কুর্ব্বীত অহোরাত্রোষি

তো নরঃ। মোদতে পশ্চিমে ভাগে ধ্রুবো যত্র প্রবর্ত্ততে॥ অথাত্র মুঞ্চতে প্রাণান্ মম কর্ম্মব্যবস্থিতঃ। সর্ব্বপাপ বিনির্ম্মুক্তো মম লোকে চ মোদতে॥ তস্য পশ্চিম পার্শ্বে তু গুহ্যং দেব সমন্বিতং। চক্রাবর্ত্ত ইতি খ্যাত মগাধশ্চ মহাহ্রদঃ॥ স্নানং করোতি য স্তত্র পঞ্চভক্তোষিতো নরঃ। মোদতে সর্ব্বশৃঙ্গেষু স্বচ্ছন্দ গমনালয়ঃ॥ অথ বৈ মুঞ্চতে প্রাণান্ চক্রাবর্ত্তে মহাযশাঃ। শৃঙ্গান্ সর্ব্বান্ পরিত্যজ্য মোদতে মম সন্নিধৌ॥ দেশং বায়ব্য মাশ্রিত্য তস্মিন্ বিন্ধ্যশিলোচয়ে। তিস্রো ধারাঃ পতন্ত্যত্র মুষলাকৃতয়ঃ শুভাঃ॥ তত্র স্নানং প্রকুর্ব্বীত মম চিত্ত ব্যবস্থিতঃ। মোদতে সর্ব্বশৃঙ্গেষু একচিত্ত সমাশ্রিতঃ॥ তথাত্র মুঞ্চতে প্রাণাং শ্চাস্মিন্ গুহ্যে যশস্বিনি। সর্ব্বসঙ্গং পরিত্যজ্য মম লোকায় গচ্ছতি॥ তস্য ত্রিক্রোশ মাত্রেণ দক্ষিণাং দিশ মাশ্রিতঃ॥ গুহ্যং গম্ভীরকং নাম অগাধশ্চ মহাহ্রদং। তত্র স্নানস্তু কুর্ব্বীত অষ্ট ভক্তোষিতো নরঃ॥ মোদতে সর্ব্ব দ্বীপেষু সর্ব্বত্র গমনালয়ঃ। অথৈবং মুঞ্চতে প্রাণান্ মম কর্ম্ম ব্যবস্থিতঃ॥ সর্ব্ব দ্বীপান্ পরিত্যজ্য মম লোকং প্রপদ্যতে। তস্য পশ্চিম পার্শ্বে তু গুহ্যং মে পরমং মহৎ। সপ্তধারাঃ পতন্ত্যত্র অগাধশ্চ মহাহ্রদঃ॥ তত্র স্নানন্তু কুর্ব্বীত অহোরাত্রোষিতো নরঃ। মোদতে শক্রলোকস্তু স্বচ্ছন্দ গমনালয়ঃ। অথ বৈ মুঞ্চতে প্রাণান্ স্বকর্ম্ম পরিনিষ্ঠিতঃ॥ সর্ব্বসঙ্গং পরিত্যজ্য মম লোকং প্রপদ্যতে। মণ্ডলং তস্য ক্ষেত্রস্য কথ্যমানং ময়া শৃণু॥ স্যান্তপঞ্চকষ্ণৈব মন্দারস্য গিরৌ মম। তত্র তিষ্ঠানি সুশ্রোণি বিন্ধ্যস্য গিরি মূর্দ্ধনি॥ মন্দারে পরমং গুহ্যং তস্মিন্ গুহ্য শিলোচয়ে। দক্ষিণে সংস্থিতং চক্রং বামে স্থানে চ বৈ গদা॥ লাঙ্গলং মুষলঞ্চৈব শঙ্খং তিষ্ঠতি চাগ্রতঃ। য এতৎ শৃণয়ান্নিত্যং গুহ্যং মন্দার সংস্থিতং॥ তব চৈব প্রিয়ার্থায় মম ভক্ত সুখাবহং। এতন্ন জানতে কশ্চিন্মম মায়া বিমোহিতঃ। মুচ্য ভাগবতান্ শুদ্ধান্ যেচ বারাহ সংশ্রিতান্॥ ইত্যাদি বারাহপুরাণে ভগবচ্ছাস্ত্রে মন্দারগুহ্যবর্ণনং নামাধ্যায়ঃ॥

মন্দাস্যং, ক্লী লজ্জা। ইতি শব্দরত্নাবলী॥

মন্দাক্ষং ক্লী লজ্জা। ইত্যমরঃ॥

মন্দিজ্জরঃ পুং মৎস্যবিশেষঃ। ইতি ভূরিপ্রয়োগঃ॥ গ্রন্থান্তরে মল্লিজ্জড়োপি পাঠঃ॥

মন্দিরং ক্লী গৃহং। ইত্যমরঃ॥ মন্দ্যতে সুপ্যতে ত্র মন্দিরং। নন্দিও স্বপনে জাড্যে মদে মোদে স্তুতৌ গতৌ নাম্নীতি ইরঃ। নগরং মন্দিরং পুর মিতি পুং নপুংসকযো রকুণেন পঠ্যতে। স্ত্রিযাং মন্দিরা চ প্রয়োগশ্চ মন্দিরাযাস্ত্বরাবানিতি মধুমঞ্জটাদযঃ। ইতি ভট্টীকাযাং ভরতঃ॥ * ॥ অথ ভগবন্মন্দির নির্মাণ মাহাত্ম্যং। যঃ কারযে অন্দিরং কেশবস্য পুণ্যাল্লোকান্ স জযেচ্ছাশ্বতান বৈ। দত্ত্বাবাসান্ পুষ্প ফলাভিপন্নান্ ভোগান্ ভুঙ্ক্তে কানতঃ শ্লাঘনীযান্॥ আসপ্তমং পিতৃজ্জলং তথা মাতৃজ্জলং নরঃ। তারযেদাত্মনা সার্দ্ধং বিষ্ণো র্মন্দির কারকঃ॥ ইমাশ্চ পিতরো দৈত্য গাথা গাযন্তি যোগিনঃ। পুরতো যদুসিংহস্য হনবস্য তপস্বিনঃ॥ অপি নঃ স্বজ্জলে কশ্চিদ্বিষ্ণুভক্তো ভবিষ্যতি। হরিমন্দির কর্ত্তা যো ভবিষ্যতি শুচিব্রতঃ॥ ইতি বামনে শেষাধ্যাযঃ॥ * ॥ অপিচ। অগ্নিপুরাণে। যে ধ্যাযন্তি সদা বুদ্ধ্যা করিষ্যামো হরে গৃহং। তেষাং বিলীযতে পাপং পূর্বজন্ম শতোদ্ভবং॥ কিঞ্চ। সমতীতং ভবিষ্যঞ্চ জ্জলানামযুতং নরঃ। বিষ্ণুলোকং নযত্যাশু কারযেদ্বা হরে গৃহং॥ কিঞ্চ। লক্ষেণাথ সহস্রেণ শতেনার্দ্ধেন বা হরেঃ। তুল্যং ফলং সমাখ্যাত মিহেশ্বর দরিদ্রযোঃ॥ বিষ্ণু ধর্ম্মোত্তরে তৃতীযকাণ্ডে। কৃত্বা বাস গৃহং তস্য দেবস্য পরমেষ্ঠিনঃ। রাজসূযাশ্বমেধানাং ফলেন সহ যুজ্যতে॥ প্রাসাদে মৃন্ময়ে পুণ্যং মযৈতৎ কথিতং দ্বিজাঃ। তস্মাদ্দারুমযে পুণ্যং কৃতে শত গুণং ভবেৎ॥ ততো দশগুণং পুণ্যং তথা শৈলমযে ভবেৎ॥ ততো দশগুণং লৌহে তাম্রে শতগুণং ততঃ॥ সহস্র গুণিতং রৌপ্যে তস্মাৎ ফল মবাপ্নুতে। ততঃ শতসহস্রং বৈ সৌবর্ণে দ্বিজ সত্তমাঃ॥ অনন্তং ফলমাপ্নোতি রত্নচিত্রে মনোহরে। স্কান্দে। আরম্ভে কৃষ্ণ ধিষ্ণ্যস্য সপ্তজন্মনি যৎকৃতং। পাপং বিলয মাপ্নোতি নরকাদুদ্ধরেৎ পিতৄন্॥ প্রাসাদপাদে কৃষ্ণস্য যাবত্তিষ্ঠন্তি রেণুকাঃ। তাবদ্বর্ষ সহস্রাণি বসতে বিষ্ণুসদ্মনি॥ প্রাসাদে কৃষ্ণদেবস্য চিত্রকর্ম্ম করোতি যঃ। বসতে বিষ্ণু

লোকে তু যাবত্তিষ্ঠন্তি সাগরাঃ ॥ নারসিংহে। যঃ জর্য্যাচ্ছোভনং বেশ্ম নরসিংহস্য ভক্তিমান্ ।সর্ব্বপাপ বিনির্ম্মুক্তো বিষ্ণুলোক মবাপ্নুযাৎ ॥ হযশীর্ষে। দেবাগারং করোমীতি মনসা যস্ত চিন্তযেৎ। তস্য কাযগতং পাপং তদহ্না বিপ্র নশ্যতি ॥ কৃতে তু কিং পুন স্তস্য প্রাসাদে বিধিনৈব তু। অষ্টেষ্টকা সমাযুক্তং যঃ জর্য্যাদ্বৈষ্ণবং গৃহং । ন তস্য ফল সম্পত্তি র্বক্তুং শক্যেত কেনচিৎ ॥ অনেনৈবানুমেযস্তু ফলং প্রাসাদ বিস্তরাৎ। মরণঞ্চ বুক্ষেমর্ত্ত্যো যঃ কৃত্বা প্রথমেষ্টকাং ॥ স সমাপ্তস্য যজ্ঞস্য ফলং প্রাপ্নোত্যসংশযং । বিষ্ণুরহস্যে। বাল্যে চ ক্রীডমানা যে পাংশুভি র্ভবনং হরেঃ। বাসুদেবস্য জর্ব্বন্তি তেপি তল্লোক গামিনঃ॥ আদি পুরাণে । লেপনাচ্ছদনঞ্চৈব যঃ করোতি পুন র্নরঃ । দেবস্যাযতনং কৃত্বা ন ভবেৎ কীটজং ভযং॥ * ॥ অথ মন্দিরনির্ম্মাণকালঃ। মাৎস্যে । চৈত্রে ব্যাধি মবাপ্নোতি যো গৃহং কারযেন্নরঃ । বৈশাখে ধন রত্নানি জ্যৈষ্ঠে মৃত্যুং তথৈব চ ॥ আষাঢে ভৃত্য রত্নানি পশু বর্গ মবাপ্নু যাৎ। শ্রাবণে মিত্র লাভন্তু হানিং ভাদ্রপদে তথা। পত্নী নাশঞ্চাশ্বযুগে কার্ত্তিকে ধন ধান্যকং ॥ মার্গশীর্ষে তথা ভক্তং পৌষে তস্করজং ভযং। লাভন্তু বহুশো বিদ্যাদগ্নিং মাঘে বিনির্দ্দিশেৎ॥ কাঞ্চনং ফাল্গুনে পুত্রানিতি কাল বলং স্মৃতং। অশ্বিনী রোহিণী মূল মুত্তরাত্রয মৈন্দবং ॥ স্বাতী হস্তানুরাধা চ গৃহারম্ভে প্রশস্যতে। আদিত্য ভৌম বর্জ্জঞ্চ সর্ব্বে বারাঃ শুভাবহাঃ ॥ বজ্র ব্যাঘাত শূলানি ব্যতীপাতাতিগণ্ডকে। বিষ্কম্ভগণ্ড পরিঘান্ বর্জ্য যোগেষু কারযেৎ ॥ শ্বেত মৈত্রে চ মাহেন্দ্রে গান্ধর্ব্বাভিজিদ্রৌহিণে । তথা বৈরাজ সাবিত্রে মুহূর্ত্তে গৃহমারভেৎ ॥ চন্দ্রাদিত্য বলং লব্ধা লগ্নং শুভ নিরীক্ষিতঃ। স্তম্ভোচ্ছ্রাদি প্রকর্ত্তব্য মন্যত্র পরি বর্জ্জযেৎ ॥ হযশীর্ষে। বাস্তু কর্ম্ম নচারভ্যং বর্ষাকালে বিজানতা। কৃষ্ণপক্ষে ত্রিভাগান্তে শুক্লপাদৌ দ্বিতীযকে ॥ চতুর্থী নবমী বর্জ্জ্যা তিথিশ্চাপি চতুর্দ্দশী। ভৌমস্য তু দিনং বর্জ্যং করণং বিষ্টি সংজ্ঞিতং ॥ ক্ষিত্যন্তরীক্ষ দিব্যোত্থৈ রুৎপাতৈ র্ভয পীডিতং। উপসৃষ্টে গৃহে ভঙ্গে ব্যতিপাত হতং তথা ॥ চন্দ্র তারানুকূলে চ কার্য্যং কর্ম বিজানতা। ধ্রুবা-

ণি চাত্র শস্তানি নৈর্ঋতং শক্র দৈবতং ॥ পুষ্যং পৌষ্ণঞ্চ সাবিত্রং বাযব্যং বৈষ্ণবং তথা। স্থিরাংশে চ স্থিরে লগ্নে কর্ত্তুঃ শোভনচযাত্মকে ॥ কেন্দ্রে সৌম্য গ্রহো যস্য ত্রিকোণে তু সুরোত্তম। পাপ শোপচয স্থানে তদাকার্য্যং সমারভেদিতি ॥ * ॥ অথ প্রাসাদস্থানং। হযশীর্ষে। পূর্ব্বং দেব জলং পীড্য প্রাসাদং স্বল্পকন্তথা। সমং বাপ্যধিকং বাপি ন কর্ত্তব্যং বিজানতা ॥ উভযো দ্বিগুণাং সীনাং ত্যক্ত্বা চোচ্ছ্রায সংমিতাং। প্রাসাদং কারযেদন্যং নোভযং পীড়যেদ্বুধঃ ॥ * ॥ অথ স্থান শোধনানি। দেবীপুরাণে। দেবো বিষ্ণুস্তথা রুদ্রো ব্রহ্মাদ্যাঃ সুর সত্তমাঃ। প্রতিষ্ঠাপ্যাঃ শুভে স্থানে অন্যথাতে ভযাবহাঃ ॥ গর্ত্তাদি লক্ষণা ধাত্রী গন্ধ স্বাদেন যা ভবেৎ। বর্ণেন চ সুরশ্রেষ্ঠ সা মহী সর্ব্বকামদা ॥ মাৎস্যে। পূর্ব্বং ভূমিং পরীক্ষেত পশ্চাৎ বাস্তুং প্রকল্পযেৎ। শ্বেতা রক্তা তথা পীতা কৃষ্ণা চৈবানুপূর্ব্বশঃ ॥ বিপ্রাদেঃ শস্যতে ভূমি রতঃ কার্য্যং পরীক্ষণং। বিপ্রাণাং মধুরাস্বাদা কষাযা ক্ষত্রিযস্য চ ॥ কষাযে কটুতা তদ্বদ্বৈশ্য শূদ্রেষু শস্যতে। অরত্নি মাত্রে বৈ গর্ত্তে স্বনুলিপ্তে চ সর্ব্বতঃ ॥ ঘৃতমাম শরাবস্থং কৃত্বা বর্ত্তি চতুষ্টযং। জ্বালযেদ্ভূপরীক্ষার্থং পূর্ণং তৎ সর্ব্ব দিঙ্মুখং ॥ দীপ্তা পূর্ব্বাদি গৃহ্নীযাদ্বর্ণানামনুপূর্ব্বশঃ। বাস্তুঃ সমূহিকো নাম দীপ্যতে সর্ব্বতস্তু যঃ ॥ শুভদঃ সর্ব্ববর্ণানাং প্রাসাদেষু গৃহেষু চ। অরত্নি মাত্রকং গর্ত্তং পরীক্ষ্য খাত পূরণে ॥ অধিকে শ্রিয মাপ্নোতি ন্যূনে হানিং সমে সমং। ফাল কৃষ্টে ২থবা দেশে সর্ব্ববীজানি রোপযেৎ ॥ ত্রিপঞ্চ সপ্ত রাত্রেণ যত্র রোহন্তি তান্যপি। জ্যেষ্ঠা মধ্যা কনিষ্ঠা ভূর্ব্বর্জ্জনীযেতরা সদা ॥ হযশীর্ষে। সুরভীনাং রতি র্যত্র সবৎসানাং বৃষৈঃ সহ। সুন্দরীণাং রতি র্যত্র পুরুষৈঃ সহ সত্তম ॥ রাজ্ঞাং পূর্ব্বং গৃহং যস্যামগ্নীনাং যজ্বিনাং তথা। কাশ্মীর চন্দনামোদা কর্পূরাগুরু গন্ধিনী ॥ কমলোৎপল গন্ধা চ জাতী চম্পক গন্ধিনী। পাটলা মল্লিকা গন্ধা নাগকেশর গন্ধিনী ॥ দধি ক্ষীরাজ্য গন্ধা চ মদিরাসব গন্ধিনী। সুগন্ধি ব্রীহি গন্ধা চ শুভদ্রব্য স্বনা চ যা ॥ সর্ব্বেষাং বর্ণিনাং ভূমিঃ সর্ব্ব সাধারণা মতা। দুর্গন্ধা দুঃস্বনা যা চ নানা বর্ণা চ দুর্ভগা ॥ বৃত্তার্দ্ধচন্দ্র সদৃশা

বিস্তারাদ্দ্বিগুণায়তা । বিবর্ণা বর্ণ-
হীনা চ বক্রা শচিমুখী তথা ॥ দ্বিব-
র্ণা সূর্পসদৃশী গোমুখী চ ত্রিকোণি-
কা । ষড়স্রা শূল সদৃশী দন্তিপৃষ্ঠো-
পমা চ যা ॥ সরীসৃপ সমা যা চ দি-
ঙ্মুখা শকটাকৃতিঃ । এবং প্রকারা
যা ভূমি র্ব্বর্জ্জ্যা যত্নেন দেশিকৈঃ ॥
কিঞ্চ । প্রাসাদস্য বিশেষেণ প্রো-
ক্তা ভূমি শ্চতুর্ব্বিধা । সুপদ্মা ভদ্রিকা
পূর্ণা ধূম্রা রাগিণ্যথা পরা ॥ তিল-
কৈ র্নারিকেলৈশ্চ বর্হিঃ কাশৈশ্চ
শোভিতা । পদ্মেন্দীবর সংযুক্তা সা
সুপদ্মেতি বিশ্রুতা ॥ নদী সমুদ্রায়-
তন তীর্থপর্য্যন্ত শোভিতা । পুন্নবৃক্ষ
সমাকীর্ণা ক্ষীরবৃক্ষোপশোভিতা ॥
বনোদ্যান লতা গুল্ম ফল্গু স্তম্ব স-
মাবৃতা । যজ্ঞীয় বৃক্ষ সুক্ষেত্র যুক্তা
ভদ্রেতি কীর্ত্তিতা ॥ বঙ্গনাশোক
বহুলা তথা প্লক্ষাম্র লোহিতৈঃ ।
মাধবী বেষ্টিতা যা চ মৃদঙ্গ নিস্বান
কোদ্রবৈঃ ॥ শূকধান্যৈশ্চ পুন্নাগৈ
গিরিপার্শ্ব গতা চ সা । তোয়ঞ্চ স্বল্প
কং যস্যাং সা পূর্ণা পরিকীর্ত্তিতা ॥
বিল্বার্কস্নুহি পীলূনাং বনৈ র্যা পরি
তো বৃতা । সশর্করা চ কঠিনা যুক্তা
কণ্টকিভি দ্রুমৈঃ ॥ গৃধ্র গোমায়ু
কাকানাং শ্যেনানাং যা স্থলাস্থলৈঃ
। ধূম্রেতি কীর্ত্তিতা সা তু তাং যত্নাৎ
পরিবর্জ্জয়েৎ ॥ ততো ভূমিং পরী-
ক্ষেত পূর্ব্বোদক্ প্লবনাং শুভাং । অ-
সঙ্কটাং তথা ছন্না মল্পতোয়াং পরি-
প্লুতাং ॥ সংপূর্য্যমাণে খাতে তু ত-
থাধিক মৃদং শুভাং । অশুভু সদৃশং
বর্ণং যস্যাং ন ম্লানি মৃচ্ছতি ॥ ন নির্গা-
তি তথা দীপস্তোয়ং শীঘ্রং ন জীর্য্যতে
। শ্বেতারুণা পীত কৃষ্ণা বিপ্রাদীনাং
প্রশস্যতে ॥ আজ্য সদ্গন্ধ মদ্যানাং
তুল্য গন্ধা তু যা ভবেৎ । মধুরা চ ক-
ষায়া চ অম্লা চ কটুকা চ যা ॥ স্থলৈঃ
শরৈ স্তথা কাশৈঃ দূর্ব্বাভি র্যা চ সম্বৃ-
তা । তস্যাং পুণ্যে হথ নক্ষত্রে স্ব
য্যাদ্ভূমি পরিগ্রহং ॥ * ॥ অথ ভূমি
পরিগ্রহঃ । তত্রৈব । প্রাকার সীমাপ-
র্য্যন্তং ততো ভূতবলিং হরেৎ । মাং-
সং হরিদ্রা চূর্ণঞ্চ সলাজ দধি শক্তবঃ
॥ এভি র্ভূতবলিং দত্বা সূত্র নষ্টাক্ষ-
রেণ তু । পাতয়িত্বা ততঃ শঙ্কূনষ্ট
দিক্ষু নিবেশয়েৎ ॥ রাক্ষসা শ্চাপি
ভূতাশ্চ যে হস্মিংস্তিষ্ঠন্তি ভূতলে ।
তে সর্ব্বে ব্যপগচ্ছন্তু স্থানং কুর্য্যামহং
হরেঃ ॥ ইত্যনুজ্ঞাপ্য ভূতাদীন্ তাং
ভূমিং পরিশোধয়েৎ । আদিত্যাদি
গ্রহাণাঞ্চ লোকপালৈঃ সমং কৃতী ॥
আর্য্যমিষ্ট বিধানেন ততো বৈ হোম

মাচরেৎ। চতুর্হোমং ততঃ কুর্য্যা-
ন্মূলমন্ত্রেণ দেশিকঃ॥ দদ্যাৎ পূ-
র্ণাহুতিং পশ্চাৎ বৌষডন্তেন দেশি-
কঃ। বৃষভৌ কপিলৌ গৃহ্য সবর্ণৌ
বা বিচক্ষণঃ॥ যোজনার্থং হলশ্চৈব
গৃহ্নীযাদমনোদ্ভবং। প্রাঙ্মুখং যো-
জ্য নম্রস্তো বস্ত্রালঙ্কার ভূষিতঃ॥
আমনীং যষ্টি মাদায দ্বাদশাক্ষর
বিদ্যযা। সংমর্দ্দেন সমীকৃত্য শুভ
বীজানি বাপযেৎ॥ সংপ্রাপ্তে শুভ
কালে তু গোভিস্তৎ খাদযেদ্বুধঃ।
পুনস্তং কর্ষযিত্বা তু সমীকৃত্য গৃহং
গুরুঃ॥ মাৎস্যে চ। হীনাধিকাং গ-
তাং বাস্তোঃ সর্ব্বতঃ পরিবর্জযেৎ।
নগর গ্রাম দেশেষু সর্ব্বত্রৈব বিব-
র্জ্জযেৎ॥ * ॥ অথ দিক্সাধনং।
হযশীর্ষে। বাহ্য বাস্তু সমং কৃত্বা
চতুরস্রং সমন্ততঃ। ভূমিং তোয স-
মাং কৃত্বা দর্পণোদর সন্নিভাং॥ দ্বাদ-
শাঙ্গুল মানেন চাষ্টৌবারাংস্তু ভ্রা-
মযেৎ। মধ্যে সুনিশ্চলং শঙ্কুং স্থা-
প্য ছাযাং নিরীক্ষযেৎ॥ প্রবেশে
নিষ্ক্রমে তস্যাং শঙ্কুচ্ছাযাং নিরূপ-
যেৎ। বৈষুবে বিমলে ব্যোম্নি শঙ্কুনা
সাধযেদ্দিশং॥ শরদ্বসন্তযো রেব
মাদিত্যাৎ সাধযেদ্দিশং। প্রাচীং
বা পূষ্প বেধেন বিচিত্রা মন্তরেণ বা॥



উদীচীং ধ্রুববেধেন মধ্যযোগেন চো-
দযেৎ। চতুরস্রাং শিলাং গৃহ্য ইষ্ট-
কাং বা সুশোভনাং॥ চতুর্দ্দিক্ষু নি-
বেশ্যাথ সূত্রচিহ্নন্তু কারযেৎ। এবং
কৃত্বা সূত্রচিহ্নং ব্রাহ্মণাংস্তত্র ভোজ-
যেৎ॥ বৈষ্ণবান্ পাযসেনাগ্র্যান্ দ্বা-
দশৈব সমাহিতঃ॥ * ॥ অথ শ-
ল্যোদ্ধরণং। মাৎস্যে। গৃহারম্ভেতি
কণ্ডুতিঃ স্বাম্যঙ্গে যত্র জাযতে। শ-
ল্যন্ত্বপনযেত্তত্র প্রাসাদে ভবনেথবা
॥ সশল্যং ভযদং যস্মাদশল্যং ভয
নাশনং। হযশীর্ষে। আদিশেদ্বাস্তু-
বঃ শল্যং গৃহিণো হঙ্গ বিকারতঃ।
শকুনো দৃশ্যতে বাপি যস্য বা শ্রূয-
তে ধ্বনিঃ॥ কীর্ত্ত্যতে যস্য বৈ নাম শ-
ল্যং তস্য বিনির্দ্দিশেৎ॥ * ॥ অথ
বাস্তু মণ্ডলং। মাৎস্যে। পঞ্চগ-
ব্যোষধিজলৈঃ পরীক্ষিত্বাবসেচযেৎ
। একাশীতি পদং কুর্য্যাদ্রেখাভিঃ
কনকেন তু॥ পশ্চাল্লেপ্যেন চালি-
প্য সূত্রেণালোড্য সর্ব্বতঃ। দশপূ-
র্ব্বাযতা রেখা দশ চৈবোত্তরাযতাঃ॥
সর্ব্ববাস্তু বিভাগেষু বিজ্ঞেযা নবকা
নর। একাশীতি পদং কৃত্বা বাস্তুবিৎ
সর্ব্ববাস্তুষু॥ পদস্থান্ পূজযেদ্দেবান্
ত্রিংশৎ পঞ্চদশৈব চ। দ্বাত্রিংশদ্বা-
হ্যতঃ পূজ্যাঃ পূজ্যাশ্চান্তে ত্রযোদশ

।। নাগত স্তান্ প্রবক্ষ্যামি স্থানানি চ নিবোধ মে। ঈশকোণাদিষু সুরান্ পূজযেচ্চ বিধানতঃ ।। শিখী চৈবাথ পৰ্জ্জন্যো জয়ন্তঃ স্থলিশায়ুঃঃ। সূর্য্যঃ সত্যো ভৃশশ্চৈব আকাশো বায়ুরেব চ ।। পূষা চ বিতথশ্চৈব গৃহক্ষত যমাবুভৌ। গন্ধৰ্ব্বো ভৃঙ্গরাজশ্চ মৃগঃ পিতৃগণ স্তথা ।। দৌবারিকোথ সুগ্রীবঃ পুষ্পদন্তো জলাধিপঃ। অসুরঃশোষ পাপৌ চরোগোঽহি মুখ্য এব চ ।। ভল্লাটঃ সোম সূৰ্য্যৌ চ অদিতিশ্চ দিতি স্তথা। বহি দ্বাত্রিংশদেতে তু তদন্তশ্চ সুরান্ শৃণু ।। ঈশানাদি চতুষ্কোণে সংস্থিতান্ পূজযেদ্বুধঃ। আপ শ্চৈবাথ সাবিত্রো জযো রুদ্র স্তথৈব চ ।। মধ্যে নবপদো ব্রহ্মা তস্যাষ্টৌ চ সমীপগাঃ। সর্ব্বানেকোত্তরান্ বিদ্যাৎ পূর্ব্বাদীমামতঃ শৃণু ।। অর্য্যমা সবিতা চৈব বিবস্বান্ বিবুধাধিপঃ। মিত্রোথ রাজযক্ষ্মা চ তথা পৃথ্বীধরঃ ক্রমাৎ ।। অষ্টম শ্চাপবৎসশ্চ পরিতো ব্রহ্মণঃ স্মৃতাঃ। অর্য্যমা চ বিবস্বাংশ্চ মিত্রঃ পৃথ্বীধর স্তথা ।। ব্রহ্মণঃ পরিতো দিক্ষু ত্রিপদাস্তে তু সর্ব্বতঃ। আপ শ্চৈবাপবৎসশ্চ পৰ্জ্জন্যোগ্নি দিতি স্তথা ।। পদিকানাঞ্চ বর্গোয মেবং কোণেষ্বশেষতঃ। তন্মধ্যে তু বহি ৰ্বিংশ দ্বিপদাস্তে তু সৰ্ব্বতঃ ।। অর্য্যমা চ বিবস্বাংশ্চ মিত্রঃ পৃথ্বীধর স্তথা। ব্রহ্মণঃ পরিতো দিক্ষু ত্রিপদা স্তে তু সর্ব্বতঃ ।। বংশানিদানীং বক্ষ্যামি রজ্জুরপি পৃথক্ পৃথক্। বায়ুং যাবত্তথা রোগাৎ পিতৃভ্যঃ শিখিন স্তথা ।। মুখ্যাদ্ভৃশং তথা শোষাদ্বিতথং যাবদেব তু। সুগ্রীবাদদিতিং যাবৎ ভৃঙ্গাৎ পর্জ্জন্যমেব চ ।।এতে বংশাঃ সমাখ্যাতাঃ ক্বচিদুজ্জব এব তু। এতেষাং যস্তু সম্পাতঃ পদমধ্যং সমং তথা ।। সমং চৈতৎ সমাখ্যাতং ত্রিশূলং কোণগঞ্চ যৎ। স্তম্ভন্যাসেষু বর্জ্জ্যানি তুলা বিধিষু সর্ব্বদা ।। কীলোৎসৃষ্টোপধানাদি বর্জ্জযেদ্যত্নতো নরঃ। সর্ব্বত্র বাস্তু নিৰ্দ্দিষ্টঃ পিতৃবংশোত্তরাযতঃ।। মূৰ্দ্ধন্যগ্নিঃ সমাবিষ্টো মুখে চাপঃ সমাস্থিতঃ। পৃথ্বীধরো ঽর্য্যমা চৈব স্তনযো স্তাবধিষ্ঠিতৌ ।। বক্ষঃস্থলে ত্বাপবৎসঃ পূজনীযঃ সদা বুধৈঃ। নেত্রযোর্দ্দিতি পৰ্জ্জন্যৌ শ্রোত্রে দিতি জযন্তকৌ ।। সর্পেন্দ্রা বংশ সংস্থৌ তু পূজনীযৌ প্রযত্নতঃ। সূৰ্য্যঃ সোমাদয স্তদ্বদ্বাহ্বোঃ পঞ্চচ পঞ্চচ ।। রুদ্রশ্চ রাজযক্ষ্মা চ বামহস্তং সমাশ্রিতৌ। সাবিত্রঃ

সবিতা তদ্বদ্বস্তং দক্ষিণমাশ্রিতৌ।। বিবস্বানথ মিত্রশ্চ জঠরে সংব্যবস্থিতৌ। পূষা চ পাপযক্ষ্মা চ হস্তয়োর্মণিবন্ধনে ।। তথৈবাসুর শোষৌ চ বামপার্শ্বং সমাশ্রিতৌ। পার্শ্বে তু দক্ষিণে তদ্বদ্বিতথঃ সগৃহক্ষতঃ ।। ঊর্ব্বো র্যমাম্বপৌ জ্ঞেয়ৌ জান্বো র্গন্ধর্ব্ব পুষ্পকৌ। জঙ্ঘয়ো র্ভৃঙ্গ সুগ্রীবৌ স্ফিক্স্থৌ দৌবারিকো মৃগঃ ।। জয়ঃ শক্র স্তথা মেঢ্রে পাদয়োঃ পিতর স্তথা। মধ্যে নবপদো ব্রহ্মা হৃদয়ে তু স পূজ্যতে ।। চতুঃষষ্টি পদো বাস্তুঃ প্রাসাদে ব্রহ্মণঃ স্মৃতঃ। ব্রহ্মা চতুষ্পদ স্তদ্বৎ কোণেম্বেকপদা স্তথা ।। বহিঃ কোণেষু চাষ্টৌ তু সার্দ্ধা শ্চোভয়তঃ স্মৃতাঃ। বিংশতি র্দ্বিপদা স্তেষাং চতুঃষষ্টিপদে স্মৃতঃ।।*।। হয়শীর্ষে। বাস্তুঙ্গং সূত্রয়েৎ প্রাজ্ঞঃ শ্বেতাম্বরধরঃ শুচিঃ। শ্বেতগন্ধানুলিপ্তাঙ্গঃ সর্ব্বালঙ্কার ভূষিতঃ।। চতুঃষষ্টি তু প্রাসাদে একাশীতি র্গৃহে সদা। চতুরস্রীকৃতে ক্ষেত্রে অষ্টধোভয় ভাজিতে ।। কোণরেখাং ততো দত্বা সুর ভাগাংস্তু কল্পয়েৎ। শিবঃ কোণার্দ্ধতো জ্ঞেয়ঃ পর্জ্জন্যঃ পদ সংস্থিতঃ ।। দ্বিপদস্থো জয়ো জ্ঞেয়ঃ সুরেশ শ্চৈকপাদিকঃ। ভাস্কর স্তু পদে জ্ঞেয়ো দ্বিপদঃ সত্য ইষ্যতে।। ভৃশঃপদস্থো বিজ্ঞেয়ো ব্যোমশ্চৈব পদার্দ্ধগঃ। হুতাশনঃ পদার্দ্ধশ্চ পূষা চ পদ সংস্থিতঃ।। বিতথো দ্বিপদস্থশ্চ পদৈকশ্চ গৃহক্ষতঃ। বৈবস্বতঃ পদৈকস্থো গন্ধর্ব্বো দ্বিপদস্থিতঃ।। ভৃঙ্গশ্চৈক পদো জ্ঞেয়ো মৃগশ্চার্দ্ধ পদে স্থিতঃ। পিতরশ্চার্দ্ধতো জ্ঞেয়াঃ পদে দৌবারিকঃ স্তথা।। সুগ্রীবশ্চ পদে জ্ঞেয়োহ্থে কস্থঃ পুষ্পদন্তকঃ। যাদসাম্পতিরেকস্থো হ্যসুরস্তু হি সংস্থিতঃ।। শোষ শ্চৈকপদে জ্ঞেয়ো হ্যর্দ্ধগঃ পাপ ইষ্যতে। রোগ শ্চার্দ্ধপদে জ্ঞেয়ো নাগ শ্চাপি পদে স্থিতঃ।। মুখ্যশ্চ দ্বিপদে জ্ঞেয়ো ভল্লাটঃ পদ সংস্থিতঃ। যজ্ঞেশ্বরঃ পদে জ্ঞেয়ো নাগস্তু দ্বিপদে স্থিতঃ।। পদস্থা শ্রীমহাদেবী অদিতি শ্চার্দ্ধ সংস্থিতা। আপো জ্ঞেয়াস্তু পদগা বলী দ্বিপদ সংস্থিতঃ।। চতুষ্পদস্থো বিজ্ঞেয় স্তুর্য্যমা পূর্ব্ব মধ্যগঃ। সবিতা তু পদে জ্ঞেয়ঃ সাবিত্রী চ পদেস্থিতা।। ততো বিবস্বান্ বিজ্ঞেয় শ্চতুষ্টয় পদে স্থিতঃ। ইন্দ্র শ্চন্দ্রো জয় শ্চৈব একৈকে সংব্যবস্থিতাঃ ।। মিত্র শ্চতষ্পদস্থশ্চ পশ্চিমে তু ব্যবস্থিতঃ। রুদ্রঃ পদৈক সংস্থো বৈ যক্ষ্মা চৈক পদে স্থিতঃ ।। ধরাধরশ্চ বিজ্ঞেয়ো

হ্যন্তরে চ চতুষ্পদঃ। চতুর্ম্মুখ শ্চতুষ্কস্থঃ। মধ্যেজ্ঞেয়ঃ প্রজাপতিঃ॥*॥

অথ বাস্তুপূজা। মাৎস্যে। অথাতঃ সংপ্রবক্ষ্যামি প্রাসাদ বিধি নির্ণয়ং। বাস্তৌ পরীক্ষিতে সম্যগ্বাস্তু দেহ বিচক্ষণাঃ॥ বাস্তুপশমনং কুর্য্যাৎ পূর্ব্বমেব বিচক্ষণঃ। একাশীতি পদং লিখ্য বাস্তু মধ্যে তু পিষ্টকৈঃ॥ হোম স্ত্রিমেখলে কার্য্যঃ কুণ্ডে হস্ত প্রমাণকে। যবৈঃ কৃষ্ণতিলৈ স্তদ্বৎ সমিদ্ভিঃ ক্ষীরবৃক্ষজৈঃ॥ পলাশৈঃ খাদিরৈ র্ব্বাপি মার্গোডুম্বর সম্ভবৈঃ। কুশ দূর্ব্বা ময়ৈ র্ব্বাপি মধু সর্পিঃ স মন্বিতৈঃ॥ কার্য্যস্ত পঞ্চভি র্ব্বিল্বৈ র্ব্বীজৈ রথাপি বা। হোমান্তে ভক্ষ্য ভোজ্যৈশ্চ বাস্তুদেশে বলিং হরেৎ॥ তত্ত্ব দ্বিশব নৈবেদ্য মিদং দদ্যাৎ ক্রমেণ তু। ঈশকোণে ঘৃতাক্ত শিখিনে বিনিবেদয়েৎ॥ উদনং সোৎপলং দদ্যাৎ পর্জ্জন্যায ঘৃতান্বিতং। জয়ন্তায ধ্বজং পীতং পৈষ্টং কূর্ম্মঞ্চ সংত্যজেৎ॥ ইন্দ্রায পঞ্চরত্নানি পৈষ্টকং কুলিশং তথা। বিতানকঞ্চ সূর্য্যায ধূম্রং রক্তং তথৈব চ॥ সত্যায ঘৃত গোধূমং মৎস্যান্ দদ্যা দ্ভৃশায চ। শষ্কুলীং চান্তরীক্ষায দদ্যাচ্ছক্তুঞ্চ বাযবে॥ পূষ্ণে লাজাস্তু দাতব্যা বিতথে চণকোদনং। গৃহক্ষতায মধ্বন্নং যমায পিশিতৌদনং॥ গন্ধোদনঞ্চ গন্ধর্ব্বে ভৃঙ্গে মেষস্য শৃঙ্গকং। মৃগায যাবকং দদ্যাৎ পিতৃভ্যঃ কৃষরা মতাঃ॥ দৌবারিকে দন্তকাষ্ঠং পৈষ্টং কৃষ্ণং বলিং তথা। সুগ্রীবে পূপকং দদ্যাৎ পুষ্পদন্তায পাযসং॥ কুশস্তম্বেন সহিতং দদ্যাৎ পদ্মঞ্চ বারুণে। পৈষ্টং হিরণ্মযং দদ্যাদসুরায সুরা মতা॥ ঘৃতৌদনং চ শোষায গোধূমং বৈ পাপযক্ষ্মণে। ঘৃত লড্ডুকাংশ্চ রোগায নাগে পুষ্পং ফলান্বিতং॥ সর্পি মুখ্যায দাতব্যং মুদ্গৌদন মতঃপরং। ভল্লাটায ততো দদ্যাৎ সোমায ঘৃতপাযসং॥ সর্পায পৈষ্টং শালুক মদিত্যৈ লোপিকা স্তথা। দিতৈ্য তু পুরিকাং দদ্যাৎ ইত্যেবং বাহ্যতো বলিং॥*॥ ক্ষীর মাপায দাতব্য মাপবৎসায বৈ দধি। সবিত্রে লড্ডুকান্ দদ্যাৎ সমরীচান্ কুশোদনং॥ সবিতু গুড়পূপাংশ্চ জযায ঘৃত চন্দনং। বিবস্বতে তথা দদ্যাৎ রক্তচন্দন পাযসং॥ হরিতালোদনং দদ্যাদিন্দ্রায ঘৃত সংযুতং। ঘৃতৌদনঞ্চ মিত্রায রুদ্রায ঘৃতপাযসং॥ আমং পক্বং তথা মাংসং দেযং স্যাদ্রাজযক্ষ্মণে। পৃথ্বী

শ্বরায মাংসানি ক্সমাণ্ডায চ দাপযেৎ ॥ সশর্করান্নং সংদদ্যাদর্য্যম্নে সর্ব্বতঃ ক্রমাৎ। নমস্কারান্ত যুক্তেন মন্ত্রেণ পুনরেব চ ॥ পঞ্চগব্যং যবাংশ্চৈব তিলাক্ষত হবিশ্চরুন্। ভক্ষ্যং ভোজ্যঞ্চ বিবিধং ব্রাহ্মণে বিনিবেদযেৎ॥ এবং সংপূজিতা দেবাঃ শান্তিং কুর্ব্বন্তি তে সদা। সুরেভ্যঃ কাঞ্চনং দদ্যাদ্ব্রাহ্মণে গাং পযস্বিনীং॥*॥ রাক্ষসীনাং বলিং দেযো অপি যাদৃক্ তথা শৃণু। মাংসৌদনং ঘৃতং পদ্মং কেশরং হবিষান্বিতং॥ ঈশান ভাগমাশ্রিত্য চরকৈ্য বিনিবেদযেৎ। দধ্যোদনং সরুধিরমস্থিখণ্ডৈশ্চ সংযুতং॥ পীত রক্ত বলিং দদ্যাৎ পূতনা যা তু রাক্ষসী। বাযব্যে পাপ রাক্ষস্যৈ মৎস্যমাংস সুরাসবং ॥ পাযসং বাপি দাতব্যং স্বনাম্না সর্ব্বতঃ ক্রমাৎ। নমস্কারান্ত যুক্তেন প্রণবাদ্যেন সর্ব্বতঃ ॥*॥ ততঃ সর্ব্বৌষধি স্নানং যজমানস্য কারযেৎ। দ্বিজাংস্তু পূজযেদ্ভক্ত্যা যেচান্যে গৃহমাগতাঃ॥ এতদ্বাস্তুপশমনং কৃত্বা কর্ম্ম সমারভেৎ। প্রাসাদ ভবনোদ্যান প্রারম্ভে পরিবর্ত্তনে ॥ পুরবেশ্ম প্রবেশেষু সর্ব্ব দোষাপনুত্তযে। ইতি বাস্তুপশমনং কৃত্বা সূত্রেণ বেষ্টযেৎ ॥ রক্ষোঘ্ন পব মানেন সূত্রেণ ভবনাদিকং। নৃত্য মঙ্গল বাদ্যেন কুর্য্যাদ্ব্রাহ্মণ বাচনং॥ অনেন বিধিনা যস্তু প্রতি সংবৎসরং বুধঃ। গৃহে বাযতনে কুর্য্যাৎ স দুঃখমবাপ্নুযাৎ ॥ নচ ব্যাধি ভযং তস্য নচ বন্ধু ধন ক্ষযঃ। জীবেদ্বর্ষ শতং স্বর্গে কল্পনেকং বসেন্নরঃ॥*॥ হযশীর্ষপঞ্চরাত্রে। এবং প্রগৃহ্য কাষ্টানি রজসা পূর্য্য দেশিকঃ। এতেষা মেব দেবানাং বলিং দদ্যাত্তু কামিকং ॥ ঈশানায প্রদাতব্যঃ পাযসং মধুনা সহ। পর্জ্জন্যায জলং দেযং পুষ্পগন্ধাদিবাসিতং ॥ জযন্তায প্রদাতব্যা পতাকা পীত বর্ণিকা। সুরেশায চ রত্নানি ভাস্করায ঘৃতং তথা ॥ ধূম্রকং পীতবর্ণং বা সত্যে দদ্যাদ্বিতানকং। দদ্যাদ্ভৃশে পক্ষিমাংসং ব্যোমায ত্বচ মণ্ডযে॥ পূষ্ণে ধানাঃ সলাজাস্তু সুবর্ণং বিতথে তথা। গৃহক্ষতায মধুমং যমায পিশিতৌদনং ॥ গন্ধং গন্ধর্ব্বদেবায ভৃঙ্গে দদ্যাত্তু শাক্সনং। মৃগে তিল যবাংশ্চৈব পিতৃভ্যঃ কৃশরং তথা ॥ দৌবারিকে দন্তকাষ্ঠং সুগ্রীবে যাবকং তথা। পুষ্পদন্তে কুশা দেযা বরুণে পদ্মমুৎপলং ॥ অসুরায বৈষ্ণবং দেযং রসং শোষে ঘৃতৌদনং। যবাস্তু দেযাঃ পাপায রোগায

ঘৃতমণ্ডকং ॥ নাগায নাগপুষ্পাণি ভক্ষ্যান্ মুখ্যায দাপযেৎ। চিত্রৌদনঞ্চ ভল্লাটে সোমায মধুপাযসং ॥ নাগায চাপি শালূকং শ্রিযে সরস পাযসং। অদিত্যৈ পূরিকা দেযা ক্ষীরং চাস্ভ্যো দদেদ্বলিং ॥ দধি ক্ষীরং চাপবল্যৈ অর্য্যম্নে লড্ডুকং বলিং। অশোদকং সবিত্রে চ সাবিত্র্যৈ গুড় পূর্ব্বকং ॥ বিবস্বতে রক্তপুষ্পং রক্তচন্দন মেব চ। হরিদ্রান্নং তথেন্দ্রায সাজ্যামন্ত্র জযায চ ॥ ঘৃতপূরন্ত মিত্রায রুদ্রায গুড় পাযসং। আম পক্কানি মাংসানি প্রদদ্যাদ্রাজযক্ষ্মণে ॥ পৃথ্বীধরাযামমাংসং খড়্গি মাংসং বলিং হরেৎ। সাক্ষতং সলিলঞ্চৈব পঞ্চগব্যং তথা চরুং ॥ ঈশান্ গন্ধং তথা পুষ্পং ব্রহ্মস্থানে নিবেশযেৎ। আম মাংসং পূর্ব্বভাগে সর্ব্বস্কন্দে তুষোদকং ॥ সিতপদ্মং ঘৃতং মাংসং বিদার্য্যৈ চাগ্নিকোণকে। অংশং বা শূপকং মাংস মর্য্যম্নেযেব দক্ষিণে ॥ পিণ্ডঞ্চৈব তথা রক্তং পুতনৈ্য নৈর্ঋতে তথা। সাসৃঙ্মাংসং প্রদাতব্যং জম্ভকাযৈব পশ্চিমে ॥ অগ্নি খণ্ডেন সহিতং রক্ত পিণ্ডেন মিশ্রিতং। প্রদেযং পাপরাক্ষস্যৈ বাযব্যাং মাংস মেব চ ॥ উত্তরে পিলিপিচ্ছাযৈ সান্দ্রং রক্তং বলিং হরেৎ। বারাহে ছাগ মাংসানি ঐশান্যাং দিশি দাপযেৎ ॥ ততো ভূতগণানান্তু রাক্ষসানাং সুরোত্তম। পিশাচানাং গণানান্তু বলি দেঁযস্তু কামিকঃ ॥ এতান্ বা পূজযেৎ সর্ব্বান্ গন্ধপুষ্পাক্ষতৈ র্বুধঃ। এবং সংপূজিতা দেবাঃ শান্তি পুষ্টিপ্রদা নৃণাং ॥ অপূজিতা বিহিংসন্তি কারকং স্থাপকং তথা। তস্মাদেতাংস্ত সংপূজ্য গন্ধপুষ্পৈ র্মনোহরৈঃ ॥ প্রাসাদং কারযেদ্বিদ্বান্ গৃহং বা সুরসত্তম ॥ * ॥ অথ প্রাসাদ মূলারম্ভঃ। তত্রৈব। ব্রহ্মস্থানে ততঃ অর্য্যাদ্বাসুদেবস্য পূজনং। শ্রিযঃ সংপূজনং অর্য্যাৎ হৃষীকেশ গণস্য চ ॥ পূজনন্তু ততঃ অর্য্যাদ্বাসুদেব গণস্য চ। গন্ধাঢ্য পুষ্প নৈবেদ্য ধূপদীপৈঃ সুরোত্তম ॥ ততঃ সংপূজযেত্তস্মিন্ সর্ব্বলোকধরাং মহীং। সুরূপাং প্রমদারূপাং দিব্যাভরণ ভূষিতাং ॥ ধ্যাত্বা সমর্চযেদ্দেবীং পরিতুষ্টাং স্মিতাননাং। ততঃ প্রণম্য বিজ্ঞাপ্য তন্মযত্নেন চিন্তযেৎ ॥ ততঃ স্বনাম মন্ত্রেণ সর্ব্বদেব মযং পদ্মং। ধ্যাত্বা সমর্চযেত্তত্র যত্নদ্বাস্তু মযং নরঃ ॥ ব্রহ্মস্থানে ততো বিদ্বান্ অর্য্যাদাধার নক্ষত্রৈঃ। তস্মিন্ সংস্থাপযেৎ

স্তম্ভং বর্দ্ধন্যা সহ পূজিতং ॥ হেমং বা রাজতং বাপি মৃন্ময়ং বাদৃঢ়ং নবং। সর্ব্ববীজৌষধী যুক্তং সুবর্ণ রজতান্বিতং ॥ রত্নগর্ত্তং সুসংপূর্ণং বস্ত্রপূতেন বারিণা। প্রশস্ত পল্লবোপেতংশ্বেত চন্দন চর্চ্চিতং ॥ পুষ্পৈঃ সুনালিতং কৃত্বা গন্ধপুষ্পৈ র্বিধূপিতং। আহতেন চ শুক্লেন বস্ত্রযুগ্মেন বেষ্টিতং ॥ ব্রহ্মস্থানে ততো মন্ত্রী কলসং স্থাপ্য পূজয়েৎ। তস্মিং শ্চতুর্মুখং দেবং প্রজেশং মন্ত্র বিগ্রহং ॥ গন্ধপুষ্পৈশ্চ নৈবেদ্যৈঃ পূজয়েৎ সুমনোহরৈঃ। ততো মণ্ডল বাহ্যে তু প্রাচ্যাং বা প্রাঙ্মুখ স্থিতঃ ॥ আচার্য্যো গৃহ্য সংভারান্ গৃহাদীং স্তর্পয়েৎ সুরান্। ঘৃতৈ স্তৈলৈ র্যবৈ র্মন্ত্রৈ ব্রহ্মাদীং স্তর্পয়েত্ততঃ ॥ প্রজেশং তর্পয়েদ্বিদ্বানাহুতীনাং শতেন চ। ইতরান্ দশভি র্দেবানাহুতিভিঃ প্রতর্পয়েৎ ॥ দদ্যাৎ পূর্ণাহুতিং পশ্চাৎ বৌষডন্তেন মন্ত্রবিৎ। তত্র প্রণম্য বিজ্ঞাপ্য কৃত্বা বৈ স্বস্তিবাচনং ॥ প্রগৃহ্য কর্করীং সম্যগ্মণ্ডলস্ত প্রদক্ষিণং। সূত্র মার্গেণ দিব্যেন তোযধারাস্তু ভ্রাময়েৎ ॥ পূর্ব্ববত্তেন মার্গেণ সূত্রবীজানি ভ্রাময়েৎ। সুশোভনং শুভং স্থানং তথা খাতস্য কারয়েৎ ॥ ততো গর্ত্তং খনেন্মধ্যে হস্তমাত্র প্রমাণকং। চতুরঙ্গুল মাত্রং তদধঃ খন্যাৎ সুসম্মিতং ॥ গোময়েনোপলিপ্যাথ চন্দনেন চ ভূষয়েৎ। মধ্যে দত্ত্বা তু পুষ্পাণি শুক্লান্যক্ষত মেব চ ॥ আচার্য্যঃ প্রাঙ্মুখো ভূত্বা ধ্যায়েদ্দেবং চতুর্ভুজং। তূর্য্য মঙ্গল ঘোষেণ ব্রহ্ম ঘোষ রবেণ চ ॥ অর্ঘ্যং দদ্যাৎ সুরশ্রেষ্ঠ স্তম্ভং তোয়েন মন্ত্রবিৎ। প্রগৃহ্য কর্করীং তাবচ্ছুভ্রং প্রপূরয়েজ্জলৈঃ ॥ সর্ব্বরত্ন সমাকীর্ণৈ র্বিমলৈঃ সুসুগন্ধিভিঃ। তস্মিন্ শুক্লানি পুষ্পাণি প্রক্ষিপেদ্যোগিতি স্মরন্ ॥ তদাবর্ত্তং পরীক্ষেত যেনাদ্যেনাক্ষতং ক্ষিপেৎ। শুভং স্যাদ্দক্ষিণাবর্ত্তে হ্যশুভং বামে ভবেত্ততঃ। বীজৈঃ শালি যবাদীনাং তং গর্ত্তং পূরয়েদ্বুধঃ। ক্ষত্রজাভিঃ পবিত্রাভি র্মৃদ্ভি গর্ত্তং প্রপূরয়েৎ ॥ এবং প্রয়াদ্য বিধিনাচার্য্য দানং সুরোত্তম। সুবর্ণং গাং বস্ত্র যুগ মাচার্য্যায নিবেদয়েৎ ॥ কালজ্ঞ স্থপতী পূজ্যৌ বৈষ্ণবান্ শক্তিতো হর্চয়েৎ। ব্রাহ্মণান্ ভোজয়িত্বা চ গেয় নৃত্যাদি কারয়েৎ ॥ * ॥ ততস্তং খাতয়েদ্যাবজ্জলান্তং যাবদেব তু। পুরুষাধঃ স্থিতং শল্যং ন গৃহে দোষদং ভবেৎ ॥ প্রাসাদে দোষদং শল্যং

ভবেদ্যাবজ্জলান্তিকং। তস্মাৎ প্রাসাদিকী ভূমিঃশোধ্যা যাবজ্জলান্তিকং॥ শিবান্তং কর্করান্তং বা যাবদ্বাভূঃ স্বনারিকা। আকোট্যতাং সমীকৃত্য ততো যোগং সমাচরেৎ॥ কিঞ্চ। পূরযেৎ খাতকং যত্নাৎ পাদং পাদং যথা ক্রমং। অষ্টাঙ্গুলং মৃত্তিকয়া স্বস্তিকং চেষ্টিকাদিভিঃ॥ সিক্ত্বা সিক্ত্বা তু তোযেন কলসৈঃ কাঞ্চনাদিভিঃ। আকোটনং ততঃ কুর্য্যাৎ মুদ্গরৈ বৃক্ষবৃক্ষজৈঃ॥ পাদোনং পূরযেৎ খাতং সুসমং চৈব কারযেৎ। দেশিকঃ পঞ্চগব্যেন তাং ভূমিং প্রোক্ষযেদ্বুধঃ॥ সুবর্ণব্রীহিগর্ভেণ চূতপল্লবশোভিনা। তীর্থতোয সুপূর্ণেন স্বর্ণ তাম্রমযেন বা॥ সেচযেদভিজপ্তেন বারিণা কলসেন তু। ততঃ শুদ্ধা ভবেদ্ভূমি দোষ যুক্তাপি যা ভবেৎ॥ * ॥ অথ শিলা লক্ষণং মাৎস্যে। আদাবেবং সমাসেন শিলা লক্ষণমুত্তমং। শিলান্যাস বিধানঞ্চ প্রোচ্যতে তদনন্তরং॥ শিলা বাথেষ্টকা বাপি চতস্রো লক্ষণান্বিতাঃ। প্রাসাদাদৌ বিধানেন ন্যস্তব্যাঃ সুমনোহরাঃ॥ চতুরস্রাঃ সমাঃ কৃত্বা সমন্তাদথ বেষ্টকাঃ। শিলারূপা স্মৃতা বিদ্যা নন্দাদ্যা শ্রেষ্ঠকান্তিকাঃ॥ সংপূর্ণাঃ সুতলাঃ স্নিগ্ধাঃ সুসমা লক্ষণান্বিতাঃ। শঙ্খ দূর্বাঙ্কিতা ধন্যাঃ নন্দ্যাবর্ত্ত ছত্র চামরাঃ॥ সাঙ্কুশা স্তোরণোপেতাঃ কূর্ম্ম মৎস্য ফলান্বিতাঃ। দর্পণা হস্তি বজ্রাঙ্কাঃ প্রশস্ত দ্রব্যলাঞ্ছিতাঃ॥ শস্ত পক্ষি মৃগাঙ্কাশ্চ বৃষাঙ্কাঃ সর্ব্বদা হিতাঃ। স্বস্তিকা বেদিকা শঙ্খা নন্দ্যাবর্ত্তক লাঞ্ছিতাঃ॥ পদ্মাদি লক্ষণোপেতাঃ শিলাঃ সর্ব্বার্থ সিদ্ধিদাঃ। তথা গো বাজি পাদাঙ্কাঃ শিলা ধন্যাঃ সুখাবহাঃ॥ ক্রব্যাদ মৃগপাদাঙ্কা ন শস্তাঃ পক্ষিণ স্তথা। দিঙ্মূঢা দিগ্বিহীনাশ্চ দীর্ঘ হ্রস্বাঃ ক্ষতান্বিতাঃ॥ বিবর্ণাঃ স্ফুটিতা ভগ্নাঃ সংত্যাজ্যা লক্ষণ চ্যুতাঃ। প্রশস্ত পাণিরূপাঙ্কাঃ প্রশস্ত দ্রব্য লাঞ্ছিতাঃ॥ যথোক্ত লক্ষণোপেতাঃ শিলা নিত্যহিতাবহাঃ॥ * ॥ অথ ইষ্টকা লক্ষণং। তত্রৈব। ইষ্টকানাং সমাসেন লক্ষণং শৃণু সাম্প্রতং। একবর্ণাঃ সুপক্বাশ্চ সুপ্রমাণা মনোরমাঃ॥ নন্দাদ্যা শ্চেষ্টকাঃ কার্য্যা শ্চতুরস্রাঃ সুসংমিতাঃ। অস্থ্যঙ্গারান্বিতা নেষ্টাঃ কৃষ্ণবর্ণাঃ সশর্করাঃ॥ মন্দপক্বা বিপক্বাশ্চ বহুদিন্যাশ্চ বর্জ্জিতাঃ। ভগ্নাশ্চ বিষমা হীনা বর্জ্জনীযাঃ প্র-

ধন্ত্রতঃ॥ হয়শীর্ষপঞ্চরাত্রে। ইষ্টকানাং প্রমাণঞ্চ লক্ষণং সাম্প্রতং শৃণু। সুতলা লক্ষণোপেতা দ্বাদশাঙ্গুল সংমিতাঃ॥ সুবিস্তার বিভাগেন নৈপুণ্যেন চ সম্মিতাঃ। সুপক্বাঃ সুপ্রমাণা স্তা একবর্ণা মনোহরাঃ॥ বিমলা ইষ্টকাঃ কার্য্যা শ্চতুরস্রাঃ সুসংমিতাঃ। ছিন্নকর্ণা শ্চাপ্রশস্তাঃ পাণিপাদ বিবর্জ্জিতাঃ॥ সশর্করাঃ কৃষ্ণবর্ণা অস্থ্যঙ্গার চিতাশ্চ যাঃ। বিবর্ণা মন্দগন্ধাশ্চ যাঃ পীনাঃ পিণ্ডিকাশ্চ যাঃ॥ হীনাশ্চ বিষমা ভগ্না জর্জ্জরাশ্চ বিবর্জ্জিতাঃ॥ * ॥ অথ শিলাদিন্যাস ব্যবস্থা। মাৎস্যে। শিলান্যাসস্ত কর্ত্তব্যঃ প্রাসাদে তু শিলাময়ে। ইষ্টকানাস্তু বিন্যাসঃ প্রাসাদে চেষ্টকাময়ে॥ শৈলজে শৈলজঃ পীঠঐষ্টিকে ঐষ্টিকঃ স্মৃতঃ। শিলান্যাসাদিকো ভদ্রে মূল পাদো বিধীযতে॥ হয়শীর্ষপঞ্চরাত্রে। কর্ত্তব্য শ্চেষ্টকান্যাসঃ প্রাসাদে চেষ্টকাময়ে। শৈলে শিলানাং বিন্যাসঃ কার্করে কর্করা ন্যসেৎ॥ কৃত্বা শিলাদি ন্যাসে চ প্রাক্শিলাভ্যধিবাসনং। ইষ্টকানাং প্রতিষ্ঠাঞ্চ গর্ত্তাধানঞ্চ কারয়েৎ॥ গুরবে দক্ষিণাং দত্বা পীঠ বন্ধঞ্চ সাধয়েৎ। স্বয়ং শ্রীহয়শীর্ষেণ প্রোক্ত স্তত্ত্ববিধিঃ স্ফুট॥ * ॥ অথ পীঠবন্ধনং। হয়শীর্ষে। পীঠবন্ধং ততঃ কুর্য্যাদ্যথা প্রাসাদ মানতঃ। পীঠোত্তমং চোচ্ছ্রযেণ প্রাসাদস্যার্দ্ধমানতঃ॥ পাদহীনং মধ্যমং স্যাৎ কন্যসং চার্দ্ধ মানতঃ। উত্তমং বাসুদেবস্য কুর্য্যাৎ পীঠং বিচক্ষণঃ॥ * ॥ অথ প্রাসাদ লক্ষণানি। মাৎস্যে। এবং বাস্তুবলিং কৃত্বা ভজেৎ ষোড়শ ভাগিকং। তস্য মধ্যে চতুর্ভিস্তু ভাগৈ র্গর্ত্তঞ্চ কারয়েৎ॥ ভাগ দ্বাদশকং তত্র ভিত্ত্যর্থং পরিকল্পয়েৎ। চতুর্ভাগেন ভিত্তীনা মুচ্ছ্রায়ঃ স্যাৎ প্রমাণতঃ॥ দ্বিগুণঃ শিখরোচ্ছ্রায়ো ভিত্ত্যুচ্ছ্রায়াৎ প্রমাণতঃ। শিখরার্দ্ধস্য চার্দ্ধেন বিধেয়া তু প্রদক্ষিণা॥ চতুর্দ্দিক্ষু তদা জ্ঞেয়ো নির্গমস্তু তথা বুধৈঃ। গর্ত্তসূত্র দ্বযং ভাগো বিস্তারো মণ্ডপস্য তু॥ আয়তঃ স্যাত্রিভির্ভাগৈ র্ভদ্রযুক্তঃ সুশোভনঃ। পঞ্চভাগেন সংভজ্য গর্ত্তমানং বিচক্ষণঃ॥ ভাগমেকং গৃহীত্বা তু প্রাগ্গ্রীবং কল্পয়েদ্বুধঃ। গর্ত্তসূত্র সমো ভাগাদগ্রতো মুখমণ্ডপঃ॥ এতৎ সামান্য মুদ্দিষ্টং প্রাসাদস্যেহ লক্ষণং। * ॥ কিঞ্চ। মেরু মন্দর কৈলাস কুম্ভ সিংহ মৃগা স্তথা। বিমানছন্দক স্ত-

স্বস্তীবৃক্ষো হথ মৃগাধিপঃ ।। বলভি-
চ্ছন্দক স্তদ্বদ্বর্তুলঃ সর্ব্ব ভদ্রকঃ । গজ-
শ্চ নন্দন শ্চৈব নন্দিবর্দ্ধন এব চ ।।
হংসো বৃষঃ সুপর্ণশ্চ পদ্মকোথ স-
মুদ্গকঃ । প্রাসাদা নামতঃ প্রোক্তা বি-
ভাগং শৃণু তদ্দ্বিজাঃ ।। ❀ ।। শতশৃঙ্গ
শ্চতুর্দ্বারো ভূমিকা ষোড়শোচ্ছ্রিতঃ ।
নানা বিচিত্র শিখরো মেরু প্রাসাদ
উচ্যতে ।। মন্দরো দ্বাদশঃ প্রোক্তঃ
কৈলাসো দশ ভূমিকঃ । বিমানচ্ছ-
ন্দক স্তদ্বদনেক শিখরাননঃ।। স চাষ্ট
ভূমিক স্তদ্বৎ সপ্তভি র্নন্দিবর্দ্ধনঃ ।
বিংশাণ্ডক সমাযুক্তো নন্দনঃ সমু
দাহৃতঃ ।। ষোড়শাণ্ডক সংযুক্তো
নানারূপ সমন্বিতঃ । অনেক শিখর
স্তদ্বৎ সর্ব্বতোভদ্র উচ্যতে ।। চন্দ্র
শাল সমোপেতো বিজ্ঞেয়ঃ পঞ্চ
ভূমিকঃ । বলভিচ্ছন্দক স্তদ্বচ্ছুকনা
সাত্রয়ান্বিতঃ ।। বৃষস্যোশ্রুযত স্ত-
ল্যো মণ্ডল শ্চাস্রি বর্জ্জিতঃ । সিংহঃ
সিংহগতি র্জ্ঞেয়ো মৃগো মৃগসম স্ত-
থা ।। হস্তঃ হস্তাকৃতি স্তদ্বদ্ভূমিকা
নবকোচ্ছ্রয়ঃ । অঙ্গুলীপুট সংস্থান
পঞ্চাণ্ডক বিভূষিতঃ ।। ষোড়শাস্রুঃ
সমন্তাত্তু বিজ্ঞেয়ঃ স সমুদ্গকঃ । পা-
র্শ্বয়ো শ্চন্দ্রশালস্য উচ্ছ্রায়ো ভূমিকা
দ্বয়ং ।। ষোড়শাস্রুঃ স বিজ্ঞেয়ো বি

চিত্র শিখরঃ শুভঃ । মৃগরাজস্তু বি-
খ্যাত শ্চন্দ্রশালা বিভূষিতঃ ।। প্রাগ্
গ্রীবেণ বিশালেন ভূমিকাসু ষড়ুন্নতঃ
। অনেক চন্দ্রশালস্তু গজঃ প্রাসাদ
উচ্যতে ।। পর্য্যন্ত গৃহরাজো বৈ গরু-
ড়ো নাম নামতঃ । সপ্ত ভূম্যুচ্ছ্রয় স্তদ্ব-
চ্চন্দ্রশালা ত্রয়ান্বিতঃ ।। ভূমিকা ষ-
ডশীতিস্তু বাহ্যতঃ সর্ব্ব ... ভবেৎ
তথান্যো গরুড স্তদ্বদশা... দশ ভূ-
মিকঃ ।। পদ্মকঃ ষোড়শাস্রুস্তু ভূমি-
দ্বয় সমন্বিতঃ । পদ্মতুল্য প্রমাণেন
বৃক্ষক ইতি স্মৃতঃ ।। পঞ্চাণ্ডক
স্ত্রি ভূমিস্তু গর্ব্ভে হস্ত চতুষ্টয়ং । বৃষো
ভবতি নাম্না যঃ প্রাসাদঃ সর্ব্ব কামি-
কঃ ।। সপ্তাষ্টৌ পঞ্চকাশ্চৈব প্রাসা-
দা যে ময়োদিতাঃ । সিংহস্যতে স্ক-
ন্ধাজ্ঞেয়া যে চান্যে তৎপ্রমাণতঃ ।।
চন্দ্রশালৈঃ সমোপেতাঃ সর্ব্বে প্রাগ্-
গ্রীব সংযুতাঃ । ঐষ্টকা দারবাশ্চৈব
শৈলা বা স্যুঃ সতোরণাঃ ।। মেরুঃ প-
ঞ্চাশদ্ধস্তঃ স্যাৎ মন্দরঃ পঞ্চহীন-
কঃ । চত্বারিংশত্তু কৈলাস শ্চতুস্ত্রিং-
শদ্বিমানকঃ ।। নন্দিবর্দ্ধনক স্তদ্বদ্দ্বা-
ত্রিংশৎ সমুদাহৃতঃ । ত্রিংশতা ন-
ন্দনঃ প্রোক্তঃ সর্ব্বতোভদ্রক স্তথা ।।
বর্ত্তুলঃ পদ্মকশ্চৈব বিংশদ্ধস্ত উদা-
হৃতঃ । মৃগঃ সিংহশ্চ হস্তশ্চ বলভী-

ছন্দক স্তথা ॥ এতে ষোড়শ হস্তাঃ স্যু শ্চত্বারো দেব বল্লভাঃ। শ্রীবৃক্ষো মৃগরাজশ্চ সমুদ্গক গজৌ তথা ॥ এতে দ্বাদশ হস্তাঃ স্যুরেতেষাং হংসকঃ সমঃ। গরুড়োষ্টকরো জ্ঞেয়ো বৃষো দশ উদাহৃতঃ ॥ এবমেতে প্রমাণেন কর্ত্তব্যাঃ শুভ লক্ষণাঃ। যক্ষ রাক্ষস নাগানাং মাতৃহস্তঃ প্রশস্যতে ॥ তথা মের্ব্বাদযঃ সপ্ত জ্যেষ্ঠলিঙ্গে সুখাবহাঃ। শ্রীবৃক্ষকাদয শ্চাষ্টৌ মধ্যমস্য উদাহৃতাঃ ॥ তথা হংসাদযঃ পঞ্চ কন্যসে সুভদা মতাঃ। * ॥ হয়শীর্ষপঞ্চরাত্রে। প্রাসাদং সংপ্রবক্ষ্যামি সর্ব্বসাধারণং শৃণু। চতুরস্রী কৃতং ক্ষেত্রং ভবেৎ ষোড়শধা পুনঃ ॥ মধ্যে তস্য চতুর্ভিস্তু মর্য্যাদায সমন্বিতং। দ্বাদশৈব তু ভাগানি ভিত্ত্যর্থং পরিকল্পযেৎ ॥ জঙ্ঘোচ্ছায়ন্তু মর্ব্বীত চতুর্ভাগেন চাযতং। জঙ্ঘাযো দ্বিগুণোচ্ছ্রাযং মঞ্জর্য্যাঃ কল্পযেদ্বুধঃ ॥ চতুর্ভাগেন মঞ্জর্য্যাঃ কার্য্যা সম্যক্ প্রদক্ষিণা। তন্মানং নির্গমং কার্য্য মুভযোঃ পার্শ্বযোঃ সমং ॥ শিখরেণ সমং কার্য্য মগ্রে জগতি বিস্তরং। ত্রিগুণেনাপি কর্ত্তব্যং যথা শোভানুরূপতঃ ॥ বিস্তরং মণ্ডপস্যাগ্রে গর্ত্তসূত্রদ্বযেন তু। দৈর্ঘ্যাৎ পাদাধিকং ম র্য্যান্মধ্যে স্তম্ভৈ র্ব্বিভূষিতং ॥ প্রাসাদগর্ত্তমানং বা মর্ব্বীত মুখমণ্ডপং। একাশীতি পদৈ র্ব্বাস্তুং যষ্ট্বা মণ্ডপমারভেৎ ॥ শুকাঢ্য দ্বারি বিন্যাসে পাদান্তস্থান্ যজেৎ সুরান্। তথা প্রাকার বিন্যাসে যজেদ্দ্বাত্রিংশদন্তগান্ ॥ সর্ব্বসাধারণঞ্চৈতৎ প্রাসাদস্য তু লক্ষণং। মানেন প্রতিমাযা বা প্রাসাদ মপরং শৃণু ॥ প্রতিমাযাঃ প্রমাণেন কর্ত্তব্যা পিণ্ডিকা শুভা। গর্ত্তস্ত পিণ্ডিকার্দ্ধেন গর্ত্তমানাস্তু ভিত্তযঃ ॥ ভিত্তে রাযাম মানেন উচ্ছ্রাযন্তু প্রকল্পযেৎ। ভিত্ত্যুচ্ছ্রাযাত্তু দ্বিগুণং শিখরং কল্পযেদ্গুরু ॥ শিখরস্য তু তূর্য্যেণ ভ্রমণং পরিকল্পযেৎ। শিখরস্য চতুর্থেন অগ্রতো মুখমণ্ডপং ॥ অষ্টকাংশেন গর্ত্তস্য রথকানান্তু নির্গমঃ। পরিধে র্গুণ ভাগেন রথকাং স্তত্র কল্পযেৎ ॥ তত্তৃতীযেন বা মর্য্যাদ্রথকানান্তু নির্গমং। বাসত্রযং স্থাপনীযং রথকত্রিতযে সদা ॥ শিখরার্থঞ্চ সূত্রাণি রত্নানি বিনিপাতযেৎ। শিখরস্যার্দ্ধ ভাগস্থং সিংহং তত্র চ কারযেৎ ॥ শুকনাসাং স্থিরীকৃত্য মধ্যসন্ধৌ বিবর্জ্জযেৎ। অপরেচ তথা পার্শ্বে তদ্বৎ সূত্রং নিধাপযেৎ ॥ তদর্দ্ধন্তু ভবেদংশুঃ

কণ্ঠেশ্যামল সারবান্। স্কন্ধভগ্নস্তু কর্ত্তব্যং বিকরালং তথৈব চ॥ উর্দ্ধন্তু বেদিকানানাৎ কলসং পরিকল্পয়েৎ ॥॥ কিঞ্চ। গরুত্মন্তং তথা অর্য্যাদুপরিষ্টাৎ চতুর্গুণং। অর্য্যাদিদ্দিক প্রতিমা-যামান্ দিক্ষু চাষ্টাসু চোপরি॥ মহাবরাহ মৈন্দ্র্যান্তু নরসিংহন্তু দক্ষিণে। প্রতীচ্যাং শ্রীধরং দেব মুদীচ্যাং হয়শীর্ষকং॥ আগ্নেয্যাং যামদগ্ন্যঞ্চ নৈঋতে রাম মেব চ। বামনঞ্চৈব বায়ব্যাং বাসুদেব মথাপরে ॥॥ কিঞ্চ। পূর্ব্বভূমৌ তু শয়নং দ্বিতীয়ে চাসনং ভবেৎ। স্থান মেব তৃতীয়ে তু চতুর্থে যান মেব চ॥ পঞ্চমে যোগনিদ্রা তু ষষ্ঠে যোগাসনং ভবেৎ। স্থানং যোগ সমাযুক্তং সপ্তমে পরিকল্পয়েৎ॥ নানা গবাক্ষকৈ র্যত্নাৎ পত্রবল্ল্যাদি ভূষিতং। নানা প্রকার পুষ্পাদ্যৈ র্যথাশোভং প্রকল্পয়েৎ॥ কনিষ্ঠ মধ্য জ্যেষ্ঠানাং প্রাসাদানাং যথা ক্রমং। বসু ভাগা চ ঋত্বিগ্ভিঃ প্রদেয়া রচনা বুধৈঃ॥ দ্বারস্য চাষ্টমে যুক্তে নবমে দশমে তথা। ললাট বেধো নৈবং স্যাদায়স্য শৃণু সাম্প্রতং॥ যাবদ্ধস্তৈ রভিপ্রেতঃ প্রাসাদ কর্তৃণা নয়। তাবদ্ভি রঙ্গুলৈ রায়ো বসু ভাগেন বা ভবেৎ॥ এক স্তম্ভো ধ্বজো জ্ঞেয়ো দ্বিস্তম্ভা বেদিকা মতা। দশভূম্যন্তরে-নিত্যং চতুস্তম্ভং প্রকল্পয়েৎ॥॥

অথ মণ্ডপলক্ষণবিশেষঃ। মাৎস্যে। অথাতঃ সংপ্রবক্ষ্যামি মণ্ডপানান্তু লক্ষণং। মণ্ডপান্ প্রবরান্ বক্ষ্যে প্রাসাদস্যানুরূপতঃ॥ বিবিধা মণ্ডপাঃ কার্য্যা জ্যেষ্ঠ মধ্য কনীয়সঃ। নামত স্তান্ প্রবক্ষ্যামি শৃণুধ্বং দ্বিজ সত্তমাঃ॥ পুষ্পকঃ পুষ্পভদ্রশ্চ সুবৃত্তো মৃতনন্দনঃ। কৌশল্যো বুদ্ধি সংকীর্ণো রাজভদ্রো জয়াবহঃ॥ শ্রীবৃক্ষো বিজয়শ্চৈব বাস্তুকীর্ণঃ শ্রুতিংধরঃ। যজ্ঞভদ্রো বিশালশ্চ সংশ্লিষ্টঃ শত্রুনন্দনঃ॥ ভাগপঞ্চো নন্দনশ্চ মানবো মানভদ্রকঃ। সুগ্রীবো হর্ষণশ্চৈব কর্ণিকারঃ পদার্দ্ধক॥ সিংহশ্চ শ্যামভদ্রশ্চ সুভদ্রশ্চ তথৈব চ। সপ্তবিংশতি ব্যাখ্যাতা লক্ষণং শৃণুত দ্বিজাঃ॥ স্তম্ভা যত্র চতুঃষষ্টিঃ পুষ্পকঃ স উদাহৃতঃ। দ্বাষষ্টিঃ পুষ্পভদ্রস্তু ষষ্টিঃ সুবৃত্ত উচ্যতে॥ অষ্টপঞ্চাশক স্তম্ভঃ কথ্যতে মৃতনন্দনঃ। কৌশল্যঃ ষট্পঞ্চাশচ্চতুঃপঞ্চাশতা পুনঃ॥ নাম্না তু বুদ্ধি সংকীর্ণো দ্বিহীনো রাজভদ্রকঃ। জয়াবহস্তু পঞ্চাশচ্ছ্রীবৃক্ষস্তু দ্বিহীনকঃ॥ বিজয়স্তু দ্বিহীনঃ স্যাদ্বাস্তু সংকীর্ণক স্তথা।

দ্বাভ্যামেব প্রহীয়েত ততঃ শ্রুতিধরো পরঃ ॥ চত্বারিংশদ্যজ্ঞভদ্রো দ্বিহীনোথ বিশালকঃ । ষট্ত্রিংশচ্চৈব সংশ্লিষ্টো দ্বিহীনঃ শত্রুমর্দ্দনঃ ॥ দ্বাত্রিংশদ্ভাগপঞ্চস্তু ত্রিংশতা নন্দনঃ স্মৃতঃ । অষ্টাবিংশন্মানবস্তু মানভদ্রো দ্বিহীনকঃ ॥ চতুর্ব্বিংশস্তু সুগ্রীবো দ্বাবিংশদ্ধর্ষণো মতঃ । বিংশতিঃ কর্ণিকারঃ স্যাদষ্টাদশঃ পদার্দ্ধকঃ ॥ সিংহো ভবেদ্দ্বিহীনশ্চ শ্যামভদ্রো দ্বিহীনকঃ । সুভদ্রস্তু তথা প্রোক্তো দ্বাদশ স্তম্ভ সংবৃতঃ ॥ মণ্ডপাঃ কথিতা হ্যেতে যথা বল্লক্ষণান্বিতাঃ । ত্রিকোণং বৃত্ত মর্দ্ধেন্দু মষ্টকোণং দ্বিরষ্টকং ॥ চতুষ্কোণঞ্চ কর্ত্তব্যং সংস্থানং মণ্ডপস্য তু । রাজ্যঞ্চ বিজয়শ্চৈব মায়ুর্ব্বর্দ্ধন মেব চ ॥ পুত্রলাভঃ শ্রিয়ঃ পুষ্টি স্ত্র্যস্রাদিষু ভবেৎ ক্রমাৎ । এবন্তু শুভদাঃ প্রোক্তা অন্যথা তু ভয়াবহাঃ ॥ ❋ ॥ অথ তত্র দ্বার নির্ণয়ঃ । হয়শীর্ষপঞ্চরাত্রে । গ্রাম মধ্যে চ পূর্ব্বে চ প্রত্যগ্দ্বারং প্রকল্পয়েৎ । বিদিশাসু চ সর্ব্বাসু তথা প্রত্যঙ্মুখং ভবেৎ ॥ দক্ষিণে চোত্তরে চৈব পশ্চিমে প্রাঙ্মুখং ভবেৎ । কিঞ্চ । বিস্তারাদ্দ্বিগুণং দ্বারং কর্ত্তব্যন্তু সুশোভনং । জাতরূপং সরজতং তদ্বদুড়ুম্বরৈর্বৃতং ॥ ঔডুম্বরোর্দ্ধতঃ স্বর্ণং দত্ত্বা শাখাং ন্যসেদ্বুধঃ । তূর্য্য মঙ্গল ঘোষেণ ব্রাহ্মণান্ স্বস্তিবাচ্য চ ॥ দ্বারস্য চ চতুর্থাংশে কার্য্যৌ চণ্ড প্রচণ্ডকৌ । দণ্ডহস্তৌ তু কর্ত্তব্যৌ বিষ্বক্সেনোপমাবুভৌ ॥ শাখোর্দ্ধং ন্যস্য রত্নানি ন্যসেদূর্দ্ধ মুডম্বরং । তস্য মধ্যে স্থিতা দেবী সাক্ষাল্লক্ষ্মীঃ সুরেশ্বরী ॥ কর্ত্তব্যা দিগ্গজৈঃ সা তু স্নাপ্যমানা ঘটেন তু । শাখোড়ম্বরকৌ কার্য্যৌ পত্রবল্ল্যাদি ভূষিতৌ ॥ একশাখং ত্রিশাখং বা ষট্ শাখং দ্বার মিষ্যতে । নবশাখঞ্চ সর্ব্বীত অত ঊর্দ্ধং ন কারয়েৎ ॥ বিষ্ণ্বতার রূপাদ্যৈঃ শাখাং রত্নেন ভূষয়েৎ । ❋ ॥ মাৎস্যে । চতুঃষষ্টি পদং কৃত্বা মধ্যে দ্বারং প্রকল্পয়েৎ । বিস্তারাদ্দ্বিগুণোচ্ছ্রায স্ত্রিভাগা কটি ভবেৎ ॥ বিস্তারার্দ্ধো ভবেদ্গর্ভো ভিত্তয়ো হ্যন্যাঃ সমন্ততঃ । গর্ব্ভপাদেন বিস্তীর্ণং দ্বারং দ্বিগুণ মায়তং ॥ উচ্ছ্রায়াৎ পাদ বিস্তীর্ণা শাখা তদ্বদুড়ুম্বরঃ । বিস্তার পাদ প্রতিমং বাহুল্যং শাখয়োঃ স্মৃতং ॥ ত্রি পঞ্চ সপ্ত নবভিঃ শাখাভি দ্বার মিষ্যতে । কনিষ্ঠং মধ্যমং জ্যেষ্ঠং যথা যোগং প্রকল্পয়েৎ ॥ অঙ্গুলানাং শতং সার্দ্ধং চত্বারিংশদ্ভি রুত্তমং ।

ধন্য মুত্তম মায়ুষ্যং ধন ধান্যদ মেব-চ ॥ শতং চাশীতি সহিতং বাত নির্গমনং ভবেৎ । অধিকং দশভি স্তুথবত্তথা ষোড়শভিঃ শতং ॥ শত মানং দ্বিতীযন্ত ভবত্যশীতিভি স্তথা । দশদ্বারাণি চৈতানি ক্রমে পোক্তানি সর্ব্বদা ॥ অন্যানি বর্জ্জনী যানি মানসোদ্বেগদানি তু । দ্বারবে ধন্তুযত্নেন সর্ব্বাস্তষু বর্জ্জযেৎ ॥ বৃক্ষকোণাচ্চ ভূদ্বারাৎ স্তম্ভ কূপ ধ্বজাদপি । অন্যা শ্বভ্রেণ বা বিদ্ধং ন দ্বারং শুভদং ভবেৎ ॥ ক্ষযশ্চ দুর্গতি শ্চৈব প্রবাসঃ ক্ষুদ্ভযং তথা । দৌর্ভাগ্যং বন্ধনং রোগো দারিদ্র্যং কলহং তথা ॥ বিরোধ শ্চার্থনাশশ্চ সর্ব্বং বেধে ভবেৎ ক্রমাৎ । * ॥ অথ প্রাকারাদি নির্ণযঃ । হযশীর্ষপঞ্চরাত্রে । প্রাসাদস্য চতুর্ভাগৈঃ প্রাকারস্যোচ্চ্রযো ভবেৎ । পঞ্চহস্তস্য দেবস্য একহস্তা তু পীঠিকা ॥ তস্মাত্তু দ্বিগুণঃ প্রোক্ত স্তথা গরুড মণ্ডপঃ । একহস্তাদি দেবীত ত্রিংশদ্ধ স্তান্ত মেব চ ॥ * ॥ অথ বৃক্ষরোপণ নির্ণযঃ । মাৎস্যে । পূর্ব্বেণ ফলিনো বৃক্ষাঃ ক্ষীরবৃক্ষাস্ত দক্ষিণে । পশ্চিমেন জলং শ্রেষ্ঠং পদ্মোৎপল বিভূষিতং ॥ উত্তরেণ নলৈ স্তালৈঃ শুভা স্যাৎ পুষ্পবাটিকা । সর্ব্বতস্ত জলং শ্রেষ্ঠং স্থির মস্থির মেব চ ॥ সর্ব্বতশ্চাপি কর্ত্তব্যং পরিখা-বলযাদিকং । যান্যে তপোবন স্থান-মুত্তরে মাতৃকাগৃহং ॥ মহানসং তথাগ্নেযে নৈর্ঋতে তু বিনাযকঃ । বারুণে শ্রীনিবাসশ্চ বায়ব্যে গৃহনালিকা ॥ উত্তরে যজ্ঞ শালা তু নির্ম্মাল্যস্থান মুত্তরে । বারুণে সোমদৈবত্যে বলিনির্ব্বপনং স্মৃতং ॥ পুরতো গরুডস্থানং তথান্যেযাং যথোচিতং । এবমাযতনং কুর্য্যাদ্ভ মণ্ডপ সংযুতং ॥ ঘণ্টা বিতানক সতোরণ চিত্র যুক্তং নিত্যোৎসব প্রমুদিতেন জনেন সার্দ্ধং । যঃ কারযেৎ সুরগৃহং বিবিধ ধ্বজাঢ্যং শ্রী স্তং ন মুঞ্চতি সদা দিবিপূজ্যতে চ ॥ * ॥ অথ জীর্ণোদ্ধারঃ । বিষ্ণুধর্ম্মে তৃতীয কাণ্ডে । যস্য রাজ্যস্থ বিষযে দেববেশ্ম বিশীর্য্যতে । তস্য সীদতি তদ্রাজ্যং দেববেশ্ম যথা তথা ॥ কৃত্বা জীর্ণস্য সংস্কারং তথা দেবেশ বেশ্মনঃ । দ্বিগুণং ফল মাপ্নোতি নাত্র কার্য্যা বিচারণা ॥ বিষ্ণুরহস্যে । পতিতস্য চ যঃ কর্ত্তা পতমানস্য রক্ষিতা । বিষ্ণো রাযতনস্যেহ স নরো বিষ্ণু লোক ভাক্ ॥ অগ্নিপুরাণে । পতিতং পতমানন্ত তথার্দ্ধস্ফুটিতং নরঃ ।

সমুদ্ধৃত্য হরে দ্ধাম দ্বিগুণং ফল মাপ্নুযাৎ ॥ দেবীপুরাণে। মূলাচ্ছতগুণং পুণ্যং প্রাপ্নুযাজ্জীর্ণকারকঃ। তস্মাৎ সর্ব্ব প্রযত্নেন জীর্ণস্যোদ্ধার মাচরেৎ ॥ হয়শীর্ষপঞ্চরাত্রে। বাপী কূপ তড়াগানাং সুরধাম্নাং তথানঘ। প্রতিমানাং সভানাঞ্চ সংস্কর্ত্তা যো নরো ভুবি ॥ পুণ্যং শতগুণং তস্য ভবেন্মূলাম সংশয়ঃ। ॥ প্রতিষ্ঠায়া বিধিঃ কার্য্যস্তথা মন্দিরে নির্মিতে। প্রায়ং শ্রীমৎপ্রভুবাক্যে রনুসারেণ বৈষ্ণবৈঃ ॥ কেবলা প্রতিষ্ঠা চ খ্যাতা তল্লিখনেন কিং। শ্রীমূর্ত্তি স্থাপনে নৈব সম্পূর্ণা সা বিশেষতঃ॥ ইতি শ্রীহরিভক্তিবিলাসে ২০বিলাসঃ॥

মন্দিরং ক্লী নগরং। ইতি মেদিনী॥ পুংলিঙ্গোপ্যয়ং শব্দঃ। যথা। নগরং মন্দিরং পুর মিতি পুং নপুংসকযো রক্রণেন পঠ্যতে। ইত্যমর টীকাযাং ভরতঃ॥

মন্দিরঃ পুং সমুদ্রঃ। ইতি মেদিনী ॥ জানপশ্চাদ্ভাগঃ। ইতি হেমচন্দ্রঃ॥

মন্দিরপশুঃ পুং বিড়ালঃ। ইতি শব্দচন্দ্রিকা॥

মন্দিরা স্ত্রী মন্দিরং। যথা মন্দিরাবাস্তুরাবানিতি মধ্বনঙ্গটাদযঃ॥

মন্দুরা স্ত্রী বাজিশালা। ইত্যমরঃ ॥ শয্যাগাথবস্ত্র। মাদুর ইতি ভাষা। ইতি মেদিনী॥

মন্দোদরী স্ত্রী রাবণমহিষী। সা তু ময়দানব কন্যা। ইতি রামায়ণং॥

মন্দোদরীশঃ পুং রাবণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মন্দোদরীসুতঃ পুং ইন্দ্রজিৎ। ইতি জটাধরঃ॥

মন্দোষ্ণং ক্লী ঈষদুষ্ণং। তদ্বতি ত্রি। ইত্যমরঃ॥

মন্দ্রঃ পুং গম্ভীরধ্বনিঃ। ইত্যমরঃ॥ বাদ্যবিশেষঃ। তৎপর্য্যায়ঃ। মন্দ্রঃ ২মৃদঙ্গকঃ৩। ইতি শব্দরত্নাবলী॥

মন্মথঃ পুং কামদেবঃ॥ কপিত্থবৃক্ষঃ। ইত্যমরঃ॥ কামচিন্তা। ইতি মেদিনী॥ ॥ কামদেবস্যোৎপত্তির্যথা। এবং চিন্তযত স্তস্য ব্রহ্মণো মুনিসত্তমাঃ। মনসঃ পুরুষো বস্তুরাবির্ভূতো বিনিঃসৃতঃ॥ কাঞ্চনীচূর্ণ পীতাভঃ পীনোন্নত সুনাসিকঃ। সুবৃত্তোরু কটী জঙ্ঘো নীলাবল্লিত কেশকঃ॥ লগ্ন ভ্রূযুগলো লোলঃ পূর্ণচন্দ্র নিভাননঃ। কপাট বিস্তীর্ণ হৃদি রোমরাজী বিরাজিতঃ॥ শুভ্রমাতঙ্গকরবৎ পীন নিস্তল বাহু-

কঃ। আরক্ত পাণি নয়ন মুখ পাদ করোদ্ভবঃ ॥ ক্ষীণ মধ্য শ্চারুদন্তঃ প্রমত্ত গজকন্ধরঃ। প্রফুল্ল পদ্মপত্রাক্ষঃ কেশর ঘ্রাণ তর্পণঃ ॥ কম্বুগ্রীবো মীনকেতুঃ প্রাংশু র্মকরবাহনঃ। পঞ্চ পুষ্পায়ুধো যোগী পুষ্পকোদণ্ড মণ্ডিতঃ ॥ কান্তঃ কটাক্ষ পাতেন ভ্রাময়ন্নয়ন দ্বয়ং। সুগন্ধি মারুতাভ্রান্তং শৃঙ্গাররস সেবিতং ॥ বীক্ষ্য তং তাদৃশং দক্ষপ্রমুখা মানসাশ্চ তে। মরীচ্যাদ্যা দশ স্ততো বিস্ময়াবিষ্ট চেতসঃ ॥ ঔৎসুক্যং পরমং জগ্মু রাপু র্ব্বৈকারিকং মনঃ। স চাপি বেধ সংবীক্ষ্য স্রষ্টারং জগতাং পতিং ॥ প্রণম্য পুরুষঃ প্রাহ বিনয়ানত কন্ধরঃ। শ্রীপুরুষ উবাচ। কিং করিষ্যাম্যহং কর্ম্ম ব্রহ্মং স্তত্র নিয়োজয়। মাং নার্য্যে পুরুষো যস্মাদুচিতে শোভিতে বিধে ॥ অভিধানঞ্চ মদ্যোগ্যং স্থানং পত্নী চ যা মম। তন্মে ত্ব কথ্য লোকেশ স্রষ্টা ত্বং জগতাং যতঃ ॥ মার্কণ্ডেয় উবাচ। এবং তস্য বচঃ শ্রুত্বা পুরুষস্য মহাত্মনঃ। ক্ষণং ন কিঞ্চিৎ প্রোবাচ স্বস্রষ্টাপি বিস্মিতঃ। ততো মনঃ সুসংযম্য সম্যগুৎসৃজ্য বিস্ময়ং। উবাচ পুরুষং ব্রহ্মা তৎকর্ম্মোদ্দেশ মাবহন্ ॥ ব্রহ্মোবাচ। অনেন চারুরূপেণ পুষ্পবাণৈশ্চ পঞ্চভিঃ। মোহয়ন্ পুরুষাং স্ত্রীংশ্চ কুরু সৃষ্টিং সনাতনীং ॥ ন দেবা নচ গন্ধর্ব্বা ন কিন্নর মহোরগাঃ। নাসুরা নচ দৈত্যা বা ন বিদ্যাধর রাক্ষসাঃ ॥ ন যক্ষা ন পিশাচাশ্চ ন ভূতা ন বিনায়কাঃ। ন গুহ্যকা ন সিদ্ধাশ্চ ন মনুষ্যা ন পক্ষিণঃ ॥ পশবো ন মৃগাঃ কীটাঃ পতঙ্গা জলজাশ্চ যে। ন তে সর্ব্বে ভবিষ্যন্তি ন লক্ষ্যা যে শরস্য তে ॥ অহং বা বাসুদেবো বা স্থাণু র্ব্বা পুরুষোত্তম। ভবিষ্যাম স্তব বশে কিমন্যৈঃ প্রাণধারিভিঃ ॥ প্রচ্ছন্নরূপী জন্তূনাং প্রবিশন্ হৃদয়ে সদা। সুখহেতুঃ স্বয়ং ভূত্বা কুরু সৃষ্টিং সনাতনীং ॥ ত্বৎ পুষ্পবাণস্য সদা মুখ্যং লক্ষ্যং মনোস্তু চ। সর্ব্বেষাং প্রাণিনাং নিত্যং মদ মোদকরো ভবান্ ॥ ইতি তে কর্ম্ম কথিতং সৃষ্টি প্রাবর্ত্তকং পুনঃ। নামানি চ বদিষ্যানি যত্তে যোগ্যং ভবিষ্যতি ॥ মার্কণ্ডেয় উবাচ। ইত্যুক্ত্বাথ সুরজ্যেষ্ঠো মানসানাং মুখানি চ। আলোক্য চাসনে পদ্মে সোপবিষ্টো ২ভবৎ ক্ষণাৎ ॥ ইতি কালিকাপুরাণে কাম প্রাদুর্ভাবো নাম ১ অধ্যায়ঃ ॥ ॥ মার্কণ্ডেয় উবাচ। ততস্তে-

মুনযঃ সর্ব্বে তদভিপ্রাযবেদিনঃ ।
চক্র স্তদুচিতং নাম মরীচ্যত্রি মথা
দ্যো ।। মুখাবলোকিনাদেব জ্ঞাত্বা
বৃত্তান্ত মন্যতঃ । দক্ষাদযশ্চ স্রষ্টারঃ
স্থানং পত্নীঞ্চ তে দদুঃ ।। ততো নি-
শ্চিত্য নামানি মরীচি প্রমুখা দ্বি-
জাঃ । ঊচুঃ সঙ্গত মেতস্মৈ পুরুষায
দ্বিজোত্তমাঃ ।। ঋষযঊচুঃ । যস্মাৎ
প্রমথ্যচেত স্ত্বং জাতো হস্মাকং তথা
বিধেঃ । তস্মান্মন্মথ নাম্না ত্বং লোকে
খ্যেযো ভবিষ্যসি ।। জগৎসু কামক্র
প স্ত্বং ত্বৎসমো নহি বিদ্যতে । অ
ত স্ত্বং কাম নাম্নাপি খ্যাতো ভব ম-
নোভব ।। মদনান্মদনাখ্য স্ত্বং শম্ভো
র্দর্পাৎ সদর্পকঃ । তথা কন্দর্প নাম্না-
পি লোকে খ্যাতো ভবিষ্যসি ।।
ত্বদাশুগানাং যদ্বীর্য্যং তদ্বীর্য্যং ন ভ
বিষ্যতি । বৈষ্ণবানাঞ্চ রৌদ্রাণাং ব্র
হ্মাস্ত্রাণাঞ্চ তাদৃশং ।। স্বর্গো মর্ত্য-
শ্চ পাতালং ব্রহ্মলোকঃ সনাতনঃ ।
অবস্থানানি সর্ব্বাণি সর্ব্বব্যাপী ভ
বান্ যতঃ ।। কিম্বা চাপি বিশেষেণ
সামান্যে নাস্তি তে সমঃ । যত্র যত্র
ভবেৎ প্রাণী শাদ্বলা স্তরবো হথবা ।
তত্র তত্র তব স্থান মত্রৈব্বক্ষ্য সদো-
দযং । দক্ষো হযং ভবতঃ পত্নীং স্বযং
দাস্যত্রি শোভনাং ।। ইতি কালিকা
পুরাণে ২ অধ্যাযঃ ।।

মন্মথানন্দঃ পুং মহারাজচূতঃ । ইতি
রাজনির্ঘণ্টঃ ।।

মন্মথালযঃ পুং আম্রঃ । ইতি রাজ-
নির্ঘণ্টঃ ।।

মন্মনঃ পুং গদ্গদধ্বনিঃ । ইতি ত্রিকাণ্ড-
শেষঃ ।।

মন্যা স্ত্রী গ্রীবাযাঃ পশ্চাৎ শিরা ।
ইত্যমরঃ ।।

মন্যাকা স্ত্রী মন্যা । ইতি শব্দরত্না-
বলী ।।

মন্যুঃ পুং শোকঃ ।। দৈন্যং ।। ক্রতুঃ ।।
ক্রোধঃ । ইত্যমরঃ ।। অহঙ্কারঃ ।
ইতি শব্দরত্নাবলী ।।

মন্বন্তরং ক্লী দিব্যানাং যুগানা মেক-
সপ্ততিঃ । ইত্যমরঃ ।। দেবমানে-
নৈক সপ্ততি যুগানি মন্বন্তর মুচ্যতে-
মনো রন্তর মবকাশো হবধি র্বা অ-
স্মিন্নিতি মন্বন্তরং । এবং চতুর্যুগা-
খ্যানাং সাধিকা হ্যেক সপ্ততিঃ ।
কৃত ত্রেতাদি যুক্তানাং মনো রন্তর
মুচ্যতে ।। ইতি লিঙ্গপুরাণং ।। ম-
নবঃ স্বাযম্ভুবাদয স্তেষা মন্তর মব
কাশো হবধি র্বা মন্বন্তর মিতি বা ।
একসপ্ততি রিতি যদ্যপি গণনযা
অর্দ্ধযুগেনাধিকা দৈবিকানাং যুগা-
নান্তু সহস্রং ব্রহ্মণো দিনং । মন্বন্তরং

তীর্থৈরিঃ তস্য ভাগা শ্চতুর্দ্দশ ॥ তৎ কিঞ্চিদধিকা দিব্যযুগানামেক সপ্ততি রিতি নাম বিধানে সর্ব্বজ্ঞ নারায়ণেনোক্তত্বাৎ তথাপি অল্পত্বাদিহ নোক্তং। মন্বন্তরস্য সংখ্যাত বর্ষাণি যথা। ত্রিংশৎকোট্যস্তু বর্ষাণাং মানুষেণ দ্বিজোত্তমাঃ। সপ্তষষ্টিস্তথান্যানি নিযুতান্যধিকানি তু॥ বিংশতিস্তু সহস্রাণি কালোয়ঃ সাধিকাং বিনা। মন্বন্তরস্য সংখ্যেয়া লিঙ্গে হস্মিন্ কথিতা দ্বিজাঃ॥ ইতি। এতদঙ্কা যথা ৩০৬৭২০০০০। এবং চতুর্দশ মন্বন্তরৈ ব্রহ্মদিনং। যুগানি যথা লৈঙ্গে। পূর্ব্বং কৃত যুগং নাম ততস্ত্রেতা বিধীয়তে। দ্বাপরশ্চ কলিশ্চৈব যুগান্যেতানি সুব্রতাঃ॥ যগমানানি যথা। চত্বারি ত্রীণি দ্বে চৈকং কৃতাদিষু যথা ক্রমং। দিব্যাব্দানাং সহস্রাণি যুগেষ্বাহুঃ পুরাবিদ ইতি॥ অন্যত্র চ। চত্বার্য্যাহুঃ সহস্রাণি বর্ষাণাস্তু কৃতং যুগং। তস্য তাবৎ সতী সন্ধ্যা সন্ধ্যাংশশ্চ তথা বিধঃ॥ ইতরেষু সসন্ধ্যেষু সসন্ধ্যাংশেষু চ ত্রিষু। একাপায়েন বর্ত্তন্তে সহস্রাণি শতানি চেতি॥ অস্যার্থঃ। দেবমানে সত্যস্য বর্ষাণি ৪০০০ চতুঃসহস্রাণি সন্ধ্যা বর্ষাণি ৪০০ চত্বারিংশতানি

সন্ধ্যাংশ বর্ষাণি ৪০০ চত্বারিংশতানি। এবং দেবমানে সত্যস্য বর্ষাণি অষ্টশতাধিক চতুঃসহস্রাণি ৪৮০০ এবং ত্রেতায়াঃ ষট্‌শতাধিক ত্রিসহস্রং ৩৬০০ এবং দ্বাপরস্য চতুঃশতাধিকং দ্বিসহস্রং ২৪০০ এবং কলেঃ শতদ্বয়াধিক মেক সহস্রং ১২০০ সমুদায়েন দ্বাদশ সহস্রাণি ১২০০০। মানুষ মানেন সত্যাদীনাং মানং যথা জ্যোতিষে। বসবি নৈত্রা ঋতু রন্ধ্র নাসা বেদা রসাষ্টৌ ভুজ বহ্নি বেদাঃ। এতানি শূন্য ত্রয় তাড়িতানি যুগাব্দ সংখ্যাঃ পরিকীর্ত্তিতানি॥ এতদঙ্কে দৃশ্যতে সত্যস্য যথা ১৭২৮০০০। ত্রেতায়া যথা ১২৯৬০০০। দ্বাপরস্য যথা ৮৬৪০০০। কলে র্যথা ৪৩২০০০। সমুদায়েন ৪৩২০০০০। অপরং ব্রাহ্মবর্ষাদি মানং বাহুল্য ভিয়া নোক্তং। ইতি তট্টীকায়াং ভরতঃ॥ ❀ ॥ অপিচ। ব্রহ্মণো দিন মধ্যে চতুর্দ্দশ মন্বন্তরাণি ভবন্তি। একো মনু র্যাবদধিকারী ভবতি স কালো মন্বন্তর সংজ্ঞকো ভবতি। তত্র মনূনাং নামানি। প্রথমঃ স্বায়ম্ভুবো মনুঃ। দ্বিতীয়ঃ স্বারোচিষো মনুঃ। তৃতীয় উত্তমো মনুঃ। চতুর্থ স্তামসো মনুঃ। পঞ্চমো রৈবতো

মনঃ। ষষ্ঠ শ্চাক্ষুষো মনুঃ। সপ্তমো বৈবস্বতো মনুঃ। বর্ত্তমানো হয়ং। অষ্টমঃ সাবর্ণির্মনুঃ। নবমো দক্ষসাবর্ণি মনুঃ। দশমো ব্রহ্মসাবর্ণি মনুঃ। একাদশো ধর্ম্মসাবর্ণি মনুঃ। দ্বাদশো রুদ্রসাবর্ণি মনুঃ। ত্রয়োদশো দেবসাবর্ণি মনুঃ। চতুর্দ্দশ ইন্দ্রসাবর্ণি মনুঃ॥ প্রতিমন্বন্তরং ভগবদবতারেন্দ্র দেবগণ সপ্তর্ষি মনু মনপুত্রাদয়ঃ পৃথক্ পৃথগ্‌ভবন্তি। তদ্যথা। স্বায়ম্ভুবে মন্বন্তরে যজ্ঞো হবতারঃ স এবেন্দ্রঃ। যমাদয়ো দেবাঃ। মরীচি প্রভৃতয়ঃ সপ্তর্ষয়ঃ। স্বায়ম্ভুবো মনুঃ। প্রিয়ব্রতোত্তানপাদৌ মনুপুত্রৌ॥ ১॥ স্বারোচিষে বিভুরবতারঃ। রোচন ইন্দ্রঃ। দেবা স্তুষিতাদয়ঃ। ঊর্জ্জস্তম্ভাদয়ঃ সপ্তর্ষয়ঃ। অগ্নিসুতঃ স্বারোচিষো মনুঃ। দ্যুমৎসেন রোচিষ্মৎ প্রমুখা মনুপুত্রাঃ॥ ২॥ উত্তমে সত্যসেনো হবতারঃ। সত্যজিদিন্দ্রঃ। সত্যবেদ শ্রুতভদ্রাদয়ো দেবাঃ। বশিষ্টসুতাঃ সপ্তর্ষয়ঃ প্রমদাদয়ঃ। প্রিয়ব্রত সুত উত্তমো মনুঃ। পবন সৃঞ্জয় যজ্ঞহোত্রাদ্যা স্তৎসুতাঃ॥ ৩॥ তামসে হরিরবতারঃ। ত্রিশিখ ইন্দ্রঃ। [illegible] দেবাঃ। জ্যোতির্ধামাদয়ঃ সপ্তর্ষয়ঃ। তামসো মনুঃ। বৃষখ্যাতি নরাদয স্তৎ সুতাঃ॥ ৪॥ রৈবতে বিকুণ্ঠো হবতারঃ। বিভুরিন্দ্রঃ। ভূতরযাদয়ো দেবাঃ। হিরণ্যরোমাদয়ঃ সপ্তর্ষয়ঃ। রৈবতো মনুঃ। বলি বিন্ধ্যাদয স্তৎ সুতাঃ॥ ৫॥ চাক্ষুষে অজিতো হবতারঃ। মন্দদ্রুম ইন্দ্রঃ। অপ্যাদয়ো দেবাঃ। হর্য্যশ্ববীরকাদয়ঃ সপ্তর্ষয়ঃ। চাক্ষুষো মনুঃ। পুরু পুরুষ সুদ্যুম্নাদয় স্তৎ সুতাঃ॥ ৬॥ বৈবস্বতে বামনো হবতারঃ। পুরন্দর ইন্দ্রঃ। আদিত্যা বসবো রুদ্রা বিশ্বেদেবা মরুদ্গণা অশ্বিনাবৃষভ ইত্যাদ্যা দেবাঃ। কশ্যপো হত্রি বশিষ্ঠো বিশ্বামিত্রো গোতমো জমদগ্নি ভরদ্বাজ এতে সপ্তর্ষয়ঃ। বৈবস্বতো মনুঃ। ইক্ষ্বাকুঃ নৃগঃ শর্য্যাতিঃ দৃষ্টঃ ধৃষ্টঃ করূষকঃ নরিষ্যন্তঃ পৃষধ্রঃ নাভাগঃ কবিঃ এতে মনুপুত্রা দশ॥ ৭॥ অথ ভবিষ্যাণি। সাবর্ণিকে সার্ব্বভৌমো হবতারঃ। বলি রিন্দ্রঃ। সুতপসো বিরজা অমৃতপ্রভা দেবাঃ। গালবঃ দীপ্তিমান পরশুরামঃ অশ্বত্থামা কৃপঃ ঋষ্যশৃঙ্গঃ ব্যাসঃ এতে সপ্তর্ষয়ঃ। সাবর্ণি মনুঃ। নির্ম্মোক বিরজস্কাদয়া স্তৎ সুতাঃ॥ ৮॥ দক্ষসাবর্ণিকে ঋষভো হবতারঃ। শ্রুত ইন্দ্রঃ।

পায় মরীচি গর্ব্ভাদ্যা দেবাঃ । দ্যুতি-
মদাদ্যাঃ সপ্তর্ষয়ঃ । দক্ষসাবর্ণি র্ম্মনুঃ
। ভূতকেতু দীপ্তিকেত্বাদ্যা স্তৎ সুতাঃ
॥ ৯ ॥ ব্রহ্মসাবর্ণিকে বিষ্বক্সেনো হব-
তারঃ । শম্ভু রিন্দ্রঃ । সুবাসন বিরু-
দ্ধাদ্যা দেবাঃ । হবিষ্মদাদ্যাঃ সপ্ত
র্ষয়ঃ । ব্রহ্মসাবর্ণি র্ম্মনুঃ । ভূরিষেণা-
দ্যা স্তৎ সুতাঃ ॥ ১০ ॥ ধর্ম্মসাবর্ণিকে
ধর্ম্মসেতু রবতারঃ । বৈধৃত ইন্দ্রঃ । বি-
হঙ্গম কামগমাদ্যা দেবাঃ । অরু-
ণাদয়ঃ সপ্তর্ষয়ঃ । ধর্ম্মসাবর্ণি র্ম্মনুঃ ।
সত্যধর্ম্মাদয় স্তৎ সুতাঃ ॥ ১১ ॥
রুদ্রসাবর্ণিকে সুধামাখ্যো হবতা-
রঃ । ঋতধামা ইন্দ্রঃ । হরিতাদয়ো
দেবাঃ । তপোমূর্ত্ত্যাদয়ঃ সপ্তর্ষয়ঃ ।
রুদ্রসাবর্ণি মনুঃ । দেববানুপদেবাদয়
স্তৎসুতাঃ ॥ ১২ ॥ দেবসাবর্ণিকে যো-
গেশ্বরো হবতারঃ । দিবস্পতি রিন্দ্রঃ ।
সুকর্ম্মসূত্রাদ্যা দেবাঃ । নির্ম্মোক তত্ত্ব-
দর্শাদ্যাঃ সপ্তর্ষয়ঃ । দেবসাবর্ণি র্ম্মনুঃ
। চিত্রসেন বিচিত্রাদ্যা স্তৎ সুতাঃ
॥ ১৩ ॥ ইন্দ্রসাবর্ণিকে বৃহদ্ভানু রব-
তারঃ । শুচি রিন্দ্রঃ । পবিত্র চাক্ষুষা
দ্যা দেবাঃ । অগ্নিবাহু শুচিশুদ্ধ মা-
[illegible] ইন্দ্রসাবর্ণি র্ম্মনুঃ ।
[illegible] স্তৎ সুতাঃ ॥ ১৪
[illegible] ইন্দ্রঃ

দেবরাট্ যথাবর্ষী চ । মনু রাদৌ পৃ-
থিব্যাং রাজা ভবতি তৎ পুত্র পৌ-
ত্রাদয়ো মন্বন্তর সমাপ্তি পর্য্যন্তং রা-
জানো ভবন্তি । দেবতাঃ প্রজানাং য-
জ্ঞাদি কর্ম্ম তুষ্টা স্তৎ ফলং প্রযচ্ছন্তি ।
সপ্তর্ষয়ো ধর্ম্মশাস্ত্রাণি প্রকাশয়ন্তি ।
ভগবদবতারা এতান্ স্ব স্ব কর্ম্মণি
নিযোজয়ন্তি দৈত্য রাক্ষসাদীন্ ধর্ম্ম
দ্রুহো ঘ্নন্তি চ ॥ চতুর্দ্দশ মন্বন্তরৈ ব্রহ্ম-
ণ একং দিনং ভবতি তন্মনুষ্য মানে-
নৈকঃ কল্পঃ । ত্রিংশৎ কল্পৈ ব্রহ্মণ এ-
কো মাসো ভবতি । ইতি শ্রীভাগবত
মতং ॥ * ॥ অন্যচ্চ । বর্ষ লক্ষাণি চত্বা-
রি ভবেৎ কলিযুগং ক্রমে । দ্বাত্রিংশ-
ত্যা সহস্রৈস্তু স হতান্যপি সংখ্যয়া
॥ চতুঃষষ্টি সহস্রাণি লক্ষাণ্যষ্টৌ চ
সংখ্যয়া । বর্ষাণাং দ্বাপরং প্রোক্তং
যুগং পূর্ব্ব নিদর্শনাৎ ॥ ত্রেতা দ্বাদশ
লক্ষাণি বর্ষাণাং পরিকীর্ত্তিতা । ষ-
ণ্ণবত্যা সহস্রৈস্তু সংযুক্তানি ভবন্তি
হি ॥ দশ সপ্ত চ লক্ষাণাং বর্ষাণাঞ্চ
কৃতং যুগং । সহস্রৈরষ্টবিংশত্যা সং-
যুতান্যপি সংখ্যয়া ॥ ত্রিচত্বারিংশ-
ল্লক্ষাণি সহস্রাণি চ বিংশতিঃ । না-
রায়ণ প্রমাণেন ভবেৎ চাতুর্য্যগং ক্র-
মাৎ ॥ সপ্ত ষষ্টিশ্চ লক্ষাণি ত্রিংশৎ
কোট্যস্তথৈব চ । বিংশতিশ্চ সহস্রা-

ণি মন্বন্তর মিহোচ্যতে ॥ চতুর্যুগৈ-
ক সপ্তত্যা মন্বন্তর মিতি শ্রুতিঃ । ক-
ল্পে মন্বন্তরৈরেভি শ্চতুর্দশভি রুচ্যতে
॥ কোট্যো দ্বাদশ ষট্‌ত্রিংশল্লক্ষাণি
চ ভবন্তি চ ॥ অষ্টাশীতি সহস্রাণি
জীবেৎ স্বায়ম্ভুবো মনুঃ । ইতি ব
হ্নিপুরাণং ॥ * ॥ অপরঞ্চ । মার্ক
ণ্ডেয় উবাচ । মন্বন্তরং মনোঃ কা-
লো যাবৎ পালয়তে প্রজাঃ । একো
মনুঃ স কালস্তু মন্বন্তর মিতি শ্রুতং ॥
তদেক সপ্ততি যুগৈ র্দেবানা মিহ জা-
য়তে । তৈ শ্চতুর্দশভিঃ কল্পো দিন
মেকন্তু বেধসঃ ॥ ইতি কালিকাপু-
রাণে ২৭ অধ্যায়ঃ ॥ * ॥ অন্যদপি ।
মন্বন্তরাণ্যশেষাণি শ্রোতুমিচ্ছাম্যনু-
ক্রমাৎ । মন্বন্তরাধিপাংশ্চৈব শক্র
দেব পুরোগমান্ ॥ ভবতা কথিতা-
নেতান্ শ্রোতুমিচ্ছাম্যহং গুরো । শ্রী
পরাশর উবাচ । অতীতানাগতা-
নীহ যানি মন্বন্তরাণি বৈ । তান্যহং
ভবতঃ সম্যক্ কথয়ামি সমাসতঃ
॥ স্বায়ম্ভুবো মনুঃ পূর্ব্বং মনুঃ স্বারো-
চিষ স্তথা । ঔত্তমি স্তামসশ্চৈব
রৈবত শ্চাক্ষুষ স্তথা ॥ ষড়েতে মন-
বো হতীতাঃ সাম্প্রতন্ত রবেঃ সুতঃ ।
বৈবস্বতো হয়ং ভস্যৈতৎ সপ্তমং
বর্ত্ততে হন্তরং ॥ সায়ম্ভুবন্ত কথিতং



কল্পাদাবন্তরং ময়া । দেবাস্তত্র্ষয়শ্চৈ
যথাবৎ কথিতা ময়া ॥ ১॥ অত ঊর্দ্ধং
প্রবক্ষ্যামি মনোঃ স্বারোচিষস্য তু
। মন্বন্তরাধিপান্ সম্যগ্দেবর্ষীং স্তং
সুতাং স্তথা ॥ পারাবতাঃ স তুষিতা
দেবাঃ স্বারোচিষে হন্তরে । বিপশ্চি-
ত্তত্র দেবেন্দ্রো মৈত্রেয়াসীন্মহাবলঃ
॥ ঊর্জ্জ স্তম্ভ স্তথা প্রাণো দত্তোলিঋষ-
ভ স্তথা । নিশ্চর শ্চার্ব্বরীবাংশ্চ তত্র
সপ্তর্ষয়ো ভবন্ ॥ চৈত্র কিংপুরুষা-
দ্যাশ্চ সুতাঃ স্বারোচিষস্য তু । দ্বি-
তীয় মেতদ্ব্যাখ্যাত মন্তরং শৃণু চো-
ত্তমং ॥২॥ তৃতীয়ে হপ্যন্তরে ব্রহ্ম-
ন্নৌত্তমি র্নাম যো মনুঃ । সুশান্তি র্নাম
ভত্রেন্দ্রো মৈত্রেয়া ভূৎ সুরেশ্বরঃ ॥
সুধামান স্তথা সত্যাঃ শিবাশ্চাথ
প্রতর্দ্দনাঃ । বশবর্ত্তিনশ্চ পঞ্চৈতে
গণা দ্বাদশকাঃ স্মৃতাঃ ॥ বশিষ্ঠ তন-
য়া স্তত্র সপ্ত সপ্তর্ষয়ো হভবন্ । অজঃ
পরশু দিব্যাদ্যা স্তথৌত্তমে র্মনোঃ
সুতাঃ ॥ ৩॥ তামসস্যান্তরে দেবাঃ
স্বরূপা হরয় স্তথা । সত্যাশ্চ স ধিব-
শ্চৈব সপ্তবিংশতিকা গণাঃ ॥ শিবি-
রিন্দ্র স্তথা চাসীচ্ছত যজ্ঞোপলক্ষণঃ
। সপ্তর্ষয়শ্চ যে তত্র তেষাং নামানি
মে শৃণু । জ্যোতির্দ্ধামা পৃথুঃ কাব্য
শ্চৈত্রোহগ্নি র্বণক স্তথা । পীবরশ্চৈব

গোহ্নেতে সপ্ত তত্রাপি চান্তরে॥ নরঃ খ্যাতিঃ শান্তহযো জানু জঙ্ঘাদয স্ত থা। পুত্রস্ত তামসস্যাসন্ রাজানঃ সুমহাবলাঃ॥৪॥ পঞ্চমে চাপি মৈত্রেয় রৈবতো নাম নামতঃ। মনু র্বিভু শ্চ তত্রেন্দ্রো দেবাংশ্চৈবান্তরে শৃণু॥ অমিতাভা ভূতরয়া বৈকুণ্ঠাশ্চ সুমেধসঃ। এতে দেবগণা স্তত্র চতুর্দশ চতুর্দ্দশ॥ হিরণ্যরোমা বেদ শ্রীরূদ্ধ বাহু স্তথা পরঃ। বেদবাহুঃ সধামা চ পর্জ্জন্যশ্চ মহামুনিঃ॥ এতে সপ্ত র্ষযো বিপ্র তত্রাসন্ রৈবতান্তরে। বল বন্ধুঃ সুসম্ভাব্যঃ সত্যকানাশ্চ তৎ সুতাঃ॥ নরেন্দ্রাঃ সুমহাবীর্য্যা বভূবু র্মুনি সত্তম। স্বারোচিষ শ্চৌত্তমিস্ত তামসো রৈবত স্তথা॥ প্রিযব্রতান্বযা হ্যেতে চত্বারো মনবঃ স্মৃতাঃ। বিষ্ণু মারাধ্য তপসা স রাজর্ষিঃ প্রিযব্রতঃ॥ মন্বন্তরাধিপানেতান্ লব্ধবানাত্ম বংশজান্। ৫। ষষ্ঠে মন্বন্তরে চাসীচ্চাক্ষুষাখ্য স্তদা মনুঃ॥ মনোজব স্তথৈবেন্দ্রো দেবানপি নিবোধ মে। আর্য্যাঃ প্রসূতা ভব্যাশ্চ পৃথুগাশ্চ দিবৌকসঃ॥ মহানুভাবা লেখাশ্চ পঞ্চৈতেপ্যষ্টকা গণাঃ। সুমেধা বিরজাশ্চৈব হবিষ্মানুত্তমো মধুঃ॥ অতিনামা সহিষ্ণুশ্চ সপ্তাস ন্নিতি চর্ষযঃ। উরুঃ পুরুঃ শতদ্যুম্ন প্রমুখাঃ সুমহাবলাঃ॥ চাক্ষুষস্য মনোঃ পুত্রাঃ পৃথিবীপতযো হভবন্॥৬॥ বিবস্বতঃ সুতো বিপ্র শ্রাদ্ধদেবো মহাদ্যুতিঃ॥ মনুঃ স বর্ত্ততে ধীমান্ সাম্প্রতং সপ্তমে হন্তরে। আদিত্য বসু রুদ্রাদ্যা দেবাশ্চাত্র মহামুনে॥ পুরন্দর স্তথৈবাত্র মৈত্রেয ত্রিদশেশ্বরঃ। বশিষ্ঠঃ কশ্যপো হথাগ্নি র্জমদগ্নিঃ স গৌতমঃ॥ বিশ্বামিত্র ভরদ্বাজৌ সপ্ত সপ্তর্ষযো হত্র চ। ইক্ষ্বাকুশ্চৈব নাভাগো ধৃষ্টঃ শর্য্যাতি রেব চ॥ নরিষ্যন্তশ্চ বিখ্যাতো নাভানেদিষ্ট এব চ। করূষশ্চ পৃষধ্রশ্চ বসুমান্ লোকবিশ্রুতঃ॥ মনো বৈবস্বতস্যৈতে নবপুত্রাস্তু ধার্ম্মিকাঃ।৭। বিষ্ণুশক্তি রনৌপম্যা সত্ত্বোদ্রিক্তা স্থিতৌ স্থিতা॥ মন্বন্তরেষ্বশেষেষু দেবত্বেনাধিতিষ্ঠতি। অংশেন তস্য যজ্ঞো হসৌ জজ্ঞে স্বাযম্ভুবান্তরে॥ আকূত্যাং মানসো দেব উৎপন্নঃ প্রথমে হন্তরে। ততঃ পুনঃ স বৈ দেবঃ প্রাপ্তে স্বারোচিষে হন্তরে॥ তুষিতাযাং সমুৎপন্নো হ্যজিত স্তুষিতৈঃ সহ। ঔত্তমে হন্তরে চাপি তুষিতস্ত পুনঃ স বৈ॥ সত্যাযা মভবৎ সত্যঃ সত্যৈঃ সহ সুরোত্তমৈঃ। তামসস্যান্তরে

চৈব সংপ্রাপ্তে পুনরেব হি ॥ হর্য্যাযাং হরিভিঃ সার্দ্ধং হরিরেব বভূবহ। রৈবতেপ্যন্তরে দেবঃ সম্ভূত্যাং মানসো হভবৎ ॥ সম্ভূতো রাজসৈঃ সার্দ্ধং দেবৈর্দেববরো হরিঃ। চাক্ষুষে চান্তরে দেবো বৈকুণ্ঠঃ পুরুষোত্তমঃ ॥ বিকুণ্ঠাযা মসৌ জজ্ঞে বৈকুণ্ঠে দৈবতৈঃ সহ। মন্বন্তরে তু সংপ্রাপ্তে তথা বৈবস্বতে দ্বিজ ॥ বামনঃ কশ্যপাদ্বিষ্ণু রদিত্যাং সংবভূবহ। ত্রিভিঃ ক্রমৈ রিমান্ লোকান্ জিত্বা যেন মহাত্মনা ॥ পুরন্দরায ত্রৈলোক্যং দত্তং নিহত কণ্টকং। ইত্যেতা স্তনব স্তস্য সপ্ত মন্বন্তরেষু বৈ ॥ সপ্তস্বেবা ভবন্ বিপ্র যাভিঃ সংরক্ষিতাঃ প্রজাঃ। যস্মাদ্বিষ্ট মিদং সর্ব্বং তস্য শক্ত্যা মহাত্মনঃ ॥ তস্মাৎ সংপ্রোচ্যতে বিষ্ণুর্ব্বিষে র্ধাতোঃ প্রবেশনাৎ। সর্ব্বে চ দেবা মনবঃ সমস্তাঃ সপ্তর্ষযো যে মনুসূনবশ্চ। ইন্দ্রশ্চ যো যস্ত্রিদশেশভূতো বিষ্ণো রশেষাস্তু বিভূতয স্তাঃ ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে মন্বন্তরাখ্যানং নাম ১ অধ্যাযঃ ॥ * ॥ শ্রীমৈত্রেয উবাচ। প্রোক্তান্যেতানি ভবতা সপ্ত মন্বন্তরাণি বৈ। ভবিষ্যাণ্যপি বিপ্রর্ষে মমাখ্যাতুং ত্বমর্হসি ॥ শ্রীপরাশর উবাচ। ছাযা সংজ্ঞাসুতো যো হসৌ দ্বিতীযঃ কথিতো মনুঃ। পূর্ব্বজস্য সবর্ণো হস্য সাবর্ণি স্তেন কথ্যতে ॥ তস্য মন্বন্তরং হ্যে তৎ সাবর্ণিকমথাষ্টমং। তচ্ছৃণুষ্ব মহাভাগ ভবিষ্যং কথযামি তে ॥ সাবর্ণিস্তু মনু র্যো হসৌ মৈত্রেয ভবিতা ততঃ। সুতপা শ্চামিতাভাশ্চ মুখ্যাশ্চাপি তদা সুরাঃ ॥ তেষাং গণস্তু দেবানা মেকৈকো বিংশকঃ স্মৃতঃ। সপ্তর্ষীনপি বক্ষ্যামি ভবিষ্যানথ সপ্ত চ ॥ দীপ্তিমান্ গালবো রামঃ কৃপো দ্রৌণি স্তথাপরঃ। মৎপুত্রশ্চ তথা ব্যাস ঋষ্যশৃঙ্গশ্চ সপ্তমঃ ॥ বিষ্ণুপ্রসাদাদনঘঃ পাতালান্তর গোচরঃ। বিরোচন সুত স্তেষাং বলিরিন্দ্রো ভবিষ্যতি ॥ বিরজা শ্চার্ব্বরীবাংশ্চ নির্মোহাদ্যা স্তথা পরে। সাবর্ণস্য মনোঃ পুত্রা ভবিষ্যন্তি নরেশ্বরাঃ ॥ ৮ ॥ নবমো দক্ষ সাবর্ণি র্মৈত্রেয ভবিতা মনুঃ। পারাসরী বিগর্ভাশ্চ সুধর্ম্মাণ স্তথা ত্রিধা ॥ ভবিষ্যন্তি তদা দেবা একৈকো দ্বাদশো গণঃ। তেষামিন্দ্রো মহাবীর্য্যো ভবিষ্যত্যদ্ভুতো দ্বিজ ॥ সবনো দ্যুতিমান্ হব্যো বসু র্মেধাতিথি স্তথা। জ্যোতিষ্মান্ সপ্তমঃ সত্য স্তত্রৈতে চ মহর্ষযঃ ॥ ধৃতকেতু র্দীপ্তিকেতুঃ পঞ্চ-

হ্যন্তো নিরাময়ঃ পৃথুস্তবাদ্যাশ্চ তথা ॥ চক্ষসাবর্ণিকাত্মজাঃ॥৯॥ দশমো ব্রহ্মসাবর্ণি র্ভবিষ্যতি মুনে মনুঃ। সুধামানো ২নিরুদ্ধাশ্চ শতসংখ্যা স্তথা সুরাঃ। তেষা মিন্দ্রশ্চ ভবিতা শান্তি র্নাম মহাবলঃ। সপ্তর্ষয়ো ভবিষ্যন্তি যে তদা তান্ শৃণুষ্ব চ॥ হবিষ্মান্ সুকৃতিঃ সত্যো হ্যপাংমূর্ত্তি স্তথা পরঃ। নাভাগো প্রতিমৌজাশ্চ সত্যকেত স্তথৈব চ॥ সুক্ষেত্রশ্চোত্তমৌজাশ্চ ভূরিষেণাদয়ো দশ। ব্রহ্মসাবর্ণি পুত্রাশ্চ রক্ষিষ্যন্তি বসুন্ধরাং॥ ১০॥ একাদশশ্চ ভবিতা ধর্ম্মসাবর্ণিকো মনুঃ। বিহঙ্গমাঃ কামগমা নির্ম্মাণরুচয় স্তথা॥ গণা স্ত্বেতে তদা মুখ্যা দেবানাং হি ভবিষ্যতাং। একৈক স্ত্রিংশক স্তেষাং গণ শ্চেন্দ্রশ্চ বৈ বৃষঃ॥ নিশ্চর শ্চাগ্নিতেজাশ্চ বপুষ্মান্ বৃষ্টি রারুণিঃ। হবিষ্মাননঘশ্চৈ ভাবাঃ সপ্তষয় স্তথা॥ সর্ব্বত্রগঃ সর্ব্বধর্ম্মা দেবানীকাদয় স্তথা। ভবিষ্যন্তি মনো স্তস্য তনয়াঃ পৃথিবীশ্বরাঃ॥১১॥ রুদ্রপুত্রস্তু সাবর্ণি র্ভবিতা দ্বাদশো মনুঃ। ঋতধামা চ তত্রেন্দ্রো ভবিতা শৃণু মে সুরান্॥ হরিতা লোহিতা দেবা স্তথা সুমনসো দ্বিজ। সুকর্ম্মাণঃ সুরাপাশ্চ দশকাঃ পঞ্চ বৈ গণাঃ॥ তপস্বী সুতপাশ্চৈব তপোমূর্ত্তি স্তপোরতিঃ। তপোধৃতি দ্যুতিশ্চান্যঃ সপ্তমস্তু তপোধনঃ॥ দেববানুপদেবশ্চ দেবশ্রেষ্ঠাদয় স্তথা। ভবিষ্যন্তি মনো স্তস্য মহাবীর্য্যাঃ সুতা নৃপাঃ॥ ১২॥ ত্রয়োদশো রৌচ্য নামা ভবিষ্যতি মনে মনুঃ। সত্রামণিঃ সুকর্ম্মাণঃ সুধর্ম্মাণ স্তথা পরঃ॥ ত্রয়স্ত্রিংশদ্বিভেদা স্তে দেবানাং যে তু বৈ গণাঃ। দিবস্পতি র্মহাবীর্য্য স্তেষা মিন্দ্রো ভবিষ্যতি॥ নির্ম্মোহ স্তত্ত্বদর্শী চ নিষ্প্রকম্পো নিরুৎসুকঃ। ধৃতিমানব্যয়শ্চান্যঃ সপ্তমঃ সুতপা মুনিঃ॥ সপ্তর্ষয় স্ত্বিমে তস্য পুত্রানপি নিবোধ মে। চিত্রসেন বিচিত্রাদ্যা ভবিষ্যন্তি মহীক্ষিতঃ॥ ১৩॥ ভৌত্য শ্চতুর্দ্দশ শ্চাত্র মৈত্রেয় ভবিতা মনুঃ। শুচি রিন্দ্রঃ সুরগণা স্তত্র পঞ্চ শৃণুষ্ব তান্॥ চাক্ষবশ্চ পবিত্রাশ্চ কনিষ্ঠা ভ্রাজিন স্তথা। বাতাবৃদ্ধাশ্চ বৈ দেবাঃ সপ্তর্ষীনপি মে শৃণু॥ অগ্নিবাহুঃ শুচিঃ শুক্রো মাগধো ২গ্নীধ্র এব চ। যুক্ত স্তথাজিত শ্চান্যো মনুপুত্রানতঃ শৃণু॥ উরু গম্ভীর রন্ধ্যাদ্যা মনো স্তস্য সুতা নৃপাঃ। কথিতা মুনি শার্দ্দূল পালয়িষ্যন্তি মেদিনীং॥ ১৪॥ চতুর্যুগান্তে বেদানাং জা-

যস্তে কিল বিপ্লবঃ। পুনর্ব্বর্ত্তয়ন্তি তা- ॥ নেত্য ভবি সপ্তর্ষয়ো দিবং ॥ কৃতে কৃতে স্মৃতে বিপ্র প্রণেতা জায়তে মনুঃ। দেবা যজ্ঞভুজস্তে তু যাবন্মন্বন্ত- ॥ রন্তু তৎ॥ ভবন্তি যে মনোঃ পুত্রা যাবন্মন্বন্তরং হি তৈঃ। তদন্বয়োদ্ভবৈশ্চৈব তাবদ্ভূঃ পরিপাল্যতে ॥ মনুঃ সপ্তর্ষয়ো দেবা ভূপালাশ্চ মনোঃ সুতাঃ। মন্বন্তরে ভবন্ত্যেতে শক্রশ্চৈবাধিকারিণঃ॥ চতুর্দ্দশভি রেতৈস্তু গতৈর্ম্মন্বন্তরৈ র্দ্বিজ। সহস্রযুগ পর্য্যন্তঃ কল্পো নিঃশেষ উচ্যতে॥ তাবৎ প্রমা- ॥ ণা চ নিশা। ততো ভবতি সত্তম ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে ২ অধ্যায়ঃ॥ *॥ মন্বন্তর শ্রবণ ফলং যথা। শ্রুতে মন্বন্তরে পূর্ব্বে ধর্ম্ম মাপ্নোতি মানবঃ। স্বারোচিষস্য শ্রবণাৎ সর্ব্বান্ কামানবাপ্নুয়াৎ ॥ ঔত্তমে ধনমাপ্নোতি জ্ঞানঞ্চাপ্নোতি তামসে। রৈবতে চ শ্রুতে বুদ্ধিং সুরূপাং বিন্দতে স্ত্রিয়ং ॥ আরোগ্যঞ্চাক্ষুষে পুংসাং শ্রুতে বৈবস্বতে বলং। গুণবৎ পুত্রপৌত্রাংশ্চ সূর্য্যসাবর্ণিকে শ্রুতে ॥ মাহাত্ম্যং ব্রহ্মসাবর্ণে ধর্ম্মসাবর্ণিকে শুভাং। মতিমাপ্নোতি মনুজো রুদ্রসাবর্ণিকে জয়ং ॥ জাতি শ্রেষ্ঠো গুণৈ র্যুক্তো দক্ষসাবর্ণিকে শ্রুতে। বিশাতয়ত্যরি বলং রৌচ্যং শ্রুত্বা মনূত্তমং॥ দেব প্রসাদ মাপ্নোতি ভৌত্যে মন্বন্তরে শ্রুতে। তথাগ্নিদীপ্তিং পুত্রাংশ্চ গুণযুক্তানবাপ্নুতে ॥ সর্ব্বাণ্যনুক্রমাদ্যস্তু শৃণোতি মুনিসত্তম। মন্বন্তরাণি তস্যাপি শ্রূয়তাং ফলমুত্তমং॥ তত্র দেবানৃষীন্ বিপ্রান্মনূন্ সত্তনয়ান্নৃপান্। ইন্দ্রাংশ্চ শ্রুত্বা সর্ব্বেভ্যঃ পাপেভ্যো বিপ্রমুচ্যতে॥ দেবেন্দ্রর্ষি নৃপাশ্চান্যে যে তন্মন্বন্তরাধিপাঃ। তে প্রীয়ন্তে তথা প্রীতাঃ প্রযচ্ছন্তি শুভাং মতিং॥ ততঃ শুভাং মতিং প্রাপ্য কৃত্বা কর্ম্ম তথাশুভং। শুভাং গতি মবাপ্নোতি যাবদিন্দ্রাশ্চতুর্দ্দশ ॥ সর্ব্বর্ত্তবঃ সৌম্যাঃ সর্ব্বে সৌম্যা স্তথা গ্রহাঃ। ভবন্ত্যসংশয়ং শ্রুত্বা ক্রমান্মন্বন্তর স্থিতিং ॥ ইতি শ্রীমার্কণ্ডেয় পুরাণে মন্বন্তরানুবর্ণনং নামাধ্যায়ঃ ॥

**মপষ্টঃ, মপষ্টকঃ, মপষ্টকঃ** পুং বনমুদ্গঃ। ইত্যমরটীকায়াং ভরতঃ ॥

**মভ্রু** গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ওষ্ঠ্যবর্গ চতুর্থোপধঃ। মভ্রুতি। ইতি দুর্গাদাসঃ ॥

**মম** ব্য মদীয়ং। আমার ইতি ভাষা। যথা। মমত্বং মম রাজ্যস্য রাজ্যা-

ঙ্গেষ্বখিলেষ্বপি। জানতোপি যথা জ্ঞস্য কিমেতন্মুনি সত্তম ॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং ॥ তেষু অমদীয়ত্বং জানতো ঽপি মম যথাজ্ঞস্য অজ্ঞস্যেব রাজ্যাদিষু মমত্ব মে তৎ কিং কিংনিবন্ধন মিত্যর্থঃ। ইতি তট্টীকাযাং নাগোজী ভট্টঃ॥ অস্যাব্যযত্বেন স্পষ্ট প্রমাণং মমত্বশব্দে দ্রষ্টব্যং॥ অস্মচ্ছব্দস্য ষষ্ঠ্যেকবচনান্তস্যেদং রূপং তৎপদং ত্রিষুলিঙ্গেষু সদৃশং ॥

মমতা স্ত্রী দর্পঃ। অভিমানঃ। ইতি হেমচন্দ্রঃ॥ মমত্বং। যথা। তথাপি মমতাবর্ত্তে মোহগর্ত্তে নিপাতিতাঃ। ইতি দেবীমাহাত্ম্যং ॥

মমতাযুক্তঃ পুং কৃপণঃ। ইতি শব্দমালা॥ অভিমানাদিবিশিষ্টে ত্রি॥

মমত্বং ক্লী মদীয়ত্বং। যথা। দুঃখাযতন ভূতো হি মমত্বালম্বনো গৃহী। ইতি মার্কণ্ডেয়পুরাণং ॥ স্নেহঃ। যথা। সো ঽচিন্তয়ত্তদা তত্র মমত্বাকৃষ্ট চেতনঃ। ইতি দেবীমাহাত্ম্যং ॥ মমত্বেন স্নেহেন আকৃষ্টা চেতনা মতি র্যস্য। মমেতি ষষ্ঠ্যন্তরূপ মব্যযং তস্য ভাবঃ মমত্বং। ইতি তট্টীকাযাং কাশীরামঃ॥

মমাপতালঃ পুং বিষযঃ। মব্যতে রাল প্রত্যযঃ স্যাত্তস্যাপ রুড়াগমো ধাতো র্যলোপো মকারশ্চান্ত্যস্য। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥

মষ ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ মযতে। ইতি দুর্গাদাসঃ॥

মযঃ পুং উষ্ট্রঃ। ইত্যমরঃ॥ অশ্বতরঃ॥ দানববিশেষঃ। সতু দৈত্যানাং শিল্পী। ইতি মেদিনী॥ তস্য সপ্তাপত্যানি যথা। ময়স্য জাতা হেমাযাং পুত্রাঃ সপ্ত মহাবলাঃ। মাযাবী দুন্দুভিশ্চৈব বৃষশ্চ মহিষস্তথা। বালিকা বজ্রকন্যা চ কন্যা মন্দোদরী তথা॥ ইতি বহ্নিপুরাণং॥

মযটঃ পুং তৃণযুক্তহর্ম্যঃ। ইতি হারাবলী॥ হলন্তশ্চেৎ তদ্রূপার্থে প্রাচুর্য্যার্থে চ মযট্ ইতি প্রত্যযো ভবতি॥

মযষ্টকঃ পুং বনমুদ্গঃ। ইত্যমর টীকাযাং ভরতঃ॥

মযা স্ত্রী চিকিৎসা। ইতি শব্দচন্দ্রিকা॥ তৃতীযৈকবচনান্তাস্মচ্ছব্দস্যরূপমপ্যেবং॥

মযি ত্রি আত্মনি। আমাতে ইতি ভাষা। সপ্তম্যেকবচনান্তাস্মচ্ছব্দস্যরূপ মিদং। ইতি ব্যাকরণং॥

ময়ী স্ত্রী ময়স্যস্ত্রীজাতিঃ। উষ্ট্রী। ইতি ব্যাকরণং ॥

ময়ুঃ পুং কিন্নরঃ। ইত্যমরঃ॥ মৃগঃ। ইতি মেদিনী॥

ময়রাজঃ পুং কুবেরঃ। ইতি শব্দরত্নাবলী॥

ময়ুষ্টকঃ পুং বনমুদ্গঃ। ইত্যমরটীকা॥

ময়ূখঃ পুং কিরণঃ॥ দীপ্তিঃ॥ জ্বালা। ইত্যমরঃ॥ শোভা। ইতি মেদিনী॥ কীলঃ। ইত্যজয়ঃ॥

ময়ূরঃ পুং স্বনামখ্যাতপক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। বর্হিণঃ২ বহী ৩ নীলকণ্ঠঃ ৪ ভুজঙ্গভুক্ ৫ শিখাবলঃ ৬ শিখী ৭ কেকী ৮ মেঘনাদানুলাসী ৯। ইত্যমরঃ॥ প্রচলাকী ১০ চন্দ্রকী ১১ সিতাপাঙ্গঃ ১২। ইতি শব্দরত্নাবলী॥ ধ্বজী ১৩ মেঘানন্দী ১৪ কলাপী ১৫ শিখণ্ডী ১৬ চিত্রপিচ্ছকঃ ১৭ ভুজগভোগী ১৮ মেঘনাদানুলাসকঃ ১৯। অস্য মাংসগুণাঃ। ময়ূরঃ শ্রোত্র নেত্রাগ্নি মেধা বর্ণস্বরায়ুষাং। হিতো বল্যো গুরুশ্চোষ্ণো বাতঘ্নঃ শুক্র মাংসদঃ॥॥ হেমন্তকালে শিশিরে বসন্তে সেব্যং হি মায়ূর মুশন্তি মাংসং। উষ্ণো হি বহী বিষ ভোজনৈশ্চ বর্ষা শরদ্‌গ্রীষ্ম মুখেষ্বপথ্যঃ॥ ইতি রাজনির্ঘণ্টঃ॥ এতন্মাংস মেরণ্ডতৈলভৃষ্টং বিষতুল্যং। ইতি রাজবল্লভঃ॥ ॥ ময়ূরশিখাক্ষুপঃ। তৎপর্য্যায়ঃ। খরা শ্বা ২ কারবী ৩ দীপঃ ৪ লোচমস্তকঃ ৫। ইত্যমরঃ॥ অপামার্গঃ। ইতি মেদিনী॥

ময়ূরকং ক্লী অঞ্জনবিশেষঃ। তুতিয়া ইতি ভাষা। তৎপর্য্যায়ঃ। তুত্থাঞ্জনং২ শিখিগ্রীবং ৩ বিতুন্নকং ৪। ইত্যমরঃ॥

ময়ূরকঃ পুং অপামার্গঃ। ইত্যমরঃ॥ তুত্থকং॥ ময়ূরঃ। ইতি বিশ্বঃ॥ ময়ূরশিখা। ইতি জটাধরঃ॥

ময়ূরগ্রীবকং ক্লী তুত্থং। ইতি রাজনির্ঘণ্টঃ॥

ময়ূরচটকঃ পুং গৃহকুক্কুটঃ। ইতি হারাবলী॥

ময়ূরচূড়ং ক্লী স্থৌণেয়কং। ইতি রাজনির্ঘণ্টঃ॥

ময়ূরচূড়া স্ত্রী ময়ূরশিখা। ইতি বৈদ্যকং॥

ময়ূরজঙ্ঘঃ পুং শ্যোনাকঃ। ইতি রাজনির্ঘণ্টঃ॥

ময়ূরতুত্থং ক্লী তুত্থং। ইতি রাজনির্ঘণ্টঃ॥

ময়ূরপদকং ক্লী নখাঘাতঃ। যথা। তথাবকেরকোলী চ নখাঘাতে ...

মগুনং। ময়ূরপদকং ব্যাঘ্রনখকোৎপলপত্রকে॥ ইতি শব্দমালা॥

ময়ূরবিদলা স্ত্রী অম্বষ্ঠা। ইতি বৈদ্যকং॥

ময়ূরশিখা স্ত্রী স্বনামখ্যাতক্ষুপবিশেষঃ। তৎপর্য্যায়ঃ। বর্হিচূড়া ২ শিখিনী ৩ শিখালুঃ ৪ সুশিখা ৫ শিখা ৬ শিখাবলা ৭ কেকিশিখা ৮। অস্যাগুণাঃ। রসেস্বাদুত্বং। মূত্রকৃচ্ছ্র বালগ্রহাদি দোষ নাশিত্বং। বশ্যকর্ম্মণি শস্তত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। ময়ূরাখ্যা শিখা প্রোক্তা সহস্রাঙ্ঘ্রি মধুচ্ছদা। নীলকণ্ঠশিখা লঘ্বী পিত্ত শ্লেষ্মাতিসারজিৎ॥ ইতি ভাবপ্রকাশঃ॥

ময়ূরিকা স্ত্রী অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ॥

ময়ূরী স্ত্রী ময়ূরস্ত্রীজাতিঃ। ইতি ব্যাকরণং লিঙ্গাদিসংগ্রহশ্চ॥

মরকঃ পুং মারিঃ। মড়ক ইতি ভাষা। ইতি হেমচন্দ্রঃ॥ তৎপর্য্যায়ঃ। মারী ২ মারকঃ ৩। ইতি জটাধরঃ॥ তস্য কারণাদি যথা। যাবন্মার্ত্তণ্ড সুনুর্গবি ধনুষি ঝসে মন্মথে বা স্তি নার্য্যাং তাবদ্দুর্ভিক্ষ পীড়া ভবতি চ মরকং সংশয়ং যান্তি লোকাঃ। হাহাকারা তথোর্ব্বী মনুজ ভয়করী ফেরুরাবৈশ্চ ভীমৈঃ শূন্যগ্রামা ভবেয়ু র্নরপতি রহিতা ভূরি কঙ্কাল মালা॥ বক্রং করোতি রবিজো ধরণীসুতো বা মূলর্ক্ষ হস্ত মঘ রেবতি মৈত্রভেষু। ছত্রোপভঙ্গ পতনানি চ সৈনকানাং সর্ব্বত্র লোক মরণং জলশ্বেত দেশঃ॥ নাংস্বাস্থীনি সমাদায় শ্মশানাদ্গৃধ্রবায়সাঃ। শ্বা শৃগালো অথবা মধ্যে পুরস্য প্রবিশন্তি চেৎ॥ বিকিরন্তি গৃহাদৌ চ শ্মশানং সা মহী ভবেৎ। চৌরেণ হন্যতে লোকঃ পরচক্র সমাগমঃ॥ সংগ্রামশ্চ মহাঘোরো দুর্ভিক্ষং মরকস্তথা। অদ্ভুতানি প্রসূযন্তে তস্য দেশস্য বিদ্রবঃ॥ ইতি জ্যোতিস্তত্ত্বং॥ অপিচ। সাচিষ্যগ্নিভয়ং গৈরিকরূপে চ যুদ্ধানি। দূর্ব্বাকাণ্ডশ্যামে হারিদ্রে চাপি নির্দ্দিশেন্মরকং॥ ইতি গ্রহণ প্রকরণে তিথ্যাদিতত্ত্বং॥ অন্যদপি। রবাবিন্দৌ গজারূঢ়া শস্যস্ফারে তুরঙ্গমে। নৌকয়া গুরু শুক্রাভ্যাং দোলয়া বুধবাসরে॥ গজে চ জলদা দেবী ছত্রভঙ্গস্তুরঙ্গমে। নৌকায়াং শস্যবৃদ্ধিঃ স্যাৎ দোলায়াং মরকং ভবেৎ॥ ইতি পত্রিকাপ্রবেশ ফল কথনে জ্যোতিষং॥ * ॥ অস্য শান্তিঃ। দেবীমাহাত্ম্য পাঠ।

বটুকভৈরবস্তব পাঠঃ। তুলস্যা বিষ্ণুপূজনঞ্চ। যথা। উপসর্গানশেষাংস্তু মহামারী সমুদ্ভবান্। তথা ত্রিবিধ মুৎপাতং মাহাত্ম্যং শময়েন্মন ॥ ইতি মার্কণ্ডেয়পুরাণং ॥ মারীভয়ে রাজভয়ে তথা চৌরাগ্নিজে ভয়ে। ঔৎপাতিকে মহাঘোরে তথা দুঃস্বপ্নদর্শনে ॥ বন্ধনে চ তথা ঘোরে পঠেৎ স্তোত্রং সমাহিতঃ। ইতি বিশ্বসারোদ্ধারতন্ত্রে আপদুদ্ধারকল্পঃ ॥ গৃহযজ্ঞৈঃ শান্তিকৈশ্চ কিং ক্লিশ্যন্তি নরা দ্বিজ। মহাশান্তিকরঃ শ্রীমাংস্তুলস্যা পূজিতো হরিঃ ॥ উৎপাতান্ দারুণান্ পুংসাং দুর্নিমিত্তান্যশেষতঃ। তুলস্যা পূজিতো ভক্ত্যা মহাশান্তিকরো হরিঃ ॥ অত্র ব্রহ্মপুরাণীয়ো মন্ত্রঃ। ওঁ নমস্তে বহুরূপায় বিষ্ণবে পরমাত্মনে স্বাহেতি। ইতি জ্যোতিস্তত্ত্বং ॥

মরকতং ক্লী হরিদ্বর্ণমণিবিশেষঃ। পান্না ইতি ভাষা। তস্য দেবতা বুধঃ। ইতি জ্যোতিষং ॥ তৎপর্য্যায়ঃ। গারুত্মতং ২ অশ্মগর্ভং ৩ হরিন্মণিঃ ৪। ইত্যমরঃ ॥ মরক্তং ৫ রাজনীলং ৬ গরুড়াঙ্কিতং ৭। ইতি শব্দরত্নাবলী ॥ রৌহিণেয়ং ৮ সৌপর্ণং ৯ গরুড়োদ্গীর্ণং ১০ বুধরত্নং ১১ অশ্মগর্ব্বজং ১২ গরলারিঃ ১৩ বাপবোলং ১৪ গারুড়ং ১৫। ক্বচিৎ পুস্তকে গরুড়োদ্গীর্ণ স্থানে গরুড়োত্তীর্ণং বাপবোল স্থানে বাপুবোলং ইতিচ পাঠঃ। অস্য গুণাঃ। বিষঘ্নত্বং। নশীতলত্বং। রসে মধুরত্বং। আম পিত্ত হরত্বং। রুচ্যত্বং। পুষ্টিদত্বং। ভূতনাশনত্বঞ্চ ॥ * ॥ অস্য লক্ষণং। স্বচ্ছঞ্চ গুরু সচ্ছায়ং স্নিগ্ধং গাত্রঞ্চ মার্দ্দব সমেতং। অব্যঙ্গং বহুরঙ্গং শৃঙ্গারী মরকতং শুভং বিভৃয়াৎ ॥ * ॥ তস্যাপলক্ষণং। শর্করিলং কলিলং রুক্ষং মলিনং লঘু হীনকান্তি কল্মাষং। ত্রাসযুতং বিকৃতাঙ্গং মরকত মমরোপি নোপভুঞ্জীত ॥ * ॥ তস্য পরীক্ষা। যচ্ছৈবাল শিখণ্ডি শাদ্বল হরিৎকাচৈশ্চ বাধচ্ছদৈঃ খদ্যোতেন চ বালকীর বপুষা শৈরীষ পুষ্পেণ চ। ছায়াভিঃ সমতাং দধাতি তদিদং নির্দ্দিষ্ট মষ্টাত্মকং জাত্যং যত্তপনাতপেষ্বপরিতো গারুত্মতং রঞ্জয়েৎ ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ গ্রন্থান্তরে তস্য পরীক্ষাদি যথা। সূত উবাচ। দানবাধিপতেঃ পিত্ত মাদায় ভুজগাধিপঃ। দ্বিধা কুর্ব্বন্নিব ব্যোম

সত্বরং বাসুকির্যযৌ ॥ স তদাস্য শি-
রোরত্ন প্রভা দীপ্তে নভো ম্বুধৌ ।
রাজতঃ স মহানেকঃ খণ্ডসেতুরিবা-
বভৌ ॥ ততঃ পক্ষনিপাতেন সংহর-
ন্নিব রোদসী । গরুত্মান্ পন্নগেন্দ্রস্য
প্রহর্ত্তুমুপচক্রমে ॥ সহসৈব মুমো-
চ তৎ ফণীন্দ্রঃ সুরসাদ্যুক্ত তুরুষ্ক
পাদপাযাং । নলিকা বন গন্ধ বাসি
তাযাং বরমাণিক্য গিরেরুপত্যকা-
যাং ॥ তস্য প্রপাত সমনন্তর কাল
মেব তদ্বদ্বরালয মতীত্য রমা সমী-
পে । স্থানং ক্ষিতে রুপপযোনিধি
তীর লেখং তৎপ্রভৃত্যাস্মরকতাকর-
তাং জগাম ॥ তত্রৈব কিঞ্চিৎ পত-
তস্তু পিত্তাদুৎপত্য জগ্রাহ ততো
গরুত্মান্ । মূর্চ্ছাপরীতঃ সহসৈব
ঘোণা রন্ধ্রদ্বযেন প্রমুমোচ সর্ব্বং ॥
তত্রাকঠোর শুককণ্ঠ শিরীষপুষ্প খ
দ্যোত পৃষ্ঠচর শাদ্বল শৈবলানাং ।
কহ্লার শষ্পক ভুজঙ্গভুজাঞ্চ পত্র-
প্রান্ত ত্বিষো মরকতাঃ শুভদা ভব
ন্তি ॥ তস্যত্র ভোগীন্দ্রভুজা বিমুক্তং
পপাত পিত্তং দিতিজাধিপস্য ।
তস্যাকরস্যান্তিতরাং স দেশো দুঃ-
খোপলভ্যশ্চ গুণৈশ্চ যুক্তঃ ॥ তস্মি
ন্মরকত স্থানে যৎকিঞ্চিদুপজাযতে
। তৎসর্ব্বং বিষরোগাণাং প্রশমায

প্রকীর্ত্ত্যতে ॥ সর্ব্ব মন্ত্রৌষধিগণৈ
র্যন্নশক্যং চিকিৎসিতুং । মহাহিদং-
ষ্ট্রা প্রভবং বিষন্তেন শাম্যতি ॥
অন্য দপ্যাকরে তত্র যদ্দোষৈ রুপ-
বর্জ্জিতং জাযতে তৎ পবিত্রাণা-
মুত্তমং পরিকীর্ত্তিতং ॥ অত্যন্ত হ-
রিত বর্ণং কোমল মর্চ্চি র্বিভেদ জ-
টিলঞ্চ । কাঞ্চন চূর্ণস্যান্তঃ পূর্ণমিব
লক্ষ্যতে যচ্চ ॥ যুক্তং সংস্থান গুণৈঃ
সমরাগং গৌরবেণ বিহীনং । সবিতুঃ
কর সংস্পর্শাচ্ছুরযতি সর্ব্বাশ্রমং দী-
প্ত্যা ॥ হিত্বা চ হরিত ভাবং যস্যা-
ন্ত র্বিনিহিতা ভর্দ্দীপ্তিঃ । অচির
প্রভা প্রভাহত নব শাদ্বল সন্নিভা
ভাতি ॥ যচ্চ মনসঃ প্রসাদং বিদধা-
তি নিরীক্ষিত মতি মাত্রং । তন্মর-
কতং মহাগুণ মিতি রত্নবিদাং মনো
বৃত্তিঃ ॥ যস্তু ভাস্কর সংস্পর্শাৎ হ-
স্তন্যস্তো মহামণিঃ । রঞ্জযেদাত্ম
পাদৈস্তু মহামরকতং হি তৎ ॥ চ-
তুর্থা জাতি ভেদস্তু মহামরকতে ম-
ণৌ । ছাযা ভেদেন বিজ্ঞেযা চতুর্বর্গ-
স্য লক্ষণৈঃ ॥ * ॥ অথ ছাযা । ভ-
বেদষ্ট বিধ ছাযা মণে র্মরকতস্য চ ।
বর্হিপুচ্ছ সমাভাষা চাসপক্ষ সমা
হপরা ॥ হরিকোচ নিভা চান্যা ত-
থা শৈবাল সন্নিভা । খদ্যোত পৃষ্ঠ

সংকাশা বালকীর সমা তথা ॥ নব॥ শাদ্বল সচ্ছায়া শিরীষ কুসুমোপমা ॥ এব মষ্ঠৌ সমাখ্যাতা শুষা মরক তাশুয়াঃ ॥ ছায়াভির্যুক্ত মেতাভিঃ শ্রেষ্ঠং মরকতং ভবেৎ । পদ্মরাগ গতঃ স্বচ্ছো জলবিন্দুর্যথা ভবেৎ॥ তথা মরকতচ্ছায়া শ্যামলা হরিতামলা ॥❀॥ অথ দোষ গুণাঃ । দোষাঃ সপ্ত ভবন্ত্যস্য গুণঃ পঞ্চবিধো মতঃ । অস্নিগ্ধং রুক্ষ মিত্যুক্তং ব্যাধি স্তস্য ধৃতে ভবেৎ ॥ বিস্ফোটঃ স্যাৎ সাপড়কে তত্র শস্ত্রহতি ভবেৎ । স পাষাণে ভবেদিষ্ট নাশো মরকতে ধৃতে ॥ বিচ্ছায়ং মরকতং প্রাহু র্বার্য্যতে ন তু ধার্য্যতে । শর্করং কর্করা যুক্তং পুত্র শোকপ্রদং ধৃতং ॥ জঠরং কান্তি হীনন্তু দংষ্ট্রি বহ্নি ভয়াবহং । কল্মাষ বর্ণং ধবলং ততো মৃত্যু ভয়ং ভবেৎ ॥ ইতি দোষাঃ সমাখ্যাতা বর্ণন্তে॥ অথ মহা গুণাঃ । নির্ম্মলং কথিতং স্বচ্ছং গুরু স্যাদ্গুরুতা যুতং ॥ স্নিগ্ধং রুক্ষ বিনির্মুক্ত মরজস্ক মরেণুকং । সুরাগং রাগ বহুলং মণেঃ পঞ্চ গুণা॥ মতাঃ ॥ এতৈ র্যুক্তং মরকতং সর্ব্ব পাপ ভয়াপহং । গজ বাজি রথান্দত্ত্বা বিপ্রেভ্যো বিস্তরাদ্বিমে॥ তৎফলং সমবাপ্নোতি শুদ্ধে মরকতে ধৃতে । ধন ধান্যাদি করণে তথা সৈন্যক্রিয়া বিধৌ ॥ বিষরোগোপশমনে কর্ম্মস্বাথর্ব্বণেষু চ । শস্যতে মুনিভির্যস্মাদক্ষং মরকতো মণিঃ ॥ তথাচ । স্বচ্ছতা গুরুতা কান্তিঃ স্নিগ্ধত্বং পিত্ত কারণং । হরিন্মিরঞ্জকশ্চৈব সপ্ত মরকতে গুণাঃ ॥ ❀ ॥ অথ কৃত্রিমাকৃত্রিম পরীক্ষা । কৃত্রিমত্বং সহজত্বং দৃশ্যতে সূরিভিঃ ক্বচিৎ । ঘর্ষয়েৎ প্রস্তরে বঙ্গ কাচ স্তম্ভাদ্বিপদ্যতে ॥ লেখয়েল্লৌহ ভৃঙ্গেণ চূর্ণেনাথ বিলেপয়েৎ । সহজঃ কান্তি মাপ্নোতি কৃত্রিমো মলিনায়তে ॥ বর্ণস্যাতি বহুত্বাৎ যস্যান্তঃ স্বচ্ছ কিরণ পরিধানং । সান্দ্র স্নিগ্ধ বিশুদ্ধং কোমল বর্হপ্রভাদি সম কান্তি॥ চলোজ্জ্বলয়া কান্ত্যা সান্দ্রাকারং বিভাসয়া ভাতি । তদপি গুণবৎ সংজ্ঞা মাপ্নোতি হি যাদৃশী পূর্ব্বং ॥ সকল কঠোরং মলিনং রুক্ষং পাষাণ কর্করোপেতং । দিগ্ধঞ্চ শিলাজতুনা মরকতমেবম্বিধং বিগুণং ॥ যৎসন্ধি শ্লেষিতং রত্ন মন্যম্মরকতাদ্ভবেৎ । শেষস্কান্নৈ র্ন তদ্ধার্য্যং ক্রেতব্যং বা কথঞ্চন ॥ ভল্লাতক পুত্রিকা চ তদ্বর্ণ সংযোগতঃ । মণে র্মরকতস্যৈতে লক্ষণীয়া বিজাতয়ঃ ॥ ক্ষৌমেণ বাস-

স্তথা বিপ্রা মাতা স্নেহের পূজয়েৎ ॥ পিতা স্বজন বর্গশ্চ ধর্ম্মাত্মানং মহামতিং। এবম্ভূতাঃ সমাখ্যাতাঃ পুণ্য স্থানানি তে বিভো ॥ প্রত্যক্ষান্ পশ্যতে ভূতান্ হাস্য স্নেহ সমাবিলান্। নচ স্বপ্নেন মোহেন ক্লেশ রক্তেন বৈ বত ॥ ধর্ম্মরাজো মহাপ্রাজ্ঞো দূরাত্তস্তু সমাহ্বয়েৎ। ব্রহেহি ত্বং মহাভাগ যত্র ধর্ম্মঃ স তিষ্ঠতি ॥ তস্য মোহো নচ ভ্রান্তির্গ্লানির্নচ বিক্রিয়া। জায়তে নাত্র সন্দেহঃ প্রসন্নাত্মা প্রতিষ্ঠতে ॥ জ্ঞান বিজ্ঞান সম্পন্নঃ স্মরন্নেবং জনার্দ্দনং। তৈশ্চ স[illegible]ত্যেবং সন্তুষ্টো হৃষ্টমানসঃ ॥ দশম দ্বারমাশ্রিত্য আত্মা ॥ তস্য হি গচ্ছতি। শিবিকা তস্য চা যাতি সুযানং সুমনোহরং ॥ বিমানৈরেব যাত্যেষ বায়ো র্বেগেন চোত্তমঃ। ছত্রেণ ধ্রিয়মানেন চামরব্যজনৈস্তথা ॥ বীজ্যমানঃ স ধর্ম্মাত্মা পুণ্যৈরেব সমন্ততঃ। গীযমানস্তু ধর্ম্মাত্মা স্তূযমানস্তু পণ্ডিতৈঃ ॥ বন্দিভি শ্চামরৈ র্দ্দি ব্যৈ ব্রাহ্মণৈ র্বেদপারগৈঃ। সাধুভি স্তূযমানস্তু সর্ব্বসৌখ্য সমন্বিতঃ ॥ যথা দান প্রভাবেন ফলমাপ্নোতি তত্রসঃ। আরাম বাটিকা মধ্যে স প্রযাতি সুখেন বৈ ॥ অপ্সরাভিঃ সমাকীর্ণো দিব্যাভি র্মঙ্গলৈর্যুতঃ। দেবৈস্তু স্তূযমানস্তু ধর্ম্মরাজং প্রপশ্যতি ॥ দেবাশ্চ ধর্ম্মসংযুক্তা জগ্মুঃ সাংমুখ্যমেব তে। ব্রহেহি ত্বং মহাভাগ ভুঙ্ক্ষ্ব ভোগান্মনোরমান্ ॥ এবং সংপশ্যতে ধর্ম্মং সৌম্যরূপং মহামতিঃ। অস্য পুণ্যস্য ভাবেন ভুঙ্ক্ষ্ব স্বর্গ মনুত্তমং ॥ ভোগ ক্ষয়াৎ স ধর্ম্মাত্মা পুনর্জন্ম প্রযাতি চ। নিজ ধর্ম প্রসাদাৎ স ফলং পুণ্য[illegible]তি চ ॥ ব্রাহ্মণস্য সপুণ্যস্য ক্ষত্রিয়স্য তথৈব চ। ধনাঢ্যস্য সুপুণ্যস্য বৈশ্যস্য চ মহা[illegible]। ধর্ম্মেণ মোদতে ভদ্রং পুনঃ [illegible] করোতি সঃ।

ইতি শ্রীপদ্মপুরাণে ভূমিখণ্ডে সুমনোপাখ্যানে ১৫ অধ্যায়ঃ ॥ * ॥

অথ পাপিনাং মরণ লক্ষণং। সোম শর্ম্মোবাচ। পাপিনাং মরণং ভদ্রে কীদৃশৈ র্লক্ষণৈ র্যুতং। তন্মে ত্বং বিস্তরাদ্ব্রূহি যদি জানাসি ভাবিনি ॥ সুমনোবাচ। শ্রূযতা মভিধাস্যামি তস্মাৎ সিদ্ধাৎ শ্রুতং ময়া ॥ পাপিনাং মরণং কান্ত যাদৃশং লিঙ্গ মেবচ। মহাপাতকিনাঞ্চৈব স্থান মেষাং বদাম্যহং ॥ লিপ্তা মমেধ্য সংক্লেদৈ র্ভূমিং পাপ সমন্বিতাং। স তাং প্রাপ্য সুদুষ্টাত্মা প্রাণান্ দুঃখেন মুঞ্চতি ॥

চাণ্ডাল ভূমিং সংপ্রাপ্য মরণং যাতি দুঃখিতঃ। গর্দ্ধভাচরিতাং ভূমিং বেশ্যাগারং সমাশ্রিতঃ ॥ মদ্যপানগৃহং গত্বা নৈধন্যং মুপগচ্ছতি। অস্থি চর্ম্ম নখৈঃ পূর্ণা মাশ্রিতাং পাপ কিল্বিষৈঃ ॥ তা মবাপ্য স দুষ্টাত্মা মৃত্যুং প্রাপ্নোতি নিশ্চিতং। অন্যাং পাপ সমাচারাং প্রাপ্য মৃত্যুং স গচ্ছতি ॥ অথ চেষ্টাং প্রবক্ষ্যামি দূতানাং প্রিয় নিশ্চিতাং। ভৈরবান্ দারুণান্ ঘোরানতিকৃষ্ণান্মহোদরান্ ॥ পিঙ্গাক্ষান্ পীত নীলাংশ্চ অতি শ্বেতান্মহোদরান্। অতুচ্চাংশ্চ করালাংশ্চ শুষ্ক মাংস ত্বচোপমান্ ॥ রৌদ্রদংষ্ট্রা করালাংশ্চ সিংহাস্যান্ সর্প হস্তকান্। স তান্ দৃষ্ট্বা প্রকম্পেত স্বিদ্যেত চ মুহু র্মুহুঃ ॥ শিবা সম্বাদ বদ্ঘোরান্মহারাবান্মহানতে। মুঞ্চন্তি দূতকাঃ সর্ব্বে কর্ণ মূলে তু তস্য হি ॥ গলে পাশ প্রবন্ধা স্তে কণ্ঠে বদ্ধা স্তথোদরে। সমাকৃষ্য নযন্ত্যেতে হাহেতি রুদতো মুহুঃ ॥ ম্রিয়মাণস্য যা চেষ্টা তামেবং প্রবদাম্যহং। পর দ্রব্যাপহরণং পরভার্য্যা বিড়ম্বনং ॥ ঋণং পরস্য সর্ব্বস্বং গৃহীতং যৈস্তু পাপিভিঃ। পুন নৈব প্রদত্তং হি লোভাস্বাদ বিমোহিতৈঃ ॥ অন্যদেব মহাপাপং স্বপ্রতিগ্রহনেব চ। কণ্ঠ মাযান্তি তে সর্ব্বে ম্রিয়মাণস্য তস্য চ ॥ যানি কানি চ পাপানি পূর্ব্বমেব কৃতানি চ। আযান্তি কণ্ঠমূলং হি মহাপাপস্য নান্যথা ॥ দুঃখ মুৎপাদযন্ত্যেতে কফবন্ধেন দারুণং। পীডাভি র্দারুণাভিশ্চ কণ্ঠো ঘুরঘুরাযতে ॥ রোদতে কম্পতে হত্যর্থং মাতরং পিতরং পুনঃ। স্মরতি ভ্রাতরং তত্র ভার্য্যাং পুত্রং পুনঃ পুনঃ ॥ পুন র্বিস্মরণং যাতি মহাপাপেন মোহিতঃ। তস্য প্রাণা ন গচ্ছন্তি বহু পীডা সমাকুলাঃ ॥ [illegible]তে কম্পতে চৈব মূর্চ্ছতে চ পুনঃ পুনঃ। এবং পীডা সমাযুক্তো দুঃখং ভুঙ্ক্তে হতিমোহিতঃ ॥ তস্য প্রাণাঃ সুদুঃখেন মহাকষ্টৈঃ প্রচালিতঃ। অপানং মার্গ মাশ্রিত্য শূণ কান্ত প্রযান্তি তে ॥ এবং প্রাযা দুরাত্মানো লোভ মোহ সমন্বিতাঃ। নীযন্তে চ মহাভূতৈ স্তেবাং দুঃখং বদাম্যহং ॥ ইতি পাদ্মে ভূমিখণ্ডে সুমনোপাখ্যানে পাপিমরণং নাম ৯৬অধ্যাযঃ ॥*॥ পাপিনাং যমালয গমন নানা যোনি প্রাপ্তি বিবরণং যথা। সুমনোবাচ। অঙ্গারসঞ্চযে মার্গে কৃষ্যমাণো হি নীযতে। দহ্যমানঃ স দুষ্টাত্মা চেষ্টমানঃ পুনঃ পুনঃ ॥ যন্ত্রা-

তপো মহাভীরো দ্বাদশাদিত্য তা-
পিতঃ। নীযতে তেন মার্গেণ সন্তপ্তঃ
সূর্য্য রশ্মিভিঃ ॥ পর্ব্বতেষ্বিব দুর্গেষু
ছাযাহীনেষু দুর্ম্মতিঃ ॥ নীযতে তেন
মার্গেণ ক্ষুধা তৃষ্ণাদি পীড়িতঃ ॥
স দূতৈ হন্যমানস্ত পদা দণ্ডৈঃ পর
শ্বধৈঃ। কশাভি স্তাড্যমানস্ত নিন্দ্য
মানস্তু দূতকৈঃ ॥ ততঃ শীতমযে মা-
র্গে বাযুনা সেব্যতে পুনঃ। তেন শী
তেন দঃখী স ভূত্বা যাতি ন সংশযঃ
॥ আকৃষ্যমাণো দূতৈস্তু নানা দুঃখেন
নীযতে। এবং পাপী স দুষ্টাত্মা দেব
ব্রাহ্মণ নিন্দকঃ ॥ সর্ব্ব পাপ সমাযু
ক্তো নীযতে যমকিঙ্করৈঃ। যমং প
শ্যতি দুষ্টাত্মা কৃষ্ণাঞ্জনচযোপমং ॥
তনুগং দারুণং ভীমং যমদূতৈঃ স
মাবৃতং। সর্ব্বব্যাধি সমাকীর্ণং চিত্র
গুপ্ত সমন্বিতং ॥ আরূঢ় মহিষং
দেবং ধর্ম্মরাজং দ্বিজোত্তম। দংষ্ট্রা
করাল মভ্যুগ্রং লম্বাস্যং কাল সন্নি-
ভং ॥ পীতবাসং মহাহস্তং রক্তগ-
ন্ধানুলেপনং। রক্তমালা কৃতাভূ
ষং গদাহস্তং ভযঙ্করং ॥ এবং বিধং
মহাকাযং যমং পশ্যতি দুর্ম্মতিঃ।
তং দৃষ্ট্বা সমনুপ্রাপ্তং সর্ব্ব ধর্ম্ম বহিষ্কৃ
তং ॥ যমঃ পশ্যতি তং দুষ্টং পাপি
ষ্ঠং ধর্ম্মকণ্টকং। শাস্তযেত্তু মহাদুঃ
খৈঃ পীড়াভি র্দারুণৈর্ন্নরৈঃ ॥ যাব-
দ্যুগ সহস্রান্তং তাবৎ কালং প্রপচ্য-
তে। নানা নরক দেশেষু পচ্যতে চ
পুনঃ পুনঃ ॥ নরকস্থ স্তু যাত্যেবং
কৃমি কীটেষু পাপকৃৎ। অমেধ্যে
পচ্যতে নিত্যং হাহা ভূতো বিচে
তনঃ ॥ মরণঞ্চৈব পাপাত্মা এবং
যাতি সুনিশ্চিতং। এবং পাপিষ্য
সম্ভোগং ভুক্তৈব সুদুর্ম্মতিঃ ॥ পুন
র্জন্ম প্রবক্ষ্যামি যাসু যোনিষু জা-
তিষু। খযোনিং সমনুপ্রাপ্য ভুঙ্ক্তে
পাতকং পুনঃ ॥ ব্যাঘ্রো ভবতি দু-
ষ্টাত্মা রাসভং যাতি বৈ পুনঃ। মা-
র্জার শৌকরীং যোনিং সর্পযোনি
স্তথৈব চ ॥ নানা ভেদাসু সর্ব্বাসু
তির্য্যক্‌সু চ পুনঃ পুনঃ। পাপ প-
ক্ষিষু সংযাতি অন্যাসু গর্হিতাসু চ
॥ চাণ্ডাল ভিল্ল জাতিঞ্চ পুলিন্দীং
যাতি পাপকৃৎ। এতত্তে সর্ব্বমা-
খ্যাতং পাপিনাং জন্ম চৈব হি ॥
পাপ পুণ্য সমাচার স্তদগ্রে কথিতো
মযা। ইতি পাদ্মে ভূমিখণ্ডে সুম-
নোপাখ্যানে পাপ পুণ্য বিবেকো-
নাম ১৭ অধ্যাযঃ ॥ * ॥ শাল
গ্রাম শিলা স্পর্শে মরণ ফলং যথা।
রাজান ঊচুঃ। যুবাং নারাযণস্যাস্য-
কল্কেঃ শ্বশুরত্তাং গতৌ। বযং নৃপা

ইমে লোকা ঋষযো ব্রাহ্মণাশ্চ যে ॥ প্রেক্ষ্য ভক্তি বিতানং বা হরৌ বিস্মিত মানসাঃ। পৃচ্ছাম স্ত্বা মিথং ভক্তিঃ ক্ব লব্ধা পরমাত্মনঃ ॥ কস্য বা শিক্ষিতা রাজন্ কিং বা নৈসর্গিকী তব। শ্রোতুমিচ্ছামহে রাজন্ ত্রিজগজ্জন পাবনীং ॥ কথাং ভাগবতীং ত্বত্তঃ সংসারাশুভ নাশিনীং। শশিধ্বজ উবাচ। স্ত্রী পুংসো রাবযো র্যুযং শৃণুতামোঘ বিক্রমাঃ। বৃত্তং যজ্জন্ম কর্মাদি স্মৃতিং তদ্ভক্তি লক্ষণাং ॥ পুরা যুগ সহস্রান্তে গৃধ্রো হ্যহং পূতিমাংসভুক। গৃধ্রীযং মে প্রিযারণ্যে কৃতনীডৌ বনস্পতৌ ॥ চকার কামং সর্ব্বত্র বনোপবন সংকুলে। মৃতানাং পূতিপললৈঃ প্রাণিনাং বৃত্তি কল্পকৌ॥একদা লুব্ধকঃ ক্রুরো লুলোভ পিশিতাশিনৌ। আবাং বীক্ষ্য গৃহে পুষ্টপশুং তত্রাপ্যযোজবৎ॥ তং বীক্ষ্য জাত বিশ্বাস্তৌ ক্ষুধযা পরিপীডিতৌ। স্ত্রী পুংসৌ পতিতৌ তত্র মাংস শোণিত চেতসৌ ॥ বদ্ধাবাবাং বীক্ষ্য শিচা হর্ষাদাগত্য লুব্ধকঃ। জগ্রাহ কণ্ঠে তরসা চঞ্চুঘাত পীডিতঃ ॥ আবাং গৃহীত্বা গণ্ডক্যাঃ শিলাযাং সলিলান্তিকে। মস্তিষ্কং চূর্ণযামাস লুব্ধকঃ পিশিতাশনঃ ॥ চক্রাঙ্কিত শিলাঃ সদ্যা মরণাদপি তৎক্ষণাৎ। জ্যোতির্ম্মর্য বিমানেন সদ্যো ভূত্বা চতুর্ভুজৌ ॥ প্রাপ্তৌ বৈকুণ্ঠ নিলযং সর্ব্বলোক নমস্কৃতং। ততঃ স্থিত্বা যুগশতং ব্রহ্মণো লোক মাগতৌ ॥ ব্রহ্মলোকে পঞ্চশতং যুগানা মুপভুজ্য বৈ। দেবলোকে কালবশাদ্গতং যুগ চতুঃশতং ॥ ততো ভুবি নৃপা স্তাবৎ বদ্ধ সুনু রহং স্মরন্। হরে রনুগ্রহং লোকে শালগ্রাম শিলাশ্রযং॥ জাতিস্মরত্বং গণ্ডক্যাঃ কিং তস্যাঃ কথযাম্যহং। যজ্জল স্পর্শমাত্রেণ মাহাত্ম্যং মহদদ্ভুতং ॥ চক্রাঙ্কিতশিলাস্পর্শ মরণস্যেদৃশং ফলং। ন জানে বাসুদেবস্য সেবযা কিং ভবিষ্যতি ॥ ইতি কল্কিপুরাণে২৫ অধ্যাযঃ॥*॥ মরণজনক বস্তুনি যথা। অগ্নি রাপঃ স্ত্রিযো মূর্খঃ সর্পা রাজকুলানি চ। নিত্যং পরোপসেব্যানি সদ্যঃ প্রাণহরাণি ষট্ ॥ ইতি গারুড়ে ১১৪ অধ্যাযঃ ॥

মরুতঃ পুং মরণং। ইত্যাদিকোষঃ॥

মরন্দঃ ⎫ পুং মকরন্দঃ। ইতি শব্দ-
মরন্দকঃ ⎭ রত্নাবলী॥

মরাকালী স্ত্রী বৃশ্চিকালী। বিছাটী

ইতি ভাষা। ইতি রত্নমালা ॥

মরারঃ পুং শস্যরক্ষণস্থানং। মরাই ইতি ভাষা। ইতি জটাধরঃ ॥

মরালঃ পুং রাজহংসঃ। ইতি জটাধরঃ ॥ কজ্জলং ॥ কারণ্ডবঃ ॥ তুরঙ্গমঃ ॥ বারিবাহঃ ॥ দাড়িমীবিপিনং ॥ খলঃ। ইতি সারস্বতঃ ॥ মসৃণে ত্রি। ইতি ত্রিকাণ্ডশেষঃ ॥

মরালকঃ পুং কলহংসঃ। ইতি রাজনির্ঘণ্টঃ ॥

মরিচং ক্লী কক্কোলকং ॥ স্বনামখ্যাত বর্ত্তুলাকার কটুদ্রব্যবিশেষঃ। তৎপর্য্যায়ঃ। পবিতং ২ শ্যামং ৩ কোলং ৪ বল্লীজং ৫ ঊষণং ৬ যবনেষ্টং ৭ বৃত্তফলং ৮ শাকাঙ্গং ৯ ধর্ম্মপত্তনং ১০ কটুকং ১১ শিরোবৃত্তং ১২ বীরং ১৩ কফবিরোধি ১৪ মূষং ১৫ সর্ব্বহিতং ১৬ কৃষ্ণং ১৭ বেল্লজং ১৮। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। লঘুত্বং। শ্লেষ্ম বিনাশনত্বং। শমীর কৃমি হৃদ্রোগ হরত্বং। রুচি কারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। মরিচং বেল্লজং কৃষ্ণ মূষণং ধর্ম্মপত্তনং। মরিচং কটুকং তীক্ষ্ণং দীপনং কফ বাতজিৎ ॥ উষ্ণং পিত্তহরং রূক্ষং শ্বাস শূল কৃমীন্ হরেৎ। তদার্দ্রং মধুরং পাকে নাত্যুষ্ণং কটুকং গুরু ॥ কিঞ্চিত্তীক্ষ্ণ গুণং শ্লেষ্মপ্রসেকি স্যাদপিত্তলং। ইতি ভাবপ্রকাশঃ ॥

মরিচঃ পুং মরুবরক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মরিচপত্রকঃ পুং সরলবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মরিমা পুং মৃত্যুঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

মরীচং ক্লী স্বনামখ্যাতকটুদ্রব্যবিশেষঃ। তৎপর্য্যায়ঃ। বেল্লজং ২ কোলকং ৩ কৃষ্ণং ৪ ঊষণং ৫ ধর্ম্মপত্তনং ৬। ইত্যমরঃ ॥ মরিচং ৭ শ্যামং ৮ বরিষ্ঠং। ইতি জটাধরঃ ॥ আর্দ্রস্য তস্য গুণাঃ। পাকে স্বাদুত্বং। গুরুত্বং। শ্লেষ্মপ্রসেকিত্বঞ্চ ॥ শুষ্কস্য তস্য গুণাঃ। রুচ্যত্বং। অগ্নিদত্বং। রুক্ষত্বং। কটুত্বং। উষ্ণত্বং। লঘুত্বং। শুক্রনাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥ অন্যৎ মরিচশব্দে দ্রষ্টব্যং ॥

মরীচিঃ পুং মুনিবিশেষঃ। সতু ব্রহ্মণোজ্যেষ্ঠমানসপুত্রঃ। অস্য ভার্য্যা কর্দমমুনিকন্যা কলা। পুত্রঃ কশ্যপঃ পূর্ণিমাসশ্চ। ইতি শ্রীভাগবতমতং ॥ কৃপণঃ। ইতি হেমচন্দ্রঃ ॥

মরীচিঃ পুং স্ত্রী কিরণঃ। ইত্যমরঃ ॥

ষট্‌ত্রসরেণুপরিমাণং। ইতিবৈদ্যক পরিভাষা ॥

মরীচিকা স্ত্রী মৃগতৃষ্ণা। ইত্যমরঃ ॥ মরীচি রিব মরীচিকা স্বার্থে সংঘে ইত্যাদিনা ইবার্থে কঃ। গ্রীষ্মে মরুদেশসিকতাদাবর্ককরাঃ প্রতিফলিতাঃ দূরস্থানাং জলভ্রেনা ভান্তি তন্মরীচিকা মৃগতৃষ্ণেতি টীকাকারঃ। উৎকট রবি রশ্মি জন্য ক্ষিতি বাষ্প জালং মরীচিকা। দূরশূন্যে যন্মুখে জল মিব দৃশ্যতে ইত্যপরে। ইতি ভরতঃ ॥

মরুঃ পুং পর্ব্বতঃ ॥ নির্জ্জলদেশঃ। তৎপর্য্যায়ঃ। ধন্বা ২। ইত্যমরঃ ॥ দশেরকদেশঃ। যথা। শাল্বাস্তু কারঙ্গক্ষীযা মরবস্তু দশেরকাঃ। ইতি হেমচন্দ্রঃ ॥ মরুবকবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥ সূর্য্যবংশীয় ভাবি রাজবিশেষঃ। তস্য বিবরণং যথা। রামাৎ ক্ষশো ঽভূদতিথি স্ততো ঽভূন্নিষধাম্ভঃ। তস্মাদভূত পুণ্ডরীকঃ ক্ষেমধন্বা ভবত্ততঃ। দেবানীক স্ততো হীনঃ পারিপাত্রো ঽথ হীনতঃ। বলাহক স্ততো ঽর্কশ্চ রজনাভ স্ততো ঽভবৎ ॥ খগণাদ্বিধৃত স্তস্মাদ্ধিরণ্যনাভ সংজ্ঞিতঃ। ততঃ পুষ্যার্ণব স্তস্মান্মুদ্‌গলো ঽথাগ্নিবর্ণকঃ ॥ তস্মাৎ শীঘ্রো ঽভবৎ পুত্রঃ পিতা মে ঽতুলবিক্রমঃ। তস্মাৎ মরুং মাং কেপীহ বুধ্যস্বাপি সুমিত্রকং। কল্পাপ গ্রাম মাসাদ্য বিদ্ধি সত্তপসি স্থিতং। তবাবতারং বিজ্ঞায় ব্যাসাৎ সত্যবতী সুতাৎ। প্রতীক্ষ্য কালং লক্ষাব্দং কালপ্রাপ্ত স্তবান্তিকং ॥ কল্কিরুবাচ। মরো ত্বা মভিষেক্ষ্যামি নিজাযোধ্যাপুরে ঽধুনা। হত্বা ম্লেচ্ছানধর্ম্মিষ্ঠান্ প্রজা ভূত বিহিংসকান্ ॥ বিশাখযূপ ভূপাল স্তনযাং বিনযান্বিতাং। বিবাহে রুচিরাপাঙ্গীং সুন্দরীং ত্বাং প্রদাস্যতি ॥ ইতি কল্কিপুরাণে ১৮ অধ্যায়ঃ ॥

মরুজঃ পুং নখীনামগন্ধদ্রব্যং। ইতি শব্দচন্দ্রিকা ॥ মরুদেশজাতে ত্রি ॥

মরুজা স্ত্রী মৃগেৰ্বারুঃ। ইতি রাজনিঘণ্টঃ ॥

মরুটা স্ত্রী উচ্চললাটযুক্তস্ত্রী। ইতি শব্দরত্নাবলী ॥

মরুণ্ডা স্ত্রী উচ্চললাটানারী। ইতি ত্রিকাণ্ডশেষঃ ॥

মরুতঃ পুং বায়ুঃ ॥ দেবঃ। ইতি ভরত ধৃত ব্যাড়িঃ ॥ ঘণ্টাপাটলিবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

মরুৎ পুং বায়ুঃ। ইত্যমরঃ ॥ মরু-

বকঃ। ইতি ভাবপ্রকাশঃ ॥ দেবঃ ॥ গ্রন্থিপর্ণে ক্লী। ইতি মেদিনী ॥ পৃক্কায়াং স্ত্রী। ইতি শব্দরত্নাবলী ॥

মরুৎকরঃ পুং রাজমাষঃ। ইতি শব্দচন্দ্রিকা ॥

মরুৎক্রিয়া স্ত্রী অপানোৎসর্গঃ। বাতকর্ম্ম ইতি খ্যাতঃ। ইতিকেচিৎ॥

মরুত্তঃ পুং চন্দ্রবংশীয়রাজবিশেষঃ। স চ অবীক্ষিদ্রাজপুত্রঃ। যথা ক্রোষ্টুকিরুবাচ। আবীক্ষিতস্য নৃপতে মরুত্তস্য মহাত্মনঃ। শ্রোতুমিচ্ছামি চরিতং শ্রূয়তে সো হতিচেষ্টিতঃ ॥ চক্রবর্ত্তী মহাভাগঃ শূরঃ ক্ষান্তো মহামতিঃ। ধর্ম্মবিদ্ধর্ম্মকৃচ্চৈব সম্যক্ পালয়িতা ভবঃ॥ মার্কণ্ডেয় উবাচ। স পিত্রা সমনুজ্ঞাতো রাজ্যং প্রাপ্য পিতামহাৎ। ধর্ম্মতঃ পালয়ামাস প্রজাঃ পুত্রানিবৌরসান্॥ ইযাজ সুমহাযজ্ঞান্ যথাবৎ প্রাজ্যদক্ষিণান্। ঋত্বিক্ পুরোহিতাদেশাদনির্ব্বিণ্ণো মহীপতিঃ॥ তস্যাপ্রতিহতং চক্রমাসীদ্দ্বীপেষু সপ্তসু। গতয়শ্চাপ্যবিচ্ছিন্নাঃ স্বঃপাতালজলাদিষু ॥ ইত্যাদি মার্কণ্ডেয়পুরাণং ॥

মরুত্তকঃ পুং মরুবকঃ। ইতি ভাবপ্রকাশঃ ॥

মরুৎপথঃ পুং আকাশং। ইতি হেমচন্দ্রঃ ॥

মরুৎপালঃ পুং ইন্দ্রঃ। ইতি কেচিৎ ॥

মরুৎপুত্রঃ পুং ভীমসেনঃ। ইতি হেমচন্দ্রঃ॥ হনুমাংশ্চ ॥

মরুৎপ্লবঃ পুং সিংহঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মরুৎফলং ক্লী ঘনোপলঃ। ইতি শব্দমালা ॥

মরুত্বান্ পুং ইন্দ্রঃ। ইত্যমরঃ ॥ হনুমান্। ইতি শব্দরত্নাবলী ॥

মরুৎসখঃ পুং ইন্দ্রঃ। ইতি ধরণিঃ ॥ অগ্নিঃ। বায়ুসখ ইত্যমরদর্শনাৎ ॥

মরুদান্দোলঃ পুং ধবিত্রং। ইতি শব্দমালা ॥

মরুদিষ্টঃ পুং গুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মরুদ্ধ্বজং ক্লী বাততূলং। বুড়ীরসুতা ইতি ভাষা। যথা। গ্রীষ্মহাসং বংশকফং বাততূলং মরুদ্ধ্বজং। ইতি হারাবলী ॥

মরুদ্ভবা স্ত্রী তাম্রমূলাক্ষুপঃ। খিরাই ইতি ভাষা। ইতি রত্নমালা ॥

মরুদ্রথঃ পুং অশ্বঃ। ইতি ত্রিকাণ্ডশেষঃ॥ দেবরথঃ। ইতিহেমচন্দ্রঃ॥

মরুদ্রুমঃ পুং বিট্খদিরঃ। ইতি রত্ন-

মালা ॥

মরুদ্বর্ত্ম ক্লী আকাশং। ইতি ত্রিকাণ্ডশেষঃ ॥

মরুদ্বাহঃ পুং ধূমঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অগ্নিঃ। ইতি শব্দমালা ॥

মরুদ্বিপঃ পুং উষ্ট্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মরুন্মালা স্ত্রী পৃক্কা। পিড়িংশাক ইতি ভাষা। ইত্যমরঃ ॥

মরুপ্রিয়ঃ পুং উষ্ট্রঃ। ইতি হেমচন্দ্রঃ ॥

মরুভূঃ স্ত্রী মারোয়ারদেশঃ। মারওয়ার ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ নির্জলভূমিশ্চ ॥

মরুভূরুহঃ পুং করীরবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥ মরুভূমিজাতে ত্রি ॥

মরুলঃ পুং কারণ্ডবপক্ষী। ইতি হেমচন্দ্রঃ ॥

মরুবঃ পুং বৃক্ষবিশেষঃ। মরুআ ইতি নাগদানা ইতিচ ভাষা। তৎপর্য্যায়ঃ। খরপত্রঃ ২ গন্ধপত্রঃ ৩ ফণিজ্ঝকঃ ৪ বহুবীর্য্যঃ ৫ শীতলকঃ ৬ সুরাহ্বঃ ৭ সমীরণঃ ৮ জম্বীরঃ ৯ প্রস্থকুসুমঃ ১০ মরুবকঃ ১১ আজন্মসুরভিপত্রঃ ১২ মরিচঃ ১৩। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। কৃমি কুষ্ঠ বিড়ন্ধাধ্মান শূল নান্দ্য জ্বগ্দোষ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। মরুত্তকো মরুবকো মরুন্মরুরপি স্মৃতঃ। ফণী ফণিজ্ঝক শ্চাপি প্রস্থপুষ্পঃ সমীরণঃ ॥ মরুবোগ্নিপ্রদো হৃদ্যস্তিক্তোষ্ণঃ পিত্তলো লঘুঃ। বৃশ্চিকাদি বিষ শ্লেষ্ম বাত কুষ্ঠ কৃমি প্রণুৎ ॥ কটুপাক রসো রুচ্য স্তিক্তো রুক্ষঃ সুগন্ধিকঃ। ইতি ভাবপ্রকাশঃ ॥

মরুবকঃ পুং কণ্টকিবৃক্ষবিশেষঃ। ময়না ইতি ভাষা। তৎপর্য্যায়ঃ। পিণ্ডীতকঃ ২ শ্বসনঃ ৩ করহাটকঃ ৪ শল্যঃ ৫ মদনঃ ৬ ॥ স্বল্পপত্রতুলসী। তৎপর্য্যায়ঃ। সমীরণঃ ২ প্রস্থপুষ্পঃ ৩ ফণিজ্ঝকঃ ৪ জম্বীরঃ ৫। ইত্যমরঃ ॥ জম্বীরভেদঃ। ইতি তট্টীকায়াং ভরতঃ ॥ পুষ্পবৃক্ষবিশেষঃ। মরুয়াফুল ইতি ভাষা। তৎপর্য্যায়ঃ। শুক্লপুষ্পঃ ২ তিলকঃ ৩ কুলকঃ ৪ ॥ ক্ষুপবিশেষঃ। নাগদানা ইতি ভাষা। তৎপর্য্যায়ঃ। খরপত্রঃ ২ গন্ধপত্রঃ ৩। ইতি রত্নমালা ॥ ব্যাঘ্রঃ ॥ রাহুঃ ॥ ভল্লানকঃ ॥ ইতি জটাধরঃ ॥

মরুসম্ভবং ক্লী চাণক্যমূলকং। ইতি রাজনির্ঘণ্টঃ ॥

মরুসম্ভবা স্ত্রী মহেন্দ্রবারুণী ॥ ক্ষুদ্র-

দুরালভা। ইতি রাজনির্ঘণ্টঃ ॥

মরুস্থা স্ত্রী ক্ষুদ্রদুরালভা। ইতি রাজনির্ঘণ্টঃ ॥

মরুকঃ পুং মৃগবিশেষঃ। ইত্যুণাদিকোষঃ ॥ ময়ূরঃ ॥ শটী। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মরুদ্ভবা স্ত্রী কার্পাসী ॥ যবাসঃ ॥ ক্ষুদ্রখদিরঃ। ইতি রাজনির্ঘণ্টঃ ॥

মরোলিঃ পুং মকরঃ। যথা। জলরূপস্তু মকরো মরোলি রসিদংষ্ট্রকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মরোলিকঃ পুং মকরঃ। ইতি শব্দরত্নাবলী ॥

মর্ক সর্পে। সৌত্রধাতুরয়ং। ইতি কবিকল্পদ্রুমঃ ॥ মর্কটঃ। ইতি দুর্গাদাসঃ ॥

মর্কঃ পুং দেহঃ ॥ বায়ুঃ। ইত্যুণাদিকোষঃ ॥ বানরঃ। ইতি শব্দরত্নাবলী ॥

মর্ককঃ পুং গলগণ্ডপক্ষী। হাড়গিল ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

মর্কটঃ পুং বানরঃ। ইত্যমরঃ ॥ ঊর্ণনাভঃ ॥ স্থাবরবিষভেদঃ। ইতি হেমচন্দ্রঃ ॥ গলেগণ্ডপক্ষী। হাড়গিল ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

মর্কটকঃ পুং শস্যভেদঃ ॥ বানরঃ ॥ লূতা। ইতি মেদিনী ॥ মৎস্যভেদঃ ॥ দৈত্যঃ। ইতি শব্দরত্নাবলী ॥

মর্কটতিন্দুকঃ পুং কুপীলুঃ। ইতি ভাবপ্রকাশঃ ॥

মর্কটপিপ্পলী স্ত্রী অপামার্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

মর্কটপ্রিয়ঃ পুং ক্ষীরবৃক্ষঃ। ইতি শব্দমালা ॥

মর্কটবাসঃ পুং লতাতন্তুঃ। মাকড়শারজাল ইতি ভাষা। তৎপর্য্যায়ঃ। আশাবন্ধঃ ২। ইতি শব্দরত্নাবলী ॥

মর্কটশীর্ষং ক্লী হিঙ্গুলং। ইতি রত্নমালা ॥

মর্কটাস্যং ক্লী তাম্রং। ইতি হেমচন্দ্রঃ ॥ বানরমুখং তদ্বতি ত্রি ॥

মর্কটী স্ত্রী কপিকচ্ছুঃ ॥ অপামার্গঃ ॥ অজমোদা। ইতি রাজনির্ঘণ্টঃ ॥ করঞ্জভেদঃ। মাকড়াকরঞ্জা ইতি ভাষা। ইত্যমরঃ ॥ বানরী চ ॥

মর্কটেন্দুঃ পুং কাকতিন্দুকবৃক্ষঃ। যথা। কাকেন্দুঃ কুলকঃ কাকপীলুকঃ কাকতিন্দুকে। মর্কটেন্দুঃ সিক্তপুত্রো দ্বাবেতৌ তত্র কীর্ত্তিতৌ ॥ ইতি শব্দচন্দ্রিকা ॥

মর্করঃ পুং ভৃঙ্গরাজঃ। ইতি শব্দ-

রত্নাবলী ॥

মর্করা স্ত্রী দরী ॥ ভাণ্ডং ॥ সুরঙ্গা ॥ নিষ্ফলাস্ত্রী । ইতি বিশ্বঃ ॥

মর্ট ক গুহে । সৌত্রো হয়ং ধাতুঃ । ইতি কবিকল্পদ্রুমঃ ॥ তালব্যবর্গপ্রথমান্তঃ । মর্কঃ । ইতি দুর্গাদাসঃ ॥

মৃজুঃ স্ত্রী শুদ্ধিঃ । ইতি মেদিনী ।

মর্জুঃ পুং রজকঃ । ইতি হেমচন্দ্রঃ ॥ পীঠনর্দ্দঃ । ইতি শব্দরত্নাবলী ॥

মর্ত্তঃ পুং মনুষ্যঃ । ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥ মাণবকঃ । ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মর্ত্ত্যঃ পুং মনুষ্যঃ । ইত্যমরঃ ॥ মধ্যমলোকঃ । ইতি জটাধরঃ ॥

মর্দ্দনং ক্লী অঙ্গমর্দ্দনং । গাচাপা ইতি ভাষা । তৎপর্য্যায়ঃ । সম্বাহনং ২ । ইত্যমরঃ ॥ সম্বলং ৩ । ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ । ভ্রমহরত্বং । নিদ্রা শুক্র সুখপ্রদত্বং । মাংস রক্ত ত্বক্ প্রসন্নকারিত্বং । বায়ু কফ নাশিত্বঞ্চ । ইতি রাজবল্লভঃ ॥ চূর্ণনং । ইতি মৃদ ধাত্বর্থ দর্শনাৎ ॥

মর্দ্দলঃ পুং বাদ্যবিশেষঃ । মাদল ইতি ভাষা । ইত্যমরঃ ॥ তৎপর্য্যায়ঃ । মুরজঃ ২ । ইতি শব্দরত্নাবলী ॥

মর্দ্দিতং ত্রি গুম্ফিতং । ইতি বিশেষ্যনিঘ্নবর্গটীকায়াং ভরতঃ ॥ চূর্ণিতং । যথা । তিন্তিড়ীফলরসেন মর্দ্দিতো রামবাণ ইতি বিশ্রুতো রসঃ । ইতি ভাবপ্রকাশঃ ॥

মর্ব্ব গত্যাং । ইতি কবিকল্পদ্রুমঃ ॥ মর্ব্বতি । ইতি দুর্গাদাসঃ ॥

মর্ম্ম ক্লী স্বরূপং । তত্ত্বং । যথা । মৃগয়া ন বিগীয়তে নৃপৈ রপি ধর্ম্মাগম মর্ম্ম পারগৈঃ । স্মর সুন্দর মাং যদত্যজ স্তব ধর্ম্মঃ সদয়োদয়োজ্জ্বলঃ ॥ ইতি নৈষধীয় দ্বিতীয়সর্গ শ্লোক ব্যাখ্যানে ভরতঃ ॥ সন্ধিস্থানং । ইতি লিঙ্গাদিসংগ্রহে অমর ভরতৌ ॥ জীবস্থানং । ইতি রাজনির্ঘণ্টঃ ॥ * ॥ অথ মর্ম্মাণি । সন্নিপাতঃ সিরা স্নায়ু সন্ধি মাংসাস্থি সম্ভবঃ । মর্ম্মাণি তেষু তিষ্ঠন্তি প্রাণাঃ খলু বিশেষতঃ ॥ সপ্তোত্তরং শতং সন্তি দেহে মর্ম্মাণি দেহিনাং । তান্যেকাদশ মাংসে স্যু রষ্টাবস্থিষু সন্তি হি ॥ সন্ধীনাং বিংশতি স্তানি স্নায়ূনাং সপ্তবিংশতিঃ । চত্বারিংশত্তথৈকঞ্চ সিরা মর্ম্মাণি তত্র তু ॥ * ॥ দ্বাবিংশতিঃ সক্থিযুগে তাবন্ত্যেব ভুজদ্বয়ে । দ্বাদশোরসি কক্ষৌ চ পৃষ্ঠদেশে চতুর্দ্দশ ॥ গ্রীবায়া ঊর্দ্ধ্বভাগে তু সপ্তত্রিংশন্মতানি হি । * । মর্ম্মাণি হতানি সন্তি পঞ্চধা ভবন্তি

। তান্যাহ । সদ্যঃ প্রাণ হরাণিস্যুর্ম্মাণ্যেকোনবিংশতিঃ । মর্ম্মদেশাস্ত্রবস্ত্রিংশৎ স্যুঃ কালান্তর মারকাঃ ॥ চত্বারিংশচ্চ চত্বারি বৈকল্যং জনযন্তি হি । নর্ম্মাষ্টকং রুজাকারি বিশল্যঘ্নং ত্রিকং মতং ॥ শৃঙ্গাটকান্যধিপতিঃ শঙ্খৌ কণ্ঠ সিরা গুদং । হৃদয়ং বস্তি নাভ্যৌ চ সদ্যো ঘ্নন্তি হতানি চেৎ ॥ ॥ শৃঙ্গাটকানি ঘ্রাণ শ্রোত্র জিহ্বা সন্তর্পকানাং সিরানুখানাং শিরসো মধ্যে সংযোগ স্থানং তানি চত্বারি সিরামর্ম্মাণি চতুরঙ্গুল প্রমাণানি হতানি সন্তি সদ্যোমারকানি । অধিপতিঃ মস্তকস্যাভ্যন্তরে সন্ধি সিরযোঃ সন্নিপাত উপরিষ্টাদ্রোমাবর্ত্তঃ স একঃ সন্ধি মর্ম্মেদং অর্দ্ধাঙ্গুল প্রমাণং সদ্যোমারকং । শঙ্খৌ ভ্রুবোরন্তোপরি কর্ণ ললাট মধ্যে তৌ দ্বৌ অস্থিমর্ম্মণী অর্দ্ধাঙ্গুলে সদ্যোমারকে । কণ্ঠ শিরাঃ মাতৃকাঃ গ্রীবায়া উভয়পার্শ্বয়োশ্চতস্রশ্চতস্রঃ শিরাস্তা অষ্টৌ শিরামর্ম্মাণি চতুরঙ্গুলানি সদ্যোমারকাণি । গুদং প্রসিদ্ধমেকং মাংস মর্ম্ম চতুরঙ্গুলং সদ্যোমারকং । হৃদয়ং স্তনয়োর্মধ্য মামাশয় দ্বারমেকং শিরামর্ম্ম চতুরঙ্গুলং সদ্যোমারকং । বস্তিঃ নাভি পৃষ্ঠ কটী মুষ্ক গুদ বঙ্ক্ষণ সেফসাং মধ্যে বস্তি স্তনুত্বক একদ্বারো হ্যধোমুখঃ স্নায়ুমর্ম্মেদং চতুরঙ্গুলং সদ্যোমারকং । নাভিঃ প্রসিদ্ধা সিরামর্ম্মেদং চতুরঙ্গুলং সদ্যোমারকং ॥ ॥ বক্ষোমর্ম্মাণি সীমন্তা স্তল ক্ষিপেন্দ্রবস্তয়ঃ । বৃহত্যৌ পার্শ্বজৌসন্ধা কটীকতরুণে চ যে ॥ নিতম্বাবিতি চৈতানি কালান্তরহরাণি তু । বক্ষোমর্ম্মাণি স্তনমূল স্তন রোহিত অপলাপাপস্তম্ভাঃ স্তনমূলে স্তনয়োরধস্তাদ্দ্ব্যঙ্গুলং যাবৎ দ্বে সিরামর্ম্মণী দ্ব্যঙ্গুলে কফপূর্ণকোষ্ঠতয়া কালান্তরমারকে । স্তনরোহিতে স্তনয়োরুপরি দ্ব্যঙ্গুলং যাবৎ দ্বে মাংস মর্ম্মণী রক্তপূরিতকোষ্ঠতয়া কালান্তরমারকে । অপলাপৌ অংশকূটয়োরধস্তাৎপার্শ্বয়োরুপরি দ্বৌ সিরামর্ম্মণী অর্দ্ধাঙ্গুলে রক্তেন পূযতাঙ্গতেন কালান্তরমারকে । অপস্তম্ভৌ উরস উভয়তো নাড্যৌ বাতবহে সিরামর্ম্মণী অর্দ্ধাঙ্গুলে বাতপূর্ণকোষ্ঠতয়া কাস শ্বাসাভ্যাঞ্চ কালান্তরমারকে । সীমন্তাঃ শিরসি পঞ্চ সন্ধয়ঃ সন্ধিমর্ম্মাণি চতুরঙ্গুলাঃ উন্মাদ ভয় চিত্ত বিনাশৈঃ কালান্তরমারকাঃ ।

তলানি মধ্যাঙ্গুলি মনুক্রম্য হস্ত মধ্যং তলং এব মুপরস্য হস্তস্য পাদযোশ্চ চত্বারি তলানি মাংসমর্মাণ্যর্দ্ধাঙ্গুলানি রুজাভিঃ কালান্তরমারকাণি। ক্ষিপ্রাণি অঙ্গুষ্ঠাঙ্গুল্যো র্মধ্যং ক্ষিপ্রং তচ্চ হস্তযোর্দ্বে পাদযো র্দ্বে এবঞ্চ ত্বারি স্নায়ুমর্মাণ্যর্দ্ধাঙ্গুলান্যাক্ষেপকেণ কালান্তরমারকাণি। ইন্দ্রবস্তঃ প্রকোষ্ঠযো মধ্যে দ্বৌ জঙ্ঘযো মধ্যে দ্বৌ এবং চত্বারো মাংসমর্মাণ্যর্দ্ধাঙ্গুলাঃ শোণিতক্ষয়েণ কালান্তরমারকাঃ। বৃহত্যৌ স্তনমূলাদুভযতঃ পৃষ্ঠবংশং যাবৎ সিরামর্মণী অর্দ্ধাঙ্গুলে শোণিতাতিপ্রবৃত্তি নিমিত্তে রূপদ্রবৈঃ কালান্তরমারকে। পার্শ্বসন্ধী জঘন পার্শ্বযোঃ সন্ধী সিরামর্মণী অর্দ্ধাঙ্গুলৌ শোণিত পূর্ণকোষ্ঠতযা কালান্তরমারকৌ। কটীকতরুণে ত্রিক সন্নিধানে উভযতঃ শ্রোণিকাণ্ডং লক্ষীকৃত্যাস্থিনী অস্থিমর্মণী অর্দ্ধাঙ্গুলে শোণিত ক্ষযাৎ পাণ্ডু বিবর্ণ রূপং কৃত্বা কালান্তর মারকে। নিতম্বৌ প্রসিদ্ধৌ দ্বৌ অস্থিমর্মণী অর্দ্ধাঙ্গুলাবধঃকাযশোষেণ দৌর্বল্যেন চ কালান্তরমারকৌ ॥*॥ লোহিতাক্ষাণি জানুর্বী কূর্চা বিটপ কূর্পরাঃ স্কন্দরে কক্ষধরে বিধুরে সকৃকাটিকে। অংসাংসফলকাপাঙ্গা নীলে মন্যে ফণে তথা। বৈকল্যকারকাণ্যাহু রাবর্ত্তৌ দ্বৌ তথৈব চ॥ লোহিতাক্ষাণি ঊর্ব্বোরূর্দ্ধ মধ্যে বঙ্ক্ষণ সন্ধে লোহিতাক্ষং তচ্চ দ্বে বাহ্বো। দ্বে ঊর্ব্বো রেবং তানি চত্বারি সিরা মর্মাণ্যর্দ্ধাঙ্গুলানি বৈকল্যকারকাণি তত্র শোণিত ক্ষযেণ পক্ষাঘাতঃ সক্থিসাদো বা। আণযঃ জানুন ঊর্দ্ধ মুভযোঃ পার্শ্বযো র্দ্ব্যঙ্গুলা একস্মিন্ জানুনি দ্বে অপরস্মিন্ দ্বে এবং চতস্রঃ স্নাযুমর্মাণ্যর্দ্ধাঙ্গুলা বৈকল্যকর্য্যঃ তত্র শোথাভিবৃদ্ধিঃ সক্থিস্তম্ভশ্চ। জানুনী জঙ্ঘোর্ব্বোঃ সন্ধী সন্ধিমর্মণী দ্ব্যঙ্গুলে বৈকল্যকরে তত্র খঞ্জতা। ঊর্ব্ব্যঃ দ্বে ঊর্ব্বোর্মধ্যে দ্বে প্রগণ্ডযো র্মধ্যে এবং চতস্রঃ সিরামর্মাণ্যেকাঙ্গুলা বৈকল্যকর্য্যঃ তত্র শোণিতক্ষযাৎ সক্থিশোষঃ। কূর্চাঃ পাদযো রঙ্গুষ্ঠাঙ্গুল্যো র্মধ্যে তযো রূর্দ্ধ মধশ্চ এবং চত্বারঃ স্নাযুমর্মাণি বৈকল্যকরা স্তত্র পাদযো ভ্রমণ বেপনে ভবতঃ। বিটপে দ্বে বঙ্ক্ষণ বৃষণযো র্মধ্যে স্নাযুমর্মণী একাঙ্গুলে বৈকল্যকরে তত্র ষাণ্ড্য মল্পশুক্রতা বা। কূর্পরৌ কফোণী তৌ দ্বৌ সন্ধিমর্মণী দ্ব্যঙ্গুলৌ বৈক-

ল্যকরৌ তত্র বাহুমধ্যে সঙ্কোচঃ। জঙ্ঘন্দরে নিতম্ব কূপকৌ দ্বৌ সন্ধিমর্ম্মণী অর্দ্ধাঙ্গুলে বৈকল্যকরে তত্র স্পর্শাজ্ঞান মধঃকাযে চেষ্টোপঘাতশ্চ। কক্ষধরে বক্ষঃ কক্ষযো র্মধ্যে দ্বে স্নাযুমর্ম্মণী একাঙ্গুলে বৈকল্যকরে তত্র পক্ষাঘাতঃ। বিধুরে কর্ণ পৃষ্ঠতোধঃ সংশ্রিতে কিঞ্চিন্নিম্নাকারে দ্বে স্নাযুমর্ম্মণী অর্দ্ধাঙ্গুলে বৈকল্যকরে তত্র বাধির্য্যং। কৃকাটিকে শিরে গ্রীবযো রুভযতঃ সন্ধী দ্বে সন্ধিমর্ম্মণী অর্দ্ধাঙ্গুলে বৈকল্যকরে তত্র শিরঃকম্পঃ। অংসৌ স্কন্ধৌ স্নাযুমর্ম্মণী অর্দ্ধাঙ্গুলৌ বৈকল্যকরৌ তত্র বাহুস্তম্ভঃ। অংসফলকে পৃষ্ঠোপরি পৃষ্ঠবংশ মুভযত স্ত্রিক সম্বন্ধে গ্রীবাযা অংসদ্বযস্য চ সংযোগো যত্র তত্রিকং অস্থিমর্ম্মণী অর্দ্ধাঙ্গুলে বৈকল্যকরে তত্র বাহ্বোঃ শূন্যতা শোষশ্চ। অপাঙ্গৌ নেত্রযো রন্তৌ সিরামর্ম্মণী অর্দ্ধাঙ্গুলৌ বৈকল্যকরৌ তত্রান্ধ্যং দৃষ্ট্যুপঘাতো বা। নীলে মন্যে চ কণ্ঠনাড়ী মুভযত শ্চতস্রো ধমন্যো দ্বে নীলে দ্বে মন্যে তত্র একা নীলা একা মন্যা একস্মিন্ পার্শ্বে মন্যা নীলা অপরস্মিন্ পার্শ্বে দ্বে দ্বে শিরামর্ম্মণী দ্ব্যঙ্গুলে দ্ব্যঙ্গুলে বৈকল্যকরে তত্র মূকতা বিকৃতস্বরতা রসাগ্রাহিতা চ। ফণে ঘ্রাণ মার্গ মুভযতঃ অভ্যন্তরে সিরামর্ম্মণী অর্দ্ধাঙ্গুলে বৈকল্যকরে, তত্র গন্ধাজ্ঞানং। আবর্ত্তৌ ভ্রুবোরুপরি নিম্নযোঃ সন্ধিমর্ম্মণী অর্দ্ধাঙ্গুলৌ বৈকল্যকরৌ তত্রাপ্যান্ধ্যং দৃষ্ট্যুপঘাতো বা॥ *॥ গুল্ফৌ দ্বৌ মণিবন্ধৌ দ্বৌ তথা কূর্চ্চশিরাংসি চ রুজাকরাণি জানীযাদষ্টাবেতানি বুদ্ধিমান্॥ গুল্ফৌ ঘুটিকে সন্ধিমর্ম্মণী দ্ব্যঙ্গুলৌ রুজাকরৌ তত্র রুজা পাদস্তম্ভঃ খঞ্জতা বা। মণিবন্ধৌ হস্তপ্রকোষ্ঠ সন্ধী সন্ধিমর্ম্মণী দ্ব্যঙ্গুলৌ রুজাকরৌ তত্র হস্তযোঃ ক্রিযা রাহিত্যং। কূর্চ্চশিরাংসি গুল্ফ সন্ধে রুভ উভযতঃ একস্মিন্ পাদে দ্বে দ্বে চ দ্বিতীযে এবং চত্বারি স্নাযু মর্ম্মাণ্যেকাঙ্গুলানি রুজাকরাণি তত্র রুজা শোফশ্চ॥*॥ উৎক্ষেপৌ স্থাপনী চৈব বিশল্যঘ্নং ত্রিকং মতং। উৎক্ষেপৌ শঙ্খযো রুপরি কেশান্ যাবৎ স্নাযুমর্ম্মণী অর্দ্ধাঙ্গুলৌ তযো র্বিদ্ধযোঃ সশল্যো জীবেৎপাকাৎপতিত শল্যো বাউদ্ধৃত শল্যস্তু ম্রিযেত অতএব বিশল্যমুদ্ধৃত শল্যং হন্তীতি বিশল্যঘ্নং মর্ম্ম। স্থাপনী একাভ্রুবো র্মধ্যে সিরামর্ম্মৈদ অর্দ্ধাঙ্গুলং বিশল্যঘ্নং। সপ্তত্রিং-

ক্ষরে হনুঃ সদ্যঃ প্রাণহরাণি হি। কালান্তর প্রাণহরং পক্ষে মাসে চ মারকং॥ সদ্যঃ প্রাণহরং চান্তে বিদ্ধং কালেন মারয়েৎ। কালান্তর প্রাণহর মন্তে বিদ্ধন্তু দুঃখদং॥ অন্তে মর্ম্মসমীপে। মর্ম্মাণ্যধিষ্ঠায হি যে বিকারা মূর্চ্ছন্তি কাযে বিবিধা নরাণাং। প্রায়েণ তে কৃচ্ছ্রতমা ভবন্তি বৈদ্যেন যত্নৈ রপি সাধ্যমানাঃ॥ ইতি ভাবপ্রকাশঃ॥ ❀॥ মর্ম্মস্পর্শনিষেধো যথা। পরক্ষেত্রে গাং চরন্তীং নচাচক্ষীত কস্যচিৎ। ন সংবসেৎ সূতকে চ ন কংবৈ মর্ম্ম ন স্পৃশেৎ॥ ইতি কূর্ম্মপুরাণে উপরিভাগে ১৫ অধ্যাযঃ॥

মর্ম্মকীলঃ পুং ভর্ত্তা। ইতি জটাধরঃ॥

মর্ম্মজ্ঞঃ ত্রি মর্ম্মবিৎ। তত্ত্বজ্ঞঃ। মর্ম্ম স্বরূপং সন্ধিস্থানং বা তজ্জানাতি যঃ সঃ॥

মর্ম্মরঃ পুং বস্ত্রস্য পর্ণস্য চ ধ্বনিঃ। মড়মড়শব্দ ইতি ভাষা। ইত্যমরঃ॥

মর্ম্মরী স্ত্রী পীতদারু। দারুহরিদ্রা ইতি খ্যাতা। ইতি মেদিনী॥

মর্ম্মরীকঃ পুং দীনঃ। ইত্যুণাদিকোষঃ॥

মর্ম্মবিৎ পুং মর্ম্মজ্ঞঃ। তৎপর্য্যাযঃ। কার্পটিকঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ মর্ম্মিকঃ ৩ মর্ম্মবেদী ৪। ইতি জটাধরঃ॥

মর্ম্মবেদী পুং মর্ম্মবিৎ। তত্ত্বজ্ঞঃ। ইতি জটাধরঃ॥

মর্ম্মস্পৃক্ ত্রি মর্ম্মপীডকঃ। তৎপর্য্যাযঃ। অরুন্তুদঃ ২। ইত্যমরঃ॥ ব্যথকঃ ৩। ইতি হেমচন্দ্রঃ॥

মর্ম্মাবিৎ } ত্রি সন্ধিস্থানবেধকর্ত্তা॥
মর্ম্মাবিদ্ } মর্ম্মজ্ঞঃ। যথা। চিরং ক্লিশিত্বা মর্ম্মাবিদ্যামো বিলভিত্তপল্লবং। শব্দাযমান মব্যাৎ সীদ্ভয়দং ফণাচরং॥ ইতি ভট্টিকাব্যে ৫ সর্গঃ॥ মর্ম্মাণি বিধ্যতীতি বিপ্ ক্বিঃ নীরুহো ধত্ত্বাবিতি দীর্ঘ নির্দ্দেশাৎ কৃচিৎ ক্বিবন্তে পূর্ব্বপদ দীর্ঘত্বং স্যাদিতি সূচিত্বং আড পূর্ব্বস্য রূপং বা মর্ম্মাবিৎ মর্ম্মজ্ঞো বা বেত্তে রূপং। ইতি তট্টীকাযাং ভরতঃ॥

মর্ম্মিকঃ ত্রি মর্ম্মবিৎ। ইতি জটাধরঃ॥

মর্য্যা ব্য সীমা। ইতি মর্য্যাদাশব্দটীকাযাং রাযমুকুটঃ॥

মর্য্যাদা স্ত্রী ন্যায্যপথস্থিতিঃ। তৎপর্য্যাযঃ। সংস্থা ২ ধারণা ৩ স্থিতিঃ ৪। ইত্যমরঃ॥ পর্য্যাদীযতে মর্য্যাদা পর্য্যাঙ পূর্ব্বাৎ দাঞো ডঃ নিপাতনাৎ পস্য মঃ। ইতি তট্টীকাযাং ভরতঃ॥ মর্য্যেতি সীমার্থে

অব্যয়ং তত্র দীয়তে মর্য্যাদেতি স্বা-নী। ইতি রায়মুকুটঃ ॥ নিবৃত্তে ত্রেতি মর্য্য তাং দদাতীতি মর্য্যাদা। ইতি সারসুন্দরী ॥ সীমা। ইতি জটাধরঃ ॥ কূলং। ইতি হেমচন্দ্রঃ ॥

মর্য্যাদকঃ ত্রি মর্য্যাদাকর্ত্তা। মর্য্যাদাং করোতীতি কর্ত্তরি ঢযেকাদিতি কণ্ প্রত্যযে কে হ্রকঃ স্বো হেতুবেতি আকারস্য হ্রস্বে নিয়মো হয়ং শব্দঃ ॥

মর্ব পুংভৌ ॥ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ মর্বতি পয়সা জন্তুং চেটী। ইতি দুর্গাদাসঃ ॥

মর্ষঃ পুং ক্ষান্তিঃ। মৃষধাতো র্ভাবে ঘঞ্ প্রত্যয়েন নিয়মঃ ॥

মর্ষণং ক্লী ক্ষমা। মৃষধাতো র্ভাবে অনট্ প্রত্যয়েন নিয়মং ॥

মর্ষিতঃ ত্রি ক্ষমাযুক্তঃ। ক্ষান্তিবিশিষ্টঃ। মৃষধাতোঃ কর্ত্তরি ক্ত প্রত্যয়েন নিয়মঃ ॥ ভাবে ক্তে ক্লী ॥

মর্ষিতবান্ ত্রি ক্ষান্তঃ। মৃষধাতোঃ কর্ত্তরি ক্তবতু প্রত্যয়েন নিয়মঃ ॥

মল ঙ ধৃতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঙ মলতে। ইতি দুর্গাদাসঃ ॥

মলঃ পুং ক্লী পাপং ॥ বিট্ ॥ কিট্টং। ইত্যমরঃ ॥ পাপং কিল্বিষং। বিষ্ঠা। কিট্টং কলঙ্কো মণ্ডুরাদি স্বেদাদিক এব মলঃ ॥ বসা শুক্রমসৃঙ্মজ্জা মূত্রং বিট্ কর্ণবিম্নখাঃ। শ্লেষ্মাশ্রু দূষিকা স্বেদো দ্বাদশৈতে নৃণাং মলাঃ ॥ ইতি স্মৃতিঃ ॥ ইতি তট্টীকায়াং ভরতঃ ॥ কর্পূরং। ইতি শব্দচন্দ্রিকা ॥ বাত পিত্ত কফাঃ। যথা। সর্ব্বেষা মেব রোগাণাং নিদানং কুপিতা মলাঃ। তৎ প্রকোপস্য তু প্রোক্তং বিবিধাহিত সেবনং ॥ ইতি মাধবকরঃ ॥

মলঘ্নঃ পুং শাল্মলীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥ মলনাশকে ত্রি ॥

মলঘ্নী স্ত্রী নাগদমনী। ইতি রাজনির্ঘণ্টঃ ॥

মলজং ক্লী পূযঃ। ইতি শব্দচন্দ্রিকা ॥ মলোদ্ভবে ত্রি ॥

মলদূষিতং ত্রি মলিনং। ইত্যমরঃ ॥

মলদ্রাবী পুং জয়পালঃ। ইতি রাজনির্ঘণ্টঃ ॥

মলনং ক্লী মর্দ্দনং। ইতি মেদিনী ॥

মলনঃ পুং পটবাসঃ। তাঁবু ইতি ভাষা। ইতি মেদিনী ॥

মলপূঃ স্ত্রী কাকোডুম্বরিকা। ইত্যমরঃ ॥

মলভুক্ পুং কাকঃ। ইতি শব্দরত্নাবলী ॥

মলভেদিনী স্ত্রী কটুকা। ইতি রাজ নির্ঘণ্টঃ ॥

মলমাসঃ পুং অধিকমাসঃ। তৎপর্য্যায়ঃ। মলিম্লুচঃ ২ অধিমাসঃ ৩ অসংক্রান্তমাসঃ ৪ নপুংসকঃ ৫। তস্য লক্ষণং যথা। রবিসংক্রান্ত্যভাববিশিষ্ট চান্দ্রমাসত্বং মলমাসত্বং। ইতি শুদ্ধিবিবেক টীকায়াং শ্রীকৃষ্ণতর্কালঙ্কারঃ ॥ অপিচ। জ্যোতিষে। অমাবস্যা দ্বয়ং যত্র রবিসংক্রান্তিবর্জ্জিতং। মলমাসঃ স বিজ্ঞেয়ো বিষ্ণুঃ স্বপিতি কর্কটে ॥ অমাবস্য দ্বয়ং অমাবস্যা দ্বয়ান্ত্যক্ষণদ্বয়ঃ। রবিসংক্রান্তিভ্যাং রবিক্রিয়োৎপত্তিব্যাপাভ্যাং সংযোগক্ষপাভ্যাং যথাক্রমং বর্জ্জিতং তেন দর্শদ্বয়ান্ত্য ক্ষণদ্বয় পূর্ব্বাপরয়োরেব রবেঃ ক্রিয়োৎপত্ত্যুত্তর সংযোগাভ্যাং যথা ক্রমং যোগেনাধিমাসঃ। সংক্রান্তেরেকক্ষণে ক্রিয়োৎপত্তিরপরক্ষণে পূর্ব্ব সংযোগ নাশঃ উত্তর সংযোগোৎপত্তিশ্চেতি ক্ষণদ্বয় বৃত্তিত্ব মিতি মীমাংসক সিদ্ধান্তাৎ ॥ গৃহ্য পরিশিষ্ট জ্যোতিঃ পরাশরৌ। রবিণা লঙ্ঘিতো মাস শ্চান্দ্রঃ খ্যাতো মলিম্লুচঃ। তত্র যদ্বিহিতং কর্ম্ম উত্তরে মাসি কারয়েৎ ॥ পরাশরঃ। পক্ষদ্বয়েপি সংক্রান্তি র্যদি নস্যাৎ সিতাসিতে। তদা তন্মাস বিহিত মুত্তরে মাসি কারয়েৎ ॥ অত্র লঙ্ঘন মসংক্রমণং রবে স্তদা ভবতি যদা তন্মাস তৎপূর্ব্বমাসান্ত্যক্ষণযোরেক রাশ্যবস্থিতস্য রবে স্তন্মাসানন্তর মেব রাশ্যন্তর সংযোগঃ নত্বেক রাশি স্থিতস্য মাসব্যাপন মাত্রং তথাত্বে চতুর্দ্দশ্যা মেকরাশৌ সংক্রান্তস্য প্রতিপৎ প্রথমক্ষণে ২পর রাশৌ তৎপর রাশৌচ দ্বিতীয়ায়াং প্রতিপদি বা রবেঃ সংযোগে ২পরস্যাপি মলমাসতা স্যাৎ অতএব জ্যোতিষে। অমাবাস্যা পরিচ্ছিন্নং রবিসংক্রান্তি বর্জ্জিতং। মলমাসং বিজানীয়াদ্গর্হিতং সর্ব্বকর্ম্মসু ॥ তস্যার্কো দর্শক শ্চৈক রাশৌ দর্শদ্বয়াতিগঃ। অত্রৈক রাশিস্থার্কস্য দর্শ দ্বয়াতিগত্ব মুক্তং। এতচ্চ পূর্ব্বোপদর্শিতয়ো র্মাসযোঃ পূর্ব্বস্যৈব সম্ভবতি ন পরস্য ॥ ৯ ॥ মলমাস কারণন্তু জ্যোতিষে। দিবসস্য হরত্যর্কঃ ষষ্টিভাগ মৃতৌ ততঃ। করোত্যেক মহশ্ছেদং তথৈবৈকঞ্চ চন্দ্রমাঃ ॥ এবং মর্দ্ধ তৃতীয়ানা মব্দানা মধিমাসকং। গ্রীষ্মে জনয়তঃ পূর্ব্বং প

ঋাদ্বান্তে তু পশ্চিমং ॥ তেন দিন সস্য তিথেঃ ষষ্টিভাগং দণ্ডমেকং রবি হরতি ছেদযতি উত্তরে ছেদ মিত্যভিধানাৎ । ততশ্চ ঋতৌ য়াঃ সম্বধে ষষ্টিনাড়ী ছেদাদহস্তিথে শ্চেদ মাকর্ষাং করোতি । এবং চন্দ্রোপি । এবমুক্ত ক্রমেণ বর্ষে দ্বাদশ তিথ্যাত্মক কালা কর্ষাদদ্ধ ততীয়াণাং মন্দানা মন্তে অর্দ্ধং তৃতীয়ং যেবাং তে তথা গ্রীষ্মে মাধবাদি ষট্কে পূর্বং মাধবাদি ত্রিক পতিতং পঞ্চাদ্বান্তে তু পশ্চিমং শ্রাবণাদি ত্রিক পতিতং মলমাসং চন্দ্রার্কৌ জনযতঃ । গ্রীষ্মে মাধবাদি ষট্কে ইতি যদুক্তং তদ্ব্যক্ত মাহ নিহিরঃ । মাধবাদিষু ষট্কেষু মাসি দর্শ দ্বযং যদা । দ্বিরাষাঢঃ স বিজ্ঞেযঃ শেতে তু শ্রাবণে হচ্যুতঃ ॥ দ্বিরাষাঢো দ্বিরাষাঢাদিঃ । শ্রাবণে সৌরশ্রাবণে । তথা চ জ্যোতিষে । মিথুনস্থো যদা ভানুরমাবস্যা দ্বযং স্পৃশেৎ । দ্বিরাষাঢঃ স বিজ্ঞেযো বিষ্ণুঃ স্বপিতি কর্কটে । অমাবস্যা দ্বযং তদন্ত্য ক্ষণ দ্বযং স্পৃশেৎ সংযুঞ্জ্যাৎ ন তন্মধ্যে রাশ্যন্তর সংযোগ ইত্যর্থঃ ॥ * ॥ ননু কর্কটাদি ত্রিকে অধিমাস পাতে তৎ পূর্বং মিথুন এব হরিশযনং তৎ কথং মাধবাদি ষট্ক মাত্রে কর্কটে তৎ । তত্রাহ রাজমার্ত্তণ্ডঃ । কন্যা সিংহ কুলীরেষু যদা দর্শ দ্বযং ভবেৎ । আগামিনি তদা বর্ষে কুলীরে শ্যামকঃ স্বপেৎ ॥ মাধবাদিত্রিক শ্রাবণাদি ত্রিকাধিমাস বিবেচন মপেত্যতদর্থং । ইদন্তু সার্দ্ধবর্ষ দ্বযাধি মাস পাত মৌচিত্য ক্রমাদুক্তং কচিত্তিথীনাং হ্রাস বাহুল্যেন দণ্ডষষ্ট্যধিক ন্যূন দর্শনাদুক্ত কাল ন্যূনাধিক কালেপি মলমাসো ভবতীতি সমযপ্রকাশকৃৎ । বস্তুতস্তু বৈপরীত্যং যতো ন্যূন দণ্ড তিথেঃ প্রাযিকত্বে তত্র তিথি ক্ষযস্য ঝটিত্যুপলভ্যমানত্বাৎ স্বল্পকালেন তিথ্যন্তর সম্বন্ধাৎ শীঘ্রং রবিলঙ্ঘন প্রতীতেঃ শীঘ্রমেব মলমাসো ভবতীতি অধিক দণ্ডতিথেঃ প্রাযিকত্বে তত্র তিথিক্ষযস্য ঝটিত্যনুপলভ্যমানত্বেনাধিকেনৈব কালেন তিথ্যন্তর সম্বন্ধাৎ বিলম্বেনৈব রবি লঙ্ঘন প্রতীতে শ্চিরেণৈব মলমাসো ভবতীতি তথাচ বিষ্ণুধর্ম্মোত্তরং । সৌর সম্বৎসরস্যান্তে মানেন শশিজেন তু । একাদশাতিরিচ্যন্তে দিনানি ভৃগুনন্দন । সমাদ্বযে সাষ্টমাসে তস্মান্মাসো হতিরিচ্যতে । সচাধিমাসকঃ প্রোক্তঃ কাম্যকর্ম্মসু গর্হিতঃ ॥

ইদন্তু নিযতং একস্মাদধিমাসাত্তৃতীযাব্দে অধিমাসান্তরমিতি। যদ্যপি যাং তিথিং সমনুপ্রাপ্য তুলাং গচ্ছতি ভাস্করঃ। তযৈব প্রবসংক্রান্তির্যাবিন্মেষং ন গচ্ছতি॥ ইতি রাজমার্ত্তণ্ডবচনাত্তুলাদি ষণ্মাসে তিথিবৃদ্ধ্যভাবাদ্বর্ষে দ্বাদশতিথি বৃদ্ধি রনুপপন্না তথাপি মধ্যে বিষবতো র্ভানুর্যান্যহানি তু বর্দ্ধযেৎ। তৈঃ সম্যুযাধিকো মাসঃ পতত্যেষ ত্রযোদশঃ॥ ইতি গৃহ্যপরিশিষ্ট বাক্যে বিষুবতো মেষ তুলাসংক্রান্ত্যো র্মধ্যে মেষাদি ষণ্মাস এব তিথি বৃদ্ধি রুক্তা। অহর্গণনে মেষাদি ষণ্মাসে মন্দভুক্ত্যা সপ্ত দিন বৃদ্ধি স্তুলাদৌ শীঘ্রভুক্ত্যা দিনদ্বয হ্রাস ইতি। তথাচ জ্যোতিঃশাস্ত্রং। মেষাদীনা মহর্বৃন্দং যন্ত্রা সপ্তাষ্ট চন্দ্রকং। তুলাদীনামষ্ট সপ্ত চন্দ্রকন্ত লিখেৎ পৃথক্॥ চন্দ্র একঃ। অঙ্কস্য বামাগতি রিত্যঙ্কবিদাং সমযাৎ ব্যুৎক্রমেণ অঙ্কা বোধ্যাঃ।তেন দিন বৃদ্ধি ক্রম সঞ্চযাভ্যাং মেষাদি ষট্ক এব একাদশ্যাদি তিথি বৃদ্ধি এবঞ্চ। গতেব্দদ্বিতযে সার্দ্ধে পঞ্চপক্ষে দিনদ্বযে। দিবসস্যাষ্টমে ভাগে পতত্যেকোঽধিমাসকঃ॥ ইতি রাজমার্ত্তণ্ডোক্তঃ॥ সপ্তদশ দিনাধিকাষ্ট মাসাধিক বর্ষদ্বযে অধিমাসঃ। স সৌরে মাসি সপ্তদশদিনোত্তরং চান্দ্রমাস লঙ্ঘনাসম্ভবাৎ সাবন মানেন জ্ঞেযঃ। তথা চ বিষ্ণুধর্ম্মোত্তর প্রথমকাণ্ডং। সৌরেণাব্দস্তু মানেন যদা ভবতি ভার্গব। সাবনে চ তদা মানে দিন ষট্কং প্রপূর্য্যতে॥সৌর সম্বৎসরে দিনষট্কাধিকঃ সাবন সম্বৎসরো ভবতীতি। সৌর মাসাষ্টকাধিক বর্ষদ্বযে সপ্তদশ দিনানি বর্দ্ধন্তে সাবন ক্রমেণেতি পূর্ব্বোক্ত বিষ্ণুধর্ম্মোত্তরোক্ত সমানবিষযতাস্যেতি॥জ্যোতিষে। দশানাং ফাল্গুনাদীনাং প্রাযো মাঘস্য চ ক্বচিৎ। নপুংসকত্বং ভবতি ন পৌষস্য কদাচন॥ নপুংসকত্বং মলমাসত্বং। তথাচোক্তং। অসংক্রান্তো হি যো মাসঃ কদাচিত্তিথি বৃদ্ধিতঃ। কালান্তরাৎ সমাযাতি স নপুংসক ইষ্যতে॥ শাণ্ডিল্যোপি। প্রাযশো ন শুভঃ সৌম্যো জ্যৈষ্ঠ শ্চাষাঢক স্তথা। মধ্যমৌ চৈত্র বৈশাখাবধিকো হ্যন্যঃ সুভিক্ষ কৃৎ॥ সৌম্যো মার্গশীর্ষঃ। অধিকো হ্যধিমাসঃ॥ * ॥ তদযং সংক্ষেপঃ। শুক্ল প্রতিপদাদিরমাবাস্যান্তো রবিলঙ্ঘিতো মাসো মলমাসঃ। সচ মাধবাদৌ ভবে-

সর্গিকঃ কদাচিৎ কার্ত্তিকাদাবপি। অথপ্রানিষ্টকৃৎ মাঘবাদি কার্ত্তিকাদি ষট্কযো রপি তল্লক্ষণ যোগে মাঘবাদাবেব তুলাদি ষট্ক এবং। তয মাসে তল্লক্ষণ যোগে পূর্ব এব। আশ্বিন বৈশাখযো তল্লক্ষণ যোগে পরএব মলমাসঃ তদ্ভিন্নস্তু ভানুলঙ্ঘিতঃ। মলমাসে আষাঢাদে র্দ্বিত্বং। ভানুলঙ্ঘিতে তু নৈতদিতি বিস্তরঃ॥ *॥ মলমাসে নিষিদ্ধানি যথা। কাঠকগৃহ্যং। চূড়াং মৌঞ্জী বন্ধনঞ্চ অগ্ন্যাধেযং মহালযং। রাজাভিষেকং কাম্যঞ্চ ন কুর্য্যাদধিমাসকে॥ চূড়াং মৌঞ্জীবন্ধনঞ্চ অগ্ন্যাধেযং মহালযং। রাজাভিষেকং কাম্যঞ্চ ন কুর্য্যাদ্ভানুলঙ্ঘিতে॥ মহালযং কন্যাকৃষ্ণপক্ষং। ভীমপরাক্রমেপি। অধিমাসে দিনপাতে ধনুষি রবৌ ভানুলঙ্ঘিতে মাসি। চক্রিণি সুপ্তে কুর্য্যান্না মাঙ্গল্যং বিবাহঞ্চ॥ দিনপাতে দিনক্ষযে। অধিমাসে বিবাহং যাত্রাং চূড়াং তথোপনযনাদি। কুর্য্যান্ন সাবকাশং মাঙ্গল্যং ন তু বিশেষেজ্যাং ইতি॥ অত্র বিবাহাদি কীর্ত্তনং নিরবকাশস্যাপি নিষেধার্থং। অন্যথা সাবকাশ মিত্যনেনৈব সিদ্ধেঃ। সাবকাশঞ্চ সম্ভবৎকালান্তরং কর্ম্ম অতো নিরবকাশস্যানন্যগতিকস্য প্রতিপ্রসবো হর্থাৎ সূচিতঃ। তথাচ মলমাসাধিকারে কাঠকগৃহ্যং। কালে হনন্যগতিং নিত্যাং কুর্য্যান্নৈমিত্তিকীং ক্রিযাং। ইতি মলমাসতত্ত্বং॥ *॥ অপিচ। অগ্ন্যাধানং প্রতিষ্ঠাঞ্চ যজ্ঞদান ব্রতানি চ। দেবব্রত বৃষোৎসর্গ চূড়াকরণ মেখলাঃ॥ মাঙ্গল্যমভিষেকঞ্চ মলমাসে বিবর্জ্জযেৎ। ইতি গারুড়ে ১২৮ অধ্যাযঃ॥ *॥ অথ মলমাসে কর্ত্তব্য ব্রতাদি। চাতুর্মাস্য ব্রতং আষাঢাদ্যুল্লেখেন বিহিতং তদপ্যারব্ধং শ্রাবণাদি মলমাসেপি কর্ত্তব্যং আষাঢাদি প্রতিদিন কর্ত্তব্যত্বেন নিরবকাশাৎ। ষষ্ট্যা তু দিবসৈ র্মাসঃ কথিতো বাদরাযণৈঃ। ইতি জ্যোতিঃশাস্ত্রে পিতামহেন একমাসত্বাভিধানাচ্চ। যচ্চ সম্বৎসরন্তু যঃ পূর্ণমেক ভক্তেন তিষ্ঠতি। ইত্যাদৌ মাঘাদ্যনুল্লিখিত সম্বৎসর ব্রত মারব্ধং তন্মলমাসে হপি কর্ত্তব্যং। কৃচিৎ ত্রযোদশমাসাঃ সম্বৎসর ইতি শ্রুতেঃ। যচ্চ প্রতিমাস বিহিতং ন মাঘাদ্যুল্লেখেন তন্মলমাসে হপি কর্ত্তব্যং। তথাচ রম্ভাতৃতীযাব্রতে শিবরহস্যং। মাসে মাস্যর্চ্চযেদ্দেবং যজেদ্দেবীং সশঙ্করাং। কিন্তু মোক্ষা-

পান° কার্য্যমিত্যাহ ভগবান্ শিবঃ ॥ উদ্যাপনং প্রতিষ্ঠা চ ব্রতারম্ভো২পি নিষিদ্ধঃ। পূর্ব্বোক্ত কাশ্যপ ব-চনাৎ। জ্যৈষ্ঠাদি মাসবিশেষে বিহি-তং সাবিত্রী ব্রতাদিকন্তু সাবকাশত্বা মলমাসে ন কার্য্যং। কিন্তু শুদ্ধ এব জ্যৈষ্ঠাদৌ কর্ত্তব্য মিতি॥ বৃহস্পতিঃ। নিত্য নৈমিত্তিকে কুর্য্যাৎ প্রযতঃ সন্ মলিম্লুচে। তীর্থস্নানং গজচ্ছায়াং প্রেতশ্রাদ্ধং তথৈব চ। নিত্যমহরহঃ কর্ত্তব্যত্বেন বিহিতং স্নান সন্ধ্যা পঞ্চ মহাযজ্ঞাদি কাম্যমপি তথা বিধ° সংকল্পিতং যৎকিঞ্চিদ্দ্রব্য দান শিব পূজাদি। ব্যক্তং ভবিষ্যে। কুর্য্যাৎ প্রাত্যহিকং কর্ম্ম প্রযতঃ সন্ মলি-ম্লুচে। নৈমিত্তিকঞ্চ কুর্ব্বীত সাবকা-শং ন যদ্ভবেৎ॥ কালমাধবীয়ে মৎস্য পুরাণং। বর্ষে চাহরহঃ শ্রাদ্ধং দানঞ্চ প্রতিবাসরং। গো ভূ তিল-হিরণ্যানাং মাসে২পি স্যান্মলিম্লুচে ॥ কাঠকগৃহ্যপরিশিষ্টং। প্রবৃত্তং ম-লমাসাৎ প্রাক্ যৎ কর্ম্ম ন সমাপি তং। আগতে মলমাসে২পি তৎ সমা-প্যমসংশয়ং॥ কৃত্যসিদ্ধান্তে। আ-রব্ধং কর্ম্ম যৎ কিঞ্চিত্তৎ কার্য্যং হি-মলিম্লুচে। নৈমিত্তিকং মাস সংবৎ-সর দিবসাদি বিশেষ নিয়ম শূন্য দশ্য কর্ত্তব্য কাদাচিৎক নিমিত্তোৎ পন্নং ॥ অপি চ। জাত কর্ম্মাদ্যপি মল-মাসে কার্য্যং। জাতকর্ম্মান্ত্যকর্ম্মাণি নব শ্রাদ্ধং তথৈব চ। মঘাত্রয়োদশী শ্রা-দ্ধং শ্রাদ্ধান্যপি চ ষোড়শ॥ চন্দ্র সূর্য্য গ্রহে স্নানং দান শ্রাদ্ধ ক্রিয়াদিকং। কার্য্যং তন্মলমাসে২পি নিত্যং নৈমি-ত্তিকং তথা॥ স্মৃতিঃ। শুদ্ধ জাতক নামানি যেচ সংস্কার মাশ্রিতাঃ। ম-লিম্লুচে২পি কর্ত্তব্যাঃ কাম্যা ইষ্টী-শ্চ বর্জ্জয়েৎ॥ সংস্কারা অন্নপ্রাশন নিষ্ক্রমণাদয়ঃ। ইতি মাধবাচার্য্যঃ। অন্ত্যকর্ম্মাণি বহন দহনোদকদান পিণ্ডদানাস্থিসঞ্চয়াদীনি। নবশ্রা-দ্ধং। চতুর্থে পঞ্চমে চৈব নবমৈকাদ-শে তথা। যদত্র দীয়তে জন্তো স্তন্নব-শ্রাদ্ধ মুচ্যতে॥ ইতি যমোক্তং॥ অত্র চতুর্থাহাদি গ্রহণং মরণ দিনাবধীতি ॥ বালগ্রহ ভূতগ্রহ নরাধিপ প্রবল শত্রু দুঃসহরোগাভিভবাদ্ভুত দুঃ-স্বপ্ন গ্রহদৌস্থ্যাদি নিমিত্তং শান্তি কর্ম্মাপি মলমাসে২পি কর্ত্তব্যং। বি-ষ্ণুনা শান্তি স্বস্ত্যয়নৈ র্দৈবোপঘাতান্ শময়েৎ পরচক্রোপঘাতাংশ্চ ইত্যু-ক্তং। ইতি মলমাসতত্ত্বং॥

মলযঃ পুং স্বনামখ্যাতপর্ব্বতঃ। তৎ পর্য্যায়ঃ। আষাঢঃ ২ দক্ষিণাচলঃ

৩। ইতি হেমচন্দ্রঃ ॥ চন্দনাদ্রিঃ ৪ ॥ মলযাচলঃ ৫। ইতি শব্দরত্নাবলী ॥ শৈলাঙ্গং ॥ দেশবিশেষঃ ॥ আ-রানঃ। ইতি মেদিনী ॥ নন্দনবনং। ইতি ধরণিঃ ॥ অষ্টাদশোপদ্বীপা-ন্তর্গত দ্বীপবিশেষঃ। ইতি শব্দমা-লা ॥ ঋষভদেবস্য শতপুত্রান্তর্গত পঞ্চমপুত্রঃ। ইতি শ্রীভাগবতে ৫ স্কন্ধে ৪ অধ্যাযঃ ॥

মলযগন্ধিনী স্ত্রী উমাসখীবিশেষঃ। ইতি শব্দমালা ॥

মলযজং পুং ক্লী চন্দনং। ইত্যমরঃ ॥ রাহৌ পুং। যথা। রাহুং মলযজং শূদ্রং পৈঠীনং দ্বাদশাঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং সিংহাসনং ধ্যাত্বা তথা-হ্বযেৎ॥ ইতি গ্রহযজ্ঞতত্ত্বং ॥

মলযা স্ত্রী ত্রিবৃতা। ইতি মেদিনী ॥

মলযাচলঃ পুং মলযপর্ব্বতঃ। ইতি শব্দরত্নাবলী ॥

মলযানিলঃ পুং বসন্তকালীনবাযুঃ। তৎপর্য্যাযঃ। বাসন্তঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

মলযূঃ স্ত্রী মলপূঃ। ইতি শব্দরত্না-বলী ॥

মলযোদ্ভবং ক্লী চন্দনং। ইতি রাজ-নির্ঘণ্টঃ ॥

মলবিনাশিনী স্ত্রী শঙ্খপুষ্পী। ইতি রাজনির্ঘণ্টঃ ॥

মলহন্তা পুং শাল্মলীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

মলা স্ত্রী ভূম্যামলকী। ইতি শব্দ-চন্দ্রিকা ॥

মলাকর্ষী পুং হড়িকঃ। হাড়ি ইতি ভাষা। ইতি শব্দমালা ॥

মলাকা স্ত্রী কামিনী ॥ হস্তিনী ॥ দূতী। ইতি সংক্ষিপ্তসারোণাদি-বৃত্তিঃ ॥

মলাপকর্ষণং ক্লী পাপমোচনং ॥ মলদূরীকরণং। ইতি কেচিৎ ॥

মলাপহা স্ত্রী নদীবিশেষঃ। যথা। মলাপহা ভীমরথী চ ঘণ্টগা যথা চ কৃষ্ণা জলসান্যগা গুণৈঃ। মলা-পহা ঘণ্টগযো স্তথাপি পথ্যং লঘু স্বাদুতরং সুকান্তিদং ॥ ইতি রাজ-নির্ঘণ্টঃ ॥

মলাবহং ক্লী নববিধপাপান্তর্গত-পাপবিশেষঃ। যথা। কৃমি কীট বযো হত্যা মদ্যানুগত ভোজনং। ফলৈধঃকুসুমস্তেয মধৈর্য্যঞ্চ মলা-বহং ॥ ইতি মানবে ১১ অধ্যাযঃ ॥

মলারিঃ পুং সর্জ্জক্ষারঃ। ইতি রাজ-নির্ঘণ্টঃ ॥

মলিনং ত্রি মলযুক্তবস্তু। তৎপর্য্যা-যঃ। মলীমসং ২ কচ্চরং ৩ মলদূষিতং

ম্না ইত্যমরঃ॥ দূষিতং॥ কৃষ্ণং। ইতি মেদিনী॥ নিত্য নৈমিত্তিক ক্রিয়া ত্যাগী। ইতি মার্কণ্ডেয়পুরাণং

মলিনং ক্লী ঘোলং। ইতি শব্দচন্দ্রিকা॥ দোষঃ। ইতি হেমচন্দ্রঃ॥ টঙ্কণঃ। ইতি রাজনির্ঘণ্টঃ॥

মলিনমুখঃ পুং অগ্নিঃ॥ গোলাঙ্গুলঃ। ইতি মেদিনী॥ প্রেতঃ। ইতি হেমচন্দ্রঃ॥

মলিনমুখঃ ত্রি ক্রূরঃ। খলঃ। ইতি মেদিনীহেমচন্দ্রশ্চ॥ ম্লানবদনশ্চ॥

মলিনাম্বু ক্লী মসী। ইতি হেমচন্দ্রঃ॥

মলিনাস্যঃ ত্রি খলঃ। ইতি শব্দমালা॥

মলিনী স্ত্রী রজস্বলানারী। ইত্যমরঃ॥

মলিম্লুচঃ পুং মলমাসঃ। যথা। তমতিক্রম্য তু রবি র্যদা গচ্ছেৎ কথঞ্চন। আদ্যো মলিম্লুচোজ্ঞেয়ো দ্বিতীয়ঃ প্রকৃতঃ স্মৃতঃ॥ যদা তং দর্শান্ত মাস মতিক্রম্য তৎপূর্ব্ব মাসান্ত্য ক্ষণবৃত্তি রাশিস্থঃ সন্ সূর্য্যো হতিবাহ্য গচ্ছেৎ মাসান্তরে রাশ্যন্তর সংযোগং গচ্ছেৎ তদা আদ্যো হতিক্রান্তমাসো মলিম্লুচো জ্ঞেয়ঃ মলী সন্ ম্লোচতি গচ্ছতীতি মলিম্লুচঃ। দ্বিতীয়স্তু প্রকৃতঃ শুদ্ধঃ কর্মার্হত্বাৎ। ইতি মলমাসতত্ত্বং॥ অগ্নিঃ। চৌরঃ। ইতি মেদিনী॥ বায়ুঃ। ইতি শব্দমালা॥

মলিম্লুচা স্ত্রী রজস্বলানারী। ইতি ত্রিকাণ্ডশেষঃ॥

মলীমসং ক্লী লৌহং॥ পুষ্পকাসীসং। ইতি মেদিনী॥

মলীমসঃ ত্রি মলিনঃ। ইত্যমরঃ॥

মলূকঃ পুং কৃমিবিশেষঃ। ইত্যুণাদিকোষঃ॥

মল্ল ঙ ধৃতৌ। ইতি কবিকল্পদ্রুমঃ॥ ঙ মল্লতে। ইতি দুর্গাদাসঃ॥

মল্লঃ পুং বাহুযোধী। মাল ইতি ভাষা। ইত্যমরভরতৌ॥ স চ ব্রাত্য ক্ষত্রিযাৎ সবর্ণাযাং জাতঃ। ইতি মানবে ১০ অধ্যায়ঃ॥ পাত্রং॥ কপোলং॥ মৎস্যভেদঃ॥ বলীয়ান্। ইতি মেদিনী॥ বর্ণসঙ্কর জাতিবিশেষঃ। মালা ইতি ভাষা। স চ লেটাৎ তীবর কন্যাযাং জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥ তন্ত্রবায্যাং ঝন্দকারাজ্জাতঃ। ইতি পরাসরপদ্ধতিঃ॥ দেশবিশেষঃ। যথা। দশার্ণা নবরাষ্ট্রঞ্চ মল্লাঃ শাল্লা যুগন্ধরাঃ। ইতি বিরাটপর্ব্বণি ১ অধ্যায়ঃ॥

মল্লকঃ পুং দন্তঃ। ইতি হেমচন্দ্রঃ॥

মল্লকঃ পুং স্ত্রী দীপাধারঃ॥ নারি-কেলফলাবয়বভাজনপাত্রবিশেষঃ মা ইতি ভাষা॥ স্ত্রিয়াং মল্লিকা ৮ ইত্যমরভরতৌ॥ প্রদীপঃ। ইতি মথুরেশঃ॥

মল্লজং ক্লী মরিচং। ইতি জটাধরঃ॥

মল্লতূর্য্যং ক্লী বাদ্যবিশেষঃ। তৎপর্য্যায়ঃ। মহাস্বনঃ২। ইতি ত্রিকাণ্ডশেষঃ॥

মল্লনাগঃ পুং বাৎস্যায়নমুনিঃ॥ অভ্রমাতঙ্গঃ। ইতি মেদিনী॥ লেখহারঃ। ইতি শব্দরত্নাবলী॥ কামশাস্ত্রবিশেষঃ। ইতি ধরণিঃ॥

মল্লভূঃ স্ত্রী মল্লভূমিঃ। ইতি জটাধরঃ॥

মল্লভূমিঃ স্ত্রী মল্লক্রীড়াস্থানং। তৎপর্য্যায়ঃ। অক্ষবাটঃ২ রঙ্গভূমিঃ ৩ রণস্থলী ৪। ইতি শব্দরত্নাবলী॥ মল্লভূঃ৫ অক্ষপাটঃ৬। ইতি জটাধরঃ॥ দেশবিশেষশ্চ॥

মল্লযাত্রা স্ত্রী মল্লানাংযুদ্ধার্থযাত্রা। তৎপর্য্যায়ঃ। মাল্লবী ২। ইতি হারাবলী॥

মল্লযুদ্ধং ক্লী মল্লানাং সংগ্রামঃ। তৎপর্য্যায়ঃ। নিযুদ্ধং ২ বাহুযুদ্ধং ৩। ইতি শব্দরত্নাবলী॥ তৎপ্রকারো যথা। অথ সূদেন তং মল্লং যোধযামাস মৎস্যরাট্। চোদ্যমান স্ততো ভীমো দুঃখেনৈবাকরোন্মতিং॥ নহি শক্নোতি বিবৃতং প্রত্যাখ্যাতুং নরাধিপং। ততঃ স পুরুষব্যাঘ্রঃ শার্দ্দূলশিথিলং চরন্॥ প্রবিবেশ মহারঙ্গং বিরাটমভিপূজয়ন্॥ ববন্ধ কক্ষাং কৌন্তেয় স্ততঃ সংহর্ষয়ন্ জনান্॥ ততস্তং বৃত্রসঙ্কাশং ভীমো মল্লং সমাহ্বয়ৎ॥ জীমূতং নাম তং মল্লং তত্র প্রখ্যাতবিক্রমং॥ তাবুভৌ সুমহোৎসাহৌ উভৌ তীব্রপরাক্রমৌ। মত্তাবিব মহাকায়ৌ বারণৌ ষষ্টিহায়নৌ॥ ততস্তৌ নরশার্দ্দূলৌ বাহুযুদ্ধে সমীয়তুঃ। বীরৌ পরমসংহৃষ্টৌ অন্যোন্যজয়কাঙ্ক্ষিণৌ॥ আসীৎ সুভীমঃ সম্পাতো বজ্রপর্ব্বতযোরিব। ১০। উভৌ পরমসংহৃষ্টৌ বলেনাতিবলাবুভৌ॥ অন্যোন্যস্যান্তরং প্রেপ্সূ পরস্পরজয়ৈষিণৌ। উভৌ পরমসংহৃষ্টৌ মত্তাবিব মহাগজৌ॥ কৃতপ্রতিকৃতৈশ্চিত্রৈর্ব্বাহুভিশ্চ সকঙ্কটৈঃ। ১১। সন্নিপাতাবধূতৈশ্চ প্রমাথোন্মথনৈস্তথা॥ ক্ষেপণৈর্মুষ্টিভিশ্চৈব বরাহোদ্ধূতনিস্বনৈঃ। তলৈর্ব্বজ্রনিপাতৈশ্চ প্রসৃষ্টাভিস্তথৈব চ॥ শলাকানখপাতৈশ্চ পাদোদ্ধূতৈশ্চ দারুণৈঃ॥ জানুভিশ্চাশ্মনির্ঘোষৈঃ শিরোভি-

শ্চাবঘট্টনৈঃ ॥ তদ্বদ্ধ মভবদ্ঘোর মশস্ত্রং বাহুতেজসা। বল প্রাণেন শূরাণাং সমাজোৎসব সন্নিধৌ ॥ অরজ্যত জনঃ সর্ব্বঃ সোৎকৃষ্ট নিনদোত্থিতঃ। বলিনোঃ সংযুগে রাজন্ বৃত্রবাসবযো রিব ॥ প্রকর্ষণাকর্ষণ যো রভ্যাকর্ষ বিকর্ষণৈঃ। আকর্ষে তা মথান্যোন্যং জানুভি শ্চাভিজঘ্নতুঃ ॥১২॥ ততঃ শব্দেন মহতা ভর্ৎসযন্তৌ পরস্পরং। ব্যূঢোরস্কৌ দীর্ঘভুজৌ নিযুদ্ধ কুশলৌ যুধি ॥ বাহুভিঃ সমসজ্জেতা মাসৈঃ পরিঘৈ রিব। চকর্ষ দোর্ভ্যা মুৎপাট্য ভীমো মল্লমমিত্রহা ॥ বিনদন্ত মভিক্রোশন্ শার্দূল ইব বারণং। তমুদ্যম্য মহাবাহু ভ্রাময়ামাস বীর্য্যবান্॥ ততো মল্লাশ্চ মৎস্যাশ্চ বিস্ময়ং চক্রিরে পরং। ভ্রাময়িত্বা শতগুণং গতসত্ত্ব মচেতনং ॥ প্রত্যপিংষন্মহাবাহু র্মল্লং ভুবি বৃকোদরঃ। ১৩। তস্মিন্ বিনিহতে মল্লে জীমূতে লোকবিশ্রুতে ॥ বিরাটঃ পরমং হর্ষ মগচ্ছদ্বান্ধবৈঃ সহ। স হর্ষাৎ প্রদদৌ বিত্তং বহুরাজা মহামনাঃ ॥ ইতি বিরাটপর্ব্বণি ১২ অধ্যায়ঃ ॥ * ॥ এষাং টীকা যথা। দুঃখেন ব্যপ্রকটন রাজাজ্ঞা লঙ্ঘন দ্বন্দ্বজেন। বিবৃতং লোক সমক্ষং শা

দূর্ল শিথিলঃ সিংহইব ব্যাঘ্রইব বা শিথিলঃ শাবক্তঃ। স্যাৎ সিংহেপিচ শার্দূল ইতি দর্শনাৎ। কক্ষ্যাং কচ্ছং। সম্পাতঃ সংঘর্ষঃ। ১০। সকঙ্কটৈঃ কঙ্কটঃ করঘর্ষণজঃ কিণঃ কড়া ইতি প্রসিদ্ধঃ। কৃতপ্রতিকৃতৈঃ পরপ্রযুক্তি প্রতিকৃতৈঃ। চিত্রৈ র্বিচিত্রৈ র্ব্বন্ধৈ রিতিশেষঃ। ১১। সন্নিপাতেত্যাদি এতে মল্লানাং শিক্ষা বিশেষাঃ। সন্নিপাতৈঃ পরস্পর সংঘাতৈ রবধূতৈ র্বদ্ধমুষ্টিভুজাঘাতৈঃ প্রমাথৈঃ পাতয়িত্বা পেষণৈঃ। উন্মথনৈঃ অন্তরীক্ষে ভুজাভ্যাং মথনৈঃ। ক্ষেপণৈঃ স্থানাৎ প্রচ্যাবনৈঃ। বদ্ধাঙ্গুলিকরো মুষ্টিঃ। অবাঙ্মুখং স্কন্ধগতং ভ্রাময়িত্বা তথৈব যঃ। ক্ষিপ্তস্য শব্দঃ স ভবেদ্বরাহোদ্ধূতনিস্বনঃ ॥ তর্জন্যঙ্গুষ্ঠ মধ্যেন প্রসারিত করো হি যঃ। সংপ্রহার স্তলাখ্যস্তু সংগ্রহো বজ্র মিষ্যতে ॥ অর্দ্ধচন্দ্র তুল্য মল্লমুষ্টি র্বজ্র মিত্যর্থঃ। প্রসৃতাঙ্গুলি হস্তেন প্রসৃষ্টঃ প্রকৃতিঃ স্মৃতা। দ্বিগুণীকৃত বাহু র্য স্তদীযার্থং যথা বলং ॥ প্রহারঃ সশলাকা স্যাৎ পাদোদ্ধৃতঃ পদাহতং। জানুভি শ্চাশ্ম নির্ঘোষৈঃ পাষাণঘোষ সদৃশ ধ্বনিভিঃ করণৈ র্যান্যবঘট্টনা

ৈতঃ। বল প্রাণেন বলাৎ কর্ষণ। সোৎক্রুষ্ট নিনদোত্থিতং উৎক্রোশন নিনদোত্থান সহিতঃ। প্রকর্ষণং বাহু সংমুখানয়নং প্রকৃষ্টাকর্ষণং তদেবাকর্ষণ মীষৎ সম্মুখানয়নং। অভ্যাকর্ষঃ সমন্ততঃ কর্ষণং। বিকর্ষণং পশ্চাৎ নয়নং তদেব বিপরীত কর্ষণমুচ্যতে উপসর্গভেদাদর্থভেদো হপীতি। ১২। শতগুণং শতবারং। ১৩। ইত্যর্জুনমিশ্রকৃত ভারতার্থদীপিকা॥

মল্লা স্ত্রী নারী॥ পত্রবল্লী॥ মল্লিকা। ইতি শব্দরত্নাবলী॥

মল্লারঃ পুং রাগবিশেষঃ। সতু ষণ্ণাং রাগাণাং মধ্যে দ্বিতীয়ঃ। যথা। আদৌ মালব রাগেন্দ্র স্ততো মল্লার সংজ্ঞিতঃ। শ্রীরাগ স্তস্য পশ্চাদ্বৈ বসন্ত স্তদনন্তরং॥ হিল্লোলশ্চাথ কর্ণাট এতে রাগাঃ প্রকীর্ত্তিতাঃ। অস্য ষট্‌রাগিণ্যো যথা বেলাবলী পূরবী চ কানড়া মাধবী তথা। কোড়া কেদারিকা চৈব মল্লারস্য প্রিয়া ইমাঃ॥ অস্য গান সময়ঃ। মেঘ মল্লার রাগস্য গানং বর্ষাসু সর্ব্বদা॥ অস্য স্বরূপং যথা। শুভ্রাবদাতং পলিতং দধানঃ প্রলম্বকর্ণঃ কুমুদেন্দুবর্ণঃ। কৌপীনবাস্যঃ সবিহারচারী মল্লার রাগঃ শুচি শান্তমূর্ত্তিঃ॥ ইতি সংগীতদামোদরঃ॥

মল্লারী স্ত্রী বসন্তরাগস্য রাগিণী। যথা। আন্দোলিতা চ দেশাখ্যা লোলা প্রথমমঞ্জরী। মল্লারী চেতি রাগিণ্যো বসন্তস্য সদানুগাঃ॥ ইতি সঙ্গীতদামোদরঃ॥ মেঘরাগস্য রাগিণী। ইতি হলায়ুধঃ॥

মল্লিঃ পুং চতুর্বিংশতিবর্ত্তার্হতাং মধ্যে ঊনবিংশজ্জিনঃ। ইতি হেমচন্দ্রঃ॥

মল্লিঃ স্ত্রী মল্লিকা। ইতি শব্দরত্নাবলী॥

মল্লিকঃ পুং মলিনচঞ্চুচরণযুক্তহংসঃ। মলিনৈঃ কিঞ্চিদ্ধূসরবর্ণৈ রালোহিতৈ শ্চঞ্চুচরণৈ রুপলক্ষিতঃ শুক্লহংসঃ। ইত্যমরভরতৌ॥ নৃণাং উপাধিবিশেষশ্চ॥

মল্লিকা স্ত্রী স্বনামখ্যাতপুষ্পবৃক্ষঃ। বেলফুল ইতি ভাষা। তৎপর্য্যায়ঃ। তৃণশূন্যং ২ ভূপদী ৩ শতভীরুঃ ৪। ইত্যমরঃ॥ তৃণশূন্যা ৫ শীতভীরুঃ ৬। ইতি ভরতঃ॥ ভদ্রবল্লী ৭ গৌরী ৮ বনচন্দ্রিকা ৯ প্রিয়া ১০ সৌম্যা ১১ নারীষ্টা ১২ গিরিজা ১৩ সিতা ১৪ মল্লী ১৫ মদয়ন্তী ১৬

চন্দ্রিকা ১৭ মোদিনী ১৮ ।। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। চক্ষুষ্যত্বং। মুখপাক দুষ্ট বিস্ফোট কণ্ডূতি বিষ ব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ কফ নাশিত্বং। ইতি রাজবল্লভঃ ॥ উষ্ণত্বং। লঘুত্বং। বৃষ্যত্বং। বাত পিত্তাস্র দৃগ্ব্যাধ্যরুচি নাশিত্বঞ্চ। ইতিভাবপ্রকাশঃ॥ ॥ অস্যাউৎপত্তি র্যথা। বিচরন্তং তদা ভূয়ো মহেশং কুসুমায়ুধঃ। আরাৎ স্থিত্বা গৃহীত্বা ধনুঃ সন্তাপয়িতুমুদ্যতঃ ॥ ততস্তমগ্রতো দৃষ্ট্বা ক্রোধাধ্মাত দৃশাহরঃ। স্মর মালোকয়ামাস শিখাগ্রাচ্চরণান্তিকং ॥ আলোকিত স্ত্রিনেত্রেণ মদনো দ্যুতিমানপি। প্রাদহ্যত তদা ব্রহ্মন্ পাদাদারভ্য কক্ষবৎ ॥ প্রদহ্যমানৌ চরণৌ দৃষ্ট্বাসৌ কুসুমায়ুধঃ। উৎসসর্জ ধনুঃ শ্রেষ্ঠং তজ্জগামাথ পঞ্চধা ॥ যদাসীন্মুষ্টিবন্ধং তদ্রুক্মপৃষ্ঠং মহাপ্রভং। স চম্পকস্তরু র্জাতঃ সুগন্ধাঢ্যো গুণাকৃতিঃ॥ নাহ স্থানং শুভাকারং যদাসীদ্বজ্রভূষিতং। তজ্জাতং কেশবারণ্যং বকুলং নামতো নৈগঃ॥ যাচ কোটী শুভা হ্যাসীদিন্দ্রনীল বিভূষিতা। জাতা সা পাটলা রম্যা ভৃঙ্গরাজ বিভূষিতা॥ নাহোপরি তথা মুষ্টৌ স্থানং চন্দ্রমণিপ্রভং। পঞ্চগুল্মা ভবজ্জাতী শশাঙ্ককিরণোজ্জ্বলা॥ ঊর্দ্ধং মুষ্ট্যা অধঃ কোট্যাং স্থানং বিদ্রুম ভূষিতং। তস্মাদ্বহুপুটা মল্লী সংজাতা বিবিধা মুনে॥ ইতি বামনপুরাণে ৬ অধ্যায়ঃ ॥ ॥ মৎস্যবিশেষঃ ॥ মৃৎপাত্রভেদঃ। ইতি মেদিনী ॥ পানপাত্রং। ইতি হেমচন্দ্রঃ ॥

মল্লিকাখ্যঃ পুং মলিনচঞ্চুচরণযুক্ত হংসঃ। ইত্যমরটীকা। তে সিতা হংসা মলিনৈঃ কিঞ্চিদ্ধূসরবর্ণৈ রালোহিতৈশ্চঞ্চুচরণৈর্লক্ষিতা মল্লিকাখ্যা মল্লিক নামানঃ। মল মল্ল ড বৃত্তৌলান্তঃ নাম্নীতি ইকঃ। কল্লিকো হংসভেদে স্যাত্তুণশূন্যস্তু কল্লিকা। ইতি রুদ্রঃ। শুক্লাঙ্গত্বান্মল্লিকাপুষ্পমিব অক্ষি যেষাং তে মল্লিকাক্ষা ইতি স্বামী। ইতি ভরতঃ ॥

মল্লিকাখ্যা স্ত্রী ত্রিপুরমালীপুষ্পং। তৎপর্য্যায়ঃ। মোহিনী ২ বটপত্রা ৩ মোহনা ৪। ইতি রত্নমালা ॥

মল্লিকাগন্ধং ক্লী মঙ্গলাগুরু। ইতি রাজনির্ঘণ্টঃ ॥

মল্লিকাপুষ্পঃ পুং কুটজবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ করুণবৃক্ষঃ। করুণ নেবু ইতি ভাষা। ইতি হেমচন্দ্রঃ।

॥ স্বনামখ্যাতপুষ্পবৃক্ষশ্চ ॥

মল্লিকাক্ষঃ পুং মলিনচঞ্চুচরণযুক্ত-হংসঃ। ইতি হেমচন্দ্রঃ ॥ শুক্লবর্ণ বেষ্টিত চক্ষুর্দ্বয় যুক্ত হংসঃ। ইতি হলায়ুধঃ ॥

মল্লিগন্ধি ক্লী অগুরু। ইতি শব্দচন্দ্রিকা ॥

মল্লিপত্রং ক্লী ছত্রাকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মল্লী স্ত্রী মল্লিকা। ইতি রাজনির্ঘণ্টঃ শব্দরত্নাবলী চ ॥

মল্লীকরঃ ত্রি চৌরঃ। ইতি শব্দরত্নাবলী ॥

মল্লূঃ পুং ভাল্লুকঃ। ইতি শব্দচন্দ্রিকা ॥

মব নহে। ইতি কবিকল্পদ্রুমঃ ॥ নহো বন্ধনং। মবতি চৌরং লোকঃ। ইতি দুর্গাদাসঃ ॥

মবিতঃ ত্রি বদ্ধঃ। ইত্যমরটীকায়াং স্বামী ॥

মব্য বন্ধে। ইতি কবিকল্পদ্রুমঃ ॥ মব্যতি চৌরং রাজা। যদ্বযান্তোঽয মিত্যেকে। ইতি দুর্গাদাসঃ ॥

মশ ধ্বনৌ ॥ কোপে। ইতি কবিকল্পদ্রুমঃ ॥ মশতি মশকঃ। ইতি দুর্গাদাসঃ ॥

মশকঃ পুং কীটবিশেষঃ। মশা ইতি ভাষা। তৎপর্য্যায়ঃ। বজ্রতুণ্ডঃ ২ শূচ্যাস্যঃ ৩ ক্ষুদ্রমক্ষিকঃ ৪ রাত্রিজাগরদঃ ৫। ইতি রাজনির্ঘণ্টঃ ॥ তন্নাশকধূপো যথা। বিফলার্জ্জুনপুষ্পাণি ভল্লাতক শিরীষকং। লাক্ষা সর্জ্জরসশ্চৈব বিডঙ্গশ্চৈব গুগ্গুলঃ ॥ এতৈর্ধূপৈ ম্মক্ষিকাণাং মশকানাং বিনাশনং। ইতি গারুড়ে ১৮১ অধ্যায়ঃ ॥ চর্ম্মভেদঃ। স তু স্বনামখ্যাতচর্ম্মনির্ম্মিতঃ স্নেহাদি পাত্রং ॥ রোগবিশেষঃ। মশা ইতি হিন্দী আঁচিল ইতি বঙ্গভাষা। ইতি শব্দরত্নাবলী ॥ ॥ মশকরোগমাহ। অবেদনং স্থিরশ্ছেদং যস্তু গাত্রে প্রদৃশ্যতে। মাষবৎ কৃষ্ণমুৎসন্নং মলিনং মশকং দিশেৎ ॥ স্থিরং অচলং ॥ অস্য চিকিৎসা যথা। চর্ম্মকীলং জতুমণিং মশকাং স্তিলকালকান্। উৎকৃত্য শস্ত্রেণ দহেৎ ক্ষারাগ্নিভ্যা মশেষতঃ ॥ ইতি ভাবপ্রকাশঃ ॥ অপিচ। লশুনানান্ত চূর্ণস্য ঘর্ষো মশক নাশনঃ। ইতি গারুড়ে ১৭৫ অধ্যায়ঃ ॥

মশকী পুং উদুম্বরবৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥

মশহরী স্ত্রী মশকনিবারকপ্রাবরণবিশেষঃ। মশারী ইতি ভাষা। তৎ

পর্য্যায়ঃ। চতুষ্কী ২। ইতি জটাধরঃ॥

মশুনঃ পুং কুক্কুরঃ। ইতি শব্দমালা॥

মষ বধে। ইতি কবিকল্পদ্রুমঃ॥ মষতি। ইতি দুর্গাদাসঃ॥

মষিকূপী স্ত্রী } মস্যাধারঃ। ইতি
মষিধানং ক্লী } হেমচন্দ্রঃ॥

মষীলেখ্যদলঃ পুং শ্রীতালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মস ইর য ঈ পরিমাণে॥ পরিণামে। ইতি কবিকল্পদ্রুমঃ॥ ইর অমসৎ অমাসীৎ অমসীৎ। অস্মাৎ পুষাদিত্বান্নিত্যং ঙ ইত্যন্যে। য মস্যতি ধান্যং গৃহী। পরিমাতীত্যর্থঃ। ঈ মস্তঃ। পরিমাণং কস্যচিদনুরোধাৎ। ইতি দুর্গাদাসঃ॥

মসনং ক্লী সোমরাজীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মসরা স্ত্রী মসূরঃ। ইতি জটাধরঃ॥

মসারঃ } পুং ইন্দ্রনীলমণিঃ। ইতি
মসারকঃ } শব্দরত্নাবলী॥

মসিঃ স্ত্রী পুং লিপিপ্রযোজনা। লেখনদ্রব্যং। ইত্যমরটীকায়াং ভরতঃ॥ তৎপর্য্যায়ঃ। মসিজলং ২ পত্রাঞ্জনং ৩। ইতি ত্রিকাণ্ডশেষঃ॥ মেলা ৪ কালী ৫ অঞ্জনং ৬ মসী। ইতি শব্দরত্নাবলী॥ রঞ্জনী ৮। ইতি স্বামী॥ মলিনাম্বু ৯ মশী ১০। ইতি হেমচন্দ্রঃ॥ শেফালিকাবৃন্তং। ইতি কশ্চিৎ শব্দরত্নাবলী চ॥

মসিকা স্ত্রী শেফালিকা। ইতি শব্দরত্নাবলী॥ মলিকা ইতি গ্রন্থান্তরে পাঠঃ॥

মসিধানং ক্লী মস্যাধারঃ। ইতি শব্দরত্নাবলী॥

মসিধানী স্ত্রী মস্যাধারঃ। দোয়াতি ইতি ভাষা। তৎপর্য্যায়ঃ। মসিমণিঃ ২ মেলান্ধুঃ ৩ বর্ণকূপিকা ৪ মেলানন্দা ৫ মেলাম্বু ৬ মসিধানং ৭। ইতি শব্দরত্নাবলী॥ মসিকূপী ৮। ইতি হেমচন্দ্রঃ॥ মসিকূপিকা ৯। ইতি জটাধরঃ॥

মসিনং ক্লী সপিণ্ডকং। ইত্যুণাদিকোষঃ॥

মসিপণ্যঃ পুং লেখকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মসিপ্রসূঃ স্ত্রী মস্যাধারঃ। ইতি হারাবলী॥ লেখনী। ইতি কেচিৎ॥

মসিমণিঃ স্ত্রী মস্যাধারঃ। ইতি শব্দরত্নাবলী॥

মসিবর্দ্ধনং ক্লী রসগন্ধঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মসী স্ত্রী কালী॥ সেফালিকাবৃন্তং। ইতি শব্দরত্নাবলী॥

মসীজলং স্ত্রী মসী। কালী। ইতি ত্রিকাণ্ডশেষঃ ॥

মসীধানী স্ত্রী মস্যাধারঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মসীনা স্ত্রী ক্ষুমাথ্যাতশস্যং। যথা। মসীনা চাতসী চিহ্না ক্ষুমোমা-মালিকা মিতা। ইতিশব্দচন্দ্রিকা ॥

মসুরঃ পুং মসূরকলায়ঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মসুরা স্ত্রী বেশ্যা ॥ ব্রীহিপ্রভেদঃ। ইতি মেদিনী ॥

মসূরঃ পুং স্ত্রী ব্রীহিভেদঃ। মসুরী-কলাই ইতি ভাষা। তৎপর্য্যায়ঃ। মঙ্গল্যকঃ ২। ইত্যমরঃ ॥ মসূরঃ ৩ ব্রীহিকাঞ্চনঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ মসুরা ৫ মসূরা ৬। ইতি মেদিনী ॥ রাগদালিঃ ৭ মঙ্গল্যঃ ৮ পৃথুবীজকঃ ৯ শূরঃ ১০ কল্যাণবীজঃ ১১ গুড়বীজঃ ১২ মসূরকঃ ১৩। ইতি রাজনির্ঘণ্টঃ ॥ মঙ্গল্যা ১৪ মসূরকা ১৫। ইতি ভাবপ্রকাশঃ ॥ অস্য গুণাঃ। মধুরত্বং। শীতত্বং। সংগ্রাহিত্বং। কফ পিত্ত নাশিত্বং। বাতাময়করত্বং। মূত্রকৃচ্ছ্রহরত্বং। লঘুত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ অস্রহরত্বং। রুক্ষত্বং। জ্বরনাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥ তস্য যূষগুণাঃ। সংগ্রাহিত্বং। স্বাদুপাকিত্বং। প্রমেহ পিত্ত শ্লেষ্ম জ্বরাতীসার নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মসূরকঃ পুং উপবর্হবিশেষঃ। গোল বালিশ ইতি ভাষা। তৎপর্য্যায়ঃ। চতুরঃ ২ চাতুরঃ ৩ অঙ্গেডুঃ ৪ চক্রগণ্ডুঃ ৫। ইতি শব্দরত্নাবলী ॥

মসূরবিদলা স্ত্রী কৃষ্ণত্রিবৃৎ। ইত্যমরঃ ॥ শ্যামলতা। ইতি রত্নমালা ॥

মসূরা স্ত্রী বেশ্যা ॥ মসূরকলায়ঃ ॥ ইতি মেদিনী ॥

মসূরিকা স্ত্রী কুট্টনী। ইতি শব্দমালা ॥ বসন্তরোগঃ। তৎপর্য্যায়ঃ। পাপরোগঃ ২ রক্তবটী ৩ মসূরী ৪। ইতি শব্দরত্নাবলী ॥ অথ মসূরিকাধিকারঃ। তত্র মসূরিকা বিপ্রকৃষ্টং নিদান পূর্ব্বিকাং সংপ্রাপ্তি মাহ। কট্বম্ল লবণ ক্ষার বিরুদ্ধাধ্যশনাশনৈঃ। দুষ্ট নিষ্পাব শাকাদ্যৈঃ প্রদুষ্টপবনোদকৈঃ ॥ ক্রূরগ্রহেক্ষণাচ্চাপি দেশে দোষাঃ সমুদ্ধতাঃ। জনয়ন্তি শরীরে হস্মিন্ দুষ্টরক্তেন সঙ্গতাঃ ॥ মসূরাকৃতি সংস্থানাঃ পিড়কাঃ স্যু মসূরিকাঃ। ক্ষারো যবক্ষারঃ। বিরুদ্ধাধ্যশনাশনৈঃ। কট্বাদি বিরুদ্ধান্তানামশনৈঃ। অথচ অধ্যশনাশনং অধিকনশনং

অধ্যশনং। দুষ্টনিষ্পাব শাকাদৈ্যঃদষ্টৈ নিষ্পাব শাক মাদ্য শব্দান্মধ্বালকাদি তৈঃ। প্রদুষ্টপবনোদকৈঃ সবিষ জন্তুন্নাদি সংসর্গাৎ। ক্রুদ্ধগ্রহে ক্ষণাচ্চাপি দেশে দেশে ক্রুদ্ধগ্রহা রাহু শনৈশ্চরাদয স্তেষাংবীক্ষণাদ্দৃষ্টৈঃ যস্মিন্দেশে ক্রুদ্ধ গ্রহ দৃষ্টি স্তত্রাপি মসূরিকোৎপত্তি রিত্যর্থঃ। মসূরাকৃতি সংস্থানা মসূরস্য যা আকৃতি স্তদ্বৎসংস্থান মাকৃতি র্যাসাং তাঃ ॥ ❋ ॥ অথ পূর্ব্বরূপমাহ। তাসাং পূর্ব্বং জ্বরঃ কণ্ডু গাত্রভঙ্গো হরতি ভ্রমঃ। ত্বচি শোফঃ সবৈবর্ণ্যো নেত্র রাগ স্তথৈব চ ॥ ❋ ॥ বাতজামাহ। স্ফোটাঃ কৃষ্ণারুণা রুক্ষা স্তীব্রবেদনযান্বিতাঃ। কঠিনা শ্চিরপাকাশ্চ ভবন্ত্যনিল সম্ভবাঃ ॥ ❋ ॥ পৈত্তিকামাহ। সন্ধ্যস্থি পর্ব্বণাং ভেদঃ কাসঃ কম্পো হরতি ভ্রমঃ। শোষ স্তাল্বোষ্ঠ জিহ্বানাং তৃষ্ণা চারুচি সংযুতা॥ রক্ত পীতাসিতাঃ স্ফোটাঃ সদাহা স্তীব্র বেদনাঃ। মৃদব শ্চিরপাকাশ্চ পিত্তকোপ সমুদ্ভবাঃ ॥ ❋ ॥ রক্তজামাহ। বিড্ভেদ শ্চাঙ্গমর্দশ্চ দাহ স্তৃষ্ণারুচি স্তথা। মুখপাকো হক্ষিপাকশ্চ জ্বর স্তীব্রঃ সুদারুণঃ ॥ রক্তজায়াং ভবন্ত্যেতে বিকারাঃ পিত্ত লক্ষণাঃ ॥ ❋ ॥ অথ কফজামাহ। শ্বেতাঃ স্নিগ্ধা ভৃশং স্থূলাঃ কণ্ডুরা মন্দবেদনাঃ। মসূরিকাঃ কফোদ্ভূতা শ্চিরপাকাঃ প্রকীর্ত্তিতাঃ ॥ ❋ ॥ সান্নিপাতিকীমাহ। নীলা শ্চিপিট বিস্তীর্ণা মধ্যে নিম্না মহারুজঃ। পূতিস্রাবা শ্চিরং পাকাঃ প্রভূতাঃ সর্ব্বদোষজাঃ ॥ ❋ ॥ সপ্তধাতুগতামাহ। মসূরিকা স্ত্বচং প্রাপ্তা স্তোয বুদ্বুদ সন্নিভাঃ। স্বল্পদোষাঃ প্রজাযন্তে ভিন্না স্তোযং স্রবন্তি চ ॥ ত্বচং প্রাপ্তাঃ ত্বক্ছব্দেনাত্র রস উচ্যতে রসাশ্রয়ত্বাৎ ॥ ❋ ॥ রক্তস্থামাহ। রক্তস্থা লোহিতাকারাঃ শীঘ্রপাকা স্তনুত্বচঃ। সাধ্যা নাত্যর্থ দুষ্টাস্তু ভিন্না রক্তং স্রবন্তি চ। সাধ্যা রক্তস্থা ইত্যর্থঃ। নাত্যর্থ দুষ্টাস্তু অত্যর্থ দষ্ট শোণিতাঃ পুন নসাধ্যাঃ কিন্তু কষ্ট সাধ্যাঃ ॥ ❋ ॥ মাংসস্থামাহ। মাংসস্থাঃ কঠিনাঃ স্নিগ্ধা শ্চিরপাকা স্তনুত্বচঃ। গাত্রশূল নিশাকণ্ডু মূর্চ্ছা দাহ তৃষান্বিতাঃ ॥ ❋ ॥ মেদস্থামাহ। মেদোজা মণ্ডলাকারা মৃদবঃ কিঞ্চিদুন্নতাঃ। ঘোর জ্বর পরীতাশ্চ স্থূলাঃ স্নিগ্ধাঃ সবেদনাঃ ॥ সংমোহারতি সন্তাপাঃ কশ্চিদাভ্যো বিনিস্তরেৎ ॥ ❋ ॥ অস্থিমজ্জাগতেমাহ। ক্ষুদ্রা গাত্রসমা রু।

ক্কা শ্চিপিটাঃ কিঞ্চিদুন্নতাঃ। মজ্জস্থা ভৃশসম্মোহ বেদনারতি সংযুতাঃ। ভ্রমরেণেব বিদ্ধানি ক্ষর্বন্ত্যস্থীনি সর্বতঃ। ছিন্দন্তি মর্ম্মধামানি প্রাণানাশ্ হরন্তি তাঃ। গাত্রসমাঃ গাত্রতুল্য বর্ণাঃ। চিপিটাঃ চিপিটা কারাঃ। মজ্জাগ্রহণেনাস্থ্নোপি গ্রহণং তদাধারত্বাৎ। অতএবাগ্রে ভ্রমরেণেব বিদ্ধানি ক্ষর্বন্ত্যস্থীনি সর্বত ইতি। মর্ম্মধামানি মর্ম্মস্থানানি॥ ॥ শুক্রগতামাহ। পক্কাভাঃ পিডকাঃ স্নিগ্ধাঃ শুক্রা শ্চাত্যর্থ বেদনাঃ। স্তৈমিত্যারতি সম্মোহ দাহোন্মাদ সমন্বিতাঃ॥ শুক্রগাসা মসূর্য্যাস্তু লক্ষণানি ভবন্তি হি। নির্দ্দিষ্টং কেবলং চিহ্নং জীবনন্তু ন দৃশ্যতে॥ পক্কা ভাঃ পক্কাকারাঃ ন তু পক্কাঃ। শুক্লাঃ শ্বেতাঃ। নির্দ্দিষ্টং কেবলং চিহ্নং নত্বস্যা শ্চিকিৎসা যুক্তা যতো জীবনং ন দৃশ্যতে। সপ্তাপ্যেতা দোষহেতুং বিনা ন ভবন্তি। দোষমন্তরেণ রসাদি দুষ্টে রভাবাদিত্যত আহ। দোষ মিশ্রাস্তু সপ্তৈতা দ্রষ্টব্যা দোষ লক্ষণৈঃ॥ ॥ চর্ম্মজামাহ। কণ্ঠরোধারুচী তন্দ্রা প্রলাপারতি সংযুতাঃ। দুশ্চিকিৎসাঃ সমুদ্দিষ্টাঃ পিডকা শ্চর্ম্ম সংজ্ঞিতাঃ॥ ॥ রোমান্তিকামাহ। রোমকূপোন্নতি সমা রাগিণ্যঃ কফ পিত্তজাঃ। কাসারোচক সংযুক্তা রোমাঞ্চ জ্বর পূর্ব্বিকাঃ॥ ॥ সাধ্যাঃ প্রাহ। ত্বগাতা রক্তগাশ্চৈব পিত্তজাঃ শ্লেষ্মজা স্তথা। শ্লেষ্ম পিত্ত কৃতাশ্চৈব সুখসাধ্যা মসূরিকাঃ। ইমা বিনাপি ক্রিয়া প্রশাম্যন্তি শরীরিণাং। ত্বগ্গতা রসগতাঃ॥ ॥ কষ্টসাধ্যতমাঃ প্রাহ। বাতজা বাত পিত্তোত্থা বাত শ্লেষ্ম কৃতাশ্চযাঃ। কষ্টসাধ্যতমা স্তাস্ত যত্নাদেতা উপাচরেৎ॥ ॥ অসাধ্যাঃপ্রাহ। অসাধ্যাঃ সন্নিপাতোত্থা স্তাসাং বক্ষ্যামি লক্ষণং। প্রবাল সদৃশাঃ কাশ্চিৎ কাশ্চিজ্জম্বুফলোপমাঃ। লোহজাল সমাঃ কাশ্চিদতসীফল সন্নিভাঃ॥ আসাং বহুবিধা বর্ণা জায়ন্তে দোষ ভেদতঃ। প্রবাল সদৃশা ইত্যাদি। আসাং প্রবাল জম্বুফল লোহ গুটিকাতসীফল সাদৃশ্যং বর্ণেন। অনুক্ত বর্ণ সংগ্রহার্থ মাহ। আসাং বহুবিধা বর্ণা ইতি॥ ॥ অপরা শ্চাসাধ্যাঃ প্রাহ। কাসো হিক্কা প্রমোহশ্চ জ্বর স্তীব্রঃ সুদারুণঃ। প্রলাপারতি মূর্চ্ছাশ্চ তৃষ্ণা দাহোতি ঘূর্ণতা॥ দাহস্থানে দৌর্গন্ধ্য ইতিচপাঠঃ॥ মুখেন প্রস্রবেদ্রক্তং তথা

প্রাণের চক্ষুষা । কণ্ঠৌ ঘর্ঘরকং কৃত্বা
শ্বসিত্যত্যর্থদারুণং ॥ মসূরিকাভি-
ভূতস্য যস্যৈতানি ভিষগ্বরঃ । লক্ষ-
ণানীহ দৃশ্যন্তে ন দদ্যাত্তত্র ভেষজং
॥ * ॥ মসূরিকাস্বরিষ্টমাহ । মস
রিকাভিভূতো যো ভৃশং ঘ্রাণেন নি-
শ্বসেৎ । স ভৃশং ত্যজতি প্রাণান্
তৃষ্ণার্ত্তো বায়ুদূষিতঃ ॥ বায়ুদূষিতঃ
অপতানকাদি বাতব্যাধিদূষিতঃ
॥ * ॥ মসূরিকা হেতুকং শোথবি-
শেষমাহ । মসূরিকান্তে শোথঃ স্যাৎ
কূর্পরে মণিবন্ধকে । তথাংসফলকে
বাপি দুশ্চিকিৎস্যঃ সুদারুণঃ ॥ দু-
শ্চিকিৎস্যঃ কষ্টসাধ্যঃ । দুঃশব্দো হত্র
নিষেধে তেনাসাধ্য ইত্যেকে । কা-
শ্চিদ্বিনাপি যত্নেন সিধ্যন্ত্যাশু মসূ-
রিকাঃ । দৃষ্টাঃ কৃচ্ছ্রতরাঃ কাশ্চিৎ
কাশ্চিৎ সিধ্যন্তি বা নবা ॥ কাশ্চিন্নৈ-
ব তু সিধ্যন্তি সাধ্যমানাঃ প্রযত্নতঃ
॥ * ॥ অথ মসূরিকায়াশ্চিকিৎসা
। মসূরিকায়াং জ্বরোক্তা লেপনাদি
ক্রিয়া হিতা। পিত্তশ্লেষ্মবিসর্পোক্ত
ক্রিয়া চাত্র প্রশস্যতে ॥ শ্বেতচন্দন
কল্কেহি হিলমোচী ভবং দ্রবং । পি-
বেন্মসূরিকারম্ভে নৈব বা কেবলং র
সং ॥ হিলমোচিকা শাকবিশেষঃ ।
হুরহুর ইতি লোকে । দ্বে পঞ্চমূলেরা

রাস্না চ ধাত্র্যুশীরং দুরালভা । সা
মৃতং ধান্যকং মুস্তং জয়েদ্বাতমসূ-
রিকাং ॥ মঞ্জিষ্ঠা বহুপাৎ প্লক্ষ শি-
রীষোডুম্বর ত্বচঃ । বাতজায়াং মসূ-
র্য্যাং স্যাৎ প্রলেপঃ সঘৃতো হিতঃ
॥ বহুপাদ্বটঃ । গুড়ূচী মধুকং দ্রাক্ষা
মোরটং দাড়িমৈঃ সহ । সাককালে
প্রদাতব্যং ভেষজং গুড় সংযুতং ॥
তেন শাম্যত্যতো বায়ুং পাকং যান্তি
মসূরিকাঃ । মসূরিকস্তু ভুঞ্জীত শা-
লীন্ মুদ্গান্ মসূরিকান্ ॥ রসং মধু-
র মেবাদ্যাৎ সৈন্ধবঞ্চাল্পমাত্রকং ।
পটোলমূলং ক্বথিতং মোরটং সুরসং
তথা ॥ পটোলমূলং ক্বথিত মিত্যত্র
পটোলং ক্বথিতঞ্চেতি বা পাঠঃ ।
আদাবেব মসূর্য্যান্তু পিত্তজায়াং প্র-
যোজয়েৎ । নিম্ব পর্পটকঃ পাঠা প-
টোল শ্চন্দন দ্বয়ং ॥ উশীরং কটুকা
ধাত্রী তথা বাসা দুরালভা । এষাং
পানং প্রশস্তং শীতমুত্তমং শর্করান্বি-
তং ॥ মসূর্য্যাং পিত্তজায়াস্তু প্রযো-
ক্তব্যং বিজানতা । দাহে জ্বরে বিস-
র্পে চ ব্রণে পিত্তাধিকেপি চ ॥ মসূ-
র্য্যো রক্তজা নাশং যান্তি শোণিত
মোক্ষণৈঃ ॥ * ॥ বাসা মুস্তক ভূনিম্ব
ত্রিফলেন্দ্রযবাসকং ॥ পটোলারিষ্ট-
কং বাপি ক্বাথয়িত্বা সমাক্ষিকং । পি-

বেত্তেন প্রশাম্যন্তি মসূর্য্যঃ কফ সম্ভ বাঃ। ইন্দুঃ ইন্দ্রযবঃ ॥*॥ শিরীষো ডুম্বর ভ্রগু্যা খদিরারিষ্টৈর্জ লৈঃ। কফোত্থাসু মসূরীষু লেপঃ পিত্তো- ত্থিতাসু চ ॥*॥ নিম্ব পপটকঃ পা- ঠা পটোলঃ কটু রোহিণী। চন্দনে দ্বে উশীরঞ্চ ধাত্রী বাসা দুরাল ভা ॥ এষ নিম্বাদিকঃ ক্বাথঃ পীতঃ শকর- যান্বিতঃ। মসূরীং সর্বজাং হন্তি জ্বর- বীসর্প সংযুতাং ॥ * ॥ উত্থিতা প্র বিশেদ্যাচ তাং পুন র্বাহ্যতো নয়েৎ। কাঞ্চনার ত্বচঃ ক্বাথ স্তাপ্য চূর্ণাবচূ র্ণিতঃ ॥ তাপ্যং সুবর্ণমাক্ষিকং। ধা- ত্রীফলং স মধুকং ক্বথিতং মধুসংযুতং। মুখে কণ্ঠে ব্রণে জাতে গণ্ডুষার্থং প্র শস্যতে ॥ * ॥ অক্ষ্নোঃ সেকং প্রশং- সন্তি গবেধু মধুকাম্বুনা। গবেধু র্গবে- ধুকা। গবড়ুযা ইতি লোকে। মধুকং ত্রিফলা মূর্ব্বা দার্ব্বী ত্বক্ নীলমুৎপ- লং॥ উশীর লোধ্র মঞ্জিষ্ঠা প্রলেপা শ্চোতনে হিতাঃ। নশ্যন্ত্যনেন দৃষ্ট্য- তা মসূর্য্যো ন ভবন্তি চ॥ প্রলেপং চ- ক্ষুষো র্দদ্যাদ্বহুবারস্য বল্কলৈঃ। প ঞ্চ বল্কল চূর্ণেন ক্লেদিনী মবধূনয়েৎ॥ ভস্মনা কেচিদিচ্ছন্তি কেচিদ্গোময়রে- ণুনা। সুষবী পত্র নির্যাসং হরিদ্রা চূর্ণ সংযুতং ॥ রোমাঞ্চজ্বর সংযুক্ত ব্রণা-

নাং শান্তয়ে পিবেৎ। নির্যাসং দ্রবং ॥*॥ অথ মসূরিকা ভেদস্য শী- তলাখ্য অধিকারঃ। তত্র শীতলাখ্যা রূপমাহ। দেব্যা শীতলয়া ক্রান্তা ম- সূর্য্যেব হি শীতলা ॥ জ্বর এব তথা ভূতাধিষ্ঠিতো বিষম জ্বরঃ। সাচ সপ্তবিধা খ্যাতা তাসাং ভেদান প্র- চক্ষতে ॥ জ্বর পূর্ব্বা বৃহৎ স্ফোটৈঃ শীতলা বৃহতী ভবেৎ। সপ্তাহা- ন্নিঃসরত্যেষা সপ্তাহাৎ পূর্ণতাং ব্র- জেৎ ॥ তত স্তৃতীয়ে সপ্তাহে শুষ্য- তি স্খলতি স্বয়ং। তাসাং মধ্যে যদা কাচিৎ পাকং গত্বাস্ফুটং স্রবেৎ ॥ তত্রাবধূননং অর্ব্যাদ্রুনাগোময় ভস্ম- না। নিম্ব সৎপত্র শাখাভি মক্ষিকা মপসারয়েৎ ॥ জলঞ্চ শীতলং দ- দ্যাৎ জ্বরেপি ন তু দাপয়েৎ। স্থাপয়েত্তং স্থলে পূতে রম্যে হ্রস্বে শীতলে ॥ নাশুচিঃ সংস্পৃশেত্তন্তু ন- চ তস্যান্তিকং ব্রজেৎ। বহবো ভি- ষজো নাত্র ভেষজং যোজয়ন্তি হি ॥ কেচিৎ প্রযোজয়ন্ত্যেব মতন্তেষা মথ ব্রুবে। *। যে শীতলেন সলিলেন বি- পিষ্য সম্যক্ চিঞ্চাজ বীজ সহিতাং রজনীং পিবন্তি। তেষাং ভবন্তি ন কদাচিদপীহ দেহে পীড়াকরা জগ- তি শীতলিকা বিকারাঃ ॥ নোট।

মসেন সহিতং সিতচন্দনেন বাসারসেন মধুকং মধুকেন বাথ। আদৌ পিবন্তি সুমনা স্বরসেন নিশং তে নাপ্নুবন্তি ভুবি শীতলিকা বিকারান্ ॥ মোচারসেন কদলীস্তম্ভজলেন। মধূকেন বাথ অথবা মধুনা। আদৌ পূর্বরূপে জ্বরাগমনমাত্রে। সুমনাস্বরসেন জাতীপত্ররসেন। শীতলাসুক্রিযাকার্য্যা শীতলা রক্ষযা সহ। বধ্নীযা নিম্বপত্রাণি পরিতো ভবনান্তরে॥ কদাচিদপি নোকার্য্য মুচ্ছিষ্টস্য প্রবেশনং। স্ফোটেষ্বধিকদাহেষু রক্ষারেণুঃ করো হিতঃ॥ তেন তে শোষমাযান্তি পূপাকং ন ভজন্তি চ। রক্ষারেণুৎকরঃ শুষ্কগোমযভস্মচূর্ণতঃ॥ চন্দনং বালকো মুস্তং গুড়ূচী দ্রাক্ষযা সহ। এষাং শীতকষাযস্ত শীতলা জ্বর নাশনঃ॥ শীতকষাযো হিমঃ। জপ হোমোপহারৈশ্চ দান স্বস্ত্যযনার্চনৈঃ। বিপ্র গো শম্ভু গৌরীণাং পূজনৈ স্তাং সমং নযেৎ॥ স্তোত্রঞ্চ শীতলা দেব্যাঃ পঠেৎ শীতলিনো হন্তিকে। ব্রাহ্মণঃ শ্রদ্ধযা যুক্ত স্তেন শাম্যতি শীতলা॥ * ॥ স্কন্দ উবাচ। ভগবন্ দেবদেবেশ শীতলাযাঃ স্তবং শুভং। বক্তু মর্হস্যশেষেণ বিস্ফোটক ভযাপহং॥ ঈশ্বর উবাচ। নমামি শীতলাং দেবীং রাসভস্থাং দিগম্বরীং। মার্জনী কলশোপেতাং সূর্পালঙ্কৃত মস্তকাং॥ বন্দেহং শীতলাং দেবীং সর্বরোগ ভযাপহাং। যামাসাদ্য নিবর্ত্তেত বিস্ফোটক ভযং মহৎ॥ শীতলে শীতলে চেতি যো ব্রূযাদ্দাহ পীডিতঃ। বিস্ফোটক ভযং ঘোরং ক্ষিপ্রং তস্য প্রণশ্যতি॥ যস্ত্বা মুদক মধ্যে তু ধৃত্বা সংপূজযেন্নরঃ। বিস্ফোটক ভযং ঘোরং গৃহে তস্য ন জাযতে॥ শীতলে জ্বর দগ্ধস্য পূতি গন্ধগতস্য চ। প্রণষ্ট চক্ষুষঃ পুংস স্ত্বা মাহু র্জীবনৌষধং॥ শীতলে তনুজান্রোগান্ নৃণাং হরসি দুস্তরান্। বিস্ফোটক বিশীর্ণানাং ত্বমেকামৃতবর্ষিণী ॥ গলগণ্ড গ্রহারোগা যে চান্যে দারুণা নৃণাং। ত্বদনুধ্যান মাত্রেণ শীতলে যান্তি তে ক্ষযং॥ নমন্ত্রো নৌষধং কিঞ্চিৎ পাপরোগস্য বিদ্যতে। ত্বমেকা শীতলে ত্রাত্রী নান্যাং পশ্যামি দেবতাং॥ মৃণাল তন্তু সদৃশীং নাভি হৃন্মধ্য সংস্থিতাং। যস্ত্বাং বিচিন্তযেদ্দেবী তস্য মৃত্যুর্ন জাযতে॥ অষ্টকং শীতলা দেব্যাযঃ পঠেন্মানবঃ সদা। বিস্ফোটক ভযং ঘোরং গৃহে তস্য ন জাযতে॥ শ্রোতব্যং পঠিতব্যঞ্চ নরৈর্ভক্তি সম-

ন্বিতৈঃ। উপসর্গ বিনাশায পরং স্বস্ত্যযনং মহৎ॥ শীতলাষ্টকমেতদ্ধি ন দেযং যস্য কস্যচিৎ। দাতব্যং হি সদা তস্মৈ ভক্তিশ্রদ্ধান্বিতো হি যঃ॥ ইতি শ্রীস্কন্দপুরাণে কাশীখণ্ডে শীতলাষ্টকস্তোত্রং সমাপ্তং॥

মসূরিকা স্ত্রী মশহরী। মশারি ইতি ভাষা। যথা। দংশাংশ্চ মশকাংশ্চৈব বর্ষাকালে নিবারযেৎ। মসূরিকাভিঃ প্রাবৃত্য মঞ্চশাযিন মচ্যুতং॥ ইতি পাদ্মে ক্রিযাযোগসারে ১২ অধ্যাযঃ॥

মসূরী স্ত্রী পাপরোগঃ। ইতি মেদিনী॥ সতু বসন্তরোগ ইতি প্রসিদ্ধঃ॥ ত্রিবৃৎ॥ রক্তত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ॥

মসৃণং ত্রি অকর্কশং॥ স্নিগ্ধং। ইতি মেদিনী॥

মসৃণা স্ত্রী উমা। মসিনা ইতি ভাষা। ইতি মেদিনী॥

মস্ক ঙ গতৌ। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যমধ্য ইতি দুর্গসিংহঃ। ক্বিপি সংযোগাদেঃ লোপে মক্। মূর্দ্ধন্যমধ্য ইত্যেকে। ক্বিপি সংযোগান্তলোপে মট্। ঙ মস্কতে। ইতি দুর্গাদাসঃ॥

মস্করঃ পুং বংশঃ। ইত্যমরঃ॥ রন্ধ্রুবংশঃ। ইতি রাজনির্ঘণ্টঃ॥

মস্করী পুং ভিক্ষুঃ। ইত্যমরঃ॥ চন্দ্রঃ। ইতি শব্দচন্দ্রিকা॥

মস্জ ও টু শ ঔ স্নানে। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যমধ্যঃ ক্বিপি সংযোগাদিলোপে মক্। ও মগ্নঃ। শ মজ্জতী মজ্জন্তী। টু মজ্জথুঃ। ঔ অনাঙ্ক্ষৎ। স্নাযতে হনেনেতি স্নানমিহ জলান্তঃপ্রবেশঃ। মজ্জতি প্রস্তরো জলে। ইতি দুর্গাদাসঃ॥

মস্তং ক্লী মস্তকং। ইতি দ্বিরূপকোষঃ

মস্তকঃ পুং ক্লী প্রধানাঙ্গং। মাতা ইতি ভাষা। তৎপর্য্যাযঃ। উত্তমাঙ্গং২ শিরঃ৩ শীর্ষং৪ মূর্দ্ধা৫। ইত্যমরঃ॥ মুণ্ডং৬ শিরং৭। ইতি শব্দরত্নাবলী॥ বরাঙ্গং৮। ইতি জটাধরঃ॥ কং৯ পুণ্ডং১০ মৌলিঃ১১ কপালং১২ কেশভূঃ১৩। ইতি রাজনির্ঘণ্টঃ॥ তস্য শুভাশুভ লক্ষণং যথা। ছত্রাকারৈঃ শিরোভিস্তু নৃপানিম্নশিরা ধনী। চিপিটৈশ্চ পিতুর্মৃত্যুর্গবাঢ্যাঃ পরিমণ্ডলৈঃ॥ ঘটমূর্দ্ধা পাপরুচি ধনাদ্যৈঃ পরিবর্জ্জিতঃ। ইতি গারুড়ে ৬৬ অধ্যাযঃ॥*॥ মস্তকে অধোমুখ সহস্রদলকমলমস্তি তৎকর্ণিকাযাং পরমাত্মা তিষ্ঠতি।

যথা। স্বাঙ্কে উত্তানৌ করৌ কৃত্বা সোঽহমিতি জীবাত্মানং হৃদয়স্থং দীপকলিকাকারং মূলাধারস্থ স্বয়ম্ভুলিঙ্গণ্ডলিন্যা সহ সুসুম্না বর্ত্মনা মূলাধার স্বাধিষ্ঠান মণিপূরানাহত বিশুদ্ধাজ্ঞাখ্য ষট্‌চক্রাণি ভিত্ত্বা শিরোবস্থিতাধোমুখ সহস্রদল কমল কর্ণিকান্তর্গত পরমাত্মনি সংযোজ্যেত্যাদি তন্ত্রসারঃ॥ তথাচ। সুসুম্না বর্ত্মনা সোঽহমিতি মন্ত্রেণ যোজযেৎ। সহস্রারে শিরঃ স্থানে পরমাত্মনি দেশিকঃ॥ ইতি গৌতমীযতন্ত্রং॥

মস্তকস্নেহঃ পুং শিরোমজ্জা। যথা। গোদন্ত মস্তকস্নেহো মস্তিষ্কো মস্তুলুঙ্গকঃ। ইতি হেমচন্দ্রঃ॥

মস্তকাখ্যঃ পুং বৃক্ষশিরঃ। ইতি শব্দচন্দ্রিকা॥

মস্তদারু ক্লী দেবদারু। ইতি ভাবপ্রকাশঃ॥

মস্তমূলকং ক্লী শিরোধঃ। ঘাড ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

মস্তিষ্কং ক্লী মস্তকভবঘৃতাকারস্নেহঃ। মগজ ইতি পারস্যভাষা। তৎপর্য্যাযঃ। গোর্দ্দং ২। ইত্যমরঃ॥ গোদং ৩ মস্তকস্নেহঃ ৪ মস্তুলুঙ্গকঃ ৫। ইতি হেমচন্দ্রঃ॥

মস্তু ক্লী দধিভবমণ্ডং। দধিরমাৎ ইতি ভাষা। ইত্যমরঃ॥ দধিজলং। দ্বিগুণবারিযুতংদধি। অস্য গুণাঃ। উষ্ণাম্লং রুচি পিত্তদং শ্রমহরং বল্যং কষাযং সরং ভুক্তিচ্ছন্দকরং তৃষোদরগদ প্লীহার্শসাং নাশনং। স্রোতঃ শুদ্ধিকরং কফানিলহরং বিষ্টম্ভ শূলাপহং পাণ্ডু শ্বাস বিকার গুল্ম শমনং মস্তু প্রশস্তং লঘু॥ ইতি রাজনির্ঘণ্টঃ॥ অপিচ। মস্তু ক্লমহরং স্বল্পং লঘু ভুক্তাভিলাসকৃৎ। স্রোতোবিশোধনং হ্লাদি কফ তৃষ্ণাবিলাপহং॥ অবৃষ্যং প্রীণনং শীঘ্রং ভিনত্তি মলসংগ্রহং। ইতি ভাবপ্রকাশঃ॥

মস্তুলুঙ্গঃ পুং মস্তিষ্কং। ইতি ত্রিকাণ্ডশেষঃ॥

মস্তুলুঙ্গকঃ পুং মস্তিষ্কং। ইতি হেমচন্দ্রঃ॥

মহ পূজে। ইতি কবিকল্পদ্রুমঃ॥ মহতি। ইতি দুর্গাদাসঃ॥

মহ ইক ত্বিষি। ইতি কবিকল্পদ্রুমঃ॥ ইক মংহযতি। ত্বিষি দীপ্তৌ। ইতি দুর্গাদাসঃ॥

মহ ইঙ বৃদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ ই মংহতে। ঙ মংহতে। ইতি দুর্গাদাসঃ॥

মহ ভক পূজে। ইতি কবিকল্পদ্রুমঃ ॥ মহযতি। ইতি দুর্গাদাসঃ ॥

মহঃ পুং উৎসবঃ। ইত্যমরঃ ॥ তেজঃ। ইতি মেদিনী ॥ যজ্ঞঃ। ইতি শব্দরত্নাবলী ॥ মহিষঃ। ইতি হেমচন্দ্রঃ ॥

মহঃ(স) স্ত্রী উৎসবঃ ॥ তেজঃ। ইতি মেদিনী ॥ যজ্ঞঃ। ইতি শব্দরত্নাবলী ॥

মহক্কঃ পুং বহুলামোদঃ। ইতি জটাধরঃ ॥

মহৎ ক্লী রাজ্যং। ইতি মেদিনী ॥

মহৎ ত্রি বৃদ্ধঃ। ইতিমেদিনী ॥ তৎপর্য্যাযঃ। বিশঙ্কটং ২ পৃথু ৩ বৃহৎ ৪ বিশালং ৫ পৃথুলং ৬ বড্রং ৭ উরু ৮ বিপুলং ৯। ইত্যমরঃ ॥ পীনং ১০ বিস্তীর্ণং ১১। ইতি শব্দরত্নাবলী ॥

মহতী স্ত্রী বল্লকীভেদঃ। ইতি মেদিনী ॥ নারদবীণা ॥ বৃহৎপ্রমাণা। ইত্যমরটীকাযাং ভরতঃ ॥ বৃহতী ॥ বার্ত্তাকী। ইতি রাজনির্ঘণ্টঃ ॥

মহতীদ্বাদশী স্ত্রী শ্রবণদ্বাদশী। যথা। মাসি ভাদ্রপদে শুক্লে দ্বাদশী শ্রবণান্বিতা। মহতীদ্বাদশী জ্ঞেযা উপবাসে মহাফলা ॥ ইতি গারুডে ১৪১ অধ্যাযঃ ॥

মহত্তত্ত্বং ক্লী চতুর্বিংশতিতত্ত্বান্তর্গত দ্বিতীযতত্ত্বং। তত্তু প্রকৃতে কার্য্যং। সমষ্টিবুদ্ধিস্বরূপং। তৎপর্য্যাযঃ। যথা। মহান্নাত্মা মতি বিষ্ণু র্জিষ্ণুঃ শম্ভুশ্চ বীর্য্যবান্। বুদ্ধিঃ প্রজ্ঞোপলব্ধিশ্চ তথা খ্যাতি ধৃতিঃ স্মৃতিঃ ॥ পর্য্যায বাচকৈঃ শব্দৈর্মহানাত্মা বিভাব্যতে। তং জানন্ ব্রাহ্মণো বিদ্বান্ প্রমোহং নাধিগচ্ছতি ॥ ইতি মহাভারতে আশ্বমেধিকপর্ব্ব ॥ অপিচ। একা মূর্ত্তি স্ত্রযো ভাগা ব্রহ্ম বিষ্ণু মহেশ্বরাঃ। সবিকারাৎ প্রধানাত্তু মহত্তত্ত্বং প্রজাযতে ॥ মহানিতি যতঃ খ্যাতির্লোকানাং জাযতে সদা। অহঙ্কারশ্চ মহতো জাযতে মানবর্দ্ধনঃ ॥ ইতি মাৎস্যে ২ অধ্যাযঃ ॥

মহত্তরঃ পুং স্ত্রী শূদ্রঃ। যথা। শূদ্রঃ স্যাৎ পাদজো দাসো গ্রামকূটো মহত্তরঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অতিশযমহতি ত্রি ॥

মহত্ত্বং ক্লী মহতোভাবঃ। যথা। মহত্ত্বং যদ্বিধে হেতু রিন্দ্রিযং করণং মতং। ইতি ভাষাপরিচ্ছেদঃ ॥ মহত্ত্বং ষড্বিধ ইতি। দ্রব্য প্রত্যক্ষে মহত্ত্বং সমবায সম্বন্ধেন কারণং। দ্রব্য সমবেতানাং গুণকর্ম্ম সামান্যানাং প্রত্যক্ষে স্বাশ্রয সমবায

সম্বন্ধেন। দ্রব্য সমবেত সমবেতা-না: রূপত্বাদীনাং প্রত্যক্ষে স্বাশ্রয় সমবেত সমবায় সম্বন্ধন কারণং। ইতি সিদ্ধান্তমুক্তাবলী ॥

মহর্লোকঃ পুং ভূরাদিসপ্তলোকান্তগতচতুর্থলোকঃ। যথা। ভূ ভুবঃ স্বর্মহশ্চৈব জনশ্চ তপ এব চ। সত্যলোকশ্চ সপ্তৈতে লোকাস্তু পরিকীর্ত্তিতাঃ॥ চতুর্মুখ দিনস্যান্তে জগদেতচ্চরাচরং। তদা হি দহ্যতে সর্বং ত্রৈলোক্যং ভূ ভুবাদিকং ॥ জনং প্রযান্তি তাপার্ত্তা মহর্লোক নিবাসিনঃ। ইতি বহ্নিপুরাণং॥ চতুর্থে তু মহর্লোকে তিষ্ঠন্তে কল্পবাসিনঃ। ইতি দেবীপুরাণং ॥

মহর্ষভী স্ত্রী কপিকচ্ছুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহর্ষিঃ পুং ব্যাসাদিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অস্য ব্যুৎপত্ত্যাদি যথা ঋষি হিংসা গতো ধাতুর্বিদ্যা সত্য তপঃ শ্রুতৈঃ। এষ সন্নিচযো যস্মাদ্ব্রাহ্মণশ্চ ততস্ত্বৃষিঃ ॥ বিবৃত্তি সমকালন্তু বুদ্ধ্যা ব্যক্তিমৃষি স্তুযং। ঋষতে পরমং যস্মাৎপরমর্ষি স্ততঃ স্মৃতঃ॥ গত্যর্থাদৃষতে র্ধাতো র্নাম নিবৃত্তি কারণং। যস্মাদেষ স্বয়ম্ভূত স্তস্মাচ ঋষিতা মতা।...

শ্বরাঃ স্বয়ম্ভুবা ব্রহ্মণো মানসাঃ সুতাঃ। বিবর্দ্ধমানৈস্তৈস্তু বুদ্ধ্যা মহান্ পরিগতঃ পরঃ ॥ যস্মাদৃষিঃ পরত্বেন মহাংস্তস্মান্মহর্ষযঃ। ঈশ্বরাণাং সুতা স্তেষাং মানসা শ্চৌরসাশ্চ বৈ ॥ ঋষয স্তৎ পরত্বেন ভূতাদি ঋষয স্ততঃ। ঋষিপুত্রা ঋষীকাস্তু মৈথুনাদ্গর্ভ সম্ভবাৎ ॥ পরত্বেনর্ষয স্তেবৈ ভূতাদি ঋষিকা স্ততঃ। ঋষীকাণাং সুতা যে বৈ বিজ্ঞেযা ঋষিপুত্রকাঃ ॥ শ্রুত্বা ঋষং পরত্বেন নাম তস্মাৎ শ্রুতর্ষযঃ। অব্যক্তাত্মা মহাত্মা হঙ্কারাত্মা তথৈব চ ॥ ভূতাত্মা চেন্দ্রিযাত্মা চ তেষান্তু জ্ঞানমুচ্যতে। ইত্যেব মৃষিজাত্যন্ত পঞ্চনামাভিঃ শৃণু ॥ ভৃগু মরীচি রত্রিশ্চ অঙ্গিরাঃ পুলহঃ ক্রতুঃ। মনুর্দক্ষো বশিষ্ঠশ্চ পুলস্ত্য শ্চেতি তে দশ ॥ ব্রহ্মণো মানসা হ্যেতে উৎপন্নাঃ স্বয মীশ্বরাঃ। পরত্বেনর্ষয স্তস্মাদ্ভূতা স্তস্মান্মহর্ষযঃ ॥ ইতি মাৎস্যে ১২০ অধ্যাযঃ ॥

মহল্লকঃ পুং অন্তঃপুররক্ষকঃ। তৎপর্য্যাযঃ। সৌবিদল্লঃ ২ কঞ্চুকী ৩ স্থাপত্যঃ৪ সৌবিদঃ ৫ বিদাঙ্কঃ ৬। ইতি জটাধরঃ॥ সৌবিদল্লকঃ ৭ অন্তর্বংশিকঃ ৮। ইতি শব্দরত্নাবলী॥

মহল্লিকঃ পুং অন্তঃপুররক্ষকঃ। খোজা ইতি ভাষা। তস্য লক্ষণং। যথা। মুষ্কশূন্যো হনুপস্থো যঃ স্ত্রীস্বভাবো মহল্লিকঃ। ইতি শব্দমালা॥

মহসং ক্লী জ্ঞানং॥ প্রকারঃ। ইত্যুণাদিকোষঃ॥

মহা স্ত্রী গোপবল্লী। গোরক্ষচাকলিযা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥ স্ত্রীগবী। ইতি শব্দরত্নাবলী॥

মহাকচ্ছঃ পুং সমুদ্রঃ॥ বরুণঃ। ইতি মেদিনী॥ পর্ব্বতঃ। ইতি শব্দরত্নাবলী॥

মহাকণ্টকিনী স্ত্রী বিশ্বসারকং। ফণিমনসা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

মহাকন্দঃ পুং রসোনকঃ। ইত্যমরঃ॥ মূলকং। ইতি শব্দরত্নাবলী॥ চাণক্যমূলকং॥ রক্তলশুনং। রাজপলাণ্ডুঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাকপিত্থঃ পুং বিল্ববৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মহাকরঞ্জঃ পুং করঞ্জবিশেষঃ। বড়করঞ্জা ইতি ভাষা। তৎপর্য্যাযঃ। ষড়গ্রন্থা ২ হস্তিচারিণী ৩ উদকীর্য্যঃ ৪ বিষঘ্নী ৫ কাকঘ্নী ৭ মদহস্তিনী ৭ শারঙ্গেষ্টা ৮ মধুমতী ৯ রসাযনী ১০ হস্তিরোহণকঃ ১১ হস্তিকরঞ্জকঃ ১২ সুমনাঃ ১৩ কাকভাণ্ডী ১৪ মধুযুক্তা ১৫। অস্য গুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। কটুত্বং। বিষকণ্ডূ বিচর্চিকা জন্তু ত্বগ্দোষ ব্রণনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহাকর্ণিকারঃ পুং আরগ্বধঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাকাযঃ পুং নন্দী। স চ শিবদ্বারপালঃ। ইতি ত্রিকাণ্ডশেষঃ॥ হস্তী। ইতি কেচিৎ॥ বৃহচ্ছরীরং॥ তদ্বতি ত্রি॥

মহাকার্ত্তিকী স্ত্রী রোহিণীনক্ষত্রযুক্তা কার্ত্তিকীপূর্ণিমা। যথা। প্রাজাপত্যং যদা ঋক্ষং তিথেস্তস্যাং নরাধিপ। সা মহাকার্ত্তিকী প্রোক্তা দেবানামপি দুর্লভা। ইতি পাদ্মে ২ খণ্ডে ৩ অধ্যাযঃ॥

মহাকালঃ পুং বিষ্ণুস্বরূপাখণ্ডদণ্ডাযমানসময়ঃ। যথা। কালো ঘটবান্ মহাকালত্বাৎ। ইতি সিদ্ধান্তলক্ষণং॥ মহাদেবঃ॥ প্রমথগণবিশেষঃ। ইতি মেদিনী॥ লতাবিশেষঃ। মাকাল ইতি ভাষা। তৎপর্য্যাযঃ। উরুকালঃ ২ কিম্পাকঃ ৩ কাকমর্দ্দকঃ ৪। ইতি রত্নমালা॥

কাকমর্দ্দঃ ৫ দেবদালিকা ৬ দালা
৭ দালিকা ৮ জগঙ্গঃ ৯ ঘোষকা-
কৃতিঃ ১০ । ইতি রাজনির্ঘণ্টঃ ॥
শিবপুত্রবিশেষঃ । তস্য জন্মবৃত্তান্তং
যথা । শ্রীদেবা ঊচুঃ । এষ বৈশ্বানরঃ
শ্রীমান্ ভূরিতেজোময়ো বলী । ম-
হামৈথুনবীজন্তু ত্বত্তেজঃ সংগ্রহী-
ষ্যতি ॥ ইত্যুক্ত্বা ত্রিদশাঃ সর্ব্বে
বীতিহোত্রং পুরঃস্থিতং । তস্মৈ নি
দেশযামাসুঃ সম্ভবে সর্ব্বহেতবে ॥
ততঃ ষড়ঙ্গং স্বং রেতো ব্যাদিতে দ-
হনাননে। উৎসসর্জ্জ মহাবাহু র্মহা-
মৈথুন কারণং ॥ অগ্নাবুৎসৃজ্যমা-
নস্য তেজসঃ শশভূদ্ভৃতঃ । অণুর্ব্বা
মতি স্বল্পং গিরিপৃষ্ঠে পপাত হ ॥
তযোঃ কারণযোঃ সদ্যঃ সম্ভূতৌ
শঙ্করাত্মজৌ । একো ভৃঙ্গসমঃ কৃষ্ণো
ভিন্নাঞ্জন নিভোঽপরঃ॥ ভৃঙ্গী তস্য
তদা ব্রহ্মা নাম ভৃঙ্গীতি চাকরোৎ ।
মহাকৃষ্ণৈক রূপস্য মহাকালেতি
লোকভৃৎ ॥ ততস্তৌ পালযামাস
শঙ্করঃ পুত্রযোৎকরৈঃ । অপর্ণা
চাপি তথা ক্রমাত্তাবভিবর্দ্ধিতৌ
॥ পুত্রৌ তৌ মহাত্মানৌ হরেণ
প্রতিপালিতৌ । ক্রমাদ্‌গণেশৌ কৃ-
ত্বা তৌ হরো দ্বারি ন্যবোজয়ৎ ॥
ইতি কালিকাপুরাণে ৪৫ অধ্যায়ঃ ॥

॥ * ॥ তস্য বানরমুখ কারণং জ-
ন্মান্তরঞ্চ যথা । অথৈকদো নর্ম্মা সা-
র্দ্ধং নিগূঢে রতিমন্দিরে । নর্ম্মাকরো
মহাদেবো মোদযুক্তো রতিপ্রিয়ঃ
॥ যদা সা নর্ম্মণে জাতা গৌরী স্মর-
হরান্তিকং ॥ তদা ভৃঙ্গি মহাকালৌ
দ্বাস্থৌ দ্বারি প্রতিষ্ঠিতৌ ॥ নর্ম্মাব-
সানে সা দেবী মুক্ত ধম্মিল্ল বন্ধনা ।
গ্রন্থিহীন গলদ্‌গাত্রা বস্ত্র মাল্য-
পাণিনা ॥ ব্যস্তহারা গন্ধপুষ্পৈ রা-
জন্তৈর্নাতি শোভনা । বিলুপ্তকঙ্কনা
দষ্ট দশনচ্ছদবিভ্রমা । নিঃসৃতা রতি
সঙ্কেতশালাযা জলজাননা ॥ ঈষ-
দাঘূর্ণনযনা সিক্তা স্বেদবিন্দুভিঃ ।
তাং নিঃসরন্তীং সহসা তথা ভূতা
মনিন্দিতাং ॥ অযোগ্যাং বীক্ষিতুং
চান্যৈ র্বৃষধ্বজ মতে প্রিয়ং । দদৃশতু
র্মহাত্মানৌ নাতি হৃষ্টাত্মমানসৌ ॥
ভৃঙ্গী চাপি মহাকালঃ প্রাপ্তকাল-
শ্চ কোপতঃ । দৃষ্ট্বা তৌ মাতরং দী-
নৌ তদা ভূতা বধো মুখৌ ॥ চিন্তাঞ্চা
জগ্মতু স্তীব্রাং নিশশ্বসতু রুত্তনং ।
তৌ পশ্যন্তৌ তদা দেবী দদর্শ হি-
মবৎসুতা ॥ চুকোপ চ তদাপর্ণা বা-
ক্যঞ্চৈতদুবাচ হ । এবম্ভূতাঙ্ক মাং
কস্মাদসম্বদ্ধা মপশ্যতাং ॥ ভবন্তৌ
তনযৌ শুদ্ধৌ স্ত্রী মর্য্যাদা বিবর্জ্জি-

তৌ। তস্মাদিমৌ মনর্য্যাদাং ভবন্তৌ নিরপত্রপৌ ॥ অন্তর্হিতাং ততো ভূযাভ্যাংতো র্জন্মমানুষে। মানুষীং যোনি মাসাদ্য মাতরীক্ষণদোষতঃ ॥ ভবিষ্যতো ভবন্তৌ তু শাখামৃগ মুখৌ ভুবি। ইতি তারমযা শপ্তৌ হরপুত্রৌ মহামতী ॥ অথোমযা সনং দেবো বিযতা চন্দ্রশেখরঃ। আজগাম তদা গচ্ছন্ প্রাসাদং প্রতি তং নৃপ ॥ দদৃশেথ চরন্তীং তা মুমাযাঃ সদৃশীং গুণৈঃ। সর্ব্ব লক্ষণ সম্পূর্ণাং মাধবস্যেব মাধবীং ॥ তাং দৃষ্ট্বা ন্যগদদ্দেবীং গৌরীং বৃষভকেতনঃ। স্মিত প্রসন্ন বদনঃ প্রহসন্নিব ভাবিনীং ॥ ঈশ্বরউবাচ। ইযং তে মানুষী মূর্ত্তিঃ প্রিয়ে তারাবতীতি যা। ভৃঙ্গী মহাকালযোস্তে জন্মনে বিহিতা স্বযং ॥ ত্বত্তো হ্যনন্যকান্তো হং নান্যাং গন্তু মিহোৎসহে। ত্ব মিদানীং স্বযং চাস্যাং মূর্ত্ত্যাং প্রবিশ ভাবিনি ॥ তত উৎপাদযিষ্যামি মহাকালঞ্চ ভৃঙ্গিণং। শ্রীদেব্যুবাচ। মমৈব মানুষী মূর্ত্তি রিযং বৃষভকেতন। বিশামিতে হত্র বচনাদুৎপাদয সুত দ্বযং ॥ প্রবিবেশ ততো দেবী স্বযং তারাবতী তনৌ। মহাদেবো হপি তস্যাস্ত কামার্থং সমুপস্থিতঃ ॥ ততঃ সাপর্ণযাবিষ্টা দেবী তারাবতী সতী। রমমানং মহাদেবং স্বযমেবাভজন্মুদা ॥ তস্মিন্ কালে হভবদ্গর্ত্তঃ কপালী চাস্থিমাল্যধৃক্। কামাবসানে তস্যাস্তু সদ্যঃ জাতং সুত দ্বযং। অভবদ্দ্বিজশার্দূল তথা শাখামৃগাননং। ইতি কালিকাপুরাণে ৪৬। ৪৯ অধ্যাযঃ॥ ❀ ॥ বাণাসরস্য মহাকালত্বং যথা। ঋষযঊচুঃ। কথিতো ভবতা সর্গঃ সংশযা অপি শাতিতাঃ। ত্বৎ প্রসাদামহাভাগ কৃত কৃত্যা বযং গুরো ॥ ভূযশ্চ শ্রোতুমিচ্ছামো বযমেতদ্দ্বিজোত্তম। কোন্যো ভৃঙ্গী মহাকালো জাতৌ বেতালভৈরবৌ ॥ বেতালঞ্চ মহাকালং ভৈরবং ভৃঙ্গিণং তথা। শৃণু মে দ্বিজশার্দূল কথমেষাং চতুষ্টযং ॥ মার্কণ্ডেয উবাচ। ভূবং গতে মহাকালে মানুষত্বে চ ভৃঙ্গিণি। বেতালভৈরবাখ্যে চ তথা ভূতে দ্বিজোত্তমাঃ। বরলব্ধে চ বেতালে ভৈরবে তেন সংগতে অন্ধকং তপসা যুক্তং ভৃঙ্গিণঞ্চাকরোদ্ধরঃ ॥ অন্ধকস্তু হরং পূর্ব্বং বিরুধ্যাপদমাগতঃ। পশ্চাদ্ধরং সমারাধ্য পুনর্ভূত্তস্য সো হসুরঃ॥ ভৃঙ্গিমে ভ্রাম্ভৃঙ্গিণং তং সংজ্ঞযা চাকরোদ্ধরঃ

। স্নেহেন তু মহাকালংবাণং বলি সুতং হরঃ ॥ বিষ্ণুনা ছিন্ন বাহুং তং মহাকাল মথাকরোৎ । এবং মুনিবরা স্তেষাং সংজ্ঞাভক্ষ চতুষ্টয়ং ॥ বেতালো ভৈরবো ভৃঙ্গী মহাকালে অনুক্রমাৎ । ইতি কালিকাপুরাণে ৮৫ অধ্যায়ঃ ॥ * ॥ তস্য ধ্যানাদি যথা । মহাকালং যজেদ্দেব্যা দক্ষিণে ধূম্রবর্ণকং । বিভ্রতং দণ্ড খট্টাঙ্গৌ দংষ্ট্রা ভীমমুখং শিশুং ॥ ব্যাঘ্রচর্ম্মাবৃতকটিং তুন্দিলং রক্তবাসসং । ত্রিনেত্র মূর্দ্ধ্ব কেশঞ্চ মুণ্ডমালা বিভূষিতং ॥ জটা ভার লসচ্চন্দ্র খণ্ডমগ্রং জ্বলন্নিভং । তথাচ শ্যমাস্ত্রীকল্পে । দেব্যাস্তু দক্ষিণে ভাগে মহাকালং প্রপূজযেৎ । হুং ক্ষ্ৌং যাং রাং লাং বাং ক্রোং মহাকালভৈরব সর্ব্ব বিঘ্নান্নাশয নাশয হ্রীং শ্রীং ফট্ স্বাহা ইত্যনেন পাদ্যাদিভি রারাধ্য ত্রি স্তর্পযিত্বা মূলেন দেবীং পঞ্চোপচারৈঃ পূজযেৎ ॥ তথাচ কালীতন্ত্রে । মহাকালং যজেদ্যত্নাৎ পশ্চাদ্দেবীং প্রপূজযেৎ । কালীকল্পে । কবচং ক্ষ্ৌং সমুদ্ধৃত্য যাং রাং লাং বাঞ্চ ক্রোন্ততঃ । মহাকাল ভৈরবেতি সর্ব্ব বিঘ্নান্নাশযেতি চ ॥ নাশযেতি পুনঃপ্রোচ্য মাযাং লক্ষ্মীং ... ষেৎ । ফট্স্বাহযা সমাযুক্তো মন্ত্রঃ সর্ব্বার্থসাধকঃ ॥ ইতি তন্ত্রসারঃ ॥

মহাকালী স্ত্রী মহাকালস্যপত্নী । সাতু পঞ্চবক্ত্রাষ্টভুজকালীবিশেষঃ । ইতি তন্ত্রং ॥ জিনানাং চতুর্বিংশতি শাসনদেবতান্তর্গতদেবীবিশেষঃ । ইতি হেমচন্দ্রঃ ॥ * ॥ অথ মহাকালী মন্ত্রঃ । ওঁ ফ্রেং ফ্রেং ক্রোং ক্রোং পশূন্ গৃহাণ হুং ফট স্বাহা । শ্মশানভৈরবী মন্ত্রেণ যাবৎ ক্রূর কর্ম্মণি প্রযোগঃ কর্ত্তব্যঃ । অথ মহাকালী মন্ত্র প্রযোগঃ । তত্র ন্যাস শুদ্ধ্যাদিকং ন কর্ত্তব্যং । তথা চ ন্যাস শুদ্ধ্যাদিকং কিঞ্চিন্মাত্র নকার্য্যা বিচারণা । কৃষ্ণতোযৈশ্চ সংপূর্ণে কৃষ্ণদ্রুমেথ কালিকাং ॥ পঞ্চবক্ত্রাং মহারৌদ্রীং প্রতিবক্ত্র ত্রিলোচনাং । শক্তি শূল ধনু র্বাণ খড়্গ খেট বরাভযান্ ॥ দক্ষাদক্ষ ভুজৈ দেবীং বিভ্রাণাং ভূরি ভূষণাং । ধ্যাত্বৈবং সাধকঃ সাধ্যং সাধযেন্মনসেপ্সিতং ॥ ব্রাহ্মী মাহেশ্বরী চৈব কৌমারী বৈষ্ণবী তথা । বারাহী চ তথা চৈন্দ্রী চামুণ্ডা চণ্ডিকাষ্টমী পূর্ব্বাদীশান পর্য্যন্তং স্তম্ভস্থানে স্থিতা ইমাঃ ॥ তত্র ক্রমঃ । দেবীং ধ্যাত্বা যথা বিধ্যুপচারেণ সংপূজ্য ব্রাহ্ম্যাদ্যষ্ট

শক্তীঃ পূর্ব্বাদি ক্রমেণ পূজয়েৎ। তথা। নামোচ্চারণ সংবন্ধং বহ্নৌ পুজ্বলিতেম্বরে। জুহুয়াদ্বৈরিণাং শুদ্ধো দেবী মন্ত্রং জপং স্তথা॥ স নিধঃ পিচুমর্দ্দস্য তথা বিভীতকাণ্ঠিকাঃ। গৃহধূম শ্মশানাস্থি বিভীতাঙ্গার হোমতঃ॥ সপ্তাহা দ্বৈরিণং হন্তি কালিকা মন্ত্র যোগতঃ। উচ্চাটনং চাপরাহ্নে সন্ধ্যায়াং মারণং তথা॥ দক্ষিণস্যাং দিশি স্থিত্বা গ্রামাদে র্দক্ষিণা মুখঃ। ইতি তন্ত্রসারঃ॥

মহাকাব্যং ক্লী কাব্যশাস্ত্রবিশেষঃ। তৎপর্য্যায়ঃ। সর্গবন্ধঃ ২। ইতি ত্রিকাণ্ডশেষঃ॥ তস্য লক্ষণং যথা। সর্গবন্ধো মহাকাব্যং তত্রৈকো নায়কঃ সুরঃ। সদ্বংশ ক্ষত্রিযো বাপি ধীরোদাত্ত গুণান্বিতঃ॥ একবংশভবা ভূপাঃ কুলজা বহবো হপিবা। শৃঙ্গার বীর শান্তানা মেকো হঙ্গী রস ইষ্যতে॥ অঙ্গানি সর্ব্বে হপি রসাঃ সর্ব্বে নাটক সন্ধযঃ। ইতিহাসোদ্ভবং বৃত্ত মন্যদ্বা সজ্জনাশ্রযং॥ চত্বার স্তত্র বর্গাঃ স্যু স্তেষ্বেকঞ্চ ফলং ভবেৎ। আদৌ নমস্ক্রিয়াশীর্ব্বা বস্তুনির্দ্দেশ এব বা॥ কৃচিন্নিন্দা খলাদীনাং সতাঞ্চ গুণকীর্ত্তনং। একবৃত্তময়ৈঃ পদ্যৈ রবসানে হন্য বৃত্তকৈঃ॥ নাতি স্বল্পা নাতি দীর্ঘাঃ সর্গা অষ্টাধিকা ইহ। নানা বৃত্ত মযঃ ক্বাপি সর্গঃ কশ্চন দৃশ্যতে॥ সর্গান্তে ভাবি সর্গস্য কথাযাঃ সূচনং ভবেৎ। সন্ধ্যা সূর্য্যেন্দু রজনী প্রদোষ ধ্বান্ত বাসরাঃ॥ প্রাত র্মধ্যাহ্ন মৃগযা শৈলর্তু বন সাগরাঃ। সম্ভোগ বিপ্রলম্ভৌ চ মুনি স্বর্গ পুরাধ্বরাঃ॥ রণ প্রযাণো পযম মন্ত্র পুত্রোদযাদযঃ। বর্ণনীযা যথা যোগং সাঙ্গোপাঙ্গা অমী ইহ॥ কবে র্বৃত্তস্য বা নাম্না নাযকস্যেতরস্য বা। নামাস্য সর্গোপাদেয কথযা সর্গনাম তু॥ ইতি সাহিত্যদর্পণং॥ *॥ মহাকাব্যগ্রন্থা যথা। কালিদাসকৃত কুমারসম্ভব রঘুবংশ মেঘদূতাঃ। ভর্তৃহরি কৃত ভট্টিকাব্যং। ভারবিকৃত কিরাতার্জ্জুনীযং। শ্রীহর্ষকৃত নৈষধীয চরিতং। মাঘকৃত শিশুপালবধশ্চেত্যাদযঃ॥

মহাকুমুদা স্ত্রী কাশ্মরী। ইতি রাজনির্ঘণ্টঃ॥

মহাকুম্ভী স্ত্রী কট্ফলঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাকুলঃ ত্রি উত্তমকুলজাতঃ। তৎ

পর্য্যায়ঃ । অলীনঃ ২ আর্য্যঃ ৩॥ সভ্যঃ ৪ সজ্জনঃ ৫ সাধুঃ ৬। ইত্যমরঃ ॥ অল্যঃ ৭ অভিজাতঃ ৮ কৌলেয়কঃ ৯ জাত্যঃ ১০। ইতি হেমচন্দ্রঃ ॥ মাহাকুলঃ ১১ কৌলেয়ঃ ১২ কৌলেয়কঃ ১৩। ইত্যমরটীকা ॥ অলজঃ ১৪ সাধুজঃ ১৫ অলশ্রেষ্ঠঃ ১৬। ইতি শব্দরত্নাবলী ॥

মহাকুলীনঃ ত্রি মহাকুলঃ। যথা। মহাকুলীন ঐক্ষ্বাকে বংশে দাশরথি স্মা। পিতুঃ প্রিয়ঙ্করো ভর্ত্তা ক্ষেমকার স্তপস্বিনাং॥ ইতি ভট্টি পঞ্চমসর্গঃ ॥

মহাকূপঃ পুং বৃহৎকূপঃ। তৎপর্য্যায়ঃ। অরঘট্টঃ ২। ইতি জটাধরঃ ॥

মহাকুলঃ পুং মহাকুলঃ। সৎকুলঃ। ইতি বিশ্বপকোষঃ ॥

মহাকোশফলা স্ত্রী দেবদালীলতা। ইতি রাজনির্ঘণ্টঃ ॥

মহাকোশাতকী স্ত্রী হস্তিঘোষা। ইতি রাজনির্ঘণ্টঃ ॥

মহাগদঃ পুং জ্বরঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহাগন্ধং ক্লী হরিচন্দনং ॥ বোলং। ইতি রাজনির্ঘণ্টঃ ॥

মহাগন্ধঃ পুং জটাজূটঃ। ইতি রাজনির্ঘণ্টঃ ॥ জলবেতসঃ। ইতি শব্দচন্দ্রিকা ॥

মহাগন্ধা স্ত্রী নাগবলা॥ কেবিকাপুষ্পং। ইতি রাজনির্ঘণ্টঃ ॥ চামুণ্ডা। যথা। চামুণ্ডা চর্ব্বিকা চর্ম্মমুণ্ডা মার্জ্জারকর্ণিকা। কর্ণমোটা মহাগন্ধা ভৈরবী চ কপালিনী ॥ ইতি হেমচন্দ্রঃ ॥

মহাগবঃ পুং গবয়ঃ। যথা। বনগৌর্গবয়ঃ প্রোক্তো বলভদ্রো মহাগবঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহাগিরিঃ পুং বৌদ্ধভেদঃ। যথা। মহাগিরিঃ সুহস্ত্যাদ্যা বজ্রান্তা দশপূর্ব্বিণঃ। ইতি হেমচন্দ্রঃ ॥ বৃহৎপর্ব্বতশ্চ ॥

মহাগুরুঃ পুং অতিগুরুঃ। স চ পুরুষস্য পিতা মাতা আচার্য্যশ্চ। স্ত্রিয়াঃ পতিঃ। অদত্তকন্যায়াঃ পিতা মাতা চ। যথা। ত্রয়ঃ পুরুষস্যাতিগুরবো ভবন্তি মাতা পিতাচার্য্যশ্চেতি। ইতি বিষ্ণুসূত্রং ॥ পত্যু র্মহাগুরুত্ব মাহ রামায়ণে। মাতো বিশিষ্টং পশ্যামি বান্ধবং বৈ জনস্ত্রিয়াঃ। পতি র্বন্ধু র্গতি র্ভর্ত্তা দৈবতং গুরু রেব চ ॥ শাতাতপঃ। গুরু রগ্নি র্দ্বিজাতীনাং বর্ণানাং ব্রাহ্মণো গুরুঃ। পতি রেকো গুরুঃ স্ত্রীণাং

সর্ব্বত্রাভ্যাগতো গুরুঃ॥ একপদে ॥ ন দত্তস্ত্রীণাং পিতৃ মাতৃ ব্যাবৃত্তিঃ ॥*॥ সপিণ্ড মরণং প্রকৃত্য আশ্বলায়নঃ। ত্রিরাত্র মক্ষারলবণাশিনঃ স্যু দ্বাদশরাত্রং মহাগুরুষু ॥ আচার্য্যশ্চ উপনীয় দদদ্বেদ মাচার্য্যঃ স উদাহৃতঃ। ইতি যাজ্ঞবল্ক্যোক্তঃ। তন্মরণে ত্রিরাত্রাশৌচত্বেন নৈতাদৃক্নিয়মঃ॥ আশ্বলায়নঃ। নৈতস্যাং রাত্রাবন্নং পচেয়ুঃ। অন্নং নপচেয়ুরিত্যনেনোপবাসঃ সূচিতঃ। অথ সম্বরে ত্র্যহমনশ্নন্ত আসীরন্ ইতি বক্ষ্যমাণ বচনাৎ। অথসুস্তরঃ কটাদিঃ। অক্ষারলবণং ক্ষারমৃত্তিকাদি কৃত লবণ ভিন্নং তত্তু সৈন্ধবং সামুদ্রঞ্চ॥ ইতি শুদ্ধিতত্ত্বং ॥*॥ মহাগুরু মরণে সম্বৎসর পর্য্যন্তং নিষিদ্ধ কর্ম্মাণি যথা। মহাগুরু নিপাতে চ কাম্যং কিঞ্চিন্নচাচরেৎ। আর্ত্বিজ্যং ব্রহ্মচর্য্যঞ্চ যাবৎ পূর্ণো ন বৎসরঃ॥ অন্য শ্রাদ্ধং পরান্নঞ্চ গন্ধং মাল্যঞ্চ মৈথুনং। বর্জয়েদ্গুরু পাতে চ যাবৎ পূর্ণো ন বৎসরঃ॥ তীর্থ যাত্রাং বিবাহঞ্চাধ্যাপনং তর্পণন্তথা। সংবৎসরং ন ক্কর্বীত মহাগুরু নিপাতনে। ইতি কর্ম্মলোচনং॥ অপিচ। বিশেষতঃ পিবাপূজাং প্রমীত পিতৃকো দ্বিজঃ। যাবদ্বৎসর পর্য্যন্তং মনসাপি নচাচরেৎ॥ মহাগুরু নিপাতে তু কাম্যং কিঞ্চিন্নচাচরেৎ। আর্ত্বিজ্যং ব্রহ্মযজ্ঞঞ্চ শ্রাদ্ধং দেবযজ্ঞঞ্চ যৎ॥ ইতি কালিকাপুরাণে৫৪ অধ্যায়ঃ॥

মহাগুল্মা। স্ত্রী সোমবল্লী। ইতি রাজনির্ঘণ্টঃ॥

মহাগুহা স্ত্রী পৃশ্নিপর্ণী। ইতি রাজনির্ঘণ্টঃ॥

মহাগোধূমঃ পুং বৃহদ্গোধূমঃ। বড়গম ইতি ভাষা। যথা। গোধূমঃ সুমনোপি স্যাৎত্রিবিধঃ সচ কীর্ত্তিতঃ। মহাগোধূম ইত্যাখ্যঃ পশ্চাদ্দেশাৎ সচাগতঃ॥ মধূলী তু ততঃ কিঞ্চিদল্পা সা মধ্যদেশজা। নিঃশূকো দীর্ঘ গোধূমঃ ক্বচিন্নন্দীমুখাভিধঃ॥ গোধূমো মধুরঃ শীতো বাত পিত্ত হরো গুরুঃ। কফ শুক্রপ্রদো বল্যঃ স্নিগ্ধঃ সন্ধান কৃৎসরঃ॥ জীবনো বৃংহণো বর্ণ্যো ব্রণ্যো রুচ্যঃ স্থিরত্ব কৃৎ। কফপ্রদো নবীনো নতু পুরাণঃ। পুরাণ যব গোধূম ক্ষৌদ্র জাঙ্গল শূল্য ভগিতি বাগুরৈন বসন্তে গৃহীতত্বাৎ। মধূলী শীতলা স্নিগ্ধা পিত্তঘ্নী মধুরা লঘুঃ শুক্রলা বৃংহণী পথ্যা তদ্বন্নন্দী-

মুখাঃ স্মৃতাঃ॥ ইতি ভাবপ্রকাশঃ॥

মহাগ্রীবঃ পুং উষ্ট্রঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহদ্গ্রীবাযুক্তে ত্রি॥

মহাঘাসঃ পুং মহতো দেশস্য মহত্যা ভূমের্বা ঘাসঃ। ইতি মুগ্ধবোধব্যাকরণটীকায়াং দুর্গাদাসঃ॥

মহাঘূর্ণা স্ত্রী সুরা। ইতি শব্দচন্দ্রিকা॥ অতিশয়ভ্রমিশ্চ॥

মহাঘোরঃ ত্রি অতিশয়ভয়ানকঃ। যথা। যমদ্বারে মহাঘোরে তপ্তা বৈতরণী নদী। তাঞ্চ তর্ত্তুং দদাম্যেনাং কৃষ্ণাং বৈতরণীঞ্চ গাং। ইতি শুদ্ধিতত্ত্বং॥

মহাঘোষং ক্লী হট্টং। ইতি মেদিনী॥

মহাঘোষঃ পুং অতিঘোষণং। ইতি মেদিনী॥ বৃহচ্ছব্দযুক্তে ত্রি॥

মহাঘোষা স্ত্রী কর্কটশৃঙ্গী। ইতি মেদিনী॥ অন্দুরুকী। ইতি শব্দচন্দ্রিকা॥

মহাঙ্কঃ পুং উষ্ট্রঃ। ইত্যমরঃ॥ গোক্ষুরকঃ॥ রক্তচিত্রকঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহদবয়বযুক্তে ত্রি॥

মহাচঞ্চুঃ পুং শাকবিশেষঃ। তৎপর্য্যায়ঃ। বৃহচ্চঞ্চুঃ ২ বিষারিঃ ৩ সুচঞ্চুকা ৪ স্থূলচঞ্চুঃ ৫ দীর্ঘপত্রী ৬ দিব্যগন্ধা ৭। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কষায়ত্বং। মলশোধনত্বং। গুল্ম শূলোদরার্শোর্ত্তি বিষনাশিত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ বৃহচ্চঞ্চুযুক্তপক্ষী চ॥

মহাচণ্ডঃ পুং যমভৃত্যঃ। ইতি হেমচন্দ্র ত্রিকাণ্ডশেষৌ॥ প্রচণ্ডে ত্রি॥

মহাচ্ছদঃ পুং দেবতাড়বৃক্ষঃ। ইতি রত্নমালা॥ বৃহৎপক্ষে॥

মহাচ্ছায়ঃ পুং বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহচ্ছায়াযুক্তে ত্রি॥

মহাচ্ছিদ্রা স্ত্রী মহামেদা। ইতি রাজনির্ঘণ্টঃ॥ বৃহচ্ছিদ্রযুক্তে ত্রি॥

মহাজঃ পুং বৃহচ্ছাগঃ॥ মহাঙ্গলোদ্ভবে ত্রি॥ মহাংশ্চাসাবজশ্চেতি পৃথগর্থে কর্ম্মধারয় সমাসেন মহতো জায়ত ইতি দ্বিতীয়ার্থে পঞ্চমী তৎপুরুষ সমাসেন চ নিষ্পন্নঃ॥

মহাজটা স্ত্রী রুদ্রজটা। ইতি রাজনির্ঘণ্টঃ॥ বৃহজ্জটা চ॥

মহাজনঃ পুং সাধুঃ। যথা। বেদাবিভিন্নাঃ স্মৃতয়ো বিভিন্না নাসৌ মুনির্যস্য মতং ন ভিন্নং। ধর্ম্মস্য তত্ত্বং নিহিতং গুহায়াং মহাজনো যেন গতঃ স পন্থাঃ॥ ইতি মহাভারতে বনপর্ব্ব॥ মন্বাদিঃ। যথা। প্রায়েণ বেদ তদিদং ন মহাজনোঽয়ং দেব্যা বিমোহিত মতির্ব্বত মায়য়া হলং। ত্রয্যাং জড়ীকৃত মতি

মর্ত্যপুষ্পিতায়া বৈতানিকে মহতি কর্ম্মণি যুজ্যমানঃ ॥ ইতি শ্রীভাগবতষষ্ঠস্কন্ধে অজামিলোপাখ্যানে যমবাক্য ব্যাখ্যানে শ্রীধরস্বামী ॥

মহাজবঃ পুং গবয়ঃ ॥ শ্রীকারীমৃগঃ। ইতি রাজনির্ঘণ্টঃ ॥ অতিবেগযুক্তে ত্রি ॥

মহাজম্বুঃ স্ত্রী বৃহজ্জম্বুবৃক্ষঃ। যথা। মহাজম্বুর্মহাপত্রা রাজজম্বুর্বৃহৎফলা। ইতি রত্নমালা ॥

মহাজম্বুঃ স্ত্রী বৃহজ্জম্বুঃ। তৎপর্য্যায়ঃ। রাজজম্বুঃ ২ স্বর্ণমাতা ৩ মহাফলা ৪ পিকপ্রিয়া ৫ কোকিলেষ্টা ৬ মহানীলা ৭ বৃহৎফলা ৮। অস্যা গুণাঃ। উষ্ণত্বং। মধুররসত্বং। কষায়ত্বং। শ্রমহরত্বং। বাতিত্যাস্যজড়িমনাশিত্বং। স্বরকরত্বং। বিষ্টম্ভিত্বং। শোষশমনত্বং। ভ্রমাতীসারাত্তিবন্ধকত্বং। শ্বসিত কফকাসপ্রশমনত্বঞ্চ। ইতি রাজনিঘণ্টঃ ॥ অপিচ। ফলেন্দুঃ কথিতো নন্দো রাজজম্বুর্মহাফলা। তথা সুরভিপত্রা চ মহাজম্বুরপি স্মৃতা ॥ রাজজম্বুফলং স্বাদু বিষ্টম্ভি গুরু রোচনং। ইতি ভাবপ্রকাশঃ ॥

মহাজাতিঃ স্ত্রী বাসন্তীলতা। ইতি রাজনির্ঘণ্টঃ ॥ শ্রেষ্ঠবর্ণশ্চ ॥

মহাজাতীয়ঃ ত্রি মহতঃপ্রকারঃ। ইতি ব্যাকরণং ॥

মহাজালী স্ত্রী পীতবর্ণঘোষা। ইত্যমরঃ ॥ রাজকোশাতকী। ইতি রাজনির্ঘণ্টঃ ॥ বৃহজ্জালবাহকে ত্রি

মহাজ্যৈষ্ঠী স্ত্রী নক্ষত্রবিশেষাদিযুক্ত জ্যৈষ্ঠীপূর্ণিমা। সা পঞ্চধা। ব্রহ্মপুরাণে। ঐন্দ্রে গুরুঃ শশী চৈব প্রাজাপত্যে রবি স্তথা। পূর্ণিমা গুরুবারেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ ঐন্দ্রে জ্যেষ্ঠাবাং প্রাজাপত্যে রোহিণ্যাং ॥ ১ ॥ বিনা গুরুবারেণাপি। ঐন্দ্রে গুরুঃ শশী চৈব প্রাজাপত্যে রবি স্তথা। পূর্ণিমা জ্যৈষ্ঠমাসস্য মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ ২ ॥ অনুরাধাস্থে গুরাবপি। ঐন্দ্রে মৈত্রে যদা জীব স্তৎপঞ্চদশকে রবিঃ। পূর্ণিমা শক্র চন্দ্রেণ মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ ৩ ॥ অনুরাধাস্থে চন্দ্রেপি। ব্যাঘ্রভূতিঃ। ঐন্দ্রর্ক্ষে ত্বথবা মৈত্রে গুরুচন্দ্রৌ যদা-স্থিতৌ। পূর্ণিমা জ্যৈষ্ঠমাসস্য মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ ৪ ॥ রাজমার্ত্তণ্ডে। জ্যৈষ্ঠে সম্বৎসরে চৈব জ্যৈষ্ঠমাসস্য পূর্ণিমা। জ্যেষ্ঠাভেন সদাযুক্তা মহাজ্যৈষ্ঠী প্রকীর্ত্তিতা ॥ ৫ ॥ জ্যৈষ্ঠসম্বৎসরশ্চ। জ্যেষ্ঠা

মলোপগে জীবে বর্ষং স্যাৎ শক্র দৈবত মিতি বিষ্ণুপ্রোক্তয়োঃ গ্রাহ্যঃ। নতু সম্বৎসরাদি পঞ্চকান্তর্গত বর্ষবিশেষঃ। জ্যৈষ্ঠ ইতি বর্ষ বিশেষণস্য বৈয়র্থ্যাপত্তেঃ॥ সম্বৎসরে যদি স্যাদিতি পাঠঃ কাল্পনিকঃ॥ ॥ মহাজ্যৈষ্ঠ্যান্তু যঃ পশ্যেৎ পুরুষঃ পুরুষোত্তমং। বিষ্ণুলোক মবাপ্নোতি মোক্ষং গঙ্গাম্বু মজ্জনাৎ॥ ইতি তিথ্যাদিতত্ত্বং॥

মহাজ্যোতিষ্মতী স্ত্রী লতাবিশেষঃ। বড়ীমালকঙ্গুনী ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। তেজোবতী ২ বহুরসা ৩ কনকপ্রভা ৪ তীক্ষ্ণা ৫ সুবর্ণনকুলী ৬ লবণা ৭ অগ্নিদীপ্তা ৮ তেজস্বিনী ৯ সুরলতা ১০ অগ্নিফলা ১১ অগ্নিগর্ভা ১২ কঙ্গুনী ১৩ শৈলসুতা ১৪ সুতৈলা ১৫ সুবেগা ১৬ বায়সী ১৭ তীব্রা ১৮ কাকাণ্ডী ১৯ বায়সাদনী ২০ পীতলতা ২১ শ্রী লতা ২২ সৌম্যা ২৩ ব্রাহ্মী ২৪ লবণকিংশুকা ২৫ পারাবতপদী ২৬ পীতা ২৭ পীততৈলা ২৮ যশস্বিনী ২৯ মেধ্যা ৩০ মেধাবতী ৩১ ধীরা ৩২। অস্যা গুণাঃ। তিক্তত্বং। রুক্ষত্বং। কিঞ্চিৎকটুত্বং। বাত কফাপহত্বং। দাহপ্রদত্বং। দীপনত্বং। মেধা প্রজ্ঞা কারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহাজ্বালঃ পুং হোমাগ্নিঃ। ইতি হেমচন্দ্রঃ॥

মহাজ্বালা স্ত্রী জিনানাংবিদ্যাধরী বিশেষঃ। ইতি হেমচন্দ্রঃ॥ বৃহদগ্নিশিখা চ॥

মহাঢ্যঃ পুং কদম্বঃ। ইতি রাজনির্ঘণ্টঃ॥ অতিশয়ধনবতি ত্রি॥

মহাতমঃপ্রভা স্ত্রী নরকবিশেষঃ। সচাতিশয়ান্ধকারময়ঃ। যথা। ঘনোদধি ঘনবাত তনুবাত নভঃস্থিতাঃ। রত্নশর্করা বালুকা পঙ্ক ধূম তমঃপ্রভাঃ॥ মহাতমঃ প্রভাবেত্য ধো ধো নরক ভূময়ঃ। ইতি হেমচন্দ্রঃ॥

মহাতরুঃ পুং সুহীবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥ বৃহদ্বৃক্ষশ্চ॥

মহাতলং ক্লী পাতালবিশেষঃ। যথা। অতলং বিতলঞ্চৈব নিতলঞ্চ তলাতলং। মহাতলঞ্চ সুতলং সপ্তমঞ্চ রসাতলং॥ ইতি শব্দমালা॥

মহাতারা স্ত্রী জিনানাংদেবীবিশেষঃ ১। তৎপর্য্যায়ঃ। তারা ২ মহাশ্রীঃ ৩ ওঙ্কারা ৪ স্বাহা ৫ শ্রীঃ ৬ মনোরমা ৭ তারিণী ৮ জয়া ৯ অনন্তা ১০ শিবা ১১ লোকেশ্বরা ১২ আ[illegible]

১৩ খর্ব্বরবাসিনী ১৪ ভদ্রা ১৫ বৈশ্যা ১৬ নীলসরস্বতী ১৭ শঙ্খিনী ১৮ বসুধারা ১৯ ধনংদদা ২০ ত্রিলোচনা ২১ লোচনা ২২। ইতি হেমচন্দ্রঃ ॥

মহাজালী স্ত্রী আবর্ত্তকী। ইতি রাজনির্ঘণ্টঃ ॥

মহাতিক্তঃ পুং মহানিম্বঃ। ইতি রাজনির্ঘণ্টঃ ॥ অতিশয়তিক্তরসযুক্তে ত্রি ॥

মহাতিক্তা স্ত্রী যবতিক্তা। ইতি রাজনির্ঘণ্টঃ ॥ পাঠা। ইতি শব্দচন্দ্রিকা ॥

মহাতীক্ষ্ণা স্ত্রী ভল্লাতকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ অতিশয়তীক্ষ্ণে ত্রি ॥

মহাতেজঃ(স্) ক্লী পারদঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহাতেজাঃ(স্) পুং কার্ত্তিকেয়ঃ। ইতি হলায়ুধঃ ॥ অগ্নিঃ। ইতি শব্দচন্দ্রিকা ॥ অতিশয়তেজস্বিনি ত্রি ॥

মহাত্মা ত্রি উত্তমস্বভাবযুক্তঃ। তৎপর্য্যায়ঃ। মহেচ্ছঃ ২ উদ্ভটঃ ৩ উদারঃ ৪ উদাত্তঃ ৫ উদীর্ণঃ ৬ মহাশয়ঃ ৭ মহামনাঃ ৮। ইতি হেমচন্দ্রঃ ॥

মহাদণ্ডঃ পুং যমদূতপ্রভেদঃ। ইতি বৃহদ্ধর্ম্মপুরাণে ৫৬ অধ্যায়ঃ ॥ বৃহদ্দণ্ডশ্চ ॥

মহাদন্তঃ পুং গজদন্তঃ। তৎপর্য্যায়ঃ ঈশাদন্তঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥ বৃহদ্দন্তমাত্রঞ্চ ॥ তদ্বতি ত্রি ॥

মহাদানং ক্লী শ্রেষ্ঠদানং। তত্তু তুলাপুরুষাদি ষোড়শ প্রকারং। যথা। মৎস্যপুরাণে। অথাতঃ সংপ্রবক্ষ্যামি মহাদানস্য লক্ষণং। ইত্যভিধায়। আদ্যন্তু সর্ব্বদানানাং তুলাপুরুষসংজ্ঞিতং। হিরণ্যগর্ব্ভদানঞ্চ ব্রহ্মাণ্ডং তদনন্তরং ॥ কল্পপাদপদানঞ্চ গোসহস্রন্তু পঞ্চমং। হিরণ্যকামধেনুশ্চ হিরণ্যাশ্ব স্তথৈব চ ॥ পঞ্চলাঙ্গলকং তদ্বদ্ধরাদান ন্তথৈব চ। হিরণ্যাশ্ব রথ স্তদ্বদ্ধেমহস্তিরথ স্তথা ॥ দ্বাদশং বিষ্ণুচক্রঞ্চ ততঃ কল্পলতাত্মকং। সপ্তসাগর দানঞ্চ রত্নধেনু স্তথৈব চ ॥ মহাভূতঘট স্তদ্বৎ ষোড়শঃ পরিকীর্ত্তিতঃ। *। অত্র সামান্য লক্ষণং। সূক্ত জপাঙ্গক দানং মহাদানং। বিনায়কাদি পঞ্চাশদ্দেবতাহোমাঙ্গকং বা। তথা মৎস্যপুরাণং। বিনায়কাদি গ্রহ লোকপাল বস্বষ্টকাদিত্য মরুদ্গণানাং। ব্রহ্মাচ্যুতেশান বৃহস্পতীনাং স্বমন্ত্রতো হোম চতুষ্টয়ং স্যাৎ ॥ জপ্যানি সূক্তানি

তথৈব চৈষামনুক্রমেণাপি যথা স্বরূপং। ইত্যাদিনা সূক্ত জপ হোম রূপাঙ্গযো র্বিধানং প্রত্যেকং ষোডশ তুলাপুরুষ প্রধানান্যুদ্দিশ্যোক্তং নতু মহাদানত্বেনোদ্দিশ্যেতি। অতো নেতরেতরাশ্রয়ঃ। নতু জপ্ত মণ্ডপেতি কর্ত্তব্যতা যোগিত্বং জিকনীয লক্ষণং। অন্যদানেপি গতত্বাৎ। এবঞ্চ। কনকাশ্ব তিলা গাবো দাসী রথ মহী গৃহাঃ। কন্যা চ কপিলাধেনুর্মহাদানানি বৈ দশ। ইতি কূর্ম্মপুরাণোক্ত মহাদান পদং গৌণং। অন্যথা বহুশক্তি কল্পনাপত্তেঃ কনকদানাদি সাধারণানুগতৈক রূপাভাবাচ্চ। অতো নবৈপরীত্যমিতি। সর্ব্বেষামেব দানানামেক জন্মানুগং ফলং। ইতি মল মাসতত্ত্বং ॥

মহাদারু ক্লী দেবদারু। ইতি জটাধরঃ ॥ বৃহৎকাষ্ঠঞ্চ ॥

মহাদেবঃ পুং শিবঃ। ইত্যমরঃ ॥ অস্য অষ্টমূর্ত্ত্যন্তর্গত সোমমূর্ত্তিরযং। যথা মহাদেবায সোমমূর্ত্তযে নমঃ। ইতি শিবপূজাপদ্ধতিঃ ॥ ✽ ॥ অস্য ব্যুৎপত্তি র্যথা। ব্রহ্মাদীনাং সুরাণাঞ্চ মুনীনাং ব্রহ্মবাদিনাং। তেষাঞ্চ মহতাং দেবো মহাদেবঃ প্রকীর্ত্তিতঃ ॥ মহতী পূজিতা বিশ্বে মূলপ্রকৃতিরীশ্বরী। তস্যা দেবঃ পূজিতশ্চ মহাদেবঃ স চ স্মৃতঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫৩ অধ্যাযঃ ॥ ✽ ॥ তস্য পঞ্চবক্ত্রত্ব ত্রিনেত্রত্ব কারণং যথা। অতীব কমনীযাঙ্গং কিশোরং শ্যামসুন্দরং। অহো নির্ব্বচনীযঞ্চ দৃষ্ট্বা রূপ মনুত্তমং ॥ ন বভূব বিতৃষ্ণশ্চ লোচনাভ্যাং ত্রিলোচনঃ। পশ্যন্নিমেষ রহিত ইতি মত্বা স্ব মানসে ॥ ভক্ত্যুদ্রেকাম্মহাভক্তো রুরোদ প্রেমবিহ্বলঃ। সহস্রবদনো হ্যনন্তো ভাগ্যবাংশ্চ চতুর্ম্মুখঃ ॥ বহুভি র্লোচনৈ দৃষ্ট্বা তুষ্টাব বহুভি র্মুখৈঃ। পশ্যামি কিং বা কিং স্তৌমি সংপ্রাপ্য নাথ মীদৃশং ॥ আস্যৈকেন লোচনাভ্যাং চতুর্ধা স পুনঃ পুনঃ। স্বমানসে স্বর্ব্বীদং শঙ্করে চ তপস্বিনি ॥ তদ্বভূব চতুর্ব্বক্ত্রং পূর্ব্বেণ সহ পঞ্চমং। একৈক বক্ত্রং শুশুভে লোচনৈশ্চ ত্রিভি স্ত্রিভিঃ ॥ বভূব তেন তন্নাম পঞ্চবক্ত্র স্ত্রিলোচনঃ। চক্ষুংষি ত্রিগুণ রূপাণি তস্য ব্রহ্ম স্বরূপিণঃ ॥ সত্ত্বং রজ স্তম ইতি তস্য হেতু র্নিশামষ। সত্ত্বাংশেন দৃশা শম্ভুঃ পশ্যন্ পাতি চ সাত্ত্বিকান্ ॥ রাজসেন রাজসিকান্ তামসেন চ তা-

মসান্। চক্ষুষ স্তানসাৎ পশ্চাৎ
ললাটস্থাদ্ধরস্য চ॥ সংহার কালে
সংহর্ত্তু রগ্নি রাবির্ভবেৎ ক্রুধা। কো
টিতাস্ম পুনশ্চ সূর্য্যকোটি সম
প্রভঃ॥ লেলিহানো দীর্ঘশিখ স্ত্রৈ-
লোক্যং দগ্ধুমীশ্বরঃ। *। তস্য ভ-
স্মধারণ কারণং যথা। বিভূতিগাত্রঃ
স বিভুঃ সতী সৎকার ভস্মনা॥
ধত্তে তস্যা অস্থিমালাং প্রেমভাবে-
ন ভস্ম চ। স্বাত্মারামো যদ্যপীশ
স্তথাপি পূর্ণনন্দকং॥ সতীশবং গৃ
হীত্বা চ ভ্রামং ভ্রামং রুরোদ হ। প্র
ত্যঙ্গাঙ্গঞ্চ তস্যাশ্চ পপাত যত্র যত্র
চ॥ সিদ্ধপীঠ স্তত্র তত্র বভূব মন্ত্র
সিদ্ধিকৃৎ। তদা শবাবশেষঞ্চ কৃত্বা
বক্ষসি শঙ্করঃ॥ পপাত মূর্চ্ছিতো
ভূত্বা সিদ্ধক্ষেত্রে চ রাধিকে। তদা
গত্বা মহেশন্তং কৃত্বা ক্রোড়ে প্রবোধ্য
চ অদদং দিব্য তত্ত্বঞ্চ তস্মৈ শোক
হরং পরং॥ তদা শিবশ্চ সন্তুষ্টঃ স্ব-
লোকঞ্চ জগাম হ। মন্বন্তরেণ কালে-
ন তাং সংপ্রাপ প্রিয়াং সতীং॥ *॥
তস্য দিগম্বরত্ব জটাধারিত্ব কার-
ণং যথা। দিগ্বস্ত্র ধারী যোগেন নেচ্ছা
নিত্যে পটে বিভোঃ। জটা স্তপস্যাং
কালীনা ধত্তেদ্যাপি বিবেকতঃ॥ ন
েচ্ছা কেশ সংস্কারে স্বাঙ্গবেশেন

যোগিনঃ। সমতা চন্দনে পঙ্কে লো-
ষ্টে রত্নে মণীশ্বরে॥ *॥ তস্য নাগ
ভূষণত্ব বৃষবাহনত্ব কারণং যথা।
গরুড়দ্বেষিণো নাগাঃ শঙ্করং শরণং
যযুঃ। বিভর্ত্তি কৃপয়া স্বাঙ্গে তানেব
শরণাগতান্॥ বাহনং বৃষরূপোহ
মন্য স্তং বোঢু মক্ষমঃ। ত্রিপুরস্য
বধে পূর্ব্বং মৎকলাংশ সমুদ্ভবঃ॥
*॥ তস্য ধুস্তুরপুষ্প বিল্বপত্র প্রিয়ত্ব
ব্যাঘ্রচর্ম্ম ধারিত্ব শ্মশানস্থায়িত্ব কা-
রণং যথা। পারিজাতাদিকং পুষ্পং
সুগন্ধি চন্দনাদিকং। ময়ি সংন্যস্য
তেষ্বেব প্রীতি র্নাস্তি কদাচন॥
ধুস্তুর তৎ সদা প্রীতি র্বিল্বপত্রা-
নুলেপনে। গন্ধহীনে প্রসূনেচ যোগে-
ষ্টে ব্যাঘ্রচর্ম্মণি॥ দিব্যলোকে দিব্য-
তল্পে জনতায়াং ন তন্মনঃ। শ্মশানে-
তীব রহসি ধ্যায়তে মা মহর্নিশং॥
*॥ তস্য মহিমাদি যথা। আব্রহ্ম
তৃণপর্য্যন্তং স্বপ্নবন্মন্যতে শিবঃ। মমা
হনির্বচনীয়ে হত্র রূপে তন্মগ্ন মানসং
॥ ব্রহ্মণঃ পতনেনাপি শম্ভোঃ পাণেঃ ক্ষ-
ণো ভবেৎ। তস্যায়ুষঃ প্রমাণঞ্চ না-
হং জানামি কা শ্রুতিঃ॥ জ্ঞানং মৃ-
ত্যুঞ্জয়ং শূলং ধত্তে মত্তেজসা সমং।
বিনা ময়া ন কশ্চত্তং শঙ্করং জেতু-
মীশ্বরঃ॥ শঙ্করঃ পরমাত্মা মে প্রা-

দেভ্যোপি পরঃ শিবঃ। ত্র্যম্বকে ম-
মনঃ শশ্বন্ন প্রিযো মে ভবাৎপরঃ ॥
ন সংবসামি গোলোকে বৈকুণ্ঠে তব
বক্ষসি। সদাশিবস্য হৃদযে নিবদ্ধঃ
প্রেমপাশতঃ ॥ সৃষ্টং শক্তো হি নষ্ট
ঞ্চ ভ্রূভঙ্গ লীলযা হি যঃ। ব্রহ্মাণ্ড
নিকরং যোগান্ন যোগী শঙ্করাৎ প
রঃ ॥ দিব্যজ্ঞানেন যঃ স্রষ্টং নষ্টং ভ্রূ
ভঙ্গলীলযা। মৃত্যকালাদিকং শ-
ক্তো ন জ্ঞানী শঙ্করাৎ পরঃ ॥ মম
ভক্তিঞ্চ দাস্যঞ্চ মুক্তিঞ্চ সর্বসম্পদং
। সর্বসিদ্ধিং দাতুমীশো ন দাতা
শঙ্করাৎ পরঃ ॥ পঞ্চ বক্ত্রেণ মন্নাম
যশো গাযত্যহর্নিশং। মদ্রূপং ধ্যা
যতে শশ্বদ্ভক্তঃ শঙ্করাৎ পরঃ ॥
ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে৩৬
অধ্যাযঃ ॥ * ॥ শিবনৈবেদ্য ভক্ষণ
দোষ কারণাদিকং যথা। রাধিকো-
বাচ। এবং ভূতস্য চ বিভোঃ সর্বে-
শস্য মহাত্মনঃ। ন মস্তং কথমুচ্ছিষ্টং
ব্রূহি সন্দেহভঞ্জন ॥ শ্রীকৃষ্ণ উবা-
চ। শৃণু দেবি প্রবক্ষ্যে ইহ মিতি
হাসং পুরাতনং। পাপেন্ধনানাং দ-
হনে জ্বলদগ্নি শিখোপমং ॥ সনৎ-
কুমারো বৈকুণ্ঠে মেকদা চ জগাম হ।
দদর্শ ভুক্তবন্তঞ্চ নাথং নারাযণং দ্বি-
জঃ ॥ তুষ্টাব পাঠে স্তোত্রৈশ্চ প্রণম্য
ভক্তিতো মুদা। অবশেষং দদৌ তস্মৈ
সন্তুষ্টো ভক্তবৎসলঃ ॥ প্রাপ্তমাত্রে-
ণ তত্রৈব ভুক্তং তেনাপি কিঞ্চন।
কিঞ্চিদুদ্রক্ষ বন্ধুনা ভক্ষণায চ দুর্ল-
ভং ॥ সিদ্ধাশ্রমে চ তদ্দত্তং গুরবে
শূলপাণিনে। ভক্ত্যুদ্রেকাচ্চ তৎসর্বং
ভুক্তঞ্চ প্রাপ্তি মাত্রতঃ ॥ ভুক্তা সুদু-
র্লভং বস্তু ননর্ত্ত প্রেমবিহ্বলঃ। পপা-
ত ডমরু হস্তাৎ শৃঙ্গঞ্চ ব্যাঘ্রচর্ম্ম চ॥
স্বযং নিপত্য পশ্চাচ্চ কদম্মূর্চ্ছা মবা-
প চ। এতস্মিন্নন্তরে দেবী দুর্গা দুর্গতি
নাশিনী ॥ মুদা জগাম শীঘ্রং তৎ
প্রসন্ন বদনেক্ষণা। কান্তং মূর্চ্ছিতং
দৃষ্ট্বা নিপতন্তঞ্চ ভক্তিতঃ ॥ প্রহস্য
বার্ত্তাং পপ্রচ্ছ কুমারং শূলপাণিনঃ
। সর্বং তাং কথযামাস কুমারঃ সং-
পুটাঞ্জলিঃ ॥ শ্রুত্বা চুকোপ সা দেবী
শিবং প্রস্ফুরিতাধরা। শ্রুত্বা মনোহ-
রং স্তোত্রং ন শশাপ শিবং শিবা ॥
দুষ্টং চক্রে তদুচ্ছিষ্ট মভক্ষ্যং বিদুষা-
মপি। সুচিরঞ্চ তপ স্তপ্তা মযা লব্ধ
স্ত্ব মীশ্বরঃ ॥ ত্বযা বিষ্ণোঃ প্রসাদেন
বঞ্চিতাহং কথং বিভো। যতো মদ-
ত্তং নৈবেদ্যং বিষ্ণো র্মহ্যং ত্বযাধুনা ॥
অতো মত্তো গৃহাণৈতৎ ফলমেব ম-
হেশ্বর। অদ্য প্রভৃতি যে লোকা
নৈবেদ্যং ভুঞ্জতে তব ॥ তে জন্মৈকং

সারমেযা ভবিষ্যন্ত্যেব ভারতে। ত্যুক্ত্বা পার্ব্বতী মামা রুরোদ পুরতো বিভোঃ॥ দৃষ্টিঃ পপাত তৎকণ্ঠে নীলকণ্ঠো বভূব সঃ। অপূর্ব্বং তবনৈবেদ্যং জন্মমৃত্যুজরাহরং॥ কৃতং দুষ্টং যত স্তস্মাৎ পশ্যদেহং ত্যজামি চ। লিঙ্গোপরি চ যদ্দত্তং তদেবাগ্রাহ্যমীশ্বর॥ সুপবিত্রং ভবেত্তত্র বিষ্ণোর্নৈবেদ্য মিশ্রিতং। ইত্যেবং কথিতং সর্ব্বং ত্বয়া পৃষ্টং সুরেশ্বরি॥ অভিশস্তং শঙ্করস্য নির্ম্মাল্যং যেন হেতুনা। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩৭ অধ্যায়ঃ॥ ॥ তস্যাবতারা যথা। সূতউবাচ। বেদব্যাসাবতারাণি দ্বাপরে কথিতানি তু। মহাদেবাবতারাণি কলৌ শৃণুত সুব্রতাঃ॥ আদৌ কলিযুগে শ্বেতে দেবদেবো মহাদ্যুতিঃ। নাম্না হিতায বিপ্রাণা মভূদ্বৈবস্বতে ঽন্তরে॥ হিমবচ্ছিখরে রম্যেছগলে পর্ব্বতোত্তমে। তস্য শিষ্যাঃ শিখা যুক্তা বভূবুরমিতপ্রভাঃ॥ শ্বেতঃ শ্বেতশিখশ্চৈব শ্বেতাস্যঃ শ্বেতলোহিতঃ। চত্বার স্তে মহাত্মানো ব্রাহ্মণা বেদপারগাঃ॥ সুতারো দমনশ্চাথ সুহোত্রঃ কঙ্কণ স্তথা। লোকাক্ষি রথ যোগীন্দ্রো জৈগীষব্য স্তু সপ্তমে॥ অষ্টমে দধিবাহঃ স্যাম্নবনে বৃষভঃ প্রভুঃ। ভৃগুস্তু দশমে প্রোক্ত স্তস্মাদুগ্রপরঃ স্মৃতঃ। দ্বাদশে ঽত্রিঃ সমাখ্যাতো বালী চাথ ত্রয়োদশে॥ চতুর্দ্দশে গৌতম স্তু বেদশীর্ষা ততঃ পরং। গোকর্ণশ্চাভবত্তস্মাদ্গুহাবাসঃ শিখণ্ড্যথ॥ জটামাল্যশ্চ হাসশ্চ দারুকো লাঙ্গলী ক্রমাৎ। শ্বেত স্তথা পরঃ শূলী তিণ্ডী মুণ্ডী চ বৈ ক্রমাৎ॥ সহিষ্ণুঃ সোমশর্ম্মা চ নকুলীশো ঽন্তিমে প্রভুঃ। বৈবস্বতে ঽন্তরে শম্ভো রবতারা স্ত্রিশূলিনঃ॥ অষ্টাবিংশতি বিখ্যাতা হ্যন্তে কলিযুগে প্রভোঃ। তীর্থকার্য্যাবতারঃ স্যাদ্দেবেশো নকুলীশ্বরঃ॥ ইতি কৌর্ম্মে ৫০ অধ্যাযঃ॥ ॥ তস্যাষ্টষষ্টি নামানি ক্ষেত্রাণি চ যথা। মনুরুবাচ। মন্দরস্থং মহাদেবং ব্রহ্মা পৃচ্ছতি শঙ্করং। কেষু কেষু চ স্থানেষু দ্রষ্টব্যোসি মযা প্রভো॥ ঈশ্বর উবাচ। বারাণস্যাং মহাদেবং প্রযাগে তু মহেশ্বরং। নৈমিষে দেবদেবঞ্চ গযাযাং প্রপিতামহং॥ কুরুক্ষেত্রে বিদুঃ স্থাণুং প্রভাসে শশিভূষণং। পুষ্করে তু অপোগন্ধিং বিশ্বঞ্চ বিমলেশ্বরে॥ অট্টহাসে মহানাদং মহেন্দ্রে তু মহাব্রতং। উজ্জযিন্যাং মহাকালং মাকোটে তু মহোৎকটং॥ শঙ্কুকর্ণে

মহাতেজং গোকর্ণে চ মহাবলং । ভৈরবে ভৈরবাকারং ভবং বস্ত্রাপদে বিদুঃ ॥ উগ্রং কনখলে চৈব ভদ্রকর্ণা হ্রদে শিবং । দেবদারুবনে দিণ্ডিং চণ্ডীশং মধ্যমস্থলে ॥ ঊর্দ্ধরেতং ত্বরুণ্ডে তু সকলাণ্ডে কপর্দ্দিনং । কৃত্তিবাসসমেকাগ্রে সূক্ষ্মং তাম্রাতিকেশ্বরে ॥ কালঞ্জরে নীলকণ্ঠং শ্রীকণ্ঠং মণ্ডলেশ্বরে । ধ্যানং সিদ্ধেশ্বরে যোগী গাগর্ত্রীক্ষোত্তরে ধরে ॥ বিজয়ং নাম কাশ্মীরে জয়ন্তং মরুকেশ্বরে । হরিশ্চন্দ্রে হরিশ্চৈব পুরিশ্চন্দ্রে তু শঙ্করং ॥ জটাবাসেশ্বরে বিদ্যাৎ সৌম্যং অম্রাতকেশ্বরে । ভূতেশ্বরে ভস্মগাত্রং জললিঙ্গে জলেশ্বরং ॥ ভিক্ষুকং কর্ণিকায়াস্তু বারাহং বিন্ধ্যপর্ব্বতে । তাম্রং পশ্চিম সন্ধ্যায়াং বিরজায়াং ত্রিলোচনং ॥ দৃপ্তেশ্বরে ত্রিশূলিস্তু শ্রীশৈলে ত্রিপুরান্তকং । জললিঙ্গে বিদুঃ কালিং কপালিং করবীরকে ॥ দীপ্তচক্রেশ্বরে বেদং নেপালে পশুপতিং পতিং । শ্রীকারারোহণে রুদ্রং দৈবিকায়াং উমাপতিং ॥ গঙ্গায়াং সাগরে ত্বমরে নোঙ্কার মমরকণ্ঠকে । সপ্তগোদাবরে ভীমং স্বয়ম্ভুং নজলেশ্বরে ॥ কর্ণিকারে গণাধ্যক্ষং কৈলাসে চ গণাধিপং । হেমকূটে বিরূপাক্ষং ভূর্ভুবং গন্ধমাদনে ॥ সিদ্ধেশ্বরস্তু আকাশে পাতালে চণ্ডকেশ্বরং । অষ্ট ষষ্টিশ্চ নামানি দেবদেবস্য ধীমতঃ ॥ পুরাণে চোপগীতানি ব্রাহ্মণস্য স্বয়ম্ভুবা । যঃ পঠেৎ প্রাতরুত্থায় স্নাতো বা যদি বা শুচিঃ ॥ মুচ্যতে সর্ব্ব পাপেভ্যঃ শিবলোকং স গচ্ছতি । ইত্যাদ্যে দেবীপুরাণে অষ্টষষ্টি নামানি মহাদেবস্য ॥ ✻ ॥ তস্য দ্বাদশ নাম স্তোত্রং । প্রথমস্তু মহাদেবো দ্বিতীয়স্তু মহেশ্বরঃ । তৃতীয়ঃ শঙ্করো জ্ঞেয় শ্চতুর্থো বৃষভধ্বজঃ ॥ পঞ্চমঃ কৃত্তিবাসাশ্চ ষষ্ঠঃ কামাঙ্গনাশনঃ । সপ্তমো দেব দেবেশঃ শ্রীকণ্ঠ শ্চাষ্টমঃ স্মৃতঃ ॥ ঈশ্বরো নবমো জ্ঞেয়ো দশমঃ পার্ব্বতীপতিঃ । রুদ্র একাদশ শ্চৈব দ্বাদশঃ শিব উচ্যতে ॥ দ্বাদশৈতানি নামানি ত্রিসন্ধ্যং যঃ পঠেন্নরঃ । কৃতঘ্ন শ্চৈব গোঘ্নশ্চ ব্রহ্মহা গুরুতল্পগঃ ॥ স্ত্রী বালঘাতক শ্চৈব সুরাপো বৃষলীপতিঃ । মুচ্যতে সর্ব্ব পাপেভ্যো রুদ্রলোকং স গচ্ছতি ॥ ইতি স্কন্দপুরাণং ॥ ✻ ॥ তন্নামোচ্চারণ ফলং যথা । কোটয়ো ব্রহ্মহত্যানা মগম্যাগম্য কোটয়ঃ । সদ্যঃ প্রলয় মায়ান্তি মহাদেবেতি কীর্ত্তনাৎ ॥ মহাদেব মহাদেব ম-

হাদেবেতি বাদিনং। বৎসং গৌরিব গৌরীশো ধাবন্তমনুধাবতি ॥ ইতি পুরাণং ॥ * ॥ তস্য প্রণাম মন্ত্রঃ। নমস্যে ত্বাং মহাদেব লোকানাং গুরু মীশ্বরং। পুংসা মপূর্ণকামানাং কামপূরামরাঙ্ঘ্রিপং ॥ ইতি শ্রীভাগবতং ॥ মহাদেবং মহাত্মানং ম হাযোগিন মীশ্বরং। মহাপাপহরং দেবং মকারায় নমো নমঃ ॥ ইতি তন্ত্রং ॥ * ॥ তস্য কালরূপ বর্ণনং যথা। নারদ উবাচং। কালরূপী ত্বয়া খ্যাতঃ শম্ভু র্গগণ গোচরে। লক্ষণঞ্চ স্বরূপঞ্চ সর্ব্বং ব্যাখ্যাতু মর্হসি ॥ পুলস্ত্য উবাচ। স্বরূপং ত্রিপুরঘ্নস্য বদিষ্যে কালরূপিণঃ। অশ্বিনী ভরণী চৈব কৃত্তিকা প্রথমাংশকং ॥ মেষকং হি বিজানীয়াৎ স্ত জক্ষেত্র মুদাহৃতং। আগ্নেয়াংশা স্ত্রয়ো ব্রহ্মন্ প্রাজাপত্যং কবে গৃহং সৌম্যার্দ্ধং বৃষনামেদং বদনং পরিকীর্ত্তিতং। মৃগার্দ্ধ মাদ্রা দিত্যাংশাস্ত্রয়ঃসৌম্য গৃহন্ত্বিদং ॥ মিথুনং ভুজ যো স্তস্য গগণস্থস্য শূলিনঃ। আদিত্যাংশশ্চ পুষ্যঞ্চ অশ্লেষা শশিনো গৃহং ॥ রাশিঃ কর্কটকো নাম পার্শ্বেন খবিলাসিনঃ। পিত্রর্ক্ষং ভগ দৈবত্যং উত্তরাংশশ্চ কেশরী ॥ সূর্য্য

ক্ষেত্রং বিভো ব্রহ্মন্ হৃদয়ং পরিকীর্ত্তিতং। উত্তরাংশা স্ত্রয়ঃ পাণি শ্চিত্রার্দ্ধং কন্যকা ত্বিদং ॥ সোমপুত্রস্য সদ্মৈ তৎ দ্বিতীয়ং জঠরং বিভোঃ। চিত্রাংশ দ্বিতয়ং স্বাতী বিশাখায়াং-শক ত্রয়ং ॥ দ্বিতীয়ং শুক্রসদনং তুলা-নাভি রুদাহৃতং। বিশাখাংশ মনুরাধা জ্যেষ্ঠা ভৌম গৃহং ত্বিদং ॥ দ্বিতীয়ং বৃশ্চিকো রাশি র্মেঢ্রং কাল স্বরূপিণঃ। মূলং পূর্ব্বোত্তরাংশশ্চ দেবাচার্য্যগৃহং ধনুঃ ॥ ঊরুযুগল মীশস্য অমরর্ষে প্রগীয়তে। উত্তরাংশা স্ত্রয়ো ঋক্ষং শ্রবণং মকরো মুনে ॥ ধনিষ্ঠার্দ্ধং শনিক্ষেত্রং জানুনী পরিকীর্ত্তিতে। ধনিষ্ঠার্দ্ধং শতভিষা প্রোষ্ঠপদ্যাংশক ত্রয়ং। সৌরং সদ্মাপর মিদং জঙ্ঘেজঙ্ঘে চ বিশ্রুতে। প্রোষ্ঠপদ্যাং শমেকন্তু উত্তরা রেবতী তথা। দ্বিতীয়ং জীব সদনং মীনস্তু চরণাবুভৌ। এবংকৃত্বা কালরূপং ত্রিনেত্রো যজ্ঞংক্রোধান্মার্গণৈ র্বাণবান। বিদ্ধ শ্চাদৌ বেদনা বুদ্ধি যুক্তঃ খেসন্তস্থৌ তারকাভিশ্চিতাঙ্গঃ ॥ ইতি বামনপুরাণে ৫ অধ্যায়ঃ ॥

মহাদেবী স্ত্রী দুর্গা। যথা। অপর্ণাস্যান্মহাদেবী গিরিজা মেনকাত্ম-

-জা॥ ইতি হলায়ুধঃ॥ তস্যা ব্যুৎপত্তি র্যথা। পূজ্যতে বা সুরৈঃ সর্ব্বৈর্মহাংশ্চৈব পুরাণতঃ। ধাতু র্মহেতি পূজায়াং মহাদেবী ততঃ স্মৃতা॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥ রাজ্ঞী। পাটরাণী ইতি ভাষা। তৎপর্য্যায়ঃ। মহিষী ২ পট্টার্হা ৩ পট্টদেবী ৪। ইতি রাজনির্ঘণ্টঃ॥

মহাদৈত্যঃ পুং ভৌত্যমন্বন্তরীয়দৈত্যবিশেষঃ। যথা। চতুর্দ্দশস্য ভৌত্যস্য শৃণু প্রাগ্মনো র্মমেত্যুপক্রম্য শুচি রিন্দ্রো মহাদৈত্যো রিপুহন্তা হরিঃ স্বয়ং। ইতি গারুড়ে ৭৮ অধ্যায়ঃ॥

মহাদ্রুমঃ পুং অশ্বত্থবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ বৃহদ্বৃক্ষশ্চ॥

মহাদ্রোণা স্ত্রী বৃক্ষবিশেষঃ। বড়ীদ্রোণপুষ্পী ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। দেবজকন্যা ২ দিব্যপুষ্পা ৩ মহাদ্রোণী ৪ দেবী ৫ কাঞ্চী ৬ দেবদ্রোণী ৭। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। মেধ্যত্বং। ভূতার্ত্তি বাতকফাগ্নিমান্দ্য নাশিত্বং। যুক্ত্যা পারদ শোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহাদ্রোণী স্ত্রী মহাদ্রোণাক্ষুপঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাদ্বন্দ্বঃ পুং যুদ্ধবাদ্যং। ইতি শব্দরত্নাবলী॥ অতিশয়কলহশ্চ॥

মহাধনং ক্লী বহুমূল্যবস্ত্র। ইত্যমরঃ॥ সুবর্ণং॥ সিহ্লকং। ইতি মেদিনী॥ চারুবস্ত্রং। ইতি হেমচন্দ্রঃ॥ কৃষিঃ॥ ইতি শব্দরত্নাবলী॥ অতিশয়ধনযুক্তে ত্রি॥

মহাধাতুঃ পুং স্বর্ণং। ইতি শব্দচন্দ্রিকা॥

মহান্ ত্রি বৃহৎ। ইত্যমরঃ॥ অস্য পর্য্যায়ঃ মহৎশব্দে দ্রষ্টব্যঃ॥

মহান্ পুং উষ্ট্রঃ। ইতি রাজনির্ঘণ্টঃ॥ দুর্গা। যথা। মহান্ ব্যাপ্য স্থিতা সর্ব্বং মহা বা প্রকৃতি র্মতা। স্মৃতিঃ সংস্মরণাদ্দেবী নিয়তী চ নিয়ামতা। ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥ মহত্তত্ত্বং। যথা। স বিকারাৎ প্রধানাত্তু মহত্তত্ত্বং প্রজায়তে। মহানিতি যতঃ খ্যাতি র্লোকানাং জায়তে সদা॥ ইতি মাৎস্যে ৩ অধ্যায়ঃ॥ মহৎশব্দপ্রয়োগ নিষেধো যথা। শঙ্খে তৈলে তথা মাংসে বৈদ্যে জ্যোতিষিকে দ্বিজে। যাত্রায়াং পথি নিদ্রায়াং মহৎশব্দো ন দীয়তে॥ ইতি ভট্টিপ্রথমসর্গীয় চতুর্থশ্লোক টীকায়াং ভরতঃ॥

মহানটঃ পুং শিবঃ। ইতি ত্রিকাণ্ড-

শেষঃ ॥

মহানদী স্ত্রী পুরুষোত্তমক্ষেত্রান্তর্গত কটকস্যোত্তরদেশস্থ নদী বিশেষঃ। তস্যা নামান্তরং চিত্রোৎপলা। যথা। নদী তত্র মহাপুণ্যা বিন্ধ্যপাদ বিনির্গতা। চিত্রোৎপলেতি বিখ্যাতা সর্ব্বপাপহরা শুভা ॥ চিত্রোৎপলা মহানদী। ইতি পুরুষোত্তমতত্ত্বং ॥ গঙ্গা। যথা। অম্বুজ মম্বুনি জাতং জাতু ন জায়তে অম্বুজাদম্বু। মুরহর তব বিপরীতং পাদাম্বুজান্মহানদী স্নাতা॥ ইত্যুদ্ভটঃ ॥

মহানন্দঃ পুং মুক্তিঃ। ইতি হলাযুধঃ ॥ অতিশয়াহ্লাদশ্চ ॥

মহানন্দা স্ত্রী সুরা। ইতি রাজনির্ঘণ্টঃ ॥ মাঘশুক্লানবমী। যথা। ভবিষ্যে। মাঘ মাসস্য যা শুক্লা নবমী লোকপূজিতা। মহানন্দেতি সা প্রোক্তা সদানন্দকরী নৃণাং ॥ স্নানং দানং জপো হোমো দেবার্চ্চনমুপোষণং। সর্ব্বং তদক্ষয়ং প্রোক্তং যদস্যাং ক্রিয়তে নরৈঃ ॥ ইতি তিথ্যাদিতত্ত্বং ॥ নদীবিশেষঃ। সা পদ্মাযা বিনিঃসৃতা রামপুরাখ্য গ্রামাৎ পশ্চিমস্থ উত্তরদিগ্গতা ॥

মহানন্দিঃ পুং নন্দিবর্দ্ধনরাজপুত্রঃ। যথা। চত্বারিংশত্তথা ভাব্যো রাজা বৈ নন্দিবর্দ্ধনঃ। চত্বারিংশত্ত্রয়শ্চৈব মহানন্দি ভবিষ্যতি। মহানন্দি সুত শ্চাপি শূদ্রাযাং কলিকাংশজঃ ॥ উৎপৎস্যতে মহাপদ্মঃ সর্ব্ব ক্ষত্রান্তকো নৃপঃ। ততঃ প্রভৃতি রাজানো ভবিষ্যাঃ শূদ্রযোনযঃ ॥ একরাট্ স মহাপদ্ম একচ্ছত্রো ভবিষ্যতি। ইতি মৎস্যপুরাণে ২৪৬ অধ্যাযঃ ॥ অপিচ। মহানন্দিসুতঃ শূদ্রা গর্ভোদ্ভবো২তিলুব্ধো মহাপদ্মানন্দঃ পরুষরাম ইবাপরো২খিল ক্ষত্রিযান্তকারী ভবিতা ততঃ প্রভৃতি শূদ্রা ভূপালা ভবিষ্যন্তি। তেন মহানন্দি পর্য্যন্তং ক্ষত্রিয় আসীৎ। ইতি শুদ্ধিতত্ত্বধৃত বিষ্ণুপুরাণং ॥

মহানরকঃ পুং অতিশয়নানাপ্রকারযাতনাস্থানং। ইতি পুরাণং ॥

মহানলঃ পুং দেবনলঃ। ইতি রাজনির্ঘণ্টঃ ॥ বৃহদগ্নিশ্চ ॥

মহানবমী স্ত্রী আশ্বিনশুক্লনবমী। যথা। শ্রীভগবানুবাচ। দুর্গাতন্ত্রেণ মন্ত্রেণ ঙর্য্যাদ্দুর্গা মহোৎসবং। মহানবম্যাং শরদি বলিদানং নৃপাদযঃ ॥ আশ্বিনে শুক্লপক্ষস্য ভবেদ্যা অষ্টমী তিথিঃ। মহাষ্টমীতি

স্যপ্রোক্তা দেব্যাঃ প্রীতিকরা পরা ॥ ততোন্ নবমী যা স্যাৎ সা মহানবমী স্মৃতা। সা তিথিঃ সর্ব্বলোকানাং পূজনীয়া শিবাপ্রিয়া ॥ ইতি কালিকাপুরাণে ৬৯ অধ্যায়ঃ ॥ অপিচ। প্রাবৃট্‌কালে বিশেষেণ আশ্বিনে হ্যষ্টমীষু চ। মহা শব্দো নবম্যাস্তু লোকে খ্যাতিং গমিষ্যতি॥ ইতি তিথ্যাদিতত্ত্বং ॥

মহানসং ক্লী রন্ধনগৃহং। তৎপর্য্যায়ঃ। রসবতী ২ পাকস্থানং ৩। ইত্যমরঃ॥ তত্র রক্ষণীয়া জনা যথা। সূদশাস্ত্র বিধানজ্ঞাঃ পরাভেদ্যাঃ কুলোদ্গতাঃ। সর্ব্বে মহানসে ধার্য্যা লূণ্ডকেশ নখা জনাঃ॥ ইতি মাৎস্যে ২৮৯ অধ্যায়ঃ॥ মহানসোঽপি পুংসি ইত্যমরটীকায়াং রমানাথঃ॥

মহানাটকং ক্লী নাটকবিশেষঃ। তস্য লক্ষণং যথা। এতদেব যদা সর্ব্বৈঃ পতাকাস্থানকৈর্যুতং। অঙ্কৈশ্চ দশভির্ধীরা মহানাটকমূচিরে॥ এতদেব নাটকং। যথা বালরামায়ণং। ইতি সাহিত্যদর্পণং॥ স্বনামখ্যাত হনূমদ্রচিত রামচরিত গ্রন্থবিশেষঃ। যথা। এষ শ্রীল হনূমতা বিরচিতে শ্রীমন্মহানাটকে বীর শ্রীযুত রামচন্দ্র চরিতে প্রত্যুদ্ধৃতে বিক্রমৈঃ। মিশ্র শ্রীমধুসূদনেন কবিনা সন্দর্ভ্য সজ্জীকৃতে স্বর্গারোহণ নামকো হ্যত্র নবমো যাতো হ্যঙ্ক এবেত্যসৌ॥ ইতি তস্যান্তিমশ্লোকঃ॥

মহানাড়ী স্ত্রী কণ্ডরা। ইতি রাজনির্ঘণ্টঃ॥

মহানাদঃ পুং হস্তী॥ বর্ষুকমেঘঃ॥ মহাশব্দঃ। ইতি মেদিনী॥ সিংহঃ॥ কর্ণঃ। ইতি হেমচন্দ্রঃ॥ উষ্ট্রঃ॥ শঙ্খঃ। ইতি রাজনির্ঘণ্টঃ॥ কাহলবাদ্যং। ইতি হারাবলী॥

মহানিদ্রা স্ত্রী মরণং। ইতি জটাধরঃ॥

মহানিম্বঃ পুং নিম্বাক্ষবিশেষঃ। ঘোড়ানিম ইতি ভাষা। তৎপর্য্যায়ঃ। কৈটর্য্যঃ ২ পবনেষ্ট ৩ পার্ব্বতঃ ৪। ইতি রত্নমালা॥ অস্য গুণাঃ। পরমগ্রাহিত্বং। কষায়ত্বং। অম্লত্বং। শীতলত্বঞ্চ। ইতি রাজবল্লভঃ॥

মহানিশা স্ত্রী নিশামধ্যভাগঃ। তৎপর্য্যায়ঃ। নিশার্দ্ধঃ ২ নিশীথঃ ৩। ইতি হেমচন্দ্রঃ॥ * ॥ স্মৃত্যুক্ত মহানিশা সার্দ্ধপ্রহরোপরি প্রহর দ্বয়ং। মহানিশা তু বিজ্ঞেয়া মধ্যমং প্রহর দ্বয়ং। তত্র স্নানং ন কুর্ব্বীত কাম্য নৈমিত্তিকাদৃতে॥ ইতি রঘুনন্দনভট্টাচার্য্যধৃতবচনাৎ। মহা-

নিশা। পরকালস্য নাড়ী চতুষ্টয়স্য পরদিনাদিত্বেন তদানীং পূর্ব্বদিবসীয় ভোজনানুপপত্তেঃ। তদ্দিন কৃত্যলোপাপত্তেশ্চেতি তিথিতত্ত্ব শ্রীধরলিখনস্বরসাচ ।। * ।। তত্র ভক্ষণনিষেধো যথা। যন্মুহূর্ত্তব্যতীতে তু রাত্রাবেব মহানিশা। লভতে ব্রহ্মহত্যাঞ্চ তত্র ভুক্তা চ নারদ ।। গোমাংসং ত্রিগুণঞ্চ সমং তাম্রলগ্নং ফলং জলং। পুংসামভক্ষ্যং শুদ্ধায়া মোহনস্যাপি কা কথা ।। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ।। * ।। তত্র পারণ নিষেধো যথা। ন রাত্রৌ পারণং কুর্য্যাদৃতে বৈ রোহিণী ব্রতাৎ। নিশায়াং পারণং কুর্য্যাদ্বর্জয়িত্বা মহানিশাং ।। মহানিশায়াং পুণ্যায়াং তিথি অন্তং যদা ভবেৎ। তৃতীয়েহ্নি মুনিশ্রেষ্ঠ পারণং কুরুতে ব্রতী।। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৮ অধ্যায়ঃ।। * ।। দেবলোক্তা মহানিশা রাত্রিমধ্যম দণ্ডদ্বয়াত্মিকা। যা দ্বিতীয় প্রহর শেষ দণ্ড তৃতীয় প্রহর প্রথম দণ্ড রূপা। তস্যাং শিবলিঙ্গোৎপত্তি যথা। মাঘকৃষ্ণচতুর্দ্দশ্যামাদিদেবো মহানিশি। শিবলিঙ্গতয়োদ্ভূতঃ কোটিসূর্য্যসমপ্রভঃ ।।

অত্র মহানিশা দ্বে ঘটিকে রাত্রের্মধ্যম যাময়োঃ। ইতি দেবলোক্তা মহানিশা। ঘটিকা দণ্ডরূপা। ইতি তিথ্যাদিতত্ত্বং ।। * ।। তান্ত্রিক মহানিশা যথা। গতে তু প্রথমে যামে তৃতীয় প্রহরাবধি। মহানিশায়াং জ্ঞাতব্যং রাত্রিশেষে জপেন্মতঃ। ইতি তন্ত্রসারঃ।।*।। অপিচ। নিশা তু পরমেশানি সূর্য্যে চাস্তমুপাগতে। প্রহরে চ গতে রাত্রৌ ঘটিকেদ্বে গতে চ যে ।। মহানিশা সমাখ্যাতা ততশ্চাতিমহানিশা। অর্দ্ধরাত্রে গতে দেবি পশুভাবে ন পূজয়েৎ ।। দণ্ডদণ্ডে তু যা পূজা তৎ সর্ব্বং নিষ্ফলং ভবেৎ। ষষ্ঠক্রোশে মহেশানি তৎ সর্ব্বং মধুরোপমং ।। সপ্তমক্রোশকে দেবি সর্ব্বং ক্ষীরোপমং ভবেৎ। অষ্টম ক্রোশকে দেবি সুরাতুল্যং ন সংশয়ঃ। অতঃপরং মহেশানি বিষতুল্যো ন সংশয়ঃ। এতৎ সর্ব্বং মহেশানি পশুভাবে ময়োদিতং ।। দিব্যবীরমতে দেবি তত্ত্বজ্ঞানেন পূজয়েৎ। পঞ্চতত্ত্বং সমানীয় যদি পূজাপরো ভবেৎ ।। কালাকালং মহেশানি বিচারং তত্র বর্জ্জয়েৎ। অর্দ্ধরাত্রে গতে দেবি জলপূজা প্রকীর্ত্তিতা।

ভুক্তেস্বানুরূপেণ সর্ব্বং পূজাদিক ঞ্চারেৎ। অতিস্নেহেন দেবেশি তব স্থানেপুত্রাশিকং॥ পশো। রগ্নেক দারিদ্রৈ পৃকাশং নৈব কারয়েৎ॥ ইতি গুপ্তসাধনতন্ত্রে ৬ পটলঃ॥

মহানাদঃ পুং রজকঃ। ইতি শব্দমালা॥ অতিশয়হীনবর্ণশ্চ॥

মহানীলঃ পুং ভৃঙ্গরাজঃ। নাগবিশেষঃ॥ নীলবিশেষঃ। ইতি মেদিনী॥ তস্য লক্ষণং যথা। যস্তু বর্ণস্য ভূয়স্ত্বাৎ ক্ষীরে শতগুণে স্থিতঃ। নীলতাং তন্নয়েৎ সর্ব্বং মহানীলঃ স উচ্যতে॥ ইতি গারুড়ে ৭২ অধ্যায়ঃ॥

মহানীলা স্ত্রী মহাজম্বূ। ইতি রাজনির্ঘণ্টঃ॥

মহানীলী স্ত্রী নীলাপরাজিতা॥ বৃহন্নীলী। তৎপর্য্যায়ঃ। অমরা ২ জনিনীলিকা ৩ তুত্থা ৪ শ্রীফলিকা ৫ মেলা ৬ ক্লেশার্হা ৭ ভদ্রপত্রিকা ৮। অস্যাগুণাঃ। গুণাঢ্যত্বং। রঙ্গশ্রেষ্ঠত্বং। সুবর্ণদাতৃত্বং। নীলিকানপেক্ষ্য সর্ব্বকর্ম্মসু সগুণত্বং। ইতি রাজনির্ঘণ্টঃ॥

মহানুভাবঃ ত্রি মহাশয়ঃ। যথা। সুকৃতী পুণ্যবান্ ধন্যো ধর্ম্মী চ ধর্ম্মবানপি। মহাশয়ো মহেচ্ছঃ স্যান্মহানুভাব ইত্যপি॥ ইতি শব্দরত্নাবলী॥

মহান্তঃ পুং নবধাভক্তিযুক্তকৃষ্ণভক্তাঃ। তে শিব শেষ ধর্ম্মাদয়ঃ। যথা। শিবঃ শেষশ্চ ধর্ম্মশ্চ ব্রহ্মা বিষ্ণুর্মহান্ বিরাট্। সনৎকুমারঃ কপিলঃ সনকশ্চ সনন্দনঃ॥ বোঢ়ঃ পঞ্চশিখো দক্ষো নারদশ্চ সনাতনঃ। ভৃগুর্মরীচি র্দুর্ব্বাসাঃ কশ্যপঃ পুলহো ঽঙ্গিরাঃ॥ মেধসো লোমশঃ শুক্রো বশিষ্ঠঃ ক্রতুরেব চ। বৃহস্পতিঃ কর্দ্দমশ্চ শক্তিরত্রিঃ পরাশরঃ॥ মার্কণ্ডেয়ো বলিশ্চৈব প্রহ্লাদশ্চ গণেশ্বরঃ। যমঃ সূর্য্যশ্চ বরুণো বায়ুশ্চন্দ্রো হুতাশনঃ॥ অকূপার উলূকশ্চ নাড়ীজঙ্ঘশ্চ বায়ুজঃ। নরো নারায়ণঃ কূর্ম্ম ইন্দ্রদ্যুম্নো বিভীষণঃ॥ নবধা ভক্তিযুক্তাশ্চ কৃষ্ণস্য পরমাত্মনঃ। এতে মহান্তো ধর্ম্মিষ্ঠা ভক্তানাং প্রবরাস্তথা॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৬০ অধ্যায়ঃ॥

মহাপঞ্চমূলং ক্লী বৃহৎপঞ্চমূলং। তদ্যথা। বিল্বো ঽগ্নিমন্থঃ শ্যোনাকঃ কাশ্মর্য্যঃ পাটলা তথা। সর্ব্বৈস্তু মিলিতৈরেতৈঃ স্যান্মহাপঞ্চমূলকং॥ ইতি রাজনির্ঘণ্টঃ॥

মহাপঞ্চবিষং ক্লী বৃহদ্বিষপঞ্চকং। তদ্যথা। শৃঙ্গীচ কালকূটশ্চ মুস্তকো বৎসনাভকঃ। শঙ্খকর্ণীতি যোগোহয়ং মহাপঞ্চবিষাভিধঃ॥ ইতি রাজনির্ঘণ্টঃ॥

মহাপগ্রা স্ত্রী মহাজম্বুঃ। ইতি রত্নমালা॥ বৃহৎপর্ণযুক্তে ত্রি॥

মহাপথঃ পুং প্রধানপথঃ। তৎপর্য্যায়ঃ। ঘণ্টাপথঃ ২ সংসরণং ৩ শ্রীপথঃ ৪ রাজবর্ত্ম ৫ উপনিষ্ক্রমণং ৬ উপনিষ্করং ৭। ইতি হেমচন্দ্রঃ॥

মহাপথগমঃ পুং মরণং। ইতি জটাধরঃ॥

মহাপদ্মঃ পুং অষ্টনাগান্তর্গতনাগভেদঃ। তৎপর্য্যায়ঃ। অতিশুক্লঃ ২ দশবিন্দুকমস্তকঃ ৩। ইতি হেমচন্দ্রঃ॥ কুবেরস্যনবনিধ্যন্তর্গতনিধিবিশেষঃ। ইতি জটাধরঃ॥ লক্ষকোটিসংখ্যা। ইতি লীলাবতী॥ শুক্লপদ্মে ক্লী। ইতি রত্নমালা॥

মহাপাতকং ক্লী পাপবিশেষঃ। তত্তু পঞ্চবিধং। যথা। ব্রহ্মহত্যা সুরাপানং স্তেয়ং গুর্ব্বঙ্গনাগমঃ। মহান্তি পাতকান্যাহুঃ সংসর্গশ্চাপি তৈঃ সহ॥ ইতি মানবে ১১ অধ্যায়ঃ॥ ॥ মহাপাতকজং চিহ্নং সপ্তজন্মসু জায়তে। বাধতে ব্যাধিরূপেণ তস্য কৃচ্ছ্রাদিভিঃ শমঃ॥ ইতি শাতাতপীয় কর্ম্মবিপাকঃ॥ ॥ তুলা মকর মেষেষু প্রাতঃ স্নানং বিধীয়তে। হবিষ্যং ব্রহ্মচর্য্যঞ্চ মহাপাতক নাশনং॥ ইতিমলমাসতত্ত্বং॥ কৃষ্ণেতি মঙ্গলং নাম যস্য বাচি প্রবর্ত্ততে। ভস্মীভবন্তি রাজেন্দ্র মহাপাতক কোটয়ঃ। ইতি পুরাণং॥

মহাপাতকী ত্রি পঞ্চপ্রকারমহাপাতকযুক্তঃ॥ স চ পতিতঃ। যথা। মহাপাতকিনো যে চ পতিতাস্তে প্রকীর্ত্তিতাঃ। পতিতানাং ন দাহঃ স্যান্নান্ত্যেষ্টি র্নাস্থিসঞ্চয়ঃ। নচাশ্রুপাতঃ পিণ্ডো বা কার্য্যং শ্রাদ্ধাদিকং কৃচিৎ॥ এতানি পতিতানান্তু যঃ করোতি বিমোহিতঃ। তপ্তকৃচ্ছ্রদ্বয়েনৈব তস্য শুদ্ধি র্নচান্যথা॥ ইতি শুদ্ধিতত্ত্ব ধৃত বিষ্ণুপুরাণ বচনং॥ ॥ পারিভাষিক মহাপাতকী যথা। কৃত প্রাণপ্রতিষ্ঠাঞ্চ নীচৈ র্যাং প্রতিমাং দ্বিজ। দুর্গাং ন প্রণমেদ্যস্তু স মহাপাতকী স্মৃতঃ॥ ইতি দেবীপুরাণে ব্যাস নারদ সংবাদঃ॥ অপিচ। পিতরং মাতরং ভার্য্যাং গুরুপত্নীং গুরুং পরং। যো ন পুষ্ণাতি কাপট্যাৎস মহাপা-

...ণ্ডী শিব ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৫৪ অধ্যায়ঃ ॥

মহাপাপং ক্লী মহাপাতকং। যথা। মহাপাপেষু সর্ব্বং স্যাৎ তদর্দ্ধন্তুপপাতকে। দদ্যাৎ পাপেষু ষষ্ঠাংশং জ্ঞাত্বা ব্যাধিবলাবলং॥ ইতি মলমাসতত্ত্বং ॥

মহাপারেবতং ক্লী ফলবৃক্ষবিশেষঃ। বড়াপারেবত ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। স্বর্ণপারেবতং ২ সাম্রাণিজং ৩ খারিকং ৪ রক্তরৈবতকং ৫ বৃহৎপারেবতং ৬ দ্বীপজং ৭ দ্বীপখর্জ্জুরং ৮। অস্য গুণাঃ। মধুরত্বং। বলকারিত্বং। পুষ্টিবর্দ্ধনত্বং। বৃষ্যত্বং। মূর্চ্ছাভ্রমঘ্নত্বং। পারেবতাদধিক গুণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহাপাশঃ পুং যমদূতবিশেষঃ। ইতি বৃহদ্ধর্ম্মপুরাণে ৫৬ অধ্যায়ঃ॥ বৃহৎপাশশ্চ ॥

মহাপাসকঃ পুং বদ্ধভিক্ষুকঃ। তৎপর্য্যায়ঃ। চেলকঃ ২ শ্রামণেরঃ ৩ প্রব্রজিতঃ ৪ গোনীনঃ ৫। ইতি ত্রিকাণ্ডশেষঃ ॥

মহাপিণ্ডীতকঃ পুং কৃষ্ণবর্ণমহামদনবৃক্ষঃ। তৎপর্য্যায়ঃ। বারাহঃ ২। অস্য গুণাঃ। শ্রেষ্ঠত্বং। কটু তিক্ত রসান্বিতত্বং। ছর্দ্দনত্বং। কফ হৃদ্রোগ পক্কামাশয় শোধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহাপিণ্ডীতকঃ পুং বৃক্ষবিশেষঃ। পেডিরা ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। শ্বেতপিণ্ডীতকঃ ২ করহাটঃ ৩ ক্ষুরঃ ৪ শল্যকোষতরুঃ ৫ শরঃ ৬ পিণ্ডীতরুঃ ৭। অস্য গুণাঃ। কষায়ত্বং। উষ্ণত্বং। ত্রিদোষ শমনত্বং। চর্ম্মরাগাপহত্বং। বিশেষাৎ রক্তদোষ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহাপীলুঃ পুং পীলুবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। বৃহৎপীলুঃ ২ মহাফলঃ ৩ রাজপীলুঃ ৪ মহাবৃক্ষঃ ৫ মধুপীলুঃ ৬। অস্য ফলগুণাঃ। মধুরত্বং। বৃষ্যত্বং। বিষনাশিত্বং। পিত্তপ্রশমনত্বং। রুচ্যত্বং। আমঘ্নত্বং। দীপনীয়কত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহাপুরাণং ক্লী একাদশলক্ষণযুক্ত ব্যাস প্রণীতাষ্টাদশসংখ্যকপুরাণ বিশেষঃ। তস্য লক্ষণং যথা। সৃষ্টিশ্চাপি বিসৃষ্টিশ্চ স্থিতি স্তেষাঞ্চ পালনং। কর্ম্মণাং বাসনা বার্ত্তা মনূনাঞ্চ ক্রমেণ চ॥ বর্ণনং প্রলয়ানাঞ্চ মোক্ষস্য চ নিরূপণং। উৎকীর্ত্তনং হরেরেব দেবানাঞ্চ পৃথক্

পৃথক্। দশাধিকং লক্ষণঞ্চ মহতাং পরিকীর্ত্তিতং ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৩২ অধ্যায়ঃ ॥

মহাপুরুষঃ পুং শ্রেষ্ঠনরঃ ॥ নারায়ণঃ । যথা । ধ্যেয়ং সদা পরিভবঘ্নম ভীষ্টদোহং তীর্থাস্পদং শিব বিরিঞ্চি নুতং শরণ্যং। ভৃত্যার্ত্তিহং প্রণতপাল ভবাব্ধিপোতং বন্দে মহাপুরুষতে চরণারবিন্দং ॥ ত্যক্ত্বা সুদুস্ত্যজ সুরেপ্সিত রাজ্যলক্ষ্মীং ধর্ম্মিষ্ঠ আর্য্য বচসা যদগাদরণ্যং। মায়ামৃগং দয়িতয়েপ্সিতমন্বধাবদ্ব ন্দে মহাপুরুষ তে চরণারবিন্দং ॥ ইত্যাহ্নিকতত্ত্বধৃত শ্রীভাগবতং ॥

মহাপুরুষদন্তা স্ত্রী শতমূলী। ইতি রত্নমালা ॥

মহাপুরুষদন্তিকা স্ত্রী মহাশতাবরী । ইতি রাজনির্ঘণ্টঃ ॥

মহাপ্রুয়া স্ত্রী অপরাজিতা। ইতি শব্দচন্দ্রিকা ॥

মহাপৃষ্ঠঃ পুং উষ্ট্রঃ। ইতি রাজ নির্ঘণ্টঃ ॥ বৃহৎপৃষ্ঠশ্চ ॥

মহাপ্রকৃতিঃ স্ত্রী দুর্গা। যথা। চিতিশ্চৈতন্য ভাবাদ্বা চেতনা বা চিতিঃ স্মৃতা। মহান্ ব্যাপ্য স্থিতা সর্বং মহা বা প্রকৃতির্মতা॥ ইতি দেবীপুরাণে ৩১ অধ্যায়ঃ ॥

মহাপ্রভঃ ত্রি অতিশয়দীপ্তিযুক্তঃ। মহতী প্রভা যস্যেতি বহুব্রীহি সমাস নিয়মঃ ॥

মহাপ্রভা স্ত্রী মহতীদিপ্তিঃ। যথা । মহাপ্রভাস্বাবহ্নিমাভাবো হন্ধকারঃ । ইতি সামান্যলক্ষণায়াং জগদীশঃ ॥

মহাপ্রভুঃ পুং পরমেশ্বরঃ। যথা। বন্দে হনন্তাদ্ভুতৈশ্বর্য্যং শ্রীচৈতন্যং মহাপ্রভুং। নীচো হপি যৎ প্রসাদাৎ স্যাৎ সদাচার প্রবর্ত্তকঃ ॥ ইতি হরিভক্তিবিলাসে ৩ বিলাসঃ ॥ অনন্ত মদ্ভুত ঞ্চাবিতর্ক্যৈশ্বর্য্যং প্রভাবো যস্য তং বন্দে মহাপ্রভুং পরমেশ্বরং। ইতি তট্টীকায়াং জীবগোস্বামী ॥ অপিচ । সোয়ং নীলগিরীশ্বরঃ সবিভবো যাত্রা চ সা গুণ্ডিচা তে তে দিগ্বিদিগাগতাঃ সুকৃতিন স্তা স্তা দিদৃক্ষাতুরাঃ। আরামাশ্চ তএব নন্দনবন শ্রীণাং তিরস্কারিণঃ সর্ব্বাণ্যেব মহাপ্রভুং বত বিনা শূন্যানি মন্যামহে। ইতি চৈতন্যচন্দ্রোদয়নাটকং

মহাপ্রলয়ঃ পং ত্রিলোকনাশঃ। তৎপর্য্যায়ঃ। সংহারঃ২। ইতিহলায়ুধঃ ॥ তস্য বিবরণং যথা। শ্রীমার্কণ্ডেয় উবাচ। মন্বন্তরং মনোঃ কালো

যাবৎ পালয়তে প্রজাঃ। একো মনুঃ সকালস্তু মন্বন্তর মিতি শ্রুতং ॥ তদেক সপ্ততি যুগৈ র্দ্দেবানা মিহ জায়তে। তৈ শ্চতুর্দ্দশভিঃ কল্পো দিন মেকন্তু বেধসঃ ॥ দিনান্তে বেধসো জাতে সুষুপ্সা তস্য জায়তে। যোগনিদ্রা মহামায়া সমায়াতি পিতামহং ॥ নাভিপদ্মং প্রবিশ্যাথ বিষ্ণো রমিত তেজসঃ। সুখং স শেতে ভগবান্ ব্রহ্মা লোক পিতামহঃ ॥ ততো বিষ্ণুঃ স্বয়ং ভূত্বা রুদ্ররূপী জনার্দ্দনঃ। পূর্ব্বমাশোষয়ামাস স সর্ব্বং ভুবন ত্রয়ং ॥ বায়ুনা বহ্নিনা সর্ব্বং দাহয়ামাস বৈ যথা। মহাপ্রলয়কালে চ তথা সর্ব্বং জগৎত্রয়ং ॥ জনং যান্তি প্রতাপার্ত্তা মহর্লোক নিবাসিনঃ। ত্রৈলোক্যং দাহয়ামাস পীড়িতা দারুণাগ্নিনা ॥ ততঃ কালান্তকৈ র্মেঘৈ র্নানা বর্ণৈ র্মহাস্বনৈঃ। সমুৎপাদ্য মহাবৃষ্টি মাপূর্য্য ভুবন ত্রয়ং ॥ চলত্তরঙ্গৈ স্তোয়ৌঘৈ রাপ্লুতস্থান সঙ্কটৈঃ। নিধায় জঠরে লোকানিমাংস্ত্রীন্ স জনার্দ্দনঃ ॥ নাগপর্য্যঙ্ক শয়নে শেতে স পরমেশ্বরঃ ॥ শয়ানং নাভিকমলে ব্রহ্মাণং স জগৎপ্রভুঃ ॥ সংস্থাপ্য ত্রীনিমাল্লোকান্ দগ্ধ্বা দগ্ধ্বা শ্রিয়া সহ। শেতে স ভোগিশয্যা-

যাং ব্রহ্মা নারায়ণাত্মকঃ ॥ যোগনিদ্রা বশং যাত ত্রৈলোক্য গ্রাস বৃংহিতঃ। ত্রৈলোক্য মখিলং দগ্ধং যদা কালাগ্নিনা তদা। অনন্তঃ পৃথিবীং ত্যক্ত্বা বিষ্ণো রন্তিক মাগতঃ ॥ তেন ত্যক্ত্বা তু পৃথিবী ক্ষণ মাত্রাদধো গতা। পতিতা কূর্ম্ম পৃষ্ঠে তু বিশীর্ণেব তদা ভবৎ ॥ কূর্ম্মোপি মহতো যত্নাচ্চলন্তীং পৃথিবীং জলে। ব্রহ্মাণ্ডং পঙ্ক্তি রাক্রম্য পৃষ্ঠে দধ্রে ধরাং তদা ॥ ব্রহ্মাণ্ড খণ্ড সংযোগাচ্চূর্ণিতা পৃথিবী ভবেৎ। ইতি তাং পরিগৃহ্য কূর্ম্মরূপী জনার্দ্দনঃ ॥ চলজ্জলৌঘ সংসর্গাচ্চলন্ত্যা ধরয়া তদা। কূর্ম্মপৃষ্ঠং বহুতরৈ র্বরৈশ্চ বিতভীকৃতং ॥ অনন্ত স্তত্র গত্বা তু যত্র ক্ষীরোদসাগরঃ। তত্র স্বয়ং শ্রিয়া যুক্তং সুষুপ্সন্তং জনার্দ্দনং ॥ ফণয়া মধ্যয়া দধ্রে ত্রৈলোক্য গ্রাস বৃংহিতং ॥ পূর্ব্বং ফণং বিতত্যোর্দ্ধং পদ্মং কৃত্বা মহাবলঃ। বিষ্ণু মাহ্লাদয়ামাস শেষাখ্যঃ পরমেশ্বরঃ ॥ তস্যোপধান মকরোদনন্তো দক্ষিণাং ফণাং। উত্তরাং পাদয়ো শ্চক্রে উপধানং মহাবলঃ ॥ তালবৃন্তং তদা চক্রে স শেষঃ পশ্চিমাং ফণাং। স্বয়ন্ত বীজয়ামাস শেষরূপী জনার্দ্দনং ॥ শঙ্খং চক্রং নন্দকাসি মিষুধী দ্বে ম-

হাবলঃ। ঐশানযাথ ফণয়া স দগ্ধে গরুড়ং তদা॥ গদাং পদ্মঞ্চ শার্ঙ্গঞ্চ তথৈব বিবিধাযুধং। যানি চান্যানি তস্যাসন্মাগ্নেন্যা ফণয়া দগ্ধৌ॥ এবং কৃত্বা স্বকং কাযং শযনীযং তদা হরেঃ। পৃথ্বী মধর কাযেন মগ্না মাক্রম্য চাম্ভসি। ত্রৈলোক্য ব্রহ্ম সহিতং সলক্ষ্মীকং জনার্দ্দনং। সোপাসঙ্গ জগদ্বীজং জগৎ কারণ কারণং। নিত্যানন্দং বেদময়ং ব্রহ্মণ্যং পরমেশ্বরং॥ জগৎকারণ কর্ত্তারং জগৎ কারণ কারণং। ভূত ভব্য ভবন্নাথং পরাপর পতিং হরিং॥ দধার শিরসানন্তঃ স্বযমেব স্বকাং তনুং। এবং ব্রহ্মদিনস্যৈব প্রমাণেন নিশাং হরিঃ। সন্ধ্যাঞ্চ সমধিপ্রাপ্য শেতে নারাযণো ঽব্যযঃ॥ যস্মাদযন্ত প্রলযো ব্রহ্মণঃ স্যাদ্দিনে দিনে। তস্মাদ্দৈনং দিন মিতি খ্যাপযন্তি পুরাবিদঃ॥ ব্যতীতাযাং নিশাযান্তু ব্রহ্মা লোক পিতামহঃ। ত্যক্ত্বা নিদ্রাং সমুত্তস্থৌ স পুনঃ সৃষ্টযে ত্বিহ॥ ইতি কালিকা পুরাণে ২৭ অধ্যাযঃ॥ ন্যাযমতে জন্যভাবানধিকরণ কালঃ। স চ চরমধ্বংসরূপঃ॥

মহাপ্রসাদঃ পুং বিষ্ণুনৈবেদ্যাদি। যথা। পাদোদকঞ্চ নির্ম্মাল্যং নৈবেদ্যঞ্চ বিশেষতঃ। মহাপ্রসাদ ইত্যুক্ত্বা গ্রাহ্যং বিষ্ণোঃ প্রযত্নতঃ॥ ইত্যেকাদশীতত্ত্ব ধৃত মৎস্যসূক্ত বচনং॥ শ্রীজগন্নাথস্য মহাপ্রসাদমাহাত্ম্যং জগন্নাথ শব্দে দ্রষ্টব্যং॥ অতিশযপ্রসন্নতা চ॥

মহাপ্রাণঃ পুং দ্রোণকাকঃ। ইতি রাজনির্ঘণ্টঃ॥ বর্ণবিশেষঃ। সচ। খ ঘ ছ ঝ ঠ ঢ থ ধ ফ ভ শ ষ স হ রূপঃ। যথা। বর্গাণাং প্রথম তৃতীয পঞ্চমাঃ প্রথম তৃতীয যনৌ য র ল বাশ্চাল্পপ্রাণাঃ। অন্যে মহাপ্রাণা ইত্যর্থঃ। ইতি সিদ্ধান্তকৌমুদী॥

মহাফলঃ পুং বিল্ববৃক্ষঃ। ইতি রত্নমালা॥ বৃহৎফলে ক্লী॥

মহাফলা স্ত্রী ইন্দ্রবারুণী। ইতি জটাধরঃ॥

মহাফেণা স্ত্রী হিণ্ডীরঃ। ইতি শব্দচন্দ্রিকা॥

মহাবলং ক্লী সীসকং। ইতি হেমচন্দ্রঃ॥

মহাবলঃ পুং বুদ্ধঃ। ইতি ত্রিকাণ্ডশেষঃ॥ বাযুঃ॥ বলীযসি ত্রি। ইতি হেমচন্দ্রঃ॥

মহাবলা স্ত্রী বলাভেদঃ। পীতবাট্যালকঃ। তৎপর্য্যাযঃ। ঋষ্যপ্রোক্তা ২ অতিবলা ৩ পীতপুষ্পী ৪।

ইতি রত্নমালা ॥

মহাবোধিঃ পুং বুদ্ধঃ। ইতি হেমচন্দ্রঃ ॥

মহাব্রাহ্মণঃ পুং নিন্দিতব্রাহ্মণঃ। ইতি পাণিনিব্যাকরণং ॥ অস্মিন্ দেশে অযং অগ্রদানিত্বেনপ্রসিদ্ধঃ॥

মহাভদ্রা স্ত্রী গঙ্গা। ইতিশব্দমালা ॥ কাশ্মরী। ইতি রাজনির্ঘণ্টঃ ॥

মহাভটঃ পুং অতিশযযোদ্ধা। যথা ।। তদোজসা দৈত্য মহাভটার্পিতং চকাস দন্তঃ খ উদীর্ণ দীধিতি। চক্রেণ চিচ্ছেদ নিশাত নেমিনা হরির্যথা তার্ক্ষ্য পতত্র মুজ্ঝিতং ॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১৯ অধ্যাযঃ॥

মহাভারতং ক্লী ব্যাসপ্রণীতেতিহাসশাস্ত্রং। তন্নাম কারণং যথা। একত শ্চতুরো বেদা ভারতঞ্চৈতদেকতঃ। পুরা কিল সুরৈঃ সর্বৈঃ সমস্য তুলযা ধৃতং ॥ চতুর্ভ্যঃ স রহস্যেভ্যো বেদেভ্যো হ্যভ্যধিকং যদা। তদা প্রভৃতি লোকে হস্মিন্ মহাভারত মুচ্যতে ॥ মহত্ত্বাদ্ভারতত্বাচ্চ মহাভারত মুচ্যতে ইতি মহাভারতে আদিপর্ব্ব॥ * ॥লোকবিশেষেষু তস্য শ্লোক সংখ্যা বাচকাশ্চ যথা। ষষ্টিংশত সহস্রাণি চকারান্যাং স সংহিতাং। ত্রিংশচ্ছত সহস্রঞ্চ দেবলোকে প্রতিষ্ঠিতং ॥ পিত্রে পঞ্চদশ প্রোক্তং রক্ষো যক্ষে চতুর্দশং। একংশত সহস্রন্তু মানুষেষু প্রতিষ্ঠিতং ॥ নারদো হশ্রাবযদ্দেবানসিতো দেবলঃ পিতৃন্। গন্ধর্ব যক্ষ রক্ষাংসি শ্রাবযামাস বৈ শুকঃ ॥ অস্মিংস্তু মানুষে লোকে বৈশম্পাযন উক্তবান্। ইতি মহাভারতে ১ পর্ব্বণি অনুক্রমণিকাধ্যাযঃ ॥ * ॥ তত্র শতপর্ব্বাণি তেষ্বষ্টাদশ মুখ্যানি যথা। আদি সভা রিণিনানি বিরাট প্রোদ্যম ভীষ্ম গুরুণি চ কর্ণঃ। শল্যঞ্চ সৌপ্তিক পর্ব্ব তথা স্ত্রী শান্ত্যনুশান্তি তুরঙ্গমমেধাঃ ॥ আশ্রম মৌষল যানিক নাকাঃ পর্ব্বণি পর্ব্বণি নাম বিশেষাঃ ॥ ইতি ভারতটীকা ॥ * ॥ হরিবংশ সহিতোনবিংশতি পর্ব্বণামন্তর্গত শতপর্ব্ববিভাগ স্তেষামধ্যায শ্লোক সংখ্যা চ যথা। ১ আদিপর্ব্বণি ১৯ পর্ব্বাণি ২২৭ অধ্যাযাঃ ৮৯৮৪ শ্লোকাঃ। ২ সভাপর্ব্বণি ৯ পর্ব্বাণি ৭৮ অধ্যযাঃ ২৫১১ শ্লোকাঃ। ৩ আরণ্যকপর্ব্বণি ১৬ পর্ব্বাণি ২৬৯ অধ্যাযাঃ ১১৬৬৪ শ্লোকাঃ। ৪ বিরাটপর্ব্বণি ৪ পর্ব্বাণি ৬৭ অধ্যাযাঃ ২০৫০ শ্লোকাঃ। ৫ উদ্যোগপর্ব্বণি ১১ পর্ব্বাণি ১৮৬ অধ্যাযাঃ ৬৬২৮

শ্লোকাঃ। ৬ ভীষ্মপর্ব্বণি ৫ পর্ব্বাণি ১১৭ অধ্যাযাঃ ৫৮৮৪ শ্লোকাঃ। ৭ দ্রোণপর্ব্বণি ৮ পর্ব্বাণি ১৭০ অধ্যাযাঃ ৯৯০৯ শ্লোকাঃ। ৮ কর্ণপর্ব্বণি ১ পর্ব্ব ৬৯ অধ্যাযাঃ ৪৯৬৩ শ্লোকাঃ। ৯ শল্যপর্ব্বণি ৪ পর্ব্বাণি ৫৯ অধ্যাযাঃ ৩২২০ শ্লোকাঃ। ১০ সৌপ্তিকপর্ব্বণি ৩ পর্ব্বাণি ১৮ অধ্যাযাঃ ৮৭০ শ্লোকাঃ। ১১ স্ত্রীপর্ব্বণি ৫ পর্ব্বাণি ২৭ অধ্যাযাঃ ৭৭৫ শ্লোকাঃ। ১২ শান্তিপর্ব্বণি ৪ পর্ব্বাণি ৩৩৯ অধ্যাযাঃ ১৪৭৩২ শ্লোকাঃ। ১৩ অনুশাসনপর্ব্বণি ১ পর্ব ১৪৬ অধ্যাযাঃ ৮০০০ শ্লোকাঃ। ১৪ অশ্বমেধপর্ব্বণি ২ পর্ব্বণী ১০৩ অধ্যাযাঃ ৩৩২০ শ্লোকাঃ। ১৫ আশ্রমবাসপর্ব্বণি ৩ পর্ব্বাণি ৪২ অধ্যাযাঃ ১৫০৬ শ্লোকাঃ। ১৬ মৌষলপর্ব্বণি ১ পর্ব্ব ৮ অধ্যাযাঃ ৩০০ শ্লোকাঃ। ১৭ মহাপ্রাস্থানিকপর্ব্বণি ১ পর্ব্ব ৩ অধ্যাযাঃ ৩২০ শ্লোকাঃ। ১৮ স্বর্গপর্ব্বণি ১ পর্ব্ব ৫ অধ্যাযাঃ ২০০ শ্লোকাঃ। ১৯ হরিবংশে আশ্চর্য্যপর্ব্বণি ১ পর্ব্ব ২৪৪ অধ্যাযাঃ ১২০০০ শ্লোকাঃ। হরিবংশে ভবিষ্যপৌষ্কর প্রাদুর্ভাবে ১ পর্ব্ব ১১২ অধ্যাযাঃ ৩৩৪৮ শ্লোকাঃ। ইতি মহাভারতে আদিপর্ব্বণি পর্ব্বসংগ্রহ নামকঃ ২ অধ্যাযঃ॥ *॥

তৎ শ্রবণবিধ্যাদি যথা। জনমেজয উবাচ। ভগবন্ কেন বিধিনা শ্রোতব্যং ভারতং বুধৈঃ ফলং কিংকেচদেবাশ্চ পূজ্যা বৈ পারণেষ্বিহ॥ দেযং সমাপ্তে ভগবন্ কিঞ্চ পর্ব্বণি পর্ব্বণি। বাচকঃ কীদৃশশ্চাত্র এষ্টব্য স্তদ্ব্রবীহি মে॥*॥ বৈশম্পাযন উবাচ। শৃণু রাজন্ বিধিনিমং ফলং যচ্চাপি ভারতাৎ। শ্রুতাদ্ভবতি রাজেন্দ্র যত্ত্বং মামনুপৃচ্ছসি॥ দিবি দেবা মহীপাল ক্রীডার্থ মবনিং গতাঃ। কৃত্বা কার্য্য নিদঞ্চৈব ততশ্চ দিব মাগতাঃ॥ হন্ত যত্তে প্রবক্ষ্যামি তচ্ছৃণুষ্ব সমাহিতঃ। ঋষীণাং দেবতানাঞ্চ সম্ভবং বসুধাতলে॥ অত্র রুদ্রা স্তথা সাধ্যা বিশ্বেদেবাশ্চ শাশ্বতাঃ। আদিত্যা অশ্বিনৌ দেবৌ লোকপালা মহর্ষযঃ॥ গুহ্যকাশ্চ সগন্ধর্ব্বা নাগা বিদ্যাধরা স্তথা। সিদ্ধা ধর্ম্মঃ স্বযম্ভূশ্চ মুনিঃ কাত্যাযনো বরঃ॥ গিরযঃ সাগরা নদ্য স্তথৈবাপ্সরসাং গণাঃ। গ্রহাঃ সংবৎসরশ্চৈব অযনান্যৃতব স্তথা॥ স্থাবরং জঙ্গমঞ্চৈব জগৎ সর্ব্বং সুরাসুরং। ভারতে ভরত শ্রেষ্ঠ একস্থমিহ দৃশ্যতে॥ তেষাং শ্রুত্বা প্রতিষ্ঠানং নাম কর্ম্মানুকীর্ত্তনাৎ। কৃত্বাপি পাতকং ঘোরং সদ্যো মুচ্যেত মানবঃ

| অনুবাদ | মহাভা |
|---|---|

॥৯॥ ইতিহাস মিমং শ্রুত্বা যথাবদনু পূর্ব্বশঃ। সংযতাত্মা শুচি র্ভূত্বা পারং গত্বা চ ভারত॥ তেষাং শ্রাদ্ধানি দেয়ানি শ্রুত্বা ভারত ভারতং। ব্রাহ্মণেভ্যো যথা শক্ত্যা ভক্ত্যা চ ভরতর্ষভ॥ মহাদানানি দেয়ানি রত্নানি বিবিধানি চ। গাবঃ কাংস্যোপদোহাশ্চ কন্যাশ্চৈব স্বলঙ্কৃতাঃ॥ সর্ব্ব কাম গুণোপেতা যানানি বিবিধানি চ। ভবনানি বিচিত্রাণি ভূমি র্ব্বাসাংসি কাঞ্চনং॥ বাহনানি চ দেয়ানি হয়া মত্তাশ্চ বারণাঃ। শয়নং শিবিকাশ্চৈব স্যন্দনাশ্চ স্বলঙ্কৃতাঃ॥ যদ্যদ্গৃহে বরং কিঞ্চিৎ যদ্যদস্তি মহদ্বসু। তত্তদ্দেয়ং দ্বিজাতিভ্য আত্মা দারাশ্চ সুনবঃ॥ শ্রদ্ধয়া পরয়া দত্তং ক্রমশ স্তস্যপারগঃ। শক্তিতঃ সুমনা হৃষ্টঃ শুশ্রূষু রবিকল্পনঃ॥ ৯॥ সত্যার্জ্জবরতো দান্তঃ শুচিঃ শৌচ সমন্বিতঃ। শ্রদ্ধধানো জিতক্রোধো যথা সিধ্যতি তচ্ছৃণু॥ শুচিঃ শীলান্বিতাচারঃ শুক্লবাসা জিতেন্দ্রিয়ঃ। সংস্কৃতঃ সর্ব্বশাস্ত্রজ্ঞঃ শ্রদ্দধানো হন সূয়কঃ॥ রূপবান্ শুভগো দান্তঃ সত্যবাদী জিতেন্দ্রিয়ঃ। দান মান গৃহীতশ্চ কার্য্যো ভবতি বাচকঃ॥ অবিলম্বমনা যস্তু মন্দতং ধীর মূর্জ্জিতং। অসংসক্তাক্ষরপদং রস ভাব সমন্বিতং॥ ত্রিষষ্টি বর্ণ সংযুক্ত মষ্ট স্থান সমন্বিতং। বাচযেদ্বাচকঃ স্বস্থঃ স্বাসীনঃ সুসমাহিতঃ॥ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমং। দেবীং সরস্বতী ঞ্চৈব ততো জয় মুদীরয়েৎ॥ ঈদৃশাদ্বাচকাদ্রাজন্ শ্রুত্বা ভারত ভারতং। নিযমস্থঃ শুচিঃ শ্রোতা শৃণ্বন্ স ফল মশ্নুতে॥ ৯॥ পারণং প্রথমং প্রাপ্য দ্বিজান্ কামৈশ্চ তর্পয়ন্। অগ্নিষ্টোমস্য যাগস্য ফলং বৈ লভতে নরঃ॥ অপ্সরোগণ সঙ্কীর্ণং বিমানং লভতে মহৎ। প্রহৃষ্টঃ সতু দেবৈশ্চ দিবং যাতি সমাহিতঃ॥ দ্বিতীয়ং পারণং প্রাপ্য অতিরাত্র ফলং লভেৎ। সর্ব্বরত্ন ময়ং দিব্যং বিমান মধিরোহতি॥ দিব্য মাল্যাম্বরধরো দিব্যগন্ধ বিভূষিতঃ। দিব্যাঙ্গদধরো নিত্যং দেবলোকে মহীয়তে॥ তৃতীয়ং পারণং প্রাপ্য দ্বাদশাহ ফলং লভেৎ। বসত্যমর সঙ্কাশো বর্ষাণ্যযুতশো দিবি॥ চতুর্থে বাজপেয়স্য পঞ্চমে দ্বিগুণং ফলং। উদিতাদিত্য সঙ্কাশং জ্বলন্ত মনলোপমং॥ বিমানং বিবুধৈঃ সার্দ্ধমারুহ্য দিবি গচ্ছতি। বর্ষাযুতানি ভবনে শক্রস্য দিবি মোদতে॥ ষষ্ঠে

দ্বিগুণ মস্তীহ সপ্তমে ত্রিগুণং ফলং। কৈলাস শিখরাকারং বৈদূর্য্যময় বেদিকং ॥ পরিক্ষিপ্তঞ্চ বহুধা মণি বিদ্রুম ভূষিতং। বিমানং সমধিষ্ঠায কামগং সাপ্সরাগণং ॥ সর্ব্বান্ লোকান্ বিচরতে দ্বিতীয ইব ভাস্করঃ। অষ্টমে রাজসূযস্য পারণে লভতে ফলং ॥ চন্দ্রোদয নিভং রম্যং বিমান মধিরোহতি। চন্দ্ররশ্মি প্রতীকাশৈ র্হযৈ র্যুক্তং মনোজবৈঃ ॥ সেব্যমানো বরস্ত্রীণাং চন্দ্রাৎকান্ততরৈ র্ম্মুখৈঃ। মেখলানাং নিনাদেন নূপুরাণাঞ্চ নিস্বনৈঃ ॥ অঙ্কে পরম নারীণাং সুখ সুপ্তো বিবুধ্যতে। নবমে ক্রতুরাজস্য বাজিমেধস্য ভারত ॥ কাঞ্চন স্তম্ভ নির্ব্যূহং বৈদূর্য্য কৃত বেদিকং। জাম্বূনদমযৈ র্দ্দিব্যৈর্গবাক্ষৈঃ সর্ব্বতো বৃতং ॥ সেবিতং চাপ্সরঃ সংঘৈ র্গন্ধর্ব্বৈ র্দ্দিবিচারিভিঃ। বিমানং সমধিষ্ঠায শ্রিযা পরমযা জ্বলন্ ॥ দিব্য মাল্যাম্বরধরো দিব্য চন্দন রূষিতঃ। মোদতে দৈবতৈঃ সার্দ্ধং দিবি দেব ইবাপরঃ ॥ দশমং পারণং প্রাপ্য দ্বিজাতীনভিবন্দ্য চ। কিঙ্কিণী জাল নির্ঘোষং পতাকা ধ্বজ শোভিতং ॥ বসু বেদিক সংকাশং বৈদূর্য্যমণি তোরণং। হেমজাল পরিক্ষিপ্তং প্রবাল বড়ভীমুখং। গন্ধর্ব্বৈ র্গীত কুশলৈ রপ্সরোভিশ্চ শোভিতং ॥ বিমানং সুকৃতাবাসং সুখেনৈবোপপদ্যতে ॥ মুকুটেনার্কবর্ণেন জাম্বূনদ বিভূষিণা। দিব্য চন্দন দিগ্ধাঙ্গো দিব্যমাল্য বিভূষিতঃ ॥ দিব্যান্ লোকান্ বিচরতি দিব্যৈ র্ভোগৈঃ সমন্বিতঃ। বিবুধানাং প্রসাদেন শ্রিযা পরমযা যুতঃ ॥ অথ বর্ষগণানেবং স্বর্গলোকে মহীযতে। অথ গন্ধর্ব্ব সহিতঃ সহস্রাণ্যেক বিংশতিং ॥ পুরন্দরপুরে রম্যে শক্রেণ সহ মোদতে। দিব্যযান বিমানেষু লোকেষু বিবিধেষু চ ॥ দিব্যনারীগণাকীর্ণো নিবসত্যমরো যথা। ততঃ সূর্য্যস্য ভবনে চন্দ্রস্য ভবনে তথা ॥ শিবস্য ভবনে রাজন্ বিষ্ণো র্যাতি সলোকতাং। এব মেতন্মহারাজ নাত্র কার্য্যা বিচারণা ॥ শ্রদ্দধানেন বৈ ভাব্যমেব মাহ গুরু র্ম্মম ॥ * ॥ লেখকস্য তু দাতব্যং মনসা যদ্যদিচ্ছতি ॥ হস্ত্যশ্ব রথ যানানি বাহনঞ্চ বিশেষতঃ। কটকং কুণ্ডলঞ্চৈব ব্রহ্মসূত্রং তথা পরং ॥ বস্ত্রঞ্চৈব বিচিত্রঞ্চ গন্ধঞ্চৈব বিশেষতঃ। দেববৎ পূজযেত্তন্তু বিষ্ণুলোক মবাপ্নুযাৎ ॥ * ॥ অতঃ পরং প্রবক্ষ্যামি যানি দেযানি ভারতে। বাচ্যমানে তু বিপ্রেভ্যো রাজন্

পর্ব্বণি পর্ব্বণি ॥ জাতিং দেশঞ্চ স ত্বঞ্চ মাহাত্ম্যং ভরতর্ষভ । ধর্ম্ম বৃত্তিঞ্চ বিজ্ঞায় ক্ষত্রিয়াণাং নরাধিপ ॥ স্বস্তিবাচ্য দ্বিজানাদৌ ততঃ কার্য্যে প্রবর্ত্তত । সমাপ্তে পর্ব্বণি ততঃ স্ব শক্ত্যা পূজয়েৎ দ্বিজান্ ॥ আদৌ তু বাচকন্তত্র বস্ত্র গন্ধ সমন্বিতং । বিধিবদ্ভোজয়েদ্রাজন্ মধু পায়স মুত্তমং ॥ ততো মূল ফল প্রায়ং পায়সং মধু সর্পিষা । আস্তীকে ভোজয়েদ্রাজন্ দদ্যাচ্চৈব গুড়ৌদনং ॥ অপূপৈ শ্চৈব পূপৈশ্চ মোদকৈশ্চ সমন্বিতং । সভাপর্ব্বণি রাজেন্দ্র হবিষ্যং ভোজয়েৎ দ্বিজান্ ॥ আরণ্যকে মূলফলৈ স্তর্পয়েত্ত দ্বিজোত্তমান্ । অরণীপর্ব্ব চাসাদ্য জলকুম্ভান্ প্রদাপয়েৎ ॥ তর্পণানি চ মুখ্যানি রম্য মূল ফলানি চ । সর্ব্বকাম গুণোপেতং বিপ্রেভ্যো অন্নং প্রদাপয়েৎ ॥ বিরাটপর্ব্বণি তথা বাসাংসি বিবিধানি চ । উদ্যোগে ভরতশ্রেষ্ঠ সর্ব্ব কাম গুণান্বিতং ॥ ভোজনং ভোজয়েদ্বিপ্রান্ গন্ধমাল্যৈ রলঙ্কৃতান্ । ভীষ্মপর্ব্বণি রাজেন্দ্র দত্ত্বা যান মনুত্তমং ॥ ততঃ সর্ব্বগুণোপেত মন্নং দদ্যাৎ সুসংস্কৃতং । দ্রোণপর্ব্বণি বিপ্রেভ্যো ভোজনং পরমার্চিতং ॥ শরাশ্চ দে-

যা রাজেন্দ্র চাপান্যসিবরা স্তথা । কর্ণপর্ব্বণ্যপি তথা ভোজনং সার্ব্বকামিকং ॥ বিপ্রেভ্যঃ সংস্কৃতং সৌম্যক দদ্যাৎ সংযতমানসঃ । শল্য পর্ব্বণি রাজেন্দ্র মোদকৈঃ সগুড়ৌদনৈঃ ॥ অপূপৈ স্তর্পণৈ শ্চৈব সর্ব্বমন্নং প্রদাপয়েৎ । গদাপর্ব্বণ্যপি তথা মদ্গমিশ্রং প্রদাপয়েৎ ॥ স্ত্রীপর্ব্বণি তথা রত্নৈ স্তর্পয়েত্ত দ্বিজোত্তমান্ । ঘৃতৌদনং পুরস্তাচ্চ ঐষীকে দাপয়েৎ পুনঃ ॥ ততঃ সর্ব্ব গুণোপেত মন্নং দদ্যাৎ সুসংস্কৃতং । শান্তিপর্ব্বণ্যপি তথা হবিষ্যং ভোজয়েদ্দ্বিজান ॥ আশ্বমেধিক মাসাদ্য ভোজনং সার্ব্বকামিকং । তথাশ্রমনিবাসে তু হবিষ্যন্ভোজয়েৎ দ্বিজান্ ॥ মৌষলে সার্ব্বগুণিকং গন্ধমাল্যানুলেপনং । মহাপ্রাস্থানিকে তদ্বৎ সর্ব্বকাম গুণান্বিতং ॥ স্বর্গপর্ব্বণ্যপি তথা হবিষ্যং ভোজয়েদ্দ্বিজান্ । হরিবংশে পর্ব্বণি চ পায়সং তত্র ভোজয়েৎ ॥ পারণে পারণে রাজন্ যথা বত্তরতর্ষভ । সমাপ্য সর্ব্বাঃ প্রযতঃ সংহিতাঃ শাস্ত্রকোবিদঃ ॥ ॥ শুভে দেশে নিবেশ্যাথ ক্ষৌম বস্ত্রাভি সংবৃতাঃ । শুক্লাম্বরধরঃ স্রগ্বী শুচি ভূত্বা স্বলঙ্কৃতঃ ॥ অর্চয়েত যথা ন্যায়ং গন্ধমা-

ন্যৈঃ পৃথক্ পৃথক্। সংহিতা পুস্তকান্যাজন্ প্রযতঃ সুসমাহিতঃ॥ ভক্ষ্যৈর্মাল্যৈশ্চ পেযৈশ্চ কামৈশ্চ বিবিধৈঃ শুভৈঃ। হিরণ্যঞ্চ সুবর্ণঞ্চ দক্ষিণামথ দাপযেৎ॥ দেবতাঃ কীর্ত্তযেৎ সর্ব্বা নরনারায়ণৌ তথা। ততো গন্ধৈশ্চ মাল্যৈশ্চ স্বলংকৃত্য দ্বিজোত্তমান্॥ তর্পযেদ্বিবিধৈঃ কামৈ র্দানৈশ্চোচ্চাবচৈ স্তথা। অতিরাত্রস্য যজ্ঞস্য ফলং প্রাপ্নোতি মানবঃ॥ প্রাপ্ন যাচ্চ ক্রতু ফলং তথা পর্ব্বণি পর্ব্বণি। বাচকো ভরতশ্রেষ্ঠ ব্যক্তাক্ষর পদ স্বরঃ॥ ভবিষ্যং শ্রাবযেদ্বিদ্বান্ ভারতং ভরতর্ষভ। ভক্তবৎসু দ্বিজেন্দ্রেষু যথা বৎসংপ্রদাপযেৎ॥ বাচকং ভরতশ্রেষ্ঠ ভোজযিত্বা স্বলঙ্কৃতং। বাচকে পরিতুষ্টে তু শুভা প্রীতি রনুত্তমা॥ ব্রাহ্মণেষু তু তুষ্টেষু প্রসন্নাঃ সর্ব্বদেবতাঃ। *। ততো হি বরণং কার্য্যং দ্বিজানাং ভরতর্ষভ॥ সর্ব্বকামৈ র্যথা ন্যাযং সাধুভিশ্চ পৃথগ্বিধৈঃ। ইত্যেষ বিধিরুদ্দিষ্টো ময়া তে দ্বিপদাং বর॥ শ্রদ্দধানেন বৈ ভাব্যং যন্মাং ত্বং পরিপৃচ্ছসি। ভারত শ্রবণাদ্রাজ্ঞা পারণে চ নৃপোত্তম॥ সদা যত্নবতা ভাব্যং শ্রেযস্তু পরমিচ্ছতা। *। ভারতং শৃণুযান্নিত্যং ভারতং পরিকীর্ত্তযেৎ। ভারতং ভবনে যস্য তস্য হস্তগতো জযঃ॥ ভারতং পরমং পুণ্যং ভারতে বিবিধাঃ কথাঃ। ভারতং সেব্যতে দেবৈ র্ভারতং পরমং পদং॥ ভারতং সর্ব্বশাস্ত্রাণামুত্তমং ভরতর্ষভ। ভারতাৎ প্রাপ্যতে মোক্ষ স্তত্ত্বমেতদ্ব্রবীমি তে॥ মহাভারতমাখ্যানং ক্ষিতিং গাঞ্চ সরস্বতীং। ব্রাহ্মণান্ কেশবঞ্চৈব কীর্ত্তযন্নাবসীদতি॥ বেদে রামাযণে পুণ্যে ভারতে ভরতর্ষভ। আদৌ চান্তে চ মধ্যে চ হরিঃ সর্ব্বত্র গীযতে॥ যত্র বিষ্ণুকথা দিব্যাঃ শ্রুতযশ্চ সনাতনাঃ। তচ্ছ্রোতব্যং মনুষ্যেণ পরং পদ মিহেচ্ছতা॥ এতৎ পবিত্রং পরম মেতদ্ধর্ম্ম নিদর্শনং। এতৎ সর্ব্ব গুণোপেতং শ্রোতব্যং ভূতি মিচ্ছতা॥ ইতি মহাভারতে হরিবংশে সর্ব্বপর্ব্বানুকীর্ত্তনং॥ *॥ ত্রিষষ্টিবর্ণ সংযুক্ত মিতন্ত্রে ত্রিষষ্টিবর্ণাঃ। অ ই উ ঋ ৯ ইতি হ্রস্বপঞ্চকং। আ ঈ ঊ ৠ ৡ ইতি দীর্ঘপঞ্চকং। আ ঈ ঊ ৠ ৡ ইতি প্লুতপঞ্চকং। এ ও ঐ ঔ চ দীর্ঘাঃ। প্লুতত্বে নাপর চতুষ্টযং। অং অঃ ক× প৺ ইতি চত্বারঃ। ঋ ৯ ইতি অচ সংজ্ঞকৌ দ্বৌ। অনুনাশিকশ্চৈকঃ। তথা কাদি মাবসানাঃ পঞ্চবিংশতি

বর্ণাঃ। অন্তস্থাশ্চত্বারঃ। উষ্ম চতুষ্টয়মিতি ত্রিষষ্টিঃ। ইতি।৵। বর্ণানাংকিলাষ্টৌ স্থানানি ভবন্তি তানি যথা। উরঃ কণ্ঠঃ শির স্তালু জিহ্বা দন্তৌষ্ঠ নাসিকাঃ। অষ্টৌ স্থানানি বর্ণানাং যে বিদু স্তে হি পাঠকাঃ। ইতি ॥৵॥ পারণং যথা। ভারতং শতপর্ব্বোক্তং মুনিনা তত্ত্বদর্শিনা। পর্ব্বভি র্দশভিশ্চৈষাং পর্ব্বণাং পারণং স্মৃত মিতি বিক্রমাদিত্যঃ ॥ দ্যূতান্তং প্রথমং প্রোক্তং দ্বিতীয়ং বনবাসিকং। উদ্যোগান্তং তৃতীয়ন্তু ভীষ্মান্তঞ্চ তুরীয়কং ॥ পঞ্চমং দ্রোণপর্ব্বান্তং কর্ণান্তং পারণং ততঃ। বিশোকান্তং সপ্তমন্তু শান্তিপর্ব্বান্ত মষ্টমং ॥ নাম স্বর্গপর্ব্বান্ত মাশ্চর্য্যান্ত মতঃপরং। ইতিচ ভারত টীকায়াং অর্জ্জুনমিশ্রঃ ॥

মহাভীতা স্ত্রী লজ্জালবৃক্ষঃ। যথা। স্পর্শলজ্জা মহাভীতা বশিনী চ মহৌষধিঃ। ইতি শব্দচন্দ্রিকা ॥ অতিশয়ভয়যুক্তে ত্রি ॥

মহাভীমঃ পুং শান্তনরাজঃ। ইতি জটাধরঃ ॥ ভৃঙ্গিনামক শিবদ্বারপালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ অতিশয় ভয়ানকে ত্রি ॥

মহাভীরুঃ পুং গোপালিকাখ্যকীটবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ অতিভয়শীলে ত্রি ॥

মহাভীষ্মঃ পুং শান্তনুরাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মহাভূতং ক্লী পৃথিব্যাদিপঞ্চভূতং। যথা। মহাভূতানি পঞ্চৈব খানিলাগ্ন্যম্বু ভূমিভিঃ। ইতি শব্দচন্দ্রিকা ॥

মহাভৃঙ্গঃ পুং নীলভৃঙ্গরাজঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহাভৈরবঃ পুং শরভরূপীহরঃ। যথা। যো হসৌ মহাভৈরবাখ্যঃ স কায়ঃ সারভো হরঃ। ভৈরবঃ পৃথগেবায়ং গণাধ্যক্ষো হরাত্মজঃ ॥ ইতি কালিকাপুরাণে ৪৬ অধ্যায় ॥

মহাভোগা স্ত্রী দুর্গা। যথা। মহার্থসাধনীদেবী মহাভোগা ততঃস্মৃতা ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥

মহামণ্ডূকঃ পুং পীতমণ্ডূকঃ। সোনাবেঙ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ ॥

মহামতিঃ পুং অতিবুদ্ধিমান্। যথা। কিমেতন্নাভিজানামি জানন্নপি মহামতে। যৎ প্রেম প্রবণং চিত্তং বিগুণেষ্বপি বন্ধুষু ॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং ॥

মহামদঃ পুং মত্তহস্তী। ইতি শব্দ-

রত্নাবলী ॥ অতিশয়হর্ষঃ । অতি
শয়মত্ততা চ । তদ্যুক্তে ত্রি ॥
মহামনাঃ [স] ত্রি মহাশয়ঃ । যথা ।
মহেচ্ছে তুন্ডটাদারোদাত্তোদীর্ণ
মহাশয়াঃ । মহামনামহাত্মাচেতি
হেমচন্দ্রঃ ॥

মহামাত্রঃ পুং প্রধানঃ । ইত্যমরঃ ॥
সেনাপত্যাদিষু মহতী মাত্রা ধনং
পরিচ্ছদো বা যেষাং তে তথা ।
ইতি ভরতটীকায়াং ভরতঃ ॥ সমৃদ্ধঃ
॥ অমাত্যঃ ॥ হস্তিপকাধিপঃ ।
ইতি মেদিনী ॥

মহামাত্রী স্ত্রী আচার্য্যপত্নী । ইতি
জটাধরঃ ॥ মহামাত্রপত্নী চ ॥

মহামানসী স্ত্রী জিনানাংবিদ্যাদেবী
ভেদঃ । ইতি হেমচন্দ্রঃ ॥

মহামায়া স্ত্রী দুর্গা । ইতি শব্দরত্না-
বলী ॥ তস্যাঃ স্বরূপং যথা । গর্ব্ভো-
ত্তজ্ঞান সম্পন্নং প্রেরিতং সূতি মা-
রুতৈঃ । উৎপন্নং জ্ঞান রহিতং কু-
রুতে যা নিরন্তরং ॥ পূর্ব্বাতিপূর্ব্ব
সংবদ্ধ সংস্কারেণ নিযোজ্য চ ।
আহারাদৌ ততো মোহং মমত্বং
জ্ঞান সংশয়ং ॥ ক্রোধোপরোধ
লোভেষু ক্ষিপ্ত্বা ক্ষিপ্ত্বা পুনঃ পুনঃ ।
পশ্চাৎকামে নিযোজ্যাশু চিন্তা যু
ক্ত মহর্নিশং ॥ আমোদ যুক্তং ব্যস-
নাসক্তং জন্তুং করোতি যা । মহামা-
য়েতি সা প্রোক্তা তেন সা জগদী-
শ্বরী ॥ ইতি কালিকাপুরাণে ৬
অধ্যায়ঃ ॥ মহতীমায়া চ ॥

মহামায়ী স্ত্রী দুর্গা । ইতি শব্দরত্না-
বলী ॥

মহামারী স্ত্রী মহাকালী । যথা ।
ব্যাপ্তং তয়ৈতৎ সকলং ব্রহ্মাণ্ডং
মনুজেশ্বর । মহাকাল্যা মহাকালে
মহামারী স্বরূপয়া ॥ সৈব কালে
মহামারী সৈব সৃষ্টি র্ভবত্যজা ।
স্থিতিং করোতি ভূতানাং সৈব
কালে সনাতনী ॥ ইতি মার্কণ্ডেয়-
পুরাণং ॥ অতিশয়মরকশ্চ ॥

মহামাষঃ পুং রাজমাষঃ । ইতি
শব্দচন্দ্রিকা ॥

মহামুখঃ পুং কুম্ভীরঃ । ইতি হেম-
চন্দ্রঃ ॥ বৃহন্মুখে ক্লী । তদ্বতি ত্রি ॥

মহামুনিঃ পুং অগস্ত্যঃ ॥ বুদ্ধঃ ।
ইতি শব্দরত্নাবলী ॥ কৃপাচার্য্যঃ ॥
কালঃ । ইত্যজয়পালঃ ॥ ব্যাসঃ ।
যথা । ধর্ম্মঃ প্রোজ্ঝিত কৈতবো হত্র
পরমো নির্ম্মৎসরাণাং সতাং বে-
দ্যং বাস্তব মত্র বস্তু শিবদং তাপ-
ত্রয়োন্মূলনং । শ্রীমদ্ভাগবতে মহা-
মুনিকৃতে কিম্বাপরৈ রীশ্বরঃ সদ্যো
হৃদ্যবরুধ্যতে হত্র কৃতিভিঃ শুশ্রূষুভি

স্তুৎকরণাৎ ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ১ অধ্যায়ঃ ॥ তুঙ্গবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহামুনি ক্লী ঔষধং। ইতি শব্দরত্নাবলী ॥ ধন্যাকং। ইতি জটাধরঃ ॥

মহামূর্দ্ধা পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং ॥ বৃহন্মস্তকযুক্তে ত্রি ॥

মহামূলঃ পুং রাজপলাণ্ডুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহামূল্যং ক্লী মহার্ঘং। বহুমূল্যং। মহচ্চ তন্মূল্যং চেতি কর্ম্মধারয় সমাস নিষ্পন্নং ॥ তদ্যুক্তে ত্রি ॥

মহামূষিকঃ পুং বৃহদুন্দুরুঃ। তৎপর্য্যায়ঃ। মূষী ২ বিঘ্নেশবাহনঃ ৩ মহাঙ্গঃ ৪ শস্যমারী ৫ ভূফলঃ ৬ ভিত্তিপাতনঃ ৭। ইতি রাজনির্ঘণ্টঃ

মহামৃগঃ পুং হস্তী। ইতি হেমচন্দ্রঃ ॥ শরভঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহামৃত্যুঞ্জয়ঃ পুং শিবস্য মন্ত্রবিশেষঃ। যথা দেব্যুবাচ। যদি মে মহতী প্রীতি স্তবাস্তি জগদ্ভৈরব। কথয স্ব বিশেষেণ মহামৃত্যুঞ্জয়াভিধং ॥ ভৈরব উবাচ। শৃণু দেবি প্রবক্ষ্যামি মহামৃত্যুঞ্জয়াভিধং। আয়ুর্বৃদ্ধিকরং পুংসাং মৃত্যো মৃত্যুকরং পরং ॥ যস্য বিজ্ঞান মাত্রেণ চিরজীবী নিরাময়ঃ। নিত্যমষ্টশতং জপ্ত্বা মৃত্যুং মৃত্যুপথং নযেৎ ॥ ইতি মৃত্যুঞ্জযতন্ত্রং ॥

মহামেঘঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং ॥ অতিশযমেঘশ্চ ॥

মহামেদঃ পুং অষ্টবর্গেপ্রসিদ্ধৌষধবিশেষঃ। তৎপর্য্যাযঃ। পুরোদ্ভবঃ ২। ইতি রত্নমালা ॥ বৃহন্মেদশ্চ ॥

মহামেদা স্ত্রী অষ্টবর্গেপ্রসিদ্ধৌষধবিশেষঃ। তৎপর্য্যাযঃ। বসুচ্ছিদ্রা ২ জীবনী ৩ পাণ্ডুরাগিণী ৪ দেবেষ্টা ৫ সুরামেদা ৬ দিব্যা ৭ দেবমণিঃ ৮ দেবগন্ধা ৯ মহাচ্ছিদ্রা ১০ বৃক্ষার্হা ১১। অস্যা গুণাঃ। হিমত্বং। রুচ্যত্বং। কফ শুক্রবৃদ্ধি কারিত্বং। দাহাস্রপিত্ত ক্ষয বাতজ্বর নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ । অথ মেদ মহামেদযো রুৎপত্তি লক্ষণ নাম গুণাঃ। মহামেদাভিধঃ কন্দো মোরঙ্গাদৌ প্রজাযতে। মহামেদা বসৌমেদা স্যাদিত্যুক্তং মুনীশ্বরৈঃ ॥ শুক্লার্দ্রকনিভঃ কন্দো লতাজাতঃ স পাণ্ডুরঃ ॥ মহামেদাভিধো জ্ঞেযো মেদা লক্ষণ মুচ্যতে। শুক্লকন্দো নখচ্ছেদ্যো মেদোধাতুরিব স্রবেৎ ॥ যঃ স মেদে-

তি বিজ্ঞেয়া জিজ্ঞাসা তৎপরৈর্জনৈঃ। স্বল্পগণী মণিচ্ছিদ্রা মেদা মেদোভবাধ্বরা ॥ মহামেদা বসুচ্ছিদ্রা ত্রিদন্তী দেবতামণিঃ। মেদাযুগং গুরু স্বাদু বৃষ্যং স্তন্যকফাপহং ॥ বৃংহণং শীতলং পিত্ত রক্ত বাত জ্বর প্রণুৎ। ইতি ভাবপ্রকাশঃ ॥

মহানেত্রঃ পুং বুদ্ধভেদঃ। ইতি হেমচন্দ্রঃ ॥

মহামোহঃ পুং ভোগেচ্ছারূপাজ্ঞানং। ইতি কেচিৎ ॥ সংসার মূলকারণ রাগরূপমোহঃ ॥ মহামোহজনক কামরাজবীজং। ইতি চণ্ডী প্রথমমাহাত্ম্য টীকায়াং নাগোজীভট্টঃ ॥ অপিচ। সসর্জাগ্রেন্ধতামিস্রমথ তামিস্রমাদিকৃৎ। মহামোহঞ্চ মোহঞ্চ তমশ্চাজ্ঞান বৃত্তয়ঃ ॥ ইতি শ্রীভাগবতে ৩ স্কন্ধে ১২ অধ্যায়ঃ ॥ অগ্র ইতি ব্রহ্মা স্বসৃষ্টৌ প্রথমমবিদ্যা সৃষ্টীঃ সসর্জ তত্র তমো নাম স্বরূপাপ্রকাশঃ। মোহো দেহাদ্যহংবুদ্ধিঃ। মহামোহো ভোগেচ্ছা। তামিস্রঃ তৎ প্রতিঘাতে ক্রোধঃ। অন্ধতামিস্রঃ তন্নাশে অহমেব মৃতোস্মীতি বুদ্ধিঃ। তদেবোক্তং বৈষ্ণবে। তমো হবিবেকো মোহঃ স্যাদন্তঃকরণ বিভ্রমঃ। মহামোহস্তু বিজ্ঞেয়ো গ্রাম্যভোগ সুখৈষণা ॥ মরণং হ্যন্ধতামিস্রং তামিস্রং ক্রোধ উচ্যতে। অবিদ্যা পঞ্চপর্ব্বা যা প্রাদুর্ভূতা মহাত্মনঃ ॥ ইতি তট্টীকায়াং শ্রীধরস্বামী ॥

মহাম্লং ক্লী তিন্তিড়ীকং। ইতি জটাধরঃ ॥

মহাযজ্ঞঃ পুং বেদপাঠাদিরূপপঞ্চপ্রকারযজ্ঞঃ। যথা। পাঠো হোমশ্চাতিথীনাং সপর্য্যা তর্পণং বলিঃ। এতৈঃ পঞ্চ মহাযজ্ঞা ব্রহ্মযজ্ঞাদি নামকৈঃ ॥ ইত্যমরঃ ॥ অপিচ। দিব্যো ভৌম স্তথা পৈত্রো মানুষো ব্রাহ্ম এব চ। এতৈঃ পঞ্চ মহাযজ্ঞা ব্রহ্মণা নির্ম্মিতাঃ পুরা ॥ ব্রাহ্মণানাং হিতার্থায় ইতরেষাঞ্চ তন্মুখাঃ। ইতরেষাস্তু বর্ণানাং ব্রাহ্মণৈঃ কারিতাঃ শুভাঃ ॥ এবং কৃত্বা নরো ভুক্ত্বা হস্মাদ্ধরিত্রি বিশুধ্যতি। অন্যথা ব্রীহযোপ্যেতে এককে মৃগ পক্ষিণঃ ॥ মন্তব্যা দাতৃ ভোক্তৃণাং মহামাংসস্ত তৎ স্মৃতং। ইতি বরাহপুরাণং ॥

মহাযশস্কঃ ত্রি অতিশয়যশোবিশিষ্টঃ। ইতি পাণিনিব্যাকরণং ॥

মহাযশাঃ পুং ভূতার্হদ্বিশেষঃ। ইতি হেমচন্দ্রঃ ॥ অতিশয়যশোযুক্তে ত্রি

মহাযক্ষঃ পুং অর্হদুপাসকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

মহারজতং ক্লী সুবর্ণং ॥ ধুস্তূরঃ। ইত্যমরঃ ॥ বৃহদ্দৌপ্যঞ্চ ॥

মহারজনং ক্লী কুসুম্ভপুষ্পং। ইত্যমরঃ ॥ স্বর্ণং। ইতি মেদিনী ॥

মহারণ্যং ক্লী বৃহদ্বনং। তৎপর্য্যায়ঃ। অরণ্যানী ২। ইত্যমরঃ ॥

মহারথঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং ॥ অযুতধন্বিভিঃ সহাস্ত্রশস্ত্রনিপুণযোদ্ধা। যথা। একো দশ সহস্রাণি যোধযেদ্যস্তু ধন্বিনাং। অস্ত্র শস্ত্র প্রবীণশ্চ মহারথ ইতি স্মৃতঃ ॥ ইতি ভগবদ্গীতা টীকায়াং শ্রীধরস্বামী ॥ বৃহদ্রথশ্চ ॥

মহারম্ভং ক্লী গড়লবণং। ইতি রাজনির্ঘণ্টঃ ॥

মহারসং ক্লী কাঞ্জিকং। ইতি জটাধরঃ ॥

মহারসঃ পুং খর্জ্জূরঃ। কোষকারঃ ॥ কশেরু। ইতি মেদিনী ॥ ইক্ষুঃ। ইতি জটাধরঃ ॥ পারদঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহারসাষ্টকং ক্লী অষ্টধাতুবিশেষাঃ। যথা। দরদঃ পারদঃ সস্যো বৈক্রান্তং কান্তমভ্রকং। মাক্ষিকং বিমলশ্চেতি স্যুরেতে হ্যষ্টৌ মহারসাঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

মহারাজঃ পুং পূর্ব্বজিনবিশেষঃ ॥ নখঃ। ইতি হেমচন্দ্রঃ ॥ শ্রেষ্ঠরাজঃ। যথা। অর্থস্য পুরুষো দাসো দাসস্ত্বর্থো ন কস্যচিৎ। ইতি সত্যং মহারাজ বদ্ধোঽস্ম্যর্থেন কৌরবৈঃ ॥ ইতি মহাভারতে উদ্যোগপর্ব্ব ॥

মহারাজকঃ পুং মহারাজিকগণঃ। ইত্যমরটীকায়াং রামাশ্রমঃ ॥

মহারাজচূতঃ পুং উত্তমাম্রঃ। তৎপর্য্যায়ঃ। মহারাজাম্রকঃ ২ স্থূলাম্রঃ ৩ মন্মথানন্দঃ ৪ কন্দঃ ৫ নীলকপিত্থকঃ ৬ কামায়ুধঃ ৭ কামফলঃ ৮ রাজপুত্রঃ ৯ নৃপাত্মজঃ ১০ মহারাজফলঃ ১১ কামঃ ১২ মহাচূতঃ ১৩। কোমলস্য তস্য গুণাঃ। কটুত্বং। অম্লত্বং। পিত্ত দাহ দাতৃত্বঞ্চ। সুপক্বস্য তস্য গুণাঃ। স্বাদুত্বং। মধুরত্বং। পুষ্টি বীর্য্য বলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহারাজদ্রুমঃ পুং আরগ্বধঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহারাজিকঃ পুং গণদেবতাবিশেষঃ। স তু বিংশত্যধিক শতদ্বয়সংখ্যকঃ। ইত্যমর ভরতৌ ॥

মহারাত্রিঃ স্ত্রী ব্রহ্মলযোপলক্ষিতা

মহাপ্রলয়রাত্রিঃ। ইতি চণ্ডীটীকা- যাং নাগোজীভট্টঃ॥ মহত ঈশ্বর- স্য রাত্রিঃ। ব্রহ্মমরণোপলক্ষিতা- রাত্রি রিত্যর্থঃ। ইতি দেবীমাহা- ত্ম্যটীকাযাং বিদ্যাবিনোদঃ॥ অ পিচ। ব্রহ্মণাঞ্চ নিপাতে চ মহাক- ল্লো ভবেন্নৃপ। প্রকীর্ত্তিতা মহারা- ত্রিঃ সা এবচ পুরাতনৈঃ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫ অধ্যায়ঃ॥ *॥ অর্দ্ধরাত্রাৎপরং মুহূর্ত্তদ্বযং। যথা। অর্দ্ধরাত্রাৎ পরং যচ্চ মুহূ- র্ত্তদ্বয মুচ্যতে। সা মহারাত্রি রুদ্দি- ষ্টা তদ্দত্ত মক্ষয়ং ভবেৎ॥ ইতি তন্ত্রং॥ *॥ আশ্বিন শুক্লাষ্টমী॥ নবরাত্রং। যথা। শুক্লাষ্টমী চাশ্বি নস্য নবরাত্রং তু তস্য বৈ। মহা- রাত্রি র্মহেশানি কালরাত্রিং শৃণু প্রিযে॥ ইতি শক্তিসঙ্গমতন্ত্রং॥

মহারাষ্ট্রঃ পুং দেশবিশেষঃ। মার- হাট্টা ইতি ভাষা। যথা। নৈর্ঋতে দ্রবিডানর্ত্ত মহারাষ্ট্রাশ্চ রৈবতঃ। জবনঃ পহ্লবঃ সিন্ধুঃ পারসীকাহ- যো মতাঃ॥ ইতি জ্যোতিষতত্ত্বে কূর্ম্মচক্রং॥

মহারাষ্ট্রী স্ত্রী জলপিপ্পলী। ইতি রাজনির্ঘণ্টঃ॥ শাকভেদঃ। মারাটী ইতি ভাষা। অস্যা গুণঃ। কফ বাযুনাশিত্বং। ইতি রাজবল্লভঃ॥ অষ্টাদশ ভাষান্তর্গত ভাষাবিশেষঃ। যথা। আর্য্যা মেষ তু গাথান্ত মহারাষ্ট্রীং প্রযোজযেৎ। অত্রো- ক্তামাগধী ভাষা রাজান্তঃপুরচা- রিণাং॥ ইতি সাহিত্যদর্পণে ৬ পরিচ্ছেদঃ॥

মহারিষ্টঃ পুং মহানিম্ববিশেষঃ। তৎপর্য্যাযঃ। কৈটর্য্যঃ ২ রামণঃ ৩ রমণঃ ৪ গিরিনিম্বঃ ৫ শুক্লসালঃ ৬। অস্যগুণাঃ। কটুত্বং। তিক্তত্বং। ক- ষাযত্বং। শীতলত্বং। লঘুত্বং। স- ন্তাপ শোষ হৃষ্টাস্র কৃমি ভূত বিষা- পহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহারুদ্রঃ পুং মহাদেবঃ। যথা। ম- হাকাল্যা মহাকাল শ্চণকাকার রূপতঃ। মাযযাচ্ছাদিতাত্মা চ ত- ন্মধ্যে সমভাগতঃ॥ মহারুদ্রঃ স- এবাত্মা মহাবিষ্ণুঃ সএব হি। ইতি নির্ব্বাণতন্ত্রং॥

মহারূপঃ পুং শিবঃ। ইতি মহা- ভারতে তস্য সহস্রনাম স্তোত্রং॥ অতিশযরূপযুক্তে ত্রি॥

মহারূপকং ক্লী নাটকং। ইতি ত্রি- কাণ্ডশেষঃ॥

মহারোগঃ পুং পাপরোগঃ। সচাষ্ট- বিধঃ যথা। উন্মাদঃ ১ ত্বগ্দোষঃ ২

রাজযক্ষ্মা ৩ শ্বাসঃ ৪ মধুমেহঃ ৫ ভগন্দরঃ ৬ উদরঃ ৭ অশ্মরী ৮। ইতি শুদ্ধিতত্ত্বে নারদঃ ॥

মহারোগী পুং মহারোগযুক্তঃ। যথা। ক্রিয়াহীনস্য মূর্খস্য মহারোগিন এব চ। যথেষ্টাচরণস্যাহুর্মরণান্তমশৌচকং ॥ ইতি শুদ্ধিতত্ত্বধৃত কূর্ম্মপুরাণ বচনং ॥

মহারোমা পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং ॥ বৃহদ্রোমযুক্তে ত্রি ॥

মহারৌরবঃ পুং নরকবিশেষঃ। ইত্যমরঃ॥ মহান্ রৌদ্রো রবো যত্র মহারৌরবঃ নদীযাদিত্বাৎ দুলোপঃ। ইতি ভরতঃ॥ অপিচ। মহারৌরব সংজ্ঞন্তু অধোর্দ্ধং তাম্রসংপুটং। ধম্যতে খদিরাঙ্গারৈ গুরুদারাপনায়কঃ॥ দেবদ্রব্যাপহারী চ পচ্যতে কালমক্ষয়ং। ইতি বহ্নিপুরাণে পাপনাশন বৃষদানাধ্যায়ঃ

মহার্ঘং ত্রি মহামূল্যং। ইতি মেদিনী ॥

মহার্ঘঃ পুং লাবকপক্ষী। ইতি বিশ্বঃ॥

মহার্ণবঃ পুং মহাসমুদ্রঃ। যথা। আঘূর্ণিতো বা বাতেন স্থিতঃ পোতে মহার্ণবে। ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং॥ শিবঃ। ইতি মহাভারতে তস্যসহস্রনামস্তোত্রং

মহার্দ্ধঃ পুং বৃক্ষবিশেষঃ। মহাজা ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

মহার্দ্রকং ক্লী বনার্দ্রকং। অস্যগুণাঃ। অগ্নিদীপনত্বং। ধারকত্বং। রুক্ষত্বং। বায়ু কফ নাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

মহার্ব্বুদং ক্লী দশার্ব্বুদং। শতকোটি সংখ্যা। ইতি জ্যোতিষং ॥

মহার্হং ক্লী শ্বেতচন্দনং। ইতি রাজনির্ঘণ্টঃ ॥

মহালয়ঃ পুং বিহারঃ॥ তীর্থঃ॥ পরমাত্মা। ইতি মেদিনী॥ সৌরাশ্বিনীয কৃষ্ণপক্ষঃ। যথা ভবিষ্যে। যেযং দীপান্বিতা রাজন্ খ্যাতা পঞ্চদশী ভুবি। তস্যাং দদ্যান্নচেদ্দত্তং পিতৃণাং বৈ মহালয়ে ॥ মহালয়ে কন্যাগতাপরপক্ষে। ইতি তিথ্যাদিতত্ত্বং ॥

মহালক্ষ্মীঃ স্ত্রী রাধা॥ নারায়ণশক্তিঃ। যথা। যন্মায়যা মোহিতাশ্চ ব্রহ্মবিষ্ণুশিবাদয়ঃ। বৈষ্ণবাস্তাং মহালক্ষ্মীং পরাং রাধাং বদন্তি তে॥ যদর্দ্ধাঙ্গা মহালক্ষ্মীঃ প্রিয়া নারায়ণস্য চ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ॥*॥ অথ মহালক্ষ্মী

মন্ত্রঃ। তারো বাগ্ভবং মায়া রমা কামঃ স্ত্রৌং জগৎপ্রসূত্যৈ নমঃ। তথাচ। বাগ্ভবং শম্ভুবনিতা রমা মকরকেতনঃ। তান্ত্রী বহ্ণু জগৎপার্শ্বে বহ্নিবীজ সমুজ্বলঃ॥ অথী শান্ত্যা ভূগুস্তৈস্ত্য হ্রুমন্ত্রোয়ং দ্বাদশাক্ষরঃ। মহালক্ষ্ম্যাঃ সমুদ্দিষ্ট স্তারাদ্যঃ সর্ব্ব সিদ্ধিদঃ॥ *॥ তস্যা ধ্যানং যথা। বালার্কদ্যুতি মিন্দু খণ্ড বিলসৎ কোটীর হারোজ্জ্বলাং রত্নাকল্প বিভূষিতাং স্তচনতাং শালেঃ করৈর্ম্মঞ্জরীং। পদ্মৌ কৌস্তুভ রত্নমপ্যবিরতং সংবিভ্রতীং সস্মিতাং ফুল্লাম্ভোজ বিলোচন ত্রয় যুতাং ধ্যায়েৎ পরাম্বিকাং॥ ইতি তন্ত্রসারঃ॥

মহালিকটভী স্ত্রী শ্বেতকিণিহীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মহালিঙ্গঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং॥ বৃহল্লিঙ্গযুক্তশ্চ॥

মহালীলসরস্বতী স্ত্রী তারাবিশেষঃ। লীলয়া বাকপ্রদা চেতি তেন লীলসরস্বতী। তারাস্ত্র রহিতা ত্র্যর্ণা মহালীলসরস্বতী॥ ইতি তন্ত্রসারঃ॥

মহালোধ্রঃ পুং লোধ্রবিশেষঃ। পাটিয়ালোধ ইতি ভাষা। ইতি রত্নমালা॥

মহালোলঃ পুং কাকঃ। ইতি রাজনির্ঘণ্টঃ॥ অতিচঞ্চলে ত্রি॥

মহালোহং ক্লী অয়স্কান্তঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাবনং ক্লী বৃহদ্বনং। তৎপর্য্যায়ঃ। অরণ্যানী ২ মহারণ্যং ৩ মহাটবী ৪। ইতি রাজনির্ঘণ্টঃ॥ বৃন্দাবনস্থ চতুরশীতিবনান্তর্গতবনবিশেষশ্চ॥

মহাবপঃ পুং মহামেদঃ। ইতি শব্দচন্দ্রিকা॥

মহাবরা স্ত্রী দূর্ব্বা। ইতি শব্দরত্নাবলী॥

মহাবরাহঃ পুং বরাহরূপীভগবান্। যথা। মহাবরাহো গোবিন্দঃ সুষেণঃ কনকাঙ্গদী। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং॥

মহাবরোহঃ পুং প্লক্ষবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাবল্লী স্ত্রী মাধবীলতা। ইতি শব্দচন্দ্রিকা॥

মহাবসঃ পুং শিশুমারঃ। ইতিহেমচন্দ্রঃ॥

মহাবক্ষাঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং॥ বৃহদ্বক্ষোযুক্তে ত্রি॥

মহাবাক্যং ক্লী যোগ্যতাকাঙ্ক্ষাসত্তিযুক্তবাক্যসমূহঃ। ইতি সাহিত্যদর্পণঃ॥ ন্যায়মতে তু। স্বঘটকানেক নাম লভ্য তাদৃশার্থকং। প্রকৃত্যর্থ মাত্রাবচ্ছিন্ন প্রত্যযার্থ বোধং প্রত্যযোগ্যবাক্যং বা। ইতি শব্দশক্তিপ্রকাশিকা॥ তত্ত্বমসীতি আদিবাক্যং॥ প্রতিষ্ঠাদাবুৎসর্গ বাক্যঞ্চ॥

মহাবিদ্যা স্ত্রী দেবীবিশেষঃ। সা দশধা। যথা চামুণ্ডাতন্ত্রে। কালী তারা মহাবিদ্যা ষোড়শী ভুবনেশ্বরী। ভৈরবী ছিন্নমস্তা চ বিদ্যা ধূমাবতী তথা। বগলা সিদ্ধবিদ্যা চ মাতঙ্গী কমলাত্মিকা। এতা দশমহাবিদ্যাঃ সিদ্ধবিদ্যাঃ প্রকীর্ত্তিতাঃ॥ নাত্র সিদ্ধাদ্যপেক্ষাস্তি ন নক্ষত্র বিচারণা। কালাদি শোধনং নাস্তি নচামিত্রাদি দূষণং॥ সিদ্ধবিদ্যাতযা নাত্র যুগসেবা পরিশ্রমঃ। নাস্তি কিঞ্চিন্মহাদেবি দুঃখ সাধ্যং কথঞ্চন॥*॥ মালিনী বিজযে। অথ বক্ষ্যাম্যহং যা যা মহাবিদ্যা মহীতলে॥ দোষজালৈ রসংস্পৃষ্টা স্তাঃ সর্ব্বা হি ফলৈঃ সহ। কালী নীলা মহাদুর্গা ত্বরিতা ছিন্নমস্তকা॥ বাগ্বাদিনী চান্নপূর্ণা তথা প্রত্যঙ্গিরা পুনঃ॥ কামাখ্যা বাসলী বালা মাতঙ্গী শৈলবাসিনী॥ ইত্যাদ্যাঃ সকলা বিদ্যাঃ কলৌ পূর্ণ ফলপ্রদাঃ। সিদ্ধমন্ত্রতযা নাত্র যুগসেবা পরিশ্রমঃ॥ অথ চৈতা মহাবিদ্যাঃ কলিদোষায় বাধিতাঃ। ইতি তন্ত্রসারঃ॥*॥ তাসাং দশাবতারত্বং যথা। প্রকৃতি র্বিষ্ণুরূপা চ পুংরূপশ্চ মহেশ্বরঃ। এবং প্রকৃতি ভেদেন ভেদাস্ত প্রকৃতে র্দশ॥ কৃষ্ণরূপা কালিকা স্যাৎ রামরূপা চ তারিণী। বগলা কূর্ম্মমূর্ত্তিঃ স্যান্মীনো ধূমাবতী ভবেৎ ছিন্নমস্তা নৃসিংহঃ স্যাদ্বরাহশ্চৈব ভৈরবী। সুন্দরী যামদগ্ন্যঃ স্যাদ্বামনো ভুবনেশ্বরী॥ কমলা বৌদ্ধরূপা স্যাৎ দুর্গা স্যাৎ কল্কিরূপিণী। স্বযং ভগবতী কালী কৃষ্ণস্তু ভগবান্ স্বযং॥ স্বযঞ্চ ভগবান্ কৃষ্ণঃ কালীরূপো ভবেদ্ব্রজে॥ ইতি মুণ্ডমালাতন্ত্রং॥

মহাবিরাট্ পুং মহাবিষ্ণুঃ। যথা। মুনিরুবাচ। বিশ্বানাং গোলকং রাজন্ বিস্তৃতঞ্চ নভঃ সমং। শশ্বন্নিত্যং ডিম্বরূপং শ্রীকৃষ্ণেচ্ছা সমুদ্ভবং॥ জলেন পরিপূর্ণঞ্চ কৃষ্ণস্য মুখবিন্দুনা। সৃষ্ট্যুন্মুখস্যাদিসর্গে প-

ব্রিশ্রান্তস্য ক্রীড়তঃ॥ প্রকৃত্যা সহ যুক্তেন কলযা নিজযা নৃপ। তত্রা- ধারো মহদ্বিষ্ণো র্বিশ্বাধারস্য বিস্তৃ তঃ॥ প্রকৃতী গর্ব্ভ সংভূত ডিম্বো- দ্ভূতস্য ভূমিপ। সুবিস্তৃতে জলা- ধারে শযানশ্চ মহান্ বিরাট্॥ রাধেশ্বরস্য কৃষ্ণস্য ষোড়শাংশঃ প্রকীর্ত্তিতঃ। দূর্ব্বাদলশ্যামরূপঃ সস্মিতশ্চ চতুর্ভুজঃ॥ বনমালাধরঃ শ্রীমান্ শোভিতঃ পীতবাসসা। ইতি ব্রহ্মবৈবর্ত্তেপ্রকৃতিখণ্ডে ৫১ অধ্যাযঃ॥

মহাবিলং ক্লী আকাশং। ইতি জটা- ধরঃ॥ বৃহচ্ছিদ্রঞ্চ॥

মহাবিষঃ পুং দ্বিমুখসর্পঃ। যথা। মহাবিষঃ কালসর্পো রাজাহি র্দ্বি- মুখোরগঃ। ইতি জটাধরঃ॥

মহাবিষুবং ক্লী মেষসংক্রান্তিঃ। যথা। মহাবিষুবমাখ্যাতং কৃতিভির্শ্চৈত্র চিহ্নিতং। ইতি শব্দরত্নাবলী॥✱॥ তস্মিন্ মসূর নিম্বপত্রদ্বযভক্ষণং যথা। কৃত্যচিন্তামণৌ। মসূরং নিম্বপত্রা- ভ্যাং যো হত্তি মেষ গতে রবৌ। অপি রোষান্বিত স্তস্য তক্ষকঃ কিং করিষ্যতি॥✱॥ তত্র শক্ত্বাদি দা- নং যথা। মেষাদৌ শক্তবো দেযা বারিপূর্ণা চ গর্গরী।✱। বারিপূর্ণঘ- টদান মন্ত্রাদি যথা। এষ ধর্ম্মঘটো- দত্তো ব্রহ্ম বিষ্ণু শিবাত্মকঃ। অস্য প্রদানাৎ সফলা মম সন্তু মনোরথাঃ॥ বৈশাখে যো ঘটং পূর্ণং স ভোজ্যং বৈ দ্বিজন্মনে। দদাতি সু- ররাজেন্দ্র স যাতি পরমাং গতিং॥ মহার্ণবে। যো দদাতি হি মে- ষাদৌ শক্তূনম্বুঘটান্বিতান্। পিতৄনু- দ্দিশ্য বিপ্রেভ্যঃ সর্ব্বপাপৈঃ প্র- মুচ্যতে॥✱॥ তত্র ছত্র পাদুকা দানং যথা। বিপ্রেভ্যঃ পাদুকা ছত্রং পিতৃভ্যো মেষগে শুভং। পিতৃভ্যো- পি তুনুদ্দিশ্যেত্যর্থঃ। ইতি তিথ্যা- দিতত্ত্বং॥

মহাবিষুবচক্রং ক্লী নক্ষত্রঘটিতনরা- কারচক্রং। যথা। মূর্দ্ধ্নি সপ্ত মুখে- ত্রীণি হৃদযে পঞ্চ বিন্যসেৎ। ত্রিত- যং হস্তপাদেষু মহাবিষুবভে ন্যসেৎ॥ মস্তকে ভূপতেঃ সৌখ্যং বদনে পটুতা স্মৃতে। হৃদযে চ ধনাধ্যক্ষো হ্যর্থপ্রাপ্তি র্দক্ষিণেকরে॥ বামে করে মহদ্দুঃখং সুখং পাদে চ দক্ষিণে। ভ্রমণং বামপাদে চ কথিতং বিষু- বৎফলং॥ ইতি জ্যোতিষতত্ত্বং॥

মহাবিষ্ণুঃ পুং মহাবিরাট্। যথা। যস্য জলে কোটি কোটি ব্রহ্মা- ণ্ডানি মহাবিষ্ণু রোমকূপ গতানি

তস্যা বিরজাযাঃ পরিখা ভূতাযা উপরি মহাবৈকুণ্ঠলোকঃ। তস্যো-র্দ্ধভাগে গোলোকঃ। তস্য নাথঃ কৃষ্ণো দেবলীলঃ স পরিবারেণ ব-র্ত্ততে। ইতি ভাগবতামৃতকণিকা ॥ স চ শ্রীকৃষ্ণস্য কলাবিশেষঃ। যথা। বিষ্ণুর্মহান্ স ইহ যস্য কলা বিশেষো গোবিন্দ মাদিপুরুষং ত-মহং ভজামি। ইতি ভাগবতামৃত পূর্ব্বখণ্ডঃ ॥

মহাবীচিঃ পুং নরকবিশেষঃ। যথা মনুঃ। নরকং কালসূত্রঞ্চ মহানরক-মেবচ। সংজীবনং মহাবীচিং তপনং সংপ্রতাপনং ॥ যাতীতি পূর্ব্ববচন-স্থ মনুবর্ত্ততে। মহাবীচি যত্র মহা কল্লোলেন নীযতে। ইতি প্রায-শ্চিত্তবিবেকঃ ॥

মহাবীজ্যং ক্লী বিটপং তত্তুমুষ্কবঙ্ক্ষণ-যোরন্তরং। ইতি হেমচন্দ্রঃ ॥

মহাবীরঃ পুং গরুড়ঃ ॥ সূরঃ ॥ সিংহঃ ॥ নখাযুধঃ ॥ বজ্রঃ ॥ শ্বেতহযঃ ॥ যজ্ঞাগ্নিঃ ॥ সন্ধানপক্ষী। ইতি মেদিনী ॥ অগ্নিমন্থিনঃ ॥ কোকিলঃ। ইতি হেমচন্দ্রঃ ॥ ধনুর্দ্ধরঃ। ইতি শব্দ-রত্নাবলী ॥ একবীরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ লক্ষ্মণঃ। যথা। লক্ষ্ম-ণঞ্চ মহাবীরং পতিতং রণভূতলে ॥ অঙ্গদাদিঃ। যথা। অঙ্গদাদ্যৈর্মহা-বীরৈর্ব্বেষ্টিতং রুদ্ররূপিণং। ইতি তন্ত্রসারে হনুমৎকল্পঃ ॥ হনুমান্ স্বযমপি মহাবীরত্বেন প্রসিদ্ধঃ ॥

মহাবীরা স্ত্রী ক্ষীরকাকোলী। ইতি রত্নমালা ॥

মহাবীর্য্যঃ পুং ব্রহ্মা। ইতি শব্দরত্না-বলী ॥ বুদ্ধভেদঃ। ইতি ত্রিকাণ্ড-শেষঃ ॥ বারাহীকন্দঃ। ইতি রাজ-নির্ঘণ্টঃ ॥ অতিশযবলযুক্তে ত্রি ॥

মহাবীর্য্যা স্ত্রী সংজ্ঞা। সাচ সূর্য্য-পত্নী। ইতি ত্রিকাণ্ডশেষঃ ॥ বন-কার্পাসী। ইতি শব্দরত্নাবলী ॥ মহাশতাবরী। ইতি রাজনির্ঘণ্টঃ ॥

মহাবৃহতী স্ত্রী বার্ত্তাকী। ইতি ত্রিকাণ্ডশেষঃ ॥

মহাবৃক্ষঃ পুং স্নুহীবৃক্ষঃ। ইতি হলাযুধঃ ॥ বৃহদ্বৃক্ষশ্চ ॥

মহাবেগঃ পুং শিবঃ। ইতি মহা-ভারতে তস্য সহস্রনামস্তোত্রং ॥ অতিজবঃ। তদ্যুক্তে ত্রি ॥

মহাব্যাধিঃ পুং মহারোগঃ। স তু কুষ্ঠাদিঃ। যথা। সর্ব্বব্যাধি বিনির্ম্-ক্তো মহাব্যাধিবিশেষতঃ। পঠনাৎ সম্পূর্ণশ্যেব জীবন্মুক্তো ভবেন্নরঃ ॥ ইতি রুদ্রযামলে গাযত্রীকবচং ॥

মহাব্যাহৃতিঃ স্ত্রী প্রণব স্বাহা যুক্ত-

ব্যাহৃতি ত্রয়ং। যথা। ওঁ ভূঃ স্বাহা ওঁ ভুবঃ স্বাহা ওঁ স্বঃ স্বাহা। ইতি ভবদেবভট্টঃ॥

মহাব্রণং ক্লী দুষ্টব্রণং। নালীঘা ইতি ভাষা। যথা। অর্য্যাৎ সপ্তদশাবৃত্তং তথাষ্টাদশকং প্রিয়ে। মহাব্রণ বিমোক্ষায় বিংশাবৃত্তং পঠেন্নরঃ॥ ইতি তিথ্যাদিতত্ত্ব ধৃত বারাহী তন্ত্রবচনং॥

মহাব্রতং ক্লী দ্বাদশবার্ষিকব্রতং। যথা। তেন যবকালাদূর্দ্ধং বিংশত্যধিকশতস্য যাবদবশিষ্টং তাবৎ পরিমাণ মহাব্রতানুরূপা ধেনবো দাতব্যা। ইতি প্রায়শ্চিত্তবিবেকে ভবদেব ভট্টমতং॥ শরৎকালীন দুর্গাপূজনং। যথা। মহাব্রতং মহা পুণ্যং শঙ্করাদ্যৈরনুষ্ঠিতং। কর্ত্তব্যং সুররাজেন্দ্র দেবী ভক্তি সমন্বিতৈঃ॥ ইতি তিথ্যাদিতত্ত্ব ধৃত দেবীপুরাণবচনং॥ অরুণোদয়কালীন মাঘস্নানং। যথা। বাসুদেবং হরিং কৃষ্ণং শ্রীধরঞ্চ স্মরেত্ততঃ। দিবা কর জগন্নাথ প্রভাকর নমোহস্তুতে॥ পরিপূর্ণং অরুন্বেদং মাঘ স্নানং মহাব্রতং। ইতি মলমাসতত্ত্ব ধৃত পদ্মপুরাণবচনং॥

মহাব্রতী পুং শিবঃ। ইতি হেমচন্দ্রঃ॥ টিরস্কটঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মহাব্রতযুক্তে ত্রি॥

মহাশক্তিঃ পুং কার্ত্তিকেয়ঃ। ইতি শব্দমালা॥ অতিশয়পরাক্রমঃ॥ তদ্যুক্তে ত্রি॥

মহাশঙ্খঃ পুং মানুষাস্থি॥ সংখ্যাবিশেষঃ। সচ দশনিখর্ব্বঃ॥ ললাটং। ইতি মেদিনী॥ নিধিবিশেষঃ। ইতি বিশ্বঃ॥ কর্ণ নেত্রয়োর্মধ্যগতাস্থি। যথা। কর্ণনেত্রান্তরালাস্থি মহাশঙ্খঃ প্রকীর্ত্তিতঃ। তস্য মালয়া জপবিধি র্যথা। মহাশঙ্খময়ী মালা নীলসারস্বতে বিধৌ। নৃললাটাস্থিখণ্ডেন রচিতা জপমালিকা॥ মহাশঙ্খময়ী মালা তারাবিদ্যা জপে প্রিয়ে॥ ইতি তন্ত্রসার ধৃত মুণ্ডমালাতন্ত্রং॥ বৃহচ্ছঙ্খঃ। যথা। পৌণ্ড্রং দধ্মৌ মহাশঙ্খং ভীমকর্ম্মা বৃকোদরঃ। ইতি শ্রীভগবদ্গীতা ১ অধ্যায়ঃ॥

মহাশঠঃ পুং রাজধুস্তুরঃ। ইতি রাজনির্ঘণ্টঃ॥ অতিধূর্ত্তে ত্রি॥

মহাশণপুষ্পিকা স্ত্রী বৃহচ্ছণপুষ্পী। তৎপর্য্যায়ঃ। বৃত্তপর্ণী ২ শ্বেতপুষ্পী ৩ মহাসিতা ৪ মহাশ্বেতঘণ্টী ৫ মহাশ্বেতা ৬। অস্যা গুণাঃ। কষায়ত্বং। উষ্ণত্বং। কটুত্বং। রস-

মিবানকত্বং। অভূহল্ মোহন স্তম্ভনাদিষু প্রোক্তত্বঞ্চ। ইতি রাজনিঘণ্টঃ ॥

মহাশতা স্ত্রী মহাশতাবরী। ইতি রাজনিঘণ্টঃ ॥

মহাশতাবরী স্ত্রী বৃহচ্ছতাবরী। তৎপর্য্যায়ঃ। শতবীর্য্যা ২ সহস্রবীর্য্যা ৩ সুরসা ৪ মহাপুরুষদন্তিকা ৫ বীরা ৬ তঙ্গিনী ৭ বহুপুত্রিকা ৮ ঊর্দ্ধকণ্টী ৯ মহাবীর্য্যা ১০ ফণিজিহ্বা ১১ মহাশতা ১২ সুবীর্য্যা ১৩। অস্যা গুণাঃ। বশ্যত্বং। মধুরত্বং। পিত্তনাশিত্বং। হিমত্বং। মেহ কফ বাতঘ্নত্বং। তিক্তত্বং। শ্রেষ্ঠত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহাশয়ঃ ত্রি মহান্ আশয়ো ইভিপ্রায়ো মনো বা যস্য সঃ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। মহেচ্ছঃ২। ইত্যমরঃ॥ মহানুভাবঃ ৩। ইতি শব্দরত্নাবলী॥ উদাত্তঃ ৪ মহামনাঃ ৫। ইতি জটাধরঃ॥ উদ্ভটঃ ৬ উদারঃ ৭ উদীর্ণঃ ৮ মহাত্মা ৯। ইতি হেমচন্দ্রঃ॥ সমুদ্রে পং। ইতি শব্দরত্নাবলী॥

মহাশয্যা স্ত্রী রাজশয্যা। ইতি হেমচন্দ্রঃ॥ বৃহচ্ছয্যা চ॥

মহাশরঃ পুং স্থূলশরঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাশল্কঃ পুং চিঙ্গটমৎস্যঃ। ইতি হারাবলী॥ বৃহচ্ছল্কশ্চ। তদ্যুক্তে ত্রি

মহাশাকং ক্লী বৃহচ্ছাকবিশেষঃ। ইতি কেচিৎ॥

মহাশাখা স্ত্রী নাগবলা। ইতি রাজনিঘণ্টঃ॥

মহাশালিঃ পুং স্থূলশালিঃ। ইতি রাজনিঘণ্টঃ॥ তৎপর্য্যায়ঃ। সুগন্ধিকঃ২। ইতি হেমচন্দ্রঃ॥

মহাশিবঃ পুং মহাদেবঃ। যথা। রত্নসিংহাসনস্থঞ্চ মহাভূষণভূষিতং। মহাশিবং শিবকরং শিববীজং শিবাশ্রয়ং॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ২৯ অধ্যায়ঃ॥

মহাশীতা স্ত্রী শতমূলী। ইতি শব্দচন্দ্রিকা॥ অতিশীতবীর্য্যযুক্তে ত্রি॥

মহাশুক্তিঃ স্ত্রী মুক্তামাতা। সা চ শুক্তিঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহচ্ছুক্তিশ্চ॥

মহাশুক্লা স্ত্রী সরস্বতী। ইতি ভূরিপ্রয়োগঃ॥ অতিশুক্লবর্ণযুক্তে ত্রি॥

মহাশুভ্রং ক্লী রজতং। ইতি রাজনির্ঘণ্টঃ॥ অতিশুভ্রবর্ণযুক্তে ত্রি॥

মহাশূদ্রঃ পুং আভীরঃ। ইতি মহাশূদ্রীশব্দদর্শনাৎ॥

মহাশূদ্রী স্ত্রী আভীরী। ইত্যমরঃ॥
মহাশৌণ্ডী স্ত্রী শ্বেতকিনিহীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
মহাশ্মশানং ক্লী কাশী। ইতি কাশীখণ্ডং॥
মহাশ্যামা স্ত্রী শ্যামালতা। ইতি রত্নমালা॥ শিংশপাবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥
মহাশ্রমণঃ পুং বুদ্ধবিশেষঃ। স চ শাক্যমুনিঃ। তৎপর্য্যায়ঃ। সর্ব্বার্থসিদ্ধঃ২ জলিশাসনঃ ৩ গোপেন্দ্রঃ ৪। ইতি হেমচন্দ্রঃ॥
মহাশ্রাবণিকা স্ত্রী ক্ষুপবিশেষঃ। বড়থুলকুড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। মহামুণ্ডী ২ লোচনী ৩ কদম্বপুষ্পী ৪ বিকচা ৫ ক্রোড়া ৬ চোড়া ৭ পলঙ্কষা ৮ নদীকদম্বঃ ৯ মুণ্ডাখ্যা ১০ মহামুণ্ডনিকা ১১ মাতা ১২ স্থবিরা ১৩ লোতনী ১৪ ভূকদম্বঃ ১৫ অলম্বুষা ১৬। অস্যা গুণাঃ। উষ্ণত্বং। তিক্তত্বং। ঈষন্মধুরত্বং। বায়ুশমনত্বং। স্বরকৃত্ত্বং। রেচনত্বং। হেমকৃত্ত্বং। রসায়নত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥
মহাশ্রীঃ স্ত্রী বুদ্ধশক্তিবিশেষঃ। তৎপর্য্যায়ঃ। তারা ২ ওঙ্কারা ৩ স্বাহা ৪ শ্রীঃ ৫ মনোরমা ৬ তারিণী ৭ জয়া ৮ অনন্তা ৯ শিবা ১০ লোকেশ্বরাত্মজা ১১ খদিরবাসিনী ১২ ভদ্রা ১৩ বৈশ্যা ১৪ নীলসরস্বতী ১৫ শঙ্খিনী ১৬ মহাতারা ১৭ বসুধারা ১৮ ধনন্দদা ১৯ ত্রিলোচনা ২০ লোচনা ২১। ইতি ত্রিকাণ্ডশেষঃ॥
মহাশ্বেতা স্ত্রী সরস্বতী। ইতি ত্রিকাণ্ডশেষঃ॥ কৃষ্ণভূমিকুষ্মাণ্ডঃ। তৎপর্য্যায়ঃ। ক্ষীরবিদারী ২ ঋক্ষগন্ধিকা ৩। ইত্যমরঃ॥ শ্বেতাপরাজিতা। ইতি রত্নমালা॥ সিতা। তৎপর্য্যায়ঃ। মধুজা ২। ইতি ত্রিকাণ্ডশেষঃ। শ্বেতকিনিহীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ দুর্গা। যথা। শ্বেতং শুক্লং শিবস্থানং যস্মাচ্চেহ সমাগতা। মহাভাব সমুৎপন্না মহাশ্বেতা ততঃ স্মৃতা॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥
মহাষষ্ঠী স্ত্রী দুর্গা। যথা। ওঁ দুং দুং দুং দুর্গে দুর্গং নাশয় নাশয় হন হন দহ দহ মথ মথ বধ বন্ধ সর্ব্ব হিংস্রান্ মহাষষ্ঠী রূপেণ বালকং রক্ষ রক্ষ চিরজীবিনং কুরু কুরু শ্রীং হ্রীং হুং ফট্ স্বাহা। ইতি যোগিনীতন্ত্রে মহাষষ্ঠী কবচং॥
মহাষ্টমী স্ত্রী আশ্বিনশুক্লাষ্টমী। যথা। আশ্বিনে শুক্লপক্ষস্য ভবেদ্যা

অষ্টমী তিথিঃ। মহাষ্টমীতি সা প্রোক্তা দেব্যাঃ প্রীতিকরা পরা॥ ইতিকালিকাপুরাণে ৫৯ অধ্যায়ঃ॥ *॥ তস্যাং পূজাবিধিঃ পূর্ব্বব্রত উপবাস নিষেধশ্চ যথা। অষ্টম্যাং রুধিরৈ র্মাংসৈ র্মহামাংসৈঃ সুগন্ধিভিঃ। পূজয়েদ্বহুজাতীয়ৈ র্বলিভি র্ভোজনৈঃ শিবাং॥ সিন্দূরৈঃ পট্টবাসৈশ্চ নানা বিধ বিলেপনৈঃ পুষ্পৈ রনেকজাতীয়ৈঃ ফলৈ র্বহুবিধৈরপি॥ উপবাসং মহাষ্টম্যাং পুত্রবান্ন সমাচরেৎ। যথা তথৈব পূতাত্মা ব্রতী দেবীং প্রপূজয়েৎ॥ পূজয়িত্বা মহাষ্টম্যাং নবম্যাং বলিভি স্তথা। বিসর্জয়েদ্দশম্যাস্তু শ্রবণে সাবরোৎসবৈঃ॥ ইতি তত্রৈব ৬০ অধ্যায়ঃ॥ *॥ তত্রার্দ্ধরাত্র পূজা যথা। কন্যা সংস্থে রবাবীশে শুক্লাষ্টম্যাং প্রপূজয়েৎ। সোপবাসো নিশার্দ্ধে তু মহাবিভব বিস্তরৈঃ॥ পূজাং সমারভেদ্দেব্যা নক্ষত্রে বারুণে শুভে। পশুঘাতশ্চ কর্ত্তব্যো গবলাজ বধস্তথা॥ ইতি দেবীপুরাণ বচনে বারুণপদেন পূর্ব্বাষাঢ়োচ্যতে। ইতি তিথ্যাদি তত্ত্বং॥

মহাসমঃ পুং জবেরঃ। ইতি শব্দমালা॥ অতিনিকটশ্চ॥

মহাসফরঃ পুং বৃহৎপ্রোষ্ঠীমৎস্যঃ। অস্যগুণাঃ। মহাসফর সংজ্ঞস্তু তিক্তঃ পিত্ত কফাপহঃ। শিশিরো মধুরো রুচ্যো বাত সাধারণঃ স্মৃত॥ ইতি ভাবপ্রকাশঃ॥

মহাসমঙ্গা স্ত্রী বৃক্ষবিশেষঃ। কগহিয়া ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। ওদনিকা ২ ওদনাহ্বয়া ৩ বৃক্ষা ৪ রুহা ৫ বৃষ্যবলা ৬ তণ্ডুলা ৭ ভুজঙ্গজিহ্বা ৮ শীতপাকিনী শীতবলা ১০ শীতাবলা ১১ বলোত্তরা ১২ বলা ১৩ খিরহিটী ১৪ ব্যালজিহ্বা ১৫। অস্যা গুণাঃ। মধুরত্বং। অম্লত্বং। দোষত্রয় নাশিত্বং। যুক্ত্যা বুদ্ধ্যা প্রযোগে জ্বর দাহ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহাসর্জ্জঃ পুং পনসঃ॥ অসনবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাসহঃ পুং অম্লকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ অতিক্ষমে ত্রি॥

মহাসহা স্ত্রী মাষপর্ণী॥ অম্লানবৃক্ষঃ। ইত্যমরঃ॥

মহাসান্তপনং ক্লী ব্রতবিশেষঃ। যথা। অথ মহাসান্তপনং। তত্রদ্ব্যহসাধ্য সান্তপন মুক্ত্বা যাজ্ঞবল্ক্যঃ। পৃথক সান্তপনৈ দ্রব্যৈঃ ষড়হঃ সোপবা-

সকঃ। সপ্তাহেনৈব কৃচ্ছ্রোঽয়ং মহাসান্তপনঃ স্মৃতঃ॥ এতৎ সপ্তাহসাধ্যং॥ জাবালঃ। গোমূত্রং গোময়ং ক্ষীরং দধি সর্পিঃ কুশোদকং। একৈকং ক্রমশো হশ্নীয়াদহোরাত্রমভোজনং॥ কৃচ্ছ্রঃ সান্তপনো নাম সর্ব্বপাপ প্রণাশনঃ। ঐকৈক মেতদেবং হি ত্রিরাত্র মুপযোজয়েৎ॥ ত্র্যহঞ্চোপবসেদন্ত্যং মহাসান্তপনে বিধিঃ। এতৎ সপ্তাহ সাধ্য সান্তপন মুক্ত্বা একবিংশতি দিন সাধ্যং মহাসান্তপনমুক্তং॥ মহাসান্তপনং ধেনুষট্‌কদান সমং। জাবালোক্তমহাসান্তপনস্য একবিংশতি দিনসাধ্যত্বেন সপ্তাহ সাধ্য সান্তপনাৎ ত্রিগুণত্বান্মহাসান্তপনে ধেনু ষট্‌কং দেয়ং। ইতি প্রায়শ্চিত্তবিবেকঃ॥

মহাসারঃ পুং দুর্ব্বদিরঃ। ইতি রাজনির্ঘণ্টঃ॥

মহাসাহসং ক্লী অতিবলাৎকারকৃতকার্য্যং॥ অতিশয়দণ্ডঃ। ইতি সাহস শব্দার্থে মেদিনী॥ অতিদুষ্কৃতকর্ম্ম॥ অতিশয়দ্বেষঃ। ইতি সাহস শব্দার্থে হেমচন্দ্রঃ॥

মহাসাহসিকঃ ত্রি চৌরঃ। ইতি কেচিৎ॥ অতিসাহসযুক্তশ্চ॥

মহাসিংহঃ পুং সরভঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহৎসিংহঃ। স চ দেবীবাহনং। যথা। উত্থায চ মহাসিংহং দেবী চণ্ড মধাবত। ইতি মার্কণ্ডেয় পুরাণে দেবীমাহাত্ম্যং॥

মহাসুখং ক্লী শৃঙ্গারঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অতিশয়ানন্দঃ। তদ্বতি ত্রি

মহাসুখঃ পুং বুদ্ধঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মহাসুগন্ধা স্ত্রী গন্ধনাকুলী। ইতি রাজনির্ঘণ্টঃ॥ অতিসুগন্ধযুক্তে ত্রি॥

মহাসূক্ষ্মা স্ত্রী বালুকা। ইতি রাজনির্ঘণ্টঃ॥ অতিশয়সূক্ষ্মে ত্রি॥

মহাসেনঃ পুং কার্ত্তিকেয়ঃ। ইত্যমরঃ॥ শিবঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং॥ মহাসেনাপতিঃ। ইতি মেদিনী॥ বৃত্তার্হৎপিতৃবিশেষঃ। ইতি হেমচন্দ্রঃ॥

মহাস্কন্ধা স্ত্রী জম্বুকঃ। ইতি রাজনির্ঘণ্টঃ॥ বৃহৎস্কন্ধযুক্তে ত্রি॥

মহাস্থলী স্ত্রী পৃথিবী। ইতি শব্দমালা॥ শ্রেষ্ঠস্থানঞ্চ॥

মহাস্নায়ুঃ পুং কণ্ডরা। ইতি হেমচন্দ্রঃ॥

মহাস্ত্রঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং॥

মহাস্বনঃ পুং মল্ল তূর্য্যং। ইতি ত্রিকা-

শুশেষঃ॥ বৃহচ্ছন্দঃ॥ তুদ্মক্তে ত্রি॥

মহাহনুঃ পুং শিবঃ। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং॥ বৃহদ্ধনুযুক্তে ত্রি॥

মহাহবিঃ স্ত্রী গব্যঘৃতং। যথা। গয়ায়া নথ বা পিণ্ডং খঙ্গ মাংসং মহাহবিঃ। কালশাকং তিলাজ্যং বা কৃশরং মাসতৃপ্তয়ে॥ ইতি মার্কণ্ডেয়পুরাণে শ্রাদ্ধকল্পঃ॥ বিষ্ণুঃ। ইতি মহাভারতে তস্য সহস্রনামস্তোত্রং॥

মহাহাসঃ পুং অট্টহাসঃ। ইতি শব্দরত্নাবলী॥

মহাহিগন্ধা স্ত্রী গন্ধনাকুলী। ইতি রাজনির্ঘণ্টঃ॥

মহাহ্বা স্ত্রী কপিকচ্ছুঃ। ইতি শব্দমালা॥ অতিখর্বে ত্রি॥

মহিঃ স্ত্রী পৃথিবী। ইতি শব্দমালা॥

মহিকা স্ত্রী হিমং। ইত্যমরঃ॥

মহিতং ত্রি পূজিতং। যথা। রণপণ্ডিতো হগ্যবিবুধারিপুরে কলহংস রাম মহিতঃ কৃতবান্। জ্বলদগ্নি রাবণ গৃহঞ্চ বলাৎ কলহংস রাম মহিতঃ কৃতবান্॥ ইতি ভট্টিকাব্যে ১০ সর্গঃ॥

মহিনং ক্লী রাজ্যং। ইত্যুণাদিকোষঃ॥

মহিমা পুং শিবস্যাষ্টৈশ্বর্য্যান্তর্গতৈশ্বর্য্যবিশেষঃ। ইতি হেমচন্দ্রঃ॥ সচ মহত্ত্বং যেন চতুর্দ্দশ ভুবনান্যস্যোদরে বর্ত্তন্তে। ইত্যমরটীকায়াং ভরতঃ॥ উৎকর্ষঃ। যথা। অধোধঃ পশ্যতঃ কস্য মহিমা নোপজায়তে। উপর্য্যুপরি পশ্যন্তঃ সর্ব্ব এব দরিদ্রতি॥ ইতি পুরাণং॥

মহিরঃ পুং সূর্য্যঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মহিলা স্ত্রী স্ত্রীমাত্রং॥ প্রিয়ঙ্গুলতা। ইত্যমরঃ॥ রেণুকানামকগন্ধদ্রব্যং। ইতি রাজনির্ঘণ্টঃ॥ মদমত্তাস্ত্রী। ইতি শব্দরত্নাবলী॥

মহিলাহ্বয়া স্ত্রী প্রিয়ঙ্গুলতা। ইত্যমরঃ॥

মহিষঃ পুং স্বনামখ্যাতপশুবিশেষঃ। তৎপর্য্যায়ঃ। লুলাপঃ ২ বাহদ্বিষন্ ৩ কাসরঃ ৪ সৈরিভঃ ৫। ইত্যমরঃ॥ যমবাহনঃ ৬ বিষজ্বরন্ ৭ বংশশীকঃ ৮ রজস্বলঃ ৯। ইতি শব্দরত্নাবলী॥ আনূপঃ ১০ রক্তাক্ষঃ ১১ অশ্বারিঃ ১২। ইতি জটাধরঃ॥ ক্রোধী ১৩ কলুষঃ ১৪ মন্তঃ ১৫ বিষাণী ১৬ গবলী ১৭ বলী ১৮। বনমহিষ মাংস গুণাঃ। দোষকারিত্বং। লঘুত্বং। দীপনত্বং। বলদায়িত্বঞ্চ॥ গ্রামীণমহিষ মাংস

গুণাঃ। স্নিগ্ধত্বং। মলিনকরত্বং। পিত্তহরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তর্পণত্বং। স্নিগ্ধত্বং। উষ্ণত্বং। মধুরত্বং। গুরুত্বং। নিদ্রা পুংস্ত্ব স্তন্য বর্দ্ধনত্বং। মাংসদার্ঢ্যকৃত্ত্বঞ্চ। ইতি রাজবল্লভঃ॥ অপিচ। মহিষো ঘোটকারিঃ স্যাৎ কাসরশ্চ রজস্বলঃ। পীনস্কন্ধঃ কৃষ্ণকায়ো লুলাপো যমবাহনঃ॥ মহিষস্য মষং স্বাদু স্নিগ্ধোষ্ণং বাত নাশনং। নিদ্রা শুক্র বল স্তন্য তনু দীর্ঘকরং গুরু॥ বৃষ্যঞ্চ সৃষ্টবিমূত্রং বাত পিত্তাসু নাশনং। ইতি ভাবপ্রকাশঃ॥ *॥ শশ্রুধারি ম্লেচ্ছজাতিবিশেষঃ। স চ পুরা ক্ষত্রিয় আসীৎ সগর রাজ্ঞেনাস্য বেদযাগাদাবনধিকারো বেশান্যত্বং ধর্ম্মনাশশ্চ কৃতঃ। যথা। হরিবংশে। সগর স্তাং প্রতিজ্ঞাঞ্চ গুরো র্বাক্যং নিশম্য চ। ধর্ম্মং জঘান তেষাং বৈ বেশান্যত্বং চকার হ॥ অর্দ্ধং শকানাং শিরসো মুণ্ডয়িত্বা ব্যসর্জ্জয়ৎ। জবনানাং শিরঃ সর্ব্বং কাম্বোজানাং তথৈব চ॥ পারদা মুক্তকেশাশ্চ পহ্লবাঃ শ্মশ্রুধারিণঃ। নিঃস্বাধ্যায বষট্কারাঃ কৃতাস্তেন মহাত্মনা॥ শকা জবন কাম্বোজাঃ পারদাঃ পহ্লবা স্তথা। কোলিসর্পাঃ সমহিষা দার্ব্বাশ্চোলাঃ সকেরলাঃ॥ বশিষ্ঠ বচনাদ্রাজন্ সগরেণ মহাত্মনা। ইতি প্রায়শ্চিত্ততত্ত্বং॥ *॥ দৈত্যবিশেষঃ। ইতি হেমচন্দ্রঃ॥ মহিষাসুরঃ। যথা। মহিষে হসুরাণা মধিপে দেবানাঞ্চ পুরন্দরে। তত্রাসুরৈ র্মহাবীর্য্যৈ র্দেবসৈন্যং পরাজিতং॥ জিত্বা চ সকলান্ দেবানিন্দ্রো ভূন্মহিষাসুরঃ। ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং॥ ২

মহিষকন্দঃ পুং মহাকন্দবিশেষঃ। তৎপর্য্যায়ঃ। শৃগাল ২ লুলাপকন্দঃ ৩ শুক্লকন্দঃ ৪ মাহিষীকন্দ ৫। অস্য গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতাময়াপহত্বং। মুখজাড্যহরত্বং। রুচ্যত্বং। অসিতশ্চেৎ মহাসিদ্ধত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহিষঘ্নী স্ত্রী দুর্গা। যথা। মহিষঘ্নি মহামায়ে চামুণ্ডে মুণ্ডমালিনি। আয়ু রারোগ্য বিজয়ং দেহি দেবি নমোস্তু তে॥ ইতি দুর্গোৎসবপদ্ধতিঃ॥ অপিচ। সিংহ মাক্রম্য কল্পান্তে নিহতো মহিষো যয়া। মহিষঘ্নী ততো দেবী কন্যা বৈ সিংহবাহিনী॥ ইতিদেবীপুরাণং॥

মহিষধ্বজঃ পুং যমঃ॥ অর্হদ্বিশেষঃ।

ইতি হেমচন্দ্রঃ ॥

মহিষমর্দ্দিনী স্ত্রী দুর্গা। ইতি শব্দরত্নাবলী॥ অস্যা মন্ত্রো যথা। শারদাতিলকে। ভাস্তঃ বিযৎ সনযনং থেন্তো মর্দ্দিনি ঠদ্বযং। অষ্টাক্ষরী সমাখ্যাতা বিদ্যা মহিষমর্দ্দিনী॥ নারায়ণীতন্ত্রে। বিষং হি মজ্জাকালো হংগ্নি রদ্রি রিন্থো মি ঠদ্বযং। বিষং মকারঃ। হি স্বরূপং। মজ্জা-মকারঃ। কালো মকারঃ। অগ্নী রেফঃ। অদ্রি দকারঃ। ইন্দু ইতি বচনাদিকার যুক্তো দকারঃ। অযং মন্ত্র স্তারাদি মাযাদিঃ কামাদি বাগ্ভবাদি বধূবীজাদিঃ কবচাদিশ্চ নবাক্ষরঃ। তথাচ বিশ্বসারে। প্রণবাদ্যাং জপোদ্বিদ্যাং মাযাদ্যাং বা জপেৎ সুধীঃ। বধূবীজাদিকাং বাপি কবচাদ্যাং জপেত্তথা॥ সর্ব্বকালেষু সর্ব্বত্র কামাদ্যাং প্রজপেৎ সুধীঃ। বাগ্ভবাদ্যাং জপেদ্বাপি দেবীং বাক্য বিশুদ্ধযে॥ অস্যা ধ্যানং। গারুড়োপল সন্নিভাং মণিময কুণ্ডল মণ্ডিতাং নৌমি ভাল বিলোচনাং মহিষোত্তমাঙ্গ নিষেদুষীং। শঙ্খ চক্র কৃপাণ খেটক বাণ কার্ম্মুক শূলকান্ তর্জ্জনী মপি বিভ্রতীং নিজবাহুভিঃ শশি-শেখরাং॥ ইতি তন্ত্রসারঃ॥

মহিষবল্লী স্ত্রী লতাবিশেষঃ। ছিরহিণ্ডী ইতি হিন্দীভাষা। তৎপর্য্যাযঃ। সৌম্যা ২ প্রতিসোমা ৩ অম্রবল্লিকা ৪ খণ্ডশাখা ৫। অস্যা গুণঃ। রস বীর্য্য বিপাকে সোমবল্লী সমত্বং। ইতি রাজনির্ঘণ্টঃ॥

মহিষবাহনঃ পুং যমঃ। ইতি শব্দরত্নাবলী॥

মহিষাসুরঃ পুং রম্ভাসুরপুত্রঃ। তস্য উৎপত্তি র্যথা। শ্রীঔর্ব্ব উবাচ। আরাধিতো মহাদেবো রম্ভেণ সুরবৈরিণা। চিরেণ স চ সুপ্রীত স্তপসা তস্য শঙ্করঃ॥ অথ তুষ্টো মহাদেবঃ প্রত্যক্ষং রম্ভ মুক্তবান্। প্রীতোস্মি তে বরং রম্ভ বরযস্ব যথেপ্সিতং॥ এবমুক্তঃ প্রত্যুবাচ রম্ভ স্তং চন্দ্রশেখরং। অপুত্রোহং মহাদেব যদি তে মধ্যনুগ্রহঃ॥ মম জন্মত্রযে পুত্রো ভবান্ ভবতু শঙ্কর। অবধ্যঃ সর্ব্ব ভূতানাং জেতা চ ত্রিদিবৌকসাং॥ চিরাযুশ্চ যশস্বী চ লক্ষ্মীবান্ সত্যসঙ্গরঃ। এব মুক্তস্ত দৈত্যেন প্রত্যুবাচ বৃষধ্বজঃ॥ ভবতস্তেতদ্বাঞ্ছিতং তে ভবিষ্যামি সুত স্তব। ইত্যুক্ত্বা স মহাদেব স্তত্রৈবান্তরধীযত॥ রম্ভোপি যাতঃ স্বস্থানং হর্ষোৎ-

কুল্ল বিলোচনঃ। পথি গচ্ছন্ সরম্ভো-থ দদৃশে মহিষীং শুভাং ॥ ত্রিহায়ণীং চিত্রবর্ণাং সুন্দরীং শতুলশালিনীং সত্তাং দৃষ্ট্বাথ মহিষীং রম্ভঃ কামেন মোহিতঃ ॥ দোর্ভ্যাং গৃহীত্বা চ তদা চকার সুরতোৎসবং। তয়োঃ প্রবৃত্তে সুরতে সা তদা তস্য তেজসা ॥ দধার মহিষী গর্ভং তদা ত্বম্মহিষাসুরঃ। তস্যাং স্বাঙ্গেষু গিরিশ ত্বৎপুত্রত্ব মবাপ্তবান্ ॥ ববৃধে স তদা বাপ্তিঃ শুক্লপক্ষে সমুদ্রবৎ ॥ ॥ তস্য যো বিষয়স্ত্বং যথা। তন্তু কাত্যায়ন মুনিঃ শপ্তবান্ মহিষাসুরং। দুর্ণয়ং বীক্ষ্য শিষ্যার্থে শিব্যান গৃহ কারকঃ॥ কাত্যায়নেন শপ্তং তং বিজ্ঞায় মহিষাসুরং। প্রাহ প্রণয় পূর্বন্তু চণ্ডিকাং চন্দ্রশেখরঃ॥ ঈশ্বর উবাচ ॥ দেবি কাত্যায়নেনাপি শপ্তো হয়ং মহিষাসুরঃ। যোষিদ্বিনাশকর্ত্রীতি ভবিতেতি জগন্ময়ি ॥ নিঃসংশয় মৃষে বাক্যং ভবিষ্যতি ন সংশয়ঃ। মদীয়ো মাহিষঃ কায স্ত্বয়া দেবি জগন্ময়ি ॥ হন্তব্যঃ সতত্তং যোগ যুক্তঃ পূর্বে পরেপি চ। হরি হরি স্বরূপেণ ত্বাং বোঢ় মক্ষমো হধুনা ॥ মমাহং মাহিষঃ কায স্তব বোঢা ভবিষ্যতি ॥ ইতি পূর্বং মহাদেবো দেবীং প্রার্থিতবান্ পুরা ॥ তেন দেবী মহাদেবং জগ্রাহ মহিষাসুরং। ত্রিষু জন্মসু পুত্রো হভূৎ রম্ভস্য ভগবান্ শিবঃ ॥ সৃষ্টিত্রয়ং স রম্ভাৎ প্রাপ্য রম্ভ এব ব্যজায়ত। অস্য স্তাদৃশ স্তেপে তপঃ পরম দারুণং॥ তথৈবারাধিতঃ শম্ভুঃ পুত্রার্থে প্রদদৌ বরং। তথৈব মহিষীং ভেজে প্রথমং সুরতাগমঃ ॥ তস্যাং তথা ভবদ্বীরো দানবো মহিষাসুরঃ। তথৈব শেপে ভগবান্ মুনিঃ কাত্যায়নস্তু তং॥ ইতি পূর্বস্তে পূর্বস্মিন্ পরস্মিন্ স্তু জন্মনি। মহিষঃ পূজয়িত্বাথ দেবীং বর মযাচত ॥ তৃতীয়ে জন্মনি বরং প্রাপ্য কল্পানশেষতঃ। নেহ দ্বে জন্ম ভাত্তিতস্ত্রেবং বর মযাচত ॥ তেন দেবী পদতলে তিষ্ঠত্যেষো হসুরো হধুনা। নোৎপত্তি রপি তস্যাস্তি সম্বর্ত্তং স্তান্ বহূন্ নৃপ ॥ এবং দেবী প্রসাদেন মহাদেবাঙ্গ সম্ভবঃ। পরামবাপ সততং প্রতিপত্তিং মহাসুরঃ ॥ ইতি তে কথিতং রাজন্ যথা স মহিষাসুরঃ। দেবী পাদতলং প্রাপ্য যথা সো হদ্যাপি মোদতে ॥ ইতি কালিকা পুরাণে ৫৯ অধ্যায়ঃ॥ ॥ অপিচ। নারদ উবাচ। কশ্চাসৌ মহিষো নাম রক্তবীজাদয়শ্চ কে। কাসৌ কাত্যা-

ধনী নাম যা জন্মে মহিষাসুরং ॥ এ
তন্মে বিস্তরত স্তাত যথাবদ্বক্তু মর্হ ॥
সি ॥ পুলস্ত্য উবাচ ॥ শ্রূয়তাং সং-
প্রবক্ষ্যামি কথা পাপ প্রণাশিনীং।
সর্ব্বদা বরদা দুর্গা যেয কাত্যায়নী
মুনে॥ সুরাসুর কুলৌ আদৌ জগৎ-
ক্ষোভ করাবুভৌ। রম্ভশ্চৈব করম্ভ
শ্চ দ্বাবাস্তাং সুমহাবলৌ॥ তাবপু-
ত্রৌ চ দেবর্ষে পুত্রার্থং চেপতু স্তপঃ।
বহুবর্ষগণান্ দৈত্যৌ স্থিতৌ পঞ্চন
দে জলে॥ তত্রৈকো জল মধ্যস্থো দ্বি
তীয়ো হপ্যগ্নি পঞ্চমী। করম্ভশ্চৈব
রম্ভশ্চ যক্ষং মালবটং প্রতি॥ এক
নিমগ্নং সলিলে গ্রাহরূপেণ বাসবঃ।
চ... ॥ত...ং সমা...র নির্জ্জঘান যথে
চ্ছয়া॥ ততো ভ্রা...রি নষ্টে চ রম্ভঃ
কোপ পরিপ্লুতঃ। বহ্নৌ স্ব শীর্ষং
সংছিদ্য হোতু মৈচ্ছন্মহাবলঃ॥
ততঃ প্রগৃহ্য কেশেষু খড়্গঞ্চ রবিসং-
প্রভং। ছেত্তুকামো নিজং শীর্ষং ব
হ্নিনা প্রতিষেধিতঃ॥ উত্তিষ্ঠাসুর
মাদৈবং নাশয়াত্মান মাত্মনা। দুস্ত
রা পরবধ্যাপি স্ববধ্যাপ্যতি দুস্তরা
॥ যচ্চ প্রার্থয়সে বীর তদ্দদামি যথে-
প্সিতং। নাম্রিয়স্ব মৃতস্যেহ নষ্টা ভ
বতি বৈ কথা॥ ততো হব্রবীদ্বচো
রম্ভো বরং চেন্মে দদাসি হি। ত্রৈলো-
ক্য বিজয়ী পুত্রঃ স্যান্মে ত্বত্তেজসা-
ধিকঃ॥ অজেয়ো দৈবতৈঃ সর্ব্বৈঃ পুং-
ভি র্দ্দৈত্যৈশ্চ পাবক। মহাবলো
বায়ুরিব কামরূপী কৃতাস্ত্রবিৎ॥ তং
প্রোবাচ কবি র্ব্রহ্মন্ বাঢ় মেবং ভবি-
ষ্যতি। যস্যাং চিত্তং সমালম্বি ক-
রিষ্যসি ততো হসুর॥ ইত্যেব মুক্তো
দেবেন বহ্নিনা দানবো যযৌ। যষ্টুং
মুনিবটং যাক্ষং যক্ষৈশ্চ পরিবারিতং
॥ তেষাং পদ্ম নিধি স্তত্র বসতে নান্য
চেতনঃ। গজাশ্চ মহিষা শ্চাশ্বা গা-
বো হজাবি পরিপ্লুতাঃ॥ তান্দৃষ্ট্বৈব
তদা চক্রে ভাবং দানব পার্থিবঃ।
মহিষ্যাং রূপযুক্তায়াং ত্রিহায়ণ্যাং
তপোধন॥ সমাগচ্ছৎ দৈত্যেন্দ্রং
কামযন্তী তরস্বিনী। স চাভিগমনং
চক্রে ভবিতব্য প্রচোদিতঃ॥ তস্যাং
সমভবদ্গর্ভ স্তাং প্রগৃহ্যাথ দানবঃ
। পাতালং প্রবিবেশাথ ততঃ স্বভ-
বনং গতঃ॥ দৃষ্টশ্চ দানবৈঃ সর্ব্বৈঃ
পরিত্যক্তশ্চ বন্ধুভিঃ। অকার্য্যং
কারযত্যেবং ভূয়ো মালবটং গতঃ॥
সাপি তেনৈব পতিনা মহিষী চারু
দর্শনা। সমং জগাম তৎপণ্যং যক্ষ
মণ্ডল মুত্তমং॥ ততস্তু বসত স্তস্য
শ্যামা সা সুষবে মুনে। অজীজনৎ
সুতং শুভ্রং মহিষং কামরূপিণং॥

ইতি বামনপুরাণে ১৭ অধ্যায়ঃ॥*॥ অন্যচ্চ। ধরণ্যুবাচ। যা সা মায়া শরীরাত্তু ব্রহ্মণো হব্যক্ত জন্মনঃ। গা-যত্র্যষ্টভুজা ভূত্বা চৈত্রাসুর মযোধযৎ॥ সৈব নন্দা ভবদ্দেবী দেবকার্য্য চিকীর্ষয়া। মহিষাখ্যাসুরবধং স্বর্বতী ব্রহ্মণে স্থিতা॥ বৈষ্ণব্যা চ হতো দেব কথমেতদ্ধি সংশয়ঃ। বারাহউবাচ। ইয়ং জগদ্ধিতা দেবী গঙ্গা শঙ্কর সুপ্রিয়া। ক্বচিৎ কিঞ্চিৎ ভবেদ্বৃত্তং সপদং বেদ সর্ব্ববিৎ॥ স্বায়ম্ভুবে হতো দৈত্যো বৈষ্ণব্যা মন্দরে গিরৌ। মহিষাখ্যো হপরঃ পশ্চাৎ স বৈ চৈত্রাসুরঃ পুনঃ॥ নন্দয়া নিহতো বিন্ধ্যে মহাবল পরাক্রমঃ। অথবা জ্ঞানশক্তিঃ সা মহিষো হজ্ঞান মূর্ত্তিমান্॥ অজ্ঞানং জ্ঞানসাধ্যন্তু ভবতীতি ন সংশয়ঃ। মূর্ত্তিপক্ষে চেতিহাস মমূর্ত্তে চৈকবচ্ছৃদি॥ ধ্যায়তে বেদবাক্যৈস্তু ইহ সা বেদবাদিভিঃ। ইতি বরাহপুরাণং॥

মহিষাসুরসম্ভবঃ পুং ভূমিজগুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥

মহিষাসুরহন্ত্রী স্ত্রী দুর্গা। যথা। মহিষাসুর হন্ত্র্যাশ্চ প্রতিষ্ঠা দক্ষিণায়নে। ইতি প্রতিষ্ঠাতত্ত্বধৃতপদ্ম পুরাণবচনং॥

মহিষাক্ষঃ ) পুং গুগ্গুলুঃ। ইতি রাজ-
মহিষাক্ষকঃ ) নির্ঘণ্টঃ॥

মহিষী স্ত্রী কৃতাভিষেকারাজপত্নী। ইত্যমরঃ॥ সৈরিন্ধ্রী॥ ঔষধিভেদঃ। ইতি মেদিনী॥ মহিষযোষিৎ। তৎপর্য্যায়ঃ। মন্দগমনা ২ মহাক্ষীরা ৩ পয়স্বিনী ৪ লুলাপকান্তা ৫ কলুষা ৬ তুরঙ্গদ্বিষণী ৭। অস্যাঃ ক্ষীরগুণাঃ। মধুরত্বং। বিপাকে শীতলত্বং। গুরুত্বং। বল পুষ্টিপ্রদত্বং। বৃষ্যত্বং। পিত্ত দাহাস্র নাশিত্বঞ্চ॥*॥ তস্যা দধিগুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। শ্লেষ্মকারিত্বং। রক্তপিত্ত নাশিত্বং। বলাস্র বর্দ্ধনত্বং। বল্যত্বং। [illegible]॥*॥ অস্যা নবনীতগুণাঃ। কষায়ত্বং। মধুররসত্বং। শীতত্বং। বৃষ্যত্বং। বল্যত্বং। গ্রাহিত্বং। পিত্তঘ্নত্বং। তন্দ্রাদত্বঞ্চ॥*॥ অস্যা ঘৃতগুণাঃ। উত্তমত্বং। ধৃতিকরত্বং। সুখদত্বং। কান্তিকৃত্বং। বাত শ্লেষ্ম নাশিত্বং। বলকরত্বং। বর্ণ প্রদানে ক্ষমত্বং। দুর্নাম গ্রহণীবিকার শমনত্বং। মন্দানলোদ্দীপনত্বং। চক্ষুষ্যত্বং। গব্যতো ন শ্রেষ্ঠত্বং। হৃদ্যত্বং। মনোহারিত্বঞ্চ॥*॥ অস্যা মূত্রগুণাঃ। আনাহশোফ গুল্মদোষ নাশিত্বং

। কটুত্বং। উষ্ণত্বং। জঠ কণ্ডূতি শূলোদররোগ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মহিষীপ্রিয়া স্ত্রী শূলীতৃণং। ইতি রাজনির্ঘণ্টঃ॥

মহী স্ত্রী পৃথিবী। ইত্যমরঃ॥ নদী বিশেষঃ। সা চ মালবদেশে বর্ত্ততে। ইতি মেদিনী॥ তজ্জলগুণাঃ। মহীজলন্তু সুস্বাদু বল্যং পিত্তহরং গুরু। ইতি রাজনির্ঘণ্টঃ॥ গৌঃ। ইতি জটাধরঃ॥ হিলমোচিকা। ইতি ত্রিকাণ্ডশেষঃ॥

মহীজং ক্লী আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥ ভূমিজাতে ত্রি॥

মহীজঃ পুং মঙ্গলগ্রহঃ। যথা। রবৌ রসাঙ্কী সিতগো হয়াঙ্কী দ্বদং মহীজে বিধুজে শরাষ্টৌ। গুরৌ শরাষ্টৌ ভৃগুজে তৃতীয়ং শনৌ রসাদ্যন্তমিতি ক্ষপায়াং॥ ইতি সময়প্রদীপঃ॥

মহীধ্রঃ পুং পর্ব্বতঃ। ইত্যমরঃ॥

মহীপালঃ পুং রাজা। যথা। স পপাত মহীপৃষ্ঠে শস্ত্র সংঘ সমাহতঃ। নীরক্তশ্চ মহীপাল রক্তবীজো মহাসুরঃ। ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং॥

মহীপ্রাচীরং ক্লী সমুদ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মহীভৃৎ পুং পর্ব্বতঃ। যথা। মহীভৃতঃ পুত্রবতোপি দৃষ্টি স্তস্মিন্নপত্যেন জগাম তৃপ্তিং। অনন্ত পুষ্পস্য মধো হি চূতে দ্বিরেফমালাঃ সবিশেষ সঙ্গাঃ॥ ইতি কুমারসম্ভবে ১ সর্গঃ॥ রাজা। যথা। যে মমানুগতা নিত্যং প্রসাদ ধন ভোজনৈঃ। অনুবৃত্তিং ধ্রুবং তে হদ্য কুর্ব্বন্ত্যন্য মহীভৃতাং॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং॥

মহীময়ঃ ত্রি মৃত্তিকানির্ম্মিতঃ। যথা। তৌ তস্মিন্ পুলিনে দেব্যাঃ কৃত্বা মূর্ত্তিং মহীময়ীং। অর্হণাঞ্চ ক্রতু স্তস্যাঃ পুষ্প ধূপাগ্নি তর্পণৈঃ॥ ইতি মার্কণ্ডেয়পুরাণে দেবীমাহাত্ম্যং॥

মহীরুহঃ পুং বৃক্ষঃ। ইত্যমরঃ॥ শাকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মহীলতা স্ত্রী কিঞ্চুলুকঃ। ইত্যমরঃ॥

মহীসুতঃ পুং মঙ্গলঃ। ইত্যমরঃ॥

মহীক্ষিৎ পুং রাজা। ইত্যমরঃ॥

মহেচ্ছঃ পুং মহাশয়ঃ। ইত্যমরঃ॥

মহেন্দ্রঃ পুং বিষ্ণুঃ। ইতি মহাভারতে তস্য সহস্রনাম স্তোত্রং॥ শক্রঃ॥ জম্বুদ্বীপস্য পর্ব্বতবিশেষঃ। ইতি মেদিনী॥

মহেন্দ্রকদলী স্ত্রী কদলীভেদঃ। ইতি রাজনির্ঘণ্টঃ॥

মহেন্দ্রনগরী স্ত্রী অমরাবতী। ইতি শব্দরত্নাবলী ॥

মহেন্দ্রবারুণী স্ত্রী লতাবিশেষঃ। বড়নাকাল্ ইতি ভাষা। তৎপর্য্যায়ঃ। চিত্রবল্লী ২ মহাফলা ৩ মহেন্দ্রী ৪ চিত্রফলা ৫ ত্রপুসী ৬ ত্রপুসা ৭ আত্মরক্ষা ৮ বিশালা ৯ দীর্ঘবল্লী ১০ মহৎফলা ১১ মহাবারুণী ১২ বৃহৎফলা ১৩ বৃহদ্বারুণী ১৪ সৌম্যা ১৫ গজচির্ভিটা ১৬ চিত্রদেবী ১৭ ধনুঃশ্রেণী ১৮ স্থাণুকর্ণী ১৯ মরুসম্ভবা ২০। অস্যা গুণাঃ। ইন্দ্রবারুণী গুণভাগিত্বং। রসে বীর্য্যে বিপাকে চ কিঞ্চিদ্গুণাধিকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মহেন্দ্রাণী স্ত্রী ইন্দ্রভার্য্যা। ইতি শব্দরত্নাবলী ॥

মহেরণা স্ত্রী শল্লকীবৃক্ষঃ। ইত্যমরঃ ॥ মহেরুণা ইত্যপি পাঠঃ। ইত্যমরটীকায়াং ভরতঃ ॥

মহেলা } স্ত্রী নারী। ইতি শব্দরত্নাবলী ॥
মহেলিকা }

মহেশঃ পুং শিবঃ। ইতি শব্দরত্নাবলী ॥

মহেশবন্ধুঃ পুং শ্রীফলবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

মহেশ্বরঃ পুং শিবঃ। ইত্যমরঃ ॥ অস্য ব্যুৎপত্তির্যথা। বিশ্বস্থানাঞ্চ সর্ব্বেষাং মহতামীশ্বরঃ স্বয়ং। মহেশ্বরঞ্চ তেনেমং প্রবদন্তি মনীষিণঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫৩ অধ্যায়ঃ ॥ অস্য বিবাহস্মরণফলং যথা। মহেশ্বর সমাযুক্ত মীদৃশং যঃ স্মরেৎ হৃদা। শিতং তস্য কন্যাপ্রাপ্তিরভীপ্সিতঞ্চ ভবিষ্যতি ॥ ইতি কালিকাপুরাণে শিববিবাহে ৪৩ অধ্যায়ঃ ॥

মহেশ্বরকরচ্যুতা স্ত্রী করতোয়ানদী। ইতি কেচিৎ ॥ গৌরীবিবাহ সময়ে শঙ্কর কর গলিত সম্প্রদান তোয প্রভবত্বাৎ করস্য তোয়ং বিদ্যতে হস্তেতি করতোয়েতি ব্যুৎপত্তিং প্রদর্শ্য ভরতশ্চ [illegible] ॥

মহেশ্বরী স্ত্রী মহেশ্বরপত্নী। যথা। ঐং পাতু দক্ষনেত্রং মে হ্রীং পাতু বামলোচনং। শ্রীং পাতু দক্ষকর্ণং মে ত্রিবর্ণাত্মা মহেশ্বরী ॥ ইতি তন্ত্রসারে ভুবনেশ্বরীকবচং ॥ অপরাজিতা। ইতি শব্দচন্দ্রিকা ॥ কাংস্যং। ইতি হেমচন্দ্রঃ ॥ রাজরীতিঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহৈরণ্ডঃ পুং স্থূলৈরণ্ডঃ। ইতি রাজনির্ঘণ্টঃ ॥

মহৈলা স্ত্রী স্থূলৈলা। ইতি রাজ-

নির্ঘণ্টঃ ॥

মহোৎকটিকা স্ত্রী বৃহতী। ইতি রাজনির্ঘণ্টঃ ॥

মহোটী স্ত্রী বৃহতী। ইতি ভাবপ্রকাশঃ ॥ বৃহদুৎপলঞ্চ ॥

মহোৎকা স্ত্রী বিদু...। ইতিকেচিৎ॥

মহোৎপলং ক্লী পদ্মং ॥ সারসপক্ষী। ইত্যমরঃ ॥

মহোৎসবঃ পুং অতিশয়সুখজনক কর্ম্ম। যথা। সর্ব্বৈশ্চ জন্মদিবসে স্নাতৈর্ম্মঙ্গলপাণিভিঃ। গুরু দেবাগ্নি বিপ্রাশ্চ পূজনীয়াঃ প্রযত্নতঃ। স্বনক্ষত্রঞ্চ পিতরৌ তথা দেব প্রজাপতিঃ। প্রতিসম্বৎসরঞ্চৈব কর্ত্তব্যশ্চ মহোৎসবঃ॥ ইতি তিথ্যাদিতত্ত্বে ব্রহ্মপুরাণবচনং। অপিচ। দুর্গাতন্ত্রেণ মন্ত্রেণ অর্ঘ্যাদ্দুর্গা মহোৎসবং। মহানবম্যাং শরদি বলিদানং নৃপাদয়ঃ॥ ইতি কালিকাপুরাণে ৬৯ অধ্যায়ঃ ॥

মহোৎসাহঃ ত্রি অতিশয়োৎসাহযুক্তঃ। তৎপর্য্যায়ঃ। মহোদ্যমঃ ২। ইত্যমরঃ ॥

মহোৎসাহঃ পুং রাজ্যাঙ্গপ্রাপ্তরাজপুরুষঃ। যথা। সম্পন্নস্ত প্রকৃতিভি র্মহোৎসাহঃ কৃতশ্রমঃ। ইতি শব্দমালা ॥ অতিশয়োদ্যমশ্চ ॥

মহোদধিঃ পুং সমুদ্রঃ। যথা। লঙ্কা দগ্ধা বনং ভগ্নং লঙ্ঘিতশ্চ মহোদধিঃ। যৎ কৃতং রামদূতেন স রামঃ কিং করিষ্যতি ॥ ইতি মহানাটকং

মহোদয়ং ক্লী পুরবিশেষঃ। তৎপর্য্যায়ঃ। কান্যকুব্জং ২ কন্যাকুব্জং ৩ গাধিপুরং ৪ কৌশং ৫ কুশস্থলং ৬। ইতি হেমচন্দ্রঃ ॥

মহোদয়ঃ পুং কান্যকুব্জদেশঃ॥ আধিপত্যং॥ অপবর্গঃ। ইতি মেদিনী ॥ স্বামী। ইতি হেমচন্দ্রঃ ॥

মহোদয়া স্ত্রী নাগবলা। ইতি রাজনির্ঘণ্টঃ ॥

মহোদরী স্ত্রী মহাশতাবরী। ইতি ভাবপ্রকাশঃ॥ বৃহদুদরযুক্তে ত্রি ॥

মহোদ্যমঃ ত্রি মহোৎসাহঃ। ইত্যমরঃ ॥ অতিশয়োদ্যোগে পুং ॥

মহোন্নতঃ পুং তালবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥ অত্যুন্নতিযুক্তে ত্রি

মহোন্নতিঃ স্ত্রী অতিশয়বৃদ্ধিঃ। যথা। ভূযাত্তে মহদৈশ্বর্য্যং পুত্রাদীনাং মহোন্নতিঃ। অব্যাধিনা শরীরেণ চিরং জীব সুখীভব॥ ইত্যুদ্ভটঃ ॥

মহোন্মদঃ পুং মৎস্যবিশেষঃ। ফলুই ইতি ভাষা। যথা। রাজগ্রীব শ্চিত্রকলঃ ফলকী চ মহোন্মদঃ। ইতি

শব্দরত্নাবলী ॥ অত্যুষ্মস্তে ত্রি ॥

মহোরগং ক্লী তগরমূলং। ইতি রত্নমালা ॥

মহোরগঃ পুং সর্পগণবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ বৃহৎসর্পমাত্রঞ্চ ॥

মহোল্কা স্ত্রী উল্কাবিশেষঃ। যথা। বিদ্যুৎস্তনিত নির্ঘাত মহোল্কানাঞ্চ সংপ্লবে। আকালিক মনধ্যায মেতেষু মনু রব্রবীৎ ॥ মহোল্কানাঞ্চ সংপ্লবে ইতস্ততো হনেক মহোল্কানাং সন্নিপাতে ॥ উল্কা লক্ষণ মাহ বৃহদ্বশিষ্ঠঃ। বৃহচ্ছিখা চ সূক্ষ্মাগ্রা রক্ত নীল শিখোজ্জ্বলা। পৌরুষী চ প্রমাণেন উল্কা নানাবিধা স্মৃতা ॥ ইতি তিথ্যাদিতত্ত্বং ॥

মহোক্ষঃ পুং বৃহদ্বৃষঃ। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। বৃষভঃ ২ বৃষঃ ৩ পুঙ্গবঃ ৪ বলী ৫ গোনাথঃ ৬ ঋষভঃ ৭ গোপ্রিয়ঃ ৮ উক্ষা ৯ গোপতিঃ ১০ ইতি রাজনির্ঘণ্টঃ ॥

মহৌজাঃ ত্রি অতিতেজোযুক্তঃ। মহদোজো যস্যেতি বিগ্রহে বহুব্রীহৌ প্রথমৈকবচনে অত্বসোধাবিত্যনেন দীর্ঘে কৃতে মহৌজা ইতি পদং নিষ্পন্নং ॥

মহৌষধং ক্লী ভূম্যাহল্যং ॥ শুণ্ঠী ॥ লশুনং ॥ বারাহীকন্দঃ ॥ বৎসনাভঃ। ইতি রাজনির্ঘণ্টঃ ॥ পিপ্পলী। ইতি শব্দচন্দ্রিকা ॥ অতিবিষা। ইত্যমরঃ ॥

মহৌষধিঃ স্ত্রী দূর্বা ॥ লজ্জালুক্ষুপঃ। ইতি শব্দচন্দ্রিকা ॥ মহাস্নানীয দ্রব্যবিশেষঃ। যথা। সহদেবী তথা ব্যাঘ্রী বলা চাতিবলা তথা। শঙ্খপুষ্পী তথা সিংহী অষ্টমী চ সুবর্চ্চলা ॥ মহৌষধ্যষ্টকং প্রোক্তং মহাস্নানে নিযোজযেৎ। ইতি গোবিন্দানন্দ ধৃত মৎস্যপুরাণবচনং ॥ অপিচ। পৃশ্নিপর্ণী শ্যামলতা ভৃঙ্গরাজঃ শতাবরী গুড়ূচী সহদেবা চ মহৌষধিগণঃ স্মৃতঃ ॥ ইতি শব্দচন্দ্রিকায়াং প্রমাণান্তরং ॥

মহৌষধী স্ত্রী শ্বেতকণ্টকারী ॥ ব্রাহ্মী ॥ কটুকা ॥ অতিবিষা। ইতি রাজনির্ঘণ্টঃ ॥ ছিলনোটিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

মক্ষ রোষে ॥ সংঘাতে। ইতি কবিকল্পদ্রুমঃ ॥ মক্ষতি। ইতি দুর্গাদাসঃ

মক্ষঃ পুং স্বদোষাচ্ছাদনং। ইতি হড্ডাবলী ॥ ক্রোধঃ ॥ সমূহঃ। ইতি পূর্ব্বোক্তধাত্বর্থদর্শনাৎ ॥

মক্ষবীর্য্যঃ পুং প্রিয়ালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মক্ষিকা স্ত্রী কীটবিশেষঃ। মাছি

ইতি ভাষা। তৎপর্য্যায়ঃ। মক্ষী কা ২ ভৃঙ্গঃ ৩ মাচিকা ৪ গন্ধলোলুপা ৫ পতঙ্গিকা ৬ পত্তিকা ৭। ইতি শব্দরত্নাবলী॥ অমৃতোৎপমা ৮ বমনীযা ৯ অলক্ষ্য ১০। ইতি রাজনির্ঘণ্টঃ॥ নীলা মক্ষিকা বর্ব্বণা ১১। ইত্যমরঃ॥ তন্নাশক ধূপো যথা। ত্রিফলাচূর্ণৈর্ন পুষ্পাণি ভল্লাতক শিরীষকং। লাক্ষা সর্জ্জবসু শৈচব বিডঙ্গ শ্চৈব গুগ্গুলুঃ॥ এতৈ র্ধূপৈ র্মক্ষিকাণাং মশকানাং বিনাশনং। ইতি গারুড়ে ১৮১ অধ্যায়ঃ॥

মক্ষিকামলং ক্লী সিক্থকং। ইতি রাজনির্ঘণ্টঃ॥

মক্ষীকা স্ত্রী শাক্ষুকা। ইতি রাজনির্ঘণ্টঃ॥

মা ড লি শব্দে॥ মানে। ইতি কবিকল্পদ্রুমঃ॥ ড লি মিমীতে। শুত্যা ধর্ম্মং মিমীতে যঃ। ইতি হলায়ুধঃ। ইতি তট্টীকায়াং দুর্গাদাসঃ॥

মা ল মানে। ইতি কবিকল্পদ্রুমঃ॥ ল মাতি ভূমিং নজেন রাজা। ন মান্তি মানিনো যস্য যশ ত্রিভুবনোদরে। ইতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

মা ড য নানে। ইতি কবিকল্পদ্রুমঃ॥ ড য মায়তে। ইতি দুর্গাদাসঃ॥

মা ব্য বারণং॥ বিকল্পঃ। ইতি মেদিনী॥

মা স্ত্রী লক্ষ্মীঃ। ইতি মেদিনী॥ মাতা॥ মানং। ইত্যেকাক্ষরকোষঃ শব্দরত্নাবলী চ॥

মা } ত্রি মদীযাকর্ম্মতা। আমাকে ইতি
মাং } ভাষা। অস্মচ্ছব্দাৎ দ্বিতীয়ৈক বচন নিষ্পন্নং পদং। ইতিব্যাকরণং॥

মাংসং ক্লী রক্তজধাতুবিশেষঃ। মাস ইতি ভাষা। স তু গর্ত্তস্থবালকস্যাষ্টভি র্মাসৈ র্ভবতি। ইতি সুখবোধঃ॥ ভাগবতমতে চতুর্ভি র্মাসৈ র্ভবতি॥ তৎপর্য্যায়ঃ। পিশিতং ২ তরসং ৩ পললং ৪ ক্রব্যং ৫ আমিষং ৬ পলং ৭। ইত্যমরঃ॥ অসৃজং ৮ জাঙ্গলং ৯ কীরং ১০॥ সর্ব্বমাংস গুণাঃ। বাত নাশিত্বং। বৃষ্যত্বং। বল্যত্বং। রুচ্যত্বং। বৃংহণত্বং। দেশ স্থান সাত্ম্য সংস্থা স্বভাবৈ র্ভূযো নানা রূপত্বঞ্চ॥ *॥ প্রসহ ভূশযানূপ বারিজ বারিচারি মাংসগুণাঃ। গুরুত্বং। উষ্ণত্বং। মধুরত্বং। স্নিগ্ধত্বং। বাতঘ্নত্বং। শুক্রবর্দ্ধনত্বঞ্চ॥ *॥ বিষ্কির প্রতুদ জাঙ্গল মাংস গুণাঃ। লঘুত্বং। শীতত্বং। মধুরত্বং। কষাযত্বং। নৃণাং হিত-

ত্বক্ষ ॥ ❀ ॥ অঙ্গবিশেষ মাংস গুণাঃ। একদেহেঽপি পূর্বার্দ্ধং মৃগাণাং পক্ষিণাং পরং। সর্বেষাঞ্চ শির স্কন্ধ প্লীহ চর্ম্ম যকৃৎ গুদং॥ পাদ পুচ্ছান্ত মস্তিষ্ক মুষ্ক ক্রোড়াশ্চ মেহনাঃ। ধাতবঃ শোণিতাদ্যাশ্চ গুরবঃ স্যুর্যথোত্তরং। ❀॥ প্রশস্তাপ্রশস্ত মাংসং যথা। বয়স্থং নির্বিষং সদ্যোহতং মাংসং প্রশস্যতে। মৃতঞ্চ ব্যাধিতং বৃদ্ধং বৃদ্ধং বালং বিষে হতং॥ অগোচর হতং ব্যাড সূদিতং মাংস মুৎসৃজেৎ। ❀ ॥ অষ্টবিধা মাংস যোনির্যথা। প্রসহাঃ ১ প্রসহ্য ভক্ষণাৎ শ্যেনাদয়ঃ। ভূশয়াঃ ২ বিলশায়িত্বাৎ নকুল গোধাদয়ঃ। আনূপাঃ ৩ খড়্গ মহিষ বরাহাদয়ঃ। জলজাঃ ৪ কুম্ভীরাদয়ঃ। জলেচরাঃ ৫ হংস বক প্রভৃতয়ঃ। জাঙ্গলাঃ ৬ হরিণ ছাগাদয়ঃ। বিষ্কিরাঃ ৭ বিকীর্ণচরণাৎ তিত্তির ময়ূর কুক্কুটাদয়ঃ। প্রতুদাঃ ৮ প্রতুদ্য চরণাৎ কপোত পারাবতাদয়ঃ। ইতি রাজনির্ঘণ্টঃ॥ ❀❀॥ অপিচ। মাংসং বাতহরং সর্বং বৃংহণং বল পুষ্টিকৃৎ। প্রীণনং গুরু হৃদ্যঞ্চ মধুরং রসপাকয়োঃ॥ ❀ ॥ অথ তদ্ভেদাঃ। মাংসবর্গো দ্বিধা জ্ঞেয়ো জাঙ্গলানূপ ভেদতঃ। তত্র জাঙ্গলস্য লক্ষণং গুণাশ্চ। মাংসবর্গে ঽত্র জাঙ্গলা বিলস্থাশ্চ গুহাশয়াঃ। তথা পর্ণমৃগা জ্ঞেয়া বিষ্কিরাঃ প্রতুদা অপি॥ প্রসহা অথ চ গ্রাম্যা অষ্টৌ জাঙ্গল জাতয়ঃ। জাঙ্গলা মধুরা রূক্ষা স্তুবরা লঘব স্তথা॥ বল্যা স্তু বৃংহণা বৃষ্যা দীপনা দোষ হারিণঃ। মূকতাং মিন্মিনত্বঞ্চ গদ্গদত্বাদিকং তথা॥ অর্দিতং বধিরত্বঞ্চ অরুচিং ছর্দ্দি প্রমেহ মুখজান্ গদান্। শ্লীপদং গলগণ্ডঞ্চ নাশয়ন্তি নিলানযান্॥ ❀ ॥ অথানূপস্য লক্ষণং গুণাশ্চ। কূলচরাঃ প্লবাশ্চাপি কোষস্থাঃ পাদিন স্তথা। মৎস্যা এতে সমাখ্যাতাঃ পঞ্চধানূপজাতয়ঃ॥ আনূপা মধুরা স্নিগ্ধা গুরবো বহ্নিসাদনাঃ। শ্লেষ্মলাঃ পিচ্ছিলাশ্চাপি মাংস পুষ্টিপ্রদা ভৃশং॥ তথাভিষ্যন্দিন স্তে হি প্রায়ো ঽপথ্যতমাঃ স্মৃতাঃ। ❀॥ অথ জাঙ্গলানাং গণাঃ বিশিষ্টা গুণাশ্চ। হরিণৈণ কুরঙ্গর্ষ্য পৃষত ন্যঙ্কু শম্বরাঃ। রাজীবোঽপি চ মুণ্ডী চেত্যাদ্যা জাঙ্গল সংজ্ঞকাঃ॥ হরিণ স্তাম্রবর্ণঃ স্যাদেণঃ কৃষ্ণঃ প্রকীর্ত্তিতঃ। কুরঙ্গ ঈষত্তাম্রঃ স্যাদ্ধরিণাকৃতিকো মহান্॥ ঋষ্যো নীলাণ্ডকো লোকে সরোজ ইতি কী-

স্থিতঃ। পৃষত শ্চন্দ্রবিন্দুঃ স্যাদ্ধরিণাৎ কিঞ্চিল্লকঃ॥ ন্যঙ্কু বহু বিষাণোথ শম্বরো গবয়ো মহান্। রাজীবস্তু মৃগো জ্ঞেয়ো রাজীভিঃ পরিতো বৃতঃ॥ যো মৃগঃ শৃঙ্গহীনঃ স্যাৎ স মুণ্ডীতি নিগদ্যতে। জঙ্ঘালাঃ প্রায়শঃ সর্ব্বে পিত্তশ্লেষ্মহরাঃ স্মৃতাঃ॥ কিঞ্চিদ্বাতকরা শ্চাপি লঘবো বলবর্দ্ধনাঃ। ॥ ❈ ॥ অথ বিলেশয়ানাং গণনা গুণাশ্চ। গোধা শশ ভুজঙ্গাখু শল্লক্যাদ্যা বিলেশয়াঃ। বিলেশয়া বাতহরা মধুরা রসপাকয়োঃ॥ বৃংহণা বদ্ধবিণ্মূত্রা বীর্য্যোষ্ণা অপি কীর্ত্তিতাঃ। ❈ ॥ অথ গুহাশয়ানাং গণনা গুণাশ্চ। সিংহ ব্যাঘ্র বৃকা ঋক্ষ তরক্ষু দ্বীপিন স্তথা। বভ্রু জম্বুক মার্জ্জারা ইত্যাদ্যাস্তু গুহাশয়াঃ॥ হস্বপুচ্ছো রক্তনেত্রো বভ্রু ভেদঃ সনাঙ্গলঃ। গুহাশয়া বাতহরা গুরুষ্ণ মধুরাশ্চ তে॥ স্নিগ্ধা বল্যা হিতা নিত্যং নেত্র গুহ্য বিকারিণাং। ❈ ॥ অথ পর্ণমৃগাণাং গণনা গুণাশ্চ। বনৌকো বৃক্ষমার্জ্জার বৃক্ষমর্কটিকাদয়ঃ। এতে পর্ণমৃগাঃ প্রোক্তা সুশ্রুতাদ্যৈ মহর্ষিভিঃ॥ স্মৃতাঃ পর্ণমৃগা বৃষ্যা শ্চক্ষুষ্যাঃ শোষিণে হিতাঃ। শ্বাসার্শঃ কাশ সমনাঃ সৃষ্ট মূত্র পুরীষকাঃ॥ ❈ ॥ অথ বিষ্কিরাণাং গণনা গুণাশ্চ। বর্ত্তলাবা বিকির কপিঞ্জলক তিত্তিরাঃ। কুলিঙ্গ কুক্কুটাদ্যাশ্চ বিষ্কিরাঃ সমুদাহৃতাঃ॥ বিকীর্য্য ভক্ষয়ন্ত্যেতে যস্মাত্তস্মাদ্ধি বিষ্কিরাঃ। কপিঞ্জলা ইতি প্রাজ্ঞৈঃ কথিতা গৌরতিত্তিরাঃ॥ বিষ্কিরা মধুরাঃ শীতাঃ কষায়াঃ কটুপাকিনঃ। বল্যা বৃষ্যা স্ত্রিদোষঘ্নাঃ পথ্যা স্তে লঘবঃ স্মৃতাঃ॥ ❈ ॥ অথ প্রতুদানাং গণনা গুণাশ্চ। কাল কণ্ঠক হারীত কপোত শত পত্রকাঃ। সারিকা খঞ্জরীটশ্চ পিকাদ্যাঃ প্রতুদাঃ স্মৃতাঃ॥ প্রতুদ্য ভক্ষয়ন্ত্যেতে তস্মাত্তেন প্রতুদা স্মৃতাঃ। কপোতো ধবলঃ পাণ্ডুঃ শতপত্রো বৃহচ্ছুকঃ॥ প্রতুদা মধুরাঃ পিত্ত কফঘ্নাস্তু বরা হিমাঃ। লঘবো বদ্ধবর্চ্চস্কাঃ কিঞ্চিৎ বাতকরাঃ স্মৃতাঃ॥ ❈ ॥ অথ প্রসহানাং গণনা গুণাশ্চ। কাকো গৃধ্র উলূকশ্চ চিল্লশ্চ শশঘাতকঃ। চাষো ভাষশ্চ কুররা ইত্যাদ্যাঃ প্রসহাঃ স্মৃতাঃ॥ প্রসহাঃ কীর্ত্তিতা এতে প্রসহ্য ছিদ্য ভক্ষণাৎ। প্রসহাঃ খলু বীর্য্যোষ্ণাঃ যন্মাংসং ভক্ষয়ন্তি যে॥ তে শোষ ভস্মকোন্মাদৈঃ শুক্রক্ষীণা ভবন্তি হি। শশঘাতকস্থানে শতঘাতকোপি

পাঠঃ। বাজ ইতি লোকে॥ ॥ অথগ্রাম্যাণাং গণনা গুণাশ্চ। ছাগ মেষ বৃষাশ্বাদ্যা গ্রাম্যাঃ প্রোক্তা মহর্ষিভিঃ। গ্রাম্যা বাতহরাঃ সর্ব্বে দীপনাঃ কফ পিত্তলাঃ॥ মধুরা রস পাকাভ্যাং বৃংহণা বলবর্দ্ধনাঃ। ॥ অথ জলেচরাণাং গণনা গুণাশ্চ। লুলাপ গণ্ড বারাহ চমরী বারণাদয়ঃ। এতে কূলেচরাঃ প্রোক্তা যতঃ কূলে চরন্ত্যমী॥ কূলেচরা মরুৎপিত্ত হরা বৃষ্যা বলাবহাঃ। মধুরাঃ শীতলাঃ স্নিগ্ধা মূত্রলাঃ শ্লেষ্ম বর্দ্ধনাঃ॥ ॥ অথ প্লবানাং গণনা গুণাশ্চ। হংস সারস কাচাক্ষ বক ক্রৌঞ্চ সরারিকাঃ। নন্দীমুখী সকাদম্বা বলাকাদ্যাঃ প্লবাঃ স্মৃতাঃ। প্লবন্তে সলিলে যস্মাদেতে তস্মাৎ প্লবাঃ স্মৃতাঃ॥ স্থূলা কঠোরা বৃত্তা চ যস্যা শ্চঞ্চুঃ পরিস্থিতা॥ গুটিকা চঞ্চু সদৃশী জ্ঞেযা নন্দীমুখীতি সা। প্লবাঃ পিত্তহরাঃ স্নিগ্ধা মধুরা গুরবো হিমাঃ॥ বাত শ্লেষ্মপ্রদা শ্চাপি বল শুক্র করাঃ সরাঃ। ॥ অথ কোষস্থানাং গণনা গুণাশ্চ। শঙ্খঃ শঙ্খনখশ্চাপি শুক্তি শম্বূক কর্কটাঃ। জীবা এবম্বিধা শ্চান্যে কোষস্থাঃ পরিকীর্ত্তিতাঃ॥ কোষস্থা মধুরাঃ স্নিগ্ধাঃ পিত্ত বাতহরা হিমাঃ। বৃংহণা বহুবর্চ্চস্কা বৃষ্যাশ্চ বলবর্দ্ধনাঃ॥ ॥ অথ পাদিনাং গণনা গুণাশ্চ॥ কুম্ভীর কূর্ম্ম নক্রাশ্চ গোধা মকর শঙ্কবাঃ। ঘণ্টিকঃ শিশুমার শ্চেত্যাদয়ঃ পাদিনঃ স্মৃতাঃ॥ পাদিনোঽপি চ যে তে তু কোষস্থানাং গুণৈঃ সমাঃ ইতি ভাবপ্রকাশঃ ॥ ॥ অন্যচ। মাংসং বাত হরং বৃষ্যং বৃংহণং বলবর্দ্ধনং। প্রীণনং গুরু হৃদ্যঞ্চ মধুরং রস পাকযোঃ॥ ॥ তস্যোৎপত্তি স্থান মষ্টবিধং যথা। প্রসহ ভক্ষযন্ত্যেতে প্রসহা স্তেন কীর্ত্তিতাঃ। ভূশয়া বিলশা বিত্বাদানূপোনূপ সংশ্রয়াৎ॥ জলে নিবাসাজ্জলজা জলেচর্য্যজ্জলেচরাঃ। স্থলজা জাঙ্গলাঃ প্রোক্তা মৃগা জঙ্গল চারিণঃ॥ বিকীর্য্য বিষ্কিরাশ্চৈব প্রতুদ্য প্রতুদা স্তথা। যোনি রষ্ট বিধা ত্বেষাং মাংসানাং সংপ্রকীর্ত্তিতা॥ ॥ প্রসহা ভূশযানূপ বারিজা বারিচারিণঃ। গুরূষ্ণ মধুরাঃ স্নিগ্ধা বাতঘ্নাঃ শুক্রবর্দ্ধনাঃ॥ লাবাদ্যো বৈষ্কিরো বর্গঃ প্রতুদা জাঙ্গলা মৃগাঃ। লঘবঃ শীত মধুরাঃ সকষাযা হিতা নৃণাং॥ ॥ অথ মাংসযূষ গুণাঃ। রসো মাংসস্য চক্ষুষ্যঃ বৃংহণঃ প্রাণ বর্দ্ধনঃ। বৃষ্যো বাত

বি সারঘ্নঃ স্মৃতোৌজঃ স্বরবর্দ্ধনঃ ॥ ভগ্ন বিশ্লিষ্ট সন্ধীনাং ক্ষতানাং ব্রণিনাং হিতঃ ॥ ❀ ॥ অথ তৈলপক্কমাংসগুণাঃ । মাংসং যত্তৈল সংসিদ্ধং বীর্য্যোষ্ণং পিত্তলং কটু । অগ্নিসন্দীপনং রুচ্যং দৃষ্টিনুৎ পুষ্টিমুদ্রু ॥ ❀ ॥ ঘৃতপক্ক মাংসগুণাঃ । মাংসন্তু ঘৃত সংসিদ্ধং দৃষ্টিদং পুষ্টিনুল্লঘু । প্রীণনং সর্ব্বধাতূনাং বিশেষান্মুখশোষিণাং ॥ ❀ ॥ পরিশুষ্ক প্রদিগ্ধ মাংসযো র্লক্ষণং গুণাশ্চ । মাংসং বহুঘৃতে ভৃষ্টং সিক্তা চোষ্ণাম্বুনা মুহুঃ । জীরকাদ্যৈঃ সমাযুক্তং পরিশুষ্কং তদুচ্যতে ॥ পরিশুষ্কং স্থিরং স্নিগ্ধং হর্ষণং প্রীণনং গুরু । পিত্তঘ্নং বলমেধাগ্নি মাংসৌজঃ শুক্রবর্দ্ধনং ॥ তদেব ঘনতক্রাঢ্যং প্রদিগ্ধং সত্রিজাতকং । প্রদিগ্ধং বল মাংসাগ্নি বর্দ্ধনং বাত পিত্তজিৎ ॥ ❀ ॥ শূলিকা পক্ক মাংস গুণাঃ । মাংসন্তু শূলিকা প্রোত মঙ্গারেণ বিপাচিতং । জ্ঞেয়ং গুরুতরং বৃষ্যং দীপ্তাগ্নীনাং সদা হিতং ॥ ❀ ॥ বেশবার মাংসস্য লক্ষণং গুণাশ্চ । নিরস্থি পিশিতং পিষ্টং সিদ্ধং গুড ঘৃতান্বিতং । কৃষ্ণা মরিচ সংযুক্তং বেশবার ইতি স্মৃতং ॥ বেশবারো গুরুঃ স্নিগ্ধো বলোপচয বর্দ্ধনঃ ॥ দ্রব্যেণ যেন যেনেহ ব্যঞ্জনং

নৎস্যমাংসযোঃ । তস্য তস্য তযোশ্চৈতদ্গুণ দোষৈ র্বিভাবযেৎ ॥ ❀ ॥ একত্র সর্ব্বমাংস ভক্ষণ দোষো যথা । একত্র সর্ব্বমাংসানি বিরুধ্যন্তে পরস্পরং । ❀ ॥ মাংসস্য গুরুত্বং যথা । অন্নাদষ্ট গুণং পিষ্টং পিষ্টাদষ্টগুণং পযঃ । পযসোষ্টগুণং মাংসং মাংসাদষ্টগুণং ঘৃতং । ঘৃতাদষ্টগুণং তৈলং মর্দ্দনান্নচ ভক্ষণাৎ ॥ ইতি রাজবল্লভঃ ॥ ❀ । ❀ ॥ বর্জ্জনীয মাংসানি যথা । ক্রব্যাদ পক্ষি দাত্যূহ শুক মাংসানি বর্জযেৎ । সারসৈকশফান্ হংসান্ বলাকা বক টিট্টিভান্ ॥ জরং জালপাদঞ্চ খঞ্জরীট মৃগদ্বিজান্ । চাসান্ মাৎস্যান্ রক্তপাদান্ জগ্ধ্বা বৈ কামতো নরঃ ॥ বজ্রং কামতো জগ্ধ্বা সোপবাস স্ত্র্যহং বসেৎ । ইতি গারুড়ে ৯৬ অধ্যাযঃ ॥ ❀ ॥ মাংস ভক্ষণে দোষো যথা । লোভাৎস্ব ভক্ষণার্থায জীবিনং হন্তি যো নরঃ । মজ্জাকুণ্ডে বসেৎ সোপি তদ্ভোজী লক্ষবর্ষকং ॥ ততো ভবেৎ স শশকো মীনশ্চ সপ্তজন্মস্য তৃণাদযশ্চ কর্ম্মভ্যস্ততঃ শুদ্ধিং লভেৎ ধ্রুবং ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যাযঃ ॥ ❀ ॥ অপিচ । বলাকং হংস দাত্যূহং কলবিঙ্কং শুকং তথা । জ-

কুরঙ্গঞ্চ চকোরঞ্চ জালপাদঞ্চ কোকিলং ॥ চাষঞ্চ খঞ্জরীটঞ্চ শ্যেনং গৃধ্রমেবচ । উলূকং চক্রবাকঞ্চ ভাষং পারাবতন্তথা ॥ কপোতং টিটিকঞ্চৈব গ্রামটিট্টিভ মেব চ । সিংহং ব্যাঘ্রঞ্চ মার্জ্জারং শ্বানং শূকর মেব চ ॥ শৃগালং মর্ক্কটঞ্চৈব গর্দ্দভঞ্চ ন ভক্ষয়েৎ । ন ভক্ষয়েৎ সর্ব্বমৃগান্ পক্ষিণো হন্যান্বনেচরান্ ॥ জলেচরান্ স্থলেচরান্ প্রাণিন শ্চেতি ধারণা । ইতি কূর্ম্মপুরাণে উপরিভাগে ১৬ অধ্যায়ঃ ॥ * ॥ অন্যচ্চ । নাদ্যাদবিধিনা মাংসং বিধিজ্ঞোনাপদিদ্বিজঃ । জগ্ধা হ্যবিধিনা মাংসং প্রেত্য তৈরদ্যতে হবশঃ ॥ ন তাদৃশং ভবত্যেনো মৃগহন্তু র্ধনার্থিনঃ । যাদৃশং ভবতি প্রেত্য বৃথামাংসানি খাদতঃ ॥ অর্য্যাদ্বৃতপশুং সঙ্গং জর্য্যাৎ পিষ্টপশুং তথা । ন ত্বেব তু বৃথা হন্তুং পশু মিচ্ছেৎ কদাচন ॥ যাবন্তি পশুরোমাণি তাবৎ কৃত্বো হ মারণং । বৃথা পশুঘ্নঃ প্রাপ্নোতি প্রেত্য জন্মনি জন্মনি ॥ না কৃত্বা প্রাণিনাং হিংসাং মাংস মুৎপদ্যতে ক্বচিৎ । নচ প্রাণিবধঃ স্বর্গ্য স্তস্মান্মাংসং বিবর্জ্জয়েৎ ॥ সমুৎপত্তিঞ্চ মাংসস্য বধ বন্ধৌ চ দেহিনাং । প্রসমী-

ক্ষ্য নিবর্ত্তেত সর্ব্বমাংসস্য ভক্ষণাৎ ॥ ন ভক্ষয়তি যো মাংসং বিধিং হিত্বা পিশাচবৎ । স লোকে প্রিয়তাং যাতি ব্যাধিভিশ্চ ন পীড্যতে ॥ স্বমাংসং পরমাংসেন যো বর্দ্ধয়িতু মিচ্ছতি । অনভ্যর্চ্চ্য পিতৃন্ দেবান্ ততোন্যো নাস্ত্য পুণ্যকৃৎ ॥ বর্ষে বর্ষে হশ্বমেধেন যো যজেত শতং সমাঃ । মাংসানি চ ন খাদেদ্য স্তয়োঃ পুণ্য ফলং সমং ॥ ফল মূলাশনৈ র্মেধ্যৈ র্মুন্যন্নানাঞ্চ ভোজনৈঃ । ন তৎ ফল মবাপ্নোতি যন্মাংস পরিবর্জ্জনাৎ ॥ মাং স ভক্ষয়িতামুত্র যস্য মাংস মিহাদ্ম্যহং । এতন্মাংসস্য মাংসত্বং প্রবদন্তি মনীষিণঃ ॥ যো যস্য মাংস মশ্নাতি স তন্মাংসাদ উচ্যতে । মৎস্যাদঃ সর্ব্বমাংসাদ স্তস্মান্মৎস্যান্ বিবর্জ্জয়েৎ ॥ ইতি মানবে ৫ অধ্যায়ঃ ॥ * ॥ অন্যচ্চ । শ্রীভাগবত পঞ্চমস্কন্ধগদ্যং । যেত্বিহ বৈ পুরুষাঃ পুরুষমেধেন যজন্তে । যাশ্চ স্ত্রিয়ো নৃপশূন্ খাদন্তি তাংশ্চ তাশ্চ তে পশবো ইহ নিহতা যমসদনে যাতয়ন্তো রক্ষোগণাঃ । শৌনিকা ইব স্বধিতিনা বদায়াসৃক্ পিবন্তীতি ॥ ব্রহ্মপুরাণে । পশোস্তু সার্থমাণস্য ন মাংসং গ্রাহয়েৎ

ন্দ্রচিৎ। পৃষ্ঠমাংসং গর্ত্তশয্যাং শুষ্কমাংস ঞ্চথাপিবা ॥ মহাভারতং। রোগার্ত্তো ভ্যর্থিতো বাপি যো মাংসং নাত্ত্যলোলুপঃ। ফলমাপ্নোত্য যত্নেন সো হশ্বমেধ শতস্য চ ॥ নন্দিপুরাণং যশ্চোপদেশং ঙ্করুতে পরস্য তু মহাত্মনঃ। মাংসস্য বর্জ্জন ফলং সো হমাংসাদ ফলং লভেৎ ॥ ভবিষ্যপুরাণং। আমিষং রক্ত শাকঞ্চ যো ভুঙ্ক্তে চ রবের্দ্দিনে। সপ্ত জন্ম ভবেৎ কুষ্ঠী দরিদ্রশ্চোপজায়তে ॥ বিষ্ণুপুরাণং। চতুর্দ্দশ্যষ্টমী চৈব অমাবাস্যথ পূর্ণিমা। পর্ব্বাণ্যেতানি রাজেন্দ্র রবিসংক্রান্তিরেব চ ॥ স্ত্রী তৈল মাংস সংভোগী পর্ব্বস্বেতেষু বৈ পুমান্। বিণ্মূত্র ভোজনং নাম প্রযাতি নরকং মৃতঃ ॥ ইতি তিথ্যাদিতত্ত্বং ॥ * । * ॥ অথ মাংস ভক্ষণ বিধিঃ। শ্রাদ্ধে দেবান্ পিতৄন্ প্রাচ্য খাদন্ মাংসং ন দোষভাক্। বসেৎ স নরকে ঘোরে দিনানি পশুরোমভিঃ ॥ সম্মিতানি দুরাচারো যো হন্ত্যবিধিনা পশূন্। মাংসং সংত্যজ্য সংপ্রাপ্য কামান্ যাতি ততো হরিং ॥ ইতি গারুড়ে ৯৬ অধ্যায়ঃ ॥ * ॥ অপিচ। গোধা কূর্ম্মঃ শশঃ খড়্গী শল্যকশ্চেতি সত্তমাঃ। ভক্ষ্যান্ পঞ্চনখান্নিত্যং মনুরাহ প্রজাপতিঃ ॥ মৎস্যান্ সশল্কান্ ভুঞ্জীত মাংসং রৌরব মেব চ। নিবেদ্য দেবতাভ্যশ্চ ব্রাহ্মণেভ্যশ্চ নান্যথা ॥ মাযূরং তৈত্তিরঞ্চৈব কপোতঞ্চ কপিঞ্জলং। বাধ্রীনসং বকং ভক্ষ্যং নীলহংসং পরাজিতাঃ ॥ সফরঃ সিংহতুণ্ডশ্চ তথা পাঠীনরোহিতৌ। মৎস্যাস্ত্বেতে সমুদ্দিষ্টা ভক্ষণায তপোধনৈঃ ॥ প্রোক্ষিতং ভক্ষযেদেষাং মাংসঞ্চ দ্বিজকাম্যযা। যথা বিধি নিযুক্তঞ্চ প্রাণানামপি চাত্যযে ॥ ভক্ষযন্নপি মাংসানি শেষভোজী ন লিপ্যতে। ঔষধার্থ মশক্তৌ বা নিযোগাদ্যজ্ঞ কারণাৎ ॥ আমন্ত্রিতস্তু যঃ শ্রাদ্ধে দৈবে বা মাংসমুৎসৃজেৎ। যাবন্তি পশুরোমাণি তাবতো নরকান্ ব্রজেৎ ॥ ইতি কূর্ম্মপুরাণে উপরিভাগে ১৬ অধ্যাযঃ ॥ * ॥ অপিচ। মাংসস্যাতঃ প্রবক্ষ্যামি বিধিং ভক্ষণ বর্জ্জনে। প্রোক্ষিতং ভক্ষযেন্মাংসং ব্রাহ্মণানাঞ্চ কাম্যযা। যথা বিধি নিযুক্তস্তু প্রাণানা মেব চাত্যযে ॥ প্রাণস্যান্ন মিদং সর্ব্বং প্রজাপতি রকল্পযৎ। স্থাবরং জঙ্গমঞ্চৈব সর্ব্বং প্রাণস্য ভোজনং ॥ চরাণা মন্নমচরা দংষ্ট্রিনামপ্যদংষ্ট্রিণঃ।

অহস্তাশ্চ সহস্তানাং সুরাণাঞ্চৈব ভীরবঃ ॥ মাত্রাদুষ্যত্যদন্নাদ্যান্ প্রাণিনো হন্যহন্যপি। ধাত্রৈব সৃষ্টা হ্যাদ্যাশ্চ প্রাণিনোত্তার এব চ॥ যজ্ঞায জগ্ধির্মাংসস্যেত্যেষ দৈবো বিধিঃ স্মৃতঃ। অতো হন্যথা প্রবৃত্তিস্তু রাক্ষসো বিধি রুচ্যতে॥ ক্রীত্বা স্বয়ম্বাপ্যুৎপাদ্য পরোপকৃত মেব বা। দেবান্ পিতৃনর্চযিত্বা খাদন্ মাংসং ন দুষ্যতি॥ নিযুক্তস্তু যথান্যাযং যো মাংসং নাত্তি মানবঃ। স প্রেত্য পশুতাং যাতি সম্ভবানেক বিংশতিং॥ ন মাংস ভক্ষণে দোষো ন মদ্যে নচ মৈথুনে। প্রবৃত্তিরেষা ভূতানাং নিবৃত্তিস্তু মহাফলা॥ ইতি মানবে ৫ অধ্যাযঃ॥ *॥ দেবীপুরাণং। অষ্টমীং সমুপোষ্যৈবনবম্যাম পরে হনি। মৎস্য মাংসোপহারেণ দদ্যান্নৈবেদ্য মুত্তমং॥ তেনৈব বিধিনান্নন্তু স্বযং ভুঞ্জীত নান্যথা। যাজ্ঞবল্ক্যঃ। প্রাণাত্যযে তথা শ্রাদ্ধে প্রোক্ষিতং দ্বিজকাম্যযা। দেবান্ পিতৄন্ সমভ্যর্চ্য খাদন্ মাংসং ন দোষভাক্॥ যমঃ। ভক্ষযেৎ প্রোক্ষিতং মাংসং সকৃৎ ব্রাহ্মণ কাম্যযা। দৈবে নিযুক্তঃ শ্রাদ্ধে বা নিযমে চ বিবর্জ্জযেৎ॥ ইতি তিথ্যাদিতত্ত্বং॥ *॥ *॥ ভাক্তামিত্রং যথা॥ গোবর্জ্জ্যং মামিষং ক্ষীরং ফলে, জম্বীর মামিষং আমিষং রক্তশাকঞ্চ সর্বঞ্চ দগ্ধ মামিষং॥ গোবর্জ্জ্য মামিষং ক্ষীর মিত্যত্র পত্রাণামামিষং পর্ণ মিতি চ পাঠঃ। ইতি কর্ম্মলোচনঃ॥

মাংসঃ পুং কালঃ॥ কীটঃ। ইতি শব্দরত্নাবলী॥

মাংসকারি ক্লী রক্তং। ইতি হেমচন্দ্রঃ॥

মাংসচ্ছদা স্ত্রী মাংসরোহিণীবিশেষঃ। তৎপর্য্যাযঃ। মাংসী ২ মাংসরোহী ৩ রসাযনী ৪ সুলোমা ৫ লোমকরিণী ৬। ইতি রাজনির্ঘণ্টঃ॥

মাংসজং ক্লী মেদঃ। ইতি হেমচন্দ্রঃ॥

মাংসতেজঃ ক্লী মেদঃ। ইতি হেমচন্দ্রঃ॥

মাংসদলনঃ পুং প্লীহঘ্নবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মাংসদ্রাবী পুং অম্লবেতসঃ। ইতি রাজনির্ঘণ্টঃ॥

মাংসপচনং ক্লী মাংসপাকঃ। তস্য রূপান্তরং মাংস্পাকঃ। ইতি ব্যাকরণং॥

মাংসপেশী স্ত্রী গর্ভস্থাবস্থাবিশেষঃ। যথা। বুদ্বুদঃ সপ্তরাত্রেণ মাংসপেশী

। ভবেত্তগন্। দ্বিসপ্তাহাৎ ভবেৎ পেশী রক্তমাংস চিতা দৃঢ়া॥ বীজ স্যৈবাঙ্কুরাঃ পেশ্যঃ পঞ্চবিংশতি রাত্রতঃ। ইতি সুখবোধঃ॥ * ॥ অথ মাংসস্য পেশী রাহ। যথার্থ মূষ্মণা যুক্তো বায়ঃ স্রোতাংসি দার যেৎ। অনুপ্রবিশ্য পিশিতং পেশী র্বিভজতে তথা॥ যথার্থং যথাপ্রযোজনং॥ * ॥ মাংসপেশীনাং সংখ্যামাহ। মাংসপেশ্যঃ সমাখ্যাতা নৃণাং পঞ্চশতানি চ। তাসাং শতানি চত্বারি শাখাসু কথিতান্যথ॥ কোষ্ঠে ষড়ুত্তরা ষষ্টিঃ কথিতা মুনিপুঙ্গবৈঃ। গ্রীবায়া ঊর্দ্ধ গা স্তাস্ত চতুস্ত্রিংশৎ প্রকীর্ত্তিতাঃ॥ তাঃ শাখাগতাঃ প্রাহ। একৈকস্যাং পাদাঙ্গুল্যাং তিস্র স্তিস্র স্তাঃ পঞ্চদশ ১৫ পাদাগ্রে দশ ১০ পাদোপরিকূর্চস ন্নিবিষ্টা দশ ১০ গুল্ফতলয়ো দশ ১০ গুল্ফজানুনোরন্তরে বিংশতিঃ ২০ জানুনি পঞ্চ ৫ ঊরৌ বিংশতিঃ ২০ বংক্ষণে দশ ১০ এবমেকস্মিন্ শক্থ্নি শতং ১০০ ভবন্তি। এতেনেতর শক্থি বাহূ চ ব্যাখ্যাতৌ॥ * ॥ অথ কোষ্ঠগতাঃ প্রাহ। গুদে তিস্রঃ ৩ শেফস্যেকা ১ সেবন্যামেকা ১ বৃষণয়োর্দ্বে ২ স্ফিচোঃ পঞ্চ পঞ্চ ৫।৫ বস্তিমূর্দ্ধনি দ্বে ২ উদরে পঞ্চ ৫ নাভৌ একা ১ পৃষ্ঠোর্দ্ধ সন্নিবিষ্টা উভয়তঃ পঞ্চ পঞ্চ দীর্ঘাঃ ৫।৫ পার্শ্বযোঃ ষট্ ৬ বক্ষসি দশ ১০ অক্ষকাংসৌ প্রতি সমন্তাৎ সপ্ত ৭। অক্ষকৌ অংসজত্রূ ইতি লোকে। অংসৌ স্কন্ধৌ। হৃদি দ্বে ২ যকৃতি দ্বে ২ প্লীহ্নি দ্বে ২ উণ্ডুকে দ্বে ২॥ * ॥ অথ গ্রীবোর্দ্ধগা আহ। গ্রীবায়াং চতস্রঃ ৪ হন্বোরষ্টৌ ৮ কণ্ঠনাড়্যৌ ঘণ্টিকায়ামিতি যাবৎ একা ১ গলে একা ১ তালুনি দ্বে ২ জিহ্বায়ামেকা ১ ওষ্ঠযোর্দ্বে ২ নাশায়াং দ্বে ২ ললাটে চতস্রঃ ৪ শিরস্যেকা ১ এবং মাংসপেশ্যঃ পঞ্চশতানি ভবন্তি॥ * ॥ স্ত্রীণামপি ভবন্ত্যেতাঃ কিন্তু বিংশতি রুত্তরাঃ। গর্ব্ভাশয়ে গর্ব্ভমার্গে যোনৌ চ স্তনযো রপি॥ এতাঃ পঞ্চশতানি মাংসপেশ্যঃ। অধিকা বিংশতি যথা। গর্ব্ভাশয়ে তিস্রঃ ৩ গর্ব্ভছিদ্র সংস্থিতাঃ। শুক্রার্ত্তবপ্রবেশিন্যাং তিস্রঃ ৩ যোনাবভ্যন্তরতো মুখাশ্রিতে প্রসৃতে দ্বে ২ যোনাবেব বহির্নির্গতস্রোতঃ পাশ্বদ্বয়স্থিতে বর্ত্তুলে যোনিকর্ণিক ইতি যাবৎ দ্বে ২ স্তনযোঃ পঞ্চ পঞ্চ ৫।৫ যৌবনে তাসাং বৃদ্ধি র্ভবতি। পুংসাং পেশ্যঃ পুর-

স্তাৎ যাঃ প্রোক্তা মেহন মুষ্কজাঃ। স্ত্রীণানাবৃত্য তিষ্ঠন্তি ফলমন্তর্গতং হি তাঃ ॥ অস্যাযমর্থঃ। পুংসাং মেহনমুষ্কযোশ্চ যা তিস্রো মাংস পেশ্যঃ পূর্ব্বমুক্তা স্তাঃ স্ত্রীণাং মেহন মুষ্কা ভাবাৎ ফলং গর্ভাশযং আবৃত্য তিষ্ঠন্তি। গযদাসস্ত্বাহ। স্ত্রীণাং মাংসপেশ্য স্ত্রিভি হীনানি পঞ্চশতানি। তথাচ ভোজঃ। পঞ্চপেশী শতান্যেব স্ত্রীবর্জ্জং বিদ্ধি ভূমিপ। অতশ্চ তিস্রো হীযন্তে স্ত্রীণাং শেফসি মুষ্কযোঃ॥ঞ্চ॥ অথ মাংসপেশীনাং কর্ম্মাণ্যাহ। শিরা স্নাযুস্থি পর্ব্বাণি সন্ধয়স্তু শরীরিণাং। পেশীভিঃ সংহিতান্যেব বলবন্তি ভবন্তি হি॥ ইতি ভাবপ্রকাশঃ॥

মাংসফলা স্ত্রী বার্ত্তাকী। ইতি রাজনির্ঘণ্টঃ॥

মাংসভক্ষঃ ত্রি মাংসভক্ষণকর্ত্তা। মাংসং ভক্ষযতীতি ঢাৎষণ্নিতি কর্ত্তরি ষণ্ প্রত্যযেন নিয়মঃ॥

মাংসমাসা স্ত্রী মাষপর্ণী। ইতি রাজনির্ঘণ্টঃ॥

মাংসরোহিণী স্ত্রী সুগন্ধিদ্রব্যভেদঃ। তৎপর্য্যাযঃ। অগ্নিরুহা ২ বৃত্তা ৩ চর্ম্মকষা ৪ বসা ৫ বিকষা ৬ মাংসরোহী ৭। অস্যা গুণাঃ। বৃষ্যত্বং। সারকত্বং। দোষ ত্রয নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মাংসলং ক্লী কাব্যস্য গৌডীরীত্যুদ্গতস্য ওজোগুণস্যাঙ্গবিশেষঃ। যথা। ওজঃ সমাসভূযস্ত্বং মাংসলং পদডম্বরং। ইতি কাব্যচন্দ্রিকা॥

মাংসলঃ ত্রি বলবান্। ইত্যমরঃ॥ স্থূলঃ। যথা। নিম্নাশ্চ বহুরেখাঃ স্যুর্নির্দ্রব্যা শিচবুকৈঃ কৃশৈঃ। মাংসলৈশ্চ ধনোপেতৈ রবক্রৈ রধুরৈর্নৃপাঃ॥ ইতি গারুডে ৬৬ অধ্যাযঃ

মাংসলফলা স্ত্রী বৃন্তাকী। ইতি রাজনির্ঘণ্টঃ॥

মাংসবিক্রযী ত্রি আমিষবিক্রযকর্ত্তা। ইতি হলাযুধঃ॥ তৎপর্য্যাযঃ। বৈতংসিকঃ ২ কৌটিকঃ ৩ মাংসিকঃ ৪। ইত্যমরঃ॥

মাংসসারঃ পুং মেদঃ। ইতি রাজনির্ঘণ্টঃ॥

মাংসস্নেহঃ পুং মেদঃ। ইতি রাজনির্ঘণ্টঃ॥

মাংসহাসা স্ত্রী চর্ম্ম। ইতি শব্দরত্নাবলী॥

মাংসিকঃ পুং মাংসবিক্রযী। ইত্যমরঃ॥

মাংসিনী স্ত্রী জটামাংসী। ইতি রাজনির্ঘণ্টঃ॥

মাংসী স্ত্রী জটামাংসী॥ কক্কোলী। ইতি মেদিনী॥ মাংসছদা। ইতি রাজনির্ঘণ্টঃ॥

মাংসেষ্টা স্ত্রী বল্গুলা। ইতি রাজ-নিঃ॥

মাকন্দঃ পুং আম্রবৃক্ষঃ। ইতি মেদিনী॥

মাকন্দী স্ত্রী আমলকী॥ নগরভেদঃ। ইতি মেদিনী॥ পীতচন্দনং। ইতি শব্দমালা॥ মাদ্রাণী ইতি মাঙ্গনী ইতিচ হিন্দীভাষা। তৎপর্য্যায়ঃ। বহুমূলী২ মাদনী৩ গন্ধমূলিকা৪। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। মধুরত্বং। দীপনত্বং। রুচ্যত্বং। অশ্লবাতকারিত্বং। পথ্যত্বং। বর্ষাসু নসিতাধিকত্বঞ্চ। একাবিংশদমূলী চ শ্যামলা চ তথা পরা। ইতি রাজনির্ঘণ্টঃ॥

মাকরী স্ত্রী মাঘশুক্লসপ্তমী। অত্র স্নানাদি বিধির্যথা। ভবিষ্যে। সূর্য্যগ্রহণতুল্যা হি শুক্লা মাঘস্য সপ্তমী। অরুণোদয়বেলায়াং তস্যাং স্নানং মহাফলং॥ মাঘে মাসি সিতে পক্ষে সপ্তমী কোটি ভাস্করা। দদ্যাৎ স্নানার্ঘ্য দানাভ্যা মায়ুরারোগ্য সম্পদঃ॥ অরুণোদয় বেলায়াং শুক্লা মাঘস্য সপ্তমী। গঙ্গায়াং যদি লভ্যেত সূর্য্যগ্রহশতৈঃ সমা॥ কোটি ভাস্করা কোটি সপ্তমী তুল্যা সপ্তম্যা ভাস্কর দেবতাকত্বাৎ। সূর্য্যগ্রহণ ফলং স্নানজং। সন্নিহিতে বুদ্ধিরন্তরঙ্গেতি ন্যায়াৎ। তেন বহুশত সূর্য্যগ্রহণ কালীন গঙ্গাস্নান জন্য ফল সমফলমত্র জ্ঞেয়ং॥ ❀॥ স্নান পরিপাটী মাহ কৃত্যকল্পলতায়াং বিষ্ণুঃ। সপ্তবদরপত্রাণি সপ্তার্কপত্রাণি চ শিরসি নিধায় ওঁ যদ্যজ্জন্ম কৃতং পাপং ময়া সপ্তসু জন্মসু। তন্মে রোকঞ্চ শোকঞ্চ মাকরী হন্তু সপ্তমী॥ ইত্যুচ্চার্য্য স্নায়াদিতিশেষঃ। রোকং ছিদ্রং। তিথিকৃত্যস্য পৌর্ণমাস্যন্ত মাসাঙ্গত্বাৎ মাকরী পদং মকরার্কারব্ধ চান্দ্রমাসীয তিথিপরং। তিথিকৃত্যে চ কৃষ্ণাদিং ব্রতে শুক্লাদি মেব চ। বিবাহাদৌ চ সৌরাদিং মাসং কৃত্যে বিনির্দ্দিশেদিতি ব্রহ্মপুরাণাৎ মন্বন্তরাদিত্বেন তথা যুক্তত্বাচ। যথা মৎস্যপুরাণং। যস্মান্মন্বন্তরাদৌ তু রথমাপ দিবাকরাঃ। মাঘমাসস্য সপ্তম্যাং তস্মাৎ সা রথসপ্তমী॥ অরুণোদয় বেলায়াং তস্যাং স্নানং মহাফলং। অতএব নারসিংহে রথাখ্যায়া নিভৃক্তং॥ ❀॥ অর্ঘ্যদান পরিপাটী

যথা। অর্কপত্রৈঃ সবদরৈর্দূর্ব্বাক্ষত সচন্দনৈঃ। অষ্টাঙ্গ বিধিনা চার্ঘ্যং দদ্যাদাদিত্য তুষ্টয়ে॥ অষ্টাঙ্গ মর্ঘ্যমাপূর্য্য ভানো মূর্দ্ধ্নি নিবেদযেৎ॥ অর্ঘ্য মন্ত্রস্তু। জননী সর্ব্ব ভূতানাং সপ্তমী সপ্তসপ্তিকে। সপ্তব্যাহৃতিকে দেবি নম স্তে রবিমণ্ডলে॥ প্রণাম মন্ত্রস্তু। সপ্তসপ্তিবহ প্রীত সপ্তলোকপ্রদীপন। সপ্তম্যাঞ্চ নম স্তভ্যং নমো হনন্তায বেধসে॥ ইতি তিথ্যাদিতত্ত্বং॥ *॥ তস্যাং সূর্য্য মুদ্দিশ্য রথযাত্রা ফলং যথা। মাঘমাসস্য সপ্তম্যাং দেবং শাম্ব পুরং নরাঃ। রথযাত্রাং প্রকুর্ব্বন্তি সর্ব্ব দ্বন্দ্ব বিবর্জ্জিতাঃ॥ গচ্ছন্তি তৎ পদং শান্তং সূর্য্যমণ্ডল ভেদকং। এতত্তে কথিতং দেবি সাম্ব শাপ সমুদ্ভবং॥ পাপ প্রশমনাখ্যানং মহাপাতক নাশনং। ইতি বরাহপুরাণং॥

মাগধঃ পুং পাণিস্বনকঃ। ইতি মহাভারতং॥ বংশক্রমেণ মহত্ত্ববেদি রাজাগ্র স্তুতিকারী। তৎপর্য্যাযঃ। মধুকঃ ২ বন্দী ৩ স্তুতিপাঠকঃ ৪। ইত্যমরভরতৌ॥ অস্যোৎপত্তি র্যথা। ততো হস্য দক্ষিণং হস্তং মমন্থু স্তে তদা দ্বিজাঃ। মথ্যমানে চ তত্রাভূৎ পৃথু র্বৈণ্যঃ প্রতাপবান্॥ তস্য বৈ জাত মাত্রস্য যজ্ঞে পৈতামহে শুভে। সূতঃ সূত্যাং সমুৎপন্নঃ সৌত্যে হহনি মহামতে॥ তস্মিন্নেব মহাযজ্ঞে যজ্ঞে প্রাজ্ঞো হথ মাগধঃ। প্রোক্তৌ তদা মুনিবরৈ স্তাবুভৌ সূতমাগধৌ॥ স্তূযতা মেষ নৃপতিঃ পৃথু র্বৈণ্যঃ প্রতাপবান্। সূত্যা মিতি সূতি রভিষূতিঃ অভিষূযতে কণ্ড্যতে সোমো হস্যামিতি সূতিঃ সোমাভিষব ভূমি স্তস্যাং। সৌত্যে হহনি তস্মিন্নেবদিনে। ইতি বিষ্ণুপুরাণে ১ অংশে ১৩ অধ্যায স্তট্টীকা চ॥ *॥ বর্ণসঙ্করজাতিবিশেষঃ। স তু ক্ষত্রিযাযাং বৈশ্যাজ্জাতঃ। ভাট্ ইতি খ্যাতঃ। মগধেষু ভবো মাগধঃ ষ্ণঃ। ইত্যমরভরতৌ॥ জরাসন্ধরাজঃ। যথা। মাগধো ন চ হন্তব্যো ভূযঃ কর্ত্তা বলোদ্যমং। ইতি শ্রীভাগবতে ১০ স্কন্ধঃ॥ শুক্লজীরকঃ॥ মগধদেশোদ্ভবে ত্রি। ইতি মেদিনী॥

মাগধাদেবী স্ত্রী রাধিকা। যথা। তাসান্তু মাগধাদেবী তপ্তচামীকরপ্রভা। বৃন্দাবনেশ্বরী রাধা নাম্না খ্যাত্বথ কারণাৎ॥ ইতি পাদ্মে-

পাতালখণ্ডে৯অধ্যায় শ্লোকার্দ্ধ-
দ্বয়ং ॥

মাগধী স্ত্রী যূথিকা ॥ পিপ্পলী । মেদিনীকরৌ ॥ ত্রুটিঃ । গুজরাটীএলাচি ইতি ভাষা । ইতি শব্দচন্দ্রিকা ॥ শর্করা । ইতি জটাধরঃ ॥ ভাষাবিশেষঃ । ইতি হেমচন্দ্রঃ ॥

মাঘঃ পুং শ্রীদত্তকসূনু শিশুপালবধ মহাকাব্যকর্ত্তা । ইতি তদ্গ্রন্থশেষপুষ্পিকা ॥ স্বনামখ্যাত মহাকাব্যং । যথা । পুষ্পেষু জাতী নগরেষু কাঞ্চী নারীষু রম্ভা পুরুষেষু বিষ্ণুঃ । নদীষু গঙ্গা নৃপতৌচ রামঃ কাব্যেষু মাঘঃ কবি কালিদাসঃ ॥ ইতি প্রাচীনাঃ ॥ বৈশাখাদি দ্বাদশমাসান্তর্গত দশমমাসঃ । মঘাযুক্তা পৌর্ণমাসী যত্র মাসে সঃ । তৎ পর্য্যায়ঃ । তপাঃ ২ । ইত্যমরঃ ॥ স চ ত্রিবিধঃ । মকরস্থ রব্যারব্ধ শুক্ল প্রতিপদাদি দর্শান্তো মুখ্যচান্দ্রঃ ১ । কৃষ্ণপ্রতিপদাদি পৌর্ণমাস্যন্তো গৌণচান্দ্রঃ ২ । মকরস্থ রবিকঃ সৌরঃ ৩ । ইতি মলমাসতত্ত্বীয লিখন স্বরসাৎ ॥ তত্র জাত ফলং । বিদ্যা বিনীতঃ মঙ্গল প্রধানঃ সদা সদাচার যুতঃ প্রবীণঃ । যোগানুরক্তো বিষয়েষু শক্তো মাঘে হথ মাসে মঘবানিবেশঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ অথ মাঘকৃত্যং । পাদ্মে । স্বর্গলোকে চিরং বাসো যেষাং মনসি বর্ত্ততে । যত্র ক্বাপি জলে তৈস্তু স্নাতব্যং মৃগ ভাস্করে ॥ মৃগো মৃগাস্যত্বেন মকরঃ । তৎস্থে ভাস্করে । তত্র সঙ্কল্পঃ । অরুণোদয়কালে জলে মজ্জনং কৃত্বা আচম্য উত্তরাভিমুখঃ ওঁ তৎ সদিত্যুচার্য্য কুশ কুসুম তিল জলান্যাদায ওমদ্য মাঘেমাসি অমুকপক্ষে অমুক তিথাবারভ্য মকরস্থ রবিং যাবৎ প্রত্যহ মমুকগোত্রো হমুক দেবশর্ম্মা স্বর্গলোকে চিরকাল বাস কামো বিষ্ণুপ্রীতিকামো বা প্রাতঃ স্নান মহং করিষ্যে ইতি সংকল্প্য গঙ্গাব্যতিরিক্ত জলমাত্রেপি স্নানং কর্ত্তব্যং । প্রতিদিন সঙ্কল্পে তু আরভ্য মকরস্থরবিং যাবৎ প্রত্যহ মিতি ন বক্তব্যং কিন্তু মাস্যনন্তরং মকরস্থে রবাবিত্যধিকং বক্তব্যং । চান্দ্র স্নান বাক্যন্তু বৈশাখকৃত্যে হনুসন্ধেয়ং । তত্র সঙ্কল্পং কৃত্বা যথোক্ত বিধিনা স্নানেতিকর্ত্তব্যতাং বিধায ওঁ দুঃখ দারিদ্র্য নাশায শ্রীবিষ্ণো স্তোষণায চ । প্রাতঃ স্নানং

করোম্যদ্য মাঘে পাপ প্রণাশনং ॥ মকরস্থে রবৌ মাঘে গোবিন্দাচ্যুত মাধব। স্নানেনানেন মে দেব যথোক্ত ফলদো ভব ॥ ইত্যুচ্চার্য্য স্নায়াৎ। ততো বাসুদেবং হরিং কৃষ্ণং শ্রীধরঞ্চ স্মরেত্ততঃ। ওঁ দিবাকর জগন্নাথ প্রভাকর নমো২স্তু তে ॥ পরিপূর্ণং করুষ্বেদং মাঘ স্নানং মহাব্রতং। চান্দ্রস্নানে মকরার্কা স্পৃষ্টকালে মকরস্থে রবাবিত্যস্য ন পাঠঃ। অসম বেতার্থত্বাৎ। তীর্থে তু মাঘমাস মিমং পুণ্যং স্নাম্যহং দেবমাধব। তীর্থস্যাস্য জলে নিত্যং প্রসীদ ভগবন্ হরে ॥ ইতি পঠিত্বা দুঃখ দারিদ্র্য নাশায়েত্যাদিকং পঠিতব্যং। গঙ্গায়ান্তু পদ্মপুরাণে। দিনে দিনে সহস্রন্তু সুবর্ণানাং বিশাম্পতে। তেন দত্তংহি গঙ্গায়াং যো মাঘে স্নাতি মাধব ॥ মানব ইতি ক্বচিৎ পাঠঃ ॥ একদা সঙ্কল্পে তু প্রতিদিন সহস্র সুবর্ণদানজন্য ফল সমফল প্রাপ্তিকামঃ শ্রীবিষ্ণু প্রীতিকামো বা মাঘ মাসং যাবৎ প্রত্যহং গঙ্গায়াং প্রাতঃ স্নান মহঙ্করিষ্যে। ইতি বাক্যে বিশেষঃ। প্রতিদিন সঙ্কল্পে তু সহস্র সুবর্ণদানজন্য ফল সমফল প্রাপ্তি কামো বিষ্ণু প্রীতিকামো বা গঙ্গা-

যাং প্রাতঃ স্নান মহং করিষ্যে ইতি যথোক্ত বিধিনা স্নানেতিকর্ত্তব্যতাং বিধায় ওঁ মাঘমাস মিমং পুণ্যং স্নাম্যহং দেব মাধব। তীর্থস্যাস্য জলে নিত্যং প্রসীদ ভগবন্ হরে ॥ দুঃখ দারিদ্র্য নাশায় শ্রীবিষ্ণো স্তোষণায় চ। প্রাতঃ স্নানং করোম্যদ্য মাঘে পাপ প্রণাশনং ॥ মকরস্থে রবৌ মাঘে গোবিন্দাচ্যুত মাধব। স্নানেনানেন মে দেব যথোক্ত ফলদো ভব ॥ ইতি পঠিত্বা স্নায়াৎ ততো বাসুদেবং হরিং কৃষ্ণং শ্রীধরঞ্চ স্মরেত্ততঃ। দিবাকর জগন্নাথ প্রভাকর নমো২স্তু তে। পরিপূর্ণং করুষ্বেদং মাঘস্নানং মহাব্রতং ॥ ইতি পঠেৎ ॥ * ॥ স্কন্দপুরাণং। সম্প্রাপ্তে মকরাদিত্যে পুণ্যে পুণ্যপ্রদে শুভে। কর্ত্তব্যো নিয়মঃ কশ্চিদ্ব্রতরূপী নরোত্তমৈঃ ॥ তত্তৎ পুণ্যকামঃ শ্রীবিষ্ণু প্রীতিকামো বা ইতি বাক্যে বিশেষঃ ॥ * ॥ পৌষ্যাঃ পৌর্ণমাস্যা ঊর্দ্ধং মাঘপৌর্ণমাসী পর্য্যন্তং মদিরা তুল্যং তাম্বূলকং ন ভোক্তব্যং ॥ * ॥ পৌষ্যা ঊর্দ্ধং মাঘ কৃষ্ণাষ্টম্যাং ছাগমাংসেন শ্রাদ্ধং কর্ত্তব্যং। মাংসাভাবে পায়সোপকরণেন। তদভাবে কেবলান্নেন বা শ্রাদ্ধং কর্ত্তব্যং ॥ * ॥ অথ রটন্তী

চতুর্দ্দশী। মাঘে মাস্যসিতেপক্ষে রটন্ত্যাখ্যা চতুর্দ্দশী। তস্যা মুদয বেলাযাং স্নাত্বা নাবেক্ষতে যমং॥ উদযবেলাযাং অরুণোদয বেলাযাং। অনকাঙ্ক্ষিতে কালে মাঘে কৃষ্ণ চতুর্দ্দশী। সতারব্যোম কালে তু তস্যাং স্নানং মহাফলং॥ স্নাত্বা সন্তর্প্য তু যমান্ সর্ব্বপাপৈঃ প্রমুচ্যতে। অত্র তিথি কৃত্যত্বাদ্দৌণচান্দ্রাদরঃ। তত্রোভযদিনে অরুণোদয সতারকালে মহূর্ত্তান্যূন চতুর্দ্দশীলাভে পূর্ব্বদিনে স্নানং যমতর্পণঞ্চ। এক দিনমাত্রে তল্লাভে তদ্দিনে। মাঘ স্নান কালাভ্যন্তরে তাদৃশ চতুর্দ্দশী লাভে মাঘ প্রাতঃস্নাযিনা তন্ত্রেণ দ্বযং কার্য্যং। তত্র ওঁ তৎ সদদ্য। মাঘে মাসি কৃষ্ণে পক্ষে রটন্ত্যাং চতুর্দ্দশ্যাং তিথৌ অরুণোদয বেলাযাং অমুক গোত্রঃ শ্রীঅমুক দেব শর্ম্মা যমাদর্শনকামো গঙ্গাযাং স্নানমহং করিষ্যে ইতি সঙ্কল্প্য যথা বিধি স্নানং প্রাগুক্তং চতুর্দ্দশ যমতর্পণঞ্চ কুর্য্যাৎ॥ ❀ ॥ অথ শ্রীপঞ্চমী। তত্রোভযদিনে পূর্ব্বাহ্নে পঞ্চমীলাভে পূর্ব্বদিনে লক্ষ্মী সরস্বত্যোঃ পূজনং কুর্য্যাৎ। এক দিন প্রাপ্তে তদ্দিনে। এবং ষড্বর্ষং শুক্লপঞ্চমীব্রতে হপি। ততশ্চ ওঁ তৎসদিত্যুচার্য্য ওমদ্যেত্যাদি লক্ষ্মীপ্রীতিকামো লক্ষ্মীপূজন মহং করিষ্যে ইতি সঙ্কল্প্য শালগ্রামে জলে বা পূজযেৎ। ওঁ পাশাক্ষ মালিকাম্ভোজ সৃণিভি র্যাম্য সৌম্যযোঃ। পদ্মাসনস্থাং ধ্যাযেচ্চ শ্রিযং ত্রৈলোক্য মাতরং॥ গৌরবর্ণাং সুরূপাঞ্চ সর্ব্বালঙ্কার ভূষিতাং। রৌক্মপদ্ম ব্যগ্রকরাং বরদাং দক্ষিণেন তু॥ ইত্যনেন ধ্যাত্বা এতৎপাদ্যং ওঁ লক্ষ্ম্যৈ নমঃ। ইত্যাদিনা নৈবেদ্যান্তেন পূজযেৎ। ওঁ নমস্তে সর্ব্বদেবানাং বরদাসি হরিপ্রিযে। যা গতি স্তৎ প্রপন্নানাং সা মে ভূযাত্ত্বদর্চ্চনাৎ। ইত্যনেন পুষ্পাঞ্জলি ত্রযেণ প্রণমেৎ॥ ❀ ॥ ওঁ তৎসদিত্যুচার্য্য ওমদ্যেত্যাদি সরস্বতী প্রীতিকামঃ সরস্বতী পূজন মহং করিষ্যে ইতি সঙ্কল্প্য শালগ্রামে ঘটাদিস্থ জলে বা পূজযেৎ। ওঁ তরুণ সকল মিন্দো র্বিভ্রতী শুভ্রকান্তিঃ কুচভর নমিতাঙ্গী সন্নিষণ্ণা সিতাব্জে। নিজকর কমলোদ্যল্লেখনী পুস্তক শ্রীঃ সকল বিভবসিদ্ধ্যৈ পাতু বাগ্দেবতা নঃ॥ ইতি ধ্যাত্বা বাহ্য এতৎ পাদ্যং ওঁ সরস্বত্যৈ নমঃ। ইত্যাদিনা নৈবেদ্যান্তেন পূজযেৎ। ততঃ ওঁ ভদ্রকাল্যৈ

নমো নিত্যং সরস্বত্যৈ নমো নমঃ। বেদ বেদাঙ্গ বেদান্ত বিদ্যাস্থানেভ্য এব চ স্বাহা। ইতি ব্রহ্মপুরাণীযেন পুষ্পাঞ্জলিনা ত্রিঃ পূজযেৎ। মৎস্য সূক্তে। সরস্বতীং সংপূজ্য ওঁ যথা ন দেবো ভগবান্ ব্রহ্মা লোক পিতামহঃ। ত্বাং পরিত্যজ্য সন্তিষ্ঠেত্তথা ভব বরপ্রদা॥ বেদাঃ শাস্ত্রাণি সর্ব্বাণি নৃত্য গীতাদিকঞ্চ যৎ। ন বিহীনং ত্বযা দেবি তথা মে সন্তু সিদ্ধযঃ॥ লক্ষ্মী র্মেধা ধরা পুষ্টি গৌরী তুষ্টিঃ প্রভা ধৃতিঃ। এতাভিঃ পাহি তনুভি রষ্টাভি র্মাং সরস্বতি॥ ইতি মৎস্যপুরাণীযৈঃ প্রার্থ্য প্রণমেৎ॥ ❁॥ বন্ধুজীবঞ্চ দ্রোণঞ্চ সরস্বত্যৈ ন দাপযেৎ। আচারাৎ পুস্তকঞ্চ পূজযেৎ। ওঁ মস্যাধারায নমঃ। ইতি মস্যাধারং পূজযেৎ। ওঁ লেখন্যৈ নমঃ। ইতি লেখনীং পূজযেৎ॥ ❁॥ অথ মাঘ সপ্তমী। তত্রোভযদিনে অরুণোদযকালে সপ্তমীলাভে পূর্ব্বদিনে একদিনে তল্লাভে তদ্দিনে। অরুণোদযকালে সামান্য জলে ওঁ অদ্যেত্যাদি সূর্য্য গ্রহণ কালীন গঙ্গাস্নান জন্য ফল সমফল প্রাপ্তিকাম আযুরারোগ্য সম্পৎ কামো বারুণোদয বেলাযাং স্নান মহং করিষ্যে। ইতি সঙ্কল্প্য যথা বিধি স্নানেতিকর্ত্তব্যতাং বিধায সপ্ত বদরপত্রাণি সপ্তার্কপত্রাণি চ শিরসি নিধায ওঁ যদ্যজ্জন্ম কৃতং পাপং মযা সপ্তসু জন্মসু। তন্মে রোকঞ্চ শোকঞ্চ মাকরী হন্তু সপ্তমী॥ ইত্যচার্য্য স্নাযাৎ। ততো যথা কালং সপ্ত বদরী ফলার্কপত্রাণি তিল দূর্ব্বাক্ষত চন্দন রক্ত জলমাদায ওমদ্যেত্যাদি আযুরারোগ্য সম্পৎ কামঃ শ্রীসূর্য্যাযার্ঘ্য মহং দদে। ইতি সঙ্কল্প্য ওঁ নমো বিবস্বতে ব্রহ্মন্ ভাস্বতে বিষ্ণুতেজসে। জগৎসবিত্রে শুচযে সবিত্রে কর্ম্মদাযিনে॥ ইত্যনন্তরং ওঁ জননী সর্ব্বভূতানাং সপ্তমী সপ্তসপ্তিকে। সপ্ত ব্যাহৃতিকে দেবি নমস্তে রবি মণ্ডলে॥ ইতি পঠিত্বা ইদমর্ঘ্যং শ্রীসূর্য্যাযনম ইত্যর্ঘ্যং দত্ত্বা ওঁ সপ্তসপ্তিবহ প্রীত সপ্তলোক প্রদীপন। সপ্তম্যাং হি নমস্তুভ্যং নমো হনন্তায বেধসে। ইত্যনেন প্রণমেৎ। শূদ্রেণাপি স্নানে তূষ্ণীং বিধানাৎ স্নান মন্ত্রং বিনা অর্ঘ্য প্রণাম মন্ত্রাঃ পাঠ্যাঃ পৌরাণিকত্বাৎ। গঙ্গাযান্তু বহুশত সূর্য্যগ্রহণকালীন গঙ্গাস্নান জন্য ফল সমফল প্রাপ্তিকামো গঙ্গাযাং স্নান মহং করিষ্যে ইতি বাক্যে বিশেষঃ। অত্রার্ঘ্য দান

মক্ষং এত্তৎ স্নানাদেব মাঘ প্রাতঃ স্নানং তন্ত্রেণৈব সিধ্যতি ॥ * ॥ অথ বিধানসপ্তমীব্রতং। প্রথমতো ব্রাহ্মণান্ স্বস্তিবাচ্য ওঁ সূর্য্যঃ সোম ইত্যাদি পঠিত্বা তাম্রাদি পাত্রে জলং তিল জলান্যাদায় ওঁ তৎসদিত্যুচার্য্য ওমদ্য মাঘে মাসি শুক্লেপক্ষে সপ্তম্যান্তিথাবারভ্য প্রতিমাসীয় শুক্ল সপ্তম্যাং পৌষসপ্তমীং যাবৎ আরোগ্য সম্পৎ কামো ঽভীষ্ট তত্তৎ ফলকামো বা অর্কাগ্রাদীতর ভোজন বিচ্ছিত্তি বিধানেন সপ্তমী ব্রতমহং করিষ্যে ইতি সঙ্কল্প্য সংযম পারণ সহিতং তত্তন্মাসি তত্তন্নিয়মং জর্য্যাৎ। তত্র মাঘে অর্কাগ্রমাত্রং ভুঞ্জীত। ফাল্গুনে অন্তরীক্ষ গৃহীতং কপিলাবিড্ যবমাত্র প্রমাণং তদভাবে অন্যগোময় মপীতি। চৈত্রে মরীচমেকং। বৈশাখে কিঞ্জিজ্জলং। জ্যৈষ্ঠে অপক্ব কদলী ফল মধ্যং কণামাত্রং। আষাঢে স্বচ্ছায দ্বিগুণ সময়ে যব প্রমাণং জশমূলং। শ্রাবণে নক্তং কালে অল্প হবিষ্যৌদনং। ভাদ্রে শুদ্ধোপবাসঃ। আশ্বিনে পঞ্চমার্দ্ধমাসে ময়ূরাণ্ড প্রমাণং হবিষ্যান্নং। কার্ত্তিকে অর্দ্ধ প্রসৃতি মাত্রং কপিলাক্ষীরং তদভাবে ক্ষীরান্তরং। মার্গশীর্ষে প্রাঙ্মুখো বায়ুশনং। পৌষে স্বল্পং ঘৃতং। তদনন্তরঞ্চ। ব্রাহ্মণান্ ভক্ষয়েৎ ভক্ত্যা গুড ক্ষীর নিরামিষৈঃ। বিপ্রায় দক্ষিণা দেয়া বিভবস্যানুরূপতঃ ॥ অষ্টম্যাং পারণং জর্য্যাৎ কটুম্ল রহিতেন চ। মুদ্গ মাষ তিলাদীনি ঘৃতঞ্চৈব বিবর্জয়েৎ ॥ একসিদ্ধং ভক্ষ্য মুক্ত মর্ক তন্ত্রানুসারতঃ। চান্দ্রমাস বিশেষোল্লেখবৎ অনন্তাদি ব্রতবৎ মলমাসেতরে তত্তু কর্ত্তব্যং ॥ * ॥ অথারোগ্যসপ্তমী। তত্র পূর্ব্ববৎ সপ্তম্যান্তিথাবারভ্য ঐহিকারোগ্য ধন ধান্য পারলৌকিক শুভস্থান প্রাপ্তি কামঃ সম্বৎসরং যাবৎ আরোগ্যসপ্তমী ব্রত মহং করিষ্যে ইতি সঙ্কল্প্য প্রতিমাস শুক্লসপ্তম্যাং শালগ্রামে ঘটাদিস্থজলে বা পূজয়েৎ। রক্তাম্বুজাসন মিতি ধ্যাত্বা এতৎ পাদ্যং ওঁ সূর্য্যায নম ইত্যাদিভিঃ সংপূজ্য আদিত্য ভাস্কর রবে ভানো সূর্য্য দিবাকর। প্রভাকর নমস্তে ঽস্তু রোগাদস্মান্ প্রমোচয় ॥ ইতি ত্রিঃ পূজয়েৎ। এবং সম্বৎসরে পূর্ণে দক্ষিণাং দদ্যাৎ। ব্রাহ্মণাংশ্চ ভোজয়েৎ। বিশেষ মাসানুদ্দেশাদমাবাস্যা ব্রত বৎ মলমাসেপি ক-

ভব্যং ॥ ॥ অথ ভীষ্মাষ্টমী। অষ্টম্যাং ব্রাহ্মণঃ পিতৃ তর্পণং কৃত্বা ওঁ বৈয়াঘ্রপদ্য গোত্রায় সাঙ্কৃতি প্রবরায় চ। অপুত্রায় দদাম্যেতৎ সলিলং ভীষ্মবর্ম্মণে ॥ ইতি পিতৃবৎ ভীষ্মং তর্পয়েৎ। ততঃ কৃতাঞ্জলিঃ। ভীষ্মঃ শান্তনবো বীরঃ সত্যবাদী জিতেন্দ্রিয়ঃ। আভি রদ্ভি রবাপ্নোতু পুত্রপৌত্রোচিতাং ক্রিয়াং॥ ইত্যনেন প্রার্থয়েৎ। ক্ষত্রিয়াদিভিঃ পিতৃতর্পণাৎ পূর্ব্বং এতৎ কর্ত্তব্যং ॥ ॥ ভৈম্যা মেকাদশ্যা মুপোষ্য দ্বাদশ্যাং তিলোদ্বর্ত্তন মাবশ্যকং কর্ত্তব্যং। স্নান তর্পণ মহাদান ভোজনাদি যথালাভং স্যাৎ ॥ ॥ মাঘ পৌর্ণমাস্যাং যুগাদ্যাত্ত্বেন পার্ব্বণ বিধিনা শ্রাদ্ধং কর্ত্তব্যং। অনন্তফল কামনয়া স্নান দানঞ্চ কর্ত্তব্যং। তস্যাং দানপ্রমাণন্তু তিথিতত্ত্বে হনুসন্ধেয়ং। ইতি কৃত্যতত্ত্বং ॥ । ॥ অথ মাঘ স্নান ফলং। ব্রত দানৈ স্তপোভিশ্চ ন তথা প্রীয়তে হরিঃ। মাঘ মজ্জন মাত্রেণ যথা প্রীণাতি কেশবঃ॥ ন সমং বিদ্যতে কিঞ্চিৎ তেজঃ সৌরেণ তেজসা। তদ্বৎ স্নানেন মাঘস্য ন সমাঃ ক্রতজাঃ ক্রিয়াঃ॥ প্রীতয়ে বাসুদেবস্য সর্ব্বপাপাদ্বিমুক্তয়ে। মাঘস্নানং প্রকুর্ব্বীত স্বর্গলাভায় মানবঃ॥ কিং রক্ষিতেন দেহেন সুপুষ্টেন বলীয়সা। অধ্রুবেণাপ্ত হেযেন মাঘ স্নানং বিনা ভবেৎ ॥ মকরস্থে রবৌ যো হি ন স্নাত্যনুদিতে রবৌ। কথং পাপৈঃ প্রমুচ্যেত কথং স ত্রিদিবং ব্রজেৎ ॥ ব্রহ্মহা হেমহারী চ সুরাপো গুরুতল্পগঃ। মাঘস্নায়ী বিপাপঃ স্যাত্তৎ সংসর্গী চ পঞ্চমঃ ॥ উপপাতকানি সর্ব্বাণি পাতকানি মহান্তি চ। ভস্মীভবন্তি সর্ব্বাণি মাঘস্নায়িনি মানবে ॥ পাবকা ইব দীপ্যন্তে মাঘ স্নাতা নরোত্তমাঃ। বিমুক্তাঃ সর্ব্বপাপেভ্যো মেঘেভ্য ইব চন্দ্রমাঃ ॥ আর্দ্রং শুষ্কং লঘু স্থূলং বাঙ্মনঃ কর্ম্মভিঃ কৃতং। মাঘস্নানং দহেৎ সর্ব্বং পাবকঃ সমিধো যথা॥ প্রমাদিকঞ্চ যৎ পাপং জ্ঞানাজ্ঞান কৃতঞ্চ যৎ। স্নান মাত্রেণ তন্নশ্যেৎ মকরস্থে দিবাকরে ॥ নিষ্পাপা ত্রিদিবং যান্তি পাপিষ্ঠা যান্তি শুদ্ধতাং। সন্দেহো হত্র ন কর্ত্তব্যো মাঘস্নানে নরাধিপ ॥ সর্ব্বে হধিকারিণো হত্র বিষ্ণুভক্তৌ যথা নৃপ। সর্ব্বেষাং স্বর্গদো মাঘঃ সর্ব্বেষাং পাপ নাশনঃ ॥ এতদেব পরো মন্ত্রো হ্যেতদেব পরং তপঃ। প্রায়শ্চিত্তং পরঞ্চৈব মাঘস্নান মনু-

ত্তমং ॥ নৃণাং জন্মান্তরাভ্যাসাৎ মাঘস্নানে মতি র্ভবেৎ । অধ্যাত্মজ্ঞান কৌশল্যং জন্মাভ্যাসাদ্যথা নৃপ॥ সংসার কর্দ্দমালেপ প্রক্ষালন বিশারদং । পাবনং পাবনানাঞ্চ মাঘস্নানং পরন্তপ ॥ স্নাতা মাঘে চ যে রাজন্ সর্ব্বকাম ফলপ্রদে । তে শচ ভুঞ্জতে লোকাং শ্চন্দ্র সূর্য্য গৃহোপমান্ ॥ ইতি শ্রীপদ্মপুরাণে উত্তরখণ্ডে ৪ অধ্যায়ঃ ॥

মাঘবতী স্ত্রী পূর্ব্বদিক্ । ইতি রাজনির্ঘণ্টঃ ॥

মাঘবনং ক্লী ইন্দ্রসম্বন্ধিবস্তু । মঘবত ইদ মিত্যর্থে ষ্ণ প্রত্যযেন নিষ্পন্নং ॥ ইতি মুগ্ধবোধব্যাকরণং ॥

মাঘী স্ত্রী মঘাযুক্তাপৌর্ণমাসী । যথা । পুষ্যযুক্তা পৌর্ণমাসী পৌষী মাসে তু যত্র সা । নাম্না স পৌষো মাঘাদ্যাশ্চৈব মেকাদশাপরে ॥ ইত্যমরঃ ॥ মাঘীপূর্ণিমা । যথা । অযোধ্যাকাণ্ডে ভরত শপথে । আষাঢী কার্ত্তিকী মাঘী তিথয়ঃ পুণ্য সম্ভবাঃ । অপ্রদানবতো যান্ত যস্যার্য্যোনুমতো গতঃ ॥ বিষ্ণুধর্ম্মোত্তরে । পৌর্ণমাসী তথা মাঘী শ্রাবণী চ নরোত্তম । প্রৌষ্ঠপদ্যা মতীতাযাং তথা কৃষ্ণা ত্রয়োদশী ॥ এতাংস্তু শ্রাদ্ধকালান্ বৈ নিত্যানাহ প্রজাপতিঃ ॥ সা চ কলিযুগাদ্যা । যথা । অথ ভাদ্রপদে কৃষ্ণে ত্রয়োদশ্যান্ত দ্বাপরং । মাঘে চ পৌর্ণমাস্যাং বৈ ঘোরং কলিযুগং স্মৃতং ॥ অস্যাং কর্ম্মণো হনন্ত ফলং যথা । মাৎস্যে । শত মিন্দু ক্ষযে পুণ্যং সহস্রন্তু দিনক্ষযে । বিষুবে শতসাহস্র মা কা মা বৈষ্বনন্তকং ॥ আ কা মা বৈষু আষাঢী কার্ত্তিকী মাঘী বৈশাখীষু । ইতি তিথ্যাদিতত্ত্বং ॥ মাঘ্যাং মঘা যোগাভাবে সিংহস্থ গুরাবকাল প্রতিপ্রসবো যথা । শাতাতপঃ । মাঘ্যাং যদি মঘা নাস্তি সিংহে গুরু রকারণং ॥ রাজমার্ত্তণ্ডে দক্ষঃ । গুরৌ হরিস্থে ন বিবাহ মাহু র্হারীত গর্গ প্রমুখা মুনীন্দ্রাঃ । যদা ন মাঘী মঘসংযুতা স্যাত্তদা চ কন্যোদ্বহনং বদন্তি ॥ ইত্থঞ্চ মাঘ্যাং মঘাযোগাভাবেপি শ্রুতিবেধাদি মঘাস্থেপি গুরৌ ভবতি বিবাহস্তু গুরো মঘা পরিত্যাগাদেব । ইতি মলমাসতত্ত্বং ॥

মাঘোনী স্ত্রী পূর্ব্বাদিক্ । ইতি রাজ-

মাঙ্গল্যং ক্লী অন্দপুষ্পং । ইত্যমরঃ ॥

মাঙ্গল্যং ক্লী মঙ্গলাযহিতং । যথা ।

রাজমার্ত্তণ্ড। মাঙ্গল্যেষু বিবাহেষু কন্যা সংবরণেষু চ। দশমাসাঃ প্রশস্যন্তে চৈত্র পৌষ বিবর্জ্জিতাঃ॥ ইত্যুদ্বাহতত্ত্বং॥ অপিচ। ভীমপরাক্রমে। অধিমাসে দিনপাতে ধনুষি বরৌ ভানুলঙ্ঘিতে মাসি। চক্রিণি সুপ্তে হর্য্যাম মাঙ্গল্যং বিবাহঞ্চ॥ ইতি মলমাসতত্ত্বং॥

মঙ্গল্যার্হা স্ত্রী ত্রায়মাণালতা। ইতি রাজনির্ঘণ্টঃ॥

মাচঃ পুং পন্থাঃ। ইতি শব্দরত্নাবলী

মচ্ফলঃ পুং গ্রহঃ॥ যোগঃ॥ বন্দী॥ চৌরঃ। ইতি শব্দরত্নাবলী॥ মেদিন্যাং গ্রহস্থানেগ্রাহ ইতি পাঠঃ॥

মাচিকা স্ত্রী মক্ষিকা। ইতি ত্রিকাণ্ডশেষঃ॥ অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ

মাচিরং ব্য শীঘ্রং। যথা। অথাব্রবীত্তদা মৎস্যস্তানৃষীন্ প্রহসন্ শনৈঃ। অস্মিন্ হিমবতঃ শৃঙ্গে নাবং বধ্নীত মাচিরং॥ ইতি বনপর্ব্বণি মাৎস্যোপাখ্যানং॥

মাচীপত্রং ক্লী সুরপর্ণং। ইতি রাজনির্ঘণ্টঃ॥

মাজলঃ পুং চাসপক্ষী। যথা। মাজল শ্চাসকঃ হৃদ্রো বিহারো বিন্দুরেথকঃ। ইতি শব্দচন্দ্রিকা॥

মাঙ্গিষ্ঠং ক্লী লোহিতবর্ণঃ। তদ্বতি ত্রি। ইতি হেমচন্দ্রঃ॥

মাটামুকঃ পুং বৃক্ষভেদঃ। যথা। বৃক্ষী কর্কটীর্ব্বাকঃ সেটু মাটামুকৌ সমৌ। ইতি ভূরিপ্রয়োগঃ॥

মাঠরঃ পুং সূর্য্যপার্শ্বপরিবর্ত্তিবিশেষঃ। যথা। মাঠরঃ পিঙ্গলো দণ্ড শ্চণ্ডাংশোঃ পারিপার্শ্বিকাঃ। ইত্যমরঃ॥ মঠতি নিবসতি সূর্য্যসমীপে মাঠরঃ মঠ বাস মর্দ্দযোঃ নাম্নীতি অরণ্ মঠরস্যাপত্যং মাঠর ইতি স্বামী। পিঙ্গলবর্ণত্বাৎ পিঙ্গলঃ। দণ্ডকারিত্বাদ্দণ্ডঃ। ইতি স্বামী। পরিতঃ পার্শ্বে বর্ত্তন্তে পারিপার্শ্বিকাঃ ন্যেকাদিতি ফিকঃ। সূর্য্যঃ কারুণিকত্বাদ্দৈত্যানাং বরং দাস্যতীতি ধিয়া ইন্দ্রাদযোঽষ্টাদশ নামান্তরেণ প্রচ্ছন্না অস্য পার্শ্বেষু স্থিতাঃ। অত্র প্রাধান্যাৎত্রয়ো অভিহিতাঃ। অত্র মাঠরনামা যমঃ। পিঙ্গলনামা বহ্নিঃ। দণ্ডনামা শক্রঃ। তথাচাগমঃ। তত্র শক্রো বামপার্শ্বে দণ্ডাখ্যো দণ্ডনায়কঃ। বহ্নিস্তু দক্ষিণে পার্শ্বে পিঙ্গলো নামতশ্চ সঃ॥ যমোপি দক্ষিণেপার্শ্বে খ্যাতো মাঠর সংজ্ঞকঃ। এব মপরে হর গুহাদযঃ অন্যেপি পক্ষ্যাদি সংজ্ঞকাঃ পূর্ব্বদ্বারাদিষু

স্থিতাঃ। ইতি তট্টীকায়াং ভরতঃ ॥ ... ব্যাসঃ। ইতি মেদিনী ॥ বিপ্রঃ। ইতি ...ত্তিকঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ

মাড়ঃ পুং বৃক্ষবিশেষঃ। মাড়বৈনৌ ইতি কোকণে প্রসিদ্ধঃ। তৎপর্য্যায়ঃ। মাড়াক্রমঃ ২ দীর্ঘঃ ৩ ধ্বজবৃক্ষঃ বিতানকঃ ৫ মদ্যদ্রুমঃ ৬। অস্য গুণাঃ। মোহকারিত্বং। শ্রমহরত্বং। শ্লেষ্মকারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মাড়বঃ পুং বর্ণসঙ্করজাতিবিশেষঃ। যথা। লেট তীবরকন্যায়াং জনয়ামাস যন্ত্রণাম্‌। মাল্লং মল্লং মাতরঞ্চ ভড়ং কোলঞ্চ কন্দরং ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১০ অধ্যায়ঃ ॥ পুস্তকান্তরে মাড়বস্থানে মাতর ইতি পাঠঃ। কন্দর স্থানে কলন্দর ইতি পাঠঃ ॥

মাড়ুকঃ পুং মাড়ুকিকঃ। মড়ুবাদকঃ। ইতি সিদ্ধান্তকৌমুদী ॥

মাটিঃ স্ত্রী দেহভেদঃ ॥ পত্রশিরা। ইতি রত্নকোষঃ ॥ দন্তভেদঃ। ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ ॥ পত্রভঙ্গং ॥ দৈন্যপ্রকাশনং। ইতি মেদিনী শব্দরত্নাবল্যৌ ॥ মাটি দৈন্যং পত্রশিরার্চা মূচ স্তন্দিতে জড়ে। ইতি হেমচন্দ্রঃ ॥

মাটী স্ত্রী দন্তশিরা। ইতি শব্দরত্নাবলী ॥

মাণকং ক্লী কন্দবিশেষঃ। মাণকচু ইতি ভাষা। অস্য গুণাঃ। স্বাদুত্বং। শীতত্বং। গুরুত্বং। শোথহরত্বং। কটুত্বঞ্চ। ইতি রাজবল্লভঃ ॥

মাণকঃ পুং স্বনামখ্যাতবৃক্ষঃ। মাণকচুগাছ ইতি ভাষা। তৎপর্য্যায়ঃ। স্থলপদ্মঃ ২। ইতি রত্নমালা ॥ মাণঃ ৩। বৃহচ্ছদঃ ৪ ছত্রপত্রঃ ৫। ইতি কেচিৎ ॥

মাণবঃ পুং মনুষ্যঃ ॥ বালকঃ। ইতি শব্দরত্নাবলী ॥ ষোড়শযষ্টিকহারঃ। ইতি হেমচন্দ্রঃ ॥

মাণবকঃ পুং বালকঃ। স চ ষোড়শবর্ষপর্য্যন্ত প্রথমবয়স্কঃ ॥ হারভেদঃ। স তু বিংশতি যষ্টিকঃ। বিশনরহার ইতি ভাষা। ইত্যমর ভরতৌ ॥ কুপুরুষঃ। ইতি মেদিনী ॥ বটুঃ। ইতি হেমচন্দ্রঃ ॥

মাণবীনং ত্রি মাণবসম্বন্ধি। মাণবস্যেদ মিত্যর্থে খীন প্রত্যয়েন নিষ্পন্নং ॥

মাণব্যং ক্লী শিশুসমূহঃ। ইত্যমরঃ ॥ মাণবানাং সমূহো মাণব্যং বিকার সংঘেতি ঞ্যঃ। মাণবো বালঃ মূর্দ্ধন্য মধ্যঃ দন্ত্যমধ্য ইত্যেকে। ইতি

তণ্ডীকায়া° ভরতঃ ॥

মাণিকা স্ত্রী অষ্টপলপরিমাণ° । ইতি শব্দমালা ॥

মাণিক্য° ক্লী রত্নবিশেষঃ। মাণিক্ ইতি ভাষা। তৎপর্য্যায়ঃ। শোণ রত্ন° ২ রত্নরাট্ ৩ রবিরত্নক° ৪ শৃঙ্গারী ৫ রঙ্গমাণিক্য° ৬ তরুণ° ৭ রত্ননায়ক° ৮ রাগযুক্ ৯ পদ্মরাগঃ ১০ রত্ন° ১১ শোণোপলঃ ১২ সৌগন্ধিক° ১৩ লোহিতক° ১৪ কুরুবিন্দ° ১৫। অস্য গুণাঃ। মধুরত্ব°। স্নিগ্ধত্ব°। বাতপিত্ত নাশিত্ব°। রত্নপ্রয়োগে প্রধানত্ব°। ক্ষয়-রসায়ন কারিত্বঞ্চ ॥ তস্য লক্ষণ° যথা। স্নিগ্ধ° গুরুগাত্রযুত° দীপ্ত° স্বচ্ছ° সমাঙ্গঞ্চ সুরঙ্গদঞ্চ। ইতি জাত্যমাণিক্য° কল্যাণ° ধারণাৎ কুরুতে॥ * ॥ তস্য দোষো যথা। দ্বিছায় মভ্রপিহিত° কর্কশ° শার্করিল° ভিন্ন° ধূম্রঞ্চ। বিরূপ° রাগ বিমল° লঘুমাণিক্য° ন ধারয়েদ্ধীমান্॥ * ॥ তস্য চতুর্বিধা জাতি যথা। তদুক্ত° যদি পদ্মরাগ মথ তৎ পীতাতি রক্ত° দ্বিধা জানীয়াৎ কুরুবিন্দক° যদরুণ° স্যাদেষ সৌগন্ধিক°। তন্নীল° যদি নীলগন্ধিক মিতি জ্ঞেয়° চতুর্ধা বুধৈ র্মাণিক্য° কষ ঘর্ষণে হৃপ্যবিকল° রাগেণ জাত্য° গুণৈঃ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ মতান্তরে তস্য দোষা যথা। মাণিক্যস্য সমাখ্যাতা অষ্টৌ দোষা মনীশ্বরৈঃ। দ্বিছায়ঞ্চ দ্বিরূপঞ্চ সভেদঃ কর্করস্তথা ॥ অশোভন° কোকিলঞ্চ জল° ধূম্রাভিধঞ্চ বৈ। গুণাশ্চত্বার আখ্যাতা ছায়াঃ ষোড়শ কীর্ত্তিতাঃ ॥ ছায়াস্তু পূর্ব্বোক্তা এব তাস্তু পদ্মরাগ শব্দে দ্রষ্টব্যাঃ। ছায়া দ্বিতয় সম্বন্ধাদ্দিছায়° বন্ধুনাশন°। দ্বিরূপ° দ্বিপদ° তেন মাণিক্যে ন পরাভবঃ॥ সভেদো ভিন্ন মিত্যুক্ত° শস্ত্রঘাত বিধায়ক°। কর্কর° কর্করাযুক্ত° পশু বন্ধু বিনাশকৃৎ ॥ দুগ্ধেনেব সমালিপ্ত ময়নীপুট মুচ্যতে। অশোভন° সমদ্দিষ্ট° মাণিক্য° বহু দুঃখকৃৎ ॥ মধুবিন্দু সমচ্ছায়° কোকিল° পরিকীর্ত্তিত°। আয়ু র্লক্ষ্মী যশো হন্তি সদোষ° তন্ন ধারয়েৎ ॥ রাগ হীন° জল° প্রোক্ত° ধন ধান্যাপবাদকৃৎ। ধূম্র° ধূম সমাকার° বৈদ্যুত° ভয মাবহেৎ॥ তথা। শোভাদ্বিতয়বন্তো যে মণয়ঃ ক্ষতি কারকাঃ। উভয়ত্র পদ° যেষা° তেন চ স্যাৎ পরাভবঃ॥ ভিন্নেন যুদ্ধে মৃত্যুঃ স্যাৎ কর্কর স্কন্ধ নাশকৃৎ। দুগ্ধেনেব সমালিপ্তঃ পুটকে যস্ত সম্ভবেৎ ॥ দুঃখ-

কুৎসিতম্মাথ্যাতো ন নৃপে রক্ষণীয়কঃ। নবারবিন্দ সমা শোভা কোকিলানাং প্রকীর্ত্তিতা ॥ তেষাঞ্চ বহু ভেদাঃ স্যু র্ন তে ধার্য্যাঃ কদাচন ॥ অথ গুণাঃ। গুরুত্বং স্নিগ্ধতা চৈব বৈমল্য মতিরক্ততা। তথাচ। বর্ণাধিক্যং গুরুত্বঞ্চ স্নিগ্ধতা চ তথা। স্বচ্ছিমত্তা মহত্তা চ মণীনাং গুণসংগ্রহঃ ॥ ফলং। যে কর্করা শ্চিদ্রমযোপদিগ্ধাঃ প্রভা বিমুক্তাঃ পরুষা বিবর্ণাঃ। নতে প্রশস্তা মণযো ভবন্তি সমাসতো জাতি গুণৈঃ সমস্তৈঃ ॥ দোষোপসৃষ্টং মণি মপ্রবোধাদ্বিভর্ত্তি যঃ কশ্চন কশ্চিদেকং। তস্য শত্রু দুঃখামর বন্ধু বিত্ত নাশাদযো দোষগণা ভজন্তে ॥ সপত্ন মধ্যে হপি কৃতাধিবাসং প্রমাদ বৃত্তাবপি বর্ত্তমানং। ন পদ্মরাগস্য মহাগুণস্য ভর্ত্তার মাপৎ সমুপৈতি কাচিৎ। দোষোপসর্গ প্রভবাশ্চ যে তেনোপদ্রবাস্তং সমভিদ্রবন্তি। গুণৈঃ সমুথ্যৈঃ সকলৈ রূপেতং যঃ পদ্মরাগং প্রযতো বিভর্ত্তি॥ বালার্ক করসংস্পর্শাৎ তাংবর্ণৈঃ। রঞ্জয়েৎ দাপরম্যাপি স মহাগুণ উচ্যতে॥ দুগ্ধে শতগুণে ক্ষিপ্তো রঞ্জয়েদ্যঃ সমন্ততঃ বর্ণেচ্ছিথাং লোহিতাশ্বা পদ্মরাগঃ স উত্তমঃ॥ অন্ধকারে মহাঘোরে যো ন্যস্তঃ সন্ মহামণিঃ। প্রকাশয়তি সূর্য্যাভঃ স শ্রেষ্ঠঃ পদ্মরাগকঃ॥ পদ্মকোষে তু যো ন্যস্তো বিকাশয়তি তৎ ক্ষণাৎ। পদ্মরাগ বরো হ্যেষ দেবানামপি দুর্লভঃ॥ সর্ব্বরিষ্ট প্রশমনাঃ সর্ব্বসম্পত্তি দাযকাঃ। চত্বারস্ত ময়োদ্দিষ্টা গুণিনশ্চ যথোত্তরং॥ যো মণি দৃশ্যতে দুরাজ্জ্বলদগ্নি সমচ্ছবিঃ। বংশ কান্তিঃ স বিজ্ঞেয়ঃ সর্ব্ব সম্পত্তিদাযকঃ॥ পঞ্চ সপ্ত নব বিংশতি সন্থতেপি সকলঃ খলু রত্নে। বর্জযেদ্বমতি বা করজালং উত্তরোত্তর মহাগুণিনস্তে॥ নীলীরসং দুগ্ধরসং জলং বা যে রঞ্জযন্তি দ্বিশত প্রমাণং। তে তে যথাপূর্ব্ব মতি প্রশস্তাঃ সৌভাগ্য সম্পত্তি বিধানদাযকাঃ॥ গুঞ্জাফল প্রমাণস্তু দশ সপ্ত ত্রি গুঞ্জকান্। পদ্মরাগ স্তুলযতি যথা পূর্ব্বং মহাগুণঃ॥ ক্রোষ্টকোল ফলাকারো দ্বাদশাষ্টাব্দি গুঞ্জকান্। পদ্মরাগ স্তুলযতি যথা পূর্ব্বং মহাগুণঃ॥ বদরী ফল তুল্যো যঃ স্বর দিগ্ সু মাসকঃ। তথা ধাত্রীফল ত্রিংশৎ বিংশতিদ্ব্যষ্টমাসকঃ। তথাক্ষ ফল তুল্যো যো বহ্নিপক্ষৈকমাসকঃ। তাম্বূল ফলমানো য শ্চতুস্ত্রি দ্বিক তোলকঃ॥ বিম্বীফল সমা-

 মাণিক্য

কারো বসু ষড়ংশে তোলকঃ। অতঃ পরং প্রমাণেন মানেন চ ন লভ্যতে॥ যদি লভ্যেত পুণ্যেন তদা সিদ্ধি মবাপ্নুয়াৎ। কেচিচ্চার তরাঃ সন্তি জাত্যানাং প্রতিরূপকাঃ॥ বিজাতয়ঃ প্রযত্নেন সিদ্ধা স্তা মূল্য মাহরেৎ। কাঙ্কলকাঃ সিংহল দেশোত্থ মুক্তমালীয়াঃ। শ্রীপর্ণিকাশ্চ সদৃশা বিজাতয়ঃ পদ্মরাগাণাং॥ তুষোপ লঙ্কাদ্দলনাভিধানং মণিঃ স্বভাবাদপি তুরুকণ্ঠঃ। কাকাস্তথা সিংহল দেশ জাতে মুক্তাভিধানং নভসঃ স্বভাবাৎ। শ্রীপর্ণকং দীপ্তি নিরাকৃতিত্বাদ্বিজাতি লিঙ্গাশ্রয় ভেদ এবং॥ *॥ তথাচ। স্নেহ প্রদেহো মৃদুতা লঘুত্বং বিজাতি লিঙ্গং খলু সার্বজন্যং। যঃ শ্যামিকাং পুষ্যতি পদ্মরাগো যো বা তুষাণামিব চূর্ণ মধ্যঃ॥ স্নেহ প্রদিগ্ধো নচ যো বিভাতি যো বা প্রমৃষ্টঃ প্রজহাতি দীপ্তিং। আক্রান্ত মূর্দ্ধা চ তথাঙ্গুলিভ্যাং যঃ কালিকাং পার্শ্বগতাং বিভর্ত্তি॥ সংপ্রাপ্য তার্ক্ষ্যোপি পথং স্ববৃত্তং বিভর্ত্তি যঃ সর্ব্ব গুণানতীব। তুল্য প্রমাণস্য চ তুল্যজাতে র্যো বা গুরুত্বেন ভবেন্ন তুল্যঃ॥ প্রাপ্যাপি নানাকর দেশজাতং জ্ঞাত্বা বুধো জাতি গুণেন লক্ষেৎ। অপুণশ্যতি সন্দেরাজাব্লি-লাযাং পরিঘর্ষযেৎ। ঘৃষ্টস্য দোষা শোভমানান্ প্রয়িসাণং ন মুখবিষ্ঠো স জ্ঞেয়ঃ শুদ্ধজাতিস্তু জ্ঞেয়া শ্চান্যে বিজাতয়ঃ। স্বজাতকং সংমুখেন বিলিখেদ্বা পরস্পরং॥ বজ্রং বা কুরুবিন্দং বা বিমুচ্যান্যোন্যকেনচেৎ॥ ন শক্যং লেখনং কর্ত্তুং পদ্মরাগেন্দ্রনীলযোঃ। গুণোপপন্নেন সহাববদ্ধে মণিস্তু জাত্যো বিগুণেন জাত্যঃ। সুখ ন ধার্য্যাদপি কৌস্তুভেন বিদ্বান্ বিজাতিং ন ভূষাদ্বধ স্তং॥ চণ্ডাল একোপি তথা ভজাতান্ সমেত্য দূরান্ দূষয়তি যত্নাৎ। তথা মণীন্ ভূরি গুণোপপন্নান্ শক্তো হতিবিদ্যাবধিতুং বিজাতঃ॥ *॥ অথ মূল্যং। বালার্কাভিমুখং কৃত্বা দর্পণে ধারয়েন্মণিং। তত্র কান্তি বিভাগেন ছায়া ভাগং বিনির্দ্দিশেৎ॥ বজ্রস্য যত্তুল সংখ্যযোক্তং মূল্যং সমস্তাপিত গৌরবস্য। তৎ পদ্মরাগস্য গুণান্বিতস্য স্যান্মাষকাখ্যা তুলিতস্য মূল্যং॥ যন্মূল্যং পদ্মরাগস্য সগুণস্য প্রকীর্ত্তিতং। তাবন্মূল্যং তদা শুদ্ধে কুরুবিন্দে বিধীয়তে॥ সগুণে কুরুবিন্দে চ যাবন্মূল্যং প্রকীর্ত্তিতং। তাবন্মূল্যং চতুর্থাংশ হীনং স্যাদ্ধে

কৃষ্ণলঃ ॥ যাবন্মূল্যং সমাখ্যাতং কঃ। মধ্যা চ সূরিভিঃ। তাবন্মূল্যন্থাংশং হীনং শদুদ্রব্যাপি ॥ পদ্মরাগঃ পণং যস্তু ধত্তে লাক্ষারসপ্রভঃ। কার্ষাপণ সহস্রাণি ত্রিংশন্মূল্যং লভেত সঃ ॥ ইন্দ্রগোপক সঙ্কাশঃ কর্ষত্রয় ধৃতো মণিঃ। দ্বাবিংশতি সহস্রাণি তস্য মূল্যং বিনির্দ্দিশেৎ ॥ একোনো নযতে যস্তু যবা ন্সূন সম্মিতঃ। কার্ষাপণ সহস্রাণি তস্য মূল্যং চতুর্দ্দশ ॥ বালাদিত্য দ্যুতি নিভঃ কর্ষং যস্তু প্রতুল্যতে। কার্ষাপণ শতানাস্তু মূল্যং সদ্ভিঃ প্রকীর্ত্তিতং ॥ যস্তু দাড়িম পুষ্পাভঃ কর্ষার্দ্ধেন তু সম্মিতঃ। কার্ষাপণ শতানাস্তু বিংশতিং মূল্যমাদিশেৎ ॥ চত্বারো মাষকা যস্ত রক্তোৎপল-দল প্রভঃ। মূল্যং তস্য বিধাতব্যং সূরিভিঃ শতপঞ্চকং ॥ দ্বিমাষকো-যস্তু গুণৈঃ সর্ব্বৈরেব সমন্বিতঃ। তস্য মূল্যং বিধাতব্যং দ্বিশতং তত্ত্ববেদি-ভিঃ ॥ মাষৈকৈক মিতো যস্তু পদ্মরাগো গুণান্বিতঃ। প্রত্যেক সম্মিতং বাচ্যং মূল্যং রত্ন বিচক্ষণৈঃ ॥ অতো ন্যূনপ্রমাণাস্তু পদ্মরাগা গুণোত্তরাঃ। স্বর্ণ দ্বিগুণ মূল্যেন মূল্যং তেষাং প্রকল্পয়েৎ ॥ কার্ষাপণঃ সমাখ্যাতঃ

পুরাণ দ্বয় সম্মিতঃ। অন্যে হংসমুস্ত পানীয মঞ্জিষ্ঠোদক সন্নিভাঃ॥ কাষায়া ইতি বিখ্যাতাঃ স্ফটিক প্রভবাশ্চতে। তেষাং দোষো গুণো বাপি পদ্মরাগ বদাদিশেৎ॥ মূল্য মপ্যস্ত বিজ্ঞেয়ং ধারণে হল্পফলং তথা। ব্রহ্মক্ষত্রিয় বৈশ্যান্ত্যা শ্চতুর্দ্ধা যে প্রকীর্ত্তিতাঃ॥ চতুর্বিধৈর্নৃপতিভি র্ধার্য্যাঃ সম্পত্তি হেতবে। অতো হন্যথা ধৃতঃ হর্ষ্যাদ্রোগ শোক ভয ক্ষযং ॥ ইতি যুক্তিকল্পতরুঃ ॥

মাণিক্যা স্ত্রী। জ্যেষ্ঠী। তৎপর্য্যাযঃ। মুষলী ২ গৃহগোধিকা ৩ গৃহগোলিকা ৪ ভিত্তিকা ৫ পল্লী ৬ হড্ডমৎস্যঃ ৭ গৃহোলিকা ৮। ইতি হেমচন্দ্রঃ ॥

মাণিবন্ধং ক্লী সৈন্ধবলবণং। ইত্যমর টীকাযাং স্বামী ॥

মাণিমন্থং ক্লী সিন্ধুজলবণং। ইত্যমরঃ ॥

মাতঙ্গঃ পুং হস্তী। ইত্যমরঃ ॥ অশ্বত্থবৃক্ষঃ॥ কিরাতজাতিবিশেষঃ। ইতি ভটীকাযাং ভরতেশঃ ॥ শ্বপচঃ। ইতি মেদিনী॥ অর্হদুপাসকবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

মাতঙ্গমকরঃ পুং মহামৎস্যভেদঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাতঙ্গী স্ত্রী দশমহাবিদ্যান্তর্গতনবমবিদ্যা। অথ মাতঙ্গীমন্ত্রঃ। বামকেশ্বরতন্ত্রে। অথ বক্ষ্যে মহাদেবীং মাতঙ্গীং সর্ব্বসিদ্ধিদাং। অস্যোপাসনমাত্রেণ বাক্ সিদ্ধিং লভতে ধ্রুবং॥ প্রণবঞ্চ ততো মায়াং কামবীজঞ্চ কূর্চ্চকং। মাতঙ্গী ঙেযুতা চাস্ত্রং বহ্নিজায়া বধির্ম্মনুঃ॥ ঋষিঃ স্যাদ্দক্ষিণামূর্ত্তি র্বিরাট্ ছন্দঃ প্রকীর্ত্তিতং। মাতঙ্গী দেবতা দেবী সর্ব্বসিদ্ধিপ্রদায়িনী॥ অঙ্গন্যাস করন্যাসৌ কুর্য্যান্মন্ত্রী সমাহিতঃ। ষড্দীর্ঘভাজা বীজেন প্রণবাদ্যেন কল্পয়েৎ॥ ষট্কোণাষ্টদলং পদ্মং লিখেদ্যন্ত্রং মনোরমং। তত্র পূজা প্রকর্ত্তব্যা জবাপুষ্পেণ মন্ত্রবিৎ॥ অষ্টশক্তী শ্চাষ্টদলে পূজয়েৎ সুসমাহিতঃ। রতিঃ প্রীতি র্মনোভবা ক্রিয়া শুদ্ধা চ শক্তয়ঃ॥ অনঙ্গ অনঙ্গকুসুমানঙ্গমদনা মদনালসা। ইত্যষ্টশক্তীঃ সংপূজ্য উপহার সমন্বিতঃ॥ ততো দেবীং পরাং ধ্যায়েৎ সাধকঃ স্থির মানসঃ। শ্যামাঙ্গীং শশিশেখরাং ত্রিনয়নাং রত্নসিংহাসনস্থিতাং॥ বেদৈ র্বাহুদণ্ডৈ রসিখেটকপাশাঙ্কুশধরাং। এবং ধ্যাত্বা মহাদেবীং গন্ধপুষ্পৈ র্মনোরমৈঃ॥ নৈবেদ্যৈশ্চ মহাদেব্যৈ সর্জ্জরস শর্করান্বিতং। পুরশ্চরণে দোষা ষট্সহস্রং মনুং জপেৎ॥ তদ্দশাংশং হুনেদাজ্যৈঃ শর্করা মধুভিঃ সহ। বৃক্ষবৃক্ষোদ্ভবৈঃ কাষ্ঠৈঃ সাধকঃ শক্তিভিঃ সহ॥ এবং পুরস্ক্রিয়াং কৃত্বা প্রয়োগ বিধি মাচরেৎ। চতুষ্পথে শ্মশানে বা কন্যামধ্যে চ মান্ত্রিকঃ॥ মৎস্যং মাংসং পায়সঞ্চ দদ্যাদ্ধূপঞ্চ গুগ্গুলুং। রাত্রিযোগেন কর্ত্তব্যং সদা পূর্ণশ্চ সাধকঃ॥ এবং প্রয়োগ মাত্রেণ কবিতা জায়তে ধ্রুবং। অগ্নিস্তম্ভং জলস্তম্ভং বায়ুস্তম্ভং কারয়েৎ ধ্রুবং॥ মন্ত্রী জয়তি শত্রুংশ্চ তার্ক্ষ্যো ভোগিকুলং যথা। শাস্ত্রে বাদে কবিত্বে চ বৃহস্পতি রিবাপরঃ॥ অনেনৈব বিধানেন মাতঙ্গী সিদ্ধিদায়িনী। নূনং তদ্গৃহ মাগত্য সর্ব্বৈ র্দীয়তে বরং॥ বিনা মৎস্যৈ র্বিনা মাংসৈ র্নাচরেৎ পরদেবতাং। ইতি তন্ত্রসারঃ॥

মাতরপিতরৌ পুং মাতাপিতৃজনয়িত্র্যৌ। মাতৃপিত্রোর্দ্বিবচনান্তৌ। ইত্যমরঃ॥

মাতরিশ্বা পুং বায়ুঃ। ইত্যমরঃ॥

মাতলিঃ পুং ইন্দ্রসারথিঃ। ইত্য

স্ত্রী নাম্যতেপূজ্যতে যা সা । কৃপণী কঃ । নর্ধ্বাজ্ঞায়াং নাম্নীতি ডাতৃঃ । ন্যস্ত ভরস্তং ॥ মা ইতি ভাষা । তৎপর্য্যায়ঃ । জনয়িত্রী ২ প্রসূঃ ৩ জননী ৪ । ইত্যমরঃ ॥ সবিত্রী ৫ জনিঃ ৬ জনী ৭ জনিত্রী ৮ অক্কা ৯ অম্ব ১০ অম্বিকা ১১ অম্বালিকা ১২ ইতি শব্দরত্নাবলী ॥ মাতৃকা ১৩ । ইতি জটাধরঃ ॥ * ॥ ষোড়শ প্রকারা মাতরো যথা । স্তনদাত্রী গর্ভধাত্রী ভক্ষ্যদাত্রী গুরুপ্রিয়া । অভীষ্টদেবপত্নী চ পিতুঃ পত্নী চ কন্যকা ॥ সগর্ভজা যা ভগিনী পুত্রপত্নী প্রিয়াপ্রসূঃ । মাতুর্মাতা পিতুর্মাতা সোদরস্য প্রিয়া তথা ॥ মাতুঃ পিতুশ্চ ভগিনী মাতুলানী তথৈব চ । জনানাং বেদবিহিতা মাতরঃ ষোড়শ স্মৃতাঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে কার্ত্তিকেয় সংবাদে ১৫ অধ্যায়ঃ ॥ * ॥ তস্যা গৌরবং যথা । জনকো জন্মদানাৎ পালনাচ্চ পিতা স্মৃতঃ । গরীয়ান্ জন্মদাতশ্চ সোঽন্নদাতা পিতা মনে ॥ বিনাঽন্নমশ্বস্নো দেহো নিত্যঃ পিতৃকস্তবঃ । তয়োঃ শতগুণং মাতা পূজ্যা মান্যা চ বন্দিতা । গর্ভধারণপোষাভ্যাং সা চ তাভ্যাং গরীয়সী । ইতি তত্রৈব ৪০ অধ্যায়ঃ ॥ * ॥ অপিচ । স গুরুর্যঃ ক্রিয়াঃ কৃত্বা বেদমস্মৈ প্রযচ্ছতি । উপনীয় দদদ্বেদমাচার্য্যঃ স প্রকীর্ত্তিতঃ ॥ একাদশ উপাধ্যায়াশ্চর্ত্বিগ্‌যজ্ঞকৃদুচ্যতে । এতে মান্যা যথা পূর্ব্বমেভ্যো মাতা গরীয়সী ॥ ইতি গারুড়ে ৯৪ অধ্যায়ঃ ॥ * ॥ অন্যচ্চ । ন পিতুর্ব্বচনং কার্য্যং যথা মাতুঃ সুতেন হি । পিতা চ পতিতস্ত্যাজ্যো ন মাতা সৎসুতেন হি ॥ গর্ভধারণপোষাভ্যাং অতো মাতা গরীয়সী । দশ বপ্যাদুপাধ্যায়ো গৌরবেণাতিরিচ্যতে ॥ তেভ্যঃ পিতা দশভ্যস্তু মাতা চৈব গরীয়সী । মাতৃতো হন্যো ন দেবোঽস্তি তস্মাৎ পূজ্যা সদা সুতৈঃ ॥ মাতুশ্চ যাদ্ধতং কিঞ্চিৎ কুরুতে ভক্তিতঃ পুমান্ । তদ্ধর্ম্মং হি বিজানীয়াদেবং ধর্ম্মবিদো বিদুঃ ॥ ইতি বহ্নিপুরাণং ॥ * ॥ অপরঞ্চ । গুরূণামপি সর্ব্বেষাং পূজ্যাঃ পঞ্চ বিশেষতঃ । তেষামাদ্যাস্ত্রয়ঃ শ্রেষ্ঠাস্তেষাং মাতা সুপূজিতা ॥ যো ভাবয়তি যা সূতে যেন বিদ্যোপদিশ্যতে । জ্যেষ্ঠভ্রাতা চ ভর্ত্তা চ পঞ্চৈতে গুরবঃ স্মৃতাঃ ॥ আত্মনঃ সর্ব্বযত্নেন প্রাণত্যাগেন বা পুনঃ । পূজনীয়া বিশেষেণ

পক্ষেতে ভূতি মিছুতা ।। যাবৎ পিতা চ মাতা চ যাবেতৌ নির্ব্বিকারিণৌ । তাবৎ সর্ব্বং পরিত্যজ্য পুত্রঃ স্যাত্তৎপরায়ণঃ ।। পিতা মাতা চ সুপ্রীতৌ স্যাতাং পুত্র গুণৈ র্যদি । স পুত্রঃ সকলং ধর্ম্মং প্রাপ্নুযাত্তেন কর্ম্মণা ।। নাস্তি মাতৃ সমং দৈবং নাস্তি পিতৃ সমো গুরুঃ । তযোঃ প্রত্যুপকারোপি ন কথঞ্চন বিদ্যতে ।। তযো র্নিত্যং প্রিযং কুর্য্যাৎ কর্ম্মণা মনসাপি বা । ন তাভ্যা মননুজ্ঞাতো ধর্ম্মমন্যং সমাশ্রযেৎ ।। ইতি কৌর্ম্মে উপরিভাগে ১১ অধ্যাযঃ ।। ✽ ।। মাতৃ শব্দসম্বোধযা মাতৃতুল্যত্বং যথা । মাতরিত্যেব শব্দেন যাঞ্চ সংভাষ্যতে নরঃ । সা মাতৃতুল্যা সত্যেন ধর্ম্মঃ সাক্ষী সতামপি ।। তযা সহিত শৃঙ্গারে কালসূত্রং প্রযাতি সঃ । তত্র ঘোরে বসত্যেব যাবদ্দৈব ব্রহ্মণো বযঃ ।। প্রাযশ্চিত্তং পাপিনশ্চ তস্য নৈব শ্রুতৌ শ্রুতং । ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ১০ অধ্যাযঃ ।। ✽ ।। শিবস্য পরিবারবিশেষঃ । স চ অসুর মারণে ব্রহ্মাদীনাং দেহ নির্গতত্বাৎ অষ্টশক্তিদেবতারূপো যথা । ব্রাহ্মী মাহেশ্বরী চৈন্দ্রী বারাহী বৈষ্ণবী তথা । কৌমারী চৈব চামুণ্ডা চর্চ্চিকেত্যষ্ট মাতরঃ ।। সপ্তমাতরো যথা । ব্রাহ্মী চ বৈষ্ণবী রৌদ্রী বারাহী নারসিংহিকা তথা । কৌবেরী চ কৌমারী মাতরঃ সপ্ত কীর্ত্তিতাঃ ।। ইত্যমরটীকাযাং ভরতঃ ।। ✽ ।। গৌর্য্যাদিষোড়শমাতৃকাঃ । যথা । গৌরী পদ্মা শচী মেধা সাবিত্রী বিজযা জযা । দেবসেনা স্বধা স্বাহা মাতরো লোকমাতরঃ ।। শান্তিঃ পুষ্টি র্ধৃতি স্তুষ্টি রাত্মদেবতযা সহ । আদৌ বিনাযকঃ পূজ্যো অন্তে চ কুলদেবতা ।। ইতি শ্রাদ্ধতত্ত্বধৃত চণ্ডীপরিশিষ্টং ।। ✽ ।। বৈষ্ণব পূজ্য মাতৃগণা যথা । তত্র মাতৃগণাঃ পূজ্যা স্তত্র স্থে তাঃ প্রপূজযেৎ ।। সদা ভাগবতী পৌর্ণমাসী পদ্মান্তরঞ্জিকা । গঙ্গা কলিঙ্গতনযা গোপী বৃন্দাবতী তথা । গাযত্রী তুলসী বাণী পৃথিবী গাশ্চ বৈষ্ণবীঃ । শ্রীযশোদা দেবহূতী দেবকী রোহিণী মুখাঃ । শ্রীসীতা দ্রৌপদী কুন্তী হুপত্ন্যো যা মহর্ষযঃ । রুক্মিণ্যাদ্যা স্তথা চাষ্ট মহিষীর্যাশ্চ তা অপি ।। ইতি পাদ্মে উত্তরখণ্ডে ৭৮ অধ্যাযঃ ।। ✽ ।। সপ্তমাতরো যথা । আদৌ মাতা গুরোঃ পত্নী ব্রাহ্মণী রাজপত্নিকা । গাবী ধাত্রী তথা পৃথ্বী সপ্তৈতা মাতরঃ স্মৃতাঃ ।।

কুত্রচিৎ পঠিতং ॥ ✽ ॥ মাতৃকঃ। মধ্যা ইথা। মাতৃষ্বসা মাতুলানী পিতৃব্যস্ত্রী পিতৃষ্বসা। শ্বশ্রূঃ পূর্ব্বজপত্নী চ মাতৃতুল্যাঃ প্রকীর্ত্তিতাঃ ॥ ইতি দায়ভাগঃ ॥ ✽ ॥ গৌঃ ॥ ভূমিঃ। ইতি মেদিনী ॥ বিভূতিঃ। ইতি শব্দরত্নাবলী ॥ লক্ষ্মী। ইতি হেমচন্দ্রঃ ॥ রেবতী ইত্যজয়পালঃ ॥ আখুকর্ণী ॥ ইন্দ্রবারুণী ॥ মহাশ্রাবণী ॥ জটামাংসী। ইতি রাজনির্ঘণ্টঃ ॥ পরিমাণকর্ত্তরি ত্রি। অস্মিন্নর্থে পরিমাণার্থ মা ধাতোঃ কর্ত্তরি তৃন্ প্রত্যয়েন নিষ্পন্নঃ ॥

মাতা স্ত্রী জননী। যথা। বিশ্বেশ্বরী বিশ্বমাতাং চণ্ডিকাং প্রণমাম্যহং। ইতি শিবরহস্যে দুর্গাস্তব দর্শনাৎ আবন্তোয়ং শব্দঃ ॥

মাতাপিতরৌ পুং জননীজনকৌ। তৎপর্য্যায়ঃ। পিতরৌ ২ মাতরপিতরৌ ৩ মাতৃজনয়িত্র্যৌ ৪। ইত্যমরভরতৌ ॥ নিত্যদ্বিবচনান্তোহয়ং ॥

মাতামহঃ পুং মাতুঃপিতা। ইত্যমরঃ ॥ ✽ ॥ দৌহিত্রস্য মাতামহস্বাধর্ম্যং যথা। আসীদঙ্গো নৃপশ্রেষ্ঠো যজ্ঞশীলো দৃঢ়ব্রতঃ। যজতঃ সুমহৎকালাদ্বেণ একো হভবৎসুতঃ। মৃত্যোঃ কন্যা সুনীথাখ্যা মাতুর্দুঃশীল কারণাৎ। ক্রূরা বুদ্ধির ভূত্তস্য জগতো হস্যাপি পীড়নে ॥ তপস্বিনাং কুলে জাতা ঋষীণাঞ্চ যশস্বিনাং। সগুণাং নির্গুণাং বাপি যান্তি মাতামহীং তনুং ॥ ইত্যগ্নিপুরাণং ॥ ✽ ॥ তন্মরণে ত্রিরাত্রাশৌচং যথা। মাতামহানাং মরণে ত্রিরাত্রং স্যাদশৌচকং। ইতি শুদ্ধিতত্ত্বে কূর্ম্মপুরাণং ॥ ✽ ॥ দুহিতৃ পর্য্যন্তাভাবে তস্য শ্রাদ্ধে দৌহিত্রস্যাধিকারো যথা। মাতামহানাং দৌহিত্রাঃ কুর্ব্বন্ত্যহনি চাপরে। তে চ তেষাং প্রকুর্ব্বন্তি দ্বিতীয়ে হহনি সর্ব্বদা ॥ ইতি শুদ্ধিতত্ত্বং ॥ ✽ ॥ দুহিতৃপর্য্যন্তাভাবে তস্য ধনে দৌহিত্রস্যাধিকারো যথা। তদভাবে দৌহিত্রঃ। পৌত্র দৌহিত্রয়ো লোকে বিশেষো নাস্তি ধর্ম্মতঃ। তয়োর্হি মাতাপিতরৌ সম্ভূতৌ তস্য দেহতঃ ॥ ইতি মনুবচনে পৌত্রতুল্যাভিধানেন যথা পুত্রাভাবে পৌত্রস্তথা দুহিত্রভাবে দৌহিত্রঃ। অতএব গোবিন্দরাজধৃতো বিষ্ণুঃ। অপুত্র পৌত্রে সংসারে দৌহিত্রা ধনমাপ্নুয়ুঃ। পূর্ব্বেষাং হি স্বধা কারে পৌত্র দৌহিত্রকাঃ সমাঃ ॥ ইতি

দায়তত্ত্বং ॥

মাতামহী স্ত্রী মাতামহপত্নী। মাতৃমাতা। আই ইতি ভাষা। যথা। মাতামহী মাতৃমাতা মাতৃতুল্যা চ পূজিতা। প্রমাতামহীতি বিজ্ঞাতা প্রমাতামহ কামিনী। বৃদ্ধ প্রমাতামহী জ্ঞেয়া তৎপিতুঃ কামিনী তথা। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে১০ অধ্যায়ঃ॥ * ॥ তন্মরণেপক্ষিণ্যশৌচং যথা। মাতুলে শ্বশুরে মিত্রে গুরৌ গুর্বঙ্গনাসু চ। অশৌচং পক্ষিণীং রাত্রিং মৃতা মাতামহী যদি। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ দুহিতৃ পর্য্যন্তাভাবে তচ্ছ্রাদ্ধে দৌহিত্রস্যাধিকারো যথা। তদভাবে দৌহিত্রঃ। প্রাগুক্ত ব্রহ্মপুরাণে তথা দর্শনাৎ। পৌত্রদৌহিত্রযো র্লোকে ন বিশেষোঽস্তি ধর্ম্মতঃ। তযো র্হি মাতা পিতরৌ সম্ভূতৌ তস্য দেহতঃ ॥ ইত্যনেন যথা পুত্রাভাবে পৌত্রস্তথা দুহিত্রভাবে দৌহিত্রঃ। ইতি প্রাগেবোক্তত্বাৎ। মাতুলো ভাগিনেয়স্য স্বস্রীয়ো মাতুলস্য চ। শ্বশুরস্য গুরোশ্চৈব সখ্যু র্মাতামহস্য চ। এতেষাঞ্চৈব ভার্য্যাভ্যঃ স্বসু র্মাতুঃ পিতু স্তথা। পিণ্ডদানন্তু কর্ত্তব্য মিতি বেদবিদাং স্থিতি রিতি বৃদ্ধশাতাতপ বচনৈর্মাতামহ্যাশ্চ সাক্ষাদ্দৌহিত্রেণ পিণ্ডদান শ্রুতেঃ ধনাধিকারিত্বাচ্চ। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ তস্যা অযৌতক ধনে পৌত্রপর্য্যন্তাভাবে দৌহিত্রাধিকারঃ। যৌতুকধনে তু পুত্রপর্য্যন্তাভাবে দৌহিত্রাধিকারো যথা। দৌহিত্রোপি হ্যমুত্রৈনং সন্তারয়তি পৌত্রবদিতি মনুবচনে দৌহিত্রে পৌত্র ধর্ম্মাতিদেশাৎ পুত্রেণ পরিণীত দুহিতু র্বাধাৎ বাধক পুত্রেণ বাধ্য দুহিতৃ পুত্রবাধস্য ন্যায্যত্বাৎ। ইতি দায়তত্ত্বং॥ পুত্রাভাবে দৌহিত্রো হধিকারী। পুত্রাধিকারাৎ প্রাক্ দুহিত্রধিকার শ্রুতেঃ তদ্বাধিকায়া দুহিতুঃ পুত্রেণ বাধ্য পুত্রবাধস্যৈব ন্যায্যত্বাৎ। ইতি দায়ক্রমসংগ্রহশ্চ ॥

মাতালী স্ত্রী মাতুঃসখী। ইতি শব্দমালা ॥

মাতুলঃ পুং মাতৃভ্রাতা। পিতৃশ্যালকঃ॥ মামা ইতি ভাষা। ইত্যমরঃ॥ তন্মরণে ভাগিনেয়স্য পক্ষিণ্যশৌচং ॥ যথা। মাতুলে পক্ষিণীং রাত্রিং শিষ্য র্ত্বিগ্বান্ধবেষু চ। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ স চ মাতামহপর্য্যন্তরহিতস্য মৃতস্য প্রেত

-দ্যেধিকারী। যথা। মাতুলো ভাগিনেয়স্য স্বস্রীযো মাতুলস্য চ। ইতি প্রায়শ্চিত্ততপীয় পাঠক্রমাৎ। ইতি শুদ্ধিতত্ত্বং ॥ * ॥ ব্রীহিভেদঃ ॥ মদনদ্রুমঃ ॥ ধস্তুরঃ। ইতি মেদিনী ॥ সর্পবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

মাতুলকঃ পুং ধুস্তুরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাতুলপুত্রকঃ পুং ধুস্তুরফলং। ইত্যমরঃ ॥ মাতুলতনযঃ। ইতি মেদিনী ॥

মাতুলা } স্ত্রী মাতুলপত্নী। মামী
মাতুলানী } ইতি ভাষা। ইত্যমরভরতৌ ॥ তন্মরণে ভাগিনেয়স্য পক্ষিণ্যশৌচং। যথা। শ্বশুরযো র্ভগিন্যাঞ্চ মাতুলান্যাঞ্চ মাতুলে। পিত্রোঃ শ্বসরি তদ্বচ্চ পক্ষিণীং ক্ষপযেন্নিশাং ॥ ইতি শুদ্ধিতত্ত্বং ॥

মাতুলানী স্ত্রী কলাযঃ ॥ ভঙ্গা। ইতি মেদিনী ॥ শণঃ। ইতি হেমচন্দ্রঃ ॥ প্রিযঙ্গুবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

মাতুলাহিঃ পুং সর্পবিশেষঃ। মালুণাসাপ ইতি ফেযুযাটী ইতি চ ভাষা। অযং খট্বাকৃতিঃ আযত দেহঃ দীর্ঘলাঙ্গূলঃ চতুষ্পাৎ। ইতি

মধুমাধবাদযঃ ॥ তৎপর্য্যাযঃ। মালুধানঃ ২। ইত্যমরঃ ॥

মাতুলী স্ত্রী মাতুলপত্নী। ইত্যমরঃ ॥ ভঙ্গা। ইতি শব্দচন্দ্রিকা ॥

মাতুলুঙ্গঃ পুং বীজপূরঃ। ইত্যমরটীকাযাং ভরতঃ ॥

মাতুলুঙ্গকঃ পুং ছোলঙ্গবৃক্ষঃ। তৎপর্য্যাযঃ। ফলপূরঃ ২ বীজপূরঃ ৩ রুচকঃ ৪। ইত্যমরঃ ॥ মাতুলুঙ্গঃ ৫ শ্বফলঃ ৬ ফলপূরকঃ ৭ লুঙ্গষঃ ৮ পূরকঃ ৯ পূরঃ ১০ বীজপূর্ণঃ ১১ অম্লকেশরঃ ১২ ছোলঙ্গঃ ১৩। ইতি রত্নমালা ॥ অস্য গুণাঃ। হৃদ্যত্বং। অম্লত্বং। লঘুত্বং। অগ্নিদীপনত্বং। আধ্মানগুল্মপ্লীহহৃদ্রোগোদাবর্ত্তনাশিত্বং। বিবন্ধ হিক্কা শূল ছর্দ্দিরোগে প্রশস্তত্বঞ্চ ॥ অস্য ত্বগ্গুণাঃ। তিক্তত্বং। দুর্জ্জরত্বং। কফ বাত নাশিত্বং। বিগন্ধরসত্বঞ্চ ॥ তন্মাংসগুণাঃ। স্বাদুত্বং। শীতত্বং। গুরুত্বং। বাযু পিত্ত নাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

মাতুলুঙ্গা স্ত্রী মধুকর্কটী। যথা। মাতুলুঙ্গা সুগন্ধান্যা গিরিজা পূতিপুষ্পিকা। অত্যম্লা দেবদূতী চ সা ক্বচিন্মধুকর্কটী ॥ ইতি রত্নমালা ॥

মাতুলুঙ্গিকা স্ত্রী বনবীজপূরঃ। ইতি

রাজনির্ঘণ্টঃ ॥

মাতৃকচ্ছিদঃ পুং পরশুরামঃ। ইতি কেচিৎ ॥

মাতৃকা স্ত্রী ধাতৃকা ॥ মাতা ॥ দেবীভেদঃ ॥ বর্ণমালা। ইতি মেদিনী ॥ করণং ॥ স্বরঃ ॥ উপমাতা। ইতি হেমচন্দ্রঃ ॥ * ॥ মাতৃকাগণোৎপত্তির্যথা। তত্র দেবো প্যসৌ দৈত্যং ত্রিশূলেনাহনদ্ভৃশং। তস্যাহ তস্য যদুক্ত নপতদ্ভূতলে কিল ॥ তত্রান্ধকা অসংখ্যাতা বভূবুরপরে ভৃশং। তদ্দৃষ্ট্বা মহদাশ্চর্য্যং রুদ্রঃ শূলেঽন্ধকং মৃধে। গৃহীত্বা ত্রিশিখাগ্রেণ ননর্ত্ত পরমেশ্বরঃ। ইতরে হপ্যন্ধকাঃ সর্ব্বে চক্রেণ পরমেষ্ঠিনা। নারায়ণেন নিহতা স্তত্র যে হন্যে সমুত্থিতাঃ ॥ অসৃগ্ধারা স্তথান্যৈস্ত শূলপ্রোতস্য চাসকৃৎ। অনারতং সমুত্তস্থুঃ স্বতো রুদ্রো রুষান্বিতঃ ॥ তস্য ক্রোধেন মহতা মুখাজ্জ্বালা বিনির্যযৌ। তদ্রূপ ধারিণীং দেবীং যান্তীং যোগীশ্বরীং বিদুঃ ॥ স্বরূপধারিণী চান্যা বিষ্ণুনাপি বিনির্ম্মিতা। ব্রহ্মণা কার্ত্তিকেযেন ইন্দ্রেণ চ যমেন চ ॥ বারাহেন চ দেবেন বিষ্ণুনা পরমেষ্ঠিনা। পাতালোদ্ধরণং রূপং তস্যা দেব্যা বিনির্ম্মমে ॥ মাহেশ্বরী চ মাহেন্দ্রী ইত্যেতা অষ্ট মাতরঃ। কারণং ফস্য যৎ প্রোক্তং ক্ষেত্রজ্ঞেনাবধারিতং ॥ শরীরাদেব নানা তু তদিদং কীর্ত্তিতং মযা। কামঃ ক্রোধ স্তথা লোভো মদো মোহো হথ পঞ্চমঃ ॥ মাৎসর্য্যং ষষ্ঠ মিত্যাহুঃ পৈশুন্যং সপ্তমং তথা। অনসূযাষ্টমী জ্ঞেযা ইত্যেতা অষ্টমাতরঃ ॥ কামং যোগীশ্বরীং বিদ্ধি ক্রোধং মাহেশ্বরীং তথা। লোভস্ত বৈষ্ণবী প্রোক্তা ব্রহ্মাণী মদ এব চ ॥ মোহঃ স্বযম্ভুঃ কৌমারী মাৎসর্য্যং চৈন্দ্রজাং বিদুঃ। যামী দণ্ডধরা দেবী পৈশুন্যং স্বযমেব চ ॥ অনসূযা বরাহাখ্যা ইত্যেতাঃ পরিকীর্ত্তিতাঃ। কামাদিগণ এষোযং শরীরং পরিকীর্ত্তিতং ॥ জগ্রাহ মূর্ত্তিস্ত যথা তথা তে কীর্ত্তিতং মযা। এতাভি র্দ্দেবতাভিশ্চ তস্য রক্তে তু শোষিতে ॥ ক্ষযং গতাসুরী মাযা স চ সিদ্ধো হন্ধকো হভবৎ। এতত্তে সর্ব্ব মাখ্যাত মাত্মবিদ্যা মৃতং মযা ॥ য এতচ্ছৃণুযান্নিত্যং মাতৄণাং সম্ভবং শুভং। তস্য তাঃ সর্ব্বদা রক্ষাং কুর্ব্বন্ত্যনুদিনং নৃপ ॥ যেনৈতৎ পঠ্যতে জন্ম মাতৄণাং পুরুষোত্তম। স ধন্যঃ সর্ব্বদা লোকে শিবলোকঞ্চ গচ্ছতি। তাসা

ক্ষ ব্রহ্মণাদত্তা অষ্টমীতিথি রুত্তমা ॥ এতাঃ সংপূজযেদ্ভক্ত্যা বিল্বাহারো নরঃ সদা। তস্য তাঃ পরিতুষ্টা হ্যঃক্ষেমারোগ্যং দদন্তি চ॥ ইত্যাদি বারাহপুরাণে কামাদি মাতৃগণোৎপত্তির্নামাধ্যায়ঃ॥ *॥ অপিচ। ব্রহ্মেশগুহ বিষ্ণুনাং তথেন্দ্রস্য চ শক্তয়ঃ। শরীরেভ্যো বিনিষ্ক্রম্য তদ্রূপৈ শ্চণ্ডিকাং যযুঃ॥ যস্য দেবস্য যদ্রূপং যথা ভূষণ বাহনং। তদ্বদেব হি তচ্ছক্তি রসুরান্ যোদ্ধুমাযযৌ। হংসযুক্ত বিমানাগ্রে সাক্ষ সূত্র কমণ্ডলুঃ। আযাতা ব্রহ্মণঃ শক্তি র্ব্রহ্মাণী সাভিধীযতে॥ মাহেশ্বরী বৃষারূঢা ত্রিশূল বর ধারিণী। মহাহি বলযা প্রাপ্তা চন্দ্ররেখা বিভূষণা॥ কৌমারী শক্তিহস্তা চ মযূর বর বাহনা। যোদ্ধু মভ্যাযযৌ দৈত্যানম্বিকা গুহরূপিণী॥ তথৈব বৈষ্ণবী শক্তি র্গরুড়োপরি ~~সংস্থিতা শঙ্খ~~ চক্র গদা শার্ঙ্গ খড়্গ হস্তাভ্যুপাযযৌ॥ যজ্ঞবারাহ মতুলং রূপং যা বিভ্রতো হরেঃ। শক্তিঃ সাপ্যাযযৌ তত্র বারাহীং বিভ্রতী তনুং॥ নারসিংহী নৃসিংহস্য বিভ্রতী সদৃশং বপুঃ। প্রাপ্তা তত্র শটাক্ষেপ ক্ষিপ্ত নক্ষত্র সংহতিঃ॥ বজ্রহস্তা তথৈবৈন্দ্রী গজরাজোপরি স্থিতা। প্রাপ্তা সহস্রনযনা যথা শক্র স্তথৈব সা॥ ততঃ পরিবৃত স্তাভি রীশানোদেবশক্তিভিঃ। হন্যন্তা মসুরাঃ শীঘ্রং মম প্রীত্যাহ চণ্ডিকাং॥ ততো দেবী শরীরাত্তু বিনিষ্ক্রান্তাতি ভীষণা। চণ্ডিকা শক্তি রত্যুগ্রা শিবা শত নিনাদিনী॥ ইতি মার্কণ্ডেযপুরাণং॥ *॥ মাতৃবর্গো যথা। গুরোঃ পত্নী রাজপত্নী বিপ্রপত্নী চ যা সতী। পত্নী চ ভ্রাতৃসুতযো র্মিত্রপত্নী চ তৎপ্রসূঃ॥ প্রসূঃ পিত্রো স্তযো র্ভ্রাতুঃ পত্নী শ্বশ্রূঃ স্বকন্যকা। জননী তৎ সপত্নী চ ভগিনী সুরভী তথা॥ স্বাভীষ্ট সুরপত্নী চ ধাত্রী কান্তাপ্রদাযিকা। গর্ভধাত্রী স্বনাম্নী চ ভযাত্ত্রাতুশ্চ কামিনী॥ এতা বেদপ্রণীতাশ্চ সর্ব্বেষাং মাতরঃ স্মৃতাঃ। এতাস্বপি চ সর্ব্বাসু ন্যূনতা নাস্তি কাসু চ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৫ অধ্যাযঃ॥ *॥ ষোড়শ মাতরো যথা। গুরুপত্নী রাজপত্নী দেবপত্নী তথা বধূঃ। পিত্রোঃ স্বসা শিষ্যপত্নী ভৃত্যপত্নী চ মাতুলী॥ পিতৃপত্নী ভ্রাতৃপত্নী শ্বশ্রূশ্চ ভগিনীসুতা। গর্ভধাত্রীষ্টদেবী চ পুংসঃ ষোড়শ মাতরঃ॥ ইতি তত্রৈব ৫৯ অধ্যাযঃ॥ *॥ অথ মাতৃকান্যাসঃ।

ভগবানবাচ। মাতৃকা ন্যাস মধুনা শৃণু বেতাল ভৈরব। যেনদেবত্ব মাযাতি নরো হপি বিহিতেন বৈ॥ বাগ ব্রহ্মাণী মুখাদেব্যো মাতৃকাঃ পরিকীর্ত্তিতাঃ। তাসাং মন্ত্রাণি সর্ব্বাণি ব্যঞ্জনানি স্বরা স্তথা॥ চন্দ্র বিন্দু প্রযুক্তানি সর্ব্বকাম প্রদানি চ। ঋষিস্ত মাতৃ মন্ত্রাণাং ব্রহ্মৈব পরিকীর্ত্তিতঃ॥ প্রোক্তা ছন্দস্ত গাযত্রী দেবতা চ সরস্বতী। শরীর শুদ্ধি প্রমুখ সর্ব্ব কামার্থ সাধনে। বিনিযোগঃ সমুদ্দিষ্টো মন্ত্রাণাং ন্যূন পূরণে॥ অকারেণ সমং কাদি বর্গো যঃ প্রথমঃ স্মৃতঃ। তৈ শ্চন্দ্র বিন্দু সংযুক্তৈ স্তত্রৈষ্ট রক্ষরৈ র্বহিঃ॥ আকারশ্চ তথোচার্য্য অঙ্গুষ্ঠাভ্যাং নম স্তথা। প্রথমং মাতৃকা মন্ত্র মঙ্গুষ্ঠ দ্বযতো ন্যসেৎ॥ পরে বর্গাঃ স্বরৈঃ সার্দ্ধং যে বান্যে ন্যাস কর্ম্মণি। তে সর্ব্বে চন্দ্রবিন্দুভ্যাং যুক্তাঃ কার্য্যাস্ত সর্ব্বতঃ॥ হ্রস্বেকারশ্চ বর্গেণ দীর্ঘেকারান্তগেন তু। তর্জন্যো বিন্যসেৎ সম্যক্ স্বাহান্তেন তু পূর্ব্ববৎ॥ হ্রস্বোকারষ্টবর্গেণ দীর্ঘোকারান্তগেন তু। মধ্যমা যুগলে সম্যক্ বষডন্তেন বিন্যসেৎ॥ একারাদি তবর্গান্তৈ ঐকারান্তেন চৈব হুং। ন্যসেদনামিকাযুগ্মে নিযতং তত্রবৈভব॥ ওকারাদি পবর্গন্ত ঔকারান্তেন শেষিতং। বৌষডন্তং কনিষ্ঠাযাং বিন্যসেৎ কার্য্য সিদ্ধযে॥ অংকারাদি যকারাদি বর্গেণ ক্ষান্তকেন চ। অঃ ইত্যন্তেন তলযো র্বিন্যসেৎ পাণিপৃষ্ঠযোঃ॥ বষট্‌কারং শেষভাগে মন্ত্রন্যাসে নিযোজযেৎ। হৃদযাদি ষডঙ্গষু পূর্ব্বাৎ ক্রমতো ন্যসেৎ॥ অঙ্গুষ্ঠাদ্যুক্ত বর্গেস্তু ক্রমাৎ ষড়ি স্তথা বধৈঃ। পুন স্তথা পাদ জানু শক্তি গুহ্যে তু পার্শ্বযোঃ॥ বস্তৌ চ বিন্যসেন্মন্ত্রান্ ক্রমাৎ পূর্ব্বাক্ষরৈঃ। বাহ্বোঃ পাণ্যো স্তথা কণ্ঠে নাভৌ চ জঠরে তথা॥ স্তনযো রপি বিন্যাসং তথা ষড়্‌ভিঃ সমাচরেৎ। বক্ত্রে চ চিবুকে গণ্ডে কর্ণযোশ্চ ললাটকে॥ অংশে কক্ষে চ ষড়্‌বর্গৈঃ পূর্ব্ববন্ন্যাস মাচরেৎ। রোমকূপে ব্রহ্মরন্ধ্রে গুহ্যে জঙ্ঘা যুগে তথা॥ নখেষু পাদ পার্শ্বোশ্চ তথা পূর্ব্ববদাচরেৎ। এ স্তু মাতৃকা ন্যাসং যঃ কুর্য্যান্নর সত্তমঃ॥ স ধর্ম্ম যজ্ঞে পূজাসু পূতো যোগ্যশ্চ জাযতে॥ নাতঃ পরতরং মন্ত্রং বিদ্যতে ক্বচিদেব হি॥ যঃ সর্ব্বকামদং পুণ্যং চতুর্ব্বর্গ ফলপ্রদং। বাগ্দেবতাং হৃদি ধ্যাত্বা মূর্ত্তি সর্ব্বাক্ষরাণি চ॥ ত্রিধা চ মাতৃকা মন্ত্রৈঃ স ক্রমৈশ্চ

পিবেজ্জলং। স বাগ্মী পণ্ডিতো ধীমান্ জায়তে চ বরঃ কবিঃ। চন্দ্রবিন্দু সমাযুক্তান্ স্বরান্ পূর্বান্ পঠেদ্বুধঃ। ব্যঞ্জনানি চ সর্বাণি কেবলানি পঠেত্ততঃ॥ অকারাদি ক্ষকারান্তানেবং ত্রিঃসন্ত্রপূর্বকৈঃ। জলং করতলে গৃহ্য পাঠয়িত্বাক্ষর সংঘকং॥ অভিমন্ত্র্য তু তত্তোয়ং প্রথমং পূরকৈঃ পিবেৎ। কুম্ভকেন দ্বিতীয়ন্তু তৃতীয়ন্তু রেচকৈঃ॥ এবং সকৃৎত্রিবারন্তু পীত্বা তোয়ং বিচক্ষণঃ। দৃঢ়াঙ্গঃ পণ্ডিতো ভূয়াৎ পুত্র পৌত্র সমন্বিতঃ॥ ত্রিসন্ধ্য মথ পীত্বৈব মাতৃকা মন্ত্র মন্ত্রিতং। তোয়ং কবিত্ব মাপ্নোতি সর্বান্ কামাং স্তথৈব চ॥ সততং স্বকতে যস্তু মাতৃকা মন্ত্র মন্ত্রিতং। তোয পানং মহাভাগঃ পূরক কুম্ভ রেচকৈঃ॥ স সর্বকামান্ সংপ্রাপ্য পুত্র পৌত্র সমৃদ্ধিমান্। ভূত্বা মহাকবি র্লোকে বলবান্ সততং নিরুজঃ॥ সর্বত্র বল্লভো ভূত্বা চান্তে মোক্ষ মবাপ্নুয়াৎ। রাজান মথ বা রাজভার্য্যাং পুত্র মথাপি বা॥ বশীকরোতি ন চিরাৎ মাতৃকা মন্ত্র পালকঃ। ন্যাস ক্রমে ক্রমঃ প্রোক্তো বর্গক্রম ইহৈব তু॥ অক্ষরাণাং ক্রমেণাথ তোয়পানং সমাচরেৎ। যে যে মন্ত্রা দেবতানা মৃষীণা মথ রাক্ষসাং॥ তে মন্ত্রা মাতৃকা মন্ত্রে নিত্যমেব প্রতিষ্ঠিতাঃ। সর্ব মন্ত্রময়শ্চায়ং সর্ব বেদময় স্তথা॥ চতুর্বর্গপ্রদ শ্চায়ং মাতৃকা মন্ত্র উচ্যতে। ইতি তে কথিতঃ পুত্র মাতৃকা ন্যাস উত্তমঃ॥ ইতি শ্রীকালিকাপুরাণে মাতৃকান্যাসঃ ৭৬ অধ্যায়ঃ॥ ॥ অথ তস্য প্রয়োগঃ। অস্য মাতৃকা মন্ত্রস্য ব্রহ্মা ঋষি র্গায়ত্রী ছন্দো মাতৃকা সরস্বতী দেবতা হলো বীজানি স্বরাঃ শক্তয়ো মাতৃকান্যাসে বিনিয়োগঃ। শিরসি ওঁ ব্রহ্মণে ঋষয়ে নমঃ। মুখে ওঁ গায়ত্রীছন্দসে নমঃ। হৃদি ওঁ মাতৃকা সরস্বত্যৈ দেবতায়ৈ নমঃ। গুহ্যে ওঁ ব্যঞ্জনেভ্যো বীজেভ্যো নমঃ। পাদয়োঃ ওঁ স্বরেভ্যঃ শক্তিভ্যো নমঃ॥ তথা চ জ্ঞানার্ণবে। মাতৃকাং শৃণু দেবেশি ন্যসেৎ পাপ নিকৃন্তনীং। ঋষি ব্রহ্মাস্য মন্ত্রস্য গায়ত্রীছন্দ উচ্যতে॥ দেবতা মাতৃকা দেবী বীজং ব্যঞ্জন সঞ্চয়ং। শক্তয়স্তু স্বরা দেবি ষড়ঙ্গন্যাস মাচরেৎ॥ ॥ ততঃ ষড়ঙ্গ ন্যাসৌ। অং কং খং গং ঘং ঙং আং অঙ্গুষ্ঠাভ্যাং নমঃ। ইং চং ছং জং ঝং ঞং ঈং তর্জনীভ্যাং স্বাহা। উং টং ঠং ডং ঢং ণং ঊং মধ্যমাভ্যাং

বষট্। এং তং থং দং ধং নং ঐং অ-নামিকাভ্যাং হুং।ওং পং ফং বং ভং মং ঔং কনিষ্ঠাভ্যাং বৌষট্।অং যং রং লং বং শং ষং সং হং লং ক্ষং অঃ করতল পৃষ্ঠাভ্যাং ফট্। এবং হৃদয়াদিষু। অং কং ৫ আং হৃদয়ায় নমঃ। ইত্যাদি ॥ তথাচ জ্ঞানার্ণবে। অং আং মধ্যে কবর্গন্তু ইং ঈং মধ্যে চবর্গকং। উং ঊং মধ্যে টবর্গন্তু এং ঐং মধ্যে তবর্গকং ॥ ওং ঔং মধ্যে পবর্গন্তু বিন্দুযুক্তং ন্যসেৎ প্রিয়ে। অনুস্বার বিসর্গান্ত যশবর্গৌ স লক্ষকৌ হৃদয়ঞ্চ শিরো দেবি শিখা কবচকং তথা। নেত্র মন্ত্রং ন্যসেৎ ঙেন্তং নমঃ স্বাহা ক্রমেণ তু ॥ বষট্ হুং বৌষড়ন্তঞ্চ ফডন্তং যোজয়েৎ প্রিয়ে। ষড়ঙ্গো হয়ং মাতৃকায়াঃ সর্ব্বপাপ হরঃ স্মৃতঃ ॥ * ॥ অথান্তর্মাতৃকান্যাসঃ। অকারাদি ষোড়শ স্বরান্ সবিন্দূন্ ষোড়শ দল কমলে কণ্ঠ মূলে ন্যসেৎ। ককারাদি দ্বাদশ বর্ণান্ সবিন্দূন্ দ্বাদশদল কমলে হৃদয়ে ন্যসেৎ। ডকারাদি দশবর্ণান্ সবিন্দূন্ দশদল কমলে নাভৌ ন্যসেৎ। বকারাদি ষড়্বর্ণান্ সবিন্দূন্ ষড়্দল কমলে লিঙ্গমূলে ন্যসেৎ। বকারাদি চতুরো বর্ণান্ সবিন্দূন্ চতুর্দল কমলে মূলাধারে ন্যসেৎ। হ ক্ষ বর্ণদ্বয়ং সবিন্দুং দ্বিদল পদ্ম ভ্রূমধ্যে ন্যসেৎ। তথাচ জ্ঞানার্ণবে। ষোড়শপত্রাম্বুজে কণ্ঠে স্বরান্ ষোড়শ বিন্যসেৎ। দ্বাদশচ্ছদ হৃৎপদ্মে কাদীন্ দ্বাদশ বিন্যসেৎ॥ দশপত্রাম্বুজে নাভৌ ডকারাদীন্যসেদ্দশ। ষট্‌পত্রমধ্যে লিঙ্গস্থে বকারাদীন্যসেচ্চ ষট্ ॥ আধারে চতুরো বর্ণান্ন্যসেদ্বাদীন্ চতুর্দ্দলে। হক্ষৌ ভ্রূমধ্যগে পদ্মে দ্বিদলে বিন্যসেৎ প্রিয়ে ॥ অগস্ত্যসংহিতায়াং। একৈকবর্ণ মেকৈক পত্রান্তে বিন্যসেৎ প্রিয়ে। এবমন্তঃ প্রবিন্যস্য মনসা তো বহির্ন্যসেৎ॥ * ॥ বৈষ্ণবে তু। একৈকবর্ণ মুচ্চার্য্য মূলাধারাচ্ছিরোন্তকং। নমোন্ত মিতি বিন্যাস আন্তরঃ পরিকীর্ত্তিতঃ॥ অথান্ত র্মাতৃকান্যাসো মূলাধারে চতুর্দ্দলে। সুবর্ণাভে ব শ ষ স চতুর্বর্গ বিভূষিতে॥ ষড়্দলে বৈদ্যুতনিভে স্বাধিষ্ঠানে হনলত্বিষি। ব ভ মৈ র্যবলৈ র্যুক্তে বর্ণৈঃ ষড়্ভিশ্চ সুবৃতে ॥ মণিপূরে দশদলে নীলজীমূত সন্নিভে। ডাদি ফান্ত দলৈ র্যুক্তে বিন্দুভাবিত মস্তকৈঃ॥ অনাহতে দ্বাদশারে প্রবাল রুচি সন্নিভে। কাদিঠান্ত দলৈ র্যুক্তে যোগিনাং হৃদয়ঙ্গমে ॥ বিশুদ্ধে ষোড়শদলে ধূম্রাভে

,ম্বর ভূষিতে। আজ্ঞাচক্রে তু চন্দ্রাভে দ্বিদলে হ ক্ষলাঞ্ছিতে ॥ সহস্রারে হিমনিভে সর্ব্ববর্ণবিভূষিতে। অকথাদি ত্রিরেখাব্জ হ ল ক্ষ ত্রয ভূষিতে ॥ তন্মধ্যে পরবিন্দুঞ্চ সৃষ্টি স্থিতি লয়াত্মকং। এবং সমাহিত মনা ধ্যায়েন্ন্যাসো হয় মান্তরঃ ॥ ৩ ॥ ততো বাহ্যমাতৃকা ধ্যানং। পঞ্চাশল্লিপিভি র্বিভক্তমুখ দোঃ পন্মধ্য বক্ষঃস্থলাং ভাস্বন্মৌলি নিবদ্ধ চন্দ্র সকলা মাপীনতুঙ্গস্তনীং। মুদ্রা মক্ষ গুণং সুধাঢ্য কলসং বিদ্যাঞ্চ হস্তাম্বুজৈ র্বিভ্রাণাং বিষদপ্রভাং ত্রিনয়নাং বাগ্দেবতা মাশ্রয়ে ॥ এবং ধ্যাত্বা ন্যসেৎ। তত্রাঙ্গুলিনিয়ম স্তন্ত্রে। ললাটে হনামিকা মধ্যে বিন্যসেন্মুখ পঙ্কজে। তর্জনী মধ্যমানানা বৃদ্ধানামে চ নেত্রয়োঃ ॥ অঙ্গুষ্ঠং কর্ণযো ন্যস্য কনিষ্ঠাঙ্গুষ্ঠকৌ নসোঃ। মধ্যাস্তিস্রো গণ্ডযোশ্চ মধ্যমোষ্ঠোষ্ঠযো ন্যসেৎ ॥ অনামাং দন্তযো ন্যস্য মধ্যমা মুত্তমাঙ্গকে। মুখে হনামাং মধ্যমাঞ্চ হস্ত পাদে চ পার্শ্বযোঃ ॥ কনিষ্ঠা নামিকা মধ্যা স্তাস্ত পৃষ্ঠে চ বিন্যসেৎ। তাঃ সাঙ্গুষ্ঠা নাভিদেশে সর্ব্বাঃ কুক্ষৌ চ বিন্যসেৎ ॥ হৃদয়ে চ তলং সর্ব্বং অংশযোশ্চ ককুৎ স্থলে। হৃৎ পূর্ব্বং হস্তপৎ ক্তক্ষি মুখেষু তলমেব চ ॥ এতাস্ত মাতৃকা মুদ্রাঃ ক্রমেণ পরিকীর্ত্তিতাঃ। অজ্ঞাত্বাবিন্যসেদ্যস্ত ন্যাসঃ স্যাত্তস্য নিষ্ফলঃ ॥ গৌতমীযে। ললাট মুখবৃত্তাক্ষি শ্রুতি ঘ্রাণেষু গণ্ডযোঃ ॥ ওষ্ঠ দন্তোত্তমাঙ্গাস্য দোঃপৎ সন্ধ্যগ্রকেষু চ। পার্শ্বযোঃ পৃষ্ঠতো নাভৌ জঠরে হৃদযে হংশকে ॥ ককুদংশে চ হৃৎ পূর্ব্বং পাণি পাদ যুগে তথা। জঠরাননযো ন্যসেন্মাতৃকার্ণান্ যথা ক্রমাৎ ॥ তদ্যথা। অং নমো ললাটে। আং নমো মুখবৃত্তে। ইং ঈং চক্ষুষোঃ। উং ঊং কর্ণযোঃ। ঋং ৠং নসোঃ। ঌং ৡং গণ্ডযোঃ। এং ওষ্ঠে। ঐং অধরে। ওং ঊর্দ্ধদন্তে। ঔং অধোদন্তে। অং ব্রহ্মরন্ধ্রে। অঃ মুখে। কং দক্ষবাহুমূলে। খং কূর্পরে। গং মণিবন্ধে। ঘং অঙ্গুলিমূলে। ঙং অঙ্গুল্যগ্রে। এবং চং ৫ বামবাহুমূল সন্ধ্যগ্রকেষু। এবং টং ৫ দক্ষিণপাদমূল সন্ধ্যগ্রকেষু। এবং তং ৫ বামপাদমূল সন্ধ্যগ্রকেষু। পং দক্ষিণপার্শ্বে ফং বামপার্শ্বে। বং পৃষ্ঠে। ভং নাভৌ। মং জঠরে। যং হৃদি। রং দক্ষবাহুমূলে। লং ককুদি। বং বামবাহুমূলে। শং হৃদাদি দক্ষহস্তে। ষং হৃদাদি বাম-

হস্তে। সং হৃদয়াদি দক্ষপাদে। হং হৃদাদি বামপাদে। ক্ষং হৃদাদুদরে। ক্ষং হৃদাদি মুখে। সর্ব্বত্র নমো হন্তেন ন্যসেৎ। তথাচ। ওমাদ্যন্তো নমোন্তো বা সবিন্দু র্বিন্দু বর্জ্জিতঃ। পঞ্চাশদ্বর্ণ বিন্যাসঃ ক্রমাদুক্তো মনীষিভিঃ। ইতি ভট্টঃ॥ * ॥ অথ সংহারমাতৃকান্যাসঃ। তস্যা ধ্যানং যথা। অক্ষ স্রজং হরিণপোত মুদগ্রটঙ্কং বিদ্যাঃ করৈ রবিরতং দধতীং ত্রিনেত্রাং। অর্দ্ধেন্দু মৌলি মরুণাম রবিন্দ রামাং বর্ণেশ্বরীং প্রণমত স্তন ভার নম্রাং॥ ন্যাসস্তু ক্ষকারাদি অকারান্তঃ। যথা ক্ষং নমো হৃদাদি মুখে ইত্যাদি॥*॥ অপরঞ্চ। চতুর্দ্ধা মাতৃকা প্রোক্তা কেবলা বিন্দু সংযুতা। সবিসর্গা সোভয়া চ রহস্যং শৃণু কথ্যতে। বিদ্যাকরী কেবলা চ সোভয়া ভুক্তি দায়িনী। পুত্রদা সবিসর্গা তু সবিন্দু র্বিত্তদায়িনী॥ বিশুদ্ধেশ্বরে। বাগ্‌বাদ্যা চ বাক্‌সিদ্ধ্যৈ রমাদ্যা শ্রীপ্রবৃদ্ধয়ে। হৃল্লেখাদ্যা সর্ব্বসিদ্ধ্যৈ কামাদ্যা লোকবশ্যদা। শ্রীকণ্ঠাদ্যানিমান্ন্যসেৎ সৎমন্ত্রঃ প্রসীদতি॥ শ্রীবিদ্যাবিষয়ে নবরত্নেশ্বরে। বাগ্‌বাদ্যা নমো হন্তাশ্চ ন্যস্তব্যা মাতৃকাক্ষরাঃ। শ্রীবিদ্যাবিষয়ে মন্ত্রী বাগ্‌বাদ্যঞ্চ সিদ্ধয়ে॥ ইতি তন্ত্রসারঃ॥

মাতৃকেশটঃ পুং মাতুলঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মাতৃনন্দনঃ পুং কার্ত্তিকেয়ঃ। যথা। কথং ত্বং কৃত্তিকা পুত্র মুক্তবান্ তং সুরং গুহং। কথঞ্চ পাবকি রসৌ কথং বা মাতৃনন্দনঃ॥ ইত্যাদি বারাহপুরাণে স্কন্দোৎপত্তি নামাধ্যায়ঃ॥

মাতৃমুখঃ পুং জড়ঃ। ইতি হেমচন্দ্রঃ॥

মাতৃবন্ধুঃ পুং মাতৃবান্ধবঃ। যথা বান্ধব স্ত্রিবিধাঃ। আত্মবান্ধবঃ পিতৃবান্ধবো মাতৃবান্ধবশ্চেতি। যথোক্তং। আত্ম পিতৃস্বসুঃ পুত্রা আত্ম মাতৃস্বসুঃ সুতাঃ। আত্ম মাতুল পুত্রাশ্চ বিজ্ঞেয়া হ্যাত্মবান্ধবাঃ॥ পিতুঃ পিতৃস্বসুঃ পুত্রাঃ পিতৃর্মাতৃস্বসুঃ সুতাঃ। পিতু র্মাতুল পুত্রাশ্চ বিজ্ঞেয়াঃ পিতৃবান্ধবাঃ॥ মাতুঃ পিতৃস্বসুঃ পুত্রা মাতু র্মাতৃস্বসুঃ সুতাঃ। মাতু র্মাতুলপুত্রাশ্চ বিজ্ঞেয়া মাতৃবান্ধবাঃ॥ ইতি মিতাক্ষরা॥

মাতৃবান্ধবঃ পুং মাতৃবন্ধুঃ। স চ মাতামহ ভগিনীপুত্রঃ। মাতামহী

ভগিনীপুত্রঃ। মাতৃমাতৃলপুত্রশ্চ। যথা। মাতুঃ পিতৃষ্বসুঃ পুত্রা মাতুর্মাতৃষ্বসুঃ সুতাঃ। মাতুর্মাতুল পুত্রাশ্চ বিজ্ঞেয়া মাতৃবান্ধবাঃ॥ ইত্যুদ্বাহতত্ত্বং॥

মাতৃবাহিনী স্ত্রী বল্গুলাপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

মাতৃশাসিতঃ পুং মূর্খঃ। ইতি হেমচন্দ্রঃ॥

মাতৃষ্বসা স্ত্রী মাতৃভগিনী। মাসী ইতি ভাষা। সা মাতৃতুল্যা যথা। মাতৃষ্বসা মাতুলানী পিতৃব্যস্ত্রী পিতৃষ্বসা। শ্বশ্রূঃ পূর্ব্বজ পত্নী চ মাতৃতুল্যাঃ প্রকীর্ত্তিতাঃ॥ ইতি দায়ভাগঃ॥

মাতৃষ্বসেয়ঃ পুং মাতৃষ্বসৃপুত্রঃ। মাসিতুতাভাই ইতি ভাষা। তৎপর্য্যায়ঃ। মাতৃষ্বস্রীয়ঃ২। ইতি হেমচন্দ্রঃ॥

মাতৃষ্বসেয়ী স্ত্রী মাতৃভগিনীকন্যা। মাসিতুতাভগিনী ইতি ভাষা। ইত্যমরঃ॥

মাতৃষ্বস্রীয়ঃ পুং মাতৃভগিনীপুত্রঃ। মাসিতুতাভাই ইতি ভাষা। ইত্যমরঃ॥

মাতৃষ্বস্রীয়া স্ত্রী মাতৃভগিনীকন্যা। মাসিতুতাভগিনী ইতি ভাষা। ইত্যমরঃ॥

মাতৃসিংহী স্ত্রী বাসকঃ। ইতি শব্দরত্নাবলী॥

মাত্রং ক্লী কার্ৎস্নং॥ অবধারণং। ইত্যমরঃ॥ কার্ৎস্নে যথা জীবমাত্রং নহিংসেত। অবধারণে যথা। পয়োমাত্রং ভুঙ্ক্তে। ইতি ভট্টীকায়াং ভরতঃ॥

মাত্রা স্ত্রী পরিচ্ছদঃ॥ অল্পঃ। পরিমাণং। ইত্যমরঃ॥ পরিচ্ছদো হস্ত্যশ্বাদিঃ। অল্পে যথা। শাকমাত্রা। পরিমাণে যথা। কিং হন্তি মাত্রো হস্তশঃ। ইতি ভট্টীকায়াং ভরতঃ॥ কর্ণভূষা॥ বিত্তং। অক্ষরাবয়বঃ। ইতি মেদিনী॥ *॥ কালবিশেষঃ। যথা। কালেন যাবতা পাণিঃ পর্য্যেতি জানুমণ্ডলং। সা মাত্রা কবিভিঃ প্রোক্তা হ্রস্ব দীর্ঘ প্লুতে মতা॥ ইতি প্রাচীনাঃ॥ অপিচ। বামজানুনি তদ্ধস্ত ভ্রমণং যাবতা ভবেৎ। কালেন মাত্রা সা জ্ঞেয়া মুনিভির্ব্বেদপারগৈঃ॥ ইতি তন্ত্রসারঃ॥ ইন্দ্রিয়বৃত্তিঃ। যথা। মাত্রা স্পর্শাস্তু কৌন্তেয় শীতোষ্ণ সুখ দুঃখদাঃ। আগমাপায়িনো নিত্যা স্তাং স্তিতিক্ষস্ব ভারত॥ ইতি ভগবদ্গীতা॥ মীয়ন্তে আভি র্বিষয়াঃ মাত্রা

ইন্দ্রিয় স্তবঃ। ইতি তট্টীকায়াং ধরস্বামী॥ ইন্দ্রিয়ং। ইতি পূর্ব্বোক্ত শ্লোক টীকায়াং মধুসূদন সরস্বতী॥ অংশঃ। যথা। ন যোষিড্ভ্যঃ পৃথগ্ দদ্যাদবসান দিনাদৃতে। স্বভর্ত্তৃ পিণ্ড মাত্রাভ্য স্তৃপ্তি রাসাং যতঃ স্মৃতা॥ ইতি শ্রাদ্ধতত্ত্বং॥

মাৎসর্য্যং স্ত্রী মৎসরস্য ভাবঃ। পরশুভদ্বেষঃ। যথা। মাগাশ্চিরায়ৈকতরঃ প্রমাদং বসন্ন সম্বাধ শিবেহপি দেশে। মাৎসর্য্য রাগোপহতাত্মনাং হি স্খলন্তি সাধুম্বপি মানসানি॥ইতি ভারবৌ ৩ অধ্যায়ঃ॥

মাৎস্যিকঃ ত্রি জালিকঃ। মৎস্যঘাতকঃ। ইতি সিদ্ধান্তকৌমুদী॥

মাথ ই অস্থে। ইতি কবিকল্পদ্রুমঃ॥ ই মান্থ্যতে। অন্থো বধ ক্লেশৌ। ইতি দুর্গাদাসঃ॥

মাথঃ পুং পন্থাঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মন্থনং। ইতি শব্দরত্নাবলী

মাথুরঃ পুং মথুরায়াআগতঃ। ইতি মুগ্ধবোধব্যাকরণং॥

মাদঃ পুং দর্পঃ। ইত্যমরঃ॥ হর্ষঃ। ইতি তট্টীকায়াং ভরতঃ॥ মত্ততা। ইতি শব্দরত্নাবলী॥

মাদকঃ পুং দাত্যূহপক্ষী। ইতি শব্দমালা॥ মদকারকদ্রব্যে ত্রি॥

মাদনং ক্লী লবঙ্গং। ইতি শব্দচন্দ্রিকা॥ হর্ষধারয়িতরি ত্রি॥

মাদনঃ পুং কামদেবঃ॥ মদনবৃক্ষঃ॥ ধুস্তূরঃ। ইতি কেচিৎ॥

মাদনী স্ত্রী মাকন্দী। ইতি রাজনির্ঘণ্টঃ॥ বিজয়া। ইতি তাকপ্রকাশঃ॥

মাদৃশঃ ত্রি মৎসদৃশঃ। ইতি ব্যাকরণং॥

মাদ্রী স্ত্রী পাণ্ডুরাজপত্নী। সা মৃগীভূতস্য মুনেঃ শাপাৎ মৈথুনরহিতস্য স্বামিন আজ্ঞয়া অশ্বিনী কুমারাভ্যাং নকুল সহদেবৌ জনয়ামাস। ইতি শ্রীভাগবতমতং॥ অতিবিষা। ইতি রাজনির্ঘণ্টঃ॥

মাদ্রীপতিঃ পুং পাণ্ডুরাজঃ। ইতি শব্দরত্নাবলী॥

মাধবঃ পুং বিষ্ণুঃ। তস্য ব্যুৎপত্তি যথা। মা চ ব্রহ্মস্বরূপা যা মূলপ্রকৃতি রীশ্বরী। নারায়ণীতি বিখ্যাতা বিষ্ণুমায়া সনাতনী॥ মহালক্ষ্মী স্বরূপা চ বেদমাতা সরস্বতী। রাধা বসুন্ধরা গঙ্গা তাসাং স্বামী চ মাধবঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১০ অধ্যায়ঃ॥ তন্নাম মাহাত্ম্যং যথা। ওম্মিত্যেকাক্ষরে মন্ত্রে স্থিতঃ সর্ব্বগতো হরিঃ।

মাধবাপেতি বৈ নাম দৃষ্টং কামার্থ মোক্ষদং ॥ ইতি বহ্নিপুরাণং ॥ বৈশাখমাসঃ। ইত্যমরঃ ॥ বসন্তঃ। ইতি বিশ্বঃ ॥ মধূকবৃক্ষঃ ॥ কৃষ্ণমুদ্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাধবিকা স্ত্রী মাধবীলতা। ইত্যমরটীকায়াং ভরতঃ ॥

মাধবী স্ত্রী স্বনামখ্যাতপুষ্পলতা। তৎপর্য্যায়ঃ। অতিমুক্তঃ ২ পুণ্ড্রকঃ ৩ বাসন্তী ৪ লতা ৫। ইত্যমরঃ ॥ অতিমুক্তকঃ ৬ মাধবিকা ৭ মাধবীলতা ৮। ইতি তট্টীকায়াং ভরতঃ ॥ চন্দ্রবল্লী ৯ সুগন্ধা ১০ ভ্রমরোৎসবা ১১ ভৃঙ্গপ্রিয়া ১২ ভদ্রলতা ১৩ ভূমিমণ্ডপভূষণা ১৪। অস্যাগুণাঃ। কটুত্বং। তিক্তত্বং। কষায়ত্বং। মদগন্ধিত্বং। পিত্ত কাস ব্রণ দাহ শোষ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ মিসিঃ ॥ মধুশর্করা ॥ হউলী ॥ মদিরা। ইতি মেদিনী ॥ তুলসী। ইতি শব্দমালা ॥ দুর্গা। ইতি শব্দরত্নাবলী ॥ মাধবস্য পত্নী চ ॥

মাধবীলতা স্ত্রী স্বনামখ্যাতপুষ্পলতা। ইত্যমরটীকায়াং ভরতঃ ॥

মাধবেষ্টা স্ত্রী বারাহীকন্দঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাধবোচিতং ক্লী কক্কোলকং। ইতি রাজনির্ঘণ্টঃ ॥

মাধবোদ্ভবঃ পুং রাজাদনী। ইতি রাজনির্ঘণ্টঃ ॥

মাধকঃ পুং বর্ণসঙ্করজাতিবিশেষঃ। ইতি জটাধরঃ ॥

মাধুমতাঃ পুং কাশ্মীরদেশভবাঃ। ইতি হেমচন্দ্রঃ ॥

মাধুরং ক্লী মল্লিকা। ইতি ত্রিকাণ্ডশেষঃ ॥ মধুরসম্বন্ধে ত্রি ॥

মাধুরী স্ত্রী মদ্যং। ইতি ভূরিপ্রয়োগঃ ॥ মাধুর্য্যং। যথা। তানি স্পর্শ সুখানি তে চ তরলাঃ স্নিগ্ধা দৃশো বিভ্রমা স্তদ্বক্ত্রাম্বুজ সৌরভং স চ সুধাস্যন্দী গিরাং বক্রিমা। সা বিম্বাধর মাধুরীতি বিষয়া সঙ্গে২পি চেম্মানসং তস্যাং লগ্নসমাধি হন্ত বিরহ ব্যাধিঃ কথং বর্দ্ধতে ॥ ইতি গীতগোবিন্দে ৩ সর্গঃ ॥

মাধুর্য্যং ক্লী মধুরস্যভাবঃ। মধুরত্বং। ইতি হেমচন্দ্রঃ ॥ লাবণ্যং। যথা। রূপং কিমপ্য২নির্ব্বাচ্যং তনো মাধুর্য্য মুচ্যতে। ইত্যুজ্জ্বলনীলমণিঃ ॥ পাঞ্চালীরীতি বিশিষ্ট কাব্য গুণঃ। যথা। মধুরাং সুকুমারাঞ্চ পাঞ্চালীং কবয়ো বিদুঃ। ইতি সাহিত্যদর্পণে ৯ পরিচ্ছেদঃ ॥ তস্য

লক্ষণং যথা। চিত্ত দ্রবীভাবময়ো হ্লাদো মাধুর্য্য মুচ্যতে। সম্ভোগে করুণে বিপ্রলম্ভে শান্তেঽধিকং ক্রমাৎ॥ মূর্দ্ধ্নি বর্গান্ত্য বর্ণেন যুক্তা ষ্ট ঠ ড ঢান্ বিনা। রণৌ লঘূ চ তদ্ব্যক্তৌ বর্ণাঃ কারণতাং গতাঃ॥ অবৃত্তি রল্প বৃত্তি র্বা মধুরা রচনা তথা। ইতি সাহিত্যদর্পণে ৮ পরিচ্ছেদঃ॥

মাধ্যন্দিনং ত্রি মধ্যমং। ইতি হেমচন্দ্রঃ॥

মাধ্যমং ত্রি মধ্যেভবং। যথা। মধ্যমং মাধ্যমং মধ্যমীযং মাধ্যন্দিনঞ্চ তৎ। ইতি হেমচন্দ্রঃ॥

মাধ্যস্থ্যং ক্লী মধ্যস্থস্যভাবঃ॥ মধ্যস্থকরণং। যথা। অযাচিতারং নহি দেবদেব মদ্রিঃ সুতাং গ্রাহযিতুং শশাক। অভ্যর্থনা ভঙ্গ ভযেন সাধু র্মাধ্যস্থ্য মিষ্টে ঽপ্যবলম্বতে ঽর্থে॥ ইতি কুমারসম্ভবে ১ সর্গঃ॥

মাধ্বকং ক্লী মাধ্বীকং। ইত্যমরটীকাযাং ভানুদীক্ষিতঃ॥

মাধ্বী স্ত্রী মদ্যং। ইতি ত্রিকাণ্ডশেষঃ॥ মধ্বাদিকৃতাসুরা। ইতি রাজনির্ঘণ্টঃ॥ মধুরকণ্টকামৎস্যঃ। ইতি শব্দরত্নাবলী॥

মাধ্বীকং ক্লী মধূকপুষ্পকৃতমদ্যং। তৎপর্য্যাযঃ। মধ্বাসবঃ ২ মাধবকঃ ৩ মধু ৪। ইত্যমরঃ॥ মধুনাধ্বীক মিত্যেকং নামেতি কেচিৎ। পূর্ব্বৌ দ্বৌ পদ্মমদ্যে। পরৌ দ্বৌ দ্রাক্ষাবিকারে। ইতি ভরতঃ॥ মাদ্বীক মিতি বা পাঠঃ। ইতি রমানাথঃ॥ মাধ্বীক স্থানে মাধ্বক মিতি ভানুদীক্ষিতঃ॥

মাধ্বীকফলঃ পুং মধুনারিকেরিকঃ। ইতি রাজনির্ঘণ্টঃ॥

মাধ্বীমধুরা স্ত্রী মধুরখর্জুরিকা। ইতি রাজনির্ঘণ্টঃ॥

মান ড বিচারে॥ অর্চ্চে। ইতি কবিকল্পদ্রুমঃ॥ ড মীমাংসতে শাস্ত্রং ধীরঃ। অর্চাযাং তিবাদযো নস্য রিতি রমানাথঃ। ইতি দুর্গাদাসঃ॥

মান কি অর্চ্চে। ইতি কবিকল্পদ্রুমঃ॥ কি মানযতি মানতি। ইতি দুর্গাদাসঃ॥

মানং ক্লী পরিমাণং। তৎপর্য্যাযঃ। যৌতবং ২ দ্রুবযং ৩ পায্যং ৪ পৌতবং ৫। তত্ত্ব তুলাঙ্গুলি প্রস্থৈ স্ত্রিবিধং ভবতি। তত্র তুলাগ্রহণেনো-ন্মানাদ্যুপলক্ষ্যতে। অঙ্গুল্যা হস্তাদি। প্রস্থেন দ্রোণাদি। ইত্যমর ভরতৌ॥ প্রমাণং। ইতি মেদিনী

॥ যত্র তাড্যো বিরমত্তিকং। তদেব গুহু মুচ্যতে। তচ্চতুর্বিধং। সমং বিষমং অতীতং অনাগতঞ্চ। ইতি সঙ্গীতশাস্ত্রং ॥ * ॥ অথ মান পরিভাষা। ন মানেন বিনা যুক্তি দ্রব্যাণাং জায়তে ক্বচিৎ । অতঃ প্রযোগ কার্য্যার্থং মান মত্রোচ্যতে ময়া ॥ চরকস্য মতং বৈদ্যৈ রাদ্যৈ র্যস্মান্মতং ততঃ। বিহায সর্ব্ব মানানি মাগধং মান মুচ্যতে ॥ ত্রসরেণু র্ব্বুধৈঃ প্রোক্ত স্ত্রিংশতা পরমাণুভিঃ। ত্রসরেণুস্তু পর্য্যায নাম্না বংশীতি গদ্যতে ॥ জালান্তরগতৈঃ সূর্য্যকরৈ র্ব্বংশী বিলোক্যতে। ষড্বংশীভি র্মরীচিঃ স্যাত্তাভিঃ ষড়্ভিশ্চ রাজিকা ॥ তিসৃভী রাজিকাভিশ্চ সর্ষপঃ প্রোচ্যতে বুধৈঃ। যবো ঽষ্ট সর্ষপৈঃ প্রোক্তো গুঞ্জাস্যাত্তচ্চতুষ্টযং ॥ ষড়্ভিস্তু রক্তিকাভিঃ স্যান্মাষকো হেমধানকৌ। মাষৈ শ্চতুর্ভিঃ শাণঃ স্যাদ্ধরণঃ স নিগদ্যতে॥ টঙ্কঃ সএব কথিত স্তদ্বযংকোল মুচ্যতে। ক্ষুদ্রমো বটকশ্চৈব দ্রঙ্ক্ষণঃ স নিগদ্যতে ॥ কোল দ্বযন্তু কর্ষঃ স্যাৎ স প্রোক্তঃ পাণি মানিকঃ। অক্ষঃ পিচুঃ পাণিতলং কিঞ্চিৎ পাণিশ্চ তিন্দুকং ॥ বিড়ালপদকঞ্চৈব তথা ষোড়শিকা মতাঃ। কর মধ্যো হংসপদং সুবর্ণং কবলগ্রহং ॥ উড়ুম্বরঞ্চ পর্য্যাযৈঃ কর্ষএব নিগদ্যতে ॥ স্যাৎ কর্ষাভ্যা মর্দ্ধপলং শুক্তি রষ্টমিকা তথা ॥ শুক্তিভ্যাঞ্চ পলং জ্ঞেযং মুষ্টি রাম্রং চতুর্থিকা। প্রকুঞ্চঃ ষোড়শী বিল্বং পলমেবাত্র কীর্ত্ত্যতে॥ পলাভ্যাং প্রসৃতি র্জ্ঞেযা প্রসৃতঞ্চ নিগদ্যতে ॥ প্রসৃতিভ্যা মঞ্জলিঃ স্যাৎ কুড়বোঽর্দ্ধ শরাবকঃ॥ অষ্টমানঞ্চ স জ্ঞেযঃ কুড়বাভ্যাঞ্চ মানিকা॥ শরাবোঽষ্টপলং তদ্বজ্জ্ঞেয মত্র বিচক্ষণৈঃ॥ শরাবাভ্যাং ভবেৎ প্রস্থ শ্চতুপ্রস্থৈ স্তথাঢকঃ। ভাজনং কাংস্যপাত্রঞ্চ চতুঃষষ্টি পলশ্চ সঃ ॥ চতুর্ভি রাঢকৈ র্দ্রোণঃ কলশো নল্বণোন্মণঃ ॥ উন্মানশ্চ ঘটো রাশি র্দ্রোণ পর্য্যায সংজ্ঞিতঃ। দ্রোণাভ্যাং সূর্প কুম্ভৌ চ চতুঃষষ্টি শরাবকঃ। সূর্পাভ্যাঞ্চ ভবেদ্দ্রোণী বাহো গোণী চ সা স্মৃতা ॥ দ্রোণী চতুষ্টযং খারী কথিতা সূক্ষ্ম বুদ্ধিভিঃ। চতুঃসহস্র পলিকা ষণ্ণবত্যধিকাচ সা ॥ পলানাং দ্বিসহস্রঞ্চ ভার একঃ প্রকীর্ত্তিতঃ। তুলা পলশতং জ্ঞেযা সর্ব্ব ত্রৈবৈষ নিশ্চযঃ মাষটঙ্কাক্ষ বিল্বানি কুড়বঃ প্রস্থ মাঢকং। রাশি র্গোণী খারিকেতি যথো-

স্তুর চতুর্গুণাঃ॥*॥মাগধ পরিভাষা॥ যা° ষড়্ রক্তিকো মাষ শতুর্বিংশতি রক্তিক ষ্টঙ্কঃ যন্বতি রক্তিকঃ কর্ষঃ। অয়° চরকসম্মতঃ॥ সুশ্রুতমতে। পঞ্চরক্তিকো মাষো বিংশতি রক্তিক ষ্টঙ্কো হশীতিরক্তিকঃ কর্ষঃ। অথ নেব কলিঙ্গপরিভাষাযা মপি। যত্ত্বত্রাষ্ট রক্তিকো মাষো দ্বাত্রিংশদ্রক্তিক ষ্টঙ্কঃ। মাষ্কটঙ্কদ্বয় মিতঃ কর্ষঃ॥গুঞ্জাদি মানা মারভ্য যাবৎ স্যাৎ কুড়ব স্থিতিঃ। দ্রবার্দ্র শুষ্ক দ্রব্যাণাং তাবন্মানং সমং মতং॥প্রস্থাদি মান মারভ্য দ্বিগুণন্ত দ্রবার্দ্রযোঃ। মানং তথা তুলায়াস্তু দ্বিগুণং ন ক্বচিৎ স্মৃতং॥ মৃদ্বৃক্ষ বেণু লোহাদে র্ভাণ্ডং যচ্চতুরঙ্গুলং। বিস্তীর্ণঞ্চ তথোচ্চঞ্চ তন্মানং কুড়বং বদেৎ॥ ইতি মাগধমানং॥*॥ অথ কালিঙ্গমানং। যতো মন্দাগ্নয়ো হ্রস্বা হীনসত্বা নরাঃ কলৌ। অতস্তু মাত্রা তদ্যোগ্যা প্রোচ্যতে সুজ্ঞ সম্মতা॥ যবো দ্বাদশভি র্গৌ রৈঃ সর্ষপৈঃ প্রোচ্যতে বুধৈঃ। যবদ্বযেন গুঞ্জাস্যাত্রিগুঞ্জো বল্ল উচ্যতে। মাষো গুঞ্জাভি রষ্টাভিঃ সপ্তভি র্বা ভবেৎ ক্বচিৎ॥চতুর্ভি র্মাষকৈঃ শাণঃ স নিষ্ক ষ্টঙ্ক এব চ। গদ্যাণো মাষকৈঃ ষড়্ভিঃ কর্ষঃ স্যাদ্দশ মাষিকঃ॥ চতুঃ কর্ষৈঃ পলং প্রোক্তং দশশাণ মিতং বুধৈঃ। চতুঃপলৈশ্চ কুড়বঃ প্রস্থাদ্যাঃ পূর্ববন্মতাঃ॥ স্থিতি নাস্ত্যেব মাত্রাণাং কাল মগ্নিং বয়ো বলং। প্রকৃতিং দোষ দেশৌ চ দৃষ্ট্বা মাত্রাং প্রকল্পয়েৎ॥ নাল্পং হন্ত্যৌষধং ব্যাধিং যথাম্ভো হল্পং মহানলং। অতিমাত্রঞ্চ দোষায যথা শস্যে বহূদকং॥ ইতি মানপরিভাষা। ইতি ভাবপ্রকাশঃ॥

মানঃ পুং চিত্তসমুন্নতিঃ। ইত্যমরঃ॥ চিত্তস্য সমুন্নতি রক্ষুদ্রতা মানঃ। সাঙ্গে ধনাদ্যুৎকর্ষেণাত্মনি চিত্তোন্নতি মান ইতি। মৎসমোনাস্তীতি মননং মানঃ। ইতি তট্টীকাযাং ভরতঃ॥ আত্মনি পূজ্যতা বুদ্ধিঃ। ইতি নীলকণ্ঠঃ॥ অনুরক্তযো র্দম্পত্যো র্ভাব বিশেষঃ। যথা। দম্পত্যো র্ভাবএকত্র সতো রপ্যনুরক্তযোঃ। স্বাভীষ্টাশ্লেষ বীক্ষাদি নিরোধী মান উচ্যতে॥ ইত্যুজ্জ্বল নীলমণিঃ॥ পূজ্যত্বং। যথা। অধমাঃ কলি মিচ্ছন্তি সন্ধি মিচ্ছন্তি মধ্যমাঃ। উত্তমা মান মিচ্ছন্তি মানো হি মহতাং ধনং॥ মাদৃশো হিবুল মর্থস্য মানে ম্লানে ধনেন কিং।

প্রভুষ্টমাত্র দর্পস্য কিং ধনেন কিমা কুষ্মাণ্ডা অধমা ধন মিচ্ছন্তি ধনমানৌ হি মধ্যমাঃ। উত্তমা মানমিচ্ছন্তি মানো হি মহতাং ধনং॥ ইতি গারুড়ে ১১৫ অধ্যায়ঃ॥ প্রিয়াপরাধ সূচিকাচেষ্টা মানঃ। স চ লঘু র্মধ্যমো গুরু শ্চেতি। অল্পাপনেযো লঘুঃ। কষ্টাপনেযো মধ্যমঃ। কষ্টতমাপনেযো গুরুঃ। অসাধ্যস্তু রসাভাসঃ। অপরস্ত্রী দর্শনাদি জন্মা লঘুঃ। গোত্রস্খলনাদি জন্মা মধ্যমঃ। অপরস্ত্রী সম্ভোগ দর্শনাদি জন্মা গুরুঃ। অন্যথা সিদ্ধ স্বতূহলাদ্যপনেযো লঘুঃ। অন্যথা বাদশপথাদ্যপনেযো মধ্যমঃ। চরণপাত ভূষণ দানাদ্যপনেযো গুরুঃ॥ অপরস্ত্রী দর্শনাদি জন্মা যথা। স্বেদাম্বুভিঃ ক্বচন পিচ্ছিল মঙ্গ ভূমৌ ক্ষামোদরি ক্বচন কণ্টকিত প্রকান্তি। অন্যাং বিলোকয়তি ভাসযতি প্রিযেপি মানঃ ক্বধাস্যতি পদং তব তন্ন বিদ্মঃ॥ গোত্রস্খলনাদি জন্মা যথা। যদ্গোত্র স্খলনং তত্র ভ্রমো যদি ন মন্যতে। রোমালি ব্যাল সংস্পর্শং শপথং তন্বি কারয়॥ অপরস্ত্রী সম্ভোগদর্শনাদি জন্মা যথা। দয়িতস্য নিরীক্ষ্য ভালদেশং চরণাল ক্তকপিঞ্জরং সপত্ন্যাঃ। সুদৃশো নয়নস্য কোণ ভাসঃ শ্রুতি মুক্তাঃ শিখরোপমা বভূবুঃ॥ ইতি রসমঞ্জরী॥ গ্রহঃ। ইতি মেদিনী॥

মানকং ক্লী পুং মাণকং। মানকচু ইতি ভাষা। যথা। কচ্বীতু পিচ্ছিলা প্রোক্তা বিস্তীর্ণপর্ণ মানকে। ইতি শব্দচন্দ্রিকা॥ স্থূলকন্দো গ্রাম্যকন্দঃ স্থূলপত্রস্তু মানকঃ। ইতি রত্নমালা॥ অস্য গুণাঃ। মানকং স্বাদু শীতঞ্চ গুরু শোথহৃৎ কটু। ইতি রাজবল্লভঃ॥ অপি চ। মানকঃ স্যান্মহাপত্রঃ কথ্যতে তদ্‌গুণা অথ। মানকঃ শোথহৃচ্ছীতঃ পিত্তরক্তহরো লঘুঃ॥ ইতি ভাবপ্রকাশঃ॥

মানগ্রন্থিঃ পুং অপরাধঃ। ইতি হারাবলী॥

মানধানিকা স্ত্রী কর্কটী। ইতি শব্দমালা॥

মাননীযং ত্রি মান্যং। যথা। মানো মান্যোসি বৃক্ষেষু মাননীযঃ সুরাসুরৈঃ। স্থাপযামি মহাদেবীং মানং দেহি গৃহে মম॥ ইতি দুর্গোৎসব পদ্ধতিঃ॥

মানরন্ধ্রা স্ত্রী তাম্রী। তাঁবী ইতি ভাষা। যথা। যামঘোষো ঘণ্টা-

স্ত্রীস্যাম্মানরন্ধ্রা বিকালিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

মানবঃ পুং মনোরপত্যং। মনুষ্যঃ। ইত্যমরঃ॥ বালঃ। ইতি শব্দরত্নাবলী ॥

মানবর্জিতঃ ত্রি মানরহিতঃ॥ নীচঃ। ইতি ধরণিঃ॥

মানবী স্ত্রী মনুষ্যস্ত্রীজাতিঃ। তৎপর্য্যায়ঃ। মানব্যা ২ মানুষী ৩ নারী ৪। ইতি শব্দরত্নাবলী॥ শাসনদেবতাবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ স্বায়ম্ভুবমনুকন্যা। ইতি মহাভারতং ॥

মানবৌঘঃ পুং তারাবিদ্যাবা পীঠস্যান্তরে বায়ব্যাদীশ পর্য্যন্তং পূজ্য গুরুপঙ্‌ক্তিবিশেষঃ। যথা। তারাবত্যম্ব ভানুমত্যম্ব জয়াম্ব বিদ্যাম্ব মহোদর্য্যম্ব সুখানন্দনাথ পরানন্দনাথ পারিজাতানন্দনাথ জলেশ্বরানন্দনাথ বিরূপাক্ষানন্দনাথ ফেরব্যম্বাঃ পূজয়েৎ। এতে মানবৌঘাঃ। তথাচ তন্ত্রে। অথ তারা গুরূন্ বক্ষ্যে দৃষ্টাদৃষ্ট ফলপ্রদান্। ঊর্দ্ধকেশো ব্যোমকেশো নীলকণ্ঠো বৃষধ্বজঃ ॥ দিব্যৌঘাঃ সিদ্ধিদা বৎস সিদ্ধৌঘান্ শৃণু যত্নতঃ। বশিষ্ঠঃ কূর্ম্মনাথশ্চ মীননাথো মহেশ্বরঃ। হরিনাথো মানবৌঘান্ শৃণু বক্ষ্যামি তদ্গুরূন্। তারাবতী ভানুমতী জয়াবিদ্যা মহোদরী ॥ সুখানন্দঃ পরানন্দঃ পারিজাতঃ জলেশ্বরঃ। বিরূপাক্ষঃ ফেরবী চ কথিতং তারিণীকুলং ॥ আনন্দনাথ শব্দান্তা গুরবঃ সর্ব্বসিদ্ধিদাঃ। স্ত্রিয়োপি গুরুরূপাশ্চ অম্বান্তাঃ পরিকীর্ত্তিতাঃ॥ ইতি তন্ত্রসারঃ॥

মানব্যং ক্লী মাণবসমূহঃ। মাণবানাং সমূহো মাণব্যং বিকার সংঘেতিষ্যঃ মাণবো বালঃ মুগ্ধন্যমধ্যঃ দন্ত্যমধ্য ইত্যেকে। ইত্যমরটীকায়াং ভরতঃ ॥

মানসং ক্লী মনঃ। ইত্যমরঃ॥ তস্য গুণা যথা। পরাপরত্বং সংখ্যাদ্যাঃ পঞ্চ বেগশ্চ মানসে। ইতি ভাষাপরিচ্ছেদঃ॥*॥ মানসতাপো যথা। কাম ক্রোধ ভয় দ্বেষ লোভ মোহ বিষাদজঃ। শোকাসূয়াবমানের্ষ্যামাৎসর্য্যাদি ভবস্তথা ॥ মানসোঽপি দ্বিজশ্রেষ্ঠ তাপো ভবতি নৈকধা। ইতি বিষ্ণুপুরাণে ৬ অংশে ৫ অধ্যায়ঃ॥ * ॥ ত্রিবিধ মানস কর্ম্ম যথা। পরদ্রব্যেষ্বভিধ্যানং মনসানিষ্ট চিন্তনং। বিতথাভিনিবেশশ্চ ত্রিবিধং কর্ম্ম মানসং ॥ ইতি তি-

থ্যাদিতঃ ॥ * ॥ মানস রোগা যথা। কাম ক্রোধ লোভ মোহ ভ যাভিমান দৈন্য পৈশূন্য বিষাদে- র্ষ্যাসূয়া মাৎসর্য্য প্রভৃতয়ঃ ॥ অথ বা। উন্মাদাপস্মার মূর্চ্ছা ভ্রম তমঃ সংন্যাস প্রভৃতয়ঃ। ইতি ভাবপ্র কাশঃ ॥ * ॥ সরোবরবিশেষঃ। ইতি মেদিনী ॥ স চ কৈলাশে ব্রহ্মণা নির্ম্মিতঃ। যথা। কৈলাশ-

শৃঙ্গস্পো মানবেন্দ্রেণ ক

ল্পিতঃ। যক্ষ রাক্ষস গন্ধর্ব্বৈ র্নিত্যং সেবিত কন্দরঃ ॥ শ্রীমান্মনোহ- রৈশ্চৈব নিত্যং পুষ্পিত পাদপঃ। হেমপুষ্কর সংছন্নং তেন বৈখান- সং সরঃ ॥ কল্পিতং মানসঞ্চৈব রা- জহংস নিষেবিতং। ইতি মহাভার- তে হরিবংশে নারসিংহে ২৩২ অ- ধ্যায়ঃ ॥ অপিচ। কৈলাশপর্ব্বতে রাম মনসা নির্ম্মিতং পরং। ব্রহ্মণা নরসার্দ্দূল তেনেদং মানসং সরঃ। তস্মাৎ সুস্রাব সরসঃ সাযোধ্যা মুপগূহতে। সরঃ প্রবৃত্তা সরয়ূঃ পুণ্যা ব্রহ্মসরশ্চ্যুতা ॥ ইতি রামা- য়ণে আদিকাণ্ডে ২৪ সর্গঃ ॥ * ॥ মনোভবে ত্রি। যথা। সঙ্কল্পঃ কর্ম্ম মানসং। ইত্যমরঃ ॥ বিষয়েষ্বতি রাগো মানসো মল উচ্যতে। ইত্যেকাদশীতত্ত্বং ॥ অনঙ্গানঙ্গ- পীড়েব মনেয়ং মানসী ব্যথা। ইতি প্রাঞ্চঃ ॥

মানসজপঃ পুং ধিয়া বর্ণশ্রেণ্যুচ্চারণং। যথা। ধিয়া যদক্ষরশ্রেণীং বর্ণ স্বর পদাত্মিকাং। উচ্চরেদর্থ মুদ্দিশ্য মানসঃ স জপঃ স্মৃতঃ ॥ তজ্জপে নিয়মো নাস্ত্যেব। তথাচ। অশু- চি র্বাশুচি র্বাপি গচ্ছং স্তিষ্ঠন্ স্বপ- ন্নপি। মন্ত্রৈকশরণো বিদ্বান্ মন- সৈব সমভ্যসেৎ ॥ ন দোষো মান- সে জাপ্যে সর্ব্বদেশে ঽপি সর্ব্বদা। ইতি তন্ত্রসারঃ ॥

মানসতীর্থং ক্লী রাগাদিরহিতংমনঃ। যথা। সূত উবাচ। তীর্থানি কথি- তান্যেবং ভৌমানি মুনি সত্তম।

হ তীর্থানি ফলদানি বি-

শেষতঃ ॥ মনো নির্ম্মল তীর্থং হি রাগাদিভি রনাবিলং। ইতি নার- সিংহপুরাণে ৪৬অধ্যায়ঃ ॥

মানসপূজা স্ত্রী মনোরচিতদ্রব্যকর ণক সপর্য্যা। যথা। হৃৎপদ্মমধ্যে দেবীং বিভাব্য হৃৎসুধী পাত্র সং- স্থেন সহস্রারামৃতেন পাদ্যং দেব্যা শ্চরণে দদ্যাৎ। ততো মনশ্চার্য্যং দত্ত্বা সহস্রদলপদ্ম ভৃঙ্গার গলিত পরমামৃতজলেনাচমনীয়ং মুখে।

পঞ্চবিংশতি তত্ত্বেন গন্ধঞ্চ। অহিংসাং বিজ্ঞানং ক্ষমাং দযাং অলোভং অমোহং অমাৎসর্য্যং অমাযাং অনহঙ্কারং অরাগং অদ্বেষং ইন্দ্রিযাণি দ্বাদশ এতানি পুষ্পাণি চ প্রদাপযেৎ। ভূত স্তেজো রূপং দীপং বাযুরূপং ধূপং দদ্যাৎ। অম্বরং চামরং দর্পণং সূর্য্যং চন্দ্রং ছত্রং পদ্মন্তু মেখলাং আনন্দং হারমুত্তমং অনাহত ধ্বনিময়ীং ঘণ্টাং নিবেদযেৎ। ততঃ সপ্তারসাম্বুধিং মাংস পর্ব্বতং বুক্ষাণ্ড পূরিতং পাযসঞ্চ দত্বা। মনো নর্ত্তন সত্তালৈঃ শৃঙ্গারাদি রসোদ্ভবৈঃ। নৃত্যৈ গীতৈশ্চ বাদ্যৈশ্চ তোষযেৎ পরমেশ্বরীং। এবং সংপূজ্য। অভেদেন জপঃ কার্য্যঃ। ইতি তন্ত্রসারে ত্রিপরা প্রকরণং॥ * ॥ মানসে গুরু পূজা যথা। ততো মানস গন্ধাদ্যৈঃ পূজযেৎ স্ব স্ব মুদ্রযা। কনিষ্ঠা পৃথিবীতত্ত্বং তদ্যোগাদ্ গন্ধযোজনং॥ অঙ্গুষ্ঠো গগনং তত্ত্বং তেনৈব পুষ্পযোজনং। তর্জ্জনী বাযুতত্ত্বং স্যাদ্ধূপং তেনৈব যোজযেৎ॥ অনামা জলতত্ত্বং স্যাত্তেনৈব যোজযেচ্চরুং। ততস্তু বাগ্ভবং জপ্যাদষ্টোত্তরশতং সুধীঃ॥ জপং সমর্প্য ভক্ত্যা চ পুংমেদ্দণ্ডতদ্ভুবি। ইতি নীলতন্ত্রং

॥ * ॥ অপিচ। মিথুনং চিন্তযিত্বা তু মানসৈ রূপচারকৈঃ। ভৌতিকৈঃ পূজযেদ্বিদ্বান্ মুদ্রা মন্ত্র সমন্বিতৈঃ॥ ভূম্যাকাশ মরুদ্বহ্নি বারিমন্ত্রৈঃ সবিন্দুকৈঃ। কনিষ্ঠাঙ্গুলি তর্জ্জন্যৌ মধ্যমানামিকে তথা॥ অঙ্গুষ্ঠেন সমাযোগান্মুদ্রাঃ পঞ্চ প্রকীর্ত্তিতাঃ। পৃথিব্যাত্মক গন্ধঃ স্যাদাকাশাত্মক পুষ্পকং॥ ধূপো বায়্বাত্মকঃ প্রোক্তো দীপো বহ্ন্যাত্মকঃ পরঃ। রসাত্মকঞ্চ নৈবেদ্যং পূজা পঞ্চোপচারিকা॥ ততস্তু বাগ্ভবং জপ্যাদষ্টোত্তরশতং সুধীঃ। ইত্যম্বাদবদঃ॥ * ॥ অন্যচ। মানসৈ রূপচারৈশ্চ সংপূজ্য কল্পযেন্মুদা। গন্ধং ভূম্যাত্মকং দদ্যাদ্ভাব পুষ্পং ততঃ পরং॥ ধূপং বায়্বাত্মকং দেযং তেজসা দীপমেব চ। নৈবেদ্যমমৃতং দদ্যাৎ পানীযং বরুণাত্মকং॥ অম্বরং মুঞ্জরং দদ্যাচ্চামরং ছত্রমেব চ। তত্তন্মুদ্রাবিধানেন সংপূজ্যাত্ম গুরুং জপেৎ॥ যথাশক্তি জপং কৃত্বা সমাপ্য কবচং পঠেৎ। ইতি কঙ্কালমালিনীতন্ত্রং॥ * ॥ পূজা ক্রমস্তু। নিজগুরুং ধ্যাত্বামুকানন্দনাথামুকশক্ত্যম্ব শ্রীপাদুকাং পূজযামীতি মানসৈ পঞ্চোপচারৈঃ সংপূজ্য সুমৈ রর্চযেৎ। কনিষ্ঠাভ্যাং লং

পৃথিব্যাত্মকং গন্ধং সমর্পযামি নমঃ। অঙ্গুষ্ঠাভ্যাং হং আকাশাত্মকং পুষ্পং সমর্পযামি নমঃ। তর্জ্জনীভ্যাং যং বায্বাত্মকং ধূপং সমর্পযামি নমঃ। মধ্যমাভ্যাং রং বহ্ন্যাত্মকং দীপং সমর্পযামি নমঃ। অনামিকাভ্যাং বং অমৃতাত্মকং নৈবেদ্যং সমর্পযামি নমঃ। ইতি কমলাবতার কল্পসূত্রটীকাযাং তৃতীয়কাণ্ডং॥

মানসব্রতং ক্লী অহিংসাদি। যথা। অহিংসা সত্যমস্তেযং ব্রহ্মচর্য্যমকল্পতা। এতানি মানসান্যাহুর্ব্রতানি তু ধরাধরে॥ ইতি বরাহপুরাণং॥

মানসালযঃ পুং হংসঃ। ইতি রাজনির্ঘণ্টঃ॥

মানসূত্রং ক্লী স্বর্ণাদিনির্ম্মিতকটিসূত্রং। গোট ইতি ভাষা। ইতি ধনঞ্জযঃ॥

মানসিকং ত্রি মনোভবং। মানসশব্দাৎ ষ্ণিক প্রত্যযেন নিষ্পন্নং॥

মানসী স্ত্রী বিদ্যাদেবীবিশেষঃ। ইতি হেমচন্দ্রঃ॥ মনোভবা চ॥

মানসৌকাঃ পুং হংসঃ। ইত্যমরঃ॥

মানিকা স্ত্রী মদ্যং। ইতি শব্দরত্নাবলী॥ অষ্টপলপরিমাণং। শের ইতি ভাষা। ইতি বৈদ্যকপরিভাষা॥

মানিনী স্ত্রী ফলীবৃক্ষঃ। ইতি মেদিনী॥ মানবতী চ॥

মানী ত্রি মানবিশিষ্টঃ। ইতি মেদিনী॥ সিংহঃ। ইতি রাজনির্ঘণ্টঃ॥

মানুষঃ পুং মনুষ্যঃ। ইত্যমরঃ॥

মানুষিকং ত্রি মনুষ্যস্যকর্ম্মাদি। মনুষ্যস্যেদমিতীদমর্থে ষ্ণিক প্রত্যযেন নিষ্পন্নং॥

মানুষী স্ত্রী মনুষ্যস্ত্রীজাতিঃ। যথা। মনুষ্যী মানুষী নারী মানবী মানবস্ত্রিযাং। ইতি শব্দরত্নাবলী॥ চিকিৎসাবিশেষঃ। যথা। আসুরী মানুষী দৈবী চিকিৎসা সা ত্রিধা মতা। ইতি শব্দচন্দ্রিকা॥

মানুষ্যং ক্লী মনুষ্যস্যভাবঃ। মনুষ্যত্বং॥ মনুষ্যশরীরং। যথা। মানুষ্যে কদলীস্তম্ভে নিঃসারে সারমার্গণং। যঃ করোতি স সংমূঢ়ো জলবুদ্বুদসন্নিভে॥ ইতি শুদ্ধিতত্ত্বে যাজ্ঞবল্ক্যবচনং॥

মানুষ্যকং ক্লী মনুষ্যসমূহঃ। ইত্যমরঃ॥

মানোজ্ঞকং ক্লী মনোজ্ঞতা। মনোজ্ঞস্য ভাব ইত্যর্থে কণ প্রত্যযেন নিষ্পন্নং॥

মান্দ্যং ক্লী রোগঃ। ইতি হেমচন্দ্রঃ॥ মন্দতা চ॥

মান্ধাতা পুং যুবনাশ্বরাজপুত্রঃ । তৎপর্য্যায়ঃ । যুবনাশ্বজঃ ২ । ইতি হেমচন্দ্রঃ ॥ তদ্বিবরণং যথা । তস্মাৎ প্রসেনজিৎ ততো যুবনাশ্বোঽভবৎ । তস্য চ পুত্রস্যাতিনির্বেদান্মুনীনামাশ্রমমণ্ডলে নিবসতঃ কৃপালুভিস্তৈর্মুনিভিরপত্যোৎপাদনায়েষ্টিঃ কৃতা । তস্যাঞ্চার্দ্ধরাত্রে নিবৃত্তায়াং মন্ত্রপূতজলপূর্ণকলসং বেদীমধ্যে নিবেশ্য তে মুনয়ঃ সুষুপুঃ । সুপ্তেষু চ তেষ্বতীব তৃট্‌পরীতঃ স ভূপালস্তমাশ্রমমণ্ডলং বিবেশ । সুপ্তাংশ্চ তানৃষীন্নৈবোত্থাপয়ামাস । তচ্চ কলসজলমপরিমেয়মাহাত্ম্যং মন্ত্রপূতং পপৌ । প্রবুদ্ধাশ্চ ঋষয়ঃ পপ্রচ্ছুঃ । কেনৈতন্মন্ত্রপূতং বারি পীতং । অত্র হি পীতে রাজ্ঞোঽস্য যুবনাশ্বস্য পত্নী মহাবলপরাক্রমং পুত্রং জনয়িষ্যতি । ইত্যাকর্ণ্য স রাজা অজানতা ময়া পীতমিত্যাহ । গর্ভশ্চ যুবনাশ্বোদরেঽভবৎ । ক্রমেণ চ ববৃধে । প্রাপ্তসময়শ্চ দক্ষিণং কুক্ষিমবনীপতের্নির্ভিদ্য নিশ্চক্রাম । নচাসৌ রাজা মমার । জাতো নামৈষ কং ধাস্যতীতি তে মুনয়ঃ প্রোচুঃ । অথাগম্য দেবরাড়ব্রবীৎ । মাময়ং ধাস্যতি । ততোঽসৌ মান্ধাতা-নামতোঽভবৎ । বক্ত্রে চাস্য প্রদেশিনী দেবেন্দ্রেণ ন্যস্তা তাং পপৌ । তাঞ্চামৃতস্রাবিণী মাসাদ্যাহ্নৈবৈকেন-ব্যবর্দ্ধত । স তু মান্ধাতা চক্রবর্ত্তী সপ্তদ্বীপাং মহীং বুভুজে । ভবতি চাত্র শ্লোকঃ । যাবৎ সূর্য্য উদেতিস্ম যাবচ্চ প্রতিতিষ্ঠতি । সর্ব্বং তদ্যৌবনাশ্বস্য মান্ধাতুঃ ক্ষেত্রমুচ্যতে ॥ মান্ধাতা শশবিন্দুদুহিতরং বিন্দুমতীমুপযেমে । পুরুকুৎসমম্বরীষং মুচুকুন্দঞ্চ তস্যাং পুত্রত্রয়মুৎপাদয়ামাস । পঞ্চাশচ্চ দুহিতরস্তস্যামেব তস্য নৃপতের্বভূবুঃ । ইতি বিষ্ণুপুরাণে ৪ অংশে ২ অধ্যায়ঃ ॥

মান্যঃ ত্রি অর্চ্চ্যঃ । তৎপর্য্যায়ঃ । পূজ্যঃ ২ প্রতীক্ষ্যঃ ৩ ভগবান্ ৪ ভট্টারকঃ ৫ । ইতি জটাধরঃ ॥

মান্যস্থানং ক্লী পূজ্যত্বকারণং । যথা । বিত্তং বন্ধুর্বয়ঃ কর্ম্ম বিদ্যা ভবতি পঞ্চমী । এতানি মান্যস্থানানি গরীয়ো যদ্যদুত্তরং ॥ পঞ্চানাং ত্রিষু বর্ণেষু ভূয়াংসি গুণবন্তি চ । যত্র স্যুঃ সোঽত্র মানার্হঃ শূদ্রোঽপি দশমীং গতঃ ॥ ইতি মানবে ২ অধ্যায়ঃ ॥

(কৌর্ম্মে ১১ অধ্যায়েঽপ্যেবং ॥

মান্যা স্ত্রী নরুম্মালা। যথা। অনির্ম্মান্যা তু নান্যা চ নরুম্মালা চ মোহনা। ইতি শব্দমালা॥ পূজ্যা চ॥

মাপত্যঃ পুং কামঃ। ইতি হলায়ুধঃ॥

মাপনঃ পুং তুলঃ। ইতি শব্দচন্দ্রিকা॥ পরিমাণেক্লী॥

মামকং ত্রি মদীয়ং। ইতি মেদিনী॥ মমতাযুক্তঃ। ইতি শব্দমালা॥

মামকঃ পুং মাতুলঃ। ইতি মেদিনী॥ কৃপণঃ। ইতি শব্দমালা॥

মামকীনং ত্রি মদীয়ং। মমেদমিত্যর্থে নীনে কে লুকি অমদ একত্বাস্মদাদেশে অস্য চ মমকাদেশে বৃদ্ধৌ মামকীনং। ইতি দুর্গাদাসঃ॥

মামঃ পুং পীতাম্বরঃ॥ অমরঃ। ইতি মেদিনী॥

মায়া স্ত্রী ইন্দ্রজালাদিঃ। তৎপর্য্যায়ঃ। শাম্বরী২। ইত্যমরঃ॥ মাতি বিশ্বমস্যাং মনীষাদিঃ। শম্বরস্য দৈত্যস্য ইয়ং শাম্বরী তেন প্রাড়নির্ম্মিতত্বাৎ। ইতি ভরতঃ॥ ✽॥ বুদ্ধিঃ। ইতি মেদিনী॥ কৃপা॥ দম্ভঃ। ইতি নানার্থে হেমচন্দ্রঃ॥ শাঠ্যং। যথা মায়া তু শঠতা শাঠ্যং অসৃতি নিকৃতিশ্চ সা॥ রাজ্ঞাং ক্ষুদ্রোপায়বিশেষঃ। যথা। মায়োপেক্ষেন্দ্রজালানি ক্ষুদ্রোপায়া ইমে ত্রয়ঃ॥ লক্ষ্মীঃ। ইতিচ হেমচন্দ্রঃ॥ বুদ্ধমাতা। ইত্যমরকোষে মায়াদেবীসুত শব্দ দর্শনাৎ॥ দুর্গা। যথা। দুর্গে শিবে ঽভয়ে মায়ে নারায়ণি সনাতনি। জয়ে মে মঙ্গলং দেহি নমস্তে সর্ব্বমঙ্গলে॥ ব্রাজন্ শ্রীবচনোমাশ্চ যাশ্চ প্রাপণ বাচকঃ। তাং প্রাপয়তি যা সদ্যঃ সা মায়া পরিকীর্ত্তিতা॥ মাশ্চ মোহার্থ বচনো যাশ্চ প্রাপণ বাচকঃ। তং প্রাপয়তি যা নিত্যং সা মায়া পরিকীর্ত্তিতা॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২৭ অধ্যায়ঃ॥ অপিচ। বিচিত্র কার্য্য কারণা অচিন্তিত ফলপ্রদা। স্বপ্নেন্দ্রজাল বল্লোকে মায়া তেন প্রকীর্ত্তিতা॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥ ✽॥ বিসদৃশ প্রতীতি সাধনং মায়া। ইতি নাগোজী ভট্টঃ॥ অঘটন ঘটন পটীয়সী মায়া। ইতি কেচিৎ॥ ঈশ্বরশক্তিঃ। তস্যা নামান্তরং যথা। প্রকৃতিঃ২ অবিদ্যা ৩ অজ্ঞানং ৪ প্রধানং ৫ শক্তিঃ ৬ অজা ৭। সৃষ্টিকালে ভগবান্ আদৌ মায়াং প্রকাশযামাস। সা দ্রষ্টৃ দৃশ্যানুসন্ধানরূপা কার্য্যকারণরূপা চ।

সত্ত্ব রজ স্তমো গুণময়ী। তস্যাঃ শক্তিদ্বয়ং আবরণং বিক্ষেপশ্চ। তস্যা মায়ায়া মহত্তত্ত্বং জাতং। তস্মাদহঙ্কারঃ। তস্মাৎ পঞ্চভূতং। তস্মাৎ ব্রহ্মাণ্ডং। ইতিশ্রীভাগবতমতং॥ ৩॥ বিষ্ণু মায়া স্বরূপং যথা। যা নেতাং ভাষসে হে ত্বম মায়েতি নিত্যশঃ। কা মায়া কীদৃশী বিষ্ণো কিংবা মায়েতি চোচ্যতে॥ জ্ঞাতু মিচ্ছামি মায়ার্থং রহস্যং পরমুত্তমং। তত স্তস্যা বচঃ শ্রুত্বা বিষ্ণুর্মায়া করণ্ডকঃ॥ প্রহস্য মধুরং বাক্যং প্রত্যুবাচ বসুন্ধরাং। ভূমে না পৃচ্ছ মায়াং মে যস্মাং পৃচ্ছসি সাদরং॥ বৃথা ক্লেশং কিমর্থং ত্বং প্রাপ্স্যসে মদ্বিলোকনাৎ। অদ্যাপি মাং ন জানন্তি রুদ্রেন্দ্রাঃ সপিতামহাঃ॥ মম মায়া বিশালাক্ষি কিং পুন স্ত্বং বসুন্ধরে। পর্জ্জন্যো বর্ষতে যত্র তজ্জলেন প্রপূর্য্যতে॥ দেশো নির্জ্জলতাং যাতি এষা মায়া মম প্রিয়ে। সোমো হপি হীয়তে পক্ষে পক্ষে বাপি বিবর্দ্ধতে॥ অমায়াং স ন দৃশ্যেত মায়েয়ং মম সুন্দরি। হেমন্তে সলিলং কূপে উষ্ণং ভবতি তত্ত্বতঃ॥ ভবেচ্চ শীতলং গ্রীষ্মে মায়েয়ং মম তত্ত্বতঃ। পশ্চিমাং দিশ মাস্থায় যদস্তং যাতি ভাস্করঃ॥ উদেতি পূর্ব্বতঃ প্রাত র্মায়েয়ং মম সুন্দরি। শ্লেষ্মণীতশ্চৈব শুক্রঞ্চ উভে প্রাণিষু সংস্থিতে॥ গর্ব্ভে চ জায়তে জন্তু র্মম মায়ৈব চোত্তমা। জীবঃ প্রবিশ্য গর্ব্ভে ত সুখ দুঃখানি বিন্দতি॥ জাতশ্চ বিস্মরেৎ সর্ব্ব মেষা মায়া মনোত্তমা। আত্ম কর্ম্মাশ্রিতো জীবো নষ্ট সংজ্ঞো গতস্পৃহঃ॥ কর্ম্মণা নীয়তেন্যত্র মায়ৈষা মমচোত্তমা। শুক্র শোণিত সংযোগাজ্জায়ন্তে যদি জন্তবঃ॥ অঙ্গুল্য শ্চরণৌ চৈব ভুজৌ শীর্ষং কটি স্তথা। পৃষ্ঠং তথোদরঞ্চৈব দন্তৌষ্ঠপুট নাসিকা॥ কর্ণৌ নেত্র কপোলৌ চ ললাটং জিহ্বয়া সদা। এতয়া মায়য়া যুক্তা জায়ন্তে যদি জন্তবঃ॥ তস্যৈব জীর্য্যতে জন্তো ভুক্তং পীতঞ্চ বহ্নিনা। অয়ঞ্চ স্রবতে জন্তু রেষা মায়া মমোত্তমা॥ শব্দঃ স্পর্শশ্চ রূপঞ্চ রসো গন্ধশ্চ পঞ্চমঃ। অস্মাৎ প্রবর্ত্ততে জন্তু রেষা মায়া মম প্রিয়ে॥ সর্ব্বত্তুষু নিজাকারঃ স্থাবরে জঙ্গমে তথা। তত্ত্বং ন জ্ঞায়তে তস্য মায়ৈষা মম সুন্দরি॥ আপো দিব্যা স্তথা ভৌমা আপো যেষু প্রতিষ্ঠিতাঃ। নচ বৃদ্ধিং প্রযান্ত্যত্র মায়ৈষা পরমা মম। বৃষ্টৌ বহূদকাঃ সর্ব্বে পল্বলানি সরাংসি চ॥ গ্রীষ্মে সর্ব্বাণি শুষ্যন্তি

এতন্মায়া বলং মম। হিনগছিখরা- ক্তা নাম্না মন্দাকিনী নদী ॥ গাঙ্গ- তা সা ভবেদ্গঙ্গা মায়ৈষা মমকীর্ত্তি তা। মেঘা গৃহ্ণন্তি সলিলং লবণাৎ সলিলার্ণবাৎ॥ বর্ষন্তি মধুরং লোকে সর্ব্বং মায়া বলং মম। রোগার্ত্তা জ- ন্তবঃ কেচিৎ ভক্ষয়ন্তি মহৌষধং॥ তস্য বীর্য্যং সমাশ্রিত্য মায়াং তু বি- সৃজাম্যহং। ঔষধে দীয়মানে তু জ ন্তুঃ পঞ্চত্ব মেতি যৎ॥ নিবীর্য্য মৌ- ষধং কৃত্বা কালো ভত্বা হরাম্যহং॥ প্রথমং জায়তে গর্ভঃ পশ্চাজ্জায়েত বৈ পুমান্॥ জায়তে মধ্যমং রূপং ততোপি জরয়া পুনঃ। তত ইন্দ্রিয় নাশশ্চ এতন্মায়া বলং মম॥ এক বীজাৎ প্রকীর্ণাদ্বৈ জায়ন্তে তানি ভূ রিশঃ। তত্রামৃতং বিসৃজামি মায়া যোগেন মাধবি॥ লোক এবং বিজা- নাতি গরুড়ো বহতেঽচ্যুতং। ভূত্বাবে- গেন গরুড়ো বহাম্যাত্মান মাত্মনা ॥ যা এতা দেবতাঃ সর্ব্বা যজ্ঞভাগে- ন তোষিতাঃ। মায়ামেতা মহং কৃত্বা তোষয়ামি দিবৌকসঃ॥ লোকাঃ সর্ব্বে বিজানন্তি দেবা নিত্যং মথাশি- নঃ। মায়া মেতা মহং কৃত্বা যক্ষ্যা- মি ত্রিদশান্ সদা॥ সর্ব্বোপি যজতে লোকো যষ্টারঞ্চ বৃহস্পতিং। মায়া মাঙ্গিরসীং কৃত্বা যাজয়ামি দিবৌকসঃ ॥ সর্ব্বে লোকা বিজানন্তি বরুণঃ পা- তি সাগরং। মায়ান্তু বারুণীং কৃত্বা হং রক্ষামি মহোদধিং॥ সর্ব্বে লো- কা বিজানন্তি কুবেরো হয়ং ধনেশ্বরঃ। কুবের মায়া মাদায় অহং রক্ষা মি তদ্ধনং॥ এবং লোকা বিজানন্তি বৃত্রঃ শক্রেণ সূদিতঃ। শাক্রীং মায়াং সমাস্থায় ময়া বৃত্রো নিসূদিতঃ॥ এবং লোকা বিজানন্তি আদিত্যশ্চ ধ্রুবো মহান্। মেরুং মায়াময়ং কৃত্বা বহাম্যাদিত্য মেব চ॥ এবং চাভা- ষতে লোকো জলং কিন্নশ্যতে হখি- লং। বড়বা মুখ মাস্থায় পিবামি তদহং জলং॥ বায়ুং মায়াময়ং কৃত্বা মেঘেষু বিসৃজাম্যহং। যদিদং ভাষ- ন্তে লোকঃ ত্বত্রৈবং তিষ্ঠতে জলং॥ দেবা অপি ন জানন্তি অমৃতং ত্বত্র তিষ্ঠতি। মম মায়া নিযোগেন তি- ষ্ঠতে হ্যৌষধং বনে॥ লোকো হ্যেবং বিজানাতি রাজা পালয়তে প্রজাঃ। রাজমায়া মহং কৃত্বা পালয়ামি ব- সুন্ধরাং। যে তু বৈ দ্বাদশাদিত্যা উদ্বর্ষ্যন্তি যুগক্ষয়ে। প্রবিশ্য তানহং ভূমে মায়াং লোকে সৃজাম্যহং॥ বর্ষঞ্চ পাংশুনা ভূমিলোকেষু যতন্তে সদা। মায়াং পাংশুময়ীং কৃত্বা পুর-

যান্যখিলং জগৎ ॥ বর্ষতে যত্র সং- বর্ত্তো ধারাভি মুর্ষলাকৃতি। মায়া- সাংবর্ত্তকীং গৃহ্য পূরয়ান্যখিলং জ- গৎ ॥ যৎ স্বপামি বরারোহে শেষ সেত্রোপরিবারিণি। অনন্তনামধ্যাচাহং ধারয়াম্মি স্বপামি চ ॥ বরাহ মায়া মাদায় ত্বম্মে জানামি কিম্ববৈ। দেবা যত্র নিলীয়ন্তে সা মায়া মম কীর্ত্তিতা ॥ ত্বঞ্চাপি বৈষ্ণবীং মায়াং কৃত্বাজানা সি কিন্নু তৎ। ধারিতাসি চ সুশ্রোণি বারান্ শপ্তশৈব ত ॥ মায়া ত মম দেবীয়ং কৃত্বা হ্যেকার্ণবাং মহীং। মম মায়া বলং হ্যেতদ্যেন ... ... দ্ভং জলে ॥ প্রজাপতিং শতরুদ্রং সৃ জামি চ হরামি চ। তেপি মায়াং ন জানন্তি মম মায়া বিমোহিতাঃ ॥ অথ পিতৃগণাশ্চৈব যএতে সূর্য্যবর্চসঃ। মায়াং পিতৃময়ীং হ্যেতাং গৃহ্নামি হি চ তত্ত্বতঃ ॥ কিন্তু মায়ৈব সুশ্রোণি অন্যচ্চ শৃণু সুন্দরি। ইতি বারাহে মায়াচক্রং ॥ * ॥ অথ মায়া স্তোত্রং। শৌনক উবাচ। শশিধ্বজো মহারাজঃ স্তুত্বা মায়াং গুরুং মতঃ। কা বা মায়াস্তুতিঃ সূত বদ তত্ত্ববিদাম্বর ॥ বা ত্বৎ কথা বিষ্ণুকথা কক্ষ ... ... ন্না বিশুদ্ধয়ে। সূত উবাচ। শৃণ্বন্তু মুনয়ঃ সর্ব্বে মার্কণ্ডেয়ায় পৃচ্ছতে। শুক্রঃ প্রাহ বিশুদ্ধাত্মা মায়াস্তবমনুত্তমং ॥ তৎ শৃণুষ্ব প্রবক্ষ্যামি যথাধীতং যথা শ্রুতং। সর্ব্ব কামপ্রদং নৃণাং পাপ তাপ বিনাশনং ॥ শুক্র উবাচ। ভল্লাট নগরং ত্যক্ত্বা বিষ্ণুভক্তঃ শশিধ্বজঃ। আত্ম সংসার মোক্ষায় মায়া স্তব মলং জগৌ ॥ শশিধ্বজ উবাচ। ওঁ হ্রীং কারাং সত্ত্ব সারাং বিশুদ্ধাং ব্রহ্মাদীনাং মাতরং বেদ বোধ্যাং। তন্বীং স্বাহাং ভূত তন্মাত্র কক্ষাং বন্দে বন্দ্যাং দেব গন্ধর্ব্ব সিদ্ধৈঃ ॥ লোকাতীতাং দ্বৈত ভূতাং সমীড়ে ভূতৈ ভব্যাং ব্যাস সামাসিকাদ্যৈঃ। নানা রূপৈ র্দেব ভির্য্যন্নুষ্যে স্তামাধারাং ব্রহ্মরূপাং নমামি ॥ যস্যা ভাসা ত্রিজগদ্ভাতি ভূতৈ র্ন ভাত্যে তত্তদভাবে বিধাতুঃ। বিদ্বদ্গীতাং কালকল্লোল লোলাং লীলাপাঙ্গীং ক্ষিপ্ত সংসার দুর্গাং ॥ পূর্ণাং প্রাপ্যাং দ্বৈত লভ্যাং শরণ্যা মাদ্যে শেষে মধ্যতো যা বিভাতি। কালো দৈবং কর্ম্ম সোপাধয়ো যে তমসাং ভাসা তাং বিশিষ্টাং নমামি ॥ ভূমৌ গন্ধো রসতাপ্সু প্রতিষ্ঠা রূপং তেজস্যেব বায়ৌ স্পৃশত্বং। খে ... বৈ যচ্চিদা ভাতি নানা তামাদ্যাং তাং বিশ্বরূপাং নমামি ॥

সাবিত্রী ত্বং ব্রহ্মরূপা ভবানী ভূতেশস্য শ্রীপতেঃ শ্রীস্বরূপা। শচী শক্রস্যাপি নাকেশ্বরস্য পত্নীশ্রেভাসি মায়ে জগৎসু ॥ বাল্যে বালা যুবতী যৌবনে ত্বং বার্দ্ধক্যে যা স্থবিরা কালকল্পা। নানাকার্যাগ যোগৈশ্চ ধর্ম্মৌ ভক্ত্যা বৈকাম বজ্রা বিভাসি ॥ বরেণ্যা ব্বরদা লোক সিদ্ধা সাধ্বী ধন্যা লোকমান্যা সুকন্যা। চণ্ডী দুর্গা কালিকা কালিকাখ্যা নানা দেশে রূপ বেশৈ বিভাসি ॥ তব চরণ সরোজং দেবি দেবাদি বন্দ্যং যদি হৃদয় সরোজে ভাবয়ন্তীহ ভক্ত্যা। শ্রুক কৃত মতিশুদ্ধং হৃৎসরোজে স্মরন্তি শ্রুতি যুগ কুহরে বা সংশ্রুতং ধর্ম্ম সম্পৎ॥ জনয়তি জগদাদ্যে সর্ব্ব সিদ্ধিঞ্চ তেষাং ॥ মায়াস্তব মিদং পুণ্যং শুকদেবেন ভাষিতং। মার্কণ্ডেযাদয শ্চাপি সিদ্ধিং লেভে শশিধ্বজঃ ॥ কোকামুখে তপ স্তপ্ত্বা হরিং ধ্যাত্বা বনান্তরে। সুদর্শনেন নিহতো বৈকুণ্ঠে শরণং যযৌ॥ ইতি শ্রীকল্কিপুরাণে ঽনভাগবতে ভবিষ্যে মায়া স্তব ঊনত্রিংশো অধ্যায়ঃ ॥

মায়াকারঃ পুং ঐন্দ্রজালিকঃ। বাজীকর ইতি ভাষা। তৎপর্য্যায প্রাতিহারিকঃ ২। ইত্যমরঃ॥ মায়া স্থলজলাদৌ জলস্থলাদি জ্ঞানং করোতীতি মায়াকারঃ যণ প্রতিহরণং প্রতিহারো ব্যাজঃ তেন যক্ষ স প্রয়োজন মস্য প্রাতিহারিকঃ ষিকঃ নিত্তেরু রিতি বৃদ্ধি। প্রতিহারক ইত্যপি পাঠঃ। তত্র প্রতি প্রথমং সৃষ্ট মনো নযনে চ হরতি জ্ঞাতে ন কিঞ্চিদিতি প্রতিহারকঃ। ণকান্তাৎ স্বার্থে কে প্রাতিহারকশ্চ ঘঞি প্রতিহারশ্চ। ইতি তট্টীকায়াং ভরতঃ॥

মায়াকৃৎ পুং মায়াকারঃ। যথা। শাম্বরী সাম্বরী মায়া মায়াকৃৎ ভিক্ষুকে নটে। ইতিশব্দরত্নাবলী॥

মায়াজীবী পুং প্রাতিহারিকঃ। ইতি হেমচন্দ্রঃ॥

মায়াদঃ পুং কুম্ভীরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মায়াতিঃ পুং নরবলিঃ। যথা। মায়াতীঞ্চ নিণীতং শ্রুণতাং মুনিসত্তম। বক্ষ্যাম্যথর্ব্ব বেদোক্তং ফলহানি ব্যতিক্রমে ॥ পিতৃমাতৃবিহীনঞ্চ যুবকং ব্যাধি বর্জ্জিতং। বিবাহিতং দীক্ষিতঞ্চ পরদার বিহীনকং॥ অজারিকং বিশুদ্ধঞ্চ সৎ

শূদ্রং মূলকং বরং। তদ্বন্ধুভ্যো ধনং দত্ত্বা ক্রীতং মূল্যাতিরেকতঃ॥ স্নাপয়িত্বা চ তং ধর্ম্মী সংপূজ্য বস্ত্র চন্দনৈঃ। মাল্যৈ র্ধূপৈশ্চ সিন্দূরৈ র্দধি গোরোচনাদিভিঃ॥ তঞ্চ বর্ষং ভ্রাময়িত্বা চরদ্বারেণ যত্নতঃ। বর্ষান্তে চ সমুৎসৃজ্য দুর্গায়ৈ তং নিবেদয়েৎ॥ অষ্টমী নবমী সন্ধৌ দদ্যাদ্মাষাস্তি মেব চ॥ ইত্যেবং কথিতং সর্ব্বং বলিদান প্রসঙ্গতঃ। বলিং হত্বা চ স্তুত্বা চ ধৃত্বা চ কবচং বুধঃ। প্রণম্য দণ্ডবদ্ভূমৌ দদ্যাদ্বিপ্রায দক্ষিণাং॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৬৬ অধ্যাযঃ॥

মাযাদেবীসুতঃ পুং বুদ্ধঃ। ইত্যমরঃ॥

মাযাফলং ক্লী ফলবিশেষঃ। মাই ফল ইতি ভাষা। তৎপর্য্যাযঃ। মাযিফলং ২ মাযিকং ৩ ছিদ্রাফলং ৪ মাযি ৫। অস্য গুণাঃ। বাতহরত্বং। কটুত্বং। উষ্ণত্বং। শৈথিল্য সঙ্কোচক কেশকারি দাতৃত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মাযাবতী স্ত্রী রতিঃ। কামপত্নী। ইতি জটাধরঃ॥ তস্যা নামকারণং যথা। শ্রীপরাশর উবাচ। এতস্মিন্নন্তরে প্রাপ্তঃ সহ কৃষ্ণেন নারদঃ। অন্তঃপুরচরীং দেবীং রুক্মিণীং প্রাহ হর্ষযন্॥ এষ তে তনযঃ সুভ্রু হত্বা শম্বর মাগতঃ। হৃতো যেনাভবদ্বালো ভবত্যাঃ সূতিকা গৃহাৎ॥ ইযং মাযাবতী ভার্য্যা তনযস্যাস্য তে সতী। শম্বরস্য ন ভার্য্যেযং শ্রূযতা মত্র কারণং॥ মন্মথে তু গতে নাশং তদুদ্ভব পরাযণা। শম্বরং মোহযামাস মাযারূপেণ রূপিণী॥ বিবাহাদ্যুপভোগেষু রূপং মাযাময়ং শুভং। দর্শযামাস দৈত্যস্য তস্যেযং মদিরেক্ষণা॥ ইতি বিষ্ণুপুরাণে ৫ অংশে ২৭ অধ্যাযঃ॥

মাযাবসিকঃ ত্রি পরপ্রতারকঃ। ইতি শব্দমালা॥

মাযাবান্ পুং কংসরাজঃ। ইতি শব্দরত্নাবলী॥ মাযাযুক্তে ত্রি॥

মাযাবী পুং মাযাকারঃ। তৎপর্য্যাযঃ। ব্যংসকঃ ২ মাযী ৩ মাযিকঃ ৪ ঐন্দ্রজালিকঃ ৫। ইতি জটাধরঃ॥ বিডালঃ। ইতি রাজনির্ঘণ্টঃ॥

মাযামোহঃ পুং বিষ্ণুদেহনির্গতাসুরমোহকপুরুষবিশেষঃ। যথা। শ্রীপরাশর উবাচ। ইত্যুক্তো ভগবাংস্তেভ্যো মাযামোহং শরীরতঃ। তমুৎপাদ্য দদৌ বিষ্ণুঃ প্রাহ চেদং সুরোত্তমান্॥ শ্রীভগবানুবাচ। মাযামোহো হয মখি-

লান্ দৈত্যাং স্তুার নোহ্যবিষ্যতি। অতো বধ্যা ভবি ান্তি বেদমার্গ ব হিষ্কৃতাঃ। স্থিত ি তস্য মে ব ধ্যা যাবন্ত পরিপন্থিনঃ। ব্রহ্মণো যে হধিকারস্য দেব দৈত্যাদিকাঃ সুরাঃ॥ তদ্‌গচ্ছত ন ভীঃ কার্য্যা মাযামোহো হ্য মগ্রতঃ। গচ্ছত্ব দ্যোপকারায ভবতাং ভবিতা সুরাঃ॥ শ্রীপরাশর উবাচ। ইত্যুক্তা প্রণিপত্যৈনং যযুর্দেবা যথা গতং। মাযামোহোপি তৈঃ সার্দ্ধং যযৌ যত্র মহাসুরাঃ॥ ইতি বিষ্ণু পুরাণে ৩ অংশে ১৭ অধ্যাযঃ॥

মাযাসীতা স্ত্রী যোগেন অগ্নিকৃত সীতাপ্রতিকৃতিঃ। যথা। অগ্নিরুবাচ। ভগবন্ শ্রূযতাং বাক্যং কালেন যদুপস্থিতং। সীতা হরণ কালো হযং তত্রৈব সমুপস্থিতঃ॥ দৈবঞ্চ দুর্নিবারঞ্চ নচ দৈবাৎ পরং বলং। মৎপ্রসূং মযি সংন্যস্য ছাযা রক্ষ্যান্তিকে হধুনা॥ দাস্যামি সীতাং তুভ্যঞ্চ পরীক্ষা সমযে মম। দেবৈঃ প্রস্থাপিতো হহঞ্চ নচ বিপ্রো হুতাশনঃ॥ রাম স্তদ্বচনং শ্রুত্বা ন প্রকাশ্য চ লক্ষ্মণং। স্বীকার [illegible] দ্দং হৃদযেন বিদূযতা॥ বহ্নি র্যোগেন সীতাযা মাযাসীতাং চকার সঃ। তদ্রূপ গুণ সর্ব্বাংশাং দদৌ রামায নারদ॥ সীতাং গৃহীত্বা স যযৌ গোপ্যং বক্তুং নিষিধ্য চ। লক্ষ্মণো নৈব বুবুধে গোপ্য মন্যস্য কা কথা॥ লঙ্কাং গত্বা রঘুশ্রেষ্ঠো জঘান শাযকেন চ। সবান্ধবং রাবণঞ্চ সীতাং সংপ্রাপ দুঃখিতাং॥ তাঞ্চ বহ্নি পরীক্ষাঞ্চ কারযামাস সত্বরং। হুতাশ স্তত্র কালে চ বাস্তবীং জানকীং দদৌ॥ উবাচ ছাযা বহ্নিঞ্চ রামঞ্চ বিনযান্বিতা। করিষ্যামীতি কিমহং তদুপাযং বদস্ব মে॥ বহ্নিরুবাচ। ত্বং গচ্ছ তপসে দেবি পুষ্করঞ্চ সুপুণ্যদং। কৃত্বা তপস্যাং তত্রৈব স্বর্গ লক্ষ্মী র্ভবিষ্যসি॥ সা চ তদ্বচনং শ্রুত্বা প্রতপ্য পুষ্করে তপঃ। দিব্যং ত্রিলক্ষ বর্ষঞ্চ স্বর্গলক্ষ্মী র্বভূব হ॥ সা চ কালেন তপসা যজ্ঞ কুণ্ড সমুদ্ভবা। কামিনী পাণ্ডবানাঞ্চ দ্রৌপদী দ্রুপদাত্মজা॥ কৃতে যুগে বেদবতী কুশধ্বজ সুতা শুভা। ত্রেতাযাং রামপত্নী সা সীতেতি জনকাত্মজা॥ তচ্ছাযা দ্রৌপদী দেবী দ্বাপরে দ্রুপদাত্মজা। ত্রিহাযণীতি সা প্রোক্তা বিদ্যমানা যুগত্রযে॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতি খণ্ডে ১২ অধ্যাযঃ॥

মায়াসুতঃ পুং বুদ্ধঃ। ইতি হেমচন্দ্রঃ॥

মায়িকং ক্লী মায়াফলং। ইতি রাজনির্ঘণ্টঃ॥ গুহ্যান্তরে মায়িকা মাদুকা ইত্যপি পাঠঃ॥

মায়িকঃ পুং মায়াকারঃ। ইতি জটাধরঃ॥

মায়ী পুং মায়াকারঃ। তৎপর্য্যায়ঃ। ১ ধূর্ত্তঃ ২ বঞ্চকঃ ৩ ব্যংসকঃ ৪ কুহকঃ ৫ দাণ্ডাজিনিকঃ ৬ জালিকঃ ৭। ইতি হেমচন্দ্রঃ॥

মায়ুঃ পুং পিত্তং। ইত্যমরঃ॥

মায়ুরাজঃ পুং কুবেরপুত্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মায়ূরং ক্লী ময়ূরসমূহঃ। ইত্যমরঃ॥ তৎসম্বন্ধিনি ত্রি॥

মায়ূরিকঃ পুং ময়ূরগ্রাহী। ইতি সিদ্ধান্তকৌমুদী॥

মায়ূরী স্ত্রী অজমোদা। ইতি রাজনির্ঘণ্টঃ॥

মারঃ পুং মৃতিঃ॥ কামদেবঃ॥ বিঘ্নঃ। ইতি মেদিনী॥ মারণং। ইতি হেমচন্দ্রঃ॥ ধুস্তূরঃ। ইতি শব্দচন্দ্রিকা॥ মারগণোৎপত্তির্যথা। মার্কণ্ডেয় উবাচ। মনোভবস্য বচনং শ্রুত্বাথ চতুরাননঃ। বিবক্ষুরপি তত্রাস্য শুশ্রুবান্ নাহ কারকং॥ সর্ব্বস্য মোহনে ব্রহ্মা চিন্তাবিষ্টো ভবন্নহি। সন্মর্থো মোহিতুমিতি নিশশ্বাস মুহুর্মুহুঃ॥ নিশ্বাসমারুতাত্তস্য নানারূপা মহাবলাঃ। জাতা গণা লোলজিহ্বা লোলাশ্চাতিভয়ঙ্করাঃ॥ তুরঙ্গবদনাঃ কেচিৎ কেচিদ্‌গজমুখা স্তথা। সিংহ ব্যাঘ্রমুখা শ্চান্যে খ বরাহ খরাননাঃ॥ ঋক্ষ মার্জ্জার বদনাঃ শরভাস্যাঃ শুকাননাঃ। প্লব গোমায়ুবক্ত্রাশ্চ সরীসৃপ মুখাঃ পরে॥ গোরূপা গো-

...বা মহাহ্রস্বা মহাস্থূলা মহাকৃশাঃ। ...ক্ষা বিরলাক্ষাশ্চ ত্র্যক্ষাঃ ...মহোদরাঃ। এককর্ণা স্ত্রিকর্ণাশ্চ চতুষ্কর্ণা স্তথা পরে॥ স্থূলকর্ণা দীর্ঘকর্ণা বহুকর্ণা বিকর্ণকাঃ। দীর্ঘাক্ষা স্থূলনেত্রাশ্চ সূক্ষ্মনেত্রা বিদৃষ্টয়ঃ॥ চতুষ্পাদাঃ পঞ্চপাদা স্ত্রিপাদৈকপদা স্তথা। হ্রস্বপাদা দীর্ঘপাদা স্থূলপাদা মহাপদাঃ॥ একহস্তাশ্চতুর্হস্তা দ্বিহস্তা স্ত্রিশয়া স্তথা। বিহস্তাশ্চ বিরূপাক্ষা গোধিকাকৃতয়ঃ পরে॥ মনুষ্যাকৃতয়ঃ কেচিৎ শিশুমাররূপাঃ পরে। ক্রৌঞ্চাকারা বকাকারা হংস সারস রূপিণঃ॥ তথৈব মদ্গুর বক কঙ্ক কাকমুখা স্ত-

খা। অর্দ্ধনীলা অর্দ্ধরক্তাঃ কপিলাঃ ॥ পিঙ্গলা স্তথা ॥ নীলাঃ শুক্লা স্তথা পীতা হরিতা শ্চিত্র রূপিণঃ। অবাদয়ন্তে শঙ্খান্ পটহান্ পরিবাদিনঃ॥ মৃদঙ্গান্ ডিণ্ডিমাংশ্চৈব গোমুখান্ পণবাং স্তথা। মূর্দ্ধ জটাভিঃ পিঙ্গাভি স্তুঙ্গাভিশ্চ করান্বিতাঃ॥ নিরন্তরাভি বিপেন্দ্রা গণাঃ স্যন্দনগামিনঃ। শূলহস্তাঃ পাশহস্তাঃ খড়্গহস্তা ধনুর্দ্ধরাঃ ॥ শক্ত্যঙ্কুশ গদা বাণপট্টিশ প্রাস পাণয়ঃ। নানায়ুধা মহানাদং দদন্তস্তে মহাবলাঃ॥ মারয় ছেদয়েত্যূচু ব্রহ্মাণঃ পুরতো গণাঃ॥ তেষান্তু দর্শনং তত্র মারয় ছেদয়েত্যুত ॥ যোগনিদ্রা প্রভাবাৎ স বিধি বক্তুং প্রচক্রমে। অথ ব্রহ্মাণ মাত্মানং তান্ দৃষ্ট্বা মদনো গণান্ ॥ উবাচ বারয়ন্ বক্তুং গণানা মগ্রতঃ স্মরঃ ॥ ॥ মদন উবাচ। কিং কর্ম্মাণ্যেতে করিষ্যন্তি কুত্র স্থাস্যন্তি বা বিধে। কিং নামধেয়া এতে বা তত্রৈতান্ বিনিয়োজয় ॥ নিযুজ্যৈতান্ নিজে কৃত্যে স্থানং দত্ত্বা চ নাম চ। কৃত্বা পশ্চান্মহামায়া প্রভাবং কথয়স্ব মে ॥ মার্কণ্ডেয় উবাচ। অথ [illegible] মাকর্ণ্য সর্বলোক পিতামহঃ। গণান্ স মদনাদ্যাহ তেষাং কর্ম্মাদিকং দিশন্ ॥ ব্রহ্মোবাচ। এতে তৎপ্রথম মাত্রা হি মারয়েতি যদব্রুবন্। মুহুর্ম্মুহু র্ব্রতো হমীষাং নাম মারেতি জায়তাং॥ মারাত্ম কত্ত্বাদপ্যেতে মারাঃ সন্তুচ নামতঃ। সদৈব বিঘ্নং জন্তুনাং করিষ্যন্তি বিনার্চ্চনং॥ তবানুগমনং কর্ম্ম মুখ্য মেষাং মনোভব। যত্র যত্র ভবান্ যাতা স্বকর্ম্মার্থং যদা যদা॥ গন্তার স্তত্র তত্রৈতে যা হায্যাং তদা তদা। চিত্তোদভ্রান্তিং করিষ্যন্তি ত্বদস্ত্র বশবর্ত্তিনাং ॥ জ্ঞানিনাং জ্ঞানমার্গঞ্চ বিঘ্নয়িষ্যন্তি সর্বদা। যথা সাংসারিকং কর্ম্ম সর্বে স্বর্বন্তি জন্তবঃ ॥ তথা চৈতে করিষ্যন্তি স বিঘ্নমপি সর্বতঃ। ইমে স্থাস্যন্তি সর্বত্র বেগিনঃ কামরূপিণঃ ॥ জনেবৈষাং গণাধ্যক্ষঃ পঞ্চযজ্ঞাঙ্গ ভোজিনঃ। নিত্যক্রিয়াবতাং তোয় ভোগিনোপি ভবন্তিমে ॥ ইতি কালিকাপুরাণে ৬ অধ্যায়ঃ ॥

মারকঃ পুং মরকঃ। তৎপর্য্যায়ঃ। মারিঃ ৩ উৎপাতঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥ পক্ষিবিশেষঃ। বাজ্ ইতি ভাষা। তৎপর্য্যায়ঃ। ঘাতিপক্ষী ২ গ্রাহকঃ ৩। ইতি ভূরিপ্রয়োগঃ॥ মারণকর্ত্তরি ত্রি ॥

মারজিৎ পুং বুদ্ধঃ। ইত্যমরঃ ॥
মারণং ক্লী বধঃ। ইত্যমরঃ ॥ অভিচারবিশেষঃ। যথা। এবন্তু মারণং দেবি বিশেষাৎ কথয়ামি তে। সাস্তং বহ্নি সমাযুক্তং বামনেত্র বিভূষিতং ॥ কূর্চযুগ্মং ততো দেবি অমুকং মারয় মারয়। চতুর্দশাক্ষরো মন্ত্রো স্বাহান্তঃ শত্রুনাশকঃ ॥ খদিরাঙ্গার মাদায় অষ্টাঙ্গন্যাং বিশেষতঃ। লেখয়েৎ পুত্তলীং শত্রু স্বরূপাং লৌহ পত্রকে ॥ নিশায়াং মস্তকে নেত্রে ললাটে হৃদয়ে করে। নাভৌ গুহ্যে কটীপৃষ্ঠে ক্রমোক্তেন পদদ্বয়ে ॥ মন্ত্রবর্ণান্ সমালিখ্য প্রতিষ্ঠাং তত্র কারয়েৎ। সংহার মুদ্রাং বধা তু ধ্যায়েদ্দেবীং জয়প্রদাং ॥ দীর্ঘাকারাং কৃষ্ণবর্ণাং সদার্দ্ধ স্তন মস্তকাং। নৃমুণ্ড যুগলং হস্ত চর্ব্বয়ন্তীং দিগম্বরীং শত্রুনাশকরীং দেবীং ধ্যায়েৎ শত্রুক্ষয়ায় চ। এবং ধ্যাত্বেষ্টিকা চূর্ণে র্ব্বামহস্তেন শঙ্করি ॥ ওঁ শত্রু নাশকর্য্যৈ নমঃ ইতি দত্বা মহেশ্বরি। হরিদ্রা চূর্ণ সহিতাং ধারাং দদ্যাদনেন তু ॥ অমুকস্য শোণিতং পিব পিবেতি তৎপরং। মাংসং খাদয় খাদয় হ্রীঁ নম ইতি মন্ত্রং ॥ মধ্যাহ্নে মধ্যরাত্রৌ তু পূজয়িত্বা শতাষ্টকং। জপেদেকা দশাহে চ রোগঃ স্যান্মাত্র সংশয়ঃ ॥ দণ্ডাধিকৈক বিংশাহ্নে মৃত্যুরেব রিপো র্ভবেৎ ॥ * ॥ অথবান্য প্রকারেণ শত্রুক্ষয় মহং বদে। পুংগোশকৃৎ সমাদায় পূজয়েদুষ্ণ বারিণা ॥ বিপরীতক্রমেণৈব জপ পূজাদিকং চরেৎ। মহাদেবায় নম ইতি পুং গোশকৃৎ সমাহরেৎ ॥ শিবায় নম ইতি মন্ত্রেণ ঘটনঞ্চ সমাচরেৎ। পশুপতয়ে নম ইতি প্রাণান্ সংস্থাপয়েত্ততঃ ॥ লৌহপাত্রে মহেশানি খদিরাঙ্গার যোগতঃ। শত্রু প্রতিকৃতিং লিখ্য তত্র সংস্থাপয়েৎ শিবং ॥ ততো ধ্যায়েন্মহারুদ্রং ধ্যানস্তু সুসমাহিতঃ। শত্রো র্বক্ষঃ স্থিতং রুদ্রং জ্বলদগ্নি সমপ্রভং ॥ বামহস্ত ধৃতং কেশং দক্ষিণং প্রাণকর্ষণং। নরচর্ম্মাম্বরং দেবং মহাব্যালাদি বেষ্টিতং ॥ পিনাকধৃক্ ইহাগচ্ছাগচ্ছ ইত্যাদিনাবাহ্য যত্নতঃ। শূলপাণয়ে নম ইতি স্নাপয়েৎ সাধকোত্তমঃ ॥ মহেশ্বরায় নম ইতি পাদ্যাদিনা প্রপূজয়েৎ। ঈশানাদি স্তথা মূর্ত্তি ব্যুৎক্রমেণ প্রপূজয়েৎ ॥ অগ্নিকোণাদি-পর্য্যন্তং পূর্ব্ববীত্যা মহেশ্বরি। নমঃ শিবায়েতি মূল মষ্টাবিংশতি সংজপেৎ ॥ হুঁ ক্ষময়েতি বামেন

করেণ তু বিসর্জ্জয়েৎ। অজিত॥ কেশব বিষ্ণো হরে সত্য জনার্দ্দন॥ হংস নারায়ণ স্বাহা মন্ত্র মেব সংজপেৎ। হুঁ নমো ভগবতে বাসুদেবায স্বাহা নন ইত্যপি সকৃজ্জপেৎ॥ এব মেকাদশাহেন শত্রুচ্ছাদন মঞ্জসা। অবশ্যং জাযতে দেবি সত্যং সত্যং ত্রিলোচনে॥ ইতি যোগিনীতন্ত্রে পূর্ব্বখণ্ডে ৪ পটলঃ॥ ॥ অপিচ। গৃধ্রাস্থিঞ্চ গবাস্থিঞ্চ মূত্র নির্ম্মাল্য মেব চ। অরে র্যো নিখনেৎ দ্বারে পঞ্চত্ব মুপযাতি সঃ। ইতি গারুড়ে ১৮৬ অধ্যাযঃ॥

মারিঃ স্ত্রী মারণং॥ বর্ষঃ। ইতি মেদেনী॥ জনক্ষযঃ। তৎপর্য্যাযঃ। মারকঃ২ মরকঃ ৩ উৎপাতঃ ৪। ইতি ত্রিকাণ্ডশেষঃ॥

মারিচিকং ত্রি মরীচেনসংস্কৃতং। ইতি সিদ্ধান্তকৌমুদী॥

মারিতঃ পুং নষ্টীকৃতঃ॥ ভস্মীকৃতঃ। যথা। অসম্যঙ্মারিতং স্বর্ণং বলংবীর্য্যঞ্চ নাশযেৎ। করোতি রোগান্ মৃত্যুঞ্চ তদ্ধন্যাৎ যত্নত স্ততঃ॥ ইতি ভাবপ্রকাশঃ॥ অপিচ। পূর্ব্বং বঙ্গ সমং তালং ক্ষিপ্ত্বাম্লেন বিমর্দ্দযেৎ। ততো গজপুটে পক্ত্বা পুন রম্লেন মর্দ্দযেৎ॥ তালেন দশমাংশেন যাম মেকং ততঃ পুটেৎ। এবং দশপুটেঃ পক্বং বঙ্গং ভবতি মারিতং॥ অপরঞ্চ। আর্দ্রত্বঞ্চ ঘনত্বঞ্চ তেজো গৌরব চাপলং যস্যৈতানি ন দৃশ্যন্তে তং বিদ্যান্মৃতসূতকং॥ অন্যচ্চ। শুদ্ধো রসো ভবেদ্ব্রহ্মা মূর্চ্ছিতস্তু জনার্দ্দনঃ। মারিতো রুদ্ররূপী স্যাৎ বদ্ধঃ সাক্ষাৎ সদাশিবঃ॥ ইতি বৈদ্যদর্পণঃ॥

মারিব্যসনবারকঃ পুং রাজর্ষিবিশেষঃ। যথা। কুমারপাল শ্চৌলুক্যো রাজর্ষিঃ পরমার্হতঃ। মৃতস্বমোক্তা ধর্ম্মাত্মা মারিব্যসনবারকঃ॥ ইতি হেমচন্দ্রঃ॥

মারিষঃ পুং নাট্যোক্তৌশ্রেষ্ঠঃ। ইত্যমরঃ॥ তণ্ডুলীযশাকবিশেষঃ। মরসা ইতি হিন্দীভাষা। তৎপর্য্যাযঃ। কন্দরঃ২ মার্ষিকঃ ৩। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। বিষ্টম্ভিত্বং। পিত্তনাশিত্বং। গুরুত্বং রক্তদাহিত্ব শ্চান্যে তজ্জাতীযাশ্চ গুণাঃ। ইতি রাজনির্ঘণ্টঃ॥

মারিষা স্ত্রী দক্ষমাতা। ইতি মেদিনী॥

মারী স্ত্রী চণ্ডী॥ জনক্ষযঃ। ইতি মেদিনী॥ মাহেশ্বরীশক্তিঃ। যথা

। মারী ত্রিশূলেন জঘান চান্যান্ খট্বাঙ্গপাতৈ রপরাংশ্চ কৌশিকী। ইতি বামনে ৫২ অধ্যায়ঃ ॥

মারীচঃ পুং রাক্ষসবিশেষঃ। স চ তারকারাক্ষসীপুত্রঃ রাবণস্যানুচরঃ সীতাহরণকালে মায়ামৃগরূপো হসৌ শ্রীরামেণ হতশ্চ। ইতি রামায়ণং ॥ অস্য বিবরণং যথা। এতস্মিন্নন্তরে রামো দদর্শ কনকং মৃগং। সীতা তং প্রেরযামাস তদর্থে যত্নপূর্ব্বকং॥ সংন্যস্য লক্ষ্মণং রামো জানক্যা রক্ষণে বনে। স্বযং জগাম তূর্ণং তং বিব্যাধ শাযকেন চ ॥ হা লক্ষ্মণেতি শব্দঞ্চ কৃত্বাথ মাযযা মৃগঃ। প্রাণাং স্তত্যাজ সহসা পুরো দৃষ্ট্বা হরিং স্মরন্ ॥ মৃগদেহং পরিত্যজ্য দিব্যং দেহং বিধায চ। রত্ননির্ম্মাণ যানেন বৈকুণ্ঠং স জগাম হ ॥ বৈকুণ্ঠ দ্বারে দ্বার্য্যাসীৎ কিঙ্করো দ্বারপালযোঃ। জযশ্চ বিজযশ্চৈব বলবাংশ্চাজিতাভিধঃ॥ শাপেন শনকাদীনাং সংপ্রাপ্য রাক্ষসীং তনুং। পুনর্জগাম চ দ্বারং মাদৌ চ দ্বারপালযোঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ১২ অধ্যাযঃ ॥ * ॥ কশ্যপঃ। যথা। ইতি সংচিন্ত্য ভগবান্ মারীচঃ স্ব কনন্দন। উবাচ কিঞ্চিৎ স্বলিত আত্মানঞ্চ বিগর্হযন্ ॥ ইতি শ্রীভাগবতে ৬ স্কন্ধে ১৯ অধ্যাযঃ ॥ কক্কোলকং ॥ যাজব্রাহ্মণঃ। ইতি মেদিনী ॥ রাজহস্তী। ইতি জটাধরঃ ॥

মারীচী স্ত্রী দেবতাভেদঃ। ইতি মেদিনী ॥ সাতু মাযাদেবী। তৎপর্য্যাযঃ। ত্রিমুখা ২ বজ্রকালিকা ৩ বিকটা ৪ বজ্রবারাহী ৫ গৌরী ৬ পোত্রিরথা ৭। ইতি ত্রিকাণ্ডশেষঃ

মারুণ্ডঃ পুং সর্পাণ্ডঃ ॥ পন্থাঃ ॥ গোমযমণ্ডলং। ইতি মেদিনী ॥

মারুতঃ পুং বাযুঃ। ইত্যমরঃ ॥ ম্রিযতে হনেন ক্রুদ্ধেন নারীতি মৃঙ উৎ মরুৎ মরুদেব মারুতঃ স্বার্থে ষ্ণঃ। ইতি তট্টীকাযাং ভরতঃ ॥ অস্যোৎপত্তি র্যথা। কশ্যপ উপবাচ। পুত্রস্তে ভবিতা ভদ্রে ইন্দ্রহা দেববান্ধবঃ। সংবৎসরং ব্রত মিদং যদ্যঙ্গো ধারযিষ্যসি ॥ অঙ্গো যথাবৎ ॥ সংবৎসরং পুংসবনং ব্রত মেতদবিপ্লুতং। ধারযিষ্যসি চেত্তুভ্যং শক্রহা ভবিতা সুতঃ ॥ বাঢমিত্যভ্যুপেত্যাথ দিতী রাজন্ মহামনাঃ। কশ্যপাদ্ গর্ভ মাধত্ত ব্রতঞ্চাঞ্জো দধার সা ॥ মাতৃষসু

ঋভিপ্রায মিন্দ্র আজ্ঞায মানদ। শুশ্রূষণেনাশ্রমস্থাং দিতিং পর্য্যচরৎ কবিঃ ॥ এবং তস্যা ব্রতস্থাযা ব্রতচ্ছিদ্রং হরি র্নৃপ। প্রেপ্সুঃ পর্য্যচরৎ জিহ্মো মৃগহেব মৃগাকৃতিঃ ॥ নাধ্যগচ্ছদ্ব্রত ছিদ্রং তৎপরোথ মহীপতে। চিন্তাং তীব্রাং গতঃ শক্রঃ কেন মেস্যাচ্ছিবং ত্বিহ ॥ একদা সা তু সন্ধ্যাযা মুচ্ছিষ্টা ব্রত কর্ষিতা। অস্পৃষ্ট বার্য্য ধৌতাঙ্ঘ্রিঃ সুষ্বাপ বিধি মোহিতা ॥ লব্ধা তদন্তরং শক্রো নিদ্রাপহৃত চেতসঃ। দিতেঃ প্রবিষ্ট উদরং যোগেশো যোগমাযযা ॥ চকর্ত্ত সপ্তধা গর্ভং বজ্রেণ কনকপ্রভং। রুদন্তং সপ্তধৈকৈকং মারোদী রিতি তান্ পুনঃ ॥ তমূচুঃ পাট্যমানা স্তে সর্ব্বে প্রাঞ্জলযো নৃপ ॥ কিং ন ইন্দ্র জিঘাংসসি ভ্রাতরো মরুত স্তব। মাভৈষ্ট ভ্রাতরো মহ্যং যূয মিত্যাহ কৌশিকঃ ॥ অনন্য ভাবান্ পার্ষদানাত্মনো মরুতাং গণান্। ন মমার দিতে র্গর্ভঃ শ্রীনিবাসানুকম্পযা ॥ সভূরিন্দ্রেণ পঞ্চাশৎ দেবা স্তে মরুতো ঽভবন্। ব্যপোহ্য মাতৃদোষং তে হরিণা সোমপাঃ কৃতাঃ ॥ দিতি রুত্থায দদৃশে কুমারাননলপ্রভান্। ইন্দ্রেণ সহিতান্ দেবী পর্য্যতুষ্যদনিন্দিতা ॥ অথেন্দ্র মাহ তাতাহ মাদিত্যানাং ভযাবহং। অপত্য মিচ্ছন্ত্যচরং ব্রত মেতং সুদুষ্করং ॥ একঃ সঙ্কল্পিতঃ পুত্রঃ সপ্ত সপ্তাভবন্ কথং। যদি তে বিদিতং পুত্র সত্যং কথয মা মৃষা ॥ ইন্দ্রউবাচ। অম্ব তেহং ব্যবসিত মুপধার্য্যাগতো ঽন্তিকং। লব্ধান্তরো ঽচ্ছিদং গর্ভ মর্থ বুদ্ধি র্ন ধর্ম্মদৃক্। কৃত্তো মে সপ্তধা গর্ভ আসন্ সপ্ত কুমারকাঃ। তেপি চৈকৈকশো বৃক্ণাঃ সপ্তধানাপি মম্রিরে ॥ তত স্তৎ পরমাশ্চর্য্যং বীক্ষ্য ব্যবসিতং মযা। মহাপুরুষ পূজাযাঃ সিদ্ধিঃ কাপ্যানুষঙ্গিকী ॥ অদিদং মম দৌর্জ্জন্যং বালিশস্য মহীযসি। ক্ষন্তমর্হসি মাত স্ত্বং দিষ্ট্যা গর্ভো মৃতোত্থিতঃ ॥ শ্রীশুকউবাচ। ইন্দ্র স্তযাভ্যনুজ্ঞাতঃ শুদ্ধভাবেন তুষ্টযা। মরুদ্ভিঃ সহ তাং নত্বা জগাম ত্রিদিবং প্রভুঃ ॥ ইতি শ্রীভাগবতে ৬ স্কন্ধে ১৮ অধ্যাযঃ ॥

মারুতব্রতং স্ত্রী রাজধর্ম্মবিশেষঃ। যথা। প্রবিশ্য সর্ব্বভূতানি যথা চরতি মারুতঃ। তথা চারৈঃ প্রবেষ্টব্যং ব্রত মেতদ্ধি মারুতং ॥ ইতি

মাৎস্যে২০০ অধ্যায়ঃ ॥

মারুতাত্মজঃ পুং হনূমান্ । ইতি জটাধরঃ ॥

মারুতাপহঃ পুং বরুণবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ বায়ুনাশকে ত্রি ॥

মারুতাশনঃ পুং সর্পঃ। পবনাশন ইত্যনর দর্শনাৎ ॥ বায়ুমাত্রভক্ষকে ত্রি ॥

মারুতিঃ পুং হনূমান্। ইতি শব্দরত্নাবলী॥ ভীমসেনঃ। ইতি জটাধরঃ ॥

মার্কণ্ডঃ পুং মার্কণ্ডেয়মুনিঃ। ইতি শব্দরত্নাবলী ॥

মার্কণ্ডিকা স্ত্রী লতাবিশেষঃ। ভূই খখসা ইতি হিন্দীভাষা। সাতুকাকরোলদ্ভেদঃ। তৎপর্য্যায়ঃ। ভূমিচরী২ মার্কণ্ডী ৩ মৃদুরেচনী ৪। অস্যা গুণাঃ। কষ্টহরত্বং। উদ্ধাধঃকায়শোধনত্বং। বিষ দুর্গন্ধ কাস গুল্মোদর নাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ ॥

মার্কণ্ডীয়ং স্ত্রী ভূম্যামলকী। ইতি রাজনির্ঘণ্টঃ ॥

মার্কণ্ডেয়ঃ পুং মৃকণ্ডমুনিপুত্রঃ। জন্মতিথ্যাদৌ পূজায়াং তস্য ধ্যানং যথা। দ্বিভুজং জটিলং সৌম্যং সুবৃদ্ধং চিরজীবিনং। মার্কণ্ডেয়ং নরো ভক্ত্যা পূজয়েচ্চ চিরায়ুষং ॥ তস্য প্রার্থনামন্ত্রঃ। চিরজীবী যথা ত্বং ভো ভবিষ্যামি তথা মুনে। রূপবান্ বিত্তবাংশ্চৈব শ্রিয়াযুক্তশ্চ সর্ব্বদা ॥ মার্কণ্ডেয় মহাভাগ সপ্ত কল্পান্তজীবন। আয়ু রিষ্টার্থ সিদ্ধ্যর্থ মস্মাকং বরদো ভব ॥ ইতি তিথ্যাদিতত্ত্বং ॥ * ॥ তস্যোৎপত্ত্যাদি র্যথা। মার্কণ্ডেয় উবাচ। দেবৌ ধাতৃবিধাতারৌ ভৃগোঃ খ্যাতি রসূয়ত। শ্রিয়ঞ্চ দেবদেবস্য পত্নী নারায়ণস্য যা ॥ আয়তি র্নিয়তিশ্চৈব মেরোঃ কন্যে মহাত্মনঃ। ভার্য্যে ধাতৃ বিধাত্রো স্তে তয়ো র্জাতৌ সুতৌ বুভৌ ॥ প্রাণশ্চৈব মৃকণ্ডুশ্চ পিতা মম মহাযশাঃ। মনস্বিন্যা মহং তস্মাৎ পুত্রো বেদশিরা মম ॥ ধূম্রবত্যাং সমভবৎ প্রাণস্যাপি নিবোধ মে। ইতি শ্রীমার্কণ্ডেয়পুরাণে রুদ্রসর্গাধ্যায়ঃ ॥ * ॥ অপিচ। পুলস্ত্য উবাচ। অথ তে সংপ্রবক্ষ্যামি মার্কণ্ডোৎপত্তি মুত্তমাং। পুরা কল্পে মুনিঃ পূর্ব্বং মৃকণ্ড নাম বিশ্রুতঃ ॥ ভৃগোঃ পুত্রো মহাভাগঃ সভার্য্য স্তপ্তবাং স্তপঃ। তস্য পুত্রস্তদা জাতো বসতস্তু বনান্তরে ॥ স পঞ্চবর্ষকো জাতো বাল এব গুণান্বিতঃ। জ্ঞানিনা স তদা দৃষ্টো ভূমিষ্ঠা

নবু প্রাঙ্গনে॥ ...দ্রাস নুচিরং কালং জীবনঞ্চ ত্রৈ...ভং। বীক্ষ্য চিন্তাপরো জ্ঞানী কিং বর্ষো বালক তব॥ দিতং খণ্ডিতং॥ সংখ্যযা চাষ্টবর্ষাণি ... ...ন্যবেদয়ৎ। মৃকণ্ডুনৈব মুক্ত ...জ্ঞানী বাক্যমব্রবীৎ॥ মাসমায়ুশ্চ পুত্রস্য তেহবশিষ্টং মুনীশ্বর। নৈব শোক স্ত্বয়া কার্য্যঃ সত্যমেতদুদাহৃতং॥ এতৎ শ্রুত্বা বচো ভীম ...দিনা নদুদাহৃতং। ব্রতোপনয়নং ...স্য পিতা তদা॥ আহ চৈনং পিতা ... মুনিং ত্বমভিবাদয়। এব মুক্তঃ স বৈ ...ঋষিং ভক্ত্যা ননাম সঃ॥ এতস্মিন্নন্তরে তত্র প্রদীপ্তাঃ পাবকোপমাঃ। মার্গেণাপি সমাগতা স্তেন সপ্তর্ষয়ো হমলাঃ॥ বালেন তেন দৃষ্টা স্তে সর্ব্বে সমভিবাদিতাঃ। আয়ুষ্মান ভব তৈ রুক্তঃ স হৃষ্টো দণ্ডমেখলাং॥ উক্তা স্তে চ পুন স্তাণিং পশ্যন্তঃ ক্ষীণজীবিতং। দিনানি পঞ্চ তে চায়ু জ্ঞাত্বা ভীতাভবন্ পুনঃ॥ তমুৎক্ষিপ্য ব্রাহ্মণা বৈ গতা স্তে ব্রহ্মণো হন্তিকং। প্রতিমুচ্য চ তং বালং প্রণিপেতুঃ পিতামহং॥ আয়ুষ্মান্ ভব ইত্যাহ তেন ব্রহ্মাভিবাদিতঃ। চিরায়ু ব্রহ্মণা বালঃ প্রোক্তঃ স ঋষি সন্নিধৌ॥ তত স্তে মুনয়ঃ প্রীতাঃ শ্রুত্বা বাক্যং পিতামহাৎ। পিতামহস্ত সপ্তর্ষীন্ দৃষ্ট্বা প্রোবাচ বিস্মিতান্॥ কার্য্যেণ যেন বা যাতাঃ কো হয়ং বালো নিবেদ্য তাং। ঊচুঃ সপ্তর্ষয়ো রাজন্ সর্ব্বং তস্মৈ ন্যবেদয়ন্॥ ভৃগোঃ সূনু মৃকণ্ডুস্ত ক্ষীণায়ু স্তস্য বালকঃ। অল্পায়ুষ স্তত স্তস্য বদ্ধা স্তেনাস্য মেখলাঃ॥ যজ্ঞোপবীতং দণ্ডঞ্চ দত্ত্বা তেন প্রবোধিতঃ। যং কঞ্চিৎ পশ্যসে লোকং ভ্রমন্তং ভূতলে জনং॥ তস্যাভিবাদনং কার্য্য মেব মাহ পিতামহ। তাবন্বয মনেনাথ ক্ষিতৌ দৃষ্টাঃ পরিভ্রমন্॥ একত্বমার্ষং॥ তীর্থযাত্রা প্রসঙ্গেন দৈব যোগাৎ পিতামহ। চিরায়ু র্ভব বৈ বিপ্র বালেত্যস্মাভি রীরিতং॥ কথং চিরায়ুঃ স্যাদ্বিপ্র বালকঃ সাম্প্রতং প্রভো। কথং নানৃতিনো দেব ভবামো ভবতা বয়ং॥ এবমুক্ত স্তদা তৈস্তু ব্রহ্মা লোক পিতামহঃ। ...বাচো ভবিষ্যানঃ সর্ব্বে এব ব...ং স্থিতাঃ॥ মৎসম শ্চায়ুষা বাল্যো মার্কণ্ডেয়ো ভবিষ্যতি। ঋষীণাং মুখ্যত শ্চাসৌ মৎসহায়ো ভবিষ্যতি॥ কল্পস্যাদৌ তথা চান্তে বৃতো মুনিভি রুত্তমৈঃ। এবন্তে মুনয়ো বালং ব্রহ্মা লোক পিতামহঃ॥ সম্বোধ্য প্রেষযামাস ভূয়ো হপ্যেবং

পরন্তপ। তীর্থযাত্রাং গতা বিপ্রা মা
র্কণ্ডেযো নিজং গৃহং॥ জগাম গত্বা
তং বিপ্রং পিতরং স তথাব্রবীৎ।
ইতি পাদ্মে সৃষ্টিখণ্ডে ৩০ অধ্যাযঃ
॥ * ॥ অপরঞ্চ। ব্যাস উবাচ।
মার্কণ্ডেযেন মুনিনা যথা মৃত্যুঃ প
রাজিতঃ। তথা তে কথযিষ্যামি
শৃণু বৎস মহামতে॥ ভৃগোঃ পৌ
ত্রো মহাভাগো বালত্বে চ মহাদ্যু
তিঃ। ববৃধে বল্লভো বালঃ পিতা
তস্য কৃতক্রিযঃ॥ স তস্মিন্ বৈ জাত
মাত্রে আদেশী কশ্চিদব্রবীৎ। বর্ষে
দ্বাদশমে পূর্ণে মৃত্যুরস্য ভবিষ্যতি
॥ শ্রুত্বা তন্মাতা পিতরৌ দুঃখিতৌ
তৌ বভূবতুঃ। তৌ দৃষ্ট্বা দুঃখসম্পন্নৌ
মার্কণ্ডেযো মহামতিঃ॥ উবাচ বচ
নং তত্র কিমর্থং দুঃখ মীদৃশং। বক্ত
মর্হসি দুঃখস্য কারণং মম পৃচ্ছতঃ॥
কথযামাস তৎ সর্ব্ব মাদেশী যদব্রবী
চ হ। তৎ শ্রুত্বা স্থৌ মুনিঃ প্রাহ
মাতরং পিতরং পুনঃ॥ পিত্রা সার্দ্ধং
ত্বযা মাতর্নকার্য্যং দুঃখ মন্বহং। অপ
নেষ্যামি মে মৃত্যুং তপসা নাত্র সং
শযঃ॥ যথা চাহং চিরাযুঃ স্যাং ভুত্বা
জর্য্যা মহং তপঃ। সূত উবাচ। ই
ত্যুক্তাসৌ সমাশ্বাস্য পিতরৌ বনং
জগাম। তত্র বিষ্ণুং প্রতিষ্ঠাপ্য গ

স্কপুষ্পাদিভিঃ ক্রমাৎ॥ পূজযামাস
দেবেশং মার্কণ্ডেযো মহামুনিঃ। পূ
জযিত্বা হরিং তত্র তপস্তেপে সুদুষ্ক
রং॥ নিরাহারো মুনিস্তত্র বর্ষমেক
মতন্দ্রিতঃ। মাত্রোক্ত মরণাসন্নদিনে
তত্র মহামুনিঃ॥ স্নাত্বা যথোক্ত বি
ধিনা কৃত্বা বিষ্ণোঃ স্তথার্চনং। হৃদি
কৃত্বেন্দ্রিযগ্রামং বিশুদ্ধেনান্তরাত্মনা
॥ আসনং স্বস্তিকং বদ্ধা কৃত্বাসৌ
প্রাণ সংযমং। ওঁ কারোচ্চারণাদ্ধো
মান্ হৃৎপদ্মং বিকাশযন্॥ তন্মধ্যে
রবি সোমাগ্নি মণ্ডলানি যথা ক্রমং।
কল্পযিত্বা হরেঃ পীঠং তস্মিন্নেব স
নাতনং॥ পীতাম্বরধরং বিষ্ণুং শঙ্খ
চক্র গদাধরং। ব্রহ্মরূপং হরিং ধ্যা
যং স্তোত্র মনু মুদীরযন্॥ ইত্যেবং
ধ্যাযতস্তস্য মার্কণ্ডেযস্য ধীমতঃ।
মনস্তত্রৈব সংলগ্নং দেব দেব জগৎ-
পতৌ॥ ততো যমালযাত্তত্র আগ-
তা যমকিঙ্করাঃ। পাশহস্তাস্ত তং
নেতুং বিষ্ণুদূতৈস্তু তে হতাঃ॥ মুষলৈ
র্হন্যমানা স্তে ইত্যুক্তা পুনঃ পুনঃ।
যমং নিবৃত্তা গচ্ছামো মৃত্যুরেবাগ-
মিষ্যতি॥ আগত্য স্বযমেবাত্র মৃত্যুঃ
পার্শ্বে মহাত্মনঃ। মার্কণ্ডেযস্য ব
ভূব বিষ্ণু কিঙ্কর শঙ্কযা॥ তে চা-
পুনর্মন্য মৃত্যু মনভ্যুব বিষ্ণু কি-

ন্তরাঃ। বিষ্ণ্বার্ত্তয়া হনিষ্যান্তে মৃত্যুমন্যেতি সংস্থিতাঃ॥ ততো বিস্মৃপিতমনা মার্কণ্ডেয়ো মহামতিঃ। তুষ্টাব প্রণতো ভূত্বা দেবদেবং জনার্দ্দনং॥ বিষ্ণুনৈবোপদিষ্টন্তু স্তোত্রং কর্ণে মহাত্মনঃ। স্বভাবিতেন মনসা তেন তুষ্টাব মাধবং॥৪॥ওঁ নমো ভগবতে বাসুদেবায়। নারায়ণং সহস্রাক্ষং পদ্মনাভং পুরাতনং। প্রণতোহস্মি হৃষীকেশং কিং মে মৃত্যুঃ করিষ্যতি॥ গোবিন্দং পুণ্ডরীকাক্ষমনন্তমজমব্যয়ং। কেশবঞ্চ প্রপন্নোস্মি কিংমো মৃত্যুঃ করিষ্যতি॥ বাসুদেবং জগদ্যোনিং ভানুমন্তমতীন্দ্রিয়ং। দামোদরং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি॥ শঙ্খ চক্র ধরং দেবং ছন্মরূপিণমব্যয়ং। অধোক্ষজং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। বারাহং বামনং বিষ্ণুং নারসিংহং জনার্দ্দনং। মাধবঞ্চ প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি॥ পুরুষং পুষ্করং বীজং ক্ষেমবীজং জগৎপতিং। লোকনাথং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি॥ ভূতাত্মানং মহাত্মানং যজ্ঞযোনিমযোনিজং। বিশ্বরূপং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি॥ সহস্রশিরসং দেবং ব্যক্তাব্যক্তং সনাতনং। মহাযোগং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি॥৪॥ ইত্যুদীরিত মার্কণ্য স্তোত্রং তত্র মহাত্মনঃ। অপযাত স্ততো মৃত্যু বিষ্ণুদূতৈশ্চ পীড়িতঃ॥ ইতি তেন জিতো মৃত্যু মার্কণ্ডেয়েন ধীমতা। প্রসন্নে পুণ্ডরীকাক্ষে নৃসিংহে নাস্তি দুর্লভং॥ মৃত্যুষ্টক মিদং পুণ্যং মৃত্যু প্রশমনং শুভং। মার্কণ্ডেয় হিতার্থায় স্বয়ং বিষ্ণুরুবাচ হ॥৪॥ শ্রীভগবানুবাচ। য ইদং পঠতে ভক্ত্যা ত্রিকালং নিয়তঃ শুচিঃ। নাকালে তস্য মৃত্যুঃ স্যান্নরস্যাচ্যুত চেতসঃ॥ ব্যাস উবাচ। হৃৎপদ্ম মধ্যে পুরুষং পুরাণং নারায়ণং শাশ্বত মাদিদেবং। সঞ্চিন্ত্য সূর্য্যাদপি রাজমানো মৃত্যুং স যোগী জিতবাংস্তদৈব॥ ইতি নারসিংহপুরাণে মার্কণ্ডেয় মৃত্যুঞ্জয়ো নাম ৭ অধ্যায়ঃ॥

মার্গ ক সংস্কারে॥ সগণে। ইতি কবিকল্পদ্রুমঃ॥ ক মার্গয়তি। ইতি দুর্গাদাসঃ॥

মার্গ কি অন্বেষে। ইতি কবিকল্পদ্রুমঃ॥ অন্বেষঃ প্রতিসন্ধানং। কি মার্গয়তি মার্গতি গুণং গুণী। মার্গতাং হে দেহভাবানিত্যাত্মনেপদং

গণকৃতা নিত্যত্বাৎ। ইতি দুর্গা-দাসঃ ॥

মার্গঃ পুং পন্থাঃ। ইত্যমরঃ॥ তৎ-পরিমাণং যথা। ত্রিংশদ্ধনূংষি বিস্তীর্ণো দেশমার্গস্তু তৈঃ কৃতঃ। বিংশদ্ধনুর্গ্রামমার্গঃ সীমা মার্গো দশৈব তু ॥ ধনূংষি দশবিস্তীর্ণঃ শ্রীমান্ রাজপথঃ কৃতঃ। নৃবাজিরথ নাগানাম সম্বাধঃ সুসঞ্চরঃ॥ ধনূংষি চৈব চত্বারি শাখারথ্যাস্তু নির্ম্মিতাঃ। ত্রিকরা শ্চোপরথ্যাস্তু দ্বিকরাপ্যপরক্ষকা॥ জঙ্ঘাপথশ্চতুরাদ স্ত্রিপাদশ্চ গৃহান্তরং। বৃতীপাদ স্তদ্ধপাদঃ প্রাগ্বংশঃ পাদকঃ স্মৃতঃ॥ অবকরঃ পরিবারঃ পাদমাত্রঃ সমন্ততঃ। প্রাবৃটকালে তু প্রাবৃত্তী কর্ত্তব্যা অন্যথা নহি ॥ ইতি দেবীপুরাণে ত্রৈলোক্যাভ্যুদয়ে গোপুরদ্বার লক্ষণাধ্যায়ঃ॥*॥ গুহ্যং। তৎপর্য্যায়ঃ। পায়ুঃ ২ তনুরুহঃ ৩। ইতি ত্রিকাণ্ডশেষঃ ॥ অপানং ৪। ইত্যমরঃ ॥ মৃগমদঃ ॥ মার্গশীর্ষমাসঃ॥ অন্বেষণং। ইতি মেদিনী॥ মৃগশিরো নক্ষত্রং। ইতি হেমচন্দ্রঃ॥ বিষ্ণুঃ। ইতি তস্যসহস্রনামস্তোত্রং ॥

মার্গকঃ পুং অগ্রহায়ণমাসঃ। ইতি শব্দমালা ॥

মার্গণং ক্লী অন্বেষণং। তৎপর্য্যায়ঃ। সম্বীক্ষণং ২ বিচয়নং ৩ মৃগণা ৪ মৃগঃ ৫। ইত্যমরঃ॥ যাচ্ঞা। ইতি মেদিনী॥ প্রণয়ঃ। ইতি জটাধরঃ ॥ যাচকে ত্রি ইত্যমরঃ॥

মার্গণঃ পুং শরঃ। ইত্যমরঃ॥ যাচকঃ। ইতি মেদিনী॥

মার্গণকঃ পুং যাচকঃ। ইতি হলায়ুধঃ॥

মার্গধেনুঃ পুং যোজনপরিমাণং। ইতি শব্দমালা ॥

মার্গধেনুকং ক্লী যোজনং। ইতি ত্রিকাণ্ডশেষঃ ॥

মার্গশিরঃ পুং মার্গশীর্ষমাসঃ। ইতি শব্দরত্নাবলী॥

মার্গশীর্ষঃ পুং অগ্রহায়ণমাসঃ। মৃগশীর্ষেণ যুক্তা পৌর্ণমাসী মার্গশীর্ষী কঃ সা অস্মিন্ মাসে ভবতি মার্গশীর্ষঃ কঃ। ইত্যমরটীকায়াং ভরতঃ॥ তৎপর্য্যায়ঃ। সহাঃ ২ মার্গঃ ৩ আগ্রহায়ণিকঃ ৪। ইত্যমরঃ॥ মার্গশিরঃ ৫ সহঃ ৬। ইতি শব্দরত্নাবলী॥ বৃশ্চিকস্থ রবিপ্রারব্ধ শুক্ল প্রতিপদাদি দর্শান্তো হয়ং মুখ্যচান্দ্রঃ। ত্রিভাদৃশ মুখ্যচান্দ্র মার্গশীর্ষপৌর্ণমাস্যন্তো হয়ং গৌণচান্দ্রঃ

। বৃশ্চিকরাশিরবিকো হয়ং সৌরঃ। ইতি স্মৃতিঃ ॥ * ॥ তত্র জাতং ফলং। যস্য প্রসূতিঃ খলু মার্গমাসে তীর্থে প্রবাসে সততং মতিঃ স্যাৎ। পরোপকারী ধৃতসাধুবৃত্তিঃ সদ্বৃত্তিযুক্তো ললনাভিলাষী ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ * ॥ অথ মার্গশীর্ষকৃত্যং। আশ্বিন শুক্লপক্ষে নবান্নশ্রাদ্ধাকরণে মার্গশীর্ষস্য বিংশতি দণ্ডাধিক ত্রয়োবিংশতি দিনাভ্যন্তরে শুক্লপক্ষে তৎ শ্রাদ্ধং কর্ত্তব্যং। তত্র মার্গশীর্ষস্য বিংশতিদণ্ডাধিক প্রথমদিনত্রয়েতরেষু মঙ্গল শনি শুক্রবারেতরেষু নন্দা রিক্তা ত্রয়োদশীতর তিথিষু জন্মাষ্টম চন্দ্র জন্মতিথি জন্মনক্ষত্র ত্রয় পঞ্চমতারা ত্রয়েতরেষু পূর্বাত্রয় মঘা ভরণ্যশ্লেষাদ্রেতরেষু নক্ষত্রেষু শ্রাদ্ধং তচ্ছেষ ভোজনঞ্চ কুর্য্যাৎ। শ্রাদ্ধানধিকারিণা তু প্রাগুক্তকালে দেবাদিভ্যো নবান্নং দত্ত্বা ভোক্তব্যং। কিন্তু অশ্লেষা কৃত্তিকা জ্যেষ্ঠা মূলা পূর্বভাদ্রপদকেষ্বপি নবান্ন ভোজনং ন কর্ত্তব্যং। চন্দ্র তারাদ্যশুদ্ধৌ প্রতীকার মাহ দেবলঃ। কর্ম্ম কুর্য্যাৎ ফলাবাপ্ত্যৈ চন্দ্রাদি শোভনে বুধঃ। সংহকালে ত্বিদং সর্বং নার্ত্তঃ কাল মপেক্ষতে ॥ চন্দ্রে চ শঙ্খং লবণঞ্চ তারে তিথাবভদ্রে সিততণ্ডুলাংশ্চ। ধান্যঞ্চ দদ্যাৎ করণঞ্চ বারে যোগে তিলান্ হেম নগিঞ্চ লগ্নে ॥ রাজমার্ত্তণ্ডে তারাভেদাল্লবণপরিমাণমাহ। এক ত্রি পঞ্চ সপ্ত চ দ্বিজায় দদ্যাৎ পলানি লবণস্য ক্রমশো জন্ম বিপৎ প্রত্যরি নিধনাখ্যতারাসু ॥ পলন্তু লৌকিকৈর্মানৈঃ সাষ্টরত্তি দ্বিমাসকং। তোলকত্রিতয়ং জ্ঞেয়ং জ্যোতির্জ্ঞৈঃ স্মৃতি সম্মতং ॥ তত এবং দধ্যাদ্যং সংযুক্তং নবং পিতৃভিমন্ত্রিতং। মন্ত্রানাদেশে গায়ত্রীতি গায়ত্র্যভিমন্ত্রিতং ॥ নবমন্নং ব্রাহ্মণানুজ্ঞাং গৃহীত্বা প্রাশ্নীয়াৎ। নূতন ধান্যাসম্ভবে পুরাতনেনাপি শ্রাদ্ধং কর্ত্তব্যং। বৃশ্চিকে শুক্লপক্ষে তদকরণে হরিশয়নাৎ পূর্বং মীন ধনুস্থ রবীতরত্র মাঘাদৌ কর্ত্তব্যং ॥ * ॥ বৃশ্চিকস্থরবৌ শুক্ল চতুর্দশ্যাং সৌভাগ্য কামঃ পাষাণাকার পিষ্টকৈ দেবীং পূজয়েৎ তদপি ভক্ষয়েন্নক্তং ॥ * ॥ অগ্রহায়ণ্যাং পৌর্ণমাস্যাং পার্বণবিধিনা শ্রাদ্ধ মাবশ্যকং ॥ * ॥ ভবিষ্যপুরাণে। রোহিণ্যা প্রতিপদ্যুক্তা মার্গে মাসি সিতেতরা। গঙ্গায়াং যদি লভ্যেত সূর্য্যগ্রহ শতৈঃ সমা ॥ ইতি কৃত্যতত্ত্বং ॥

মার্গিকঃ ত্রি মৃগহন্তা ॥ পথিকঃ । ইতি সিদ্ধান্তকৌমুদী ॥

মার্গিতং ত্রি অন্বিষ্টং । ইত্যমরঃ ॥

মার্গ্যং ত্রি মার্জ্জনীয়ং । ইতি সিদ্ধান্তকৌমুদী ॥ অন্বেষণীয়ঞ্চ ॥

মার্জ্জ ক মার্জ্জনে ॥ ধ্বনৌ । ইতি কবিকল্পদ্রুমঃ ॥ ক মার্জ্জয়তি । ইতি দুর্গাদাসঃ ॥

মার্জ্জঃ পুং বিষ্ণুঃ । ইতি হেমচন্দ্রঃ ॥ রজকঃ । ইতি শব্দমালা ॥ মার্জ্জনং । ইত্যমরটীকায়াং ভরতঃ ॥

মার্জ্জনং ক্লী প্রোঞ্ছনাদিনা অঙ্গনির্ম্মলীকরণং । মাজা ইতি ভাষা । তৎপর্য্যায়ঃ । মার্ষ্টিঃ ২ মার্ষ্টি ৩ মার্জ্জনা ৪ মৃজা ৫ । ইতি শব্দরত্নাবলী ॥ মার্জ্জঃ ৬ মার্জ্জা ৭ । ইত্যমরটীকায়াং ভরতঃ ॥ * ॥ স্নানকালে শরীরমার্জ্জনগুণাঃ । দৌর্গন্ধ্যং গৌরবং কণ্ডূং কচ্ছুং মলমরোচকং । স্বেদং বীভৎসতাং হন্তি শরীরপরিমার্জ্জনং ॥ ইতি রাজবল্লভঃ ॥ * ॥ দেবীগৃহমার্জ্জনফলং যথা ॥ দেব্যা গৃহন্তু যঃ শুক্লং সংমার্জ্জয়তি নিত্যশঃ । স ভবেদ্বলবান্ সৌখ্য সর্ব্বসম্পত্তিসংযুতঃ ॥ দেব্যা গৃহন্তু যঃ শুক্লগোময়েনানুলেপয়েৎ । স্ত্রিয়ো বা যদি বা পুংসঃ যথাশক্তি নিরন্তরং ॥ স লভেদীপ্সিতান্ কামান্ দেব্যা লোকঞ্চ গচ্ছতি ॥ ইতি দেবীপুরাণে ৪২ অধ্যায়ঃ ॥ * ॥ অথ ভগবন্মন্দিরমার্জ্জন মাহাত্ম্যং । নরসিংহগৃহে নিত্যং যঃ সংমার্জ্জনমাচরেৎ । সমস্তপাপনির্ম্মুক্তো বিষ্ণুলোকে সমোদতে ॥ ইতি নৃসিংহপুরাণং ॥ সংমার্জ্জনন্তু যঃ কুর্য্যাৎ পুরুষঃ কেশবালয়ে । রজস্তমোভ্যাং নির্ম্মুক্তঃ স ভবেন্নাত্র সংশয়ঃ ॥ পাংশূনাং যাবতো রাজন্ কুর্য্যাৎ সংমার্জ্জনং নরঃ । তাবন্ত্যব্দানি স সুখী নাকমাসাদ্য মোদতে ॥ ইতি বিষ্ণুধর্ম্মোত্তরং ॥ যাবন্তি কানি পদান্তানি ভূমিং সংমার্জ্জনাদ্দঃ । তাবদ্বর্ষসহস্রাণি শাকদ্বীপে মহীয়তে । জায়তে মম ভক্তশ্চ সর্ব্বধর্ম্মসমন্বিতঃ । শুচির্ভাগবতঃ শুদ্ধো হ্যপরাধবিবর্জ্জিতঃ ॥ ততো ভুক্ত্বা সর্ব্বভোগান্ তীর্ত্বা সংসারসাগরং । শাকদ্বীপাৎ পরিভ্রষ্টঃ স্বর্গলোকং স গচ্ছতি ॥ নন্দনং বনমাশ্রিত্য মোদতে চাপ্সরৈঃ সহ । নন্দনাচ্চ পরিভ্রষ্টো মম কর্ম্মব্যবস্থিতঃ ॥ সর্ব্বসঙ্গান্ পরিত্যজ্য মম লোকন্তু গচ্ছতি ॥ ইতি বরাহপুরাণং ॥ * ॥ স্নানবিশেষঃ । যথা । আতুরাণান্তু । অশিরস্কং ভবেৎ স্নানং স্নানাশক্তৌ

র্ম্মণাং। আর্দ্রেণ বাসসা বাপি মার্জ্জনং দৈহিকং বিদুঃ ॥ ইতি জাবাল বচনাচ্ছিরো বিহায গাত্র প্রক্ষালনং তদশক্তৌ সর্ব্বগাত্র মার্জনং আর্দ্রেণ বাসসা কুর্য্যাৎ। ইত্যাহ্নিকাচারতত্ত্বং ॥ * ॥ বৈদিক সন্ধ্যোপাসনান্তগত মার্জনং যথা। ছন্দোগপরিশিষ্টং। শিরসো মার্জনং কুর্য্যাৎ কুশৈঃ সোদক বিন্দুভিঃ। প্রণবো ভূর্ভুবঃ স্বশ্চ গায়ত্রী চ তৃতীয়িকা ॥ অব্দৈবত্যং ত্র্যৃচ ঞ্চৈব চতুর্থ মিতি মার্জনং। ওঙ্কারো ভূরাদি ব্যাহৃতি ত্রয়ং তৃতীয়া চ গায়ত্রী চতুর্থমাপোহিষ্ঠেতি ঋক ত্রয়ং। ইতীদং মার্জনং মার্জন ক্রিয়া করণ মিত্যর্থঃ ॥ রামায়ণং। ঋগন্তে মার্জনং কুর্য্যাৎ পাদান্তে বা সমাহিতঃ। আপোহিষ্ঠেত্যৃচা কার্য্যং মার্জনন্তু কুশোদকৈঃ ॥ প্রতি প্রণব সংযুক্তং ক্ষিপেন্মূর্দ্ধ্নি পদে পদে। ত্র্যৃচস্যান্তে ২থ বা কুর্য্যাদৃষীণাং মত মীদৃশং ॥ আপোহিষ্ঠেতি সূক্তস্য সিন্ধুদ্বীপ ঋষিঃ স্মৃতঃ। আপো বৈ দেবতা ছন্দো গায়ত্রী মার্জনং স্মৃতং ॥ ইত্যাহ্নিকাচারতত্ত্বং ॥

মার্জ্জনঃ পুং লোধ্রবৃক্ষঃ। ইত্যমরঃ ॥ শ্বেতলোধ্রঃ। ইতি সুভূতিঃ ॥ রক্তলোধ্রঃ। ইতি স্বামী ॥

মার্জনা স্ত্রী মার্জনং। ইত্যমরঃ ॥ মুরজধ্বানঃ। ইতি হেমচন্দ্রঃ ॥

মার্জনী স্ত্রী সম্মার্জনী। ঝাঁটা ইতি ভাষা। যথা। নমামি শীতলাং দেবীং রাসভস্থাং দিগম্বরীং। মার্জনী কলসোপেতাং শূর্পালঙ্কৃত মস্তকাং ॥ ইতি স্কান্দে শীতলাস্তোত্রং ॥

মার্জনীযঃ ত্রি মার্জনযোগ্যঃ। মার্জ্জ্যঃ। ইতি মৃজধাতোঃ কর্ম্মণ্যনীয প্রত্যযেন নিষ্পন্নঃ ॥ অগ্নিঃ ॥ শোধনং। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মার্জারঃ পুং রক্তচিত্রকঃ। ইতি রাজনির্ঘণ্টঃ ॥ বিড়ালঃ। ইত্যমরঃ ॥ খট্টাসঃ। ইতি হেমচন্দ্রঃ ॥ * ॥ মার্জার স্পর্শনে দোষো যথা। অভোজ্য সূতিকা ষণ্ড মার্জারাখূংশ্চ কুক্কুরান্। পতিতাপবিদ্ধ চণ্ডাল মৃতহারাংশ্চ ধর্ম্মবিৎ ॥ সংস্পৃশ্য শুধ্যতে স্নানাদুদক্যা গ্রামশূকরৌ। ইতি মার্কণ্ডেয পুরাণে সদাচারাধ্যাযঃ ॥ * ॥ পারিভাষিক মার্জারো যথা। দত্ত্বার্থং জপতে যশ্চ তপ্যতে যজতে তথা। ন পরত্রার্থ মুদ্যুক্তো মার্জারঃ পরিকীর্ত্তিতঃ। তস্যান্নমভোজ্যং যথা। অভোজ্যাঃ

মৃত্তিকা খণ্ড মার্জারাশ্বত্থ অঙ্কুটাঃ। ইতি বামনপুরাণে ১৫ অধ্যায়ঃ॥

মার্জ্জারকঃ পুং ময়ূরঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মার্জ্জারকণ্ঠঃ পুং ময়ূরঃ। ইতি শব্দরত্নাবলী॥

মার্জ্জারকর্ণিকা স্ত্রী চামুণ্ডা। যথা। চামুণ্ডা চর্চ্চিকা চর্ম্মমুণ্ডা মার্জারকর্ণিকা। ইতি হেমচন্দ্রঃ॥

মার্জ্জারকর্ণী স্ত্রী চামুণ্ডা। যথা। মার্জারকর্ণী চামুণ্ডা কর্ণমোটিশ্চ চর্চ্চিকা। ইতি ত্রিকাণ্ডশেষঃ॥

মার্জ্জারগন্ধা স্ত্রী মুদ্গপর্ণী বিশেষঃ। ইতি রত্নমালা॥

মার্জ্জারগন্ধিকা স্ত্রী মুদ্গপর্ণী। ইতি রাজনির্ঘণ্টঃ॥

মার্জ্জারী স্ত্রী কস্তুরী॥ জন্তুবিশেষঃ। গন্ধগকুলা ইতি খাটাসী ইতি চ ভাষা। তৎপর্য্যায়ঃ। পূতিকা ২ পূতিকজঃ ৩ গন্ধচেলিকা ৪। অস্যা গুণাঃ। বাস্তিধারকত্বং। চক্ষুষ্যত্বং। কফ বাত নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মার্জ্জারীয়ঃ পুং বিড়ালঃ॥ শূদ্রঃ॥ কায়শোধনং। ইতি মেদিনী॥

মার্জ্জালঃ পুং মার্জারঃ। রলয়োরেকত্বাৎ॥

মার্জ্জালীয়ঃ পুং বিড়ালঃ॥ শূদ্রঃ॥ কায়শোধনং। ইতি হেমচন্দ্রঃ॥

মার্জ্জিতা স্ত্রী রসালা। ইত্যমরঃ॥ সংস্কৃত দধি খণ্ড মধু সর্পি মরিচাদি কৃত কর্পূরাদি বাসিত সম্ভক্ষ্য বিশেষঃ। ইত্যমরটীকায়াং ভরতঃ॥ শোধিতে ত্রি॥

মার্ত্তণ্ডঃ পুং সূর্য্যঃ॥ অর্কবৃক্ষঃ॥ ইত্যমরঃ॥ শূকরঃ। ইতি মেদিনী॥ অস্য ব্যুৎপত্তির্যথা। শ্রীমার্কণ্ডেয় উবাচ। এবং সা নিয়তা দেবী চক্রে স্তোত্রমহর্নিশং। নিরাহারা বিবস্বন্তমারিরাধয়িষুর্মুনে॥ ততঃ কালেন মহতা ভগবাংস্তপনো মুনে। প্রত্যক্ষতামগাত্তস্যা দাক্ষায়ণ্যা দ্বিজোত্তম॥ সা দদর্শ মহাকূটং তেজসো হম্বর সংস্থিতং। ভূমৌ চ সংস্থিতং ভাস্বৎ জ্বালামালাতিদুর্দৃশং॥ তঞ্চ দৃষ্ট্বা ততো দেবী সাধ্বসং পরমং গতা। জগদাদ্য প্রসীদেতি ন ত্বাং পশ্যামি গোপতে॥ যথা দৃষ্টবতী পূর্ব্বমম্বরস্থং সুদুর্দৃশং। সংঘাতং তেজস স্তস্মাদিহ পশ্যামি ভূতলে॥ প্রসাদং কুরু পশ্যেয়ং যদ্রূপং তে প্রভাকর। ভক্তানুকম্পন বিভো ভক্তাহং পাহি মে সুতান্॥ শ্রীমার্কণ্ডেয় উবাচ

। ততঃ স তেজস স্তস্মাদাবির্ভূতো বিভাবসুঃ । অদৃশ্যত তদাদিত্য স্তপ্ততাম্রোপম প্রভঃ ॥ অথ তাং প্রাগতাং দেবীং তস্য সন্দর্শনাম্মনে । প্রাহ ভাস্বান্ বৃণুষ্বেষ্টং বরং মত্তো যমিচ্ছসি ॥ প্রণতা শিরসা সা চ জানুপাড়িত মেদিনী । প্রত্যুবাচ বিবস্বন্তং বরদং সমুপস্থিতং ॥ দেব প্রসীদ পুত্রাণাং হৃতং ত্রিভুবনং মম । যজ্ঞভাগাশ্চ দৈতেয়ৈ র্দানবৈশ্চ বলাধিকৈঃ ॥ তন্নিমিত্তং প্রসাদং ত্বং কুরুষ্ব মম গোপতে। অংশেন তেষাং ভ্রাতৃত্বং গত্বা নাশয় তদ্রিপূন্ ॥ যথা মে তনয়া ভূয়ো যজ্ঞভাগভুজঃ প্রভোঁ। ভবেয়ু রধিপাশ্চৈব ত্রৈলোক্যস্য দিবাকর ॥ তথানুকম্পাং পুত্রাণাং সুপ্রসন্নো রবে মম । কুরু প্রসন্নার্ত্তিহর স্থিতিকর্ত্তা ত্ব মদ্যমে॥ মার্কণ্ডেয় উবাচ। তত স্তা মাহ ভগবান্ ভাস্করো বারিতস্করঃ। প্রণতা মদিতিং বিপ্র প্রসাদ সুমুখো বিভুঃ ॥ সহস্রাংশেন তে গর্ব্ভে সম্ভূযাহ মশেষতঃ। ত্বৎপুত্র শত্রূনদিতে নাশয়াম্যাশু নির্বৃতা ॥ ইত্যুক্ত্বা ভগবান্ ভাস্বানন্তর্দ্ধান মুপাগমৎ । নিবৃত্তা সাপি তপসঃ সংপ্রাপ্তা খিলবাঞ্ছিতা ॥ ততো রশ্মি সহস্রান্তঃ সুষুম্নাখ্যো রবেঃ করঃ । বিপ্রাবতারং সংচক্রে দেবমাতু রথোদরে॥ কৃচ্ছ্রচান্দ্রায়ণাদীনি সা চক্রে সুসমাহিতা । শুচিঃ সন্ধারয়ামেয়নং দিব্যং গর্ভ মিতি দ্বিজ॥ তত স্তাং কশ্যপঃ প্রাহ কিঞ্চিৎ কোপপ্লুতাক্ষরং । কিং মারয়সি গর্ব্ভাণ্ড মিতি নিত্যোপবাসিনী ॥ সা চ তং প্রাহ গর্ব্ভাণ্ড মেতৎ পশ্যেতি কোপনা । ন মারিতং বিপক্ষাণাং মৃত্যবে যদ্ভবিষ্যতি ॥ ইত্যুক্তা তং তদা গর্ব্ভ মুৎসসর্জ সুরারণিঃ । জাজ্বল্যমানং তেজোভিঃ প্রত্যুবাচ ন কোপিতা ॥ তং দৃষ্ট্বা কশ্যপো গর্ব্ভ মুদ্যদ্ভাস্কর বর্চসং । তুষ্টাব প্রণতো ভূত্বা ঋগ্ভি রাদ্যাভি রাদরাৎ ॥ সংস্তূয়মানঃ স তদা গর্ব্ভাণ্ডাৎ প্রকটো হ্যভবৎ । পদ্মপত্র সবর্ণাভ স্তেজসা ব্যাপ্তদিঙ্মুখঃ ॥ অথান্তরীক্ষাদাভাষ্য কশ্যপং মুনিসত্তমং । সতোয় মেঘ গম্ভীরা বাগুবাচাসরীরিণী ॥ মারিতঞ্চ যতঃ প্রোক্ত মেতদণ্ডং ত্বয়াদিতিং । তস্মান্মুনে সুত স্তে হয়ং মার্ত্তণ্ডাখ্যো ভবিষ্যতি ॥ সূর্য্যাধিকারঞ্চ বিভু র্জগত্যেষ করিষ্যতি । হনিষ্যত্যসুরাং শ্চায়ং যজ্ঞভাগ হরানরীন্॥ দেবা নিশম্যেতি বচো গগনাৎ সমুপাগতং । প্রহৃষ

মতুলং যাতা দানবাশ্চ হতৌজসঃ ॥ ততো যুদ্ধায় দৈতেয়া নাজুহাব শতক্রতুঃ। সহ দেবৈ মুদাযুক্তো দানবাশ্চ তমাযযুঃ ॥ তেষাং যুদ্ধমভূদ্ঘোরং দেবানাং মসুরৈঃ সহ। শস্ত্রাস্ত্রদীপ্তি সন্দীপ্ত সমস্ত ভুবনান্তরং ॥ তস্মিন্ যুদ্ধে ভগবতা মার্ত্তণ্ডেন নিরীক্ষিতাঃ। তেজসা দহ্যমানাস্তু ভস্মীভূতা মহাসুরাঃ ॥ ততঃ প্রহর্ষমতুলং প্রাপুঃ সর্বে দিবৌকসঃ। তুষ্টুবুঃ তেজসাং যোনিং মার্ত্তণ্ড মদিতিং তথা ॥ স্বাধিকারং ততঃ প্রাপুর্যজ্ঞভাগাংশ্চ পূর্ব্ববৎ। ভগবানপি মার্ত্তণ্ডঃ স্বাধিকার মথাকরোৎ ॥ কদম্ব পুষ্পবদ্ভাস্বান ধশ্চোর্দ্ধঞ্চ রশ্মিভিঃ। বৃত্তোগ্নি পিণ্ড সদৃশো দধ্রে নাতিস্ফুটং বপুঃ ॥ ইতি মার্কণ্ডেয়পুরাণে সূর্য্যমাহাত্ম্যে মার্ত্তণ্ডোৎপত্তি নামাধ্যায়ঃ॥

মার্ত্তণ্ডবল্লভা স্ত্রী আদিত্যভক্তা। ইতি রাজনির্ঘণ্টঃ॥ সূর্য্যপত্নী চ ॥

মার্ত্তিকঃ পুং শরাবঃ। ইতি শব্দরত্নাবলী ॥ মৃত্তিকানির্ম্মিতে ত্রি ॥

মার্দঙ্গং ক্লী পত্তনং। ইতি হারাবলী॥ মৃদঙ্গবাদকে ত্রি ॥

মার্দঙ্গিকঃ ত্রি মৃদঙ্গবাদকঃ। তৎপর্য্যায়ঃ। মৌরজিকঃ ২। ইত্যমরঃ।

॥ স্বার্ক্কিকঃ ৩ ঔদ্ধিকঃ ৪। ইতি শব্দরত্নাবলী ॥

মার্দ্দবং ক্লী পরদুঃখদর্শনাৎ পীড়াবুদ্ধিঃ। মৃদুতা ॥ যথা। মার্দ্দবং কোমলস্যাপি সংস্পর্শাসহতোচ্যতে। উত্তমং মধ্যমং প্রোক্তং কনিষ্ঠেতি ত্রিধা ॥ উত্তমং যথা। অভিনব মালিকানিবং সাশয়নববংশিরাধিকা বিশিষ্যে। নজ্জসুন পটলং দরাপি জগ্লৌ তদনুভবাত্তনুরেব সব্রণাসীৎ ॥ মধ্যমং যথা। চিত্রং ধনিষ্ঠে তনবাসসোপি চীনস্য পীনস্তনি সঙ্গমেন। লিপ্তেন তল্লোহিতচন্দনেন মূর্ত্তির্বিদূনা সখি লোহিতাসীৎ ॥ কনিষ্ঠং যথা। রসসুধাকরে আমোদ মানোহনে মাদধানং নিলীন নীলালক চঞ্চরীকং। ক্ষণেন পদ্মানুপপদ্ম মাসীৎ স্ত্রিয়া রবেঃ কোমলতাপি তাম্রং ॥ ইত্যুজ্জ্বলনীলমণিঃ ॥

মার্দ্দবঃ পুং বর্ণশঙ্কর জাতিবিশেষঃ। মাধুকো মার্দব শচঞ্চ কারুষা হিণ্ডিকাদয়ঃ। ইতি জটাধরঃ ॥

মার্ষঃ পুং নাট্যোক্তৌ শ্রেষ্ঠঃ। ইতি হেমচন্দ্রঃ ॥ মারিষশাকঃ। ইত্যমরটীকায়াং ভরতঃ ॥

মার্ষিকঃ পুং মারিষশাকঃ। ইতি

রাজনির্ঘণ্টঃ ॥
মার্ষ্টিঃ স্ত্রী মার্জনং। ইত্যমরঃ ॥ তৈলমৃক্ষণং। যথা। তৈল মল্লং য দঙ্গেষু ন ভবেৎ বাহুসঙ্গতং। সামার্ষ্টিঃ পৃথগভ্যঙ্গো মস্তকাদৌ প্রকীৰ্ত্তিতঃ ॥ ইত্যাহ্নিকতত্ত্বং ॥
মালং ক্লী ক্ষেত্রং। ইতি মেদিনী ॥ কপটং ॥ বনং। ইতি হেমচন্দ্রঃ ॥
মালঃ পুং জাতিবিশেষঃ। ইতি মেদিনী ॥ স চ ম্লেচ্ছজাতিঃ। যথা। মালা ভিল্লাঃ কিরাতাশ্চ সর্ব্বেপি ম্লেচ্ছজাতয় ইতি ॥ জনঃ। ইতি চ হেমচন্দ্রঃ ॥ দেশবিশেষঃ। স চ মেদিনীপুর প্রদেশে মালভূমিত্বেন খ্যাতঃ ॥ বিষ্ণুঃ। যথা। মা লং লক্ষ্মীং লাতীতি মালো বিষ্ণুঃ তং অতর্তীতি মালতী। ইতি মালতী শব্দটীকায়াং ভরতঃ ॥
মালকং ক্লী স্থলপদ্মং। ইতি জটাধরঃ ॥
মালকঃ পুং নিম্ববৃক্ষঃ। ইত্যমরঃ ॥
মালকা স্ত্রী মাল্যং। ইতি শব্দরত্নাবলী ॥
মালকৌশঃ পুং রাগবিশেষঃ। তস্য নামান্তরং কৌশিকঃ। স চ হনূমন্মতে ষড্রাগাণাং মধ্যে দ্বিতীয় রাগঃ। হরস্যাস্যের বা কণ্ঠান্নির্গতঃ। অস্য জাতিঃ সম্পূর্ণা তত্র সপ্ত স্বর ক্রমঃ ষ ঋ গ ম প ধ নি। অস্য গ্রহং ষড্জস্বরঃ। শরদৃতৌ রাত্রিশেষে গান সময়ঃ। রাগমালায়ামস্য স্বরূপং। পাটলবর্ণপুরুষঃ। নীলপরিচ্ছদঃ। যষ্টিহস্তঃ। যৌবনমদমত্তঃ স্ত্রীভিঃ সহ হাস্যকৌতুকান্বিতঃ। শত্রুরক্তমাল্যগলো হথবা বৃহন্মুক্তামাল্যগলঃ। অস্য রাগিণ্যঃ পঞ্চ যথা। টোড়ী ১ গৌরী ২ গুণকরী ৩ খম্বাবতী ৪ কোকভা ৫। অস্যাষ্টৌপুত্রা যথা। মারুঃ ১ মেবাড়ঃ ২ বড়হংসঃ ৩ প্রবলঃ ৪ চন্দ্রকঃ ৫ নন্দঃ ৬ ভ্রমরঃ ৭ খুখরঃ ৮ অত্র মিষ্টাঙ্গোপি পাঠঃ। ভরতমতে তস্য রাগিণ্যঃ পঞ্চ যথা। গৌরী ১ দয়াবতী ২ দেবদালী ৩ খম্বাবতী ৪ কোকভা ৫। তন্মতে অষ্টৌ পত্রা যথা। গান্ধারঃ ১ শুদ্ধঃ ২ মকরঃ ৩ ত্রিশৃঙ্গঃ ৪ সহানঃ ৫ শঙ্করবল্লভঃ ৬ মালীগৌরঃ ৭ কামোদঃ ৮। অষ্টপুত্রভার্য্যা যথা। ধনাশ্রীঃ ১ মালশ্রীঃ ২ জয়তশ্রীঃ ৩ সুঘোরাণী ৪ দুর্গা ৫ গান্ধারী ৬ ভীমপলাশী ৭ কামোদী ৮। ইতি সঙ্গীতশাস্ত্রং ॥
মালচক্রকং ক্লী সক্থ্যূরুপর্ব্বসন্ধিঃ।

মালাইচাকি ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

মালতী স্ত্রী স্বনামখ্যাতপুষ্পলতা। তৎপর্য্যায়ঃ। সুমনা ২ জাতিঃ ৩। ইত্যমরঃ॥ সুমনাঃ ৪ জাতী ৫। ইতি ভরতঃ॥ অস্যা গুণাঃ। কফ পিত্ত মুখরোগ ব্রণ ক্রিমি কুষ্ঠ নাশিত্বং। ইতি রাজবল্লভঃ॥ তস্যা উৎপত্তির্যথা। আদ্যাশক্তিরুবাচ। অহমেব ত্রিধা ভিন্না তিষ্ঠামি ত্রিবিধৈ গুণৈঃ। গৌরী লক্ষ্মীঃ স্বধাচেতি রজঃ সত্ত্ব তমো গুণৈঃ॥ তত্র গত্বা তথা কার্য্যং বিধাস্যন্তে চ তাঃ সুরাঃ। নারদ উবাচ। শৃণ্বতা মিতি তাং বাচ মন্তর্দ্ধান মগান্মহঃ। দেবানাং বিস্ময়োৎফুল্ল নেত্রাণাঞ্চ তদা নৃপ॥ ততঃ সর্ব্বেপি তে দেবা গত্বা তদ্বাক্য চোদিতাঃ। গৌরীং লক্ষ্মীং স্বধাঞ্চৈব প্রণেমু র্ভক্তি তৎপরাঃ॥ তা স্তথা তান্ সুরান্ দৃষ্ট্বা প্রণতান্ ভক্তবৎসলাঃ। বীজানি প্রদদু স্তেভ্যো বাক্যানি জগদু স্তথা॥ দেব্য ঊচুঃ। ইমানি দেবা বীজানি বিষ্ণুর্যত্রাবতিষ্ঠতি। নির্ব্বপস্ব ততঃ কার্য্যং ভবতাং সিদ্ধি মেষ্যতি॥ নারদ উবাচ। ততঃ প্রহৃষ্টাঃ সুর সিদ্ধ সংঘাঃ প্রগৃহ্য বীজানি বিচিক্ষিপুশ্চ। বিন্দারিকা ভূমিতলে স যত্র বিষ্ণুঃ সদা তিষ্ঠতি সৌখ্য বৃত্তিঃ॥ নারদ উবাচ। ক্ষিপ্তেভ্য স্তত্র বীজেভ্যো বনস্পত্য স্ত্রয়ো হভবন্। ধাত্রী চ মালতী চৈব তুলসী চ নৃপোত্তম॥ ধাত্র্যুদ্ভবা স্মৃতা ধাত্রী মা ভবা মালতী স্মৃতা। গৌরী ভবা চ তুলসী রজঃ সত্ত্ব তমো গুণাঃ॥ ইতি পাদ্মে উত্তরখণ্ডে ১৪৯। ১৫০ অধ্যায়ৌ॥ *॥ যুবতী॥ কাচমালী॥ বিশল্যা॥ জ্যোৎস্না॥ নিশা॥ নদীবিশেষঃ। ইতি হেমচন্দ্রঃ॥

মালতীতীরজঃ পুং টঙ্কণঃ। ইতি হেমচন্দ্রঃ॥

মালতীতীরসম্ভবং ক্লী শ্বেতটঙ্কণং। ইতি রাজনির্ঘণ্টঃ॥

মালতীপত্রিকা স্ত্রী জাতীপত্রী। ইতি রাজনির্ঘণ্টঃ॥

মালতীফলং ক্লী জাতীফলং। ইতি রাজনির্ঘণ্টঃ॥

মালয়ঃ পুং চন্দনবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মলয়সম্বন্ধিনি ত্রি॥

মালবঃ পুং অবন্তিদেশঃ। মালওয়া ইতি হিন্দীভাষা। ইতি হেমচন্দ্রঃ॥ রাগবিশেষঃ। স চ ষড়্রাগাণাং মধ্যে প্রথমরাগঃ। মতান্তরে ভৈরব

রাগো হয়ং। যথা। আদৌ মালব রাগেন্দ্রস্ততো মল্লার সংজ্ঞিতঃ। শ্রীরাগস্তস্য পশ্চাদ্বৈ বসন্তস্তদনন্তরং॥ হিল্লোলশ্চাথ কর্ণাট এতেরাগাঃ প্রকীর্ত্তিতাঃ॥ তস্য স্বরূপং যথা। নিতম্বিনী চুম্বিত বক্ত্রপদ্মঃ শুক দ্যুতিঃ কুণ্ডলবান্ প্রমত্তঃ। সঙ্গীতশালী প্রবিশন্ প্রদোষে নীলাম্বরো মালবরাগরাজঃ ॥ ইতি সঙ্গীতদামোদরঃ॥

মালবিকা স্ত্রী ত্রিবৃৎ। ইতি রাজনির্ঘণ্টঃ॥

মালসী স্ত্রী কেশপুষ্টবৃক্ষঃ। যথা। মালসী দুর্গপুষ্পী চ বালাক্ষী কেশবারিণী। ইতি শব্দচন্দ্রিকা॥ রাগিণীবিশেষঃ। সা তু মালব রাগস্য পত্নী। যথা। ধানুষী মালসী রামকিরী চ সিন্ধুড়া তথা। অশ্বারী ভৈরবী চ মালবস্য প্রিয়া ইমাঃ॥ ইতি হারীতঃ॥ মতান্তরে মেঘরাগস্যপত্নী। যথা। ললিতা মালসী গৌড়ী নাটী দেবকিরী তথা। মেঘরাগস্য রাগিণ্যো ভবন্তীমাঃ সুমধ্যমাঃ॥ তস্যাঃ স্বরূপং যথা। নীলারবিন্দস্য দলানি বালা বিধায় রক্তা তনুদেহযষ্টিঃ। মালূরবৃক্ষস্য তলে নিষণ্ণা শৈলোপ্দিষ্টা মালসিকা প্রদিষ্টা॥ তস্যাগানসময়ো যথা। ইন্দ্রোত্থানাৎ সমারভ্য যাবদ্দুর্গা মহোৎসবং। গেয়া ভবেদ্বুধৈর্নিত্যং মালসী সা মনোহরা॥ অপিচ। গান্ধারী দীপিকা চৈব কল্যাণী পূরবী তথা। অশ্বারী কানড়া চ গৌরী কেদার পাহিড়া॥ মাধবী মালসী নাটী ভূপালী সিন্ধুড়া তথা। সায়াহ্নে রাগিণী রেতাঃ প্রগায়ন্তি চতুর্দ্দশ॥ ইতি সঙ্গীতদামোদরঃ॥

মালা স্ত্রী শ্রেণী। তৎপর্য্যায়ঃ। রাজিঃ ২ লেখা ৩ ততী ৪ বীচী ৫ আলী ৬ আবলিঃ ৭ পঙ্ক্তিঃ ৮ ধারণী ৯। ইতি হেমচন্দ্রঃ॥*॥ পুষ্পি ন্যস্তপুষ্পদাম। অন্যত্রাপ্যুপচারাৎ। তৎপর্য্যায়ঃ। মাল্যং ২ স্রক্ ৩। ইত্যমরঃ॥ মালিকা ৪ মালাকা ৫ মাল্লকা ৬। ইতি শব্দরত্নাবলী॥ গণনিকা ৭ গুণান্তিকা ৮। ইতি বরাহপুরাণং॥ সা ত্রিবিধা যথা। মালা তু ত্রিবিধা দেবি বর্ণাক্ষ পর্ব্ব ভেদতঃ। ইতি মৎস্যসূক্তবচনং॥*॥ অথ মালানির্ণয়ঃ। তত্র করমালা। সনৎকুমার সংহিতায়াং। তর্জ্জনী মধ্যমানামা কনিষ্ঠা চেতি তাঃ ক্রমাৎ॥ তিস্রোঙ্গুল্য স্ত্রিপর্ব্বাণো মধ্যমা চৈক

র্ব্বিকা। পর্ব্বদ্বয়ং মধ্যমায়া মেরু
মেনোপকল্পয়েৎ ॥ ক্রমমাহ। অ-
নামা মধ্য মারভ্য কনিষ্ঠাদিত এ-
ব চ। তর্জনী মূলপর্য্যন্তং দশপর্ব্বসু
সংজপেৎ ॥ তথা। অনামা মূলমা-
রভ্য কনিষ্ঠাদিত এব চ। তর্জনী
মধ্যপর্য্যন্ত মষ্টপর্ব্বসু সংজপেৎ ॥
এতদ্বচনন্তু অষ্টোত্তরশতাদি বিষয়ং
॥ ❀ ॥ শক্তি বিষয়ে পুনঃ। শ্রীক্রমে
। অনামিকা ত্রয়ং পর্ব্ব কনিষ্ঠাদি ত্রি-
পর্ব্বিকা। মধ্যমায়াশ্চ ত্রিতয়ং ত-
র্জনী মূল পর্ব্বণি ॥ তর্জন্যগ্রে তথা
মধ্যে যো জপেৎ স তু পাপকৃৎ।
হংসপারমেশ্বরে। পর্ব্বদ্বয় মনামা-
যাঃ পরিবর্ত্তেন বৈ ক্রমাৎ। পর্ব্বত্র
য়ং মধ্যমায়া স্তর্জন্যেকং সমাহরেৎ
॥ পর্ব্ব দ্বয়ন্তু তর্জন্যা মেরুং তদ্বিদ্ধি
পার্ব্বতি। শক্তিমালা সমাখ্যাতা
সর্ব্বতন্ত্র প্রদীপিকা ॥ তথা। অনা-
মা মূলমারভ্য প্রাদক্ষিণ্য ক্রমেণ চ
। মধ্যামা মূলপর্য্যন্ত মষ্টপর্ব্বসু সংজ-
পেৎ॥ ❀ ॥ শ্রীবিদ্যায়া ময়ং বিশে-
ষঃ। অনামায়া মধ্যমায়া মূলাগ্র
ঞ্চ দ্বয়ং দ্বয়ং। কনিষ্ঠায়াশ্চ তর্জন্যা
স্ত্রয়ং পর্ব সুরেশ্বরি ॥ অনামা মধ্য
মায়াশ্চ মেরুঃ স্যাদ্দ্বিতয়ং শুভং।
প্রদক্ষিণ ক্রমাদ্দেবি জপোঽপ্রপূরসু

ন্দরী ॥ ইতি জামল বচনাৎ। মু-
ণ্ডমালাতন্ত্রে। অনামিকা দ্বয়ং পর্ব্ব-
প্রাদক্ষিণ্য ক্রমেণ তু। তর্জনী মূল-
পর্য্যন্তং করমালা প্রকীর্ত্তিতা ॥ ক-
নিষ্ঠা মূল মারভ্য প্রাদক্ষিণ্য ক্রমেণ
চ। তর্জনী মূল পর্য্যন্ত মষ্টপর্ব্বসু সং-
জপেৎ ॥ ইদমপি অষ্টোত্তর শতা-
দি বিষয়ং। ❀ ॥ অঙ্গুলী র্ন বিযুঞ্জী-
ত কিঞ্চিদাকুঞ্চিতে তলে। অঙ্গুলী-
নাং বিয়োগাচ্চ ছিদ্রে চ স্রবতে জপঃ
॥ অন্যত্রাপি। অঙ্গুল্যগ্রেষু যজ্জপ্তং
যজ্জপ্তং মেরু লঙ্ঘনে। পর্ব্ব সন্ধিষু
যজ্জপ্তং তৎ সর্ব্বং নিষ্ফলং ভবেৎ ॥
গণনা বিধি মুল্লঙ্ঘ্য যো জপেত্তজ্জ-
পং যতঃ। গৃহ্ণন্তি রাক্ষসা স্তেন
গণয়েৎ সর্ব্বথা বুধঃ॥ তত্রাঙ্গুলি জ-
পং কুর্ব্বন্ সাঙ্গুষ্ঠাঙ্গুলিভি র্জপেৎ।
সাঙ্গুষ্ঠেন বিনা কর্ম্ম কৃতং তদফলং
ভবেৎ ॥ বিশ্বসারে। জপসংখ্যা তু
কর্ত্তব্যা না সংখ্যাতং জপেৎ সুধীঃ।
ন সংখ্যা কারকস্যাস্য সর্ব্বং ভবতি
নিষ্ফলং ॥ তন্ত্রে। হৃদয়ে হস্ত মারো-
প্য তির্য্যক্ কৃত্বা করাঙ্গুলীঃ। আ-
চ্ছাদ্য বাসসা হস্তৌ দক্ষিণেন সদা
জপেৎ ॥ ইতি করমালা ॥ ❀ ॥ জ-
পসংখ্যায়াং নিষিদ্ধ দ্রব্যমাহ যাম-
লে। নাক্ষতৈ র্হস্ত পর্ব্বৈ র্বা ন ধান্যৈ

র্ন চ পুত্রকৈঃ। ন চন্দনৈ র্মৃত্তিকয়া জপ সংখ্যাং ন কারয়েৎ॥ বিহিত দ্রব্যমাহ। লাক্ষা কুসীদ সিন্দূরগোময়ঞ্চ করীষকং। এভি র্নির্ম্মায় গুটিকাং জপসংখ্যান্তু কারয়েৎ॥ * ॥ অথ বর্ণমালা। সনৎকুমারে। ক্রমোৎক্রমগতৈ র্মালা মাতৃকার্ণৈঃ ক্ষমেরুকৈঃ। সবিন্দুকৈঃ সাষ্টবর্গৈ রন্তর্যজন কর্ম্মণি॥ আদি কুচুটুতুপুযু শবোষ্টৌ বর্গাঃ প্রকীর্ত্তিতাঃ। তদ্যথা। অকারাদি বর্ণান্ সবিন্দূন্ প্রত্যেকং কৃত্বা শতং সংজপ্য অকারাদীনাং বর্ণানাং কবর্গাদীনাঞ্চান্তিমংবর্ণং সানুস্বারং কৃত্বা পূর্ব্বমুচ্চার্য্য শেষাষ্টবার মন্ত্র জপঃ কার্য্যঃ। অনেন প্রকারেণ অষ্টোত্তর শতসংখ্যো জপো ভবতি। অন্তর্যজনেত্যুপলক্ষণং। তথা। সবিন্দুং বর্ণমুচ্চার্য্য পশ্চান্মন্ত্রং জপেদ্বুধঃ। অকারাদি ক্ষকারান্তং বিন্দুযুক্তং বিভাব্য চ॥ বর্ণমালা সমাখ্যাতা অনুলোম বিলোমতঃ। ইতি নারদ বচনাৎ। বিশুদ্ধেশ্বরে। অনুলোম বিলোমেন বর্গাষ্টক বিভেদতঃ। মন্ত্রেণান্তরিতান্ বর্ণান্ বর্ণৈ র্নান্তরিতান্ ন্যসেৎ॥ কুর্য্যাদ্বর্ণময়ীং মালাং সর্ব্বতন্ত্র প্রকাশিনীং। * । মালিনীবিজয়ে সূত্র নিয়মঃ। অস্ত বিক্রম্ . . . . . . ভুজগী সূত্রোত বর্ণোজ্জ্বলাং। আদ্যোহ প্রতিরোহতঃ শতময়ীং বর্গাষ্টষ্টোত্তরাং॥ ইতি বর্ণমালা॥ * ॥ অথাক্ষমালা। তত্র মালায়াং মণি নির্ণয়ঃ। পদ্মবীজাদিভি র্মালা বহির্যাগে শুভা তাঃ। রুদ্রাক্ষ শঙ্খ পদ্মাক্ষ পুত্রজীবক মৌক্তিকৈঃ॥ স্ফাটিকৈ র্মণিরত্নৈশ্চ সুবর্ণৈ র্বিদ্রুমৈ স্তথা। রাজতৈঃ কুশমূলৈশ্চ গৃহস্থস্যাক্ষমালিকা॥ * ॥ অঙ্গুলী গণনাদেকং পর্ব্বণ্যষ্ট গুণং ভবেৎ। পুত্রজীবৈ র্দশগুণং শতং শঙ্খৈঃ সহস্রকং॥ প্রবালৈ র্মণি রত্নৈশ্চ দশসাহস্রকং মতং। তদেব স্ফাটিকৈঃ প্রোক্তং মৌক্তিকৈ র্লক্ষমুচ্যতে॥ পদ্মাক্ষৈ র্দশ লক্ষং স্যাৎ সৌবর্ণৈঃ কোটি রুচ্যতে। কুশগ্রন্থ্যা কোটি শতং রুদ্রাক্ষৈঃ স্যাদনন্তকং॥ সর্ব্বৈ র্বিরচিতা মালা নৃণাং মুক্তি ফলপ্রদা। কালিকা পুরাণে। রুদ্রাক্ষৈ র্বা যদি জপেৎ ইন্দ্রাক্ষৈঃ স্ফাটিকৈ স্তথা। নান্যন্মধ্যে প্রযোক্তব্যং পুত্রজীবাদিকঞ্চ যৎ॥ যদ্যন্যত্তু প্রযুঞ্জীত মালায়াং জপ কর্ম্মণি। তস্য কামঞ্চ মোক্ষঞ্চ ন দদাতি প্রিয়ঙ্করী॥ মুণ্ডমালায়াং। শ্মশান ধুস্তুরৈ র্মালা জ্ঞেয়া ধূমাবতী বিধৌ। নরাঙ্গুল্যস্থিভি র্মালা গ্রথিতা

সর্ব্বকামদা ॥ নাড্যা সংগ্রথনং কার্য্যং মুক্তেন বাসসা প্রিয়ে। সদা গোপ্যা প্রযত্নেন জনন্যা জারবৎ প্রিয়ে ॥ * ॥ কামনাবিশেষে তু। পদ্মাক্ষৈ র্বিহিতা মালা শত্রুনাশকরী মতা। কুশগ্রন্থিময়ী মালা সর্ব্বপাপ প্রণাশিনী ॥ পুত্রজীবফলৈঃ কৃপ্তা কুরুতে পুত্র সম্পদং। নির্ম্মিতা রূপ্য মণিভি র্জপমালেপ্সিতপ্রদা ॥ প্রবালৈ র্বিহিতা মালা প্রযচ্ছেৎ বিপুলং ধনং। * ॥ ভৈরবী বিদ্যাযাস্তু বারাহী তন্ত্রে। সুবর্ণ মণিভি র্মালাং স্ফাটিকীং শঙ্খ নির্ম্মিতাং। প্রবালৈ রেব বা জপ্যাৎ পুত্রজীবং বিবর্জ্জয়েৎ। পদ্মাক্ষঞ্চৈব রুদ্রাক্ষ মিন্দ্রাক্ষঞ্চ বিশেষতঃ। * ॥ ত্রিপুরা মন্ত্র জপাদৌ তু রক্তচন্দনবীজাদিভি রতিপ্রশস্তা। তথা চ তন্ত্ররাজে। রক্তচন্দনমালা তু ভোগদা মোক্ষদা ভবেৎ। তথা। বৈষ্ণবে তুলসী মালা গজদন্তৈ র্গজাননে ॥ ত্রিপুরায়া জপে শস্তা রুদ্রাক্ষৈ রক্তচন্দনৈঃ। *। কুমারীকল্পে। রুদ্রাক্ষৈঃ শক্তিমন্ত্রঞ্চ মন্ত্রী যঃ প্রজপেৎ প্রিয়ে। স দুর্গতি মবাপ্নোতি নিষ্ফল স্তস্য তজ্জপঃ ॥ কালিকা-ছিন্নমস্তা চ ত্রিপুরা তারিণী তথা। এতাঃ সর্ব্বা ন দুষ্যন্তি জপে রুদ্রাক্ষ মালয়া ॥ দিবা নৈব প্রজপ্তব্যং রুদ্রাক্ষ মালযাপি চ। পুরশ্চর্য্যাসুতে চাত্র দূষণন্ত বরাননে ॥ মহাশঙ্খময়ী মালা নীলসারস্বতে বিধৌ। নৃললাটাস্থি খণ্ডেন রচিতা জপমালিকা ॥ মহাশঙ্খময়ীমালা তারাবিদ্যা জপে প্রিয়ে। কর্ণনেত্রান্তরালাস্থি মহাশঙ্খঃ প্রকীর্ত্তিতঃ ॥ * ॥ মণি নিয়মস্তু মুণ্ডমালায়াং ॥ অন্যোন্য সমরূপাণি নাতিস্থূল কৃশানি চ। কীটাদিভি রদুষ্টানি ন জীর্ণানি নবানি বৈ ॥ * ॥ তথা গৌতমীয়ে। পঞ্চাশল্লিপিভি র্মালা বিহিতা সর্ব্বকর্ম্মসু। অকারাদি ক্ষকারান্তা বর্ণ মালা প্রকীর্ত্তিতা ॥ ক্ষার্ণং মেরুমুখং তত্র কল্পয়েন্মুনিসত্তম। অনয়া সর্ব্ব মন্ত্রাণাং জপঃ সর্ব্ব সমৃদ্ধিদঃ ॥ * ॥ চামুণ্ডাতন্ত্রে। নিত্যং জপং করে কুর্য্যাৎ নতু কাম্যং মনোধনাৎ। কাম্যমপি করে কুর্য্যাৎ মালাভাবেপি সুন্দরি ॥ তেন মালায়াঃ প্রাধান্যং ॥ * ॥ কামনাভেদে তু গৌতমীয়ে। সমাসেনাক্ষসূত্রস্য বিধান মিহ কথ্যতে। পঞ্চবিংশতিভি র্মোক্ষং ত্রিংশদ্ভি র্ধন সিদ্ধয়ে ॥ সর্ব্বার্থাঃ সপ্তবিংশত্যা পঞ্চদশ্যাভিচারকে। পঞ্চাশদ্ভি র্কাম্য সিদ্ধিঃ স্যাচ্ছতং ... চতু রুত্তরৈঃ ॥ অষ্টোত্তর

শতৈঃ সর্ব্ব সিদ্ধি রুক্তা মনীষিভিঃ ।॥ ॥ অথ মালা সংস্কারঃ । তত্র সনৎকুমারীয়ে । কার্পাস সম্ভবং সূত্রং ধর্ম্ম কামার্থ মোক্ষদং । তচ্চ বিপ্রেন্দ্র কন্যাভি নির্ম্মিতঞ্চ সুশোভনং ॥ যদ্বা । শুক্লং রক্তং তথা কৃষ্ণং পট্টসূত্র মথাপিবা । শান্তি বশ্যাভিচারেষু মোক্ষৈশ্বর্য্য জযেষু চ ॥ শুক্লং রক্তং তথা পীতং কৃষ্ণং বর্ণেষু চ ক্রমাৎ । সর্ব্বেষা মেব বর্ণানাং রক্তং সর্ব্বেপ্সিতপ্রদং ॥ আশ্রমেষু তথা চৈবং রক্তং সর্ব্ব সুসিদ্ধিদং । ত্রিগুণং ত্রিগুণীকৃত্য গ্রথযেৎ শিল্পশাস্ত্রতঃ॥ একৈকং মাতৃকা বর্ণং সতারং প্রজপন্ সুধীঃ । মণি ম্যাদায সূত্রেণ গ্রথযেন্মধ্য মধ্যতঃ॥ ব্রহ্মগ্রন্থিং বিধাযেথং মেরুঞ্চ গ্রন্থি সংযুতং । গ্রথযিত্বা পুরো মালাং ততঃ সংস্কার মারভেৎ ॥॥ কস্যচিন্মতে মূলবিদ্যযা গ্রথযেৎ । তথাচ একবীরাকল্পে । মাতৃকা মন্ত্রতো গ্রন্থিং বিদ্যযা বাথ কারযেৎ । সুবর্ণাদি গুণৈ র্বাপি গ্রথযেৎ সাধকোত্তমঃ ॥ ব্রহ্মগ্রন্থিং ততো দদ্যান্নাগপাশ মথাপিবা । কবচেনাববধ্নীযান্মালাং ধ্যানপরাযণঃ ॥ সর্ব্বাষং ততো মেরুং সূত্রদ্বয সমন্বিতং । গ্রথযেত্তাব যোগেন সুধী-যাৎ সাধকোত্তমঃ ॥ এবং নিষ্পাদ্য দেবেশি প্রতিষ্ঠাঞ্চ সমাচরেৎ ।॥ ॥ গৌতমীযে । মুখে মুখঞ্চ সংযোজ্য পুচ্ছে পুচ্ছং নিযোজযেৎ । গোপুচ্ছ সদৃশী মালা যদ্বা সর্পাকৃতিঃ শুভা ॥ এবং নির্ম্মায মালাং বৈ শোধযেন্মুনি সত্তমঃ । অশ্বত্থপত্র নবকৈঃ পদ্মাকারস্তু কারযেৎ ॥ তন্মধ্যে স্থাপযেন্মালাং মাতৃকাং মূল মুচ্চরন্ । ক্ষালযেৎ পঞ্চগব্যেন সদ্যোজাতেন সজ্জলৈঃ ॥ সদ্যোজাতস্তু । ওঁ সদ্যো জাতং প্রপদ্যামি সদ্যোজাতায বৈ নমঃ । ভবে২ভবে২নাদি ভবে ভজস্ব মাং ভবোদ্ভবায নমঃ ॥ চন্দনাগুরু কর্পূরৈ র্বামদেবেন ঘর্ষযেৎ । বামদেব মন্ত্রস্তু । ওঁ বামদেবায নমো জ্যেষ্ঠায নমো রুদ্রায নমঃ কালায নমঃ কলবিকরণায নমো বলবিকরণায নমো বলপ্রমথনায নমঃ সর্ব্বভূতদমনায নমো মনোন্মনায নমঃ ॥ ধূপযেত্তামঘোরেণ । অঘোর মন্ত্রস্তু । অঘোরেভ্যো২থঘোরেভ্যো ঘোর ঘোরতরেভ্যঃ সর্ব্বতঃ সর্ব্ব সর্ব্বেভ্যো নমস্তে ২স্তু রুদ্ররূপেভ্যঃ । লেপযেত্তৎ পুরুষেণ তু । তৎপুরুষ মন্ত্রস্তু । ওঁ তৎপুরুষায বিদ্মহে মহাদেবায ধীমহি তন্নোরুদ্রঃ প্রচো-

ম্যাৎ। নক্রয়েৎ পঞ্চমেনৈব প্র-ত্যেকন্তু শতং শতং। সেকঞ্চ মন্ত্র-যেচ্চৈব মননা চ শতং শতং॥ মন্ত্রস্তু। ওঁ ঈশানঃ সর্ব্ব বিদ্যানামীশ্বরঃ সর্ব্বভূতানাং ব্রহ্মাধিপতি ব্রহ্মণোধি পতিঃ শিরো মে হস্তু সদাশিবোঁ। প্রত্যেকন্তু সকৃৎ সকৃৎ। ইতিবা। তথা চ তত্রৈবা প্রত্যেকং মন্ত্রয়েন্মন্ত্রী পঞ্চমেন সকৃৎ সকৃৎ। তথা চ গৌ-তমীয়ে সমাদায় মালা মধিকৃত্য। পঞ্চমেনৈব সূক্তেন শতান্যূনেন মন্ত্র-য়েৎ। ইতি দর্শনাম্মালায়াম্বা শত-জপঃ। তত্রাবাহ্য যজেদ্দেবং যথা বিভব বিস্তরৈঃ। মালায়াঃ প্রাণ প্র-তিষ্ঠানন্তরং দেবতাং প্রজয়েৎ। তথা সনৎকুমারে। সংস্কৃত্যৈবং বুধো মালাং তৎ প্রাণাং স্তত্র স্থাপয়েৎ। মূলমন্ত্রেণ তাং মালাং পূজয়েদ্দ্বিজ সত্তম॥ বারাহীতন্ত্রে মালে মালে মহামালে সর্ব্বতত্ত্ব স্বরূপিণি। চতু-র্ব্বর্গ স্ত্বয়ি ন্যস্ত স্তস্মান্মে সিদ্ধিদা ভব॥ মায়াবীজাদিকাং কৃত্বা রক্তপুষ্পৈঃ সমর্চ্চয়েৎ। ইতি শক্তিবিষয়ে। * ॥ বিষ্ণু বিষয়ে তু যামলে। বাগ্বীজ্ঞ তথা লক্ষ্মী মন্ত্রাদি মালিকা ততঃ। উক্তাং হৃদয় পর্য্যন্তাং মন্ত্রেণানেন পূজয়েৎ॥ নক্রয়েন্মূল মন্ত্রেণ ক্র-মেণোৎক্রম যোগতঃ। তথৈব মা-তৃকাবর্ণৈ র্মন্ত্রয়েত্তান্তু মন্ত্রবিৎ॥ যোগিনীতন্ত্রে। হোম কর্ম্ম ততঃ স্ব-র্য্যাদ্দেবতা ভাবসিদ্ধয়ে। অষ্টোত্তর শতং হুত্বা সম্পাতাজ্যং বিনিঃক্ষি-পেৎ॥ হোমকর্ম্মণ্যশক্তশ্চেৎ দ্বি-গুণং জপ মাচরেৎ। *। নান্য মন্ত্রং জপেন্মন্ত্রী কম্পয়েন্ন বিধূনয়েৎ॥ ক-ম্পনাৎ সিদ্ধিহানিঃ স্যাদ্ধূননং বহু দুঃখদং। শব্দে জাতে ভবেদ্রোগঃ কর ভ্রষ্টা বিনাশিকা॥ ছিন্নে সূত্রে ভবে-ন্মৃত্যু স্তস্মাদ্যত্নপরো ভবেৎ। জপা-ন্তে কর্ণদেশে বা উচ্চদেশে তথা ন্য-সেৎ॥ ত্বং মালে সর্ব্ব ভূতানাং সর্ব্ব সিদ্ধিপ্রদা মতা। তেন সত্যেন মে সিদ্ধিং দেহি মাত র্নমো হস্তু তে॥ ইত্যুক্ত্বা পরিপূজ্যাথ গোপয়েদ্যত্ন-তো গৃহী। *। মালা সংস্কারস্য নি-ত্যতা মাহ রুদ্রযামলে। অপ্রতিষ্ঠিত মালাভি র্মন্ত্রং জপতি যো নরঃ। সর্ব্বং তদ্বিফলং বিদ্যাৎ ক্রুদ্ধা ভব-তি দেবতা॥ * ॥ কামনাভেদে তু অঙ্গুলি নিয়মঃ। গৌতমীয়ে। তর্জ্জ-ন্যঙ্গুষ্ঠ যোগেন শত্রূচ্চাটন মুত্তমং। অঙ্গুষ্ঠ মধ্যমা যোগান্মন্ত্র সিদ্ধিঃ সুনিশ্চিতা॥ অঙ্গুষ্ঠানামিকা যো-গাচ্চ। বৈৎসাদনে মতে। জ্যেষ্ঠা

কনিষ্ঠা যোগেন শত্রূণাং নাশনং মতং ॥ বৈশম্পায়ন সংহিতায়াং । অঙ্গুষ্ঠ মধ্যমাভ্যাঞ্চ চালয়েন্মধ্য মধ্যতঃ । তর্জ্জন্যা ন স্পৃশেদেনাং মুক্তিদো গণন ক্রমঃ ॥ * ॥ জীর্ণে সূত্রে পুনঃ সূত্রং গ্রথযিত্বা শতং জপেৎ প্রমাদাৎ পতিতা হস্তাৎ শতমষ্টোত্তরং জপেৎ ॥ জপেন্নিষিদ্ধ সংস্পর্শে ক্ষালযিত্বা যথোচিতং । ছিন্নেপ্যষ্টোত্তরশত জপঃ কার্য্যঃ । করভ্রষ্ট ছিন্নয়োস্তুল্যত্বাৎ ॥*॥ প্রকারান্তরং আগমকল্পদ্রুমে । ভূতশুদ্ধ্যাদিকাং পূজাং সমাপ্য তত্র পূজয়েৎ । গণেশ সূর্য্য বিষ্ণীশান্ দুর্গামাবাহ্য মন্ত্রবিৎ ॥ পঞ্চগব্যে ততঃ ক্ষিপ্ত্বা হ্রৌং মন্ত্রেণ মন্ত্রবিৎ । তস্মাদুত্তোল্য তাং মালাং স্বর্ণপাত্রে বিধায় চ । পয়ো দধি ঘৃত ক্ষৌদ্র শর্করাদ্যৈ রনুক্রমাৎ ॥ তোয ধূপান্তরৈঃ কৃত্বা পঞ্চামৃত বিধিং বুধঃ । ক্রমাদত্রৈব সংস্থাপ্য স্থাপয়েচ্ছীতলে জলে ॥ ততশ্চন্দনসৌগন্ধি কস্তূরী কুঙ্কুমাদিভিঃ । তামালিপ্য হ্রৌং মন্ত্র মষ্টোত্তর শতং জপেৎ ॥ তস্যাং নবগ্রহাং শ্চৈব দিক্ পালাংশ্চ প্রপূজয়েৎ ততঃ সংপূজ্য চ গুরুং পূর্ব্বোক্তাম্মালিকাং শুভাং ॥ অক্ষমালাঞ্চ মুদ্রাঞ্চ গুরো রপি ন দর্শয়েৎ । ভূত রাক্ষস বেতালাঃ সিদ্ধ গন্ধর্ব্ব চারণাঃ ॥ হরন্তি প্রকটং যস্মাত্তস্মাদ্গুপ্তং সমাচরেৎ । ইতি অক্ষমালা । ইতি তন্ত্রসারঃ ॥*॥*॥ অপিচ । বিদ্যাধরাপ্সরো যক্ষা বিবুধাসুর রাক্ষসাঃ । ভূতানি কিন্নরাঃ সিদ্ধাঃ প্রেতাশ্চ চারণাদয়ঃ ॥ হরন্তি জপফলান্যেতে যানি তানি চ নারদ । অতূষ্ণীং চেদ্বহির্জ্জানু চার্দ্রবাসাদিভির্জ্জপেৎ ॥*॥ বৃন্দাটবীজন্মমযী তুলসী কাষ্ঠ সম্ভবা । হস্তাঙ্গুলিময়ী হৈমী র্বৈ গুম্ফিময়ী তথা ॥ ভদ্রাক্ষেন্দ্রাক্ষ রুদ্রাক্ষ পদ্মবীজভবা হ্যপ্যথ । ধাত্রীপুত্রজীবফলৈ র্মালা যা পরিকীর্ত্তিতা । মুক্তা মণিময়ী রৌপ্যা স্ফাটিকী বৈদ্রুমী তথা ॥ জপকর্ম্মসু সর্ব্বেষু চাক্ষমালা প্রকীর্ত্তিতা । * । কৃষ্ণ মন্ত্র জপে মালা বৃন্দারণ্য সমুদ্ভবা ॥ নান্যা মালা অনন্যানাং হস্তাঙ্গুলিময়ীং বিনা । হৈমী মণিময়ীমালা প্রশস্তা কমলা জপে ॥ সরস্বত্যা মন্ত্রজপে রৌপ্যা মুক্তা বিনির্ম্মিতা । প্রজাপতি জপে মালা পুত্রজীব সমুদ্ভবা ॥ পুত্রকাম নরাণাঞ্চ সদা পুত্রপ্রদা তু সা । রাম মন্ত্র জপে মালা পদ্মবীজ সমুদ্ভবা ॥ ধাত্রীফলময়ী মালা বিষ্ণোঃ কামনয়া জপে ।

রুদ্রাক্ষেন্দ্রাক্ষ ভদ্রাক্ষ বৃক্ষবীজ সমুদ্ভবা॥ মহেশান মন্ত্র জপে ত্বেতা মালাঃ ফলপ্রদাঃ। স্ফাটিকী সর্ব্বদেবানা মথবা তরুণে জ্জপে॥ অশগ্রন্থিময়ী শুদ্ধা গায়ত্রী বৈষ্ণবী জপে। শ্রীহরে রঙ্গুলিময়ী জপে মালা দ্বিজন্মনাং॥ ইতি পাদ্মোত্তরখণ্ডে১০৮ অধ্যায়ঃ॥৯॥৯॥ অপরঞ্চ। জপাদৌ পূজয়েন্মালাং তোয়ৈ রভ্যুক্ষ্য যত্নতঃ। নিধায় মণ্ডলস্যান্তঃ সব্য হস্তগতাঞ্চ বা॥ ওঁ মাং মালে মহামায়ে সর্ব্ব শক্তি স্বরূপিণি। চতুর্ব্বর্গ স্ত্বয়ি ন্যস্ত স্তস্মান্মে সিদ্ধিদা ভব॥৯॥পূজয়িত্বা ততো মালাং গৃহীত্বা দক্ষিণে করে। মধ্যমায়া মধ্যভাগে বর্জ্জয়িত্বা তু তর্জ্জনীং॥ অনামিকা কনিষ্ঠাভ্যাং যুতায়া মনু ভাবতঃ। স্থাপয়িত্বা তত্র মালা মঙ্গুষ্ঠাগ্রেণ তদ্গতং॥ প্রত্যেকং বীজমাদায় জপং কুর্য্যাত্তু ভৈরব। প্রতিবারং পঠেন্মন্ত্রং শনৈরেতঙ্ক ন চালয়েৎ॥ মালা বীজন্তু জপ্তব্যং স্পৃশেন্নহি পরস্পরং। পূর্ব্ব জাপ প্রযুক্তেনৈবাঙ্গুষ্ঠাগ্রেণ ভৈরব॥ পূর্ব্ববীজং ত্যজন্ যস্তু পর বীজন্তু সংস্পৃশেৎ। অঙ্গুষ্ঠেন ভবেত্তস্য নিষ্ফল স্তস্য তজ্জপঃ॥ মালাং স্ব হৃদয়াসন্নে ধৃত্বা দক্ষিণ পাণিনা। দেবীং বিচিন্তয়ন্ জপ্যং কুর্য্যাদ্বামেন ন স্পৃশেৎ॥৯॥ স্ফাটিকেন্দ্রাক্ষ রুদ্রাক্ষৈঃ পুত্রজীব সমুদ্ভবৈঃ। সুবর্ণ মণিভিঃ সম্যক্ প্রবালৈ রথ বাব্জকৈঃ॥ অক্ষমালা তু কর্ত্তব্যা দেবী প্রীতিকরা পরা। জপেদুপাংশু সততং কুশ গ্রন্থ্যা তু পাণিনা॥ নানা বীজেষু সর্ব্বেষু রুদ্রাক্ষো মৎপ্রিয়াৎ প্রিয়ঃ। রুদ্রপ্রীতি করো যস্মাত্তস্মাদ্রুদ্রাক্ষকো বলী॥ প্রবালৈ রথবা কুর্য্যাদষ্টাবিংশতি বীজকৈঃ। পঞ্চ পঞ্চশতা বাপি ন ন্যূনৈ র্নাধিকৈশ্চ বা॥ রুদ্রাক্ষৈ র্যদি জপ্যেত ইন্দ্রাক্ষৈঃ স্ফাটিকৈ স্তথা। নান্যং মধ্যে প্রযোক্তব্যং পুত্রজীবাদিকঞ্চ যত্নতঃ॥ যদন্যত্তু প্রযুজ্যেত মালায়াং জপকর্ম্মণি। তস্য কামঞ্চ মোক্ষঞ্চ ন দদ্যতি প্রিয়ঙ্করী॥ জন্মান্তরে জায়তে স বেদ বেদাঙ্গ পারগঃ। মিত্রীভাবং তদা যাতি চাণ্ডালৈঃ পাপ কর্ম্মভিঃ॥৯॥ একো মেরু স্তত্র দেয়ঃ সর্ব্বেভ্যঃ স্থূল সম্ভবঃ। আদ্যং মূলং তত স্তস্মাৎ ন্যূনং ন্যূনতরং তথা॥ বিন্যসেৎ ক্রমত স্তস্মাৎ সর্পাকারা হি সা যতঃ। ব্রহ্মগ্রন্থি যুতং কুর্য্যাৎ প্রতিবীজং যথা স্থিতং॥ অথবা গ্রন্থি রহিতং সূত্ররজ্জু সমন্বিতং। ত্রিরাবৃত্ত্যাথ মধ্যেনৈবার্দ্ধ

বৃত্ত্যান্ত দেশতঃ ।। গ্রন্থিঃ প্রদক্ষিণা-
বর্ত্তঃ স ব্রহ্মগ্রন্থি সংজ্ঞকঃ । নাত্মনা
যোজয়েন্মালাং নামন্ত্রো যোজয়েদ্বুধঃ
।। দৃঢ়ং সূত্রং নিযুঞ্জীত জপে ত্রুট্যতি
নো যথা । যথা হস্তান্নচ্যবতে জপতঃ
স্রুক্ তথাচরেৎ ।। হস্তাচ্চ্যুতায়াং বিঘ্নঃ
স্যাচ্ছিন্নায়াং মরণং ভবেৎ । এবং যঃ
কুরুতে মালাং জপ্যং চ নগকোদিতং
।। স প্রাপ্নোতীপ্সিতং কামং হীনে-
ন্যাত্ত্ব বিপর্য্যয়ঃ । অন্যত্রাপি জপে-
ন্মালাং জপ্যং দেব মনোহরং ।। ঈ-
দৃশং সাধকঃ কুর্য্যাৎ নান্যথা তু
কদাচন । যথাশক্তি জপং কুর্য্যাৎ
সংখ্যৈব প্রযত্নতঃ ।। অসংখ্যাতন্তু
যজ্জপ্তং তৎ সর্ব্বং নিষ্ফলং ভবেৎ ।
জপ্ত্বা মালাং শিরোদেশে প্রাংশুস্থানে
হথ বা ন্যসেৎ ।। ইতি কালিকাপু-
রাণে ৫৪ অধ্যায়ঃ ।। * । * ।। অথ
মালাদি ধারণং । ততঃ কৃষ্ণার্পিতা
মালা ধারয়েত্তুলসীদলৈঃ । পদ্মাক্ষৈ-
স্তুলসীকাষ্ঠৈঃ ফলৈর্ধাত্র্যাশ্চ নির্ম্মি-
তা ।। ধারয়েত্তুলসীকাষ্ঠ ভূষণানি চ
বৈষ্ণবঃ । মস্তকে কর্ণয়োর্বাহ্বোঃ ক-
রয়োশ্চ যথা রুচি ।। * ।। অথ মালা
ধারণবিধিঃ । স্কান্দে । সংনিবেদ্যৈ-
ব হরয়ে তুলসীকাষ্ঠ সম্ভবাং ।
মালাং পশ্চাৎ স্বয়ং ধত্তে স বৈ ভাগব-
তোত্তমঃ ।। হরয়ে নার্পয়েদ্যস্তু তুল-
সীকাষ্ঠ সম্ভবাং । মালাং ধত্তে স্বয়ং
মূঢ়ঃ স যাতি নরকং ধ্রুবং ।। ক্ষালি-
তাং পঞ্চগব্যেন মূলমন্ত্রেণ মন্ত্রিতাং
। গায়ত্র্যা চাষ্টকৃত্বো বৈ মন্ত্রিতাং
ধূপয়েচ্চ তাং ।। বিধিবৎ পরয়া ভ-
ক্ত্যা সদ্যোজাতেন পূজয়েৎ । তুল-
সীকাষ্ঠ সম্ভূতে মালে কৃষ্ণজনপ্রিয়ে
।। বিভর্ম্মি ত্বা মহং কণ্ঠে কুরু মাং
কৃষ্ণ বল্লভং । যথা ত্বং বল্লভা বিষ্ণো-
র্নিত্যং বিষ্ণুজনপ্রিয়া ।। তথা মাং
কুরু দেবেশি নিত্যং বিষ্ণুজনপ্রিয়ং ।
দানে মা ধাত কুদ্দিষ্টো লাসি মাং
হরিবল্লভে ।। ভক্তেভ্যশ্চ সমস্তে-
ভ্য স্তেন মালা নিগদ্যসে । এবং
সংপ্রার্থ্য বিধিবন্মালাং কৃষ্ণ গলে-
র্পিতাং ।। ধারয়েদ্বৈষ্ণবো যো বৈ স
গচ্ছেদ্বৈষ্ণবং পদং ।। * ।। অথ মালা-
ধারণ নিত্যতা । তত্রৈব স্কান্দে কার্ত্তি-
কপ্রসঙ্গে । ধাত্রীফল কৃতাং মালাং
কণ্ঠস্থাং যো বহেন্নহি । বৈষ্ণবো ন স
বিজ্ঞেয়ো বিষ্ণুপূজা রতো যদি ।। গা-
রুড়ে ।। ধারয়ন্তি ন যে মালাং হৈতু-
কাঃ পাপ বুদ্ধয়ঃ । নরকান্ন নিবর্ত্তন্তে
দগ্ধাঃ কোপাগ্নিনা হরেঃ ।। অতএব
স্কান্দে তত্রৈব । ন জহ্যাত্তুলসী মা-
লাং ধাত্রী মালাং বিশেষতঃ । মহা

...ভক সংহন্ত্রীং ধর্ম্মকামার্থদায়িনীং ॥ * ॥ অথ মালা মাহাত্ম্যং। অগস্ত্যসংহিতায়াং । নির্ম্মাল্য তুলসী মালা যুক্তো যশ্চার্চয়েদ্ধরিং। যদ্যৎ করোতি তৎ সর্ব্বমনন্তফলদং ভবেৎ ॥ যঃ স্মর্য্যাত্তুলসীকাষ্ঠৈ রক্ষমালা স্বরূপিণীং। কণ্ঠমালাঞ্চ যত্নেন কৃতং তস্যাক্ষয়ং ভবেৎ ॥ নারদীয়ে। যে কণ্ঠলগ্ন তুলসী নলিনাক্ষমালা যে বা ললাট ফলকে লসদূর্দ্ধপুণ্ড্রাঃ। যে বাহুমূল পরিচিহ্নিত শঙ্খ চক্রা স্তে বৈষ্ণবা ভুবন মাশু পবিত্রয়ন্তি ॥ কিঞ্চ। ভুজযুগ মপি চিহ্নৈ রঙ্কিতং যস্য বিষ্ণোঃ পরম পুরুষ নাম্নাং কীর্ত্তনং যস্য বাচি। ঋজুতর মপি পুণ্ড্রং মস্তকে যস্য কণ্ঠে সরসিজ মণি মালা যস্য তস্যাস্মি দাসঃ ॥ বিষ্ণুধর্ম্মোত্তরে শ্রীভগবদুক্তৌ। তুলসী কাষ্ঠ মালাঞ্চ কণ্ঠস্থাং বহতে তু যঃ। অপ্যশৌচোপ্যনাচারো মামেবৈতি ন সংশয়ঃ ॥ স্কান্দে। ধাত্রীফল কৃতা মালা তুলসী কাষ্ঠ সম্ভবা। দৃশ্যতে যস্য দেহে তু স বৈ ভাগবতো নরঃ॥ তুলসী দলজাং মালাং কণ্ঠস্থাং বহতে তু যঃ। বিষ্ণূত্তীর্ণাং বিশেষেণ স নমস্যো দিবৌকসাং ॥ তুলসীদলজা মালা ধাত্রী ফল কৃতাপি বা। দদাতি পাপিনাং মুক্তিং কিংপুনর্বিষ্ণুসেবিনাং ॥ তত্রৈব কার্ত্তিকপ্রসঙ্গে। যঃ পুনস্তুলসীমালাং কৃত্বা কণ্ঠে জনার্দ্দনং। পূজয়েৎ পুণ্য মাপ্নোতি প্রতি পুষ্পং গবা যুতং ॥ অযুত সংখ্যগোদান ফলমিত্যর্থঃ ॥ যাবল্লুঠতি কণ্ঠস্থা ধাত্রীমালা নরস্য হি। তাবত্তস্য শরীরে তু প্রীত্যা লুঠতি কেশবঃ ॥ স্পৃশেচ্চ যানি লোমানি ধাত্রীমালা কলৌ নৃণাং। তাবদ্বর্ষ সহস্রাণি বসতে কেশবালয়ে ॥ যাবদ্দিনানি বহতে ধাত্রীমালাং কলৌ নরঃ। তাবদ্যুগ সহস্রাণি বৈকুণ্ঠে বসতি র্ভবেৎ ॥ মালা যুগ্মাঞ্চ যো নিত্যং ধাত্রী তুলসি সম্ভবং। বহতে কণ্ঠদেশে চ কল্পকোটিং দিবং বসেৎ ॥ তুলসি সম্ভব মিতি ছন্দস্তন্ত্রমার্ষং ॥ গারুড়ে চ মার্কণ্ডেয়োক্তৌ। তুলসী দলজাং মালাং কৃষ্ণোত্তীর্ণাং বহেত্তু যঃ। পত্রে পত্রে হশ্বমেধানাং দশানাং লভতে ফলং ॥ * ॥ তুলসী কাষ্ঠ সম্ভূতাং যো মালাং বহতে নরঃ। ফলং যচ্ছতি দৈত্যারিঃ প্রত্যহং দ্বারকোদ্ভবং। নিবেদ্য বিষ্ণবে মালাং তুলসীকাষ্ঠ সম্ভবাং। বহতে যো নরো ভক্ত্যা তস্য বৈ নাস্তি পা-

ভক্তং ॥ সদা প্রীতমনা স্তস্য কৃষ্ণো দেবকিনন্দনঃ । তুলসীকাষ্ঠ সম্ভূতাং যো মালাং বহতে নরঃ ॥ প্রায়শ্চিত্তং ন তস্যাস্তি নাশৌচং তস্য বিগ্রহে । তুলসীকাষ্ঠ সম্ভূতাং যো মালাং বহতে নরঃ ॥ তুলসী কাষ্ঠ সম্ভূতং শিরসো বহুভূষণং । বাহ্বোঃ করে চ মর্ত্যস্য দেহে তস্য সদা হরিঃ ॥ তুলসী কাষ্ঠ মালাভিভূষিতঃ পুণ্য মাচরেৎ । পিতৃণাং দেবতানাঞ্চ কৃতং কোটি গুণং কলৌ ॥ তুলসীকাষ্ঠ মালাস্তু প্রেতরাজস্য দূতকাঃ । দৃষ্ট্বা নশ্যন্তি দূরেণ বাতোদ্ধূতং যথা দলং ॥ তুলসীকাষ্ঠ মালাভি ভূষিতো ভ্রমতে যদি । দুঃস্বপ্নং দুর্নিমিত্তঞ্চ ন ভয়ং শস্ত্রজং ক্বচিৎ ॥ গৌতমীয়ে পুরশ্চরণপ্রসঙ্গে । তথামলক সম্ভূতৈ স্তুলসীকাষ্ঠ নির্ম্মিতৈঃ । ইত্যাদি ॥*॥ তত্রৈব । পুণ্ডরীক ভবা মালা গোপাল মনুসিদ্ধিদা । আমলকী ভবা মালা সর্ব্ব সিদ্ধিপ্রদা মতা ॥ তুলসী সম্ভবা যা তু মোক্ষং বিতনুতে চিরাৎ ॥ ইতি শ্রীহরিভক্তিবিলাসঃ ॥*॥*॥ অথ রুদ্রাক্ষমালাধারণ ফলাদি । লিঙ্গপুরাণে । বিনা ভস্ম ত্রিপুণ্ড্রেণ বিনা রুদ্রাক্ষ মালয়া । কাশিকো ঋষি মং হাদেবোন স্যাত্তস্য ফলপ্রদঃ ॥ সংবৎসরপ্রদীপে । ত্রিপুরস্য বধে কালে রুদ্রস্যাক্ষোঃ প্রপতংস্তু যে । অশ্রুণো বিন্দবস্তে তু রুদ্রাক্ষা অভবন্ ভুবি ॥ যদ্যপ্যেকাদি চতুর্দ্দশ মুখ রুদ্রাক্ষেষু মন্ত্রফল বিশেষাঃ সন্তি তথাপি সুলভত্বাৎ পঞ্চবক্ত্রস্য ফলমত্রাবভিধীযতে । যথা স্কান্দে । পঞ্চবক্ত্রঃ স্বয়ং রুদ্রঃ কালাগ্নি র্নাম নামতঃ । অগম্যাগমনাচ্চৈব অভক্ষস্য চ ভক্ষণাৎ । মুচ্যতে সর্ব্বপাপেভ্যঃ পঞ্চবক্ত্রস্য ধারণাৎ ॥ ইতি তিথ্যাদিতত্ত্বং ॥

**মালাকণ্টঃ** পুং অপামার্গঃ । ইতি রাজনির্ঘণ্টঃ ॥

**মালাকন্দঃ** পুং মূলবিশেষঃ । তৎপর্য্যায়ঃ । আবিলকন্দঃ ২ ত্রিশিখিদলা ৩ গ্রন্থিদলা ৪ পাদিকন্দঃ ৫ গ্রন্থিদলা ৬ কন্দলতা ৭ । অস্য গুণাঃ । সুতীক্ষ্ণত্বং । গণ্ডমালানাশিত্বং । দীপনত্বং । গুল্মহারিত্বং । বাতশ্লেষ্মাপকর্ষকারিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

**মালাকা** স্ত্রী মালা । ইতি শব্দরত্নাবলী ॥

**মালাকারঃ** পুং বর্ণসঙ্করজাতিবিশেষঃ । মালী ইতি খ্যাতঃ । তৎ

পর্য্যায়ঃ। মালিকঃ২। ইত্যমরঃ॥ মালাকরঃ ৩ পুষ্পাজীবী ৪ বনাট্কঃ ৫ পুষ্পলাবঃ ৬। ইতি জটাধরঃ॥ পুষ্পলাবকঃ ৭। ইতি শব্দরত্নাবলী॥ স তু শূদ্রায়াং বিশ্বকর্ম্মণো জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং॥ অপিচ। তৈলিক্যাং কর্ম্মকারাচ্চ মালাকারস্য সম্ভবঃ। ইতি পরাশরপদ্ধতিঃ॥

মালাগ্রন্থিঃ পুং মালাদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥

মালাতৃণং ক্লী ভূতৃণং। ইতি রাজনির্ঘণ্টঃ॥

মালাতৃণকং ক্লী ভূস্তৃণং। ইত্যমরঃ॥ দ্বে গন্ধখড ইতিখ্যাতে। মালাবৎ পং তৃণং মালাতৃণং স্বার্থে কঃ। ভূর্স্তৃণং ভূলগ্নত্বাৎ ভূস্তৃণং মনীষাদিত্বাৎ সাগমঃ। মালা তৃণক ভূস্তৃণে। ইতি ক্লীবে। ইতি সুভূত্যাদয়ঃ॥ মালাতৃণক ভূস্তৃণাবিতি পুংসি পঠন্তি কেচিৎ॥ স্বামী তু। ছত্রাতিছত্রাদি ভূস্তৃণান্তং পর্য্যায মাহ যথা। ভূস্তৃণো রৌহিষো ভূতি ভূর্মিকো ঽথ জটুম্বকঃ। মালাতৃণশ্চ পালম্ন শূত্রাতিছত্রক স্তথেতি॥ রামকর্পূরং বহুপত্রকাণ্ডং কর্পূর সুগন্ধি। ইদন্ত শতপুষ্পিকাবদুৎকটগন্ধং ভূলগ্নঞ্চ ভবতীত্যনয়োর্ভেদঃ। ইতি ভট্টীকায়াং ভরতঃ॥

মালাদূর্ব্বা স্ত্রী দূর্ব্বাবিশেষঃ। গাঁঠিয়াদূর্ব্বা ইতি ভাষা। তৎপর্য্যায়ঃ। বল্লিদূর্ব্বা ২ অলিদূর্ব্বা ৩ মালাগ্রন্থিঃ ৪ গ্রন্থিলা ৫ গ্রন্থিদূর্ব্বা ৬ শূলগ্রন্থিঃ ৭ বেত্রনী ৮ গ্রন্থিমূলা ৯ রোহৎপর্ব্বা ১০ শরবল্লী ১১ শিবাখ্যা ১২। অস্যা গুণাঃ। সুমধুরত্বং। তিক্তত্বং। শিশিরত্বং। পিত্ত দোষ প্রশমনত্বং। কফ বান্তি তৃষাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মালারিষ্টা স্ত্রী পাঠী। ইতি রাজনির্ঘণ্টঃ॥

মালালিকা স্ত্রী পৃক্কা। ইতি রাজনির্ঘণ্টঃ॥

মালালী স্ত্রী পৃক্কা। ইতি রাজনির্ঘণ্টঃ॥

মালিঃ পুং সুকেশরাক্ষসপুত্রঃ। যথা। গ্রামণী নাম গন্ধর্ব্বো বিশ্বাবসু সমপ্রভঃ। তস্য দেববতী নাম দ্বিতীয়া শ্রীরিবাত্মজা॥ ত্রিষু লোকেষু বিখ্যাতা রূপ যৌবন শালিনী। তাং সুকেশায় ধর্ম্মাত্মা দদৌ রক্ষঃ শ্রিয়ং যথা॥ বরদান কৃতৈশ্বর্য্যং সা তং প্রাপ্য পতিং প্রিয়ং। আসীদ্দেববতী তুষ্টা ধ[illegible]প্রাপ্যে[illegible]

নির্ঝরঃ ॥ স তয়া সহ সন্তুষ্টো ররা জ রজনীচরঃ। ততঃ কালে সুকেশস্তু জনযামাস রাঘব। ত্রীন্ পুত্রান্ জনযামাস ত্রেতাগ্নি সম বিগ্রহান্ ॥ মাল্যবন্তং সুমালিঞ্চ মালিঞ্চ বলিনাম্বরং। ইতি রামায়ণে উত্তরকাণ্ডে ৫ সর্গঃ ॥

ঃ পুং মালাকারঃ। ইত্যমরঃ ॥ পক্ষিভেদঃ। ইতি মেদিনী ॥ রঞ্জকঃ। ইতি শব্দরত্নাবলী ॥

মালিকা স্ত্রী সপ্তলা ॥ পুত্রী ॥ গ্রীবালঙ্করণং ॥ পুষ্পমাল্যং ॥ নদীবিশেষঃ। ইতি মেদিনী ॥ সুরা। ইতি হারাবলী ॥ ক্ষমা। ইতি শব্দচন্দ্রিকা ॥

মালিনী স্ত্রী মাতৃকাভেদঃ ॥ বৃত্তভেদঃ ॥ মালিকপত্নী ॥ গৌরী ॥ চম্পানগরী ॥ মন্দাকিনী ॥ নদীভেদঃ। ইতি মেদিনী ॥ অগ্নিশিখাবৃক্ষঃ ॥ দুরালভা। ইতি শব্দচন্দ্রিকা ॥ স চ বৃত্তভেদঃ পঞ্চদশাক্ষরপাদছন্দঃ। যথা। ন ন ম য য যুতেযং মালিনী ভোগি লোকৈঃ। মৃগমদকৃত চর্চা পীতকৌশেয বাসা রুচির শিখি শিখণ্ডা বদ্ধ ধম্মিল্লপাশা। অনৃজু নিহিত মংসে বংশ মুৎক্কাণ যন্তী ধৃত মধুরিপুলীলা মালিনী পাতু রাধা ॥ ইতি ছন্দোমঞ্জরী ॥

মালিন্যং ক্লী মলিনত্বং। মলিনস্য ভাবইত্যর্থে ষ্যু প্রত্যযেননিষ্পন্নং॥

মালী পুং মালাকারঃ। ইতি মালিনী শব্দ দর্শনাৎ ॥ সুকেশরাক্ষসপুত্রঃ। যথা। সুকেশপুত্রৈ র্ভগবন্ পিতামহ বরোদ্ধতৈঃ। অহং বিষ্ণুরহং রুদ্রো ব্রহ্মাহং দেবরাডহং ॥ অহং যমশ্চ বরুণ শ্চন্দ্রোহং রবিরপ্যহং। ইতি মালী সুমালী চ মাল্যবাংশ্চৈব রাক্ষসঃ ॥ বাধন্তে সমরোদ্ধর্ষা যেচ তেষাং পুরঃসরাঃ ॥ ইতি রামায়ণে উত্তরকাণ্ডে ৬ সর্গঃ ॥

মালুঃ পুং পত্রলতা ॥ নারী। ইতি মেদিনী ॥

মালুধানঃ পুং মাতুলাহিঃ। মালুবাসাপ ইতি ভাষা। ইত্যমরঃ ॥ অষ্টনাগান্তর্গত নাগবিশেষঃ। যথা। মালুধান শ্চিত্রসর্পে মহাপদ্মেহপি দৃশ্যতে। ইতি হারাবলী ॥

মালুধানী স্ত্রী লতাভেদঃ। ইতি মেদিনী ॥

মালূকঃ পুং কৃষ্ণার্জকঃ। ইতি রাজনির্ঘণ্টঃ ॥

মালূরঃ পুং বিল্ববৃক্ষঃ। ইত্যমরঃ ॥ কপিত্থবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মালেয়া স্ত্রী স্থলৈলা। ইতি রত্নমালা॥

মাল্যং ক্লী পুষ্পং॥ পুষ্পস্রক্। ইতি মেদিনী॥ পত্রার্থক মাল্য শব্দস্য প্রযোগো যথা। যথা চাল্পেন মাল্যেন বাসিতং তিল সর্ষপং। ন মুঞ্চতি স্বকং গন্ধং তদ্বৎ সূক্ষ্মস্য দর্শনং॥ ইতি মহাভারতে মোক্ষধর্ম্মে ১০৫ অধ্যায়ঃ॥ মূর্দ্ধ্নি ন্যস্তপুষ্পদাম। ইত্যমরঃ॥ অস্য পর্য্যায়াদি মালা শব্দে দ্রষ্টব্যঃ॥*॥ মাল্যদান ফলং যথা। গন্ধমাল্যৈ রলঙ্কারৈ স্তুষ্টা হৃষ্টাশ্চ নিত্যশঃ। গন্ধমাল্যপ্রদাযেতু দান নিশ্চয় তৎপরাঃ॥ ধন্যাঃ সত্যশীলাশ্চ সর্ব্বদুঃখ বিবর্জ্জিতাঃ। সুচিরং দৈবতৈঃ সার্দ্ধং ক্রীড়ন্তি হি মহামুনে॥ ইতি বহ্নিপুরাণং॥*॥ অপিচ। নারসিংহে। জাতীপুষ্প সহস্রেণ যচ্ছেন্মালাং সুশোভনাং। বৈষ্ণবৈ বিধিবদ্ভক্ত্যা তস্য পুণ্য ফলং শৃণু॥ কল্পকোটি সহস্রাণি কল্পকোটি শতানি চ। বসেদ্বিষ্ণুপুরে শ্রীমান্ বিষ্ণুতুল্য পরাক্রমঃ॥ জাতীপুষ্প কৃতাং মালাং কর্পূর পটবাসিতাং। নিবেদ্য দেবদেবায় যৎফলং প্রাপ্নুয়ান্নরঃ॥ ন তদ্বর্ণয়িতুং শক্য নাপি বর্ষশতৈ রপি। স্কান্দে। মালতী কলিকা মালা নীষদ্বিকসিতাং হরেঃ। দত্ত্বা শিরসি বিপ্রেন্দ্র বাজিমেধ ফলং লভেৎ॥ স্কান্দে। মালতীমালয়া বিষ্ণুঃ পূজিতো যেন কার্ত্তিকে। পাপাক্ষর কৃতাং মালাং পটাৎ শৌরিঃ প্রমার্জ্জতি॥ শৌরি র্যমঃ॥ বিষ্ণুরহস্যে। স্বর্ণ লক্ষাধিকং পুষ্পং মালাকোটি গুণাধিকা। ইতি শ্রীহরিভক্তিবিলাসে ৭ বিলাসঃ॥*॥ মাল্যগলস্য বহির্গমননিষেধো যথা। বহি র্মাল্যং বহি র্গন্ধং ভার্য্যয়া সহ ভোজনং। বিগৃহ্য বাদং কৃত্বা বা প্রবেশঞ্চ বিবর্জয়েৎ॥ ইতি কূর্ম্মপুরাণে উপরিভাগে ১৫ অধ্যায়ঃ॥*॥ স্বয়ং মাল্যাপকর্ষণ নিষেধো যথা। ব্রাহ্মীযাৎ সন্ধিবেলায়াং ন গচ্ছেন্নাপি সন্নিশেৎ। ন চৈব প্রলিখেদ্ভূমিং নাত্মনোপহরেৎ স্রজং॥ ইতি মানবে ৪ অধ্যায়ঃ॥ নচ মালাং ধৃতাং স্বয়মেবাপনয়েৎ। অর্থাদন্যেনাপনয়েদিত্যুক্তং। ইতি কুল্লূকভট্টঃ॥*॥ কেশবাহ্য মাল্য ধারণ নিষেধো যথা। নহি গর্হ্যতথাং কুর্য্যাৎ বহির্মাল্যং ন ধারয়েৎ। প্রবাক্য যানং পৃষ্ঠেন সর্ব্বথৈব বি-

পরিহিতং ॥ ইতি চ মানবে ৪ অধ্যায়ঃ ॥ কেশকলাপাদ্বহির্মাল্যং ন ধারয়েদিতি কুল্লূকভট্টঃ ॥ * ॥ স্বয়ং মাল্যধারণ নিষেধো যথা। স্বয়ং মাল্যং স্বয়ং পুষ্পং স্বয়ং ঘৃষ্টঞ্চ চন্দনং। নাপিতস্য গৃহে ক্ষৌরং শক্রাদপি হরেৎ শ্রিয়ং ॥ ইতি কর্ম্মলোচনং ॥ * ॥ মাল্য চন্দন দান বিধি র্যথা। আনম্রবিত্বা যো বিপ্রান্ গন্ধমাল্যৈশ্চ মানবঃ। তর্পয়েচ্ছ্রদ্ধয়া যুক্তঃ স নাকে হৃষ্যতে সদা ॥ ইতি বহ্নিপুরাণং ॥

মাল্যপুষ্পঃ পুং শণবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাল্যপুষ্পিকা স্ত্রী, শণপুষ্পী। ইতি রাজনির্ঘণ্টঃ ॥

মাল্যবান্ পুং পর্ব্বতবিশেষঃ। ইত্যমরঃ ॥ মাল্যং মালাকারতা বিদ্যতে হত্র মাল্যবান্ বতুঃ। ইতি ভট্টীকাব্যং ভরতঃ ॥ স চ কেতুমালেলাবৃতবর্ষযোঃ সীমাপর্ব্বতঃ। নীল নিষধ পর্ব্বত পর্য্যন্ত বিস্তারঃ। ইতি সিদ্ধান্তশিরোমণিঃ ॥ রাক্ষসবিশেষঃ। স চ সুকেশ রাক্ষসাৎ গ্রামণী নাম্নক গন্ধর্ব্বস্য কন্যায়াং দেববত্যাং জাতঃ। অস্য ভার্য্যা সুন্দরী তস্য কন্যায়াং কৈকস্যাং পুলস্ত্য পুত্র বিশ্রবসো রাবণো জাতঃ। ইতি রামায়ণে উত্তরকাণ্ডে ৫ সর্গঃ ॥

মাল্লঃ পুং বর্ণসঙ্করজাতিবিশেষঃ। স চ লেটাত্তীবরকন্যায়াং জাতঃ। ইতি ব্রহ্মবৈবর্ত্তপুরাণং ॥

মাল্লবী স্ত্রী মল্লযাত্রা। ইতি হারাবলী ॥

মাশব্দিকঃ ত্রি নিষেধকর্ত্তা। তৎপর্য্যায়ঃ। প্রতিষেদ্ধা২। ইতি ত্রিকাণ্ডশেষঃ ॥

মাষঃ পুং ব্রীহিভেদঃ। মাষকলাই ইতি উরিদ্ ইতিচ ভাষা। তৎপর্য্যায়ঃ। কুরুবিন্দঃ ২ ধান্যবীরঃ ৩ বৃষাকরঃ ৪ মাংসলঃ ৫ বলাঢ্যঃ ৬ পিত্র্যঃ ৭ পিতৃভোজনঃ ৮। অস্য গুণাঃ। স্নিগ্ধত্বং। বহুমলকরত্বং। শোষণত্বং। শ্লেষ্ম কারিত্বং। অনুষ্ণবীর্য্যত্বং। ঝটিতি রক্তপিত্ত প্রকোপনত্বং। বাতহরত্বং। গুরুত্বং। বলকরত্বং। রোচকত্বং। স্বাদুত্বং। শ্রম সুখবতাং নরাণাং নিত্যং সেবনীয়ত্বং। ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। মাষো গুরুঃ স্বাদুপাকঃ স্নিগ্ধো রুচ্যো হনিলাপহঃ। উষ্ণঃ সন্তর্পণো বল্যঃ শুক্রলো বৃংহণঃ পরঃ ॥ ভিন্ন মূত্র মল স্তন্যমেদ পিত্ত

কফপ্রদঃ। গুদকীলার্দ্দিত শ্বাস পংক্তি শূলানি নাশযেৎ॥ ইতি। কফ পিত্ত করা মাষাঃ। ইতিচ ভাবপ্রকাশঃ॥ অন্যচ্চ। মাষো বহু মলো বৃষ্যঃ স্নিগ্ধোষ্ণো মধুরো গুরুঃ। বাতনুদ্বৃংহণো বল্যো মেদো মাংস কফ প্রদঃ॥ ইতি রাজবল্লভঃ॥ মাষসূপেন মূলক ভক্ষণং নিষিদ্ধং যথা। মূলকং মাষসূপেন মধুনা চ ন ভক্ষযেৎ। ইতিচ রাজবল্লভঃ॥ চতুর্দ্দশ্যাং রবিবারে চ মাষ ভক্ষণ নিষেধো যথা। চিররোগী চ মাষকে। ইতি॥ মাষ মামিষ মাংসঞ্চ মসূরং নিম্বপত্রকং। ভক্ষযেদ্যো রবের্বারে সপ্ত জন্মন্যপুত্রকঃ॥ ইতি চ তিথ্যাদিতত্ত্বং॥ * ॥ পরিমাণ বিশেষঃ। মাষা ইতি ভাষা। তৎ পর্য্যাযঃ। মাষকঃ ২ মাষঃ ৩ মাসঃ ৪। ইত্যমরভরতৌ॥ হেমঃ ৫ ধানকঃ ৬। স চ মাগধমানে সুশ্রুতমতে ৫ গুঞ্জা চরকমতে ৬। ৮ গুঞ্জাপরিমাণং। কালিঙ্গমানে সুশ্রুতমতে ৫। ৭। ৮ গুঞ্জাপরিমাণং। ইতি ভাবপ্রকাশঃ॥ বৈদ্যক্রান্তরে ১০ গুঞ্জাপরিমাণং। যথা। গুঞ্জাভি র্দশভি র্মাষঃ শাণো মাষ চতুষ্টযং। ইতি বৈদ্যকপরিভাষা॥ জ্যোতিঃ স্মৃতি মতে ১২ গুঞ্জাপরিমাণং। যথা। পলং তু লৌকিকৈ মানৈঃ সাষ্টরত্তি দ্বিমাষকং। তোলক ত্রিতযং জ্ঞেযং জ্যোতিৰ্জ্ঞৈঃ স্মৃতি সম্মতং॥ ইতি তিথ্যাদিতত্ত্ব ধৃতবচনেন পলং অষ্টরত্তিকাধিকমাষদ্বযাধিক তোলকত্রযং। এতেন মাষক পরিমাণং দ্বাদশ রত্তিকং ভবতি॥ * ॥ মূর্খঃ॥ ত্বগ্দোষভেদঃ ইতি মেদিনী॥

মাষকঃ পুং মাসকঃ। পঞ্চরত্তিকপরিমাণং। যথা। গুঞ্জাঃ পঞ্চাদ্য মাষকঃ। ইত্যমরঃ॥ দশার্দ্ধগুঞ্জং প্রবদন্তি মাষং মাষা হ্বযৈঃ ষোডশভিশ্চ কর্ষং। ইতি লীলাবতী চ॥ ষড্ভিস্তু রত্তিকাভিঃ স্যান্মাষকো হেম ধানকৌ। মাষো গুঞ্জাভিরষ্টাভিঃ সপ্তভি র্বা ভবেৎ ক্বচিৎ। ইতি ভাবপ্রকাশঃ॥

মাষকলাযঃ পুং স্বনামখ্যাতশস্যং। যথা। কলায শব্দো বিশেষে সামান্যে চ অতএব মাষকলায ইত্যাদি প্রযোগঃ। ইত্যমরটীকাযাং ভরতঃ॥

মাষপর্ণী স্ত্রী বনমাষঃ। মাষাণী ইতি ভাষা। তৎ পর্য্যাযঃ। হযপুচ্ছী ২ কাম্বোজী ৩ মহাসহা ৪। ইক্ষুগন্ধা॥ সিংহপুচ্ছী ৫ ঋষিপ্রোক্তা ৬ কৃষ্ণবৃন্তা ৭ পাণ্ডুলোমশপর্ণী ৮।

ইতি রত্নমালা॥ আদ্রমাষা ৯ মাংসমাষা ১০ মঙ্গল্যা ১১ হয়পুচ্ছিকা ১২ হংসমাষা ১৩ অশ্বপুচ্ছী ১৪ পাণ্ডুরা ১৫ মাষপর্ণিকা ১৬ কাম্যাণী ১৭ বজ্রমূলী ১৮ শালিপর্ণী ১৯ বিসারিণী ২০ আত্মোদ্ভবা ২১ বহুফলা ২২ স্বয়ম্ভূঃ ২৩ সুলভা ২৪ ঘনা ২৫ সিংহবিন্না ২৬ বিশাচিকা ২৭। অস্যা গুণাঃ। তিক্তরসত্বং বৃষ্যত্বং। দাহজ্বরাপহত্বং। শুক্রবৃদ্ধিকারিত্বং। বল্যত্বং। শীতলত্বং। পুষ্টিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। মাষপর্ণী সূর্য্যপর্ণী কাম্বোজী হয়পুচ্ছিকা। পাণ্ডুলোমশপর্ণী চ কৃষ্ণবৃন্তা মহাসহা॥ মাষপর্ণী হিমা তিক্তা রুক্ষা শুক্রবলাশকৃৎ। মধুরা গ্রাহিণী শোষা বাত পিত্ত জ্বরাসৃজিৎ॥ ইতি ভাবপ্রকাশঃ॥

মাষভক্তবলিঃ পুং মাষতণ্ডুলদধিমিশ্রিতপূজোপহারবিশেষঃ। অত্র কেচিৎ হরিদ্রা ঘৃত মধ্বপি মিশ্রয়ন্তি। যথা। এষ মাষভক্তবলিঃ। ওঁ জয়ন্তং কালি সর্ব্বেশে সর্ব্বভূত সমাবৃতে। রক্ষ মাং নিজভূতেভ্যো বলিং গৃহ্ন শিবপ্রিয়ে। ওঁ কাল্যৈ নমঃ। প্রার্থনা মন্ত্রো যথা। ওঁ মাতর্মাতর্বরে দুর্গে সর্ব্ব কামার্থ সাধিনি। অনেন বলিদানেন সর্ব্বান্ কামান্ প্রযচ্ছমে॥ ইতি কৃত্যতত্ত্বং॥ ভূতেভ্যোপ্যযং বলি দেযঃ॥

মাষবর্দ্ধকঃ পুং স্বর্ণকারঃ। ইতি শব্দমালা॥

মাষশঃ ব্য প্রতিমাষং। মাষং মাষং দদাতি ইত্যর্থে শস প্রত্যয়েন নিষ্পন্নং। ইতি সিদ্ধান্তকৌমুদী॥

মাষাদঃ পুং কচ্ছপঃ। ইতি শব্দরত্নাবলী॥ মাসভক্ষকে ত্রি॥

মাষীণং ক্লী মাষক্ষেত্রং। যথা। তিমাষ্যং ক্লী তৈলীন বন্মাযোমাণুভঙ্গাদ্বি রূপতা। ইত্যমরঃ॥ যথা তিলস্য ক্ষেত্রং তিল্যং তৈলীনঞ্চ ভবতি তথা মাষাদীনামপি দ্বিরূপতা দ্বৈরূপ্যং ভবতি। ইতি তট্টীকায়াং ভরতঃ॥

মাস্ পুং চন্দ্রঃ॥ মাসঃ ইতি মেদিনী॥ অস্য পৃথগ্নৈকবচনান্ত রূপং মাঃ॥

মাসঃ পুং মাষপরিমাণং। মাষা ইতি ভাষা। ইত্যমরটীকায়াং ভরতঃ॥ শুক্লকৃষ্ণপক্ষদ্বয়াত্মকঃ কালঃ। স চ পৌষ মাঘাদি দ্বাদশ সংজ্ঞকঃ। ইত্যমরঃ॥ মাশ্চন্দ্রস্তস্যায়ং মাসঃ ফঃ। চান্দ্রমাসস্যেয়ং ব্যুৎপত্তিঃ। সৌরাদিষু তু মস্যতে পরিমীয়তে

সাধ্য যাগ বিশেষরূপাণি যাজ্ঞিক প্রসিদ্ধানি। ইন্দোরয়নানি সোমায়নাখ্য সত্রাণি। ইতি সময়প্রকাশঃ॥ এবং জন্মনক্ষত্রে শনিভৌমবারে ফলং নাক্ষত্র মাসেন যোগ্যত্বাৎ। যথা। জন্মনৃক্ষে যদি স্যাতাং বারৌ ভৌম শনৈশ্চরৌ। স মাসঃ কল্মসো নাম মনোদুঃখ প্রদায়কঃ॥ ইতি মলমাস তত্ত্বং॥ মলমাস বিবরণং মলমাস শব্দে দ্রষ্টব্যং।॥✽॥✽॥ অথ মাসকৃত্যং। আষাঢ় শুক্লৈকাদশ্যাং হর্য্যাৎ স্বাপং মহোৎসবং। আষাঢে চ রথং হর্য্যাৎ শ্রাবণে শ্রবণা বিধিং॥ ভাদ্রে চ জন্মদিবসে উপবাসপরো ভবেৎ। প্রসুপ্তঞ্চ পারিবর্ত্ত মাশ্বিনে মাসি কারয়েৎ॥ উত্থানং শ্রীহরেঃ হর্য্যাদন্যথা বিষ্ণুদ্রোহকৃৎ। শুভে চৈবাশ্বিনে মাসি মহামায়াঞ্চ পূজয়েৎ॥ কার্ত্তিকে মাসি যৎকৃত্যং শৃণু দেবি বরাননে। সপ্তবর্ত্ত্যাঃ প্রমাণেন দীপঃ স্যাচ্চতুরঙ্গুলঃ॥ পক্ষান্তে চ প্রকর্ত্তব্যা দীপমালা বলিঃ শুভা। মার্গশীর্ষে সিতে পক্ষে ষষ্ঠীঞ্চ সিতবস্ত্রকৈঃ॥ পূজয়েজ্জগদীশঞ্চ তূলবস্ত্রৈর্বিশেষতঃ। পৌষে পুণ্যাভিষেকঞ্চ বর্জ্জয়েচ্চন্দনং তথা॥ সংক্রান্ত্যাং মাঘমাসে চ সাধিবাসিত তণ্ডুলান্। নিবেদ্য বিষ্ণবে ভক্ত্যা ইমং মন্ত্র মুদীরয়েৎ॥ জীবনং সর্ব্বভূতানাং জনক জগদ্গুরো। ত্বন্মায়া লীনতা প্রাপ্তাস্ত্বয়ৈব জনিতা প্রভো॥ কর্পূরাকৃতি দ্রব্যাণি ঘৃতাক্তানি নিবেদয়েৎ। ব্রাহ্মণান্ ভোজয়েদ্ভক্ত্যা দেবদেব পুরস্থিতান॥ অভ্যর্চ্য ভগবদ্ভক্ত্যা দ্বিজাংশ্চ ভগবদ্ধিয়া। একস্মিন্ ভোজিতে ভক্তে কোটি র্ভবতি ভক্তিতঃ॥ বিপ্রভোজন মাত্রেণ ব্যঙ্গং সাঙ্গং ভবেদ্ধ্রুবং। পঞ্চম্যাং শুক্লপক্ষে তু স্নাপয়িত্বা চ কেশবং॥ পূজয়েদ্ভগবদ্ভক্ত্যা চূতপল্লব সম্মিতৈঃ। ফল্গুচূর্ণৈশ্চ বিবিধৈ র্ব্বাসিতৈঃ পটবাসিতং॥ কাননং রমণীয়ঞ্চ প্রদীপ্ত দীপ দীপিতং। দ্রাক্ষেক্ষু রম্ভা জম্বীর নাগরঙ্গক পূগকং॥ নারিকেলঞ্চ ধাত্রীচ বংশ তাল হরীতকী। অন্যৈশ্চ বৃক্ষষণ্ডৈশ্চ সর্ব্বর্ত্তু কুসুমাচিতং॥ পুষ্পৈশ্চ বিবিধৈশ্চৈব ফল পুষ্প সমন্বিতং। বিতানৈঃ কুসুমোদ্গন্ধৈর্ব্বারিপূর্ণঘটৈ স্তথা॥ চূতশাখোপশাখাভিঃ শোভিতং ছত্রচামরৈঃ। বিশেষতঃ কলিযুগে দোলোৎসবো বিধীয়তে॥ ফাল্গুনে চ চতুর্দ্দশ্যা মষ্টমে যাম সংজ্ঞকে। অথবা পৌর্ণমাস্যান্তু প্রতিপৎ সন্ধি সম্মিতৌ॥

পূজয়েদ্বিধি বদ্ভক্ত্যা ফল্গুচূর্ণৈ শ্চতু ॥ র্বিধৈঃ। সিত রক্তে গৌর পীতৈঃ কর্পূরাদি বিমিশ্রিতৈঃ ॥ হরি নাক্ষার যোগাচ্চ রন্ধ রন্যৈ মনোহরৈঃ। অন্যৈ র্বা রঙ্গ রম্যৈশ্চ প্রীণয়েৎপরমেশ্বরং ॥ একাদশ্যাং সমারভ্য পঞ্চম্যন্তং সমাপয়েৎ। পঞ্চাহানি ত্র্যহানিস্যুর্দ্দোলোৎসবো বিধীয়তে ॥ দক্ষিণাভিমুখং কৃষ্ণং দোলযানং সকৃমরাঃ। দৃষ্ট্বাপরাধ নিচয়ৈ র্মুক্তাস্তে মাত্র সংশয়ঃ ॥ নিক্ষিপ্য জলমাত্রে তু মাসে মাধব সংজ্ঞিতে। সৌবর্ণ পাত্রে তাম্রে বা রৌপ্যে বা মৃন্ময়ে হপিবা ॥ তোয়স্থং যো র্চ্চয়েদ্দেবং শালগ্রাম সমুদ্ভবং। প্রত্যহং মাংমহাভাগে তস্য পুণ্যং ন গণ্যতে ॥ দমনারোপণং কৃত্বা শ্রীবিষ্ণৌ চ সমর্পয়েৎ। বৈশাখ্যাং শ্রাবণে ভাদ্রে কর্ত্তব্যঞ্চ তদর্পণং ॥ বৈশাখে চ তৃতীয়ায্যং জলমধ্যে বিশেষতঃ। অথবা মণ্ডপে হর্য্যাৎ মণ্ডলে বা বৃহদ্ধজে ॥ সুগন্ধ চন্দনেনাঙ্গ সুপুষ্টাঙ্গো দনে। যথা প্রযত্নতঃ কার্য্যঃ কৃশাঙ্গো নৈব পূজিতঃ ॥ চন্দনাগুরু কস্তুরী হ্রষ্ঠং কুঙ্কুম রোচনা জটামাংসী বচা চৈব বিষ্ণো গন্ধাষ্টকং তথা ॥ এতৈ গন্ধ যুতৈ শ্চাপি হরে রঙ্গানি লেপয়েৎ ॥ দ্বষ্টঞ্চ তুলসীকাষ্ঠং কর্পূরাগুরু যোগতঃ ॥ অথবা কেশরৈ র্যোজ্যং হরিচন্দনে মুচ্যতে। অস্মিন্ কালে কৃষ্ণভক্ত্যা যে প্রপশ্যন্তি মানবাঃ ॥ ন তেষাং পুনরাবৃত্তিঃ কল্পকোটিশতৈ রপি। সুগন্ধি মিশ্রিতৈ স্তোয়ৈঃ স্নাপয়িত্বা জগদ্গুরুং ॥ অথবা পুষ্পমধ্যে চ স্থাপয়েজ্জগদীশ্বরং। বৃন্দাবনং তত্র কৃত্বা উপস্কৃত ফলানি চ ॥ বিষ্ণুভক্তেন যোগ্যেন ভোজয়েত্তদশেষতঃ। নারিকেল ফলং নীরং কোষঞ্চোদ্ধৃত্য দাপয়েৎ ॥ কণ্টাফলঞ্চ পনসং কোষ মুদ্ধৃত্য দীয়তে। যথা পচেত্তথা দদ্যাদ্যথাশক্তি নিযোগতঃ ॥ দধ্না বিমিশ্রিতঞ্চান্নং ঘৃতেনাপ্লুত্য দাপয়েৎ। পাচিতং পিষ্টকং ধাতু রষ্টাদশ ঘৃতেন চ ॥ তিলৈশ্চ তিলসংমিশ্রৈঃ ফলং শৃঙ্গঞ্চ দাপয়েৎ। যদ্যদেবাত্মনঃ শ্রেয় স্তত্তদীশায় কল্পয়েৎ ॥ দত্বা নৈবেদ্য বস্ত্রাদীন্নাদদীত কথঞ্চন। ত্যক্তব্যং বিষ্ণু মুদ্দিশ্য তদ্ভক্তেভ্যো বিশেষতঃ। ইতি তে কথিতং কিঞ্চিৎ সমাসেন মহেশ্বরি। গোপ্তব্যঞ্চ প্রযত্নেন স্বযোনি রিব পার্ব্বতি ॥ ইতি পাদ্মে পাতালখণ্ডে ৮২ অধ্যায়ঃ ॥

মাসকঃ পুং মাষকপরিমাণং। যথা। গুঞ্জাঃ পঞ্চাদ্য মাসকঃ। ইত্যমরঃ॥ পঞ্চগুঞ্জাঃ কৃষ্ণলাঃ আদ্যঃ প্রথমো মাসকঃ। দশগুঞ্জাপেক্ষযা আদ্যত্বং। শাস্ত্রীয ত্বাৎ মুখ্যো মাস ইত্যর্থো বা। মস্যতে পরিমীযতে হনেন মাসঃ মসির্য ঈ পরিমাণে পরীণামে ঘঞ স্বার্থে কঃ মাসো হ্রং দন্ত্যান্তঃ। মষ হিংসার্থো মূর্দ্ধন্যান্ত স্তম্মাদ্ঘঞতেন মাষো মূর্দ্ধন্যান্ত ইতি জিনেন্দ্র প্রভৃতযঃ। ইত্যমরটীকাযাং ভরতঃ॥

মাসজ্ঞঃ পুং দাত্যূহপক্ষী। ইতি শব্দরত্নাবলী॥ মাসজ্ঞাতরি ত্রি॥

মাসন্দং ক্লী সোমরাজী। ইতি শব্দচন্দ্রিকা॥

মাসমানঃ পুং বৎসরঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মাসপরিমাণে ক্লী॥

মাসরঃ পুং ভক্তসমুদ্ভবমণ্ডঃ। তৎপর্য্যাযঃ। আচামঃ ২ নিস্রাবঃ ৩। ইত্যমরঃ॥

মাসবর্ত্তিকা স্ত্রী সর্ষপীপক্ষিবিশেষঃ। ইতি শব্দমালা॥

মাসান্তঃ পুং অমাবস্যা। যথা। পক্ষান্তে নিষ্ফলা যাত্রা মাসান্তে মরণং ধ্রুবং। ইতি সমযপ্রদীপঃ॥ সংক্রান্তিদিনং। যথা। মাসান্তে স্ত্রিযতে কন্যা তিথ্যন্তে স্যাদপুত্রিণী। ঋক্ষান্তে চ বৈধব্যং বিষ্ট্যাং মৃত্যুর্যো ভবেৎ॥ মাসান্তে দিনমেকং তিথ্যন্তে ঘটিকাদ্বযং। ঘটিকাত্রিতযং ভান্তে বিবাহে পরিবর্জযেৎ॥ ইতি রত্নমালা॥

মাসিকং ক্লী প্রেতস্য সংবৎসরাভ্যন্তরে প্রতিমাসীয মৃতসজাতীয তিথিকর্ত্তব্য শ্রাদ্ধং॥ প্রতিমাসকর্ত্তব্য কৃষ্ণপক্ষ নিমিত্তক শ্রাদ্ধং। তৎপর্য্যাযঃ। অন্বাহার্য্যং ২। ইত্যমরঃ॥ মাসি ভবং মাসিকং পার্ব্বণশ্রাদ্ধং তত্র অন্বাহার্য্যং বর্ত্ততে। পক্ষশেষে অমাবাস্যাযাং দেযত্বাৎ। অনু পশ্চাদাহ্রিযতে অন্বাহার্য্যং হসৃধ্বাসো রিতি ঘ্যণ স্বার্থে কে অন্বাহার্য্যকঞ্চ। অকৃত সপিণ্ডীকরণস্য বৎসরাভ্যন্তরে প্রতিমাসং যৎশ্রাদ্ধং তত্রান্বাহার্য্য মিতি কেচিৎ। ইত্যমরটীকাযাং ভরতঃ॥ তযোঃ প্রমাণং। ষাণ্মাসিকাব্দিকে শ্রাদ্ধে স্যাতাং পূর্ব্বেদ্যু রেবতে। মাসিকানি স্বকীযে তু দিবসে দ্বাদশাপি চ॥ ইতি পৈঠীনসিঃ॥ পিণ্ডানাং মাসিকং শ্রাদ্ধ মন্বাহার্য্যং বিদুর্বুধাঃ। তচ্চামিষেণ কর্ত্তব্যং প্রশস্তেন প্রযত্নতঃ॥ ইতি মনুঃ॥ *॥ মাসিক

করণস্য ব্যবস্থা যথা। পীঠ ছাত্রা- প্রানিহ রহিতানি ইহলোকং পরি ত্যজ্য ইত্যাদি সর্ব্বঃসুগন্ধ ইত্যাদি ॥ শিবাদেব্যা ইত্যাদি বনস্পতিরস ইত্যাদি মন্ত্র চতুষ্টয় রহিতানি চ আদ্যৈকোদ্দিষ্টবৎ মৃতাহে মৃতা- হে দ্বাদশ মাসিকানি কার্য্যাণি। একাদশ মাসাভ্যন্তরে মলমাস পা তে ত্রয়োদশ মাসিকানি। ষষ্ঠমাসা- ভ্যন্তরে মলমাসপাতে হপি ষষ্ঠমা- সি পূর্ব্বতিথাবেব প্রথমষাণ্মাসিকং। তথা ত্রয়োদশ মাসিকস্য পূর্ব্বতি- থৌ দ্বিতীয় ষাণ্মাসিকং।এবং ষাণ্মা- সিকোল্লেখে প্রথম ষাণ্মাসিক দ্বিতী- য় ষাণ্মাসিকত্বেনোল্লেখঃ। এষাং ম- ধ্যে যৎ পতিতং তৎ কৃষ্ণৈকাদশ্যাং অমাবস্যায়াং মাসিকান্তর তিথৌ বা কৃত্বা প্রকৃতং কর্ত্তব্যং। অশৌচ পতিতঞ্চেত্তদশৌচান্তে কর্ত্তব্যং। এ- কাদশাহাদি শ্রাদ্ধানি কতিচিৎ কৃত্বা যদি মৃত স্তদা শেষাণ্যন্যেনাধিকা- রিণা সমাপ্যানি॥ ❀ ॥ অথ মাসি- কৈকোদ্দিষ্ট শ্রাদ্ধপ্রযোগঃ। পূর্ব্বদি- নে নিরামিষৈকভক্তঃ পরদিনে স্না- নাদিকং কৃত্বা একোদ্দিষ্টশ্রাদ্ধ বিহি- তকালে ভোজ্যমুৎসৃজ্য কুশ ব্রাহ্ম- ণং স্থাপযিত্বা বাস্তপ্রভৃত্যাদি পূজযি

ত্বা ভূস্বামি পিতৃভ্যঃ শ্রাদ্ধাগ্রভাগং দত্ত্বা দক্ষিণামুখঃ অনুজ্ঞাং কুর্য্যাৎ। যথা অদ্যামুকে মাসি অমুক পক্ষে অমুক তিথৌ অমুক গোত্রস্য প্রেত- স্য অমুক দেবশর্ম্মণঃ প্রথমমাসিকৈ কোদ্দিষ্ট শ্রাদ্ধং দর্ভময ব্রাহ্মণে হহং করিষ্যে। ওঁ কুরুষ্বেত্যুত্তরং। ততো গাযত্রীং জপেৎ।দেবতাভ্য ইত্যাদি ত্রিধা পঠেৎ। ততঃ পুণ্ডরীকাক্ষং স্মৃত্বা মৃজ্জলেন শ্রাদ্ধীয দ্রব্যং প্রোক্ষ- যেৎ।রক্ষার্থ মুদক পূর্ণপাত্র মেকদে- শে স্থাপযেৎ। ততঃ ওঁ অমুক গোত্র প্রেত অমুকদেব শর্ম্মন্নেতত্তে দর্ভা- সনং স্বধা। ইত্যনেন ব্রাহ্মণ বামপা- র্শ্বে দদ্যাৎ। অপহতেত্যাদিনা তি- লান্ বিকীর্য্য জলং স্পৃষ্ট্বা ব্রাহ্মণাগ্র ভূমৌ কুশপত্র মেকং পাতযিত্বা ত- দুপরি অর্ঘ্যপাত্রং সংস্থাপ্য ওঁ পবি- ত্রাসি বৈষ্ণবীত্যনেনানখচ্ছিন্নং ওঁ বি- ষ্ণো র্মনসা পূতমসীত্যনেন প্রোক্ষি- ত মেকদলং পবিত্রং তৎ পাত্রে নি- ধায ওঁ শন্নোদেবী রিত্যাদি মন্ত্রেণ জলং দদ্যাৎ। ততঃ ওঁ তিলোসি সোম দৈবত্যো গোসবো দেব নি- র্ম্মিতঃ। প্রত্ন মদ্ভিঃ পৃক্তঃ স্বধযা প্রে- তান্ লোকান্ প্রীণাহি নঃ স্বাহা। ইত্যনেন তিলান্দত্ত্বা গন্ধপুষ্পাদিনা

অর্ঘ্যং নির্ম্মায কুশান্তরেণাচ্ছাদ্য তৎ কুশমুদ্ঘাট্য ব্রাহ্মণে পবিত্রং দত্ত্বা জলান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নম ইতি সংপূজ্য তৎ পাত্রং বামহস্ততলে বিন্যস্য দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইতি পঠিত্বা ওঁ অমুক গোত্র প্রেতামুক দেব শর্ম্মন্নেতত্তে হর্ঘ্যং স্বধা। ততঃ ওঁ অমুক গোত্র প্রেতামুক দেব শর্ম্মন্নেতানি তে গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি স্বধা। ইত্যুৎসৃজ্য এষতে গন্ধঃ এতত্তে পুষ্পং এষতে ধূপ এষতে দীপঃ এতত্ত আচ্ছাদনং। ততো ব্রাহ্মণাগ্র ভূমৌ কুশাদিক মপনীয নৈর্ঋতি মারভ্য দক্ষিণাগ্রান্তরেখযা বামাবর্ত্তেন জলেন চতুষ্কোণ মণ্ডলং কৃত্বা তত্র ভোজন পাত্রং নিদধ্যাৎ। তত্র সামিষং সর্ব্ব মন্নাদিকং পরিবেশ্য ওঁ ইদং বিষ্ণুরিত্যাদি মন্ত্রেণ অন্নাদাবনথাঙ্গুষ্ঠং নিক্ষিপ্য ওঁ অপহতেত্যাদিনা তিলান্ বিকীর্য্য ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা গাযত্রীং জপ্ত্বা অন্নে মধু দত্ত্বা তদভাবে গুড়ং দত্ত্বা ঘৃতং দত্ত্বা ওঁ মধুবাতেত্যাদি মধু মধু মধ্বিতি চ পঠিত্বা অন্নমভিমন্ত্র্য প্রোক্ষ্য ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা বামহস্তেনান্ন পাত্রং ধৃত্বা ওঁ অমুকগোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে সামিষান্নং সোপকরণং স্বধেত্যুৎসৃজেৎ। ইদং সামিষান্নং ইদং হবিঃ ইমা গঙ্গাযা আপঃ এতান্যুপকরণানি যথাসুখং বাগ্যতঃ সদ। ইত্যনেন জলগণ্ডূষং দদ্যাৎ। ততো গাযত্রীং ত্রিঃ সকৃদ্বা ওঁ মধুবাতা ইত্যাদি মধু মধু মধ্বিতি ওঁ অন্নহীন মিত্যাদি চ পঠেৎ। অশব্রাহ্মণপক্ষে পুন গাযত্র্যাদি পঠেৎ। ওঁ যজ্ঞেশ্বরো হব্য ইত্যাদি ওঁ যোগীশ্বর মিত্যাদি যাজ্ঞবল্ক্য শ্লোকত্রযং ওঁ তদ্বিষ্ণো রিত্যাদি দুর্য্যোধন ইত্যাদি ওঁ যুধিষ্ঠির ইত্যাদি সর্ব্বং পঠেৎ। ততো দক্ষিণাগ্রান্ কুশান্ ভূমৌ সংস্থাপ্য ভূমিং প্রোক্ষ্য সর্ব্ব প্রকার মন্নমুদ্ধৃত্য সতিল মেকীকৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চেত্যাদি মন্ত্রদ্বযেন কুশোপরি বিকিরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণকর্ণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা ব্রাহ্মণায জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গাযত্রীং মধুবাতা ইত্যাদিকং মধু মধু মধ্বিতি চ জপ্ত্বা ওঁ শেষমন্নং কিং দেয মিত্যনুজ্ঞাপ্য ওঁ ইষ্টায দীযতা মিত্যুত্তরং গৃহীত্বা ওঁ পিণ্ডদান মহং করিষ্যে ওঁ কুরুষ্বেত্যুক্তে ব্রাহ্মণ

স্বমুখে ওঁ নিহন্মীত্যাদিনা নৈর্ঋ ত ॥ মবিভ্য দক্ষিণাগ্রেরেথবা জলেন বা- মাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা বিত্র বামহস্তাদ্দক্ষিণ হস্তেন গৃহী- ত্বা বামহস্তান্বারব্ধ দক্ষিণ পাণিনা দক্ষিণাগ্রাং রেখাং মণ্ডল মধ্যস্থানে ওঁ অপহতেত্যাদি নিহন্মীত্যাদি মন্ত্রাভ্যাং দর্য্যাৎ। তদ্দর্ভমুত্তরস্যাং দিশি ক্ষিপেৎ । রেখোপরি সমূ- লান্ সাগ্রান্ দর্ভানাস্তীর্য্য ওঁ দেব তাভ্য ইতি পঠিত্বা ওঁ এহি প্রেত সৌম্য গম্ভীরেভিঃ পথিভি পূর্ব্বিণে- ভি দেহ্যস্মভ্যং দ্রবিণেহ ভদ্রং রযি- ঞ্চনঃ সর্ব্ববীরং নিযচ্ছ ইত্যাবাহ্য তি- লাং শ্চাস্তীর্ণ দর্ভেষু বিকিরেৎ । ততো বামহস্তেন সতিল জলং গৃ হীত্বা বামহস্তাদ্দক্ষিণ হস্তেন সং- গৃহ্য ওঁ অমুক গোত্র প্রেতামুক দেব শর্ম্মন্নবনে নিক্ষ্ব স্বধা ইত্যনেন দদ্যাৎ । ততঃ শ্রাদ্ধ শেষ মন্নং সব্যঞ্জনং সধৃতাজ্য তিল সংযুক্তং সামিষং গৃ- হীত্বা পিণ্ডং কৃত্বা ওঁ মধুবাতেত্যা- দি ঋকত্রয়ং অক্ষন্ন মীত্যাদি চ প- ঠিত্বা বিল্বপ্রমাণং পিণ্ডং সতিলং দ্বিগুণ ভুগ্ন দর্ভত্রয় সহিতং বামহস্ত স্থিত পাত্রাদ্দক্ষিণ হস্তেন গৃহীত্বা ওঁ অমুক গোত্র প্রেতামুক দেব শর্ম্ম

ন্নেষতে সামিষপিণ্ডঃ স্বধা ইত্যবনে জন স্থানে বাম হস্তান্বারব্ধ দক্ষিণ হস্তেন দদ্যাৎ ।। ততঃ আচম্য হরিং স্মৃত্বা পিণ্ড পাত্রং প্রক্ষাল্য বামহ- স্তাদ্দক্ষিণ হস্তেন গৃহীত্বা প্রক্ষালি- ত জলং ওঁ অমুক গোত্র প্রেতামুক দেব শর্ম্মন্নবনে নিক্ষ্ব স্বধা ইতি পি- ণ্ডোপরি দদ্যাৎ। ততঃ ওঁ অত্র প্রেত মাদয়স্ব যথা ভাগমা বৃষায়স্ব ইতি জপ্ত্বা বামাবর্ত্তেনোদঙ্মুখো ভূত্বা আ- গমনাচ্ছ্বাসং ধৃত্বা তেনৈব পথা- পন্না বর্ত্তমানঃ প্রেতং ভাস্বর মূর্ত্তিং ধ্যায়ন্ ওঁ অমী মদৎ প্রেত যথা ভাগমা বৃষাবিষ্ট ইতি দক্ষিণাভিমু- খো ভবন্ জপেৎ। ততঃ শ্বাসং ত্য- জেৎ। ওঁ নম স্তে প্রেত প্রেত নম স্তে ইতি কৃতাঞ্জলি জপেৎ। ওঁ গৃহান্নঃ প্রেত দেহি ইতি গৃহিণীং পশ্যেৎ। ওঁ সদ স্তে প্রেত দেস্ম ইতি পিণ্ডং পশ্যেৎ। ততো নব মনবং বা শুক্ল বস্ত্র দশাভবং সূত্রং বাম হস্তাদ্দক্ষি- ণ হস্তেন গৃহীত্বা ওঁ এতদ্বঃ প্রেতা বাস ইতি পঠিত্বা পিণ্ডোপরি নি- দধ্যাৎ। ততঃ ওঁ অমুক গোত্র প্রে- তামুক দেব শর্ম্মন্নেতত্তে বাসঃ স্বধা । ইত্যনেনোৎসৃজেৎ। তত স্তূষ্ণীং পিণ্ডং সংপূজ্য ওঁ বসন্তাযেত্যাদি

মন্ত্রেণ ষড়ভূমমস্কূর্য্যাৎ। তত ওঁ ‖ সুসুপ্রোক্ষিতমস্তু ইতি ব্রাহ্মণাগ্রভূমি মাসিঞ্চেৎ। ওঁ শিবা আপঃ সন্তু ইতি ব্রাহ্মণে জলং দদ্যাৎ। ওঁ সন্তিতি প্রতিবচনং। ওঁ সৌমনস্যমস্তিতি প্রশ্নং ওঁ অস্তিতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্তু ইতি যবান্ দদ্যাৎ। ওঁ অস্তিত্যুত্তরং। ততস্তিলাজ্য মধুযুক্তং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেব শর্ম্মণো দত্ত মিদ মন্ন পানাদিক মুপতিষ্ঠতাং। ওঁ উপতিষ্ঠতা মিতি প্রতিবচনং। ওঁ অঘোরঃ প্রেতো হস্তু ইতি বদেৎ। ওঁ অস্তিতি প্রতিবচনং। ওঁ গোত্রং নো বর্দ্ধতা মিতি বদেৎ। ওঁ বর্দ্ধতা মিতি প্রতিবচনং। ততঃ পিণ্ডোপরি সপবিত্র দশানাস্তীর্য্য ওঁ ঊর্জং বহন্তী রমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধাস্থ তর্পযত মে প্রেতমিত্যনেন বারিধারয়া সিঞ্চেৎ। ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেব শর্ম্মণঃ কৃতৈতৎ প্রথমমাসিকৈকোদ্দিষ্ট শ্রাদ্ধ কর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথা নাম গোত্রায ব্রাহ্মণায়াহং দদানীতি দদ্যাৎ। ততো দক্ষিণাং দিশং পশ্যন্ বরং যাচেত। অত্র পাত্র মালভ্য জপেৎ। নাশিষঃ প্রার্থয়েদিতি প্রচেতো বচনাদাশিষং ন প্রার্থয়েৎ। তত ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ওঁ অভিরম্যতা মিতি বিসর্জনং ওঁ অভিরতোস্মীতি প্রতিবচনং। ওঁ আমাবাজেতি প্রদক্ষিণ বারি ধারয়া বেষ্টয়েৎ। পিণ্ডাংস্তু গোজ বিপ্রেভ্যো দদ্যাদগ্নৌজলেপিবেতি ক্ষিপেৎ। শ্রাদ্ধীয দ্রব্যং ব্রাহ্মণায দদ্যাৎ জলে বা ক্ষিপেৎ। ততো বামদেব্যং গাযেৎ অচ্ছিদ্রাবধারণং দীপাচ্ছাদনং বিষ্ণুস্মরণঞ্চ কুর্য্যাৎ। এবং প্রকারেণ দ্বিতীযাদি মাসিকং কর্ত্তব্যং। ইতি স্মার্ত্তভট্টাচার্য্য কৃত শ্রাদ্ধপ্রযোগতত্ত্বং ‖ * ‖ অন্যৎ শ্রাদ্ধশব্দে দ্রষ্টব্যং ‖

মাসিকঃ ত্রি মাসসম্বন্ধী ‖ মাসিভব ইত্যর্থে ষ্ণিক প্রত্যযেন নিষ্পন্নঃ ‖

মাসুরী স্ত্রী শ্মশ্রুঃ। ইতি হেমচন্দ্রঃ ‖

মাহ্ম ব্য বারণং। তৎপর্য্যাযঃ। মা ২ অলং ৩। ইত্যমরঃ ‖

মাহ শ্ব এ মানে। ইতি কবিকল্পদ্রুমঃ ‖ শ্ব অমমাহৎ। ঋদনুবন্ধ স্থানে ষষ্ঠ স্বরানুবন্ধ ইত্যেকে। এ মাহতি মাহতে। ইতি দুর্গাদাসঃ ‖

মাহাঙ্গনঃ } ত্রি মহাঙ্গনোদ্ভবঃ। মাহাঙ্গনীনঃ } ইত্যমরটীকায়াং রা যমুকুটঃ ॥

মাহাত্ম্যং ক্লী মহাত্মতা। মহিমেতি যাবৎ। যথা। মাহাত্ম্যং ভগবত্যাশ্চ পুরাণাদিষু কীর্ত্তিতং। পাঠস্তস্য জপঃ প্রোক্তঃ পঠেদ্দেবীমনাস্ততঃ॥ ইতি তিথ্যাদিতত্ত্বং ॥

মাহানাসিকঃ } পুং মহানাম্নীঋচামাহানাম্নিকঃ } ধ্যেতাব্রাহ্মণঃ। ইতি মেদিনী ॥

মাহিনং ক্লী রাজ্যং। ইত্যুণাদিকোষঃ ॥

মাহিরঃ পুং ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মাহিষিকঃ পুং মহিষীপতিঃ। ব্যভিচারিণ্যনুরক্তপতিঃ। যথা। মহিষীত্যুচ্যতে নারী যা চ স্যাদ্ব্যভিচারিণী। তাং দুষ্টাং কাময়তি যঃ স বৈ মাহিষিকঃ স্মৃতঃ ॥ ইতি স্কান্দে কাশীখণ্ডং ॥ মহিষোপজীবী ॥ ভগদ্বারোপার্জ্জিত স্ত্রীধনোপজীবী। যথা। মহিষীত্যুচ্যতে নার্য্যা ভগেনোপার্জ্জিতং ধনং। উপজীবতি য স্তস্যাঃ স বৈ মাহিষিকঃ স্মৃতঃ ॥ ইতি বিষ্ণুপুরাণে ২ অংশে ৬ অধ্যায়ে ১৫ শ্লোকস্য টীকায়াং শ্রীধরস্বামী ॥

মাহিষ্যঃ পুং বর্ণসঙ্করজাতিবিশেষঃ। স চ ক্ষত্রিয়াদ্বৈশ্যায়াং জাতঃ। ইত্যমরঃ ॥

মাহেন্দ্রঃ পুং শুভদণ্ডবিশেষঃ। রব্যাদি সপ্তবারেষু বায়ু বরুণ যম মাহেন্দ্রাণা মেকৈক দণ্ডা ভবন্তি। তত্র বরুণমাহেন্দ্রযো র্দণ্ডৌ শুভৌ। বায়ু যমযো র্দণ্ডাবশুভৌ। যথা। খ্যাতং বা ব য মা সূর্য্যে মা বা ব য কলানিধৌ। ব য মা বাঙ্গজে জ্ঞেয়া মা বা ব য সুধাংশুজে॥ গুরৌ বা ব য মা চৈব মা বা ব য তথা ভৃগৌ। সূর্য্যপুত্রে য মা বা ব ঘটী যুগ্মং শুভাশুভং ॥ মাহেন্দ্রে বিজয়ো নিত্যং বারুণে চ ধনাগমঃ। বায়ৌ চ ভ্রমতে নিত্যং যমে হপি মরণং ধ্রুবং ॥ ইতি সারসংগ্রহঃ ॥ মহেন্দ্রসম্বন্ধিনি ত্রি ॥

মাহেন্দ্রী স্ত্রী ইন্দ্রাণী। ইতি শব্দরত্নাবলী ॥ গৌঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাহেয়ঃ ত্রি মহ্যা অপত্যং। ইতি মুগ্ধবোধ ব্যাকরণং ॥

মাহেয়ী স্ত্রী গৌঃ। ইত্যমরঃ ॥

মাহেশী স্ত্রী দুর্গা। যথা। মহাদেবাৎসমুৎপন্না মহাস্তৈরীক্ষ্যতে যতঃ। মাহেশ্বর্য্যা তনু র্যস্যা মাহেশী

তেন সা স্মৃতা ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥

মাহেশ্বরী স্ত্রী মবতিক্তা। ইতি রাজনির্ঘণ্টঃ ॥ দুর্গা ॥ মাতৃভেদঃ। ইতি শব্দরত্নাবলী ॥ বিষ্ণুঃ। যথা। কন্যা ঊচুঃ। কস্ত্বং বিভ্রাজসে কান্ত্যা কেয়ং বা নব বিপুভা। কোন্বয়ং ভাতি বপুষা পঙ্কজায়তলোচনঃ ॥ নিশম্য তাসাং বচনং বৃষেন্দ্রবর বাহনঃ। ব্যাজহার মহাযোগী ভূতাধিপতি রব্যয়ঃ॥ অয়ং নারায়ণো গৌরী জগন্মাতা সনাতনঃ। বিভজ্য সংস্থিতো দেবঃ স্বাত্মানং বহুধেশ্বরঃ॥ নমে বিদুঃ পরং তত্ত্বং দেবাদ্যা ন মহর্ষয়ঃ। একো হয়ং দেব দেবাত্মা ভবানী বিষ্ণুরেব চ ॥ অহং হি নিষ্ক্রিয়ঃ শান্তঃ কেবলো নিত্য বিগ্রহঃ। মামেব কেশবং দেব মাহু দেবী মথাম্বিকাং ॥ এষ ধাতা বিধাতা চ কারণং কার্য্য মেব চ। কর্ত্তা কারয়িতা বিষ্ণু ভক্তি মুক্তি ফলপ্রদঃ ॥ ভোক্তা পুমানপ্রমেয় সংহর্ত্তা কালরূপধৃক্। স্রষ্টা ধাতা বাসুদেবো বিশ্বাত্মা বিশ্বতো মুখঃ ॥ কূটস্থো হ্যবরো ব্যাপী যোগী নারায়ণঃ স্বয়ং। তারকঃ পুরুষো-হ্যাত্মা কেবলং পরমং পদং ॥ এষা মাহেশ্বরী গৌরী মম শক্তি র্নিরঞ্জনা। শান্তা সত্যা সদানন্দা পরং পদমিতি শ্রুতিঃ ॥ অস্যাঃ সর্ব্বমিদং জাত মত্রৈব লয় মেষ্যতি। এষৈব সর্ব্বভূতানাং গতীনা মুত্তমা গতিঃ ॥ ইতি কৌর্ম্মে ১৪ অধ্যায়ঃ॥

মাক্ষ ই স্পৃহি। ইতি কবিকল্পদ্রুমঃ॥ ই মাক্ষতি। ম মধ্যপাঠে নৈবেষ্টসিদ্ধে ইদনুবন্ধো বেদেযূচারণ ভেদার্থঃ। ইতি দুর্গাদাসঃ ॥

মাক্ষিকং ক্লী মধু। ইত্যমরঃ ॥ নীলবর্ণ মধ্যম মক্ষিকা কৃত তৈলবর্ণ মধু। অস্য গুণাঃ। ক্ষৌদ্রাল্লঘুতরত্বং। রুক্ষত্বং। শ্রেষ্ঠত্বং। শ্বাসাদি রোগে বিশেষতঃ প্রশস্ততরত্বঞ্চ। ইতি রাজবল্লভঃ ॥ ধাতুবিশেষঃ। ধাতুমাখী ইতি হিন্দীভাষা। তদ্দ্বিবিধং। স্বর্ণমাক্ষিকং রৌপ্য মাক্ষিকঞ্চ। তৎপর্য্যায়ঃ। মাক্ষীকং ২ পীতকং ৩ ধাতুমাক্ষিকং ৪ তাপিচ্ছং ৫ তাপ্যকং ৬ তাপ্যং ৭ আপীতং ৮ পীতমাক্ষিকং ৯ আবর্ত্তং ১০ মধুধাতুঃ ১১ ক্ষৌদ্রধাতুঃ ১২ মাক্ষিকধাতুঃ ১৩। ইতি রাজনির্ঘণ্টঃ ॥ কদম্বঃ ১৪ চক্রনাম ১৫ অজনামকং ১৬। ইতি হেমচন্দ্রঃ ॥ অস্য গুণাঃ। মধুরত্বং। তিক্তত্বং। অম্লত্বং

কফ ভ্রম হৃল্লাস মূর্চ্ছার্ত্তি শ্বাস কাস বিষাপহত্বঞ্চ ॥ মাক্ষিকং দ্বিবিধং প্রোক্তং হেমাখ্যং তারমাক্ষিকং। ভিন্নবর্ণ বিশেষত্বাদুস বীর্য্যাদিকং পৃথক্॥ তারপাদাদিকে তারমাক্ষিকঞ্চ প্রশস্যতে। দেহে হেমাভকং শস্তং রোগহৃদ্বল পুষ্টিদং ॥ ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। লেখনো মাক্ষিকো ধাতুঃ সুবর্ণ রজত দ্যুতিঃ। জরাজিৎ পাণ্ডুরোগঘ্নঃ ক্ষয় কুষ্ঠ জ্বরাপহঃ॥ মধুরো হ্ম্লঃ কটুঃ পাকে কিঞ্চিদুক্ষো হমৃতোপমঃ। ইতি কশ্চিদ্রাজবল্লভঃ ॥

মাক্ষিকজং ক্লী শিক্থকং। ইতি রাজনির্ঘণ্টঃ ॥

মাক্ষিকফলঃ পুং মধুনালিকেরিকঃ। ইতি রাজনির্ঘণ্টঃ ॥

মাক্ষিকাশ্রয়ং ক্লী শিক্থকং। ইতি রাজনির্ঘণ্টং

মাক্ষীকং ক্লী মধু। ইতি রাজনির্ঘণ্টঃ

মাক্ষীকশর্করা স্ত্রী সিতাখণ্ডঃ। ইতি রাজনির্ঘণ্টঃ ॥

মি ডু ঞ ন ক্ষেপে। ইতি কবিকল্পদ্রুমঃ ॥ ডু মিত্রিমং। ঞ ন মিনোতি মিনুতে। ইতি দুর্গাদাসঃ ॥

মিছ শ বাধে। ইতি কবিকল্পদ্রুমঃ ॥ শ মিছতী মিছন্তী। বাধো বিহতিঃ। ইতি দুর্গাদাসঃ ॥

মিতঃ ত্রি পরিমিতঃ ॥ শব্দিতঃ ॥ ক্ষিপ্তঃ। ইতি মাধাতো র্মিধাতোশ্চ ক্তপ্রত্যযেন নিষ্পন্নং ॥

মিতঙ্গমঃ পুং স্ত্রী হস্তী। ইতি সিদ্ধান্তকৌমুদী॥ পরিমিতগামিনি ত্রি ॥

মিতদ্রুঃ পুং সমুদ্রঃ। ইতি হেমচন্দ্রঃ॥

মিতম্পচঃ ত্রি কৃপণঃ। ইত্যমরঃ॥ পরিমিতপাককর্ত্তা চ ॥

মিতাশনঃ ত্রি পরিমিতভোজী। মিতমশ্নাতি যঃ ইতি ব্যুৎপত্ত্যা কর্ত্তরি অন প্রত্যযেন নিষ্পন্নঃ॥

মিতিঃ স্ত্রী মানং ॥ বিজ্ঞানং ॥ অবচ্ছেদঃ। ইতি শব্দরত্নাবলী ॥

মিত্রং ক্লী শত্রোঃপরং। ইত্যমরঃ॥ অতঃ শত্রোঃ পর মবস্থিতো রাজা মিত্রং উপকারিত্বাৎ। মেদ্যতি স্নিহ্যতীতি ত্রামুসিতি ত্রঃ নিপাতাৎ গুণা ভাবঃ। দ্বিতকারং একতকারঞ্চেত্যেকে। ইতি ভট্টীকায়াং ভরতঃ ॥ অপিচ। রাজা শত্রু রিতি খ্যাত একার্থাভিনিবেশতঃ। ভূম্যৈকান্তরিতো রাজা স মিত্রং মিত্রকার্য্যতঃ॥ ইতি শব্দরত্নাবলী ॥

মিত্রং ক্লী বন্ধুঃ। মিতা ইতি ভাষা। তৎপর্য্যাযঃ। সখা ২ সুহৃৎ ৩।

ইত্যমরঃ।। মাযযতি জামাতি সর্ব্বং মিত্রং মীকি গত্যাং মায়ীতি ডিত্রঃ। মিত্র মজহল্লিঙ্গং। নিপাতাত্তস্য দ্বিত্বে দ্বিতকারঞ্চ। ইতি ভট্টীকাযাং ভরতঃ।। তচ্চতুর্ব্বিধং। সহার্থঃ ১ ভজমানঃ ২ সহজঃ ৩ কৃত্রিমঃ ৪। ইতি মহাভারতে রাজধর্ম্মঃ।। *।। মিত্রত্বোৎপত্তি র্যথা। ন কশ্চিৎ কস্যচিন্মিত্রং ন কশ্চিৎ কস্যচিদ্রিপুঃ। কারণাদেব জাযন্তে মিত্রাণি রিপব স্তথা।। বর্জ্য মিত্রং যথা। অভার্য্যঞ্চ অমিত্রঞ্চ অরাজানং অসৌহৃদং। অবন্ধুঞ্চ অদেশঞ্চ দূরতঃ পরিবর্জযেৎ।। অমিত্রে নাস্তি বিশ্বাসঃ অরাজে নাস্তি জীবিতং। পরোক্ষে কার্য্য হন্তারং প্রত্যক্ষে প্রিযবাদিনং।। বর্জযেত্তাদৃশং মিত্রং মাযাময নরিস্তথা।। বিশ্বস্তস্যৈব মিত্রত্বং যথা। সা শ্রী র্যা ন মদং কুর্য্যাৎ স সুখী তৃষ্ণযোজ্ঝিতঃ। তন্মিত্রং যস্য বিশ্বাসঃ পুরুষঃ স জিতেন্দ্রিযঃ।। ইতি গারুড়ে ১১৩। ১১৪। ১১৫ অধ্যাযঃ।।*।। মিত্রপ্রশংসাদি যথা। যস্য মিত্রেণ সংভাষো যস্য মিত্রেণ সংস্থিতিঃ। যস্য মিত্রেণ সংলাপ স্ততো নাস্তীহ পুণ্যবান্।। নানি কানি চ মিত্রাণি কর্ত্তব্যানি শতানি চ। পশ্য মূষিক মিত্রেণ কপোতা মুক্ত বন্ধনাঃ।। পরোক্ষে কার্য্যহন্তারং প্রত্যক্ষে প্রিযবাদিনং। বর্জযেত্তাদৃশং মিত্রং বিষকুম্ভং পযোমুখং।। যস্যার্থা স্তস্য মিত্রাণি যস্যার্থা স্তস্য বান্ধবাঃ। যস্যার্থাঃ স পুমান্ লোকে যস্যার্থাঃ স হি পণ্ডিতঃ।। অপুত্রস্য গৃহং শূন্যং সন্মিত্ররহিতস্য চ। মূর্খস্য চ দিশঃ শূন্যাঃ সর্ব্বশূন্যা দরিদ্রতা।। ইতি হিতোপদেশঃ।।

মিত্রঃ পুং সূর্য্যঃ। ইত্যমরঃ।।

মিত্রযুঃ ত্রি মিত্রবৎসলঃ। ইতি হেমচন্দ্রঃ।।

মিত্রযুঃ পুং লোকযাত্রিকঃ। ইত্যুণাদিকোষঃ সংক্ষিপ্তসারোণাদিবৃত্তিশ্চ।।

মিত্রযুদ্ধং ক্লী সুহৃৎসংগ্রামঃ। তৎপর্য্যাযঃ। মৈত্রেযিকা ২। ইতি ত্রিকাণ্ডশেষঃ।।

মিত্রলব্ধিঃ স্ত্রী }
মিত্রলাভঃ পুং } সুহৃৎপ্রাপ্তিঃ। যথা মিত্রলাভঃ সুহৃদ্ভেদো বিগ্রহঃ সন্ধি রেব চ। ইতি হিতোপদেশঃ।।

মিত্রবৎসলঃ ত্রি মিত্রপ্রিযঃ। তৎপর্য্যাযঃ। মিত্রযুঃ ২। ইতি হেমচন্দ্রঃ।।

মিত্রশীঃ ত্রি সুহৃৎশান্তা। মিত্রং শান্তি যঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

মিত্রা স্ত্রী সুমিত্রা। শত্রুঘ্নজননী। ইতি শব্দরত্নাবলী ॥

মিথ ঋ ঞ বধে॥ মেধাযাং। ইতি কবিকল্পদ্রুমঃ॥ ঋ অমিমেথৎ। ঞ মেথতি মেথতে শাস্ত্রার্থং শিষ্যঃ ধারযতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

মিথঃ ব্যং অন্যোন্যং॥ রহঃ। ইত্যমরঃ॥

মিথিঃ পুং নিমিরাজপুত্রঃ। স তু জনকরাজঃ। যথা। অপুত্রস্য তস্য নিমে র্ভূভুজঃ শরীর মরাজক ভীরবস্তে মুনযঃ অরণ্যাং মমন্থুঃ। তত্র চ কুমারো জজ্ঞে। জননাজ্জনকসংজ্ঞা চাসাববাপ। অভূদ্বিদেহো হস্য পিতেতি বৈদেহঃ। মথনান্মিথি রভূৎ। তস্যোদাবসুঃ পুত্রো হভবৎ। ইতি বিষ্ণুপুরাণে ৪ অংশে ৫ অধ্যাযঃ॥

মিথিলা স্ত্রী স্বনামখ্যাতনগরী। সা তু জনকরাজপুরী। যথা। বিদেহা মিথিলা প্রোক্তা। ইতি হলাযুধঃ॥ অপিচ। গণ্ডকীতীরমারভ্য চম্পারণ্যান্তকং শিবে। বিদেহভূঃ সমাখ্যাতা তৈরভুক্তাভিধঃ স তু॥ তৈরভুক্তা ত্রিহুত ইতি খ্যাতা। ইতি শক্তিসঙ্গমতন্ত্রে ৭ পটলঃ॥

মিথুনং ক্লী স্ত্রীপুংসযোর্যুগ্মং। তৎপর্য্যাযঃ। দ্বন্দ্বং ২। ইত্যমরঃ॥ যুগলং। ইতি তট্টীকাযাং রামাশ্রমঃ॥ মেষাদি দ্বাদশরাশ্যন্তর্গত তৃতীয রাশিঃ। তৎপর্য্যাযঃ। জিতুমঃ ২। তচ্চ দ্বিপদং গ্রাম্যং সম সংজ্ঞকং। অস্যোদযস্য স্থূলমানং যষ্ঠ্যাধিক পঞ্চদণ্ডাঃ। ইতি জ্যোতিষতত্ত্বং॥ অস্যাধিষ্ঠাতৃদেবতা গদাধারপুরুষঃ বীণাধারিস্ত্রী চ। মৃগশিরঃ শেষার্দ্ধং আর্দ্রা সমুদাযঃ পুনর্ব্বসো স্ত্রিপাদং এতৈ র্ভবতি। তত্তু শীর্ষোদযং পশ্চিমদিক্স্বামি বাযুপ্রকৃতি হরিদ্বর্ণং বনস্থিতং শূদ্রবর্ণং স্নিগ্ধং মধ্যস্ত্রীসঙ্গং মধ্যম সন্তানঞ্চ। তত্র জাতো জনঃ মৃগচক্ষুঃ মিষ্টভাষী কৃশঃ বঞ্চকঃ ধর্ম্মমতিঃ বিনযভাজনশ্চ ভবতিং। ইতি বৃহজ্জাতকাদযঃ॥ *॥ অথ মিথুন লগ্ন জাতফলং। মিথুনোদয সংজাতো মানী স্বজনবৎসলঃ। ত্যাগী ভোগী ধনী কামী দীর্ঘসূত্রো হরিমর্দ্দনঃ॥ ইতি কোষ্ঠীপ্রদীপঃ॥ *॥ রাত্রৌ তল্লগ্ননিরূপণং যথা। দন্ত সংখ্য ভবনে ঝষাকৃতাবন্তভে লসদনন্ত

মধ্যগে। কোমলাঙ্গি মিথুনোদ্গাৎ প্রিয়ে কাল খানল কলাঃ প্রিয়ে হচলন্ ॥ ৫।৬॥ ইতি কালিদাসকৃত রাত্রিলগ্ন নিরূপণং ॥

মিথ্যা ব্যং অসত্যং। মিছা ইতি ভাষা। তৎপর্য্যায়ঃ। মৃষা ২ বিতথঃ ৩ অনৃতং ৪। ইতি শব্দরত্নাবলী॥ সা চাধর্ম্মপত্নী। যথা। অধর্ম্মপত্নী মিথ্যা সা সর্ব্বধূর্ত্তৈশ্চ পূজিতা। যযা বিনা জগন্মুক্ত নুচ্ছন্নং বিধিনির্ম্মিতং ॥ সত্যে চাদর্শনা যা চ ত্রেতায়াং সূক্ষ্মরূপিণী। অর্দ্ধাবয়বরূপা চ দ্বাপরে সংবৃতা ভিয়া। কলৌ মহাপ্রগল্ভা চ সর্ব্বত্র ব্যাপিকা বলাৎ। কপটেন সমং ভ্রাত্রা ভ্রাম্যত্যেব গৃহে গৃহে ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ১ অধ্যায়ঃ ॥ ❀ ॥ অপিচ। অধর্ম্মস্য প্রিয়া রম্যা মিথ্যা মার্জ্জার লোচনা। তস্যাঃ পুত্রো হতিতেজস্বী দম্ভঃ পরম কোপনঃ ॥ স মায়ায়াং ভগিন্যান্তু লোভং পুত্রঞ্চ কন্যকাং। নিকৃতিং জনয়ামাস তযোঃ ক্রোধঃ সুতো হভবৎ ॥ ইতি কল্কিপুরাণে ১ অধ্যায়ঃ ॥ ❀ ॥ বিষয়ভেদে মিথ্যাভাষণে দোষাভাবো যথা। শর্ম্মিষ্ঠোবাচ। ন ন্ম্মযুক্তং বচনং হিনস্তি ন স্ত্রীষু রাজন্ন বিবাহকালে। প্রাণাত্যয়ে সর্ব্বধনাপহারে পঞ্চানৃতান্যাহুরপাতকানি ॥ মিথ্যাকথনে দোষো যথা। পৃষ্টাস্তু সাক্ষ্যে প্রবদন্তি যেহন্যথা ভবন্তি মিথ্যাপতিতা নরেন্দ্র। একার্থতায়ান্তু সমাহিতায়াং মিথ্যা বদন্তং হ্যনৃতং হিনস্তি ॥ যযাতিরুবাচ। রাজা প্রমাণং ভূতানাং স বিনশ্যেন্মৃষা বদন্। অর্থকৃচ্ছ্রমপি প্রাপ্য ন মিথ্যা কর্ত্তুমুৎসহে ॥ ইতি মাৎস্যে ৩১ অধ্যায়ঃ ॥ ❀ ॥ অথাসত্যাভিধান প্রায়শ্চিত্তং। তত্র সকৃদসত্যসম্ভাষণে কৃষ্ণানুস্মরণং প্রায়শ্চিত্তং। যথা। বিষ্ণুপুরাণং। কৃতে পাপে হনুতাপো বৈ যস্য পুংসঃ প্রজায়তে। প্রায়শ্চিত্তন্তু তস্যৈকং কৃষ্ণানুস্মরণং পরং ॥ অত্যন্তাভ্যাসে বিষ্ণুঃ। নিন্দিতেভ্যো ধনাদানং বাণিজ্যং কুসীদ জীবনং। অসত্যভাষণং শূদ্রসেবন মিত্যপাত্রীকরণং. কৃত্বা তপ্তকৃচ্ছ্রেণ শুধ্যতি ॥ অতিবহুতরকালাভ্যাসে মনুঃ। জঙ্করাপাত্রকৃত্যাসু মাসং শোধন মৈন্দবং। ইতি। চাতুর্ব্বর্ণ্যবধে সাক্ষ্যে হনৃতভাষণেহনুপাতকত্বাভাবাল্লঘু প্রায়শ্চিত্ত মাহ যাজ্ঞবল্ক্যঃ। বর্ণিনাং

ত্তি বধো যত্র তত্র সাক্ষ্যে হনৃতং বদেৎ। তৎ পাবনায় নির্ব্বাপ্যশ্চরুঃ সারস্বতো দ্বিজৈঃ॥ শূদ্রে তু বিষ্ণুঃ। তৎ পাবনায় কুষ্মাণ্ডীভির্দ্বিজোহগ্নিং জুহুয়াৎ। শূদ্রৈশ্চকো দ্দিষ্টং গোদশকস্য গ্রাসং বিদধ্যাৎ॥ বিষয় বিশেষে হপবাদ মাহ হারীতঃ। সোমবিক্রয় কন্যাবিবাহ ভয় মৈথুন বালকসংজ্ঞপনং গো ব্রাহ্মণ হিতঞ্চ সর্ব্বন্ মিথ্যা ন লিপ্যত ইতি। তথা যমঃ। ন নর্ম্ম যুক্তং বচনং হিনস্তি ন স্বৈর বাক্যং ন চ মৈথুনার্থে। প্রাণাত্যয়ে সর্ব্বনাপহারে পঞ্চানৃতান্যাহুরপাতকানি॥ ইতি প্রায়শ্চিত্তবিবেকঃ॥

মিথ্যাদৃষ্টিঃ স্ত্রী কর্ম্মফলাপবাদকজ্ঞানং। তৎপর্য্যায়ঃ। নাস্তিকতা ২। ইত্যমরভরতৌ॥ অসত্যদর্শনঞ্চ॥

মিথ্যাধ্যবসিতিঃ স্ত্রী মিথ্যাধ্যবসায়ঃ। অসত্যোৎসাহঃ। ইতি কেচিৎ॥

মিথ্যানিরসনং ক্লী শপথঃ। ইত্যমর টীকায়াং ভরতঃ॥

মিথ্যাভিযোগঃ পুং মিথ্যাবাদঃ। শতং মে ধারয়সীত্যাদি মিথ্যোদ্ভাবনং। তৎপর্য্যায়ঃ। অভ্যাখ্যানং ২। ইত্যমর ভরতৌ॥

মিথ্যাভিশংসনং ক্লী স্বর্ণস্তেয়ং ত্বয়া কৃতমিত্যাদি মিথ্যাদূষণং বাক্যং। তৎপর্য্যায়ঃ। অভিশাপঃ ২। ইত্যমর ভরতৌ॥

মিথ্যাভিশাপঃ পুং মিথ্যাপবাদঃ। যথা ভোজরাজঃ। শুক্লপক্ষে চতুর্থ্যান্তু সিংহে চন্দ্রস্য দর্শনং। মিথ্যাভিশাপং কুরুতে ন পশ্যেত্তত্র তং ততঃ॥ ইতি তিথ্যাদিতত্ত্বং॥

মিথ্যামতিঃ স্ত্রী ভ্রান্তিঃ। ইত্যমরঃ॥ অসত্যবুদ্ধিশ্চ॥

মিথ্যাসাক্ষী ত্রি কূটসাক্ষী। তস্য জ্ঞান প্রকার মাহ যাজ্ঞবল্ক্যঃ। উক্তেপি সাক্ষিভিঃ সাক্ষ্যে যদ্যন্যে গুণবত্তমাঃ। দ্বিগুণা বান্যথা ব্রূয়ুঃ কূটাঃ স্যুঃ পূর্ব্বসাক্ষিণঃ॥ মিথ্যাসাক্ষ্য কথনে দোষ মাহ। যে পাতক কৃতাং লোকা মহাপাতকিনাং তথা। অগ্নিদানাঞ্চ যে লোকা যে চ স্ত্রী বালঘাতিনাং॥ এতান্ সর্ব্বানবাপ্নোতি যঃ সাক্ষ্যমনৃতং বদেৎ। সুকৃতং যত্ত্বয়া কিঞ্চিৎ জন্মান্তর শতৈঃ কৃতং॥ তৎ সর্ব্বং তস্য জানীহি যং পরাজয়সে মৃষা। ইতি মিতাক্ষরা॥

মিথ্যোত্তরং ক্লী চতুর্থোত্তরান্তর্গতোত্তরবিশেষঃ। তস্য লক্ষণং। অভিযুক্তেঃ হভিযোগস্য যদি কুর্য্যাদপ-

ক্লব। মিথ্যা তত্ত্ব বিজানীযাদুত্তর ব্যবহারতঃ ॥ ইতি নারদঃ ॥ তচ্চতুর্ব্বিধং। মিথ্যৈতৎ ১ অহংনাভিজানামি ২ মম তত্র ন সন্নিধিঃ ৩ তৎকালে ইহমজাতঃ ৪। যথা ব্যাস নারদৌ। মিথ্যৈতন্নাভিজানামি মম তত্র ন সন্নিধিঃ। অজাতশ্চাস্মি তৎকালে ইতি মিথ্যা চতুর্ব্বিধং ॥ ইতি ব্যবহারতত্ত্বং ॥

নিদ ই ক স্নিহি। ইতি কবিকল্পদ্রুমঃ ॥ ইক নিন্দযতি বর্ত্তিকা তৈলেন। ইতি দুর্গাদাসঃ ॥

নিদ ক স্নিহি। ইতি কবিকল্পদ্রুমঃ ॥ ক মেদযতি বর্ত্তিকা তৈলেন। ইতি দুর্গাদাসঃ ॥

নিদ ইর য ঞা স্নিহি। ইতি কবিকল্পদ্রুমঃ ॥ ইর অনিদৎ অমেদীৎ। য ইতি ব্যাখ্যানশীলো হসৌ মহাকাযো নমেদ্যতীতি হলাযুধঃ ॥ ঞা মেদিতং নিন্নং তেন। ইতি দুর্গাদাসঃ ॥

মিদ ঌ ঞা ঞিঙ স্নিহি। ইতি কবিকল্পদ্রুমঃ ॥ ঌ অমিদৎ ঞি মিন্বে। হান্ত ঙ মেদতে। ইতি দুর্গাদাসঃ ॥

মিদ ঋ ঞ বধমেধযোঃ। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অমিমেদৎ। ঞ মেদতি মেদতে শাস্ত্রার্থং শিষ্যো ধার যতীত্যর্থঃ। মিনিদুঃ মিমেদুঃ। ইতি দুর্গাদাসঃ ॥

মিম্মিনঃ ত্রি সানুনাসিকবাগ্বিশিষ্টঃ। খোনা ইতি ভাষা। তস্য নিদানং যথা। আবৃত্য বাযুঃ সকফো ধমনীঃ শব্দ বাহিনীঃ। নরান্ করোত্যক্রিযকান্ মূক মিম্মিন গদ্গদান্ ॥ ইতি মাধবকরঃ ॥ অক্রিযকান্ ইত্যত্রাবচনানিতি চ পাঠঃ। অবচনান্ অত্রেবার্থে নঞ। তেন ঈষদ্বচনান্। স এব বাযুঃ প্রবলশ্চেত্তদা মুকান্ অবচনান। মিম্মিনান্ সানুনাসিকান্। গদ্গদান্ লুপ্তপদব্যঞ্জনাভিধায়িনঃ করোতীত্যন্বযঃ এবাং নানাকারণত্বেপি দুষ্টে কৎকর্যাদিনা অদৃষ্ট বশাদ্ভেদো বোদ্ধব্যঃ ॥ * ॥ অথতেষাং চিকিৎসা। পুষ্টং ঘৃতস্য পলিকৈঃ শিগ্রু বচা লবণ ধাতকীলোধ্রৈঃ। আজে পযসি বিপক্বং সিদ্ধং সারস্বতং নাম্না ॥ বিধিবদুপযুজ্যমানং জড গদ্গদ মূকতাং ক্ষণাৎ জিত্বা। স্মৃতি মতি মেধা প্রতিভাঃ স্বর্য্যাৎ সংস্পৃষ্ট বাগ্বর্ত্তি ॥ সারস্বতঘৃতং ॥ সহরিদ্রা বচা কুষ্ঠং বিপ্পলী বিশ্বভেষজং। অজাজী চাজমোদা চ যষ্টীমধুক সৈন্ধবং ॥ এতানি সমভাগানি সূক্ষ্ম চূর্ণানি

কারয়েৎ। তচ্চূর্ণং সর্পিষে নোড্য পর্ত্যহং ভক্ষয়েন্নরঃ॥ একবিংশতি মাত্রেণ ভবেচ্ছ্রুতিধরো নরঃ। মেঘ দুন্দুভি নির্ঘোষো মত্ত কোকিল নিস্বনঃ॥ ইতি ভাবপ্রকাশঃ॥

ল শ ঞ শ্লিষি। ইতি কবিকল্পদ্রুমঃ॥ শ্লিষি সম্বন্ধীভাবে। শ ঞ মিলতি মিলতে লতা বৃক্ষেণ। অযং ঘটাদি রিতি রমানাথ চন্দ্রঃ। তেন কাল নিলয মিলনেন গরল রব কলয়তি মলয় সমীরং। ইতি জয়দেবঃ। মিলিত্যন্তি। মহাপাতকিনঃ পঞ্চ মিলিতব্যং নতৈঃ সহ। ইতিচ। ইতি দুর্গাদাসঃ॥

মিলিতঃ ত্রি শ্লিষ্টঃ। সম্বন্ধবিশিষ্টঃ। যুক্তঃ। মিলধাতোঃ কর্ত্তরি ক্ত প্রত্যযেন নিষ্পন্নঃ॥

মিব ই সেকে। ইতি কবিকল্পদ্রুমঃ॥ ই মিন্বতি। ইতি দুর্গাদাসঃ॥

মিশ ধ্বনৌ॥ কোপে। ইতি কবিকল্পদ্রুমঃ॥ মেশতি। ইতি দুর্গাদাসঃ॥

মিশিঃ স্ত্রী মধুরিকা॥ শতপুষ্পা॥ ইত্যমর টীকায়াং ভরতঃ॥ জটামাংসী। ইতি শব্দরত্নাবলী॥

মিশী স্ত্রী জটামাংসী। ইতি শব্দরত্নাবলী॥ মধুরিকা। ইত্যমর টীকাযাং ভরতঃ॥

মিশ্র ত ক যুত্যাং। ইতি কবিকল্পদ্রুমঃ॥ তালব্য মধ্যো হযং। দন্ত্য মধ্য ইতি বর্ণদেশনাযাং। যুতিঃ সংযোজনং। মিশ্রযতি মিশ্রাপযিতি ঘৃতেনান্নং লোকঃ। ইতি দুর্গাদাসঃ॥

মিশ্রং ক্লী চানক্যমূলকং। ইতি রাজনিঘণ্টঃ॥ মিশ্রিতং। যথা। কেচিদাহুঃ ক্বচিদ্দেশে যাবত্তু দিন নাডিকাঃ তাবদেবত্রনধ্যাযো ন তস্মিশ্রে দিনান্তরে॥ ইতি তিথ্যাদিতত্ত্বং॥

মিশ্রঃ পুং গজজাতিবিশেষঃ। যথা। ভদ্রো মন্দ্রো মৃগো মিশ্র শ্চতস্রো গজজাতযঃ। ইতি হেমচন্দ্রঃ॥ শ্রেষ্ঠঃ। যথা। গৌরবিতা স্ত্বার্য্য মিশ্রাঃ। ইতি ভূরিপ্রযোগঃ॥ সংযুক্তে ত্রি। যথা। কররুঃ করবো মিশ্রঃ সংপৃক্তঃ খচিতঃ সমাঃ। ইতি হেমচন্দ্রঃ॥ উগ্রাদি সপ্তগণান্তর্গত সপ্তমগণঃ। স তু কৃত্তিকা বিশাখাভ্যাং ভবতি। ইতিজ্যোতিযতত্ত্বং॥

মিশ্রকং ক্লী দেবোদ্যানং। ইতি জটাধরঃ॥ ঔষরলবণং। ইতি রাজনির্ঘণ্টঃ॥

মিশ্রকাবনং ক্লী ইন্দ্রস্যোদ্যানং। যথা। নন্দনং কন্দসারং স্যান্মিশ্রকাবন মিত্যপি। ইতি ত্রিকাণ্ডশেষঃ॥

নিশ্রুক্ঃ পুং খেসরঃ। ইতি রাজনির্ঘণ্টঃ॥

নিশ্রণং ক্লী সংযোজনং। একত্রীকরণং। নিশ্রধাতোর্ভাবে ল্যট্ প্রত্যয়েন নিষ্পন্নং॥

নিশ্রপুষ্পা স্ত্রী মেথিকা। ইতি রাজনির্ঘণ্টঃ॥

নিশ্রবর্ণং ক্লী কৃষ্ণাগুরু। ইতি রাজনির্ঘণ্টঃ॥ নানাবর্ণযুক্তে ত্রি॥

নিশ্রবর্ণফলা স্ত্রী বার্ত্তাকী। ইতি রাজনির্ঘণ্টঃ॥

নিশ্রশব্দঃ পুং খেসরঃ। ইতি রাজনির্ঘণ্টঃ॥

নিশ্রিতং ত্রি গৌরবিতং। ইতি জটাধরঃ॥ মিলিতঞ্চ॥

নিশ্রিতা স্ত্রী নন্দাদিসপ্তধাসংক্রান্ত্যন্তর্গত সংক্রান্তিবিশেষঃ। যথা। মন্দা ধ্রুবেষু বিজ্ঞেয়া মৃদৌ নন্দাকিনী তথা। ক্ষিপ্রে ধ্বাঙ্ক্ষীং বিজানীয়াদুগ্রে ঘোরা প্রকীর্ত্তিতা॥ চরৈর্মহোদরী জ্ঞেয়া ক্রূরে খ্যৈন্দ্রেস্ত রাক্ষসী। নিশ্রিতা চৈব বিজ্ঞেয়া নিশ্রিতর্ক্ষৈস্ত সংক্রমে॥ ইতি তিথ্যাদিতত্ত্বং॥

নিশ্রেয়া স্ত্রী মধুরিকা। মৌরি ইতি ভাষা। ইত্যমরঃ॥ নিশ্রেয়া সরসা পেয়া ত্বয়াহা স্কন্দবন্ধনা। ইতি শব্দচন্দ্রিকা চ॥ শতপুষ্পা। সুলফা ইতি ভাষা। তৎপর্য্যায়ঃ। তালপর্ণী ২ ভালপর্ণী ৩ মিষিঃ ৪ শালেয়া ৫ শীতশিবা ৬ শালীনা ৭ বনজা ৮ অবাক্পুষ্পী ৯ মধুরিকা ১০ ছত্রা ১১ সংহিতপুষ্পিকা ১২ সুপুষ্পা ১৩ সরলা ১৪ বল্যা ১৫। অস্যা গুণাঃ। মধুরত্বং। স্নিগ্ধত্বং। কটুত্বং। পরম কফ হরত্বং। বাত পিত্তোত্থদোষ প্লীহ জন্তুবিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

নিষ উ সেচনে। ইতি কবিকল্পদ্রুমঃ॥ উ নেষিত্বা নিষ্ট্বা। ইতি দুর্গাদাসঃ॥

নিষ শ স্পর্দ্ধে। ইতি কবিকল্পদ্রুমঃ॥ স্পর্দ্ধা পরাভিভবেচ্ছা। ইতি বোপদেবঃ। শ নিষতি বলী বলবন্তং। ইতি দুর্গাদাসঃ॥

নিষং ক্লী ছলং। ইতি মেদিনী॥

নিষঃ পুং স্পর্দ্ধনং। ইতি মেদিনী॥

নিষিঃ স্ত্রী জটামাংসী। ইতি শব্দরত্নাবলী॥ মধুরিকা। ইতি শব্দচন্দ্রিকা॥ শতপুষ্পা। ইত্যমরটীকায়াং ভরতঃ॥

নিষিকা স্ত্রী জটামাংসী। ইতি শব্দরত্নাবলী॥

নিষ্টং ত্রি সিক্তং॥ স্পর্দ্ধিতং। ইতি নিষধাতোঃ ক্ত প্রত্যয়েন নিষ্পন্নং॥

মিষ্টঃ পুং মধুররসঃ। যথা। মিষ্টঃ পটুশ্চ মধুর মম্লে ৎম্লং পচ্যতে রসঃ। কটু তিক্ত কষায়াণাং পাকঃ স্যাৎ প্রায়শঃ কটুঃ। ইতি ভাবপ্রকাশঃ॥ নূতন সর্ষপশাকং নবৌদনং পিচ্ছিলানিচ দধীনি। অল্পব্যয়েন সুন্দরি গ্রাম্যজনো মিষ্টমশ্নাতি॥ ইতি ছন্দোমঞ্জরী চ॥

মিষ্টান্নং ক্লী মধুরদ্রব্যং। ইতি হলায়ুধঃ॥ অপিচ। মিষ্টান্ন পান দাতা চ স তত্তং শুদ্ধযান্বিতঃ। দেবপূজা পরো নিত্যং নপ্রেতো জায়তে মৃতঃ॥ ইত্যাগ্নিপুরাণং॥

মিসিঃ স্ত্রী মধুরিকা॥ জটামাংসী। মিসী শতপুষ্পা। ইত্যমরভরতৌ॥ উশীরী। ইতি রাজনির্ঘণ্টঃ॥ অজমোদা। ইতি মেদিনী॥

মিস্তু ক বৃত্যাং। ইতি কবিকল্পদ্রুমঃ॥ তালব্য মধ্যো হয়ং। দন্ত্যমধ্য ইতি বর্ণদেশনায়াং। যুতিঃ সংযোজনং। মিস্সুযতি মিস্সাপযতি ঘৃতেনান্নং লোকঃ। ইতি দুর্গাদাসঃ॥

মিহ ঔ সেচনে। ইতি কবিকল্পদ্রুম॥ ঔ অমিক্ষৎ। ইতি দুর্গাদাসঃ॥

মিহিকা স্ত্রী নীহারঃ। ইতি শব্দরত্নাবলী॥

মিহিরঃ পুং সূর্য্যঃ॥ অর্কবৃক্ষঃ। ইত্যমরঃ॥ বৃদ্ধঃ। ইতি মেদিনী শব্দরত্নাবল্যৌ॥ মেঘঃ। ইতি হেমচন্দ্রঃ॥ বায়ুঃ॥ চন্দ্রঃ। ইতি নানার্থরত্নমালা॥ বিক্রমাদিত্যভূপস্য নবরত্নান্তর্গত রত্নবিশেষঃ। যথা। ধন্বন্তরি ক্ষপণকামরসিংহ শঙ্কু বেতালভট্ট ঘটকর্পর কালিদাসাঃ। খ্যাতো বরাহ মিহিরো নৃপতেঃ সভায়াং রত্নানি বৈ বররুচি র্নব-বিক্রমস্য॥ ইতি নবরত্নং॥

মিহিরাণঃ পুং শিবঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মী ঙয বধে। ইতি কবিকল্পদ্রুমঃ॥ ঙ য মীযতে। ইতি দুর্গাদাসঃ॥

মী ঞ গ বধে। ইতি কবিকল্পদ্রুমঃ॥ ঞ মীনঃ। গ এ মীনাতি মীনীতে। ইতি দুর্গাদাসঃ॥

মী কি গত্যাং॥ মত্যাং। ইতি কবিকল্পদ্রুমঃ॥ কি মাযযতি মযতি। ইতি দুর্গাদাসঃ॥

মীঢ়ং ত্রি মূত্রিতং। ইত্যমরঃ॥ দ্বে কৃতমূত্রোৎসর্গে। মিহো সিচি মূত্রক প্রস্রাবে আভ্যাং ধাত্বর্থেনোপসংগ্রহাদকর্ম্মকত্বাৎ কর্ত্তরি ক্তঃ। ইতি ভরতঃ॥

মীঢ়ুষ্টমঃ পুং শিবঃ। যথা। তদা সর্ব্বাণি ভূতানি শ্রুত্বা মীঢ়ুষ্টমোদিতং।

পরিতুষ্টাস্তভিস্তাতসাধ্বসাধ্বিত্য-
থা ব্রুবন্ ॥ ইতি শ্রীমদ্ভাগবতে ৪
স্কন্ধে ৬ অধ্যায়ঃ ॥ মীঢুষ্টমঃ শিব
স্তেনোক্তং। ইতি শ্রীধরস্বামী ॥

ান্ পুং শিবঃ। যথা। ততো-
মীঢ্বাংস মামন্ত্র্য সুনাসীরাঃ সহ-
র্ষিভিঃ। ভূয় স্তদ্দেব যজনং সমীঢ়্দ্ব
প্রসো যযুঃ ॥ ইতি শ্রীমদ্ভাগবতে
৪ স্কন্ধে ৬ অধ্যায়ঃ ॥ মীঢ্বাংসং শি-
বং মীঢ়ুষা বেধসা চ বর্ত্তমানাঃ।
ইতি শ্রীধরস্বামী ॥

মীনঃ পুং মৎস্যঃ। ইত্যমরঃ॥ মে-
ষাদিদ্বাদশরাশ্যন্তর্গতান্তিমরাশিঃ
। তৎপর্য্যায়ঃ। অন্ত্যভং ২। স চ
পূর্ব্বভাদ্রপদাশেষপাদোত্তরভাদ্র-
পদা রেবতী সমুদায়েন ভবতি।
অস্যাধিষ্ঠাতৃদেবতাস্ত্রীমৎস্যদ্বয়ং
। স চ কীটসংজ্ঞঃ। জলজঃ। সৌম্যঃ
। অঙ্গনা। যুগ্মঃ। সমঃ। দ্ব্যাত্মকঃ।
ভক্ষ্যঃ। উত্তরদিঙ্নাথঃ। গুরুক্ষে-
ত্রং। দিনাত্মকশ্চ। ইতি জ্যোতি-
স্তত্ত্বং ॥ অপিচ। শীর্ষপৃষ্ঠোদয়ঃ।
চরণরহিতঃ। কফপ্রকৃতিঃ। জল-
চারী। নিঃশব্দঃ। পিঙ্গলবর্ণঃ। স্নি-
গ্ধঃ। অত্যন্তস্ত্রীসঙ্গঃ। বহুসন্তানঃ।
ব্রাহ্মণবর্ণঃ। শ্লথাঙ্গশ্চ ॥ তত্র জাতঃ
অতিক্রোধনঃ। শীঘ্রগতিঃ। অশুচি

। কর্ম্মভোগী। প্রচুরবিবাহশ্চ ভ-
বতি। ইতি বৃহজ্জাতকাদয়ঃ॥ অ-
পিচ। মীনলগ্নে সমুৎপন্নো রত্নকা-
ঞ্চনপূরিতঃ। অল্পরোমা মহাপ্রাজ্ঞো
দীর্ঘকাল পরীক্ষকঃ॥ ইতি কো-
ষ্ঠীপ্রদীপঃ॥*॥ রাত্রৌতল্লগ্ন নিরূ-
পণং যথা। সূর্পাকার তারা চতুষ্ট-
যাত্মক পূর্ব্বাষাঢ়া নক্ষত্রে মস্তকো-
পরি দৃষ্টে সতি মীনলগ্নস্য ১।৪৯
ঊনপঞ্চাশৎ পলাধিকৈক দণ্ডো
ভবতি। প্রকারান্তরে। সূর্পাকৃতি
তারাচতুষ্টয়াত্মকোত্তরাষাঢ়া নক্ষ-
ত্রে মস্তকোপরি উদিতে সতি মীন
লগ্নস্য ২।৩৬ ষট্ত্রিংশৎপলাধিক
দণ্ডদ্বয়ং ভবতি। যথা। সূর্পমূর্ত্তিনি
শিরোগতে চতুস্তারকে করিকরো-
রু বারিভে। অন্ত্য ভাদমৃত বাণি
নির্গতাঃ খেচরাম্বর শশাঙ্ক লি-
প্তিকাঃ॥ দং ১।৪৯॥ শীর্ষভাজিভ
চতুষ্টয়াঙ্কিতে বিশ্বভে তরুণি সূ-
র্পকাকৃতৌ। ভূ তিরস্কৃত মনোজ-
কার্ম্মুকে যান্তি কাল তিথি লিপ্তি-
কা ঝসাৎ ॥ দং ২।৩৬ ॥ ইতি
কালিদাসকৃত রাত্রিলগ্ন নিরূপণং
॥ * ॥ ভগবদ্দশাবতারান্তর্গত
প্রথমাবতারঃ। যথা। শেতে স
চিত্তশয়নে মম মীন কূর্ম্ম কোলো

হভূবয়হুরি বামন জামদগ্ন্যঃ। যো ভূদ্ব ভূব ভরতাগ্রজ কৃষ্ণ বুদ্ধঃ কল্কী সত্তাঞ্চ ভবিতাপ্যহৃরিষ্যতে হরীন্ ॥ ইতি মুগ্ধবোধব্যাকরণং ॥ অস্য বিবরণং মৎস্য শব্দে দ্রষ্টব্যং ॥ ॥ বিশেষ স্তুত্র কথ্যতে। প্রকৃতি বিষ্ণুরূপা চ পুংরূপশ্চ মহেশ্বরঃ। এবং প্রকৃতি ভেদেন ভেদাস্তু প্রকৃতের্দ্দশ ॥ কৃষ্ণরূপা কালিকা স্যাদ্রামরূপা চ তারিণী। বগলা কূর্ম্মমূর্ত্তিঃ স্যান্মীনো ধূমাবতী ভবেৎ ॥ ছিন্নমস্তা নৃসিংহঃস্যাদ্বরাহশ্চৈব ভৈরবী। সুন্দরী জামদগ্ন্যঃ স্যাদ্বামনো ভুবনেশ্বরী ॥ কমলা বৌদ্ধরূপাস্যাৎ মাতঙ্গী কল্কিরূপিণী। স্বয়ং ভগবতী কালী কৃষ্ণস্তু ভগবান্ স্বয়ং ॥ স্বয়ঞ্চ ভগবান্ কৃষ্ণঃ কালীরূপো ভবেদ্ব্রজে। দুর্গা স্যাৎ কল্কিরূপিণীতি পাঠান্তরং। ইতি মুণ্ডমালাতন্ত্রং ॥

মীনকেতনঃ পুং কন্দর্পঃ। ইত্যমরঃ॥

মীনগোধিকা স্ত্রী জলাশয়ঃ। যথা। পল্বলং দীর্ঘিকাবাপী যষ্টিকামীনগোধিকা। ইতি ত্রিকাণ্ডশেষঃ ॥

মীনঘাতী [ন] পুং বকঃ। ইতি রাজনির্ঘণ্টঃ॥ মৎস্যঘাতকে ত্রি ॥

মীননেত্রা স্ত্রী গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ ॥

মীনরঃ পুং হাঙ্গরঃ। হাঙ্গর ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

মীনরঙ্কঃ পুং মৎস্যাশনপক্ষী। মাচরাঙ্গা ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ ক্বচিৎপুস্তকে মৎস্যরঙ্গ ইত্যপি পাঠঃ ॥

মীনা স্ত্রী উষাকন্যা। সা তু কস্যপভার্য্যা। যথা। উষাযাস্তু প্রবক্ষ্যামি সর্গং পঞ্চ সুতা স্ততঃ। মীনা মেনা তথা বৃত্তা অনুবৃত্তা তথৈব চ ॥ পরিবৃত্তা চ বিজ্ঞেয়া ভার্য্যাঞ্চ শৃণুত প্রজাঃ। ইতি বহ্নিপুরাণং ॥

মীনাণ্ডী স্ত্রী শর্করা। ইতি রাজনির্ঘণ্টঃ ॥

মীনাম্নীণঃ পুং দদুরান্নঃ॥ খঞ্জনঃ। ইতি মেদিনী ॥

মীনালয়ঃ পুং সমুদ্রঃ। ইতি ধনঞ্জয়ঃ ॥

মীনাক্ষী স্ত্রী মৎস্যাক্ষী॥ গণ্ডদূর্ব্বা। ইতি রাজনির্ঘণ্টঃ॥ কুবেরকন্যা। ইতি পুরাণং ॥

মীন ঋ শব্দে॥ গতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অমিমীনৎ। ইতি দুর্গাদাসঃ ॥

মীমাংসকঃ পুং মীমাংসাশাস্ত্রবেত্তা। তৎপর্য্যায়ঃ। সিদ্ধান্তী ২। ইতি

জটাধরঃ ॥ পূর্ব্বমীমাংসা সূত্রকর্ত্তা জৈমিনিঃ। বৃত্তিকর্ত্তা কুমারভট্টঃ। ভাষ্যকর্ত্তা শবরস্বামী। প্রভাকরঃ কুমারভট্টস্য ছাত্রঃ। স এব গুরুত্বেন ভণ্যতে। তম্মতং গুরুমতং। তচ্ছিষ্যাঃ প্রাভাকরাঃ। অত এব স্মার্ত্তভট্টাচার্য্যেণ প্রাভাকরৈরভিহিত মিত্যুক্তং॥ উত্তরমীমাংসাসূত্রকর্ত্তা বেদব্যাসঃ। তস্য ভাষ্যকর্ত্তা শঙ্করাচার্য্যঃ। স চ অদ্বৈতবাদী। রামানুজঃ দ্বৈতবাদী। মাধ্বঃ বিশিষ্টাদ্বৈতবাদী চ ॥

মীমাংসা স্ত্রী ষড়্দর্শনান্তর্গতদর্শন শাস্ত্রবিশেষঃ। তৎপর্য্যায়ঃ। বিচারণা২। ইতি হেমচন্দ্রঃ॥ অস্যা অধ্যায়া বিংশতিঃ। তত্র পূর্ব্বমীমাংসা দ্বাদশাধ্যায়াত্মিকা জৈমিনি প্রণীতা যজ্ঞাদিকর্ম্মকাণ্ড নিরূপিকা। অস্যা অন্তর্গতানি লোক ব্যবহার নিয়মার্থং মনু যাজ্ঞবল্ক্যাদিভি বহূনি ধর্ম্মশাস্ত্রাণি কৃতানি॥ তত্রোত্তরমীমাংসা চতুরধ্যায়াত্মিকা বেদব্যাসপ্রণীতা ব্রহ্মনিরূপিকা। অস্যা নাম বেদান্তঃ। অপরাধ্যায় চতুষ্টয়ং শঙ্কর্ষণ প্রণীতং উপাসনাকাণ্ডং ষড়্দর্শনবহির্ভূতং॥*॥ প্রমাণাদয়ঃ প্রসঙ্গান্তা দ্বাদশ পদার্থাঃ ক্রমাৎ দ্বাদশানামধ্যায়ানাং বিষয়াঃ। প্রথমে হধ্যায়ে বিধ্যর্থবাদাদিরূপং ধর্ম্মে প্রমাণং নিরূপিতং। ১। দ্বীতীয়ে যাগ দানাদিকর্ম্মভেদঃ। ২। তৃতীয়ে প্রযাজাদীনাং দর্শপূর্ণমাসার্থকত্বেন তচ্ছেষত্বং। ৩। চতুর্থে গোদোহনস্য পুরুষার্থত্ব প্রযুক্ত্যা অনুষ্ঠানং নতু ক্রত্বর্থত্ব প্রযুক্ত্যেত্যেব মাদয়ঃ। ৪। পঞ্চমে ক্রম নিয়তি বিধেয়ত্বাদয়ঃ। ৫। ষষ্ঠে ক্রত্বধিকারো নান্ধাদে রিত্যাদয়ঃ। ৬। সপ্তমে সমান মিতরচ্ছেনেনেত্যাদি প্রত্যক্ষ বচনেনাগ্নিহোত্রাদিনাম্নানুমিত বচনেন চ সামান্যতো হতিদেশঃ। ৭। অষ্টমে সৌর্য্যং চরুং নির্ব্বপেদিত্যত্র নির্ব্বাপ শ্রুতিতেন দেবতা নির্দ্দেশঃ একদৈব তত্ত্ব মৌষধ দ্রব্যকত্ব মিত্যাদিনা লিঙ্গেনাগ্নেয় পুরোডাশেতিকর্ত্তব্যতা নান্যস্যেত্যেব মাদি বিশেষাতিদেশঃ। ৮। নবমে প্রকৃতাবগ্নয়ে যুষ্টং নির্ব্বপামীতি পঠিতে মন্ত্রে বিকৃতৌ সৌর্য্য চরাবগ্নিপদ পরিত্যাগেন সূর্য্যপদ প্রক্ষেপেণ সূর্য্যায়যুষ্টং নির্ব্বাপামীত্যেব মাদিরূহঃ। ৯। দশমে কৃষ্ণলেষু চোদক প্রাপ্তস্যাবঘাতস্য বিতুষীকরণাসম্ভবেন লোপ ইত্যেব মাদি বাধঃ। ১০।

একাদশে বহুনামায়োগীনাং প্ৰথমানাং সকৃদনুষ্ঠিতেন প্রযাজাদ্যঙ্গেনোপকার ইত্যাদি তত্ৰং । ১১ । দ্বাদশে প্রধানস্য পশোঃ ক পকারাবানুষ্ঠিতেন প্রযাজাদ্যঙ্গেন পশ্বঙ্গ পুরোডাশে হপ্যুপকার ইত্যাদি প্রসঙ্গঃ । ১২ । ইত্যধিকরণমালা ॥

পুং সমুদ্রঃ । ইত্যণাদিকোষঃ ॥ পর্ব্বতৈকদেশঃ ॥ সীমা ॥ পানীয়ং । ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মীল ঙ্ক নিমেষে । ইতি কবিকল্পদ্রুমঃ ॥ ঙ্ক অমিমীলৎ অমীমিলৎ । মীলতি চক্ষুঃ পক্ষ্মভি রাবৃতং স্যাদিত্যর্থঃ । ইতি দুর্গাদাসঃ ॥

মীলং ক্লী বনং । ইতি কেচিৎ ॥

মীলনং ক্লী পক্ষ্মভিরাবরণং । মীল ধাতো র্ভাবে হনট্ প্রত্যয়েন নিষ্পন্নং

মীলিতং ত্রি অপ্রফুল্লং । তৎপর্য্যায়ঃ । সঙ্কুচিতং ২ নিদ্রাণং ৩ মুদ্রিতং ৪ । ইতি হেমচন্দ্রঃ ॥

মীব . পীবে । ইতি কবিকল্পদ্রুমঃ ॥ মীবতি । পীবঃ স্থূলীভাবঃ । ইতি দুর্গাদাসঃ ॥

মীবরঃ ত্রি হিংস্রঃ । ইত্যণাদিকোষঃ ॥ সেনানী ॥ পূজ্যঃ । ইতি সংক্ষিপ্ত সারোণাদিবৃত্তিঃ ॥

মীবা পুং বায়ুঃ । ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

মীবা স্ত্রী উদরকৃমিঃ । ইত্যণাদিকোষঃ ॥ শীকরঃ ॥ সারঃ । ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মুঃ পুং বন্ধনং । ইত্যেকাক্ষরকোষঃ ॥ মহেশঃ । ইতি হদ্ভচন্দ্রঃ ॥

মুকন্দকঃ পুং পলাণ্ডুঃ । কেচিত্তু মুকন্দকস্থানে মুকুন্দক ইতি পঠিত্বা জবনানাং মুদং হর্ষং প্রাণেণ কন্দতি আহ্বয়তি কদি আহ্বানে রোদনেচ ণকঃ পৃষোদরাদিত্বাৎ দলুক্ মুকুন্দক ইতি ব্যাচক্ষতে । ইত্যমর টীকায়াং ভরতঃ ॥

মুঙ্গঃ পুং মুক্তিঃ । যথা । মুঙ্গ মুক্তৌ মহেশে মুঃ ঙঃ পৃথিব্যা মশোভনে । ইতি দুর্গাদাসধৃত হদ্ভচন্দ্রঃ ॥

মুকুটং ক্লী স্বনামখ্যাতশিরোভূষণং । তৎপর্য্যায়ঃ ১ কিরীটং ২ । ইত্যমরঃ ॥ মৌলিঃ ৩ কোটীরং ৪ উষ্ণীষং ৫ । ইতি হেমচন্দ্রঃ ॥

মুক্তী স্ত্রী অঙ্গুলিমোটনং । ইতি শব্দরত্নাবলী ॥

মুকুন্দঃ পুং বিষ্ণুঃ । তস্য ব্যুৎপত্তির্যথা । মুঙ্গ মব্যয় নাহুঙ্ক নির্ব্বাণ মোক্ষ বাচকং । তদ্দদাতিচ যোদে-

বো মুঙ্গন্দ স্তেন কীর্ত্তিতঃ ॥ মুঙ্গং ভক্তিরস প্রেমবচনং বেদ সম্মতং। য স্তদ্দদাতি বিপ্রেভ্যো মুঙ্গন্দ স্তেন কীর্ত্তিতঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১০ অধ্যায়ঃ॥ নিধিবিশেষঃ॥ রত্নভেদঃ॥ অন্দুকঃ। ইতি মেদিনী॥ পারদঃ। ইতি হেমচন্দ্রঃ॥

মুঙ্গন্দকঃ পুং পলাণ্ডুঃ। কেচিচ্চ সুকন্দকস্থানে মুঙ্গন্দক ইতি পঠিত্বা জবনানাং মুদং কন্দতীতি পৃষোদরাদিত্বাৎ দলুক্ কন্দে রত উচ্চেতি ব্যাচক্ষতে। ইত্যমরটীকাযাং ভরতঃ॥ ষষ্টি কব্রীহিঃ। যথা। ষষ্টিকঃ শতপুষ্পশ্চ প্রমোদক মুঙ্গন্দকৌ। মহাষষ্টিক ইত্যাদ্যাঃ ষষ্টিকাঃ সমুদাহৃতাঃ॥ ইতি ভাবপ্রকাশঃ॥

মুঙ্গন্দুঃ পুং অন্দুকঃ। ইত্যমর টীকাযাং মথুরানাথঃ॥

মুঙ্গম্ ব্যং নির্ব্বাণং॥ ভক্তিরসঃ॥ প্রেম। যথা। মুঙ্গ মব্যয মাস্তঞ্চ নির্ব্বাণমোক্ষ বাচকং। তদ্দদাতি চ যো দেবো মঙ্গন্দ স্তেন কীর্ত্তিতঃ॥ মুঙ্গং ভক্তিরস প্রেম বচনং বেদ সম্মতং। য স্তদ্দদাতি বিপ্রেভ্যো মুঙ্গন্দ স্তেন কীর্ত্তিতঃ। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১০ অধ্যাযঃ॥

মুঙ্গরঃ পুং দর্পণঃ॥ বঙ্গলক্রমঃ॥ জলালদণ্ডঃ। ইতি মেদিনী॥ মল্লিকাপুষ্পবৃক্ষঃ। ইতি বিশ্বঃ॥ জলবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ কোরকঃ। ইতি হেমচন্দ্রঃ॥

মুঙ্গলঃ পুং স্ত্রী ঈষদ্বিকসিতকলিকা। তৎপর্য্যাযঃ। অম্লঃ ২। ইত্যমরঃ॥ মঙ্গলঃ ৩। পৌটকোরকঃ ৪। ইতি শব্দরত্নাবলী॥ শরীরং॥ আত্মা। ইতি ধরণিঃ॥

মুঙ্গষ্টঃ পুং বনমুদ্গঃ। তৎপর্য্যাযঃ। মপষ্টঃ২। ইতি রত্নমালা॥ অস্য গুণাঃ। শীতলত্বং। গ্রাহিত্বং। কফ পিত্ত জ্বর নাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

মুঙ্গষ্টকঃ পুং বনমুদ্গঃ। মুগানী ইতি ভাষা। তৎপর্য্যাযঃ। মযষ্টকঃ ২। ইত্যমরঃ॥ মুঙ্গষ্ঠঃ ৩ মযষ্টঃ ৪। ইতি শ্রীধরঃ॥ মপষ্টকঃ ৫। ইত্যন্যে। ইতি ভরতঃ॥ মুদ্গষ্টকঃ ৬। মঙ্গষ্টকঃ ৭। মযুষ্টকঃ ৮। ইতি টীকান্তরং॥

মুকুলকঃ পুং দন্তিবৃক্ষঃ। ইত্যমরটীকাযাং রামাশ্রমঃ॥

মুক্তঃ ত্রি প্রাপ্তমোক্ষঃ॥ মোচিতঃ। ইতি মেদিনী॥ নন্দিতঃ। ইতি

শব্দরত্নাবলী ॥

মুক্তক ক্লী ক্ষেপণীযাস্ত্রং। ইতি কেচিৎ ॥

মুক্তকঞ্চুকঃ পুং অচিরত্যক্তত্বক্‌সর্পঃ। তৎপর্য্যাযঃ। নির্মুক্তঃ ২। ইত্যমরঃ॥ উজ্ঝিতকঞ্চুকে ত্রি ॥

মুক্তচক্ষুঃ পুং সিংহঃ। ইতি শব্দমালা॥ নক্তনেত্রে ত্রি ॥

মুক্তরসা স্ত্রী রাস্না। ইতিরত্নমালা॥ ত্যক্তরসে ত্রি ॥

মুক্তা স্ত্রী রাস্না। ইতি রত্নমালা॥ রত্নবিশেষঃ।মোতী ইতি হিন্দীভাষা। অস্যা অধিষ্ঠাত্রী দেবতা চন্দ্রঃ। ইতি জ্যোতিষং॥ তৎপর্য্যাযঃ। মৌক্তিকং২। ইত্যমরঃ॥ সৌম্যা ৩ শৌক্তিকেযং ৪ তারং ৫ তারা ৬ ভৌতিকং ৭ তৌতিকং ৮ অম্ভঃসারং ৯ শীতলং ১০ নীরজং ১১ নক্ষত্রং ১২ ইন্দুরত্নং ১৩ লক্ষ্মীঃ ১৪ মুক্তাফলং ১৫ বিন্দুফলং ১৬ মুক্তিকা ১৭ শৌক্তেযকং ১৮ শুক্তিমণিঃ ১৯ শশিপ্রভং ২০ স্বচ্ছং ২১ হিমং ২২ হিমবলং ২৩ সুধাংশুভং ২৪ সুধাংশুরত্নং ২৫। লক্ষ্মীস্থানে লক্ষং শশিপ্রভস্থানে শশিপ্রিযং হিমবলস্থানে হেমবতং সুধাংশুভস্থানে ভূরুহং ইতিচ পাঠঃ। ইতি রাজনির্ঘণ্টঃ॥ শৌক্তিকং ২৬। ইতি ভাবপ্রকাশঃ॥ অস্যা গুণাঃ। সারকত্বং। শীতত্বং। কষাযত্বং। স্বাদুত্বং। লেখনত্বং। চক্ষুষ্যত্বঞ্চ॥ তদ্ধারণগুণাঃ। পাপালক্ষ্মী বিনাশিত্বং। ইতি রাজবল্লভঃ॥ বৃষ্যত্বং। বল পুষ্টিদত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ * ॥ অপিচ। মৌক্তিকঞ্চ মধুরং সুশীতলং দৃষ্টিরোগ শমনং বিষাপহং। রাজযক্ষ্মপরিকোপ নাশনং ক্ষীণবীর্য্য বল পুষ্টি বর্দ্ধনং ॥ * ॥ অস্যা লক্ষণং যথা। নক্ষত্রাভং শুদ্ধ মত্যন্ত মুক্তং স্নিগ্ধং স্থূলং নির্ম্মলং নির্ব্রণঞ্চ। ন্যস্তং ধত্তে গৌরবং যত্তুলাযাং তন্নির্মৌল্যং মৌক্তিকং সৌখ্যদাযি॥ * ॥ অস্যা দোষ লক্ষণং যথা। যদ্বিচ্ছাযং মৌক্তিকং ব্যঙ্গকাযং শুক্তিস্পর্শং রক্ততাঞ্চাতিধত্তে। মৎস্যাক্ষ্যক্ষং রূক্ষ মুত্তান নম্রং নৈতদ্ধার্য্যং ধীমতা দোষদাযি ॥ * ॥ অষ্টধা মৌক্তিকং যথা। মাতঙ্গোরগ মীন পোত্রিশিরস স্ত্বক্‌সার শঙ্খাম্বুভৃৎ শুক্তীনা মুদরাচ্চ মৌক্তিকমণিঃ স্পষ্টং ভবত্যষ্টধা ॥ * ॥ মৌক্তিকবিশেষো যথা। ছাযা পাটল নীল পীত ধবলা স্তত্রাপি সামান্যতঃ সপ্তানাং বহুশো নলব্ধি রিতিচেচ্ছৌক্তেযকং

তুল্যং ॥ * ॥ মৌক্তিকপরীক্ষা যথা । লবণক্ষারক্ষোদিনি পাত্রে হজ গোমূত্রপূরিতে ক্ষিপ্তং । মর্দ্দিত মপি শালীতুষৈর্যদবিকৃতং তন্মৌক্তিকং জাত্যং ॥ ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তদুৎপত্তিস্থানানি যথা । শঙ্খো গজশ্চ ক্রোড়শ্চ ফণী মৎস্যশ্চ দর্দ্দুরঃ । বেণুরেতে সমাখ্যাতা স্তজ্জ্ঞৈর্মৌক্তিকযোনয়ঃ ॥ ইতি ভাবপ্রকাশঃ ॥ * ॥ অথ প্রকারান্তরমুক্তাপরীক্ষা । দ্বিপেন্দ্রজীমূত বরাহশঙ্খমৎস্যাহিশুক্ত্যুদ্ভববেণুজানি । মুক্তাফলানি প্রথিতানি লোকে তেষান্তু শুক্ত্যুদ্ভবমেব ভূরি ॥ বেধ্যন্তু শুক্ত্যুদ্ভবমেব তেষাং শেষাণ্যবেধ্যানি বদন্তি তজ্জ্ঞাঃ ॥ মতঙ্গজা যে তু বিশুদ্ধবংশ্যাস্তে মৌক্তিকানাং প্রভবাঃ প্রদিষ্টাঃ ॥ উৎপদ্যতে মৌক্তিকমেষু বৃত্তমাপীতবর্ণং প্রভয়া বিহীনং । বক্ষ্যে গজপরীক্ষায়াং গজজাতিশ্চতুর্ব্বিধা ॥ মৌক্তিকং তেষু জাতং হি চতুর্ব্বিধমুদীর্য্যতে । ব্রাহ্মণং পীতশুক্লন্তু ক্ষত্রিয়ং পীত রক্তকং ॥ পীতশ্যামন্তু বৈশ্যং স্যাৎ শূদ্রং স্যাৎ পীতনীলকং । কাম্বোজজম্বুসম্ভূতং ধাত্রীফলনিভং গুরু ॥ অতিপিঞ্জরসচ্ছায়ং মৌক্তিকং মন্দমীরিতি । ধারাধরেষু জায়েত মৌক্তিকং জলবিন্দুভিঃ ॥ দুর্লভং তন্মনুষ্যাণাং দেবৈস্তৎ হ্রিয়তে হম্বরাৎ । জরুটাণ্ড সমং বৃত্তং মৌক্তিকং নিবিড়ং গুরু ॥ ঘনজং ভানুসঙ্কাশং দেবযোগ্যমমানুষং । * ॥ তথা হি গারুড়ে । নাভ্যেতি মেঘপ্রভবং ধরিত্রীং বিযদ্গতং তদ্বিবুধা হরন্তি । অর্চ্চিঃপ্রভানাবৃতদিগ্বিভাগমাদিত্যবদ্দুঃখবিভাব্য বিম্বং ॥ তেজস্তিরস্কৃত্য হুতাশনেন্দুনক্ষত্রতারা গ্রহসম্ভবঞ্চ । দিবা যথা দীপ্তিকর স্তথৈব তমোবগাঢাস্বপি তমিস্রাসু ॥ বিচিত্ররত্নদ্যুতিচারুতোয চতুঃসমুদ্রা ভবনাভিরামা । মূল্যং নবাস্যাদিতি নিশ্চয়ো মে কৃৎস্না মহী তস্য সুবর্ণপূর্ণা ॥ হীনোপি যস্তল্লভতে কথঞ্চিৎ বিপাকযোগাম্মহতঃ শুভস্য । সপত্নহীনঃ পৃথিবীং সমগ্রাং ভুনক্তি তত্তিষ্ঠতি যাবদেব ॥ নকেবলং তচ্ছুভকৃন্নৃপস্য ভাগ্যৈঃ প্রজানামপি জন্ম তস্য । তদ্যোজনানাং পরিতঃ শতস্য সর্ব্বাননর্থান্ বিমুখী করোতি ॥ জল জ্যোতি র্মরুজ্জানাং দেবানাং ত্রিবিধং ভবেৎ । জলাধিকে হবিকং স্বচ্ছং কোমলং পুরুকান্তিমৎ ॥ জ্যোতিষং কান্তি-

সদ্বৃত্তং দুর্নিরীক্ষং রবিপ্রভং। কান্তিমৎ কোমলং বৃত্তং সাকৃতং বিমলং লঘু ॥ বরাহ দংষ্ট্রা প্রভবং বরিষ্ঠং তস্যৈব দংষ্ট্রাঙ্কুর তুল্য বর্ণং। ক্বচিৎ কথঞ্চিৎ স ভূবঃ প্রদেশে প্রজায়তে শূকর বর্দ্ধরিষ্ঠঃ॥ ব্রহ্মাদি জাতি ভেদেন বরাহোপি চতুর্ব্বিধঃ। তেষু জাতা ভবেন্মুক্তা সমাসেন চতুর্ব্বিধা॥ ব্রাহ্মণঃ শুক্লবর্ণস্তু মৃদুমন্তেংশস্য লক্ষ্যতে। ক্ষত্রিয়ঃ শুক্ল রক্তস্তু স্পর্শে কর্কশ এব চ॥ বৈশ্যঃ স্যাৎ শুক্ল পীতস্তু কোমলঃ কোল সন্নিভঃ। শূদ্রঃ স্যাচ্ছুক্লনীলস্তু কর্কশঃ শ্যাম এব চ॥ তথাচ। কোলজং কোল সদৃশং তদ্দংষ্ট্রা সদৃশ ছবি। অলভ্যং মনুজৈ রম্যং মৌক্তিকং পুণ্য বর্জ্জিতৈঃ॥*॥ যে কম্বরঃ শার্ঙ্গ মুখাবনর্য পীতস্য শঙ্খপ্রবরস্য গোত্রে। স্যান্মৌক্তিকান্যামিহ তেষু জন্ম তল্লক্ষণং সংপ্রতি কীর্ত্তয়ামঃ॥ স্বযোনি মধ্য ছবি তুল্যবর্ণং শঙ্খা বৃহৎকোলফল প্রমাণং। তথা চ। বর্ষোপল সমং দীপ্ত্যা পাঞ্চজন্য কুলোদ্ভবং। কপোতাণ্ড প্রমাণং তদতিকান্তি মনোহরং॥*॥ বিশেষো যথা। অশ্বিন্যাদিষু নক্ষত্রে যে জাতাঃ কম্বরঃ শুভাঃ। মৌক্তিকং তেষু জাতংহি সপ্তবিংশতি ভেদভাক্॥ শুক্লাশুক্লাঃ পীত রক্তা নীলা লোহিত পিঞ্জরাঃ। আকর্ব্বরাঃ পাটলাশ্চ নববর্ণাঃ প্রকীর্ত্তিতাঃ। মহন্মধ্য লঘুস্থানৈঃ সপ্তবিংশতিধা ভবেৎ। ক্রমতস্তেষু বিজ্ঞেয়ং নক্ষত্রেষু মনীষিভিঃ॥*॥ পাঠীন পৃষ্ঠস্য সমানবর্ণং মীনাৎ সুবৃত্তং লঘুনাতি সূক্ষ্মং। উৎপাদ্যতে বারিচরাননেষু মীনাশ্চ তে মধ্যচরাঃ পয়োধেঃ॥ তথাচ। গুঞ্জাফলকান্ হৌল্যং মৌক্তিকং তিমিজং লঘু। পাটলা পদ্মসঙ্কাশ মল্লকান্তি সুবর্ত্তুলং॥ বাত পিত্ত কফ দ্বন্দ্ব সন্নিপাত প্রভেদতঃ। সপ্ত প্রকৃতয়ো মীনে সপ্তধা তেন মৌক্তিকং॥ লঘিষ্ঠ মরুণং বাতাৎ আপীতং মৃদু পিত্ততঃ। শুক্লং গুরু কফোদ্রেকাৎ বাত পিত্তান্মৃদু র্লঘুঃ॥ বাত শ্লেষ্ম ভবং স্থূলং পিত্ত শ্লেষ্মজ মচ্ছকং। সর্ব্বলিঙ্গ প্রযোগেন সান্নিপাতিক মুচ্যতে॥ একজাঃ শুভদা প্রোক্তা স্তথা বৈ সান্নিপাতিকাঃ॥*॥ ভৌজঙ্গমং নীল বিশুদ্ধ বর্ণং সর্ব্বং ভবেৎ প্রজ্বল বর্ণ শোভং। নিতান্ত ধৌত প্রতিকল্প্যমান নিস্ত্রিংশ ধারা সমবর্ণ শোভং॥ ভুজঙ্গমাস্তে বিষবেগ তৃপ্তাঃ শ্রীবাসুকে র্ব্বংশভবাঃ পৃথিব্যাং। ক্বচিৎ কদাচিৎ খলু পুণ্য

দেশে তিষ্ঠন্তিতে পশ্যতি তান্মনুষ্যঃ ॥ ফণিজং বর্ত্তুলং রম্যং নীলছায়ং মহাদ্যুতি। পুণ্যহীনা ন পশ্যন্তি বাসুকেঃ কুল সম্ভবং ॥ শৃগালকো-মোমল কোল গুঞ্জা ফল প্রমাণাস্তু চতুর্ব্বিধাস্তে। সুব্রহ্মবাহূদ্ভব বৈশ্য শূদ্র সর্পেষু জাতাঃ প্রবরাস্তু সর্ব্বে ॥ প্রাপ্যাপি রত্নানি ধনং শ্রিযম্বা রাজ শ্রিযম্বা মহতীং দুরাপাং। তেজো-ন্বিতাঃ পুণ্যকৃতো ভবন্তি মুক্তাফল-স্যাস্য বিধারণেন ॥ জিজ্ঞাসযা রত্ন-বিনিশ্চযজ্ঞৈঃ শুভে মুহূর্ত্তে পণ্ডিতৈঃ প্রযত্নাৎ। রক্ষা বিধানং সুমহদ্বিধায হর্ম্ম্যোপবিষ্টং ক্রিযতে যদা তৎ॥তদা মহদ্দুন্দুভি তূর্য্য ঘোষৈ র্ঘনৈ র্ঘনৈ র্নাদ্রিযতে হস্তরীক্ষং॥ন তং ভুজঙ্গা ন চ যাতুধানা ন রাক্ষসা নাপিচ দুষ্ট লোকাঃ। হিংসন্তি যস্যাহি শিরঃ স-মুখং মুক্তাফলং তিষ্ঠতি কোষমধ্যে ॥ * ॥ ভেকাদিষ্বপি জাযন্তে মণযো যেকৃচিৎ কৃচিৎ। ভৌজঙ্গম মণেস্তু ল্যাস্তে বিজ্ঞেযা বধোত্তমৈঃ ॥ নক্ষত্র মালেব দিবো বিশীর্ণা দন্তাবলী তস্য মহাসুরস্য। বিচিত্র রূপেষ বিচিত্র-বর্ণা পযঃসুপত্যুঃ পযসাং পপাত ॥ সম্পূর্ণ চন্দ্রাংশু কলাপ কান্তে র্মণি প্রবেকস্য মহাগুণস্য। তচ্ছুক্তিমৎ-সুস্থিতি মাপবীজ মাক্ষ্মন পুরাপ্যন্য ভবানি যানি ॥ যস্মিন্ প্রদেশেহম্বুনি ধৌ পপাত সুচারু মুক্তা মণি রত্নবী-জং। তস্মিন্ পয স্তোয ধরাবকীর্ণং শুক্তৌ স্থিতং মৌক্তিকতা মবাপ॥*॥ সৈংহলিক পারলৌকিক সৌরাষ্ট্রিক তাম্রপর্ণ পারসবাঃ। কৌবের পাণ্ড্য বিরাট মুক্তা ইত্যাকরাশ্চাষ্টৌ॥স্বা-ত্যাং স্থিতে রবৌ মেঘৈ র্যে মুক্তা জল বিন্দবঃ। শীর্ণাঃ শুক্তিষু জাযন্তে তৈ-র্মুক্তা নির্ম্মলত্বিষঃ॥স্থূলা মধ্যা স্তথা সূক্ষ্মা বিন্দুমানানুসারতঃ। সুস্নিগ্ধ মধুরছায়ং মৌক্তিকং সিংহলোদ্ভবং ॥ পারলৌকিক সম্ভূতং মৌক্তিকং নিবিড়ং গুরু। সৌরাষ্ট্রিক ভবং স্থূলং বৃত্তং স্বচ্ছং সিতং ঘনং॥ তাম্র-পর্ণ ভবং তাম্রং পীতং পারসবোদ্ভ-বং।ঈষৎশ্যামঞ্চ কৃষ্ণঞ্চ কৌবেরো-দ্ভব মৌক্তিকং ॥ পাণ্ড্যদেশোদ্ভ-বং পাণ্ডু সিতং কৃষ্ণং বিরাটজং। রুক্মিণ্যাখ্যা তু যা শুক্তি স্তৎ প্রসূ-তিঃ সুদুর্লভা॥তত্র জাতং সিতং স্বচ্ছং জাতীফল সমং বরং। ছাযাবদ্বহুলং রম্যং নির্দ্দোষং যদি লভ্যতে ॥ অমূ-ল্যং তদ্বিনির্দ্দিষ্টং রত্নলক্ষণকোবি-দৈঃ। দুর্লভং নৃপযোগ্যং স্যাদল্পভা-গ্যৈ র্ন লভ্যতে ॥ * ॥ অন্যত্রাপি।

সর্ব্বস্য তস্যাকরজা বিশেষাৎ রূপ প্রভাবেণ চ যথৈব বিদ্বান্। নহি ব্যবস্থাস্তি গুণাগুণেষু সর্ব্বত্র সর্ব্বাকৃতযো ভবন্তি॥ ব্রহ্মাদি জাতিভেদেন শুক্তয়োপি চতুর্ব্বিধাঃ। তাসু সর্ব্বাসু জাতংহি মৌক্তিকং স্যাচ্চতুর্ব্বিধং॥ ব্রাহ্মণস্তু সিতঃ স্বচ্ছোগুরুঃ শুক্লঃপ্রভান্বিতঃ। আরক্তঃ ক্ষত্রিয়ঃ স্থূল স্তথারূণ বিভান্বিতঃ॥ বৈশ্যস্ত্বাপীতবর্ণোপি স্নিগ্ধঃ শ্বেতঃ প্রভান্বিতঃ। শূদ্রঃ শুক্ল বপুঃ সূক্ষ্ম স্তথা স্থূলো হসিতদ্যুতিঃ॥*॥ বর্ষোপলানাং সমবর্ণ শোভং ত্বক্সার মধ্য প্রভবং প্রদিষ্টং। তে বেণবো দিব্যজনোপভোগ্যে স্থানে প্ররোহন্তি ন সর্ব্বজন্যে॥ বংশজং শশিসঙ্কাশং কঙ্কোলী ফল মাদ্রকং। প্রাপ্যতে বহুভিঃ পুণ্যৈ স্তদ্দক্ষ্যং বেদ মন্ত্রতঃ॥ পঞ্চ ভূত সমুদ্রেকাদ্বংশে পঞ্চবিধে ভবেৎ। মুক্তা পঞ্চবিধা তাসাং যথা লক্ষণ মুচ্যতে॥ পার্থিবী গুরুবৎসা চ তৈজসী তেজসা লঘুঃ। বাযবী চ মৃদুঃস্থূলা গাগণী কোমলা লঘুঃ॥ আপ্যাঃ স্নিগ্ধা ভৃশং শুক্লাঃ পঞ্চৈতাঃ প্রবরা মতাঃ। আদ্যাং ধারণ মাত্রেণ ব্যাধিঃকোপি ন যতে॥*॥ এবমন্যত্রাপি। গজাহি কোল মৎস্যানাং শীর্ষে মুক্তাফলোদ্ভবঃ। ত্বক্সার শুক্তি শঙ্খানাং গর্ভে মুক্তাফলোদ্ভবঃ॥ ধারাধরেষু জাযেত মৌক্তিকং জলবিন্দুভিঃ। জীমূতে শুচিরূপঞ্চ গজে পাটল ভাস্বরং॥ মৎস্যে শ্বেতঞ্চ নিস্তেজঃ ফণীন্দ্রে নীলভাস্বরং। হরিচ্ছবিং তথা বংশে পীত শ্বেতঞ্চ শূকরে। শঙ্খ শুক্ত্যুদ্ভবং শ্বেতং মুক্তারত্ন মনুত্তমং॥ চতর্ধা মৌক্তিকে ছায়া পীতা চ মধুরা সিতা। নীলাচৈব সমাখ্যাতা রত্নতত্ত্ব পরীক্ষকৈঃ॥ পীতা লক্ষ্মী প্রদা ছায়া মধুরা বুদ্ধি বর্দ্ধিনী। শুক্লায শস্করী ছায়া নীলা সৌভাগ্য দাযিনী॥ সিতা ছায়া ভবেদ্বিপ্রঃ ক্ষত্রিয শ্চার্করশ্মিমান্। পীতছায়া ভবেদ্বৈশ্যঃ শূদ্রঃ কৃষ্ণরুচি র্মতঃ॥*॥ অথ গুণাঃ। সুতারঞ্চ সুবৃত্তঞ্চ স্বচ্ছঞ্চ নির্ম্মলং তথা। ঘনং স্নিগ্ধঞ্চ সচ্ছাযং তথা স্ফুটিত মেব চ॥ অষ্টৌ গুণাঃ সমাখ্যাতা মৌক্তিকানা মশেষতঃ। তদ্যথা। তারকাদ্যুতি সঙ্কাশং সুতার মিতি গদ্যতে॥ সর্ব্বতো বর্ত্তুলং যচ্চ সুবৃত্তং তন্নিগদ্যতে। স্বচ্ছং দোষ বিনির্ম্মুক্তং নির্ম্মলং মলবর্জ্জিতং॥ গুরুত্বং তুলনে যস্য তদ্ঘনং মৌক্তিকং বরং। স্নেহেনৈব বিলিপ্তং যত্তৎ স্নিগ্ধ মিতি গদ্যতে॥ ছায়া সমন্বিতং যচ্চ

সচ্ছায়ং তন্নিগদ্যতে। ব্রণরেখা বিহীনং যত্তৎ স্যাদস্ফুটিতং শুভং॥ ভ্রাজিষ্ণু কোমলং কান্তং মনোজ্ঞং সুরভীবচ। সুবত্তীবচ সত্ত্বানি তন্মহারত্ন সংজ্ঞিতং॥ শ্বেতকাচ সমাকারং শুভ্রাংশু শত যোজিতং। শশিরাজ প্রতিচ্ছায়ং মৌক্তিকং দেব ভূষণং॥ ॥ গারুড়ে। ত্বকসার নাগেন্দ্র তিমি প্রভূতং যচ্ছঙ্খজং যচ্চ বরাহজাতং। প্রায়ো বিযুক্তানি ভবন্তি ভাসা শস্তানি মাঙ্গল্য তয়া তথাপি॥ প্রমাণবদ্গৌরব রশ্মিযুক্তং সিতং সুবৃত্তং সমসূক্ষ্ম রন্ধ্রং। অক্রেতুরপ্যাবহতি প্রমোদং যন্মৌক্তিকং তদ্গুণবৎ প্রদিষ্টং॥ এবং সমস্তেন গুণোদয়েন যন্মৌক্তিকং যোগমুপাগতং স্যাৎ। ন তস্য ভর্ত্তার মনর্থ জাত একোপি দোষঃ সমুপৈতি সদ্যঃ॥ এবং সর্ব্ব গুণোপেতং মৌক্তিকং যেন ধার্য্যতে। তস্যায় বর্দ্ধতে লক্ষ্মীঃ সর্ব্বপাপং প্রণশ্যতি॥ গুণবদ্ভুক্ত যদ্দেহে মৌক্তিকৈকং হি তিষ্ঠতি। চঞ্চলাপি স্থিরা ভূত্বা কমলা তত্র তিষ্ঠতি॥ ॥ দোষো যথা। চত্বারঃস্যু মহাদোষাঃ ষণ্মধ্যাশ্চ প্রকীর্ত্তিতাঃ। এবং দশ সমাখ্যাতা স্তেষাং বক্ষ্যামি লক্ষণং॥ যত্রৈকদেশে সংলগ্নঃ শুক্তিখণ্ডো বিভাব্যতে। শুক্তিলগ্নঃ সমাখ্যাতঃ স দোষঃ কষ্টকারকঃ॥ মীনলোচন সঙ্কাশো দৃশ্যতে মৌক্তিকে তু যঃ। মৎস্যাক্ষঃ স তু দোষঃ স্যাৎ পুত্র নাশকরো ধ্রুবং॥ দীপ্তিহীনং গতচ্ছায়ং জঠরং তদ্বিদু র্ব্বুধাঃ। তস্মিন্ সংধারিতে মৃত্যু র্জায়তে নাত্র সংশয়ঃ॥ মৌক্তিকং বিদ্রুমচ্ছায় মতিরক্তং বিদু র্ব্বুধাঃ। দারিদ্র্য জনকং যস্মাৎ তস্মাত্তৎ পরিবর্জয়েৎ॥ উপর্য্যুপরি তিষ্ঠন্তি বলয়ো যত্র মৌক্তিকে। ত্রিবৃত্তং নাম তস্যোক্তং সৌভাগ্য ক্ষয়কারকং॥ অবৃত্তং মৌক্তিকং যচ্চ চিপিটং যন্নিগদ্যতে। মৌক্তিকং প্রিয়তে যেন তস্যাকীর্ত্তি র্ভবেৎ সদা॥ ত্রিকোণং ত্র্যস্র মাখ্যাতং সৌভাগ্য ক্ষয়কারকং। দীর্ঘং যত্তৎ কৃশং প্রোক্তং প্রজ্ঞা বিধ্বংস কারকং॥ নির্ভগ্ন মেকতো যচ্চ কৃশপার্শ্বং তদুচ্যতে। স দোষং মৌক্তিকং নিন্দ্যং নিরুদ্যোগকরং হি তৎ॥ অবৃত্তং পিড়কোপেতং সর্ব্বসম্পত্তি হারকং॥ ॥ যত্র কৃত্রিম সন্দেহঃ ক্বচিদ্ভবতি মৌক্তিকে। উষ্ণে সলবণে স্নেহে নিশান্তদ্বাসয়েজ্জলে॥ ব্রীহিভি র্মর্দনীয়ং বা শুষ্কবস্ত্রাপবেষ্টিতং। যত্তু নায়াতি বৈবর্ণ্যং বিজ্ঞেয়ং তদকৃত্রিমং॥ ॥

তথাহি । ক্ষিপেদ্গোমূত্র ভাণ্ডে তু
লবণ ক্ষার সংযুতে। স্বেদয়েদ্বহ্নিনা
বাপি শুষ্কবস্ত্রেণ বেষ্টয়েৎ ॥ হস্তে
মৌক্তিকমাদায় ব্রীহিভিশ্চোপঘ-
র্ষয়েৎ । কৃত্রিমং ভঙ্গ মাপ্নোতি স-
হজঞ্চাতি দীপ্যতে ॥ কৃত্বা পচেৎ
সুপিহিতে শভদার ভাণ্ডে মুক্তাফ-
লং নিহিত নূতন শুক্তিকাণ্ডং। স্ফোট
স্তথা প্রণিদধীত ততশ্চ ভাণ্ডাৎ
সংস্থাপ্য ধান্য নিচয়েচ তমেকমাসং
॥ আদায় তৎ সকল মেব ততোন্ন-
ভাণ্ডং জম্বীর জাত রস যোজনয়া বি-
পক্বং । ঘৃষ্টং ততো মৃদু তনূকৃত পিণ্ড
মূলৈঃ স্বর্ব্যাদ্ধ্যথহ মিহ মৌক্তিক
মাশু বিদ্ধং ॥ মৃল্লিপ্ত মৎস্যপুট
মধ্যগতন্তু কৃত্বা পশ্চাৎ পচেত্তনু
ততশ্চ বিতান পত্যা । দগ্ধে ততঃ
পয়সি তদ্বিপচেৎ সুরায়াং পক্বস্ত-
তোপি পয়সা শুচি চিক্কণেন । শুদ্ধং
ততোবিমল বস্ত্র নিঘর্ষণেন স্যান্মৌ-
ক্তিকং বিমলং সদ্গুণ কান্তিজালং॥ঞ্চ॥
অথ মূল্যং। পঞ্চভি মাষকো জ্ঞেয়ো
গুঞ্জাভি র্মাষকৈ স্তথা । চতুর্ভিঃ শা-
ণ মাখ্যাতং মাষকৈ র্মণিবেদিভিঃ ॥
একস্য শুক্তিপ্রভবস্য শুদ্ধ মুক্তা ম-
ণেঃ শাণক সম্মিতস্য । মূল্যং সহ-
স্রাণি কপর্দ্দকানি ত্রিভিঃ শতৈরভ্য-
ধিকানি পঞ্চ ॥ যন্মাষকার্দ্ধেন ততো
বিহীনং চতুঃ সহস্রং লভতে হস্য মূ-
ল্যং। যন্মাষকাং স্ত্রীন্ বিভয়াদ্রুকত্রে
দ্বে তস্য মূল্যং পরমং প্রদিষ্টং॥ অর্দ্ধা-
ধিক দ্বৌ বহতো হস্য মূল্যং ত্রিভিঃ
শতৈ রভ্যধিকং সহস্রং। দ্বিমাষকো-
ন্মাপিত গৌরবস্য শতানি চাষ্টৌ
কথিতানি মূল্যং ॥ অর্দ্ধাধিক মা-
ষক সম্মিতস্য সপঞ্চবিংশং ত্রিতয়ং
শতানাং । যন্মাষকোন্মাপিত মান-
মেকং তস্যাধিকং বিংশতিভিঃ শতং
স্যাৎ ॥ গুঞ্জাশ্চ ষড্ ধারয়তঃ শতে
দ্বে মূল্যং পরং তস্য বদন্তি তজ্জ্ঞাঃ
। গুঞ্জাশ্চতস্রো বিধৃতং শতার্দ্ধাদর্দ্ধং
লভেতাপ্যধিকং ত্রিভি র্বা ॥ অতঃ-
পরং স্যাদ্ধরণ প্রমাণং সংখ্যা বিনি-
র্দ্দেশ বিনিশ্চযোক্তিঃ। ত্রয়োদশানাং
ধরণে ধৃতানাং হিক্কেতি নাম প্রবদন্তি
তজ্জ্ঞাঃ ॥ অধ্যর্দ্ধ মাত্রঞ্চ শতং কৃতং
স্যান্মূল্যং গুণৈ স্তস্য সমন্বিতস্য ।
যদি ষোড়শভি র্ভবেৎ সুপূর্ণং ধরণং
তৎ প্রবদন্তি দার্ব্বিকাখ্যং ॥ অধিকং
দশভিঃ শতঞ্চ মূল্যং সমবাপ্নোত্যপি
বালিশস্য হস্তাৎ । যদি বিংশতিভি
র্ভবেৎ সুপূর্ণং ধরণং মৌক্তিকজং বদ-
ন্তি তজ্জ্ঞাঃ॥ নব সপ্ততি মাপ্নুযাৎ স
মূল্যং যদি ন স্যাদ্গুণযুক্তিতো বিহী-

ং। ত্রিংশতা ধরণং পূর্ণং শিক্যেতি ॥ পরিকীর্ত্ত্যতে ॥ চত্বারিংশৎ পরন্ত স্য মূল্য মেষ বিনিশ্চয়ঃ। চত্বারিং-শৎ ভবেৎ শিক্যা ত্রিংশন্মূল্যং লভে তস্য ॥ পঞ্চাশত্তু ভবেৎ সোম স্তস্য মূল্যন্তু বিংশতিঃ। ষষ্টি নিকর শীর্ষং স্যাত্তস্য মূল্যং চতুর্দ্দশ ॥ অশীতি র্নবতি শ্চেতি হুপেত্যভি পরিকল্প্যতে। একাদশস্য নব চ তয়ো মূল্য মনুক্র-মাৎ ॥ শত মর্দ্ধাধিকং দ্বেচ চূর্ণোয়ং পরিকীর্ত্তিতঃ। সপ্ত পঞ্চ ত্রয় শ্চৈব তেষাং মূল্য মনুক্রমাৎ ॥ শাণাৎ পরং মাষক মেক মেকং যাবদ্বিবর্দ্ধে ত গুণৈ রপীদং। মূল্যেন তাবদ্দ্বিগু ণেন যোগ মাপ্নোত্যনাবৃষ্টি হতেপি দেশে ॥ সূক্ষ্মাতি সূক্ষ্মোত্তম মধ্য মানাং যন্মৌক্তিকানা মিহ মূল্য মু-ক্তং। তজ্জাতি মাত্রেণ মজাতু কার্য্যং গুণৈ রহীনস্য হি তৎ প্রদিষ্টং ॥ যত্তু চন্দ্রাংশু সঙ্কাশ মীষদ্বিম্ব ফলাকৃতি। স্ব মূল্যাৎ সপ্তমং ভাগ মবৃত্তত্বা ল্লভেত তৎ ॥ পীতকস্য ভবেদর্দ্ধ মবৃত্তস্য ত্রিভাগতঃ। বিষম ব্যস্ত জাতীনাং ষড্ভাগং মূল্য মাদিশেৎ ॥ অর্দ্ধ রূপাণি সস্ফোটাৎ পঙ্কচূর্ণানি যানি চ। অঙ্গারাণি চ যানি স্যুঃ রুক্ষ কাকার বন্তি চ ॥ একদেশ প্রভাবন্তি ॥ সকলা শ্লেষিতানি চ। যানি চাতক বর্ণানি কাংস্যবর্ণানি যানি চ ॥ মীন নেত্র সবর্ণানি গুচ্ছিভিঃ সংবৃতানি চ। সদোষাণি চ যানিস্যু স্তেষাং মূল্যং পদাংশিকং ॥ * ॥ অন্যত্র তু। সঞ্চালী প্রোচ্যতে গুঞ্জা সা তিস্রো রূপকং ভবেৎ। রূপকৈ দশভিঃ প্রোক্তঃ ক-লঞ্জো নাম নামতঃ ॥ কলঞ্জ নামকং দ্রব্যমেকদেশে নিধাপয়েৎ। অন্যতো জল বিন্দূংস্তু তোলনার্থং বিনিঃক্ষিপেৎ ॥ চত্বারি ত্রীণি যুগ্মন্বা তথৈকং বহু বা স্থিতং। সমং কলঞ্জ মানেন তুল্য মানাদতঃ ক্রমাৎ ॥ নবমাৎ পঞ্চ-মং যাবৎ কলঞ্জেন সমং যদা। তৎ ক্রমাদুত্তমং জ্ঞেয়ং মৌক্তিকং মনুরে-বিভিঃ ॥ চতুর্দশাৎ সমারভ্য দশ-সংখ্যা বিধিং ক্রমাৎ। কলঞ্জস্য সমানং বা মৌক্তিকং মধ্যমং বিদুঃ ॥ আরভ্য বিংশতি তমাৎ ক্রমাৎ প-ঞ্চদশাবধি। লঘ্ব্যা স্তাঃ কথিতা মুক্তা মূল্যঞ্চ তদনুক্রমাৎ ॥ কলঞ্জদ্বয় মা-নেন যদ্যেকং মৌক্তিকং ভবেৎ। ন-ধার্য্যং নরনাথৈস্তু দেবযোগ্য মমানু-ষং ॥ ইত্থং বিচার্য্য যো মুক্তাং পরি-ধত্তে নরাধিপঃ। তস্যায়ুশ্চ যশো-বীর্য্যং বিপরীত মতোন্যথা ॥ ইতি যুক্তিকল্পতরুঃ ॥ অন্যৎ মুক্তাফল

শব্দে দ্রষ্টব্যং ॥ ❀ ॥ অথ মুক্তাধারণ দিনং ॥ রেবত্যশ্বি ধনিষ্ঠাসু হস্তাদিষু চ পঞ্চসু। শঙ্খ বিদ্রুম মুক্তানাং পরিধানং প্রশস্যতে ॥ ইতি সময়প্রদীপঃ ॥

মুক্তাকলাপঃ পুং মুক্তাহারঃ। যথা। হারো মুক্তাতঃ প্রালম্ব স্রক্ কলাপাবলী লতাঃ। ইতি হেমচন্দ্রঃ ॥

মুক্তাগারং ক্লী শুক্তিঃ। ইতি শব্দচন্দ্রিকা ॥ মৌক্তিকং হঞ্চ ॥

মুক্তাপুষ্পঃ পুং কুন্দবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মুক্তাপ্রসূঃ স্ত্রী শুক্তিঃ। ইতি রাজনির্ঘণ্টঃ ॥

মুক্তাপ্রালম্বঃ পুং মুক্তাহারঃ। ইতি হেমচন্দ্রঃ ॥

মুক্তাফলং ক্লী কর্পূরং ॥ মৌক্তিকং ॥ লবলীফলং। ইতি মেদিনী ॥ বোপদেবকৃতগ্রন্থবিশেষঃ। যথা। মুক্তাফলেন গ্রন্থেন সম্ভাগবত শুক্তিনা। ভক্তি স্বাত্যম্বুনা মুগ্ধ মার্কণ্ডেয় শিশ শিবা ॥ বিদ্বদ্ধনেশশিষ্যেন ভিষক্কেশর সূনুনা। হেমাদ্রি র্বোপদেবেন মুক্তাফল মচীকরৎ ॥ ইতি তস্য চতুর্থোপান্ত্যশ্লোকদ্বয়ং ॥ ❀ ॥ অথ মুক্তাফল পরীক্ষা। দ্বিপেন্দ্র জীমূত বরাহ শঙ্খ মৎস্যাহি শুক্ত্যুদ্ভব বেণুজানি। মুক্তাফলানি প্রথিতানি লোকে তেষাঞ্চ শুক্ত্যুদ্ভব মেব ভূরি ॥ তত্রৈব চৈকস্য হি মূলমাত্রা নিবিশ্যতে রত্নপরস্য জাতু। বেধ্যন্তু শুক্ত্যুদ্ভব মেব তেষাং শেষাণ্যবেধ্যানি বদন্তি তজ্জ্ঞাঃ ॥ ত্বক্সার নাগেন্দ্র তিমি প্রসূতং যদ্বেস্তজং যচ্চ বরাহ জাতং। প্রায়ো বিমুক্তানি ভবন্তি ভাসা শস্তানি মাঙ্গল্য তযা তথাপি ॥ যান্মৌক্তিকানাম্নিহ জাতযো হষ্টৌ প্রকীর্ত্তিতা রত্নবিনিশ্চযজ্ঞৈঃ। কম্বূদ্ভবং তেষ্বধমং প্রদিষ্ট মুৎপদ্যতে যচ্চ গজেন্দ্র কুম্ভাৎ ॥ স্ব যোনি মধ্য ছবি তুল্যবর্ণং শাঙ্খং বৃহৎকোলিফল প্রমাণং। উৎপদ্যতে বারণ কুম্ভ মধ্যাদাপীত বর্ণং প্রভযা বিহীনং ॥ যে কম্বরঃ শার্ঙ্গমুখাবমর্ষ পীতস্য শঙ্খপ্রবরস্য গোত্রে। মতঙ্গজা শ্চাপি বিশুদ্ধ বংশ্যাস্তে মৌক্তিকানাং প্রভবাঃ প্রদিষ্টাঃ ॥ পাঠীন পৃষ্ঠস্য সমানবর্ণং মীনাৎ সুবৃত্তং লঘুনাতি সূক্ষ্মং। উৎপদ্যতে বারিচরাননেষু মৎস্যাশ্চ তে মধ্যচরাঃ পযোধেঃ ॥ বরাহদংষ্ট্রা প্রভবং প্রদিষ্টং তস্যৈব দংষ্ট্রাঙ্কুর তুল্য বর্ণং। ক্বচিৎ কথঞ্চিৎ স ভুবঃ প্রদেশে প্রজাযতে শূকরবদ্বিশিষ্টঃ ॥

বর্ষোপলানাং সমবর্ণ শোভং ত্বক্সার পর্ব্ব প্রভবং প্রদিষ্টং। তে বেণবোঽদিব্যজনোপভোগ্যে স্থানে প্ররোহন্তি ন সার্ব্বজন্যে॥ ভৌজঙ্গমং মীন বিশুদ্ধবৃত্তং সংস্থানতো হত্যুজ্জ্বলবর্ণ শোভং। নিতান্ত ধৌত প্রবিকল্পমান নিস্ত্রিংশ ধারা সমবর্ণ কান্তি॥ প্রাপ্যেতি রত্নানি মহাপ্রভানি রাজ্যং শ্রিয়ং বা মহতীং দুরাপাং। পাত্রং হি নাপুণ্যকৃতো ভবন্তি মুক্তা ফলস্যাহিশিরো ভবস্য॥ জিজ্ঞাসযা রত্নসনং বিধিজ্ঞৈঃ শুভে মুহূর্ত্তে প্রযতৈঃ প্রযত্নাৎ। রক্ষা বিধানং সুমহদ্বিধায হর্ম্ম্যোপরিস্থং ক্রিযতে সদা তৎ॥ তদা মহাদুন্দুভি মন্দ্রঘোষৈর্বিদ্যুল্লতা বিস্ফুরিতান্তরালৈঃ। পযোধরা ক্রান্তি বিলম্ব লম্বৈর্ঘনৈর্ঘনৈর্বা ব্রিযতেহন্তরীক্ষং॥ ন তং ভুজঙ্গা নচ যাতুধানা নব্যাধযো নাপ্যুপসর্গ দোষাঃ। হিংসন্তি যস্যাহিশিরঃ সমুত্থং মুক্তাফলং তিষ্ঠতি পূজ্যমানং॥ নাভ্যেতি মেঘ প্রভবং ধরিত্রীং বিযদ্গতং তদ্বিবুধা হরন্তি। অর্চিঃ প্রভানাবৃত দিগ্বিভাগ মাদিত্য বদ্দুঃখ বিভাব্য বিম্বং॥ তেজস্তিরস্কৃত্য হুতাশনেন্দু নক্ষত্র তারা প্রভবং সমগ্রং। দিবা যথা দীপ্তিকরং তথৈব তমোবগাঢাস্বপি তমিস্রাসু॥ বিচিত্র রত্নদ্যুতি সারতোয চতুঃসমুদ্রা ভরণোপপন্না। কৃৎস্না ন বাস্যাদিতি নিশ্চযো মে মূল্যং মহী তস্য সুবর্ণ পূর্ণা॥ হীনোঽপি য স্তল্লভতে কদাচিদ্বিপাক যোগান্মহতঃ শুভস্য। সপত্নহীনাং সমহীং সমগ্রাং ভুনক্তি তত্তিষ্ঠতি যাবদেব॥ ন কেবলং তচ্ছুভ কৃন্নৃপস্য ভাগ্যৈঃ প্রজানা মপি তস্য জন্ম। তদ্যোজনানাং পরিতঃ সহস্রং সর্ব্বাননর্থান্ বিমুখী করোতি॥ নক্ষত্র মালেব দিবো বিশীর্ণা দন্তাবলী তস্য মহাসুরস্য। বিচিত্র বর্ণেষু বিশুদ্ধবর্ণা পযঃসু পত্যুঃ পযসাং পপাত॥ সম্পূর্ণ চন্দ্রাংশু কলাপকান্তে র্মণি প্রবেকস্য মহাগুণস্য। তচ্ছুক্তি মগ্নস্থিত মাপ বীজ মাসন্ পুরাপ্যন্য ভবানি যানি॥ যস্মিন্ প্রদেশে ঽম্বুনিধৌ পপাত সুচারু মুক্তামণি রত্ন বীজং। তস্মিন্ পয স্তোযধরাবকীর্ণং শুক্তৌ স্থিতং মৌক্তিকতা মবাপ॥ সৈংহলিক পারলৌকিক সৌরাষ্ট্রিক তাম্রপর্ণ পারসবাঃ। কৌবের পাণ্ড্য হাটক হেমকা ইত্যাকরা স্ত্বষ্টৌ॥ শুক্ত্যুদ্ভব নাতি নিকৃষ্ট বর্ণং প্রমাণ সংস্থান গুণ প্রভাভিঃ। উৎপদ্যতে

বর্দ্ধন পারসীক পাতাল লোকান্তর সিংহলেষু ॥ চিন্ত্যা ন তস্যাকরজা বিশেষা রূপে প্রমাণে চ যতেত বিদ্বান্ । ন চ ব্যবস্থাস্তি গুণাগুণেষু সর্ব্বত্র সর্ব্বাকৃতয়ো বসন্তি ॥ একস্য শুক্তি প্রভবস্য মুক্তা ফলস্য শাণেন সমন্বিতস্য । মূল্যং সহস্রাণি তু রূপকাণাং ত্রিভিঃ শতৈরভ্যধিকানি পঞ্চ ॥ যন্মাষকার্দ্ধেন ততো বিহীনং তৎপঞ্চ ভাগদ্বয় হীনমূল্যং । যন্মাষকাং স্ত্রীন্ বিভৃয়াৎ সহস্রে দ্বে তস্য মূল্যং পরমং প্রদিষ্টং ॥ অর্দ্ধাধিকৌ দ্বৌ বহতো হস্য মূল্যং ত্রিভিঃ শতৈরভ্যধিকং সহস্রং । দ্বিমাষকোন্মাপিত গৌরবস্য শতানি চাষ্টৌ কথিতানি মূল্যং ॥ অর্দ্ধাধিকং মাষক মুন্মিতস্য সপঞ্চবিংশত্রিতয়ং শতানাং । গুঞ্জাশ্চ ষড্ ধারয়তঃ শতে দ্বে মূল্যং পরং তস্য বিদন্তি তজ্জ্ঞাঃ ॥ অধ্যর্দ্ধ মুন্মাপ কৃতং শতং স্যান্মূল্যং গুণৈস্তস্য সমন্বিতস্য । যদি ষোড়শভির্ভবেদনূনং ধরণং তৎ প্রবদন্তি দার্বিকাখ্যং ॥ অধিকং দশভিঃ শতং মূল্যং সমবাপ্নোত্যপি বালিশস্য হস্তাৎ । ত্রিগুণৈর্দশভির্ভবেদনূনং ধরণং তদ্ভাকং বদন্তি তজ্জ্ঞাঃ ॥ নব সপ্ততি মাপ্নুয়াৎ স্বমূল্যং যদি নস্যাদ্গুণ সম্পদা বিহীনং ॥ ত্রিংশতা ধরণং পূর্ণং শিক্যং তস্যেতি কীর্ত্ত্যতে । চত্বারিংশদ্ভবেত্তস্যাঃ পরং মূল্যঃ বিনিশ্চয়ঃ ॥ চত্বারিংশদ্ভবেচ্ছিক্যো বিংশন্মূল্যং লভেত সা । ষষ্টি নিকরশীর্ষং স্যাত্তস্য মূল্যং চতুর্দ্দশ ॥ অশীতির্নবতিশ্চৈব রূপ্যেতি পরিকীর্ত্তিতা । একাদশ স্যান্নব চ তয়ো মূল্যং মনুক্রমাৎ ॥*॥ আদায় তৎ সকলমেব ততো হন্নভাণ্ডং জম্বীরজাতরসযোজনয়া বিপক্কং । ঘৃষ্টং ততো মৃদু তনূকৃত পিণ্ড মূলৈঃ স্বর্য্যাল্পথেষ্ট মনুমৌক্তিক নাশবিদ্ধং ॥ মৃল্লিপ্ত মৎস্যপুট মধ্য গতন্তু কৃত্বা পশ্চাৎ পচেত্তনু ততশ্চ বিতান পত্যা । দুগ্ধে ততঃ পয়সি তং বিপচেৎ সুধায়াং পক্বং ততোপি পযসা শুচি চিক্কণেন ॥ শুদ্ধং ততো বিমল বস্ত্র নিঘর্ষণেন স্যান্মৌক্তিকং বিপুল সদ্গুণ কান্তিযুক্তং । ব্যাডির্জগাদ জগতাংহি মহাপ্রভাব সিদ্ধো বিদগ্ধ হিত তৎপরয়া দয়ালুঃ ॥ শ্বেতকাচ সমং তারং হৈমাংশ শতযোজিতং । রসমধ্যে প্রধার্য্যেত মৌক্তিকং দেহ ভূষণং ॥ এবং হি সিংহলে দেশে স্বর্বন্তি স্বশলা জনাঃ । যস্মিন্ কৃত্রিম সন্দেহঃ

স্ফুটিভবতি মৌক্তিকে ॥ উক্তে সলবণে স্নেহে নিশাং তদ্বাসয়েজ্জলে । ব্রীহিভির্মর্দনীয়ন্তু শুক্লবস্ত্রোপবেষ্টিতং ॥ যত্তু নাযাতি বৈবর্ণ্যং বিজ্ঞেয়ং তদকৃত্রিমং ॥ সিতং প্রমাণবৎ স্নিগ্ধং গুরু স্বচ্ছং সুনির্ম্মলং । তেজোধিকং সুবৃত্তঞ্চ মৌক্তিকং গুণবৎ স্মৃতং ॥ প্রমাণবদ্গৌরব রশ্মিযুক্তং সিতং সুবৃত্তং সম সূক্ষ্মবেধং । অক্রেতুরপ্যাবহতি প্রমোদং যন্মৌক্তিকং তদ্গুণবৎ প্রদিষ্টং ॥ এবং সমস্তেন গুণোদয়েন যন্মৌক্তিকং যোগমুপাগতং স্যাৎ । ন তস্য ভর্ত্তারমনর্থজাত একোপি কশ্চিৎ সমুপৈতি দোষঃ ॥ ইতি গারুড়ে ৬৯ অধ্যায়ঃ ॥

মুক্তামুক্তঃ ত্রি ক্ষিপ্তাক্ষিপ্তঃ । অস্য প্রয়োগো অস্ত্রে শস্ত্রে চ প্রায়ো বর্ত্তে । ইতি হলায়ুধঃ ॥

মুক্তালতা স্ত্রী মুক্তাহারঃ । ইতি হেমচন্দ্রঃ ॥

মুক্তাবলী স্ত্রী মুক্তাহারঃ । ইত্যমরঃ ॥ মৌক্তিকশ্রেণী চ ॥

মুক্তাস্ফোটঃ পুং শুক্তিঃ । ইত্যমরঃ ॥

মুক্তাস্ফোটা স্ত্রী শুক্তিঃ । ইতি রাজনির্ঘণ্টঃ ॥

মুক্তিঃ স্ত্রী আত্যন্তিকদুঃখনিবৃত্তিঃ । ইতি নৈয়ায়িকাঃ ॥ নিত্যসুখাবাপ্তিঃ । ইতি বৈদান্তিকাঃ ॥ শরীরেন্দ্রিয়াভ্যাং আত্মনোমভত্বং মুক্তিঃ । ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ । কৈবল্যং ২ নির্ব্বাণং ৩ শ্রেয়ঃ ৪ নিঃশ্রেয়সং ৫ অমৃতং ৬ মোক্ষঃ ৭ অপবর্গঃ ৮ । ইত্যমরঃ ॥ সা পঞ্চবিধা । সার্ষ্টিঃ ১ সালোক্যং ২ সারূপ্যং ৩ সাযুজ্যং ৪ নির্ব্বাণং ৫ । যথা । সার্ষ্টি সারূপ্য সালোক্য সামীপ্যৈকত্ব মপ্যুত । দীয়মানং ন গৃহ্লন্তি বিনা মৎসেবনং জনাঃ ॥ ইতি শ্রীভাগবতং ॥ মুক্তিস্তু দ্বিবিধা সাধ্বি শ্রুত্যুক্তা সর্ব্বসম্মতা । নির্ব্বাণপদদাত্রী চ হরিভক্তিপ্রদা নৃণাং ॥ হরিভক্তিস্বরূপাঞ্চ মুক্তিং বাঞ্ছন্তি বৈষ্ণবাঃ । অন্যে নির্ব্বাণরূপাঞ্চ মুক্তিমিচ্ছন্তি সাধবঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২২ অধ্যায়ঃ ॥ * ॥ মুক্তিকরযোগো যথা । বক্ষ্যে সাঙ্গং মহাযোগং ভুক্তিমুক্তিকরং পরং । সর্ব্বপাপপ্রশমনং ভক্ত্যানুপঠিতং শৃণু ॥ মমেতি মূলং দুঃখস্য ন মমেতি চ নির্বৃতেঃ । দত্তাত্রেয়ো হ্যলর্কায় ইদমাহ মহামতিঃ ॥ অহং নিত্যঙ্কুরাৎপ্রভবো মমেতি স্কন্ধবান্ মহান্ । গৃহক্ষেত্রোপশাখাশ্চ পুত্রদারাদি পল্লবঃ

॥ ধন ধান্য মহাপত্রো হ্নেককালৈ হিবর্দ্ধিতঃ। পুণ্যাপুণ্য সপুষ্পশ্চ সুখ দুঃখ মহাফলঃ ॥ বিধিবৎ সুখ মাপ্তুং জাতো হজ্ঞান মহাতরুঃ। সংসারাধ্ব পরিশ্রান্তা যেত্র ছায়াং সমাশ্রিতাঃ ॥ ভ্রান্তিজ্ঞান সুখাসীনা স্তেষা মাত্যন্তিকং স্ততঃ। যৈস্তু সৎসঙ্গ পাষাণ নিশিতেন মহাতরুঃ ॥ ছিন্নো বিদ্যাঙ্গঠারেণ তে গতা লব নীশ্বরে। প্রাপ্য ব্রহ্মরসং পীতং নীরজস্ক মকণ্টকং। প্রাপ্নবন্তি পরাঃ প্রাজ্ঞা জ্ঞান নিবৃত্তি মেব চ। মূর্ত্তেন্দ্রিয় মনং মলং ন হ্যাবা জন্ম চাপ্যহং ॥ ন তস্যা ব্রাদিকং বাপ্য নৈবান্তঃকরণাৎ স্বকৌ। কং বা পশ্যসি রাজেন্দ্র প্রধান মিব মাবযোঃ ॥ যতঃ পরে হি ক্ষেত্রজ্ঞঃ সংজাতো হয়ং গুণাত্মকঃ। সসঙ্কো দুঃখ মাপ্তুং জাতো মৎস্যাস্তনা যথা ॥ একত্বেপি পৃথগ্ভাবস্তথা ক্ষেত্রাত্মনো নৃপ। জ্ঞান পূর্বাভি যোগো হতিজ্ঞানেন সহ যোগিনঃ ॥ সা মুক্তি ব্রহ্মণা চৈক্য মনৈক্যং পুত্র তে গুণৈঃ। তদ্গৃহ যত্র বসতি তদ্ভোজ্যং যেন জীবতি ॥ ইতি গারুড়ে ২৩০ অধ্যায়ঃ ॥ ॥ অপিচ। হরিরাত্মা ন সন্দেহো নিদা তৎ মনস্তাপত। তদা মজ্জঃ স্ব সংসারী বিষ্ণো স্বেবাত্মতাং ব্রজেৎ ॥ নান্যথা মুচ্যতে চাত্মা ভ্রমন্ বৈ ঘটি যন্ত্রবৎ। পূর্ব্ব কর্ম্ম নিবদ্ধোপি সর্ব্বযোনিষু নিত্যশঃ ॥ কূটস্থঃ পশ্যত্যাং মাতি আত্মজ্ঞান বিবর্জিতঃ। স্বর্বমহং মনেভীদ মেবং দুঃখান কল্পতে॥ মুক্তো তো হি যথা কার্য্যং লিপ্যতে বৈ নবনীশ্বরঃ। ক্ষীরাধানাদিভি র্যদ্বদ্ভাগুং তদ্বন্মহানসে ॥ চন্দ্রকান্ত মণি র্যদ্বদ্গৃহীতে সোপচান্ গুণান্। সুখং দুঃখং তথা ক্লেসং সংসরন্নীশ্বরঃ ॥ স্বপ্নে যঃ পুরুষো নিত্য মটতে কর্ম্ম বন্ধনাৎ। মন্যমানঃ সুখং দুঃখং সোপ্যেব বিপ্রমুচ্যতে ॥ জগন্মুক্তে ন সৃষ্টিঃ স্যাদমুক্তে দর্শ্বতে সদা। তস্মাজ্জগৎক্ষয়ং বিদ্যাৎ জ্ঞানং নাধিকং নেব চ ॥ যত্র তত্র স্থিতো জ্ঞানী পরমাক্ষর বিৎসদা। বিষয়ান্তর শক্তো বা যাতি দেহে মৃতে হরিং ॥ ন তস্য প্রতিবন্ধো হস্তি যদ্যনীহোপি লীলয়া। স্বরুতে গৃহ্যতে নৈব পদ্মপত্র মিবাম্ভসা ॥ যথা দুর্দ্দিন সংঘাতং মেঘ বৃন্দে ব্যবস্থিতং। তদিহ নির্মলাবস্থো জ্ঞানী বিষব সংজ্ঞিতঃ ॥ সর্ব্বাবস্থোপি মুচ্যেত ভাবযুক্তঃ পরে পদে। জীবন্মুক্তঃ সমুক্তঃ স্যান্নিদ্রা বিরহিতস্ত্বয়ঃ ॥ কর্ত্তা হর্ত্তা চ ভো-

ক্তা চ সর্ব্বজ্ঞঃ সর্ব্বগো হরিঃ। একং স্বচ্ছন্দ লীলস্য মুক্তি রিত্যভিধীয়তে॥ জীবন্মুক্তি মজ্ঞানন্তো মূর্চ্ছিতাকার বিগ্রহাঃ। বিষমুগ্ধা ইবাভান্তি মূঢা শ্চৈতন্য বর্জ্জিতাঃ॥ নির্গুণঃ স তু বিজ্ঞেয়ঃ সুখ দুঃখ মতীতবান্। জীবনাশো ভবেদ্যত্র তৎ সুখং নিষ্প্রয়োজনং॥ মৃৎপিণ্ড দণ্ডবন্মোক্ষ স্তন্মোক্ষস্তু ভবেদ্বৃথা। তিষ্ঠন্তি কাষ্ঠবদ্দেহে চ সংবিত্তি পরিবর্জ্জিতাঃ॥ তে চ মায়োদরে লীনা জড়ান্ধ বধিরোপমাঃ। আকাশ বদ্ভবেতাত্মা বিদেহো নিষ্প্রচেতনঃ॥ অলং হ্যনেন মোক্ষেণ চেতনা রহিতেন চ। বরমেব চ সংসারী বিষয়াসক্ত চেতনঃ॥ সুখস্যানন্তরং দুঃখং দুঃখস্যানন্তরং সুখং। ভুঞ্জন্নাত্মা উভৌ পাশৌ সংসারে সংব্যবস্থিতঃ॥ ঈদৃশং হি পরং জ্ঞানং বেদাদীনা মশেষতঃ। সুখস্য চ ফলং ভুঙ্ক্তে স্বর্গে চেহ দ্বিজোত্তম॥ যত্র বাসঃ পরে স্থানে সুখ দুঃখ বিবর্জ্জিতঃ। কেবলং জীবনাশো হ্যয়ং প্রোক্ত জ্ঞান মজানতা॥ চেতনা রহিতো জ্ঞান মাকাশবদ্ধ্যপ্যচেতনঃ। মৃৎপিণ্ড দণ্ড লোষ্টাদি শিলা পট্টক সদৃশ্যবৎ॥ অথ শ্রান্তো নরো মহৎ সুষুপ্তঃ সুখ মশ্নুতে। বোধ্যনা-

নঃ সচেতাপি সুখাদ্বোদ্ধুং ন মন্যতে॥ *॥ কেষাং মুক্ত মিদং মোক্ষঃ সুখ মত্যন্ত কেবলং। তদহং সংপ্রবক্ষ্যামি শৃণুষ্ব গদতো মম॥ দুঃখানা মাগমো নাস্তি যত্র সৌখ্যং নিরন্তরং। বিদ্যতে তৎপরং দৃষ্ট্বা যোপ্যানন্দ সুখী ভবেৎ॥ ব্রহ্মজ্ঞান প্রবিষ্টাশ্চ স্বচ্ছন্দাত্ম বলান্বিতাঃ। ন তেষাং পুনরাবৃত্তি র্যান্তি বিষ্ণু লয়ং বুধাঃ॥ অস্তিদেবো হরিঃ শান্তঃ কারণোপায় বর্জ্জিতঃ। তং জ্ঞাত্বা তু ভবেন্মুক্তি নিষ্প্রপঞ্চ কায়যোগিনঃ॥ ব্রহ্মা বিষ্ণুশ্চ রুদ্রশ্চ চন্দ্র সূর্য্যাদয়ঃ সুরাঃ। ন বিভক্তিং শরীরস্য যান্তি মুক্তি র্নবিদ্যতে॥ তস্মাদারাধনীযোপি সংযতেন্দ্রিয় গোচরঃ। বিষ্ণু র্মায়া পতি র্যো বৈ যদীচ্ছেন্মুক্তি মাত্মনঃ॥ নান্যত্র বিদ্যা তপসো নান্যত্রেন্দ্রিয় নিগ্রহাৎ। নান্যত্র সর্ব্ব সংত্যাগাৎ মোক্ষং বিন্দন্তি মানবঃ॥ তস্মাদ্ধর্ম্ম সুখো ভূত্বা সংযম্যাত্মান মাত্মনা। ধর্ম্মং জয্যাদ্বিহায়ৈনো ধর্ম্মাত্মা সুখ মেধতে॥ ধর্ম্মাদেবাপ্যতে দেহো দারাঃ পুত্রাশ্চ তথা। ধর্ম্মাৎ স্বর্গশ্চ মোক্ষশ্চ যদন্যদপি দুর্লভং॥ ঋষয়ো দেব গন্ধর্ব্বাঃ স্বধর্ম্ম মনুগামিনঃ। স্বর্গে তিষ্ঠন্তি বিপ্রর্ষে ততো যাস্যন্তি

২ জন্মতি॰ ॥ ধর্ম্মমর্থঞ্চ কামঞ্চ মোক্ষঞ্চ ঋষি সত্তম। সমাপ্নোতি পুনর্নিত্যং নারায়ণ পরায়ণঃ ॥ ইতি বহ্নিপুরাণং ॥

মুক্তিদং ক্লী ভগবন্নামবিশেষঃ। যথা। অল্পাক্ষরঞ্চ বহ্বর্থং মহাসারঞ্চ মুক্তিদং। নানা সিদ্ধি প্রদাতারং পরং চিন্তানুরঞ্জকং ॥ গুহ্যাৎ গুহ্যতরং চান্যন্নাম চাষ্টাক্ষরং পরং। মন্ত্রং সুখ সমুচ্চার্য্যমশেষার্থ প্রসাধকং ॥ প্রাহ নারায়ণায়েতি নমোন্তাদ্যোং নিয়োগতঃ। ওমিত্যেকাক্ষরে মন্ত্রে স্থিতঃ সর্ব্বগতো হরিঃ ॥ মাধবায়েতি বৈ নাম ধর্ম্মকানার্থ মোক্ষদং ॥ ইতি বহ্নিপুরাণং ॥ মুক্তিদাতরি ত্রি ॥

মুক্তিমণ্ডপঃ পুং বিশ্বেশ্বরস্যদক্ষিণপার্শ্বস্থ মণ্ডপঃ। যথা। নিমেষ মাত্রং স্থিত চিত্তবৃত্তা তিষ্ঠন্তি যে দক্ষিণ মণ্ডপে হত্র। অনন্যভাবা অপি গাঢ মানসা ন তে পুন গর্ব্ভদশা মুপাসতে ॥ ইতি কাশীখণ্ডং ॥ শ্রীজগন্নাথ মন্দিরে দক্ষিণপার্শ্বস্থ মণ্ডপশ্চ ॥

মুক্তিমুক্তঃ পুং শিহ্লকং। ইতি রত্নমালা ॥

মুখং ক্লী শরীরাবয়ববিশেষঃ। স তু মুখবিবরং। কবযস্ত তদুপলক্ষিতে সমুদায়ে যুঞ্জতে। ইতি ভরতঃ ॥ তত্র গর্ভস্থস্য পঞ্চমাসৈ র্ভবতি। ইতি সুখবোধঃ ॥ তৎপর্য্যায়ঃ। বক্তুং ২ আস্যং ৩ বদনং ৪ তুণ্ডং ৫ আননং ৬ লপনং ৭। ইত্যমরঃ ॥ তস্য স্বরূপং যথা। ওষ্ঠৌ চ দন্তমূলানি দন্তা জিহ্বা চ তালু চ। গলো গলাদি সকলং সপ্তাঙ্গং মুখ মুচ্যতে ॥ ইতি ভাবপ্রকাশঃ ॥ রতিক্রিয়ায়াং স্বস্ত্রীমুখস্য স্নেহাৎ স্ববালকমুখস্য চ চুম্বনে শুদ্ধত্বং যথা। মক্ষিকা সন্ততাধারা মার্জ্জারো ব্রহ্মবিন্দবঃ। স্ত্রীমুখং বালকমুখং ন দুষ্টং মনু রব্রবীৎ ॥ ইতি কর্ম্মলোচনং ॥ * ॥ নিঃসরণং। ইত্যমরঃ ॥ তত্র গৃহস্য নিষ্ক্রমণ প্রবেশন বর্ত্ম। ইতি সর্ব্বধরাদয়ঃ ॥ গৃহাদি দ্বার প্রবেশঃ। ইতি স্বামী ॥ হট্টমণ্ডপাদেঃ প্রবেশ নির্গমঃ। ইতি কোক্কটঃ ॥ গৃহাঙ্গনাদি নিঃসরণ পথঃ। ইতি রমানাথঃ ॥ ইত্যমর টীকায়াং ভরতঃ ॥ প্রারম্ভঃ ॥ উপায়ঃ ॥ সন্ধিবিশেষঃ ॥ নাটকাদেঃ শব্দঃ। ইতি মেদিনী ॥ আদ্যং ॥ প্রধানং ॥ শব্দঃ ॥ নাটকঃ ॥ বেদঃ ॥ ইতি শব্দরত্নাবলী ॥

মুখঃ পুং ডহুঃ। যথা। লঙ্গচো লিজচো নুক্তঃ খগবক্ত্রো মুখো ডহুঃ। ইতি শব্দচন্দ্রিকা॥

মুখগন্ধকঃ পুং পলাণ্ডুঃ। ইতি রাজনির্ঘণ্টঃ॥

মুখঘণ্টা স্ত্রী হুলহুলীধ্বনিঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মুখচীরী স্ত্রী জিহ্বা। ইতি শব্দমালা॥

মুখজঃ পুং ব্রাহ্মণঃ। ইতি পুরাণং॥ বক্তজাতে ত্রি॥

মুখতীযং ত্রি মুখসম্বন্ধি। ইতি সিদ্ধান্তকৌমুদী॥

মুখদূষণঃ পং পলাণ্ডুঃ। ইতি রাজনিঘণ্টঃ॥

মুখধাবনং ক্লী আস্যপ্রক্ষালনং। মুখ ধোআ ইতি ভাষা। যথা। পটোল নিম্ব জম্বাম্র মালতী বনপল্লবৈঃ। পঞ্চপল্লবজঃ শ্রেষ্ঠঃ কষাযো মুখধাবনে॥ ইতি ভাবপ্রকাশঃ॥

মুখধৌতা স্ত্রী ব্রাহ্মণযষ্টিকা। ইতি শব্দচন্দ্রিকা॥

মুখনিবাসিনী স্ত্রী সরস্বতী। ইতি কেচিৎ॥

মুখনিরীক্ষকঃ পুং অলসঃ। ইতি শব্দরত্নাবলী॥

মুখপূরণং ক্লী গণ্ডূষঃ। ইতি বৈদ্যকং॥

মুখপ্রিযঃ পুং নারঙ্গঃ। ইতি ভাবপ্রকাশঃ॥ বক্তুরোচকে ত্রি॥

মুখভূষণং ক্লী তাম্বূলং। ইতি বৈদ্যকং॥

মুখমণ্ডনকঃ পুং তিলকবৃক্ষঃ। ইতি রাজনিঘণ্টঃ॥ আস্যভূষকে ত্রি॥

মুখমোদঃ পুং শোভাঞ্জনঃ। ইতি রাজনির্ঘণ্টঃ॥

মুখযন্ত্রণং ক্লী কবিকা। যথা। কবীখলীনং কবিকা কবিযং মুখযন্ত্রণং। ইতি হেমচন্দ্রঃ॥

মুখরঃ ত্রি অপ্রিযবাদী। তৎপর্য্যাযঃ। দুর্মুখঃ২ অবদ্ধমুখঃ৩। ইত্যমরঃ॥

মুখরঃ পুং কাকঃ॥ শঙ্খঃ। ইতি রাজনির্ঘণ্টঃ॥

মুখরোগঃ পুং বক্তামযঃ। তত্র মুখস্য স্বরূপ মাহ। ওষ্ঠৌ চ দন্তমূলানি দন্তা জিহ্বা চ তালু চ। গলো গলাদি সকলং সপ্তাঙ্গং মুখ মুচ্যতে॥ ॥ অথ মুখরোগাণাং সংখ্যা মাহ। স্যু রষ্টাবোষ্ঠযো র্দন্তমূলে তু দশ ষট্ তথা। দন্তেম্বষ্টৌ রসজ্ঞাযাং পঞ্চ স্যু র্নব তালুনি॥ কণ্ঠে ত্বষ্টাদশ প্রোক্তা স্ত্রযঃ সর্ব সরাঃ স্মৃতাঃ। এবং মুখাময়াঃ সর্ব্বে সপ্তষষ্টি র্মতা বুধৈঃ॥ ॥ মুখরোগাণাং

নিদানান্যাহ। অনূপ পিশিত ক্ষীর দধি মাষাদি সেবনাৎ। মুখ মধ্যে গদাঃ স্যূর্যঃ ক্রুদ্ধা দোষাঃ কফোত্তরাঃ॥ *।* ॥ তত্রৌষ্ঠরোগাঃ। তেষাং নিদান পূর্ব্বিকাং সংখ্যাঞ্চাহ। পৃথ-দ্দোষৈঃ সমস্তৈশ্চ রক্তজো মাংসজস্তথা। মেদোজ শ্চাভিঘাতোত্থ এব মষ্টৌষ্ঠজা গদাঃ॥ * ॥ তত্র বাতিকস্য লক্ষণ মাহ। কর্কশৌ পরুষৌ স্তব্ধৌ কৃষ্ণৌ তীব্র সুগন্ধিনৌ। দাল্যেতে পরিপাট্যেতে ওষ্ঠৌ মারুত কোপতঃ॥ পরুষৌ রুক্ষৌ। দাল্যেতে বিদার্য্যেতে। পরিপাট্যেতে কিঞ্চিদ্বিদীর্ণ ত্বচৌ ক্রিয়েতে॥ * ॥ পৈত্তিকমাহ। চীযেতে পিডকাভিস্তু সরুজাভিঃ সমন্ততঃ। সদাহ পাক পিডকৌ পীতাভাসৌ চ পিত্ততঃ॥ * ॥ শ্লৈষ্মিক মাহ। সবর্ণাভিস্তু চীযেতে পিডকাভি র বেদনৌ। কণ্ডুমন্তৌ কফাদোষ্টৌ পিচ্ছিলৌ শীতলৌ গুরূ॥ * ॥ সান্নিপাতিক মাহ। সকৃৎ কৃষ্ণৌ সকৃৎ পীতৌ সকৃৎ শ্বেতৌ তথৈব চ। সন্নিপাতেন বিজ্ঞেযা বনেক পিডকান্বিতৌ॥ * ॥ রক্তজমাহ। খর্জুর ফল বর্ণাভিঃ পিডকাভি র্নিপীডিতৌ। রক্তোপসৃষ্টৌ রুধিরং স্রবন্তং শোণিত প্রভৌ॥ * ॥ মাংসজমাহ। মাংস দুষ্টৌ গুরু স্থূলৌ মাংসপিণ্ড বদুদ্গতৌ। জন্তব শ্চাত্র মূর্চ্ছন্তি নরস্যোভযতো মুখাৎ॥ জন্তবঃ কৃমযঃ। মূর্চ্ছন্তি বর্দ্ধন্তে। মুখাদুভযতঃ সৃক্বণ্যোঃ॥ * ॥ মেদোজমাহ। সর্পি মণ্ডপ্রতীকাশৌ মেদসা কণ্ডুরৌ গুরু। স্বচ্ছ স্ফটিক সঙ্কাশ মাস্রাবং স্রবতো ভৃশং॥ * ॥ অভিঘাতজ মাহ। ক্ষতজাভৌ বিদীর্য্যেতে পীড্যেতে চাভিঘাততঃ। মথিতৌ চ সমাখ্যাতাবোষ্ঠৌ কণ্ডু সমন্বিতৌ॥ মথিতৌ মুদিতাবিব। অতএব ক্ষতজাভৌ রুধিরাভাবিতি সঙ্গতং॥ * ॥ অথৌষ্ঠ রোগাণাং চিকিৎসা। গল দন্ত মূল দশনচ্ছদেষু রোগাঃ কফাস্র ভূযিষ্ঠাঃ। তস্মাদেতেষ্বসকৃদ্রুধিরং বিস্রাবযেদ্দুষ্টং॥ চতুর্ব্বিধেন স্নেহেন মধূচ্ছিষ্ট যুতেন চ। বাতজে হভ্যঞ্জনং স্যর্য্যান্নাডী স্বেদঞ্চ বুদ্ধিমান্॥ চতুর্ব্বিধেন স্নেহেন তৈল ঘৃত বসা মজ্জরূপেণ॥ বেধং শিরাণাং বমনং বিরেকং তিক্তাস্যপানং রস ভোজনঞ্চ। শীতাঃ প্রদেহাঃ পরিষেচনঞ্চ পিত্তোপসৃষ্টেষ্বধরেষু স্যর্য্যাৎ॥ শিরো বিরেচনং ধূমঃ স্বেদঃ কবল এব চ। হৃতে রক্তে প্রযোক্তব্যং ওষ্ঠ কোপে কফাত্মকে॥ মেদোজে স্বেদিতে ভি-

মে শোধিতে কবলো হিতঃ। প্রিয়ঙ্গু
ত্রিফলা লোধ্রং সক্ষৌদ্রং প্রতিসার-
ণং ॥ ❋ ॥ প্রতিসারণস্য বিধিমাহ।
দন্ত জিহ্বা মুখানাং যচ্চূর্ণ কল্কাবলে-
হনৈঃ। শনৈ ঘর্ষণ মঙ্গুল্যা তদুক্তং
প্রতিসারণং ॥ ওষ্ঠরোগেষ্বশেষেষু
দৃষ্ট্বা দোষ মুপাচরেৎ। তেষু ব্রণত্বং
যাতেষু ব্রণবৎ সমুপাচরেৎ॥❋॥❋॥
অথ দন্তবেষ্ট রোগাঃ। তত্র দন্তবেষ্ট
রোগাণাং নামানি সংখ্যাঞ্চাহ।
শীতাদো গদিতঃ পূর্ব্বং দন্তপুপ্পুটক
স্তথা। দন্তবেষ্টঃ শৌষিরশ্চ মহাশৌ-
ষির এব চ॥ ততঃ পরিদরঃ প্রোক্ত
স্তত স্তুপকুশঃ স্মৃতঃ॥ বৈদর্ভশ্চ ততঃ
প্রোক্তঃ খলিবর্দ্ধন এব চ। অধিমাং-
সক নামা চ দন্তনাড্যশ্চ পঞ্চ চ॥
দন্তবিদ্ধিরপ্যত্র দন্তবেষ্টেষু ষোড়শ
। ❋ ॥ তত্র শীতাদস্য লক্ষণমাহ।
শোণিতং দন্তবেষ্টেভ্যো যত্রাকস্মাৎ
প্রবর্ত্ততে। দুর্গন্ধীনি স কৃষ্ণানি উৎ-
ক্লেদীনি মৃদূনি চ॥ দন্ত মাংসানি
শীর্য্যন্তে পচন্তি চ পরস্পরং। সী
তাদো নাম সব্যাধিঃ কফ শোণিত
সম্ভবঃ॥ দন্তবেষ্টেভ্যঃ দন্তবেষ্টনমাং-
সেভ্যঃ। অকস্মাৎ অভিঘাতং বিনা
শীর্য্যন্তে পতন্তি। পচন্তি চ পরস্প-
রং পাকোষ্মণা মাংসানি শোণিতং
পচন্তি শোণিতং মাংসানি পচন্তি
॥ ❋ ॥ দন্তপুপ্পুটমাহ। দন্তযো স্ত্রিষু
বা যত্র শ্বযথু র্জায়তে মহান্। দন্তপু-
প্পুটকো নাম স ব্যাধিঃ কফ রক্তজঃ
॥ ❋ ॥ দন্তবেষ্টমাহ। স্রবন্তি পূযং
রুধিরং চলা দন্তা ভবন্তি চ। দন্তবেষ্টঃ
স বিজ্ঞেয়ো দুষ্ট শোণিত সম্ভবঃ॥
অত্র দন্তমূলানীতি কর্তৃপদ মধ্যা
হরণীয়ং॥ ❋ ॥ শৌষিরমাহ। শ্বযথু
র্দন্তমূলেষু রুজাবান্ কফ বাতজঃ।
লালাস্রাবী কণ্ডুরশ্চ বিজ্ঞেয়ঃ শৌষি
রো গদঃ॥ ❋ ॥ মহাশৌষিরমাহ।
দন্তাশ্চলন্তি বেষ্টেভ্যো তালু চাপ্যব-
দীর্য্যতে। যস্মিন্ স সর্ব্বজো ব্যাধি র্ম-
হাশৌষির সংজ্ঞকঃ॥ তালু চাপ্য-
বদীর্য্যতে চকারাৎ দন্তবেষ্টৌ চাপ্য-
বদীর্য্যেতে। সপ্তরাত্রান্ মারক শ্চা-
যং যত আহ ভোজঃ। মহাশৌষির
ইত্যেষ সপ্তরাত্রান্নিহন্ত্যসূন্। ❋ ॥
পরিদরমাহ। দন্তমাংসানি শীর্য্যন্তে
যস্মিন্ স্রবতি চাপ্যসৃক্। পিত্তাসৃক্
কফজো ব্যাধি র্জ্ঞেয়ঃ পরিদরো হি
সঃ॥ ❋ ॥ উপকুশমাহ। বেষ্টেষু
দাহঃ পাকশ্চ তাভ্যাং দন্তাশ্চলন্তি
হি। অভ্যাহতাঃ প্রস্রবন্তি শোণিতং
মন্দবেদনং। আধ্মায়ন্তে স্রুতে রক্তে
মুখং পূতি চ জায়তে॥ যস্মিন্নুপকুশঃ

স স্যাৎ পিত্ত রক্ত সমুদ্ভবঃ। আঘ- ট্টিতা মৃষ্টাঃ॥ বৈদর্ভমাহ ঘৃষ্টেষু দন্তমূলেষু সংরম্ভো জায়তে মহান্। চলন্তি চ রদা যস্মিন্ স বৈদর্ভো বিঘাতজঃ॥ সংরম্ভঃ শোথঃ। চলন্তীতি চকারাদ্বেদনা দাহ পাকাঃ॥ * ॥ খলিবর্দ্ধন মাহ। মারুতেনাধিকো দন্তো জায়তে তীব্রবেদনঃ। খলিবর্দ্ধন সংজ্ঞো হসৌ সংজাতে রুক্ প্রশাম্যতি॥ সঞ্জাতে দন্তে॥ * ॥ অধিমাংসকমাহ। হনব্যে পশ্চিমে দন্তে মহান্ শোথো মহারুজঃ। লালাস্রাবী কফকৃতো বিজ্ঞেয়ঃ সোহধিমাংসকঃ॥ হনব্যে হনুভবে পশ্চিমে দন্তে॥*॥ পঞ্চদন্তনাড়ী রাহ। দন্তমূলগতা নাড্যঃ পঞ্চ জ্ঞেয়া যথেরিতাঃ। যথেরিতা যথা নাড়ীব্রণে বাত পিত্ত কফ সন্নিপাতাগন্তু নিমিত্তাঃ পঞ্চনাড্যঃ কথিতা স্তথাত্রাপীত্যর্থঃ। * ॥ দন্তবিদ্রধিমাহ। দন্তমাংসমলৈঃ সাস্রৈর্বাহ্যান্তঃশ্বযথুর্মহান্। সদাহ রুক্ স্রবেদ্ভিন্নঃ পূয়াস্রং দন্তবিদ্রধিঃ॥ দন্তমাংসমলৈঃ দন্তবেষ্টগতদোষৈঃ। সাস্রৈঃ সরক্তৈর্হেতুভিঃ॥ * ॥ অথ দন্তবেষ্ট রোগাণাং চিকিৎসা। শীতাদে হৃত রক্তে তোযে নাগর সর্ষপান্।

নিষ্কাথ্য ত্রিফলাঞ্চাপি ধার্য্যাদ্গণ্ডূষ ধারণং॥ কাসীস লোধ্র কৃষ্ণা মনঃশিলা স প্রিয়ঙ্গু তেজাহ্বাঃ। এষাং চূর্ণং মধুযুক্ শীতাদে পূতিমাংসহরং॥ তেজাহ্বা তেজবল্কল ইতি লোকে॥ তৈলং ঘৃতং বা বাতঘ্নং শীতাদে সংপ্রশস্যতে।*। দন্তপুপ্পুটকে কার্য্যং তরুণে রক্ত মোক্ষণং॥ স পঞ্চ লবণঃ ক্ষারঃ স ক্ষৌদ্রঃ প্রতিসারণং। শিরো বিরেকশ্চ হিতো নস্যং স্নিগ্ধঞ্চ ভোজনং।*॥ বিস্রাবিতে দন্তবেষ্টে ব্রণস্তু প্রতিসারয়েৎ। লোধ্র পত্তঙ্গ মধুক লাক্ষা চূর্ণৈ র্মধুপ্লুতৈঃ॥ প্রতিসারয়েৎ অঙ্গুল্যা ঘর্ষয়েৎ। পত্তঙ্গং চোচকং ইতি লোকে॥ গণ্ডূষে ক্ষীরিণো যোজ্যাঃ সক্ষৌদ্র ঘৃত শর্করাঃ। চলদন্ত স্থৈর্য্যকরং কার্য্যং বকুল চর্ব্বণং॥ ভদ্রমুস্তাভয়া ব্যোষ বিড়ঙ্গারিষ্ট পল্লবৈঃ। গোমূত্র পিষ্টৈ গুটিকাং ছায়া শুষ্কাং প্রকল্পয়েৎ॥ তাং নিধায মুখে শোথ শূল দন্তান্তরোনরঃ। নাতঃ পরতরং কিঞ্চিচ্চলদন্তস্য ভেষজং॥ ভদ্রমুস্তাদিবটিকা॥ তুল্যা ঘৃতং নীলসহাচরস্য দ্রোণাম্ভুনা সংশ্রপয়েদ্যথাবৎ। তত শ্চতুর্ভাগ রসেন তৈলং পচেচ্চ তৈ র্বর্দ্ধপলৈ পুন। পৈঃ॥ কল্কৈ রনন্তা খদিরারিমেদ

জম্বাম্র বষ্টী মধুকোৎপলানাং। তৈলেন মাঘেব ধৃতং মুখেন স্থৈর্য্যং দ্বিজানাং বিদধাতি সদ্যঃ ॥ নীলসহাচরঃ নীলপুষ্পকটরৈয়া। অনন্তা দুরালভা তদলাভে যবাসো গ্রাহ্যঃ। অরিমেদো দুর্গন্ধখদিরঃ। সহাচরাদ্যং তৈলং ॥ ॥ শৈষিরে ভূতরক্তে তু লোধ্র মুস্তা রসাঞ্জনৈঃ। সক্ষৌদ্রৈঃ শস্যতে লেপো গণ্ডূষে ক্ষীরিণো হিতাঃ ॥ ॥ ক্রিয়াং পরিদরে কুর্য্যাচ্ছীতাদোক্তাং বিচক্ষণঃ। ॥ সংশোধ্যোভয়তঃ কায়ং শির শ্চোপকুশে তথা ॥ কাকোডুম্বরিকাপত্রৈর্বা বিস্রাবয়েদ্ভিষক্। লবণৈঃ ক্ষৌদ্রযুক্তৈশ্চ সব্যোষৈঃ পরিসারয়েৎ ॥ ॥ শস্ত্রেণোৎকৃত্য বৈদর্ভ দন্তান্ যানি শোধয়েৎ। ততঃ ক্ষারং প্রযুঞ্জীত ক্রিয়াঃ সর্ব্বাশ্চ শীতলাঃ ॥ উদ্ধৃত্যাধিক দন্তন্ত ততো ঽগ্নিমবচারয়েৎ। কৃমিদন্তক বচ্চাত্র বিধিঃ কার্য্যো বিজানতা ॥ ॥ ইদং খলিবর্দ্ধনস্য চিকিৎসা ॥ ॥ ছিন্নাধিমাংসং সক্ষৌদ্রৈ রেভিশ্চূর্ণৈ রুপাচরেৎ। বচা তেজোবতী পাঠা স্বর্জিকা যাব শূকজৈঃ ॥ তেজোবতী তেজবলুল স্বর্ণজীবন্তীতি চ ॥ ক্ষৌদ্র দ্বিতীয়াঃ পিপ্পল্যঃ কবলে চাত্র কীর্ত্তিতাঃ।

পটোলনিম্ব ত্রিফলা কষায়শ্চাত্র ধাবনঃ ॥ ॥ নাড়ীব্রণহরং কর্ম্ম দন্তনাড়ীষু কারয়েৎ। যদ্দন্ত মধ্যে জায়েত নাড়ীরন্তং তদুদ্ধরেৎ ॥ ছিত্ত্বা মাংসানি শস্ত্রেণ যদি নোপরিতো ভবেৎ। উদ্ধৃত্য চ দহেচ্চাপি ক্ষারেণ জ্বলনেন বা ॥ ভিনত্ত্যুপেক্ষিতে দন্তে হনকাস্থি গতিং ধ্রুবং। সমূলং দশনং তস্মাদুদ্ধরেচ্ছ্য নষ্টি চ। উদ্ধৃতে তূত্তরে দন্তে শোণিতং প্রস্রবেদতি। রক্তাভিষঙ্গাৎ প্রদ্বা ঘোরা রোগা ভবন্তি হি ॥ কাণঃ সংজায়তে জন্তু র্দিক্তং তস্য জায়তে। চল মপ্যুত্তরং দন্ত মতো নৈবোদ্ধরেৎ ভিষক্ ॥ ধাবনং জাতি মদন স্বাদু কণ্টক খাদিরৈঃ। কষাৈয় রিতিশেষঃ। কষায়ৈ জাতি মদন কণ্টকী স্বাদুকণ্টকৈঃ ॥ মঞ্জিষ্ঠা লোধ্র খদির যষ্ট্যাহ্বৈ শ্চাপি সংকৃতং। তৈলং তৎ সাধিতং তত্র হন্যাৎ দন্তগতাং গতিং ॥ জাত্যাদি চতুষ্টয়স্য কষায়েণ মঞ্জিষ্ঠাদি চতুষ্টয়স্য চ কষায়েণ তৈলমিদং পচেৎ। জাতিঃ চমেলী ইতি লোকে। তস্যাঃ পত্রং গ্রাহ্যং মিদং নো খজুর তস্যাপি পত্র মত্রগ্রাহ্যং। কণ্টকী বৃহৎকটাই তস্যা মূলং গ্রাহ্যং। স্বাদুকণ্টকো

গোক্ষুর স্তন্য পঞ্চাঙ্গং গুহ্যং। জা-
ত্যাদিতৈলং॥ ✲ ॥ বিদগ্ধযুক্ত বিধিং
যুক্তং বিদগ্ধ্যাদ্দন্তবিদুগ্ধে। শস্ত্রকর্ম্ম
ন্নর স্তত্র স্থশলেনৈব কারয়েৎ॥ ✲ ॥
॥ ✲ ॥ অথ দন্তরোগাঃ। তত্র রো-
গাণাং নামানি সংখ্যাশ্চাহ। দাল-
নঃ কথিতঃ পূর্ব্বং কৃমিদন্তক এব চ।
[illegible]ক্তো ভঞ্জনকো দন্তহর্ষো বৈ দন্ত
শর্করা॥ কপালিকাত্র কথিতা শ্যা
বদন্তক এব চ। করাল সংজ্ঞ ইত্য
ষ্টৌ দন্তরোগাঃ প্রকীর্ত্তিতাঃ॥ ✲ ॥
[illegible] দালনমাহ। দীর্য্যমা-
[illegible] রুজা যত্র দন্তেষু জায়তে।
[illegible] নাম স ব্যাধিঃ সদাগতি
নিমিত্তজঃ॥ ✲ ॥ কৃমিদন্তক মাহ।
[illegible] চলঃ স্রাবী সসংরম্ভো মহা-
রুজঃ। অনিমিত্তরুজো বাতাৎ স
বিজ্ঞেয়ঃ কৃমিদন্তকঃ॥ সসংরম্ভঃ দন্ত
মূলশোথযুক্তঃ। তত্রৈব স্রাবো বো-
দ্ধব্যঃ। অনিমিত্তরুজঃ অবঘটনাদি
নিমিত্তং বিনৈব মহারুজাবান্॥ ✲ ॥
ভঞ্জনক মাহ। বক্ত্রং বক্রং ভবেদ্যত্র
দন্ত ভঙ্গশ্চ জায়তে। কফ বাত কৃ-
তো ব্যাধিঃ স ভঞ্জনক সংজ্ঞক
॥ ✲ ॥ দন্তহর্ষ মাহ। শীত রুক্ষ
প্রবাতাম্ল স্পর্শানা নসহা দ্বিজাঃ।
যত্র স্যু র্বাত পিত্তাভ্যাং দন্তহর্ষঃ স

কীর্ত্তিতঃ॥ ✲ ॥ দন্তশর্করা মাহ।
মলো দন্তগতো যস্তু কফ শ্চানিল-
শোষিতঃ। শর্করেব খরস্পর্শঃ সা-
জ্ঞেয়া দন্তশর্করা॥ শর্করা সিকতা
॥ ✲ ॥ কপালিকা মাহ। কপালেষ্বি-
ব দীর্য্যৎসু দন্তেষু সমলেষু চ। ক-
পালিকেতি বিজ্ঞেয়া দন্ত ছিৎ দন্ত-
শর্করা॥ কপালানি মৃন্ময় ঘটাদি
ঘটকানি তেষ্বিব। সমলেষু দন্তেষু ম-
লসহিত দন্তাবয়বেষু দীর্য্যৎসু যা দন্ত-
শর্করা সা কপালিকেতি বিজ্ঞেয়া।
সা কপালিকা সমাহিৎ দন্তনাশিনী
॥ ✲ ॥ শ্যাবদন্তক মাহ। যো হসৃঙ্মি-
শ্রেণ পিত্তেন দগ্ধো দন্ত স্ত্বশেষতঃ।
শ্যাবতাং নীলতাং বাপি গতঃ স
শ্যাবদন্তকঃ॥ দগ্ধঃ দগ্ধ ইব॥ ✲ ॥
করালমাহ। শনৈঃ শনৈঃ প্রকুরুতে
যত্র দন্তাশ্রিতো হনিলঃ। করালান্
বিকটান্ দন্তান্ স করালো ন সিধ্য-
তি॥ করালান্ ভয়ানকান্। অয়ং
সুশ্রুতেনোক্তঃ। সংগ্রহকারেণ গৃহী-
তশ্চ॥ ✲ ॥ অথ দন্তরোগাণাং চি-
কিৎসা। তৈলং লাক্ষারসং ক্ষীরং
পৃথক্ প্রস্থ মিতং পচেৎ। দ্রব্যৈঃ প-
লমিতৈ রেতৈঃ ক্বাথে শ্চাপি চতুর্গু-
ণৈঃ॥ লোধ্র কট্‌ফল মঞ্জিষ্ঠা পদ্ম-
কেশর পদ্মকৈঃ। চন্দনোৎপল য-

ষ্ট্যাশ্বে স্তৈলং বদনে ধৃতং ॥ কটফলস্থানে পভঙ্গ ইতি চ পাঠঃ॥ দালনং দন্তচালঞ্চ দন্তমোক্ষং কপালিকা। শীতাদং পূতিবক্তুঞ্চ বিরুচি বিরস্যাস্যতাং ॥ হন্যাদাশু গদানেতান্ অর্য্যাদ্দন্তানপি স্থিরান্। লাক্ষাদিকমিদং তৈলং দন্তরোগেষু পূজিতং ॥ লাক্ষাদ্যংতৈলং॥ ॥ জয়েদ্বিস্রাবণৈঃ স্বিন্ন মচলং কৃমিদন্তকং। তথাবপীড়ৈ র্বাতঘ্নৈঃ স্নেহ গণ্ডূষ ধারণৈঃ ॥ ভদ্রদার্ব্বাদি বর্ষা ভু লেপৈঃ স্নিগ্ধৈশ্চ ভোজনৈঃ। কৃমিদন্তাপহং কোষ্ণং হিঙ্গু দন্তান্তরে স্থিতং ॥ বৃহতী ভূমিকদম্বী পঞ্চাঙ্গুল কণ্টকারিকা ক্বাথঃ। গণ্ডূষ স্তৈল যুতঃ কৃমিদন্তকবেদনাশমনঃ ॥ নীলী বায়সজঙ্ঘা কটুতুম্বী মূলমেকৈকং। সঞ্চর্ব্য দশন বিধৃতং দশনকৃমি পাতনং প্রাহুঃ॥ ॥ স্নেহানাং কবলাঃ কোষ্ণাঃ সর্পিষ স্ত্রৈবৃতস্য চ। নিরূহা শ্চানিলঘ্নানাং দন্তহর্ষ প্রমর্দ্দনাঃ ॥ ত্রৈবৃতস্য সর্পিষঃ ত্রিবৃতা পক্বস্য সর্পিষঃ কবল ইত্যর্থঃ ॥ স্নৈহিকো হত্র হিতো ধূমো নস্যং স্নৈহিকমেব চ। পেয়া রসা যবাগ্বশ্চ ক্ষীরসন্তানিকা ঘৃতং ॥ শিরোবস্তি হিতশ্চাপি ক্রমো য শ্চানিলাপহঃ। অত্র দন্তহর্ষে॥ ॥ অচ্ছিদ্রং দন্তমূলানি শর্করা মুদ্ধরেৎ ভিষক্। লাক্ষাচূর্ণৈ র্মধুযুতৈ স্তত স্তাং প্রতিসারয়েৎ ॥ দন্তহর্ষ ক্রিয়াং চাত্র অর্য্যাদিরবশেষতঃ। কপালিকা কৃচ্ছ্রতমা তত্রাপেপ্যেষা ক্রিয়া হিতা ॥ অত্র দন্তশর্করায়াং। এষা ক্রিয়া দন্তহর্ষক্রিয়া ॥ ॥ ফলান্যম্লানি শীতাম্বু রুক্ষান্নং দন্তধাবনং। তথাতি কঠিনং ভক্ষ্যং দন্তরোগী বিবর্জ্জয়েৎ ॥ ॥ ॥ ॥ অথ জিহ্বারোগাঃ। তত্র জিহ্বারোগাণাং নিদান নাম সংখ্যাঃ প্রাহ ॥ বাতজঃ পিত্তজ শ্চাপি কফজো হলাস সংজ্ঞকঃ। উপজিহ্বিকা চ গদা জিহ্বায়াং পঞ্চ কীর্ত্তিতাঃ ॥ ॥ তত্র বাতজস্য লক্ষণমাহ। জিহ্বানিলেন স্ফুটিতা প্রসুপ্তা ভবেচ্চ শাকচ্ছদন প্রকাশা। স্ফুটিতা মনাগ্বিদীর্ণা। প্রসুপ্তা রসানভিজ্ঞতয়া সুপ্তেব। শাকচ্ছদন প্রকাশা কাসঘ্ন ভূমিজো দ্রুম স্তদ্বৎ রুক্ষকণ্টক চিতা ॥ ॥ পিত্তজ মাহ। পিত্তাৎ সদাহৈ রুপচীয়তে চ। দীর্ঘৈঃ সরক্তৈ রপি কণ্টকৈশ্চ ॥ অযং রোগো লোকে জলী ইতি খ্যাতঃ॥ ॥ কফজ মাহ। কফেন গুর্ব্বী বহলা চিতা চ মাংসোচ্ছ্রয়ৈঃ শাল্মলি কণ্টকাভৈঃ। বহলাঃ স্থূলাঃ মাংসোচ্ছ্রয়ৈঃ মাংসজকণ্টকৈঃ

॥ * ॥ অলাস মাহ । জিহ্বাতলে
যঃ শ্বযথুঃ প্রগাঢ়ঃ সো হলাস সংজ্ঞঃ
কফ রক্ত মূর্ত্তিঃ । জিহ্বা মরুঃ স্তম্ভ
যতি প্রবৃদ্ধো মূলে চ জিহ্বা ভূশংমে
তি পাকং ॥ প্রগাঢ়ঃ প্রকর্ষেণ গাঢ়ো
দারুণঃ । কফরক্তমূর্ত্তিঃ কফ রক্তা
ভ্যাং মূর্ত্তির্যস্য কফরক্তজ ইত্যর্থঃ ।
জিহ্বা স্তম্ভেন বায়ু রপ্যত্র বোদ্ধব্যঃ
। ভূশপাকেন পিত্তঞ্চ । অত স্ত্রি
দোষোয মসাধ্যত্বঞ্চাস্য ॥ * ॥ উ
পজিহ্বিকা মাহ । জিহ্বাগ্র রূপ শ্ব
যথু হি জিহ্বা মুন্নাম্য জাতঃ কফ
পিত্ত যোনিঃ । প্রসেক কণ্ডূপরি দাহ
যুক্তঃ প্রকথ্যতে হসাবুপজিহ্বিকে
তি ॥ জিহ্বাগ্ররূপো জিহ্বাগ্রাকৃতিঃ
॥ * ॥ অথ জিহ্বারোগাণাং চিকিৎ
সা । জিহ্বাগত বিকারাণাং শস্তং
শোণিত মোক্ষণং । গুড়ূচী পিপ্পলী
নিম্ব কবলৈঃ কটুভিঃ সুখঃ ॥ ওষ্ঠ প্র
কোপে হনিলজে যদুক্তং প্রাক্ চি
কিৎসিতং । কণ্ঠকেষ্বনিলোত্থেষু
তৎকার্য্যং ভিষজা খলু ॥ পিত্তজে
পরিঘৃষ্টে তু নিঃসৃতে দুষ্ট শোণিতে ।
প্রতিসারণ গণ্ডূষ নস্যানি মধুর
হিতং ॥ কণ্টকেষু কফোত্থেষ লি
খিতেষ্বসৃজঃ ক্ষয়ে । পিপ্পল্যাদি ম
ধুযুতঃ কার্য্যন্তু প্রতিসারণং ॥ উপ



জিহ্বাস্তু সংলিখ্য ক্ষারেণ প্রতিসা
রয়েৎ ॥ শিরোবিরেক গণ্ডূষ ধূম
শ্চৈনা মুপাচরেৎ ॥ ব্যোষ ক্ষারা
ভয়া বহ্নি চূর্ণমেতৎ প্রঘর্ষণং । উপ
জিহ্বা প্রশান্ত্যর্থ মেভি স্তৈলঞ্চ পা
চয়েৎ ॥ * । * ॥ অথ তালুরোগাঃ
। তত্র তালুরোগাণাং নামানি সং
খ্যাঞ্চাহ । গলশুণ্ডী তুণ্ডিকের্য্য ধ্রুষঃ
কচ্ছপ এব চ । তাল্বর্ব্বুদশ্চ কথিতো
মাংস সংঘাত এব চ ॥ তালু পুপ্পুট
নামা চ তালুশোষ স্তথৈব চ । তালু
পাকশ্চ কথিতা স্তালুরোগা অমী
নব ॥ * ॥ তত্র গলশুণ্ডী লক্ষণ মাহ
। শ্লেষ্মাসৃগ্ভ্যাং তালু মূলাৎ প্রবৃদ্ধো
দীর্ঘঃ শোথো ধ্মাত বস্তি প্রকাশঃ ।
তৃষ্ণা কাস শ্বাস কৃষ্টং বদন্তি বৈদ্যাঃ
ব্যাধিং কণ্ঠশুণ্ডীতি নাম্না ॥ ধ্মাত
বস্তিপ্রকাশঃ বাতপূরিত চর্ম্মপুট
তুল্যঃ ॥ * ॥ তুণ্ডিকেরী মাহ ।
শোথঃ স্থূল স্তোদ দাহ প্রপাকী
প্রাগুক্তাভ্যাং তুণ্ডিকেরী মতা তু ।
প্রাগুক্তাভ্যাং শ্লেষ্মাসৃগ্ভ্যাং । তুণ্ডি
কেরী বনকার্পাসীফলং তত্তুল্যেতি
॥ * ॥ অধ্রুষমাহ । শোথ স্তব্ধো
লোহিতঃ শোণিতোত্থো জ্ঞেয়ো হ
ধ্রুষঃ সজ্বর স্তীব্র রুক চ ॥ * ॥ কচ্ছ
পমাহ । কূর্ম্মোৎসন্নো বেদনো শী

স্তুজন্মা রোগো জ্ঞেয়ঃ কচ্ছপঃ শ্লেষ্ম-ণা স্যাৎ। কুর্ম্মোৎ সন্নঃ মধ্যে প্রো-চ্চং প্রান্তে নতঃ ॥ ❋ ॥ তাল্বর্ব্বুদমাহ। পদ্মাকারং তালু মধ্যে তু শোথং বিদ্যাদ্রক্তাদর্ব্বুদং পিত্ত লিঙ্গং। প-দ্মাকারং পদ্মকর্ণিকা কেশরৈ রিব পার্শ্বতো দীর্ঘ মাংসাঙ্কুরৈ র্বেষ্টিতং ॥ ❋ ॥ মাংসসংঘাতমাহ। দুষ্টং মাংসং শ্লেষ্মণা নীরুজঞ্চ। তাল্বন্তস্থং মাংস সংঘাত মাহ ॥ ❋ ॥ তালু পুপ্পুটমাহ। নীরুক্ স্থায়ী কোল-মাত্রঃ কফাত্মা। মেদো যুক্তঃ পুপ্পুট স্তালুদেশে ॥ ❋ ॥ তালুশোষমাহ। শোষো হত্যর্থং দীর্য্যতে চাপি তালুঃ শ্বাসো বাতাত্তালুশোষোয মুক্তঃ ॥ ❋ ॥ তালুপাকমাহ। পি-ত্তং জর্য্যাৎ পাকমত্যর্থ ঘোরং তা-লুন্যেনং তালু পাকং বদন্তি ॥ ❋ ॥ অথ তালুরোগাণাং চিকিৎসা। অঙ্গুষ্ঠোষণ বচা সিন্ধু কণা পাঠা প্লবৈঃ সহ। সক্ষৌদ্রৈ র্ভিষজা কার্য্যং গল শুণ্ডী প্রঘর্ষণং ॥ প্লবঃ কেবচীমোথ শুডতচী ইতি চ লোকে ॥ অঙ্গুষ্ঠাঙ্গু-লি সন্দংশেনাকৃষ্য গলশুণ্ডিকাং। ছেদয়েন্মণ্ডলাগ্রেণ জিহ্বোপরি তু সংস্থিতাং ॥ মণ্ডলাগ্রেণ শস্ত্রবিশে-ষেণ ॥ অতিচ্ছেদাৎ স্রবেদ্রক্তং ততো হেতো র্ম্রিয়েত চ। হীন চ্ছেদাদ্ভবেৎ শোথো লালাস্রাবো ভ্রম স্তথা ॥ ত-স্মাদ্বৈদ্যঃ প্রযত্নেন দৃষ্টকর্ম্মা বিশা-রদঃ। গলশুণ্ডী তু সংছিদ্য জর্য্যাৎ প্রাপ্তা মিমাং ক্রিয়াং ॥ পিপ্পল্যতি-বিষা কুষ্ঠ বচা মরিচ নাগরৈঃ। ক্ষৌ-দ্রযুক্তৈঃ সলবণৈ স্তত স্তাং প্রতিসার-য়েৎ ॥ বচা মতিবিষা পাঠা রাস্না কটুকরোহিণীঃ। নিষ্কাথ্য পিচমর্দ্দঞ্চ কবলং তত্র কারয়েৎ ॥ তুণ্ডিকের্য্যধু-ষে কূর্ম্মে সংঘাতে তালুপুপ্পুটে। এষ এব বিধিঃ কার্য্যো বিশেষঃ শস্ত্র ক-র্ম্মণি ॥ তালু পাকে তু কর্ত্তব্যং বিধা-নং পিত্তনাশনং। স্নেহ স্বেদৌ তালু শোষে বিধিশ্চানিল নাশনঃ ॥ ❋ ॥ ॥ ❋ ॥ অথ গলরোগাঃ। তত্র গল-রোগাণাং নামানি সংখ্যাঞ্চাহ। রোহিণী পঞ্চধা প্রোক্তা কণ্ঠশালূক এব চ। অধিজিহ্বশ্চ বলয়ো হলাস নামৈকবৃন্দকঃ। ততো বৃন্দঃ শতঘ্নী চ গিলায়ুঃ কণ্ঠবিদ্রধিঃ। গলৌঘঃ প্র-স্বরঘ্নশ্চ মাংসতান স্তথৈব চ। বি-দারী কণ্ঠদেশে তু রোগা অষ্টাদশ স্মৃতাঃ। ❋ ॥ তত্র পঞ্চানামপি রো-হিণীনাং সামান্য সংপ্রাপ্তি মাহ। গলে হনিলঃ পিত্ত কফৌ চ মূর্চ্ছিতৌ প্রদূষ্য মাংসঞ্চ তথৈব শোণিতং

ঙ্গলোপসংরোধকরৈ স্তথাঙ্কুরৈ র্নিহন্ত্যসূন্ ব্যাধি রয়ং হি রোহিণী ॥ অনিলঃ মূর্চ্ছিতঃ প্রবৃদ্ধঃ। পিত্তকফৌ চ মূর্চ্ছিতৌ পিত্তং বা মূর্চ্ছিতং কফো বা মূর্চ্ছিতঃ। নন্ত্রয়োপি মূর্চ্ছিতাঃ পৃথগ্দোষজায়া অবিবক্ষমাণত্বাৎ ॥ * ॥ তস্য বাতজায়া লক্ষণ মাহ। জিহ্বা সমন্তাদ্ভৃশ বেদনাস্ত মাংসাঙ্কুরাঃ কণ্ঠ নিরোধনাঃ স্যুঃ। সা রোহিণী বাত কৃতা প্রদিষ্টা বাতাত্মকোপদ্রব গাঢ় যুক্তা ॥ সমন্তাৎ জিহ্বায়াঃ সর্বতঃ। বাতাত্মকোপদ্রব গাঢ় যুক্তা স্তম্ভাদিভি রতিশয়েন যুক্তা ॥ * ॥ পিত্তজামাহ। ক্ষিপ্রোদ্গমাক্ষি প্রবিদাহ পাকা তীব্রজ্বরা পিত্ত নিমিত্ত জাতা। * । শ্লেষ্মজামাহ। স্রোতো নিরোধিন্যপি মন্দ পাকা গুর্বী স্থিরা সা কফ সম্ভবা তু। স্রোতো হত্র কণ্ঠস্রোতঃ ॥ * ॥ সন্নিপাতজামাহ। গম্ভীর পাকিন্য নিবার্য্য বীর্য্যা ত্রিদোষ লিঙ্গা ত্রিভবাদ্ভবেৎ সা ॥ * ॥ রক্তজামাহ। স্ফোটৈ শ্চিতা পিত্ত সমান লিঙ্গা সাধ্যা প্রদিষ্টা রুধিরাত্মিকা তু। *। রক্তজেতরা সংহারকত্বাবধি মাহ। সদ্য স্ত্রিদোষজা হন্তি ত্র্যহাৎ কফ সমুদ্ভবা। পঞ্চাহাৎ পিত্ত সংভূতা সপ্তাহাৎ পবনোত্থিতা ॥ * ॥ কণ্ঠশালূকমাহ। কোলাস্থিমাত্রঃ কফ সম্ভবো যো গ্রন্থি র্গলে কণ্টকশূক ভূতঃ। খরঃ স্থিরঃ শস্ত্র নিপাত সাধ্য স্তং কণ্ঠশালূক মিতি ব্রুবন্তি। কণ্টক শূকভূতঃ কণ্টক বহুকবচ বেদনাজনকঃ ॥ * ॥ অধিজিহ্বামাহ। জিহ্বাগ্ররূপঃ শ্বয়থুঃ কফাত্তু জিহ্বো পরিষ্টাদসৃজৈব মিশ্রাৎ। জ্ঞেয়ো হধিজিহ্বঃ খলু রোগ এষ বিবর্জ্জয়েদাগত পাক মেনং ॥ অসৃজা মিশ্রাদেবেত্যন্বয়ঃ ॥ * ॥ বলয়মাহ। বলাশ এবায়ত মুন্নতঞ্চ শোথং করোত্যন্ন গতিং নিবার্য্য। তং সর্ব থৈবাপ্রতিবার্য্য বীর্য্যং বিবর্জ্জনীয়ং বলয় বদন্তি ॥ * ॥ অলাসমাহ। গলে তু শোথং হরুতঃ প্রবৃদ্ধৌ শ্লেষ্মানিলৌ শ্বাস রুজোপপন্নং। মর্ম্মচ্ছিদং দুস্তর মেতদাহু রলাস সংজ্ঞং ভিষজো বিকারং ॥ মর্ম্মচ্ছিদং হৃদয়মর্ম্মনি ছেদেনেব বেদনাজনকং ॥ * ॥ একবৃন্দমাহ। বৃত্তোন্নতো হন্তঃ শ্বয়থুঃ সদাহঃ সকণ্ডুরো পাক্য মৃদু র্গুরুশ্চ। নাম্নৈকবৃন্দঃ পরিকীর্ত্ত্যতে হসৌ ব্যাধি র্বলাশঃ ক্ষতজ প্রসূতঃ ॥ অন্তঃ গলমধ্যে। অপাকী ঈষৎপাকী। অমৃদুঃ ঈষন্মৃদুঃ ॥ * ॥ বৃন্দমাহ।

সমুন্নতং বৃন্দ মমন্দদাহং তীব্রজ্বরং
বৃন্দ মুদাহরন্তি। তচ্চাপি পিত্তক্ষ-
তজ প্রকোপাদ্বিদ্যাৎ সতোদং প-
বনাত্মকন্তু ॥ * ॥ শতঘ্নীমাহ। বর্ত্তি
র্ঘনা কণ্ঠ নিরোধিনীতু চিতাতিমাত্রং
পিশিতং প্ররোহৈঃ। অনেকরুক্
প্রাণহরী ত্রিদোষা জ্ঞেয়া শতঘ্নী
সদৃশী শতঘ্নী ॥ ঘনা কঠিনা। অনে-
করুক্ বাত পিত্ত কফজ তোদ দাহ
কণ্ড্বাদি যুক্তা। শতঘ্নী সদৃশী লৌহ
কণ্টক সংছন্না শতঘ্নী মহতী শিলা
তত্তুল্যা যতঃ প্রাণহরী ॥ * ॥ গি
লায়ুমাহ। গ্রন্থি গলে ত্বামলকাস্থি
মাত্রঃ স্থিরো ২ল্পরুক্ স্যাৎ কফ
রক্ত মূর্ত্তিঃ। সংলক্ষ্যতে সক্ত মিবা
সিতঞ্চ সশস্ত্র সাধ্যস্তু গিলায়ু সং-
জ্ঞঃ ॥ * ॥ গলবিদ্রধি মাহ। সর্ব্বং
গলং ব্যাপ্য সমুত্থিতো যঃ শোথো
রুজঃ সন্তি চ যত্র সর্ব্বাঃ। স সর্ব্বদো-
ষৈ গল বিদ্রধিস্তু তস্যৈব তুল্যঃ খলু
সর্ব্বজস্য ॥ * ॥ গলৌঘমাহ। শো-
থো মহান্ যস্তু গলাবরোধী তীব্রজ্ব-
রো বায়ুগতে র্নিহন্তা। কফেন জাতো
রুধিরান্বিতেন গলে গলৌঘঃ পরি
কীর্ত্ত্যতে ২সৌ ॥ বায়ুগতে র্নিহন্তা
উদান বায়ু গতিরোধকঃ ॥ * ॥ স্ব
রঘ্নমাহ। য স্তাম্যমানঃ শ্বসিতি
প্রসক্তং ভিন্নস্বরঃ শুষ্ক বিমুক্ত কণ্ঠঃ।
কফোপদিগ্ধে ষ্বনিলায়নেষু জ্ঞেয়ঃ
স রোগঃ শ্বসনাৎ স্বরঘ্নঃ ॥ তাম্যমান
স্তমঃ পশ্যন্। শুষ্কবিমুক্তকণ্ঠঃ শুষ্কো
বিমুক্তো২স্বাধীনঃ কণ্ঠো যস্য সঃ। অ-
স্বাধীনতা ভুক্তং গিলিতু মশক্যত্বাৎ
। অনিলায়নেষু বায়ুবর্ত্মসু শ্বসনাৎ
বাতাৎ ॥ * ॥ মাংসতানমাহ। প্র-
তানবান্ যঃ শ্বয়থুঃ সুকষ্টো গলোপ-
রোধং কুরুতে ক্রমেণ। স মাংসতানঃ
কথিতাবলম্বী প্রাণ প্রণুৎ সর্ব্বকৃতো
বিকারঃ ॥ প্রতানবান্ বিস্তারবান্।
সুকষ্টঃ অতিশয়িতং কষ্টং যত্র সঃ
॥ * ॥ বিদারীমাহ। সদাহতোদং
শ্বয়থুং সুতাম্র মন্তর্গলে পূতি বিশীর্ণ
মাংসং। পিত্তেন বিদ্যাদ্বদনে বিদা-
রীং পার্শ্বং বিশেষাৎ স তু যেন শে-
তে ॥ পার্শ্বে বিশেষাৎ সত যেন
শেতে স পুরুষো যেন পার্শ্বেন বি-
শেষাদ্বাহুল্যের্ন শেতে তস্মিন্ পার্শ্বে
সা বিদারী ভবতি ইত্যর্থঃ ॥ * ॥
অথ গলরোগাণাং চিকিৎসা। রো-
হিণীনান্তু সাধ্যানাং হিতং শোণিত
মোক্ষণং। বমনং ধূমপানঞ্চ গণ্ডূষো
নস্যকর্ম্ম বা ॥ বাতজান্তু হৃতে রক্তে
লবণৈঃ প্রতিসারয়েৎ। সুখোষ্ণান্
স্নেহ গণ্ডূষান্ ধারয়েচ্চাপ্য ভীক্ষ্ণশঃ॥

বিস্রাব্য পিত্ত সংভূতাং সিতা ক্ষৌদ্র প্রিয়ঙ্গুভিঃ। ঘর্ষযেৎ কবলো দ্রাক্ষা পরূষৈঃ ক্বথিতৈ র্হিতঃ॥ আগার ধূম কটুকৈঃ কফজাং প্রতিসারয়েৎ। আগারধূমঃ ঝুল ইতি লোকে। কটুকানি শুণ্ঠী পিপ্পলী মরিচানি॥ শ্বেতা বিড়ঙ্গ দন্তীষু তৈলং সিদ্ধং সসৈন্ধবং। নস্যকর্ম্মণি দাতব্যং কবলে চ কফোদযে॥ শ্বেতা অপরাজিতা॥ পিত্তবৎ সাধয়েদ্বৈদ্যো রোহিণীং রক্ত সংভবাং। বিস্রাব্য কণ্ঠশালূকং সাধয়েত্তুণ্ডিকেরিবৎ॥ এককালং যবান্নং বা ভুঞ্জীত স্নিগ্ধ মল্পশঃ। উপজিহ্বকবচ্চাপি সাধয়েদধিজিহ্বকং॥ একবৃন্দন্তু বিস্রাব্য বিধিং শোধন মাচরেৎ। একবৃন্দ মিবপ্রাযো বৃন্দঞ্চ সমুপাচরেৎ॥ গিলাযু শ্চাপি যো ব্যাধি স্তঞ্চ শস্ত্রেণ সাধয়েৎ। অমর্মস্থং সুসম্পক্বং ছেদয়েৎ গলবিদ্রধিং॥ ❀॥ অথ সামান্যানাং কণ্ঠরোগাণাং চিকিৎসা। কণ্ঠরোগে স্বসৃঙ্মোক্ষে স্তীক্ষ্ণৈ নস্যাদি কর্ম্মভিঃ। চিকিৎসকশ্চি কিৎসান্ত দশনোত্র সমাচরেৎ॥ ক্বাথং দদ্যাচ্চ দার্ব্বীত্বঙ্ নিম্ব তার্ক্ষ্য কলিঙ্গজং। হরীতকী কষাযো বা হিতো মাক্ষিক সংযুতঃ॥ কটুকা তিবিষা দারু পাঠা মুস্তা কলিঙ্গকাঃ। গোমূত্র ক্বথিতাঃ পীতাঃ কণ্ঠরোগ বিনাশনাঃ॥ মৃদ্বীকা কটুকা ব্যোষ দার্ব্বীত্বক্ ত্রিফলা ঘনং। পাঠাং রসাঞ্জনং দারু তেজোহ্বেতি সুচূর্ণিতং॥ ক্ষৌদ্র যুক্তং বিধাতব্যং গলরোগে মহৌষধং। রোগা স্তেতে ত্রযঃ প্রোক্তা বাত পিত্ত কফাপহাঃ॥ যবাগ্রজং তেজবতীঞ্চ পাঠাং রসাঞ্জনং দারু নিশাং সকৃষ্ণাং। ক্ষৌদ্রেণ কুর্য্যাৎ গুটিকাং মুখেন তাং ধারয়েৎ সর্ব্ব গলাময়েষু॥ ❀। ❀॥ অথ সমস্ত মুখরোগাঃ। তত্র তেষাং নিদানং সংখ্যাঞ্চাহ। পৃথগ্দোষৈ স্ত্রযো রোগাঃ সমস্ত মুখজাঃ স্মৃতাঃ। তত্র বাতিকস্য লক্ষণঞ্চাহ। স্ফোটৈঃ সতোদৈ র্বদনং সমন্তাদ্যত্রাচিতং সর্ব্ব সরঃ সবাতাৎ॥ ❀॥ পৈত্তিকমাহ। রক্তৈঃ সদাহৈঃ পিড়কৈঃ সুপীতৈ র্যত্রাচিতং চাপি স পিত্ত কোপাৎ॥ ❀॥ শ্লৈষ্মিকমাহ। অবেদনৈঃ কণ্ডুযুতৈঃ সবর্ণৈর্যত্রাচিতং চাপি স বৈ কফেন। অবেদনৈঃ ঈষদ্বেদনৈঃ। যত উক্তং সুশ্রুতেন। অল্পবেদনৈ রিতি॥ ❀॥ মুখরোগেষ্বসাধ্যানাহ। ওষ্ঠপ্রকোপে বর্জ্জ্যাঃ স্যু মাংস রক্ত ত্রিদোষজাঃ। দন্তবেষ্টেষু বর্জ্জ্যো তু

ত্রিলিঙ্গগতি শৌষিরো ॥ ত্রিলিঙ্গগতিঃ ত্রিদোষজা নাড়ী । মহাশৌষিরশ্চ ॥ দন্তেষু চ ন সিধ্যন্তি স্যাবর্দালস ভঞ্জনাঃ । জিহ্বারোগে ষ্বালসস্ত তালুজেষ্বর্বুদ স্তথা ॥ স্বরঘ্নো বলযো বৃন্দো বলাশঃ সহি দারুণঃ । গলোঘো মাংসতানশ্চ শতঘ্নী রোহিণী গলে ॥ অসাধ্যাঃ কীর্ত্তিতা হ্যেতে রোগা দশ নবোত্তরাঃ । তেষু চাপি ক্রিয়াং বৈদ্যঃ প্রত্যাখ্যায সমাচরেৎ ॥ ॥ অথ সমস্ত মুখ রোগাণাং চিকিৎসা । বাতাৎ সর্ব্বসরং চূর্ণৈর্লবণৈঃ প্রতিসারযেৎ । তৈলং বাত হরৈঃ সিদ্ধং হিতং কবল নস্যযোঃ ॥ ॥ পিত্তাত্মকে সর্ব্ব সরে শুদ্ধ কাযস্য দেহিনঃ । সর্ব্ব পিত্তহরঃ কার্য্যো বিধি র্মধুর শীতলঃ ॥ ॥ প্রতিসারণ গণ্ডূষ ধূম সংশোধনানি চ । কফাত্মকে সর্ব্বসরে ক্রমং কুর্য্যাৎ কফাপহং ॥ ॥ মুখ পাকে সিরাবেধঃ শিরসশ্চ বিরেচনং । মধু মূত্র ঘৃত ক্ষীরৈঃ শীতৈশ্চ কবলগ্রহঃ ॥ ১ ॥ জাতী পত্রা মৃতা দ্রাক্ষা যাস দার্ব্বী ফলত্রিকৈঃ । ক্বাথঃ ক্ষৌদ্রযুতঃ শীতো গণ্ডূষো মুখপাকনুৎ ॥ ২ ॥ কার্য্যশ্চ বহুধা নিত্যং জাতীপত্রস্য চর্ব্বণং । কৃষ্ণ



জীরক কুষ্ঠেন্দ্রযব চর্ব্বণন্ত ত্র্যহাৎ ॥ মুখপাক ব্রণ ক্লেদ দৌর্গন্ধ্য মুপশাম্যতি । ৩ । পটোল নিম্ব জম্ব্বাম্র মালতী নব পল্লবৈঃ ॥ পঞ্চপল্লবজঃ শ্রেষ্ঠঃ কষাযো মুখধাবনে । ৪ । পঞ্চপল্লবজঃ ক্বাথ স্ত্রিফলা সম্ভবো হথবা ॥ মুখপাকে প্রযোক্তব্যঃ সক্ষৌদ্রো মুখধাবনে । ৫ । স্বরসঃ ক্বথিতো দার্ব্ব্যা ঘনীভূতো রসক্রিযা ॥ সক্ষৌদ্রা মুখরোগাসৃগ্দোষ নাড়ীব্রণাপহা । ৬ । সপ্তচ্ছদোশীর পটোল মুস্ত হরীতকী তিক্ত করোহিণীভিঃ ॥ যষ্ট্যাহ্ব রাজদ্রুম চন্দনৈশ্চ ক্বাথং পিবেৎ পাকহরং মুখস্য । ৭ । রাজদ্রুমঃ ধনবহেরা ইতি লোকে ॥ তিলা নীলোৎপলং সর্পিঃ শর্করা ক্ষীর মেব চ । ক্ষৌদ্রাক্তো দিগ্ধ কল্কস্য গণ্ডূষো মুখপাকনুৎ ॥ ৮ ॥ আম্রাদিতা সকৃদপি মুখগন্ধং সকল মপনযতি । ভৃঙ্গীজপরফলজা প্রবল মবাধ্যঞ্চ নাশযতি ॥ ৯ ॥ হরিদ্রাং নিম্বপত্রাণি মধুকং নীল মুৎপলং । তৈল মেভি র্বিপক্বন্তু মুখপাকহরং পরং ।১০॥ যষ্ঠীমধুপলমেকং ত্রিংশন্নীলোৎপলস্য তৈলস্য । প্রস্থং তদ্দ্বিগুণ পযো বিধিনা পক্বং তু নস্যেন ॥ নিশি বদনস্য নূনং ক্ষপযতি গাত্রস্য দোষ

সংঘাতঃ। কচথর্ত্তিমবশ্যং ক্রমশো হস্ত্যঙ্গেন জন্তুনা ॥ ১১ ॥ ইতি মুখরোগাধিকারঃ। ইতি ভাবপ্রকাশঃ॥ *। *॥ অপিচ। তণ্ডুলীয়ক গোক্ষুর মূলং পীতং পয়োন্বিতং। কামলাদিহরং প্রোক্তং মুখরোগহরং তথা ॥১২॥ শৃঙ্গমূলক শুণ্ঠীনাং ক্ষারো হিঙ্গুল নাগরং। শুষ্কং চতুর্গুণং দদ্যাত্তৈল মেতৈর্বিপাচয়েৎ ॥ বাধির্য্যং কর্ণশূলঞ্চ পূযস্রাবশ্চ কর্ণয়োঃ। পূরণাদস্য তৈলস্য কৃময়ঃ কর্ণয়োঃ খিলাঃ ॥ ক্ষিপ্রং বিনাশ মায়ান্তি শুশ্রাঙ্ক কৃতশেখর। ক্ষারতৈল মিদং শ্রেষ্ঠং মুখ দন্তাময়াপহং ॥ ১৩ ॥ ইতি গারুড়ে ১৮৮। ১৯৮ অধ্যায়ৌ ॥

মুখলাঙ্গলঃ পুং শূকরঃ। ইতি জটাধরঃ ॥

মুখবল্লভঃ পুং দাড়িমবৃক্ষঃ। ইতি শব্দমালা ॥ মুখপ্রিয়ে ত্রি ॥

মুখবাচিকা স্ত্রী অম্বষ্ঠা। ইতি রাজনির্ঘণ্টঃ ॥

মুখবাদ্যং ক্লী বক্রনাদবাদ্যং। বাঁক ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ মুখস্য মুখেনচ বাদ্যঞ্চ ॥

মুখবাসঃ পুং গন্ধতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

মুখবাসনঃ পুং মুখসদ্গন্ধকারকদ্রব্যং। তৎপর্য্যায়ঃ। আমোদী ২। ইত্যমরঃ ॥ দ্বে মুখবাসনবটিকাদৌ। আমোদযুক্তঃ কর্পূরাদি রামোদী ইন্। মুখং বাসয়তি মুখবাসনঃ নন্দ্যাদিত্বাদনঃ। নানা দ্রব্য রচিত একৈকশ এব বা কর্পূরাদিভি মুর্খোপযোগ্য মুখবাসন বটিকাদি রামোদীতি সর্ব্বস্বং। শুভবাসন ইতি পাঠে শুভং মনোহরং বাসনং বাসো যস্য কেশাদেঃ স আমোদীত্যাহু রিতি সুভূতিঃ। ক্ষীরস্বামিনা তু সমাকর্ষাদি চতুষ্টয়েন ইষ্টগন্ধাদি চতুষ্টয়েন চ পর্য্যায দ্বয মাখ্যাতং। শব্দার্ণবে তু। কস্তুরিকায়া মামোদঃ কর্পূরে মুখবাসনঃ। বঙ্গলে স্যাৎ পরিমল শ্চম্পকে সুরভি স্তথা ॥ গন্ধা দ্বিষষ্টি রূপ্যেতে গুণি বৃত্তৌ ত্রিলিঙ্গকা ইতি। ইতি ভরতঃ ॥

মুখবিলুণ্ঠিকা স্ত্রী ছাগী। ইতি শব্দ- ॥

মুখবিষ্টা স্ত্রী তৈলপায়িকা। যথা। বল্গুলিকা মুখবিষ্টা পরোষ্ণী তৈলপায়িকা। ইতি হেমচন্দ্রঃ ॥

মুখশফঃ পুং দুর্ম্মুখঃ। ইতি শব্দমালা ॥

মুখশুদ্ধিঃ স্ত্রী বক্তুশোধনং। যথা। অভাবে দন্তকাষ্ঠানাং প্রতিসিদ্ধ দিনে তথা। অপাং দ্বাদশ গণ্ডূষৈ মুখশুদ্ধি র্বিধীযতে॥ ইত্যাহ্নিক তত্ত্বং॥

মুখশোধনং স্ত্রী ত্বচং। ইতি রাজ নির্ঘণ্টঃ॥

মুখশোধনঃ পুং কটুরসঃ। ইতি হেম- চন্দ্রঃ॥

মুখশোধী পুং জম্বীরঃ। ইতি রাজ- নির্ঘণ্টঃ॥

মুখষীলঃ ত্রি দুর্মুখঃ। ইতি শব্দ- মালা॥

মুখসম্ভবঃ পুং ব্রাহ্মণঃ। ইতি হেম চন্দ্রঃ॥

মুখসরং স্ত্রী তালসুরা। তাড়ী ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ॥

মুখস্রাবঃ পুং লালা। ইতি রাজ- নির্ঘণ্টঃ॥

মুখাগ্নিঃ পুং দাবাগ্নিঃ। যথা। হেম কেলি র্দবো শ্চাথ মৃদাঙ্গঃস্যাদ্দবা- নলঃ। মুখোল্কা ভূতসঞ্চারী মুখা- গ্নি র্ভরযস্মরঃ। ইতি শব্দমালা॥ শবমুখেদত্তবহ্নিঃ। ইতি লোকে। শাস্ত্রে তু শিরঃস্থানে। যথা। দেবা শ্চাগ্নিমুখাঃ সর্ব্বে গৃহীত্বা তু হুতা- শনং। গৃহীত্বা পাণিনা চৈব মন্ত্র মেতদুদীরযেৎ॥ কৃত্বা তু দুষ্কৃতং কর্ম্ম জানতা বাপ্যজানতা। মৃত্যু কাল বশং প্রাপ্য নরং পঞ্চত্ব মা- গতং॥ ধর্ম্মাধর্ম্ম সমাযুক্তং লোভ মোহ সমাবৃতং। দহেযং সর্ব্বগা- ত্রাণি দিব্যান্ লোকান্ স গচ্ছতু॥ এব মুক্ত্বা ততঃ শীঘ্রং কৃত্বা চৈব প্রদক্ষিণং। জ্বলমানং তথা বহ্নিং শিরঃস্থানে প্রদাপযেৎ॥ চাতুর্ব্ব- র্ণেষু সংস্থান মেবং ভবতি প্রেকে। ইতি শুদ্ধিতত্ত্বং॥

মুখাময়ঃ পুং মুখরোগঃ। ইতি রাজ- নির্ঘণ্টঃ॥

মুখার্জকঃ পুং অর্জকঃ। ইতি রাজ- নির্ঘণ্টঃ॥

মুখাস্রঃ পুং কর্কটঃ। ইতি ত্রিকাণ্ড- শেষঃ॥

মুখোল্কা স্ত্রী দাবানলঃ। ইতি শব্দ- মালা॥

মুখ্যঃ পুং প্রথমঃকল্পঃ। ইত্যমরঃ॥ যাগাদিষু শাস্ত্রোক্তঃ প্রথমঃ কল্পো মুখ্যঃ স্যাৎ। যথা ব্রীহিভি র্যজে- তেত্যাদিনা উৎকৃষ্টত্বাৎ মুখমিব মুখ্যঃ বিকারসংঘেত্যাদিনা ইবার্থে যঃ। ইতি তট্টীকাযাং ভরতঃ॥

মুখ্যঃ ত্রি শ্রেষ্ঠঃ। ইত্যমরঃ॥

মুখ্যসর্গঃ পুং স্থাবরসৃষ্টিঃ। যথা।

মুখ্য সর্গ শ্চতুর্থস্তু মুখ্যা বৈ স্থাব ॥
রাঃ স্মৃতাঃ। ইতি বরাহপুরাণং॥

মুগ্রহঃ পুং দাত্যূহপক্ষী। ইতি ভূরি
প্রয়োগঃ॥

মুগ্ধঃ ত্রি মূঢ়ঃ॥ সুন্দরঃ। ইতি
বিশ্বঃ॥

মুগ্ধবোধং ক্লী বোপদেবকৃতব্যাকরণ
বিশেষঃ। যথা। মুকুন্দং সচ্চিদা-
নন্দং প্রণিপত্য প্রণীয়তে। মুগ্ধ
বোধং ব্যাকরণং পত্রেশেকৃতকেশম-
যা॥ ইতি তদাদ্যশ্লোকঃ॥

মুগ্ধা স্ত্রী নায়িকাবিশেষঃ। যথা।
স্বীয়াপি ত্রিবিধা। মুগ্ধা মধ্যা প্রগ-
ল্ভা চ। তত্রাঙ্কুরিত যৌবনা মুগ্ধা।
সা চ জ্ঞাতযৌবনা অজ্ঞাত যৌব-
না চ। সৈব ক্রমশো লজ্জা ভয়
পরাধীন রতি র্নবোঢা। সৈব জাত
প্রশ্রয়া বিশ্রব্ধনবোঢা। অস্যা শ্চে
ষ্টা ক্রিয়াপনোহরা। কোপে মার্দ্দ
বং নববিভূষণে সমীহা চ॥ মুগ্ধা
যথা। আজ্ঞাপ্তং কিল কামদেব
ধরণীপালেন কাপে শুভে বস্তুং বা
স্তুবিধিং বিধাস্যতি তবেী তারুণ্য
শ্রেণীদৃশঃ। দৃষ্ট্যা খঞ্জন চাতুরী
মুখরুচা সৌধাকরী মাধুরী বাচা
কিঞ্চ সুধাসমুদ্র লহরী লাবণ্য মা
মন্ত্র্যতে॥ ※॥ অজ্ঞাতযৌবনা
যথা। নীরাস্তীর মুপাগতা প্রবণ-
যোঃ সীম্নি স্ফুরন্নেত্রযোঃ শ্রোত্রে লগ্ন
মিদং কিমুৎপল মিতি জ্ঞাতুং ক-
রং ন্যস্যতি। শৈবালাঙ্কুর শঙ্কয়া
শশিমুখী রোমাবলীং প্রোঞ্ছতি
প্রান্তাম্বীতি মুহুঃ সখী মবিদিত
শ্রোণী ভরা পৃচ্ছতি॥ ※॥ জ্ঞাত-
যৌবনা যথা। স্বয়স্তুঃ শস্ত্র রম্ভোরু
লোচনে তুৎ পয়োধরঃ। নখেন ক-
স্য ধন্যস্য চন্দ্রচূড়ো ভবিষ্যতি
॥ ※॥ নবোঢা যথা। হস্তে ধৃত্বা-
পি শয়নে বিনিবেশিতাপি ক্রোড়ে
কৃতাপি যত তে বহিরেব গন্তুং।
জানীমহে নববধূ র্মথ তস্য বশ্যা
যঃ পারদং স্থিরয়িতুং ক্ষমতে ক-
রেণ॥ ※॥ দ্বিতীয়া যথা। বলা-
ন্নীতা পার্শ্বং মুখ মনুমুখং নৈব কু-
রুতে ধুনানা মূর্দ্ধানং ক্ষিপতি ব
দনং চুম্বন বিধৌ। হৃদি ন্যস্তং হস্তং
ক্ষিপতি গমনারোপিত মনা ন-
বোঢা বোঢারং রময়তি চ সন্তাপয-
তি চ॥ ※॥ বিশ্রব্ধনবোঢা যথা।
দর মুকুলিত নেত্র পালি নীবী নি-
য়মিত বাহু কৃতোরুযুগ্ম বন্ধং। কর
কলিত কচং স্বপং নবোঢা স্বপিতি
সমীপ মুপেত্য কস্য যূনঃ॥ ※॥
ইতি রসমঞ্জরী॥

মুচ (উ) কল্কনে ॥ দম্ভে ॥ শাঠ্যে। মুচ ই উ) ইতি কবিকল্পদ্রুমঃ ॥ দ্বৌ পঞ্চস্বরিণৌ। উ মোচতে। ই মুঞ্চতে। উ মুঞ্চতে। ইতি দুর্গাদাসঃ

মুচ্ব ক মোক্ষে। ইতি কবিকল্পদ্রুমঃ॥ ক মোচযতি। মোক্ষস্ত্যাগঃ। ইতি দুর্গাদাসঃ॥

মুচ ৯ শ প এ ঔ মোক্ষে। ইতি কবিকল্পদ্রুমঃ॥ মোক্ষ ত্যাগঃ। ৯ অমুচৎ। শ প এ মুঞ্চতি মঞ্চতে ধনং দাতা। বন্ধনরহিতীভাবে অকর্ম্মকো হয়ং। আলানান্মুক্তো গজঃ কর্ত্তরি ক্তঃ। এবং পাপান্মুক্ত ইত্যাদৌ পাপবন্ধনামুক্ত ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

মুচিরঃ ত্রি দাতা। ইতি ত্রিকাণ্ডশেষঃ॥

মুচিরঃ পুং ধর্ম্মঃ॥ বায়ুঃ॥ দেবতা। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

মুচুকুন্দঃ পুং পুষ্পবৃক্ষবিশেষঃ। মেকচন্দ ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। ছত্রবৃক্ষঃ ২ চিত্রকঃ ৩ প্রতিবিষ্ণুকঃ ৪। ইতি ভাবপ্রকাশঃ॥ বহুপুত্রঃ ৫ সুদলঃ ৬ হরিবল্লভঃ ৭ সুপুষ্পঃ ৮ অর্ঘ্যার্হঃ ৯ লক্ষ্মণকঃ ১০ রক্তপ্রসবঃ ১১। অস্য গুণাঃ। কটুত্বং। তিক্তত্বং। কফ বাত নাশিত্বং। কণ্ঠকরত্বং। ত্বগ্দোষ শোফ শমনত্বং। জীর্ণজ্বর বিনাশনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ শিরঃপীড়া পিত্তাস্র বিষ নাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ ক॥ মান্ধাতৃরাজপুত্রঃ। ইতি শ্রীভাগবতং॥

মুচুটী স্ত্রী অঙ্গুলিস্ফোটনং। আঙ্গুল মটকান ইতি ভাষা। যথা। মুচুটী মুঙ্গটী চৈব ভবেদঙ্গুলিমোটনে। ইতি শব্দরত্নাবলী॥ মুষ্টিঃ। মুঠা ইতি ভাষা। যথা। সপিণ্ডিতাঙ্গুলিঃ পাণি মুষ্টি মুস্তু মুচুট্যপি। ইতি হেমচন্দ্রঃ॥

মুজ ক) মৃজাধ্বন্যোঃ। ইতি কবিকল্পমুজ্র ই ক) দ্রুমঃ॥ দ্বৌ পঞ্চস্বরিণৌ। ই ক মুঞ্জযতি। ক মোজযতি। ইতি দুর্গাদাসঃ॥

মুঞ্চকঃ পুং মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মুঞ্জঃ পুং তৃণবিশেষঃ। মুঁজ ইতি ভাষা তৎপর্য্যায়ঃ। মৌঞ্জীতৃণাখ্যঃ ২ ব্রাহ্মণ্যঃ ৩ তেজনাহ্বযঃ ৪ বাণীরকঃ ৫ মুঞ্জনকঃ ৬ শরী ৭ দর্ভাহ্বযঃ ৮ দূরমূলঃ ৯ দৃঢতৃণঃ ১০ দৃঢমূলঃ ১১ বহুপ্রজঃ ১২ রঞ্জনঃ ১৩ শত্রভঙ্গঃ ১৪। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। কফ পিত্তজদোষ

নাপিতঞ্চ। গৃহরক্ষাসু দীক্ষাসু চ শোধনত্বং ভূতনাশিত্বঞ্চ। ইতি রাজ নির্ঘণ্টঃ॥ অপিচ। মঞ্জো মুঞ্জাতকো বাণঃ স্থূলদর্ভঃ সুমেধসঃ। মুঞ্জদ্বয়ন্তু মধুরং তুবরং শিশিরং তথা॥ দাহ তৃষ্ণা বিসর্পাস্রমূত্রবস্ত্যক্ষি রোগজিৎ। দোষত্রয়হরং বৃষ্যং মেখলাসূপযুজ্যতে॥ ইতি ভাবপ্রকাশঃ॥ শরঃ। ইতি রত্নমালা॥ উপনয়নকালে মুঞ্জ মেখলা ধারণ বিধি র্যথা। অথৈনং মাণবকমাচার্য্য স্ত্রি প্রদক্ষিণং ত্রিবৃত মুঞ্জমেখলাং পরিধাপয়ন্ মন্ত্রমিমং বাচয়তি। ইতি ভবদেবভট্টঃ॥

মুঞ্জকেশী পুং বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

মুঞ্জরং ক্লী শালূকং। ইতি শব্দমালা॥

মুঞ্জাতকঃ পুং পুষ্পশাকভেদঃ। অস্য গুণাঃ। পরং স্বাদুত্বং গুরুত্বং। পিত্তানিলাপহত্বঞ্চ। ইতি রাজবল্লভঃ॥

মুট ছ মর্দ্দে। ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ছ মুট্যতে। মর্দ্দো মর্দ্দনং। ইতি দুর্গাদাসঃ॥

মুট কি ক্ষুদি। ইতি কবিকল্পদ্রুমঃ॥ ক্ষুদি চূর্ণীকরণে। কি মোটয়তি তণ্ডুলং শিলায়াং অস্ত দুর্গাহ মোটতীতি হলায়ুধঃ॥

মুট শি আক্ষেপে চ। ইতি কবিকল্পদ্রুমঃ॥ পবর্গশেষাদিঃ। শি মুটতি অমটীৎ মুমোট। চকারাৎ মুটি চ মুটতি দ্বিষাং দর্পং য ইতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

মুঠ ই ঙ পলায়ে। ইতি কবিকল্পদ্রুমঃ॥ পবর্গশেষাদিঃ। পঞ্চমস্বরী। ই মুণ্ঠ্যতে। ঙ মুণ্ঠতে চৌরঃ। ইতি দুর্গাদাসঃ॥

মুড ই ছিদি॥ মর্দ্দনে ইতি কবিকল্পদ্রুমঃ॥ পঞ্চমস্বরী। ই মুণ্ড্যতে। ছেদ ইহ লোমচ্ছেদ এব। মুণ্ডতি মুণ্ডং নাপিতঃ। লোমরহিতং করোতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

মুড ই ঙ মগ্নে। ইতি কবিকল্পদ্রুমঃ॥ পবর্গশেষাদিঃ। পঞ্চমস্বরী। মগ্নমিতি মজ্জধাতোঃ ক্তে রূপং মজ্জনমিত্যর্থঃ। ই মুণ্ড্যতে। ঙ মুণ্ডতে প্রস্তরো জলে। চতুর্ভুজস্তু মার্জ্জনে ইতি পঠিত্বা মার্জ্জনং শুদ্ধিরিতি ব্যাখ্যায় মুণ্ডতে জলেন গাত্রং লোক ইত্যুদাহৃতবান্। ইতি দুর্গাদাসঃ॥

মুণ শ প্রতিজ্ঞানে। ইতি কবিকল্পদ্রুমঃ॥ শ মুণতি ব্রতং লোকঃ।

প্রতিশ্রাপ্রতীত্যর্থঃ। নোণিজ। ইতি দুর্গাদাসঃ॥

মুণ্ডা স্ত্রী শিরস্তা ইতি নপুংসকলিঙ্গাদাপ্ ইহেতি অমরঃ॥ বোলং॥ মুণ্ডাসং। ইতি রাজনির্ঘণ্টঃ॥

মুণ্ডঃ পুং দৈত্যবিশেষঃ। রাহুগ্রহঃ। ইতি মেদিনী॥ নাপিতঃ। ইতি জটাধরঃ॥ স্থাণুবৃক্ষঃ। ইতি কেচিৎ॥

মণ্ডঃ পুং ক্লী মূর্দ্ধা। ইতি মেদিনী॥

মুণ্ডঃ ত্রি মুণ্ডিতঃ। ইত্যমরঃ॥ দ্বে মুণ্ডিতে মুণ্ডে। মুণ্ডি খণ্ডনে ভাবে ঘঞি মুণ্ডঃ। মুণ্ডনং কেশাপনয়নং তদ্যোগাৎ অর্শ আদ্যচি মুণ্ডঃ পুমান্ স্ত্রিয়াং মুণ্ডা। ইত্যমর টীকায়াং ভরতঃ॥

মুণ্ডকং ক্লী মস্তকং। ইতি হেমচন্দ্রঃ॥

মুণ্ডকঃ পুং নাপিতঃ। ইতি হেমচন্দ্রঃ॥

মুণ্ডচণকঃ পুং কলায়ঃ। ইতি রাজনির্ঘণ্টঃ॥

মুণ্ডনং ক্লী কেশচ্ছেদনং। তৎপর্য্যায়ঃ। ভদ্রাকরণং ২ বপনং ৩ পরিবাপনং ৪ ক্ষৌরং ৫। ইতি হেমচন্দ্রঃ॥

মুণ্ডফলঃ পুং নারিকেলবৃক্ষঃ। যথা। তথা মুণ্ডফলশ্চাপি বিশ্বামিত্রপ্রিয়োহপি চ। ইতি শব্দরত্নাবলী॥

মুণ্ডশালিঃ পুং শালিভেদঃ। তৎপর্য্যায়ঃ। মণ্ডলকঃ ২ নিঃশূকঃ ৩ অশূককঃ ৪। অস্য গুণাঃ। ত্রিদোষনাশিত্বং। মধুরাম্লত্বং। বলপ্রদত্বং। রুচিকারিত্বং। দীপনত্বং। পথ্যত্বং। মন্দজাড্যকারকত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মুণ্ডতা স্ত্রী মুণ্ডীরিকা। ইতি মেদিনী॥ মুণ্ডিতঅস্ত্রী। ইত্যমরটীকায়াং ভরতঃ॥

মণ্ডাখ্যা স্ত্রী মহাশ্রাবণিকা। ইতি রাজনির্ঘণ্টঃ॥

মুণ্ডায়সং ক্লী লোহং। ইতি রাজনির্ঘণ্টঃ॥

মুণ্ডিতং ক্লী লোহং। ইতি রাজনির্ঘণ্টঃ॥ বাপিতমণ্ডে ত্রি। ইত্যমরঃ॥

মুণ্ডিতিকা স্ত্রী বৃক্ষবিশেষঃ। মণ্ডীরী ইতি ভাষা। তৎপর্য্যায়ঃ। অলম্বুষা ২ শ্রাবণী ৩ পলঙ্কষা ৪ কদম্বপুষ্পা ৫ শ্রবণা ৬ ভূতঘ্নী ৭ জম্বুলা ৮ অরুণা ৯। ইতি রত্নমালা॥

মুণ্ডী পুং নাপিতঃ। ইত্যমরঃ॥

মুণ্ডীরিকা স্ত্রী মুণ্ডিতিকা। ইতি জটাধরঃ॥

মুৎ স্ত্রী বুদ্ধিনদৌষধং। ইতি রাজনির্ঘণ্টঃ॥

মুৎ স্ত্রী হর্ষঃ। ইত্যমরঃ॥

মুদ ক সংসর্গে। ইতিকবিকল্পদ্রুমঃ॥ ॥ কমোদয়তি ঘৃতেনান্নং লোকঃ। ইতি দুর্গাদাসঃ॥

মুদ ঙিঙ্ হর্ষে। ইতি কবিকল্পদ্রুমঃ ॥ হর্ষ শ্চিত্তোৎসাহঃ। ঙি মুদিতো হস্তি। ঙ মোদতে ধনী। ইতি দুর্গাদাসঃ॥

মুদা স্ত্রী হর্ষঃ। যথা। সুখ মানন্দথু-র্মুদা। ইতি শব্দরত্নাবলী॥

মুদিতঃ ত্রি আনন্দিতঃ। যথা। আর্ত্তার্ত্তে মুদিতা হৃষ্টে প্রোষিতে মলিনা কৃশা। মৃতে ম্রিয়েত যা পত্যৌ সাধ্বী জ্ঞেয়া পতিব্রতা॥ ইতি শুদ্ধিতত্ত্বং॥ আলিঙ্গনবিশেষঃ। তস্য লক্ষণং যথা। নায়িকয়া নায়কস্য বামপার্শ্বে উষিত্বা বামপাদং তস্যোরুদ্বয় মধ্যে স্থাপয়িত্বা উভৌ মিলিত্বা যদবস্থানং। ইতি কামশাস্ত্রং॥

মুদিতা স্ত্রী মুদা। হর্ষঃ। ইত্যমরটীকায়াং মথুরেশঃ॥

মুদিরঃ পুং মেঘঃ। ইত্যমরঃ॥ কামুকঃ। ইতি মেদিনী॥ ভেকঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

মুদ্গঃ পুং পক্ষিবিশেষঃ। তৎপর্য্যায়ঃ। জলবায়সঃ২। ইতি হেমচন্দ্রঃ॥ শমীধান্যভেদঃ। মুগ ইতি ভাষা। তৎপর্য্যায়ঃ। সূপশ্রেষ্ঠঃ ২ বর্ণার্হঃ ৩ রসোত্তমঃ ৪ ভুক্তিপ্রদঃ ৫ হয়ানন্দঃ ৬ সুফলঃ ৭ বাজিভোজনঃ ৮। অস্য গুণাঃ। কষায়ত্বং। মধুরত্বং। কফ পিত্তাসৃজিত্ত্বং। লঘুত্বং। গ্রাহিত্বং। শীতত্বং। পাকে কটুত্বং। চক্ষুষ্যত্বং। নাতিবাতলত্বঞ্চ॥ তদ্যূষগুণাঃ। পিত্তশন্তার্ত্তিশমনত্বং। লঘুত্বং। সন্তাপহারিত্বং। অরোচকনাশিত্বং। তৎ সৈন্ধবযুক্তঞ্চেৎ রক্তপ্রসাদনত্বং। সর্ব্বরুজাপহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। রুক্ষত্বং। স্বাদুত্বং। অল্পানিলত্বং। জ্বরঘ্নত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥*॥ বনমুদ্গগুণাঃ। মুদ্গঃ শীতলো গ্রাহী কফ পিত্ত জ্বরাপহঃ॥ তদ্বিশেষা যথা। প্রধানা হরিতা স্তত্র বন্যমুদ্গাস্তু মুদ্গবৎ। কৃষ্ণমুদ্গা মহামুদ্গা গৌরা হরিত পীতকাঃ॥ শ্বেতা রক্তাশ্চ নির্দ্দিষ্টা লঘবঃ পূর্ব্ব পূর্ব্ববৎ। ইতি রাজবল্লভঃ॥

মুদ্গপর্ণী স্ত্রী বনমুদ্গঃ। মুগানী ইতি ভাষা। তৎপর্য্যায়ঃ। কাকমুদ্গা ২ সহা ৩। ইত্যমরঃ॥ ক্ষুদ্রসহা ৪ শিম্বী ৫ মার্জ্জারগন্ধিকা ৬ বনজা ৭ রিঙ্গিণী ৮ হ্রস্বা ৯ সূর্পপর্ণী ১০

জরঙ্গিকা ১১ কোশিলা ১২ বনো ভবা ১৩ বনমুদ্গা ১৪ আরণ্যমুদ্গা ১৫ বন্যা ১৬। জরঙ্গিকা স্থানে করঙ্গিকা ইতিচ পাঠঃ। অস্যা গুণাঃ। হিমত্বং। কাস বাত রক্ত ক্ষয পিত্ত দাহ জ্বর নাশিত্বং। চক্ষুষ্যত্বং। শুক্রবৃদ্ধিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। মুদ্গপর্ণী কাকপর্ণী সূর্পপর্ণ্যল্পপর্ণিকা। কাকমুদ্গা চ সা প্রোক্তা তথা মার্জ্জারগন্ধিকা॥ মুদ্গপর্ণী হিমা রুক্ষা তিক্তা স্বাদুশ্চ শুক্রলা। চক্ষুষ্যা ক্ষয শোথঘ্নী গ্রাহিণী জ্বর দাহ নৎ॥ দোষত্রয়হরী লঘ্বী গ্রহণ্যর্শো হৃতিসারহৃৎ। ইতি ভাবপ্রকাশঃ॥

মুদ্গভক্‌ পুং ঘোটকঃ। ইতি জটাধরঃ॥

মুদ্গভোজী পুং অশ্বঃ। ইতি রাজনির্ঘণ্টঃ॥

মুদ্গমোদকঃ পুং মোদকবিশেষঃ। মতিচুর ইতি ভাষা। যথা। মুদ্গানাং ধূমসীং সম্যগ্‌ ঘোলয়েন্নির্ম্মলাম্বুনা। কটাহস্থ ঘৃতস্যোর্দ্ধ্বং ঝর্ঝরং স্থাপয়েত্ততঃ॥ ধূমসীন্তু দ্রবীভূতাং প্রক্ষিপেৎ ঝর্ঝরোপরি। পতন্তি বিন্দবস্তস্মাত্তান্ সুপক্বান্ সমুদ্ধরেৎ॥ সিতাপাকেন সংযোজ্য রচয়েৎ বৃত্তেন মোদকান্। অস্য গুণাঃ। লঘু গ্রাহী ত্রিদোষঘ্নঃ স্বাদুঃ শীতোরুচিপ্রদঃ। চক্ষুষ্যো জ্বরহৃৎ বল্যস্তর্পণো মুদ্গমোদকঃ॥ ইতি ভাবপ্রকাশঃ॥

মুদ্গরং ক্লী মল্লিকাভেদঃ॥ লোষ্ট্রাদিভেদনে পুং। ইতি মেদিনী॥

মুদ্গরঃ পুং কর্ম্মাররক্ষঃ॥ পুষ্পবৃক্ষবিশেষঃ। তৎপর্য্যায়ঃ। গন্ধসারঃ সপ্তপত্রঃ২ অতিগন্ধঃ ৩ গন্ধরাজঃ ৪ বিটপ্রিয়ঃ ৫ প্রিয়ঃ ৬ জনেষ্টঃ ৭ মৃগেষ্টঃ ৮। অস্য গুণাঃ। মধুরত্বং। শীতত্বং। সুরভিত্বং। সৌখ্যদায়কত্বং। মনোজকারিত্বং। মধুপানন্দকারিত্বং। পিত্তপ্রকোপ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥*॥ অস্ত্রবিশেষঃ। মুগুর ইতি ভাষা। তৎপর্য্যায়ঃ। দ্রুঘণঃ ২ ঘনঃ ৩। ইত্যমরঃ॥ দ্রুঘনঃ ৪। ইতি ভরতঃ॥ মুদ্গরঃ কোরকাস্ত্রযোঃ। ইতি হেমচন্দ্রঃ॥

মুদ্গরকঃ পুং কর্ম্মারঃ। কামরাঙ্গা ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

মুদ্গলং ক্লী রোহিষতৃণং। ইতি রাজনির্ঘণ্টঃ॥

মুদ্গলঃ পুং হর্য্যশ্বরাজপুত্রঃ। যথা। সুশান্তেঃ পুরুজানঃ তস্মাচ্চার্কঃ ততশ্চ হর্য্যশ্বঃ হর্য্যশ্বাম্মুদ্গল সৃঞ্জয

বৃহদিষু র্যবীনর কাম্পিল্য সংজ্ঞাঃ। পঞ্চানামেতেষাং বিষয়াণাং রক্ষণায়ালমেতে মৎপুত্রা ইতি পিত্রাভিহিতা ইতি পঞ্চালাঃ। ইতি বিষ্ণুপুরাণে ৪ অংশে ১৯ অধ্যায়ঃ ॥ গোত্রকারকমুনিবিশেষঃ। তস্য ভার্য্যা ইন্দ্রসেনা। ইতি পুরাণং ॥

মুদ্গষ্টঃ পুং বনমুদ্গঃ। ইতি শব্দরত্নাবলী ॥

মুদ্গষ্টকঃ পুং বনমুদ্গঃ। ইত্যমরঃ ॥

মুদ্গার্দ্রবটঃ পুং বটকবিশেষঃ। মুগের বড়া ইতি ভাষা। যথা। মুদ্গপিষ্টী বিরচিতান্ বটকান্ তৈলপাচিতান্। হস্তেন চূর্ণয়েৎ সম্যক্ তৎসংশচূর্ণে বিনিঃক্ষিপেৎ ॥ ভৃষ্টং হিঙ্গ্বার্দ্রকং সূক্ষ্মং মরিচং জীরকং তথা। নিম্বুরসং যবানীঞ্চ যুক্ত্যা সর্ব্বং বিমিশ্রয়েৎ ॥ মুদ্গপিষ্টীং পচেৎ সম্যক্ স্থাল্যামঙ্গারকোপরি। তস্যাস্তু গোলকং কৃত্বা তন্মধ্যে পূরণং ক্ষিপেৎ ॥ তৈলে তান্ গোলকান্ পক্ত্বা কথিতায়াং নিমজ্জয়েৎ। গোলকাঃ পাচকৈঃ প্রোক্তা মুদ্গার্দ্রকবটা অপি ॥ অস্য গুণাঃ। মুদ্গার্দ্রকবটা রুচ্যা লঘবো বলকারকাঃ। দীপনাস্তর্পণাঃ পথ্যাস্ত্রিদোষেষু প্রপূজিতাঃ ॥ ইতি ভাবপ্রকাশঃ ॥

মুদ্রা স্ত্রী প্রত্যয়কারিণী। নামের মোহর ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥ অঙ্গুলিমুদ্রা। ছাপের আঙ্গটী ইতি ভাষা। ইতি শব্দরত্নাবলী ॥ স্বর্ণরৌপ্যাদিমুদ্রিকা চ। মোহর টাকা ইত্যাদি ভাষা। ইতি লোকপ্রসিদ্ধিঃ ॥ * ॥ পঞ্চধা লিপ্যন্তর্গত লিপিবিশেষঃ। ছাপার অক্ষর ইতি ভাষা। যথা। মুদ্রালিপিঃ শিল্পলিপি র্লিপি র্লেখনিসম্ভবা। গুণ্ডিকা ঘুণসম্ভূতা লিপয়ঃ পঞ্চধা স্মৃতাঃ ॥ এতাভি র্লিপিভি র্ব্যাপ্তা ধরিত্রী শুভদা হর। ইতি বারাহীতন্ত্রং ॥ লেখন্যা লিখিতং বিপ্রৈ র্মুদ্রাভি রঙ্কিতঞ্চ যৎ। শিল্পাদি নির্ম্মিতং যচ্চ পাঠ্যং ধার্য্যঞ্চ সর্ব্বদা ॥ ইতি খড়্গমালাতন্ত্রং ॥ * ॥ পঞ্চমকারান্তর্গত ভৃষ্টদ্রব্যবিশেষঃ। যথা। পৃথুকাস্তণ্ডুলা ভৃষ্টা গোধূম চণকাদয়ঃ। তস্য নাম ভবেদ্দেবি মুদ্রা মুক্তিপ্রদায়িনী ॥ ইতি নির্ব্বাণতন্ত্রে ১১ পটলঃ ॥ তস্যাঃ শোধনং যথা। ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ দিবীব চক্ষুরাততং। ওঁ তদ্বিপ্রাসো বিপন্যবো জাগৃবাংসঃ সমিন্ধতে বিষ্ণো র্যৎ পরমং

পদং। ইতি মন্ত্রাভ্যাং শোধনং। ইতি স্বতন্ত্রতন্ত্রং ॥*॥ শরীরে ধার্য্য ভগবদায়ুধাদিচিহ্নং। ছাপ ইতি ভাষা। যথা। ততো নারায়ণী মুদ্রাং ধারয়েৎ প্রীতয়ে হরেঃ। মৎস্য কূর্ম্মাদি চিহ্নানি চক্রাদীন্যায়ুধানি চ ॥*॥ অথ মুদ্রাধারণ নিত্যতা স্মৃতৌ। অঙ্কিতঃ শঙ্খ চক্রাভ্যা মুভয়ো র্ব্বাহুমূলযোঃ। সমর্চ্চয়েদ্ধরিং নিত্যং নান্যথা পূজনং ভবেৎ॥ আদিপুরাণে। শঙ্খ চক্রোর্দ্ধ্ব পুণ্ড্রাদি রহিতং ব্রাহ্মণাধমং। গর্দ্দভন্ত সমারোপ্য রাজা রাষ্ট্রাৎ প্রবাসযেৎ ॥ গারুড়ে ভগবদুক্তৌ। সর্ব্ব কর্ম্মাধিকারশ্চ শুচীনামেব চোদিতঃ। শুচিত্বঞ্চ বিজানীযাম্মদীযাযুধ ধারণাৎ ॥ পাদ্মে চোত্তরখণ্ডে। শঙ্খ চক্রাদিভি শ্চিহ্নৈ র্বিপ্রঃ প্রিযতমৈ র্হরেঃ। রহিতঃ সর্ব্ব ধর্ম্মেভ্যঃ প্রচ্যুতো নরকং ব্রজেৎ ॥ শ্রুতৌ চ যজুঃ কঠশাখাযাং। ধৃতোর্দ্ধ্ব পুণ্ড্রঃ কৃত চক্রধারী বিষ্ণুং পরং ধ্যাযতি যো মহাত্মা। স্বরেণ মন্ত্রেণ সদা হৃদি স্থিতং পরাৎপরং যন্মহতো মহান্তং ॥ অথর্ব্বণি চ। এভি র্ব্বয মুরুক্রমস্য চিহ্নৈ রঙ্কিতা লোকে সুভগা ভবেমঃ। তদ্বিষ্ণোঃ পরমং পদং যে গচ্ছন্তি লাঞ্ছিতা ইত্যাদি ॥ অতএব ব্রহ্মপুরাণে। কৃষ্ণায়ুধাঙ্কিতং দৃষ্ট্বা সম্মানং ন করোতি যঃ দ্বাদশাব্দার্জ্জিতং পুণ্যঞ্চাফলাযোপগচ্ছতি ॥ * ॥ অথ মুদ্রাধারণ মাহাত্ম্যং। স্কান্দে শ্রীসনৎকুমার মার্কণ্ডেয সম্বাদে। যো বিষ্ণুভক্তো বিপ্রেন্দ্র শঙ্খ চক্রাদি চিহ্নিতঃ। স যাতি বিষ্ণুলোকং বৈ দাহ প্রলয বর্জ্জিতং ॥ তত্রৈবান্যত্র। নারাযণাযুধৈ র্নিত্যং চিহ্নিতং যস্য বিগ্রহং। পাপ কোটি প্রযুক্তস্য তস্য কিং কুরুতে যমঃ ॥ শঙ্খোদ্ধারে তু যৎ প্রোক্তং বসতা বর্ষকোটিভিঃ। তৎফলং লিখিতে শঙ্খে প্রত্যহং দক্ষিণে ভুজে ॥ যৎফলং পুষ্করে নিত্যং পুণ্ডরীকাক্ষ দর্শনে। শঙ্খোপরি কৃতে পদ্মে তৎফলং সমবাপ্নুযাৎ ॥ বামে ভুজে গদা যস্য লিখিতাদৃশ্যতে কলৌ। গদাধরো গযাপুণ্যং প্রত্যহং তস্য যচ্ছতি ॥ যচ্চানন্দপুরে প্রোক্তং চক্রস্বামি সমীপতঃ। গদাধো লিখিতে চক্রে তৎফলং কৃষ্ণদর্শনে ॥ শ্রীভগবদুক্তৌ চ। যঃ পুনঃ কলিকালে তু মৎপুরী সম্ভবাং মৃদং। মৎস্য কূর্ম্মাদিকং চিহ্নং গৃহীত্বা কুরুতে নরঃ ॥ দেহে তস্য প্রবিষ্টোহং জানন্তু ত্রিদশোত্তমাঃ। তস্য মে নান্তরং

কিঞ্চিৎ কর্ত্তব্যং শ্রেয় ইচ্ছতা ॥ মমা বতার চিহ্নানি দৃশ্যন্তে যস্য বিগ্রহে । মর্ত্তৈ্য মর্ত্ত্যো ন বিজ্ঞেয়ঃ স নূনং মানকী তনুঃ ॥ পাপং সুকৃত রূপন্তু জায়তে তস্য দেহিনঃ । মমাযুধানি যস্যাঙ্গে লিখিতানি কলৌ যুগে ॥ উভাভ্যা মপি চিহ্নাভ্যাং যোঙ্কিতো মৎস্য মুদ্রয়া । কূর্ম্মযাপি স্বকং তেজো নিক্ষিপ্তং তস্য বিগ্রহে ॥ শঙ্খঞ্চ পদ্মঞ্চ গদাং রথাঙ্গং মৎস্যঞ্চ কূর্ম্মং রচিতং স্ব দেহে । করোতি নিত্যং সুকৃতস্য বৃদ্ধিং পাপক্ষয়ং জন্ম শতার্জ্জিতস্য ॥ তত্রৈব শ্রীব্রহ্মনারদ সম্বাদে । কৃষ্ণ শস্ত্রাঙ্ক কবচং দুর্ভেদ্যং দেব দানবৈঃ । অধৃষ্যং সর্ব্ব ভূতানাং শত্রূণাং রক্ষসা মপি ॥ লক্ষ্মীঃ সরস্বতী দুর্গা সাবিত্রী হরবল্লভা । নিত্যং তস্য বসেদ্দেহে যস্য শঙ্খাঙ্কিতা তনুঃ ॥ গঙ্গা গযা কুরুক্ষেত্রং প্রয়াগং পুষ্করাদি চ । নিত্যং তস্য সদা তিষ্ঠেদ্যস্য পদ্মাঙ্কিতং বপুঃ ॥ যস্য কৌমোদকী চিহ্নং ভুজে বাথ কলিপ্রিয । প্রত্যহং তত্র দ্রষ্টব্যো গঙ্গাসাগর সঙ্গমঃ ॥ সব্যে করে গদাধস্তাদ্রথাঙ্গং তিষ্ঠতে যদি । কৃষ্ণেন সহিতং তত্র ত্রৈলোক্যং স চরাচরং ॥ ত্রযোগ্নয স্ত্রযো দেবা বিষ্ণো ত্রীণি পদানি চ । নিবসন্তি সদা তস্য যস্য দেহে সুদর্শনং ॥ কিঞ্চ । কৃষ্ণাযুধাঙ্কিতা মুদ্রা যস্য নারাযণী করে । উর্দ্ধ্ব লোকাধিকারী চ সজ্ঞেয ত্রিদশাং পতিঃ ॥ কৃষ্ণমুদ্রা প্রযুক্তস্তু দৈবং পিত্র্যং করোতি যঃ । নিত্যং নৈমিত্তিকং কাম্যং প্রত্যহঞ্চাক্ষযং ভবেৎ ॥ পীডযন্তি ন তত্রৈব গ্রহা ঋক্ষাণি রাক্ষসাঃ । অষ্টাক্ষরাঙ্কিতা মুদ্রা যস্য ধাতুময়ী করে ॥ বারাহে শ্রীসনৎকুমারোক্তৌ । কৃষ্ণাযুধাঙ্কিতং দেহং গোপীচন্দন মৃৎস্নয়া । প্রযাগাদিষু তীর্থেষু স গত্বা কিং করিষ্যতি ॥ যদা যস্য প্রপশ্যেত দেহং শঙ্খাদি চিহ্নিতং । তদা তদা জগৎস্বামী তুষ্টো হরতি পাতকং ॥ ভবতে যস্য দেহে তু অহোরাত্রং দিনে দিনে । শঙ্খ চক্র গদা পদ্মং লিখিতং সো হ্যচ্যুতঃ স্বযং ॥ নারাযণাযুধৈ র্মুক্তং কৃত্বাত্মানং কলৌ যুগে । কুরুতে পুণ্য কর্ম্মাণি মেরুতুল্যানি তস্য বৈ ॥ শঙ্খাদিনাঙ্কিতো ভক্ত্যা শ্রাদ্ধং যঃ কুরুতে দ্বিজঃ । বিধি হীনন্তু সংপূর্ণং পিতৃণান্তু গযাসমং ॥ যথাগ্নি র্দহতে কক্ষং বাযুনা প্রেরিতো ভৃশং । তথা দহন্তি পাপানি দৃষ্টা কৃষ্ণাযুধানি বৈ ॥ ব্রাহ্ম্যে

শ্রীব্রহ্ম নারদ সম্বাদে। বিষ্ণুনামাঙ্কিতাং মুদ্রা নষ্টাক্ষর সমন্বিতাং। শঙ্খাদিকায়ুধৈর্যুক্তাং স্বর্ণরূপ্যময়ী মপি॥ ধত্তে ভাগবতো যস্তু কলিকালে বিশেষতঃ। প্রহ্লাদস্য সমো জ্ঞেয়ো নান্যথা কলিবল্লভ॥ কিঞ্চ। শঙ্খাঙ্কিত তনুর্বিপ্রো ভুঙ্ক্তে যস্য চ বেশ্মনি। তদন্নং স্বয়মশ্নাতি পিতৃভিঃ সহ কেশবঃ॥ কৃষ্ণায়ুধাঙ্কিতো যস্তু শ্মশানে ম্রিয়তে যদি। প্রযাগে যা গতিঃ প্রোক্তা সা গতি স্তস্য নারদ॥ কৃষ্ণায়ুধৈঃ কলৌ নিত্যং মণ্ডিতং যস্য বিগ্রহং। তত্রাগ্রয়ং প্রকুর্বন্তি বিবুধা বাসবাদয়ঃ॥ যঃ করোতি হরেঃ পূজাং কৃষ্ণ শস্ত্রাঙ্কিতো নরঃ। অপরাধ সহস্রাণি নিত্যং হরতি কেশবঃ॥ কৃত্বা কাষ্ঠময়ং বিম্বং কৃষ্ণশস্ত্রৈস্তু চিহ্নিতং। যো জ্বলয়তি চাত্মানং তৎ সমো নাস্তি বৈষ্ণবঃ॥ পাষণ্ড পতিত ব্রাত্যৈর্নাস্তিকালাপ পাতকৈঃ। ন লিপ্যতে কলিকৃতৈঃ কৃষ্ণশস্ত্রাঙ্কিতো নরঃ॥ কিঞ্চ। অষ্টাক্ষরাঙ্কিতা মুদ্রা যস্য ধাতুময়ী ভবেৎ। শঙ্খ পদ্মাদিভি র্যুক্তা পূজ্যতে হসৌ সুরাসুরৈঃ॥ ধৃতা নারায়ণীমুদ্রা প্রহ্লাদেন পুরা কৃতা। বিভীষণেন বলিনা ধ্রুবেণ চ শুকেন চ॥ মান্ধাতৃণাম্বরীষেণ মার্কণ্ড প্রমুখৈ র্দ্বিজৈঃ। শঙ্খাদি চিহ্নিতৈঃ শস্ত্রৈ র্দেহে কৃষ্ণ কলিপ্রিয॥ আরাধ্য কেশবাৎ প্রাপ্তং সমীহিত ফলং মহৎ। কিঞ্চ। গোপীচন্দন মৃৎস্নায়া লিখিতং যস্য বিগ্রহে। শঙ্খ পদ্মাদি চক্রং বা তস্য দেহে বসেদ্ধরিঃ॥ তত্রৈব শ্রীসনৎকুমারোক্তৌ। যস্য নারায়ণী মুদ্রা দেহং শঙ্খাদি চিহ্নিতং। ধাত্রী ফল কৃতা মালা তুলসী কাষ্ঠ সম্ভবা। দ্বাদশাক্ষর মন্ত্রেস্তু নিয়তানি কলেবরে॥ আয়ুধানি চ চিহ্নানি যস্য মৎসমঃ স চ বৈষ্ণবঃ। কিঞ্চ। যস্য নারায়ণী মুদ্রা দেহে শস্ত্রাদি চিহ্নিতা। সর্বাঙ্গং চিহ্নিতং যস্য শস্ত্রৈ নারায়ণোদ্ভবৈঃ॥ প্রবেশো নাস্তি পাপস্য কবচং তস্য বৈষ্ণবং। অন্যত্রচ। এভি র্ভাগবতৈ শ্চিহ্নৈঃ কলিকালে দ্বিজাতয়ঃ। ভবন্তি মর্ত্যলোকে তে শাপানুগ্রহ কারকাঃ॥ *॥ অথ মুদ্রা ধারণ বিধিঃ। গৌতমীয়ে। ললাটে চ গদা কার্য্যা মূর্দ্ধ্নি চাপং শরং তথা। নন্দকঞ্চৈব হৃন্মধ্যে শঙ্খ চক্র ভুজ দ্বয়ে॥ শঙ্খ চক্রাঙ্কিতো বিপ্রঃ শ্মশানে ম্রিয়তে যদি। প্রযাগে যা গতিঃ প্রোক্তা সা গতি স্তস্য গৌতম॥ চক্রঞ্চ দক্ষিণে বাহৌ শঙ্খং বামে-

হৃপি দক্ষিণে। গদাং বামে গদাধস্তাৎ পুন শ্চক্রঞ্চ ধারয়েৎ॥ শঙ্খোপরি তথা পদ্মং পুনঃ পদ্মঞ্চ দক্ষিণে। খড়্গং বক্ষসি চাপঞ্চ শরং শিরসি ধারয়েৎ॥ ইতি পঞ্চায়ুধান্যাদৌ ধারয়েদ্বৈষ্ণবো জনঃ। মৎস্যঞ্চ দক্ষিণে হস্তে কূর্ম্মং বামকরে তথা॥ তথাচোক্তং। দক্ষিণে তু ভুজে বিপ্রো বিভৃয়াদ্বৈ সুদর্শনং। মৎস্যং পদ্মঞ্চাপরেথ শঙ্খং কূর্ম্মং গদাং তথেতি॥ সাম্প্রদায়িক শিষ্টানা মাচারাচ্চ যথা রুচি। শঙ্খ চক্রাদি চিহ্নানি স র্ব্বেষ্বঙ্গেষু ধারয়েৎ॥ ভক্ত্যা নিজেষ্টদেবস্য ধারয়েল্লক্ষণান্যপি। চক্রশঙ্খৌ চ ধার্য্যেতে সংমিশ্রাবেব কৈশ্চন॥ যত উক্তং ব্রহ্মবৈবর্ত্তে। কেবলং নোদ্বহেচ্ছঙ্খ মাদৌ চাসুর বিগ্রহং। অতশ্চক্র বিমিশ্রং তং বিভৃয়াদ্বৈষ্ণবঃ সদা॥ শ্রীগোপীচন্দনেনৈবং চক্রাদীনি বুধো হন্বহং। ধারয়েচ্চন্দনাদৌ তু তপ্তানি কিল তানি হি॥ ॥ অথ চক্রাদীনাং লক্ষণানি। দ্বাদশাক্ষরস্তু ষট্কোণং বলয় ত্রয় সংযুতং। চক্রং স্যাদ্দক্ষিণাবর্ত্তঃ শঙ্খশ্চ শ্রীহরেঃ স্মৃতঃ॥ গদা পদ্মাদিকং লোক সিদ্ধমেব মতং বুধৈঃ। মুদ্রা চ ভগবন্নামাঙ্কিতা যাষ্টাক্ষরাদিভিঃ॥ ইতি শ্রীহরিভক্তিবিলাসঃ॥ ॥ অপিচ। যথা মুদ্রা শীতলাখ্যা তথা তপ্তা ন সংশয়ঃ। তপ্তায়াঃ শীতলায়াশ্চ বিভেদো নৈব বর্ত্ততে॥ নাম চিহ্নাদিনা দেহে বহ্নিনা বা মৃদাঙ্কনং। সা দীক্ষা প্রোচ্যতে ভূপ বাহ্যানাং জ্ঞানিনা মপি॥ বৈষ্ণবৈ বিষ্ণুভক্তৈশ্চ ব্রাহ্মণৈ র্বেদপারগৈঃ। সন্ধার্য্যা সতিলা মুদ্রা গোপীচন্দন সংযুতা॥ ইতি নারদপঞ্চরাত্রং॥ কৃষ্ণনামাক্ষরৈ র্গাত্র মঙ্কয়েচ্চন্দনাদিনা। স লোক পাবনো ভূত্বা বিষ্ণুলোক মবাপ্নুয়াৎ॥ অগ্নিতপ্তেন চক্রেণ ব্রাহ্মণো বাহু মূলয়োঃ। অঙ্কয়িত্বা জপেন্মন্ত্রং সংসারান্মোক্ষ মাপ্নুয়াৎ॥ ইতি পদ্মপুরাণং॥ তন্মান্না চাঙ্কিতং সর্ব্বং বসনং ভাজনাদিকং। ইতি হারীত স্মৃতিঃ॥ ॥ ॥ দেবতাবিশেষপ্রীতিজনিকাঙ্গুলিরচনা। যথা। মুদ্রাপদব্যুৎপত্তিমাহ তন্ত্রে। মোদনাৎ সর্ব্বদেবানাং দ্রাবণাৎ পাপসন্ততেঃ। তস্মান্মুদ্রেতি সা খ্যাতা সর্ব্বকামার্থ সাধনী। অথ মুদ্রাঃ প্রবক্ষ্যামি সর্ব্বতন্ত্রেষু কল্পিতাঃ। যাভি র্বিরচিতাভিশ্চ মোদন্তে মন্ত্র দেবতাঃ॥ অর্চ্চনে জপকালে চ ধ্যানে কাম্যে চ কর্ম্মণি।

স্নানে চাবাহনে শঙ্খে প্রতিষ্ঠাযাঞ্চ রক্ষণে ॥ নৈবেদ্যে চ তথান্যত্র তত্তৎ কল্প প্রকাশিতে । স্থানে মুদ্রাঃ প্রদ্রষ্টব্যাঃ স্ব স্ব লক্ষণ লক্ষিতাঃ ॥ আবাহনাদিকা মুদ্রা নব সাধারণা মতাঃ । তথা ষড়ঙ্গ মুদ্রাশ্চ সর্ব্ব মন্ত্রেষু যোজযেৎ ॥ একোনবিংশতি র্মুদ্রা বিষ্ণো রুক্তা মণীষিভিঃ । শঙ্খ চক্র গদা পদ্ম বেণু শ্রীবৎস কৌস্তুভাঃ ॥ বনমাল্যা তথা জ্ঞান মুদ্রা বিল্বাহ্বযা তথা । গরুড়াখ্যা পরা মুদ্রা বিষ্ণোঃ সন্তোষ বৰ্দ্ধিনী ॥ নারসিংহী চ বারাহী হাযগ্রীবী ধনু স্তথা । বাণমুদ্রা ততঃ পরশু র্জ্জগন্মোহনিকাপরা ॥ কামমুদ্রা পরাখ্যাতা শিবস্য দশমুদ্রিকাঃ । লিঙ্গ যোনি ত্রিশূলাখ্যা মালেষ্টাভী মৃগাহ্বযাঃ ॥ খট্বাঙ্গা চ কপালাখ্যা ডমরুঃ শিব তোষদাঃ । সূর্য্যস্যৈকৈব পদ্মাখ্যা সপ্তমুদ্রা গণেশিতুঃ ॥ দন্ত পাশাঙ্কুশা বিঘ্ন পরশু লড্ডুক সজ্ঞিতা । বীজপূরাহ্বযা মুদ্রা বিজ্ঞেযা বিঘ্ন পূজনে ॥ পাশাঙ্কুশ বরাভীতি খড়্গ চর্ম্ম ধনুঃ শরাঃ । মৌষলী মুদ্রিকা দৌর্গী মুদ্রাঃ শক্তেঃ প্রিযঙ্করাঃ ॥ লক্ষ্মী মুদ্রার্চ্চনে লক্ষ্ম্যা বাগ্বাদিন্যাশ্চ পূজনে । অক্ষমালা তথা বীণা ব্যাখ্যা পুস্তক মুদ্রিকাঃ ॥ সপ্ত জিহ্বা হ্বযা মুদ্রা বিজ্ঞেযা বহ্নি পূজনে । মৎস্য মুদ্রা চ কূর্ম্মাখ্যা লেলিহা মুণ্ড সংজ্ঞিকা ॥ মহাযোনি রিতি খ্যাতা সর্ব্ব সিদ্ধি সমৃদ্ধিদা । শক্ত্যর্চ্চনে মহাযোনিঃ শ্যামাদৌ মুণ্ড মুদ্রিকা ॥ মৎস্য কূর্ম্ম লেলিহাখ্যা মুদ্রা সাধারণী মতা । তারার্চ্চনে বিশেষাস্তু কথ্যন্তে পঞ্চ মুদ্রিকাঃ ॥ যোনিশ্চ ভূতিনী চৈব বীজাখ্যা দৈত্যধূমিনী । লেলিহানেতি সংপ্রোক্তাঃ পঞ্চমুদ্রাঃ প্রকাশিতাঃ ॥ দশকা মুদ্রিকা জ্ঞেযা ত্রিপুরাযাঃ প্রপূজনে । সংক্ষোভ দ্রাবণাকর্ষ বশ্যোন্মাদ মহাঙ্কুশাঃ ॥ খেচরী বীজ যোন্যাখ্যা ত্রিখণ্ডা পরিকীর্ত্তিতাঃ । কুম্ভ মুদ্রাভিসেকে স্যাৎ পদ্ম মুদ্রাসনে তথা ॥ কালকর্ণী প্রযোক্তব্যা বিঘ্ন প্রশম কর্ম্মণি । গালিনী চ প্রযোক্তব্যা জলশোধন কর্ম্মণি । শ্রীগোপালার্চ্চনে বেণু র্নৃহরে র্নারসিংহিকা । বরাহস্য চ পূজাযাং বারাহাখ্যাং প্রযোজযেৎ ॥ হযগ্রীবার্চ্চনে চৈব হাযগ্রীবীং প্রদর্শযেৎ । রামার্চ্চনে ধনু র্বাণ মুদ্রে পরশুস্তথার্চ্চনে ॥ পরশুরামস্য বিজ্ঞেযা জগন্মোহন সংজ্ঞিকা । বাসুদেবাহ্বযা

ধ্যানে হস্ত মুদ্রা তু রক্ষণে। সর্ব্বত্র প্রার্থনে চৈব প্রার্থনাখ্যাং প্রযোজয়েৎ ॥ ॥ উদ্দেশানুক্রমাদাসাং মুচ্যন্তে লক্ষণান্যথ। হস্তাভ্যামঞ্জলিং বদ্ধ্বা নামিকা মূল পর্ব্বণোঃ॥ অঙ্গুষ্ঠৌ নিক্ষিপেৎ সেয়ং মুদ্রা ত্বাবাহনী স্মৃতা। ১। অধোমুখী ত্বিয়ং চেৎ স্যাৎ স্থাপনী মুদ্রিকা স্মৃতা ॥ ২ ॥ উচ্ছ্রিতাঙ্গুষ্ঠ মুষ্ট্যোস্তু সংযোগাৎ সন্নিধাপনী। ৩। অন্তঃপ্রবেশিতাঙ্গুষ্ঠা সৈব সংবোধনী মতা ॥ ৪ ॥ উত্তান মুষ্টি যুগলা সংমুখী করণী মতা। ৫। দেবতাঙ্গে ষড়ঙ্গানাং ন্যাসঃ স্যাৎ সকলী কৃতিঃ ॥ ৬॥ সব্য হস্ত কৃতা মুষ্টি দীর্ঘাধোমুখ তর্জ্জনী। অবগুণ্ঠন মুদ্রেয় মভিতো ভ্রামিতা মতা ॥ ৭॥ অন্যোন্যাভিমুখা শ্লিষ্টা কনিষ্ঠানামিকা পুনঃ। তথৈব তর্জ্জনী মধ্যা ধেনুমুদ্রা প্রকীর্ত্তিতা॥ অমৃতী করণং স্যাদেতয়া সাধক সত্তমঃ। ৮। অন্যোন্য গ্রথিতাঙ্গুষ্ঠা প্রসারিত পরাঙ্গুলী॥ মহামুদ্রেয় মুদিতা পরমী করণে বুধৈঃ। প্রযোজয়েদিমা মুদ্রা দেবতাহ্বান কর্ম্মণি॥ ৯ ॥ ॥ বৈষ্ণবীনান্তু মুদ্রাণাং কথ্যন্তে লক্ষণান্যথ। বামাঙ্গুষ্ঠন্তু সংগৃহ্য দক্ষিণেন তু মুষ্টিনা॥ কৃত্বোত্তানং ততো মুষ্টি মঙ্গুষ্ঠস্তু প্রসারয়েৎ। বামাঙ্গুল্য স্তথা শ্লিষ্টাঃ সংযুক্তাঃ স্যুঃ প্রসারিতাঃ ॥ দক্ষিণাঙ্গুষ্ঠ সংস্পৃষ্টা জ্ঞেয়ৈষা শঙ্খমুদ্রিকা। ১। হস্তৌ তু সংমুখৌ কৃত্বা সনত প্রোথিতাঙ্গুলী ॥ তলান্ত মিলিতাঙ্গুষ্ঠৌ সুভুগ্নৌ সপ্রসারিতৌ। কনিষ্ঠাঙ্গুষ্ঠকৌ লগ্নৌ মুদ্রৈষা চক্র সংজ্ঞিকা ॥ ২॥ অন্যোন্যাভিমুখৌ হস্তৌ কৃত্বা তু গ্রথিতাঙ্গুলী। অঙ্গুল্যৌ মধ্যমে ভূয়ঃ সুলগ্নে সুপ্রসারিতে ॥ গদা মুদ্রেয় মুদিতা বিষ্ণোঃ সন্তোষ বর্দ্ধিনী। ৩। হস্তৌ তু সংমুখৌ কৃত্বা সনত প্রোথিতাঙ্গুলী॥ তলান্ত মিলিতাঙ্গুষ্ঠৌ কৃত্বৈষা পদ্ম মুদ্রিকা। ৪। ওষ্ঠে বামকরাঙ্গুষ্ঠো লগ্ন স্তস্য কনিষ্ঠিকা॥ দক্ষিণাঙ্গুষ্ঠ সংযুক্তা তৎ কনিষ্ঠা প্রসারিতা। তর্জ্জনী মধ্যমানামাঃ কিঞ্চিৎ সংকুচ্য চালিতাঃ॥ বেণু মুদ্রা ভবত্যেষা সুগুপ্তা প্রেয়সী হরেঃ। ৫। অন্যোন্য পৃষ্ঠ করয়ো মধ্যমানামিকাঙ্গুলী॥ অঙ্গুষ্ঠেন তু বধ্নীযাৎ কনিষ্ঠা মূল সংস্থিতে। তর্জ্জন্যৌ কারয়েদেষা মুদ্রা শ্রীবৎস সংজ্ঞিকা॥ ৬॥ অনামা পৃষ্ঠ সংলগ্না দক্ষিণস্য কনিষ্ঠিকা। কনিষ্ঠয়ান্যয়া বদ্ধা তর্জ্জন্যা দক্ষয়া তথা॥ বামানামাঞ্চ বধ্নীযাৎ দক্ষি-

পাঙ্গুষ্ঠ মূলকে। অঙ্গুষ্ঠ মধ্যমে বামে সংযোজ্য সরলাঃ পরাঃ ॥ চতস্রো হপ্যগ্র সংলগ্না মুদ্রা কৌস্তভ সংজ্ঞিকা। ৭। স্পৃশেৎ কণ্ঠাদি পাদান্তং তর্জ্জন্যাঙ্গুষ্ঠযা তথা ॥ করদ্বয়েন মালাবৎ মুদ্রেয়ং বনমালিকা। ৮। তর্জ্জন্যঙ্গুষ্ঠকৌ শক্তাবগ্রতো বিন্যসেৎ হৃদি ॥ বামহস্তাম্বুজং বাম জানু মূর্দ্ধনি বিন্যসেৎ। জ্ঞানমুদ্রা ভবেদেষা রামচন্দ্রস্য প্রেয়সী ॥৯॥ অঙ্গুষ্ঠং বাম মুদ্দণ্ডিত মিতর করাঙ্গুষ্ঠকেনাপি বদ্ধ্বা তস্যাগ্রং পীডযিত্বাঙ্গুলিভিরপি চ তা বামহস্তাঙ্গুলীভিঃ। বদ্ধ্বা গাঢ়ং হৃদি স্থাপয়ত বিমলধী র্ব্যাহরন্ মারবীজং বিল্বাখ্যা মুদ্রিকৈষা স্ফুট মিহ গদিতা গোপনীয়া বিবিক্তৈঃ ॥ ১০ ॥ হস্তৌ তু বিমুখৌ কৃত্বা গ্রথযিত্বা কনিষ্ঠিকে। মিথ স্তর্জ্জনিকে শ্লিষ্টে শ্লিষ্টাবঙ্গুষ্ঠকৌ তথা॥ মধ্যমা নামিকে দ্বে তু দ্বৌপক্ষাবিব চালয়েৎ। এষা গরুড মুদ্রা স্যাদ্বিষ্ণোঃ সন্তোষ বর্দ্ধিনী ॥ ১১ ॥ জানু মধ্যে করৌ কৃত্বা চিবুকৌষ্ঠৌ সমাবৃত্তৌ। হস্তৌ তু ভূমি সংলগ্নৌ কম্পমানঃ পুনঃ পুনঃ॥ মুখং বিবৃতকং কুর্য্যাৎ লেলিহানাঞ্চ জিহ্বিকাং। নারসিংহী ভবেদেষা মুদ্রা তৎ প্রীতি বর্দ্ধিনী ॥ ১২॥ অথবা। অঙ্গুষ্ঠাভ্যাঞ্চ করযো স্তথাক্রমস্য কনিষ্ঠিকে। অধোমুখীভিঃ সর্ব্বাভি র্মুদ্রেয়ং নৃহরে র্মতা ॥ ১২ ॥ দেবোপরি করং বামং কৃত্বোত্তান মধঃ সুধীঃ। নময়েদিতি সংপ্রোক্তা মুদ্রা বারাহ সংজ্ঞিকা ॥ ১৩॥ যদ্বা। দক্ষহস্তঞ্চোর্দ্ধ মুখং বামহস্ত মধোমুখং। অঙ্গুল্যগ্রস্তু সংযুক্তং মুদ্রা বারাহ সংজ্ঞিকা ॥ ১৩॥ বামহস্ত তলে দক্ষা অঙ্গুল্যা স্তাস্তথোন্মুখীঃ। সংরোপ্য মধ্যমাং তাসা মুন্নম্যাধো বিকুঞ্চয়েৎ ॥ হয়গ্রীব প্রিয়া মুদ্রা তন্মূর্ত্তে রনুকারিণী। ১৪। বামস্য মধ্যমাগ্রন্তু তর্জ্জন্যগ্রেণ যোজয়েৎ ॥ অনামিকাং কনিষ্ঠাঞ্চ তস্যাঙ্গুষ্ঠেন পীড়য়েৎ। দর্শয়েদ্বামকে স্কন্ধে ধনু র্মুদ্রেয মীরিতা ॥ ১৫ ॥ দক্ষমুষ্টেস্তু তর্জ্জন্যা দীর্ঘৈষা বাণ মুদ্রিকা। ১৬। যদ্বা জ্ঞানার্ণবে। যথা হস্ত গতং চাপং তথা হস্তং কুরু প্রিয়ে ॥ চাপমুদ্রেয মাখ্যাতা বাম হস্তে ব্যবস্থিতা। ১৭। যথা হস্ত গতা বাণা স্তথা হস্তং কুরু প্রিয়ে ॥ বাণমুদ্রেয মাখ্যাতা রিপু বর্গ নিকৃন্তনী। ১৮। তলে তলন্তু করযো স্তির্য্যক্ সংযোজ্য চাঙ্গুলীঃ ॥ সংহতাঃ প্রসৃতাঃ কুর্য্যাৎ মুদ্রা পরশু সংজ্ঞি

কা। ১৯। উচ্ছ্রিতাঙ্গুষ্ঠ মুষ্টী দ্বে মুদ্রা ত্রৈলোক্যমোহিনী ॥ ২০ ॥ হস্তৌ তু সংপুটৌ কৃত্বা প্রসৃতাঙ্গুলিকৌ তথা। তর্জ্জন্যৌ মধ্যমা পৃষ্ঠে অঙ্গুষ্ঠৌ মধ্যমাশ্রিতৌ কাম মুদ্রেয় মুদিতা সর্ব্ব দেব প্রিয়ঙ্করী ॥ ২১ ॥ * ॥ মহাদেব প্রিয়াণান্তু কথ্যন্তে লক্ষণান্যথ। উচ্ছ্রিতং দক্ষিণাঙ্গুষ্ঠং বামাঙ্গুষ্ঠেন বেষ্টয়েৎ ॥ বামাঙ্গুলী দক্ষিণাভি রঙ্গুলীভিশ্চ বন্ধয়েৎ। লিঙ্গমুদ্রেয় মাখ্যাতা শিব সান্নিধ্য কারিণী ॥ ১ ॥ মিথঃ কনিষ্ঠিকে বদ্ধা তর্জ্জনীভ্যা মনামিকে। অনামিকোর্দ্ধ সংশ্লিষ্ট দীর্ঘ মধ্যময়ো রধঃ ॥ অঙ্গুষ্ঠাগ্র দ্বয়ং ন্যসেৎ যোনি মুদ্রেয় মীরিতা। ২। অঙ্গুষ্ঠেন কনিষ্ঠান্তু বদ্ধা শিষ্টাঙ্গুলি ত্রয়ং ॥ প্রসারয়েৎ ত্রিশূলাখ্যা মুদ্রেষা পরিকীর্ত্তিতা। ৩। অঙ্গুষ্ঠ তর্জ্জন্যগ্রে তু গ্রথয়িত্বাঙ্গুলি ত্রয়ং ॥ প্রসারয়েদক্ষমালা মুদ্রেয়ং পরিকীর্ত্তিতা। ৪। অধঃ স্থিতো দক্ষহস্তঃ প্রসৃতো বর মুদ্রিকা ॥ ৫ ॥ ঊর্দ্ধীকৃতো বামহস্তঃ প্রসৃতো হভয় মুদ্রিকা। ৬। মিলিতানামিকাঙ্গুষ্ঠং মধ্যমাগ্রে নিযোজয়েৎ ॥ শ্লিষ্টাঙ্গুল্যুচ্ছ্রিতে কুর্য্যাৎ মৃগ মুদ্রেয় মীরিতা। ৭। পঞ্চাঙ্গুল্যো দক্ষিণাস্তু মিলিতা হ্যূ-র্দ্ধমমতাঃ ॥ খট্টাঙ্গ মুদ্রা বিখ্যাতা শিবস্যাতি প্রিয়া মতা। ৮। পাত্রবদ্বাম হস্তন্তু কৃত্বাঙ্কে বামকে তথা ॥ নিধায়োচ্ছ্রিত বৎ কুর্য্যাৎ মুদ্রা কাপালিকী মতা। ৯। মুষ্টিঞ্চ শিথিলাং বদ্ধা ঈষদুচ্ছ্রিত মধ্যমাং ॥ দক্ষিণা মূর্দ্ধ মুন্নম্য কর্ণদেশে প্রচালয়েৎ। এষা মুদ্রা ডমরুকা সর্ব্ব বিঘ্ন বিনাশিনী ॥ ১০ ॥ * ॥ তথা গণেশ মুদ্রাণা মুচ্যন্তে লক্ষণান্যথ। উত্তানোর্দ্ধ্বমুখী মধ্যা সরলা বদ্ধ মুষ্টিকা ॥ দন্ত মুদ্রা সমাখ্যাতা সর্ব্বাগম বিশারদৈঃ। ১। বাম মুষ্টেস্ত তর্জ্জন্যা দক্ষমুষ্টেস্তু তর্জ্জনীং ॥ সংযোজ্যাঙ্গুষ্ঠকাগ্রাভ্যাং তর্জ্জন্যগ্রে স্বকে ক্ষিপেৎ। এষা পাশাহ্বয়া মুদ্রা বিদ্বদ্ভিঃ পরিকীর্ত্তিতা ॥ ২ ॥ ঋজ্বীঞ্চ মধ্যমাং কৃত্বা তর্জ্জনী মধ্য পর্ব্বণি। সংযোজ্যাকুঞ্চয়েৎ কিঞ্চিন্মুদ্রৈষাঙ্কুশ সংজ্ঞিকা ॥ ৩ ॥ তর্জ্জনী মধ্যমানামা কনিষ্ঠাঙ্গুষ্ঠ মুষ্টিকা। অধোমুখী দীর্ঘরূপা মধ্যমা বিঘ্ন মুদ্রিকা ॥ ৪ ॥ পরশু মুদ্রা ৫ নিগদিতা প্রসিদ্ধা লড্ডু মুদ্রিকা। ৬। বীজপূরাহ্বয়া মুদ্রা প্রসিদ্ধত্বাদপেক্ষিতা ॥ ৭ ॥ * ॥ শাক্তেয়ীনাঞ্চ মুদ্রাণাং কথ্যন্তে লক্ষণান্যথ। পাশা১ঙ্কুশ২ বরা৩ভীতি৪

ধনুর্ব্বাণাঃ সমীরিতাঃ ॥ ৬ ॥ কনিষ্ঠানামিকে বদ্ধা স্বাঙ্গুষ্ঠেনৈব দক্ষতঃ । শিষ্টাঙ্গুলী তু প্রসৃতে সংশ্লিষ্টে খড়্গ মুদ্রিকা ॥ ৭ ॥ বাম হস্তং তথা তির্য্যক্ কৃত্বা চৈব প্রসার্য্য চ । আকুঞ্চিতাঙ্গুলীঃ স্যাচ্চর্ম্মমুদ্রেয়মীরিতা ॥ ৮ ॥ মুষ্টিং কৃত্বা তু হস্তাভ্যাং বামস্যোপরি দক্ষিণং । স্যান্মুষল মুদ্রেয়ং সর্ব্ববিঘ্ন বিনাশিনী ॥ ৯ ॥ মুষ্টিং কৃত্বা করাভ্যাঞ্চ বামস্যোপরি দক্ষিণং । কৃত্বা শিরসি সংযোজ্য দুর্গা মুদ্রেয়মীরিতা ॥ ১০ ॥ ❀ ॥ চক্রমুদ্রাং তথা বদ্ধা মধ্যমে দ্বে প্রসার্য্য চ । কনিষ্ঠিকে তথানীয় তদগ্রে হঙ্গুষ্ঠকৌ ক্ষিপেৎ ॥ লক্ষ্মীমুদ্রা পরাহ্যেষা সর্ব্ব সম্পৎপ্রদায়িনী ॥ ১ ॥ ❀ ॥ বীণা বাদন বদ্ধস্তৌ কৃত্বা সঞ্চালয়েচ্ছিরঃ । বীণা মুদ্রেয়মাখ্যাতা সরস্বত্যাঃ প্রিয়ঙ্করী ॥ ১ ॥ বামমুষ্টিং স্বাভিমুখীং কৃত্বা পুস্তক মুদ্রিকা ॥ ২ । দক্ষিণাঙ্গুষ্ঠ তর্জ্জন্যা বগ্রলগ্নে পরাঙ্গুলীঃ ॥ প্রসার্য্য সংহতোত্তানা এষা ব্যাখ্যান মুদ্রিকা । ৩ । শ্রীরামস্য সরস্বত্যা অত্যন্ত প্রেয়সী মতা ॥ ❀ ॥ মণিবন্ধ স্থিতৌ কৃত্বা প্রসৃতাঙ্গুলিকৌ করৌ । কনিষ্ঠাঙ্গুষ্ঠ যুগলে মিলিত্বান্তঃ প্রসারয়েৎ ॥ সপ্ত জিহ্বাখ্য মুদ্রেয়ং বৈশ্বানর প্রিয়ঙ্করী । ১ । ❀ । কনিষ্ঠাঙ্গুষ্ঠকৌ শক্তৌ করয়ো রিতরেতরং ॥ তর্জ্জনী মধ্যমানামা সংহতা ভুগ্ন বর্জ্জিতা । মুদ্রৈষা গালিনী প্রোক্তা শঙ্খস্যোপরি চালিতা ॥ ❀ ॥ দক্ষাঙ্গুষ্ঠং পরাঙ্গুষ্ঠে ক্ষিপ্ত্বা হস্তদ্বয়েন তু । সাবকাশা মেকমুষ্টিং স্যাৎ সা স্যন্ত্র মুদ্রিকা ॥ ❀ ॥ মুষ্ট্যোরূর্দ্ধ্বীকৃতাঙ্গুষ্ঠৌ তর্জ্জন্যগে তু বিন্যসেৎ । সর্ব্ব রক্ষাকরী হ্যেষা দন্ত মুদ্রা প্রকীর্ত্তিতা ॥ ❀ ॥ প্রসৃতাঙ্গুলিকৌ হস্তৌ মিথঃ শ্লিষ্টৌ চ সংমুখৌ । স্যাৎ স্বে হৃদ্যেবং মুদ্রা প্রার্থন সংজ্ঞিকা ॥ ❀ ॥ অঞ্জল্যঞ্জলি মুদ্রা স্যাদ্বাসুদেবাহ্বয়া চ সা । অঙ্গুষ্ঠানুন্নতৌ কৃত্বা মুষ্ট্যোঃ সংলগ্নয়ো র্দ্বয়োঃ ॥ তাবেবাভিমুখৌ স্যাৎ মুদ্রৈষা [illegible]লকর্ণিকা । ❀ । দক্ষিণা নিবিড়া মুষ্টির্নাসিকার্পিত তর্জ্জনী ॥ মুদ্রা বিস্ময় সংজ্ঞা স্যাৎ বিস্ময়াবেশ কারিণী । ❀ । মুষ্টি বদ্ধী কৃতাঙ্গুষ্ঠা দক্ষিণা নাদ মুদ্রিকা ॥ তর্জ্জন্যঙ্গুষ্ঠ সংযোগাদগ্রতো বিন্দু মুদ্রিকা । ❀ । অধোমুখে বামহস্তে ঊর্দ্ধাস্যং দক্ষহস্তকং ॥ ক্ষিপ্ত্বাঙ্গুলী রঙ্গুলীভিঃ সংগৃহ্য পরিবর্ত্তয়েৎ । এষা সংহার মুদ্রা স্যাৎ বিসর্জ্জন বিধৌ স্মৃতা ॥ ❀ ॥

দক্ষপাণি পৃষ্ঠদেশে বামপাণি ত-
লং ন্যসেৎ। অঙ্গুষ্ঠৌ চালয়েৎ স-
ম্যক্ মুদ্রেয়ং মৎস্যরূপিণী ॥ * ॥
বামহস্তস্য তর্জ্জন্যাং দক্ষিণস্য ক-
নিষ্ঠয়া। তথা দক্ষিণ তর্জ্জন্যাং বা-
মাঙ্গুষ্ঠেন যোজয়েৎ ॥ উন্নতং দক্ষি-
ণাঙ্গুষ্ঠং বামস্য মধ্যমাদিকাঃ। অ-
ঙ্গুষ্ঠে [illegible]য়েৎ পৃষ্ঠে দক্ষিণস্য কর-
[illegible] ॥ বামস্য পিতৃতীর্থেন মধ্য-
[illegible]মিকে তথা। অধোমুখে চ তে
[illegible]ৎ দক্ষিণস্য করস্য চ ॥ কূর্ম্ম-
পৃষ্ঠ সমং [illegible]ৎ দক্ষপাণিঞ্চ সর্ব্ব
তঃ। কূর্ম্মমুদ্রেয় মাখ্যাতা দেবতা
ধ্যান [illegible] পৃষ্ঠ ক্রোড়ে ॥ * ॥
অন্তরাঙ্গুষ্ঠ মুষ্টিঞ্চ কৃত্বা বামকরস্য চ
। মধ্যমাগ্রং দক্ষিণস্য তথালম্ব্য প্র-
[illegible]নাথ তর্জ্জন্যা মঙ্গুষ্ঠা-
[illegible]য়েৎ। দক্ষিণং যোজয়েৎ
[illegible]ঙ্গুষ্ঠৌ তু সাধকঃ ॥ দর্শয়ে
দক্ষিণে ভাগে মুণ্ডমুদ্রেয় মুচ্যতে
॥ * ॥ তর্জনী মধ্যমানামাঃ সমং কু-
র্য্যাদধোমুখং। অনামায়াং ক্ষিপে-
দৃদ্ধাং ঋজ্বীং কৃত্বা কনিষ্ঠিকাং ॥ লে-
লিহা নাম মুদ্রেয়ং জীবন্যাসে প্রকী-
র্ত্তিতা। তর্জন্যনামিকা মধ্যা কনিষ্ঠা
ক্রম যোগতঃ ॥ করয়োর্যোজয়েত্ত্বেব
কনিষ্ঠা মূল যোগতঃ। অঙ্গুষ্ঠাগ্রে তু

নিঃক্ষিপ্য মহাযোনিঃ প্রকীর্ত্তিতা
॥ * ॥ তারায়া যোন্যাদি মুদ্রা যথা
। যোনিমুদ্রা চ বক্তব্যা ভূতিনী বক্ত-
ব্যা বীজাখ্যাপি। পরিবর্ত্ত্য করৌ-
স্পৃষ্টৌ কনিষ্ঠাকৃষ্ঠ মধ্যমে। অনামা
যুগলঞ্চাধ স্তর্জনী যুগলং পৃথক্ ॥
অন্যোন্যং নিবিড়ং বদ্ধা হঙ্গুষ্ঠাগ্রে
হনামিকে ততঃ। দানবধ্বনকেত্ত্বা-
খ্যা মুদ্রেষা কথিতা প্রিয়ে ॥ অস্যা-
স্ত বন্ধনামন্ত্রী বন্ধনান্মুচ্যতে ধ্রুবং
। * । বক্ত্রং বিস্তারিতং কৃত্বাপ্যধো
জিহ্বাঞ্চ চালয়েৎ ॥ পার্শ্বস্থং মুষ্টি
যুগলং লেলিহানেতি কীর্ত্তিতা।
এষা তারারাধনে হন্যা লেলিহানা
বক্তব্যা। * । যোনি র্মায়াধরঃ সেন্দু
র্বধূঃ কূর্চঃ ক্রমাদ্বিদুঃ। বীজানি চোচ্চ-
রন্ মন্ত্রী মুদ্রা বন্ধন মাচরেৎ ॥ তর্জ-
ন্যঙ্গুষ্ঠ সংযোগাদগ্রতো বিন্দু মুদ্রিকা
। বামকেশ্বর তন্ত্রোক্তাঃ প্রকাশ্যন্তে
হথ মুদ্রিকাঃ ॥ শৃণু দেবি প্রবক্ষ্যামি
মুদ্রাঃ সর্ব্বার্থ সিদ্ধিদাঃ। যাভি র্বি-
রচিতাভিস্ত সান্নিধ্যং ত্রৈপুরং ভ-
বেৎ ॥ পরিবর্ত্ত্য করৌ স্পৃষ্টাবঙ্গুষ্ঠৌ
কারয়েৎ সমৌ। অনামান্তর্গতে কৃ-
ত্বা তর্জন্যৌ কুটিলাকৃতী ॥ কনিষ্ঠি-
কে নিযুঞ্জীত নিজস্থানে মহেশ্বরি।
ত্রিখণ্ডেয়ং সমাখ্যাতা ত্রিপুরাহ্বান

কর্ম্মাণি ॥ * ॥ মধ্যমা মধ্যগে কৃত্বা কনিষ্ঠে হ্যঙ্গুষ্ঠ রোধিতে । তর্জ্জন্যৌ দণ্ডবৎ কৃত্বা মধ্যমোপর্য্যনামিকে । এষা চ প্রথমা মুদ্রা সর্ব্বসংক্ষোভকারিণী ॥ * ॥ এতস্যা এব মুদ্রায়া মধ্যমে সরলে যদা । ক্রিয়েতে পরমেশানি সর্ব্ববিদ্রাবিণী তদা ॥ * ॥ মধ্যমা তর্জ্জনীভ্যাঞ্চ কনিষ্ঠানামিকে সমে । অঙ্কুশাকাররূপাভ্যাং মধ্যমে পরমেশ্বরি ॥ অঙ্গুষ্ঠৌ তু নিযুঞ্জীত কনিষ্ঠানামিকোপরি । ইয়মাকর্ষিণী মুদ্রা ত্রৈলোক্যাকর্ষিণী পরা ॥ * ॥ পুটাকারৌ করৌ কৃত্বা তর্জ্জন্যাবঙ্কুশাকৃতী । পরিবর্ত্ত ক্রমেণৈব মধ্যমে তদধোগতে ॥ ক্রমেণ দেবি তেনৈব কনিষ্ঠানামিকে তথা । সংযোজ্য নিবিড়াঃ সর্ব্বা অঙ্গুষ্ঠাবগ্রদেশতঃ ॥ মুদ্রেয়ং পরমেশানি সর্ব্ববশ্যকরী মতা । * । সম্মুখৌ তু করৌ কৃত্বা মধ্যমা মধ্যগে হ্যন্ত্যজে ॥ অনামিকে তু সরলে তদ্বহিস্তর্জ্জনীদ্বয়ং । দণ্ডাকারৌ তদঙ্গুষ্ঠৌ মধ্যমা নখদেশগৌ ॥ মুদ্রৈষোন্মাদিনী নাম্না কর্ষিণী সর্ব্বযোষিতাং । * । অস্যাস্ত নামিকা যুগ্ম মধঃ কৃত্বাঙ্কুশাকৃতী ॥ তর্জ্জন্যাবপি তেনৈব ক্রমেণ বিনিযোজয়েৎ । ইয়ং মহাঙ্কুশা মুদ্রা সর্ব্বকামার্থসাধিনী ॥ * ॥ সব্যং দক্ষিণদেশে তু সব্যদেশে তু দক্ষিণং । বাহুং কৃত্বা মহাদেবি হস্তৌ সংপরিবর্ত্য চ ॥ কনিষ্ঠেনামিকে দেবি যুক্তে তেন ক্রমেণ চ । তর্জ্জনীভ্যাং সমাক্রান্তে সর্ব্বোর্দ্ধমপি মধ্যমে ॥ অঙ্গুষ্ঠৌ তু মহেশানি সরলাবপি কারয়েৎ । ইয়ং সা খেচরী নাম্না পার্থিব স্থানযোজিতা ॥ * ॥ পরিবর্ত্য করৌ স্পৃষ্টাবর্দ্ধচন্দ্রাকৃতী প্রিয়ে । তর্জ্জন্যঙ্গুষ্ঠযুগলং যুগপৎ কারয়েত্ততঃ ॥ অধঃ কনিষ্ঠাবষ্টব্ধে মধ্যমে বিনিযোজয়েৎ । তথৈব জটিলে যোজ্যে সর্ব্বাধস্তাদনামিকে ॥ বীজমুদ্রেয়মচিরাৎ সর্ব্বসিদ্ধিবিবর্দ্ধিনী । * । মধ্যমে জটিলে কৃত্বা তর্জ্জন্যুপরি সংস্থিতে ॥ অনামিকে মধ্যগতে তথৈব হি কনিষ্ঠিকে । সর্ব্বা একত্র সংযোজ্যা অঙ্গুষ্ঠপরিপীড়িতাঃ ॥ এষা তু পরমা মুদ্রা যোনিমুদ্রেয়মীরিতা । * । এতা মুদ্রা মহেশানি ত্রিপুরায়া ময়োদিতাঃ । পূজাকালে প্রযোক্তব্যা যথানুক্রমযোগতঃ ॥ বামহস্তেন মুষ্টিন্তু বদ্ধ্বা কর্ণপ্রদেশকে । তর্জ্জনীং সরলাং কৃত্বা ভ্রাময়েন্মনুবিত্তমঃ ॥ সৌভাগ্যদণ্ডিনী মুদ্রা ন্যাসকালেপি সূচিতা । * । অন্তরঙ্গুষ্ঠমুষ্ট্যা ত

নিরুধ্য তর্জনী মিমাং ॥ ত্রিপুজিহ্বা-গুহ্যা মুদ্রা ন্যাসকালে তু সূচিতা ।*। বদ্ধা তু যোনিমুদ্রাং বৈ মধ্যমে কুটিলে কুরু ॥ অঙ্গুষ্ঠেন তদগ্রে তুর্দ্ধেষং ভূতিনী মতা ।*। বামমুষ্টিং বিধায়াথ তর্জনী মধ্যমে ততঃ ॥ প্রসার্য্য তর্জনীমুদ্রা নির্দ্দিষ্টা বজ্রপাণিনা ॥ ইতি তন্ত্রসারে মুদ্রা প্রকরণং সমাপ্তং ॥*॥*॥ অপিচ । উক্তাঃ স্তব নমস্কারাঃ শৃণুত্বং পুরতো যুবাং । মুদ্রাণাং পরিসংখ্যানং স্বরূপঞ্চ যথা ক্রমং ॥ ধেনুশ্চ সম্পুটশ্চৈব প্রাঞ্জলি র্বিল্ব পদ্মকৌ । নারাচৌ মুণ্ড দণ্ডৌ চ যোনি রূর্দ্ধং তথৈব চ ॥ বন্দনী চ মহামুদ্রা মহাযোনি স্তথৈব চ । ভগশ্চ পুটকশ্চৈব নিঃশঙ্কো হথার্দ্ধচন্দ্রকঃ ॥ অঙ্গঞ্চ দ্বিমুখঞ্চৈব শঙ্খ মুদ্রাথ মুষ্টিকঃ । বজ্রঞ্চৈব তথা-বজ্রং সযোনি র্বিমল স্তথা ॥ ঘটঃ শিখরিণী তুঙ্গঃ প্রোক্তো হথ হ্যর্দ্ধধেনুকঃ । সংমীলনী চ ক্রগুঞ্চ চক্রং শূলং তথৈব চ ॥ সিংহবক্ত্রং গোমুখঞ্চ প্রোন্নামোন্নমনং তথা । বিম্বং গাশুপতং শূদ্ধং ত্যাগো হথ সাধনী তথা ॥ প্রসাধনী চোগ্রমুদ্রা জগুল্লী ব্যূহ মেব চ । ত্রিমখণ্ডাসিবল্লী চ যোগো ভেদো হথ মোহনং ॥ বাণো ধনুশ্চ তূণীরং মুদ্রা এতাস্তু সত্তমাঃ । অষ্টোত্তরশতং মুদ্রা ব্রহ্মণা যাঃ প্রকীর্ত্তিতাঃ ॥ তাসান্তু পঞ্চপঞ্চাশদেতাঃ গ্রাহ্যাস্তু পূজনে । শেষাস্তু যা ত্রিপঞ্চাশন্মুদ্রা স্তাঃ সময়েষু চ ॥ দ্রব্যানয়ন সংকেত নটনাদিষু তাঃ স্মৃতাঃ । দেবানাং চিন্তনে যোগে ধ্যানে জপ্যে বিসর্জ্জনে ॥ আদ্যাস্তু পঞ্চ পঞ্চাশন্মুদ্রা ভৈরব কীর্ত্তিতাঃ । মুদ্রাং বিনা তু যজ্জপ্যং প্রাণায়ামঃ সুরার্চনং ॥ যোগো ধ্যানাসনে চাপি নিষ্ফলানি চ ভৈরব ॥*॥ প্রত্যেক লক্ষণং তেষাং শৃণুত্বং তনয়ৌ যুবাং ॥ দক্ষিণা মধ্যমাগ্রেণ সব্য হস্তস্য তর্জ্জনীং । যোজয়েৎ সব্য মধ্যান্তু তর্জ্জন্যা দক্ষিণেন বৈ ॥ তথা দক্ষানামিকয়া বামহস্ত কনিষ্ঠিকাং । অনামিকান্তু বামস্য দক্ষিণস্য কনিষ্ঠয়া ॥ যোজয়েন্তু ক্রিয়াবান্ সম্যক্ দক্ষিণা বর্ত্তনেন তু । ধেনুমুদ্রা সমাখ্যাতা সর্ব্বদেবস্য তুষ্টিদা ॥ ১॥ সংযোজ্য দ্বৌ তলৌ সর্ব্বাণ্যঙ্গুষ্ঠাগ্রাণি হস্তযোঃ। সংযোজ্য পার্শ্বতোহঙ্গুষ্ঠৌ সংপুটঃ প্রোচ্যতে সুরৈঃ ॥ সর্ব্বেষা মথ দেবানাং সংপুটঃ শস্যতে সদা । ধ্যান সংপুট যোগাদৌ সম্পুটঃ শস্যতে সদা ॥২॥ নিজস্রুগলং পাণ্যোঃ সংযোজ্যার্দ্ধেন

এবচ। মধ্যশূন্যঃ পুটাকারঃ প্রাঞ্জ
লিঃ পরিকীর্ত্তিতঃ ॥৩॥ অঙ্গুষ্ঠমন্তরং
কৃত্বা পাণ্যোর্মুষ্টিং বিধায চ। সং
যোজ্য বিল্ববত্তে তু বিল্বমুদ্রা প্রকী
র্ত্তিতা ॥৪॥ মণিবন্ধাদাকরভং সংযো-
জ্য করযো র্দ্বযোঃ। অঙ্গুষ্ঠে চাপি
সংযোজ্য তথৈব চ কনিষ্ঠকে ॥ তি
স্রস্তিস্রো দ্বযোঃ পাণ্যো রঙ্গুলী র্ব্বির
লা স্তুতঃ। পদ্মমুদ্রা সমাখ্যাতা চ-
তুর্ব্বর্গপ্রদা নৃণাং ॥৫॥ অঙ্গুষ্ঠাগ্রেণ ত
র্জ্জন্যাঃ সংযোজ্যাথোর্দ্ধ রেখযা।
অন্যাঙ্গুলী স্তথা নম্য নারাচঃ স্যাৎ
প্রসার্য্যতে ॥ মমচৈব শিবাযাশ্চ প্রী-
তিদেযং প্রিযঙ্করী। নারাচমুদ্রা স-
ততং প্রীত্যৈ বেতালভৈরব।৬॥ অ-
ন্তরাঙ্গুষ্ঠ মুষ্টিঞ্চ কৃত্বা বামকরস্য তু।
মধ্যমাভ্যাং দক্ষিণস্য তথা নম্য প্র
যত্নতঃ ॥ মধ্যাঙ্কেনাথ তর্জ্জন্যা অ-
ঙ্গুষ্ঠাগ্রা ন্নিযোজ্য চ। দক্ষিণং যোজ-
যেৎ পাণিং বামমুষ্টৌ তু সাধকঃ ॥
দর্শযেদ্দক্ষিণে ভাগে মুণ্ডমুদ্রেব নি-
য্যতে। ইযন্তু গণনাথস্য প্রীতিদা
মুদ্রিকোত্তমা ॥ সর্ব্বেষা মপি দেবা
নাং তুষ্টিদা সর্ব্বকর্ম্মসু।৭। অঙ্গুষ্ঠম-
ধ্যমাদীংশ্চ সমগ্রানম্য তর্জ্জনীং ॥
প্রসার্য্য দণ্ডমুদ্রেতি দক্ষিণস্য করস্য
তু।৮। মধ্যাঙ্গুলীস্তু সংযোজ্য কর-

যো রুভযোরপি ॥ সংবেষ্ট্য রজ্জুব-
দ্ধে তু পাণ্যো রপি কনিষ্ঠকে। বাম-
স্য বামমূলেন তদগ্রং বিনিযোজযেৎ
॥ দক্ষস্য মধ্যমূলেন তথাগ্রং বাম
মেব চ। যোজযেৎ যোজনাৎ পশ্চা-
দাবর্ত্ত্য করশাখিকাঃ ॥ যোন্যা কা-
রন্তু তন্মধ্যং যোনিমুদ্রা প্রকীর্ত্তিতা।
কামাখ্যাযাঃ পঞ্চমূর্ত্তে র্দুর্গাযা অপি
ভৈরব ॥ প্রীতিদা যোনিমুদ্রেযং মম
কামস্য চ প্রিযা।৯। সংযুক্তা স্বঙ্গু-
লীঃ সর্ব্বাঃ প্রসার্য্যাঙ্গুষ্ঠ পর্ব্বণা ॥
অগ্রেণ চ কনিষ্ঠাযা অগ্রেণাপি চ
যোজযেৎ। করস্য দক্ষিণস্যেয মর্দ্ধ-
যোনিঃ প্রকীর্ত্তিতা ॥ ১০ ॥ সংপুটং
প্রাঞ্জলিং বাপি যদি শীর্ষে নিযোজ-
যেৎ। বন্দনীযা সমাখ্যাতা মুদ্রা
বিষ্ণুপ্রমোদিনী।১১। সৈব চেৎ প্রব-
ণাশক্তা মহামুদ্রা প্রকীর্ত্তিতা।১২।
দক্ষিণাঙ্গে তু সা শক্তা বৈষ্ণবী পরি-
কীর্ত্তিতা ॥১৩॥ মহাযোনিস্তু কথিতা
বৈষ্ণবী তন্ত্রগোচরে। দ্বযো র্মূলেত্ব-
ঙ্গুষ্ঠাগ্রমঙ্গুলীশ্চ কনিষ্ঠযোঃ ॥ নিযো-
জ্য প্রসৃতী কৃত্বা দ্বে পাণী যোজযেৎ
পুনঃ। ভগমুদ্রা চ সা খ্যাতা লক্ষ্মী
বাণী শিবাপ্রিযা ॥ ১৪ ॥ সর্ব্বাঙ্গুলী
নামগ্রৌঘং দক্ষিণস্য করস্য চ। সং-
যোজ্যৈকত্র পুরতো নির্দ্দেশঃ পুটকঃ

মৃতঃ ॥ ১৫ ॥ কনিষ্ঠানামিকাঙ্গুষ্ঠাঙ্গুলীনাং যোজয়েদ্বধঃ। অগ্রাণ্যেকত্র মধ্যান্তু তর্জ্জনীঞ্চ প্রসার্য্য বৈ ॥ ঊর্দ্ধী কৃত্য করদ্বন্দ্বং পৃথগগ্রে নিযোজয়েৎ। শিরঃশঙ্কো নাম মুদ্রেয়ং নরসিংহ বরাহযোঃ ॥ ১৬ ॥ কনিষ্ঠানামিকা মধ্যা মাঙ্গুষ্ঠ্য দক্ষিণস্য চ। করস্য তর্জ্জন্যঙ্গুষ্ঠে প্রসার্য্য ক্রিয়তে তথা ॥ সা মুদ্রা হ্যর্দ্ধচন্দ্রাখ্যা গৃহাণাং প্রীতিদায়িনী। ১৭। ঊর্দ্ধী কৃত্য তথাঙ্গুষ্ঠং দক্ষিণস্য করস্য চ ॥ কৃত্বা নধ্যং তদঙ্গুষ্ঠং বামাঙ্গুষ্ঠং তথোদ্ধতঃ। উত্তানাঙ্গুষ্ঠং তথা স্বর্য্যাদঙ্গমুদ্রা প্রকীর্ত্তিতা ॥ ১৮ ॥ এতস্যা এব মুদ্রায়াঃ কনিষ্ঠাদি বিমোচতঃ। অষ্টৌ মুদ্রাঃ সমাখ্যাতা নাম তাসাং পৃথক্ পৃথক্ ॥ ত্রিমুখঞ্চৈব ১৯ মুষ্টিশ্চ ২০ বজ্র ২১ মাবদ্ধ ২২ মেব চ। বিমলশ্চ ২৩ ঘটশ্চৈব ২৪ ভঙ্গঃ ২৫ পঙ্ক ২৬ স্তথৈব চ ॥ নবানাং বিষ্ণুমূর্ত্তীনাং সাক্ষে নঙ্গনমুদ্রিকাঃ। ক্রমানব সমাখ্যাতা নাদিকানাং তথৈব চ ॥ সংযোজ্য করয়োঃ পৃষ্ঠে তথাবর্ত্ত্য তু বৈনমং। প্রসার্য্য তর্জ্জনী যুগ্মং সংযুক্তং সর্ব্বতঃ পুনঃ ॥ অঙ্গুষ্ঠৌ চ তথা শক্তৌ শঙ্খমুদ্রা প্রকীর্ত্তিতা। ২৭। উত্তান মঞ্জলিং কৃত্বা অঙ্গুষ্ঠে দ্বে কনিষ্ঠয়োঃ ॥ মূলে নিঃক্ষিপ্য তু করে সংযোজ্যাথ প্রদর্শয়েৎ। সযোনিরিতি সা খ্যাতা মুদ্রা দেবৌঘ তুষ্টিদা ॥ ২৮ ॥ মুষ্টি র্দক্ষিণহস্তস্য যদোদ্ধা ঙ্গুষ্ঠিকা ভবেৎ। সা স্যাৎ শিখরিণী মুদ্রা ব্রাহ্মী সূর্য্য প্রিয়া চ সা ॥ ২৯ ॥ অনামিকে কনিষ্ঠে তু সংযোজ্য ঋজনা পুনঃ। মধ্যমা তর্জ্জনীনান্তু ধেনুমদ্রেব বন্ধনং ॥ সাদ্ধধেন রিতি খ্যাতা চন্দ্র প্রীতি বিবর্দ্ধিনী। ৩০। করযো রঙ্গুলীঃ সর্ব্বাঃ সর্ব্বাগ্রাণ্যেকতঃ স্থিতা ॥ নিযোজ্যার্দ্ধ তলে চৈব তদধো ৎপি বিবর্জ্য চ। অগ্রে রগ্রং যোজয়েত্ত মুদ্রা সম্মীলনী তু সা। ৩১। ভৌম ভূমি মুনীশানা নিয়ং প্রীতি বিবর্দ্ধিনী। লীস্ত সংসক্তা দক্ষিণস্য করস্য চ ॥ কিয়দ্ভাগং তথান্যস্য তলং স্বর্য্যাত্তু স্বগুবৎ। সমাখ্যাতা স্বগুমুদ্রা বুধবাণী শিবাপ্রিয়া ॥ ৩২ ॥ সর্ব্বাঙ্গুলীনাং মধ্যেস্তু বামহস্তস্য চাঙ্গুলীঃ। প্রসার্য্যাঙ্গুষ্ঠ যুগলং সংযোজ্যাগ্রেণ ভৈরব ॥ তদঙ্গুষ্ঠ দ্বয়ং কার্য্যং সংমুখং বিতরেত্ততঃ। চক্রমুদ্রা সমাখ্যাতা গুরু বিষ্ণু শিবপ্রিয়া ॥ ৩৩ ॥ অঙ্গুষ্ঠং মধ্যমাঞ্চৈব নামযিত্বা করস্য চ। দক্ষিণস্যাপরাস্তিস্রো যোজ-

যেদগুতঃ পুনঃ ॥ শূল মুদ্রা সমাখ্যাতা মম শুক্র গুহপ্রিয়া । ৩৪ । নিষ্ঠীকৃত্য তু করৌ বামাঙ্গুলিগণস্য তু ॥ অগ্রাণি যোজয়েন্মধ্যে তলস্যা সব্যহস্ততঃ । অধঃ কৃত্বা বামহস্তং মুদ্রা সিংহমুখী স্মৃতা ॥ ৩৫ ॥ ইয়ং প্রীত্যৈ তু দুর্গায়াঃ সূর্য্য পুত্রস্য চক্রিণঃ । ভগমুদ্রা কর্ণমূলে গোমুখাখ্যা প্রকীর্ত্তিতা ॥ মম বিষ্ণো স্তথা ব্রাহ্মোঃ সর্ব্বদা প্রীতিদায়িনী ॥ ৩৬ ॥ মুষ্টিদ্বয় মথোত্তানং কৃত্বা সংযোজ্য পার্শ্বতঃ ॥ দক্ষিণস্য কনিষ্ঠাদীন্ প্রসার্য্য ক্রমতঃ পুনঃ । তথা বামকনিষ্ঠাভ্যা মেকৈকেন প্রসারয়েৎ ॥ অষ্টৌ মুদ্রাঃ সমাখ্যাতা নামতঃ ক্রমতঃ শৃণু । প্রোম্মামো ৩৭ মনন ৩৮ শ্চৈব বিম্বং ৩৯ পাশুপতং ৪০ তথা ॥ শঙ্খং ৪১ ত্যাগঃ ৪২ সাধনী ৪৩ চ তথা চৈব প্রসাধনী ৪৪ । আঙ্গুষ্ঠ্য করশাখাস্ত দক্ষিণাঃ সা তু মুদ্রিকা ॥ উগ্রমুদ্রা সমাখ্যাতা স্বহস্তস্য বিপর্য্যযাৎ । ৪৫ । ইন্দ্রাদি লোকপালানাং দশমুদ্রাঃ প্রকীর্ত্তিতাঃ ॥ সর্ব্বেষা মপি দেবানাং পরমপ্রীতি বর্দ্ধনাঃ । অঙ্গুষ্ঠাগ্রস্ত তর্জ্জন্যা অগ্রভাগেন যোজয়েৎ ॥ আঙ্গুষ্ঠ্য মধ্যমাভ্যাস্ত দক্ষহস্তস্য চাঙ্গুলীঃ । দর্শয়েৎ কুণ্ডলাকারং কুণ্ডলী শক্তি তুষ্টিদং ॥ সর্ব্বেষা মপি দেবানাং তথা তুষ্টিকরং মহৎ । ৪৬ । অঙ্গুষ্ঠ তর্জ্জনী মধ্যা অগ্রভাগে নিযোজ্য চ ॥ মধ্যমাঞ্চ কনিষ্ঠাঞ্চ আঙ্গুষ্ঠ্যন্দক্ষিণে করে । ত্রিমুখাখ্যা সমাখ্যাতা বিশ্বেদেব প্রিয়া সদা ॥ কেতোঃ প্রিয়েযং সততং মাতৃণামপি তুষ্টিদা । ৪৭ । তর্জ্জন্যঙ্গুষ্ঠযো রগ্রভাগৌ সংযোজ্য চাঙ্গুলীঃ ॥ অন্যা আঙ্কুঞ্চয়েত্তিস্রঃ সাসিবল্লী প্রকীর্ত্তিতা । পিতৃণা মথ সাধ্যানাং রুদ্রাণাং বিশ্বকর্ম্মণঃ ॥ সর্ব্বদা প্রীতিজননী অসিবল্লী প্রকীর্ত্তিতা । ৪৮ । পাদৌ তলাভ্যাং সংযোজ্য তদঙ্গুষ্ঠ দ্বয়ং ততঃ ॥ ঊর্দ্ধ্বং সংযোজযেন্নাভৌ অস্যোপরি তথাঞ্জলিঃ । যোগমুদ্রা সমাখ্যাতা যোগিনাং তত্ত্বদায়িনী ॥ সর্ব্বেষা মপি দেবানাং পূজনে চিন্তনে তথা । যোগমুদ্রা সমাখ্যাতা তুষ্টি প্রীতিকরী সদা ॥ ৪৯ ॥ প্রাঞ্জলি নাম মুদ্রা ত ঊর্দ্ধাধো ভাব যোজিতাং । বিভিদ্য দর্শয়েদ্ধস্তৌ ঊর্দ্ধাধঃ প্রকৃতী কৃতৌ ॥ ভেদ মুদ্রা সমাখ্যাতা মম বিষ্ণো র্বিধেঃ প্রিয়া । ৫০ । অঙ্গুষ্ঠে দ্বে ত নিঃক্ষিপ্য করযো রুভয়ো স্তলে ॥ অগ্রেণ যোজ-

যেৎ পশ্চাৎ কনিষ্ঠা যুগলং ততঃ। উভয়ো হস্তয়ো শ্চান্যা স্তর্জন্যাদ্যাশ্চ যোজয়েৎ ॥ অগ্রাগ্রৈস্তু পৃথক্ কৃত্য দর্শয়েত্তৎ কনিষ্ঠিকাং। মুদ্রা সম্মোহনঃ নাম কাম দুর্গা রমাপ্রিয়া ॥ সর্ব্বেষা মপি দেবানাং মোহনং প্রীতিদং স্মৃতং। ৫১। আনম্য সব্য হস্তস্য মধ্যমা নামিকে তথা ॥ তয়োঃ পৃষ্ঠে তু সংযোজ্য অঙ্গুষ্ঠাগ্রং ততঃ পরং। কনিষ্ঠাং তর্জনীঞ্চৈব অগ্রেণ যোজয়েত্ততঃ ॥ বাণমুদ্রা সমাখ্যাতা সর্ব্বদেবস্য তুষ্টিদা। ৫২। সর্ব্বাঙ্গুলীস্তু সঙ্কোচ্য অঙ্গুষ্ঠ মথ তর্জনীং ॥ প্রসার্য্য করয়োঃ পশ্চাদঙ্গুষ্ঠাগ্রন্তু যোজয়েৎ। অঙ্গুষ্ঠাগ্রেণ তর্জন্যা অগ্রেণাপি চ তর্জনীং ॥ যথা শক্তি প্রসার্য্যাপি ধনুর্মুদ্রা প্রকীর্ত্তিতা। ৫৩। সর্ব্বাঙ্গুলীনা মগ্রাণি ব্রাহ্ম্যতীর্থে নিযোজয়েৎ ॥ অনামিকায়াঃ পৃষ্ঠে তু অঙ্গুষ্ঠাগ্রং নিযোজয়েৎ। শূন্যং তূণীরবৎ কৃত্বা তেষা মন্তস্তু ভৈরব ॥ তূণীর মুদ্রা চাখ্যাতা সর্ব্বেষাং প্রীতিবর্দ্ধিনী। ৫৪ ॥*॥ মুদ্রাসু সংস্থিতা পূজা মুদ্রাসু পরিচিন্তনং ॥ মুদ্রাসু সংস্থিতা যোগা মুদ্রা মোদকরা স্ততঃ। যদা যদা পূজনেষু চিন্তনে ধ্যান কর্ম্মণি ॥ যজ্ঞাদৌ স্তবনে বাপি হস্তকৃত্যং ন বিদ্যতে। তদা মুদ্রাযুতং অর্য্যাদিষ্টাপূর্ব্বে কর দ্বয়ং ॥ যজ্ঞকৃত্যেষু চেদ্ধক্তো হস্তো মুদ্রাসু চ ক্ষমঃ। তদা মুদ্রাং বিধায়ৈব তত্ত্কৃত্যং সমাচরেৎ ॥ মুদ্রা বিযুক্তং হস্তন্তু ক্রিয়তে কর্ম্ম দৈবিকং। কৃত্বা যন্নিষ্ফলং যস্মাত্তস্মান্মুদ্রান্বিতো ভবেৎ ॥ বিসর্জ্জনে তু দেবানাং যস্যযা পরিকীর্ত্তিতা। মুদ্রাং তাং পূজনাদৌ তু তস্য নৈব প্রযোজয়েৎ ॥ বিসৃষ্ট্যুক্তা মৃতে মুদ্রাং মুদ্রাযুক্তঃ সমাচরেৎ। পূজনাদি সমস্তঞ্চ কর্ম্ম বুদ্ধ্যে বিচক্ষণঃ ॥ অতো মুদ্রা পরং ধাম মুদ্রা পুণ্য প্রদায়িনী। দেবানাং মোদদা মুদ্রা তস্মাত্তাং যত্নত শ্চরেৎ ॥ অর্দ্ধযোনি র্মহাযোনি র্যোনি ব্রাহ্মী চ বৈষ্ণবী। মুদ্রা বিসর্জ্জনে প্রোক্তা শিবা ত্রিপুরয়োঃ সদা ॥ দুর্গায়াঃ সর্ব্বরূপেষু মুদ্রা এতাঃ প্রকীর্ত্তিতাঃ। যোনিঞ্চ সম্পুটঞ্চৈব মহাযোনি স্তথৈব চ ॥ বজ্জয়িত্বা ব্যস্ত ভাবাদুক্তাদন্যত্র যোজয়েৎ। ভবেয়ুস্তু ত্রিপঞ্চাশদন্যা মুদ্রাঃ সমন্ততঃ ॥ তা ব্যস্ত ভাবাদ্দানাঃ স্যু র্মুদ্রা মোদকরাঃ পরাঃ। এবং বাং কথিতা মুদ্রাঃ পূজনে পূজ্য তুষ্টিদাঃ ॥ ইতি কালিকা পুরাণে ৬৫ অধ্যায়ঃ ॥

মুদ্রাঙ্কিতঃ ত্রি মুদ্রয়াচিহ্নিতঃ। ছাপাকরা মোহরকরা ইত্যাদি ভাষা। যথা। ধাতা বিশ্ব বিসৃষ্টি মাত্র নিরতো দেবো হপি গৌরী ভুজা শ্লেষানন্দ বিঘূর্ণমান নয়নো দক্ষাধ্বর ধ্বংসকৃৎ। দৈত্যারিঃ কমলা কপোল মকরী মুদ্রাঙ্কিতোরঃ স্থলঃ শেতে দুগ্ধা বিতরেষু ভস্তষু পুনঃ কা নাম শান্তেঃ কথা॥ ইতি প্রবোধচন্দ্রোদয়নাটকে ১ অঙ্কঃ॥

মুদ্রালিপিঃ স্ত্রী পঞ্চবালিপ্যন্তর্গত লিপিবিশেষঃ। ছাপারঅক্ষর ইতি ভাষা। যথা। মুদ্রালিপিঃ শিল্পলিপি র্লিপি র্লেখনীসম্ভবা। গুণ্ডিকা ঘুণ সম্ভূতা লিপযঃ পঞ্চধা স্মৃতাঃ॥ এতাভি র্লিপিভি র্ব্যাপ্তা ধরিত্রী শুভদা হর॥ ইতি বারাহীতন্ত্রং॥ তস্যাঃ পাঠ্যত্বং ধার্য্যত্বঞ্চ যথা। লেখন্যা লিখিতং লিপ্যে র্মুদ্রাভি রঙ্কিতঞ্চ যৎ। শিল্পাদি নির্মিতং বহু পাঠ্যং ধার্য্যঞ্চ সর্ব্বদা॥ ইতি খড়্গমালাতন্ত্রং॥

মুদ্রিকা স্ত্রী স্বর্ণরূপ্যাদিনির্ম্মিতমুদ্রা। মোহর টাকা ইত্যাদি ভাষা। যথা। সৌবর্ণীং রাজতীং তাম্রীমাযসীং বা সুশোভিতাং। সলিলেন সমুদ্ধৃতাং প্রক্ষিপেত্তত্র মুদ্রিকাং॥ ইতি মিতাক্ষরাযাং ব্যবহারাধ্যাযঃ॥

মুদ্রিতং ত্রি অপ্রফুল্লং। মোদা ইতি ভাষা। তৎপর্য্যাযঃ। সঙ্কুচিতং ২ নিদ্রাণং ৩ মীলিতং ৪। ইতি হেমচন্দ্রঃ॥ মুদ্রাঙ্কিতশ্চ॥

মুধা ব্য ব্যর্থকং। ইত্যমরঃ॥

মুনিঃ পুং মনুতে জানাতি যঃ। মৌনব্রতী। ইত্যন্যে। ইতি ভরতঃ॥ তৎপর্য্যাযঃ। বাচংযমঃ ২। ইত্যমরঃ॥ মৌনী ৩ ব্রতী ৪ ঋষিঃ ৫ শাপাস্ত্রঃ ৬ সত্যবাক্ ৭। ইতি জটাধরঃ॥ তস্য লক্ষণং যথা। দুঃখেষ্বনুদ্বিগ্নমনাঃ সুখেষু বিগতস্পৃহঃ। বীতরাগ ভয় ক্রোধঃ স্থিতধী র্মুনি রুচ্যতে॥ ইতি শ্রীভগবদ্গীতা॥ ॥ তস্য ধর্ম্মো যথা। ব্রহ্মোবাচ। মুনিভি শ্চরিতা ধর্ম্মা উক্তা ব্যাস মযা তব। যৈ র্বিষ্ণুস্তূয়তে দেবঃ সুখাদি পরিভাবিকঃ॥ তর্পণেন চ হোমেন সন্ধ্যযা বন্দনেন চ। প্রাপ্যতে ভগবান্ বিষ্ণুধর্ম্ম কামার্থ মোক্ষদঃ॥ ধর্ম্মো বিষ্ণুর্ব্রতো বিষ্ণুঃ পূজা বিষ্ণুস্ত তর্পণং। হোমঃ সন্ধ্যা তথা ধ্যানং ধারণা সকলং হরিঃ॥ ইতি গারুডে ২২৭ অধ্যাযঃ॥ ॥ তস্যাশ্রমে বর্ণনী-

ম্বানি যথা।। অতিথিপূজা১ হরিণবিশ্বাসঃ২ হিংস্রজন্তুশান্ততা৩ যজ্ঞধূমঃ৪ মনিসুতঃ৫ ক্রমসেকঃ৬ বল্কলঃ৭ বৃক্ষশ্চ ৮। ইতি কবিকল্পলতা ।।*।। মুনিবিশেষাণাং ব্রহ্মণো হঙ্গবিশেষাদুৎপত্তি যথা। পুলস্ত্যো দক্ষকর্ণাচ্চ পুলহো বামকর্ণতঃ। দক্ষনেত্রাত্তথাত্রিশ্চ বামনেত্রাৎক্রতুঃ স্বয়ং ।। অরণী নাসিকারন্ধ্রাৎ অঙ্গিরাশ্চ মুখাক্রচিঃ। ভৃগুশ্চ বামপার্শ্বাচ্চ দক্ষো দক্ষিণপার্শ্বতঃ।। ছায়ায়াং কর্দ্দমো জাতো নাভেঃ পঞ্চশিখস্তথা। বক্ষসশ্চৈব বোঢ়ুশ্চ কণ্ঠদেশাচ্চ নারদঃ।। মরীচিঃ স্কন্ধদেশাচ্চ আপস্তম্ব স্তথা গলাৎ। বশিষ্ঠো রসনা দেশাৎ প্রচেতা অধরোষ্ঠতঃ।। হংসশ্চ বামকক্ষেশ্চ দক্ষকক্ষে যতিঃ স্বয়ং। সৃষ্টিং বিধাতুঞ্চ বিধি শ্চকারাজ্ঞাং সুতানপি।। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ৮. অধ্যায়ঃ।। * ।। গয়াসুরশরীরে যজ্ঞার্থং ব্রহ্মণো মানসাৎ সৃষ্টা মুনয়ো যথা। ব্রহ্মা সম্ভৃত সম্ভারো মানসানৃত্বিজো হসৃজৎ। অগ্নিশর্ম্মাণ মমৃতং শৌনকং জমজলিং মৃদুং।। কুমুথিং বেদকৌণ্ডিন্যং হারীতং কশ্যপং কৃপং। গর্গং কৌশিক বাশিষ্ঠৌ মুনিং ভার্গব মব্যযং।। বৃদ্ধং পারাশরং কণ্বং মাণ্ডব্যং শ্রুতি কেবলং। শ্বেতং সুতালং দমনং সুহোত্রং কঙ্ক মেব চ।। লৌগাক্ষিঞ্চ মহাবাহুং জৈগীষব্যং তথৈব চ। দধিপঞ্চমুখং বিপ্র ঋষভং কর্ক মেব চ।। কামায়নং গোভিলঞ্চ মনি মুগ্রং মহাব্রতং। জটামালিন মব্যগ্রং চাটুহাসঞ্চ দারুণং।। আত্রেয় ঞ্চাপ্যঙ্গিরসং মৌপমন্যুং মহাব্রতং। গোকর্ণঞ্চ গুহাবাসং শিখণ্ডিন মুমাব্রতং।। সুপালরুং গৌতমঞ্চ তথা বেদশিরো ব্রতং। এতানন্যাংশ্চ বিপ্রেন্দ্রান ব্রহ্মা লোকপিতামহঃ।। পরিকল্পাকরোদ্যাগং গয়াসুরশরীরকে। ইতি বায়ুপুরাণে গয়ামাহাত্ম্যং।।*।। মুনিবিশেষ নাম্নাং ব্যুৎপত্তি র্যথা। কতিকল্পান্তরে তীতে স্রষ্টুঃ সৃষ্টি বিধৌ পুনঃ। মরীচি মিশ্রৈ মুনিভিঃ সার্দ্ধং কণ্ঠাদ্বভূব সঃ।। বিধে র্নরদ নাম্নশ্চ কণ্ঠ দেশাদ্বভূব সঃ। নারদ শ্চেতি বিখ্যাতো মুনীন্দ্র স্তেন হেতনা।। যঃ পুত্র শ্চেতসো ধাত র্বভূব মুনিপুঙ্গবঃ। তেন প্রচেতা ইতি তন্নামচক্রে পিতামহঃ।। বভূব ধাত র্যঃ পুত্রঃ সহসা দক্ষপার্শ্বতঃ। সর্ব্বকর্ম্মণি দক্ষশ্চ তেন দক্ষঃ প্রকীর্ত্তিতঃ।। বেদেষু কর্দ্দমঃ শব্দ শ্ছায়ায়াং বর্ত্ততে স্ফুটঃ। বভূব

কর্দ্দমাদ্বালঃ কর্দ্দম স্তেন কীর্ত্তিতঃ ॥ তেজো ভেদে মরীচিশ্চ বেদেষু বর্ত্ততে স্ফুটং। জাতঃ সদ্যো হতিতেজস্বী মরীচি স্তেন কীর্ত্তিতঃ॥ ক্রতুসংঘশ্চ বালেন কৃতো জন্মান্তরে হধুনা। ব্রহ্মপুত্রোপি তন্নাম্না ক্রতুরিত্যভিধীযতে॥প্রধানাঙ্গং মুখং ধাতু স্ততো জাতশ্চ বালকঃ। ইর স্তেজস্বি বচনো হঙ্গিরা স্তেন প্রকীর্ত্তিতঃ ॥ অতিতেজস্বিনি ভৃগু র্বর্ত্তত নাম্নি শৌনক। জাতঃ সদ্যো হতিতেজস্বী ভৃগু স্তেন প্রকীর্ত্তিতঃ॥ বশীভূতশ্চ শিষ্টশ্চ জাতঃ সদ্যো হি বালকঃ। অতিপ্রিযশ্চ ধাতুশ্চ বশিষ্ঠ স্তেন কীর্ত্তিতঃ॥ বালো হপ্যরুণ বর্ণশ্চ জাতঃ সদ্যো হি তেজসা। প্রজ্বলন্ পূর্ব্বতপসা চারুণ স্তেন কীর্ত্তিতঃ॥ হংস আত্মা বশো যস্য যোগেন যোগিনো ধ্রুবং। বালঃ পরম যোগীন্দ্র স্তেন হংসঃ প্রকীর্ত্তিতঃ॥ সন্ততং যস্য যত্নঞ্চ তপঃসু বালকস্য চ। প্রকীর্ত্তিতো যতি স্তেন সংযতঃ সর্ব্বকর্ম্মসু ॥ পুল স্তপঃসু বেদেষু বর্ত্ততে হস্ফুটেপি চ। স্ফুটং তপঃ স্বরূপশ্চ পুলহ স্তেন কীর্ত্তিতঃ॥ পুল স্তপঃ সমূহশ্চ যস্যাস্তি পূর্ব্বজন্মনাং। তপঃ সংঘঃ সমূহশ্চ পুলস্ত্য স্তেন বালকঃ ॥ ত্রিগুণাযাং প্রকৃত্যাং ত্রি র্বিষ্ণাবশ্চ প্রবর্ত্ততে। তযো র্ভক্তেঃ সমাজো হস্যস্তেন বালো হত্রি রুচ্যতে॥ জটা শ্চাগ্নিশিখা রূপাঃ পঞ্চ সন্তি চ মস্তকে। তপস্তেজোদ্ভবা যস্য স চ পঞ্চশিখঃ স্মৃতঃ॥ অপান্তরতমে দেশে তপ স্তেপে হন্য জন্মনি। অপান্তরতমা নাম শিশো স্তেন প্রকীর্ত্তিতং॥ স্বযন্তপঃ সনাৎপ্রাপ্তি বাহযেৎ প্রাপযেৎ পরান্। উচ্চঃ সনথ স্তপাংসি বো[illegible] স্তেন প্রকীর্ত্তিতঃ॥ তপস স্তেজসা বালো দীপ্তমান্ সন্ ভো মুনে। তপঃসু রোচতে চিত্তং রুচি স্তেন প্রকীর্ত্তিতঃ॥ ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডে ২২ অধ্যাযঃ॥

মুনিঃ পুং বঙ্গসেনতরুঃ॥ জিনঃ। ইতি মেদিনী॥ পিযালবৃক্ষঃ॥ পলাশবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥ দমনকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মুনিখর্জ্জুরিকা স্ত্রী খর্জ্জুরীপ্রভেদঃ। যথা। মুনিখর্জ্জুরিকা ত্বন্যা রাজেষ্টা ধাতুসংমিতা॥ ইতি রাজনির্ঘণ্টঃ॥

মুনিচ্ছদঃ পুং সপ্তচ্ছদবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মুনিতরুঃ পুং বকবৃক্ষঃ। ইতি রত্নমালা॥

মুনিদ্রুমঃ পুং শ্যোণাকবৃক্ষঃ। ইতি

মন্ত্রমালা ॥ শ্যোণাকপুভেদঃ ॥ বকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মুনিনির্ম্মিতঃ পুং ডিণ্ডিশঃ। যথা। ডিণ্ডিশো রোমশফলো মুনিনির্ম্মিত ইত্যপি। ডিণ্ডিশো রুচিকৃৎ ভেদী পিত্ত শ্লেষ্মাপহঃ স্মৃতঃ ॥ সুশীতো বাতলো রুক্ষো মূত্রলশ্চাশ্মরীহরঃ। ইতি ভাবপ্রকাশঃ ॥

মুনিপিত্তলং ক্লী তাম্রং। ইতি ত্রিকাণ্ডশেষঃ ॥

মুনিপুঙ্গবঃ পুং মুনিশ্রেষ্ঠঃ। ইত্যমরটীকা ॥

মুনিপুত্রঃ পুং দমনকবৃক্ষঃ। ইতি ভাবপ্রকাশঃ ॥ ঋষিসুতশ্চ ॥

মুনিপুত্রকঃ পুং খঞ্জনঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মুনিপুষ্পং ক্লী বকপুষ্পং। যথা যোগিনীতন্ত্রে। বিল্বপত্রঞ্চ মাধ্যঞ্চ তমালামলকীদলং। কহ্লারং তুলসীঞ্চৈব পদ্মঞ্চ মুনিপত্রকং ॥ এতৎপর্য্যুষিতং ন স্যাৎ যচ্চান্যৎ কলিকাত্মকং। ইত্যেকাদশীতত্ত্বং ॥

মুনিপূগঃ পুং গুবাকবিশেষঃ। তৎপর্য্যায়ঃ। রামপূগঃ ২ কামীনঃ ৩ সরেবটঃ ৪। ইতি ত্রিকাণ্ডশেষঃ ॥

মুনিভেষজং ক্লী অগস্ত্যঃ ॥ হরীতকী ॥ লঙ্ঘনং। ইতি মেদিনী ॥

মুনিসুব্রতঃ পুং বৃত্তার্হন্। স চ বুদ্ধবিশেষঃ। ইতি হেমচন্দ্রঃ ॥

মুনিস্থানং ক্লী আশ্রমঃ। ইতি হেমচন্দ্রঃ ॥

মুনীন্দ্রঃ পুং বুদ্ধঃ। ইত্যমরঃ ॥ ঋষিশ্রেষ্ঠশ্চ ॥

মুন্চ উ গত্যাং। ইতি কবিকল্পদ্রুমঃ ॥ পঞ্চমস্বরী। ওষ্ঠবর্গশেষাদিঃ। নোপধঃ। উ মুঞ্চিত্বা মুক্ত্বা। ইতি দুর্গাদাসঃ ॥

মুমুচানঃ পুং মেঘঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মুমুক্ষুঃ পুং মুক্তিমিচ্ছুঃ। তৎপর্য্যায়ঃ। শ্রমণঃ ২ যতিঃ ৩ বাচংযমঃ ৪ ব্রতী ৫ সাধুঃ ৬ অনগারঃ ৭ ঋষিঃ ৮ মুনিঃ ৯ নির্গ্রন্থঃ ১০ ভিক্ষুঃ ১১। ইতি হেমচন্দ্রঃ ॥ অথ মুমুক্ষুকৃত্যং। মনঃ। ইহ চামুত্র বা কাম্যং প্রবৃত্তং কর্ম্মকীর্ত্ত্যতে। নিষ্কামং জ্ঞানপূর্ব্বন্তু নিবৃত্তমুপদিশ্যতে ॥ প্রবৃত্তং কর্ম্ম সংসেব্য দেবানামেতি সাষ্টিতাং। নিবৃত্তং সেব্যমানস্তু ভূতান্যত্যেতি পঞ্চ বৈ ॥ কামনাপূর্ব্বকং কর্ম্ম শরীরপ্রবৃত্তিহেতুত্বাৎ প্রবৃত্তং তদেব কর্ম্ম কামনারহিতং পুনর্ব্রহ্ম জ্ঞানাভ্যাসপূর্ব্বকং সংসারনিবৃত্তিহেতুত্বাৎ নিবৃত্তমুচ্যতে।

সাষ্টিতাং সমান গতিতাং ঋষের্গত্য-
র্থত্বাৎ পঞ্চভূতান্যত্যেতি অতিক্রা-
মতি মোক্ষং প্রাপ্নোতীত্যর্থঃ। বিষ্ণু
পুরাণঞ্চ। বিশিষ্ট ফলদা কন্যা নি
ষ্কামানাঞ্চ মুক্তিদা। ভগবদ্গীতাপি।
যুক্তঃ কর্মফলং ত্যক্ত্বা শান্তি মাপ্নো-
তি নৈষ্ঠিকীং। অযুক্তঃ কামকারেণ
ফলে সক্তো নিবধ্যতে॥ যুক্তঃ ঈশ্ব
রায় কর্মাণি ন ফলায় ইত্যেবং সমা-
হিতঃ। ফলং ত্যক্ত্বা কর্মাণি কুর্বন্নি-
তিশেষঃ। শান্তিং মোক্ষাখ্যাং নৈ
ষ্ঠিকীং নিষ্ঠায়াং ভবাং। সত্ত্ব শুদ্ধিঃ
জ্ঞান প্রাপ্তিঃ সর্বকর্ম সংন্যাসঃ
জ্ঞান নিষ্ঠা ক্রমেণেতি বাক্যশেষঃ।
অযুক্ত শুদ্ধহির্মুখঃ। কামকারেণ
কাম প্রেরিততয়া কামতঃ প্রবৃত্তে
রিতি যাবৎ। ফলে সক্তঃ মম ফলা
যেদং কর্মকরো মীত্যেবং ফলে স-
ক্তো নিতরাং বন্ধং প্রাপ্নোতি। ত-
থাচ অর্জুনং প্রতি ভগবদ্বাক্যং।
ময়ি সর্বাণি কর্মাণি সংন্যস্যাধ্যা-
ত্ম চেতসা। নিরাশী র্নির্মমো ভূত্বা
যুধ্যস্ব বিগতজ্বরঃ॥ সংন্যস্য নিঃ
ক্ষিপ্য সমর্প্য ইতি যাবৎ। অধ্যা-
ত্ম চেতসা বিবেক বুদ্ধ্যা ঈশ্বরায়
ভৃত্যবৎ করোমি ইত্যনয়া বুদ্ধ্যা
নিরাশী ত্যক্ত কাম সঙ্কল্পঃ। অত
এব নির্মমঃ মমতা রহিতঃ। বিগত-
জ্বরঃ বিগত সন্তাপঃ। ব্যক্ত মাহ
সএব। যৎকরোসি যদশ্নাসি যজ্জু-
হোসি দদাসি যৎ। যত্তপস্যসি কৌ-
ন্তেয় তৎ কুরুষ্ব মদর্পণং। বিষ্ণু পু-
রাণং। কর্মাণ্যসঙ্কল্পিত তৎ ফলা-
নি সংন্যস্য বিষ্ণৌ পরমাত্মরূপে।
অবাপ্যতাং কর্মমহী মনন্তে তস্মিন্
লয়ং যেত্বমলা প্রযান্তি। কর্মমহীং
ভারতবর্ষরূপাং। একাদশস্কন্ধে।
বেদোক্ত মেব কুর্বাণো নিঃসঙ্গো
হর্পিতু মীশ্বরে। নৈষ্কর্ম্যাং লভতে
সিদ্ধিং রোচনার্থা ফলশ্রুতিঃ॥ বে-
দোক্ত মেব কুর্বাণো ন তু নিষিদ্ধং।
মম কর্মাণি ক্রিয়মাণে তস্মিন্নাসক্তি
স্তৎ ফলং স্যাদেব নতু নৈষ্কর্ম্যরূ-
পা ফলসিদ্ধি রতএবাহ নিঃসঙ্গো
হনভিনিবেশবান্ ঈশ্বরে হর্পিতুং
নতু ফলোদ্দেশেন। অথ ফলস্য
শ্রুতত্বাৎ কর্মাণি কৃতে ফলং ভবত্যে-
ব ইত্যাহ রোচনার্থেতি কর্মাণি রু-
চ্যুৎপাদনার্থা। অতএব তত্রৈব। ফ-
লশ্রুতি রিয়ং নৃণাং ন শ্রেয়ো রোচনং
পরং। শ্রেয়ো বিবক্ষয়া প্রোক্তা যথা
ভৈষজ্য রোচনং॥ উৎপত্ত্যৈব হি
কামেষু প্রাণেষু স্বজনেষু চ আসক্ত
মনসো মর্ত্যা আত্মনো হনর্থ হেতুষু

।। নতানবিদুষঃ স্বার্থং ভ্রাম্যতো বৃজিনাধ্বনি। কথং যুঞ্জ্যাৎ পুন স্তেষু তাং স্তমো বিশতো বুধঃ ।। এবং ব্যবসিতং কেচিদবিজ্ঞায় কুবুদ্ধয়ঃ। ফলশ্রুতিং কুসুমিতাং ন বেদজ্ঞা বদন্তি হি। ইমং ফলশ্রুতি নশ্রেয়ঃ পরম পরুষার্থপরা ন ভবতি কিন্তু বহির্মুখানাং নৃণাং মোক্ষ বিবক্ষয়া অবান্তর কর্ম্মফলৈঃ কর্ম্মসু রুচ্যুৎপাদন মাত্রং যথা ভৈষজ্যে ঔষধে রুচ্যুৎপাদনং। যথা। পিব নিম্বং প্রদাস্যামি খলু তে খণ্ড লড্ডুকান্। পিত্রৈব মুক্তঃ পিবতি ন ফলং তাবদেব তু।। তত্রাগদপানস্য ন খলু খণ্ডাদি লাভ এব প্রয়োজনং কিন্ত্বারোগ্যং। তথা বেদোপ্যবান্তর ফলৈঃ প্রলোভয়ন্ মোক্ষায়ৈব কর্ম্মাণি বিধত্তে। ননু কর্ম্মকাণ্ডে মোক্ষস্য নামাপি ন শ্রূয়তে কথমেবং ব্যাখ্যায়তে যথা শ্রুতস্যৈব ঘটনাৎ ইত্যাহ উৎপত্ত্যেতি দ্বাভ্যাং। উৎপত্ত্যা স্বভাবত এব কামেষু পশ্বাদিষু প্রাণেষু আয়ুরিন্দ্রিয় বল বীর্য্যাদিষ স্বজনেষু পুত্র দারাদিষু অনর্থ হেতুষু পরিপাকতো দুঃখ হেতুষু অত স্তান্ স্বার্থং পরমসুখমবিদুষঃ অজানতঃ অতো ন তান্ প্রতীভূতান্ বুধো বেদো ন্যৱোধয়তি

তদেব শ্রেয়ঃ ইতি বিশ্বসিতান্ ইত্যর্থঃ। তান্ এবম্ভূতান্ বৃজিনাধ্বনি কামবর্ত্মনি দেবাদি যোনৌ ভ্রাম্যতঃ ততঃ পুন স্তমো ভূত বৃক্ষাদি যোনিং বিশত ইতি। পশুকাম ইতি চ সুখ পুত্রাদি কাম ইতি চ কথং পুনস্তেষ্বেব কামেষু অয়ং বুধো বেদো যুঞ্জ্যাৎ প্রবর্ত্তয়েৎ। তথা সত্যনাপ্তঃ স্যাৎ ইতি ভাবঃ। কথং তর্হি কর্ম্ম মীমাংসকাঃ ফলপরতাং বদন্তি তত্রাহ। এবমিতি ব্যবসিতং বেদস্যাভিপ্রায়ং অবিজ্ঞায় কুসুমিতাং মবান্তর ফলরোচনয়া রমণীয়াং পরম ফলশ্রুতিং বদন্তি কেচ স্তে কুবুদ্ধয় স্তত্রাহ হি যস্মাৎ বেদজ্ঞা ব্যাসাদয়ঃ ন তথা বদন্তি ইতি অতএব নিষ্কাম কর্ম্মণ আত্মজ্ঞানার্থতোক্তা যথা। অয়মেব ক্রিয়া যোগো জ্ঞান যোগস্য সাধকঃ। কর্ম্মযোগং বিনাজ্ঞানং কস্যচিন্নেহ দৃশ্যতে।। সোপি দুরিতক্ষয় দ্বারা ন সাক্ষাৎ তথাচ। জ্ঞানমুৎপদ্যতে পুংসাং ক্ষয়াৎ পাপস্য কর্ম্মণঃ। তথা শ্রুতিঃ। তমেবং বেদার্থ বচনেন ব্রাহ্মণা বিবিদিষন্তি ব্রহ্মচর্য্যেণ তপসা শ্রদ্ধয়া দানেন যজ্ঞেনানশনেন চেতি। তং আত্মতত্ত্ব সাক্ষাৎ কারং অতএব যজ্ঞাদীনাং

জ্ঞানশেষতাঞ্চাবধার্য্য নিষ্কামেষু ক র্ম্মসু প্রবর্ত্ততে। পণ্ডিতেনাপি মূর্খঃ কাম্যে কর্ম্মণি ন প্রবর্ত্তয়িতব্য ইত্যাহ ষষ্ঠস্কন্ধে। স্বয়ং নিঃশ্রেয়সং বিদ্বান্ ন বক্ত্যজ্ঞায় কর্ম্ম হি। ন রাতি রোগিণে হপথ্যং বাঞ্ছতেপি ভিষক্ তমঃ॥ রাতি দদাতি ইতি স্বামিপ্রদীপে শ্রীদত্তঃ। দাসী দাস মলঙ্কার মন্নং ষড়ুস সম্ভবং। পুরুষোত্তম তুষ্ট্যর্থং প্রদেয়ং সার্ব্বকালিকং॥ যদ্যদিষ্টতমং লোকে যচ্চাপ্যস্তি গৃহে শুচি। তত্তদ্ধি দেয়ং প্রীত্যর্থং দেবদেবস্য চক্রিণঃ॥ ইদং দানং ব্রাহ্মণ সম্প্রদানক মেব বিষ্ণুপ্রীতি মুদ্দিশ্য এবং সর্ব্বত্র দানে। বিষ্ণুপ্রীতেঃ সামান্যতঃ শ্রুতত্বাৎ। অথ বিষ্ণুপ্রীতৌ দেবতাধিকরণন্যায় বিরোধ ইতি চেন্ন স্বর্গাদধিকারি বিশেষণত্বেন তৎসত্ত্ব প্রসাধনাৎ ইত্যাহুঃ। ব্রাহ্মণ সম্প্রদানকত্বে কিং মান মিতি চেৎ বামনপুরাণে তত্তন্মাস ভেদেন তত্তদ্দান মভিধায় বিষ্ণুপ্রীত্যর্থ মেতানি দেয়ানি ব্রাহ্মণেভ্যঃ। দেয়ানি বিপ্রমুখ্যেভ্যো মধুসূদন তুষ্টয়ে ইত্যভিধায় দাসী দাস মিত্যাদি বচন দ্বয়াভিধানাৎ। তথা চ বিষ্ণুধর্ম্মোত্তরাগ্নিপুরাণয়োঃ। যত্র যত্র ভবেৎ প্রীতি র্বিষয়েভ্যো মহামুনে। তত্তদচ্যুত মুদ্দিশ্য বিপ্রেভ্যঃ প্রতিপাদয়েৎ॥ বিষ্ণুধর্ম্মোত্তর তৃতীয়কাণ্ডে তু বিষ্ণু সংপ্রদানক মেব দানং যথা। বিষ্ণোঃ শঙ্খ প্রদানেন বারুণং লোক মাপ্নুয়াৎ। ইত্যাদিনা ক্ষীর পল্লব সংযুক্তান্ কলসান্ সুবিভূষিতান্ দত্ত্বা বৈ দেবদেবায় বাজিমেধ ফলং লভেৎ। ইত্যন্তেন তত্তৎ ফলং তত্তদ্দান মভিধায়োক্তং। অকামঃ সাত্ত্বিকো লোকো। যৎ কিঞ্চিদ্বিনিবেদয়েৎ। তেনৈব স্থান মাপ্নোতি যত্র গত্বা ন শোচতি॥ ধর্ম্ম বাণিজিকা মূঢ়াঃ ফলকামা নরাধমাঃ। অর্চ্চয়ন্তি জগন্নাথং তে কামা নাপ্নুবন্ত্যত॥ অন্তবত্তু ফলং তেষাং তদ্ভবত্যল্পমেধসাং। তথা। পদভ্যাং প্রতীচ্ছতে দেবঃ সকামেন নিবেদিতং। মূর্দ্ধ্না প্রতীচ্ছতে দত্ত মকামেন দ্বিজোত্তমাঃ॥ ইত্যুক্ত বামনপুরাণবচনে সার্ব্বকালিক মিত্যনেন মলমাসাদাবপি বিষ্ণুপ্রীত্যর্থং দেয় মিতি। ইতি মলমাসতত্ত্বং॥

মুমূর্ষুঃ ত্রি আসন্নমৃত্যুঃ। অথ মুমূর্ষু কৃত্যানি। হারীতঃ। শূদ্রান্নেন তু ভুক্তেন উদরস্থেন যো মৃতঃ। স

বৈ খরত্ব মুষ্টত্ব শূদ্রত্বং ক্ষাধিগচ্ছতি ॥ শূদ্রান্নং শূদ্রস্বামিকান্নং। তদ্দত্ত মপি ভোজনকালে তদ্গৃহাবস্থিতং যত্তদপি শূদ্রান্নং। তদাহাঙ্গিরাঃ। শূদ্রবেশ্মনি বিপ্রেণ ক্ষীরম্বা যদি বা দধি। নিবৃত্তেন ন ভোক্তব্যং শূদ্রান্নং তদপি স্মৃতং ॥ অপি শব্দাৎ সাক্ষাৎ তদ্দত্ত ঘৃত তণ্ডুলাদি ন তু তদ্দত্ত কপর্দকাদিনা ক্রীত মপি। স্বগৃহাগতে পুন রঙ্গিরাঃ। যথাযত স্তু তা হ্যাপঃ শুদ্ধিং যান্তি নদীং গতাঃ। শূদ্রাদ্বিপ্র গৃহেম্বন্নং প্রবিষ্টন্তু সদা শুচি ॥ প্রবিষ্টং সম্রাপাকং প্রতিগ্রহাদিনা ইতি শেষঃ। অতএব পরাশরঃ। তাবদ্ভবতি শূদ্রান্নং যাবন্ন স্পৃশতি দ্বিজঃ। দ্বিজাতি করসংস্পৃষ্টং সর্ব্বং তদ্ধবি রুচ্যতে ॥ স্পৃশতি প্রতিগৃহ্লাতি ইতি কল্পতরুঃ। তচ্চ সংপ্রোক্ষ্য গ্রাহ্যমাহ বিষ্ণুপুরাণং। সংপ্রোক্ষয়িত্বা গৃহ্নীযাচ্ছূদ্রান্নং গৃহ মাগতং। তচ্চ পাত্রান্তরে গ্রাহ্য মাহ অঙ্গিরাঃ। স্বপাত্রে যত্তু বিন্যস্তং শূদ্রো গচ্ছতি নিত্যশঃ। পাত্রান্তর গতং গ্রাহ্যং দুগ্ধং স্বগৃহ মাগতং ॥ এতেন স্বগৃহ মাগতস্যৈব শুদ্ধত্বং। তদ্গৃহ গতস্য শূদ্রান্ন দোষ ভাগিত্বং প্রতীয়তে। ততশ্চতাদৃগপি মুমূর্ষুণা সর্ব্বথা শূদ্রান্নং ন ভোক্তব্যং ॥ * ॥ পূজারত্নাকরে। শালগ্রাম শিলা যত্র তত্র সন্নিহিতো হরিঃ। তৎ সন্নিধৌ ত্যজেৎ প্রাণান্ যাতি বিষ্ণোঃ পরং পদং ॥ লিঙ্গপুরাণে। শালগ্রাম সমীপে তু ক্রোশ মাত্রং সমন্ততঃ। কীকটেপি মৃতো যাতি বৈকুণ্ঠ ভবনং নরঃ ॥ কীকটো মগধঃ ॥ * ॥ বৈষ্ণবামৃতে ব্যাসঃ। তুলসী কাননে জন্তো র্যদি মৃত্যু র্ভবেৎ ক্বচিৎ। স নির্ভৎস্য যমং পাপী লীলয়ৈব হরিং বিশেৎ ॥ প্রয়াণ কালে যস্যাস্যে দীয়তে তুলসীদলং। নির্ব্বাণং যাতি পক্ষীন্দ্র পাপকোটি যুতোপি সঃ ॥ * ॥ কূর্ম্মপুরাণং। গঙ্গায়াঞ্চ জলে মোক্ষো বারাণস্যাং জলে স্থলে। জলে স্থলে চান্তরীক্ষে গঙ্গাসাগরসঙ্গমে ॥ স্কান্দে। গঙ্গায়াং ত্যজতঃ প্রাণান্ কথয়ামি বরাননে। কর্ণে তৎপরমং ব্রহ্ম দদামি মামকং পদং ॥ তথা। তীরাদ্গব্যূতি মাত্রন্তু পরিতঃ ক্ষেত্র মুচ্যতে। অত্র দানং জপো হোমো গঙ্গায়াং নাত্র সংশয়ঃ ॥ অত্রস্থা স্ত্রিদিবং যান্তি যে মৃতা স্তে হপুনর্ভবাঃ। গব্যূতিঃ ক্রোশযুগং ॥ তীর্থচিন্তামণৌ ব্রহ্মপুরাণং। অত্র দূরে সমীপে চ সদৃশং

যোজনদ্বয়ং। গঙ্গায়াং মরণেনেহ নাত্র কার্য্যা বিচারণা ॥ * ॥ এবং গঙ্গাদি মরণেন প্রাপ্ত ব্রহ্মলোকস্যাপ্যৌর্দ্ধদেহিকী ক্রিয়া তদধিকারিণা কর্ত্তব্যা নিত্যত্বাৎ। তথাচ শ্রীভাগবতে। কৃষ্ণ এবং ভগবতি মনো বাক্ দৃষ্টি বৃত্তিভিঃ। আত্মন্যাত্মান মাবেশ্য সো হন্তঃশ্বাস মুপারমৎ ॥ সংপদ্যমান মাজ্ঞায় ভীষ্মং ব্রহ্মণি নিষ্কলে। সর্ব্বে বভূবুস্তে তুষ্ণীং বয়াংসীব দিনাত্যয়ে ॥ তস্য নির্হরণাদীনি সংপরেতস্য ভার্গব। যুধিষ্ঠিরঃ কারয়িত্বা মুহূর্ত্তং দুঃখিতো হভবৎ ॥ কৃষ্ণে আত্মনি পরমাত্মনি আত্মানং স্বীয়াত্মানং নিবেশ্য একীকৃত্য স ভীষ্মঃ উপারমৎ মুক্তিং গতবান। নিষ্কলে নিরুপাধৌ ব্রহ্মণি সংপদ্যমানং মিলিতং আজ্ঞায় আলক্ষ্য তস্য ভীষ্মস্য নির্হরণাদীনি সংস্কারাদীনি সংপরে তস্য সম্যক্ পরেতস্য মুক্তস্যাপি। ভার্গবেতি শৌনকস্য সম্বোধনং। এবঞ্চ এতেষা মপি তত্তৎ কর্ম্মাণি তত্তদ্বচনোপাত্ত প্রেত পদস্য পিতৃপদস্য চ মন্ত্রাদিষু যথা যথং বাচনিকত্বাৎ প্রয়োগঃ সঙ্গচ্ছতে। নানরুভূযনা দেয়া গৌঃ সবৎসা চ পূর্ব্ববৎ। তদভাবে চ গৌরেকা নরকোদ্ধারণায় বৈ ॥ তদা যদি ন শক্নোতি দাতুং বৈতরণীঞ্চ গাং। শক্তো হন্যো হরুক্ তদা দত্বা শ্রেয়ো দদ্যান্মৃতস্য চ ॥ পূর্ব্ববদ্ধেম শূদ্রাদিনা। অত্র মৃতস্য চেতি শ্রবণাৎ একাদশাহেপি বৈতরণী দানাচারঃ ॥ বনপর্ব্বণি। সার্থঃ প্রবসতো মিত্রং ভার্য্যা মিত্রং গৃহে সতঃ। আতুরস্য ভিষঙ্মিত্রং দানং মিত্রং মরিষ্যতঃ ॥ বরাহপুরাণে। ব্যতীপাতো হথ সংক্রান্তি স্তথৈব গ্রহণং রবেঃ। পুণ্যকালা স্তদা সর্ব্বে যদা মৃত্যু রুপস্থিতঃ ॥ গো ভূ তিল হিরণ্যাদি দত্ত মস্মা তামিষ্যাৎ। নিরবকাশত্বাদত্র মলমাসাদি দোষো নাস্তি সূতকমপি ন। তথা চ শুদ্ধিরত্নাকরে দক্ষঃ। সূত্র কালেত্বিদং সর্ব্বং সূতকং পরিকীর্ত্তিতং। আপদ্গতস্য সর্ব্বস্য সূতকেপি ন সূতকং ॥ ইতি শুদ্ধিতত্ত্বং ॥

মূর শ বেষ্টনে। ইতি কবিকল্পদ্রুমঃ ॥ পবর্গশেষাদিঃ। শ মূরতিবৃক্ষলতা। মোরিতা। ইতি দুর্গাদাসঃ ॥

মূরং ক্লী বেষ্টনং। ইত্যমরটীকায়াং সারসুন্দরী… ॥

মুরঃ পুং দৈত্যবিশেষঃ। ইতি মেদিনী ॥ তং হত্বা বিষ্ণু র্মুরারিনামাভূৎ ॥

মরখণ্ডঃ পুং বরণ্ডঃ। বর্ণক ইতি ভাষা। ইতি জটাধরঃ॥
মুরজঃ পুং মৃদঙ্গঃ। ইত্যমরঃ॥
মুরকেলঃ পুং পনসবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥
মুরণ্ডঃ পং লম্পাকদেশঃ। তদ্দেশস্থে পুং ভূম্নি। ইতি হেমচন্দ্রঃ॥
মুরন্দলা স্ত্রী নর্মদানদী। ইতি ত্রিকাণ্ডশেষঃ॥
মুরমর্দ্দনঃ পুং বিষ্ণুঃ। ইতি পুরাণং॥
মুররিপুঃ পুং বিষ্ণুঃ। ইতি শব্দরত্নাবলী॥
মুরলা স্ত্রী নর্মদানদী। ইতি ত্রিকাণ্ডশেষঃ॥
মুরলী স্ত্রী স্বনামখ্যাতশুষিরবাদ্যং। তৎপর্য্যায়ঃ। বংশী ২ বংশিকা ৩ বংশনালিকা ৪ সানেয়িকা ৫ সানেয়ী ৬ নালিকা ৭ সরলানিকা ৮ শেষ চতুষ্টয়ং সানামি। ইতিশব্দরত্নাবলী
মুরলীধরঃ পং শ্রীকৃষ্ণঃ। ইতি শব্দরত্নাবলী॥
মুরহা পুং বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥
মুরা স্ত্রী স্বনামখ্যাতগন্ধদ্রব্যং। তৎপর্য্যায়ঃ। তালপর্ণী ২ দৈত্যা ৩ গন্ধকুটী ৪ গন্ধিনী ৫। ইত্যমরঃ॥ অস্যা অনুলেপন গুণাঃ। অলক্ষ্মী রক্ষো জ্বর নাশিত্বং। ইতি রাজবল্লভঃ॥ রাজনির্ঘণ্টোক্ত গুণ পর্য্যায়ৌ পুরাশব্দে দ্রষ্টব্যৌ॥
মুরারিঃ পুং শ্রীকৃষ্ণঃ। অস্য ব্যুৎপত্তির্যথা। মুরঃ ক্লেশে চ সন্তাপে কর্ম্মভোগে চ কর্ম্মিণাং। দৈত্যভেদে হপ্যরিস্তেষাং মুরারিস্তেন কীর্ত্তিতঃ॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১১০ অধ্যায়ঃ॥ *॥ অন্য স্বরূপং যথা। শ্রীনারদউবাচ। কোহসৌ মুরারি দেববর্ষে দেবো যক্ষো নু কিং নরঃ। দৈত্যো বা রাক্ষসো বাপি পার্থিবো বা তদুচ্যতাং॥ পুলস্ত্যউবাচ। যো হসৌ রজঃ সত্ত্ব মায়া গুণবাংশ্চ তমোময়ঃ। নির্গুণঃ সর্ব্বগোব্যাপী মুরারি র্মধুসূদনঃ॥ শ্রীনারদউবাচ। যো হসৌ মুর ইতি খ্যাতঃ কস্য পুত্রশ্চ গীয়তে। কথঞ্চ নিহতঃ সংখ্যে বিষ্ণুনা তদ্বদস্ব মে॥ পুলস্ত্যউবাচ। শৃণুতাং কথয়িষ্যামি মুরাসুর নিবর্হণং। বিচিত্র মিদমাখ্যানং পুণ্যং পাপ প্রণাশনং॥ কশ্যপস্যৌরসঃ পুত্রো মুরো নাম মহাবলঃ। স দদর্শ রণে শক্রং দিতিপুত্রো হসুরোত্তমঃ॥ ততঃ স মরণাদ্ভীত স্তপ্ত্বা বর্ষ গণান্ বহূন্ আরাধয়ামাস বিভুং ব্রহ্মাণমপরাজিতং। ততো হস্য তুষ্টো

বরদঃ প্রাহ বৎস বরং বৃণু॥ স চ
বব্রে তদা দৈত্যো বরমেনং পিতা
মহাৎ। যং যং করতলেনাহং স্পৃ-
শেবং সমরে বিভো॥ স স নশ্চস্ত
সংস্পৃষ্ট স্তুমরোপি মিয়ব্রজ। বাঢ
মুক্ত্বা স ভগবান্ ব্রহ্মা লোকপিতা
মহঃ। ততো হভ্যাগমহাতেজা
মুরঃ সুরগিরিং বলী। জগাম ধর্ম
রাজানং বিজেতুং দণ্ডপাণিনং॥
মুর উবাচ। মম পুজা সংযমনামি
বৃত্তিং কর্ত্তুমর্হসি। নোচেত্তবাদ্য
ছিত্বাহং মূর্দ্ধানং পাতয়ে ভুবি॥
ভমাহ ধর্ম্মরাজ বাক্যং যদি মাং
সংযমেচ্ছবান। গোপিতাসি পুরা
সত্যং করিষ্যে বচনং তব॥ মুর স্ত
মাহ ভবতঃ কঃ সংযন্তা বাস্ব মাং।
অহং তঞ্চ পরাজিত্য বারয়ামি ন
সংশয়ঃ॥ যম স্তং প্রাহ মাং বিষ্ণ
র্দেব শ্চক্র গদাধরঃ। শ্বেতদ্বীপ নি
বাসী যঃ স মাং সংযমতেহব্যয়ঃ॥
ইত্যেব মুক্তো বচনং দুগ্ধাব্ধি মগম
মুরঃ। তমাগতং প্রাহ মনে মধুঘ্নঃ
প্রাপ্তোসি কেনাসুর কারণেন॥ স
প্রাহ যুদ্ধং সহ বৈ ত্বয়াদ্য তং প্রাহ
ভূয়ঃ সুরশত্রু হত্বা। যদীহ মাং যো
দ্ধু মপাগতোসি তৎকম্পতে তে
হৃদয়ং কিমর্থং॥ জ্বরাতুরস্যেব

মুহু র্মুহু বৈ ভবিষ যোৎস্যে মহ
কাতরেণ। ইত্যেব মুক্তো মধুসূদনে-
ন মুর স্তদা স্বে হৃদয়ে স্ব হস্তকং॥
কথং নু কম্পেতি মুহু স্তদোক্ত্বা নি-
পাতযামাস বিপন্নবুদ্ধিঃ। হরিশ্চ
চক্রং মৃদু লাঘবেন মুমোচ তস্বস্য
শিরস্তু শত্রোঃ॥ ছিন্নে ত কেবোত্ত
গতব্যথা ভবন্ দেবং প্রশংসন্তি চ
পদ্মনাভং। ইতঃ প্রসিদ্ধ স্ন্যপা-
জগাম মুরারি রিত্যেব হরি র্ম-
হাত্মা॥ ইতি বামনে ৫৭। ৫৮
অধ্যায়ঃ॥ ❋॥ অনর্ঘরাঘবনাম্ন-
কর্ত্তা। যথা। অস্তি মৌদ্গল্য গোত্র
সমুদ্ভূতস্য মহাকবে র্ভট্ট শ্রীবর্দ্ধ-
মানাত্মজস্য তন্তুবর্তী জননীনন্দন-
স্য মুরারি নামধেয়স্য কবেঃ কৃতি
রনর্ঘরাঘবং নাম নাটকং তৎ প্রব-
ক্তারাঃ সামাজিকামুপাস্মহে। ইতি
তৎকৃত নাটকপদ্যং॥

মূর্চ্ছ শ্লো মোহে॥ উচ্ছুযে। ইতি
কবিকল্পদ্রুমঃ॥ পবগশেষাদিঃ।
হর্ব। তেন ক্বিপি রাচ্ছোর্লোপঃ মূঃ
মুরৌ মুরঃ। আ মূর্চ্ছিতং মূর্ত্তং তেন।
মোহো জ্ঞান রহিতীভাবঃ। উচ্ছা-
যো বৃদ্ধিঃ। মূর্চ্ছতি রোগী। মুমূর্চ্ছ
সংখ্যং রামস্য সমান ব্যসনে হ-
রাবিতি রঘুঃ। ইতি দুর্গাদাসঃ॥

মুর্ম্মিণী স্ত্রী অঙ্গারধানিকা। ইতি শব্দচন্দ্রিকা॥

মুর্ম্মুরঃ পুং তুষাগ্নিঃ॥ মন্মথঃ॥ রবিবাজিঃ। ইতি মেদিনী॥

মুর্ব্ব ঈ নহে। ইতি কবিকল্পদ্রুমঃ॥ আদ্যঃ পঞ্চমস্বরী॥ মূঃ মুর্ব্বৌ মুর্ব্বঃ। নহো বন্ধনং। ঈ মূর্ণঃ। ইতি দুর্গাদাসঃ॥

মুল ক রোপণে। ইতি কবিকল্পদ্রুমঃ॥ রোপণং আরোপণং। ক মোলয়তি বৃক্ষং লোকঃ। গোবিন্দভট্টস্তু রোহণে ইতি পঠিত্বা রোহণং জন্ম ইতি ব্যাখ্যাতি। ইতি দুর্গাদাসঃ॥

মুশটী স্ত্রী সিতরঙ্গঃ। ইতি হেমচন্দ্রঃ॥

মুশলিকা স্ত্রী পল্লী। ইতি হলায়ুধঃ॥

মুশলী স্ত্রী পল্লী॥ তালমূলী। তৎপর্য্যায়ঃ। সুবহা ২ তালপত্রিকা ৩ গোধাপদী ৪ হেমপুষ্পী ৫ ভূতালী ৬ দীর্ঘকন্দিকা ৭। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। বৃষ্যত্বং। পুষ্টি বল প্রদত্বং। পিচ্ছিলত্বং। কফদত্বং। পিত্ত দাহ শ্রম হরত্বঞ্চ॥ মশলী চ দ্বিধা প্রোক্তা শ্বেতাচাপর সংজ্ঞকা। শ্বেতা স্বল্প গুণোপেতা অপরা চ রসায়নী॥ ইতি রাজনির্ঘণ্টঃ॥

মুষ বধে। ইতি কবিকল্পদ্রুমঃ॥ মোষতি। ইতি দুর্গাদাসঃ॥

মুষ য ইর ছিদি। ইতি কবিকল্পদ্রুমঃ॥ ছেদ ইহ খণ্ডনং। য মুষ্যতি বিপক্ষং চতুরঃ। ইর অমুষৎ অমোষীৎ অস্মাৎ পৃষোদরাদিত্বান্মিত্ত্বং ও ইত্যন্যে। ইতি দুর্গাদাসঃ॥

মুষ গ লুণ্টনে। ইতি কবিকল্পদ্রুমঃ॥ গ মুষ্ণাতি। ইতি দুর্গাদাসঃ॥

মুষলঃ পুং ক্লী অয়োগ্রং। ইত্যমরটীকায়াং ভরতঃ॥ দন্ত্যমধ্যোঽপি॥

মুষলামুষলি ব্যং মুষলৈশ্চ মুষলৈশ্চ প্রহৃত্য যদ্ধং বৃত্তং। ইতি সিদ্ধান্তকৌমুদী॥

মুষলী স্ত্রী তালমূলিকা॥ গৃহগোধিকা। ইতি শব্দরত্নাবলী॥

মুষল্যঃ ত্রি মুষলবধ্যঃ। ইত্যমরটীকায়াং ভরতঃ॥

মুষা স্ত্রী মূষা। মুচী ইতি ভাষা। ইত্যমরটীকায়াং রায়মুকুটঃ॥

মুষিতং ত্রি চৌরিতদ্রব্যং। তৎপর্য্যায়ঃ। মূষিতং ২। ইত্যমরঃ॥

মুষ্কঃ পুং অণ্ডকোষঃ। ইত্যমরঃ॥ মোক্ষকবৃক্ষঃ॥ সংহাতঃ। ইতি মেদিনী॥ তস্করঃ॥ মাংসলঃ।

ইতি হেমচন্দ্রঃ ॥

মুষ্ককঃ পুং বৃক্ষবিশেষঃ। ঘণ্টা-পারুল ইতি বঙ্গভাষা। মোখা ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। গোলীঢঃ ২ ঝাটলঃ ৩ ঘণ্টাপাটলিঃ ৪ মোক্ষঃ ৫। ইত্যমরঃ ॥ মোক্ষকঃ ৬ মুষ্কঃ ৭ মোচকঃ ৮ মুষ্ককঃ ৯ গৌলিকঃ ১০ মেহনঃ ১১ ক্ষারবৃক্ষঃ ১২ পাটলী ১৩ বিষাপহঃ ১৪ জটালঃ ১৫ বনবাসী ১৬ সুতীক্ষ্ণকঃ ১৭। ইতি রাজনির্ঘণ্টঃ॥ গোলিহঃ ১৮ ক্ষারশ্রেষ্ঠঃ ১৯। স তু পলাশবৎ পর্ব্বত বৃক্ষঃ। শ্বেত কৃষ্ণ ভেদেন দ্বিবিধঃ। তস্য গুণাঃ। কটুত্বং। তিক্তত্বং। গ্রাহিত্বং। উষ্ণত্বং। কফ বাত কারিত্বং। বিষ মেদো গুল্ম বস্তু বস্তিরোগ কৃমি শুক্র নাশিত্বঞ্চ। ইতি ভাবপ্রকাশঃ॥ রেচনত্বং। পাচনত্বং। প্লীহোদরার্ত্তিনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মুষ্করঃ পুং পুলম্বাণ্ডঃ। ইতি হেমচন্দ্রঃ॥

মুষ্কশূন্যঃ পুং বৃষণরহিতঃ। স তু রাজ্ঞো অন্তঃপুররক্ষকঃ। খোজা ইতি ভাষা। তৎপর্য্যায়ঃ। অনুপস্থঃ ২ স্ত্রীস্বভাবঃ ৩ মহল্লিকঃ ৪। ইতি শব্দমালা॥

মুষ্টিঃ পুং স্ত্রী পলপরিমাণং। চারি তোলা ইতি ভাষা॥ বদ্ধপাণিঃ। মুটা ইতি ভাষা। তৎপর্য্যায়ঃ। সম্পিণ্ডিতাঙ্গুলিপাণিঃ ২ মুস্তঃ ৩ মুচটী ৪। ইতি হেমচন্দ্রঃ॥ স্তরুঃ খঙ্গেরমুট্ ইতি ভাষা। ইতি মেদিনী॥ অষ্টভাগঃ। ছটাক ইতি ভাষা। যথা। অষ্টমুষ্টি ভবেৎ অঞ্চিঃ অঞ্চযোষ্টৌ চ পুষ্কলঃ। ইতি প্রায়শ্চিত্ততত্ত্বং॥ মোষণং। ইতি মষখাত্বর্থদর্শনাৎ॥ প্রহারবিশেষঃ। কীল ইতি ভাষা। যথা। চিচ্ছেদাপতত তস্য ময়ূরং নিশিতৈঃ শরৈঃ। তথাপি সো অভ্যাবত্তাং মুষ্টি মুদ্যম্য বেগবান॥ সমুষ্টিং পাতয়ামাস হৃদয়ে দৈত্যপুঙ্গবঃ। দেব্যা স্তঞ্চাপি সা দেবী তলেনোরস্যতাডয়ৎ॥ ইতি মার্কণ্ডেয়পুরাণং॥ ॥ পথি ক্ষুধার্ত্তস্য তিলাদীনাং মুষ্টি গ্রহণে চৌর্য্যাভাবঃ। যথা। তিল মুদ্গ যবাদীনাং মুষ্টি গ্রাহ্যা পথিস্থিতৈঃ। ক্ষুধার্ত্তৈ নান্যথা বিপ্র বিধিবিভি রিতি স্থিতিঃ॥ ইতি কৌর্ম্মে উপরিভাগে ১৫ অধ্যায়ঃ॥

মুষ্টিকঃ পুং কংসরাজমল্লবিশেষঃ। ইতি শ্রীভাগবতং॥ স্বর্ণকারঃ।

ইতি হেমচন্দ্রঃ ॥

মুষ্টিকান্তকঃ পুং বলদেবঃ। ইতি শব্দরত্নাবলী ॥

মুষ্টিদ্যূতং ক্লী দ্যূতক্রীড়াবিশেষঃ। পুরমুট্খেলা ইতি ভাষা। তৎপর্য্যায়ঃ। ক্ষুল্লকং২। ইতি শব্দমালা ॥

মুষ্টিন্ধয়ঃ পুং বালকঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মুষ্টিবন্ধঃ পুং মুষ্টিবন্ধনক্রিয়া। মুটাবাঁধা ইতি ভাষা। তৎপর্য্যায়ঃ। সংগ্রাহঃ ২। ইত্যমরঃ ॥ মুষ্টের্বন্ধো হঙ্গুলিবিন্যাসো মুষ্টিবন্ধঃ। মুষ্টিনা বন্ধো দৃঢ়গ্রহণং সংগ্রাহ ইত্যপরে। মুষ্ট্যামেব সংগ্রহ ইত্যন্যে। মুষ্টিঃ স্ত্রিয়াঞ্চ সংগ্রহ ইতি বোপালিতঃ। ইতি ভরতঃ ॥

মুষ্টীমুষ্টি ব্য মুষ্টামুষ্টি। মুষ্টিভির্মুষ্টিভিঃ প্রহৃত্য যদ্যুদ্ধং বৃত্তং তৎ। কিলাকিলি ইতি ভাষা। ইতি মুগ্ধবোধব্যাকরণং ॥

মুষ্ঠকঃ পুং রাজসর্ষপঃ। ইতি রত্নমালা ॥ ব্যষ্টক ইতি বা পাঠঃ ॥

মুসঃ ম ইর ছিদি। খণ্ডনে। ইতি কবিকল্পদ্রুমঃ ॥ য মুস্যতি বিপক্ষং চতুরঃ। ইর অমুসৎ অমোসীৎ। অস্মাৎ পুষাদিত্বান্নিত্যং ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ ॥

মুসলঃ পুং ক্লী স্বনামখ্যাততণ্ডুলাদিকণ্ডনার্থ নির্ম্মিত লৌহাগ্রযষ্টিঃ। তৎপর্য্যায়ঃ। অয়োহগ্রং ২। ইত্যমরঃ ॥ মুষলং ৩ কণ্ডনীদণ্ডঃ ৪। ইতি শব্দরত্নাবলী ॥ মুস্যতি মুসলঃ মুস খিছিদি নাম্নীতি কলঃ। মসলো দন্ত্যসকারঃ। এবং মুষ্য ইছিদীতি মূর্দ্ধন্যান্তাৎ কলঃ মূর্দ্ধন্য ষকারশ্চ। ইত্যমরটীকায়াং ভরতঃ ॥

মুসলী স্ত্রী তালমূলিকা ॥ গৃহগোধিকা। ইত্যমরঃ ॥

মুসলী ন্ পুং বলদেবঃ। ইত্যমরঃ ॥

মুসল্যঃ ত্রি মুসলেনবধ্যঃ। ইত্যমরঃ ॥

মুস্ত ক সংহতৌ। ইতি কবিকল্পদ্রুমঃ ॥ পবর্গশেষাদিঃ। ক মুস্তয়তি। ইতি দুর্গাদাসঃ ॥

মুস্তঃ পুং মস্তকং। ইতি হারাবলী ॥

মুস্তকঃ পুং ক্লী তৃণমূলবিশেষঃ। মুতা ইতি ভাষা। তৎপর্য্যায়ঃ। কুরুবিন্দঃ২ মেঘনামা ৩ মুস্তং ৪। ইত্যমরঃ ॥ মস্তঃ ৫ রাজকসেরুঃ ৬। ইতি হারাবলী ॥ মেঘাখ্যং ৭ গাঙ্গেয়ং ৮ ভদ্রমুস্তকং ৯। ইতি রত্নমালা ॥ অস্য গুণাঃ। তিক্তত্বং।

কটুত্বং । বায়ুনাশিত্বং । গ্রাহিত্বং । দীপনত্বঞ্চ । ইতি রাজবল্লভঃ ॥ অপিচ । মুস্তকং নস্ত্রিয়াং মুস্তং ত্রিষু বারিদ নামকঃ । জরুবিন্দশ্চ সখ্যাতো হ্যপরঃ কোরকসেরুকঃ ॥ ভদ্রমুস্তশ্চ গুন্দ্রা চ তথা নাগরমুস্তকঃ । মুস্তং কটু হিমং গ্রাহি তিক্তং দীপন পাচনং ॥ কষায়ং কফ পিত্তাস্র তৃড্ জ্বরারুচি জন্তুহৃৎ । অনূপদেশে যজ্জাতং মুস্তকং তৎ প্রশস্যতে ॥ তত্রাপি মুনিভিঃ প্রোক্তং বরং নাগরমুস্তকং । ইতি ভাবপ্রকাশঃ ॥

মুস্তকঃ পুং স্থাবরবিষভেদঃ । ইতি হেমচন্দ্রঃ ॥

মুস্তা স্ত্রী মুস্তকঃ । ইত্যমরঃ ॥

মুস্তাদঃ পুং শূকরঃ । ইতি জটাধরঃ ॥

মুস্তাভং ক্লী মুস্তকবিশেষঃ । নাগরমতা ইতি ভাষা । তৎপর্য্যায়ঃ । জটমরটং ২ পুরং ৩ বল্যং ৪ পরিপেলবং ৫ । ইতি রত্নমালা ॥

মুস্তঃ পুং মুষ্টিঃ । ইতি হেমচন্দ্রঃ ॥

মুসং লী মসলং । মুসধাতো রৌণাদিক রক প্রত্যযেন নিষ্পন্নং । ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ ॥

মুহ য ৯ উ ক্রি বৈচিত্ত্যে । ইতি কবিকল্পদ্রুমঃ ॥ বৈচিত্ত্যং জ্ঞানহিতীভাবঃ । য তেন মুহ্যতি চিরায় মে মনঃ । ইতি মুরারিঃ । উ মোহিষ্যতি মোক্ষ্যতি । ৯ অমুহৎ । ক্রি মুগ্ধঃ মূঢো হস্তি । ইতি দুর্গাদাসঃ ॥

মুহিরঃ পুং কামঃ ॥ মূর্খঃ । ইতি মেদিনী ॥

মুহুঃ ব্য পনঃপনঃ । ইত্যমরঃ ॥

মুহুর্ভাষা স্ত্রী পুনঃপুনঃ কথনং । তৎপর্য্যায়ঃ । অনুলাপঃ ২ । ইত্যমরঃ ॥

মুহূর্ত্তঃ পুং ক্লী দ্বাদশক্ষণপরিমিতকালঃ । ইত্যমরঃ ॥ ঘটিকাদ্বয়ং । ইতি রাজনির্ঘণ্টঃ ॥ দিনপঞ্চদশভাগৈকভাগঃ । যথা । প্রাতঃকালো মুহূর্ত্তাং স্ত্রীন্ সঙ্গব স্তাবদেব তু । মধ্যাহ্ন স্ত্রি মহূর্ত্তঃ স্যাদপরাহ্ন স্ততঃ পরং । সায়াহ্ন স্ত্রি মুহূর্ত্তঃ স্যাৎ শ্রাদ্ধং তত্র ন কারযেৎ । রাক্ষসী নাম সা বেলা গর্হিতা সর্ব্ব কর্ম্মসু ॥ ইতি তিথ্যাদিতত্ত্বধৃতবচনং ॥ * ॥ কর্ম্ম বিশেষে তস্য পরিমাণং যথা । নন্ব্রতোপবাসস্নানাদৌ ঘটিকৈকাপি যা ভবেদিত্যত্র ঘটিকাপদং দণ্ডপরং মহূর্ত্ত পরং বা স্মৃত্যাচার ধৃত চতুদণ্ডাত্মকারুণোদয়জ্ঞাপকে চতস্রো ঘটিকাঃ প্রাত

অরুণোদয় উচ্যত ইত্যাদৌ প্রভাত্রে ঘটিকা যুগ্মং প্রদোষে ঘটিকাদ্বয়ং। দিনবৎ সর্ব্বকার্য্যাণি কারয়েন্ন বিচারয়েদিতি হলায়ুধ ধৃত লিখিষ্যমাণ ত্রিযামা নিশি বচনয়ো রেকমূলযোশ্চ উভযত্র প্রযোগ দর্শনাদিতি সংশযঃ। অত্রোচ্যতে। শ্রাদ্ধাদাবস্তগামিনীতি ঘটিকা নিযামক বচন চতুর্থ চরণে পার্ব্বণ যোগ্যতযা ঘটিকাযা মুহূর্ত্তাত্মকত্বস্যাবশ্য মঙ্গীকারাৎ তাৎপর্য্য লাঘবেন বৃত্তাদাবপি তথাত্বং। ঘটিকৈকাপ্যমাবাস্যা প্রতিপৎ সুন চেদ্যদা। সর্ব্বং তদাসুরং দানং দৈবে কর্ম্মণি চোদিতং॥ ইতি ঘটিকান্যূনে নিন্দামভিধায ঘটিকালাভে কর্ম্মার্হেতি বক্তব্যে মুহূর্ত্ত মপ্যমাবাস্যা প্রতিপৎস ভবেদ্যদা। তদ্দান মুত্তমং জ্ঞেযং শেষং পূর্ব্বং হি পূর্ব্ববদিত্যনেন মুহূর্ত্তলাভে কর্ম্মার্হত্ব জ্ঞাপনাচ্চ। তত্রাপি মুহূর্ত্তঃ কিং তত্তদ্দিবারাত্রি পঞ্চদশাংশ উত দণ্ডদ্বযং। নাদ্যঃ প্রতিদিন দিবারাত্র্যো হ্রাস বৃদ্ধিভ্যাং তত্তদ্দশাংশানামপি ন্যূনাধিক্যাদ্বিধি ভেদাপত্তেঃ। নাপি দ্বিতীযঃ দণ্ড দ্বযস্য ত্রিংশদ্দণ্ডাত্মক দিবারাত্রি পঞ্চদশাংশস্য মুহূর্ত্তত্বঞ্চ দণ্ডদ্বযাধিক ন্যূন কালানামপি ত্রিংশদ্দণ্ডাধিক ন্যূন দিবারাত্রি পঞ্চদশাংশানাং মুহূর্ত্তত্ব প্রতিপাদনেন বিনিগমনাবিরহাৎ কিন্তুভযঙ্গতযা কর্ম্মাঙ্গ দিবারাত্র্যন্যতর পঞ্চদশাংশস্য গ্রহণ প্রশস্তৌ অযনাংশ ক্রমেণোত্তরাযণ পূর্ব্বাহ্ন দিনমান সপাদ ষট্ত্রিংশতি দণ্ডানাং পঞ্চদশাংশস্য পাদোন দণ্ড দ্বযস্য মুহূর্ত্তত্বাত্তদ্দিন বিহিত ক্রিযাযাং তাবন্ন্যূন কালস্যাপি গ্রহণাৎ সর্ব্বত্র ন্যূনকালব্যবচ্ছেদে আবশ্যকতযা তস্যৈব পাদোন দণ্ডদ্বযাত্মকস্য মুহূর্ত্তস্য গ্রহণং লাঘবাৎ। যদা চতুর্দ্দশী যামং তুরীয মনুপূরযেৎ। অমাবাস্যা ক্ষীযমাণা তদৈব শ্রাদ্ধ মিষ্যত ইতি কাত্যাযনোক্তস্য চতুর্দ্দশী সম্বন্ধি দিন চতুর্থযাম মাত্র ব্যাপ্য মাবাস্যাযাং শ্রাদ্ধবিধানস্য মৎস্যপুরাণোক্ত মুখ্যাপরাহ্নীয মুহূর্ত্তাবাধেন বিষয লাভায পাদোন দণ্ডদ্বযাত্মক মুহূর্ত্ত গ্রহণস্যাবশ্যকত্বাচ্চ। তাদৃশামাবাস্যাযাং তদধিক মুখ্যাপরাহ্না সম্ভবাৎ। তত্র মুখ্যাপরাহ্নীয পাদোনদণ্ড দ্বযাত্মক দর্শলাভস্ত চত্বারিংশৎ পলাধিক ত্রযস্ত্রিংশদ্দণ্ডাত্মক দিবস

এব। অতএব স্মার্ত্তভট্টাচার্য্যৈরপি
যদা চতুর্দ্দশী যাম মিত্যস্য ব্যাখ্যা-
নে স্তিথ্যাদিতত্ত্বে তথা লিখিতং। ন
চ নিরূঢ় লক্ষণাতো রূঢ় শক্তে র্বলব-
ত্ত্বাৎ। তাস্থ ত্রিংশৎ ক্ষণ স্তে তু ম
হূর্ত্তো দ্বাদশাস্ত্রিয়াং। তেতু ত্রিংশ-
দহোরাত্র ইত্যমরোক্তো দ্বাদশ ক্ষ
ণাত্মকঃ অহোরাত্র ত্রিংশাংশো দ-
ণ্ডদ্বযরূপ মুহূর্ত্তো লাঘবতঃ সর্ব্বত্রা-
নুগততযা ন্যূনকাল ব্যবচ্ছেদকো
বক্তব্য ইতি বাচ্যং নিরূঢ় লক্ষণাপি
শক্তি তুল্যেতি শাব্দিকস্মরণাৎ স্মার্ত্ত
ত্ত্বেনান্তরঙ্গেতি সন্নিহিতে বুদ্ধি রন্ত-
রঙ্গেতি ন্যাযাচ্চ নিরূঢ় লক্ষণাযা এব
বলবত্ত্বাৎ। দক্ষিণঃ সপবিত্রক ইত্য
ত্র পবিত্র পদস্য স্বশগত কোষোক্ত
রূঢ়ি শক্ত্যপেক্ষযা বিশিষ্ট স্বশপত্র
দ্বয গত কাত্যাযনোক্ত নিরূঢ় লক্ষ-
ণাযা ইব। নিরূঢ় লক্ষণাযাঃ শক্তি
তুল্যত্বন্তু রূঢ় শক্তে র্নিব শক্যার্থ বাধ
জ্ঞানং শক্য সম্বন্ধ জ্ঞানঞ্চ বিনা পদ
তাৎপর্য্য জ্ঞানানুপদ মেব পদা-
র্থোপস্থাপকত্বাৎ। সা চ নিরূঢ়
লক্ষণা ক্বচিত্তাৎপর্য্য বোধক শা-
স্ত্রাৎ ক্বচিচ্চার্ষ প্রযোগতো হনুমানা
দপি নির্ণী যতে। বস্তুতস্তু দ্যুনিশোঃ
পঞ্চদশাংশাশ্রিত স্মৃত্যুক্ত নিরূঢ়

মুহূর্ত্ত পদলক্ষণা বিনিগমনাবিরহ
গৌরবাভ্যা মেব স্বণ্ঠিতা অতোত্যন্ত
ন্যূন পাদোন দণ্ডদ্বযাত্মক মুহূর্ত্ত গ্র-
হণ মশক্য মেব। অথাত্যন্ত ন্যূনত-
যা সর্ব্বানুগমায তদ্‌গ্রহণ মিতি চেৎ
অত্যন্তাধিকতযা সপাদ দণ্ডদ্বযা-
ত্মক মুহূর্ত্ত স্যৈব স্বতো ন গ্রহণং
স্যাৎ তস্মাৎ প্রভাতে ঘটিকাযুগ্মং
প্রদোষে ঘটিকাদ্বযং। দিনবৎ সর্ব্ব
কার্য্যাণি কারযেন্ন বিচারযেদিতি
লঘুহারীত বচন ত্রিযামাং রজনীং
প্রাহু স্ত্যক্ত্বাদ্যন্ত চতুষ্টযং। নাডীনাস্ত
দুভে সন্ধ্যে দিবসাদ্যন্ত সংজ্ঞিত ইতি
ব্রহ্মবৈবর্ত্ত বচনযো রেকবাক্যতযা
দণ্ডদ্বযাত্মক কালে ঘটিকাপদ নি-
রূঢ়লক্ষণা সিদ্ধৌ তযা পর্য্যায দ্বারা
কোষোক্ত রূঢ্যা চ সমঞ্জসতঃ পা-
র্ব্বণ যোগ্য দণ্ডদ্বযাত্মক কালএব ঘ-
টিকাপদাদুপস্থাপ্যতে অতঃ সর্ব্ব-
সাধারণ্যেন ন্যূনকাল ব্যবচ্ছেদায
সৈব গ্রাহ্যা লাঘবাৎ। অতএব যদা
চতুর্দ্দশী যামং তরীয মনুপূরযেদি-
ত্যত্র যদা যত্র দিনে অমাবাস্যা মু-
খ্যাপরাহ্ণীয দণ্ডদ্বযান্যূনকালব্যা-
পনং যথা স্যাত্তথৈব চতুর্দ্দশী যা-
মং তদ্যুক্ত তৃতীযযাম মনুলক্ষীকৃ-
ত্য তত্র প্রবৃত্য চতুর্থযামং পূরযেৎ

ব্যাপ্নোতীত্যর্থঃ ॥ অন্যথা চতুর্দশ মহূর্ত্তাধিক পূরণাভিধানং ব্যর্থং স্যাৎ। এতেনৈব দর্শশ্রাদ্ধেপি মুখ্যাপরাহ্লাদরঃ কার্য্যঃ। প্রাতঃ কালাদি পঞ্চধা বিভাগে কুতপাদি সংজ্ঞায়াঞ্চ দিনমান পঞ্চদশাংশ মুহূর্ত্তস্যৈব গ্রহণং। তদ্বোধক শাস্ত্র সংবাদাৎ। অত একোদ্দিষ্টে দিনমান পঞ্চদশাংশ মুহূর্ত্তো যোগ্যতয়া চ ন্যূন কাল ব্যবচ্ছেদকো গ্রাহ্যঃ। কুতপ রৌহিণান্যতর মাত্র গ্রাহক যুক্তেঃ। এবং বিশেষাভিধানাৎ কুথরমত্রৌ দিওনাত্রং জন্মাষ্টম্যেকাদশী দ্বাদশীষু চ কলা কাষ্ঠা রূপোপি প্রতিষ্ঠাদৌ তুক্ত যুক্ত্যা স্বযোগ্যকাল এব ন্যূন কাল ব্যবচ্ছেদকো গ্রাহ্যঃ। ততশ্চ বিশেষকাল প্রাপ্ত কর্ম্মেতর কর্ম্মণঃ প্রশস্তাদিকালে স্বযোগ্য দণ্ডদ্বয়ান্যূনক তিথিরেব গ্রাহ্যেত্যনুগত বিধিঃ সর্ব্বসামঞ্জস্যাদিতি তত্ত্বং। ইতি চন্দ্রশেখর বাচস্পতি কৃত দ্বৈতনির্ণয়ঃ ॥

মুহেরঃ পুং মূর্খঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ ॥

মু ড বন্ধে। ইতি কবিকল্পদ্রুমঃ ॥ পবর্গপঞ্চমাদিঃ ড মবৃতে। ইতি দুর্গাদাসঃ ॥

মূঃ স্ত্রী মূর্চ্ছা। ইতি মূর্চ্ছধাতো র্ভাবে-ক্বিপা নিষ্পন্নং। ইতি মুগ্ধবোধব্যাকরণং ॥

মূঃ স্ত্রী বন্ধনং। ইতি সিদ্ধান্তকৌমুদী ॥

মূকঃ ত্রি বাক্যরহিতঃ। বোবা ইতি ভাষা। তৎপর্য্যায়ঃ। অবাক্ ২। ইত্যমরঃ ॥

মূকঃ পুং মৎস্যঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ দৈত্যঃ। ইতি মেদিনী ॥ দীনঃ। ইতি হেমচন্দ্রঃ ॥

মূঢ়ঃ ত্রি মূর্খঃ। ইত্যমরঃ ॥ বালঃ ॥ তন্দ্রিতঃ। ইতি মেদিনী ॥ জড়ঃ। ইতি হেমচন্দ্রঃ ॥

মূতঃ ত্রি বদ্ধঃ। ইত্যমরঃ ॥

মূত্র তক প্রস্রাবে। ইতি কবিকল্পদ্রুমঃ ॥ দীর্ঘী। মূত্রয়তি মূত্রাপয়তি। ইতি দুর্গাদাসঃ ॥

মূত্রং ক্লী উপস্থনির্গতজলং। তৎপর্য্যায়ঃ। প্রস্রাবঃ ২। ইত্যমরঃ ॥ মেহনং ৩। ইতি জটাধরঃ ॥ গুহ্যনিস্যন্দঃ ৪ স্রবণং ৫ স্রবঃ ৬। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ তস্যোৎসর্গ বিধির্যথা। দিবা সন্ধ্যাসু কর্ণস্থ ব্রহ্মসূত্র উদঙ্মুখঃ। কুর্য্যান্মূত্র পুরীষে তু রাত্রৌ বৈ দক্ষিণামুখঃ ॥ ইতি

গারুড়ে ৯৪ অধ্যায়ঃ ॥ অপিচ। মূত্রোচ্চার সমুৎসর্গং দিবা কুর্য্যাদুদঙ্মুখঃ। দক্ষিণাভিমুখো রাত্রৌ সন্ধ্যয়োশ্চ যথা দিবা ॥ ইতি মনুঃ ॥ কৃত্বা যজ্ঞোপবীতন্তু পৃষ্ঠতঃ কণ্ঠলম্বিতং। বিণ্মূত্রে চ গৃহী কুর্য্যাদ্যদ্বা কর্ণে সমাহিতঃ ॥ ইতি যমঃ। যদ্যেক বস্ত্রো যজ্ঞোপবীতং কর্ণে কৃত্বা অবগুণ্ঠিত ইতি। কর্ণে দক্ষিণ কর্ণে। ইতি সাংখ্যায়নঃ ॥ ছায়ায়া মন্ধকারে বা রাত্রাবহনি বা দ্বিজঃ। যথা সুখ মুখঃ কুর্য্যাৎ প্রাণবাধ ভয়েষু চ ॥ ॥ ন মূত্রং পথি কুর্ব্বীত ন ভস্মনি ন গোব্রজে। ন ফালকৃষ্টে ন জলে ন চিত্যাং নচ পর্ব্বতে ॥ ন জীর্ণদেবায়তনে ন বল্মীকে কদাচন। ন সসত্ত্বেষু গর্ত্তেষু ন গচ্ছন্নাপি সংস্থিতঃ ॥ ন নদীতীর মাসাদ্য নচ পর্ব্বত মস্তকে। বায়্বগ্নি বিপ্রমাদিত্য মপঃপশ্যং স্তথৈব চ ॥ ন কদাচন কুর্ব্বীত বিণ্মূত্রস্য বিবর্জনং। ইতি মনুঃ ॥ ॥ আহার নির্হার বিহার যোগাঃ সুসম্বৃতা ধর্ম্ম বিদা তু কার্য্যাঃ। বাগ্‌গুপ্তি কার্য্যাণি তপ স্তথৈব ধনায়ুষী গুপ্ততমে ত কার্য্যে ॥ ইতি বশিষ্ঠঃ ॥ নির্হারো মূত্র পুরীষোৎসর্গঃ ॥ ॥ সোমাগ্ন্যর্কাম্বু বায়ূনাং পূজ্যানাঞ্চ ন সংমুখে। কুর্য্যাৎ ষ্ঠীবন বিণ্মূত্র সমুৎসর্গঞ্চ পণ্ডিতঃ ॥ ইতি বিষ্ণু পুরাণং ॥ নচ সোপানৎকো মূত্রপুরীষে কুর্য্যাদিতি। ইত্যাপস্তম্বঃ ॥ করগৃহীত পাত্রেণ কৃত্বা মূত্রপুরীষকে। মূত্রভুল্যন্তু পানীয়ং পীত্বা চান্দ্রায়ণঞ্চরেৎ ॥ ইতি বৃহন্মনুঃ ॥ ॥ গৃহীত জলপাত্রস্য মূত্রোৎসর্গে দোষো যথা। বারিপাত্রং করে ধৃত্বা মূত্রং ত্যজতি যো নরঃ। সুরাপাত্র সমং পাত্রং তজ্জলং মদিরা সমং ॥ ইতি কর্ম্মলোচনং ॥ ॥ স শব্দ মূত্রস্য দোষো যথা। নিঃস্বাঃ স শব্দ মূত্রাঃ স্যু র্নৃপা নিঃশব্দ ধারকা। ভোগাঢ্যাঃ স বিজঠরা নিঃস্বাঃ স্যু র্ঘট সন্নিভাঃ ॥ ইতি গারুড়ে ৬৩ অধ্যায়ঃ ॥ ॥ বিষ্ণুক্রান্তা জলমূত্রেণ চৌর ব্যাঘ্রাদি রক্ষণং। ইতি তত্রৈব ১৮৮ অধ্যায়ঃ ॥ ॥ অথ গোমূত্রগুণাঃ। তীক্ষ্ণত্বং। উষ্ণত্বং। লবণত্বং। পিত্তকারিত্বং। কটুত্বং। লঘুত্বং। রুক্ষত্বং। কফ্যমরানাহ শোথার্শো বিষ কুষ্ঠ নাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

মূত্রকৃচ্ছ্রং স্ত্রী রোগবিশেষঃ। তৎপর্য্যায়ঃ। মূত্ররোধঃ ২ অশ্মরী ৩

কৃচ্ছ্রং ৪। ইতি রাজনির্ঘণ্টঃ॥ ॥ অথ মূত্রকৃচ্ছ্রাধিকারঃ। তত্র মূত্রকৃচ্ছ্রস্য বিপ্রকৃষ্টং নিদান মাহ। ব্যায়াম-তীক্ষ্ণৌষধ রুক্ষমদ্য প্রসঙ্গ নৃত্যদ্রুত পৃষ্ঠযানাৎ। আনূপ মৎস্যাধ্যশনাদজীর্ণাৎস্যু মূত্রকৃচ্ছ্রাণি নৃণাং তথাষ্টৌ॥ তীক্ষ্ণৌষধং রাজিকাং লবণাদি যুক্তং। রুক্ষেতি মদ্য বিশেষণং। প্রসঙ্গঃ সততং সেবা। নৃত্যং নর্ত্তনং। নিত্যেতি দ্বিতীয়ঃ পাঠঃ। দ্রুত পৃষ্ঠযানাৎ অশ্বাদিনা গমনাৎ। আনূপং প্রচুরজল দেশ ভবং ভক্ষ্যং। অষ্টৌ বাতিক পৈত্তিক শ্লৈষ্মিক সান্নিপাতিক শল্যজ পুরীষজ শুক্রজাশ্মরীজানি। তস্য সংপ্রাপ্তি পূর্ব্বকং লক্ষণমাহ। পৃথঙ্মলাঃস্বৈঃ কুপিতা নিদানৈঃ সর্ব্বে হথবা কোপ মপেত্য বস্তৌ। মূত্রস্য মার্গং পরিপীডয়ন্তি যদা তদা মূত্রযতীহ কৃচ্ছ্রাৎ॥ ॥ তেষু বাতজ মাহ। তীব্রারুজো বঙ্ক্ষণ বস্তি মেঢ্রে স্বল্পং মুহু মূত্রযতীহ বাতাৎ। তীব্রা সাহ্বণাত্মিকা বঙ্ক্ষণাবুরুমেঢ্রাণামন্তরাল সন্ধী॥ ॥ পৈত্তিক মাহ। পীতং সরক্তং সরুজং সদাহং কৃচ্ছ্রং মুহুর্মূত্রযতীহ পিত্তাৎ। কৃচ্ছ্রমিতি ক্রিযা বিশেষণং॥ ॥ শ্লৈষ্মিক মাহ। বস্তেঃ সলিঙ্গস্য গুরুত্ব শোথৌ মূত্রং সপিচ্ছং কফ মূত্রকৃচ্ছ্রে। সপিচ্ছং পিচ্ছিলং। ॥ সান্নিপাতিক মাহ। সর্ব্বাণি রূপাণি চ সন্নিপাতাৎ ভবন্তি তৎ কৃচ্ছ্রতমং হি কৃচ্ছ্রং। কৃচ্ছ্রং মূত্রকৃচ্ছ্রং॥ ॥ শল্যজ মাহ। মূত্রবাহিষু শল্যেন ক্ষতেস্বভিহতেষু বা। মূত্রকৃচ্ছ্রং তদাঘাতাজ্জায়তে ভৃশ দারুণং॥ বাতকৃচ্ছ্রেণ তুল্যানি তস্য লিঙ্গানি নির্দ্দিশেৎ। মূত্রবাহিষু স্রোতঃসু। শল্যেন কণ্টকেন। ক্ষতেষু সকণ্টীকৃতেষু অথবা অভিহতেষু মুদ্গরাদিভিরভিহতেষু। তদাঘাতাৎ মূত্রমার্গাঘাতাৎ মূত্রকৃচ্ছ্রং জায়তে। ভৃশদারুণং মারকং তস্য শল্যজস্য॥ ॥ পুরীষজ মাহ। শকৃতস্তু প্রতীঘাতাদ্বায়ুর্বিগুণতাং গতঃ। আধ্মানং বাতশূলঞ্চ মূত্রকৃচ্ছ্রং করোতি চ॥ প্রতীঘাতাৎ নিরোধাৎ। বিগুণতাং দুষ্টতাং॥ ॥ শুক্রজমাহ। শুক্রদোষৈ রুপহতে মূত্রমার্গে বিধাবিতে। সশুক্রং মূত্রয়েৎ কৃচ্ছ্রাদ্বস্তি মেহন শূলবান্॥ উপহতে দূষিতে॥ ॥ অশ্মরীজ মাহ। অশ্মরী হেতুকোপি মূত্রকৃচ্ছ্র মদাহৃতং। সুশ্রুতেঃ শর্করাজ মপি মূত্রকৃচ্ছ্রমুক্ত মত্র তু তস্য নব সংখ্যা নিরাসার্থ মশ্মরী শর্কর-

যোঃ সাম্যমাহ। অশ্মরী শর্করা চৈব তুল্য সম্ভব লক্ষণে। বিশেষণং শর্করায়াঃ শৃণু কীর্ত্তয়তো মম॥ সম্ভবঃ কারণং। পচ্যমানাশ্মরী পিত্তা চ্ছোষ্যমাণা চ বায়ুনা। বিমুক্ত কফ সন্ধানা ক্ষরন্তী শর্করা মতা॥ পিত্তেন পচ্যমানা মূত্র শুক্র শ্লেষ্ম সংহতিঃ প্রথমং পিত্তেন বন্ধন কর্ম্মণা পচ্যমানা। পশ্চাদ্বাতেন শোষিতা কফেনা শ্লিষ্টা অশ্মরী। সৈব বিমুক্ত কফ সন্ধানা ত্যক্ত কফাশ্লেষা সতী শর্করারূপা মূত্র মার্গাৎ ক্ষরন্তী শর্করা মতা। এতাবতা কিঞ্চিদেব ভেদঃ॥ *॥ শর্করয়া উপদ্রবানাহ। হৃৎপীড়া বেপথুঃ শূলং জঙ্ঘাবগ্নিশ্চ দুর্ব্বলঃ। তয়া ভবতি মূর্চ্ছা চ মূত্রকৃচ্ছ্রঞ্চ দারুণং। শূলং জঙ্ঘাবিত্যন্বয়ঃ। তয়া শর্করয়া॥ *। *॥ অথ মূত্রকৃচ্ছ্রস্য চিকিৎসা। ত্রিকণ্টকারগ্বধ দর্ভ কাশ যবাস ধাত্রী গিরিভেদ পথ্যা। নিঘ্নন্তি পীতা মধুনাশ্মরীঞ্চ সমীপ মৃত্যো রপি মূত্রকৃচ্ছ্রং॥ ত্রিকণ্টাদি ক্বাথঃ॥ ১॥ এলাশ্মভেদক শিলাজত গোক্ষুরাণা মেরারুবীজ লবণো ত্তম জন্মানাং। চূর্ণানি তণ্ডুল জলে তুলিতানি পীত্বা প্রত্যক্ষ মৃত্যু রপি জীবতি মূত্রকৃচ্ছ্রী॥ এলাদিচূর্ণং॥২॥ অযোরজঃ সূক্ষ্ম পিষ্টং মধুনা সহ যোজিতং। মূত্রকৃচ্ছ্রং নিহন্ত্যাশু সংলীঢ়ং দিবসত্রয়াৎ॥ ৩॥ গুড়েন মিশ্রিতং ক্ষীরং কটূষ্ণং কামতঃ পিবেৎ। মূত্রকৃচ্ছ্রেষু সর্ব্বেষু শর্করায়াঞ্চ নিত্যশঃ॥ ৪॥ ধাত্রীরস শ্চেক্ষুরসং পিবেদ্বা কৃচ্ছ্রে সরক্তে মধুনা বিমিশ্রং। শল্যাভিঘাতোত্থিত মূত্রকৃচ্ছ্রে কার্য্যা ক্রিয়া মারুতকৃচ্ছ্র তুল্যা॥ ৫॥ ক্বাথো গোক্ষুরবীজস্য যবক্ষার সমন্বিতঃ। পীতঃ প্রশময়ত্যেব কৃচ্ছ্রং বিড্ধারণোত্থিতং॥ ৬॥ ত্রিফলায়াঃ সুপিষ্টায়াঃ কল্কং কেনল সমন্বিতং। বারিণা লবণীকৃত্য পিবেন্মূত্র রুজাপহং॥ ৭॥ কোলং বদরং॥ গুড়মামলকং বৃষ্যং শ্রমঘ্নং তর্পণং প্রিয়ং। পিত্তাসৃগ্দাহ শূলঘ্নং মূত্রকৃচ্ছ্র হরংপরং॥ ৮॥ সপাদশাণ তুলিতো যবক্ষারঃ সিতা যুতঃ। ভক্ষিতো নাশয়ত্যেব মূত্রকৃচ্ছ্রং ন সংশয়ঃ॥ ৯॥ দ্রাক্ষা সিতোপলা কল্কঃ পীতঃ করমিতো নরৈঃ। মস্তুনা পলমাত্রেণ মূত্রকৃচ্ছ্রং ব্যপোহতি॥ ১০॥ সমল গোক্ষুর ক্বাথঃ সিতা মাক্ষিক সংযুতঃ। নাশয়েন্মূত্রকৃচ্ছ্রাণি তথৈবোষ্ণ সমীরণং॥১১॥ উষ্ণ সমীরণং উষ্ণবাতং মূত্রাঘাতবিশেষং। ইতি ভাবপ্রকাশঃ॥

মূত্রদোষঃ পুং প্রমেহঃ। ইতি রাজনির্ঘণ্টঃ॥

মূত্রনিরোধঃ পুং মূত্রপ্রতিবন্ধকরোগবিশেষঃ। যথা। পিষ্টং বৈ মালতী মূলং গ্রীষ্মকালে সমাহৃতং। সাধিতং ছাগদুগ্ধেন পীতং শর্করযান্বিতং॥ হরেন্মূত্রনিরোধঞ্চ হরেদ্বৈ পাণ্ডুশর্করাং। ইতি গারুড়ে ১৯১ অধ্যায়ঃ॥

মূত্রপতনঃ পুং গন্ধমার্জারঃ। ইতি রাজনির্ঘণ্টঃ॥

মূত্রপুটং ক্লী নাভেরধোভাগঃ। যথা। নাভেরধো মূত্রপুটং বস্তিমূত্রাশযোঽপি চ। ইতি হেমচন্দ্রঃ॥

মূত্রফলা স্ত্রী কর্কটী॥ ত্রপুষী। ইতি রাজনির্ঘণ্টঃ॥

মূত্রলং ক্লী ত্রপুষং। ইতি শব্দচন্দ্রিকা॥ মূত্রবর্দ্ধকে ত্রি॥

মূত্রলা স্ত্রী কর্কটী। ইতি ত্রিকাণ্ডশেষঃ॥ বালুকী। ইতি রাজনির্ঘণ্টঃ॥

মূত্রাঘাতঃ পুং প্রস্রাবরোধকরোগবিশেষঃ। অথ মূত্রাঘাতস্য বিপ্রকৃষ্টং সন্নিকৃষ্টঞ্চ নিদানং সংখ্যাঞ্চাহ। প্রায়ো মূত্রবিঘাতাদ্যৈর্বাতকুণ্ডলিকাদযঃ। জাযন্তে কুপিতৈর্দোষৈর্মূত্রাঘাতাস্ত্রয়োদশ॥ মূত্রবিঘাতাদ্যৈরিত্যাদ্য শব্দেন পুরীষ শুক্রাদি বেগ বিঘাতানাং রুক্ষাশনাদীনাঞ্চ গ্রহণং। মূত্রবিঘাতাদ্যৈঃ কুপিতৈর্দোষৈরিত্যন্বযঃ। ননু মূত্রকৃচ্ছ্র মূত্রাঘাতযোঃ কো ভেদঃ। উচ্যতে। মূত্রকৃচ্ছ্রে কৃচ্ছ্রমধিকং বিবন্ধো হল্পঃ। মূত্রাঘাতে তু বিবন্ধো বলবান্ কৃচ্ছ্রমল্পং ইত্যনযো র্ভেদঃ॥ * ॥ বাতকুণ্ডলিকাযা নিদানং সংপ্রাপ্তিং লক্ষণঞ্চাহ। রৌক্ষ্যাদ্বেগ বিঘাতাদ্বা বাযুর্বস্তৌ সবেদনঃ। মূত্রমাবিশ্য চরতি বিগুণঃ কুণ্ডলী কৃতঃ॥ মূত্রমল্পাল্পমথবা সরুজং সংপ্রবর্ত্ততে। বাতকুণ্ডলিকাং তান্তু ব্যাধিং বিদ্যাৎ সুদারুণং॥ রৌক্ষ্যাৎ কাযস্য। বেগবিঘাতাৎ মূত্রাদিবেগ নিরোধাৎ আবিশ্য প্রাবৃত্য রৌক্ষ্যাদিভি র্বেগবিঘাতাদিভিশ্চ বিগুণো দুষ্টঃ কুণ্ডলীকৃতো বাযু র্বস্তৌ মূত্রাশযে চরতি প্রতিধাবতি আবর্ত্তমানস্তিষ্ঠতি ইত্যর্থঃ॥ বাত্যাবৎ। মূত্রমিতি তস্মান্মূত্র মল্পমল্পং সব্যথং প্রবর্ত্ততে। তদ্ব্যাধিং বাতকুণ্ডলিকামাহুঃ। সুদারুণং মারণাত্মকত্বাৎ॥ ১॥ * ॥ অষ্ঠীলামাহ। আধ্মাপযন্ বস্তি গুদং রুদ্ধা বাত শ্চলোন্নতাং। কুর্য্যাত্তীব্রার্ত্তি

অষ্ঠীলাং মূত্রবিন্মার্গরোধিনীং ॥ বাতঃ বস্তিগুদং রুদ্ধ্বা অথান্তরন্তর্গতং মূত্রং মলঞ্চ নিরুধ্য বস্তিগুদং বস্তিং গুদঞ্চ আধ্মাপয়ন্ আধ্মানং কুর্ব্বন্ অষ্ঠীলাং ষ্ঠীলাতুল্যাং ব্যাধিং কুর্য্যাৎ। চলোন্নতাং চলাং উন্নতাঞ্চ ॥ ২ ॥ * ॥ বাতবস্তিমাহ ॥ বেগং বিধারয়েদ্যস্তু মূত্রস্যাকুশলো নরঃ। নিরুণদ্ধি মুখং তস্য বস্তের্বস্তিগতোহনিলঃ ॥ মূত্রসঙ্গো ভবেত্তেন বস্তিকুক্ষিনিপীড়িতঃ। বাতবস্তিঃ স বিজ্ঞেয়ো ব্যাধিঃ কষ্টপ্রসাধনঃ ॥ অকুশলো মূর্খঃ। তস্য পুরুষস্য বস্তিমুখং নিরুণদ্ধি বস্তিগতো বায়ুঃ। তেন বায়ুনা মূত্রসঙ্গো মূত্রবিঘাতো ভবতি বস্তিকুক্ষিনিপীড়িত ইতি বস্তৌ কুক্ষৌ চ নিপীড়িতো সংপীড়িতো বায়ুরিতি সম্বন্ধঃ ॥ ৩ ॥ * ॥ মূত্রাতীতমাহ। চিরং ধারয়তো মূত্রং ত্বরয়া ন প্রবর্ত্ততে। মেহমানস্য মন্দং বা মূত্রাতীতঃ স উচ্যতে ॥ মেহমানস্য মূত্রমুৎসৃজতঃ। মন্দং বা অল্পং বা ॥ ৪ ॥ * ॥ মূত্রজঠরমাহ। মূত্রস্য বেগে বিহতে তদুদাবর্ত্তহেতুকঃ। অপানঃ কুপিতো বায়ুরুদরং পূরয়েদ্ভৃশং ॥ নাভেরধস্তাদাধ্মানং জনয়েত্তীব্রবেদনাং। তং মূত্রজঠরং বিদ্যাদধো বস্তিনিরোধকং ॥ তদুদাবর্ত্তহেতুক ইতি মূত্রবেগধারণজনিতোদাবর্ত্তনিদানমাধ্মানং কুর্য্যাৎ। অধো বস্তিনিরোধনং বস্তের্মধ্যোদ্দেশে বিবন্ধকারকং ॥ ৫ ॥ * ॥ মূত্রোৎসঙ্গমাহ। বস্তৌ বাপ্যথবা নালে মণৌ বা যস্য দেহিনঃ। মূত্রং প্রবৃত্তং সজ্জেত সরক্তং বা প্রবাহতঃ ॥ স্রবেচ্ছনৈরল্পমল্পং সরুজং বাথ নীরুজং। বিগুণানিলজো ব্যাধিঃ স মূত্রোৎসঙ্গসংজ্ঞিতঃ ॥ নালে মেঢ্রে মণৌ মেহনাগ্রগ্রন্থৌ সজ্জেত নিরুদ্ধং স্যাৎ সরক্তং সৎ বা প্রবর্ত্তেত। প্রবাহত ইতি কষ্টেন বলেন সশব্দং মূত্রপুরীষযাত্রানামধঃপ্রেরণং প্রবাহনং তেন কুপিতেন বায়ুনা বস্ত্যাদিভেদাৎ সরক্তং মূত্রং স্রবেদিত্যর্থঃ ॥ ৬ ॥ * ॥ মূত্রক্ষয়মাহ। রুক্ষস্য ক্লান্তদেহস্য বস্তিস্থৌ পিত্তমারুতৌ। মূত্রক্ষয়ং সরুগ্দাহং জনয়েতাং তদাহ্বয়ং ॥ ক্লান্তদেহস্য ম্লানদেহস্য তদাহ্বয়ং মূত্রক্ষয়সংজ্ঞং ॥ ৭ ॥ * ॥ মূত্রগ্রন্থিমাহ। অন্তর্বস্তিমুখে বৃত্তঃ স্থিরোহল্পঃ সহসা ভবেৎ। অশ্মরীতুল্যরুগ্‌গ্রন্থির্মূত্রগ্রন্থিঃ স উচ্যতে ॥ অন্তর্বস্তিমুখে বস্তিমুখস্যাভ্যন্তরে অল্পঃ অল্পপ্রমাণঃ। তস্য অশ্মর্য্যা

সূহ্ কো ভেদঃ। উচ্যতে। অশ্মরী ক্রমশঃ সঞ্চয়েন স্যাদয়ন্ত সহসা ভবেদিতি ভেদঃ। অপরো ভেদঃ। অশ্মর্য্যাং পিত্তাদিকং সংহন্যতে অত্রতু রক্তমেব। যত্ত উক্তং তন্ত্রান্তরে। রক্তং বাত কফাদ্দুষ্টং বস্তিদ্বারে সুদারুণং। গ্রন্থিং কুর্য্যাৎ সকৃচ্ছ্রেণ সৃজে মূত্রং তদাবৃত মিতি॥ ৮॥ *॥ মূত্রশুক্রমাহ। মূত্রিতস্য স্ত্রিয়ং যাতো বায়ুনা শুক্রমুদ্ধৃতং। স্থানচ্যুতং মূত্রযতঃ প্রাক্ পশ্চাদ্বা প্রবর্ত্ততে॥ ভস্মোদক প্রকাশং মূত্রশুক্রং তদুচ্যতে। মূত্রিতস্য মূত্রবেগযুক্তস্য শুক্রং স্থানাৎ চ্যুতং পশ্চাদ্বায়ুনা উদ্ধৃতং উদ্ধং নীতং। ভস্মোদক প্রকাশং ভস্ম সহিত জল সদৃশং॥ ৯॥ *॥ উষ্ণবাতমাহ। ব্যায়ামাধ্বাতপৈঃ পিত্তং বস্তিং প্রাপ্যানিলাবৃতং। বস্তিং মেঢ়্রং গুদঞ্চৈব প্রদহৎ স্রাবয়েদধঃ॥ মূত্রং হারিদ্রমথবা সরক্তং রক্তমেব বা। কৃচ্ছ্রং পুনঃ পুনর্জন্তো রুষ্ণবাতং বদন্তি তং॥ ব্যায়ামাদি বিরোধত্বেন সৌম্য ধাতুক্ষয়াৎ তেজো বৃদ্ধ্যা পিত্তবৃদ্ধিঃ স্যাত্তৎ কুপিতং পিত্তং অসংযুতং বস্তিং প্রাপ্য বস্ত্যাদিকং প্রদহৎ মূত্রমধঃ স্রাবয়েৎ। কীদৃশং হারিদ্রং অথবা সরক্তং ঈষল্লোহিতং॥ ১০॥ *॥ মূত্রসাদমাহ। পিত্তং কফো দ্বাবপি বা সংহন্যেতে হনিলেন চেৎ। কৃচ্ছ্রান্মূত্রং তদা পীতং রক্তং শ্বেতং ঘনং সৃজেৎ॥ সরক্তং রোচনা শঙ্খচূর্ণবর্ণং ভবেত্ততঃ। শুষ্কং সমস্তবর্ণং বা মূত্রসাদং বদন্তি হি॥ সংহন্যেতে ঘনীক্রিয়েতে। শুষ্কং অল্পং সমস্তবর্ণং উক্ত সকল বর্ণযুক্তং॥ ১১॥ *॥ বিড়্বিঘাতমাহ। রুক্ষ দুর্ব্বলয়োর্ঘাতেনোদাবৃত্তং শকৃদ্যদা। মূত্র স্রোতোনুপদ্যেত বিট্ সংসৃষ্টং তদা নরঃ॥ বিড়্গন্ধং মূত্রয়েৎ কৃচ্ছ্রাদ্বিড়্বিঘাতং তমাদিশেৎ। উদাবৃত্তং উদ্ধং নীত বিড়্গন্ধং বা বাশব্দোঽত্র যোজনীয়ঃ॥ ১২॥ *॥ বস্তিকুণ্ডলমাহ। দ্রুতাধ্ব লঙ্ঘনায়াসৈরভিঘাতাৎ প্রপীড়নাৎ। স্বস্থানাদ্বস্তিরুদ্বৃত্তঃ স্থূল স্তিষ্ঠতি গর্ভবৎ॥ শূলস্যন্দন দাহার্ত্তো বিন্দু বিন্দু স্রবত্যপি। পীড়িতস্তু সৃজেদ্ধারাং সংস্তম্ভোদ্বেষ্টনার্ত্তিমান্॥ বস্তিকুণ্ডল মাহু স্তং ঘোরং শস্ত্রবিষোপমং। পবন প্রবলং প্রায়ো দুর্নিরোধ মবুদ্ধিভিঃ॥ তস্মিন্ পিত্তান্বিতে দাহঃ শূলং মূত্র বিবর্ণতা॥ শ্লেষ্মণা গৌরবং শোথো মূত্রং স্নিগ্ধং ঘনং সিতং॥ দ্রুতাধ্বলঙ্ঘনং শীঘ্রং

মার্গচলনং। উদ্বৃত্তঃ উত্থিতঃ। স্যন্দনং কিঞ্চিচলনং। ঘোরং মারকং। শস্ত্র বিষোপমং শস্ত্রং খড়্গাদি তদ্বচ্ছীঘ্র মারকং। বিষমত্র গরঃ তদ্বৎ বিলম্বমারকং। এতয়োস্তু মারক মবশ্যং শীঘ্রং বিলম্বেন বা। ১৩॥ *॥ তস্যৈব বাসাধ্যস্য চ লক্ষণ মাহ। শ্লেষ্ম রুদ্ধ বিলো বস্তিঃ পিত্তোদীর্ণো ন সিধ্যতি। অবিভ্রান্তবিলঃ সাধ্যো ন চ যঃ কুণ্ডলীকৃতঃ॥ স্যাদ্বস্তৌ কুণ্ডলীভূতে তৃণ্মোহঃ শ্বাস এব চ। বিলং বস্তি মুখরন্ধ্রং পিত্তোদীর্ণঃ পিত্তেনোদ্ধতঃ। অবিভ্রান্তবিলঃ কফেনাবৃতবিলঃ পশ্চাৎ কুণ্ডলীকৃতঃ স সাধ্যঃ। এতেন কুণ্ডলীভূতো অসাধ্যঃ। কুণ্ডলীভূতস্য লক্ষণ মাহ। তৃডিত্যাদি কুণ্ডলীভূতস্যায়মর্থঃ। কফেন বিলাবরোধাত্তত্র বাতঃ কুণ্ডলাকারেণ তিষ্ঠতীত্যর্থঃ॥ *॥ অথ মূত্রাঘাতস্য চিকিৎসা। নল কুশ কাশেক্ষু বলা ক্বাথং প্রাতঃ সুশীতলং সসিতং। পিবতো নশ্যতি নিয়তং মূত্রগ্রহ ইত্যুবাচ কবিঃ॥ কবিঃ শুক্রঃ। কর্পূর রজসা যুক্তা বস্ত্রবর্ত্তিঃ শনৈঃ শনৈঃ। মেঢ্র নার্গান্তরে ন্যস্তা মূত্রাঘাতং ব্যপোহতি॥ ধান্য গোক্ষুরকঃ ক্বাথঃ কল্কসিদ্ধং হিতং ঘৃতং। মূত্রাঘাতে মূত্রকৃচ্ছ্রে শুক্রদোষে চ দারুণে॥ ধান্যগোক্ষুরকং ঘৃতং॥ মূত্রকৃচ্ছে হশ্মরী রোগে ভেষজং যৎ প্রকীর্ত্তিতং। মূত্রাঘাতেষু সর্ব্বেষু তৎ কুর্য্যাদ্দেশকালবিৎ॥ ইতি মূত্রাঘাতাধিকারঃ। ইতি ভাবপ্রকাশঃ॥ *॥ গরুড়পুরাণোক্ত নিদানং তস্য ১৬৩ অধ্যায়ে দ্রষ্টব্যং॥

মূত্রাশয়ঃ পুং নাভেরধোদেশঃ। তৎপর্য্যায়ঃ। মূত্রপুটং ২ বস্তিঃ ৩। ইতি হেমচন্দ্রঃ॥

মূত্রিতঃ ত্রি কৃতমূত্রোৎসর্গঃ। তৎপর্য্যায়ঃ। মীঢ়ঃ ২। ইত্যমরঃ॥

মূর্খঃ পুং মাষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ গায়ত্রীরহিতঃ। যথা। ক্রিয়াহীনস্য মূর্খস্য মহারোগিণ এব চ। যথেষ্টাচরণস্যাহু মরণান্ত মশৌচকং॥ ক্রিয়াহীনস্য নিত্য নৈমিত্তিক ক্রিয়ানন্নুষ্ঠায়িনঃ। মূর্খস্য গায়ত্রীরহিতস্য। সার্থগায়ত্রীরহিতস্যেতি রঘুনন্দনঃ। মহারোগিণঃ পাপরোগাষ্টকান্যতম রোগবতঃ তেচ উন্মাদ ত্বগ্দোষো রাজযক্ষ্মা শ্বাসো মধুমেহো ভগন্দরঃ। উদরো হশ্মরীত্যষ্টৌ পাপরোগা নারদোক্তাঃ। যথেষ্টাচরণস্য দ্যূত

বৈশ্যাদ্যাশক্তস্য। ইতি শুদ্ধিতত্ত্বং॥

মূর্খঃ ত্রি মূঢ়মতিযঃ। তৎপর্য্যায়ঃ। অজ্ঞঃ ২ মূঢ়ঃ ৩ যথাজাতঃ ৪ বৈধেয়ঃ ৫ বালিশঃ ৬। ইত্যমরঃ॥ ॥ তস্য বশীকরণোপায়ো যথা। মিত্রং স্বচ্ছতয়া রিপুং নযবলৈ লুব্ধং ধনৈ রীশ্বরং কার্য্যেণ দ্বিজমাদরেণ যুবতীং প্রেম্না শুণৈ র্বান্ধবান্। অত্যুগ্রং স্তুতিভি গুরুং প্রণতিভি র্মূর্খং কথাভি র্বুধং বিদ্যাভী রসিকং রসেন সকলং শীলেন কুর্য্যাদ্বশং॥ ইতি নবরত্নানি॥ ॥ পয়ঃপানং ভুজঙ্গানাং কেবলং বিষবর্দ্ধনং। উপদেশো হি মূর্খাণাং প্রকোপায় ন শান্তয়ে॥ ইতি হিতোপদেশঃ॥

মূর্খতা স্ত্রী মূর্খত্বং। যথা। অদাতা বংশদোষেণ কর্ম্মদোষাদ্দরিদ্রতা। উন্মাদো মাতৃদোষেণ পিতৃদোষেণ মূর্খতা॥ ইতি চাণক্যং॥ অষ্টম্যাং নারিকেল ভক্ষণে মূর্খত্বং যথা। কলঙ্কী জায়তে বিল্বে তির্য্যগ্যোনিশ্চ নিম্বকে। তালে শরীর নাশঃ স্যান্নারিকেলে চ মূর্খতা। ইতি তিথ্যাদিতত্ত্বং॥

মূর্খভ্রাতৃকঃ পুং মূর্খো ভ্রাতা যস্য সঃ। ইতি সিদ্ধান্তকৌমুদী॥

মূর্চ্ছনা স্ত্রী গীতাঙ্গবিশেষঃ। সা তু গ্রামস্য সপ্তমভাগঃ। তস্যা লক্ষণং একবিংশতি নামানি চ যথা। স্বরঃ সংমূর্চ্ছিতো যত্র রাগতাং প্রতিপদ্যতে। মূর্চ্ছনা মিতি তামাহুঃ কবয়ো গ্রামসম্ভবাং॥ ললিতা মধ্যমা চিত্রা রোহিণী চ মতঙ্গজা। সৌবীরী যণ্ডমধ্যা চ ষড়জ মধ্যমপঞ্চমাঃ॥ মৎসরী মৃদুমধ্যা চ শুদ্ধান্তা চ কলাবতী। তীব্রা রৌদ্রী তথা ব্রাহ্মী বৈষ্ণবী স্বেদরী সুরা॥ নাদাবতী বিশালা চ ত্রিষু যামেষু বিশ্রুতাঃ। একবিংশতি রিত্যুক্তা মূর্চ্ছনা চন্দ্রমৌলিনা॥ মূর্চ্ছনাং কলযতো মুরশত্রো র্বংশিকাধ্বনিবিশেষ বিতানৈঃ। মূর্চ্ছনাং যযু রনঙ্গশরোঘৈ রঙ্গনা রতিপতে রিব সেনাঃ॥ ইতি সঙ্গীতদামোদরঃ॥ ॥ হনুমন্মতে ষড়জাদি স্বরস্থ ঋষভাদি স্বরোত্থানে যত্র স্বরো বিরমতি সা মূর্চ্ছনা। ভরত মতে বাদ্যস্য গানস্য বা সময়ে যত্র হস্তস্য গলস্য বা কম্পনং সা মূর্চ্ছনা। সা একবিংশতি প্রকারা। তত্র ষড়জগামস্য মূর্চ্ছনা ললিতা ১ মধ্যমা ২ চিত্রা ৩ রোহিণী ৪ মতঙ্গজা ৫ সৌবীরী ৬ ষণ্ডমধ্যা চ ৭। মধ্যমগ্রামস্য মূর্চ্ছনা পঞ্চমা ১ মৎসরী

২ মৃদুমধ্যা ৩ শুদ্ধা ৪ অন্তা ৫ কলা-বতী ৬ তীব্রা চ ৭। গান্ধার গ্রামস্য মূর্চ্ছনা রৌদ্রী ১ ব্রাহ্মী ২ বৈষ্ণবী ৩ খেদরী ৪ সুরা ৫ নাদাবতী ৬ বিশালা চ ৭। ইতি সঙ্গীতশাস্ত্রং ॥

মূর্চ্ছা স্ত্রী সংমোহঃ। তৎপর্য্যায়ঃ। কশ্মলং ২ মোহঃ ৩। ইত্যমরঃ॥ মূর্চ্ছনং ৪। ইতি শব্দরত্নাবলী॥ মূর্চ্ছায়ঃ ৫। অথ মূর্চ্ছাধিকারঃ। তত্র মূর্চ্ছায়া নিদান পূর্ব্বিকাং সংপ্রাপ্তি মাহ। ক্ষীণস্য বহুদোষস্য বিরুদ্ধাহার সেবিনঃ। বেগাঘাতাদভিঘাতাদ্ধীন সত্ত্বস্য বা পুনঃ॥ করণায়তনেষূগ্রা বাহ্যেস্বভ্যন্তরেষু চ। নিবিশন্তে যদা দোষা স্তদা মূর্চ্ছন্তি মানবাঃ॥ বহুদোষস্য অধিকদোষস্য। নত্বনেকদোষস্য তদা মূর্চ্ছা ত্রিদোষজৈব স্যাৎ তথৈবাস্তু কো দোষঃ তন্ন। পৃথগ্দোষজানাং মূর্চ্ছানাং বক্ষ্যমাণত্বাৎ। বেগাঘাতাৎ মলাদৌ অভিঘাতাৎ লগুড়াদিনা হীন সত্ত্বস্য স্বল্প সত্ত্বগুণস্য অর্থাদধিক তমো গুণস্য যত উক্তং মূর্চ্ছা পিত্ত তমঃ প্রায়েতি। করণায়তনেষু করণং শব্দ জ্ঞানং তস্যায়তনেষু স্থানেষু বাহ্যেষু কর্ম্মেন্দ্রিয়েষু অভ্যন্তরেষু বুদ্ধীন্দ্রিয়েষু ॥ * ॥ সামান্যং লক্ষণ মাহ। সংজ্ঞাবহাসু নাড়ীষু পিহিতাস্বনিলাদিভিঃ। তমোভ্যুপৈতি সহসা সুখ দুঃখ ব্যপোহকৃৎ॥ সুখ দুঃখব্যপোহাচ্চ নরঃ পততি কাষ্ঠবৎ। মোহো মূর্চ্ছেতি তাং প্রাহুঃ ষড়্বিধা সা প্রকীর্ত্তিতা॥ তমোগুণঃ অজ্ঞান হেতুঃ। অভ্যুপৈতি আগচ্ছতি। সুখ দুঃখ ব্যপোহকৃৎ সুখ দুঃখ জ্ঞান নাশকরং। নষ্টে সুখ দুঃখ জ্ঞানে নরঃ কাষ্ঠবৎ পততি তাং মোহো মূর্চ্ছেতি প্রাহুরিত্যন্বয়ঃ। মূর্চ্ছা যা মূর্চ্ছায়ো হপি পর্য্যায়ঃ। যত উক্তং। সংজ্ঞোপঘাতো মূর্চ্ছায়ো মূর্চ্ছা স্যান্মূর্চ্ছনং তথা। কশ্মলং প্রলয়ো মোহঃ সংন্যাসস্তু মৃত্তোপম ইতি। যদ্যপি মূর্চ্ছা বিবৃণোতি বাতাদিভিঃ শোণিতেন মদ্যেন চ বিষেণ চ। ষটস্বপ্যেতাসু পিত্তস্তু প্রভুত্বনাবতিষ্ঠতে॥ যত উক্তং। মূর্চ্ছা পিত্ত তমঃ প্রায়েতি ॥ * ॥ পূর্ব্বরূপমাহ। হৃৎপীড়া জৃম্ভণং গ্লানিঃ সংজ্ঞাদৌর্ব্বল্য মেব চ। সর্ব্বাসাং পূর্ব্বরূপাণি যথা স্বং তা বিভাবয়েৎ॥ * ॥ তত্র বাতিকং মূর্চ্ছায় মাহ। নীলং বা যদি বা কৃষ্ণ মাকাশ মথবারুণং। পশ্যংস্তমঃ প্রবিশতি শীঘ্রঞ্চ প্রতিবুধ্যতে॥ বেপথুশ্চাঙ্গমর্দশ্চ প্রপীড়া হৃদয়-

স্য চ। কার্শ্যং শ্যাবারুণা চ্ছায়া॥
মূর্চ্ছা যে বাতসম্ভবে॥ নীলং নীলব-
র্ণং। কৃষ্ণং কজ্জলাভং। অরুণং অ-
ব্যক্তরাগং। তমঃপ্রবিশতি মূর্চ্ছতি
। শ্যাবারুণাচ্ছায়া গাত্রস্য॥ *॥
পৈত্তিক মাহ। রক্তং হরিতবর্ণং
বা বিয়ৎ পীত মথাপিবা। পশ্যং
স্তমঃ প্রবিশতি সস্বেদঃ প্রতিবুধ্যতে
॥ স পিপাসঃ স সন্তাপো রক্ত পী-
তাকুলেক্ষণঃ। সম্ভিন্নবর্চ্চাঃ পীতা-
ভো মূর্চ্ছায়ে পিত্ত সম্ভবে॥ *॥
শ্লৈষ্মিক মাহ। মেঘ সঙ্কাশ মাকা-
শং তমোভি র্বা ঘনৈ র্বৃতং। পশ্যং
স্তমঃ প্রবিশতি। চিরাচ্চ প্রতিবুধ্যতে
॥ গুরুভিঃ প্রাবৃতৈ রঙ্গৈ র্যথৈ বা-
র্দ্রেণ চর্ম্মণা। সপ্রসেকঃ সহৃল্লাসো
মূর্চ্ছা যে কফ সম্ভবে॥ মেঘ সঙ্কাশং
শুভ্রমেঘ শঙ্কাশ মিত্যর্থঃ। যত আহ
সুশ্রুতঃ। কফেন পশ্যেদ্রূপাণি শ্বে-
তাভ্র প্রতিমানি তু। ঘনৈ র্নিবিড়ৈ
স্তমোভিঃ। গুরুভি রঙ্গৈ রুপলক্ষি-
তঃ। সুশ্রুতেন মূর্চ্ছা যঃ ষড়্বিধ উক্তঃ
॥ *॥ চরকস্তু সান্নিপাতিক মপি
মূর্চ্ছায় মাহ। সর্ব্বাকৃতিঃ সন্নিপা-
তাদপস্মার ইবাগতঃ। স জন্তং
পাতয়ত্যাশু বিনা বীভৎস চেষ্টি
তৈঃ॥ অপস্মার ইব তেন মহতা-

ভিঘাতেন পততি চিরেণ প্রতিবু-
ধ্যতে। তর্হি তয়োঃ কো ভেদ ইত্যত
আহ। স সান্নিপাতিকো মূর্চ্ছা যঃ
বিনা বীভৎস চেষ্টিতৈঃ ফেন বম-
ন দন্তঘট্টনাক্ষিবিকৃত্যাদিভি র্নিপা-
পাতয়তি॥ *॥ রক্তজায়া মূর্চ্ছায়া
নিদান মাহ। পৃথিব্যম্বু স্তমো রূপং
রক্ত গন্ধ স্তদন্বয়ঃ। তস্মাদ্রক্তস্য গ-
ন্ধেন মূর্চ্ছন্তি ভুবি মানবাঃ॥ তমো
রূপং তমো বহুলং। মানবাশ্চ যে
তামসাঃ। নতু সাত্ত্বিকা রাজসাশ্চ।
অত্রৈকে বদন্তি নৈষা যুক্তিঃ সমীচীনা
তর্হি চম্পকাদি গন্ধেনাপি মূর্চ্ছা প্র-
সজ্যেত তত্রাপি গন্ধস্য পার্থিব-
ত্বাৎ। অত আহ। দ্রব্য স্বভাব ই-
ত্যেকে যদ্দৃষ্ট্বাপি বিমুহ্যতি। তত্রাহ
ভোজঃ। দর্শনাদসৃজ স্তজ্জাদ্গন্ধাচ্চৈ-
ব প্রমুহ্যতি॥ *॥ রক্তেন মূর্চ্ছিতস্য
লক্ষণ মাহ। স্তব্ধাঙ্গ দৃষ্টি স্ত্বসৃজা
গূঢোচ্ছাসস্তু মূর্চ্ছিতঃ। *॥ মদ্যজ
বিষজয়ো র্নিদান মাহ। গুণা স্তীব্রত-
রত্বেন স্থিতাস্তু বিষমদ্যয়োঃ। তএব
তস্মাত্তাভ্যাস্তু মোহৌ স্যাতাং য-
থেরিতৌ॥ যে গুণা লঘু রুক্ষাসু বি-
শদ ব্যবায়ি তীক্ষ্ণা বিকাশি সূক্ষ্মোষ্ণা
নির্দেশ্য রসত্বাদয়ঃ। তৈলাদৌ দ্রব্যে
ব্যস্তাঃ তীব্রাশ্চ সন্তি তএব গুণাঃ বি-

স্ব মদ্যযোস্ত তীব্রুতরত্বেন স্থিতাঃ। তত্রাপি ভেদঃ। তএব মদ্যে দৃশ্যন্তে বিষে তু বলবত্তরা ইতি ॥ ❀ ॥ মদ্যজায়া মূর্চ্ছায়া লক্ষণ মাহ। মদ্যেন প্রলপন্ শেতে নষ্ট বিভ্রান্ত মানসঃ। গাত্রাণি বিক্ষিপন্ ভূমৌ জরাং যাবন্নযাতি তৎ॥ নষ্ট বিভ্রান্ত মানসঃ নষ্টং সর্ব্বথা স্মৃতিহীনং বিভ্রান্তং রজ্জৌ সর্পজ্ঞান যুক্তং মানসং যস্য সঃ। জরাং জীর্ণতাং। তৎ মদ্যং॥ ❀ ॥ বিষজায়া লক্ষণ মাহ। বেপথু স্বপ্ন তৃষ্ণাঃ স্যুস্তমশ্চ বিষমূর্চ্ছিতে। বেদিতব্যং তীব্রুতরং যথা স্বং বিষ লক্ষণং॥ বিষস্য মূল কন্দ ফল পত্র ক্ষীরাদি ভেদ ভিন্নস্য যথা স্বকং স্বকং লক্ষণ মুক্তং সৌশ্রুতে কল্পস্থানে তল্লক্ষণং মদ্যাপেক্ষযা তীব্রুতরং বেদিতব্যং। ননু সংজ্ঞানাশেন সাধর্ম্ম্যা মূর্চ্ছা ভ্রম তন্দ্রাদীনাং কো ভেদ ইত্যত আহ। মূর্চ্ছা পিত্ত তমপ্রাযা রজঃ পিত্তানিলাদ্ভ্রমঃ। তমো বাত কফাত্তন্দ্রা নিদ্রা শ্লেষ্ম তমো ভবা॥ রজঃ পিত্তানিলাদ্ভ্রম ইতি মাত্র সমুচ্চযঃ। কেবল পিত্তজ্বরে ভ্রমস্যোক্তত্বাৎ। ভ্রম শ্চক্রাব্রুঢস্যেব ভ্রমদ্বস্তু জ্ঞানং স্বদেহস্য ভ্রমত ইব জ্ঞানং বা॥ ❀ ॥ তন্দ্রাযা লক্ষণ মাহ। ইন্দ্রিযার্থেষ্বসংবিত্তি গৌরবং জৃম্ভণং ক্লমঃ। নিদ্রার্ত্তস্যেব যস্যেহা তস্য তন্দ্রাং বিনির্দ্দিশেৎ॥ ইন্দ্রিযাণামর্থঃ প্রযোজনং যেষু তেষু অর্থাদ্বিষযেষু অসংবিত্তিঃ অসম্যক্ জ্ঞানং। ইতি ইন্দ্রিযার্থাসম্যক্ জ্ঞানাদি। নিদ্রাযাং প্রবুদ্ধস্য ক্লমাভাব স্তন্দ্রাযাস্ত প্রবোধিতস্যাপি ক্লম ইত্যনযো র্ভেদঃ॥ ❀ ॥ ক্লমস্য লক্ষণ মাহ। যো হনাযাসঃ শ্রমো দেহে প্রবৃদ্ধঃ শ্বাস বর্জ্জিতঃ। ক্লমঃ স ইতি বিজ্ঞেয ইন্দ্রিযার্থ প্রবাধকঃ॥ ইন্দ্রিযার্থ প্রবাধকঃ ইন্দ্রিযাণাং বুদ্ধীন্দ্রিযাণাং কর্ম্মেন্দ্রিযাণাঞ্চ অর্থঃ প্রযোজনং বিষয গ্রহণং তস্য প্রবাধকঃ আবল্যেন॥ ❀ ॥ নিদ্রা লক্ষণ মাহ। যদা তু মনসি ক্লান্তে কর্ম্মাত্মানঃ ক্লমান্বিতাঃ। বিষযেভ্যো নিবর্ত্তন্তে তদা স্বপিতি মানবঃ॥ ক্লান্তে গ্লানে শ্রান্ত ইতি যাবৎ। কর্ম্মাত্মানঃ কর্ম্মেন্দ্রিযাণি জ্ঞানেন্দ্রিযাণি চ ক্লমান্বিতাঃ শ্রান্তাঃ॥ ❀ ॥ সংন্যাসস্য সংপ্রাপ্তি পূর্ব্বকং লক্ষণ মাহ। বাগ্দেহ মনসাং চেষ্টা মাক্ষিপ্যাতিবলা মলাঃ। সংন্যস্যন্ত্যবলং জন্তুং প্রাণাযতন মাশ্রিতাঃ॥ স না সংন্যাস সংন্যস্তঃ কাষ্ঠীভূতো মৃতোপমঃ।

পাণে বিগুহ্যতে শীঘ্রং মূক্ত্বা সদ্যঃ॥ ফলাংক্রিয়াং॥ আক্ষিপ্য বিনাশ্য সংন্যস্যন্তি নুরান্তি। প্রাণাবতনং হৃদয়ং। সংন্যস্তঃ মূর্চ্ছিতঃ। কাষ্ঠীভূতঃ ক্রিয়ারহিতঃ। অতএব মৃতোপম ইতি। সদ্যঃ ফলাং ক্রিয়াং শূচীব্যধন অনাবপীড়ন কপিকচ্ছবর্ষণ বৃশ্চিকাদিদংশনাদিরূপাং॥ *॥ সংন্যাসস্য মূর্চ্ছাতো ভেদমাহ। দোষেষু মদ মূর্চ্ছায়া গতবেগেষু দেহিনঃ। স্বয়মপ্যপশাম্যন্তি সংন্যাসো নৌষধৈ র্বিনা॥ মদ মূর্চ্ছায়াঃ মদঃ অপূর্ব্ব উন্মাদঃ। মূর্চ্ছায়াঃ মূর্চ্ছাঃ। * *॥ অথ মূর্চ্ছায়া শ্চিকিৎসা। সেকাবগাহামণয়ঃ সহারাঃ শীতাঃ প্রদেহা ব্যজনানিলাশ্চ। শীতানি পানানি চ গন্ধবন্তি সর্ব্বাসু মূর্চ্ছা স্বনিবারিতানি॥ মণয় শ্চন্দ্রকান্তাদয়ঃ। হারাঃ মুক্তাদি হারাঃ। শীতাঃ দেহাঃ সকর্পূর চন্দনাদ্যনুলেপনানি। শীতানি পানানি সিতামলকাদিপানকানি। গন্ধবন্তি কর্পূরাদি সুগন্ধবন্তি। সর্ব্বাসু মূর্চ্ছা স্বনিবারিতানি। অস্যায মভিপ্রায়ঃ। সেকাদীন্যাসু মূর্চ্ছাসু হিতান্যেব কিন্তু বাতশ্লেষ্মজাস্বপি মূর্চ্ছাসু ন নিবারিতানি। তত্রাপি পিত্তস্য প্রাধান্যাৎ। সিদ্ধানি বর্গে মধুর পয়াংসি সদাড়িমা জাঙ্গলজা রসাশ্চ। তথা যবা লোহিতশালয়শ্চ মূর্চ্ছাসু পথ্যাঃ সসতীন মুদ্গাঃ॥ সতীনঃ কলায়ঃ॥ কোলমজ্জোষণোশীরং কেশরং শীতবারিণা। পীতং মূর্চ্ছাং জয়েল্লীঢ়া কৃষ্ণা বা মধুসংযুতা॥ শীতেন তোয়েন ভৃশং মৃণালং কৃষ্ণাঞ্চ পথ্যাং মধুনাবলিহ্যাৎ। ঘর্ষ্যাচ্চ নাসা বদনাবরোধং ক্ষীরং পিবেদ্বাপ্যথ মানুষীণাং॥ দ্রাক্ষা সিতা দাড়িম লাজবন্তি কহ্লার নীলোৎপল পদ্মবন্তি। পিবেৎ কষায়াণি চ শীতলানি পিত্তজ্বরং যানি চ যাপযন্তি॥ শিরীষবীজ গোমূত্র কৃষ্ণা মরিচ সৈন্ধবৈঃ। অঞ্জনং স্যাৎ প্রবোধায় সরসোন শিলা বচৈঃ॥ অন্যচ। অঞ্জনং সম্যগারব্ধং মধু সিন্ধু শিলোষণৈঃ। প্রমোহদ্রোহি ভবতি ভাবিতং ভিষজাং বরৈঃ॥ শিলা মনঃশিলা উষণং মরীচং॥ মধূকসার সিন্ধূত্থ বচোষণ কণাঃ সমাঃ। শ্লক্ষ্ণং পিষ্ট্বাম্ভসা নস্যং দদ্যাৎ সংজ্ঞা প্রবোধনং॥ *॥ অথ রক্তজাদীনাং মূর্চ্ছানাং চিকিৎসা॥ রক্তজায়ান্তু মূর্চ্ছায়াং হিতঃ শীতক্রিয়া বিধিঃ। মদ্যজায়াং পিবেন্মদ্যং নিদ্রাং

সেবেত বা সুখং ॥ বিষজানাং বিষম্নানি ভেষজানি প্রযোজয়েৎ ॥ * ॥ অথ সন্ন্যাসস্য চিকিৎসা । প্রভূত দোষ স্তমসো হতিরেকাৎ সংমূর্চ্ছিতো নৈব বিবুধ্যতে যঃ । সন্ন্যস্ত সংজ্ঞঃ সহি দুশ্চিকিৎসো নরো ভিষগ্ভিঃ পরিকীর্ত্তিতো হসৌ ॥ অঞ্জনান্যবপীডশ্চ ধূমাঃপ্রধমনানি চ । সূচীভি স্তোদনং শস্তং দাহঃ পীডা নখান্তরে ॥ লুঞ্চনং কেশ লোম্নাঞ্চ দন্তৈ র্দংশন মেব চ । আত্মগুপ্তাবঘর্ষশ্চ হিত স্তস্য প্রবোধনে ॥ অবপীডঃ কল্কীকৃতৌষধরসস্য নাসাপুটে দানং । তস্য সংন্যস্তস্য ॥ * ॥ অথ মূর্চ্ছায়াং রসাঃ । কণা মধুযুতং সূতং মূর্চ্ছায়াং প্রাশয়েৎ ভিষক্ । শীতসেকাবগাহাদি সর্ব্বাঙ্গে পীডনং হঠাৎ ॥ সূতং মারিতং ॥ তাম্রচূর্ণং সমোশীরং কেশরং শীতবারিণা । পীতং মূর্চ্ছাং ক্ষতং হন্যাৎ বৃক্ষ মিন্দ্রাশনি র্যথা ॥ তাম্রচূর্ণং মারিত তাম্রচূর্ণং ॥ * ॥ অথ ভ্রমস্য চিকিৎসা । পিবেদ্দুরালভাক্বাথং সঘৃতং ভ্রমশান্তয়ে । পথ্যাক্বাথেন সংসিদ্ধং ঘৃতং ধাত্রীরসেন বা ॥ শুণ্ঠী কৃষ্ণা শতাহ্বানাং সাভয়ানাং পলং পলং । গুডস্য ষট্পলা দেয়া গুটিকা ভ্রমনাশিনী ॥ তাম্রং দুরালভাক্বাথৈঃ পীতস্তু ঘৃত সংযুতং । নিবারয়েদ্ভ্রমং শীঘ্রং ক্ষুং সুধা শস্ত্র ভাবিতং । * ॥ অথ তন্দ্রায়া অতিনিদ্রায়া শ্চিকিৎসা । তুরঙ্গ লালা লবণোত্তমেন্দু মনঃশিলা মাগধিকা মধূনি । নিযোজিতান্যক্ষি বিনিশ্চয়েন তন্দ্রাং সনিদ্রাং বিনিবারয়ন্তি ॥ ইন্দুঃ কর্পূরং ॥ সৈন্ধবং শ্বেতমরিচং সর্ষপঃ কুষ্ঠমেব চ । বস্তমূত্রেণ সংপিষ্টং নস্যং তন্দ্রা নিবারণং ॥ শ্বেতমরিচং শিগ্রুবীজং । শুণ্ঠী কণাগস্তি রসোষণানি নস্যেন তন্দ্রা বিজয়োল্বণানি । ক্ষুদ্রামৃতা পৌষ্কর নাগরাণি ভার্গী শিবাভ্যাং ক্বথিতানি পানাৎ ॥ শিবা হরীতকী । ইতি মূর্চ্ছা ভ্রম তন্দ্রাতিনিদ্রা সংন্যাসাধিকারঃ । ইতি ভাবপ্রকাশঃ ॥

মূর্চ্ছালঃ ত্রি মূর্চ্ছিতঃ । ইত্যমরঃ ॥

মূর্চ্ছিতঃ ত্রি মূর্চ্ছাযুক্তঃ । তৎপর্য্যায়ঃ । মূর্ত্তঃ ২ মূর্চ্ছালঃ ৩ । ইত্যমরঃ ॥ উচ্ছ্রয়ঃ ॥ মূঢ়ঃ । ইতিমেদিনী ॥ বৃদ্ধঃ ইত্যজয়ঃ ॥

মূর্ণঃ ত্রি বদ্ধঃ । ইতি মূতশব্দটীকায়াং রায়মুকুটঃ ॥

মূর্ত্তঃ ত্রি মূর্চ্ছিতঃ । ইত্যমরঃ ॥ কঠিনঃ ॥ মূর্ত্তিমান্ । ইতি মেদিনী ॥ ন্যায়-

মূর্ত্তে পৃথিবী জলং তেজঃ বায়ুঃ মনশ্চ। এষাং গুণাঃ। রূপং রসঃ গন্ধঃ স্পর্শঃ পরত্বং অপরত্বং গুরুত্বং স্নেহঃ বেগশ্চ। মূর্ত্তামূর্ত্ত সাধারণ গুণাঃ। সংখ্যা পরিমিতিঃ পৃথক্ত্বং সংযোগঃ বিভাগশ্চ। ইতি ভাষাপরিচ্ছেদঃ॥

মূর্ত্তিঃ স্ত্রী কাঠিন্যং॥ শরীরং। ইত্যমরঃ॥ প্রতিমা। ইতি হেমচন্দ্রঃ॥

মূর্ত্তিমৎ ক্লী শরীরং। ইতি হেমচন্দ্রঃ॥

মূর্ত্তিমান্ ত্রি মূর্ত্তিবিশিষ্টঃ। যথা। মল্লানামশনির্নৃণাং নরবরঃ স্ত্রীণাং স্মরো মূর্ত্তিমান্। ইত্যাদি শ্রীভাগবতং॥

মূর্দ্ধকঃ পুং ক্ষত্রিয়ঃ। ইতি শব্দরত্নাবলী॥

মূর্দ্ধকর্ণী স্ত্রী ছত্রং। ইতি হারাবলী॥

মূর্দ্ধখোলং ক্লী ছত্রং। ইতি ত্রিকাণ্ডশেষঃ॥

মূর্দ্ধজঃ পুং কেশঃ। ইতি জটাধরঃ॥ মূর্দ্ধ্নি জাতে ত্রি॥

মূর্দ্ধন্যঃ ত্রি মূর্দ্ধনিভবঃ। যথা। ঋত্রয়ং ট ঠ ড ঢ ণ র ষা মূর্দ্ধন্যাঃ। ইতি মুগ্ধবোধব্যাকরণং॥

মূর্দ্ধপুষ্পঃ পুং শিরীষবৃক্ষঃ। ইতি শব্দমালা॥

মূর্দ্ধরসঃ পুং ভক্তফেনঃ। ইতি শব্দচন্দ্রিকা॥

মূর্দ্ধবেষ্টনং ক্লী উষ্ণীষঃ। ইতি হেমচন্দ্রঃ॥

মূর্দ্ধা পুং মস্তকঃ। ইত্যমরঃ॥

মূর্দ্ধাভিষিক্তঃ পুং ক্ষত্রিয়ঃ॥ রাজা। ইত্যমরঃ॥ মূর্দ্ধন্যভিষিক্তো মূর্দ্ধাভিষিক্তঃ রাজ্যারোপণ সময়ে প্রথমঃ ক্ষত্রিয়ো মূর্দ্ধাভিষিক্তঃ তৎ প্রভবত্বাৎ যোগ্যতয়া হনভিষিক্তো হপি মূর্দ্ধাভিষিক্তঃ॥ বর্ণসঙ্করবিশেষঃ। স তু বিপ্রাৎ ক্ষত্রিয়ায়াং জাতঃ॥ প্রধানঃ। ইতি ভরতঃ॥ মন্ত্রী। ইতি মেদিনী॥

মূর্দ্ধা পুং শিরঃ। যথা। মূর্দ্ধা মূর্দ্ধা শিরোদেশে পুংসি স্যাতামিমৌ সমৌ। ইত্যাদিকোষঃ॥ মূর্দ্ধন্ মহে মূর্দ্ধা মূর্দ্ধা চ। অস্য ধড় ধূড়ৌ। ইতি তট্টীকা॥

মূর্ব্বা স্ত্রী লতাবিশেষঃ। ধনুর্গুণোপযুক্তা মুরগা ইতি খ্যাতা। তৎ পর্য্যায়ঃ। দেবী ২ মধুরসা ৩ মোরটা ৪ তেজনী ৫ স্রবা ৬ মধুলিকা ৭ ধনুঃশ্রেণী ৮ গোকর্ণী ৯ পীলুপর্ণী ১০। ইত্যমরঃ॥ স্রুবা ১১। মূর্ব্বী ১২। মধুশ্রেণী ১৩ ধনুঃ ১৪

শ্রেণী ১৫। ইতি তত্তীকাযাং ভয়॥ ভঃ॥ সুরস্থিকা ১৬ দেবশ্রেণী ১৭ পৃথকত্বচা ১৮ নধুস্রবা ১৯ অতিরসা ২০ পীলুপর্ণিকা ২১ দিব্যলতা ২২ জ্বলিনী ২৩ গোপবল্লী ২৪। অস্যা গুণাঃ। অতিতিক্তত্বং। কষায়ত্বং। উষ্ণত্বং। হৃদ্রোগ কফ বাত বমি প্রমেহ কুষ্ঠ বিষমজ্বর নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। মূর্ব্বা সরা গুরুঃ স্বাদু স্তিক্তা পিত্তাস্র মেহনুৎ। ত্রিদোষ তৃষ্ণ হৃদ্রোগ কণ্ডূ কুষ্ঠ জ্বরাপহা॥ ইতি ভাবপ্রকাশঃ॥

মূল এ প্রতিষ্ঠায়াং। ইতি কবিকল্পদ্রুমঃ॥ পবর্গশেষাদি দীর্ঘী। প্রতিষ্ঠা স্থিতি রিতি গোবিন্দভট্টঃ। এ মূলতি মূলতে যশঃ। অযং পরস্মৈপদীত্যন্যে। ইতি দুর্গাদাসঃ॥

মূল ক রোপণে। ইতি কবিকল্পদ্রুমঃ॥ দীর্ঘী রোপণ মারোপণং। ক মূলয়তি বৃক্ষং লোকঃ। গোবিন্দভট্টস্তু রোহণে ইতি পঠিত্বা রোহণং জন্মেতি ব্যাখ্যাতি। ইতি দুর্গাদাসঃ॥

মূলং ক্লী শিফা। শিকড় ইতি ভাষা। তৎপর্য্যায়ঃ। বুধ্নঃ২ অঙ্ঘ্রি নামকঃ ৩ ইত্যমরঃ॥ কন্দঃ৪ বুধ্নঃ ৫। ইতি শব্দরত্নাবলী॥ জটা ৬। ইতি জটাধরঃ॥ আদ্যং॥ নক্ষত্রবিশেষঃ॥ নিকুঞ্জঃ॥ অন্তিকং। ইতি বিশ্বঃ॥ মূলবিত্তং। ইতি ভরতধৃত মেদিনী॥ নিজং। ইত্যজয়পালঃ॥ চরণং। ইত্যাদিকোষঃ॥ টীকাদ্গ্রন্থঃ। যথা। সমাস বলেত্যাদি মূলং। ইতি সংপ্রতিপক্ষে গদাধরভট্টাচার্য্যঃ॥ শূরণং। ইতি শব্দচন্দ্রিকা॥ পিপ্পলীমূলং॥ পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ॥ বিশেষমূলস্য অন্বেষণ নিষেধো যথা। নদীনা মগ্নিহোত্রাণাং ভারতস্য কুলস্য চ। মূলান্বেষো ন কর্ত্তব্যো মূলাদ্দোষো ন হীযতে॥ ইতি গারুড়ে ১১৬ অধ্যায়ঃ॥

মূলঃ ত্রি অশ্বিন্যাদিসপ্তবিংশতিনক্ষত্রান্তর্গতোনবিংশনক্ষত্রং। যথা। হস্তা স্বাতী শ্রবণা অক্লীবে মৃগশিরো নপুংসি স্যাৎ পুংসি পুনর্ব্বসু পুষ্যৌ মূলস্ত্রী স্ত্রিয়াং শেষাঃ। ইতি তিথ্যাদিতত্ত্বং॥ মূলমাদ্যে শিফাযাঞ্চ নিকটে ভে তু বাস্ত্রিয়া। ইতি শব্দরত্নাবলীচ॥ স তু নির্ঋতিদেবতাকঃ। ইতি জ্যোতিস্তত্ত্বং॥ সিংহপুচ্ছাকারঃ। ইতি মুহূর্ত্ত

চিন্তামণিঃ ॥ শম্বমূর্ত্তি নবতারাম । শ্চ । অস্মিন্ মস্তকোপর্য্যুদিতে মীনলগ্নস্যাষ্টৌ পলানি গতানি ভবন্তি । যথা । মৌলিভাজি নবতারকাঙ্কিতে মূলভে সুতনু শম্বমূর্ত্তিনি । লিপ্তিকাষ্টক মম্রালঙ্গন্তলে নির্জগাম পৃথুরোমলগ্নতঃ ॥ ইতি কালিদাসকৃত রাত্রিলগ্ননিরূপণং ॥*॥ অস্মিন্নক্ষত্রে জাতস্য ফলং । মূলং বিরুদ্ধাবযবং সমূলং জলং দহন্ত্যেব বদন্তি সন্তঃ । চেদন্যথাতঃ পুরুষা বিশেষাৎ সৌভাগ্য মায়ুশ্চ জলানুবৃদ্ধিঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥*॥ অস্মিন্ মাংসভক্ষণনিষেধো যথা । চিত্রা স্ব হস্তা শ্রবণাসু তৈলং ক্ষৌরং বিশাখা প্রতিপৎসু বর্জ্জ্যং । মূলে মৃগে ভাদ্রপদাসু মাংসং যোষিন্মঘা কৃত্তিকসোত্তরাসু ॥ ইতি তিথ্যাদিতত্ত্বং ॥

মূলকং ক্লী পুং কন্দবিশেষঃ । মূলা ইতি ভাষা । তৎপর্য্যায়ঃ । রাজালুকঃ ২ মহাকন্দঃ ৩ হস্তিদন্তকঃ ৪ । ইতি হারাবলী ॥ নীলকণ্ঠং ৫ মূলাহ্বং ৬ দীর্ঘমূলকং ৭ অত্র দীর্ঘপত্রমপিপাঠঃ ৭ মৃৎক্ষারং ৮ কন্দমূলং ৯ হস্তিদন্তং ১০ সিতং ১১ শঙ্খমূলং ১২ হরিৎপর্ণং ১৩ রুচিরং ১৪ দীর্ঘকন্দকং ১৫ হঞ্জক্ষারমূলং ১৬ ॥ অস্য গুণাঃ । তীক্ষ্ণত্বং । উষ্ণত্বং । কটুত্বেনাগ্নি দীপনত্বং । দুর্নাম গুল্ম হৃদ্রোগ বাত নাশিত্বং । রুচিদত্বং । গুরুত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥*॥ অপিচ । বালমূলকপত্রী তু রোচনী বহ্নি দীপনী ॥ মূলকং গুরু বিষ্টম্ভি তীক্ষ্ণমামং ত্রিদোষকৃৎ । তদেব স্নিগ্ধ সিদ্ধন্তু পিত্তলং কফ বাতনুৎ ॥ শুষ্কং ত্রিদোষ শমনং শোথঘ্নং গরজিল্লঘু । তৎপুষ্পং কফ পিত্তঘ্নং তৎফলং কফ বাতজিৎ ॥ ইতি রাজবল্লভঃ ॥*॥ অন্যচ । মূলকং দ্বিবিধং প্রোক্তং তত্রৈকং লঘুমূলকং । শালামর্কটকং বিস্রং শালেযং মরুসম্ভবং ॥ চাণক্যমূলকং তীক্ষ্ণং তথা মূলকপোতিকা । নৈপালমূলকঞ্চান্যত্তদ্ভবেদ্গজদন্তবৎ ॥ লঘুমূলক মুষ্ণং স্যাদ্রুচ্যং লঘু চ পাচনং । দোষত্রয়হরং স্বর্য্যং জ্বর শ্বাস বিনাশনং ॥ নাশিকা কণ্ঠ রোগঘ্নং নয়নাময় নাশনং । মহত্তু দেব রুক্ষোষ্ণং গুরু দোষত্রয়প্রদং ॥ স্নেহসিদ্ধং তদেব স্যাদ্দোষত্রয় বিনাশনং । ইতি ভাবপ্রকাশঃ ॥*॥ সৌরমাঘে তদ্ভক্ষণে দোষো যথা ।

মকরে মূলকঞ্চৈব সিংহে চালাবুক॥ তথা। কার্ত্তিকে শূরণঞ্চৈব সদ্যো গোমাংস ভক্ষণং॥ ইতি কর্ম্মলোচনং॥ * ॥ পৌর্ণমাস্যন্ত মাঘমুপক্রম্য। পিতৃণাং দেবতানাঞ্চ মূলকং নৈব দাপয়েৎ। দদন্নরক মাপ্নোতি ভুঞ্জীত ব্রাহ্মণো যদি॥ ব্রাহ্মণো মূলকং ভুক্ত্বা চরেচ্চান্দ্রায়ণং ব্রতং। অন্যথা যাতি নরকং ক্ষত্র বিট্ শূদ্র এব চ॥ তথা। বরং ভক্ষ্য মভক্ষ্যঞ্চ পিবেদ্বা গর্হিতঞ্চ যৎ। বর্জনীয়ং প্রযত্নেন মূলকং মদিরা সমং॥ ইতি মলমাসতত্ত্বং॥

মূলকঃ পুং চতুস্ত্রিংশৎস্থাবরবিষজাত্যন্তর্গতবিষভেদঃ। ইতি হেমচন্দ্রঃ॥

মূলকপণী স্ত্রী শোভাঞ্জনঃ। ইতি রত্নমালা॥

মূলকর্ম্ম ক্লী ঔষধ্যাদিমূলেনযৎ ত্রাসনোচ্চাটন স্তম্ভন বশীকরণাদিকর্ম্ম। তো ইতি খ্যাতং। ইতি ভরতঃ॥ টোনা ইতি মুকুটঃ॥ তৎপর্য্যায়ঃ। কার্ম্মণং ২। ইত্যমরঃ॥ উনপঞ্চাশদুপপাতকান্তর্গতোপপাতকবিশেষঃ। যথা। সর্ব্বাকরেষ্বধীকারো মহাযন্ত্র প্রবর্ত্তনং। হিংসৌষধীনাং স্ত্র্যাজীবো হভিচারো মূলকর্ম্ম চ॥ ইতি মনুঃ॥ মন্ত্রৌষধাদিনাবশীকরণং ইতি কুল্লুকভট্টঃ॥

মূলকমূলা স্ত্রী ক্ষীরকঞ্চুকীবৃক্ষঃ। ইতি রত্নমালা॥

মূলকারঃ পুং মূলগ্রন্থকর্ত্তা। যথা। নায়ং গণকারঃ কিন্তু মূলকারঃ। ইতি সংক্ষিপ্তসার টীকায়াং গোয়ীচন্দ্রঃ॥

মূলকারিকা স্ত্রী চুল্লী। ইতি হারাবলী॥ মূলগ্রন্থার্থপ্রকাশকপদ্যং॥ মূলধনস্যবৃদ্ধিবিশেষশ্চ॥

মূলকৃচ্ছ্রং ক্লী একাদশবিধপর্ণকৃচ্ছ্রান্তর্গতব্রতবিশেষঃ। যদা ক্বথিতানি বৃক্ষমূলানি পীয়ন্তে তদা মূলকৃচ্ছ্র ব্যপদেশং লভতে। যথাহ মার্কণ্ডেয়ঃ। ফলৈ র্মাসেন কথিতঃ ফলকৃচ্ছ্রো মনীষিভিঃ। শ্রীকৃচ্ছ্রঃ শ্রীফলৈঃ প্রোক্তঃ পদ্মাক্ষৈ রপর স্তথা॥ মাসেনামলকৈ রেবং শ্রীকৃচ্ছ্র মপরং স্মৃতং। পত্রৈ র্মতঃ পত্রকৃচ্ছ্রঃ পুষ্পৈ স্তৎকৃচ্ছ্র উচ্যতে॥ মূলকৃচ্ছ্রঃ স্মৃতো মূলৈ স্তোয়কৃচ্ছ্রো-জলেন ত। ইতি মিতাক্ষরায়াং প্রায়শ্চিত্তাধ্যায়ঃ॥

মূলজং ক্লী আর্দ্রকং। ইতি রাজনির্ঘণ্টঃ॥

মূলজঃ পুং উৎপলাদিঃ। ইতি হেম-

চন্দ্রঃ ॥ মূলোদ্ভবে ত্রি ।

মূলত্রিকোণং ক্লী অর্কাদিগ্রহাণাং রাশিরূপগৃহবিশেষঃ। স তু রবেঃ সিংহঃ। চন্দ্রস্য বৃষঃ। মঙ্গলস্য মেষঃ। বুধস্য কন্যা। গুরোর্ধনুঃ। ভৃগোস্তুলা। শনেঃ কুম্ভঃ। যথা। সিংহো বৃষশ্চ মেষশ্চ কন্যা ধন্বী ধটো ঘটঃ। অর্কাদীনাং ত্রিকোণানি মূলানি রাশয়ঃ ক্রমাৎ ॥ অথ মূলত্রিকোণাংশব্যবস্থা। রবি ভৌম জীব ভার্গব শনৈশ্চরাণাং ত্রিকোণ ভাগাঃ স্যুঃ। নখ রবি দিক্ তিথি নখরাঃ ক্রমেণ দিগংশকাঃ স্যুঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥

মূলদেবঃ পুং কংসরাজঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

…ং ক্লী মূলধনং। ইতি হেম

মূলধনং ক্লী আদিদ্রব্যং। পুঁজী ইতি ভাষা। তৎপর্য্যায়ঃ। পরিপণং ২ নীবী ৩। ইত্যমরঃ ॥

মূলপর্ণী স্ত্রী মণ্ডূকপর্ণী। ইতি রত্নমালা ॥

মূলপুষ্কর'ং ক্লী পুষ্করমূলং। ইতি রাজনির্ঘণ্টঃ ॥

মূলপোতী স্ত্রী পূতিকাশাকভেদঃ। তৎপর্য্যায়ঃ। ক্ষুদ্রবল্লী ২ পোতিকা ৩ ক্ষুদ্রপোতিকা ৪ ক্ষুপোপোদকল্লিকা ৫ বল্লিশাকটপোতিকা ৬। অস্যা গুণাঃ। ত্রিদোষঘ্নত্বং। রুষ্যত্বং। বল্যত্বং। লঘুত্বং। বল পুষ্টিকারিত্বং। রুচ্যত্বং। জঠরানলদীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মূলপ্রকৃতিঃ স্ত্রী আদ্যাশক্তিঃ। যথা। সর্ব্বপ্রসূতা প্রকৃতিঃ শ্রীকৃষ্ণঃ প্রকৃতেঃ পরঃ। ন শক্তঃ পরমেশোঽপি তাং শক্তিং প্রকৃতিং বিনা ॥ সৃষ্টিং বিধাতুং মায়েশো ন সৃষ্টির্মায়যা বিনা। সা চ কৃষ্ণে তিরোভূতা সৃষ্টিসংহারকারকে ॥ আবির্ভূতা সৃষ্টিকালে সা চ নিত্যা যথেশ্বরঃ। কুলালশ্চ ঘটং কর্ত্তুং যথাঽশক্তো মৃদং বিনা ॥ স্বর্ণং বিনা স্বর্ণকারঃ কুণ্ডলং কর্ত্তুমক্ষমঃ। সা শক্তিঃ সৃষ্টিকালে চ পঞ্চধা চেশ্বরেচ্ছয়া ॥ রাধা পদ্মা চ সাবিত্রী দুর্গা দেবী সরস্বতী। প্রাণাধিষ্ঠাতৃদেবী যা কৃষ্ণস্য পরমাত্মনঃ ॥ প্রাণাধিক প্রিয়তমা সা রাধা পরিকীর্ত্তিতা। ঐশ্বর্য্যাধিষ্ঠাতৃদেবী সর্ব্বমঙ্গলকারিণী ॥ পরমানন্দরূপা চ সা লক্ষ্মীঃ পরিকীর্ত্তিতা। বিদ্যাধিষ্ঠাতৃদেবী যা পরমেশস্য দুর্লভা ॥ বেদ শাস্ত্র যোগমাতা সা সাবিত্রী প্রকীর্ত্তিতা।

বুদ্ধ্যধিষ্ঠাতৃদেবী যা সর্ব্বশক্তি স্বরূপিণী ॥ সর্ব্বজ্ঞানাত্মিকা সর্ব্বাত্মা দুর্গা দুর্গনাশিনী । বাগাধিষ্ঠাতৃদেবী যা শাস্ত্রজ্ঞানপ্রদা সদা কৃষ্ণকণ্ঠোদ্ভবা যা চ সা চ দেবী সরস্বতী ॥ পঞ্চধাদৌ স্বয়ং দেবী মূলপ্রকৃতিরীশ্বরী । ততঃ সৃষ্টি ক্রমেণৈব বহুধা কলয়া চ সা ॥ যোষিতঃ প্রকৃতে রংশাঃ পুমাংসঃ পুরুষস্য চ । মায়য়া সৃষ্টিকালে চ তদ্বিনা ন ভবেদ্ভবঃ ॥ সৃষ্টেশ্চ প্রতিবিশ্বে চ ব্রহ্মন্ ব্রহ্মোদ্ভবা সদা । পাতা বিষ্ণুশ্চ সংহর্ত্তা শিবঃ শশ্বচ্ছিবপ্রদঃ ॥ ইতি ব্রহ্মবৈবর্ত্তপুরাণে গণপতিখণ্ডে ৪০ অধ্যায়ঃ ॥

মূলফলদঃ পুং পনসবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

মূলভদ্রঃ পুং কংসরাজঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মূলরসঃ পুং মোরটলতা । ইতি রত্নমালা ॥

মূলশাকটঃ } ত্রি মূলক্ষেত্রং । ইতি
মূলশাকিনঃ } ক্ষেত্রবাচ্যে শাকট শাকিন প্রত্যয়াভ্যাং নিয়মং ॥

মূলা স্ত্রী শতাবরী । ইতি রাজনির্ঘণ্টঃ ॥ মূলনক্ষত্রং । ইতি শব্দরত্নাবলী ॥

মূলাধারঃ পুং গুহ্যলিঙ্গয়োর্ম্মধ্যে অঙ্গুলিদ্বয়মিতস্থানং । স তু শরীরস্থ সকল নাড়ীনাং মূলস্থানং । অত্র বশষস সাক্ষর যুক্ত স্বর্ণবর্ণ চতুর্দ্দল পদ্ম মস্তি । তন্মধ্যে ইচ্ছা জ্ঞান ক্রিয়া স্বরূপ ত্রিকোণং বর্ত্ততে । তন্মধ্যে কোটিসূর্য্য সমপ্রভ স্বয়ম্ভু লিঙ্গ মস্তি । অত্র পৃথিবী বর্ত্ততে । তত্রৈব মৃণাল সূত্রবৎ সূক্ষ্ম সার্দ্ধ ত্রিবলয়াকার স্বয়ম্ভু লিঙ্গ বেষ্টিত বিদ্যুল্লতাপ্রভ কুলকুণ্ডলিনী বর্ত্ততে । যথা । মূলাধারে ত্রিকোণাখ্যে ইচ্ছা জ্ঞান ক্রিয়াত্মকে । মধ্যে স্বয়ম্ভু লিঙ্গন্তু কোটিসূর্য্য সমপ্রভং ॥ তদ্বাহ্যে হেমবর্ণাভং বস বর্ণ চতুর্দ্দলং ॥ ইতি তন্ত্রসারঃ ॥ অথাধার পদ্মং সুষুম্নাস্য লগ্নং ধ্বজাধো গুদোর্দ্ধং চতুঃশোণ পত্রং । অধোবক্ত্র মুদ্যৎ সুবর্ণাভবর্ণৈ র্ব্বকারাদি সান্তৈ র্যুতং বেদ বর্ণৈঃ ॥ অমুষ্মিন্ ধরায়া শ্চতষ্কোণ চক্রং সমুদ্ভাসি শূলাষ্টকৈ রাবৃতং তৎ । লসৎপীত বর্ণং তড়িৎ কোমলাঙ্গং তদন্তঃ সমাস্তে ধরায়াঃ স্ববীজং ॥ বজ্রাখ্যা বক্ত্রদেশে বিলসতি সততং কর্ণিকা মধ্য সংস্থং কোণং তত্ত্রৈপুরাখ্যং তড়িদিব বিলসৎ কোমলং কাম-

রূপং। কন্দর্পো নাম্নবায়ু র্বিবসতি সতত তস্য মধ্যে সমন্তাৎ জীবেশো বন্ধুজীব প্রকরনিভঃ সন্ কোটিসূর্য্যঃ প্রকাশঃ॥ তন্মধ্যে লিঙ্গরূপী দ্রুতকনক কলা কোমলঃ পশ্চিমাস্যো জ্ঞান ধ্যান প্রকাশঃ প্রথম কিশলযাকার রূপঃ স্বয়ম্ভূঃ। বিদ্যুৎপূর্ণেন্দু বিম্ব প্রকর করচয স্নিগ্ধ সন্তান হাসী কাশীবাসী বিলাসী বিলসতি সরিদাবর্ত্তরূপঃ প্রকারঃ। তস্যোর্দ্ধে বিষতন্তুসোদর লসৎ সূক্ষ্মা জগন্মোহিনী ব্রহ্মদ্বার মুখং মুখেন মধুরং সাচ্ছাদয়ন্তী স্বয়ং। শঙ্খাবর্ত্তনিভা নবীন চপলামালা বিলাসাস্পদা সুপ্তা সর্প সমা শিরোপরি লসৎ সার্দ্ধত্রিবৃত্তাকৃতিঃ॥ ইতি শ্রীতত্ত্বচিন্তামণৌ ষট্চক্রভেদঃ॥ *॥ তত্রস্থ তীর্থানি যথা। ইড়া মলস্থান নিবাসিনী যা সূর্য্যাত্মিকা যা যমুনা প্রবাহিকা। তথা সুসুম্না মলদেশ গামিনী সরস্বতী রক্ষতি, মজ্জনাত্মকং॥ মনোগত স্নানপরো মনুষ্যো মন্ত্র ক্রিয়া যোগ বিশিষ্ট তত্ত্ববিৎ। মহীস্থ তীর্থে বিমলে জলে মুদা মূলাম্বুজে স্নাতি সমুক্তি ভাগ্ভবেৎ॥ সর্ব্বাণি তীর্থে সুরতীর্থপাবনী গঙ্গা মহাপদ্ম বিনির্গতা সতী। করোতি পাপক্ষয মেব মুক্তিং দদাতি সাক্ষাদমলার্থ পুণ্যদা॥ ইতি রুদ্রযামলং॥

মূলাম্রং ক্লী মূলকং। ইতি রাজনির্ঘণ্টঃ॥

মূলী পুং বৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মূলী স্ত্রী জ্যেষ্ঠী। ইতি ত্রিকাণ্ডশেষঃ॥

মূলেরঃ পুং জটা। ইত্যুণাদিকোষঃ॥

মূল্যং ক্লী পটাদীনামুৎপত্তিকারণং মূলং মূলেন ক্রয় বিক্রয়ার্থ মিদং চয়েকাদিতি যঃ। ইতি ভরতঃ॥ দর ইতি দাম ইতিচ ভাষা। তৎপর্য্যাযঃ। বস্নঃ ২ অবক্রযঃ ৩। ইত্যমরঃ॥ মূল্যতে অর্প্যতে ইদং। মাহিনা ইতি ভাড়া ইতিচ ভাষা। তৎপর্য্যাযঃ। কর্ম্মণ্যা ২ বিধা ৩ ভৃত্যা ৪ ভৃতিঃ ৫ ভর্ম্ম ৬ বেতনং ৭ ভরণ্যং ৮ ভরণং ৯ নির্ব্বেশঃ ১০ পণঃ ১১। ইতিচ অমরঃ॥

মূল্যং ত্রি প্রতিষ্ঠাযোগ্যঃ॥ রোপণযোগ্যঃ। ইতি মূলধাত্বর্থদর্শনাৎ॥

মূষ লুণ্টনে। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। সে মূষতি পরদ্রব্যং। ইতি হলাযুধঃ॥ হ্রস্বীত্যেকে। মোষতি। ইতি দুর্গাদাসঃ॥

মূষঃ পুং স্ত্রী মূষিকঃ॥ তৈজসাব-

র্ভুরী। ইতি শব্দরত্নাবলী ॥

মূষকঃ পুং স্ত্রী উন্দুরুঃ। ইতি শব্দরত্নাবলী ॥

মূষককর্ণী স্ত্রী আখুকর্ণী। ইতি রাজনির্ঘণ্টঃ ॥

মূষকনারী স্ত্রী সুতশ্রেণীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মূষকা স্ত্রী মূষিকা। ইতি শব্দরত্নাবলী ॥

মূষকারাতিঃ পুং বিড়ালঃ। ইতি রাজনির্ঘণ্টঃ ॥ মূষিকারাতি ইতিচ পাঠঃ ॥

মূষা স্ত্রী স্বর্ণাদ্যাবর্ত্তনপাত্রং। মুচী ইতি ভাষা। তৎপর্য্যায়ঃ। তৈজসাবর্ত্তনী ২। ইত্যমরঃ॥ মুষা ৩ মবী ৪ আবর্ত্তনী ৫ মূষী ৬। ইতি ভরতঃ ॥ মূষিকা ৭। ইতি রয়ানাথঃ ॥ দেবতাড়কঃ। ইতি শব্দচন্দ্রিকা ॥ মূষিকস্ত্রীজাতিঃ। ইতি শব্দরত্নাবলী ॥ গবাক্ষঃ। যথা। একদিত্র্যাদিমূষাবহননিতিমহো ন হি মে ভূমিভর্ত্তা ম্যে রম্যে হৃষ্টমুখে চতুর বিরচিতে ম্লক্ষশালা বিশালে। ইত্যাদি লীলাবত্যাং শ্রেঢীব্যবহারঃ ॥

মূষাকর্ণী স্ত্রী আখুকর্ণী। ইতিশব্দরত্নাবলী ॥

মূষাতুত্থং ক্লীং নীলতুত্থং। তৎপর্য্যায়ঃ। কাংস্যনীলং ২ হেমতুত্থং ৩ বিতন্নকং ৪। ইতি হেমচন্দ্রঃ ॥

মূষিকঃ পুং জন্তুবিশেষঃ। ইঁদুর ইতি ভাষা। তৎপর্য্যায়ঃ। উন্দুরুঃ ২ আখুঃ ৩। ইত্যমরঃ ॥ মূষঃ ৪ মূষাকঃ ৫ উন্দুরুঃ ৬ বজ্রঃ ৭ বৃষঃ ৮ আখনিকঃ ৯ বৃশঃ ১০। ইতি শব্দরত্নাবলী ॥ মূষকঃ ১১ পিন্দুঃ ১২ উন্দুরুকঃ ১৩ নখী ১৪ খনকঃ ১৫ বিলকারী ১৬ ধানকঃ ১৭ বহুপ্রজঃ ১৮। অস্য মাংস গুণাঃ অতি নষ্টম শান্যঃ গোক্ষুমর মংখ্যা বিলেশয়াঃ কথিতাঃ। খালানিল কাশহরং তস্মাৎ পিত্তদাহকরং। অন্যে বিলেশয়াঃ স্যুঃ কেচিদোন্দুরুকাদয়ঃ। গহিতং তস্য মাংসঞ্চ মদ্য গৌরব দুর্জ্জরং ॥ ইতি রাজনির্ঘণ্টঃ ॥ অপিচ। মূষিকো মধুরঃ স্নিগ্ধো ব্যবায়ী বলবর্দ্ধনঃ। ইতি রাজবল্লভঃ ॥ * ॥ পারিভাষিক মূষিকো যথা। বিভবে সতি নৈবাত্তি ন দদাতি জুহোতি চ। তমাহু রাখুং তস্যান্নং ভক্ত্বা কৃচ্ছ্রেণ শুধ্যতি ॥ ইতি মার্কণ্ডেয় পুরাণে আচারাধ্যায়ঃ ॥

মূষিকপর্ণী স্ত্রী জলজতৃণবিশেষঃ।

ইঁদুরকাণীপানা ইতি ভাষা। তৎপর্য্যায়ঃ। চিত্রা ২ উপচিত্রা ৩ ন্যগ্রোধা ৪ দ্রবন্তী ৫ শম্বরী ৬ বৃষা ৭ প্রত্যকশ্রেণী ৮ সুতশ্রেণী ৯ রণ্ডা ১০। ইত্যমরঃ। পুত্রশ্রেণী ১১ আখুপর্ণিকা ১২ বৃষপর্ণী ১৩ আখুপর্ণী ১৪ মূষিকা ১৫ ফঞ্জিপত্রিকা ১৬। ইতি রত্নমালা ॥ মূষিপর্ণিকা ১৭ সুশ্রেণী ১৮ মূষাকর্ণী ১৯ মূকর্ণিকা ২০। ইতি শব্দরত্নাবলী ॥

মূষিকা স্ত্রী মূষিকপর্ণী। ইতি রত্নমালা। উন্দুরুঃ। ইতি শব্দরত্নাবলী ॥ মূষা। ইত্যমরটীকায়াং রমানাথঃ ॥

মূষিকাঙ্কঃ পুং গণেশঃ। ইতি জটাধরঃ ॥

মূষিকাঞ্চনঃ পুং গণেশঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মূষিকারাতিঃ পুং বিড়ালঃ। ইতি রাজনির্ঘণ্টঃ ॥

মূষিকাহ্বয়ঃ পুং মূষিকপর্ণী। ইতি জটাধরঃ ॥

মূষিপর্ণিকা স্ত্রী মূষিকপর্ণী। ইতি শব্দরত্নাবলী ॥

মূষী স্ত্রী মূষা। স্বর্ণাদ্যাবর্ত্তনপাত্রং। ইত্যমরটীকায়াং ভরতঃ ॥ মহামূষিকঃ। যথা। অন্যো মহামূষিকঃ স্যান্মূষী বিঘ্নেশবাহনঃ। মহাদ্রুঃ শস্যমারী চ ভূফলো মৃত্তিপাতনঃ ॥ ইতি রাজনির্ঘণ্টঃ ॥

মূষীকঃ পুং স্ত্রী মূষিকঃ। ইতি শব্দরত্নাবলী ॥

মূষীককর্ণী স্ত্রী মূষিকপর্ণী। ইতি শব্দরত্নাবলী ॥

মূষীকা স্ত্রী উন্দরুঃ। যথা। দীনামূষীকা মূষ চ মূষীকা মূষিকেত্যপি। ইতি শব্দরত্নাবলী ॥

মূষ্যায়ণঃ ত্রি অজ্ঞাতপিতৃকঃ। গূঢোৎপন্নঃ। ইতি কেচিৎ ॥

মৃ ড শ মৃতৌ। ইতি কবিকল্পদ্রুমঃ ॥ মৃতিঃ প্রাণত্যাগঃ। ড শ ম্রিয়তে প্রাণী। ড়িম্ব্রেণ্যস্য মৃঙষ্টী‌ট্যেমিতি নিয়মেন অন্যত্র পরস্মৈপদং। মমার মর্ত্তা মরিষ্যতি অমরিষ্যৎ। ইতি দুর্গাদাসঃ ॥

মৃকণ্ডকঃ পুং মৃকণ্ডুমুনিঃ। ইতি শব্দরত্নাবলী ॥

মৃকণ্ডুঃ পুং মুনিবিশেষঃ। তস্য পুত্রো মার্কণ্ডেয়ঃ। যথা। মার্কণ্ডেয়োঽপি মার্কণ্ডো মৃকণ্ডুশ্চ মৃকণ্ডকঃ। ইতি শব্দরত্নাবলী ॥

মৃগ ত্ ক ড মার্গণে। ড রামো মৃগং মৃগয়তে বনবীথিকাসু। ইতি মহানাটকং। কাতন্ত্রাদৌ মৃগ্য অন্বেষ

ণে ইতি দিবাদি পরস্মৈপদী ধাতুশ্চ দৃশ্যতে দর্গ ত্রিলোচনয়োরস-মৃতত্বাদনেনোপেক্ষিতঃ। মৃগ্যন্তঃ পদবীং তথাপ্যকরুণা ব্যাধা ন মুঞ্চন্তি মাং। ইতি তু অকারান্তস্যৈব ভাবে ক্বিপি অকারলোপে মৃগং করোতীতি কণ্ড্বাদিত্বাৎ ক্যে সাধ্যং। ইতি দুর্গাদাসঃ॥

মৃগঃ পুং পশুমাত্রং॥ হস্তিবিশেষঃ॥ নক্ষত্রভেদঃ॥ অন্বেষণং॥ যাচঞা। ইতি মেদিনী॥ মার্গশীর্ষমাসঃ॥ যজ্ঞবিশেষঃ। ইত্যজয়পালঃ॥ মৃগনাভিঃ। ইত্যমর টীকায়াং ভরতঃ॥ মকররাশিঃ। যথা। মৃগ কর্কট সংক্রান্তী দ্বেতূদগ্দক্ষিণায়নে। বিষুবতী তুলা মেষে গোলমধ্যে তথা পরাঃ॥ ইতি তিথ্যাদিতত্ত্বং॥ স্বনামখ্যাত পশুবিশেষঃ। মৃগ্যতে অন্বিষ্যতে হসৌ ব্যাধৈঃ। তৎপর্য্যায়ঃ। কুরঙ্গঃ ২ বাতায়ুঃ ৩ হরিণঃ ৪ অজিনযোনিঃ ৫। ইত্যমরঃ॥ শারঙ্গঃ ৬ চারুলোচনঃ ৭ জিনযোনিঃ ৮ কুরঙ্গমঃ ৯ ঋষ্যঃ ১০ ঋশ্যঃ ১১ রিষ্যঃ ১২ রিশ্যঃ ১৩ এণঃ ১৪ এণকঃ ১৫। ইতি শব্দরত্নাবলী॥ স নববিধঃ। যথা। সম্বরো রোহিতো-ন্যঙ্কু কুরঙ্গ সুদৃশো রুরুঃ। এণশ্চ হরিণশ্চেতি মৃগা নববিধা মতাঃ॥ পাঠান্তরং যথা। সমূরু রোহিতো ন্যঙ্কুঃ সম্বরো বক্রণো রুরুঃ। শশৈণ হরিণা শ্চেতি মৃগা নব বিধা মতা॥ হরিণশ্চাপি বিজ্ঞেয়ঃ পঞ্চভেদোহত্র ভৈরব। ঋষ্যঃ খড়্গো রুরুশ্চৈব পৃষতশ্চ মৃগ স্তথা॥ এতে বলিপ্রদানে চ চর্ম্মদানে চ কীর্ত্তিতাঃ। ইতি কালিকাপুরাণে ৬৭ অধ্যায়ঃ॥ *॥ অপিচ। অথ জাঙ্গলানাং গণনা। হরিণৈণ কুরঙ্গর্ষ্য পৃষতন্যঙ্কু শম্বরাঃ। রাজীবো পিচ মুণ্ডী চেত্যাদ্যা জাঙ্গল সংজ্ঞকাঃ॥ হরিণ স্তাম্রবর্ণঃ স্যাদেণঃ কৃষ্ণঃ প্রকীর্ত্তিতঃ। কুরঙ্গ ঈষত্তাম্রঃ স্যাদ্ধরিণাকৃতিকো মহান্॥ ঋষ্যো নীলাঙ্কো লোকে সরোজ ইতি কীর্ত্তিতঃ। পৃষত শ্চন্দ্রবিন্দুঃ স্যাদ্ধরিণাৎ কিঞ্চিদল্পকঃ॥ ন্যঙ্কু বহুবিষাণোথ শম্বরো গবয়ো মহান্। রাজীবস্তু মৃগো জ্ঞেয়ো রাজীভিঃ পরিতো বৃতঃ॥ যো মৃগঃ শৃঙ্গহীনঃ স্যাৎ স মুণ্ডীতি নিগদ্যতে। *॥ অথ তেষাং গুণাঃ। জঙ্গালাঃ প্রায়শঃ সর্ব্বে পিত্ত শ্লেষ্ম হরাঃ স্মৃতাঃ। কিঞ্চিদ্বাতকরা শ্চাপি লাঘবো বলবর্দ্ধনাঃ॥ ইতি ভাবপ্রকাশঃ॥ *॥ অথ মৃগপরীক্ষা।

মৃগনাভিং সমাদাতুং কৌতুকার্থং তথা পুনঃ। মৃগাণাং পোষণে মহীন্দ্রাণাং তেষাং বক্ষ্যামি লক্ষণং॥ পৃথিব্যপ্ বায়ু গগনা স্তেজো হবিকান্ত পঞ্চধা। ভিদ্যন্তে নৈক ভেদাস্তু সমস্তা মৃগজাতয়ঃ॥ তদ্যথা। যে গন্ধিনঃ ক্ষীণশরীরকর্ণা স্তে পার্থিবা গন্ধমৃগাঃ প্রদিষ্টাঃ। সর্ব্বাঙ্গ মেবাং সুরভি প্রকামং পুণ্যে প্রদেশে প্রভবন্তি তে তু॥ যে বৈ বিশালা শুক্ল দীর্ঘশৃঙ্গা অমাংসলা স্তীব্রখুর প্রদেশাঃ। আপ্যাস্তু তে বৈ প্রসুরন্তি ভূরি সর্ব্বত্র দেশে প্রভবন্তি চৈব॥ ধাবন্তি যে বাত নিবান্তরীক্ষে দীর্ঘাস্তু তে বাতমৃগাঃ প্রদিষ্টাঃ॥ তে যত্র যত্রৈব ভবন্তি শক্রা স্তত্রৈব সর্ব্বাণি শুভানি সন্তি। লঘু প্রমাণা লঘুবীর্য্য সত্ত্বা নির্গন্ধদেহা ছগলপ্রমাণাঃ॥ তে গাগনা বেগকরা নরাণাং স্পৃশ্যা ন তে নাপি নিরীক্ষণীয়াঃ। যে কৃষ্ণ বর্ণা গুরুদীর্ঘশৃঙ্গাঃ ক্রুদ্ধা ভৃশং যান্তি চ বায়ুবেগাঃ॥ তে কৃষ্ণসারাঃ খলু তৈজসাস্তু পুণ্যপ্রদেশে প্রভবন্তি তে ত॥ *॥ ভোজো হপ্যাহ। পার্থিবাদি মৃগঃ সর্ব্ব শ্চতুর্জাতি র্ভবেৎ পৃথক্। সুশৃঙ্গা স্তনুলোমানো ব্রাহ্মণা মৃগজাতয়ঃ॥ ক্রুদ্ধাঃ পশ্বরিশৃঙ্গাশ্চ ক্ষত্রিয়াঃ খরলোমশাঃ। আবর্ত্তশৃঙ্গা স্তনবো হরিণা বৈশ্য জাতয়ঃ। হ্রস্বশৃঙ্গা বাপ্যশৃঙ্গা বা শূদ্রাঃ খরতনূরুহাঃ। অশ্বানাং যে গুণা দোষা স্তে জ্ঞেয়া হরিণেষ্বপি॥ তথাপি দোষাঃ পঞ্চামী বক্ষ্যন্তে হরিণাশ্রয়াঃ। নেত্রয়ো রন্তরে যস্য লোমাবর্ত্তঃ স পাপকৃৎ॥ বিষমৌ বিকৃতৌ শৃঙ্গৌ যস্য স ক্ষেম নাশনঃ। আবর্ত্তঃ পৃষ্ঠতো যস্য আনাভি নভিবিন্দতি॥ পশ্চার্দ্ধে যস্য বাবর্ত্ত স্তৌ ত্যাজ্যৌ ভয়কারকৌ। বর্ণনেত্র পদাদীনাং বৈকৃতাদ্ধন নাশনঃ॥ গার্গ্যঃ। দোষবন্মৃগজাতীনাং বিজাতীনামথাপিবা। দর্শনাৎ স্পর্শনাচ্চৈব গন্ধাদানাচ্চ পোষণাৎ॥ ভবেয়ু র্বিপদঃ সর্ব্বা স্তথা চৈবান্য পোষণাৎ। শত্রোপি। হরিণ পোষণতো ধরণীভুজাং নহি ভবেন্মরুজ্ভব পীড়নং। ন পবি বহ্নি রুজা রিপুজং ভয়ং তদবতং হরিণং গুণিনং নৃপ॥ ইতি মৃগপরীক্ষা। ইতি যুক্তিকল্পতরুঃ॥ *॥ মৃগাদিবিকারোপশমো যথা। গর্গ উবাচ। প্রবিশন্তি যদা গ্রাম মারণ্যা মৃগপক্ষিণঃ। অরণ্যং যান্তি বা গ্রাম্যাঃ স্থলং যান্তি জলোদ্ভবাঃ॥ স্থলজাশ্চ জলং যান্তি ঘোরং রাসন্তি

নির্ভয়াঃ। গৃহং কপোতঃ প্রবিশেৎ ক্রব্যাদো মূর্দ্ধ্নি যতে। মধু বা মক্ষিকাঃ কুর্য্যুর্মৃত্যুং গৃহপতের্বদেৎ ॥ মৃগ পক্ষি বিকারেষু কুর্য্যাদ্ধোমং সদক্ষিণং। দেবাঃ কপোতে ইতিচ চঘ্যাঃ পঞ্চভি দ্বিজৈঃ॥ গাবশ্চ দেয়া বিধিবৎ দ্বিজানাং সকাঞ্চনা বস্ত্রযুগোত্তরীয়াঃ। এবং কৃতে শান্তি মুপৈতি পাপং মৃগৈ দ্বিজৈর্বা বিনিবেদিতং যৎ ॥ ইতি মাৎস্যে ২৩১ অধ্যায়ঃ॥ *॥ চতুর্বিধ পুরুষ মধ্যে পুরুষবিশেষঃ। তস্য লক্ষণং যথা। বদতি মধুরবাণীং দীর্ঘনেত্রো হতিভীরু শ্চপলমতি সুদেহঃ শীঘ্রবেগো মৃগো হয়ং। শশকে পদ্মিনী তুষ্টা মৃগে তুষ্টা চ চিত্রিণী। বৃষভে শঙ্খিনী তুষ্টা হয়ে তুষ্টা চ হস্তিনী॥ পদ্মিনী শশযোর্যোনি ষেট্‌কৌ চতুরঙ্গুলৌ। চিত্রিণী মৃগযো র্যোনি মেঢ্রকৌ চ তথা বিধৌ॥ ইতি রতিমঞ্জরী॥

মৃগগামিনী স্ত্রী বিড়ঙ্গা। ইতি রাজনির্ঘণ্টঃ॥ মৃগসদৃশগমনশীলা চ॥

মৃগঘর্মজং ক্লী জবাদিনামকগন্ধদ্রব্য। ইতি রাজনির্ঘণ্টঃ॥ মৃগঘর্মজাতে ত্রি

মৃগচেটকঃ পুং খট্টাসঃ। ইতি শব্দমালা॥

মৃগজালিকা স্ত্রী মৃগবন্ধনার্থজালং। তৎপর্য্যায়ঃ। বাগুরা ২। ইতি হেমচন্দ্রঃ॥

মৃগজীবনঃ পুং ব্যাধঃ। ইতি শব্দরত্নাবলী॥

মৃগণা স্ত্রী অপহৃতদ্রব্যস্যান্বেষণং। যথা। সংবীক্ষণং বিচয়নং মার্গণং মৃগণা মৃগঃ। ইত্যমরঃ॥

মৃগতৃট্‌ স্ত্রী মৃগতৃষ্ণা। ইতি শব্দরত্নাবলী॥

মৃগতৃষা স্ত্রী মৃগতৃষ্ণা। ইতি শব্দরত্নাবলী॥

মৃগতৃষ্ণা স্ত্রী জলাভাসত্বাৎ মৃগাণাং তৃষ্ণা বিদ্যতে যস্যাং। গ্রীষ্মে মরুদেশে সিকতাদাবর্ককরাঃ প্রতিফলিতাঃ দূরস্থানাং জলত্বেনাভান্তি তদ্বাচিকা। ইতি টীকাকারঃ॥ উৎকট রবিরশ্মিজন্য ক্ষিতিবাষ্পজালং মরীচিকা। মরুশূন্যে যস্মযূখে জল মিব দৃশ্যতে ইত্যপরে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। মরীচিকা ২। ইত্যমরঃ॥ মৃগতৃষ্ণিকা ৩। ইতি ভরতঃ॥ মৃগতৃট্‌ ৪ মৃগতৃষা ৫। ইতি শব্দরত্নাবলী॥

মৃগতৃষ্ণিকা স্ত্রী মৃগতৃষ্ণা। ইত্যমরটীকায়াং ভরতঃ॥

মৃগদংশকঃ পুং কুক্কুরঃ। ইত্যমরঃ॥

মৃগধূর্ত্তঃ পুং শৃগালঃ। ইতি সংক্ষিপ্ত সারে সমাসপ্রাদঃ॥

মৃগধূর্ত্তকঃ পুং শৃগালঃ। ইত্যমরঃ॥

মৃগনাভিঃ পুং কস্তূরী। তৎপর্য্যায়ঃ। মৃগনাভি র্মৃগমদঃ কথিতস্তু সহস্রভিৎ। কস্তূরিকা চ কস্তূরী বোধ্যা চ সা স্মৃতা॥ সা ত্রিবিধা যথা। কামরূপোদ্ভবা কৃষ্ণা নেপালী নীলবর্ণক। কাশ্মীরী কপিলচ্ছায়া কস্তূরী ত্রিবিধা স্মৃতা॥ কামরূপোদ্ভবা শ্রেষ্ঠা নৈপালী মধ্যমা ভবেৎ। কাশ্মীরদেশ সম্ভূতা কস্তূরী হ্যধমা স্মৃতা॥ *॥ অস্যা গুণাঃ। কস্তূরিকা কটুস্তিক্তা ক্ষারোষ্ণা শুক্রলা গুরুঃ। কফ বাত বিষ ছর্দ্দি শীত দৌর্গন্ধ্য দোষহৃৎ॥ ইতি ভাবপ্রকাশঃ॥ অন্যৎ কস্তূরীশব্দে দ্রষ্টব্যং॥

মৃগনাভিজা স্ত্রী কস্তূরী। যথা। ঘনসারঃ সিতাভ্রশ্চ চন্দ্রো হথ মৃগনাভিজা। মৃগনাভি মৃগমদঃ কস্তূরী গন্ধধূল্যপি। ইতি হেমচন্দ্রঃ॥

মৃগনেত্রা স্ত্রী মৃগো মৃগশিরা নেতা প্রাপয়িতা যস্যা রাত্রেঃ সা রাত্রিঃ। ইতি নক্ষত্রবোধটীকায়াং দুর্গাদাসঃ॥ সা অগ্রহায়ণস্য বিংশতিদণ্ডাধিক ত্রয়োবিংশদ্দিনাবধি সংক্রান্তি পর্য্যন্তং প্রায়ঃ সম্ভবতি। তত্র নবান্ন শ্রাদ্ধনিষেধো যথা। ব্রহ্মপুরাণে। বৃশ্চিকে শুক্লপক্ষে তু নবান্নং শস্যতে বুধৈঃ। অপরে ক্রিয়মাণং হি ধনষেব কৃতং ভবেৎ॥ ধনুষি যৎ কৃতং শ্রাদ্ধং মৃগনেত্রাসু রাত্রিষু। পিতরস্তস্য গৃহ্ণন্তি নবান্নামিষকাঙ্ক্ষিণঃ॥ অপরে কৃষ্ণপক্ষে। মৃগো নেতা প্রাপয়িতা যাসাং রাত্রীণামিতি ব্যুৎপত্ত্যা নক্ষত্রান্তরে তু রেবত্যনেনাদ্বিধানাত্তৎপদং সিদ্ধং। ততশ্চ মৃগশিরঃ পূর্ব্বার্দ্ধো বৃশ্চিকশেষভাগে রাত্র্যারম্ভাচ্চত্বারিংশদ্দণ্ডাধিক ষড়াত্রযো মৃগনেত্রাঃ। ইতি মলমাসতত্ত্বং॥

মৃগপতিঃ পুং সিংহঃ। ইতি হেমচন্দ্রঃ॥

মৃগপিপ্লুঃ পুং চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মৃগপ্রিয়ং ক্লী পর্ব্বততৃণং। ইতি রাজনির্ঘণ্টঃ॥

মৃগবধাজীবঃ পুং ব্যাধঃ। ইত্যমরঃ॥

মৃগবন্ধিনী স্ত্রী মৃগবন্ধনার্থজালং। তৎপর্য্যায়ঃ। বাগুরা২। ইত্যমরঃ॥

মৃগভক্ষা স্ত্রী জটামাংসী। ইতি রাজনির্ঘণ্টঃ॥

মৃগমদঃ পুং কস্তূরী। ইত্যমরঃ॥

মৃগমদবাসা স্ত্রী কস্তুরীমল্লিকা। ইতি রাজনির্ঘণ্টঃ॥

মৃগয়া স্ত্রী মৃগ্যন্তেঽন্বিষ্যন্তেঽস্যাং। শিকার ইতি ভাষা। তৎপর্য্যায়ঃ। আচ্ছোদনং ২ মৃগব্যং ৩ আখেটঃ ৪। ইত্যমরঃ॥ সা রাজ্ঞাং পাপায় ন স্যাৎ। যথা। অবলস্বকুলাশিনো ঝসাম্নিজনীড দ্রুমপীড়িনঃ খগান্। অনবদ্য তৃণার্দ্দিনো মৃগান্মৃগয়াঘায় ন ভূভৃতাং ঘ্নতাং॥ ইতি নৈষধে ২ সর্গঃ॥ সা চ কামজব্যসনবিশেষঃ। যথা। মৃগয়াক্ষো দিবাস্বপ্নঃ পরী বাদঃ স্ত্রিয়ো মদঃ। তৌর্য্যত্রিকং বৃথাট্যা চ কামজো দশকো গণঃ। ইতি মলমাসতত্ত্বং॥

মৃগয়ুঃ পুং ব্রহ্মা॥ শৃগালঃ॥ ব্যাধঃ। ইতি মেদিনী॥

মৃগরসা স্ত্রী সহদেবী। ইতি রাজনির্ঘণ্টঃ॥

মৃগরাজঃ পুং সিংহঃ। ইতি শব্দরত্নাবলী॥

মৃগরাট্ পুং সিংহঃ। ইতি শব্দরত্নাবলী॥

মৃগরাটিকা স্ত্রী জীবন্তী। ইতি রাজনির্ঘণ্টঃ॥

মৃগরিপুঃ পুং সিংহঃ। ইতি হলায়ুধঃ॥

মৃগরোমজং ত্রি পশুলোমজাতবস্ত্রাদি। তৎপর্য্যায়ঃ। রাঙ্কবং ২। ইত্যমরঃ॥

মৃগলাঞ্ছনঃ পুং চন্দ্রঃ। ইতি শব্দরত্নাবলী॥

মৃগবল্লভঃ পুং কুন্দরতৃণং। ইতি রাজনির্ঘণ্টঃ॥

মৃগবাহনঃ পুং বায়ুঃ। ইতি জটাধরঃ॥

মৃগব্যং ক্লী মৃগয়া। ইত্যমরঃ॥

মৃগশিরঃ ক্লী সপ্তবিংশতিনক্ষত্রান্তর্গতপঞ্চমনক্ষত্রং। তৎপর্য্যায়ঃ। মৃগশীর্ষং ২ আগ্রহায়ণী ৩। ইত্যমরঃ॥ তত্তু বিড়ালপদাকৃতি তারাত্রয়াত্মকং চন্দ্রাধিদৈবতং। ইতি জ্যোতিষং॥ গগনমধ্যে তস্যোদয়ে কন্যালগ্নস্য দ্বাত্রিংশৎপলানি গতানি ভবন্তি। যথা। মূষিকাশনপদাকৃতৌ বিধৌ ব্যোমমধ্যমিলিতে ত্রিতারকে। শারদেন্দুমুখি কন্যকোদয়াদীক্ষণানলকলাঃ কলাবতি॥ ইতি কালিদাসকৃত রাত্রিলগ্ন নিরূপণং॥ তত্র জাত ফলং। যথা। শরাসনাভ্যাসরতো বিনীতঃ সদানুরক্তো গুণিনাং গুণেষু। ভক্তানুপস্নেহভরেণ পূর্ণঃ সন্মার্গবর্ত্তী মৃগজন্মভাগী॥ ইতি কোষ্ঠীপ্রদীপঃ॥

মৃগশিরা স্ত্রী মৃগশিরোনক্ষত্রং। ইতি শব্দরত্নাবলী ॥

মৃগশিরাঃ পুং মৃগশিরোনক্ষত্রং। ইত্যমরটীকায়াং রায়মুকুটঃ ॥

মৃগশীর্ষং ক্লী মৃগশিরোনক্ষত্রং। ইত্যমরঃ ॥

মৃগশীর্ষঃ পুং মৃগশিরোনক্ষত্রং। ইতি কেচিৎ। ইত্যমরটীকায়াং ভরতঃ ॥

মৃগশীর্ষা স্ত্রী মৃগশিরোনক্ষত্রং। ইতি ত্রিকাণ্ডেবোপালিতঃ। ইত্যমরটীকায়াং ভরতঃ ॥

মৃগশীর্ষা পুং মৃগশিরোনক্ষত্রং। ইতি কেচিৎ। ইত্যমর টীকায়াং ভরতঃ ॥

মৃগক্ষীরং ক্লী মৃগীদুগ্ধং। তরাদৌ চেতি চকারস্যানুক্তসমুচ্চয়ার্থত্বাৎ মৃগ্যাঃ ক্ষীরং মৃগক্ষীরং মৃগ্যাঃ পদং মৃগপদং ইত্যাদিষ্বপি পুম্ভাবঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ ॥

মৃগা স্ত্রী সহদেবীলতা। ইতি রাজনির্ঘণ্টঃ ॥

...রঃ ॥ বায়ুঃ। ইতি বিশ্বঃ ॥ মৃগচিহ্নং। চন্দ্র ... কারণং যথা। ল্লোকচ্ছায়া ময়ং লক্ষ্ম তবাঙ্কে শশসংস্থিতং। ন বিদুঃ সোম দেবাপি যে চ নক্ষত্রযোগিনঃ। ইতি মহাভারতে হরিবংশঃ ॥ যথা দর্পণং প্রাপ্য পরাবৃত্তা নয়নরশ্ময়ো গ্রীবাস্থমেব মুখং দর্পণগতমিব পশ্যন্তি এবং চন্দ্রমণ্ডলং প্রাপ্য পরাবৃত্তাস্তে দূরত্বদোষাৎ পৃথিবী মব্যক্তরূপামিব চন্দ্রমণ্ডলগতাং পশ্যন্তি স এব চন্দ্রে কলঙ্ক ইত্যুপচর্য্যতে। ইতি তট্টীকা ॥ যক্ষ্মরোগস্য ঔষধবিশেষঃ। যথা। স্যাদ্রসেন সমং হেম মৌক্তিকং দ্বিগুণং ভবেৎ। গন্ধকস্তু সমস্তেন রসপাদস্তু টঙ্গণঃ ॥ সর্ব্বং তদ্গোলকং কৃত্বা কাঞ্জিকেন বিশোষয়েৎ। ভাণ্ডে লবণপূর্ণেঽথ পচেদ্যাম চতুষ্টয়ং ॥ মৃগাঙ্ক সজ্ঞকো জ্ঞেয়ো রোগরাজনিকৃন্তনঃ। অপিচ। রসস্য ভস্মনো হেম পিষ্টীকৃত্য প্রযোজয়েৎ। গুঞ্জা চতুষ্টয়ক্ষাজ্য মরিচৈ র্ভক্ষয়েন্নরঃ ॥ ইতি মধুমতী ॥

মৃগাজীবঃ পুং ব্যাধঃ। ইত্যমরঃ ॥

মৃগাণ্ডজা স্ত্রী কস্তূরী। ইতি রাজনির্ঘণ্টঃ ॥

মৃগাদ পুং স্ত্রী ব্যাঘ্রঃ। ইতি কেচিৎ ॥

মৃগাদনঃ পুং ক্ষুদ্রব্যাঘ্রঃ। তৎপর্য্যায়ঃ। তরক্ষুঃ ২। ইত্যমরঃ ॥

তর্কুঃ ৩ তরক্ষুঃ ৪ তরক্ষকঃ ৫ । ইতি শব্দরত্নাবলী ॥ বৃহৎশঙ্কুরাকারে কৃষ্ণরেখা চিত্রে নেকড়া ইতি খ্যাতে। ইতি ভরতঃ ॥ চীতা ইতি খ্যাতে। ইত্যচ্যুতঃ ॥

মৃগাদনী স্ত্রী ইন্দ্রবারুণী ॥ সহদেবী ॥ মৃগেৰ্ব্বারু। ইতি রাজনির্ঘণ্টঃ ॥ ক্ষুদ্রব্যাঘ্রী চ ॥

মৃগান্তকঃ পুং চিত্রব্যাঘ্রঃ । ইতি রাজনির্ঘণ্টঃ ॥

মৃগারাতিঃ পুং কুক্কুরঃ। ইতি শব্দমালা ॥ মৃগশত্রুঃ। যথা । নাগং নাগং মৃগপতি মৃগারাতি রামে বিরামে শোকং শোকং গতবতি গতে লক্ষ্মণে লক্ষ্মণেন । ইতি মহানাটকং ॥

মৃগারিঃ পুং সিংহঃ ॥ ব্যাঘ্রঃ। ইতি মেদিনী ॥ কুক্কুরঃ ॥ রক্তশিগ্রুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মৃগাবিৎ পুং ব্যাধঃ। ইতি জটাধরঃ

মৃগাক্ষী স্ত্রী বিশালা ॥ মৃগলোচনতুল্যনেত্রা স্ত্রী। ইতি মেদিনী ॥

মৃগিতঃ ত্রি অন্বেষিতঃ। ইত্যমরঃ ॥

মৃগী স্ত্রী মৃগজাতিস্ত্রী। ইতি ব্যাকরণং ॥ অস্যা দুগ্ধগুণা ছাগদুগ্ধগুণতুল্যাঃ। যথা। মৃগীণাং জাঙ্গলোত্থানাং অজা ক্ষীর গুণং পয়ঃ। ইতি ভাবপ্রকাশঃ ॥ পুলহভার্য্যা। সা কশ্যপকন্যা। তস্যা অপত্যং হরিণাদি। যথা। ক্রোধাচ্চ জজ্ঞিরে কন্যা–স্তাদৃশ্যেবাত্মসম্ভবাঃ । তা ভার্য্যাঃ পুলহস্যাসু মৃগী নন্দা ইরাবতী ॥ ভূতা চ কপিলা দংষ্ট্রা কষা তিষ্যা তথৈব চ। শ্বেতা চ সরমা চৈব সরসা চেতি বিশ্রুতাঃ ॥ মৃগ্যাস্তু হরিণাঃ পুত্রা মৃগাশ্চান্যে শশা স্তথা। ন্যঙ্কবঃ শরভা যে চ রুরবঃ পৃষতাশ্চ যে॥ ইতি বহ্নিপুরাণং ॥ ত্র্যক্ষরছন্দোবিশেষঃ। যথা। রো মৃগী ॥ সা মৃগীলোচনা রাধিকা শ্রীপতেঃ॥ র মধ্যা। ইতি ছন্দোমঞ্জরী ॥ অপস্মাররোগঃ। ইতি লোকেখ্যাতঃ॥

মৃগেন্দ্রঃ পুং সিংহঃ। ইত্যমরঃ ॥

মৃগেন্দ্রচটকঃ পুং শ্যেনপক্ষী। ইতি জটাধরঃ ॥

মৃগেন্দ্রাণী স্ত্রী বাসকঃ। ইতি রাজনির্ঘণ্টঃ ॥

মৃগেৰ্ব্বারুঃ স্ত্রী শ্বেতেন্দ্রবারুণী। সেঁধিনী ইতি হিন্দী ভাষা। তৎপর্য্যায়ঃ। মৃগাক্ষী ২ শ্বেতপুষ্পা ৩ মৃগাদনী ৪ চিত্রবল্লী ৫ বহুফলা ৬ কপিলাক্ষী ৭ মৃগেক্ষণা ৮ চিত্রা ৯ চিত্রফলা ১০ পথ্যা ১১ বিচিত্রা

১২ মৃগচির্ভিটা ১৩ রুক্জা ১৪ স্ব-ম্ভিনী ১৫ দেবী ১৬ কটুফলা ১৭ লঘুচির্ভিটা ১৮। অস্যা গুণাঃ। দুর্জ্জরত্বং। গুরুত্বং। মন্দানলকারিত্বং রক্তপিত্তহারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মৃগেষ্টঃ পুং মুদ্গরবৃক্ষঃ। ইতি রাজ নির্ঘণ্টঃ॥

মৃগেক্ষণা স্ত্রী মৃগের্বারুঃ। ইতি রাজনির্ঘণ্টঃ॥ মৃগনয়নাস্ত্রী চ॥

মৃগ্যঃ ত্রি মৃগিতব্যঃ। অন্বেষণীয়ঃ। ইতি ব্যাকরণং॥

মৃজ ল উষ শুদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ শুদ্ধিরিহ শুদ্ধীভাবঃ শুদ্ধীকরণঞ্চ। ল মার্ষ্টি তীর্থোদকে নিত্য মিতি হলায়ুধঃ। উ অমার্জ্জীৎ ভস্মতো মলং। অমার্ক্ষীৎ চাসিপত্রাদীনিতি ভট্টিঃ। ষ মৃজা। ইতি দুর্গাদাসঃ॥

মৃজ উ ষ কি ভূষে॥ শুদ্ধৌ। ইতি কবিকল্পদ্রুমঃ॥ উ অমার্জ্জীৎ অমার্ক্ষীৎ। ষ মৃজা। কি মার্জত্যালেপনৈ দ্বিজান্। যো মার্জ্জয়তি শাস্ত্রার্থ মিতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

মৃজঃ পুং বাদ্যবিশেষঃ। মাদল ইতি ভাষা। যথা। মর্দলো দারুজো মৃজঃ। ইতি শব্দরত্নাবলী॥

মৃজা স্ত্রী মার্জনং। ইত্যমরঃ॥

মৃজ্যং ত্রি মার্গ্যং। মার্জনীয়ং। ইতি মুগ্ধবোধব্যাকরণং॥

মৃড গ শ মোদে। ইতি কবিকল্পদ্রুমঃ॥ মোদ ইহ হৃষ্টীকরণং। গ মৃড্নাতি সরস্বত্যা চযঃ সদেতি হলায়ুধঃ॥ শ মৃডতি দীনং দাতা। অমৃডিত্বা সহস্রাক্ষ মিতি ভট্টিঃ। মর্ডিতা। ইতি দুর্গাদাসঃ॥

মৃডঃ পুং শিবঃ। ইত্যমরঃ॥

মৃডকণঃ পুং বালকঃ। ইত্যুণাদিকোষঃ॥

মৃডা, মৃডী স্ত্রী দুর্গা। ইতি হলায়ুধঃ॥

মৃডীকঃ পুং হরিণঃ। ইতি মৃড ধাতো রৌণাদিক কীকনপ্রত্যয়েন নিষ্পন্নং॥

মৃণ শ হিংসে। ইতি কবিকল্পদ্রুমঃ॥ মর্ণিতা। ইতি দুর্গাদাসঃ॥

মৃণালং ক্লী পুং মৃণ্যতে হিংস্যতে ভক্ষণাদ্যর্থং যৎ। মোলাম ইতি খ্যাতং। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। বিসং ২। ইত্যমরঃ॥ বিশং ৩। ইতি দ্বিরূপকোষঃ॥ পদ্মনালং ৪ মৃণালী ৫ মৃণালিনী ৬ পদ্মতন্তুঃ ৭ বিসিনী ৮ নলিনীরুহং ৯। অস্য

ঙ্গাঃ। শিশিরত্বং। তিক্তত্বং। কষায়ত্বং। পিত্ত দাহ মূত্রকৃচ্ছ্র বিকার রক্ত বান্তি হরত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মৃণালং ক্লী বীরণমূলং। ইতি মেদিনী।

মৃণালিনী স্ত্রী পদ্মিনী। ইতি জটাধরঃ॥ সা তু পদ্মযুক্তদেশঃ পদ্মসমূহঃ পদ্মলতা চ॥

মৃণালী স্ত্রী মৃণালং। ইতি রাজনির্ঘণ্টঃ॥ স্বল্পমৃণালজাতিঃ। যথা। সান্দ্রং চন্দন মঙ্গকে বলয়িতাঃ পাণৌ মৃণালীলতাঃ। ইতি রাজশেখরঃ। ইত্যমরটীকায়াং ভরতঃ॥

মৃণালী পুং পদ্মঃ। ইতি কেচিৎ॥

মৃৎ স্ত্রী মৃত্তিকা। ইত্যমরঃ॥ তুবরী॥ ইতি রাজনির্ঘণ্টঃ॥ *॥ মৃত্তিকা শৌচং যথা। দিবা সন্ধ্যাসু কর্ণস্থ ব্রহ্মসূত্র উদঙ্মুখঃ। কুর্য্যাৎ মূত্র পুরীষে তু রাত্রৌ বৈ দক্ষিণামুখঃ॥ গৃহীতশিশ্নশ্চোত্থায় মৃদ্ভিরভ্যুদ্ধৃতৈর্জলৈঃ। গন্ধ লেপ ক্ষয়করং শৌচং কুর্য্যামহাব্রতাঃ॥ ইতি গারুড়ে ৯৪ অধ্যায়ঃ॥

মৃতং ক্লী যাচিতং। ইত্যমরঃ॥ যাচনবৃত্তি র্মরণমিব দুঃখজনকত্বাৎ মৃতং ভাবে কর্ম্মণি বা ক্তঃ। ইতি ভরতঃ॥ মৃত্যুঃ। ইতি হেমচন্দ্রঃ॥

মৃতং ত্রি যাচিতবস্তু॥ গতপ্রাণঃ। মরা ইতি ভাষা। তৎপর্য্যায়ঃ। পরাসুঃ ২ প্রাপ্তপঞ্চত্বঃ ৩ পরেতঃ ৪ প্রেতঃ ৫ সংস্থিতঃ ৬ প্রমীতঃ ৭। ইত্যমরঃ॥ কলৌ মৃতস্য ধন্যত্বং যথা। ধর্ম্মঃ প্রব্রজিত স্তপঃ প্রবসিতং সত্যঞ্চ দূরেগতং পৃথ্বী মন্দফলা জনাঃ কপটিনো লৌল্যে স্থিতা ব্রাহ্মণাঃ। মর্ত্ত্যাঃ স্ত্রীবশগাঃ স্ত্রিয়শ্চ চপলা নীচা জনা উন্নতা কষ্টং খলু জীবিতং কলিযুগে ধন্যা নরা যে মৃতাঃ॥ ইতি গারুড়ে ১১৫ অধ্যায়ঃ॥

মৃতকং ক্লী শবঃ। ইতি হেমচন্দ্রঃ॥ মরণাশৌচং। যথা। যদি স্যাৎ সূতকে সূতি র্মৃতকে চ মৃতি স্তথা। শেষেণৈব ভবেচ্ছুদ্ধি রহঃ শেষে দ্বিরাত্রকং॥ ইতি শুদ্ধিতত্ত্বং॥

মৃতকল্পঃ ত্রি মৃতপ্রায়ঃ। ঈষদূনো মৃতঃ। ইতি মৃতশব্দাদীষদূনার্থে কল্পপ্রত্যয়েন নিষ্পন্নং॥

মৃতকান্তকঃ পুং শৃগালঃ। ইতি হারাবলী॥

মৃতজীবঃ পুং তিলকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মৃতণ্ডঃ পং সূর্য্যপিতা। ইতি মার্ত্তণ্ডশব্দটীকায়াং ভরতঃ॥

মৃতমর্ত্তঃ পুং শৃগালঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মৃতমস্তকঃ পুং শৃগালঃ। ইতি শব্দরত্নাবলী ॥

মৃতবৎসা স্ত্রী মৃতাপত্যা। অজীবৎসন্তানা। অস্যা দোষ শান্তির্যথা। সপ্তমী স্নপনং বক্ষ্যে সর্ব্বলোক হিতায় বৈ। জাতস্য মৃতবৎসায়াঃ সপ্তমে মাসি নারদ ॥ অথবা শুক্ল সপ্তম্যা নৈতৎ সর্ব্বঞ্চ শস্যতে। গ্রহ তারা বলং লব্ধা কৃত্বা বা বিপ্রবাচনং ॥ বালস্য জন্ম নক্ষত্র তিথি দেবান্ যজেদ্বুধঃ। তদ্বদ্ব্রহ্মাতরাণান্ত কৃত্যং স্যাদিতরেষু চ ॥ গোময়েনানুলিপ্তায়াং ভূমাবেকাগ্নিবত্তদা। তণ্ডুলৈ রক্তশালীনাং শ্চরুং গোক্ষীর সংযুতং ॥ নির্ব্বপেৎ সূর্য্য রুদ্রাভ্যাং তন্মন্ত্রাভ্যাং বিধানতঃ। কীর্ত্তয়েৎ সূর্য্যদৈবত্যং সপ্তর্চঞ্চ ঘৃতাহুতীঃ ॥ জুহুয়াদ্রুদ্রসূক্তেন তদ্বদ্রুদ্রায় নারদ। হোতব্যাঃ সমিধ স্তদ্বত্তথৈবার্ক পলাশয়োঃ ॥ যব কৃষ্ণতিলৈ র্হোমঃ কর্ত্তব্যো হষ্টশতং পুনঃ। ব্যাহৃতিভি রথাজ্যেন তথৈবাষ্টশতং দ্বিজ ॥ হুত্বা স্নানঞ্চ কর্ত্তব্যমঙ্গ্যঙ্গেন চ ধীমতা। বিপ্রেণ বেদবিদুষা বিধিবদ্দর্ভ পাণিনা ॥ স্থাপয়িত্বা তু চতুরঃ কুম্ভান্ কোণেষু শোভনান্। পঞ্চমঞ্চ পুনর্ম্মধ্যে দধ্যক্ষত বিভূষিতং ॥ [পয়েদব্রণং কুম্ভং সপ্তচূর্নাভিমন্ত্রিতং। সৌরেণ তীর্থতোয়েন পূর্ণং রত্ন সমন্বিতং ॥ সর্ব্বান্ সর্ব্বৌষধৈ র্যুক্তান্ পঞ্চগব্য সমন্বিতান্ ॥ পঞ্চরত্ন ফলৈ র্যুক্তান্ বাসোভি রভিবেষ্টয়েৎ ॥ গজাশ্ব রথ্যা বল্মীক সঙ্গমাৎ হ্রদ গোকুলাৎ। রাজদ্বার প্রদেশাচ্চ মৃদমানীয় নিঃক্ষিপেৎ ॥ চতুর্ষপি চ কুম্ভেষু রত্নগর্ভেষু মধ্যমং। গৃহীত্বা ব্রাহ্মণ স্তস্ত সৌরান্মন্ত্রানুদীরয়েৎ ॥ সপ্তভি রপি নারীভি রব্যঙ্গাভি র্যথাপ্যলং। পূজিতাভি র্যথা শক্ত্যা মাল্য বস্ত্র বিভূষণৈঃ ॥ স বিপ্রাভিশ্চ কর্ত্তব্যং মৃতবৎসাভিষেচনং। দীর্ঘায়ু রস্তু বালো২য়ং জীবপুত্রা চ ভাবিনী ॥ আদিত্য শ্চন্দ্রমাঃ সার্দ্ধং গ্রহ নক্ষত্র মণ্ডলৈঃ। শক্রঃ সলোক পালো বৈ ব্রহ্ম বিষ্ণু মহেশ্বরাঃ ॥ এতে চান্যে চ দেবৌঘাঃ সদা পান্তু কুমারকং। মিত্রো হশনি র্মা হুতভুগ্ম্যা চ বালগ্রহাঃ কৃচিৎ ॥ পীড়াং কুর্ব্বন্তু বালস্য মা মাতু র্জনকস্য বৈ। ততঃ শুক্লাম্বরধরা কুমারী পতিসংযুতা ॥ সপ্তক-

পূজয়েদ্ভক্ত্যা স্ত্রীণা মথগুরুং পুনঃ। কাঞ্চনীঞ্চ ততঃ কৃত্বা তিলপাত্রোপরি স্থিতাং॥ প্রতিমাং কর্ম্মরাজস্য গুরবে বিনিবেদয়েৎ। বস্ত্রং কাঞ্চন রত্নৌঘৈ র্ভক্ষ্যৈঃ সঘৃত পায় ॥ পূজয়েদ্ব্রাহ্মণং তদ্বদ্বিত্তশাঠ্য বিবর্জ্জিতঃ। ভুক্ত্বা চ গুরুণা চেষ মুচার্য্যা মন্ত্র সন্ততিঃ॥ দীর্ঘায়ু বালোয়ং যাবদ্বর্ষ শতং সমং। যৎকিঞ্চিদস্য দুরিতং নিঃক্ষিপ্তং বডবানলে॥ ব্রহ্মা রুদ্রো বসু স্কন্দো বিষ্ণু র্দেবো হুতাশনঃ। রক্ষন্তু সর্ব্বদুষ্টেভ্যো বরদাঃ সন্তু সর্ব্বদা॥ এবমাদীনি বাক্যানি বদন্তং পূজয়েদ্গুরুং। শক্তিতঃ কপিলাং দদ্যাৎ প্রণিপত্য বিসর্জ্জয়েৎ॥ গুরুঞ্চ পুত্র সহিতঃ প্রণম্য রবি শঙ্করৌ। হুতশেষং তদাশ্নীয়াদাদিত্যায় নমোস্তু তে॥ ইদমেবাদ্ভুতোদ্বেগ দুঃখ স্বপ্নেষু শস্যতে। কর্ত্তৃজন্মদিনক্ষাণাং দেবান্ সংপূজয়েৎসদা॥ শান্ত্যর্থং শুক্ল সপ্তম্যা মেতৎ জন্ম সীদতি। স চানেন বিধানেন দীর্ঘায়ু রভবত্ততঃ॥ স্বস্থঃ সরাণামযুতং শশাস পৃথিবী মিমাং। ইতি মাৎস্যে ৬৩ অধ্যায়ঃ॥

মৃতসঞ্জীবনী, স্ত্রী গোরক্ষদুগ্ধা। ইতি রাজনির্ঘণ্টঃ॥ মৃতজীবনার্থিকা বিদ্যা। যথা। অথ মৃতসঞ্জিবনীবিদ্যা। আদৌ প্রাসাদ বীজং তদনু মৃতিহরং তারকং ব্যাহৃতীশ্চ প্রোচ্চার্য্য ত্র্যম্বকং যো জপতি চ সততং সংপুটং চানুলোমং। মৃতিহরং ত্র্যক্ষর মৃত্যুঞ্জয় মন্ত্রং। সংপটিত মিতি অনুলোম ক্রমেণৈব সংপুট মিত্যর্থঃ। তেন হৌং ততঃ প্রণবঃ ততো জুং সঃ ততঃ সপ্রণব ব্যাহৃতিঃ। মধ্যে ত্র্যম্বক মন্ত্রঃ। ততো হৌং প্রণবঃ জুং সঃ ততঃ সপ্রণব ব্যাহৃতিঃ। অস্য জপাৎ সর্ব্বসিদ্ধি র্ভবতি॥ * ॥ অথ শুক্রোপাসিতা মৃতসঞ্জীবনী বিদ্যা। গায়ত্র্যা একৈক পাদানন্তরং ত্র্যম্বক মন্ত্রস্য একৈক পাদঞ্চ। ততশ্চ গায়ত্র্যাঃ প্রথম পাদানন্তরং সুগন্ধিং পুষ্টি বর্দ্ধনং। দ্বিতীয় পাদানন্তরং উর্ব্বারুক মিব বন্ধনাৎ। তৃতীয় পাদানন্তরং মৃত্যো র্মুক্ষীয় মামৃতাৎ॥ অস্য ধ্যানং। স্বচ্ছং স্বচ্ছারবিন্দ স্থিত মুভয়করে সংস্থিতৌ পূর্ণকুম্ভৌ দ্বাভ্যা মেনাক্ষ মালে নিজকরকমলে দ্বৌ ঘটৌ নিত্য পূর্ণৌ। দ্বাভ্যাং দ্বৌচ স্রবন্তৌ শিরসি শশিকলাং চামৃতৈঃ প্লাব-

শুভং দেহং দেব্যো দধানঃ প্রদিশতু বিশদাং কল্পজালঃ শ্রিয়ং বঃ ॥ এবং ধ্যাত্বাবাহ্য প্রণবাদি ত্র্যম্বকায় রুদ্রায় নমঃ। ইত্যনেন পূজয়েৎ। অস্য জপাৎ সর্ব্বসিদ্ধিঃ ইত্যাগমতত্ত্ববিলাসঃ ॥

মৃতস্নাতঃ ত্রি মৃতোদ্দেশেনস্নাতঃ। তৎপর্য্যায়ঃ। অপস্নাতঃ২। ইত্যমরঃ ॥ মৃতমুদ্দিশ্য কৃতস্নানে জনে ॥ সংস্কারার্থং স্নাপিতে মৃতে। ইতি স্বামী। ইতি তট্টীকায়াং ভরতঃ ॥

মৃতস্নানং ক্লী মৃতোদ্দেশেনস্নানং। তৎপর্য্যায়ঃ। অপস্নানং২। ইতি হেমচন্দ্রঃ ॥

মৃতসঞ্জীবনী ...

মৃতস্বমোক্তা পুং রাজর্ষিঃ। ইতি হেমচন্দ্রঃ ॥

মৃতামদং ক্লী তুত্থং। ইতি শব্দচন্দ্রিকা ॥

মৃতালকং ক্লী আঢকী। ইত্যমরঃ ॥

মৃতিঃ স্ত্রী মরণং। ইতি হেমচন্দ্রঃ ॥

মৃৎ স্ত্রী মৃত্তিকা। ইত্যমরঃ ॥ তুবরী। ইতি রাজনির্ঘণ্টঃ ॥

মৃৎকরঃ পুং জম্ভকারঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মৃৎকাংস্যং ক্লী শরাবঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মৃৎকিরা স্ত্রী ঘুর্ঘুরী। ঘুঘুরিয়া ইতি ভাষা। ইতি ত্রিকাণ্ডশেষঃ ॥

মৃৎখলিনী স্ত্রী চর্ম্মকষাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা ॥

মৃত্তালং ক্লী আঢকী। ইতি শব্দরত্নাবলী ॥

মৃত্তালকং ক্লী তুবরিকা। তুবরিকলায ইতি অড়র ইতিচ খ্যাতং। ইত্যমরটীকায়াং ভরতঃ ॥ সৌরাষ্ট্রমৃত্তিকা। ইতি রাজনির্ঘণ্টঃ ॥

মৃত্তিকা স্ত্রী তুবরী। ইতি রাজনির্ঘণ্টঃ ॥ মৃৎ। মাটী ইতি ভাষা। ইত্যমরঃ। তৎপর্য্যায়ঃ। মৃদা ২ মৃত্তিঃ৩। ইতি ভরতঃ ॥ স্নানকালে মৃত্তিকালেপন বিধি র্যথা। মৃদা প্রক্ষাল্য লিঙ্গন্তু দ্বাভ্যাং নাভেস্তথোপরি। অধশ্চ তিসৃভিঃ কায়ং ষড্ভিঃ পাদৌ তথৈব চ ॥ কটিঞ্চ তিসৃভিশ্চাপি হস্তযোর্দ্বিশ্চ মৃত্তিকাঃ। প্রক্ষাল্য কায়ং হস্তৌ চ দ্বিরাচম্য যথা বিধি। ততঃ সংমার্জনং কৃত্বা মৃদমেবাভিমন্ত্রয়েৎ ॥ অশ্বক্রান্তে রথক্রান্তে বিষ্ণুক্রান্তে বসুন্ধরে। উদ্ধৃতাসি বরাহেণ কৃষ্ণেনাশিতবাহুনা ॥ মৃত্তিকে হর মে পাপং যন্ময়া পূর্ব্ব সঞ্চিতং। মৃত্তিকে ব্রহ্মদত্তাসি পুজয়া চ ধনেন চ ॥ মৃত্তিকে ত্বাঞ্চ গৃহ্লামি কাশ্যপেনাভি-

মন্ত্রিতাং। মৃত্তিকে জহি মে পাপং। যন্ময়া দুষ্কৃতং কৃতং ॥ ত্বয়া হতেন পাপেন ব্রহ্মলোকং ব্রজাম্যহং। ইতি বহ্নিপুরাণং ॥ * ॥ শৌচার্থ মৃত্তিকা গ্রহণ বিধি যথা। আহৃত্য মৃত্তিকাং কূলাল্লেপ গন্ধাপকর্ষণং। কুর্য্যাদতন্দ্রিতঃ শৌচং বিশুদ্ধৈ রুদ্ধৃতোদকৈঃ ॥ নাহরেৎ মৃত্তিকাং বিপ্রঃ পাংশুলাশ্চ কর্দমাৎ। নমার্গান্নোষরাদ্দেশাচ্ছৌচ শিষ্টাং পরস্য চ ॥ নদেবায়তনাৎ কূপাৎ গেহাম্নচ জলাৎ তথা। উপস্পৃশেত্ততো নিত্যং পূর্ব্বোক্তেন বিধানতঃ ॥ ইতি কৌর্ম্মে উপরিভাগে ১২ অধ্যায়ঃ ॥ তস্য পরিক্ষা মন্দিরশব্দে দ্রষ্টব্যা ॥

মৃৎফলা স্ত্রী অষ্টৌষধং। ইতি হারাবলী ॥

মৃত্যুঃ পুং যমঃ। ইতি হেমচন্দ্রঃ ॥ কংসঃ। যথা। প্রত্যর্প্য মৃত্যবে পুত্রান্ মোচযে কৃপণামিমাং। সুতা মে যদি জায়েরন্ মৃত্যুর্ব্বা ন ম্রিযেত চেৎ ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১ অধ্যায়ঃ ॥

মৃত্যুঃ ত্রি প্রাণবিযোগঃ। তৎপর্য্যায়ঃ। পঞ্চতা ২ কালধর্ম্মঃ ৩ দিষ্টান্তঃ ৪ প্রলয়ঃ ৫ অত্যয়ঃ ৬ অন্তঃ ৭ নাশঃ ৮ মরণং ৯ নিধনঃ ১০। ইত্যমরঃ ॥ পঞ্চত্বং ১১ মৃতং ১২ মৃতিঃ ১৩। ইতি তট্টীকাযাং রমানাথঃ ॥ মৃত্যু ১৪ নৈধনং ১৫। ইতি তট্টীকা সারসুন্দরী ॥ সংস্থা ১৬ কালঃ ১৭ পরলোকগমঃ ১৮ দীর্ঘনিদ্রা ১৯ নিমীলনং ২০ অস্তং ২১ অবসানং ২২। ইতি হেমচন্দ্রঃ ॥ ভূমিলাভঃ ২৩ নিপাতঃ ২৪ বিলযঃ ২৫ আত্যযিকং ২৬। ইতি শব্দরত্নাবলী ॥ স তু ব্রহ্মণো গুদতো জাতঃ। যথা। পাযুর্যমস্য মিত্রস্য পরিমোক্ষস্য নারদ। হিংসাযা নির্ঋতে র্মৃত্যো র্নিরযস্য গুদং স্মৃতং ॥ ইতি শ্রীভাগবতে ২ স্কন্ধে ৫ অধ্যাযঃ ॥ কল্পান্তরে ভযাৎ মাযাযাং জাতঃ। যথা। হিংসা ভার্য্যা ত্বধর্ম্মস্য তযোর্জজ্ঞে তথানৃতং। কন্যা চ নিকৃতিস্তাভ্যাং ভযং নরক মেব চ ॥ মাযা চ বেদনা চৈব মিথুনং ত্বিদ মেতযোঃ। ভযাজ্জজ্ঞে হথ বৈ মাযা মৃত্যুং ভূতাপহারিণং ॥ বেদনা চ সুতঞ্চাপি দুঃখং জজ্ঞেথ রৌরবাৎ। *। অস্যাপত্যাদি যথা। মৃত্যো র্ব্যাধি জরা শোক তৃষ্ণা ক্রোধাশ্চ জজ্ঞিরে। দুঃখোত্তরাঃ স্মৃতা হ্যেতে সর্ব্বে চাধর্ম্ম লক্ষণাঃ ॥ নৈষাং ভার্য্যাস্তি পুত্রো বা সর্ব্বেতে হ্যূর্দ্ধরেতসঃ।

নির্ঋতিশ্চ তথা চান্যা মৃত্যোর্ভার্য্যা ভবন্ মনে ॥ অলক্ষ্মী নাম তস্যাঞ্চ মৃত্যোঃ পুত্রাশ্চতুর্দশ । অলক্ষ্মী সূচকা হ্যেতে মৃত্যোরাদেশ কারিণঃ ॥ বিনাশ কালে চ নরান্ ভজন্ত্যেতে শৃণুষ্ব তান্ । ইন্দ্রিয়েষু দশস্বেতে তথা মনসি চ স্থিতাঃ ॥ স্বে স্বে নরং স্ত্রিয়ং বাপি বিষয়ে যোজয়ন্তি চ । তথেন্দ্রিয়াণি চাক্রম্য রাগ লোভাদিভির্নরান্ ॥ যোজয়ন্তি তথা হানিং যান্তি ধর্ম্মাদিভির্দ্বিজ । অহঙ্কার গতাশ্চান্যে তথান্যে বুদ্ধি সংস্থিতাঃ ॥ বিনাশায় নরস্ত্রীণাং যতন্তে মোহ সংশ্রয়াঃ । এবং ত্বধম্মেণোৎপন্নাঃ সর্ব্বে চাপি ভয়ঙ্করাঃ ॥ ইতি মার্কণ্ডেয়পুরাণে দুঃসহানুশাসনং নামাধ্যায়ঃ ॥ বিষ্ণুপুরাণে প্রথমেংশে সপ্তমোধ্যায়শ্চ ॥ * ॥ মৃত্যু জ্ঞাপকারিষ্টানি যথা । দত্তাত্রেয় উবাচ । অরিষ্টানি মহারাজ শৃণু বক্ষ্যামি তানি তে । যেষা মালোকনান্মৃত্যুং নিজং জানাতি যোগবিৎ ॥ দেবমার্গং ধ্রুবং শুক্রং সোমচ্ছায়া মরুন্ধতীং । যো ন পশ্যেন্ন জীবেৎ স নরঃ সংবৎসরাৎ পরং ॥ অরশ্মি বিম্বং সূর্য্যস্য বহ্নিঞ্চৈবাংশুমালিনং । দৃষ্ট্বৈকাদশ মাসেভ্যো নরো নোর্দ্ধং স জীবতি ॥ বান্ত্যাং মূত্রে পুরীষে বা সুবর্ণং রজতং তথা । প্রত্যক্ষ মথবা স্বপ্নে জীবিতং দশমাসিকং ॥ দৃষ্ট্বা প্রেত পিশাচাদীন্ গন্ধর্ব্ব নগরাণি চ । সুবর্ণ বর্ণান্ বৃক্ষাংশ্চ নবমাসান্ স জীবতি ॥ স্থূলঃ কৃশঃ কৃশঃ স্থূলো যো হকস্মাদেব জায়তে । প্রকৃতেশ্চ নিবর্ত্তেত তস্যায়ুশ্চাষ্টমাসিকং ॥ খণ্ডং যস্য পদং পার্ষ্ণ্যোঃ পাদস্যাগ্রে হথবা ভবেৎ । পাংশু কর্দ্দময়োর্মধ্যে সপ্ত মাসান্ স জীবতি ॥ কপোত গৃধ্র-কাকোলা বায়সো বাপি মূর্দ্ধনি । ক্রব্যাদো বা খগো লীনঃ ষণ্মাসায়ুঃ প্রদর্শকঃ ॥ হন্যতে কাকপঙ্ক্তীভিঃ পাংশু বর্ষেণ বা পুনঃ । স্বচ্ছায়াঞ্চান্যথা দৃষ্ট্বা পঞ্চ মাসান্ স জীবতি ॥ অনভ্রে বিদ্যুতং দৃষ্ট্বা দক্ষিণাং দিশমাশ্রিতাং । পয়সীন্দ্রধনুর্ব্বাপি জীবিতং দ্বি ত্রি মাসিকং ॥ ঘৃতে তৈলে তথাদর্শে তোয়ে বা চাত্মন স্তনুং । যঃ পশ্যেদশিরস্কাং বা মাসাদূর্দ্ধং ন জীবতি ॥ যস্য বস্ত সমো গন্ধো গাত্রে শব সমোপি বা । তস্যার্দ্ধ মাসিকং জ্ঞেয়ং যোগিনো নৃপ জীবিতং ॥ যস্য বৈ স্নাত মাত্রস্য হৃৎপাদ মবশুষ্যতি । পিবতশ্চ জলং শোষো

দশাহং সোপি জীবতি ॥ স্তম্ভিতো মারুতো যস্য মর্ম্মস্থানানি কৃন্ততি। ন হৃষ্যত্যম্বু সংস্পর্শাত্তস্য মৃত্যু রু পস্থিতঃ ॥ ঋক্ষ বানর যুগ্মস্থো গায়ন্ যো দক্ষিণাং দিশং। স্বপ্নে প্রযাতি তস্যাপি ন মৃত্যুঃ কাল মৃচ্ছতি ॥ রক্ত কৃষ্ণাম্বরধরা গায়ন্তী হসতী চ যং। দক্ষিণাশাং নযেন্নারী স্বপ্নে সোপি ন জীবতি ॥ নগ্নং ক্ষপণকং স্বপ্নে হসমানং প্রদৃশ্য বৈ। এনং বা বীক্ষ্য বল্গন্তং বিদ্যান্মৃত্যু মুপস্থিতং ॥ আমস্তকং তলাদ্যস্তু নিমগ্নং পঙ্ক সাগরে। স্বপ্নে পশ্যেত্তথাত্মানং নরঃ সদ্যো ম্রিয়েত সঃ ॥ কেশাঙ্গারাং স্তথা ভস্ম ভুজগাং নির্জলাং নদীং। দৃষ্ট্বা স্বপ্নে দশাহন্তু মৃত্যু রেকাদশে হানি। করালৈ বিকটৈঃ কৃষ্ণৈঃ পুরুষৈ রুদ্যতায়ুধৈঃ। পাষাণৈস্তাডিতঃ স্বপ্নে সদ্যো মৃত্যুং সমাপ্নুয়াৎ ॥ সূর্য্যোদয়ে যস্য শিবা ক্রোশন্তী যাতি সম্মুখং। বিপরীতং পরীতং বা স সদ্যো মৃত্যু মৃচ্ছতি ॥ যস্য বৈ ভুক্তমাত্রেপি হৃদয়ং পীড্যতে ক্ষুধা। জায়তে দন্ত সংঘর্ষঃ স গতায়ু রসংশয়ং ॥ দীপাদি গন্ধং নো বেত্তি বসত্যগ্নিং তথা নিশি। নাত্মানং পরনেত্রস্থং বীক্ষতে ন স জীবতি ॥ শক্রায়ুধঞ্চার্দ্ধরাত্রে দিবা গ্রহগণং তথা। দৃষ্ট্বা মন্যেত সংক্ষীণ মাত্ম জীবিতমাত্মবান্ ॥ নাসিকা বক্রতা মেতি কর্ণযো র্নমুতোন্নতী। নেত্রঞ্চ বামং স্রবতি যস্য তস্যায়ু রুদ্গতং ॥ আরক্ততা মেতি মুখং জিহ্বা বাপি সিতা তথা। তদা প্রাজ্ঞো বিজানীয়ান্মৃত্যু মাসন্ন মাত্মনঃ ॥ উষ্ট্র রাসভ যানেন যঃ স্বপ্নে দক্ষিণাং দিশং। প্রযাতি তং বিজানীয়াৎ সদ্যো মৃত্যুং নরেশ্বর ॥ পিধায় কর্ণং নির্ঘোষং ন শৃণোত্যাত্ম সম্ভবং। নশ্যতে চক্ষুষো জ্যোতি র্যস্য সোপি ন জীবতি ॥ পততো যস্য বৈ গর্ত্তে স্বপ্নে দ্বারং পিধীয়তে। নচোত্তিষ্ঠতি যঃ শ্বভ্রাত্তদন্তং তস্য জীবিতং ॥ ঊর্দ্ধা চ দৃষ্টি র্নচ সংপ্রতিষ্ঠা রক্তা পুনঃ সংপরিবর্ত্তমানা। মুখস্য চোষ্মা শিশিরা চ নাভিঃ শংসন্তি পুংসা মপরং শরীরং ॥ স্বপ্নেগ্নিং প্রবিশেদ্যস্তু নচ নিষ্ক্রমতে নরঃ। জলপ্রবেশাদপিবা তদন্তং তস্য জীবিতং ॥ যশ্চাভিহন্যতে দুষ্টৈ র্ভূতৈ রাত্রাবথো দিবা। স মৃত্যুং সপ্তরাত্রান্তাৎ প্রমানাপ্নোত্যসংশয়ং ॥ স্ববস্ত্র মমলং শুক্লং রক্তং পশ্যত্যথো হসিতং। যঃ পুমান মৃত্যু মাপন্নং তস্যাপি হি বিনির্দ্দিশেৎ ॥

স্বভাববৈপরীত্যন্তু প্রকৃতেশ্চ বিপর্য্যয়ঃ। কথয়ন্তি মনুষ্যাণাং সদাসন্নৌ যমান্তকৌ। যেষাং বিনীতঃ সততং যস্য পূজ্যতমা মতাঃ। তানেব যোবজানাতি তানেব চ বিনিন্দতি॥ দেবতা দীর্ঘযদৃদ্ধান্ গুরূন্ বিপ্রাংশ্চ নিন্দতি। মাতা পিত্রো রসৎকারং জামাতৃণাং করোতি যঃ॥ যোগিনাং জ্ঞানবিদুষা মন্যেষাঞ্চ মহাত্মনাং। প্রাপ্তকালঃ পুরুষ স্তদ্বিজ্ঞেয়ং বিচক্ষণৈঃ॥ যোগিনা সততং যত্নাদরিষ্টান্যবলোপতে। সংবৎসরান্তে হ্যেতেন ফলদানি দিবানিশং॥ বিলোক্যানি সদা চৈব ফলপঙ্ক্তির্বিভীষণা। ইতি মার্কণ্ডেয়পুরাণে অলর্কোপাখ্যানং॥ ॥ কর্ম্মবিশেষান্মৃত্যুবিশেষো যথা। যেনানৃতানি নোক্তানি প্রীতিভেদঃ কৃতো ন চ। আস্তিকঃ শ্রদ্ধাবানশ্চ স সুখং মৃত্যুমৃচ্ছতি॥ আগারদাহিনো দাহং ক্ষুধং চান্নদায়িনঃ। প্রাপ্নুবন্তি নরাঃ কালে তস্মিন্ মৃত্যাবুপস্থিতে॥ দেবব্রাহ্মণপূজায়াং যেরতা শ্চানসূয়বঃ। শুক্লা বদান্যা হ্রীমন্ত স্তে নরাঃ সুখমৃত্যবঃ॥ যো ন কামান্ন সংরম্ভান্নদ্বেষাৎ ধর্ম্মমুৎসৃজেৎ। যথোক্তকারী সৌম্যশ্চ স সুখং মৃত্যুমৃচ্ছতি॥ শীতং জয়ন্তীহ্নদা স্তাপং চোদকদায়িনঃ। প্রাণঘ্নীং বেদনাং কষ্টাং যে চান্যে দ্বেষকারিণঃ॥ মোহাজ্ঞানপ্রদাতারঃ প্রাপ্নুবন্তি মহত্তমাং। কূটসাক্ষী মৃষাবাদী যশ্চাসদনুশাস্তি বৈ॥ তে মোহমৃত্যবঃ সর্ব্বে তথান্যে বেদনিন্দকাঃ। ইতি মার্কণ্ডেয়পুরাণে পিতাপুত্রসম্বাদঃ॥ ॥ মৃত্যুকালে কর্ত্তব্য ক্ষুদ্রজন্তুবধ প্রায়শ্চিত্তং যথা। বধেঽপি ক্ষুদ্রজন্তূনাং হিংসকানাঞ্চ পণ্ডিতঃ। কার্ষাপণং সমুৎসৃজ্য মৃত্যুকালে প্রমুচ্যতে॥ অহিংসকানাং ক্ষুদ্রাণাং বধে শতগুণং ধ্রুবং। প্রায়শ্চিত্তং মৃত্যুকালে কথিতং পদ্মযোনিনা॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৭ অধ্যায়ঃ॥ ॥ মৃত্যুসময়ে গঙ্গাগমনমাবশ্যকং যথা। অহো সগরবংশেভ্যো নির্ব্বাণমুক্তিদায়িনী। বৈকুণ্ঠগামিনাং মার্গসোপানরূপিণী বরা॥ অতোপি মৃত্যুসময়ে সতাং পুণ্যস্বরূপিণাং। আদৌ পাদৌ চ বিন্যস্য মুখে তোয়ং প্রদীয়তে॥ গঙ্গাসোপানমারুহ্য সন্তো যান্তি যমালয়ং। ইতি তত্রৈব ৩৪ অধ্যায়ঃ॥ ॥ জন্মবতাং মৃত্যো রপরিহার্য্যত্বং যথা। মৃত্যুর্জন্মবতাং বীর দেহেন সহ জায়তে।

অদ্য বাব্দ শতান্তে বা মৃত্যুর্বৈ প্রাণিনাং ধ্রুবঃ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধে ১ অধ্যায়ঃ॥ অপিচ। জাতস্য হি ধ্রুবো মৃত্যুর্ধ্রুবং জন্ম মৃতস্য চ। তস্মাদপরিহার্য্যে হর্থে নত্বং শোচিতু মর্হসি॥ ইতি শ্রীভগবদ্গীতা॥ * ॥ অকালমৃত্যুপ্রশমনং স্তোত্রং যথা। সূত উবাচ। স্তোত্রং তৎ সংপ্রবক্ষ্যামি মার্কণ্ডেযেন ভাষিতং। নারায়ণং সহস্রাক্ষং পদ্মনাভং পুরাতনং॥ প্রণতোস্মি হৃষীকেশং কিং মে মৃত্যুঃ করিষ্যতি। ১। গোবিন্দং পুণ্ডরীকাক্ষ মনন্ত মজ মব্যযং॥ কেশবঞ্চ প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ২। বাসুদেবং জগদ্যোনিং ভানুমন্ত মতীন্দ্রিযং॥ দামোদরং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ৩। শঙ্খ চক্রধরং দেবং ছদ্মরূপিণ মব্যযং॥ অধোক্ষজং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ৪। বারাহং বামনং বিষ্ণুং নারসিংহং জনার্দনং॥ মাধবঞ্চ প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ৫। পুরুষং পুষ্করং পুণ্যং ক্ষেত্র বীজং জগৎপতিং॥ লোকনাথং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ৬। সহস্রশীর্ষং দেবেশং ব্যক্তাব্যক্তং সনাতনং॥ মহাযোগং প্রপন্নোস্মি কিন্মো মৃত্যুঃ করিষ্যতি। ৭। ভূতাত্মানং মহাত্মানং যজ্ঞযোনি মযোনিজং॥ বিশ্বরূপং প্রপন্নোস্মি কিং মে মৃত্যুঃ করিষ্যতি। ৮। ইত্যুদীরিত মাকর্ণ্য স্তোত্রং তস্য মহাত্মনঃ। অপযাতস্ততো মৃত্যু র্বিষ্ণুদূতৈঃ প্রপীড়িতঃ॥ ইতি তেন জিতো মৃত্যু র্মার্কণ্ডেযেন ধীমতা। প্রসন্নে পুণ্ডরীকাক্ষে নৃসিংহে নাস্তি দুর্লভং॥ মৃত্যুষ্টক মিদং পুণ্যং মৃত্যু প্রশমনং শুভং। মার্কণ্ডেয হিতার্থায স্বযং বিষ্ণু রুবাচ হ॥ য ইদং পঠতি স্তোত্রং ত্রিকালং নিযতঃ শুচিঃ। নাকালে তস্য মৃত্যুঃ স্যান্নরস্যাচ্যুতচেতসঃ॥ হৃৎপদ্ম মধ্যে পুরুষং পুরাণং নারাযণং শাশ্বত মাদিদেবং বিচিন্ত্য সূর্য্যাদতিরাজ মানং মৃত্যুং স যোগী জিতবাংস্তদৈব॥ ইতি গারুড়ে ২৩৮ অধ্যাযঃ॥ * ॥ শুভকর্মপ্রতিবন্ধক মৃত্যুদাযোগা যথা। আদিত্য ভৌমযো র্নন্দা ভদ্রা শুক্র শশাঙ্কযোঃ। বুধে জযা গুরৌ রিক্তা শনৌ পূর্ণা চ মৃত্যুদা॥ অপিচ। রব্যাদি দিবসে যুক্তা বিশাখাদি চতুশ্চতুঃ। উৎপাটা মৃত্যবঃ কালা অমৃতানি যথা ক্রমং॥ ইতি জ্যোতিস্তত্ত্বং॥

মৃত্যুঞ্জয়ঃ পুং শিবঃ । ইত্যমরঃ ॥
তন্নাম কারণং যথা । সুযজ্ঞ উবাচ ।
শিবো লীনো নির্গুণে চেৎ শ্রীকৃষ্ণে
প্রাকৃতে লয়ে ॥ কথং তব গুরো
নাম মৃত্যুঞ্জয় ইতি শ্রুতৌ । সুত
পা উবাচ । ব্রহ্মণো হন্তেমৃত্যুকন্যা
প্রণষ্টা জল বিন্দুবৎ । সংহর্ত্রী স
র্ব্বলোকানাং ব্রহ্মাদীনাং নরাধিপ
॥ কতিধা মৃত্যু কন্যানাং ব্রহ্মণাং
কোটিশো লয়ে । কালেন লীনঃ
শম্ভুশ্চ সত্ত্বরূপী চ নির্গুণে ॥ মৃ-
ত্যুকন্যা জিতা শশ্বৎ শিবেন গু
রুণা মম । ন মৃত্যুনা জিতঃ শম্ভুঃ
কল্পে কল্পে শ্রুতৌ শ্রুতং ॥ ইতি ব্রহ্ম
বৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ
॥ * ॥ রোগশান্ত্যর্থং তস্য পূজা
বিধি র্যথা । মৃত্যুঞ্জয়ং সমাপূজ্য
লিঙ্গং ত্রিভুবনেশ্বরং । রোগান্মো
মুচ্যতে রোগাদ্বদ্ধো মুচ্যেত বন্ধ-
নাৎ ॥ যস্তু সংপূজয়েদ্ভক্ত্যা লিঙ্গং
মৃত্যুঞ্জয়াভিধং । যমোপি প্রণমে-
দ্ভক্ত্যা কিং করিষ্যতি চাময়ঃ ॥
তস্য পূজা বিধিং বক্ষ্যে শৃণু মৎ
প্রাণবল্লভে । জাতিভেদে মৃত্তিকা-
স্তু গৃহীত্বাশীতি তোলকং ॥ নি-
র্ম্মায় পার্থিবং লিঙ্গং কাংস্যাধারে
নিবেশয়েৎ । পৌরাণিকেন মন্ত্রেণ
কুর্য্যাচ গঠনং বুধঃ ॥ স্নাপয়েৎ পঞ্চ-
গব্যেন প্রত্যেকস্যাষ্ট তোলকং ।
স্ব স্ব মন্ত্রৈশ্চ প্রত্যেক দ্রব্যেণ স্নাপ-
য়েৎ সুধীঃ ॥ রোগ ক্ষয় কামনয়া
নাম গোত্রাদি পূর্ব্বকং । উপবিশ্যা-
সনে বিপ্রো ধৃত্বা ধৌতে চ বাসসী ॥
রুদ্রাক্ষ মালাং কণ্ঠে বৈ ধৃত্বা ভস্ম
ত্রিপুণ্ড্রকং । উপচারং ষোড়শকং
দেয়ং ভক্ত্যা প্রযত্নতঃ ॥ সুবর্ণস্যা-
সনং দেয়ং তথৈবাভরণানি চ । বস্ত্র
যুগ্মং প্রদদ্যাত্তু পরিধেয়ং যথা ভ-
বেৎ ॥ মধুপর্কং কাংস্য পাত্রে দ-
দ্যাদ্ভোজন যোগ্যকং । বিল্বপত্রং
সহস্রঞ্চ অভগ্নং বিনিবেদয়েৎ ॥ এবং
সংপূজ্য লিঙ্গকং জপেন্মন্ত্রং দ্বিস-
হস্রকং । ততো হোমং প্রকুর্য্যাচ্চ দ-
ক্ষিণাং ব্রাহ্মণে দদেৎ ॥ সুবর্ণং বা
তদর্দ্ধং বা দেবি বিভব মানতঃ । অ-
ঙ্গহীনা ন কর্ত্তব্যা পূজা চাফলদা যতঃ
॥ একলিঙ্গং সমারাধ্য ফলং স্যাদ-
ন্যকে যুগে । তৎফলং লভতে দেবি
কলৌ সংখ্যা চতুর্গুণা ॥ তাম্রপাত্রে
তু সংস্থাপ্য অশীতি তোলকং জলং
। তজ্জলেনৈব দেবেশি জপৈঃ সংমা-
র্জ্য রোগিণং ॥ ক্ষিপেদ্দীপ শিখা-
যাঞ্চ মন্ত্র মুচার্য্য নামকং । এবং বি-
ধি বিধানেন পূজয়েন্মম লিঙ্গকং ॥

যাদৃশ্যাদৃগ্ভবেদ্দোগো নাশ মেতি ম- যোদিতঃ। সাঙ্গেন পূজয়িত্বা চ ল- ভতে বাঞ্ছিতং ফলং ॥ অঙ্গ ব্য- তিক্রমেণৈব বৃথা ভবতি বাসনা। রোগী প্রমুচ্যতে সদ্যো ভোগীব কঞ্চুকোজ্ঝিতঃ ॥ যদি মদ্বচনে ভ- ক্তি স্তদা মুক্তো ভবেন্নরঃ। ইতি মৃত্যুঞ্জয়তন্ত্রং ॥

মৃত্যুনাশকঃ পুং পারদঃ। ইতি রাজনির্ঘণ্টঃ ॥ মরণহারকে ত্রি ॥

মৃত্যুপুষ্পঃ পুং ইক্ষুঃ। ইতি রত্ন- মালা ॥

মৃত্যুফলঃ পুং মহাকালফলং। ইতি মেদিনী ॥

মৃত্যুফলা স্ত্রী কদলী। ইতি মেদিনী

মৃত্যুভঙ্গুরকঃ পুং মরণকালবাদনীয পটহঃ। যথা। ভবকুৎ প্রেতপট হো মৃত্যুভঙ্গুরকশ্চ সঃ। ইতি ত্রি কাণ্ডশেষঃ ॥

মৃত্যুভৃত্যঃ পুং রোগঃ। ইতি রাজ- নির্ঘণ্টঃ ॥

মৃত্যুবঞ্চনঃ পুং শিবঃ॥ বিল্ববৃক্ষঃ॥ দণ্ডকাকঃ। ইতি মেদিনী ॥

মৃত্যুবীজঃ পুং বংশঃ। ইতি ত্রিকাণ্ড- শেষঃ ॥

মৃত্যুসূতিঃ স্ত্রী কর্কটী। মৃত্যবে সূতিঃ প্রসবো যস্যাঃ সা। যথা। যথা

কর্কটকী গর্ভ মাধত্তে মৃত্যু মাত্মু- নঃ। ইতি মহাভারতেবিরাটপর্ব ॥

মৃৎসা স্ত্রী প্রশস্তমৃত্তিকা। ইত্য- মরঃ ॥

মৃৎস্না স্ত্রী প্রশস্তমৃত্তিকা॥ গোপী। ইত্যমরঃ ॥

মৃৎস্নাভাণ্ডকঃ পুং ভাণ্ডবিশেষঃ। তৎপর্য্যায়ঃ। মুষ্টিকা ২। ইতি ত্রি- কাণ্ডশেষঃ ॥

মৃদ গ ক্ষুদি। ইতি কবিকল্পদ্রুমঃ ॥ গ মৃদ্নাতি মমর্দ। ক্ষুদি চূর্ণী করণে। ইতি দুর্গাদাসঃ ॥

মৃদ্ স্ত্রী মৃৎ। মৃত্তিকা। ইত্যমরঃ ॥

মৃদঙ্কুরঃ পুং হারীতপক্ষী। ইতি হেমচন্দ্রঃ ॥

মৃদঙ্গঃ পুং স্বনামখ্যাতবাদ্যং। তৎ পর্য্যায়ঃ। মুরজঃ ২। ইত্যমরঃ ॥ পটহঃ ॥ ঘোষঃ। ইতি মেদিনী ॥ বংশঃ। ইতি শব্দমালা ॥ * ॥

অথ মৃদঙ্গাদি বিবরণং। মর্দলঃ খাদিরঃ শ্রেষ্ঠো হীনঃ স্যাদন্য দা- রুজঃ। রক্তচন্দনজো বাদ্যো গভী- র ধ্বনি রুচকৈঃ॥ সার্দ্ধ হস্ত প্রমা- ণস্তু দৈর্ঘ্য মস্য বিধীয়তে। ত্রয়োদ- শাঙ্গুলং বাম মথবা দ্বাদশাঙ্গুলং ॥ দক্ষিণঞ্চ ভবেদ্ধীন মেকেনার্দ্ধা- ঙ্গুলেন বা। করণানদ্ধবদনে মধ্যে

ইন্দ্র-পৃথু র্ভবেৎ ॥ ষণ্মাসীযো ভ" বেদ্বস্তু স্থুস্ম কর্ম্মণং মতং । মৃত্তিকা নিৰ্ম্মিতশ্চৈব মৃদঙ্গঃ পরিকীর্ত্তিতঃ ॥ পাতাদেৎ খরলিং বাদ্য বাদনাৰ্থঞ্চ মর্দ্দলে । বিভূতি গৈরিকং ভক্তঃ কেন্দুকেন চ সংযুক্ত ॥ মধ্যে চিপীটকং দেযং জীবনী সত্ব মিশ্রিতং । সর্ব্বমেকত্র পিষ্টস্তল্লেপঃ খরলি কচ্যতে ॥ বামাস্যে পূরিকাং কৃত্বা লেপং দদ্যাচ্চ দক্ষিণে । এবং মৰ্দ্দলকঃ প্রোক্তঃ সর্ব্ব বাদ্যোত্তমোনতঃ ॥ অস্য সংযোগ মাসাদ্য সর্ব্বং বাদ্যঞ্চ শোভতে । এতদঙ্গে ং বীজকাষ্ঠে দল মৰ্দ্দাঙ্গলং বিদুঃ ॥ ❀ ॥ তথিযোতে নিতি জ্ঞেযাঃ পাটবর্ণা মৃদঙ্গজাঃ । থোং দং ঢেং খিক্কট স্তদ্ধীতাকং দং দং থোগং ধিধি ॥ থ ঝঝিং নং গটং দংথাঙ্গট পাটা মতা অমী । তথিং থোং ঢেং তক্কধী দোং দং দং খিগণাং তত ং তথি ॥ তক্কতং ❀ খি দোং তাথি পাটখণ্ড প্রথং ক্রমঃ ।❀। তথাচ যতিমানে পাটখণ্ডঃ । দুগ তথেজাং দুগতথেজাং ধো ধো খিকতা খিকা থোজাং থোজাং তক তত। খিকা থোতা দুগ ততা খি খি খিখি কড তাকড নাথোখিক থোজাং থোতাদুগ ততাগুগত তাদুগত.তাখি ।

ইতি যতিমানে পাটখণ্ডঃ ॥ ❀ ॥ যতি রোটোপ্যবচ্ছেদো গজরো রূপকং ধ্রুবং । গস্পুঃ সারিগোণী চ নাদশ্চং কথিতং তথা । প্রহরণং বৃন্দনঞ্চ প্রবন্ধা দ্বাদশ স্মৃতাঃ ॥ যথা । দং থাত ইত্যেক তাল্যাং যতিঃ ॥ ❀॥ ওটবাদ্যং যথা । দগং তথো তবিকং তখিক দং থাদং থা থোখি থোখি তত্ত তত্তথ বিথ বিদিশ্যাং দিশ্যাং টটু নকি টটু নকি তদ টঙ্গ তদ টঙ্গ খবটঙ্গ খবটঙ্গ তগি নগি তগি নগি দাং দাং দং দং দীং দীং দং তা তথা। ইত্যোটবাদ্যং ॥❀॥ অবচ্ছেদ বাদ্যং যথা । দং থাতঃ দং থাতঃ খিক্কি খিক্কি দিগণং দং থাতঃ। ইত্যবচ্ছেদবাদ্যং ॥ ❀ ॥ গজর বাদ্যং যথা । থোক টেঞ নেঞ ঢেং ডেং গথো গথোক্ক টেঙ্ক থোগতকি খিক তকি খিক টেঙ্কন খি খি কট তক থোক তখিকট তক্কক তথোগ তদ্ধীং । ইত্যেকতাল্যাং গজরঃ ॥ ❀ ॥ রূপক বাদ্যং যথা। তকখিক্ তকখিক্ক খবিতকি খবিতক্কি খিক্ক দং থাতঃ। ইতি রূপকবাদ্যং ॥ ❀ ॥ ধ্রুবক বাদ্যং যথা। তক্ক তক্কট খিক্ক খিক্কট । ইতি নিসারতালে ধ্রুবকঃ ॥ ❀ ॥ গলগো যথা। তখিদ্ধি খিক্ক

তক তধি গলগং থা থা দেং তথা ঢেঞন । ইত্যেকতাল্যাং গলপঃ ॥ ❀ ॥ সারিগোণী যথা । থোঙ্গ-টেঞ তক্ক ধিক্ক তক্‌ধিক্‌ তকথো হুট-ঙ্গন হুটঙ্গন থোগক্ক থোঃ । ইতি প্র-থমখণ্ডঃ ॥❀॥ টেঞ থোঃ ধি খোহঃ টেঞ টেঞ দক্ক তগদক্ক ধিক্ক তদি-দক্কদং গদং গথো গথো ক তক তক ধিক তধিক্‌ তথো ঢেঞধোটেঞ ধটে গল খোগগল খোগ খোহট গেং টগেং খোহটঞ । ইত্যস্য ছন্দনং । ইতি সারীগোণী ॥ ❀ ॥ নাদো যথা । দাং কার ত্রিতযং পূর্ব্বং দাং থি গিতি তত স্তুযং । দাং দাং ধিক ত্রনং যত্র ইতি নাদঃ শচী প্রিয়ঃ ॥ ইতি নাদঃ ॥❀॥ দ্রুতং মান সমারব্ধং শুদ্ধং কূট বিনির্ম্মিতং । সপ্তখণ্ড মথং বাদ্যং কথিতং তদিহোচ্যতে ॥ ❀ ॥ দ্রুত মানত্বাৎ প্রতিতালে যথা । তত্তত তত্তত তক্কি তক্কিং দিদং ধিগনথো ধিগনথো ধিক্ক ধিক্‌ ধিক্ক ধিক্ক ধিক নগি নগনি থো থো থি থি থিঃ দাং দাং ধিক্ক থো থো থো হথো হনক্রি থো নক্রিথো থোহ থোহ ড়েটি ডেটি থোহ থোহ তটি তটি তটুক গীং গীং ধগি ধগি তত তধে তত তধে তভত গিড়ী ঞডী থোগ থো গ থোং থোগগগ থোগথো তত্তং । ইতি সপ্তপদাত্যাতঃ কথিতং বা-দ্য পণ্ডিতাঃ । প্রতিতালেন তালে-ন পাদবর্ণ সমাসতঃ ॥ গন্ধর্ব্বপ-তিনা পূর্ব্ব মূর্ব্বশী লাস্য নর্ত্তনে । সুধর্ম্মা সজ্জনার্থঞ্চ কথিতং প্রকটী-কৃতং ॥ ❀ ॥ প্রহরণং যথা । থো-গক্কা তদ্ধিকা থাগ কট গগো দং থোগ দিদ্ধিক ধিক্ক ধিকটেঞ । ই-ত্যেকতাল্যাং প্রহরণং । ❀ ॥ বা-দ্যং বিমুচ্যতে যেন ছন্দনং তন্ন গদ্যতে । যথা । তদ্ধিথো দিঞ টেঞ তমঃ । ইতি ছন্দনং ॥ ❀ ॥ মর্দ্দল স্ত্রয়োদশাঙ্গুল বামমথো দ্বাদশাঙ্গুল দক্ষিণমথঃ । মুরজস্তু-ষ্টাদশাঙ্গুল বামমুখঃ সপ্তদশাঙ্গুল দক্ষিণমুখঃ মর্দল মুরজযো রযং ভেদঃ । ইতি সঙ্গীতদামোদরঃ ॥

মৃদঙ্গফলঃ পুং পনসবৃক্ষঃ । ইতি শব্দরত্নাবলী ॥

মৃদঙ্গফলিনী স্ত্রী কোষাতকী । ইতি রাজনির্ঘণ্টঃ ॥

মৃদঙ্গী স্ত্রী ঘোষাতকী । শ্বেতঘোষা ইতি ভাষা । ইতি রত্নমালা ॥

মৃদা স্ত্রী মৃত্তিকা । ইতি দ্বিরূপকোষঃ

মৃদাকরঃ পুং বজ্রং । ইতি শব্দমালা ॥

মৃদিতঃ ত্রি চূর্ণীকৃতঃ । ইতি মৃদ-

শ্যাস্তাং কর্ম্মণি ক্তপ্রত্যয়েননিষ্পন্নং॥

মৃদিনী স্ত্রী প্রশস্তমৃত্তিকা। ইতি শব্দচন্দ্রিকা॥

মৃদুঃ ত্রি অতীক্ষ্নঃ॥ কোমলঃ। ইত্যমরঃ॥ গুহকন্যাযাং স্ত্রী। ইতি রাজনির্ঘণ্টঃ॥

মৃদুকৃষ্ণাযসং ক্লী শীষকং। ইতিরাজনির্ঘণ্টঃ॥

মৃদুগণঃ পুং চিত্রানুরাধা মৃগশিরোরেবতী নক্ষত্রাণি। যথা। চিত্রা মিত্রমৃগান্ত্যভং মৃদুগণঃ। ইতি জ্যোতিস্তত্ত্বং॥

মৃদুগমনা স্ত্রী হংসী। ইতি রাজনির্ঘণ্টঃ॥ মন্দগমনাস্ত্রী চ॥

মৃদুচর্ম্মী পুং ভূর্জবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কোমলত্বগ্বিশিষ্টে ত্রি॥

মৃদুচ্ছদঃ পুং ভূর্জবৃক্ষঃ। ইতি হেমচন্দ্রঃ॥ গিরিজপীলুবৃক্ষঃ। ইতি জটাধরঃ॥ অক্ষরক্ষঃ॥ শ্রীতালঃ। ইতি রাজনির্ঘণ্টঃ॥

মৃদুতা স্ত্রী মৃদুত্বং। মৃদোর্ভাবঃ। ইতি ব্যাকরণং॥

মৃদুতালঃ পুং শ্রীতালবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কোমলতালশ্চ॥

মৃদুত্বক্ } পুং ভূর্জ্জবৃক্ষঃ। ইত্যমরঃ॥
মৃদুত্বচঃ } মৃদব স্ত্বচো যস্য মৃদুত্বক্ চান্তঃ। ভূর্জ্জোথ ভূর্জ্জপত্রঃ স্যাৎ মৃদুত্বক্ পত্রপুষ্পকঃ। ইতি কোষান্তর মিতি মধুঃ। অদন্ত নপুংসক ত্বচ শব্দেন আবন্ত ত্বচা শব্দেন বা বিগ্রহে মৃদুত্বচো যদন্তোপি। ভূর্জ্জো ভর্জো বহুপটো বহুত্বক্কো মৃদুত্বচঃ। ইতি স্বামী। ইত্যমরটীকাযাং ভরতঃ॥

মৃদুস্রকং ক্লী সুবর্ণং। ইতি শব্দচন্দ্রিকা॥

মৃদুপত্রঃ পুং নলঃ। ইতি রাজনির্ঘণ্টঃ॥ কোমলপর্ণেক্লী। তদ্বতি ত্রি॥

মৃদুপত্রী স্ত্রী চিল্লীশাকং। ইতি রাজনির্ঘণ্টঃ॥

মৃদুপর্ব্বকঃ পুং বেত্রঃ। ইতি রাজনির্ঘণ্টঃ॥ কোমলপর্ব্ববিশিষ্টে ত্রি॥

মৃদুপুষ্পঃ পুং শিরীষবৃক্ষঃ। ইতি রত্নমালা॥ কোমলকুসুমযুক্তে ত্রি॥

মৃদুফলঃ পুং বিকঙ্কতঃ॥ মধূলিকেরিকেঃ॥ বিকণ্টকবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কোমলফলবতি ত্রি॥

মৃদুলং ক্লী জলং। ইতি শব্দচন্দ্রিকা॥ কোমলে ত্রি। ইত্যমরঃ॥

মৃদুলোমকঃ পুং শশকঃ। ইতি হেমচন্দ্রঃ॥ কোমলরোমবিশিষ্টে ত্রি॥

মৃদুৎপলং ক্লী নীলপদ্মং। ইতি শব্দচন্দ্রিকা॥

মৃদ্গুঃ পুং মৎস্যভেদঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

মৃদ্বঙ্গং ক্লী বঙ্গং। ইতি হেমচন্দ্রঃ॥ কোমলাবয়বশ্চ॥

মৃদ্বী স্ত্রী কোমলাঙ্গী। ইতি মুগ্ধবোধব্যাকরণং॥ অপি চ। সদ্যঃ পুরী পরিসরেষু শিরীষমৃদ্বী সীতা যবাত্রি চতুরাণি পদানি গত্বা। গন্তব্যমস্তি কিয়দিত্যসকৃদ্‌ব্রুবাণা রামাশ্রুণঃ কৃতবতী প্রথমাবতারং। ইতি মহানাটকং॥ কপিলদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ॥

মৃদ্বীকা স্ত্রী দ্রাক্ষা। ইত্যমরঃ॥ কপিলদ্রাক্ষা। ইতি রাজনির্ঘণ্টঃ॥

মৃধ উ ঞ ক্লিদি। ইতি কবিকল্পদ্রুমঃ॥ উ মর্দ্ধিত্বা মৃদ্ধা। ঞ মর্ধতি মর্ধতে। ক্লিদি আর্দ্রভাবে। ইতি দুর্গাদাসঃ॥

মৃধং ক্লী যুদ্ধং। ইত্যমরঃ॥

মৃধা ব্যং মৃষা। ইত্যমরটীকাসারসুন্দরী॥

মৃন্মরুঃ পুং পাষাণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মৃশ শ ঔ মৃশি। ইতি কবিকল্পদ্রুমঃ॥ শ মৃশতি ঔ অম্রাক্ষীৎ অমার্ক্ষীৎ অমৃক্ষৎ। মৃশি ইতি ভালব্যান্তস্যৈব ক্বিপি রূপং। তেন অনির্দিষ্টার্থত্বাৎ স্পর্শনং পুনির্ধানঞ্চ অস্যার্থঃ। স্পর্শনে। পরামৃশৎ হর্ষজড়েন পাণিনা তদীয়মঙ্গং জলিশ বৃতাক্কিত। ইতি রঘুঃ॥ পুনির্ধানে। রামপ্রবাসে ব্যমৃশন্ন দোষং জনাপবাদং সনরেন্দ্রমৃত্যুং। কেকয়ীতি ভট্টিঃ॥ বিমৃশ্য পর্যামর্শঃ। মৃশি ইতি মূর্দ্ধন্যান্তপাঠো হেয়ঃ। তর্হি ক্ষমৈবার্থঃ স্যাৎ। ইতি দুর্গাদাসঃ॥

মৃষ তৃ ক ক্ষান্তৌ। ইতি কবিকল্পদ্রুমঃ॥ মৃষ তৃ ঞ ক্রমঃ॥ মূর্দ্ধন্যোপধৌ। ঞ মৃষতে মৃষতি। ক মৃষাভিং। ইতি দুর্গাদাসঃ॥

মৃষ উ সেচনে। ইতি কবিকল্পদ্রুমঃ॥ উ মর্ষিত্বা মৃষ্ট্বা। ইতি দুর্গাদাসঃ॥

মৃষ ক ক্ষান্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ক মর্ষয়তি। অয় মাত্মনেপদীত্যেকে। ইতি দুর্গাদাসঃ॥

মৃষ ঞ উ উ ক্ষান্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ঞ মর্ষতি মর্ষতে। উ মর্ষতে। উ মর্ষিত্বা মৃষ্ট্বা। অপি শুক্রমপরাধং মর্ষতি ব্রাহ্মণানামিতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

মৃষ য ঞ ক্ষান্তৌ। ইতি কবিকল্পদ্রুমঃ॥ য ঞ মৃষ্যতি মৃষ্যতে মমর্ষ। ইতি দুর্গাদাসঃ॥

মৃষা ব্যং মিথ্যা। ইত্যমরঃ॥ বৃথার্থ ইতি তট্টীকাসারসুন্দরী॥

মৃষার্থকং ক্লী অত্যন্তাসম্ভবার্থবাক্যং। তৎপর্য্যায়ঃ। আহৃতং ২। ইত্যমরঃ॥ দ্বে অত্যন্তাসম্ভবার্থে বচসি। আহন্যতেস্ম আহতং ক্তঃ। মৃষা মিথ্যা অর্থো ঽস্য মৃষার্থকং ইহ মৃষার্থং যৎসর্ব্বথা ন ঘটতে। যথা। এষ বন্ধ্যা সুতো যাতি খপুষ্পকৃতশেখরঃ। কূর্ম্মলোম তনুত্রাণঃ শশশৃঙ্গ ধনর্দ্ধর ইতি। যাবজ্জীব মহং মৌনী ব্রহ্মচারী পিতা মমেতি। অস্য চাযং ভেদঃ মৌনিত্বং ব্রহ্মচারিত্বং অন্যত্র সিদ্ধমেব। বন্ধ্যা সুতত্বং খপুষ্পত্বঞ্চান্যত্রাসিদ্ধমিতি। ইতি ভরতঃ॥

মৃষাধ্যায়ী পুং বকঃ। যথা। কঙ্কো বকো বকোটশ্চ তীর্থসেবী চ তাপসঃ। মীনঘাতী মৃষাধ্যায়ী নিশ্চলাঙ্গশ্চ দাম্ভিকঃ। ইতি রাজনির্ঘণ্টঃ॥

মৃষালকঃ পুং আম্রবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মৃষাবাদঃ পুং মিথ্যাবাক্যং। তৎপর্য্যায়ঃ। চটুশ্রী ২। ইতি জটাধরঃ॥

মৃষাবাদী ত্রি মিথ্যাবাদকঃ। তৎপর্য্যায়ঃ। মৃষোদ্যঃ। ইতি শব্দমালা॥ মিথ্যাভিযোক্তা চ॥

মৃষোদ্যং ক্লী মিথ্যাবাক্যং। ইতি মুগ্ধবোধব্যাকরণং॥

মৃষোদ্যঃ ত্রি মিথ্যাবাদী। ইতি শব্দমালা॥

মৃষ্টং ক্লী মরিচং। ইতি রাজনির্ঘণ্টঃ॥

মৃষ্টঃ ত্রি শোধিতং। ইত্যমরঃ॥

মৃষ্টেরুকঃ পুং বদান্যঃ॥ মিষ্টাশী॥ অতিথিদ্বিট। ইতি মেদিনী॥

মৃ গি বধে। ইতি কবিকল্পদ্রুমঃ॥ গি মৃণাতি। মূর্ণঃ। মূর্ত্তিঃ। ইতি দুর্গাদাসঃ॥

মে উ প্রতীদানে। ইতি কবিকল্পদ্রুমঃ॥ প্রতীদানং পরিবর্ত্তঃ। উ মযতে ধান্যেন মাষং লোকঃ। ইতি দুর্গাদাসঃ॥

মে ত্রি মহ্যং। আমাকে ইতি ভাষা। মম। আমার ইতি ভাষা। এতে অস্মৎশব্দস্য চতুর্থী ষষ্ঠ্যেকবচনাভ্যাং নিয়মে। ইতি ব্যাকরণং॥

মেকঃ পুং ছাগঃ। ইতি রাজনির্ঘণ্টঃ॥

মেকলকন্যকা স্ত্রী নর্ম্মদানদী। ইত্যমরঃ॥

মেকলাদ্রিজা স্ত্রী নর্ম্মদানদী। যথা। রেবেন্দুজা পূর্ব্বগঙ্গা নর্ম্মদা মেকলাদ্রিজা। ইতি হেমচন্দ্রঃ॥

মেখলা স্ত্রী স্ত্রীকট্যাভরণং। চন্দ্রহার গোট্ ইত্যাদি ভাষা। তৎপর্য্যায়ঃ। কাঞ্চী ২ সপ্তকী ৩ রসনা ৪ সারসনং ৫। ইত্যমরঃ॥ কাঞ্চিঃ ৬ রশনা ৭। সারসনং স্ত্রীকট্যাং বস্ত্রগুম্ফনং। ইতি স্বামী॥ কেচিত্তু একযষ্টি র্ভবেৎ কাঞ্চী মেখলা ত্বষ্টযষ্টিকা। রসনা ষোড়শ জ্ঞেয়া কলাপঃ পঞ্চবিংশকঃ॥ ইতি পঠন্তি। ইহ ত্বভেদাৎ পর্য্যায়তা। ইতি ভরতঃ॥ খড়্গাদিনিবন্ধনং। ইত্যমরঃ॥ শিক্কনিকা। চর্ম্মরজ্জ্বাদি। মুষ্টিদার্ঢ্যার্থং উপর্য্যধো লৌহবন্ধঃ। ইত্যেকে। ইত্যপি ভরতঃ॥*॥ শৈলনিতম্বঃ। ইতি মেদিনী॥ নর্ম্মদা নদী। ইতি শব্দরত্নাবলী॥ পৃশ্নিপর্ণী। ইতি রাজনির্ঘণ্টঃ॥*॥ উপনয়নকালে ধারণীয় মুঞ্জ নির্ম্মিত সূত্র ত্রয়ং। যথা। অথৈনং মানবকমাচার্য্য স্ত্রিঃ প্রদক্ষিণং ত্রিবৃত্ত মুঞ্জ মেখলাং পরিধাপয়ন্ মন্ত্রদ্বয়ং বাচয়তি। ইতি ভবদেবভট্টঃ॥ অপিচ। গোভিলঃ। মুঞ্জ কাশ তাম্বন্যো রসনাঃ। মুঞ্জঃ শরঃ তাম্বনঃ শনস্ত ভবা তাম্বনী। রসনা মেখলা। তথা চ মনুঃ। মৌঞ্জী ত্রিবৃৎ সমা শ্লক্ষ্ণা কার্য্যা বিপ্রস্য মেখলা। ক্ষত্রিয়স্য চ মৌর্ব্বী যা বৈশ্যস্য শনতান্তবী॥ মুঞ্জালাভে তু কর্ত্তব্যা কুশাশ্মন্তক বল্বজৈঃ। ত্রিবৃতা গ্রন্থিনৈকেন ত্রিভিঃ পঞ্চভি রেব বা॥ ইতি সংস্কারতত্ত্বং॥ অন্যচ। গর্ত্তাষ্টমে ~~হষ্টমে বাব্দে~~ স্বসূত্রোক্ত বিধানতঃ। দণ্ডী চ মেখলী সূত্রী কৃষ্ণাজিনধরো মনিঃ॥ মৌঞ্জী ত্রিবৃৎ সমা শ্লক্ষ্ণা কার্য্যা বিপ্রস্য মেখলা। মৌঞ্জ্যভাবে কুশেনাহু গ্রন্থিনৈকেন চ ত্রিভিঃ॥ ইতি কৌর্ম্মে উপরিভাগে ১১ অধ্যায়ঃ॥*॥ হোমকুণ্ডোপরি মৃদ্ঘটিত বেষ্টনবিশেষঃ। যথা। বশিষ্ঠপঞ্চরাত্রে। যাবান্ কুণ্ডস্য বিস্তারঃ খননং তাবদিষ্যতে। হস্তৈকে মেখলা ত্রিস্রো বেদাগ্নি নয়নাঙ্গুলাঃ॥ কুণ্ডে দ্বিহস্তে তা জ্ঞেয়া রস বেদ গুণাঙ্গুলাঃ। চতুর্হস্তে তু কুণ্ডে তা বসু তর্ক যুগাঙ্গুলাঃ॥ মেখলা ব্রহ্মচারি মেখলাবৎ কুণ্ডোপরি স্থিতা মৃদ্ঘটিতা তাশ্চ খাত দেশাদ্বাহ্যে একাঙ্গুলিরূপং কণ্ঠং পরিত্যজ্য উচ্চায়েণ বিস্তারেণ চেত্যাদি ক্রমেণ বেদাদ্যঙ্গুলাঃ এতদ্বিপরীতা তন্ত্রান্তরোক্তা ব্যবহার বিরুদ্ধাঃ। বেদাশ্চত্বারঃ অগ্নয় স্ত্রয়ঃ নয়নে দ্বে রসাঃ ষট্ গুণা স্ত্রয়ঃ। বসু তর্ক যুগানি অষ্ট

ষট্ চত্বারি । পিঙ্গলামতে হপি । খণ্ডিতাস্বেকাঙ্কলং ত্যক্ত্বা মেখলা-নাং বিধি র্ভবেৎ । ইতি তিথ্যাদিতত্ত্বে দুর্গোৎসবতত্ত্বং ॥

মেখলকন্যকা স্ত্রী নর্ম্মদানদী । ইত্য-মরটীকায়াং ভরতঃ ॥

মেঘঃ পুং মুস্তকঃ ॥ রাক্ষসঃ । ইতি শব্দরত্নাবলী ॥ স্বনামখ্যাতদ্রব্যপ-দার্থঃ । মেহতি সিঞ্চতি যঃ । তৎ-পর্য্যায়ঃ । অভ্রং ২ বারিবাহঃ ৩ স্তনয়িত্নুঃ ৪ বলাহকঃ ৫ ধারাধরঃ ৬ জলধরঃ ৭ তড়িত্বান্ ৮ বারিদঃ ৯ অম্বুভৃৎ ১০ ঘনঃ ১১ জীমূতঃ ১২ মুদিরঃ ১৩ জলমক ১৪ ধূমযোনিঃ ১৫ । ইত্যমরঃ ॥ অব্দং ১৬ পয়ো-ধরঃ ১৭ অম্ভোধরঃ ১৮ ব্যোমধূমঃ ১৯ ঘনাঘনঃ ২০ বায়ুদারুঃ ২১ ন-ভশ্চরঃ ২২ কন্ধরঃ ২৩ কন্ধঃ ২৪ নীরদঃ ২৫ গগনধ্বজঃ ২৬ বারিমুক্ ২৭ বারিবাহনঃ ২৮ জলমক্ ২৯ অব্দঃ ৩০ পর্জ্জন্যঃ ৩১ নভোগজঃ ৩২ মদয়ি-ত্নুঃ ৩৩ কুরঃ ৩৪ কন্দঃ ৩৫ গবেড়ুঃ ৩৬ গদামরঃ ৩৭ খতমালঃ ৩৮ রাতরথঃ ৩৯ শ্বেতনীলঃ ৪০ নাগঃ ৪১ জলকরঙ্কঃ ৪২ পেচকঃ ৪৩ ভেকঃ ৪৪ দর্দ্দরঃ ৪৫ । ইতি শব্দ-রত্নাবলী ॥ অম্বুদঃ ৪৬ তোযদঃ ৪৭ অম্বুবাহঃ ৪৮ । ইতি রত্নমালা ॥ পাথোদঃ ৪৯ গদাম্বরঃ ৫০ গা-ডবঃ ৫১ বারিমসিঃ ৫২ । ইতি ত্রিকাণ্ডশেষঃ ॥ * ॥ মেঘনায়কা যথা । ত্রিযুতে শাকবর্ষে তু চতুর্ভিঃ শোধিতে ক্রমাৎ । আবর্ত্তং বিদ্ধি সম্বর্ত্তং পুষ্করং দ্রোণ মম্বুদং ॥ * ॥ এষাং ফলানি । আবর্ত্তো নির্জ্জলো মেঘঃ সম্বর্ত্তশ্চ বহূদকঃ । পুষ্করো দুষ্করজলো দ্রোণঃ শস্যপূরকঃ । ইতি জ্যোতিস্তত্ত্বং ॥ * ॥ ত্রেতাযুগে তস্যোৎপত্তি যথা । অপাং সিদ্ধে প্রতিগতে তদা মেঘাত্মনা তু বৈ । মে-ঘেভ্য স্তনয়িত্নুভ্যঃ প্রবৃত্তং বৃষ্টি সর্জ্জ-নং ॥ সকৃদেব তযা বৃষ্ট্যা সংপৃক্তে পৃথিবীতলে । প্রাদুরাসংস্তদা তাসাং বৃক্ষা বৈ গৃহ সংজ্ঞিতাঃ ॥ সর্ব্ব প্রত্যু-পভোগস্তু তাসাং তেভ্যঃ প্রজাযতে । বর্ত্তযিষ্যন্তি তে স্বস্থাস্ত্রেতাযুগ মুখে প্রজাঃ ॥ ইতি কৌর্ম্মে ২৬ অধ্যাযঃ ॥ * ॥ প্রলযকালীন মেঘা যথা ॥ ত-তো গজকুলোন্মাদা স্তনিতৈঃ সমল-ঙ্কৃতাঃ । উত্তিষ্ঠন্তি সদা ব্যোম্নি ঘো-রাঃ সম্বর্ত্তকা ঘনাঃ ॥ কেচিন্নীলোৎ-পল শ্যামাঃ কেচিৎ কুমুদ সন্নিভাঃ । ধূম্রবর্ণা স্তথা কেচিত্তথা পীতাঃ পযোধরাঃ ॥ কেচিদ্রক্তা ভুবর্ণাশ্চ

স্থূলাঃ ক্ষারস্নিভা স্তথা। শঙ্খকুন্দনিভা শ্চান্যে জাত্যাঞ্জননিভাঃ পরে॥ মনঃশিলানিভাস্ত্বন্যে কপোতসদৃশাঃ পরে। কেচিদ্রুদ্রাক্ষবর্ণাভা স্তথান্যে ক্ষীরসন্নিভাঃ॥ তথা কর্ব্বুর বর্ণাভা ভিন্নাঞ্জননিভা স্তথা॥ ইন্দ্রগোপনিভাঃ কেচিৎ হরিতালনিভা স্তথা। কাকাণ্ডকনিভাঃ কেচিদ্দিবিষ্ঠন্তি ঘনা দিবি॥ কেচিৎ পর্ব্বতসঙ্কাশাঃ কেচিদ্গজকুলোপমাঃ। কূটাগারনিভা শ্চান্যে কেচিন্মীনকুলোদ্বহাঃ॥ বহুরূপা ঘোররূপা ঘোরস্বর নিনাদিনঃ। তদা জলধরাঃ সর্ব্বে পূরয়ন্তি নভস্তলং॥ ততস্তে জলদা ঘোরা বারিণা ভাস্করাত্মজাঃ। সপ্তধা সংবৃতাত্মান স্তমগ্নিং শময়ন্ত্যত॥ ততস্তে জলদা বর্ষং বর্ষন্তীহ মহৌঘবৎ। সুঘোরমশিবং সর্ব্বং নাশয়ন্তি চ পাবকং। প্রবৃত্তেন তদাত্যর্থ মম্ভসা পূর্য্যতে কিল॥ অদ্ভিস্তেজোংশ ভূতত্বাত্তদাগ্নিং প্রবিশত্যপি। নষ্টে চাগ্নৌ বর্ষশতৈঃ পযোদা জলসম্ভবাঃ॥ প্লাবয়ন্তোথ ভুবনং মহাজল পরিস্রবৈঃ। ধারাভিঃ পূরয়ন্তীদং চোদ্যমানাঃ স্বয়ম্ভুবা। উদ্যন্তং সলিলৌঘৈশ্চ বেলা ইব মহোদধেঃ॥ সাদ্রি দ্বীপা তথা পৃথ্বী জলৈঃ সংছাদ্যতে শনৈঃ। আদিত্যরশ্মিভিঃ পীতং জলমভ্রেষু তিষ্ঠতি॥ পুনঃ পততি তদ্ভূমৌ পূর্য্যন্তে তেন চার্ণবাঃ॥ ইতি কৌর্ম্মে উপরিভাগে ৪২ অধ্যায়ঃ॥ * ॥মেঘস্য উৎপত্তির্যথা। তেজো হ সর্ব্বভূতেভ্য আদত্তে রশ্মিভির্জলং। সমুদ্রাদ্বায়ুসংযোগা দুহ্যমঃপ্রবহন্ত্যপঃ॥ ততোঽয়নবশাৎ কালে পরিবৃত্তো দিবাকরঃ। নিযচ্ছতি পযোমেঘে শুক্লা শুক্লৈর্গভস্তিভিঃ॥ অভ্রস্থাঃ প্রপতন্ত্যাপো বাযুনা সমুদীরিতাঃ। সর্ব্বভূত হিতার্থায় বাযুভূতাঃ সমন্ততঃ॥ ততো বর্ষতি সোমাংসি সর্ব্বভূত বিবৃদ্ধয়ে। বাযব্যং স্তনিতঞ্চৈব বিদ্যুদগ্নি সমপ্রভং॥ মেরুসান্নিহেত্যাতো মেঘত্বং ব্যঞ্জয়ন্তি চ। ভূমিষ্যন্তি যথা চাপ স্তদন্তং কবযো বিদুঃ॥ * ॥ অপি চ। মেঘানাং পুনরুৎপত্তৌ ত্রিবিধা যোনিরুচ্যতে। অগ্নিজা ব্রহ্মজা শ্চৈব পক্ষজাশ্চ পৃথগ্বিধাঃ॥ ত্রিধা ত্রিধাগমান্তেষাং বক্ষ্যামি বিস্তসম্ভবং। আগ্নেযাঃ স্বমজাঃপ্রোক্তাস্তেষাং ধূমঃ প্রবর্ত্তং॥ জাতা দুর্দিন বাতাম্রে সগুণাস্তে ব্যবস্থিতাঃ। মহিষাশ্চ বরাহাশ্চ মত্তমাতঙ্গ রূপিণঃ॥ ভূত্বা ধরণিমভ্যেত্য রমন্তে বিচরন্তি চ। জীমূতা

নাম্নাস্তে মেঘা যে তেভ্যো জীব সম্ভবাঃ ॥ বিদ্যুদ্গুণ বিহীনাশ্চ জলধারাবলম্বিনঃ । মৃদবেকা মহাকায়া আবহস্য চ সানুগাঃ ॥ ক্রোশ মাত্রাচ্চ বর্ষন্তি ক্রোশার্দ্ধাদপি বা পুনঃ । পর্ব্বতাগ্র নিতম্বেষু বর্ষন্তি দিপিনেষু চ ॥ বলাকা গর্দ্দভা শ্চৈব বলাকা গর্ব্ভধারিণঃ । ব্রহ্মজা নাম তে মেঘা ব্রহ্ম নিশ্বাস সংভবাঃ ॥ দ্বিতীয়ং প্রবহম্বায়ুং মেঘা স্তে তু সমাশ্রিতাঃ । ইতো যোজন মাত্রাচ্চ সার্দ্ধার্দ্ধাৎদ্বিকৃতাদপি ॥ বৃষ্টিসর্গাদ্দিব স্তেষাং ধারাসারাঃ প্রকীর্ত্তিতাঃ । শক্রেণপক্ষা যচ্ছিন্নাঃ পর্ব্বতানাং মহৌজসাং ॥ কামগানাং প্রবৃদ্ধানাং প্রজানাং শিব মিচ্ছতা । পুষ্করাবর্ত্তকা স্তেন করণেনেহ বিশ্রুতাঃ ॥ নানা রূপধরা শ্চৈব মহাঘোরস্বনাশ্চ তে । কল্পান্ত বৃষ্টেঃ স্রষ্টারঃ সম্বর্ত্তাগ্নে র্নিয়ামকাঃ ॥ বর্ষন্তি তে যুগান্তেষু তৃতীযা স্তে প্রকীর্ত্তিতাঃ । অনেকরূপ সংস্থানাঃ পূরয়ন্তো মহীং জলৈঃ । বায়ং পরিবহন্তেস্য রাশ্রিতাঃ কল্প সাধকাঃ ॥ যোন্যস্যাণ্ডস্য ভিন্নস্য প্রাকৃত প্রভব স্তদা ॥ যস্মাদ্ব্রহ্মা সমুৎপন্ন শ্চতুর্ব্বক্ত্রঃ স্বয়ম্ভুবঃ । তস্যৈবাণ্ডস্য পালা হি সর্ব্বে মেঘা প্রকীর্ত্তিতাঃ ॥ তেষা মাপ্যায়নং ধূমঃ সর্ব্বেষা মবিশেষতঃ । তেষাং শ্রেষ্ঠস্তু পর্জ্জন্য শ্চত্বার শ্চৈব দিগ্গজাঃ ॥ গজানা পর্ব্বতানাঞ্চ মেঘানাং ভোগিভিঃ সহ । কুলমেকং পৃথগ্ভূতং যোনি স্ত্বেকা জলং স্মৃতং ॥ পর্জ্জন্যোদিগ্গজাশ্চৈব হেমন্তে শীত সংভবাং । তুষার বৃষ্টিং বর্ষন্তি হিম শস্য বিবৃদ্ধয়ে ॥ ইতি ব্রহ্মাণ্ডে ৫৮ অধ্যায়ঃ ॥*॥*॥ ষড়্রাগান্তর্গত রাগবিশেষঃ । যথা । ভৈরবো২থ বসন্তশ্চ নটো নারায়ণ স্তথা । শ্রীরাগো মেঘরাগশ্চ ষড়েতে পুরুষাহ্বয়াঃ ॥ তস্য রাগিণ্যো যথা । ললিতা মালসী গৌড়ী নাটী দেবকিরী তথা । মেঘ রাগস্য রাগিণ্যো ভবন্তীমাঃ সুমধ্যমাঃ ॥ অয়ং হনুমন্মতে ষষ্ঠরাগো ব্রহ্মণো মস্তকান্নির্গতঃ । আকাশাজ্জাত ইতিচ বদন্তি । অস্য জাতিঃ ঔড়বঃ । অর্থাৎ ধ ন স ঋ গ ইতি পঞ্চস্বর নিলিতঃ । অস্য গৃহং ধৈবতস্বরঃ । বর্ষর্ত্তৌ রাত্রিশেষে গানসময়ঃ । অস্যাকারঃ সুন্দরপুরুষঃ । শ্যামবর্ণঃ । উষ্ণীষবদ্ধকেশঃ । শাণিত খড়্গহস্তঃ । হনুমন্মতে অস্য পঞ্চরাগিণ্যো যথা । টঙ্কঃ ১ মল্লারী ২ গুর্জ্জরী ৩ ভূপালী ৪ দেশকারীচ ৫ । অস্যাষ্টপুত্রা যথা ।

জালন্ধরঃ ১ সারঃ ২ নটনারায়ণঃ ৩ শঙ্করাভরণঃ ৪ কল্যাণঃ ৫ গজধরঃ ৬ গান্ধারঃ ৭ সহানা ৮॥ কলানাথমতে। অস্য রাগিণ্যঃ ষট্ যথা। বঙ্গালী ১ মধুরা ২ কামোদা ৩ ধনাশ্রীঃ ৪ তীর্থকী ৫ দেবালী ৬। এতন্মতেপি অষ্টৌ পুত্রাঃ কিন্তু নটনারায়ণ শঙ্করাভরণ কল্যাণ স্থানে কেদারা মারু জলভরতা জ্ঞেযাঃ॥ সোমেশ্বরমতে অস্য ষড়্রাগিণ্যো যথা। মল্লারী ১ সোরটী ২ সাবীরী ৩ কৌশিকী ৪ গান্ধারী ৫ হরশিঙ্গারী ৬। এতন্মতেপি পুত্রাঃ পূর্ব্ববৎ॥ রাগিণী সহিতস্যৈতদ্রাগস্য বর্ষর্ত্তৌ গানসময়ঃ॥ ভরতমতে তস্য পঞ্চ রাগিণ্যো যথা। মল্লারঃ ১ মূলতানী ২ দেশী ৩ রতিবল্লভা ৪ কাবেরী ৫। তন্মতে অষ্টৌপুত্রা যথা। কলাধরঃ ১ বাগেশ্বরী ২ সহানা ৩ পূরীয়া ৪ কানরা ৫ তিলকঃ ৬ স্তম্ভঃ ৭ শঙ্করাভরণঃ ৮। তন্মতে অষ্টপুত্রাণাং ভার্য্যা যথা। করণাটী ১ কাদবী ২ কদনাটঃ ৩ পাহাড়ী ৪ মাঁবাঃ ৫ পরজঃ ৬ নটনঞ্জরী ৭ শুদ্ধনটঃ ৮। ইতি সঙ্গীতশাস্ত্রং॥

মেঘকফঃ পুং করকা। ইতি হারাবলী॥

মেঘকালঃ পুং বর্ষর্ত্তুঃ। ইতি জটাধরঃ॥

মেঘচিন্তকঃ পুং চাতকপক্ষী। ইতি শব্দচন্দ্রিকা॥

মেঘজং ত্রি মেঘভবস্তু। মেঘাজ্জায়তে ইতি ব্যুৎপত্ত্য ডপ্রত্যয়েন নিষ্পন্নং॥

মেঘজাবং ক্লী অভ্রিযং। ইতি শব্দচন্দ্রিকা॥

মেঘজীবনঃ পুং চাতকপক্ষী। ইতি রাজনির্ঘণ্টঃ॥

মেঘজ্যোতিঃ পুং বজ্রাগ্নিঃ। তৎপর্য্যায়ঃ। ইরম্মদঃ ২। ইত্যমরঃ॥ মেঘস্যজ্যোতি রগ্নি র্মেঘজ্যোতিঃ। জ্যোতি রগ্নৌ সমাখ্যাতং জ্যোতিশ্চন্দ্রো নিগদ্যতে। ইতি রন্তিঃ॥ ইরযা জলেন মাদ্যতি দীপ্যতে ইতি ইরম্মদঃ। মেঘাগ্নি র্হি জলেনৈব দীপ্যতে। মদীভি র্যক্রি হর্ষে তৃ ভৃ বৃ দৃ জীতি খঃ খিত্যব্যাজিতি মনস্বৌ। অন্যোন্য সংঘট্টেন মেঘাগ্নিঃসৃত্য যজ্জ্যোতি র্বৃক্ষাদৌ পততি স ইরমদঃ। মেঘইত্যুপলক্ষণং তেন বাতজো হপীরম্মদঃ সোপি হি ইরযা জলেন মাদ্যতীতি কৌমুদী। মেঘাগ্ন্যাদি রিরম্মব ইতি শব্দার্ণবঃ। ইতি ভটীকাগাং ভরতঃ॥

মেঘডম্বরঃ পুং মেঘস্যাডম্বরঃ। মেঘ

গর্জ্জনং। যথা। অজাযুদ্ধে ঋষিশ্রাদ্ধে প্রভাতে মেঘডম্বরে। দম্পত্যোঃ কলহে চৈব বহ্বারম্ভে লঘুক্রিয়া॥ ইত্যুদ্ভটঃ॥

মেঘতিমিরং ক্লী মেঘাচ্ছন্নদিনং। ইতি হলায়ুধঃ॥

মেঘদীপঃ পুং বিদ্যুৎ। ইতি শব্দমালা॥

মেঘনাদঃ পুং বরুণঃ॥ রাবণপুত্রঃ। ইতি মেদিনী॥ মেঘশব্দঃ। ইতি হেমচন্দ্রঃ॥ পলাশবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥ তণ্ডুলীয়শাকঃ। ইতি রাজনির্ঘণ্টঃ॥

মেঘনাদজিৎ পুং লক্ষ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মেঘনাদানুলাসকঃ পুং ময়ূরঃ। ইতি রাজনির্ঘণ্টঃ॥

মেঘনাদানুলাসী পুং ময়ূরঃ। ইত্যমরঃ॥

মেঘনামা পুং মুস্তকঃ। ইত্যমরঃ॥

মেঘনির্ঘোষঃ পুং মেঘশব্দঃ। তৎপর্য্যায়ঃ। স্তনিতং ২ গর্জ্জিতং ৩ রসিতং ৪। ইত্যমরঃ॥ ধ্বনিতং ৫ হ্রাদিতং ৬। ইতি ভরতঃ॥

মেঘপুষ্পং ক্লী জলং। ইত্যমরঃ॥ পিণ্ডাভ্রং॥ নদীজলং। ইতি মেদিনী॥

মেঘপুষ্পঃ পুং শক্রহয়ঃ। ইতি শব্দরত্নাবলী॥

মেঘপ্রসবঃ পুং জলং। ইতি রাজনির্ঘণ্টঃ॥

মেঘভূতিঃ পুং বজ্রং। ইতি শব্দরত্নাবলী॥

মেঘমালঃ পুং রমাগর্ভজাত কল্কিদেবপুত্রঃ। যথা। তথা রমা সিতে পক্ষে ইত্যুপক্রম্য সা পুত্রং সুষুবে সাধ্বী মেঘমাল বলাহকৌ। মহোৎসাহৌ মহাবীর্য্যৌ সুভগৌ কল্কিসম্মতৌ॥ ইতি কল্কিপুরাণে ৩১ অধ্যায়ঃ॥

মেঘমালা স্ত্রী মেঘশ্রেণী। তৎপর্য্যায়ঃ। কাদম্বিনী ২। ইত্যমরঃ॥

মেঘযোনিঃ পুং ধূমঃ। ইতি শব্দরত্নাবলী॥

মেঘরাগঃ পুং ষড়্রাগান্তর্গতরাগবিশেষঃ। ইতি হলায়ুধঃ॥ অস্য বিবরণং মেঘশব্দে দ্রষ্টব্যং॥

মেঘবর্ণা স্ত্রী নীলীবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মেঘবর্ত্ম ক্লী আকাশং। ইতি ত্রিকাণ্ডশেষঃ॥

মেঘবহ্নিঃ পুং বজ্রাগ্নিঃ। তৎপর্য্যায়ঃ। ইরম্মদঃ ২। ইতি হেমচন্দ্রঃ॥

মেঘবাহনঃ পুং ইন্দ্রঃ। ইত্যমরঃ॥

মেঘবেশ্ম ক্লী আকাশং । ইতি জটাধরঃ ॥

মেঘসারঃ পুং চীনকর্পূরঃ । ইতি রাজনির্ঘণ্টঃ ॥

মেঘসুহৃদ্ পুং ময়ূরঃ । ইতি হেমচন্দ্রঃ ॥

মেঘস্তনিতোদ্ভবঃ পুং বিকণ্টকবৃক্ষঃ । ইতি রাজনির্ঘণ্টঃ ॥

মেঘাখ্যং ক্লী মুস্তকং । ইতি রত্নমালা ॥

মেঘাগমঃ পুং বর্ষাকালঃ । ইতি শব্দরত্নাবলী ॥ মেঘস্যাগমনঞ্চ ॥

মেঘানন্দা স্ত্রী বলাকা । ইতি রাজনির্ঘণ্টঃ ॥

মেঘানন্দী পুং ময়ূরঃ । ইতি রাজনির্ঘণ্টঃ ॥

মেঘান্তঃ পুং শরৎকালঃ । ইতি রাজনির্ঘণ্টঃ ॥

মেঘাস্থি ক্লী করকা । ইতি ত্রিকাণ্ডশেষঃ ॥

মেঘাস্পদং ক্লী আকাশং । ইতি ধনঞ্জয়ঃ ॥

মেঘোদরঃ পুং অর্হৎপিতা । ইতি হেমচন্দ্রঃ ॥

মেচকং ক্লী স্রোতোঞ্জনং ॥ অন্ধকারঃ । ইতি মেদিনী ॥ নীলাঞ্জনং । ইতি রাজনির্ঘণ্টঃ ॥

মেচকঃ পুং ময়ূরচন্দ্রকঃ ॥ শ্যামলঃ । ইতি মেদিনী ॥ ধূমঃ ॥ মেঘঃ ॥ শোভাঞ্জনঃ । ইতি শব্দরত্নাবলী ॥ শ্যামলগুণযুক্তে ত্রি । ইত্যমরঃ ॥

মেচকাভিধা স্ত্রী পাতালগরুড়ীলতা । ইতি রাজনির্ঘণ্টঃ ॥

মেট ধ উন্মাদে । ইতি কবিকল্পদ্রুমঃ ॥ ধ অমিমেটৎ । মেটতি লোকঃ । উন্মাদ্যতীত্যর্থঃ । ইতি দুর্গাদাসঃ ॥

মেটুলা স্ত্রী আমলকী । ইতি শব্দচন্দ্রিকা ॥

মেঠঃ পুং হস্তিপকঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মেড ধ উন্মাদে । ইতি কবিকল্পদ্রুমঃ ॥ ধ অমিমেডৎ । মেডতি উন্মাদ্যতীত্যর্থঃ । ইতি দুর্গাদাসঃ ॥

মেঢ্রঃ পুং শিশ্নঃ ॥ স তু গর্ভস্থস্য সপ্তভির্মাসৈর্ভবতি । ইতি সুখবোধঃ । মেষঃ । ইত্যমরঃ ॥

মেঢ্রশৃঙ্গী স্ত্রী মেষশৃঙ্গীবৃক্ষঃ । ইতি রত্নমালা ॥

মেণ্টঃ পুং হস্তিপকঃ । ইতি হারাবলী ॥

মেণ্ডঃ পুং হস্তিপকঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মেণ্ঢঃ পুং মেষঃ । ইতি শব্দরত্নাবলী ॥

মেথ ঋ ঞ সঙ্গে ॥ বধে ॥ মেথায়াং । ইতি কবিকল্পদ্রুমঃ ॥ ঞ মেথতি মেথতে ধীরো গুণিনা সঙ্গত ইত্যর্থঃ । ঋ অমিমেথৎ । মিমেথ । ইতি দুর্গাদাসঃ ॥

মেথিঃ পুং খলেপশুবন্ধনার্থনস্তম্ভদারু । মেইকাঠ ইতি ভাষা । যথা । মেধি মেথিঃ খলেবালী খলে গোবন্ধদারু যৎ । ইতি হেমচন্দ্রঃ ॥

মেথিকা স্ত্রী ক্ষুপবিশেষঃ । মেথিশাক ইতি ভাষা । তৎপর্য্যায়ঃ । মেথিনী ২ মেথী ৩ দীপনী ৪ বহুপত্রিকা ৫ বোধিনী ৬ গন্ধবীজা ৭ জ্যোতিঃ ৮ গন্ধফলা ৯ বল্লরী ১০ চন্দ্রিকা ১১ মন্থা ১২ মিশ্রপুষ্পা ১৩ কৈরবী ১৪ কুঞ্চিকা ১৫ বহুপর্ণী ১৬ পীতবীজা ১৭ । অস্যা গুণাঃ । কটুত্বং । উষ্ণত্বং । রক্তপিত্তপ্রকোপণত্বং । অরোচকহরত্বং । দীপ্তিকারিত্বং । বাতঘ্নত্বং । দীপনত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

মেথিনী স্ত্রী মেথিকা । ইতি রাজনির্ঘণ্টঃ ॥

মেথী স্ত্রী মেথিকা । ইতি রাজনির্ঘণ্টঃ ॥

মেদ ঋ ঞ বধমেধযোঃ । ইতি কবিকল্পদ্রুমঃ ॥ ঋ অমিমেদৎ । ঞ মেদতি মেদতে শাস্ত্রার্থং শিষ্যঃ ধারয়তীত্যর্থঃ । মিমেদ । ইতি দুর্গাদাসঃ ॥

মেদঃ ক্লী মাংসপ্রভবধাতুবিশেষঃ । তৎপর্য্যায়ঃ । বপা ২ বসা ৩ । ইত্যমরঃ ॥ মেদঃ ৪ । অকারান্ত ইতি ভরতঃ ॥ অস্য গুণাঃ । বাতনাশিত্বং । বল পিত্ত কফ দাতৃত্বঞ্চ । ইতি রাজবল্লভঃ ॥ অথ মেদসঃ স্বরূপমাহ । যন্মাংসং স্বাগ্নিনা পক্বং তন্মেদ ইতি কথ্যতে । তদতীব শুক্র স্নিগ্ধং বলকার্য্যতি বৃংহণং ॥ অথ মেদসঃ স্থানমাহ । মেদো হি সর্ব্বভূতানামুদরেম্বস্থিষু স্থিতং । অতএবোদরে বৃদ্ধিঃ প্রায়ো মেদস্বিনো ভবেৎ ॥ ইতি ভাবপ্রকাশঃ ॥*॥ রোগবিশেষঃ । তত্র মেদসো বিপ্রকৃষ্টং নিদানমাহ । অব্যায়াম দিবাস্বপ্ন শ্লেষ্মলাহারসেবিনঃ । মধুরো ঽন্নরসঃ প্রায়ঃ স্নেহান্মেদো বিবর্দ্ধয়েৎ ॥ অন্নরসঃ আমদ্রবঃ । তথাচ সুশ্রুতঃ । আমদ্রবান্নরসো মধুরশ্চ ভবতীতি । মেদসোতিপ্রবৃদ্ধৌ বৈগুণ্য মাহ । মেদসাবৃত মার্গত্বাৎ পুষ্যন্ত্যন্যে ন ধাতবঃ । মেদস্তু চীয়তে তস্মাদশক্তঃ সর্ব্বকর্ম্মসু । অন্যে ধাতবঃ অস্থ্যাদয়ঃ

শুক্রান্তাঃ। নপুষ্যন্তি নপুষ্টা ভবন্তি। চীযতে সঞ্চিতং ভবতি বৰ্দ্ধত ইতি যাবৎ। তস্মাৎ মেদস্বী সৰ্ব্বকৰ্ম্মসু অশক্তঃ স্যাৎ। মেদসঃ সৌক্ষ্মার্য্যাৎ। অপরানপি দোষানাহ। ক্ষুদ্‌শ্বাস তৃষামোহ স্বপ্ন ক্রন্থন সাদনৈঃ। যুক্তঃ ক্ষুৎ স্বেদ দৌগন্ধ্যে রল্প প্রাণো হল্পমৈথুনঃ॥ মেদসঃ স্বেদ দৌর্গন্ধ্যাজ্জাযন্তে জন্তবো নরঃ। ক্রন্থনং উচ্ছাসাবরোধঃ। কণ্ঠেন ঘুঘুর ইত্যন্যে। জন্তবঃ ক্রনযঃ॥ মেদসঃ স্থানমাহ। মেদস্তু সৰ্ব্বভূতানা মুদরেম্বস্থিষু স্থিতং। অতএবোদরে বৃদ্ধিঃ প্রাযো মেদস্বিনো ভবেৎ॥ মেদস্বিনো হপি বৃদ্ধৌ হেতু মাহ। মেদসাবৃত মার্গত্বাদ্বাযুঃ কোষ্ঠে বিশেষতঃ। চরন্ সন্ধুক্ষযত্যগ্নি মাহারং শোষযত্যপি॥ তস্মাৎ শীঘ্রন্ত জরযত্যাহারঞ্চাপি কাঙ্ক্ষতি। বিকারান্ সোশ্নুতে ঘোরান্ কাংশ্চিৎ কালব্যতিক্রমাৎ। সন্ধুক্ষযতি প্রদীপযতি। সমেদস্বী আহারং শীঘ্রং জরযতি পুন র্ভোক্তুং কাঙ্ক্ষতি স দীপ্তাগ্নিঃকাল ব্যতিক্রমাৎ ভোজনকালাতিক্রমাৎ। কাংশ্চিদ্বিকারান্ বাত পিত্ত কৃতান্ ঘোরান্ অশ্নুতে প্রাপ্নোতি। এতে বাত পিত্তে মেদসাবরুদ্ধে বিশেষাদুপদ্রবকরে ইত্যাহ। এতাবুপদ্রবকরৌ বিশেষাৎ পিত্ত মারুতৌ। এতৌহি দহতঃ স্থূলং বনং দাবানলং যথা॥ এতৌ পিত্ত মারুতৌ মেদসা রুদ্ধ মার্গত্বাৎ কোষ্ঠ মধ্যে প্রবৃদ্ধৌ সন্তৌ বিশেষাদুপদ্রবকরৌ দহতঃ নাশযেতাং। মেদসোতিবৃদ্ধে বিনাশহেতুত্বমাহ। মেদস্যতীব সংবৃদ্ধে সহসৈবানিলাদযঃ। বিকারান্ দারুণান্ কৃত্বা নাশযন্ত্যাশু জীবিতং॥ বিকারান্ প্রমেহ পিডকা জ্বর ভগন্দর বিদ্রধি বাতরোগাণামন্যতমান্॥ অতিস্থূলতযা বৈগুণ্য মাহ। অতিস্থূলেষু সংদৃষ্টা বিসর্পাঃ স ভগন্দরাঃ। জ্বরাতীসার মেহার্শঃ শ্লীপদাযবিকাদযঃ॥ অতিস্থূলস্য লক্ষণ মাহ। মেদো মাংসাতিবৃদ্ধত্বাচ্চল স্ফিগুদর স্তনঃ। অযথোপচযোৎসাহো নরোহতিস্থূল উচ্যতে॥ অযথোপচযোৎসাহঃ ন যথা উপচযো মাংসোপচযঃ উৎসাহো বলঞ্চ যস্য সঃ॥ *॥ *॥ অথ মেদস্য চিকিৎসা। পুরাণাঃশালযোমুদ্গাঃ কুলত্থোদ্দাল কোদ্রবাঃ। লেখনা বস্তয শ্চাপি সেব্যা মেদস্বিনা সদা॥ শ্রম চিন্তা ব্যবাযাধ্ব ক্ষৌদ্র জাগরণ প্রিযঃ। হন্ত্য-

বর্জ্য মতি স্থৌল্যং যব শ্যামাক ভোজনঃ ॥ ক্ষারং বাতারিপত্রস্য হিঙ্গুযুক্তং পিবেন্নরঃ। সংহিতং ভক্তমণ্ডেন মেদো বৃদ্ধি নিবৃত্তয়ে॥ গুডূচী ত্রিফলাক্বাথঃ পীতো মেদোহরঃ স্মৃতঃ। গুডূচী ত্রিফলাক্বাথস্তথা লোহরজোযুতং॥ ক্ষৌদ্রেণ ত্রিফলাক্বাথঃ পীতো মেদহরঃ পরঃ। প্রাতর্মধুযুতং বারি সেবিতং স্থৌল্য নাশনং॥ উষ্ণমন্নস্য মণ্ডং বা পিবেৎ কৃষ্টতনুর্ভবেৎ। ব্যোষাগ্নি ত্রিফলা মুস্ত বিডঙ্গৈ র্গুগ্গুলুং সমং। খাদেৎ সর্ব্বান্ জয়েদ্রোগান্মেদঃশ্লেষ্মানিবাতজান্॥ পিপ্পলী মধুনা সেব্যা মেদঃ কফ বিনাশিনী। বব্বূরপত্রস্বরসেন গাঢ মদ্বর্ত্তনং স্থৌল্যহরং প্রদিষ্টং। বাসাদলরসো লেপাচ্ছঙ্খচূর্ণেন সংযুতঃ। বিল্বপত্ররসো বাপি দেহ দৌর্গন্ধ্য নাশনঃ॥ নিম্বপত্র স্বরসঃ প্রক্ষিত কক্ষাদি যোজিতং জয়তি। দথহরিদ্রোদ্বর্ত্তন মচিরাচির দেহ দৌর্গন্ধ্যং। শিরীষ লামজ্জক হেমলোধ্রৈ স্ত্বগ্দোষ সংস্বেদ হরঃ প্রঘর্ষঃ॥ শরীর দৌর্গন্ধ্যহরঃ প্রদেহঃ পত্রাম্বু লোধ্রাভয় চন্দনানাং। শিরীষস্যাত্র পত্রং গ্রাহ্যং ব্যবহারাৎ। লামজ্জকং সুগন্ধিতৃণবিশেষ স্তদলাভে উশীরং গ্রাহ্যং। হেম নাগকেশরং। অম্বু বালকং। অভয় মুশীরং। হরীতকী ~~তু সং~~ পিষ্য দেহ মুদ্বর্ত্তন নরঃ। পশ্চাৎ স্নানং প্রকুর্বীত দেহ মেদোপশান্তয়ে॥ বঙ্গলস্য দলৈঃ সম্যগ্বারিণা পরিপেষিতৈঃ। দেহ মুদ্বর্ত্তয়েৎ পশ্চাদ্ধরীতক্যা সুপিষ্টয়া॥ তুষ উদ্বর্ত্তনং কুর্য্যাৎ পশ্চাৎ স্নানং সমাচরেৎ। প্রস্বেদান্ মুচ্যতে শীঘ্রং মেদো বৃদ্ধি সম্ভবাৎ॥ ইতি মেদো ঽধিকারঃ। ইতি ভাবপ্রকাশঃ॥

মেদঃ পুং বপা। ইতি শব্দচন্দ্রিকা॥ ম্লেচ্ছজাতিবিশেষঃ। ইতি জটাধরঃ॥ অলম্বুষা। ইতি রাজনির্ঘণ্টঃ

মেদকঃ পুং জগলঃ। মেষা ইতি ভাষা। ইত্যমরঃ॥

মেদজঃ পুং ভূমিজগুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥ মেদোভবশ্চ॥

মেদঃসারা স্ত্রী মেদা। ইতি রাজনির্ঘণ্টঃ॥

মেদস্কৃৎ ক্লী মাংসং। ইতি হেমচন্দ্রঃ॥

মেদা স্ত্রী অষ্টবর্গপ্রসিদ্ধৌষধিবিশেষঃ। তৎপর্য্যায়ঃ। মেদোদ্ভবা ২ জীবনী ৩ শ্রেষ্ঠা ৪ মণিচ্ছিদ্রা ৫

বিতাবল্লী ৬। ইতি প্রয়োগাল্ম॥ বসা ৭ বল্লপর্ণিকা ৮ মেদঃসারা ৯ স্নেহবতী ১০ মেদিনী ১১ মধুরা ১২ স্নিগ্ধা ১৩ মেধ্যা ১৪ দ্রুবা ১৫ সাধ্বী ১৬ শল্যদা ১৭ বহুরন্ধ্রিকা ১৮ পুরুষদন্তিকা ১৯। অস্যা গুণাঃ। মধুরত্বং। শীতত্বং। পিত্ত দাহার্ত্তি কাশ রাজযক্ষ জ্বর নাশিত্বং। বাতদোষ কারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ তস্য লক্ষণং যথা। শল্লকন্দো নথচ্ছেদ্যো মেদো ধাতুমিব স্রবেৎ। যঃ স মেদেতি বিজ্ঞেয়ো জিজ্ঞাসা তৎপরৈজ্ঞনৈঃ॥ মেদা মহামেদোস্থানে শতাবরী মূলী। ইতি ভাবপ্রকাশঃ॥ অস্যা বিবরণং মহামেদাশব্দে দ্রষ্টব্যং॥

মেদিনী স্ত্রী মেদা॥ কাশ্মরী। ইতি রাজনির্ঘণ্টঃ॥ পৃথিবী। ইত্যমরঃ॥ মেদো বিদ্যতে ২স্যাং মেদিনী সা। ম্ভান্মেদঃ শব্দাদিন্ সলোপশ্চ নিপাত্যতে ইতি পরে। স্বমতে মেদঃ সমাবার্থো ২দন্তো মেদশব্দো ২স্তি। তৃষ্ণা কণ্ডু কৃমিহরা মলঘ্নো মেদজঃ ২হেতি শালিহোত্রঃ। নৈকাজ্ঞাদিতি ইন্। তথাচোক্তং। মধুকৈটভযো রাসীন্মেদসৈব পরিপ্লুতা। তেনেয়ং মেদিনী দেবী প্রোচ্যতে ব্রহ্মবাদিভিরিতি। মেদ্যতীতি বা মেদিনী ইন্মেদ্যা স্নিহি প্রহাদিভ্যঃ ম্নিন্। ইতি ভট্টীকাব্য ভরতঃ॥ তদুৎপত্তির্যথা। শ্রুয়তাং বসুধা জন্ম সর্ব মঙ্গল কারণং। বিঘ্ন নিঘ্ন করং পাপ নাশনং পুণ্য বর্দ্ধনং॥ অহো কেচিদ্বদন্তীতি মধুকৈটভ মেদসা। বভূব বসুধা জন্ম তদ্বিরুদ্ধ মতং শৃণু॥ ঊচতুস্তৌ পুরা বিষ্ণুং তুষ্টৌ যুদ্ধেন তেজসা। আবাং বধ ন যত্রোর্বী পাথসা সংবৃতেতি চ॥ তয়োর্জ্জীবন কালেন প্রত্যক্ষা সা ভবেৎ স্ফুটং। ততো বভূব মেদশ্চ মরণস্যান্তরং তয়োঃ॥ মেদিনীতি চ বিখ্যাতেত্যুক্তা গৈন্তন্মতং শৃণু। জলধৌতা কৃতা পূর্বং বর্দ্ধিতা মেদসা যতঃ॥ কথয়ামি চ তজ্জন্ম সার্থকং সর্ব সম্মতং। পুরা শ্রুতং যৎ শ্রুত্যুক্তং ধর্ম্মবক্তাচ পুষ্করে॥ মহাবিরাট্ শরীরস্য জলস্থস্য চিরং স্ফুটং। মলো বভূব কালেন সর্বাঙ্গ ব্যাপকো ধ্রুবং॥ স চ প্রবিষ্টঃ সর্বেষাং তল্লোম্নাং বিবরেষু চ। কালেন মহতা তস্মাদ্বভূব বসুধা মুনে॥ প্রত্যেকং প্রতিলোমাঞ্চ কূপেষু সা স্থিরা স্থিতা। আবির্ভূতা তিরোভূতা সাজলেচ

পুনঃ পুনঃ ॥ আবি-ভূতা সৃষ্টিকালে তজ্জলোপর্য্যবস্থিতা। প্রলয়ে চ তিরোভূতা জলাভ্যন্তরবস্থিতা ॥ ইতি শ্রী ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে নারায়ণ নারদ সংবাদে পৃথিব্যুপাখ্যানে ৭ অধ্যায়ঃ ॥

মেদিনীদ্রবঃ পুং ধূলিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মেদুরঃ পুং অতিশয়স্নিগ্ধঃ। তং পর্য্যায়ঃ। সান্দ্রস্নিগ্ধঃ২। ইত্যমরঃ

মেদুরা স্ত্রী কাকোলী। ইতি রাজনির্ঘণ্টঃ ॥

মেদোজং ক্লী অস্থি। ইতি রাজনির্ঘণ্টঃ ॥

মেদোদ্ভবা স্ত্রী মেদা। ইতি রাজনির্ঘণ্টঃ ॥

মেদোক্ষঃ পুং বর্ণসঙ্করজাতিভেদঃ। ইতি জটাধরঃ ॥

মেদোবতী স্ত্রী মেদা। ইতি রাজনির্ঘণ্টঃ ॥

মেধ ঋ ঞ বধমেধাসঙ্গেষু। ইতি কবিকল্পদ্রুমঃ ॥ ঋ অমিমেধৎ। ঞ মেধতি মেধতে ইতি দুর্গাদাসঃ ॥

মেধঃ পুং যজ্ঞঃ। ইতি জটাধরঃ ॥

মেধা স্ত্রী ধারণাবতীবুদ্ধিঃ। ইত্যমরঃ ॥ ধারণাশক্তি যুক্তা ধী র্মেধা মেধ্যতে সঙ্গম্যতে হস্যাং সর্ব্বং বহুশ্রুতং বিষয়ী করোতি ইতি বা মেধা মেধৃ ঞ সঙ্গে মেধাযাং সেনকাৎ সংজ্ঞা রিত্যঃ আপ বহুশ্রুত বিষয়ী করণং ধারণা যদুক্তং ধারণা বুদ্ধে র্গুণবিশেষ ইতি। ইতি ভরতঃ॥॥ মেধাকরঔষধং যথা। শঙ্খপুষ্পী বচা সোমা ব্রাহ্মী ব্রহ্ম সুবর্চ্চলা। অভয়া চ গুডূচী চ অটরূষক বাকুচী ॥ এতৈ রক্ষ সমৈ র্ভাগৈ র্ঘৃতং প্রস্থং বিপাচয়েৎ। কণ্টকার্য্যা রসং প্রস্থং বৃহত্যা চ সমন্বিতং ॥ এতদ্ব্রাহ্মী ঘৃতং নাম স্মৃতি মেধাকরং পরং। ইতি গারুড়ে ১৯৮ অধ্যায়ঃ॥॥ মেধাকরগণো যথা। সততাধ্যয়নং। তত্ত্বজ্ঞানকথা ॥ শ্রেষ্ঠতন্ত্রশাস্ত্রাবলোকনং ॥ সদ্বিজাচার্য্যসেবা চ। ইতি পুরাণং ॥

মেধাঃ পুং স্বায়ম্ভুবমনুপুত্রঃ। যথা। অগ্নিধ্রু শ্চাগ্নিবাহুশ্চ রিপুঃ সবল এব চ। জ্যোতিষ্মান্ দ্যুতিমান্ হব্যো মেধা মেধাতিথি র্বসুঃ ॥ স্বায়ম্ভুবস্যাস্য মনো র্দশৈতে বংশবর্দ্ধনাঃ। ইতিমাৎস্যে ৯অধ্যায়ঃ॥

মেধাকৃৎ স্ত্রী সিতাবরশাকং। ইতি রাজনির্ঘণ্টঃ ॥ মেধাকারকে ত্রি ॥

মেধাজিৎ পুং কাত্যায়নমুনিঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মেধাতিথিঃ পুং মনুসংহিতাটীকাকৃৎ ॥ মুনিবিশেষঃ। যথা। মেধাতিথি র্দেবল আর্ষ্টিষেণো ভরদ্বাজো গৌতমঃ পিপ্পলাদঃ। ইতি শ্রীভাগবতে ১ স্কন্ধে ১৯ অধ্যায়ঃ ॥

মেধারুদ্রঃ পুং কালিদাসঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

মেধাবতী স্ত্রী মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ॥মেধাবিশিষ্টাচ॥

মেধাবিনী স্ত্রী ব্রহ্মণঃপত্নী। ইতি মেদিনী ॥

মেধাবী পুং শুকপক্ষী। ইতি মেদিনী ॥ মদিরা। ইতি রাজনির্ঘণ্টঃ ॥ পণ্ডিতঃ। ইতি হেমচন্দ্রঃ ॥ ব্যাড়িঃ। ইতি ত্রিকাণ্ডশেষঃ ॥ মেধাযুক্তে ত্রি। ইতি মেদিনী ॥

মেথিঃ পুং খলেপশুবন্ধনার্থন্যস্তদারু। ইত্যমরঃ॥খলে ধান্য মর্দন স্থান মধ্যে পশুবন্ধন নিমিত্তং নিহিতং যদ্দারু সংমেথিঃ।মেথি ইতি খ্যাতে। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। মেথিঃ ২ খলেবালী ৩। ইতি হেমচন্দ্রঃ॥ অস্য স্থাপনদিনং তত্র বারৌ শুক্র বৃহস্পতী। নক্ষত্রাণি রেবতী স্বাতী হস্তা মূলং মৃগশিরশ্চ। তত্র লগ্নং স্থিরং। ইতি জ্যোতিস্তত্ত্বং ॥

মেধিরঃ ত্রি মেধাবী। ইতি ত্রিকাণ্ডশেষঃ ॥

মেধিষ্ঠঃ ত্রি অতিশয়মেধাযুক্তঃ। ইতি ব্যাকরণং ॥

মেধ্যং ত্রি পবিত্রং। ইত্যমরঃ॥ পবিত্রঃ প্রযতঃ পূত ইতি ব্রহ্মবর্গে প্রাণিবিষয মাত্র উক্তং ইহত্বপ্রাণিদ্রব্যে। ইতি ভরতঃ॥ পূতং মেধ্যং পবিত্রং স্যাদ্বীধ্রং প্রযত নির্ম্মলং। নিশোধ্যং শোধিতং মৃষ্টং নির্ণিক্ত মনবস্করং॥ ইতি শব্দরত্নাবলী॥ শুচিঃ। ইতি মেদিনী ॥

মেধ্যঃ পুং খদিরঃ॥ যবঃ॥ ছাগঃ। ইতি রাজনির্ঘণ্টঃ ॥

মেধ্যা স্ত্রী রক্তবচা॥ রোচনা। ইতি মেদিনী॥ কেতকী॥ জ্যোতিষ্মতী ॥ শঙ্খপুষ্পী॥ ব্রাহ্মী॥ শ্বেতবচা॥ শমী॥ মণ্ডূকী। ইতি রাজনির্ঘণ্টঃ॥

মেনকা স্ত্রী স্বর্বেশ্যা। ইতি শব্দরত্নাবলী॥ তস্যাঃ কন্যা শকুন্তলা। যথা। বিশ্বামিত্রাত্মজৈবাহং ত্যক্তা মেনকযা বনে। বেদৈতদ্ভগবান্ কণ্বো বীর কিং করবাম তে॥ ইতি শ্রীভাগবতে ৯ স্কন্ধে ২০ অধ্যায়ঃ॥ উমামাতা। যথা। ততঃ প্রীতাস্তু পিতরস্তাং দদুস্তনযাং নিজাং। মেনাং দেবাশ্চ শৈলায হিমযুক্তায

বৈ দদুঃ ॥ তাং মেনাং হিমবাঞ্ছৈলঃ প্রাপ্যাদ্রিবরস্তেজস । প্রীতিমান্ ভবেত্তাভ্যাং রেমে চ যথেচ্ছয়া ॥ ততো হিমাদ্রিঃ পিতৃকন্যা সার্দ্ধং সুখং নিষেবে বিবিধং যথেপ্সিতং । গজীজন্মনা তনয়াস্তস্যা রূপাতিযুক্তাঃ সুরযোষিত্তোপমাঃ ॥ পুনস্তস্য ভবাচ । মেনায়াং কন্যকাস্তিস্রো জাতা রূপগুণান্বিতাঃ । সুনাভ ইতি বিখ্যাত শ্চতুর্থ স্তনযো হভবৎ ॥ রাক্তাঙ্গ্যম্বর প্রথমা সিতোদন্তীললোচনা । কালপর্ণমুপমা কালী অন্যা মেনক সুতা ॥ জাতাঃ স্তাঃ কন্যকাস্তিস্রঃ ষডব্দাৎ পরতো মনে । কর্তুং তপঃ প্রযাতা স্তা দেবা স্তা দদৃশুঃ স্মৃতাঃ ॥ ততো গতে কন্যকে দ্বে জ্ঞাত্বা মেনা তপস্বিনী । তপসো বারয়ামাস উমেত্যেবাব্রবীচ্চ সা ॥ তদেব মাত্রা নামাস্যাশ্চক্রে পিতৃসুতা শুভা । উমেত্যেব হি কন্যায়াঃ সা জগাম তপোবনং ॥ ইতি বামনে ৫১।৭৫ অধ্যায়ঃ ॥ ॥ অপি চ । কথং গিরিসুতা কালী বভূব জগতাং প্রসূঃ দাক্ষায়ণী ত্যক্ত তনুঃ কথনায় হরপতিং ॥ মার্কণ্ডেয় উবাচ । যদা ত্যক্তবতী দেবী পূর্বং দাক্ষায়ণী সতী । তদৈব মেনকা গচ্ছন্মেনকাং হিমবদ্গিরিং ॥ ত্যক্ত প্রাণা তদা দেবী ভূত্বা হিমবতঃ সুতা । শিবা বিন্যস্ত মনসা সপ্তবিংশতি বৎসরান্ ॥ নিনায় মেনকা দেবী পরমা মূর্তি নির্বৃতী । সপ্তবিংশতি বর্ষান্তে জগন্মাতা জগন্ময়ী ॥ সুপ্রীতা ভবদত্যর্থং প্রাহ প্রত্যক্ষতাং গতা ॥ শ্রীদেব্যুবাচ । যৎ প্রার্থিতং ত্বয়া দেবি সুস্তুতৎ প্রাগ্ যথাস্মৃতা ॥ ততঃ সা প্রথমং পুত্রশতং নাম যশস্বিনী । পশ্চাচ্চ তনয়ামেকাং বরগুণশালিনীং ॥ সুমাতীং পালনকরীং কুলস্য প্রবর্দ্ধনীং । ততো ভগবতী প্রাহ মেনকাং মুদি জনিতাং ॥ শ্রীদেব্যুবাচ । শতং পুত্রাঃ সম্ভবন্তু ভবত্যা বীর্য্য সংযুতাঃ ॥ সুতা চ তব দেবানাং নানুগ্রাণাঞ্চ রক্ষণাং । হিতায় সম্ভবতাং ভবিষ্যাম্যহমেব তে ॥ এবমুক্ত্বা জগদ্ধাত্রী তত্রৈবান্তরধীয়ত । ততঃ সা কালিকা দেবী যোগনিদ্রা জগন্ময়ী । ॥ পূর্বত্যক্ত সতীরূপা জয়াং মেনকাং যযৌ । সন্ধ্যায়ানুক্রমেণ মেনকা জঠরে শিবা ॥ মনুষ্যজন্ম সমুৎপন্না সা লক্ষ্মী রিব সাগরাৎ । বসন্ত সময়ে দেবী নবম্যাং মৃগযোগতঃ ॥ অর্দ্ধরাত্রৌ সমুৎপন্না গ-

ক্ষেব শশিনগুলাৎ। ইতি কালিকাপুরাণে৪০ অধ্যায়ঃ॥

মেনকাত্মজা স্ত্রী দুর্গা। ইতি হলায়ুধঃ॥

মেনকাপ্রাণেশঃ পুং হিমালয়ঃ। ইতি হেমচন্দ্রঃ॥

মেনা স্ত্রী মেনকা। ইতি ভরতদ্বিরূপ কোষঃ॥ সা পিতৃকন্যা। যথা। তাং মানসীং মেরুসখঃ পিতৄণাং কন্যাং কুলস্য স্থিতয়ে স্থিতিজ্ঞঃ। মেনাং মুনীনামপি মাননীয়ামাত্মানুরূপাং বিধিনোপযেমে॥ ইতি কুমারসম্ভবে কালিদাসঃ॥*॥ অপিচ। অগ্নিষাত্তা বর্হিষদো দ্বিধা তেষাং ব্যবস্থিতিঃ। তেভ্যঃ স্বাহা স্বধা যজ্ঞে মেনা বৈতরণী তথা। ইতি কৌর্ম্মে ১২ অধ্যায়ঃ॥

মেনাজা স্ত্রী পার্ব্বতী। ইতি হেমচন্দ্রঃ॥

মেনাদঃ পুং বিড়ালঃ॥ ছাগঃ॥ ময়ূরঃ। ইতি মেদিনী॥

মেনাধবঃ পুং হিমালয়ঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মেন্দিকা } মেন্ধী } স্ত্রী ক্ষুপবিশেষঃ। মেহদী ইতি ভাষা। ইতি কেচিৎ॥

মেপ ঋ ঙ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ ঙ মেপতে। ঋ অমিমেপৎ। ইতি দুর্গাদাসঃ॥

মেরকঃ পুং বিষ্ণুশত্রুভেদঃ। ইতি হেমচন্দ্রঃ॥

মেরুঃ পুং পর্ব্বতবিশেষঃ। তৎপর্য্যায়ঃ। সুমেরুঃ ২ হেমাদ্রিঃ ৩ রত্নসানুঃ ৪ সুরালয়ঃ ৫। ইত্যমরঃ॥ মিনোতি ক্ষিপতি জ্যোতীংষি উচ্চত্বাৎ মেরুঃ। ডুমিঞ্‌ ক্ষেপে নাম্নীতি রুঃ। ইতি ভরতঃ॥*॥ জপমালাগ্রবর্ত্তিন্যকামালা। যথা। মালা মেকৈক মাদায় সূত্রে সম্পাতয়েৎ সুধীঃ। মুখে মুখন্তু সংযোজ্য পুচ্ছে পুচ্ছন্তু যোজয়েৎ॥ গোপুচ্ছ সদৃশী কার্য্যাথ বা সর্পাকৃতি র্ভবেৎ। তৎসজাতীয় মেকাক্ষং মেরুত্বেনাগ্রতো ন্যসেৎ॥ ইত্যুৎপত্তিতন্ত্রে ৬০ পটলঃ॥*॥ করমালায়াং মেরু র্যথা। তিস্রোঙ্গুল্য স্ত্রিপর্ব্বাণো মধ্যমা চৈকপর্ব্বিকা। পর্ব্বদ্বয়ং মধ্যমায়া মেরুত্বেনোপকল্পয়েৎ॥ ইদন্তু শক্তিভিন্ন বিষয়ং॥*॥ শক্তিবিষয়ে মেরু যথা। পর্ব্বদ্বয়মনামায়া পরিবর্ত্তেন বৈ ক্রমাৎ। পর্ব্বত্রয়ং মধ্যমায়া স্তর্জ্জন্যেকং সমাহরেৎ॥ পর্ব্বদ্বয়ন্তু তর্জ্জন্যা মেরুং তদ্বিদ্ধি পার্ব্বতি॥*॥ শ্রীবিদ্যাবিষয়ে মেরু যথা। অনামা মধ্যমায়াশ্চ মূলাগ্রন্তু

ন্ধষং ন্বগং। কনিষ্ঠাযাশ্চ তর্জ্জন্যা ত্রয়ং পৰ্ব্ব সুরেশ্বরি॥ অনামা ম ধ্যমাযাশ্চমেরুঃ স্যাদ্দ্বিতয়ং শুভং॥ *॥ তল্লঙ্ঘিত জপেদ্দোষো যথা। অঙ্গুল্যগ্রেষ যজ্জপ্তং যজ্জপ্তং মেরুলঙ্ঘনে। পৰ্ব্বসন্ধিষু যজ্জপ্তং তৎসৰ্ব্বং নিষ্ফলং ভবেৎ॥ ইতি তন্ত্রসারঃ॥

মেরুকঃ পুং যক্ষধূপঃ। ধুনা ইতি ভাষা। ইতি শব্দচন্দ্রিকা॥

মেরুসাবর্ণঃ পুং একাদশমনুঃ। যথা। ততস্তু মেরুসাবর্ণো ব্রহ্মসূনু র্মনুঃ স্মৃতঃ। ঋতুশ্চ ঋতুধামা চ বিশ্বক্সেনো মনু স্তথা॥ ইতি মাৎস্যে ৯ অধ্যায়ঃ॥

মেলকঃ পুং সঙ্গঃ। ইত্যমরঃ॥

মেলকলবণং ক্লী ঔষরলবণং। ইতি রাজনির্ঘণ্টঃ॥

মেলা স্ত্রী মেলকঃ॥ মসিঃ। ইতি মেদিনী॥ অঞ্জনং। ইতি হেমচন্দ্রঃ॥ মহানীলী। ইতি রাজনির্ঘণ্টঃ॥

মেলানন্দা স্ত্রী মস্যাধারঃ। ইতি হারাবলী॥

মেলান্ধঃ স্ত্রী মস্যাধারঃ। ইতি জটাধরঃ॥

মেলাম্বুঃ পুং মস্যাধারঃ। ইতি শব্দরত্নাবলী॥

মেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অমিমেবৎ। ঙ মেবতে। ইতি দুর্গাদাসঃ॥

মেষঃ পুং পশুবিশেষঃ। মেড়া ইতি ভাষা। তৎপৰ্য্যায়ঃ। মেঢ্রঃ ২ উরভ্রঃ ৩ উরণঃ ৪ ঊর্ণায়ুঃ ৫ বৃষ্ণিঃ ৬ এড়কঃ ৭। ইত্যমরঃ॥ ভেড়ঃ ৮ হুড়ঃ ৯ শৃঙ্গিণঃ ১০ অবিঃ ১১ লোমশঃ ১২ বলী ১৩। অস্য মাংস গুণাঃ। মধুরত্বং। শীতত্বং। গুরুত্বং। বিষ্টম্ভিত্বং। বৃংহণত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। পিত্ত শ্লেষ্ম করত্বং। ঙ্গসুস্ত শাকেন সহ ত্যাজ্যত্বঞ্চ। ইতি রাজবল্লভঃ॥ *॥ লগ্নবিশেষঃ॥ ঔষধবিশেষঃ। ইতি মেদিনী॥ রাশিবিশেষঃ। তৎপৰ্য্যায়ঃ। ক্রিয়ঃ২। অস্যাধিষ্ঠাত্রী দেবতা পংমেষঃ। অশ্বিনী ভরণী কৃত্তিকাপাদৈকেন মেষরাশি ভবতি। অত্র জাত ঈদৃশো ভবতি। শোবদশায়াং নেত্রদুঃখী দয়ালুঃ ধনী গানসখী ধাৰ্ম্মিকঃ ধীরঃ মৎস্য মাংসাশী চ॥ স ত পৃষ্ঠোদয়ঃ। অস্যবর্ণঃ। আরক্তঃ পীতশ্চ। অয়ং ক্রূরঃ। পিত্তোক্ত স্বভাবঃ। কান্তিরহিতঃ। সমানাঙ্গঃ। পৰ্ব্বতচারী। পূৰ্ব্বদিগধিপতিঃ। বৈশ্যবর্ণঃ। অল্পস্ত্রীসঙ্গঃ। অল্পসন্তানঃ। স্ফুটঃ। অতিরবশ্চ। ইতি জ্যোতিষং॥

॥ রব্যাশ্রিত তদ্রাশি জাত ফলং যথা ॥ মেষে দিনেশে পুরুষঃ সুবেশঃ সৎসাহসঃ স্যান্নৃপতেঃ সমানঃ। বুদ্ধ্যাবৃতঃ পিত্তকৃতা চ পীড়া বক্তোদ্ভবা বা সততং মহৌজাঃ ॥ ॥ চন্দ্রাশ্রিত তদ্রাশি জাত ফলং যথা। স্থিরজনো রহিতঃ স্বজনৈর্নরঃ সুত যতঃ প্রমদা বিজিতো ভবেৎ। অজগতে দ্বিজরাজ ইতীরিতং বিভুতয়া ভুতয়া সহিতঃ শ্রিয়া ॥ ॥ তল্লগ্ন জাত ফলং যথা। মেষলগ্নে সমুৎপন্নঃ প্রচণ্ডো মানী ধনী শুভঃ। ক্রোধী স্বজনহন্তা চ বিক্রমী পর বৎসলঃ ॥ ইতি কোষ্ঠীপ্রদীপঃ ॥ ॥ তল্লগ্নস্য স্থূল মানং। ৩। ৪৭। ইতি জ্যোতিস্তত্ত্বং ॥ ॥ ত্রিতারক শরাকৃতি শ্রবণা নক্ষত্রস্য গগন মধ্যোদয়ে মেষলগ্নস্য অষ্টাদশপলাধিক দণ্ডেকোগতো ভবেৎ। যথা। তারকা ত্রয় মিতে শরাকৃতৌ কেশবে গগন মধ্যবর্ত্তিনি। মত্তবারণগতে হজলগ্নতো নির্গতং গজ মহীধ্র লিপ্তিকাঃ ॥ ॥ মর্দ্দলাকৃতি পঞ্চতারক ধনিষ্ঠা নক্ষত্রস্য মস্তকোপর্য্যুদয়ে মেষলগ্নস্য ষটত্রিংশৎ পলাধিক দণ্ডদ্বয়ং গতং স্যাৎ। যথা। মস্তকোপরি সমাগতে ধনে মর্দ্দলাকৃতিনি পঞ্চতারকে। যাতি কান্তিমতি মেষলগ্নভঃ সারঙ্গাক্ষি রস ধনু লিপ্তিকঃ ॥ ইতি কালিদাসকৃত রাত্রিলগ্ন নিরূপণং ॥

মেষকঃ পুং জীবশাকঃ। ইতি রাজনির্ঘণ্টঃ ॥

মেষকম্বলঃ পুং মেষলোমনির্ম্মিতবস্ত্রং। তৎপর্য্যায়ঃ। ঊর্ণায়ুঃ ২। ইত্যমরঃ ॥

মেষলোচনঃ পুং চক্রমর্দ্দঃ। ইতি ভাবপ্রকাশঃ ॥ মেষ চক্ষু স্তুল্য চক্ষুশ্চ ॥

মেষবল্লী স্ত্রী অজশৃঙ্গী। ইতি ভাবপ্রকাশঃ ॥

মেষবিষাণিকা স্ত্রী মেষশৃঙ্গী। ইতি রত্নমালা ॥

মেষশৃঙ্গঃ পুং স্থাবরবিষভেদঃ। ইতি হেমচন্দ্রঃ ॥

মেষশৃঙ্গী স্ত্রী অজশৃঙ্গীবৃক্ষঃ। মেঢাশিঙ্গী ইতি ভাষা। তৎপর্য্যায়ঃ। নন্দীবৃক্ষঃ ২। মেষবিষাণিকা ৩ চক্ষুঃ ৪ চক্ষুর্বহনং ৫ মেঢ্রশৃঙ্গী ৬ গৃহদ্রুমা ৭। ইতি রত্নমালা ॥

মেষা স্ত্রী ত্রুটিঃ। গুজরাটীএলাচি ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

মেষাণ্ডঃ পুং ইন্দ্রঃ। ইতি পুরাণং ॥

মেষাস্ত্রী স্ত্রী বস্তাস্ত্রীবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মেষালুঃ পুং বর্ব্বরাবৃক্ষঃ। ইতি শব্দচন্দ্রিকা॥

মেষাম্বয়ঃ পুং চক্রমর্দঃ। ইতি রাজনির্ঘণ্টঃ॥

মেষাক্ষিকুসুমঃ পুং চক্রমর্দঃ। ইতি রত্নমালা॥

মেষিকা স্ত্রী মেষী। ইতি শব্দরত্নাবলী॥

মেষী স্ত্রী তিনিষবৃক্ষঃ॥ জটামাংসী। ইতি রাজনির্ঘণ্টঃ। মেষস্ত্রীজাতিঃ। তৎপর্য্যায়ঃ। জালকিনী ২ অবিঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ অস্যা দুগ্ধ গুণাঃ। মধুরত্বং। গাঢ়ত্বং। স্নিগ্ধত্বং। কফাপহত্বং। বাতাময়করত্বং। স্থৌল্যত্বং। লোমশাযাশ্চেৎ গুরুত্বং। বৃদ্ধিদত্বঞ্চ॥ *॥ অস্যা দধিগুণাঃ। সুস্নিগ্ধত্বং। কফপিত্ত করত্বং। গুরুত্বং। বাতে রক্তবাতে চ পথ্যত্বং। শোক ব্রণনাশিত্বঞ্চ॥ *॥ অস্যা নবনীত গুণাঃ। ক্লিষ্টগন্ধত্বং। শীতলত্বং। মেধাহরত্বং। পুষ্টিদত্বং। স্থৌল্যত্বং। মন্দাগ্নি দীপনত্বং। সারকত্বং। পাকে হিমত্বং। লঘুত্বং। যোনি শূলে কফে বাতে দুর্নাম্নি চ হিতত্বঞ্চ॥ দুর্নাম্নি স্থানে গুদশূলে ইতি পুস্তকান্তরে পাঠঃ॥ *॥ তস্যা ঘৃত গুণাঃ। অতীব গৌরবাৎ সুন্দরাগ্নি দেহিনাং বর্জ্জ্যত্বং। বুদ্ধিপাটবহরত্বং। বলাবহত্বং। বপুষাং বিসুগন্ধিকারিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মেসূরণং ক্লী দশমলগ্নং। যথা। কর্ম্মস্থানঞ্চ দশমং খং মেসূরণমাস্পদং। ইতি জ্যোতিস্তত্ত্বং॥

মেহঃ পুং প্রমেহরোগঃ। ইত্যমরঃ॥ মেষঃ। ইতি শব্দচন্দ্রিকা॥ প্রস্রাবঃ। ইতি হেমচন্দ্রঃ॥

মেহঘ্নী স্ত্রী হরিদ্রা। ইতি রত্নমালা॥

মেহনং ক্লী শিশ্নঃ। ইত্যমরঃ॥ মূত্রং। ইতি মেদিনী॥ ভাবে ল্যুট্প্রত্যয়ে মূত্রোৎসর্গঃ॥

মেহনঃ পুং মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মেহনা স্ত্রী মহিলা। ইতি কেচিৎ॥

মেক্ষণং ক্লী যজ্ঞীযপাত্রবিশেষঃ। যথা। মেক্ষণাদীনাহ ছন্দোগপরিশিষ্টং। ইধ্মজাতীয মিধ্মার্দ্ধপ্রমাণং মেক্ষণং ভবেৎ। বৃত্তং বাক্ষঞ্চ পৃথগ্ মবদান ক্রিযাক্ষমং॥ ইধ্মার্দ্ধ প্রমাণং। প্রাদেশ দ্বযমিধ্মস্য প্রমাণং পরিকল্পিত মিতি। তদর্দ্ধং। এষৈব দর্ব্বী। বিশেষস্তু

মহাসুরে। দর্ব্বী দ্ব্যঙ্গুল পৃথগা ত-রীবেণ তু মেক্ষণং। মুষলোদূখলে ব্রাহ্মে স্বায়তে সুদৃঢ়ে তথা॥ ইতি সংস্কারতত্ত্বং॥

মৈত্রং ক্লী অনুরাধানক্ষত্রং ১৭। যথা। মৈত্রাদ্য পাদে স্বপিতীহ বিষ্ণু রৈবত্যমধ্যে পরিবর্ত্ততে চ। পৌষ্ণাবসানে চ সুরারিহন্তা প্রবুধ্যতে মাস চতুষ্টয়েন॥ ইতি তিথ্যাদিতত্ত্বং॥ ❀॥ পুরীষোৎসর্গঃ। যথা। ততঃ কল্যং সমুত্থায় কুর্য্যান্মৈত্রং নরেশ্বর। নৈর্ঋত্যা মিষুবিক্ষেপ মতীত্যাভ্যধিকং ভুবঃ॥ কল্যং উষঃকালং। মৈত্রং মিত্রদেবতাক পায়ুসম্বন্ধাৎ পুরীষোৎসর্গঃ। ইত্যাহ্নিকাচারতত্ত্বং॥ অপিচ। ব্রাহ্মে মুহূর্ত্তে চোত্তিষ্ঠেৎ সুস্থো রক্ষার্থমায়ুষঃ। শরীরচিন্তাং নির্বর্ত্য মৈত্রং কর্ম্ম সমাচরেৎ॥ মৈত্রং মল মূত্রোৎসর্গঃ। ইতি রাজবল্লভঃ॥ ❀॥ তত্র নিষিদ্ধ স্থানাদি যথা। ছায়া কূপ নদী গোষ্ঠ চৈত্যাম্ভঃ পথি ভস্মসু। অগ্নৌ চৈব শ্মশানে চ বিণ্মূত্রে ন সমাচরেৎ॥ ন গোময়ে ন দৃষ্টে বা মহাবৃক্ষে চ শাদ্বলে॥ ন তিষ্ঠন্ বা ন নির্ব্বাসা নচ পর্ব্বত মস্তকে॥ ন জীর্ণদেবায়তনে ন বল্মীকে কদাচন। ন সসত্ত্বেষু গর্ত্তেষু ন গচ্ছন্ বা সমাচরেৎ॥ তুষাঙ্গার কপালেষু রাজমার্গে তথৈব চ। ন ক্ষেত্রে ন বিলে বাপি ন তীর্থে ন চতুষ্পথে॥ নদ্যা নদ সমীপে বা নোষরে ন পরাশুচৌ। ন সোপানত্ পাদুকো হি ছত্রী বা নান্তরীক্ষকে॥ ন চৈবাভিমুখঃ স্ত্রীণাং গুরু ব্রাহ্মণযো গবাং। ন দেব দেবালযযো রপামপি কদাচন॥ ন-জ্যোতীংষি নিরীক্ষন্ বা ন বাযুভিমুখো থবা। প্রত্যাদিত্যং প্রত্যনলং প্রতিসোমং তথৈব চ॥ ইতি কৌর্ম্মে উপরিভাগে ১২ অধ্যায়ঃ॥ অস্য বিস্তারস্তু পাদ্মে উত্তরখণ্ডে ১৯০ অধ্যাযে দ্রষ্টব্যঃ॥ ❀॥ মিত্রসম্বন্ধিনি ত্রি॥

মৈত্রঃ পুং ব্রাহ্মণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মৈত্রভং ক্লী অনুরাধানক্ষত্রং। ইতি জটাধরঃ॥

মৈত্রাবরুণঃ পুং অগস্ত্যঃ। ইতি শব্দরত্নাবলী॥

মৈত্রাবরুণিঃ অগস্ত্যঃ। ইত্যমরঃ॥

মৈত্রী স্ত্রী মিত্রস্যভাবঃ॥ মিত্রস্য কর্ম্ম। ইত্যমর ভরতৌ॥ ব্যক্তি

বিশেষে মৈত্রীকরণ নিষেধো যথা ॥ । বিদ্বিষ্ট পাতিতোন্মত্ত বহুবৈরাতি কীটকৈঃ । বন্ধকী বন্ধকীভর্তৃ ক্ষুদ্রানৃতকথৈঃ সহ ॥ তথাতিব্যয়শীলৈশ্চ পরীবাদরতৈঃ শঠৈঃ । বুধো মৈত্রীং ন কুর্বীত নৈকঃ পন্থান মাশ্রয়েৎ ॥ ইতি বিষ্ণুপুরাণে তৃতীয়েংশে ১১ অধ্যায়ঃ ॥ বিদ্বিষ্টাদিভি মৈত্রীং ন কুর্বীত বহুভি র্বৈরং যস্য অতিকীটকঃ অত্যন্তং কীটবৎ পীড়কঃ । কণ্টকৈ রিতি পাঠেপি সএবার্থঃ । বন্ধকী অসতী । ইতি তট্টীকা ॥

মৈত্রীবলঃ পুং বুদ্ধঃ । ইতি ত্রিকাণ্ডশেষঃ ॥

মৈত্রেয়ঃ পুং বুদ্ধভেদঃ । ইতি ত্রিকাণ্ডশেষঃ ॥ মুনিবিশেষঃ । যথা । এবং ব্রুবাণং মৈত্রেয়ং দ্বৈপায়ন সুতো বুধঃ । প্রীণয়ন্নিব ভারত্যা বিদুরঃ প্রত্যভাষত ॥ ইতি শ্রী ভাগবতে ৩ স্কন্ধে ৭ অধ্যায়ঃ ॥ মিত্র সম্বন্ধিনি ত্রি ॥

মৈত্রেয়িকা স্ত্রী মিত্রযুদ্ধং । ইতি ত্রিকাণ্ডশেষঃ ॥

মৈত্র্যং ক্লী স্ত্রী মিত্রস্যভাবঃ ॥ মিত্রস্যকর্ম্ম ইত্যমর ভরতৌ ॥

মৈথিলী স্ত্রী সীতা । ইতি হেমচন্দ্রঃ ॥

মৈথুনং ক্লী অগ্ন্যাধানং । যথা । মনুঃ । তাভপৌ । অসপিণ্ডা চ যা মাতুরসগোত্রা চ যাপিতুঃ । সাপ্রশস্তা দ্বিজাতীনাং দারকর্ম্মণি মৈথুনে ॥ মৈথুনে মিথুন শব্দ বাচ্যে স্ত্রী পুংস সাধ্যে অগ্ন্যাধান পুত্রোৎপত্ত্যাঃ দৌ । ইত্যুদ্বাহতত্ত্বং ॥ * ॥ সঙ্গতং ॥ রতং । ইত্যমরঃ ॥ সঙ্গতিঃ সঙ্গমো দারসংযোগঃ বিবাহ ইতি কলিঙ্গঃ ॥ রতং সুরতং । অনযো মৈথুনং । মিথুনাৎ সঙ্গমে ইদমর্থে স্বার্থে রতৌনিম্নাদ্যার্থে বা কঃ । সম্বন্ধে সুরতে যুগ্মে রাশৌ মিথুন মিষ্যতে । ইতি ব্যাড়িঃ ॥ ইতি তট্টীকায়াং ভরতঃ ॥ * ॥ শেষস্যপর্য্যায়ঃ । সুরতং ২ অভিমানিকং ৩ ধর্ষিতং ৪ সংপ্রয়োগঃ ৫ অনারতং ৬ অব্রহ্মচর্য্যকং ৭ উপসৃষ্টং ৮ ত্রিভদ্রং ৯ ক্রীড়ারত্নং ১০ মহাসুখং ১১ । ইতি ত্রিকাণ্ডশেষঃ ॥ ব্যবায়ঃ ১২ গ্রাম্যধর্ম্মঃ ১৩ রতং ১৪ নিধুবনং ১৫ । ইত্যমরঃ ॥ অস্য গুণাঃ । ধাতুক্ষয়কারিত্বং । রতি সন্তান দাতৃত্বঞ্চ ॥ অতিশয়মৈথুনস্য শ্বাস কাস জ্বরকারিত্বং ॥ অমৈথুনস্য প্রমেহ মেদ গুহ্যরোগ অগ্নিমান্দ্য কারি-

ত্বং ॥ স্ত্রী সংসর্গ রহিতস্য আয়ু
রজরা শরীর বল বর্ণ স্থিরোপচিত
মাংসানি ভবন্তি ॥ পূজ্যস্থানাশু-
চিস্থান সেকস্থান লোক সমীপ
প্রাতঃকাল সন্ধ্যাকাল পর্ব্বকালেষু
তস্য ত্যাজ্যত্বং ॥ এতৎকর্ম্মণি রজ
স্বলাকামা মলিনা বন্ধ্যা বর্ণজ্যেষ্ঠা
বয়োজ্যেষ্ঠা ব্যাধিযুক্তাঙ্গহীনাস-
তী বেশ্যা যোনিদোষযুক্তা সগো-
ত্রা গুরুপত্নী ভিক্ষুকী কপটব্রতধা
রিণী বৃদ্ধা চ ত্যাজ্যা ॥ রজস্বলা
গমনে দৃষ্ট্যায়ুস্তেজঃ ক্ষয়োঽধর্ম্মশ্চ
ভবতি ॥ কপটব্রতযুক্তা গুরুপত্নী
সগোত্রা বৃদ্ধা গমনে এবং পর্ব্বকা
লে সন্ধ্যাকালে চ স্ত্রীমৈথুনে পাপ
মায়ুঃ ক্ষয়শ্চ ভবতি ॥ বয়ো রূপ
গুণোপেতাং কুলশীল সমন্বিতাং
অধিকামাং হৃষ্টা মলঙ্কৃতাং বাজী
করণ পীড়িতাঙ্গ প্রমদাং হৃষ্টো
ঽধিকামশ্চ পুরুষঃ সেবেত ॥ শুক্র
বর্দ্ধক দ্রব্যং সশর্করং শীতলজল-
ম্বা পীত্বা কামবাণচঞ্চলাং সুরূপা
মনিন্দ্যাং হৃষ্টাং প্রমদা মাদ্যপ্রহ-
রে হৃষ্টঃ কামুকো গত্বা তদনু সুখং
স্বপেৎ ॥ অসকৃদ্গমনে তু নরো
ধাতুবৈষম্য মেতি ॥ রতান্তে স্নানং
সশর্করক্ষীরপানং নিদ্রাগৌড়িকরস
ভোজনঞ্চ হিতং । ইতি রাজবল্লভঃ
॥ * ॥ ব্রতদিবসে অষ্টাঙ্গ মৈথুনস্য
ত্যাজ্যত্বং যথা । স্মরণং কীর্ত্তনং কে-
লিঃ প্রেক্ষণং গুহ্যভাষণং । সঙ্কল্পো
ঽধ্যবসায়শ্চ ক্রিয়ানিষ্পত্তিরেব চ ॥
মৈথুনং বিবিধং ত্যাজ্যং ব্রতে ক্রীড়া
বিবৃদ্ধয়ে । ইতি ব্রহ্মবৈবর্ত্তে গণপতি-
খণ্ডে ৪ অধ্যায়ঃ ॥ * ॥ অস্য বিধি
নিষেধৌ যথা । ঋতাবুপগমঃ শস্তঃ
স্বপত্ন্যা মবনীপতে । পুন্নামর্ক্ষে শু-
ভে কালে জ্যেষ্ঠ যুগ্মাসু রাত্রিষু ॥
নাস্নাতাং তু স্ত্রিয়ং গচ্ছেন্নাতুরাং ন
রজস্বলাং । নানিষ্টাং ন প্রকুপিতাং
নাপ্রশস্তাং ন গুর্ব্বিণীং ॥ নাদক্ষিণাং
নান্যকামাং নাকামাং নান্যযোষি-
তং । ক্ষুৎক্ষামাং মতিভুক্তাং বা স্বয়-
ঞ্চৈভি র্গুণৈ র্যুতঃ ॥ স্নাতঃ স্রুগগন্ধ
ধৃক্ প্রীতো নাধ্মাতঃ ক্ষুধিতোপি-
বা । সকামঃ সানুরাগশ্চ ব্যবায়ং
পুরুষো ব্রজেৎ ॥ চতুর্দশ্যষ্টমী চৈব
অমাবাস্যাথ পূর্ণিমা । পর্ব্বাণ্যেতা-
নি রাজেন্দ্র রবিসংক্রান্তিরেব চ ॥
তৈল স্ত্রী মাংস সম্ভোগী পর্ব্বস্বেতে-
ষু বৈ পুমান্ । বিণ্মূত্র ভোজনং নাম
প্রযাতি নরকং মৃতঃ ॥ অশেষ পর্ব্ব
স্বেতেষু তস্মাৎ সংযমিভি র্বুধৈঃ ।
ভাব্যং সচ্ছাস্ত্র দেবেজ্যা ধ্যান জপ্য

পৰ্ব্বে নরৈঃ ॥ নান্যযোনাবযোনৌ-
বা নোপভূক্তৌষধ স্তথা ॥ দেব দ্বিজ
গুরূণাঞ্চ ব্যবাযী নাশুচী ভবেৎ ॥
চৈত্য চত্বর তীর্থেষু নৈব গোষ্ঠে চ-
তুষ্পথে। নৈব শ্মশানোপবনে জলি-
লেষু মহীপতে ॥ প্রোক্ত পৰ্ব্ব স্বশে-
ষেষু নৈব ভূপাল সন্ধ্যযোঃ। গচ্ছে-
দ্ব্যবাযং মতিমান্ মূত্রোচ্চার পীডি
তঃ ॥ পৰ্ব্বস্বভিগমো হধন্যো দিবা
পাপপ্রদো নৃপ। ভুবি রোগাবহো
নৃণা মপ্রশস্তো জলাশযে॥ পরদারা
ন্নগচ্ছেত মনসাপি কদাচন। কিমু বা-
চাপ্যস্থিবন্ধোঽপি নাস্তি তেষু ব্যবাযি-
নাং ॥ মৃতো নরক মভ্যেতি হীযতে-
ত্রাপি চাযুষঃ। পরদার গতিঃ পুংসা
মুভযত্রাপি ভীতিদা ॥ ইতি মত্বা-
স্বদারেষু ঋতু মৎসু বুধো ব্রজেৎ।
যথোক্ত দোষহীনেষু সকামেষ্বনৃতা
বপি ॥ ইতি বিষ্ণুপুরাণে ৩ অংশে
১১ অধ্যাযঃ ॥ * ॥ পরস্ত্র্যাদিগমনে
দণ্ডো যথা। ব্রাহ্মণঃ ক্ষত্রিযো বৈশ্যঃ
ক্ষত্র বিট্ শূদ্র যোষিতঃ। ব্রজন্দা-
প্যো ভবেদ্রাজ্ঞা দণ্ড উত্তম সাহসং
॥ বৈশ্যাগমে চ বিপ্রস্য ক্ষত্রিযস্যা-
ন্ত্যজাশ্রযে। মধ্যমং প্রথমং বৈশ্যো
দণ্ড্যঃ শূদ্রাগমাদ্ভবেৎ॥ শূদ্রঃ সবর্ণা
গমনে শতং দণ্ড্যো মহীভুজা। বৈ-
শ্যশ্চ দ্বিগুণং রাজন্ ক্ষত্রিয স্ত্রিগুণং
তথা ॥ ব্রাহ্মণশ্চ ভবেদ্দণ্ড্য স্তথা
রাজং শ্চতুর্গুণং। অগুপ্তাঃ
স্বগুপ্তাস্বধিকো ভবেৎ॥ মাতা মাতৃ-
স্বসা শ্বশ্রূ র্মাতুলানী পিতৃস্বসা।
পিতৃব্য সখি শিষ্যস্ত্রী ভগিনী তৎ
সখী তথা ॥ ভাগিনেযী তথা চৈব
রাজপত্নী তথৈব চ। তথা প্রব্রজিতা
নারী বর্ণোৎকৃষ্টা তথৈব চ ॥ ইত্যগ-
ম্যাস্তু নির্দ্দিষ্টা স্তাসাস্তু গমনে নরঃ।
শিশ্নস্যোৎকর্ত্তনং কৃত্বা ততস্তু বধ
মর্হতি ॥ ভ্রাতৃ ভার্য্যাগমে পূর্ব্বাদ্দ-
ণ্ডস্তু দ্বিগুণো ভবেৎ। চাণ্ডালীঞ্চ
শ্বপাকীং বা গচ্ছন্ বধ মবাপ্নু যাৎ॥
তির্য্যগ্যোনৌ চ গোবর্জ্যং মৈথুনং যো
হভিসেবতে। স পণং প্রাপ্নু যাদ্দণ্ডং
তস্যাশ্চ যবসোদকং ॥ সুবর্ণঞ্চ ভ-
বেদ্দণ্ড্যো গাং ব্রজন্ মনুজোত্তম। বৈ-
শ্যাগামী দ্বিজো দণ্ড্যো বৈশ্য শুল্ক
সমং পণং ॥ গৃহীত্বা বেতনং বেশ্যা
লোভাদন্যত্র গচ্ছতি। বেতনং দ্বিগু-
ণং দদ্যাদ্দণ্ডঞ্চ দ্বিগুণস্তথা ॥ অন্য
মুদ্দিশ্য যো দদ্যাৎ নযেদন্যস্য
কারণাৎ। তস্য দণ্ডং ভবেদ্রাজন্
সুবর্ণস্য চ মাষকং ॥ নীত্বা ভোগায
যো দদ্যাদ্দাপ্যো দ্বিগুণ বেতনং।
রাজ্ঞশ্চ দ্বিগুণং দণ্ড স্তথা ধর্ম্মো ন

হীয়ন্তে ॥ বহুনাং দুরন্তা মেকা সুরৈ স্তে দ্বিগুণং দমং। দদ্যুঃ পৃথক্ পৃথক্ সর্বে দণ্ডঞ্চ দ্বিগুণং পরং ॥ ইতি মাৎস্যে ২৮১ অধ্যায়ঃ ॥

মৈনাকঃ পুং পর্বতবিশেষঃ। তৎপর্য্যায়ঃ। হিরণ্যনাভঃ ২ সুনাভঃ ৩ হিমবৎসুতঃ ৪। ইতি জটাধরঃ ॥ স তু হিমালয়স্য জ্যেষ্ঠপুত্রঃ। যথা। ততো ভগবতী প্রাহ মেনকাং মুনি সন্নিভাং। স্মিত পূর্বং তদা তস্যাঃ পূরয়ন্তী মনোরথং ॥ শ্রীদেব্যুবাচ। শতং পুত্রাঃ সংভবস্তু ভবত্যা বীর্য্য সংযুতাঃ। তত্রৈকো বলবান্মুখ্যঃ প্রথমং সংভবিষ্যতি ॥ এব মুক্ত্বা জগদ্ধাত্রী তত্রৈবান্তরধীয়ত। মেনকা চ মুদং লব্ধা স্বস্থানং প্রবিবেশ হ ॥ ততঃ কালে তু সংপ্রাপ্তে মৈনাক মচলোত্তমং। পক্ষেণ সহ যোহদ্যাপি সিন্ধুমধ্যে প্রবর্ত্ততে ॥ মেনকা সুষুবে দেবী দেবেন্দ্রং স্পর্দ্ধযাগতং। অন্যানুন শতং পুত্রান্ ক্রমাৎ সা সুষুবে চ হ ॥ ইতি কালিকাপুরাণে ৪০ অধ্যায়ঃ ॥

মৈনাকস্বসা স্ত্রী পার্বতী। ইতি হেমচন্দ্রঃ ॥

মৈনিকঃ পুং জালিকঃ। ইতি সিদ্ধান্ত কৌমুদী ॥

মৈন্দঃ পুং বিষ্ণুবধ্যাসুরবিশেষঃ। ইতি হেমচন্দ্রঃ ॥ বানরবিশেষঃ। রামায়ণং ॥

মৈন্দহা পুং বিষ্ণুঃ। ইতি হেমচন্দ্রঃ ॥

মৈরেয়ং ক্লী মদ্যবিশেষঃ। ইত্যমরঃ ॥ যদ্যপি সীধুরিক্ষুরসৈঃ পক্কৈর পক্কৈরাসবো ভবেৎ। মৈরেয়ং ধাতকীপুষ্প গুড় ধানাম্ল সংহিতং। ইতি মাধবেন ভেদঃ কৃতঃ। তথাপি সূক্ষ্ম মনাদৃত্যেদ মুক্তং। মারং কামং জনয়তি মৈরেয়ং ক্ষেয়ঃ। নিপাতনাদাত ঐত্বং। ইতি ভরতঃ ॥

মোঘং ত্রি নিরর্থকং। ইত্যমরঃ ॥ হীনং। ইতি মেদিনী ॥

মোঘঃ পুং প্রাচীরং। ইতি শব্দমালা ॥

মোঘপুষ্পা স্ত্রী বন্ধ্যা। ইতি রাজনির্ঘণ্টঃ ॥

মোঘা স্ত্রী পাটলাবৃক্ষঃ। ইতি মেদিনী ॥ বিডঙ্গং। ইতি শব্দমালা ॥

মোঘোলিঃ পুং প্রাচীরং। ইতি হারাবলী ॥

মোচং ক্লী কদলীফলং। ইত্যমরঃ ॥

মোচঃ পুং শোভাঞ্জনবৃক্ষঃ। ইতি মেদিনী ॥

মোচকঃ পুং মোক্ষঃ ॥ কদলী ॥

শিগ্রুঃ ॥ বিরাগী। ইতি হেমচন্দ্রঃ ॥ মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

মোচনং ক্লী মোক্ষঃ॥ কম্পনং ॥ দম্ভঃ ॥ শাঠ্যং। ইতি মুচধাতো র্ভাবে ল্যুট্প্রত্যয়েন নিষ্পন্নং ॥

মোচনী স্ত্রী কণ্টকারী। ইতি জটাধরঃ॥ মোক্ষকর্ত্রী চ ॥

মোচরসঃ পুং শাল্মলিনির্য্যাসঃ। তৎপর্য্যায়ঃ। মোচস্রুৎ ২ মোচস্রাবঃ ৩ মোচনির্য্যাসঃ ৪ পিচ্ছিলসারঃ ৫ সুরসঃ ৬ শাল্মলীশ্লেষ্মঃ ৭ মোচসারঃ ৮। অস্য গুণাঃ। কষায়ত্বং। কফ বাত হরত্বং। রসায়নত্বং। বল পুষ্টি বর্ণ বীর্য্য প্রজ্ঞায়ুর্দেহসিদ্ধিদত্বং। গ্রাহিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥

মোচা স্ত্রী শাল্মলিবৃক্ষঃ॥ কদলীবৃক্ষঃ। ইত্যমরঃ॥ নীলীবৃক্ষঃ। ইতিরাজনির্ঘণ্টঃ ॥

মোচাটঃ পুং কৃষ্ণজীরঃ॥ রম্ভাস্থি ॥ মলযোদ্ভবঃ। ইতি মেদিনী ॥

মোচী স্ত্রী হিলমোচিকা। ইতিরত্নমালা ॥

মোটকং ক্লী পিতৃদানার্থদ্বিগুণভুগ্নকুশত্রয়ং। যথা। ইতি দ্বিগুণভুগ্নদর্ভমোটকং পিতৃব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। ইতি শ্রাদ্ধপ্রয়োগতত্ত্বং ॥

মোটকী স্ত্রী রাগিণীবিশেষঃ। ইতি হলাযুধঃ ॥

মোটনং ক্লী চূর্ণীকরণং ॥ আক্ষেপঃ। ইতি মুটধাত্বর্থদর্শনাৎ ॥

মোটনঃ পুং বায়ুঃ। ইতি রাজনির্ঘণ্টঃ ॥

মোটনকং ক্লী একাদশাক্ষরছন্দোবিশেষঃ। যথা। স্যান্মোটনকং তজ জাশ্চ লগৌ। রঙ্গে খলু মল্লকলা ঙ্গলঙ্কানুর মহাভট মোটনকং। যঃ কেলি লবেন চকার মমে সংসার রিপুং প্রতি মোটবতু ॥ ইতি ছন্দোমঞ্জরী ॥

মোটা স্ত্রী বলা। ইতি রাজনির্ঘণ্টঃ ॥

মোট্টায়িতং ক্লী স্ত্রীণাং স্বাভাবিকদশবিধালঙ্কারান্তর্গতালঙ্কার বিশেষঃ। ইতি হেমচন্দ্রঃ॥ তল্লক্ষণং যথা। কান্ত স্মরণ বার্ত্তাদৌ হৃদিতদ্ভাব ভাবতঃ। প্রাকট্যমভিলাষস্য মোট্টায়িতমুদীর্য্যতে। ইত্যুজ্জ্বলনীলমণিঃ ॥

মোণঃ পুং শুষ্কফলং ॥ নক্রঃ॥ মক্ষিকা ॥ সর্পকরণ্ডঃ। ইতিমেদিনী

মোদঃ পুং হর্ষঃ। ইতি শব্দরত্নাবলী ॥

মোদকঃ পুং ক্লী খাদ্যবিশেষঃ। মোয়া ইতি ভাষা। ইত্যমরঃ ॥

অস্য দানমন্ত্রো যথা। মোদকং স্বাদুসংযুক্তং শর্করাদি বিনির্ম্মিতং। ময়া নিবেদিতং ভক্ত্যা গৃহাণ পরমেশ্বরি। ইতি দুর্গোৎসবপদ্ধতিঃ॥ গুড়ঃ॥ যবাসশর্করা। ইতি রাজনির্ঘণ্টঃ॥ শর্করাদিদ্বারাপক্বৌষধবিশেষঃ। অস্য পূর্ণবীর্য্যং বর্ষমাসং তিষ্ঠতি। ইতি সুখবোধঃ॥ হর্ষকে ত্রি। ইতি মেদিনী॥

মোদকঃ পুং বর্ণশঙ্করজাতিবিশেষঃ। ময়রা ইতি ভাষা। স চ শূদ্রায়াং ক্ষত্রিয়াজ্জাতঃ। ইতি স্মৃতিঃ॥

মোদনং ক্লী শিক্থকং। ইতি রাজনির্ঘণ্টঃ॥ হর্ষঃ। মুদধাত্বর্থদর্শনাৎ॥

মোদমোদিনী স্ত্রী জম্বূঃ। ইতি রাজনির্ঘণ্টঃ॥

মোদযন্তী স্ত্রী বনমল্লিকা। কাঠমল্লিকা ইতি ভাষা। যথা। মদযন্তী গন্ধবতী মোদযন্তী থরস্বরা। ইতি রত্নমালা॥ অপিচ। তৃণশূন্যা মোদযন্তী ভূপদী মদযন্তিকা। ইতি শব্দরত্নাবলী॥

মোদা স্ত্রী অজমোদা। ইতি রাজনির্ঘণ্টঃ॥

মোদাখ্যঃ পুং আম্রবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মোদাঢ্যা স্ত্রী অজমোদা। ইতি রাজনির্ঘণ্টঃ॥ হর্ষযুক্তা চ॥

মোদিতঃ ত্রি হর্ষযুক্তঃ। মুদধাতোঃ কর্ত্তরি ক্ত প্রত্যয়েন নিষ্পন্নঃ॥

মোদিনী স্ত্রী অজমোদা॥ মল্লিকা॥ যূথিকা॥ কস্তূরী॥ মদিরা॥ মল্লিকাপুষ্পবিশেষঃ। তৎপর্য্যায়ঃ। কটপত্রী ২ জম্বারিকা ৩ বৃত্তমল্লিকা ৪। অস্যা গুণাঃ। নেত্ররোগাপহন্তৃত্বং। কটুত্বং। উষ্ণত্বং। ব্রণঘ্নত্বং। গন্ধবহুলত্বং। আস্যজরোগনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মোরটং ক্লী ইক্ষুমূলং॥ অঙ্কোঠপুষ্পং॥ সপ্তরাত্রাৎপরক্ষীরং। ইতি মেদিনী॥

মোরটঃ পুং লতাপ্রভেদঃ॥ ক্ষীরমোরটা ইতি ভাষা। তৎপর্য্যায়ঃ। কর্ণপুষ্পঃ ২ পীলুপত্রঃ ৩ মধুস্রবঃ ৪ ঘনমূলঃ ৫ দীর্ঘমূলঃ ৬ পুরুষঃ ৭ ক্ষীরমোরটঃ ৮। কুচিৎ পুস্তকে কর্ণপুষ্পস্থানে ক্ষীরপুষ্প ইতি পীলুপত্রস্থানে পীলুপুত্র ইতিচ পাঠঃ। অস্য গুণাঃ। ক্ষীরবহুলত্বং। মধুরত্বং। কষায়ত্বং। পিত্ত দাহ জ্বর নাশিত্বং। বৃষ্যত্বং। বলবিবর্দ্ধনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

মোরটকং ক্লী ইক্ষুমূলং। ইতি রাজ-

নির্ঘণ্টঃ ॥

মোরটা স্ত্রী মূর্ব্বা। ইত্যমরঃ ॥

মোষকঃ পুং তস্করঃ। ইত্যমরঃ ॥

মোষণং ক্লী লুণ্টনং॥ ছেদনং। বধঃ। ইতি মুষধাতো র্ভাবে হনট্ প্রত্যযেন নিষ্পন্নং ॥

মোষিতা ত্রি মোষণকর্ত্তা। চৌরঃ। ইতি মুষধাতো স্তৃন্ প্রত্যযেন নিষ্পন্নং ॥

মোহঃ পুং মূর্চ্ছা। ইত্যমরঃ ॥ অবিদ্যা ॥ ইতি মেদিনী ॥ দুঃখং। ইতি শব্দরত্নাবলী ॥ দেহাদিষু আত্মবুদ্ধিঃ। ইতি গীতাসুবোধিন্যাং শ্রীধরস্বামী ॥ অসৌ ব্রহ্মণো বুদ্ধিতো জাতঃ। যথা। বুদ্ধে র্মোহঃ সমভবদহঙ্কারাদভূন্মদঃ। প্রমোদ শ্চাভবৎ কণ্ঠান্মৃত্যু র্লোচনতো নৃপ ॥ ইতি মাৎস্যে২ অধ্যাযঃ ॥ মোহস্বরূপং যথা। মম মাতা মম পিতা মমেযং গৃহিণী গৃহং। এতদন্যং মমত্বং যৎ স মোহ ইতি কীর্ত্তিতঃ ॥ ইতি পাদ্মে ক্রিযাযোগসারে ১৬ অধ্যাযঃ ॥ ॥ ধর্ম্মবিমূঢত্বং। যথা। অকামতঃ কৃতং পাপং বেদাভ্যাসেন নশ্যতি। কামতস্তু কৃতং মোহাৎ প্রাযশ্চিত্তৈঃ পৃথগ্বিধৈরিতি ॥ নন্বত্র মোহাদিতি কো মোহঃ। অত্র, মোহ শব্দেন দৈবেন্দ্র বুদ্ধি পূর্ব্বো ব্যতিক্রমঃ। উচ্যতে পণ্ডিতৈ র্নিত্যং পুরাণে সাংশপাযনঃ॥ ইতি ভবিষ্য পুরাণ বচনাৎ জাত বুদ্ধি পূর্ব্বো ব্যতিক্রমো মোহঃ। ইতি জিকনঃ। তন্ন কামনা সামর্থ্যাদেব বুদ্ধে র্লব্ধত্বাৎ। উচ্যতে। শূদ্রস্য ব্রাহ্মণীং মোহাদ্গচ্ছত ইত্যাদৌ মুহবৈচিত্ত্যে ইতি ধাত্বর্থানুসারাৎ অজ্ঞান মাত্রং মোহঃ। যত্র তু কামনা শব্দো হস্তি তত্র ভবিষ্যপুরাণ শঙ্কেতিত মোহশব্দো ন গ্রাহ্যঃ। কিন্তু ধর্ম্মবিমূঢত্বং মোহঃ সচাধর্ম্ম বুদ্ধৌ সত্যা মপ্যকর্ত্তব্যে রাগাৎ কর্ত্তব্যতা ভ্রমঃ। যথা ব্যাসঃ। মোহো ধর্ম্মবিমূঢত্বং মানস্ত্বাত্মাভিমানিতা। এবঞ্চ ভবিষ্যপুরাণীয বুদ্ধি শব্দোপ্যধর্ম্মজ্ঞানমেবাভিধত্তে সত্যধর্ম্মজ্ঞানে পাপগৌরবার্থমিদমুক্তং মোহাদিতি। ইতি প্রাযশ্চিত্তবিবেকঃ॥ ॥ মোহবৃক্ষো যথা। সুমনোবাচ। শ্রূযতা মভিধাস্যামি সর্ব্বসন্দেহ নাশনং। স্বরূপ মুপদেশস্য সর্ব্ব বিজ্ঞান দর্শনং ॥ লোভঃ পাপস্য বীজো হযং মোহো মূলন্তু তস্য হি। অসত্যং তস্য চ স্কন্ধো মাযা শাখা

সুবিস্তরঃ॥ দম্ভ কৌটিল্য পত্রাণি জকৃত্যা পুষ্পিতঃ সদা। পৈশূন্যং তস্য সৌগন্ধ্য মজ্ঞানং ফল মেব-হি॥ ছদ্ম পাষণ্ড চৌরাশ্চ কূটাঃ ক্রূরাশ্চ পাপিনঃ। পক্ষিণো মোহ বৃক্ষস্য মায়া শাখাঃ সমাশ্রিতাঃ॥ অজ্ঞানন্ত ফলং তস্য রসো হ্যধর্মঃ ফলস্য হি। ভাবোদকেন সংবৃদ্ধ স্তস্য সত্ত্বাৎ সতু প্রিয়ঃ॥ অধর্ম্ম স্তস্য সরভিঃ ক্লেশ্চ মধুরায়তে। তাদৃশৈশ্চ ফলৈশ্চৈব সুফলো লোভ পাদপঃ॥ তস্য ছায়াং সমাশ্রিত্য যো নরঃ পরিবর্ত্ততে। ফলানি তস্য যো হশ্নাতি সুপক্কানি দিনে দিনে। ফলানাস্তু রসেনৈব অধর্ম্মেণ তু পোষিতঃ॥ সুসংপুষ্টো ভবেন্মর্ত্যঃ পতনায় প্রযচ্ছতি॥ ইতি পাদ্মে ভূমিখণ্ডে ১১অধ্যায়ঃ॥

মোহনং ক্লী সুরতং। ইতি হেমচন্দ্রঃ॥ হোমমন্ত্রৌষধ্যাদিদ্বারামুগ্ধতা করণং। তত্র হোমে হঙ্গলিনিয়মো যথা। মোহনং বশ্যকামশ্চ প্রীতি সম্বর্দ্ধনং তথা। প্রদেশিনী কনিষ্ঠাভ্যাং সর্ব্ব মেতৎ প্রসিধ্যতি॥ মোহনাকর্ষণঞ্চৈব ক্ষোভনোচ্চাটনং তথা। কনিষ্ঠা মধ্যমাঙ্গুষ্ঠ সংযোগেন তু লীলয়া॥ বিধিযুক্তেন হোমেন তথা দ্রব্যানুযোগতঃ। সর্ব্বে মন্ত্রাঃ প্রসিধ্যন্তি মুদ্রা মন্ত্র প্রযোগতঃ॥ ইতি তন্ত্রসারঃ॥

মোহনঃ পুং ধুস্তুরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ কামদেবস্য পঞ্চবাণান্তর্গতবাণবিশেষঃ। ইতি ত্রিকাণ্ডশেষঃ॥ মোহকারকে ত্রি॥

মোহনা স্ত্রী ত্রিপুরমালীপুষ্পং। ইতি রত্নমালা॥ মকম্মালা। ইতি শব্দমালা॥

মোহনী স্ত্রী উপোদকী॥ ইতি রাজনির্ঘণ্টঃ॥ বটপত্রী। ইতি ভাবপ্রকাশঃ॥

মোহরাত্রিঃ স্ত্রী দৈনন্দিনপ্রলয়ঃ। যথা। এবং পঞ্চাশদব্দে চ গতে তু ব্রহ্মণো নৃপ। দৈনন্দিনন্তু প্রলয়ং বেদেষু পরিকীর্ত্তিতং॥ মোহরাত্রিশ্চ সা প্রোক্তা বেদবিদ্ভিঃ পুরাতনৈঃ। তত্র সর্ব্বে প্রণষ্টাশ্চ চন্দ্রার্কাদি দিগীশ্বরাঃ॥ আদিত্যা বসবো রুদ্রা মনিন্দ্রা মানবাদয়ঃ। ঋষয়ো মুনযশ্চৈব গন্ধর্ব্বা রাক্ষসাদয়ঃ॥ মার্কণ্ডেযো লোমশশ্চ পেচকশ্চিরজীবিনঃ। ইন্দ্রদ্যুম্নশ্চ নৃপতিশ্চাকূপারশ্চ কচ্ছপঃ॥ নাড়ীজঙ্ঘা বকশ্চৈব সর্ব্বে নষ্টাশ্চ তত্র বৈ। ব্রহ্মলোকাদধঃ সর্ব্বে লোকা নাগালয়া

তথা ॥ ব্রহ্মলোকং যযুঃ সর্ব্বে ব্রহ্ম-লোকাদধ স্তথা। গতে দৈনন্দিনে ব্রহ্মা লোকাংশ্চ সসৃজে পুনঃ॥এবং শতাব্দ পর্য্যন্তং পরমায়ুশ্চ ব্রহ্মণঃ। ব্রহ্মণশ্চ নিপাতে চ মহাকল্পো ভবেন্নৃপ॥প্রকীর্ত্তিতা মহারাত্রিঃ সা এব চ পুরাতনৈঃ। ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৫১ অধ্যায়ঃ॥ ✽ ॥ মোহঃ কর্ত্তব্যাগুহঃ স এব রাত্রিরিব রাত্রিঃ বুদ্ধিমোহকত্ত্বান্নিদ্রারূপা। ইদানীন্তন জনানাং রাত্রি রিতি বা। ইতি দেবীমাহাত্ম্যটীকায়াং বিদ্যাবিনোদঃ॥✽॥ জন্মাষ্টমীরাত্রিঃ। যথা। দীপোৎসব চতুর্দ্দশ্যামমযা যোগ এব চেৎ। কালরাত্রি র্মহেশানি তারা কালী প্রিয়ঙ্করী॥ জন্মাষ্টমী মহেশানি মোহরাত্রিঃ প্রকীর্ত্তিতা। তৃতীযা মাধবে শুক্লা জলবারক্ষ সংযতা॥ দারুণা কীর্ত্তিতা দেবি সর্ব্বসিদ্ধেশ্বরীপরা। ইতি শক্তিসঙ্গমতন্ত্রং॥

মোহশাস্ত্রং ক্লী অবিদ্যাজনকগ্রন্থঃ। যথা। গোপতিং প্রাহ বিপ্রেন্দ্রানালোক্য ভগবান্ হরিঃ। নবেদবাহ্য পুরুষে পুণ্যলেশোঽপি শঙ্কর॥ স ঞ্জ্যতে মহাদেব ধর্ম্মো বেদাদ্ধি নির্ব্বভৌ। তথাপি ভক্তবাৎসল্যাদ্রক্ষিতব্যা মহেশ্বর॥ অস্মাভিঃ সর্ব্বএবনে গন্তারো নরকানপি। অস্মাদ্বে বেদবাহ্যানাং রক্ষণায চ পাপিনাং॥ বিমোহনায শাস্ত্রাণি করিষ্যাবো বৃষধ্বজ॥ এবং সম্বোধিতো রুদ্রো মাধবেন মুরারিণা। চকার মোহশাস্ত্রাণি কেশবোপি শিবেরিতঃ॥ কাপালং নাকুলং বামং ভৈরবং পূর্ব্বপশ্চিমং॥ পঞ্চরাত্রং পাশুপতং তথান্যানি সহস্রশঃ॥ ইতি কৌর্ম্মে ১৪ অধ্যাযঃ॥

মোহিনী স্ত্রীং ত্রিপরমালীপুষ্পং। ইতি রত্নমালা॥ সমুদ্রমন্থনকালে দেবানা মমৃত পানাযাসুরাণাং মোহনায চ ভগবদবতারবিশেষঃ। যথা। ধান্বন্তরং দ্বাদশমং ত্রয়োদশম মেব চ। অপাযযৎ সুরানন্যান্ মোহিন্যা মোহযন্ স্ত্রিযা। ইতি শ্রীভাগবতে ১ স্কন্ধে ৩ অধ্যাযঃ॥ স্বর্বেশ্যাবিশেষঃ। যস্যাঃ শাপাৎ ব্রহ্মণো হ্যপূজ্যত্বং জাতং। যথা। যতো হসসি গর্ব্বেণ ততো হপূজ্যো ভবাচিরং। অচিরাদ্দর্পভঙ্গং তে করিষ্যতি হরিঃ স্বযং॥ নিবোধ শরণং ব্রহ্মন্ স্বর্বেশ্যাযাশ্চ সাম্প্রতং। তবৈব কবচং স্তোত্রং মন্ত্রং গৃহ্নাতি যো নরঃ॥ ভবিতা ত-

জ্য বিপ্রশ্চ স যাস্যত্যুপহাস্যতাং। ভবিতা বার্ষিকী পূজা দেবজানাং যুগে যুগে॥ তব মাঘ্যাঞ্চ সংক্রান্ত্যাং ন ভবিষ্যতি সা পুনঃ। ইত্যুক্ত্বা মোহিনী শীঘ্রং জগাম মদনালয়ং॥ তেন সার্দ্ধং রতিং কৃত্বা বভূব বিজ্বরা পুনঃ। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ৩৩ অধ্যায়ঃ॥ বিস্তরস্তু ব্রহ্মন্‌শব্দে দ্রষ্টব্যঃ॥

মোক্ষ কি ক্ষেপে। ইতি কবিকল্পদ্রুমঃ॥ কি মোক্ষয়তি মোক্ষতি। ইতি দুর্গাদাসঃ॥

মোক্ষঃ পুং মুক্তিঃ॥ পাটলিবৃক্ষঃ॥ মোচনং। ইতি মেদিনী॥ মৃত্যুঃ। ইতি হেমচন্দ্রঃ॥ মোক্ষধর্মস্তু মহাভারতে শান্তিপর্ব্বণি দ্রষ্টব্যঃ॥

মোক্ষকঃ পুং মুষ্ককবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

মোক্ষোপায়ঃ পুং মুক্তিসাধনং। তত্তু তপঃ। শমাদিঃ। যোগঃ। জ্ঞানঞ্চ। ইতি হেমচন্দ্রঃ॥

মৌকুলিঃ পুং কাকঃ। ইতি হেমচন্দ্রঃ॥

মৌক্তিকং ক্লী মুক্তা। ইত্যমরঃ॥

মৌক্তিকতণ্ডুলঃ পুং ধবলযাবনালঃ। ইতি রাজনির্ঘণ্টঃ॥

মৌক্তিকপ্রসবা স্ত্রী শুক্তিঃ। ইতি রাজনির্ঘণ্টঃ॥

মৌক্তিকশুক্তিঃ স্ত্রী শুক্তিঃ। মুক্তারঝিনুক্‌ ইতি ভাষা। ইতি রাজনির্ঘণ্টঃ॥

মৌখর্য্যং ক্লী মুখরত্বং। মুখরস্যভাব ইত্যর্থে ষ্যণ্‌ প্রত্যয়েন নিষ্পন্নং॥

মৌখিকং ত্রি মুখসম্বন্ধি। মুখস্যেদমিত্যর্থে ষ্ণিক প্রত্যয়েন নিষ্পন্নং॥

মৌঞ্জী স্ত্রী মুঞ্জনির্ম্মিতমেখলা। যথা। বিপ্রস্য ক্ষত্রিয়স্যাপি মৌঞ্জী স্যাদ্দক্ষিণায়নে। দক্ষিণে চ বিশাং কার্য্যং নানধ্যায়ে ন সংক্রমে॥ মনুঃ। মৌঞ্জী ত্রিবৃৎ সমা শ্লক্ষ্ণা কার্য্যা বিপ্রস্য মেখলা। ক্ষত্রিয়স্য চ মৌর্ব্বী জ্যা বৈশ্যস্য শনতান্তবী॥ মুঞ্জালাভে তু কর্ত্তব্যা কুশাশ্মন্তক বল্বজৈঃ। ত্রিবৃতা গ্রন্থিনৈকেন ত্রিভিঃ পঞ্চভি রেব বা॥ ইতি সংস্কারতত্ত্বং॥

মৌঞ্জীতৃণাখ্যঃ পুং মুঞ্জঃ। ইতি রাজনির্ঘণ্টঃ॥

মৌঞ্জীপত্রা স্ত্রী বল্বজা। ইতি রাজনির্ঘণ্টঃ॥

মৌঞ্জীবন্ধঃ পুং মুঞ্জমেখলাবন্ধনং। উপনয়ন মিতি যাবৎ। যথা। জন্মভাদষ্টমে সিংহে নীচস্থে শত্রুভে গুরৌ। মৌঞ্জীবন্ধঃ শুভঃ প্রোক্ত

শ্চৈত্রে মীনগতে রবৌ॥ ইতি জ্যোতিনির্বন্ধে নারদবচনং॥

মৌঢ্যং ক্লী মোহঃ। ইতি হেমচন্দ্রঃ॥

মৌদ্গলিঃ পুং কাকঃ। ইতি ত্রিকাণ্ডশেষঃ॥

মৌদ্গল্যঃ পুং মুদ্গলমুনিপুত্রঃ। স চ গোত্রকারকঃ। অস্য পঞ্চপ্রবরাঃ যথা। ঔর্ব্ব চ্যবন ভার্গব জামদগ্ন্যাপ্লবন্তঃ। ইতি জলদীপিকা॥

মৌদ্গীনং ক্লী মুদ্গভবোচিতক্ষেত্রং। ইত্যমরঃ॥

মৌনং ক্লী শব্দপ্রযোগরাহিত্যং। তৎপর্য্যায়ঃ। অভাষণং ২। তূষ্ণীং ৩ তূষ্ণীকাং ৪। ইত্যমরঃ॥ কর্ম্মবিশেষে মৌনাচরণং যথা। উচ্চারে মৈথুনে চৈব প্রস্রাবে দন্তধাবনে। স্নানে ভোজন কালে চ ষট্‌সু মৌনং সমাচরেৎ॥ ইতি তিথ্যাদিতত্ত্বং॥

মৌনী পুং মুনিঃ। ইতি জটাধরঃ॥ মৌনযুক্তে ত্রি। যথা। সিনীবালী কুহূর্বাপি যদি সোমদিনে ভবেৎ। গোসহস্রফলং দদ্যাৎ স্নানং যন্মৌনিনা কৃতং॥ এতচ্চ মৌন নক্ষত্রোদয মারভ্য স্নানপর্য্যন্তং কার্য্যং নতু স্নানকালমাত্রে। ইতি তিথ্যাদিতত্ত্বং॥

মৌনেয়ঃ পুং গন্ধর্ব্বগণবিশেষঃ। যথা। গন্ধর্ব্বাপ্সরসঃ পুণ্যা মৌনেয়াস্তু নিবোধত। চিত্রঃ সেনোগ্রসেনৌ তু ঊর্ণায়রনিধ স্তথা॥ ধৃতরাষ্ট্র স্তথোমাংশু সূর্য্যবর্চা স্তথৈব চ। যুগ তত্ত্বগপৎ কার্ষ্ণো নিদি শ্চিত্ররথ স্তথা॥ ত্রযোদশঃ শালিশিরাঃ পর্য্যন্যশ্চ চতুর্দ্দশঃ। ইত্যেতে দেব গন্ধর্ব্বা শ্চতত্রিংশচ্ছ ভাপ্সরাঃ॥ ইতি বহ্নিপুরাণং॥

মৌরজিকঃ ত্রি মুরজবাদকঃ। ইত্যমরঃ॥

মৌর্খ্যং ক্লী জাড্যং। ইতি হেমচন্দ্রঃ॥

মৌর্ব্বী স্ত্রী ধনুর্গুণঃ। ইত্যমরঃ॥ অজশৃঙ্গী। কোঁগা ইতি ভাষা। ইতি রত্নমালা॥

মৌলঃ পুং ভূম্যাদের্মূলজ্ঞাতা। মোড়ল ইতি ভাষা। যথা। যং পরম্পরযা মৌলাঃ সামন্তাঃ স্বামিনং বিদুঃ। তদন্বয়স্যাগতস্য দাতব্যা গোত্রজৈ র্মহী। ইতি দায়তত্ত্বং॥ তস্য লক্ষণং যথা। যে তত্র পূর্ব্ব সামন্তাঃ পশ্চাদ্দেশান্তরং গতাঃ। তন্মূলত্বাত্তু তে মৌলা ঋষিভিঃ পরিকীর্ত্তিতাঃ॥ ইতি মিতাক্ষরা॥

মৌলিঃ পুং স্ত্রী চূড়া॥ কিরীটং॥ সংযতকেশঃ। ইত্যমরঃ॥ মস্তকং। ইতি হেমচন্দ্রঃ॥

মৌলিঃ পুং অশোকবৃক্ষঃ। ইতি মেদিনী ॥

মৌলিঃ স্ত্রী ভূমিঃ। ইতি মেদিনী ॥

মৌলিকঃ পুং অকুলীনভিন্নঃ। যথা রাঢীয় বারেন্দ্র ব্রাহ্মণস্য শ্রোত্রিয়ঃ তথা কায়স্থস্য মৌলিকঃ। এবং দাক্ষিণাত্য বৈদিক ব্রাহ্মণস্য অন্যপূর্ব্বাপরিনেতাপি তৎপদবাচ্যঃ ॥ বঙ্গজকায়স্থস্য সচ মধ্যল্য শব্দবাচ্যঃ। যথা। অথ মধ্যল্য লক্ষণমাহ। মধ্যল্য শব্দো রূঢ ইত্যন্যঃ। ডিত্থ ডবিত্থবৎ। মধ্যল্যঃ কুলমধ্যস্থ কুলীনস্য বিশ্রামস্থল মিত্যর্থঃ। মধ্যল্য শব্দস্য লক্ষণান্তরং। কুলীনেতর সিদ্ধ বংশ জাতকত্বে সতি দশপুরুষাবধি অনবচ্ছিন্ন কুলাৰ্চনত্বং মধ্যল্যত্বং। স চ দ্বিবিধঃ। সিদ্ধঃ সাধ্যশ্চ। সিদ্ধত্বং প্রকৃত মধ্যল্যত্বং। প্রকৃত সিদ্ধবংশজাতত্বে সতি দশপুরুষাবধি কুলার্চকত্বং সিদ্ধত্বং। সিদ্ধপদাকাঙ্ক্ষিত্বে সতি দশপুরুষাবধি কুলার্চকত্বং সাধ্যত্বং। অস্য প্রসংশা মাহ। কুলীন কুলরক্ষার্থং বিবাদেষু মীমাংসকা। এতেষাং গুণ মাশ্রিত্য মধ্যল্যঃ কুল মুত্তমং ॥ ইতি কুলদীপিকা ॥ * ॥ দক্ষিণরাঢীয়কায়স্থস্যাষ্ট সম্মৌলিকা যথা। গৌড়েশ্বৌ কীর্ত্তিমন্ত শ্চির বসতি কৃতা মৌলিকা যে হি সিদ্ধা স্তেদত্তাঃ সেন দাসাঃ কর গুহ সহিতাঃ পালিতাঃ সিংহ দেবাঃ। যে বা পদ্যাভিমুখ্যাঃ স্থিতি বিনয়যুষঃ সপ্তত্তি স্তে দ্বি পূর্ব্বা মিত্রাদ্যা বীক্ষ্য রাজ্ঞা চরণ গুণযুতা মৌলিকত্বেন সাধ্যাঃ ॥ অপিচ। সেনো দত্তঃ করো জ্ঞেয়ো দাসো দেবঃ প্রতিষ্ঠিতঃ। পালিতঃ সিংহ ধর্ম্মজ্ঞো গুহঃ সম্মৌলিকাঃ স্মৃতাঃ ॥ * ॥ দ্বিসপ্ততি সাধ্যমৌলিকা যথা। হোড়ঃ স্বর ধর ধরণী বাণ আইচ সোমঃ পই সুর সামঃ। ভঞ্জো বিন্দো গুহ বল লোধঃ শর্ম্মা বর্ম্মা হুই ভুই চন্দ্রঃ ॥ রুদ্রো রক্ষিত রাজাদিত্যো বিষ্ণু র্নাগঃ খিল পিল গুতঃ। ইন্দ্রো গুপ্তঃ পালো ভদ্র ওম শ্চাঙ্কুর বঙ্কুর নাথঃ। সাঁই হেশো মানো গণ্ডো রাহা রাণা রাহুত সানা। দাহা দানা গণ উপমানা। শ্যামঃ ক্ষোমো যর বৈগুবঃ বীদ তেজ শ্চাণব আশঃ। শক্তি ভূতো ব্রহ্মো শানঃ ক্ষেমো হেমো বর্দ্ধন রঙ্গঃ। গুইঃ কীর্ত্তির্যশঃ কুণ্ডো নন্দী শীলো ধনুর্গুণঃ। ইতি দ্বিসপ্ততি মৌলিকাঃ ॥ * ॥ অন্যচ্চ। দেবো ভূদেব

ভক্তো গুহ সদৃশ গুহো দাস ঈ
শানদাসঃ সেনো দত্তঃ সুদত্তা ম-
হিত জন চযঃ পালিতো ধৰ্ম্মপালঃ
। সিংহঃ সিংহপ্রতাপঃ ক্ষিতি নি
কর করা দান দক্ষঃ করো হসৌ
গৌড়েষ্টৌ সংস্থিতা স্তে গুণগণ নি
পুণা মৌলিকত্বেন সিদ্ধাঃ ॥ * ॥
হোড় বাণ ধরণী খিল সোনা ভুঞ্জ
বিন্দ গুহ রাজ রাহুতাঃ। কু পা
ল বল সান রক্ষিতা লোধ শৰ্ম্ম
ভুঁযি বৰ্ম্ম বন্ধরাঃ ॥ চন্দ্র শাঁযি
গুযি ভদ্র পৈসুরা গণ্ড গুপ্ত ঘর
কীৰ্ত্তি বৰ্দ্ধনাঃ। ক্ষেম হেন গণ নাথ
বিষ্ণবো ব্রহ্ম রঙ্গ পিল হুই ধনুর্গু
ণাঃ ॥ তেজো হর্ণব ধর ধরাযিচ
শক্তি ভূতাঃ ক্ষোমৌষ শান বিদ
শীল যশোম নন্দী। দাহাঙ্কুরে-
ন্দ্র শুভ জণ্ড মনোপমানা দানাশ
গুপ্ত বিদিতা ভুবি কীৰ্ত্তিমন্তঃ॥ হে-
সাদিত্যৌ রাণ রাহা সানা চ থা-
মক স্তথা। দ্বিসপ্ততি মিতাঃ সাধ্যা
মৌলিকা বিদিতাঃ ক্ষিতৌ॥ ইতি
কুলাচার্য্যকারিকা॥ * ॥ মূলসম্ব
ন্ধিনি মৌলসম্বন্ধিনি চ ত্রি ॥

মৌষলং ক্লী মুষলবৎ। যথা। গঙ্গা
যাং মৌষলং স্নানং মহাপাতক না
শনং। ইতি প্রায়শ্চিত্ততত্ত্বধৃত ভ
বিষ্যপুরাণ চবনং ॥ মহাভারত-
স্যাষ্টাদশপৰ্ব্বান্তৰ্গতপৰ্ব্ববিশেষঃ।
যথা। মৌষলং পৰ্ব্ব চোদ্দিষ্টং ততো
ঘোরং সদারুণং। মহাপ্রস্থানিকং
পৰ্ব্ব স্বৰ্গারোহণিকং ততঃ ॥ ইতি
মহাভারতে আদিপৰ্ব্ব ॥ মুষলস-
ম্বন্ধিনি ত্রি ॥

মৌষ্টা স্ত্রী মুষ্টিপ্রহরণক্রীড়া। ইত্য-
মরঃ। মুষ্টিপ্রহরণং অস্যাং ক্রীড়া-
যাং মৌষ্টা ষঃ। নিত্ত্বেবৃদ্ধিরিতি বৃদ্ধিঃ
যযোর্লোপ ইতি ইকারলোপঃ।
স্ত্রিযামত ইত্যাপ। ইতি ভরতটীকা-
যাং ভরতঃ ॥

মৌহূৰ্ত্তঃ } পুং জ্যোতির্ব্বেত্তা।
মৌহূৰ্ত্তিকঃ } ইত্যমরঃ ॥

ম্না অভ্যাসে। ইতি কবিকল্পদ্রুমঃ ॥
অভ্যাসঃ পৌনঃপুন্যেনানুশীলনং।
মনতি সন্ধ্যাং ব্রাহ্মণঃ। ইতি দুর্গা-
দাসঃ ॥

ম্রদ ষ ম ঙ ক্ষোদে। ইতি কবিকল্প-
দ্রুমঃ ॥ রেফযুক্তঃ। ক্ষোদ শ্চূর্ণীক-
রণং। ম ম্রদযতি ষ ম্রদা ঙ ম্রদতে
কাননং দন্তী। ইতি দুর্গাদাসঃ ॥

ম্রদিমা পুং মৃদুতা। মৃদুশব্দাদিমন্
প্রত্যযেন নিষ্পন্নঃ ॥

ম্রদিষ্ঠঃ ত্রি অতিশযমৃদুঃ। মৃদুশব্দা-
দিষ্ঠপ্রত্যযেন নিষ্পন্নঃ ॥

ম্রদীযান্ ত্রি অতিশয়ম্রদঃ। ম্রদ-শব্দাদীযসু প্রত্যযেন নিষ্পন্নঃ॥

ম্রক্ষ ক ম্রক্ষণে॥ স্নেহনে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তাদিঃ। ম্রক্ষণং দ্রব্যস্য দ্রব্যান্তরেণ যোজনং। ক ম্রক্ষযতি ঘৃতেনান্নং লোকঃ। ইতি দুর্গাদাসঃ॥

ম্রক্ষ সংঘাতে। ইতি কবিকল্পদ্রুমঃ॥ রেফযুক্তাদিঃ। ম্রক্ষতি পযসা শক্তূন্ লোকঃ। ইতি দুর্গাদাসঃ॥

ম্রক্ষঃ পুং স্বদোষগূহনং। ইতি ত্রিকাণ্ডশেষঃ॥ ম্রক্ষণঞ্চ॥

ম্রক্ষণং ক্লী তৈলং। ইতি হেমচন্দ্রঃ॥ দ্রব্যস্য দ্রব্যান্তরেণ সংযোজনং॥ স্নেহনং॥ রাশীকরণং। ইতি ম্রক্ষ ধাতো র্ভাবে হনট্ প্রত্যযেন নিষ্পন্নং॥

ম্রাতনং ক্লী কৈবর্ত্তীমুস্তকং। ইতি শব্দচন্দ্রিকা॥

ম্রুচ উ ইর গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ উ ম্রোচিত্বা ম্রোক্ত্বা ইর অম্রুচৎ অম্রোচীৎ। ইতি দুর্গাদাসঃ॥

ম্রুন্চ উ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ উ ম্রুন্চিত্বা ম্রুক্ত্বা। ইতি দুর্গাদাসঃ॥

ম্রেট ঞ উন্মাদে। ইতি কবিকল্পদ্রুমঃ॥ ঞ অমিম্রেটৎ। ম্রেটতি লোকঃ উন্মাদ্যতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ম্রেড ঞ উন্মাদে। ইতি কবিকল্পদ্রুমঃ॥ ঞ অমিম্রেডৎ। ম্রেডতি লোক উন্মাদ্যতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ম্লক্তং ক্লী চোরিতং। যথা। চোরিতং মুষিতং ম্লক্তং প্রতীতন্তু প্রতীচ্ছিতং। ইতি ভূরিপ্রযোগঃ॥

ম্লানং ত্রি মলিনং। যথা। মলিনং কচ্চরং ম্লানং কশ্মলঞ্চ মলীমসং। ইতি হেমচন্দ্রঃ॥

ম্লানিঃ স্ত্রী কান্তিক্ষযঃ। ইতি ম্লৈধাতো র্ভাবে ক্তি প্রত্যযেন নিষ্পন্নং॥

ম্লিষ্টং ক্লী অস্পষ্টবাক্যং। তৎপর্য্যাযঃ। অবিস্পষ্টং ২। ইত্যমরঃ॥

ম্লিষ্টঃ ত্রি অব্যক্তবাক্॥ ম্লানঃ। ইতি মেদিনী॥

ম্লুচ উ ইর গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ উ ম্লোচিত্বা ম্লুক্ত্বা। ইর অম্লুচৎ অম্লোচীৎ। ইতি দুর্গাদাসঃ॥

ম্লুন্চ উ গত্যাং। ইতি কবিকল্পদ্রুমঃ॥ উ ম্লুন্চিত্বা ম্লুক্ত্বা। ইতি দুর্গাদাসঃ॥

ম্লেচ্ছ কি দেশ্যোক্তৌ। ইতি কবিকল্পদ্রুমঃ॥ দেশ্যা গ্রাম্যা উক্তি র্দেশ্যোক্তি রসংস্কৃত কথন মিত্যর্থঃ। কি ম্লেচ্ছযতি ম্লেচ্ছতি মূঢ়ঃ। অন্ত র্বিদ্যা মসৌ বিদ্বান্ ম্লেচ্ছতি ধূর্ত্ত

ব্রুত ইতি হলাযুধঃ ॥ অনেকার্থত্বাদ-ব্যক্ত শব্দেপি । তথাচামরঃ । অথ ম্লিষ্ট মবিস্পষ্ট মিতি । ম্লেচ্ছ ব্যক্তা-যাং বাচি ইতি প্রাঞ্চঃ । তত্র রমা-নাথস্তু। ম্লেচ্ছতি বটু র্ব্যক্তং বদতীত্য-র্থঃ । অব্যক্তাযা মিতি পাঠে ধ্বং-সিতাযাং বাচীত্যর্থঃ ॥ তৎসাদৃ-শ্য মভাবশ্চ তদন্যত্বং তদল্পতা । অপ্রাশস্ত্যং বিরোধশ্চ নঞর্থাঃ ষট্ প্রকীর্ত্তিতাঃ । ইতি ভাষ্যবচনেন নঞো হপ্রাশস্ত্যার্থত্বাৎ ইতি ব্যা-খ্যানায় হলাযুধোক্ত মুদাহৃতবান্ । ইতি দুর্গাদাসঃ ॥

ম্লেচ্ছং ক্লী হিঙ্গুলং । ইতি রাজনি-র্ঘণ্টঃ ॥

ম্লেচ্ছঃ পুং কিরাতশবরপুলিন্দাদি-জাতিঃ । ইত্যমরঃ ॥ পামরভেদঃ ॥ পাপরক্তঃ ॥ অপভাষণং । ইতি মেদিনী ॥ ম্লেচ্ছাদীনাং সর্ব্বধর্ম্ম রা-হিত্য মুক্তং হরিবংশে । সগর স্তাং প্রতিজ্ঞাঞ্চ গুরো র্ব্বাক্যং নিশম্য চ । ধর্ম্মং জঘান তেষাং বৈ বেশা-ন্যত্বং চকার হ ॥ অর্দ্ধং শকানাং শিরসো মুণ্ডযিত্বা ব্যসর্জ্জযৎ । জব-নানাং শিরঃ সর্ব্বং কাম্বোজানান্ত-থৈব চ ॥ পারদা মুক্তকেশাশ্চ পহ্লবাঃ শ্মশ্রুধারিণঃ । নিঃস্বাধ্যায বষট্কারাঃ কৃতা স্তেন মহাত্মনা ॥ শকা যবনকাম্বোজাঃ পারদাঃ পহ্লবা স্তথা । কোলিসর্পাঃ সমহিষা দার্ব্বা শ্চোলাঃ সকেরলাঃ ॥ বশিষ্ঠ বচনাদ্রাজন্ সগরেণ মহাত্মনা ॥ শকানাং শকদেশোদ্ভবানাং ক্ষত্রি-যাণাং । এবং জবনাদীনামিতি । অত্র জবন শব্দ স্তদ্দেশোদ্ভব বাচী চবর্গ তৃতীযাদিঃ । জবনো দেশ বেগি নো রিতি ত্রিকাণ্ডশেষাভিধান দর্শ-নাৎ ॥ * ॥ তেষাং ম্লেচ্ছত্ব মপ্যুক্তং বিষ্ণুপুরাণে । তথা কৃতান্ জবনাদী-নুপক্রম্য তেচাত্মধর্ম্ম পরিত্যাগাৎ ম্লেচ্ছত্বং যযু রিতি । বৌধাযনঃ । গো-মাংস খাদকো যশ্চ বিরুদ্ধং বহু-ভাষতে । সর্ব্বাচার বিহীনশ্চ ম্লেচ্ছ ইত্যভিধীযতে ॥ ইতি প্রাযশ্চিত্ততত্ত্বং ॥ * ॥ অপিচ । দেবযান্যাং যযাতে র্দ্বৌ পুত্রৌ যদুঃ তুর্ব্বসুশ্চ । শর্ম্মিষ্ঠাযাং ত্রযঃ পুত্রাঃ দ্রুহ্যুঃ অনুঃ পুরুশ্চ । তত্র যদু প্রভৃতয শ্চত্বারঃ পিতু রাজ্ঞাহেলনং কৃতবন্তঃ পিত্রা শপ্তাঃ । জ্যেষ্ঠপুত্রং যদুং শশাপ তব বংশে রাজা চক্রবর্ত্তী মাভূদিতি । তুর্ব্বসু দ্রুহ্যূন্ শশাপ যুষ্মাকং বংশ্যা বেদবাহ্যা ম্লেচ্ছা ভবিষ্যন্তি । ইতি শ্রীভাগবতমতং ॥ * ॥ অন্যচ্চ

। শকজবন কাম্বোজ পারদ পহ্লবা হন্যমানো স্তৎ কুল গুরুং বশিষ্ঠং শরণং যযুঃ। অথৈতান্ বশিষ্ঠো জীবন্মৃতকান্ কৃত্বা সগরমাহ। বৎস বৎসালম্ মেভি জীবন্মৃতকৈ রনুসৃতৈঃ। এতে চ ময়ৈব ত্বৎ প্রতিজ্ঞা পালনায় নিজধর্ম্ম দ্বিজসঙ্গ পরিত্যাগং কারিতাঃ। স তথেতি তদ্ গুরু বচন মভিনন্দ্য তেষাং বেশান্যত্ব মকারয়ৎ। জবনান্মুণ্ডিত শিরসো ঽর্দ্ধ মুণ্ডাংশ্চকার। প্রলম্বকেশান্ পারদান্। পহ্লবাংশ্চ শ্মশ্রুধরান্নিঃস্বাধ্যায বষট্কারানেতানন্যাংশ্চ ক্ষত্রিয়াংশ্চকার। তেচাত্ম ধর্ম্ম পরিত্যাগাদ্ব্রাহ্মণৈশ্চ পরিত্যক্তা ম্লেচ্ছতাং যযুঃ। ইতি বিষ্ণুপুরাণে ৪ অংশে ৩ অধ্যায়ঃ ॥ * ॥ প্রকারান্তরেণ তস্যোৎপত্তি র্যথা। সূত উবাচ। বংশে স্বায়ম্ভুবে হ্যাসীদঙ্গো নাম প্রজাপতিঃ। মৃত্যোস্তু দুহিতা তেন পরিণীতাতিরমুখী ॥ সুতীর্থা নাম তস্যাস্তু বেণো নাম সুতঃ পুরা। অধর্ম্ম নিরতঃ কামী বলবান্ বসুধাধিপঃ ॥ লোকে ঽপ্যধর্ম্মকৃজ্জাতঃ পরভার্য্যাপহারকঃ। ধর্ম্মাচার প্রসিদ্ধ্যর্থং জগতো ঽস্য মহর্ষিভিঃ ॥ অনুনীতো ঽপি ন দদাবনুজ্ঞাং স যদা ততঃ। শাপেন মারয়িত্বৈন মরাজক ভয়ার্দ্দিতাঃ ॥ মমন্থু র্ব্রাহ্মণা স্তস্য বলাদ্দেহ মকল্মষাঃ। তৎকায়ান্মথ্যমানাত্তু নিষ্পেতু র্ম্লেচ্ছজাতয়ঃ ॥ শরীরে মাতু রংশেন কৃষ্ণাঞ্জন সমপ্রভাঃ। ইতি মৎস্যপুরাণে ১০ অধ্যায়ঃ ॥ * ॥ ম্লেচ্ছভাষাভ্যাস নিষেধো যথা। ন সাতয়েদিষ্টকাভিঃ ফলানি বৈ ফলেন তু। ন ম্লেচ্ছভাষাং শিক্ষেত নাকর্ষেচ্চ পদাসনং ॥ ইতি কৌর্ম্মে উপরিভাগে ১৫ অধ্যায়ঃ ॥ * ॥ তস্য মধ্যমাতামসীগতি র্যথা। হস্তিনশ্চ তুরঙ্গাশ্চ শূদ্রা ম্লেচ্ছাশ্চ গর্হিতাঃ। সিংহা ব্যাঘ্রা বরাহাশ্চ মধ্যমা তামসীগতিঃ ॥ ইতি মানবে ১২ অধ্যায়ঃ ॥

ম্লেচ্ছকন্দঃ ত্রি লশুনং। ইতি রাজনির্ঘণ্টঃ ॥

ম্লেচ্ছজাতিঃ ত্রি গোমাংসখাদক বহুবিরুদ্ধভাষক সর্ব্বাচারবিহীন বর্ণঃ। যথা। গোমাংসখাদকো যস্তু বিরুদ্ধং বহুভাষতে। সর্ব্বাচার বিহীনশ্চ ম্লেচ্ছ ইত্যভিধীয়তে ॥ ইতি প্রায়শ্চিত্ততত্ত্ব ধৃত বৌধায়ন বচনং ॥ অপিচ। ভেদাঃ কিরাত শবর পুলিন্দা ম্লেচ্ছজাতয়ঃ। ইত্যমরঃ ॥

অন্যচ্চ। পৌণ্ড্রকা শ্চৌড্রু দ্রবিড়া কাম্বোজা জবনাঃ শকাঃ। পারদাঃ পহ্ন্বা শ্চীনাঃ কিরাতা দরদাঃ খশাঃ॥ মুখ বাহূরু পজ্জানাং যা লোকে জাতযো বহিঃ। ম্লেচ্ছবাচ শ্চার্য্যবাচঃ সর্ব্বেতে দস্যবঃ স্মৃতাঃ॥ ইতি মানবে ১০ অধ্যাযঃ॥

ম্লেচ্ছদেশঃ পুং চাতুর্ব্বর্ণ্যব্যবস্থাদিরহিতস্থানং। তৎপর্য্যাযঃ। প্রত্যন্তঃ ২। ইত্যমরঃ॥ ভারতবর্ষস্যান্তং প্রতিগঃ প্রত্যন্তঃ। ম্লেচ্ছযতি শিষ্টাচার হীনো ভবত্যত্র ম্লেচ্ছঃ অল্। সচাসৌ দেশশ্চেতি ম্লেচ্ছদেশঃ। কিম্বা ম্লেচ্ছযন্তি অসংস্কৃতং বদন্তি শিষ্টাচার হীনা ভবন্তীতি বা পচাদ্যনি ম্লেচ্ছা নীচ জাতযঃ তেষাং দেশো ম্লেচ্ছদেশঃ। ভারতবর্ষস্যান্তঃ শিষ্টাচার রহিতঃ কামরূপ বঙ্গাদিঃ। উক্তঞ্চ। চাতুর্ব্বর্ণ্য ব্যবস্থানং যস্মিন্ দেশে ন বিদ্যতে। ম্লেচ্ছদেশঃ সবিজ্ঞেয আর্য্যাবর্ত্ত স্ততঃ পর মিতি। ইতি ভরতঃ॥

ম্লেচ্ছভোজনং ক্লী যাবকঃ। ইতি শব্দরত্নাবলী॥

ম্লেচ্ছভোজনঃ পুং গোধূমঃ। ইতি ত্রিকাণ্ডশেষঃ॥

ম্লেচ্ছমণ্ডলং ক্লী ম্লেচ্ছদেশঃ। ইতি হেমচন্দ্রঃ॥

ম্লেচ্ছমুখং ক্লী তাম্রং। ইত্যমরঃ॥

ম্লেচ্ছাশঃ পুং ম্লেচ্ছভোজনঃ। গোধূমঃ। ইতি কেচিৎ॥

ম্লেচ্ছাস্যং ক্লী তাম্রং। ইতি হারাবলী॥

ম্লেচ্ছিতং ক্লী ম্লেচ্ছ ভাষা। অপশব্দঃ। তৎপর্য্যাযঃ। পরভাষা ২। ইতি হারাবলী॥

ম্লেট ঋ উন্মাদে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অমিম্লেটৎ। ম্লেটতি লোকঃ উন্মাদ্যতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ম্লেড ঋ উন্মাদে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অমিম্লেডৎ। ম্লেডতি। উন্মাদ্যতীত্যর্থঃ। ইতি দুর্গাদাসঃ॥

ম্লেব ঋ ঙ সেবনে। ইতি কবিকল্পদ্রুমঃ॥ ঋ অমিম্লেবৎ। ঙ ম্লেবতে। ইতি দুর্গাদাসঃ॥

ম্লৈ কান্তিসংক্ষযে। ইতি কবিকল্পদ্রুমঃ॥ ম্লাযতি চন্দ্রো দিবসে। ইতি দুর্গাদাসঃ॥

---

## য

য অন্তঃস্থযকারঃ। সচ ষড়্বিংশহল-বর্ণঃ। অস্যোচ্চারণস্থানং তালুঃ। তস্য স্বরূপং যথা। যকারং শৃণু চার্ব্বঙ্গি চতুষ্কোণময়ং সদা। প-

লালধূম্র সঙ্কাশং স্বয়ং পরম কু-
ণ্ডলী ॥ পঞ্চপ্রাণ ময়ং বর্ণং পঞ্চ
দেবময়ং সদা । ত্রিশক্তি সহিতং
বর্ণং ত্রিবিন্দু সহিতং তথা ॥ প্রণ
মামি সদা বর্ণং মুক্তিমোক্ষ ম
ব্যয়ং । ইতি কামধেনুতন্ত্রে ৫ পট-
লঃ ॥ তস্য লেখন প্রকারো যথা ।
ঊর্দ্ধাধঃ ক্রমতো রেখা চতুষ্কোণ
ময়ী শুভা । নারায়ণে শবিধয়স্তাসু
তিষ্ঠন্তি নিত্যশঃ ॥ মাত্রা কুণ্ডলি-
নী জ্ঞেয়া ধ্যান মস্য প্রচক্ষ্যতে ।
ইতি বর্ণোদ্ধারতন্ত্রং ॥

যঃ পুং বায়ুঃ ॥ বন্ধঃ ॥ যোগঃ ॥
যানং ॥ যাতা । ইতি শব্দরত্নাবলী
॥ সর্ব্বনাম । যদ্ শব্দার্থ ইতি যাবৎ
। ইতি বিশ্বঃ ॥

যকঃ ত্রি যঃ । যে ইতি ভাষা । যদ্
শব্দস্য টেরক্তে টেঃ পূর্ব্বং অকাগ-
মেন নিষ্পন্নঃ ॥

যকৃৎ ক্লী কুক্ষের্দক্ষিণভাগস্থমাংস
খণ্ডং । তৎপর্য্যায়ঃ । কালখণ্ডং ২ ।
ইত্যমরঃ ॥ কালখঞ্জং ৩ কালেয়ং ৪
কালকং ৫ । ইতি হেমচন্দ্রঃ ॥ করণ্ডঃ ৬ মহাস্নায়ুঃ ৭ । ইতি রভসঃ
॥ * ॥ অথ শরীরাবয়ববিশেষস্য
যকৃতঃ স্বরূপ মাহ । অধো দক্ষিণ-
ত শ্চাপি হৃদয়াদ্যকৃতঃ স্থিতিঃ ।
তত্তু রঞ্জক পিত্তস্য স্থানং শোণি-
তস্য মতং ॥ * ॥ অথ যকৃদ্রোগ
মাহ । প্লীহমেবাস্য হেত্বাদি সম-
স্তং যকৃদাময়ে । কিন্তু স্থিতি স্তযো
র্জ্ঞেয়া বাম দক্ষিণ পার্শ্বয়োঃ ॥
* ॥ অথ যকৃদ্রোগ চিকিৎসা । প্লী-
হোদ্দিষ্টাঃ ক্রিয়াঃ সর্ব্বা যকৃত্যপি
সমাচরেৎ । কার্য্যঞ্চ দক্ষিণে বাহৌ
তত্র শোণিত মোক্ষণং ॥ ক্ষারঞ্চ
বিডকৃষ্ণাভ্যাং পূতিকস্যাম্বু নিস্রু-
তং । পিবেৎ প্রাত র্যথা বহ্নি র্য-
কৃৎ প্লীহপ্রশান্তয়ে ॥ ইতি ভাব-
প্রকাশঃ ॥

যকৃদাত্মিকা স্ত্রী তৈলপায়িকা ।
ইতি শব্দচন্দ্রিকা ॥

যকৃদ্বৈরী পুং রোহিতকবৃক্ষঃ । যথা
। প্লীহঘ্নো মাংসদলনো যকৃদ্বৈরী
চলচ্ছদঃ । ইতি শব্দচন্দ্রিকা ॥

যচ্ছন্ ত্রি দানকর্ত্তা ॥ উপরমকর্ত্তা ।
দানধাতো র্যমধাতোশ্চ শতৃপ্রত্য-
য়েন নিষ্পন্নঃ ॥

যজ ঐ এ ঔ দেবার্চ্চাদানসঙ্গকৃতৌ
। ইতি কবিকল্পদ্রুমঃ ॥ সঙ্গস্যকৃ-
তিঃ সঙ্গকৃতিঃ ঐ ইজ্যাৎ । এ
যজতি যজতে বিষ্ণুং সুধীঃ । পূজয়-
তীত্যর্থঃ । পশুনা রুদ্রং যজতে পশুং
রুদ্রায় দদাতীত্যর্থঃ । যজতি সঙ্গং

সন্ সতা সহ সঙ্গং করোতীত্যর্থঃ। ওঁ যষ্ঠা। ইতি দুর্গাদাসঃ॥

যজতঃ পুং ঋত্বিক্। যথা। ভূম্ দৃশি বজি পর্বি পচ্যমি তমি হর্যেভ্যো ঽতচ্। দশভ্যো ঽতচ্ স্যাৎ। ইতি সিদ্ধান্তকৌমুদী॥

যজতিঃ পুং যাগঃ। যথা। যজতিষু যেযজামহং কর্য্যামানুযাজেষু। ইতি মলমাসতত্ত্বধৃতাশ্রুতিঃ॥

যজত্রঃ পুং অগ্নিহোত্রী। ইত্যুণাদিকোষঃ॥

যজনং ক্লী যাগঃ। তত্তু ব্রাহ্মণস্য ষট্কর্ম্মান্তর্গত কর্ম্মবিশেষঃ। যথা। অধ্যাপনং অধ্যয়নং যজনং যাজনং তথা। দানং প্রতিগ্রহশ্চৈব ব্রাহ্মণানামকল্পয়ৎ॥ ইতি মানবে ১ অধ্যায়ঃ॥ অস্য লক্ষণং যথা। পশু ক্ষীরাজ্য পুরোডাশ সোমৌষধি চরু প্রভৃতি হবির্ভিঃ খদির পলাশাশ্বত্থ ন্যগ্রোধোডুম্বর প্রভৃতিভিঃ সমিদ্ভিঃ স্রুক্ স্রুবোদূখল মুষল শঠার খনিত্রযূপদারু দর্ভ চর্ম্মগ্রাব পবিত্র ভাজনাদিভি দ্রব্যোপকরণৈ কর্ত্রাতৃ হোত্রধ্বর্য্য ব্রহ্মাদিভি ঋত্বিগ্ভিঃ কাম্য নৈমিত্তিকানাং পক্ষাদি পর্ব্বকানাং যথোক্ত দক্ষিণানাং সম্পাদনং যজনং। ইতি শ্রাদ্ধবিবেকধৃত দেবলবচনং॥

যজম্ পুং যাগকর্ত্তা। যজধাতোঃ শতৃপ্রত্যযেন নিষ্পন্নঃ॥

যজন্তঃ পুং যাগকর্ত্তা। যজধাতো র্ঝচ্ প্রত্যযেন নিষ্পন্নঃ। ইতি সিদ্ধান্তকৌমুদী॥

যজমানঃ পুং অধ্বরেআদেষ্টা। তৎপর্য্যাযঃ। ব্রতী ২ যষ্টা ৩। ইত্যমরঃ॥ ব্রত্যাদিত্রযং যজমানে। অধ্বরে যাগ বিষযে মম ইষ্ট সম্পাদনায যথার্থং কর্ম্ম কুরু ইতি ঋত্বিজা মাদেশকো যাগস্বামী ব্রত্যাদিশব্দত্রয বাচ্যইত্যর্থঃ। ব্রতমেণাজিনাদিধারণং বিদ্যতে ঽস্য ব্রতী ইন্। যজতে ইতি তৃনি যষ্টা। শানে যজমানঃ। স ব্রতী সোমপানবতি অধ্বরে যজমানঃ সন্ দীক্ষিত উচ্যতে অন্যত্রাপ্যুপচারাৎ। দীক্ষ মৌণ্ড্যেজ্যোপনযন ব্রতাদেষু ক্তঃ দীক্ষাশব্দাদিতো বা। ইতি ভরতঃ॥

যজাকঃ ত্রি দানকর্ত্তা। ইত্যুণাদিকোষঃ॥

যজিঃ পুং যষ্টা। ইত্যুণাদিকোষঃ॥

যজুস্ ক্লী বেদবিশেষঃ। ইত্যমরঃ॥ ইজ্যতে ঽনেনেতি যজুঃ। যজ্ঞে এত্যাদেবার্চা দানসঙ্গতৌ। অর্চিশুচিস ইতি উস্। ইতি ভরতঃ॥

অপিচ। যজুরাহ জৈমিনিঃ। শেষে বা যজুঃ শব্দঃ। শেষে ঋক্ সামভিন্নে মন্ত্রজাতে তত্তশ্চ যন্মন্ত্রজাতং প্রশ্লিষ্য পঠিতং গানাদি বিচ্ছেদ রহিতং তদ্যজুরিতি। ইতি তিথ্যাদিতত্ত্বং ॥ ❀ ॥ যজুর্ব্বেদস্য ষড়শীতি র্ভেদা ভবন্তি। তত্র চরকা নাম দ্বাদশ ভেদা ভবন্তি। চরকাঃ ১ আহ্বরকাঃ ২ কঠাঃ ৩ প্রাচ্যকঠাঃ ৪ কপিষ্ঠলকঠাঃ ৫ ঔপমন্যাঃ ৬ আষ্টালকঠাঃ ৭ চারায়ণীযাঃ ৮ বারায়ণীযাঃ ৯ বার্ত্তান্তবেযাঃ ১০ শ্বেতাশ্বতরাঃ ১১ মৈত্রায়ণীযাশ্চেতি ১২। তত্র মৈত্রায়ণীযা নাম সপ্ত ভেদা ভবন্তি। মানবাঃ ১ দুন্দুভাঃ ২ চৈকেযাঃ ৩ বারাহাঃ ৪ হারিদ্রবেযাঃ ৫ শ্যামাঃ ৬ শ্যামায়নীযাশ্চেতি ৭। তেষামধ্যযন মষ্টৌশতং। যজুঃ সহস্রাণ্যধীত্য শাখাপারো ভবতি। তান্যেব দ্বিগুণান্যধীত্য পদপারো ভবতি। তান্যেব ত্রিগুণান্যধীত্য ক্রমপারো ভবতি। ষডঙ্গান্যধীত্য ষডঙ্গ বিদ্ভবতি। শিক্ষা কল্পো ব্যাকরণং নিরুক্তং ছন্দো জ্যোতিষ মিত্যঙ্গানি। তত্র প্রাচ্যোদীচ্যাং নৈর্ঋত্যাং নির্ঋত্যঃ। তত্র বাজসনেযা নাম সপ্তদশ ভেদা ভবন্তি। জাবালাঃ ১ ঔধেয়াঃ ২ কাণ্বাঃ ৩ মাধ্যন্দিনাঃ ৪ শাপীযাঃ ৫ তাপায়নীযাঃ ৬ কাপালাঃ ৭ পৌণ্ড্রবৎসাঃ ৮ আবটিকাঃ ৯ পারমাবটিকাঃ ১০ পারাশর্য্যাঃ ১১ বৈধেযাঃ ১২ বৈনেযাঃ ১৩ ঔধেযাঃ ১৪ গালবাঃ ১৫ বৈজবাঃ ১৬ কাত্যাযনীযাশ্চেতি ১৭। প্রতিপদ মনুপদং ছন্দো ভাষা ধর্ম্মো মীমাংসা ন্যায় স্তর্ক ইত্যুপাঙ্গানি ভবন্তি। উপজ্যোতিষং ১ সাঙ্গলক্ষণং ২ প্রতিজ্ঞা ৩ অনুবাক্যং ৪ পরিসংখ্যা ৫ চরণব্যূহং ৬ শ্রাদ্ধকল্পঃ ৭ প্রবরাধ্যাযশ্চ ৮ শাস্ত্রং ৯ ক্রতুঃ ১০ সংখ্যা ১১ অনুগমঃ ১২ যজ্ঞং ১৩ পার্শ্বানঃ ১৪ হোত্রকং ১৫ পশবঃ ১৬ উক্থানি ১৭ কূর্ম্মলক্ষণং ১৮ ইত্যষ্টাদশপরিশিষ্টানি। দ্বে সহস্রে শতে ন্যূনে মন্ত্রে বাজসনেযকে। ইত্যুক্তং পরিসংখ্যাত মেতৎ সকলং সশুক্রিযং ॥ গুহ্যাংশ্চ পরিসংখ্যাতং ব্রাহ্মণঞ্চ চতুর্গুণং। আদাবারভ্য বেদান্তং ব্রহ্ম ব্যাকৃতি পূর্ব্বকং ॥ বেদমধ্যায এতেষাং হোমান্তে তু সমারভেৎ। তত্র তৈত্তিরীযকা নাম দ্বিভেদা ভবন্তি। ঔখ্যাঃ খাণ্ডিকেযাশ্চেতি। তত্র খাণ্ডিকেযা নাম পঞ্চভেদা ভবন্তি। আপস্তম্বী ১ বোধাযনী ২ সত্যাষাঢী ৩ হিরণ্যকেশী ৪

ওথেম্নাশ্চেতি ৫। তত্র কঠানান্তুপগান বিশেষঃ। চতশ্চত্বারিংশত্যুপগুহ্যান্। মন্ত্র ব্রাহ্মণযো র্বেদ স্ত্রিগুণং যত্র পঠ্যতে। যজুর্ব্বেদঃ স বিজ্ঞেয়ো হন্যে শাখান্তরাঃ স্মৃতাঃ॥ যজুর্ব্বেদস্য ধনুর্ব্বেদ উপবেদঃ। যজুর্ব্বেদস্য ভারদ্বাজ গোত্রং। রুদ্র দৈবত্যং। ত্রৈষ্টুভং ছন্দঃ। যজুর্ব্বেদঃ কৃশঃ। দীর্ঘঃ। কপালী। তাম্রবর্ণঃ। কাঞ্চননযনঃ। আদিত্যবর্ণঃ বর্ণেন। পঞ্চারত্নিমাত্রঃ। অস্য ধ্যানং। বন্দে রৌদ্রং ত্রৈষ্টুভং তাম্রবর্ণং ভারদ্বাজং কম্রনেত্রং কৃশাঙ্গং। যজুর্ব্বেদং দীর্ঘ মাদিত্যবর্ণং কাপালীনং পঞ্চারত্নিমাত্রং॥ য ইদং দৈবতং রূপং গোত্রং প্রমাণং ছন্দোবর্ণং বর্ণযতি স বিদ্যাং লভতে স বিদ্যাং॥ লভতে। জন্ম জন্মনি বেদপারো ভবতি। জন্ম জন্মনিবেদধারো ভবতি। অব্রতো ব্রতী ভবতি। অপূষতঃ পূষতো ভবতি। অব্রহ্মচারী ব্রহ্মচারী ভবতি। জাতিস্মরো জাযতে। ইতি চরণব্যূহং॥

যজুর্ব্বেদঃ পুং বেদবিশেষঃ। তস্যাধিপতি র্যথা। ঋগ্বেদাধিপতি র্জীবঃ সামবেদাধিপঃ কুজঃ। যজুর্ব্বেদাধিপঃ শুক্রঃ শশিজো হথর্ব্ববেদরাট্॥ ইতি জ্যোতিষং॥ অস্য বক্তা বৈশম্পাযনঃ। স তু আদাবেক এবাসীৎ। যথা। ঋগ্বেদ শ্রাবকং পৈলং জগ্রাহ স মহামুনিঃ। যজুর্ব্বেদ প্রবক্তারং বৈশম্পাযন মেব চ॥ জৈমিনিং সামবেদস্য শ্রাবকং সোহন্বপদ্যত। তথৈবাথর্ব্ববেদস্য সুমন্ত মৃষি সত্তমং॥ এক আসীদ্যজুর্ব্বেদ স্তঞ্চতুর্ধা ব্যকল্পযৎ। চাতুর্হোত্র মভূদ্যস্মিং স্তেন যজ্ঞ মথাকরোৎ॥ অধ্বর্যবং যজুর্ভি স্যাদৃগ্ভি র্হোত্রং দ্বিজোত্তমাঃ। উদ্গাত্রং সামভি শ্চক্রে ব্রহ্মত্বঞ্চাপ্যথর্ব্বভিঃ॥ ততঃস ঋচ উদ্ধৃত্য ঋগ্বেদং কৃতবান্ প্রভুঃ। যজূংষি চ যজুর্ব্বেদং সামবেদঞ্চ সামভিঃ॥ একবিংশতি ভেদেন ঋগ্বেদং কৃতবান্ পুরা। শাখানাস্তু শতেনাথ যজুর্ব্বেদ মথাকরোৎ॥ সামবেদং সহস্রেণ শাখানাঞ্চ বিভেদতঃ। অথর্ব্বাণমথো বেদং বিভেদ নবকেন তু। ইতি কৌর্ম্ম্যে ৪৯ অধ্যাযঃ॥

যজ্ঞঃ পুং ইজ্যতে হবির্দীযতেহত্র। তৎপর্য্যাযঃ। সবঃ ২ অধ্বরঃ ৩ যাগঃ ৪ সপ্ততন্তুঃ ৫ মখঃ ৬ ক্রতুঃ ৭। ইত্যমরঃ॥ ইষ্টিঃ ৮ ইষ্টং ৯ বিতানং ১০ মন্যুঃ ১১ আহবঃ ১২ সবনং ১৩

হবঃ ১৪ অভিষবঃ ১৫ হোমঃ ১৬ হবনঃ ১৭ মহঃ ১৮। ইতি শব্দরত্নাবলী॥ স ত্রিবিধঃ। সাত্ত্বিকো রাজসিক স্তামসিকশ্চ। সাত্ত্বিকযজ্ঞো যথা। অফলাকাঙ্ক্ষিভি র্যজ্ঞো বিধিদৃষ্টো য ইজ্যতে। যষ্টব্য মেবেতি মনঃ সমাধায স সাত্ত্বিকঃ॥ রাজসিকযজ্ঞো যথা। অভিসন্ধায তু ফলং দম্ভার্থ মপি চৈব যৎ। ইজ্যতে ভরতশ্রেষ্ঠ তং যজ্ঞং বিদ্ধি রাজসং॥ তামসিকযজ্ঞো যথা। বিধিহীন মসৃষ্টান্নং মন্ত্রহীন মদক্ষিণং। শ্রদ্ধা বিরহিতং যজ্ঞং তামসং পরিচক্ষতে॥ ইতি শ্রীভগবদ্গীতাযাং ১৭ অধ্যাযঃ॥ * ॥ সচ নানাবিধঃ। যথা। দ্রব্যযজ্ঞা স্তপোযজ্ঞা যোগযজ্ঞা স্তথা পরে। স্বাধ্যায জ্ঞানযজ্ঞাশ্চ যতযঃ সংশিত ব্রতাঃ॥ ইতি শ্রীভগবদ্গীতাযাং ৪ অধ্যাযঃ॥ * ॥ পঞ্চযজ্ঞা যথা। অধ্যাপনং ব্রহ্মযজ্ঞঃ পিতৃযজ্ঞস্তু তর্পণং। হোমো দৈবো বলি র্ভৌতো নৃযজ্ঞো ঽতিথিপূজনং॥ ইতি গারুড়ে ১১৫ অধ্যাযঃ॥ * ॥ তস্যোৎপত্তি র্যথা। ঋষয ঊচুঃ। কথং যজ্ঞবরাহস্য দেহো যজ্ঞত্ব মাপ্তবান্। ত্রেতাত্রগতন্ পুরা বরাহস্য কথং ত্রযঃ॥ তন্নো বদস্ব শোত্র্যাণাং কথযস্ব মহামতে। শ্রীমার্কণ্ডেয উবাচ। শৃণুধ্বং দ্বিজশার্দূলা যৎ পৃষ্টোঽহং মহাদ্ভুতং। যজ্ঞেষু দেবা স্তিষ্ঠন্তি যজ্ঞে সর্বং প্রতিষ্ঠিতং॥ যজ্ঞেন ধ্রিযতে পৃথ্বী যজ্ঞ স্তারযতি প্রজাঃ। অন্নেন ভূতা জীবন্তি পর্জ্জন্যাদন্নসম্ভবঃ॥ পর্জ্জন্যো জাযতে যজ্ঞাৎ সর্বং যজ্ঞমযং ততঃ। স যজ্ঞো ঽভূদ্বরাহস্য কাযাৎ শম্ভু বিদারিতাৎ॥ যথাহং কথযে তদ্বঃ শৃণুধ্বমবহিতা দ্বিজাঃ। বিদারিতে বরাহস্য কাযে ভর্গেণ তৎক্ষণাৎ॥ ব্রহ্ম বিষ্ণু শিবা দেবাঃ সর্বৈশ্চ প্রমথৈঃ সহ। নিন্যুর্জলাৎ সমুদ্ধৃত্য তৎ শরীরং নভঃ প্রতি॥ তদ্বিভক্তঃ শরীরন্তে বিষ্ণো শ্চক্রেণ খণ্ডশঃ। তস্যাঙ্গ সন্ধযো যজ্ঞা জাতা স্তে বৈ পৃথক্ পৃথক্॥ যস্মাদ্যস্মাচ যে যজ্ঞা স্তৎ শৃণুত্ত মহর্ষযঃ। ভ্রূ নাসা সন্ধিনা জাতো জ্যোতিষ্টোমো মহাধ্বরঃ॥ হনু শ্রবণ সন্ধ্যোস্তু বহ্নিষ্টোমো ব্যজাযত। চক্ষুর্ভ্রুবোঃ সন্ধিনা তু ব্রাত্যষ্টোমো ব্যজাযত॥ রাজঃ পৌনর্ভবষ্টোম স্তস্য পোত্রোষ্ঠ সন্ধিনা। বৃদ্ধষ্টোম বৃহষ্টোমৌ জিহ্বামূলাদ্ব্যজাযত॥ অতিরাত্রং সবৈরাজ দন্তঃ জিহ্বান্তরাদ-

ভূৎ। অধ্যাপনং ব্রহ্মযজ্ঞঃ পিতৃয-
জ্ঞস্তু তর্পণং ॥ হোমো দৈবো বলি-
ভৌতো নৃযজ্ঞো ঽতিথিপূজনং। স্না-
নং তর্পণ পর্য্যন্তং নিত্যযজ্ঞাশ্চ সং-
র্বশঃ ॥ কণ্ঠ সন্ধেঃ সমুৎপন্না জিহ্বা-
তো বিধয স্তথা। বাজিমেধো মহা-
মেধো নরমেধ স্তথৈব চ॥ প্রাণিহিংসা-
করা যে ঽন্যে তে জাতাঃ পাদসন্ধি-
তঃ। রাজসূযো ঽথ কাম্যীযো বা-
জপেয স্তথৈব চ ॥ পৃষ্ঠসন্ধৌ সমুৎ-
পন্না গৃহযজ্ঞা স্তথৈব চ। প্রতিষ্ঠোৎ-
সর্গ যজ্ঞাশ্চ দান শ্রাদ্ধাদয স্তথা ॥
হৃৎসন্ধিতঃ সমুৎপন্নাঃ সাবিত্রী য-
জ্ঞ এব চ। সর্ব্বেষাং সাধকা যজ্ঞাঃ
প্রাযশ্চিত্তকরাশ্চ যে ॥ তেমেঢ্রসন্ধি-
তো জাতা যজ্ঞা স্তস্য মহাত্মনঃ।
রক্ষঃশত্রং সর্পশত্রং সর্ব্ব ঞ্চৈবাভি-
চারিকং॥ গোমেধো বৃক্ষজাপশ্চ খু-
রেভ্যো হ্যভবন্নিমে। নাযেষ্টিঃ পর-
মেষ্টিশ্চ গীরতি ভোগ সম্ভবঃ ॥
লাঙ্গলসন্ধৌ সংজাতা অগ্নিষ্টোম
স্তথৈব চ। নৈমিত্তিকাশ্চ যে যজ্ঞাঃ
সংক্রান্ত্যাদৌ প্রকীর্ত্তিতাঃ ॥ লাঙ্গল
সন্ধৌ তে জাতা স্তথাদ্বাদশবার্ষিক
তীর্থপ্রযোগ সামৌজ যজ্ঞঃ সঙ্কর্ষ-
ণ স্তথা ॥ আর্ক মাথর্ব্বণঞ্চৈব নাভি-
মধ্যে সমুদ্ভূতং চোৎকর্ষঃ ক্ষেত্র

যজ্ঞঃ পঞ্চমার্গাভিযোজনঃ ॥ লিঙ্গ
সংস্থান শৈরব যজ্ঞা জাতাশ্চ জানু-
নি। এবমষ্টাধিকং জাতং সহস্রং দ্বি-
জসত্তমাঃ ॥ যজ্ঞান্ প্রতত্য লোকা
যে ভাবযন্তে ঽধুনাপি চ। স্রুগাস্যপো-
ত্রাৎ সংজাতা নাসিকাযাঃ স্রুবো
ঽভবৎ ॥ অন্যে স্রুক্ স্রুব ভেদা যে
তে জাতাঃ পোত্র নাসযোঃ। গ্রীবা
ভাগেন তস্যা ভূৎ প্রাগ্বংশো মুনি
সত্তমাঃ ॥ ইষ্টা পূর্ত্তং যজু র্ধর্ম্মো জা-
তাঃ শ্রবণরন্ধ্রতঃ। দংষ্ট্রাভ্যো হ্যভ-
বন্ যূপাঃ কুশা রোমাণি চাভবন্ ॥
উদ্গাতা চ তথাধ্বর্য্যু র্হোতা সমিধ
এব চ। অগ্র দক্ষিণ বামাঙ্গ পশ্চাৎ
পাদেষু সংস্থিতাঃ ॥ পুরোডাশাঃ
সচরবো জাতা মস্তিষ্ক সঞ্চযাৎ।
কর্ণনেত্রযুগাজ্জাতা যজ্ঞকেতু স্তথা
খুরাৎ। মধ্যভাগো ভবদ্বেদী মে-
ঢ্রাৎ কুণ্ড মজাযত ॥ রেতো ধারা
স্তথৈবাজ্যং স্বরমন্ত্রাঃ সমুদ্গতাঃ।
যজ্ঞালযঃ পৃষ্ঠভাগাৎ হৃৎপদ্মাৎ
যজ্ঞ এব চ ॥ তদাত্মা যজ্ঞপুরুষো
মুঞ্জাঃ কক্ষাৎ সমুদ্গতাঃ। এবং যাব-
ন্তি যজ্ঞানাং ভাণ্ডানি চ হবীংষি চ
॥ তানি যজ্ঞবরাহস্য শরীরাদেক-
চাভবন্ ॥ এবং যজ্ঞবরাহস্য শরী-
রং যজ্ঞতামগাৎ। যা যজ্ঞরূপেণ স-

কল মাপ্যাবিতু মিদং জগৎ। এবং বিধায যজ্ঞস্তু ব্রহ্ম বিষ্ণু মহেশ্বরাঃ॥ সুবৃত্তং কনকং ঘোর মাসেদু র্যত্র তৎ পরাঃ। তত্র স্তেষাং শরীরাণি পিণ্ডীকৃত্য পৃথক্ পৃথক্॥ ত্রিদেবা স্ত্রি শরীরাণি ব্যধমন্মুখ বাযুভিঃ। সুবৃত্তস্য শরীরন্তু ব্যধমন্মুখ বাযুনা। স্বযমেব জগৎস্রষ্টা দক্ষিণাগ্নি স্ততো হভবৎ। কনকস্য শরীরন্তু ধ্মাপযামাস কেশবঃ॥ ততো হভূদ্গার্হপত্যাগ্নিঃ পঞ্চ বৈতান ভোজনঃ। ঘোরস্য তু বপুঃ সম্ভুর্ধ্মাপযামাস বৈ স্বযং॥ তত আহবনীযো হগ্নি স্তৎক্ষণাৎ সমজাযত। এত স্ত্রিভি র্জগৎ ব্যাপ্তং ত্রিমূলং সরূপং জগৎ॥ এতৎ যত্র ত্রযং নিত্যং তিষ্ঠতি দ্বিজ সত্তমাঃ। সমস্তা দেবতা স্তত্র বসন্তে হনুচরৈঃ সহ॥ এতদ্ভদ্রুপদং নিত্যমেতদেব ত্রযাত্মকং। এতৎ ত্রযী বিধি স্থান মেতৎ পণ্যকরং পরং॥ যস্মিন্ জনপদে চৈতে স্থাস্তে অগ্নয ত্রযঃ। তস্মিন জনপদে নিত্যং চতুর্বর্গো বিবর্দ্ধতে॥ এতদ্বঃ কথিতং সর্বং যৎপৃষ্টং দ্বিজ সত্তমৈঃ। যথা যজ্ঞ বরাহস্য দেহো যজ্ঞত্ব মাপ্তবান্॥ তথা চ তস্য পত্রাণাং দেহা স্ত্রেতাত্মাগমন্॥ ইতি কালিকাপুরাণে ৩০ অধ্যাযঃ॥ * ॥ ব্রহ্মণ আদিযজ্ঞো যথা। পুলস্ত্য উবাচ। পূর্বমেব মযাখ্যাতং যদা স্বাযম্ভুবো মনুঃ। জাতঃ পরমধর্ম্মাত্মা শতরূপাপতিঃ স্বযং॥ স্রষ্টা প্রজাপতিঃ পূর্বং সৃষ্টিকর্ম্মণ্যযোজযৎ। বৎস ত্বমেব সংকল্প্য স্বল্পাং সৃষ্টিং জক হ্যথ॥ স্বযং তু পুষ্করং গত্বা কৃত্বা যজ্ঞন্তু বিস্তরং। ব্রহ্মোদ্গাতা হোতাধ্বর্য্যু শ্চত্বারো যজ্ঞবাহকাঃ॥ একৈকস্য ত্রয শ্চান্যে পরিবারাঃ স্বযং কৃতাঃ। এতে বৈ ষোডশ প্রোক্তা ঋত্বিজো বেদচিন্তকাঃ॥ শতানি ত্রীণি ষষ্টিশ্চ যজ্ঞাঃ সৃষ্টাঃ স্বযম্ভুবা। ভীষ্ম উবাচ। যজ্ঞস্য ব্রহ্মণো বিপ্র সমাপ্তিং বদ সাম্প্রতং। পুলস্ত্য উবাচ। মন্বন্তরে ব্যতীতে তু যজ্ঞস্যাবভৃথো হভবৎ। দক্ষিণা ব্রহ্মণা দত্তা প্রাচী হোতুস্তু দক্ষিণা॥ অধ্বর্য্যবে প্রতীচী তু উদ্গাতু শ্চোত্তরা তথা। ত্রৈলোক্যং সকলং ব্রহ্মা দদৌ তেষাস্তু দক্ষিণাং॥ ধেনূনাঞ্চ শতং সাষ্টং দাতব্যং যজ্ঞ সিদ্ধযে। অধ্বর্য্যূণাং সহস্রাণি স্বেচ্ছযা দান মিষ্যতে॥ ইতি পাদ্মে সৃষ্টিখণ্ডে ৩১ অধ্যাযঃ॥ * ॥ ব্রাহ্মণাদীনাং স্বধর্ম্ম যজ্ঞা যথা। আরম্ভযজ্ঞাঃ ক্ষত্রাঃ স্যু র্হবির্যজ্ঞা বিশঃ স্মৃতাঃ। পরিচার

যজ্ঞাঃ শূদ্রাস্তু জপ যজ্ঞাস্তু ব্রাহ্মণাঃ ॥ ইতি মাৎস্যে ১১৮অধ্যায়ঃ ॥*॥ হিংসা যজ্ঞস্য অধর্ম্ম জনকত্বং যথা। তথা বিশ্বভুগিন্দ্রস্তু যজ্ঞং প্রাবর্ত্তযৎ প্রভুঃ। দৈবতৈঃ সহ সংহৃত্য সর্ব্বসাধন সংভৃতং ॥ তস্যাশ্বমেধে বিততে সমাজগ্মু র্মহর্ষয়ঃ। মহর্ষযশ্চ তান্ দৃষ্ট্বা দীনান্ পশুগণাং স্তদা ॥ বিশ্বংভুজস্তে ত্বপৃছন্ কোযং যজ্ঞবিধি স্তব। অধর্ম্মো বলবানেষ হিংসা ধর্ম্মেপ্সগা তব॥ ন নঃ পশুবধ স্ত্বিষ্ট স্তব যজ্ঞেশ্বরোত্তম। অধর্ম্মো ধর্ম্মঘাতায প্রারব্ধঃ পশুভি স্তুযা॥ নায়ং ধর্ম্মো হ্যধর্ম্মো য়ং ন হিংসা ধর্ম্ম উচ্যতে। আগমেন ভবান্ ধর্ম্মং প্রকরোতু য দীচ্ছতি ॥ বিধিদৃষ্টেন যজ্ঞেন ধর্ম্মেণাব্যয সেতুনা। এবং বিশ্বভুগিন্দ্রস্তু ঋষিভি স্তত্ত্বদর্শিভিঃ॥ উক্তো ন প্রতিজগ্রাহ মানমোহ সমন্বিতঃ। তেষাং বিবাদঃ সুমহান্ যজ্ঞে ইন্দ্র মহর্ষিণাং ॥ জঙ্গমৈঃ স্থাবরৈঃ কেন যষ্টব্য মিতি চোচ্যতে। তে তু খিন্না বিবাদেন তথ্য মুক্ত্বা মহর্ষযঃ॥ সংধ্যায বাক্য মিন্দ্রেণ পপ্রচ্ছুঃ খচরং বসুং। ঋষয উচুঃ। মহাপ্রাজ্ঞ কথং দৃষ্ট স্তব যজ্ঞ বিধি র্ন্নৃপ। উত্তানপাদে প্রব্রূহি সংশয়ং নো নুদ প্রভো॥ সূত উবাচ শ্রুত্বা বাক্যং বসু স্তেষা মবিচার্য্য বলাবলং। বেদ শাস্ত্র মনুস্মৃত্য যজ্ঞ তত্ত্ব মুবাচ হ ॥ যষ্টব্যং পশুভি র্মেধ্যৈ রথ মূল ফলৈ রপি। হিংসা স্বভাবো যজ্ঞস্য ইতি মে দর্শনাগমঃ ॥ এবং কৃতোত্তরা স্তেতু যুক্তাত্মানং ততো ধিযা। অবশ্যং ভাবিনং দৃষ্ট্বা তমধো হ্যপং স্তদা ॥ ইত্যুক্ত মাত্রো নৃপতিঃ প্রবিবেশ রসাতলং। ধর্ম্মাণাং সংশযচ্ছেত্তা রাজা বসু রধো গতঃ॥ তস্মান্ন বাচ্যোহ্যেকেন বহুজ্ঞেনাপি সংশয়ঃ। তস্মান্ন হিংসা যজ্ঞস্য যদুক্ত মৃষিভিঃ পরা ॥ ইতি মাৎস্যে ১১৯ অধ্যায়ঃ॥

যজ্ঞকৃৎ পুং যাগকর্ত্তা। যজ্ঞং করোতি ইত্যর্থে ক্বিপ্ প্রত্যযেন নিষ্পন্নঃ॥

যজ্ঞপশুঃ পুং ঘোটকঃ। ইতি শব্দমালা॥ ছাগশ্চ॥

যজ্ঞপুরুষঃ পুং বিষ্ণুঃ। ইতি হেমচন্দ্রঃ॥

যজ্ঞভাজনং ক্লী যজ্ঞপাত্রং। ইতি জটাধরঃ॥

যজ্ঞভূষণঃ পুং শ্বেতদর্ভঃ। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞযোগ্যঃ পুং উডুম্বরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ যাগার্হে ত্রি॥

যজ্ঞবল্লী স্ত্রী সোমবল্লী। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞবাটঃ পুং যজ্ঞস্থানং। ইতি হেমচন্দ্রঃ॥

যজ্ঞবৃক্ষঃ পুং বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞশ্রেষ্ঠা স্ত্রী সোমবল্লী। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞসাধনঃ পুং বিষ্ণুঃ। ইতি তস্য সহস্রনামস্তোত্রং॥

যজ্ঞসারঃ পুং যজ্ঞোডুম্বরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞসূত্রং ক্লী যজ্ঞোপবীতং। যথা। পবিত্রং ব্রহ্মসূত্রঞ্চ যজ্ঞোপবীত মিত্যপি। যজ্ঞসূত্রং তদেবোপবীতং স্যাদ্দক্ষিণে ভুজে॥ উদ্ধৃতে বাম বাহৌ তু প্রাচীনাবীত মপ্যদঃ। নিবীতন্তু তদেবস্যাদৃজু বক্ষসি লম্বিতং॥ ইতি জটাধরঃ॥ তস্য প্রমাণং যথা। উর্দ্ধন্তু ত্রিবৃতং সূত্রং সধবা নির্ম্মিতং শনৈঃ। তন্তুত্রয মধো বৃতং যজ্ঞসূত্রং বিদুর্বুধাঃ॥ ত্রিগুণং তদ্গ্রন্থিযুক্তং বেদপ্রবর সম্মিতং। শিরোধরান্নাভি মধ্যাৎ পৃষ্ঠার্দ্ধ পরিমাণকং॥ যজুর্ব্বিদাং নাভি মিতং সামগানামযং বিধিঃ। বামস্কন্ধেন বিধৃতং যজ্ঞসূত্রং বলপ্রদং॥ ইতি কল্কিপুরাণে ৪ অধ্যায়ঃ॥ অস্য ধারণে মন্ত্রো যথা। যজ্ঞোপবীত মসি যজ্ঞস্যত্বোপবীতেনোপনহ্যামি। ইতি সংস্কারতত্ত্বধৃত ভট্টভাষ্যং॥ যজুষান্তু। যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতের্যৎ সহজং পুরস্তাৎ। আয়ুষ্য মগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ॥ ইতি পশুপতিঃ॥

যজ্ঞস্থানং ক্লী যজ্ঞবাটঃ। ইতি জটাধরঃ॥

যজ্ঞাঙ্গঃ পুং উডম্বরঃ। ইত্যমরঃ॥ খদিরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥ ব্রাহ্মণযষ্টিকা। ইতি শব্দচন্দ্রিকা॥ যাগাবয়বে ক্লী॥

যজ্ঞাঙ্গা স্ত্রী সোমবল্লী। ইতি রাজনির্ঘণ্টঃ॥

যজ্ঞান্তঃ পুং অবভৃথঃ। ইতি হেমচন্দ্রঃ॥ যাগশেষশ্চ॥

যজ্ঞারিঃ পুং শিবঃ। ইতি ধনঞ্জয়ঃ॥ রাক্ষসশ্চ॥

যজ্ঞিকঃ পুং পলাশবৃক্ষঃ। ইতি জটাধরঃ॥

যজ্ঞিয়ং ত্রি যজ্ঞকর্ম্মার্হং। ইত্যমরঃ॥ যজ্ঞায হিতং। ইতি মুগ্ধবোধব্যাকরণং॥

যজ্ঞিয়ঃ পুং দ্বাপরযুগং। ইতি

ত্রিকাণ্ডশেষঃ ॥

যজ্ঞিয়দেশঃ পুং যাগকরণোপযুক্ত দেশঃ। যথা। কৃষ্ণসারস্তু চরতি মৃগো যত্র স্বভাবতঃ। স জ্ঞেয়ো যজ্ঞিয়ো দেশো ম্লেচ্ছদেশস্ততঃ পরঃ ॥ ইতি মনুঃ ॥

যজ্ঞিয়শালা স্ত্রী যাগমণ্ডপং। ইতি জটাধরঃ ॥

যজ্ঞীয়ঃ পুং উড়ুম্বরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ যাগসম্বন্ধিনি ত্রি ॥

যজ্ঞীয়বৃক্ষপাদপঃ পুং বিকঙ্কতবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

যজ্ঞেশ্বরঃ পুং বিষ্ণুঃ। যথা। যজ্ঞেশ্বরো হব্যসমস্তকব্যভোক্তাব্যয়াত্মা হরিরীশ্বরোঽত্র। তৎসন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশেষাণ্যসুরাশ্চ সর্ব্বে ॥ ইতি শ্রাদ্ধতত্ত্বং ॥

যজ্ঞেষ্টং ক্লী দীর্ঘরোহিষকতৃণং। ইতি রাজনির্ঘণ্টঃ ॥

যজ্ঞোডুম্বরঃ পুং উড়ুম্বরবৃক্ষঃ। যজ্ঞডুমুর ইতি ভাষা। তৎপর্য্যায়ঃ। হেমদুগ্ধী ২ যজ্ঞফলঃ ৩ যজ্ঞাঙ্গঃ ৪ হেমদুগ্ধকঃ ৫ উড়ুম্বরঃ ৬ জন্তুফলঃ ৭। ইতি শব্দরত্নাবলী ॥ অস্য গুণাঃ। উড়ুম্বরো হিমো রুক্ষো গুরুঃ পিত্তকফাস্রনুৎ। মধুরস্তুবরো বর্ণ্যো ব্রণশোধনরোপণঃ ॥

ইতি ভাবপ্রকাশঃ ॥

যজ্ঞোপবীতং ক্লী যজ্ঞসূত্রং। পৈতা ইতি ভাষা। তৎপর্য্যায়ঃ। পবিত্রং ২ ব্রহ্মসূত্রং ৩ দ্বিজায়নী ৪। ইতি ত্রিকাণ্ডশেষঃ ॥ তস্য নিরূপণং যথা। উপবীতমাহ গোভিলঃ। যজ্ঞোপবীতং কুরুতে সূত্রং বস্ত্রং বা অপি বা কুশরজ্জুমেব। যজ্ঞোপবীতং বিশিষ্টবিন্যাসধারণকর্ম্মতয়া কুরুতে। কিং তৎ সূত্রং। সূত্রং বিশেষয়তি ছন্দোগপরিশিষ্টং। ঊর্দ্ধন্তু ত্রিবৃতং কার্য্যং তন্তুত্রয়মধো বৃতং। ত্রিবৃতঞ্চোপবীতং স্যাত্তস্যৈকো গ্রন্থিরিষ্যতে ॥ বামাবর্ত্তবলিতং তন্তুত্রয়ং ত্রিগুণং কৃত্বা দক্ষিণাবর্ত্তবলিতং কার্য্যমেবং ত্রিবৃতং ত্রিসরং উপবীতং স্যাৎ। একো গ্রন্থিরিতি নানাত্ব নিষেধার্থং। তথা বৌধায়নঃ। কৌষং সৌত্রং ত্রিস্ত্রিবৃতং যজ্ঞোপবীতমানাভেঃ। কৌষং কৃমিকোষোদ্ভবং পট্টসূত্রাদিময়মিত্যর্থঃ। সৌত্রং কার্পাসোদ্ভবং। তথা মনুঃ। কার্পাসমুপবীতং স্যাৎ বিপ্রস্যোর্দ্ধবৃতং ত্রিবৃৎ। শনসূত্রময়ং রাজ্ঞো বৈশ্যস্যাবিকসৌত্রিকং ॥ ত্রিস্ত্রিবৃতমিত্যুক্তত্বাৎ মনুবচনেঽপি ত্রিবৃন্মাত্রং ত্রি-

সবত্বেন বিশেষ্যং। মনু পৈঠীনসি বচনং। কার্পাস মুপবীতং ষট্তন্তু ত্রিবৃতং ব্রাহ্মণস্য। ক্ষৌমং রাজন্যস্য। আবিকং বৈশ্যস্য। তন্নবতন্তু সম্ভবে ষট্তন্তু বিধায়কং। নবতন্তুত্বং ব্যক্তমাহ দেবলঃ। যজ্ঞোপবীতং কুর্বীত সূত্রাণি নব তন্তবঃ। একেন গ্রন্থিনা তন্তু দ্বিগুণ ত্রিগুণো হথবা॥ একেন গ্রন্থিনা যুক্ত ইতি শেষঃ। দ্বিগুণ ত্রিগুণোথবেতি। তন্তু বলেন দ্বিসব ত্রিসবো বা কর্ত্তব্যঃ। দ্বিসবত্বং ত্রিসবত্বাসম্ভবে। গোভিলে বা শব্দো বিকল্পার্থঃ। অপিশব্দো বস্ত্র কুশরজ্বোঃ সূত্রানুকল্পত্ব প্রদর্শনার্থঃ। এবকার স্ত্রিসবত্ব ব্যবচ্ছেদার্থঃ। দ্বিতীয়ো বা শব্দো হনুক্ত মৌঞ্জ বালাদি সমুচ্চয়ার্থঃ। তথা নিগমপরিশিষ্টং। বাসসা যজ্ঞোপবীতানি কুর্যাতে তদভাবে ত্রিবৃতা সূত্রেণ। কুশ মুঞ্জ বাল প্রভৃতিভির রজ্জুভি র্বা। বালো হত্র গোবালঃ। যথা দেবলঃ। কার্পাস ক্ষৌম গোবাল শনরজ্জু তৃণোদ্ভবং। সদা সম্ভবতো ধার্য্য মুপবীতং দ্বিজাতিভিঃ। তদভাব ইতি কুশাদ্বস্ত্রাভাবে কুশরজ্জুভিরিতি বোদ্ধব্যং। ইতি শ্রাদ্ধবিবেকঃ ॥ ॥ অথোপনয়নদিনং। তত্র গর্ভাষ্টমেব্দে ব্রাহ্মণস্যোপনয়নং শস্তং। ক্ষত্রিয়স্য গর্ভৈকাদশে। গর্ভদ্বাদশে বৈশ্যস্য শস্তং। অত্রাসামর্থ্যে ব্রাহ্মণস্য ষোড়শ বর্ষ পর্য্যন্ত মেব। ক্ষত্রিয়স্য দ্বাবিংশতি বর্ষ পর্য্যন্তং। বৈশ্যস্য চতুর্বিংশতি বর্ষ পর্য্যন্তং তদনুষ্ঠান কালঃ। তত্র মাসাঃ। মাঘ ফাল্গুন চৈত্র বৈশাখ জ্যৈষ্ঠাষাঢা বিহিতাঃ। তত্র তিথয়ঃ। দ্বিতীয়ৈকাদশী দ্বাদশী পঞ্চমী দশমী তৃতীযা বিহিতাঃ। তত্র বারাঃ। বৃহস্পতি শুক্র রবীণাং প্রশস্তাঃ। সামগানাং মঙ্গলবারোপি। তত্র নক্ষত্রাণি। স্বাতী জ্যেষ্ঠা ধনিষ্ঠা অশ্বিনী অনুরাধা হস্তা রেবতী পুষ্যঃ চিত্রা শ্রবণা মৃগশিরঃ শতভিষা পূর্ব্বফল্গুনী উত্তরফল্গুনী পূর্ব্বভাদ্রপদা উত্তরভাদ্রপদা রোহিণী পূর্ব্বাষাঢা। তত্র লগ্নানি। বৃষ সিংহ তুলা ধনু মীন সংজ্ঞকানি। তত্র পক্ষঃ শুক্লঃ। তচ্চন্দ্রাদি শোভনে অনধ্যায়াদীন্ পরিত্যজ্য কর্ত্তব্যং। ইতি জ্যোতিষতত্ত্বমতং ॥ ॥ অথোপনয়নং। তত্র গোভিলঃ। গর্ভাষ্টমেষু ব্রাহ্মণমুপনয়েৎ গর্ভৈকাদশেষু ক্ষত্রিয়ং গর্ভদ্বাদশেষু বৈশ্যং। আষোড়শাৎ ব্রাহ্মণস্যানতীতঃ কালো ভবতি আদ্বাবিংশাৎ ক্ষত্রি-

যস্য আচতুর্ব্বিংশাৎ বৈশ্যস্য। অত উর্দ্ধং পতিত সাবিত্রীকা ভবন্তি। নৈতানুপনযেয়ু নাধ্যাপযেয়ু নএভির্ব্বিবাহযেয়ুঃ॥ আষোডশাদিত্যভিধাবাত্। তথাচ বিষ্ণুধর্ম্মোত্তরং। ষোড়শাব্দোহি বিপ্রস্য রাজন্যস্য দ্বিবিংশতিঃ। বিংশতিঃ স চতুর্থী চ বৈশ্যস্য পরিকীর্ত্তিতা॥ সাবিত্রী নাতিবর্ত্তেত অতউর্দ্ধং নিবর্ত্ততে। অত্র ষোড়শবর্ষাণামুপনযনাঙ্গতা প্রতীযতে। পতিতা যস্য সাবিত্রী দশবর্ষাণি পঞ্চ চ। ব্রাহ্মণস্য বিশেষেণ তথা রাজন্যবৈশ্যযোঃ॥ প্রাযশ্চিত্তং ভবেদেষাং প্রোবাচ বদতাং বরঃ। ইতি যমবচনেন তদনঙ্গতা প্রতীযতে অনযো র্গর্ভজন্মপ্রভৃতিগণনাভ্যা মবিরুদ্ধতা। যত্তু দ্বিজানামিত্যুপক্রমস্য পৈঠীনসি বচনং। দ্বাদশ ষোড়শ বিংশতি শ্চেদতীতা অবরুদ্ধকালা ভবন্তি। তদ্দ্বাদশবর্ষাদূপরি ব্রাহ্মণাদীনাং মহাব্যাহৃতিহোম প্রাযশ্চিত্তার্থং ষোড়শবর্ষোপরি শুদ্ধপ্রাযশ্চিত্ত মিতি। তথা চ শঙ্খলিখিতৌ। ব্রাত্য শ্চান্দ্রাযণং চরেৎ গোপ্রদানঞ্চ কুর্য্যাৎ। চান্দ্রাযণাশক্তৌ ধেনুষ্টকং তন্মূল্যং বা সার্দ্ধদ্বাবিংশতি কার্ষাপণাঃ গোমূল্যং কার্ষাপণ একঃ মিলিত্বা সার্দ্ধত্রযোবিংশতি কার্ষাপণা দেযাঃ। পিতৃ মাতৃ রহিতস্য ত্রিংশবর্ষস্য দেশোপপ্লবাদিনা পতিত সাবিত্রীকস্য ব্রহ্ম বিষযেতু মনুবিষ্ণু। যেষাং দ্বিজানাং সাবিত্রী নানূচ্যেত যথা বিধি। তাং শ্চারযিত্বা ত্রীন্ কৃচ্ছ্রান্ যথা বিধ্যুপনাযযেৎ॥ কৃচ্ছ্রং প্রাজাপত্যং। তদশক্তৌ ধেনুত্রযং তন্মূল্যং বা নব কার্ষাপণাঃ। অকৃত প্রাযশ্চিত্তং প্রত্যাহ নৈতানিত্যাদি। তত্র বহুবচনং তৎ কর্তৃসংসর্গিণাং প্রাযশ্চিত্ত প্রদর্শনার্থং। তথাচ স্মৃত্যন্তরং। ব্রাত্যাচার্য্যস্য ভুক্ত্বান্নং কৃচ্ছ্রপাদেন শুধ্যতি। যশ্চোপনযতে ব্রাত্যান্ ত্রিভিঃ কৃচ্ছ্রৈঃ স শুধ্যতি॥ ভুজবলভীম কৃত্যচিন্তামণ্যোঃ। স্বাতী শক্র ধনাশ্বি মিত্র করভে পৌষ্ণেন্দ্য চিত্রা হরিস্বিন্দৌ তোযপতৌ ভগে হ্দিতিসূতে ভাদ্রু দ্বযে সাগরে ৪ কেন্দ্রস্থে ভৃগুজে হঙ্গিরঃ শশিসূতে চন্দ্রে চ তারে শুভে কর্ত্তব্যং ব্রতকর্ম্ম মঙ্গল তিথৌ বারাঃ সিতার্কেজ্যকাঃ॥ অদিতিসূত উত্তরফল্গুনী। সাগরঃ পূর্ব্বাষাঢ়া। দীপিকাযাং। জীবার্কেন্দুভৃশক্ষৌ হরিশযন বহি র্ভাস্করে চোত্তরস্থে স্বাধ্যাযে বেদবর্ণাধিপ ইহ

শুভদে ক্ষৌর ভে ন্যদ্দতৌ চ। শু-ক্রার্কেজ্যর্ক্ষ লগ্নে রধি মদন তিথিং প্রোজ্ঝ্য বষ্ঠাষ্টমেন্দং নো জীয়াস্তাতিচারে হর্ক সিত শুক্লদিনে কাল শুদ্ধৌ বৃতং স্যাৎ॥ রবি মদন তিথিং সপ্তমীং ত্রয়োদশীং বষ্ঠাষ্টমেন্দং লগ্নাপেক্ষযা। কৃত্যচিন্তামণৌ। মাঘে দ্রবিণশীলাঢ্যঃ ফাল্গুনে চ দৃঢ়বৃতঃ। চৈত্রে ভবতি মেধাবী বৈশাখে কোবিদো ভবেৎ॥ জ্যৈষ্ঠে গহন নীতিজ্ঞ আ-ষাঢে ক্রতুভাজনঃ। শেষেম্বন্যেষু রাত্রিঃ স্যান্নিষিদ্ধং নিশ্চি বৃতং॥ রাজমার্ত্তণ্ডঃ। পুনর্ব্বসৌ কৃতো বিপ্রঃ পুনঃ সংস্কার মর্হতি। আশ্বলায়নঃ। উদগয়নে আপূর্য্যমাণে পক্ষে কল্যা-ণে নক্ষত্রে চুড়োপনয়ন গোদান বি-বাহাঃ। বিবাহঃ সার্ব্বকালিক ইত্যেকে। আপূর্য্যমাণে পক্ষে শুক্লেপক্ষে। বৃদ্ধগর্গঃ। স্মৃতিযুক্তাননধ্যায়ান্ সপ্তমীঞ্চ ত্রয়োদশীং। পক্ষযো র্মাঘমাসস্য দ্বিতীয়াং পরিবর্জ্জয়েৎ॥ শ্রীপতিব্যবহারসমুচ্চয়ে। কার্ত্তিকস্যাশ্বিনস্যাপি ফাল্গুনাষাঢযো র-পি। কৃষ্ণপক্ষে দ্বিতীয়ায়া মনধ্যায়ং বিদুর্ব্বুধাঃ॥ ভুজবলঃ। চৈত্র কৃষ্ণ দ্বিতীয়ায়াং তিসৃষ্বেবাষ্টকাসু চ। মাগে চ ফাল্গুনে চৈব আষাঢে কার্ত্তিকে তথা॥ পক্ষযো র্মাঘমাসস্য দ্বিতীয়াং পরিবর্জ্জয়েৎ। নাকাল বৃষ্টৌ অব্রবীত বৃতবন্ধ শুভক্রিয়াং॥ উপনয়নে উত্তরায়ণ শুক্লপক্ষযো বিধানাৎ কার্ত্তিকাদৌ কৃষ্ণপক্ষে চ দ্বিতীয়া নিষেধঃ পুনঃ সংস্কার মর্হতি ইত্যুক্ত প্রায়শ্চিত্তরূপোপনয়ন পরঃ। বৈশ্যোপনয়ন পরশ্চ। তথা চ গর্গঃ। বিপ্রস্য ক্ষত্রিয়স্যাপি মৌঞ্জীস্যাদুত্তরায়ণে। দক্ষিণে চ বিশাং কার্য্যং নানধ্যায়ে ন সংক্রমে॥ অনধ্যায়েপি অব্রবীত যস্য নৈমিত্তিকং ভবেৎ। অপিনা দক্ষিণায়ন কৃষ্ণপক্ষযোঃ সমুচ্চয়ঃ। নৈমিত্তিক প্রায়শ্চিত্তরূপং। চৈত্র শুক্লতৃতীয়া আষাঢ শুক্লদশমী মন্বন্তরাদিত্বেন নিষিদ্ধা। বৈশাখ শুক্ল তৃতীয়া যুগাদিত্বেন নিষিদ্ধা। বষ্ঠ্যামশুচি কণ্ডার্য্যো রিক্তাসু বহুদোষভাক্। সামগানাং গুরুবারেপ্যুপনয়নং। শাখাধিপত্বাৎ। তথাচ। শাখাধিপে বলিনি কেন্দ্রগতে হথবাস্মিন্ বারে হস্য চোপনয়নং কথিতং দ্বিজানাং। নীচস্থিতে হরিগৃহগেথ পরাজিতে বা জীবে ভৃগাবুপনয়ঃ স্মৃতি কর্মহীনঃ॥ অস্য শাখাধিপস্য। কৃত্যচিন্তামণৌ। জন্মোদয়ে জন্মসু তারকাসু মাসে

অথবা জন্মনি জন্মতে বা। ব্রতেন বিপ্রো ন বহুশ্রুতোপি বিদ্যাবিশেষৈঃ প্রথিতঃ পৃথিব্যাং॥ অস্তং গতে দৈত্যগুরৌ গুরৌ বা খক্ষেপি বা পাপযুতেপ্যনুক্তে। ব্রতোপনীতো দিবসৈঃ প্রণাশং প্রযাতি দেবৈরপি রক্ষিতো যঃ॥ উদয়ে লগ্নে ব্রতেন উপনয়নেন। ইতি সংস্কারতত্ত্বং॥

যজ্বঃ পুং যজুর্ব্বেদবেত্তাব্রাহ্মণঃ। ইত্যুণাদিকোষঃ॥ যজমানঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

যজ্বা পুং বিধিনাইষ্টবান্। বেদবিধানেন কৃতযাগঃ। ইত্যমরঃ॥

যজ্বনাংপতিঃ পুং চন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

যত ক খেদোপস্করযোঃ। ইতি কবিকল্পদ্রুমঃ॥ খেদ ইহ তাডনং। ক যাতযতি পুত্রং পিতা তাডযতি ইত্যর্থঃ। যাতযতি গৃহং গৃহিণী উপস্করোতি ইত্যর্থঃ। নিরঃপ্রত্যর্পণে প্রত্যর্পণং পরীবর্ত্তঃ। নির্যাতযতি ধান্যেন মাষান্ লোকঃ ধান্যং দত্ত্বা মাষান্ গৃহ্লাতি ইত্যর্থঃ। ইতি দুর্গাদাসঃ॥

যত ঈ ড যত্নে। ইতি কবিকল্পদ্রুমঃ॥ ঈ যত্তঃ। ঙ যততে পঠিতুং শিষ্যঃ। ইতি দুর্গাদাসঃ॥

যত্ ব্য হেতুঃ। যস্মাৎ। ইত্যমরঃ॥

যত্ ত্রি বুদ্ধিস্থত্বোপলক্ষিতধর্ম্মাবচ্ছিন্নং। যে ইতি ভাষা। ইতি ন্যায়মতং সিদ্ধান্তকৌমুদ্যাদিবৃত্তিশ্চ॥

যতঃ ব্য হেতুঃ। যস্মাৎ। ইত্যমরঃ॥

যতমঃ ত্রি বহূনাংমধ্যেনির্দ্ধারিতৈকঃ॥ এষাং মধ্যে যঃ। যদ্শব্দাৎ ডতম প্রত্যয়েন নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং॥

যতরঃ ত্রি দ্বযোর্মধ্যেনির্দ্ধারিতৈকঃ। অনযো র্মধ্যে যঃ। যদ্শব্দাৎ ডতর প্রত্যয়েন নিষ্পন্নঃ। ইতি মুগ্ধবোধব্যাকরণং॥

যতিঃ পুং নির্জ্জিতেন্দ্রিযগ্রামঃ। তৎপর্য্যাযঃ। যতী ২। ইত্যমরঃ॥ ভিক্ষুঃ ৩ সংন্যাসিকঃ ৪ কর্ম্মন্দী ৫ রক্তবসনঃ ৬ পরিব্রাজকঃ ৭ তাপসঃ ৮ পরাশরী ৯ পারিকাঙ্ক্ষী ১০ মস্করী ১১ পারিরক্ষকঃ ১২। ইতি হেমচন্দ্রঃ॥ নিকারঃ॥ বিরতিঃ। ইতি তত্রৈব নানার্থে॥ * ॥ তস্য বারাণস্যাং বাসো যথা। অষ্টৌমাসান্বিহারস্য যতীনাং সংযতাত্মনাং। একত্র চতুরো মাসানব্দং বা নিবসেৎ পুনঃ॥ অবিমুক্তে প্রবিষ্টানাং বিহারস্তু ন বিদ্যতে। যতি-

ভি র্মোক্ষকামৈশ্চ অবিমুক্তং নিষেব্যতে॥ ইতি মাৎস্যে অবিমুক্ত মাহাত্ম্যে ১৫৯ অধ্যায়ঃ॥ যতিধর্ম্মো যথা। অলাবুং দারুপাত্রঞ্চ মৃন্ময়ং বৈদলং তথা॥ এতানি যতি পাত্রাণি মনুঃ স্বায়ম্ভুবো ব্রবীৎ॥ এককালং চরেদ্ভৈক্ষ্যং ন প্রসজ্জেত বিস্তরে। ভৈক্ষ্যে প্রসক্তোহি যতি র্বিষয়েষ্বপি সজ্জতি॥ বিধূমে সন্নমুষলে ব্যঙ্গারে ভুক্তবজ্জনে। বৃত্তে শরাব সম্পাতে ভিক্ষাং নিত্যং যতি শ্চরেৎ॥ অলাভে ন বিষাদীস্যাল্লাভে চৈব ন হর্ষয়েৎ। প্রাণযাত্রিকমাত্রঃ স্যান্মাত্রা সঙ্গাদ্বিনির্গতঃ॥ অভিপূজিত লাভাংস্তু জগুপ্সেতৈব সর্ব্বশঃ। অভিপূজিত লাভৈশ্চ যতি র্মুক্তো২পি বধ্যতে॥ অল্পান্ন ভ্যবহারেণ রহঃস্থানাসনেন চ। হ্রিয়মাণানি বিষয়ৈ রিন্দ্রিয়াণি নিবর্ত্তয়েৎ॥ ইন্দ্রিয়াণাং নিরোধেন রাগ দ্বেষ ক্ষয়েণ চ। অহিংসয়া চ ভূতানা মমৃতত্বায় কল্পতে॥ অবেক্ষেতগতীর্নৃণাং কর্ম্মদোষ সমুদ্ভবাঃ। নিরয়ে চৈব পতনং যাতনাশ্চ যমক্ষয়ে॥ বিপ্রযোগং প্রিয়ৈ শ্চৈব সংযোগঞ্চ তথা প্রিয়ৈঃ। জরয়া চাভিভবনং ব্যাধিভি শ্চোপপীড়নং॥ দেহাদুৎক্রমণঞ্চাস্মাৎ পুন র্গর্ভে চ সম্ভবং। যোনি কোটি সহস্রেষু সৃতী শ্চাস্যান্তরাত্মনঃ॥ অধর্ম্ম প্রভবঞ্চৈব দুঃখযোগং শরীরিণাং। ধর্ম্মার্থ প্রভবঞ্চৈব সুখ সংযোগ মক্ষয়ং॥ সূক্ষ্মতাঞ্চান্ববেক্ষেত যোগেন পরমাত্মনঃ। দেহেষু চ সমুৎপত্তি মুত্তমেষ্বধমেষু চ॥ দূষিতোপি চরেদ্ধর্ম্মং যত্র তত্রাশ্রমে রতঃ। সমঃ সর্ব্বেষু ভূতেষু ন লিঙ্গং ধর্ম্ম কারণং॥ ফলং কতক বৃক্ষস্য যদ্যপ্যম্বু প্রসাদকং। ন নামগ্রহণাদেব তস্য বারি প্রসীদতি॥ সংরক্ষণার্থং জন্তূনাং রাত্রাবহনি বা সদা॥ শরীরস্যাত্যয়ে চৈব সমীক্ষ্য বসুধাং চরেৎ॥ অহ্না রাত্র্যা চ যান্ জন্তূন্ হিনস্ত্যজ্ঞানতো যতিঃ। তেষাং স্নাত্বা বিশুদ্ধ্যর্থং প্রাণায়ামান্ সমাচরেৎ॥ প্রাণায়ামা ব্রাহ্মণস্য ত্রয়োপি বিধিবৎ কৃতাঃ। ব্যাহৃতি প্রণবৈ র্যুক্তা বিজ্ঞেয়ং পরমং তপঃ॥ দহ্যন্তে ধ্মায়মানানাং ধাতূনাংহি যথা মলাঃ। তথেন্দ্রিয়াণাং দহ্যন্তে দোষাঃ প্রাণস্য নিগ্রহাৎ॥ প্রাণায়ামৈ র্দহেদ্দোষান্ ধারণাভিশ্চ কিল্বিষং। প্রত্যাহারেণ সংসর্গান্ ধ্যানেনানীশ্বরান্ গুণান্॥ উচ্চাবচেষু ভূতেষু দুর্জ্ঞেয়া মকৃতাত্মভিঃ। ধ্যান যোগেন সম্পশ্যেদ্গ-

-তি মসন্ন্যাস্তরাত্মনঃ ॥ সম্যগ্দর্শন স-ম্পন্নঃ কর্ম্মভি র্ন নিবধ্যতে । দর্শনেন বিহীনস্তু সংসারং প্রতিপদ্যতে ॥ অহিংসযেন্দ্রিয়াসঙ্গৈ র্বৈদিকৈশ্চৈব কর্ম্মভিঃ । তপস শ্চরণৈ শ্চোগ্রৈঃ সাধয়ন্তীহ তৎপদং ॥ অস্থি স্থূণং স্নায়ু যুতং মাংস শোণিত লেপনং । চর্ম্মাবনদ্ধং দুর্গন্ধি পূর্ণং মূত্র পুরীষ-যোঃ ॥ জরা শোক সমাবিষ্টং রো-গায়তন মাতুরং । রজস্বল মনিত্যঞ্চ ভূতাবাস মিমং ত্যজেৎ ॥ নদীকূলং যথা বৃক্ষো বৃক্ষং বা শকুনি র্যথা । তথা ত্যজন্নিমং দেহং কৃচ্ছ্রাদ্গ্রাহাদ্বি মুচ্যতে ॥ প্রিয়েষু স্বেষু সুকৃত মপ্রি-য়েষুচ দুষ্কৃতং । বিসৃজ্য ধ্যান যোগেন ব্রহ্মাভ্যেতি সনাতনং ॥ যদা ভাবে-ন ভবতি সর্ব্বভাবেষু নিস্পৃহঃ । তদা সুখ মবাপ্নোতি প্রেত্য চেহ চ শা-শ্বতং ॥ অনেন বিধিনা সর্ব্বাং স্ত্যক্ত্বা সঙ্গান্ শনৈঃ শনৈঃ । সর্ব্ব দ্বন্দ্ব বিনি-র্মুক্তো ব্রহ্মণ্যেবাবতিষ্ঠতে ॥ ধ্যা-নিকং সর্ব্ব মেবৈতৎ যদেতদভিশ-ব্দিতং । ন হ্যনধ্যাত্মবিৎ কশ্চিৎ ক্রিয়া ফল মুপাশ্নুতে ॥ অধিযজ্ঞং ব্রহ্ম জপেদাধিদৈবিক মেব চ । অ-ধ্যাত্মিকঞ্চ সততং বেদান্তাভিহি-তঞ্চ যৎ ॥ ইদং শরণ মজ্ঞানা মিদ-মেব বিজানতাং । ইদমন্বিচ্ছতাং স্বর্গ মিদ মানন্ত্য মিচ্ছতাং ॥ অনেন ক্র-মযোগেন পরিব্রজতি যো দ্বিজঃ । স বিধূয়েহ পাপ্মানং পরং ব্রহ্মাধি গচ্ছতি ॥ ইতি মানবে ৬ অধ্যায়ঃ ॥

যতিঃ স্ত্রী পাঠবিচ্ছেদঃ । ইতি মে-দিনী ॥ বিধবা ॥ রাগঃ ॥ সন্ধিঃ । ইতি শব্দরত্নাবলী ॥ জিহ্বেষ্টবি-শ্রামস্থানং । যথা । যতি র্জিহ্বেষ্ট বিশ্রামস্থানং কবিভি রুচ্যতে । সা বিচ্ছেদ বিরা মাদ্যৈঃ পদৈ র্বাচ্যা নিজেচ্ছয়া ॥ ক্বচিচ্ছন্দস্যান্তে যতি রভিহিতা পূর্ব্বকৃতিভিঃ পদান্তে সা শোভাং ব্রজতি পদমধ্যে ত্য-জতি চ । পুন স্তত্রৈবাসৌ স্বর বি-হিত সন্ধিঃ শ্রয়তি তাং যথা কৃষ্ণঃ পুষ্ণাত্বতুল মহিমা মাং করুণয়া ॥ শ্বেতমাণ্ডব্য মুখ্যাস্তু নেচ্ছন্তি মুন-যো যতিং । ইত্যাহ ভট্টঃ স্ব গ্রন্থে শুকর্মে পুরুষোত্তমঃ ॥ ইতি ছন্দো মঞ্জরী ॥ বাদ্যাঙ্গপ্রবন্ধবিশেষঃ । যথা । যতি র্লোঢাপ্যবচ্ছেদো গঞ্জ-রো রূপকং ধ্রুবং । গনপঃ সারিগো-পী চ নাদশ্চ কথিতং বুধৈঃ ॥ প্রহর-ণং বৃন্দনঞ্চ প্রবন্ধা দ্বাদশ স্মৃতাঃ । যথা দং থাতঃ । ইত্যেকতাল্যাং যতিঃ । ইতি সঙ্গীতদামোদরঃ ॥

যতিঃ ত্রি বহুবচনান্তযদ্‌শব্দার্থকঃ। যতগুলি ইতি ভাষা। যদ্‌শব্দাৎ নিপাতনাৎ ডতি প্রত্যয়েন নিষ্পন্নং। ইতি মুগ্ধবোধব্যাকরণং ॥

যতিচান্দ্রায়ণং ক্লী ব্রতবিশেষঃ। যথা। অষ্টাবষ্টৌ সমশ্নীয়াৎ পিণ্ডান্ মধ্যদিনে স্থিতে। নিয়তাত্মা হবিষ্যাশী যতিচান্দ্রায়ণং চরন্॥ ইতি মানবে ১১ অধ্যায়ঃ॥ যতিচান্দ্রায়ণে পাদোন ধেনুচতুষ্টয়ং তদশক্তৌ সপাদৈকাদশ কার্ষাপণাঃ। ইতি প্রায়শ্চিত্তবিবেকঃ॥

যতিনী স্ত্রী বিধবা। যথা। বিধবা জানিকারণ্ডা বিশ্বস্তা যতিনী যতিঃ। ইতি শব্দরত্নাবলী॥

যতিমৈথুনং ক্লী যতিগোপ্যরতিঃ। তৎপর্য্যায়ঃ। খঞ্জনরতং ২। ইতি ত্রিকাণ্ডশেষঃ॥

যতী স্ত্রী বিধবা। ইতি শব্দরত্নাবলী

যতী পুং যতিঃ। জিতেন্দ্রিয়ঃ। ইত্যমরঃ॥

যতুকা) স্ত্রী বৃক্ষবিশেষঃ। যথা। রজ-
যতুকা) নী স্যাদ্রযতুকা যতুকা জননীতি চ। ইতি শব্দরত্নাবলী॥

যত্নঃ পুং রূপাদিচতুর্ব্বিংশতিগুণান্তর্গতগুণবিশেষঃ। স চ ত্রিবিধঃ। প্রবৃত্তিঃ ১ নিবৃত্তিঃ ২ জীবনযোনিঃ ৩। যথা। প্রবৃত্তিশ্চ নিবৃত্তিশ্চ তথা জীবনকারণং। এবং প্রযত্নস্ত্রৈবিধ্যং তান্ত্রিকৈঃ পরিকীর্ত্তিতং॥ তেষাং কারণং যথা। চিকীর্ষা কৃতিসাধ্যেষ্টসাধনত্ব মতি স্তথা। উপাদানস্য চাধ্যক্ষং প্রবৃত্তৌ জনকং ভবেৎ॥ নিবৃত্তিস্তু ভবেদ্দ্বেষাদ্দিষ্টসাধনতা ধিয়ঃ। যত্নো জীবনযোনিস্তু সর্ব্বদাতীন্দ্রিয়ো ভবেৎ॥ শরীরে প্রাণসঞ্চারে কারণং তৎ প্রকীর্ত্তিতং। ইতি ভাষাপরিচ্ছেদঃ॥ উদ্যোগঃ। যথা। উদ্যোগিনং পুরুষসিংহ মুপৈতি লক্ষ্মী র্দৈবেন দেয় মিতি কাপুরুষা বদন্তি। দৈবং নিহত্য কুরু পৌরুষ মাত্মশক্ত্যা যত্নে কৃতে যদি ন সিধ্যতি কোত্র দোষঃ॥ ইত্যুদ্ভটঃ॥

যত্নবান্ ত্রি যত্নবিশিষ্টঃ। যত্নশব্দাৎ বত্ প্রত্যয়েন নিষ্পন্নঃ॥

যত্র ব্য যস্মিন্। যেখানে ইতি ভাষা। যদ্‌শব্দাৎ সপ্তম্যা ত্রল্ প্রত্যয়েন নিষ্পন্নং। ইতি সিদ্ধান্তকৌমুদী॥

যন্ত্র ই ক সংকোচনে। ইতি কবিকল্পদ্রুমঃ॥ দন্ত্যবর্গাদ্যোপধঃ। ই ক যন্ত্রয়তি মন্ত্রেণ সর্পং জাঙ্গলিকঃ। যন্ত্র ইত্যনেনৈবেষ্টে সিদ্ধে ইদনুবন্ধো বেদেষূচ্চারণ ভেদার্থঃ। ইতি

দুর্গাদাসঃ ॥

বা সাদৃশ্যং। সাম্যং। তৎপর্য্যায়ঃ। বৎ ২ বা ৩ তথা ৪ এব ৫ এবং ৬। ইত্যমরঃ ॥

যথাকামী ত্রি স্বেচ্ছাচারী। তৎপর্য্যায়ঃ। স্বরুচিঃ ২ স্বচ্ছন্দঃ ৩ স্বৈরী ৪ অপাবৃতঃ ৫ স্বতন্ত্রঃ ৬ নিরবগ্রহঃ ৭। ইতি হেমচন্দ্রঃ ॥ নির্যন্ত্রণঃ ৮। ইতি জটাধরঃ ॥

যথাক্রমং ক্লী ক্রমানুরূপং। ক্রমমনতিক্রম্যেতি ব্যাকরণং ॥ অপিচ। যথাক্রমেণ পুত্রেণ কার্য্যা প্রেতক্রিয়া সদা। পতিতাপতিতা বাপি একোদ্দিষ্ট বিধনতঃ ॥ ইতি শ্রাদ্ধতত্ত্বং ॥

যথাজাতঃ ত্রি মূর্খঃ। ইত্যমরঃ ॥ নীচঃ। ইতি জটাধরঃ ॥

যথাতথং অ ব্য যথার্থং। ইতি হারাবলী ॥

যথাপূর্ব্বং ব্য পূর্ব্বদিগ্দেশকালানুরূপং। যথা। অকৃতায়াং প্রতিষ্ঠায়াং প্রাণানাং প্রতিমাসু চ। যথাপূর্ব্বং তথাভাবঃ স্বর্ণাদীনাং ন বিক্ষুতা ॥ ইতি তিথ্যাদিতত্ত্বধৃত কালিকাপুরাণ বচনং ॥

যথামুখীনঃ ত্রি মুখপ্রতিবিম্বাশ্রয়ঃ। মুখস্য সদৃশং যথা মুখং প্রতিবিম্বং নিপাতনাৎ সাদৃশ্যে হব্যয়ীভাবঃ। যথামুখং দর্শনঃ যথামুখীনঃ। ইতি সিদ্ধান্তকৌমুদী ॥ অপিচ। তত শিচত্রীয়মাণো হসৌ হেম রত্নময়ো মৃগঃ। যথামুখীনঃ সীতায়াঃ পুপ্লুবে বহু লোভয়ন্ ॥ ইতি ভট্টিঃ ॥ মুখস্য সদৃশং যথামুখং দর্পণাদিস্থ প্রতিবিম্ব মুচ্যতে সাদৃশ্যার্থে হব্যয়ীভাবঃ। ইতি ভরতঃ ॥ নির্ম্মলত্বাৎ সীতায়া অগ্রতো যথামুখীনঃ প্রতিবিম্বাশ্রয় ইব ভূত্বা পুপ্লুবে ভ্রমতিস্ম ইব শব্দ লোপো দ্রষ্টব্যঃ। ইতি জয়মঙ্গলঃ ॥

যথাযথং অ ব্য যথার্থং। ইতি মুদ্রাঙ্কিতামরঃ ॥

যথার্থং অ ব্য যথাতথং। ইত্যমরঃ ॥ দ্বে অব্যভিচারিণি। অর্থমনতিক্রান্তং যথার্থং যথাস্বরূপং যথাতথং উভয়ত্র অব্যয়ীভাবঃ। যথার্থ মেবেদং। যথাতথং বক্তি সভাসু বিদ্বান্। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। সত্যং সম্যক্ সমীচীন মৃতং তথ্যং যথাতথং। যথাস্থিতঞ্চ সদ্ভূতে হলীকে তু বিতথানৃতে ॥ ইতি হেমচন্দ্রঃ ॥

যথার্হং ব্য যথাযোগ্যং। যথা। কৃত্বা তু তৌ যথান্যায়ং যথার্হং স্তেন স-

যদৃচ্ছা স্ত্রী স্বাতন্ত্র্যং। তৎপর্য্যায়ঃ। স্বৈরিতা২। ইত্যমরঃ॥ স্বৈরিতা ৩। ইতি তট্টীকা॥

যদ্যবা অব্য যদি। যথা। যদ্যবাল্পতর সত্ত্বারঃ স্যাদপি পশ্যৈনৈব জয্যাৎ। যদ্যবেতি নিপাত সমুদায়ো যদ্যর্থে॥ অপিচ। যদ্যবা উভয়ং চিকীর্ষেদ্দোত্রং ব্রহ্মত্বঞ্চ ইতি তেনৈব কল্পেন ছত্র মুত্তরাসঙ্গং মোদকং কমণ্ডলুং দর্ভবটুং বা ব্রহ্মাসনে নিধায় তেনৈব প্রত্যাবর্ত্যান্যচ্ছেষ্টতা ইতি তিথ্যাদিতত্ত্বং॥

যদ্বা স্ত্রী বুদ্ধিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ পক্ষান্তরঞ্চ॥

যন্তা পুং সারথিঃ॥ হস্তিপকঃ। ইত্যমরঃ॥ বিরতিকারকে ত্রি॥

যন্ত্রং ক্লী দেবাদ্যধিষ্ঠানং॥ পাত্রভেদঃ॥ নিযন্ত্রণং। ইতি হেমচন্দ্রঃ॥ অগ্নিযন্ত্রং। কামান্ বন্দুক ইত্যাদি ভাষা। ইতি মহাভারতটীকায়াং নীলকণ্ঠঃ॥ বাদ্যং। যথা। যন্ত্রস্য গুণদোষৌ ন বিচার্য্যৌ মধুসূদন। অহং যন্ত্রং ভবান্ যন্ত্রী ন মে দোষো ন মে গুণঃ। ইতি মহাভারতং॥ দারুযন্ত্রাদি। কল ইতি ভাষা। যথা। ঈশ্বরঃ সর্ব্বভূতানাং হৃদ্দেশে ঽর্জ্জুন তিষ্ঠতি। ভ্রাময়ন্ সর্ব্বভূতানি যন্ত্রারূঢ়ানি মায়য়া॥ ইতি শ্রীভগবদ্গীতায়াং ১৮ অধ্যায়ঃ॥ অস্যার্থঃ। সর্ব্বভূতানাং হৃদ্দেশে ঈশ্বরোঽন্তর্যামী তিষ্ঠতি। কিং কুর্ব্বন্ সর্ব্বাণি ভূতানি মায়য়া নিজশক্ত্যা ভ্রাময়ং স্তত্তৎ কর্ম্মসু প্রবর্ত্তয়ন্ যথা দারুযন্ত্রমারূঢ়ানি কৃত্রিমাণি ভূতানি সূত্রধারো লোকে ভ্রাময়তি তদ্বদিতি। যদ্বা যন্ত্রাণি শরীরাণি আরূঢ়ানি ভূতানি দেহাভিমানিনো জীবানিত্যর্থঃ। ইতি শ্রীধরস্বামী॥ *॥ অথ পূজায়াং যন্ত্রং। তত্র নারদীয়ে। আপো হগ্নিঃ হৃদয়ং চক্রং বিষ্ণোঃ ক্ষেত্র সমুদ্ভবং। যন্ত্রঞ্চ প্রতিমাস্থান মর্চনে সর্ব্বদা হরেঃ॥ গৌতমীয়ে। শালগ্রামে মণৌ যন্ত্রে প্রতিমা মণ্ডলেষু চ॥ নিত্যং পূজা হরেঃ কার্য্যা ন তু কেবল ভূতলে॥ যোগিনীতন্ত্রে। লিঙ্গস্থাং পূজয়েদ্দেবীং পুস্তকস্থাং তথৈব চ। মণ্ডলস্থাং মহামায়াং যন্ত্রস্থাং প্রতিমাসু চ জলস্থাং বা শিলাস্থাং বা পূজয়েৎ পরমেশ্বরীং॥ এতৎ সর্ব্বং যন্ত্রাভাবে॥ কৌলাবলীয়ে। যত্রাপরাজিতা পুষ্পং জবা পুষ্পঞ্চ বিদ্যতে। করবীরে শুক্ল রক্তে দ্রোণং বা যত্র তিষ্ঠতি॥ তত্র দেবো বসেন্নিত্যং তস্য তন্ত্র চণ্ডিকাচ্চনং। এতৎ সর্ব্বং যন্ত্রাভাবে

॥ তথাচ। যন্ত্রং মন্ত্রময়ং প্রোক্তং মন্ত্রাত্মা দেবতৈব হি। দেহাত্মনো র্যথা ভেদো যন্ত্র দেবতয়ো স্তথা॥ তথা। আদৌ লিখেন্মন্ত্রবরং দেবতায়াশ্চ বিগ্রহং। কাম ক্রোধাদি দোষোত্থ সর্ব্বদুঃখ নিয়ন্ত্রণাৎ॥ যন্ত্র মিত্যাহু রেতস্মিন্ দেবঃ প্রীণাতি পূজিতঃ। বিনা যন্ত্রেণ পূজায়াং দেবতা ন প্রসীদতি॥ দুঃখ নির্যন্ত্রণাদ্যন্ত্র মিত্যাহু স্তন্ত্রবেদিনঃ। ইতি যন্ত্রপূজাপ্রাধান্যং॥ * ॥ অথ ধারণযন্ত্রাণি। তত্রাদৌ ভুবনেশ যন্ত্রং। শারদায়াং। আলিখ্যাষ্ট দিগর্গলান্যদরগং পাশাদিকং ত্র্যক্ষরং। কোষ্ঠেষ্বঙ্গ মনূন্ পরেষু বিলিখেদষ্টার্ণ মন্ত্রদ্বয়ং॥ অচ্ পূর্ব্বাপর ষট্ক যুগ ল য ব রান্ ব্যোমাসনানর্গলেষ্বালিখেন্দ্রজলাধিপা দিগুণশঃ পংক্তিদ্বয়ান্তং পরং। কোষ্ঠেষ্বষ্ট যুগার্ণমায় সহিতাং যুগ্মস্বরান্তর্গতাং মায়াং কেশরগাং দলেষু বিলিখেন্মূলং ত্রিপংক্তি ক্রমাৎ॥ ত্রিঃপাশাঙ্কুশবেষ্টিতঞ্চ লিপিভি র্বীতং ক্রমাদ্ব্যুৎক্রমাৎ পদ্মস্থেন ঘটেন পঙ্কজ মুখেনাবেষ্টিতং তদ্বহিঃ। ঘটার্গল মিদং যন্ত্রং মন্ত্রাখ্যং শ্রীপ্রদং মহৎ। পাশ শ্রীশক্তি কন্দর্প কাম শক্তীন্দিরাঙ্কুশাঃ॥ প্রথমোষ্টাক্ষরো মন্ত্র স্ততঃ কামিনি রঞ্জিনি। স্বাহান্তো হ্যষ্টাক্ষরঃ সদ্ভিরপরঃ পরিকীর্ত্তিতঃ॥ হ্রীং গৌরি রুদ্রদয়িতে যোগেশ্বরি সবর্ম্ম ফট্। দ্বিঠান্তঃ ষোডশার্ণোয়ং মন্ত্রঃ সদ্ভি রুদীরিতঃ॥ ইতি ঘটার্গল যন্ত্রং॥ * ॥ তারে হুঁ বিলিখেৎ সরোজ সহরে সাধ্যাভিধানান্বিতং। মন্ত্রার্ণান্ বসু সংখ্যকান বসুদলেষ্বালিখ্য তদ্বাহ্যতঃ। শক্ত্যা ত্রিঃ পরিবেষ্টিতং ঘটগতং পদ্মস্থ মর্ণাননং যন্ত্রং বশ্যকরং গৃহাদি ভয়হৃল্লক্ষ্মীপ্রদং কীর্ত্তিদং॥ ইতি ত্বরিতা যন্ত্রং॥ * ॥ পদ্মং ভানুদলান্বিতং প্রবিলিখেৎ তৎ কর্ণিকায়াং পুন স্তারং শক্তিগ বীজ সাধ্য সহিতং তৎ কেশরেষু ক্রমাৎ। মর্দিন্যা মনু সম্ভবান্ যুগলশো বর্ণান পুনঃ পত্রগান্ মন্ত্রার্ণান্ গুণশো বিধায় বিলিখেদন্ত্যং তদন্ত্যে দলে॥ মন্ত্রস্তু। উত্তিষ্ঠ পুরুষি কিং স্বপিষি ভয়ংমে সমুপস্থিতং। যদিশক্য মশক্যম্বা তন্মে ভগবতি শময় স্বাহা। মাতৃকার্ণেন সংবীতং ভূপুর দ্বয় মধ্যগং। যন্ত্রঞ্চ বিন্ধ্যবাসিন্যাঃ প্রোক্তং সর্ব্ব সমৃদ্ধিদং॥ রক্ষাকরং বিশেষেণ ক্ষুদ্রভূতাদি নাশনং। রাজ্যদং ভ্রষ্ট রাজ্যানাং বশ্য

দং বশ্য মিচ্ছতাং ॥ সুতার্থিনীনাং
সুতদং রোগিণাং রোগ শান্তিদং।
বহুনা কি মিহোক্তেন যন্ত্রং তৎকাম-
দো মণিঃ॥ ইতি বনদুর্গা যন্ত্রং ॥ * ॥
অথ লক্ষ্মীযন্ত্রং। বেদাদি স্থিত সা-
ধ্য নাম যুগলঃ শ্রীশক্তি মারান্বিতং
কিঞ্জল্কষু দিনেশ পত্র বিলসন্ মন্ত্রা-
ক্ষরং তদ্বহিঃ। পদ্মং ব্যঞ্জন কেশরং
স্বর লসৎপত্রাষ্ট যুগ্মং ধরা বিম্বা-
ভ্যাং বষডন্তয়া ত্বরিতয়া যন্ত্রং লি-
খেদ্বেষ্টিতং ॥ ভূপুরদ্বয়কোণেষু হ-
ক্ষৌ লেখ্যৌ পুনঃ পুনঃ। মহালক্ষ্মী
যন্ত্র মিদং সর্ব্বৈশ্বর্য্য ফলপ্রদং॥ সর্ব্ব
দুঃখ প্রশমনং সর্ব্বাপদ্বিনিবারকং।
বহুনা কি মিহোক্তেন পরমস্মান্ন
বিদ্যতে ॥ অথ ত্রিপুরভৈরবীযন্ত্রং
॥ * ॥ মধ্যাদ্যং মদযোনিষু প্রবি-
লিখেদ্বীজানি বর্ণাং স্ত্রিশো গায়ত্র্যাঃ
পুনরষ্ট পত্র বিবরেষ্বালিখ্য লিপ্যা-
বৃতং। ভূবিম্ব দ্বিতয়েন মন্মথ যজা
কোণেষু সংবেষ্টিতং যন্ত্রং ত্রৈপুর মী-
রিতং ত্রিভুবন প্রক্ষোভণং শ্রীপ্রদং
॥ গায়ত্রী তু। মন্মথং ত্রিপুরাদেবি
বিদ্মহে পদ মুদ্ধরেৎ। উক্ত্বা কামে-
শ্বরি পদং প্রবদেদথ ধীমহি ॥ অ-
ন্তে চ প্রবদেত্তন্ন স্তন্নঃ ক্লিন্নে প্রচোদ-
য়াৎ। গায়ত্র্যেষা সমাখ্যাতা ত্রৈ-

পুরী সর্ব্বসিদ্ধিদা ॥ যন্ত্রান্তরং।
বহ্নে গেঁহ যুগান্তরস্থ মদনে মায়াং
লিখেদ্বাগ্ভবং ষট্কোণেষ্বথ সন্ধিষু
প্রবিলিখেৎ হুংকার মাবেষ্টিতং
স্ত্রীং বীজেন সমীরিতং ত্রিভুবন প্র-
ক্ষোভণং ত্রৈপুরং যন্ত্রং পঞ্চ মনো ভ-
বাত্মক মিদং সৌন্দর্য্য সম্পৎকরং ॥
ইতি ত্রিপুরা যন্ত্রং ॥ * ॥ অথ শ্রী
বিদ্যা যন্ত্রং। বিশেষং ধারণং যন্ত্রং
প্রসঙ্গাৎ কথয়ামি তে। রেফ হকা-
রয়ো র্মধ্যে দেবীনা মভিমুখ্যকং ॥
সাধ্যনাম দ্বিতীয়ান্তং তস্যোদ্ধে বি-
লিখেন্মনুং। তত্রৈব মাতৃকাং সর্ব্বাং
বিলিখেচ্চক্র মাস্থতঃ ॥ পঞ্চগব্য-
মৃতেনৈব মলেন পরিবেষ্টয়েৎ। তত্র
প্রাণং প্রতিষ্ঠাপ্য বিদ্যা মষ্টোত্তরং
শতং ॥ তৎস্পৃষ্ট্বা প্রজপেন্মন্ত্রং দেবী
ধ্যান পরায়ণঃ। হেম্নো মধ্যগতং কৃ-
ত্বা রজতস্যাথ বা পুনঃ॥ করে ধৃত্বা
জগদ্বশ্যং হৃদয়ে স্ত্রীষু বল্লভং। কণ্ঠে
ধনং লভেদ্ভালে স্তম্ভনং জম্ভনং ভ-
বেৎ॥ শিখায়াং মোক্ষ মাপ্নোতি
তস্মাদ্যত্নেন ধারয়েৎ। * ॥ অথ গ-
ণেশ যন্ত্রং ॥ বীজং ষট্কোণ মধ্যে
স্মরদনল পুরে তারগং দিক্ষু লক্ষ্মী
মায়া কন্দর্প ভূমী অঙ্কুর রস পুটে
ষ্বালিখেদ্বীজ ষট্কং। তৎ ন্যস্তাস্থ

মন্ত্রান্ বসুদল কমলে মূল মন্ত্রস্য বর্ণান্ শিষ্টান্ পত্রেষু বিদ্বান্ বিলিখতু গুণশশ্চাষ্ট্য মন্ত্যে পলাশে ॥ আবীতং লিপিভিঃ ক্রমোৎক্রম বশাৎ পাশাঙ্কুশাভ্যা মপি ভূবিম্বদ্বিতয়েন বেষ্টিত মিদং যন্ত্রং গণাধীশিতুঃ। লাক্ষা কুঙ্কুম রোচনা মৃগমদৈ ভূর্জোদরে হেম্নি বা সংলিখ্যাভিবহন্ লভেত সকলৈঃ সংপ্রার্থনীয়াং শ্রিয়ং ॥ উক্তং মহাগণপতের্বিধানং সুর পূজিতং। সর্ব্বসিদ্ধিকরং পুংসাং সমস্ত পুরুষার্থদং ॥ * ॥ অথ শ্রীরামযন্ত্রং ॥ তারং মধ্যে বিলিখতু মনুং ষট্স কোণেষু সাঙ্গযুগ্মং মায়াং স্মর মপি লিখেৎ কোণগণ্ডেষু পশ্চাৎ। কিঞ্জল্কেষু স্বরগণ মথো পত্র মধ্যেষু মালা মন্ত্রস্যার্ণান্ গুহমুখ মিতানষ্টমে পঞ্চবর্ণান্ ॥ দশাক্ষরেণ সংবেষ্ট্য কাদি বর্ণৈশ্চ ভূপুরে। দিগ্বিদিক্ষু লিখেদ্বীজে নরসিংহ বরাহয়োঃ ॥ নমো ভগবতে ব্রূয়াচ্চতুর্থ্যা রঘুনন্দনং। রক্ষোঘ্ন বিষদায়ান্তে মধুরাদি সমীরয়েৎ ॥ প্রসন্নবদনায়েতি পশ্চাদমিত তেজসে। বলায় পশ্চাদ্রামায় বিষ্ণবে ভদনন্তরং ॥ প্রণবাদি নমোন্তো হয়ং মালামন্ত্রঃ প্রকীর্ত্তিতঃ ॥*॥ অথ নৃসিংহ যন্ত্রং। বীজং সাধ্য সমন্বিতং প্রবিলিখেন্মধ্যেষ্ট পত্রেষ্বথো মন্ত্রার্ণান্ শ্রুতিশো বিভজ্য বিলিখেল্লিপ্যা বহির্বেষ্টয়েৎ। বাহ্যে কোণগ বীজ বদ্ধ বসুধা গেহদ্বয়েনাবৃতং যন্ত্রং ক্ষুদ্র বিষগ্রহাময় রিপু প্রধ্বংসনং শ্রীপ্রদং ॥ * ॥ অথ গোপাল যন্ত্রং ॥ পিণ্ডং মূলেন বীতং দহন পুর যুগে কোণ রাজৎ ষডর্ণং জর্য্যাত্ পদ্মং দশার্ণ স্ফুরিত দশদলং কাম বীজেন বীতং। পদ্মং কিঞ্জল্ক সংস্থ স্বর বিকৃতি দল প্রোল্লসৎ ষোডশার্ণং কিঞ্জল্ক ব্যঞ্জনাঢ্যং বিকৃতি যুগ দলেষ্বর্পিতা নষ্টবর্ণান্ ॥ পাশাঙ্কুশাভ্যানাবীতং ক্ষৌণী পুর যুগাশ্রিষু। অষ্টাক্ষরেণ লসিতং যন্ত্রং গোপাল দৈবতং ॥ ধর্ম্মার্থ কাম ফলদং সর্ব্ব রক্ষাকরং স্মৃতং। গঞ্চান্তকো ধরাসংস্থো মনু বিন্দু বিভূষিতঃ ॥ পিণ্ডবীজ মিদং প্রোক্তং সর্ব্বসিদ্ধি করং পরং। স্মরঃ কৃষ্ণায় টৈদ্বন্দ্বং ষডর্ণো মনুরীরিতঃ ॥ গোপী জনান্তে প্রবদেদ্বল্লভায়াগ্নি বল্লভা। অযং দশাক্ষরো মন্ত্রো দৃষ্টাদৃষ্ট ফলপ্রদঃ ॥ প্রণবং হৃদয়ং কৃষ্ণং ঙেন্ত মুক্ত্বা ততঃ পরং। তাদৃশং দেবকীপুত্রং হুং ফট্ স্বাহা সমন্বিতং ॥ ষোডশাক্ষর মন্ত্রো হয়ং গোবিন্দস্য জগৎপতেঃ। পিণ্ডং র-

তিপতে স্বী জং নমো ভগবতে ততঃ ॥ নন্দপুত্রায় বালাদি বপুষে শ্যামলায় চ। গোপীজন পদস্যান্তে বল্লভায় দ্বিঠাবধি ॥ অনুষ্টুপ্ মন্ত্র আখ্যাতো গোপালস্য জগৎপতেঃ। অনঙ্গঃ কৃষ্ণ গোবিন্দৌ ঙেন্তাবষ্টাক্ষরো মনুঃ॥ ইতি গোপালযন্ত্রং ॥ ॥ * ॥ অথ গোপালস্য যন্ত্রান্তরং। প্রাক্ প্রত্যক দক্ষিণোদক বিধিবদভিলিখেৎ স্পষ্ট রেখা চতুষ্কং কোণোদ্যচ্ছূল যুক্তং বলয়যুগ যুতং মধ্য পূর্ব্বং তদন্তং। শ্লোকস্যার্ণান্ পুরস্তাদ্বসু পদ বিবরেস্বষ্টবর্ণং লিখিত্বা তদ্বাহ্যে দ্বাদশার্ণৈস্তদনু পরিবৃতং দেবকী পুত্র যন্ত্রং ॥ তং সুকী দেব দেবেতং তং বেদে বরতো বতং। তং বতো রুচতো থ্যাতং তং খ্যাতো দেবকী সুতং ॥ লিখিতং ভূর্জ্জ পত্রাদৌ যন্ত্রমেতদ্যথা বিধি। বিধৃতং বাহুনা নিত্যং সর্ব্বকাম ফলপ্রদং ॥ পলাশ বৃক্ষ ফলকে লিখিতং সাধু সাধিতং। গোস্থানে নিখনেদেতৎ গবাং বৃদ্ধি র্ভবেত্তদা ॥ * ॥ অথ শিব যন্ত্রং। তত্রাদৌ ষট্কোণ মণ্ডলং কৃত্বা তদন্তঃ সাধ্য নাম যুক্তং প্রাসাদবীজং বিলিখ্য ষট্কোণেষু প্রণব সহিত পঞ্চাক্ষর বর্ণান্ বিলিখ্য বিবরেষু ষড়ঙ্গমন্ত্রান্ তদ্বহিঃ পঞ্চদলানি বিরচয্য তদ্দলেষু ওঁ ঈশানায় নমঃ ওঁতৎপুরুষায় নমঃ ওঁঅঘোরায় নমঃ ওঁসদ্যোজাতায় নমঃ ওঁবামদেবায় নমঃ। ইতি পঞ্চমন্ত্রান্ প্রাগাদি ক্রমেণ লিখেৎ। তদ্বহি রষ্টদলানি রচয়িত্বা তদ্দলেষু মাতকা বর্ণান্ লিখেৎ। তদ্বহি র্বৃত্তং ত্র্যম্বকেন বেষ্টয়েৎ। এতদ্যন্ত্রং জপ হোমাদিনা সম্পূজ্য ধারয়েৎ। আয়ু রারোগ্যৈশ্বর্য্যাদি সিদ্ধি র্ভবতি ॥ * ॥ অথ মৃত্যুঞ্জযস্য। মধ্যে সাধ্যাক্ষরাঢ্যং ধ্রুব মভিবিলিখেন্মধ্যমং দিগ্দলেষু কোণেষ্বন্ত্যং মনো স্তৎ ক্ষিতি ভুবন মথো দিক্ষু চন্দ্রং বিদিক্ষু। টান্তং যন্ত্রং তদুক্তং সকল ভযহরং ক্ষেড় ভূতাপ মৃত্যু ব্যাধি ব্যামোহ দুঃখ প্রশমন মুদিতং শ্রীপ্রদং কীর্ত্তিদাযি ॥ * ॥ অথ কালীযন্ত্রং। যামলে। আদ্যং বীজং সসাধ্যং প্রথম বসুগৃহে তদ্বহি শ্চাষ্টকোণে পূর্ব্বাদ্যং চাষ্টবীজং তদনু বসুগৃহ দ্বন্দ্বকে বীজষট্কং। কিঞ্জল্কং তৎস্বরাঢ্যং বসদল বিবরে স্বাহয়া বীজ ষট্কং কূর্চাভ্যা মেব বীতং ক্ষিতি গৃহযুগযো রন্তরে যন্ত্ররাজং ॥

দেবীবীজ ত্রয়ং তৎ প্রতিদিশ মপ-
রং শক্তিবীজ দ্বয়ং তৎ কোণে কোণে
লিখেদ্‌যং ত্রিজগতি সগুরুঃ শঙ্কর-
স্যাপি বিষ্ণোঃ ॥ * ॥ অথ শান্তি-
কাদৌ তারাধারণ যন্ত্রং । তদুক্তং
ফেৎকারীয়ে । যোনিযুগ্মে লিখে-
ন্মন্ত্রং মন্ত্রী হেমশলাকয়া । ক্লীবহী-
নান্ দীর্ঘবর্ণান্ ষট্‌কোণে বিলিখে
ত্ততঃ ॥ অষ্ট পত্রেষ্বষ্টবর্ণান্ তদ্বহি ভূ
পুরদ্বয়ং । অষ্টবজ্রং ভূপুরে চ বিলিখ্য
সাধকোত্তমঃ ॥ সুবর্ণ পট্টে ভূর্জ্জে
বা রূপ্যে বাপ্যথ সুমুহূর্ত্তে । বিলি
খেদ্ধেম লেখন্যা গন্ধাষ্টক সমন্বিতং
॥ দূর্ব্বাকাণ্ডেন বা লিখ্য দশমূলেন
বা পুনঃ । একবীরাকল্পে । বেষ্টিতং
পীতবস্ত্রেণ জতুনা পরিবেষ্টয়েৎ ।
বধ্নীয়াৎ পট্টসূত্রেণ শিশূনাং কণ্ঠ ভূ
ষণং ॥ স্ত্রীণাং বামভুজে চৈব মন্যে-
ষাং দক্ষিণে ভুজে । বন্ধ্যাপি লভতে
পুত্রং নির্ধনো ধনবান্ ভবেৎ ॥ ইমাং
রক্ষাং পুরা বধ্বা জ্ঞানার্থং গোতমা-
দিভিঃ । প্রীত্যর্থং পার্থিবৈশ্চান্যৈঃ
সংগ্রামে জয়কাঙ্ক্ষিভিঃ ॥ অস্যার্থঃ ।
যোনি যুগ্মে ষট্‌কোণে । তন্মধ্যে হেম
শলাকাদিনা ভূর্জ্জপত্রাদৌ কুঙ্কুম
রোচনা রক্তচন্দন জটামাংসীনাং স-
মাংশং বিধায় পঙ্ক্তি ক্রমেণ মূলমন্ত্রং



লিখিত্বা তস্য হৃল্লেখা রেফ-মধ্যে
অমুকস্য রক্ষাং কুরু কুরু অমুকীনাং
শুভং পুত্র মুৎপাদয়েতি বা অস্য
জ্ঞানং কুরু কুরু ইত্যাদি বা সাধ্য
সহিতং বিলিখ্য ষট্‌কোণে ক্লীব বি-
য়ান্ দীর্ঘ বর্ণান্ আ ঈ ঊ ঐ ঔ অঃ
ইত্যেকৈকং লিখেৎ । তদুক্তং । স্ব-
রাণাং মধ্যগং যচ্চ তচ্চতুষ্কং নপুংস-
ক মিতি । অষ্টপত্রেষ্বষ্টবর্ণান্ ঐং
হ্রীং ওঁ ঐং হ্রীং ফট্ স্বাহেতি লিখেৎ
। তদুক্তং । বাগ্ভবং কুলদেবীঞ্চ তার-
কং বাগ্ভবং তথা । হৃল্লেখা চাস্ত্র ম-
ন্ত্রান্তে বহ্নিজায়াবধি র্মনুঃ ॥ অষ্টা-
ক্ষরো মনুঃ প্রোক্তো মন্ত্রাণাং সার
ঈরিতঃ ॥ * ॥ অথ যন্ত্র লিখন দ্রব্যং
। কাশ্মীর রোচনা লাক্ষা মৃগেভ মদ
চন্দনৈঃ । বিলিখেদ্ধেম লেখন্যা যন্ত্রা-
ণ্যেতানি দেশিকঃ ॥ ভূমিস্পৃষ্টং শব
স্পৃষ্টং যন্ত্রং নির্মাল্য সঙ্গতং । বিদী-
র্ণং লঙ্ঘিতং মন্ত্রী যন্ত্রং নৈব চ ধার-
য়েৎ ॥ সৌবর্ণে রাজতে পাত্রে ভূর্জে বা
সম্যগালিখেৎ । অথ বা তাম্রপট্টে
বা গুটিকাং কৃত্য ধারয়েৎ ॥ যাব-
জ্জীবং সবর্ণে স্যাৎ রৌপ্যে বিংশতি
বার্ষিকং । ভূর্জ্জে দ্বাদশ বর্ষাণি তদ-
র্দ্ধং তাম্রপট্টকে ॥ ইতি তন্ত্রসারঃ
॥ * ॥ অন্যৎ কালিকাপুরাণে ৭৭

৭৮। ৭৯ অধ্যায়ে দ্রষ্টব্যং ॥ * ॥ অথ যন্ত্র সংস্কারঃ। রামকেশ্বরতন্ত্রে। স্নাত্বা সংকল্পয়েন্মন্ত্রী গুরো রর্চ্চন্মাচরেৎ। পঞ্চগব্যং ততঃ কৃত্বা শিবমন্ত্রেণ মন্ত্রিতং ॥ তত্র চক্রং ক্ষিপেন্মন্ত্রী প্রণবেন সমাঙ্গলং। তদুদ্ধৃত্য ততশ্চক্রং স্থাপয়েৎ স্বর্ণপাত্রকে ॥ পঞ্চামৃতেন দুগ্ধেন শীতলেনজলেন চ। চন্দনেন সুগন্ধেন কস্তুরী কুঙ্কুমেন চ ॥ পয়ো দধি ঘৃত ক্ষৌদ্র শর্করাদ্যৈ রনুক্রমাৎ। তোয় ধূপান্তরৈঃ কুর্য্যাৎ পঞ্চামৃত বিধিং বুধঃ ॥ হাটকৈঃ কলসৈ দেবী মষ্টভি র্ব্বারি পূরিতৈঃ। কষায জলসম্পূর্ণৈঃ কারয়েৎ স্নান মুত্তমং ॥ স্নানং সমাপ্য তাং দেবীং স্থাপয়েৎ স্বর্ণ পীঠকে। যন্ত্ররাজায় বিদ্মহে মহাযন্ত্রায় ধীমহি তন্নো যন্ত্রং প্রচোদয়াৎ ॥ স্পৃষ্ট্বা যন্ত্রং হুশাগ্রেণ গায়ত্র্যা চাভিমন্ত্রয়েৎ। অষ্টোত্তর শতং দেবি দেবতাভাব সিদ্ধয়ে ॥ আত্মশুদ্ধিং ততঃ কৃত্বা ষড়ঙ্গে দেবতাং যজেৎ। তত্রাবাহ্য মহাদেবীং জীবন্যাসঞ্চ কারয়েৎ ॥ উপচারৈঃ ষোড়শভি র্মহামুদ্রাদিভিঃ সহ। ফল তাম্বূল নৈবেদ্যৈ র্দেবীং তত্র সমর্চয়েৎ ॥ পট্টসূত্রাদিকং দদ্যাৎ বস্ত্রালঙ্কার মেবচ। অগুরুং চামরং ঘণ্টাং যথাযোগ্যং মহেশ্বরি ॥ সর্ব্ব মেতৎ প্রযত্নেন দদ্যাদাত্ম হিতে রতঃ। ততো জপেৎ সহস্রঞ্চ সকলেপ্সিত সিদ্ধয়ে ॥ বলিদানং ততঃ কৃত্বা প্রণমেচ্চক্ররাজকং। অষ্টোত্তর শতং হুত্বা সংপাতাজ্যং বিনিঃক্ষিপেৎ ॥ হোমকর্ম্মণ্যশক্তশ্চেৎ দ্বিগুণং জপমাচরেৎ। ধেনুমেকাং সমানীয় স্বর্ণ শৃঙ্গাদ্যলঙ্কৃতাং ॥ গুরবে দক্ষিণাং দদ্যাৎ ততো দেব্যা বিসর্জ্জনং ॥ * ॥ অস্য প্রয়োগঃ। কৃতনিত্য ক্রিয়ঃ স্বস্তিবাচন পূর্ব্বকং সঙ্কল্পং কুর্য্যাৎ। অদ্যেত্যাদি অমকগোত্রঃ শ্রীঅমুক দেবশর্ম্মা অমুক দেবতায়াঃ পূজার্থং অমুক যন্ত্র সংস্কার মহং করিষ্যে। ইতি সংকল্প্য পঞ্চগব্য মানীয় হৌ মিতি মন্ত্রেণাষ্টোত্তর শতং অভিমন্ত্র্য প্রণবেন যন্ত্রং তত্র ক্ষিপেৎ। তত উত্তোল্য স্থাপয়েৎ। ততঃ শীতল জল চন্দন গন্ধ কস্তুরী কুঙ্কুমৈঃ স্নাপয়িত্বা পঞ্চগব্য মানীয় হৌ মিতি মন্ত্রেণাষ্টোত্তরশতমভিমন্ত্র্য প্রণবেন পূর্ব্ববৎ শোধয়িত্বা স্নাপয়েৎ। তত্র ক্রমঃ। প্রথমং ক্ষীরেণ স্নাপয়িত্বা ধূপং দদ্যাৎ। এবং দধ্না ঘৃতেন মধুনা শর্করয়া চ। ততো হৃষ্টভিঃ কলসৈঃ

কুঙ্কুম গোরোচনা চন্দন মিশ্রিতৈ
স্তোয়ৈঃ স্নাপয়েৎ। সর্ব্বত্র স্নান মূল
মন্ত্রেণ ততো যন্ত্র মুত্তোল্য দক্ষা-
গ্রেণ তৎ স্পৃষ্ট্বা যন্ত্ররাজায় বিদ্মহে
মহাযন্ত্রায় ধীমহি তন্নো যন্ত্রং প্র-
চোদয়াৎ। ইত্যষ্টোত্তরশত মভি-
মন্ত্র্য প্রাণপ্রতিষ্ঠাং কুর্য্যাৎ। অস্য
প্রাণ প্রতিষ্ঠা মন্ত্রস্য ব্রহ্ম বিষ্ণু মহে-
শ্বরা ঋষয় ঋগ্‌যজুঃ সামানি ছন্দাং-
সি চৈতন্যং দেবতা প্রাণপ্রতিষ্ঠায়াং
বিনিয়োগঃ। তদ্যথা। আং হ্রীং ক্রোং
যং রং লং বং শং ষং সং হৌং হং সঃ
অমুক দেবতায়াঃ প্রাণা ইহ প্রাণাঃ
। এব মামিত্যাদি অমুক দেবতায়া
জীব ইহ স্থিতঃ। এবং আমিত্যাদি
অমুক দেবতায়াঃ সর্ব্বেন্দ্রিয়াণি।
এবং আমিত্যাদি অমুক দেবতায়া
বাঙ্মন শ্চক্ষুঃশ্রোত্র ঘ্রাণ প্রাণা ইহা
গত্য সুখং চিরং তিষ্ঠন্তু স্বাহা। ইতি
প্রাণান্ প্রতিষ্ঠাপ্য তত্র প্রকৃত দে-
বতা মাবাহ্য ষোড়শোপচারৈঃ প-
ঞ্চোপচারৈ র্বা পূজয়েৎ। ততঃ
পট্টসূত্রাদিকং দত্ত্বা অষ্টোত্তর শতং
জপ্ত্বা শক্তশ্চেৎ বলিং দদ্যাৎ। ত-
তো হষ্টোত্তরশত হোমং কৃত্বা প্র-
ত্যাহুতি সম্পাতং দদ্যাৎ। হোমা-
ভাবে দ্বিগুণ জপঃ কার্য্যঃ। ততো
দক্ষিণাং দত্ত্বা অচ্ছিদ্রাবধারণং কু-
র্য্যাৎ। ইতি তন্ত্রসারঃ॥ * ॥ * ॥
ঔষধ পাকার্থ যন্ত্রাণি যথা। ভাণ্ডে-
বিতস্তি গম্ভীরে মধ্যে নিহিত কূপি-
কে। কূপিকা কণ্ঠপর্য্যন্তং বালুকা-
ভিশ্চ পূরিতে॥ ভেষজং কূপিকা-
সংস্থং বহ্নিনা যত্র পচ্যতে। বালুকা
যন্ত্র মেতদ্ধি যন্ত্র তন্ত্র বুধৈঃ স্মৃতং॥
বালুকাযন্ত্রং॥ * ॥ নিবদ্ধ মৌষধং
সূতং ভূর্জ্জে তৎত্রিগুণাম্বরে। রসপো-
টলিকাং কাষ্ঠে দৃঢ়ং বধ্বা গুণেন হি॥
সন্ধান পূর্ণ কুম্ভান্তঃ অবলম্বন সং-
স্থিতং। অধস্তাজ্জ্বালয়েদগ্নিং তত্ত-
দুক্ত ক্রমেণ হি॥ দোলাযন্ত্র মিদং
প্রোক্তং স্বেদনাখ্যং তদেব হি। স-
ন্ধানং কাঞ্জিকাদি ইতি দোলাযন্ত্রং
॥*॥ সাম্বুস্থালী মুখে বদ্ধে বস্ত্রে স্বে-
দ্যং নিধায় চ। পিধায় পচ্যতে যত্র
তদ্যন্ত্রং স্বেদনং স্মৃতং॥ স্বেদনযন্ত্রং
॥*॥ অধঃস্থাল্যাং রসংক্ষিপ্ত্বা নিদ-
ধ্যাত্তন্মুখোপরি। স্থালী মূর্দ্ধমুখীং
সম্যক্ নিরুধ্য মৃদু মৃৎসয়া॥ ঊর্দ্ধ-
স্থাল্যাং জলং ক্ষিপ্ত্বা চুল্ল্যা মারোপ্য
যত্নতঃ। অধস্তাজ্জ্বালয়েদগ্নিং যাবৎ
প্রহর পঞ্চকং॥ স্বাঙ্গশীতং ততো
যন্ত্রাদগৃহ্ণীয়াদ্রস মুত্তমং॥ বিদ্যা-
ধরাভিধং যন্ত্র মেতত্তজ্জ্ঞৈ রুদা-

হৃতং ॥ বিদ্যাধরযন্ত্রং ॥ * ॥ বালুকাসু সমস্তাঙ্গং গর্ত্তে মূষারসান্বিতা। দীপ্তোপলৈঃ সংবৃণুযাদ্যন্ত্রং ভূধর নামকং ॥ ভূধরযন্ত্রং ॥ * ॥ যন্ত্রং ডমরু সংজ্ঞং স্যাত্তৎ স্থাল্যো মুদ্রিতে মুখে। ডমরুযন্ত্রং। ইতি ভাবপ্রকাশঃ ॥

যন্ত্রকং ক্লী যন্ত্রকাষ্ঠং। কঁদ ইতি ভাষা। যম্যতে কাষ্ঠমনেনেতি যম ধাতো স্ত্র প্রত্যযেন যন্ত্রং ততঃ স্বার্থে ক প্রত্যযেন নিষ্পন্নং ॥

যন্ত্রগৃহং ক্লী তৈলিশালা। ঘানিঘর ইতি ভাষা। ইতি হেমচন্দ্রঃ ॥

যন্ত্রগোলঃ পুং কলাযবিশেষঃ। মটর ইতি ভাষা। ইতি শব্দচন্দ্রিকা ॥

যন্ত্রণং ক্লী রক্ষণং ॥ বন্ধনং ॥ নিযমনং। ইতি মেদিনী ॥

যন্ত্রণা স্ত্রী পীড়া। যথা। মদনতাপভরেণ বিদীর্য্য না যদুদপাতি হৃদা দমনস্বসুঃ। নিবিড় পীন কুচদ্বয যন্ত্রণা তদপরাধমধাৎ প্রতিজর্ব্বতী। ইতি নৈষধে ৪ সর্গঃ ॥

যন্ত্রপেষণী স্ত্রী পেষণার্থযন্ত্রং। যাঁতা ইতি ভাষা। ইতি জটাধরঃ ॥

যন্ত্রিকা স্ত্রী পত্ন্যাঃকনিষ্ঠাভগিনী। যথা। কনিষ্ঠাশ্যালিকা হালী যন্ত্রিকা কেলিকুঞ্চিকা। ইতি হেমচন্দ্রঃ ॥

যন্ত্রিতঃ ত্রি বদ্ধঃ। ইতি ধরণিঃ ॥

যন্ত্রী পুং যন্ত্রবিশিষ্টঃ। যন্ত্রশব্দাদস্ত্যর্থে ইন্ প্রত্যযেন নিষ্পন্নঃ ॥

যভ ঔ মৈথুনে। ইতি কবিকল্পদ্রুমঃ ॥ ঔ অযাপ্সীৎ যভতি যুবা। ইতি দুর্গাদাসঃ ॥

যম ঔ উ বিরতৌ। ইতি কবিকল্পদ্রুমঃ ॥ ঔ যন্তা উ যমিত্বা যান্ত্বা। বিরতি র্নিবৃত্তিঃ। যছতি পাপাৎ সাধুঃ। ইতি দুর্গাদাসঃ ॥

যম ক মি পরিবেষণে ॥ তদভাবে। ইতি কবিকল্পদ্রুমঃ ॥ ক মি যমযতি যাময়তি পরিবেষণং অস্মাদে রর্পণং। বেষ্টন মিত্যেকে। বিষত্যব্যাপ্তাবিত্যস্য রূপ মিতি রমানাথঃ ॥ কেচিত্তু পরিবেষণ এবায়ং মানুবন্ধঃ। যমযত্যন্নং দ্বিজায গৃহী। অন্যত্র নিযামযতি সংযাময়তি ইত্যাহুঃ। অন্যে তু অপরিবেষণ এবাযং মানুবন্ধঃ। নিযমযতি বিমার্গ প্রস্থিতানান্ত দণ্ডং। ইতি শাঙ্গন্তলে। পরিবেষণে তু যাময়ত্যন্নং দ্বিজায গৃহী ইত্যাহুঃ। তেন উভযস্য প্রামাণিকত্বাদুভযত্র বিকল্প জ্ঞাপনার্থঞ্চানুবন্ধঃ কৃতঃ। ইতি দুর্গাদাসঃ ॥

যমঃ পুং দক্ষিণদিক্‌পালঃ। তৎপর্য্যায়ঃ। ধর্ম্মরাজঃ২ পিতৃপতিঃ৩ সমবর্ত্তী ৪ পরেতরাট্‌৫ কৃতান্তঃ৬ যমুনাভ্রাতা ৭ শমনঃ ৮ যমরাট্‌ ৯ কালঃ ১০ দণ্ডধরঃ ১১ শ্রাদ্ধদেবঃ ১২ বৈবস্বতঃ ১৩ অন্তকঃ ১৪। ইত্যমরঃ॥ ধর্ম্মঃ ১৫ ধর্ম্মরাট্‌ ১৬ জীবিতেশঃ ১৭ মহিষধ্বজঃ ১৮ ঔডম্বরঃ ১৯ দণ্ডধারঃ ২০ কীনাশঃ ২১ দধ্নঃ ২২ মহিষবাহনঃ ২৩ শীর্ণপাদঃ ২৪ ভীমশাসনঃ ২৫ কঙ্কঃ ২৬ হরিঃ ২৭। ইতি শব্দরত্নাবলী॥ কর্ম্মকরঃ ২৮। ইতি জটাধরঃ॥ * ॥ চতুর্দ্দশ যম তর্পণং যথা। যাং কাঞ্চিৎ সরিতং প্রাপ্য কৃষ্ণপক্ষে চতুর্দশীং। যমুনায়াং বিশেষেণ নিয়ত স্তর্প-য়েদ্যমান্‌॥ যমায় ধর্ম্মরাজায় মৃত্যবে চান্তকায় চ। বৈবস্বতায় কালায় সর্ব্বভূতক্ষয়ায় চ॥ ঔডম্বরায় দধ্নায় নীলায় পরমেষ্ঠিনে। বৃকোদরায় চিত্রায় চিত্রগুপ্তায় বৈ নমঃ॥ একৈকস্য তিলৈ র্মিশ্রাং স্ত্রীং স্ত্রীন্‌ দদ্যাৎ জলাঞ্জলীন্‌। সংবৎসর কৃতং পাপং তৎক্ষণাদেব নশ্যতি॥ ইতি তিথ্যাদিতত্ত্বধৃত ভবিষ্যপুরাণবচনং॥ * ॥ তস্যোৎপত্তি যথা। সংজ্ঞা চ রবিণা দৃষ্টা ন্যমীলয়ত লোচনে। যত স্ততঃ সরোষো ঽর্কঃ সংজ্ঞাং বচনমব্রবীৎ॥ ময়ি দৃষ্টে সদা যস্মাৎ কুরুষে নেত্র সংযমং। তস্মাজ্জনিষ্যসে মূঢে প্রজা সংযমনং যমং॥ মার্কণ্ডেয় উবাচ। তত স্তস্যাস্ত সংজজ্ঞে ভর্ত্তৃশাপেন তেন বৈ। যমশ্চ যমুনা চেয়ং প্রখ্যাতা সুমহানদী॥ ইতি মার্কণ্ডেয় পুরাণে বৈবস্বত মন্বন্তরাধ্যায়ঃ॥ * ॥ পুণ্যাত্মনাং সম্বন্ধে তস্যরূপং যথা। তানাগতাং স্ততো দৃষ্ট্বা নরান্‌ ধর্ম্মপরায়ণান্‌। ভাস্করিঃ প্রীতিমাসাদ্য স্বয়ং নারায়ণো ভবেৎ॥ চতুর্ব্বাহুঃ শ্যামবর্ণঃ প্রফুল্লকমলেক্ষণঃ। শঙ্খ চক্র গদা পদ্ম ধারী গরুড়বাহনঃ॥ স্বর্ণযজ্ঞোপবীতী চ স্মের চারু তরাননঃ। কিরিটী কুণ্ডলী চৈব বনমালাবিভূষিতঃ॥ * ॥ পাপিনাং সম্বন্ধে তস্য রূপং যথা। ত্রিংশদ্যোজন দীর্ঘাঙ্গো বাপী সদৃশলোচনঃ। ধূম্রবর্ণো মহাতেজাঃ প্রলয়াম্ভোধরধ্বনিঃ॥ তৃণাধিরাজ লোমা চ জ্বলদগ্নি শিখাগুরৎ। নাসা রন্ধ্র স্ফুরৎশ্বাস স্বনৈ র্জ্জিত মহানিলঃ॥ সুদীর্ঘ দশনশ্রেণিঃ সূর্পোপম নখাবলিঃ। প্রচণ্ড মহিষারূঢঃ সংদষ্টদশনচ্ছদঃ॥ দণ্ডহস্ত শ্চর্ম্মবাসা ভ্রুকুটীকুটিলান-

নঃ॥ ইতিপাদ্মে ক্রিযাযোগসারে২২ অধ্যাযঃ॥*॥ অস্যানধিকারো যথা। প্রোবাচ ধর্ম্মং যদহং ব্রবীমি কার্য্যং ত্বযা তৎ খলু ধর্ম্মরাজ। বুদ্ধোবাচ। যে ভক্তাঃ পুণ্ডরীকাক্ষে কর্ম্মণা মনসা গিরা। স্বকর্ম্ম নিরতা দান্তা ন নিযম্যাহি তে ত্বযা॥ কৃষ্ণঃ সংপূজিতো যৈস্তু যৈঃ কৃষ্ণঃ সমুপাসিতঃ। যৈশ্চ নিত্যং স্মৃতঃ কৃষ্ণো ন তে ত্বদ্বিষযোপগাঃ॥ নমঃ কৃষ্ণাচ্যুতানন্ত বাসুদেবেত্যদীরিতং। যৈ র্ভাব ভাবিতো ধর্ম্ম ন তে ত্বদ্বিষযোপগাঃ॥ দানং দদদ্ভির্যৈ কৃষ্ণ মচ্যুতঃ প্রীযতা মিতি। শ্রদ্ধা পুরঃসরৈ র্ধর্ম্ম ন তে ত্বদ্বিষযোপগাঃ॥ উত্তিষ্ঠদ্ভিঃ স্বপদ্ভিশ্চ ব্রজদ্ভিশ্চ জনার্দনঃ। যৈ স্মৃতস্তু সদা ধর্ম্ম ন তে ত্বদ্বিষযোপগাঃ॥ সর্ব্ববাধাসু যে কৃষ্ণং সংস্মরন্ত্যুচরন্তি চ। তদ্ভাব ভাবিনো যে চ ন তে ত্বদ্বিষযোপগাঃ॥ সএব ধাতা সর্ব্বস্য তন্নিযোগকরা বযং। যম সংযমনে ত্যক্তঃ সো হস্মাৎ সংযমকো হরিঃ॥ ইতি বহ্নিপুরাণে নারসিংহপ্রাদুর্ভাবাধ্যাযঃ॥ * ॥ অপিচ। ব্রাহ্মণ উবাচ। যৎকৃত্বা সুমহৎপুণ্যং ধর্ম্মাধর্ম্ম বিনির্ণযে। প্রমাণং ত্বং হি লোকানাং ফলং মে ব্রূহি তন্মম॥ যম উবাচ। যমো যম ইতি প্রত্যুথং হৃৎস্থিরজতে জনঃ। আত্মা চ সংযমিতো যেন ন তস্যেযম্ যমঃ স্মৃতঃ॥ আনৃশংস্যং ক্ষমা সত্যং অহিংসা দম আর্জ্জবং। ধ্যানং প্রসাদো মাধুর্য্যং সন্তোষশ্চ যমা দশ॥ যমৈশ্চ নিযমৈশ্চৈব যঃ করোত্যাত্ম সংযমং। সংচাদৃষ্টা তস্মাংযাতি পরং ব্রহ্ম সনাতনং॥ ইতি তত্রৈব যম শর্ম্মিষোপাখ্যানং॥ * ॥ সাবিত্রী কৃতং যমাষ্টকং স্তোত্রং যথা। সাবিত্র্যবাচ। তপসা ধর্ম্ম মারাধ্য পুষ্করে ভাস্করঃ পুরা। ধর্ম্মাংশং যং সুতং প্রাপ ধর্ম্ম রাজং নমাম্যহং॥ ১॥ সমতা সর্ব্ব ভূতেষু যস্য সর্ব্বস্য সাক্ষিণঃ। অতো যন্নাম শমন মিতি তং প্রণমাম্যহং॥ ২॥ যেনান্তশ্চ কৃতো বিশ্বে সর্ব্বেষাং জীবিনাং পরং। কর্ম্মানুরূপ কালেচ তং কৃতান্তং নমাম্যহং॥ ৩॥ বিভর্ত্তি দণ্ডং দণ্ডায পাপিনাং শুদ্ধি হেতবে। নমামি তং দণ্ডধরং যঃ শাস্তা সর্ব্বদেহিনাং॥ ৪॥ বিশ্বেচ কলযত্যেব যঃ সর্ব্বাযুশ্চ সন্ততং। অতীব দুর্নিবার্য্যঞ্চ তং কালং প্রণমাম্যহং॥ ৫॥ তপস্বী বৈষ্ণবো ধর্ম্মী সংযমী বিজিতেন্দ্রিযঃ। জীবিনাং কর্ম্মফলদস্তং যমং প্রণমাম্যহং॥ ৬॥ স্বাত্মা

ন্নানশ্চ সর্ব্বজ্ঞো মিত্রঃ পুণ্যকৃতাং ভজে। পাপিনাং ক্লেশদো য স্তং পুণ্যং মিত্রং নমাম্যহং ॥ ৭॥ যজ্জন্ম ব্রহ্মণো বংশে জ্বলন্তং ব্রহ্মতেজসা। যো ধ্যায়তি পরং ব্রহ্ম ব্রহ্মবংশং নমাম্যহং ॥ ৮ ॥ ইত্যুক্ত্বা সা চ সাবিত্রী প্রণনাম যমং মুনে। যম স্তাং বিষ্ণু ভজনং কর্ম্মপাক মুবাচ হ ॥ ইদং যমাষ্টকং নিত্যং প্রাত রুত্থায যঃ পঠেৎ। যমাত্তস্য ভয়ং নাস্তি সর্ব্বপাপাৎ প্রমুচ্যতে ॥ মহাপাপী যদি পঠেৎ নিত্যং ভক্ত্যা চ নারদ। যমঃ করোতি তং শুদ্ধং কায়ব্যূহেন নিশ্চিতং ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৬ অধ্যায়ঃ ॥ * ॥ পারিভাষিক যম দন্তা যথা। কার্ত্তিকস্য দিনান্যষ্টৌ যষ্টাবগ্রহায়ণস্য চ। যমস্য দশমা এতে লঘ্বাহারী স জীবতি॥ ইতিবৈদ্যকং ॥ * ॥ * ॥ শরীর সাধনাপেক্ষ নিত্যকর্ম্ম। ইত্যমরঃ। উপায়ান্তর নিরপেক্ষং শরীর মাত্র সাধ্যং নিত্যং যাবজ্জীব মবশ্য কার্য্যং যৎ কর্ম্ম সত্যাস্তেয়াদি তদ্যমঃ। যমেরলং। অহিংসা সত্য বচনং ব্রহ্মচর্য্য মকল্কতা। অস্তেয মিতি পঞ্চৈতে যমা শ্চৈব ব্রতানি চ ॥ ইতি মনুঃ। ইতি ভট্টীকায়াং ভরতঃ ॥ স চ অষ্টাঙ্গযোগান্তর্গতাঙ্গবিশেষঃ। সতু দশবিধো যথা। ব্রহ্মচর্য্যং দয়া ক্ষান্তি র্ধ্যানং সত্য মকল্কতা। অহিংসা হস্তেয মাধুর্য্যং দম শ্চেতে যমাঃ স্মৃতাঃ ॥ ইতি গারুড়ে ১০৫ অধ্যায়ঃ ॥ * ॥ স চ পঞ্চবিধো যথা। অহিংসা সত্য মস্তেযং ব্রহ্মচর্য্যাপরিগ্রহৌ। যমাঃ পঞ্চাথ নিযমাঃ শৌচং দ্বিবিধ মীরিতং ॥ ইতি তত্রৈব ২৩০ অধ্যায়ঃ ॥ * ॥ সংযমঃ। যথা। বিযামো বিযমো যামো যমঃ সংযাম সংযমৌ। ইতি চামরঃ ॥ কাকঃ ॥ শনিঃ। ইতি মেদিনী ॥

যমঃ ত্রি যমজঃ। ইতি মেদিনী ॥ তযো র্জ্যৈষ্ঠত্ব নিরূপণং যথা। বহির্গর্ভেষু চারিত্রাদ্যমযোঃ পূর্ব্বজন্মতঃ। যস্য জাতস্য যমযোঃ পশ্যন্তি প্রথমং মুখং ॥ সন্তানঃ পিতর শ্চৈব তস্মিন্ জ্যৈষ্ঠং প্রতিষ্ঠিতং। জন্ম প্রাথম্যাৎ জ্যৈষ্ঠং যমযোঃ নতু নিষেক প্রাথম্যাৎ জন্ম প্রাথম্য সন্দেহে মুখদর্শন প্রাথম্যাৎ। ইতি উদ্বাহতত্ত্বং ॥

যমকং ক্লী শব্দালঙ্কারঃ। তস্য লক্ষণাদি যথা। সত্যর্থে পৃথগর্থায়াঃ স্বর ব্যঞ্জন সংহতেঃ। ক্রমেণ তে নৈবাবৃত্তি র্যমকং বিনিগদ্যতে ॥

অত্র দ্বয়ো রপি পদয়োঃ ক্বচিৎ সার্থকত্বং ক্বচিন্নিরর্থকত্বং ক্বচিদেকস্য সার্থকত্ব মপরস্য নিরর্থকত্ব মত উক্তং সত্যর্থ ইতি। তেনৈব ক্রমেণেতি দমো মোদ ইত্যাদে র্বিভক্ত বিষয়ত্বং সূচিতং। এতচ্চ পদ পাদার্দ্ধ শ্লোকাবৃত্তিত্বেন পাদাদ্যাবৃত্তেশ্চানেক বিষয়তয়া প্রভূততম ভেদ দিঙ্মাত্র মুদাহ্রিয়তে। নবপলাশ পলাশবনং পুরঃ স্ফুট পরাগ পরাগত পঙ্কজং। মৃদু লতান্ত লতান্ত মলোকযন্ সসুরভিং সুরভিং সুমনোভরৈঃ ॥ অত্র পদাবৃত্তিঃ পলাশ পলাশেতি সুরভিং সুরভি মিত্যত্রচ দ্বয়োঃ সার্থকত্বং লতান্ত লতান্তেত্যত্র প্রথমস্য নিরর্থকত্বং পরাগ পরাগেত্যত্র দ্বিতীয়স্য এব মন্যত্রাপ্যুদাহার্য্যং। যমকাদৌ ভবেদৈক্যং ডলো র্ববো লরো স্তথা। ইত্যুক্ত নয়াৎ ভুজলতাং জড়তা মবলা জন ইত্যত্র ন যমকত্ব হানিঃ। ইতি সাহিত্যদর্পণে দশমঃ পরিচ্ছেদঃ। * ॥ যমজে ত্রি। ইতি মেদিনী ॥

যমকঃ পুং সংযমঃ। ইতি মেদিনী ॥

যমকালিন্দী স্ত্রী সংজ্ঞা। সা চ সূর্য্যপত্নী। ইতি শব্দরত্নাবলী ॥

যমকীটঃ পুং ঘুর্ঘুরনামাকীটঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

যমকোটিঃ স্ত্রী লঙ্কায়াঃ পূর্ব্বং পৃথিব্যাশ্চতুর্থভাগে দেশবিশেষঃ। যথা। লঙ্কা কুমধ্যে যমকোটি রস্যাঃ প্রাক্ পশ্চিমে রোমকপত্তনঞ্চ। অধ স্ততঃ সিদ্ধপুরং সুমেরুঃ সৌম্যেহথ যাম্যে বড়বানলশ্চ ॥ কুবৃত্ত পাদান্তরিতানি তানি স্থানানি ষড়্গোলবিদো বদন্তি ॥ ইতি সিদ্ধান্তশিরোমণিঃ ॥

যমঘণ্টঃ পুং যোগবিশেষঃ। যথা। দ্বে মঘা পূর্ব্বফল্গুন্যৌ পুষ্যাশ্লেষা চ চন্দ্রয়োঃ। জ্যেষ্ঠানুরাধা ভরণী চাশ্বিনী কুজবাসরে ॥ হস্তাদ্রা চন্দ্রজে মূলা পূর্ব্বাষাঢ়া চ রেবতী। জীবে হ্যুত্তরভাদ্রশ্চ শুক্রাহে স্বাতিরোহিণী॥ শনিবারে শতভিষা শ্রবণা যমঘণ্টকঃ। ইতি সারসংগ্রহঃ ॥ অপিচ। ঘণ্টো হথগুর্ব্বযুক্তে স্বগৃহপতিদিনে সৌম্যবারে র্য্যমাপি। অস্য বর্জ্জ্যকাল নির্ণয়ো যথা। যমঘণ্টে ত্যজেদষ্টৌ মৃত্যৌ দ্বাদশ নাড়িকাঃ। অন্যেষাং পাপযোগানাং মধ্যাহ্নাৎ পরতঃ শুভং ॥ অস্য দোষা যথা। এতি জাতো ন জীবেত যদি শক্র সমো ভবেৎ।

বিবাহে বিধবা নারী যাত্রায়াং ম-রণং ভবেৎ ॥ নিষ্ফলং কৃষিবাণিজ্যং বিদ্যারম্ভে চ মূর্খতা। গৃহপ্রবেশে ভঙ্গঃ স্যাচ্চূড়ায়াং মরণং ধ্রুবং ॥ ঋণদানে ফলং নাস্তি ব্রতদানে চ নিষ্ফলে। শুভকর্ম্মাণি সর্ব্বাণি নৈব কুর্য্যাদ্বিচক্ষণঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ রবিবারে ১০।১১। সোমবারে ৮।৯। মঙ্গলবারে ১৭। ১৮।১।২। বুধবারে ১৩।৬। বৃহস্পতিবারে ১৯।২০।২৬।২৭। শুক্রবারে ১৫।৪। শনিবারে।২৪। ২২। ইতি যমঘণ্টযোগঃ ॥

যমজঃ ত্রি একৈকালীনৈকগর্ব্ভজাত-সন্তানদ্বয়ং। যথা। যমো হন্যলিঙ্গো যমজে না কাকে শমনে শনৌ। ইতি মেদিনী ॥ অস্য জ্যেষ্ঠত্বং যম শব্দে দ্রষ্টব্যং ॥

যমদগ্নিঃ পুং জমদগ্নিমুনিঃ। সতু পরশুরামপিতা। ইতি ভরত দ্বিরূপ কোষঃ ॥

যমদূতঃ পুং যমস্যচরঃ। যথা। ধর্ম্মরাজ উবাচ। কে যূয়ং বিকৃতাকারাঃ পাশ মুদ্গর পাণয়ঃ। দংষ্ট্রা করাল বদনা অঙ্গার সদৃশ প্রভাঃ ॥ যূয়ং সর্ব্বে মহাবীরাঃ জ্বলৎপাবক লোচনাঃ। কৃতা তথাপি যুষ্মাক মিয়ং কেন সুদুর্গতিঃ ॥ যমদূতা ঊচুঃ। যমদূতা বয়ং সর্ব্বে যমাজ্ঞা কারিণঃ সদা। ত্বদ্দত্তো হয়ং দ্বিজাস্মাকং সুমহান্ কশ্মলোদয়ঃ ॥ ইতি পদ্মপুরাণে ক্রিয়াযোগসারে ৬ অধ্যায়ঃ ॥

যমদূতকঃ পুং কাকঃ। ইতি শব্দরত্নাবলী ॥ যমদূতশ্চ ॥

যমদূতিকা স্ত্রী তিন্তিড়ীবৃক্ষঃ। ইত্যমরঃ ॥

যমদেবতা স্ত্রী ভরণীনক্ষত্রং। ইতি হেমচন্দ্রঃ ॥

যমদ্রুমঃ পুং শাল্মলিবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

যমদ্বিতীয়া স্ত্রী কার্ত্তিকশুক্লদ্বিতীয়া। ভ্রাতৃদ্বিতীয়া ইতি খ্যাতা। তৎকৃত্যং যথা। লিঙ্গপুরাণে। কার্ত্তিকে তু দ্বিতীয়ায়াং শুক্লায়াং ভ্রাতৃপূজনং। যা ন কুর্য্যাদ্বিনশ্যন্তি ভ্রাতরঃ সপ্তজন্মনি ॥ তস্যা ইতি শেষঃ ॥ মহাভারতে। কার্ত্তিকে শুক্লপক্ষস্য দ্বিতীয়ায়াং যুধিষ্ঠির। যমো যমুনয়া পূর্ব্বং ভোজিতঃ স্বগৃহে স্বয়ং ॥ তস্মান্নিজ গৃহে পার্থ ন ভোক্তব্যমতো বুধৈঃ। যত্নেন ভগিনী হস্তাদ্ভোক্তব্যং পুষ্টি বর্দ্ধনং ॥ দানানি চ প্রদেয়ানি ভগিনীভ্যো বিশেষ-

তঃ। তথা যমঞ্চ চিত্রগুপ্তঞ্চ যমদূতাংশ্চ পূজয়েৎ॥ অর্ঘ্যশ্চাত্র প্রদাতব্যো যমায় সহজদ্বয়ৈঃ। সহজদ্বয়ৈ ভগিনী ভ্রাতৃভিঃ॥ অর্ঘ্য মন্ত্রঃ। এহ্যেহি মার্ত্তণ্ডজ পাশহস্ত যমান্তকা লোক ধরামরেশ। ভ্রাতৃ দ্বিতীয়া কৃত দেবপূজাং গৃহাণ চার্ঘ্যং ভগবন্নমস্তে॥ ধর্ম্মরাজ নম স্তুভ্যং নমস্তে যমনাগ্রজ। পাহি মাং কিঙ্করৈঃ সার্দ্ধং সূর্য্যপুত্র নমো হস্ত তে॥ যমনাঞ্চ সংপূজ্য নমস্কুর্য্যাৎ। যমস্বসর্নমস্তে হস্ত যমুনে লোক পূজিতে। বরদা ভব মে নিত্যং সূর্য্যপুত্রি নমো হস্ত তে॥ অন্যং চ স্তুত্বা পঠেৎ। ভ্রাতস্তবানুজাতাহং ভুঙ্ক্ষ ভক্ত মিদং শুভং। প্রীতয়ে যমরাজস্য যমুনায়া বিশেষতঃ॥ জ্যেষ্ঠা চেত্তদা গুজা ভাহ মিতি বদেৎ। অত্র ভোক্তব্যং পুষ্টিবর্দ্ধন মিতি বিধি সমভিব্যাহৃত ফল শ্রুত্যা ভোজন নিয়মস্য প্রাধান্যাত্তস্য মুখ্যকালো হষ্টধা বিভক্ত দিন পঞ্চমাংশো গ্রাহ্যঃ। যথা দক্ষঃ। পঞ্চমে চ তথা ভাগে সম্বিভাগো যথা হর্তঃ। পিতৃদেব মনুষ্যাণাং কীটানাঞ্চোপদিশ্যতে॥ সম্বিভাগং ততঃ কৃত্বা গৃহস্থঃ শেষ ভুগ্‌ভবেৎ। ইতিহাস পুরাণাদ্যৈঃ ষষ্ঠঞ্চ সপ্তমং নয়েৎ॥ সম্বিভাগো বিভজ্যান্নস্য প্রতিপাদনং। দেবো হত্র বৈশ্বদেব সম্বন্ধী। পঞ্চমাংশাদাভে তু। ন ভুঞ্জীতোদ্ধৃত স্নেহং নাতি সৌহিত্য মাচরেৎ। নাতি প্রগে নাতি সায়ং নাতি সন্ধ্যা সমীপতঃ॥ ইতি মনূক্ত পর্য্যুদস্ত সূর্য্যোদয়াস্তেতর কালোপি গ্রাহ্যঃ। সৌহিত্যং তৃপ্তিঃ অত্র ভোজনস্য রাগ প্রাপ্তত্বেপি তৎকালস্য। মুনিভি র্দ্বিরশনং প্রোক্তং বিপ্রাণাং মর্ত্য বাসিনাং নিত্যং। অহনি চ তথা তমস্বিন্যাং সার্দ্ধ প্রহর যামান্তঃ॥ ইতি কাত্যায়নীয়েন নিয়মিতত্বাদ্ভোজন কালস্য বৈধত্বেন শাস্ত্রীয়ত্বাৎ ন সামান্য শাস্ত্রপ্রাপ্ত্যপজীবি পর্য্যুদাসাসঙ্গতিঃ॥ অত্রানধ্যয়নং ভ্রাতানাং। প্রেতপক্ষোত্তর দ্বিতীয়ায়াং তন্নিষেধাৎ। তথাচ রাজমার্ত্তণ্ডঃ। প্রেক্ষৈ চৈ চা দ্বিতীয়া স্যাঃ প্রেতপক্ষে গতে তু যা। যাতু কোজাগরে যাতে চৈত্র্যাবল্যাঃ পরে হপি চ॥ চাতুর্মাস্যে সমাপ্তে চ দ্বিতীয়া যা ভবেত্তিথিঃ। পরাস্বেতা স্বনধ্যায়ঃ পুরাণৈঃ পরিকীর্ত্তিতঃ॥ জ্যোতিষে। তথা যম-দ্বিতীয়ায়াং যাত্রায়াং মরণং ভবেৎ। ইতি তিথ্যাদিতত্ত্বং॥ * ॥ অন্যাং

ব্রত বিধানং যথা। নারদউবাচ। ভগবন্ প্রষ্টু মিচ্ছামি ত্বামহং বিনয়ান্বিতঃ। তদ্ব্রতং ব্রূহি মে স্বামিন্ মৃত্যুং যেন ন পশ্যতি॥ অল্পদোষং মহৎ পুণ্যং শোভনং ব্রত মুত্তমং। প্রসাদং কুরু মে স্বামিন্ যথাহং তৎ করোমি ভোঃ॥ ব্রহ্মোবাচ। যদি চেচ্ছসি বিপ্রেন্দ্র ব্রতানাং ব্রত মুত্তমং। ব্রতং যমদ্বিতীয়াখ্যং শৃণু ত্বং মৃত্যুবারণং॥ কার্ত্তিকে মাসি শুক্লায়াং দ্বিতীয়ায়াং মুনীশ্বর। কর্ত্তব্যং তদ্বিধানেন হ্যপমৃত্যু নিবারণং॥ ব্রাহ্ম্যে মুহূর্ত্তে চোত্থায় চিন্তযেদাত্মনোহিতং। প্রাতঃ কৃত্বা দ্বিজঃ স্নানং দন্তধাবন পূর্ব্বকং॥ ততঃ শুক্লাম্বর ধরঃ শুক্লমাল্যানুলেপনঃ। কৃত নিত্যক্রিযো হৃষ্টঃ কুণ্ডলাঙ্গদ ভূষিতঃ॥ বিধিং বিষ্ণুঞ্চ রুদ্রঞ্চ সংস্থাপ্যৌড়ম্বরে শুভে। পদ্মং সপ্তদলং কৃত্বা পূজযেৎ সুস্থ মানসঃ॥ চন্দনাগুরু কর্পূর কুঙ্কুমৈ র্দ্বিজ সত্তম। পুষ্পৈ র্ধূপৈশ্চ নৈবেদ্যৈ র্নারিকেলাদিভিঃ ফলৈঃ॥ সরস্বতীঞ্চ বরদাং বীণা পুস্তক ধারিণীং। ধ্যাযেৎ শুক্লাম্বর ধরাং হংসবাহন সংস্থিতাং॥ ততো মৃত্যু বিনাশার্থং সালঙ্কারাং পযস্বিনীং। বিপ্রায বেদবিদুষে গাঞ্চ দদ্যাৎ সবৎসকাং।

অপমৃত্যুবিনাশায সংসারার্ণবতারিকাং। বিপ্র তুভ্য মিমাং রৌদ্রীং ধেনুং সম্প্রদদে হ্যহং॥ ইতি বাক্য বিচারেণ ধেনুং দদ্যাদ্দ্বিজাতযে। কুলীনায সুশান্তায রোগহীন দ্বিজায বৈ॥ তদভাবে চোদকুম্ভং সবস্ত্রং সহিরণ্যকং। ঔডুম্বর বিধানেন সম্প্রদদ্যাদ্দ্বিজাতযে॥ তস্যাপ্যলাভে বিপ্রেন্দ্র বিপ্রায সদুপানহৌ। দদ্যাৎ কার্ত্তিক শুক্লাযাং দ্বিতীযাযাং বিশেষতঃ॥ জ্ঞাতি শ্রেষ্ঠান্ তথা বৃদ্ধান্ সংপূজ্য চাভিবাদযেৎ। নারিকেলাদি দানেন তোষযেৎ স্বজনানপি॥ ততঃ সোদরসম্পন্না ভগিনী যা ভবন্মুনে। তস্যা গৃহং সমাগত্য শ্রদ্ধযানোভি রাজযেৎ॥ ভদ্রে ভগিনি শুভগে ত্বদঙ্ঘ্রি সরসীরুহে। শ্রেযসে হদ্য নমস্কর্ত্তু মাগতোহং তবালযং॥ ইতি শ্রুত্বা ভগিন্যাদিঃ সোদরং বিনযান্বিতং। মৃদ্বাক্যৈ স্তত স্তস্য পূজনং ক্রিযতে মহৎ॥ অদ্য ভ্রাতৃমতী ভ্রাত স্ত্বং নো বযসি বান্ধবঃ। ভোক্তব্যং ভোদ্য মদ্গেহে ত্বাযুষে কুলদীপক॥ কার্ত্তিকে শুক্লপক্ষস্য দ্বিতীযাযাং সহোদরঃ। যমো যমুনযা পূর্ব্বং ভোজিতঃ স্বগৃহেঽর্চ্চিতঃ॥ অস্মিন্ দিনে যমেনাপি পূজিতা ভ-

গিনী শুভা। স্বস্নরো বেশ্মনি যো ন ভুংক্তে যমদ্বিতীয়া দিনমেব লব্ধা ॥ তং পাপিনং সর্ব্বসুরাঃ প্রবধ্য সংসারমার্গে রটয়ন্তি বিপ্র ॥ তস্মাদ্ভ্রাত্রা স্বসৃগৃহে ভোক্তব্যং মাসি কার্ত্তিকে। শুক্লায়াঞ্চ দ্বিতীয়ায়াং সর্ব্বৈর্ঘর্য্যায ভো দ্বিজঃ ॥ বর্ষে বর্ষে চ কর্ত্তব্যং যশসে আযুষে শ্রিযে। ততঃ সম্প্রাপ্য সুমতে ভগিন্যৈ সুবিধানতঃ ॥ স্বর্ণালঙ্কার বস্ত্রাদি দান সৎকার মাদরাৎ। প্রদদ্যাত্মনি শার্দূল প্রশ্রযাবনতঃ সুধীঃ। স আশিষং প্রগৃহ্যাস্যা নমস্কৃত্য গৃহমাগমেৎ। সর্ব্বা ভগিন্যঃ সন্তোষ্য জ্যেষ্ঠানুক্রমশ স্তদা ॥ বস্ত্রাম প্রদান সৎকারৈ র্ভোজনৈঃ পুষ্টিবর্দ্ধনৈঃ। কর্ত্তোত্যেবং নরো বিধ্বাম যাতি যম যাতনাং ॥ অপমৃত্যু নচাপ্নোতি সত্যং সত্যংহি নান্যথা। যে র্ভগিন্যঃ সুবাসিন্যো বস্ত্রালঙ্কার তোষিতাঃ ॥ ন তেষাং বৎসরং যাবৎ কলহো ন রিপো র্ভযং। ব্রতস্যাস্য প্রসাদেন ভূতাঃ প্রেতাশ্চ রাক্ষসাঃ ॥ দূরাদেব পলাযন্তে ধর্ম্মরাজেন তাড়িতাঃ। যো দেবো মহিষারূঢো দণ্ড মুদ্গর ধারকঃ ॥ বেষ্টিতঃ কিঙ্করৈ র্দুষ্টৈ স্তস্মৈ কালাত্মনে নমঃ। ইত্থং ত্বং দ্বিজ শার্দূল জরুষ্ব তদ্ব্রতং শুভং ॥ মৃত্যুং যমদ্বিতীয়াখ্যং অপমৃত্যু নিবারণং। ব্রতস্যাস্য প্রভাবেন পুত্রপৌত্র সমন্বিতঃ ॥ সত্যং বদামি তে বিপ্র গৃহস্থঃ স্যাৎ সদৈব হি। গার্হস্থ্যেন সমো ধর্ম্মো ন ভূতো ন ভবিষ্যতি ॥ সন্দেহোত্র ন কর্ত্তব্য ইহলোকে পরত্র চ। যে বৈ যমদ্বিতীযাখ্যং ব্রতং স্বর্ব্বন্তি মানবাঃ ॥ সপ্তজন্ম কৃতং পাপং তৎক্ষণা দেব নশ্যতি। অপুত্রো লভতে পুত্রং ধনহীনো লভেদ্ধনং ॥ ভার্য্যাহীনো লভেদ্ভার্য্যাং সুরূপাং জলসন্নিভাং। যস্যাং তিথৌ যমুনয়া যমরাজ দেবঃ সংভোজিতঃ সকল লোক নিপাত দক্ষঃ ॥ তস্যাং ভুনক্তি সুতিথৌ চ গৃহে ভগিন্যাঃ প্রাপ্নোতি বিত্ত মতুলং স চিরাযুরেব। ইতি পাদ্মে উত্তরখণ্ডে ১২৫ অধ্যায়ঃ ॥

**যমধারঃ** পুং পার্শ্বদ্বযধারযুক্তাস্ত্রবিশেষঃ। কিরীচ কাটার ইত্যাদি ভাষা।

**যমনং** ক্লী বন্ধনং ॥ উপরতিঃ। ইতি মেদিনী ॥

**যমনঃ** পুং যমঃ। ইতি মেদিনী ॥

**যমনিকা** স্ত্রী যবনিকা। কানাৎ ইতি ভাষা। ইত্যমরটীকাযাং

রামাশ্রমঃ ॥
যমপত্নী স্ত্রী যমস্যভার্য্যা। তৎপর্য্যায়ঃ। ধূম্রোর্ণা-২ বিজয়া ৩। ইতি জটাধরঃ ॥
যমপ্রিয়ঃ পুং বটবৃক্ষঃ। ইতি শব্দরত্নাবলী ॥
যমভগিনী স্ত্রী যমুনা। ইতি হেমচন্দ্রঃ ॥
যমরাজঃ পুং যমঃ। ইতি হেমচন্দ্রঃ॥ অস্য পর্য্যাদি যথা। পুরী সংযমনী তস্য চিত্রগুপ্তস্তু লেখকঃ। ভৃত্যৌ চণ্ড মহাচণ্ডৌ ধূমোর্ণা বিজয়ে প্রিয়ে ॥ বিচার ভূমিরস্য নীতিঃ সহায়াঃ কালপুরুষাঃ। ইতি জটাধরঃ ॥*॥ সচ বিমাত্রা ছায়যা শপ্তঃ তচ্ছাপান্তং যথা। স্বরূপধারিণীং চেমা মানিনায নিজাশ্রমং ॥ সংজ্ঞাং ভার্য্যাং প্রীতিমতীং ভাস্করো বারিতস্করঃ। ততঃ পূর্ব্বসুতো যো হস্যাঃ সো ভূদ্বৈবস্বতো মনুঃ॥ দ্বিতীযস্তু যমঃ শাপাদ্ধর্ম্ম দৃষ্টি রভূৎ সুতঃ। ক্রিময়ো মাংস মাদায পাদতস্তে মহীতলং॥ পতিষ্যন্তীতি শাপান্তং তস্য চক্রে পিতা স্বযং। ধর্ম্মদৃষ্টি র্যত শ্চাসৌ সমো মিত্রে তথাহিতে ॥ ততো নিযোগং তং যাম্যে চক্রার তিমিরাপহঃ। যমুনা চ নদী জজ্ঞে কলিন্দান্তর বাহিনী ॥ ইতি মার্কণ্ডেযপুরাণে বৈবস্বত মন্বন্তরে ॥
যমরাট্ পুং যমঃ। ইত্যমরঃ ॥
যমলং স্ত্রী যুগ্মং। ইতি হেমচন্দ্রঃ ॥
যমলপত্রকঃ পুং অশ্মন্তকবৃক্ষঃ ॥ কোবিদারবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ
যমলার্জ্জুনহা পুং শ্রীকৃষ্ণঃ। ইতি হেমচন্দ্রঃ ॥
যমলার্জ্জুনৌ পুং গোকুলস্থার্জ্জুনবৃক্ষদ্বযং। তৌ কুবেরপুত্রৌ নলকূবর মণিগ্রীবৌ। নারদ শাপাৎ বৃক্ষতাং গতৌ। শ্রীকৃষ্ণেন উদ্ধারিতৌ। যথা। যদিমৌ লোকপালস্য পুত্রৌ ভূত্বা তমঃ প্লুতৌ। ন বিবাসস মাত্মানং বিজানীতঃ সুদুর্ম্মদৌ ॥ অতো হর্হতঃ স্থাবরতাং স্যাতাং নৈবং যথা পুনঃ। স্মৃতিঃ স্যাম্মৎ প্রসাদেন তত্রাপি মদনুগ্রহাৎ ॥ বাসুদেবস্য সান্নিধ্যং লব্ধা দিব্য শরচ্ছতে। বৃত্তে স্বর্লোকিতাং ভূযো লব্ধ ভক্তী ভবিষ্যতঃ ॥ শ্রীশুক উবাচ। সএব মুক্ত্বা দেবর্ষি র্গতো নারাযণাশ্রমং। নলকূবর মণিগ্রীবাবাসতু র্যমলার্জ্জুনৌ ॥ ঋষে র্ভাগবত মুখ্যস্য সত্যং কর্ত্তুং বচো হরিঃ। জগাম শনকৈ স্তত্র যত্র স্তো

যমলাজ্জুনৌ। দেবর্ষি র্মে প্রিয়তমো যদিমৌ ধনদাত্মজৌ। তত্তথা সাধয়িষ্যামি যদ্গীতং তন্মহাত্মনা॥ ইত্যন্তরেণাজ্জুনযোঃ কৃষ্ণস্তু যমযো র্যযৌ। আত্ম নির্বেশ মাত্রেণ তীর্য্যগ্‌ গত মূদুখলং॥ বালেন নিষ্কর্ষতান্বগুদুখলং তৎ দামোদরেণ তর্বোৎকলিতাঙঘ্রিবন্ধৌ। নিষ্পেতত্‌ঃ পরম বিক্রমিতাতিবেপ স্কন্ধ প্রবাল বিটপৌ কৃত চণ্ডশব্দৌ॥ তত্র শ্রিয়া পরময়া কভভ স্ফুরন্তৌ সিদ্ধাবুপেত্য কুজযোরিব জাতবেদাঃ। কৃষ্ণং প্রণম্য শিরসা খিল লোকনাথং বদ্ধাঞ্জলী বিরজসা বিদমূচতুঃস্ম॥ বাণী গুণানুকথনে শ্রবণৌ কথায়াং হস্তৌ চ কর্মসু মনঃ স্তব পাদয়ো র্নঃ। স্মৃত্যাং শিরস্তব নিবাস জগৎ প্রণামে দৃষ্টিঃ সতাং দর্শনেহস্ত ভবত্তনূনাং॥ শ্রীভগবানুবাচ। তদ্গচ্ছতং মৎপরমৌ নলকুবর সাদনং। সংজাতো ময়ি ভাবো বা মীপ্সিতঃ পরমো২ভবঃ॥ শ্রীশুকউবাচ। ইত্যুক্তৌ তং পরিক্রম্য প্রণম্য চ পুনঃ পুনঃ। বদ্ধোলূখল মামন্ত্র্য জগ্মতু র্দিশ মুত্তরাং॥ ইতি শ্রী ভাগবতে ১০ স্কন্ধে ১০ অধ্যায়ঃ॥

যমলী স্ত্রী চোটিকাদ্বয়ং। ইতি মেদিনী॥ চোটী শাটী পর্য্যায়ে হেমচন্দ্রেণ গণিতা সৈব চোটিকা॥

যমবাহনঃ পুং মহিষঃ। ইতি হেমচন্দ্রঃ॥

যমব্রতং ক্লী রাজধর্ম্মবিশেষঃ। সতু পক্ষপাতং বিনা পাপিনাং শাসন রূপঃ। ইতি পুরাণং॥

যমস্বসা স্ত্রী যমুনা॥ দুর্গা। ইতি মেদিনী॥

যমানিকা স্ত্রী যমানী। তৎপর্য্যায়ঃ ১ অজমোদা ২ উগ্রগন্ধা ৩ ব্রহ্মদর্ভা ৪। ইত্যমরঃ॥ চত্বারি যমান্যাং যমানী দ্বিবিধা একা ক্ষেত্রযমানী সা অজমোদা ইত্যেব খ্যাতা। অপরা যমানী ইত্যেব খ্যাতা অবিশেষাৎ দ্বয়ো রপীতি সুভূতিঃ। কেচিত্তু অজমোদাদি দ্বয়ং বনযমান্যাং ব্রহ্মদর্ভাদি দ্বয়ং যমান্যা মিত্যাহুঃ। উগ্রগন্ধাজমোদাখ্যা স্মৃতা ক্ষেত্রযমানিকা ইতি। যমানী দীপকো দীপ্যো ভূতিকশ্চ যমানিকা ইতিচ রত্নঃ। যচ্ছতি বিরমতি নিবর্ত্ততে অগ্নিমান্দ্যং মনয়া যমানী যমৌ উ বিরতৌ নাম্নীতি অনট্‌ ঙীপ্‌ যমানী স্বার্থে কে যমানিকা যমানী পঞ্চমবর্গ পঞ্চম মধ্যা। যবা-

নাতি, অম্ল্যস্তু চতুর্থ মধ্যা ইতিকেচিৎ। ইতি ভরতঃ ॥ * ॥ অস্যা গুণাঃ। হৃষ্ঠ শূল নাশিত্বং। হৃদ্যত্বং পিত্তাগ্নিকারিত্বং। বায়ু কফ কৃমি নাশিত্বঞ্চ। ইতি রাজবল্লভঃ ॥

যমানী—স্ত্রী যমানিকা। ইতি শব্দরত্নাবলী ॥

যমান্তকঃ পুং শিবঃ। ইতি শব্দরত্নাবলী ॥

যমী স্ত্রী যমুনানদী। ইতি ত্রিকাণ্ড শেষঃ ॥

যমুনা স্ত্রী দুর্গা। যথা। সর্ব্বাণি হৃদয স্থানি মঙ্গলানি শুভানিচ। দদাতি চেপ্সিতান্ লোকে তেন সা সর্ব্বমঙ্গলা ॥ সঙ্গমাদ্গমনাদ্গঙ্গা লোকে দেবী বিভাব্যতে। যমস্য ভগিনী যাতা যমুনা তেন সা মতা ॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ ॥ * ॥ নদীবিশেষঃ। সাত হিমালয দক্ষিণ দেশান্নির্গত্য প্রযাগে গঙ্গাযাং মিশ্রিতা। তৎপর্য্যাযঃ। কালিন্দী ২ সূর্য্যতনযা ৩ শমনস্বসা ৪। ইত্যমরঃ ॥ তপনতনূজা ৫ কলিন্দকন্যা ৬ যমস্বসা ৭। অস্যা জলগুণাঃ। পিত্ত দাহ বমন শ্রমাপহত্বং। স্বাদুত্বং। বাতজননত্বং। পাবনত্বং। বহ্নিদীপনকরত্বং। রোচনত্বং। বলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ ॥ * ॥ সা যমস্য ভগিনী। যথা। সাবর্ণি র্মেরু পৃষ্ঠেতু তপো ঘোরং চকার হ। অদ্যাপি ভবিতা লোকে মনুঃ সাবর্ণিকেন্তরে ॥ ভ্রাতা শনৈশ্চর শ্চাস্য গ্রহত্বং সতু লব্ধবান্ তযো র্যবীযসী যা তু যমস্বসা যশস্বিনী। অভবৎ সা সরিৎশ্রেষ্ঠা যমুনা লোকপাবনী ॥ ইতি বহ্নিপুরাণে সাগরোপাখ্যানং ॥ * ॥ সাচ বৃন্দাবনে সুষুম্নাখ্যা পরাশক্তিঃ। যথা। শ্রীভগবানুবাচ। ইদং বৃন্দাবনং রম্যং মম ধামৈব কেবলং। তত্র যে পশবঃ সাক্ষাদ্বৃক্ষাঃ কীটা নরাধনাঃ ॥ যে বসন্তি মমাধিষ্ট্যং মৃতা যান্তি মমান্তিকং। তত্র যা গোপপত্ন্যশ্চ নিবসন্তি মমালযে। যোগিন্যস্তাত এবং হি মম দেবাঃ পরাযণাঃ ॥ পঞ্চযোজন মেবং হি বনং মে দেহ রূপকং। কালিন্দীযং সুষুম্নাখ্যা পরমামৃত বাহিনী ॥ ইতি পাদ্মে পাতালখণ্ডে ৭ অধ্যাযঃ ॥ * ॥ অস্যা জলস্য কৃষ্ণবর্ণত্ব কারণং যথা। পুলস্ত্য উবাচ। যদা দক্ষসুতা ব্রহ্মন্ সতী যাতা যমক্ষযং। বিনাশ্য দক্ষযজ্ঞং তং বিচচার ত্রিলোচনঃ ॥ ততো বৃষধ্বজং দৃষ্ট্বা কন্দর্পঃ কুসুমাযুধঃ। অপত্নীকং তদাস্ত্রেণ উন্মাদে-

নাভ্যতাড়যৎ ॥ ততো হরঃ শরে- ণাথ ঔন্মাদেনাভিতাড়িতঃ। বিচ- চার তদোন্মত্তঃ কাননানি সরাংসি চ ॥ স্মরন্ সতীং মহাদেব স্তথো- ন্মাদেন তাড়িতঃ। ন শর্ম্ম লেভে দেবর্ষে বাণবিদ্ধ ইব দ্বিপঃ ॥ ততঃ পপাত দেবেশঃ কালিন্দী সরিতে মনে। নিমগ্নে শঙ্করে চাপে দগ্ধা কৃষ্ণত্ব মাগতা ॥ তদা প্রভৃতি কা- লিন্দ্যা দৃগঞ্জন নিভং জলং। ইতি বামনে ৬ অধ্যায়ঃ ॥ ॥ জ্যৈষ্ঠ শুক্ল দ্বাদশ্যাদিষ্বস্যাং স্নান পিণ্ডদান ফলং যথা। যুজ্যৈষ্ঠ শুক্লদ্বাদশ্যাং স্নাত্বা বৈ যমুনাজলে। মথুরায়াং হ- রিং দৃষ্ট্বা প্রাপ্নোতি পরমাং গতিং॥ যমুনা সলিলে স্নাতঃ পুরুষো মুনি সত্তম। জ্যেষ্ঠা মূলা হমলে পক্ষে দ্বাদশ্যা মুপবাস কৃৎ ॥ সমভ্য- চ্যাচ্যুতং সম্যক্ মথুরায়াং সমা- হিতঃ। অশ্বমেধস্য যজ্ঞস্য প্রাপ্নো- ত্যবিকলং ফলং ॥ জ্যেষ্ঠা মূলে সি- তে পক্ষে সমভ্যচ্য জনার্দ্দনং। ধ- ন্যো নঃ পিণ্ড নির্ব্বাপং যমুনায়াং প্রদাস্যতি ॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৮ অধ্যায়ঃ ॥

যমুনাজনকঃ পুং সূর্য্যঃ। ইতি হেম- চন্দ্রঃ ॥

যমুনাভিৎ পুং বলদেবঃ। ইতি হেম- চন্দ্রঃ ॥

যমুনাভ্রাতা পুং যমঃ। ইত্যমরঃ ॥

যমেরুকা স্ত্রী দণ্ডঢক্কা। ইতি ত্রিকা- ণ্ডশেষঃ ॥

যযাতিঃ পুং নহুষরাজপুত্রঃ। তৎ- পর্য্যায়ঃ। নাহুষিঃ ২। ইতি ত্রিকা- ণ্ডশেষঃ ॥ নাহুষঃ ৩। ইতি জটাধরঃ ॥ তস্যোপাখ্যানং যথা। নহুষস্য প্রবক্ষ্যামি পুত্রান্ সপ্তৈব ধার্ম্মিকা- ন্। যতি র্যযাতিঃ সংযাতি রুদ্ভবঃ পঞ্চম স্তথা ॥ সর্য্যাতি র্মেঘযাতিশ্চ সপ্তৈতে বংশবর্দ্ধনাঃ। যযাতি র- করোদ্রাজ্যং ধর্ম্মৈকশরণ স্তদা ॥ শর্ম্মিষ্ঠা তস্য ভার্য্যা ভূৎ দুহিতা বৃষপর্ব্বণঃ। ভার্গবস্যাত্মজা তদ্ব- দ্দেবযানী চ সুব্রতা ॥ যযাতি র্দেব- যান্যাস্তু পুত্রাবজনয়ন্নৃপঃ। যদুঞ্চ তুর্বসুঞ্চৈব শক্র বিষ্ণূ ইবাপরৌ ॥ তস্মাদেব তু রাজর্ষেঃ শর্ম্মিষ্ঠা বার্ষ- পর্ব্বণী। দ্রুহ্যঞ্চানুঞ্চ পূরুঞ্চ ত্রীন্ কুমারানজীজনত্ ॥ ততঃ কালে চ কস্মিংশ্চিদ্দেবযানী শুচিস্মিতা। যযাতি সহিতা রাজন্ জগাম বি- হিতং বনং ॥ দদর্শ চ তদা তত্র কু- মারান্ দেবরূপিণঃ। ক্রীড়মানান্ সুবিশ্রদ্ধান্ বিস্মিতা চেদ মব্রবীৎ ॥

কিন্নামধেয়ং গোত্রো বঃ পুত্রকা ব্রাহ্মণঃ পিতা। বিব্রূত মে যথা তথ্যং শ্রোতুমিচ্ছামি তং হ্যহং॥ তে হদর্শয়ন্ প্রদেশিন্যা তমেব নৃপসত্তমং॥ বুদ্ধ্বা চ তত্ত্বতো দেবী শর্ম্মিষ্ঠা মিদমব্রবীৎ॥ মমাধীনা সতী কস্মাদকার্ষী বিপ্রিয়ং মম। শর্ম্মিষ্ঠোবাচ। যদা ত্বয়া বৃতো রাজা বৃতএব তদা ময়া। ত্বত্তো হি মে পূজ্যতমো রাজর্ষিঃ কিং নবেৎসি তৎ॥ শৌনক উবাচ। শ্রুত্বা তস্যা স্ততো বাক্যং দেবযান্যব্রবীদিদং। রাজন্নাদ্যেহ বৎস্যামি বিপ্রিয়ং মে ত্বয়া কৃতং॥ অবিব্রুবন্তী কিঞ্চিচ্চ রাজানং সাশ্রুলোচনা। অচিরাদেব সংপ্রাপ্তা কাব্যস্যোশনসো হন্তিকে॥ দেবযান্যুবাচ। শর্ম্মিষ্ঠযাতিবৃত্তাস্মি দুহিত্রা বৃষপর্ব্বণঃ। ত্রয়ো হস্যাং জনিতাঃ পুত্রা রাজ্ঞানেন যযাতিনা॥ দুর্ভগায়া মম দ্বৌ তু পুত্রৌ তাত ব্রবীমি বঃ। শুক্রউবাচ। ধর্ম্মজ্ঞঃ সন্ মহারাজ যো হধর্ম্ম মকৃথাঃ প্রিয়ং। তস্মাজ্জরা ত্বামচিরাদ্ধর্ষয়িষ্যতি দুর্জ্জয়া॥ যযাতিরুবাচ। প্রতিকামাং স্ত্রিয়ং যস্তু গম্যাং রহসি যাচিতঃ। নোপৈতি স হ ধর্ম্মেণ ভ্রূণহেত্যুচ্যতে বুধৈঃ॥ অধর্ম্ম ভয় সংবিগ্নঃ শর্ম্মিষ্ঠা মুপজগ্মিবান্। অতৃপ্তো যৌবনস্যাহং দেবযান্যা ভৃগূদ্বহ। প্রসাদং কুরু মে ব্রহ্মন্ জরেয়ং মা বিশেত মাং॥ শুক্রউবাচ। নাহং মৃষা ব্রবীম্যেতৎ জরাং প্রাপ্তোসি ভূমিপ॥ জরাং ত্বে তাং ত্বমন্যস্মিন্ সংক্রাময় যদীচ্ছসি। বযো দাস্যতি পুত্রো যঃ স তে রাজা ভবিষ্যতি॥ ইতি মাৎস্যে ৩২ অধ্যায়ঃ॥ *॥ শৌনকউবাচ। জরাং প্রাপ্য যযাতিস্তু স্ব পুরং প্রাপ্যৈব হ। পুত্রং জ্যেষ্ঠং বরিষ্ঠঞ্চ যদু মিত্যব্রবীদ্বচঃ॥ ত্বং যদো প্রতিপদ্যস্ব পাপ্মানং জরয়া সহ। যৌবনেন ত্বদীযেন চরেয়ং বিষযানহং॥ পূর্ণে বর্ষসহস্রে তু পুনস্তে যৌবনং ত্বহং। দত্ত্বা সংপ্রতিপৎস্যামি পাপ্মানং জরয়া সহ॥ যদুরুবাচ। সন্তি তে বহবঃ পুত্রা মত্তঃ প্রিয়তরা নৃপ। জরাং গ্রহীতুং ধর্ম্মজ্ঞ পুত্রমন্যং বৃণীষ্ব বৈ॥ যযাতিরুবাচ। যো মে ত্বং হৃদযাজ্জাতো বযঃ স্বং ন প্রযচ্ছসি। পাপাম্মাতুল সম্বন্ধাৎ প্রজা বৈ তে ভবিষ্যতি॥ তুর্ব্বসো প্রতিপদ্যস্ব পাপ্মানং জরয়া সহ। যৌবনেন চরেয়ং বৈ বিষয়াং স্তব পুত্রক॥ তুর্ব্বসুরুবাচ। ন কামযে জরাং তাত কামভোগ প্রণাশিনীং। বলরূপান্তকরণীং

বুদ্ধিমান বিনাশিনী॥ যযাতিরুবাচ। য স্ত্বং মে হৃদযাজ্জাতো বযঃ স্বং ন প্রযচ্ছসি। তস্মাৎ প্রজা সমুচ্ছেদং তুর্ব্বসো তব যাস্যতি॥ দ্রুহ্যো ত্বং প্রতিপদ্যস্ব বর্ণরূপ বিনাশিনীং। জরাং বর্ষ সহস্রাণি যৌবনং স্বং প্রযচ্ছ চ॥ দ্রুহ্যুরুবাচ। ন গজং ন রথং চাশ্বং জীর্ণো ভুঙ্‌ক্তে বরস্ত্রিযং। নারোগশ্চাস্য ভবতি তাং জরাং তেন কাময়ে॥ যযাতিরুবাচ। য স্ত্বং মে হৃদযাজ্জাতো বযঃ স্বং ন প্রযচ্ছসি। তস্মাৎ দ্রুহ্যো প্রিযঃ কামো ন তে সম্পৎস্যতে ক্বচিৎ॥ অনো ত্বং প্রতিপদ্যস্ব পাপ্মানং জরযা সহ। একং বর্ষ সহস্রন্তু চরেযং যৌবনেন তে। অনুরুবাচ। জীর্ণঃ শিশুরিবাদত্তে কালে হন্নমশুচি যথা॥ ন জুহোতি চ কালে হগ্নিং তাং জরাং নৈব কাময়ে। যযাতিরুবাচ। য স্ত্বং মে হৃদযাজ্জাতো বযঃ স্বং ন প্রযচ্ছসি। জরা দোষস্ত্বযোক্তো যস্তস্মাত্ত্বং প্রতিপৎস্যসি॥ পুরোমে ত্বং প্রিযঃ পুত্র ত্বং বরীযান্ ভবিষ্যসি॥ কাব্যস্যোশনসঃ শাপায় চ তৃপ্তোস্মি যৌবনে॥ পুরো ত্বং প্রতিপদ্যস্ব পাপ্মানং জরযা সহ। কিঞ্চিৎকালং চরেযং বৈ বিষযান্ বযসা তব॥ পূর্ণে বর্ষ সহস্রে তু প্রতিদাস্যামি যৌবনং॥ স্বঞ্চৈব প্রতিপৎস্যামি পাপ্মানং জরযা সহ। শৌনক উবাচ। এবমুক্তঃ প্রত্যুবাচ পূরুঃ পিতরমঞ্জসা। যথাত্থ ত্বং মহারাজ তৎকরিষ্যামি তে বচঃ॥ যযাতিরুবাচ। পুরো প্রীতোস্মি তে বৎস প্রীত শ্চেদং দদামি তে। সর্ব্বকাম সমৃদ্ধা তে প্রজা রাজ্যে ভবিষ্যতি। ইতি মাৎস্যে ৩৩ অধ্যাযঃ॥*॥ শৌনক উবাচ। পৌরবেণাথ বযসা যযাতির্নহুষাত্মজঃ। প্রীতিযুক্তো নরশ্রেষ্ঠ শ্চচার বিষযান্ সুখী॥ পূর্ণং মত্বা ততঃ কালং পূরুং পুত্র মুবাচ হ। পুরো প্রীতোস্মি ভদ্রং তে গৃহাণেমং স্বযৌবনং॥ রাজ্যঞ্চাপি গৃহাণেদং যৎ ত্বযোপকৃতং পুরা। শৌনক উবাচ। এবং স নাহুষো রাজা যযাতিঃ পুত্রমীপ্সিতং। রাজ্যেভিষিচ্য মুদিতো বানপ্রস্থো হভবন্মুনিঃ॥ উষিত্বা বনবাসং স ব্রাহ্মণৈঃ সহ সংশ্রিতঃ। ফল মূলাশনো দান্তো যথা স্বর্গমিতো গতঃ॥ ইতি মাৎস্যে ৩৫ অধ্যাযঃ॥

যযী ন পুং মহাদেবঃ। ইত্যুণাদিকোষঃ॥

যযুঃ পুং অশ্বমেধীযাশ্বঃ॥ সামান্য-

ঘোটকঃ। ইতি মেদিনী ॥

যবঃ পুং সুনামখ্যাতশূকধান্যং। তৎপর্য্যায়ঃ। সিতশূকঃ ২। ইত্যমরঃ॥ শীতশূকঃ ৩। ইতি শব্দরত্নাবলী ॥ মেধ্যঃ ৪ দিব্যঃ ৫ অক্ষতঃ ৬ কঞ্চুকী ৭ ধান্যরাজঃ ৮ তীক্ষ্ণশূকঃ ৯ তুরগপ্রিয়ঃ ১০ শক্তুঃ ১১ মহেষ্টঃ ১২ পবিত্রধান্যং ১৩। তস্য গুণাঃ। কষায়ত্বং। মধুরত্বং। সুশীতলত্বং। প্রমেহ পিত্ত কফাপহারকত্বঞ্চ ॥ অশূক মণ্ড যব গুণাঃ। বলপ্রদত্বং। বৃষ্যত্বং। নৃণাং বহুবীর্য্য পুষ্টিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। যবঃ কষায় মধুরো বহু বাত শকৃৎ গুরুঃ। রুক্ষঃ স্থৈর্য্যকরঃ শীতো মূত্র মেদ কফাপহঃ ॥ ইতি রাজবল্লভঃ॥ *॥ পরিমাণবিশেষঃ। সতু চতুর্ধান্যমানরূপঃ। ইতি শুভঙ্করঃ ॥ ষট্সর্ষপপরিমাণাত্মকশ্চ। যথা। জালান্তরগতে ভানৌ যচ্চাণু দৃশ্যতে রজঃ। তৈশ্চতুর্ভির্ভবেল্লিখ্যা লিখ্যা ষড্ভিশ্চ সর্ষপঃ॥ ষট্ সর্ষপৈ র্যব স্ত্বেকো গুঞ্জৈকাতু যবৈস্ত্রিভিঃ। ইতি শব্দচন্দ্রিকা ॥ *॥ অঙ্গুলিস্থ যবাকার রেখাবিশেষঃ। যথা। তর্জনী মূল সংপৃক্তৌ যবৌ পুত্রার্থদৌ ক্রমাৎ। মধ্যমায়াং যবশ্চেদ্বাঙ্গুষ্ঠে হপূর্ব্বধনপ্রদঃ ॥ অপিচ। মধ্যমায়াং যদি যবো দৃশ্যতে চ সুশোভনঃ। তদাস্য সঞ্চিতং দ্রব্যং প্রাপ্নোত্যঙ্গুষ্ঠকে যবে ॥ যস্যাপি চক্র মঙ্গুষ্ঠে যব পূর্ণঞ্চ দৃশ্যতে। তদা পিতামহাদীনা মর্জ্জিতং লভতে ধনং ॥ ইতি সামুদ্রকং॥

যবকঃ পুং যবঃ। ইত্যমরটীকায়াং রামাশ্রমঃ ॥

যবক্যং ত্রি যবভবনোচিতক্ষেত্রং। ইত্যমরঃ ॥

যবগণ্ডঃ পুং যুবগণ্ডঃ। ব্রণস্ফোড়া ইতি ভাষা। ইতি শব্দরত্নাবলী ॥

যবজঃ পুং যবক্ষারঃ। ইতি রত্নমালা ॥ যবানী। ইতি রাজনির্ঘণ্টঃ ॥

যবজোদ্ভবং ক্লী তবক্ষীরং। ইতি রাজনির্ঘণ্টঃ ॥

যবতিক্তা স্ত্রী লতাপ্রভেদঃ। শঙ্খিনীতি যবেচী ইতিচ খ্যাতা। তৎপর্য্যায়ঃ। মহাতিক্তা ২ দৃঢ়পাদবিসর্পিণী ৩ নাকুলী ৪ নেত্রমীনা ৫ শঙ্খিনী ৬ পত্রতণ্ডুলী ৭ তণ্ডুলী ৮ অক্ষপীড়া ৯ সূক্ষ্মপুষ্পী ১০ যশস্বিনী ১১ মাহেশ্বরী ১২ তিক্তফলা ১৩ যাবী ১৪ তিক্তা ১৫। অস্যা গুণাঃ। সতিক্তাম্লত্বং। দীপনত্বং। রুচিকারিত্বং। কৃমি জঠ

দ্বিবর্ণাসুদোষ নাশিত্ব‍ং । রেচনত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

যবতৈলং ক্লী যবচূর্ণাদিযুক্তপক্বতৈলবিশেষঃ । তৎপ্রকারং গুণশ্চাহ । যবচূর্ণার্দ্ধ জদ্রবং মঞ্জিষ্ঠার্দ্ধ পলেন তু । তৈলপ্রস্থঃ শতগুণে কাঞ্জিকে সাধিতো জয়েৎ ॥ জ্বরং দাহং মহাবেগ মঙ্গানাঞ্চ প্রহর্ষণং । ইতি সুখবোধঃ ॥

যবনঃ পুং দেশবিশেষঃ ॥ বেগঃ ॥ বেগাধিকাশ্বঃ । ইতি মেদিনী ॥ গোধূমঃ ॥ গর্জরতৃণং ॥ তুরুষ্কঃ । ইতি রাজনির্ঘণ্টঃ ॥ জাতিবিশেষঃ । ইতি শব্দরত্নাবলী ॥ সতু যযাতিপুত্র তুর্বসুবংশঃ । যথা । যদোস্ত জাতা যাদব স্তুরসো যবনাঃ সুতাঃ । দ্রুহ্যোস্ত তনয়া ভোজা অনোস্ত ম্লেচ্ছজাতয়ঃ । পূরোস্ত পৌরবো বংশো যত্র জাতোঽসি পার্থিব ॥ ইতি মাৎস্যে ৩৪ অধ্যায়ঃ ॥ ॥ যবনশব্দ শ্চবর্গ তৃতীযাদি রিতি রঘুনন্দনভট্টাচার্য্যেণ লিখিতং । যথা । জবনাদীনাস্তু সর্ব্বধর্ম্ম রাহিত্যং মুক্তং হরিবংশে । সগর স্তাং প্রতিজ্ঞাঞ্চ গুরো বাক্যং নিশম্য চ । ধর্ম্মং জঘান তেষাং বৈ বেশান্যত্বং চকার হ ॥ অর্দ্ধং শকানাং শির সো মুণ্ডয়িত্বা ব্যসর্জ্জয়ৎ । জবনানাং শিরঃ সর্ব্বং কাম্বোজানাং তথৈব চ ॥ পারদা মুক্তকেশাশ্চ পহ্লবাঃ শ্মশ্রুধারিণঃ । নিঃস্বাধ্যায বষট্কারাঃ কৃতা স্তেন মহাত্মনা ॥ শকা জবন কাম্বোজাঃ পারদাঃ পহ্লবা তথা । কোলিসর্পাঃ সমহিষা দার্ব্বা শ্চোলাঃ সকেরলাঃ ॥ বশিষ্ঠ বচনাদ্রাজন্ সগরেণ মহাত্মনা । শকানাং শকদেশোদ্ভবানাং ক্ষত্রিয়াণাং এবং জবনাদীনা মিতি । অত্র জবনশব্দ স্তদ্দেশোদ্ভববাচী চবর্গ তৃতীযাদিঃ । জবনো দেশ বেগিনো রিতি ত্রিকাণ্ডশেষাভিধান দর্শনাৎ । তেষাং ম্লেচ্ছত্ব মপ্যুক্তং বিষ্ণুপুরাণে । তথা কৃতান্ জবনাদীনুপক্রম্য । তে চাত্ম ধর্ম্ম পরিত্যাগাৎ ম্লেচ্ছত্বং যযু রিতি । বৌধাযনঃ । গোমাংসখাদকো যশ্চ বিরুদ্ধং বহুভাষতে । ধর্ম্মাচার বিহীনশ্চ ম্লেচ্ছ ইত্যভিধীযতে ॥ ইতি প্রাযশ্চিত্ততত্ত্বং ॥ ॥ মুনিবিশেষঃ । যথা । জাতং দিনং দূষযতে বশিষ্ঠ শ্চাষ্টৌ চ গর্গো যবনো দশাহং ॥ জন্মাখ্য মাসংকিল ভাগুরিশ্চ ক্ষৌরে বিবাহেপি চ কর্ণবেধে ॥ ইতি তিথ্যাদিতত্ত্বং ॥ ॥ কালযবনোৎপত্তি র্যথা । শ্রীপরা-

শর উবাচ। গার্গ্যং গোষ্ঠে দ্বিজং ॥ শ্যালঃ ষণ্ড ইত্যুক্তবান্ দ্বিজ। যদূনাং ॥ সন্নিধৌ ততস্তু জহসু র্যাদবা স্ততঃ ॥ ততঃ কোপ সমাবিষ্টো দক্ষিণাপথ মেত্য সঃ। সুতমিচ্ছং স্তপ স্তেপে যদুচক্র ভয়াবহং ॥ আরাধয়ন্মহাদেবং সো হয়শ্চূর্ণমভক্ষয়ৎ। দদৌ বরঞ্চ তুষ্টো হস্মৈ বর্ষে দ্বাদশমে হরঃ ॥ স ভাজয়ামাস চ তং যবনেশো হ্যনাত্মজঃ। তদ্যোষিৎ সঙ্গমাচ্চাস্য পুত্রো হভূদলিসপ্রভঃ ॥ অলিসো ভৃঙ্গঃ ॥ তং কালযবনং নাম রাজ্যে স্বে যবনেশ্বরঃ। অভিষিচ্য বনং যাতো বজ্রাগ্র কঠিনোরসং ॥ স চ বীর্য্যমদোন্মত্তঃ পৃথিব্যাং বলিনো নৃপান্। পপ্রচ্ছ নারদ শ্চাস্মৈ কথযামাস যাদবান্ ॥ ম্লেচ্ছ কোটি সহস্রাণাং সহস্রৈঃ সো হভিসংবৃতঃ। গজাশ্ব রথ সম্পন্নৈ শ্চকার পরমোদ্যমং ॥ প্রযযৌ চাব্যবচ্ছিন্নং ছিন্ন যানো দিনে দিনে। যাদবান্ প্রতি সামর্ষো মৈত্রেয় মথুরাং পুরীং ॥ কৃষ্ণোপি চিন্তযামাস ক্ষপিতং যাদবং বলং। যবনেন রণে গম্যং মগধস্য ভবিষ্যতি ॥ মাগধস্য বলং ক্ষীণং স কালযবনো বলী। হন্তা তদিদ মায়াতং যদূনাং ব্যসনং দ্বিধা ॥ তস্মাদ্দুর্গং করিষ্যামি যদূনা মতিদুর্জয়ং। ইতি সঞ্চিন্ত্য গোবিন্দো যোজনানি মহোদধিং ॥ যযাচে দ্বাদশ পুরীং দ্বারকাং তত্র নির্ম্মমে। মথুরাবাসিনো লোকাং স্তত্রানীয জনার্দ্দনঃ ॥ আসন্নে কালযবনে মথুরাঞ্চ স্বযং যযৌ। বহিরাবাসিতে সৈন্যে মথুরাযা নিরাযুধঃ ॥ নির্জগাম স গোবিন্দো দদৃশে যবনশ্চ তং। স জ্ঞাত্বা বাসুদেবং তং বাহু প্রহরণো নৃপঃ ॥ অনুযাতো মহাযোগি চেতোভিঃ প্রাপ্যতে ন যঃ। তেনানুযাতঃ কৃষ্ণোপি প্রবিবেশ মহাগুহাং ॥ যত্র শেতে মহাবীর্য্যো মুচুকুন্দো নরেশ্বরঃ। সোপি প্রবিষ্টো যবনো দৃষ্ট্বা শয্যাগতং নরং ॥ পাদেন তাডযামাস কৃষ্ণং মত্বা সুদুর্ম্মতিঃ। দৃষ্টমাত্রশ্চ তেনাসৌ জজ্বাল যবনো হগ্নিনা ॥ তৎক্রোধজেন মৈত্রেয ভস্মীভূতশ্চ তৎক্ষণাৎ। ইতি বিষ্ণুপুরাণে ৫ অংশে ২৩ অধ্যাযঃ ॥

যবমঃ ত্রি বেণী। ইতি মেদিনী ॥

যবনদ্বিষ্টঃ পুং গুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ ॥

যবনপ্রিযং ক্লী মরিচং। ইতি হেমচন্দ্রঃ ॥

যবনাচার্য্যঃ পুং জ্যোতিঃশাস্ত্রকর্ত্তৃ মুনিবিশেষঃ। ইতিবরাহমিহিরৌ॥

যবনানী স্ত্রী যবনস্যলিপিঃ। ইতি মুগ্ধবোধটীকায়াং দুর্গাদাসঃ॥

যবনারিঃ পুং শ্রীকৃষ্ণঃ। ইতি ত্রিকাণ্ডশেষঃ॥

যবনালঃ পুং ধান্যবিশেষঃ। দেধান্ ইতি ভাষা। তৎপর্য্যায়ঃ। যোনালঃ ২ জূর্ণাহ্বয়ঃ ৩ দেবধান্যং ৪ জোন্তালা ৫ বীজপুষ্পিকা ৬। ইতি হেমচন্দ্রঃ॥

যবনালজঃ পুং যবক্ষারঃ। ইতিহেমচন্দ্রঃ॥

যবনিকা স্ত্রী জবনিকা। কানাত্ ইতি ভাষা। ইত্যমরটীকা॥

যবনী স্ত্রী যবানীনামকৌষধিভেদঃ। ইতি মেদিনী॥ যবনভার্য্যা চ॥

যবনেষ্টং ক্লী সীসকং। ইতি হেমচন্দ্রঃ॥ মরীচং॥ গৃঞ্জনং। ইতি রাজনির্ঘণ্টঃ॥

যবনেষ্টঃ পুং লশুনঃ॥ রাজপলাণ্ডুঃ॥ নিম্বঃ॥ পলাণ্ডুঃ। ইতি রাজনির্ঘণ্টঃ॥

যবনেষ্টা স্ত্রী খর্জ্জূরী। ইতি রাজনির্ঘণ্টঃ॥

যবফলঃ পুং বংশঃ। ইত্যমরঃ॥ জটামাংসী॥ স্ফটজঃ। ইতি মেদিনী॥ প্লক্ষবৃক্ষঃ ৮ ইতি শব্দরত্নাবলী॥

যবমধ্যং ক্লী চান্দ্রায়ণপর্ব্বভেদঃ। যথা। শিশুচান্দ্রায়ণং প্রোক্তং যতিচান্দ্রায়ণন্তথা। যবমধ্যং তথা প্রোক্তং তথা পিপীলিকাকৃতি॥ ইতি প্রায়শ্চিত্ততত্ত্বং॥

যবময়ঃ ত্রি যবনির্ম্মিতঃ। যবশব্দাৎ ময়ট্ প্রত্যয়েন নিষ্পন্নঃ॥

যবলাসঃ পুং যবক্ষারঃ। ইতি শব্দরত্নাবলী॥

যবশূকঃ পুং যবক্ষারঃ। ইতি ত্রিকাণ্ডশেষঃ॥

যবশূকজঃ পুং যবক্ষারঃ। ইতি রাজনির্ঘণ্টঃ॥

যবসং ক্লী তৃণং। ঘাসঃ। ইত্যমরঃ॥

যবসুরং ক্লী যবজাতসুরা। ইতি সিদ্ধান্তকৌমুদী॥

যবক্ষারঃ পুং ক্ষারবিশেষঃ। শোরা ইতি ভাষা। যথা। নরসার যবক্ষার স্ফটিকারিত এব কাচ বক যস্ত্রৈঃ। বহুশঃ পাতং সত্ত্বং তদ্ধি মহাদ্রাবকনাম। ইতি রত্নাবলী॥ তৎপর্য্যায়ঃ। যবাগ্রজঃ ২ পাক্যং ৩। ইত্যমরঃ॥ যবলাসঃ ৪ যবশূকঃ ৫ সারকঃ ৬ রেচকঃ ৭ যবনালকঃ ৮। ইতি শব্দরত্নাবলী॥ যাব-

শূকঃ ৯ ক্ষারঃ ১০ তৈক্ষ্ণ্যঃ ১১ তীক্ষ্ণরসঃ ১২ যবনালজঃ ১৩। ইতি রত্নমালা॥ যবজঃ ১৪ যবশূকজঃ ১৫ যবাহ্বঃ ১৬ যবাপত্যং ১৭। গুণাঃ। কটুত্বং। উষ্ণত্বং। কফবাতোদরার্ত্তি নাশিত্বং। আনাহশূলাশ্মকৃচ্ছ্রকৃৎ স্নবিষদোষহরত্বং। সারত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অর্শঃ শ্বাস গুল্ম গ্রহণী পাণ্ডু প্লীহানাহগলাময় নাশিত্বঞ্চ। ইতি রাজবল্লভঃ॥

যবক্ষোদঃ পুং যবচূর্ণং। তৎপর্য্যায়ঃ। চিক্কসঃ ২। ইতি হেমচন্দ্রঃ॥

যবাগূঃ স্ত্রী ষড়্‌গুণজলপক্বঘনদ্রবদ্রব্যবিশেষঃ। যাউ ইতি ভাষা। তৎপর্য্যায়ঃ। উষ্ণিকা ২ শ্রাণা ৩ বিলেপী ৪ তরলা ৫। ইত্যমরঃ॥ যূয়তে মিশ্র্যতে যবাগূঃ যুল মিশ্রণে নাম্নীতি আগূঃ। ওষতি দহতি জ্বরাদি রোগং উষ্ণিকা উষ দাহে দহি প্রর্বেণ নিক। শ্রায়তে পচ্যতেস্ম শ্রাণা শ্রাণপাকে ক্তঃ সূত্রাদ্যোদিতি নঃ। বিলিম্পতি বিলেপী ক্লি লিপৌ শপ এ লেপে পচাদিত্বাদন্ নদাদিত্বাদীপ্। তরতি প্লবতি তরলা। তৃ তরে হভিভবে প্লুত্যানাম্নীতি অলঃ। অন্নং পঞ্চগুণে সাধ্যং বিলেপী চ চতুর্গুণে। সপ্তশচতুর্দ্দশগুণে যবাগূঃ ষড়্‌গুণে হস্তসি। ইতি বৈদ্যকোক্তোভেদ ইহ নাদৃতঃ। ইতি ভট্টীকায়াং ভরতঃ॥ অস্যা গুণাঃ। যবাগূ জ্বর তৃষ্ণাঘ্নী লঘ্বী বস্তি বিশোধনী। অতীসারে জ্বরে দাহে হিতা বহ্নি প্রদীপনী॥ ইতি রাজবল্লভঃ॥

যবাগ্রজঃ পুং যবক্ষারঃ। ইত্যমরঃ॥ যবানী। ইতি রাজনির্ঘণ্টঃ॥

যবানঃ ত্রি বেগী। ইতি মেদিনী॥

যবানিকা, যবানী স্ত্রী ওষধিভেদঃ। যোয়ানি ইতি ভাষা। তৎপর্য্যায়ঃ। দীপ্যকঃ ২ দীপ্যঃ ৩ যবসাহ্বঃ ৪ যবাগ্রজঃ ৫ দীপনী ৬ উগ্রগন্ধা ৭ বাতারিঃ ৮ ভূকদম্বকঃ ৯ যবজঃ ১০ দীপনীয়ঃ ১১ শূলহন্ত্রী ১২ যবানিকা ১৩ উগ্রা ১৪ তীব্রগন্ধা ১৫। অস্যা গুণাঃ। কটুত্বং। তিক্তত্বং। উষ্ণত্বং। বাতার্শঃ শ্লেষ্ম শূলাধ্মান ক্রিমি ছর্দ্দি নাশিত্বং। দীপনত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ ॥ অপিচ। অথ যবান্যা নাম গুণাঃ। যবানিকোগ্রগন্ধা চ ব্রহ্মদর্ভাজমোদিকা। সৈবোক্তা দীপ্যকো দীপ্যং তথাস্যাদ্যবসাহ্বয়া॥ যবানী পাচনী রুচ্যা তীক্ষ্ণোষ্ণা কটুকা লঘুঃ

।দীপনী চ তথা তিক্তা পিত্তলা শুক্র শূল হৃৎ ॥ বাত শ্লেষ্মোদরানাহ গুল্ম প্লীহ কৃমি প্রণুৎ । * । অথ অজমোদাযা নামানি গুণাশ্চ । অজমোদা খরাশ্বা চ মর্যূরো দীপ্যক স্তথা । তথা ব্রহ্মকুশা প্রোক্তা কারবী লোচমস্তকঃ ॥ অজমোদা কটু স্তীক্ষ্ণা দীপনী কফ বাতনুৎ । উষ্ণা বিদাহিনী হৃদ্যা বৃষ্যা বলকরী লঘুঃ ॥ নেত্রাময কৃমি চ্ছর্দি হিম বস্তি রুজো হরেৎ । * । অথ খরাসানী যবানী নাম গুণাঃ । পারসীক যবানী তু যবানী সদৃশী গুণৈঃ । বিশেষাৎ পাচনী রুক্ষা গ্রাহিণী মাদিনী গুরুঃ ॥ ইতি ভাবপ্রকাশঃ ॥

যবাপত্যং ক্লী যবক্ষারঃ । ইতি রাজনির্ঘণ্টঃ ॥

যবাম্লজং ক্লী সৌবীরকং । ইতি রাজনির্ঘণ্টঃ ॥

যবাসঃ পুং দুরালভা । যথা । যাসো যবাসো দুস্পর্শো ধনুর্যাসো দুরালভা । ইতি রত্নমালা ॥ খদিরভেদঃ । যথা । কণ্টকী বাসপত্রশ্চ যবাসঃ খদির স্তথা । ইতি শব্দমালা ॥ যবাসা ইতি খ্যাতা কণ্টকী ক্ষুপবিশেষঃ । তৎপর্য্যাযঃ । যাসঃ ২ বহুকণ্টকঃ ৩ অল্পকঃ ৪ ক্ষুদ্রেঙ্গুদী ৫ রোদনিকা ৬ কচ্ছুরা ৭ বর্ণপত্রঃ ৮ বিষঘ্নঃ ৯ কণ্টকালুকঃ ১০ ত্রিকর্ণিকা ১১ গান্ধারী ১২ অনন্তা ১৩ । অস্য গুণাঃ । মধুরতিক্তত্বং । শীতত্বং । পিত্তার্ত্তি দাহ নাশিত্বং । বল দীপন কারিত্বং । তৃষ্ণা কফ ছর্দ্দি বিসর্পজিত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

যবাসকঃ পুং দুরালভা । ইতি শব্দরত্নাবলী ॥

যবাসশর্করা স্ত্রী যবাসরসঘটিতশর্করা । তৎপর্য্যাযঃ । সুধামোদকঃ ২ মোদকঃ ৩ তবরাজঃ ৪ খণ্ডসরঃ ৫ খণ্ডজঃ ৬ খণ্ডমোদকঃ ৭ । অস্যা গুণাঃ । অতিমধুরত্বং । পিত্ত শ্রম তৃষাপহত্বং । বৃষ্যত্বং । বিদাহ মূর্চ্ছার্ত্তি ভ্রান্তি শান্তি করত্বং । সরত্বঞ্চ । ইতি রাজনির্ঘণ্টঃ ॥

যবাসা স্ত্রী গুণ্ডাসিনীতৃণং । ইতি রাজনির্ঘণ্টঃ ॥

যবাহ্বঃ পুং যবক্ষারঃ । ইতি রাজনির্ঘণ্টঃ ॥

যবিষ্ঠঃ ত্রি অতিশযযুবা । অযমনযোরতিশযেনযুবা ইত্যর্থে ইষ্ঠ প্রত্যযেন নিষ্পন্নঃ ॥ কনিষ্ঠভ্রাতরি পুং । ইতি হেমচন্দ্রঃ ॥

যবীয়ান্ ত্রি কনিষ্ঠঃ। যুবা। ইতি মেদিনী ॥

যবোত্থং ক্লী সৌবীরকং। ইতি রাজনির্ঘণ্টঃ ॥ ৯

যব্যং ত্রি যবাদিভবনোচিতক্ষেত্রং। তৎপর্য্যায়ঃ। যবক্যং ২ যষ্টিক্যং ৩। ইত্যমরঃ ॥ যবোচিতং ৪ যবকোচিতং ৫। ইতি শব্দরত্নাবলী ॥

যব্যঃ পুং মাসঃ। যথা। যব্যদ্বয়ং শ্রাবণাদি সর্ব্বা নদ্যো রজস্বলাঃ। তাসু স্নানং ন কুর্ব্বীত বর্জয়িত্বা সমুদ্রগাঃ ॥ ইতি প্রায়শ্চিত্ততত্ত্বে গঙ্গামাহাত্ম্যং ॥

যশঃ ক্লী সুখ্যাতিঃ। তৎপর্য্যায়ঃ। কীর্ত্তিঃ ২ সমজ্ঞা ৩। ইত্যমরঃ ॥ সমাখ্যা ৪ কীর্ত্তনা ৫ অভিখ্যানং ৬ আজ্ঞা ৭ সমজ্যা ৮। ইতি শব্দরত্নাবলী ॥ দানাদি প্রভবা কীর্ত্তিঃ শৌর্য্যাদি প্রভবং যশঃ। ইতি মাধবী ॥ অতএব যশঃ কীর্ত্ত্যো র্ভেদস্যাপি দর্শনাৎ যশঃ কীর্ত্তি পরিভ্রষ্টো জীবন্নপি ন জীবতি। ইতি কস্যচিৎ প্রয়োগঃ। জীবতঃ খ্যাতি র্যশো মৃতস্য খ্যাতিঃ কীর্ত্তিরিতি কেচিৎ। তন্ন সাধু কীর্ত্তিস্তে নৃপ দূতকেতি প্রয়োগ দর্শনাৎ। ইত্যমরটীকায়াং ভরতঃ ॥ * ॥ কীর্ত্তিনাশে দোষো যথা। হন্তি যঃ পরকীর্ত্তিঞ্চ স্বকীর্ত্তিং মানবাধমঃ। স কৃতঘ্ন ইতি খ্যাতস্তৎ ফলঞ্চ নিশাময় ॥ অন্ধকূপে বসেৎ সোঽপি যাবদিন্দ্রা শ্চতুর্দ্দশ। কীটৈর্নকুলমানৈশ্চ ভক্ষিতঃ সততং নৃপ ॥ তপ্তক্ষারোদকং পাপী নিত্যং পিবতি খাদতি। ততঃ সর্পো জন্ম সপ্ত কাকঃ পঞ্চ ততঃ শুচিঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ৪৯ অধ্যায়ঃ ॥

যশঃপটহঃ পুং ঢক্কা। ইত্যমরঃ ॥

যশঃশেষঃ ত্রি মৃতঃ। ইতি হেমচন্দ্রঃ ॥ মরণে পুং ॥

যশদং ক্লী ধাতুবিশেষঃ। দস্তা ইতি ভাষা। যথা। যশদং রঙ্গসদৃশং রীতিহেতুশ্চ তন্মতং। যশদং তুবরং তিক্তং শীতলং কফ পিত্ত হৃৎ ॥ চক্ষুষ্যং পরমং মেহান্ পাণ্ডুং শ্বাসঞ্চ নাশয়েৎ। ইতি ভাবপ্রকাশঃ ॥

যশস্করঃ ত্রি কীর্ত্তিকারকঃ। সুখ্যাতিজনকঃ। যশস্করোতি য ইত্যর্থে ট প্রত্যয়েন নিষ্পন্নঃ ॥ যশস্করী বিদ্যা ইতি ব্যাকরণং ॥

যশস্যা স্ত্রী জীবন্তী ॥ ঋদ্ধিনামৌষধিঃ। ইতি রাজনির্ঘণ্টঃ ॥

যশস্বান্ ত্রি কীর্ত্তিবিশিষ্টঃ। যশো॥ হস্ত্যস্য ইত্যর্থে বতু প্রত্যযেন নিষ্পন্নঃ। ইতিব্যাকরণং॥

যশস্বিনা স্ত্রী বনকার্পাসী। ইতি শব্দরত্নাবলী॥ যবতিক্তা॥ মহাজ্যোতিষ্মতী। ইতি রাজনির্ঘণ্টঃ॥

যশস্বী ত্রি যশোবিশিষ্টঃ। কীর্ত্তিমান্। যশঃ শব্দাদস্ত্যর্থে ইন্ প্রত্যযেন নিষ্পন্নঃ। ইতি ব্যাকরণং॥

যশোদঃ পুং পারদঃ। ইতি রাজনির্ঘণ্টঃ॥ যশোদাতরি ত্রি॥

যশোদা স্ত্রী নন্দপত্নী। যথা। নন্দঃ কিমকরোদ্‌ব্রহ্মন্ শ্রেয এবং মহোদযং। যশোদা বা মহাভাগা পপৌ যস্যাঃ স্তনং হরিঃ॥ ইতি শ্রীভাগবতে ১০ স্কন্ধঃ॥

যষ্টা পুং যাগকর্ত্তা। তৎপর্য্যাযঃ। যজমানঃ২। ইত্যমরঃ॥

যষ্টিঃ পুং ধ্বজদণ্ডঃ। ইতি বিশ্বমেদিনী শব্দরত্নাবল্যঃ॥ ভুজদণ্ডঃ। ইতি মনুস্থিত মেদিনী॥

যষ্টিঃ পুং স্ত্রী তন্তুঃ। ইতি শব্দমালা॥ হারলতা॥ ভার্গী॥ মধুকা॥ শস্ত্রভেদঃ। ইতি মেদিনী॥শেষস্যপর্য্যাযঃ। দণ্ডঃ২ লগুডঃ ৩। ইতি হেমচন্দ্রঃ॥ *॥ তদ্দানফলং যথা। যষ্টিং যে তু প্রযচ্ছন্তি নেত্রহীনে সুদুর্ব্বলে। তেষান্তু বিপুলঃ পুংসঃ সন্তানো মোহবর্জ্জিতঃ॥ ইতি বহ্নিপুরাণং॥

যষ্টিকঃ পুং জলরঙ্কুটঃ। ইতি শব্দরত্নাবলী॥ দণ্ডশ্চ॥

যষ্টিকা স্ত্রী হারভেদঃ। যথা। যষ্টিকা দণ্ডিকা চৈব তিলকা সারিকেত্যপি। ইতি জটাধরঃ॥ বাপী। যথা। পল্বলং দীর্ঘিকা বাপী যষ্টিকা মীনগোধিকা। ইতি ত্রিকাণ্ডশেষঃ॥ যষ্টিমধুকা। যথা। অথ যষ্টী মধুকং স্যান্মধুযষ্টী তু যষ্টিকা। ইতি শব্দরত্নাবলী॥ লগুডঃ। যথা। অথ শক্তিশ্চ শক্তী চ যষ্টি যষ্টী চ যষ্টিকা। দণ্ডঃ কাণ্ডো হপি লগুডঃ পশুঘ্নো দণ্ডকো হপি চ॥ ইতি শব্দরত্নাবলী॥

যষ্টিগ্রহঃ পুং যষ্টিধারকঃ। লগুডগ্রাহী। ইতি মুগ্ধবোধ টীকাযাং দুর্গাদাসঃ॥

যষ্টিমধ ক্লী যষ্টিমধুকা। ইতি হলাযুধঃ॥

যষ্টিমধুকা স্ত্রী যষ্টিমধু। তৎপর্য্যাযঃ। ক্লীতকং২ মধুকং ৩ মধুযষ্টিকা ৪। ইত্যমরঃ॥ যষ্ট্যাহ্বং ৫ যষ্টি ৬ স্থলেজাতং চেৎ যষ্টীমধু ৭ জলজা চেৎ অতিরসা ৮। ইতি রত্ন-

মালা॥ অপিচ। যষ্টীমধু তথা যষ্টী মধুকং ক্লীতকং তথা। অন্য ক্লীতনকং তত্তু ভবেত্তোয়ে নিশুদ্ধিকা॥ অস্যাঃ গুণাঃ। যষ্টী হিমা। স্বাদ্বী চক্ষুষ্যা বল বর্ণ কৃৎ। সুস্নিগ্ধা শুক্রলা কেশ্যা স্বর্য্যা পিত্তানিলাস্রজিৎ॥ ব্রণ শোথ বিষ ছর্দ্দি তৃষ্ণা গ্লানি ক্ষয়াপহা। ইতি ভাবপ্রকাশঃ॥

যষ্টী স্ত্রী যষ্টিমধু। ইতি ভাবপ্রকাশঃ

যষ্টীকং ক্লী যষ্টিমধু। ইতি রাজনিঘণ্টঃ॥

যষ্টীপুষ্পঃ পুং পুত্রজীববৃক্ষঃ। ইতি ভাবপ্রকাশঃ॥

যষ্টীমধু ক্লী মিষ্টমূলবিশেষঃ। জেঠীমধু ইতি মুলহটী ইতিচ হিন্দীভাষা। তৎপর্য্যায়ঃ। মধুযষ্টী ২ মধুবল্লী ৩ মধুস্রবা ৪ মধুকং ৫ মধু ৬ যষ্টীকং ৭ যষ্ট্যাহ্বং ৮। অস্য গুণাঃ। মধুরত্বং। কিঞ্চিত্তিক্তত্বং। শীতলত্বং। চক্ষুষ্যত্বং। পিত্তহরত্বং। রুচ্যত্বং। শোষ তৃষ্ণা ব্রণাপহত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

যষ্ট্যাহ্বং ক্লী যষ্টিমধু। ইতি রাজনির্ঘণ্টঃ॥

যস য উ ইর যত্নে। ইতি কবিকল্পদ্রুমঃ॥ ইর অযসৎ অযাসীৎ অযসীৎ। অস্মাৎ পুষাদিত্বাদিত্যং উ ইত্যন্যে। য পুষস্যতি। কর্ম্মক্লন ইত্যাদিনা কেবলাৎ সংপূর্ব্বাচ্চ অস্মাৎ শ্যন্ বিকল্পাৎ যসতিযস্যতি সংযস্যতি সংযসতি। উ যসিত্বা যস্ত্বা। যতনং যত্নঃ। ইতি দুর্গাদাসঃ॥

যস্কঃ পুং মুনিবিশেষঃ। ইতি মুগ্ধবোধব্যাকরণং॥

যস্বঃ পুং যজমানঃ। ইত্যুণাদিকোষঃ॥

যক্ষ ঙক মহি। ইতি কবিকল্পদ্রুমঃ। ক ঙ যক্ষয়তে। মহি পূজায়াং। ইতি দুর্গাদাসঃ॥

যক্ষঃ পুং গুহ্যকমাত্রং॥ গুহ্যকেশ্বরঃ। ইতি মেদিনী॥ ইন্দ্রগৃহং॥ ধনরক্ষকঃ। ইতি সারস্বতঃ॥ যক্ষস্বরূপং যথা। আজন্ম যক্ষ নিকরাঃ ভবের বর কিঙ্করাঃ। শৈলজপ্রস্তরকরা অঞ্জনাকার মূর্ত্তয়ঃ॥ বিকৃতাকার বদনাঃ পিঙ্গলাক্ষা মহোদরাঃ॥ স্ফুটিকা রক্তবেশাশ্চ দীর্ঘস্কন্ধাশ্চ কেচন। ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ১৭ অধ্যায়ঃ॥ যক্ষগণো যথা। প্রচেতসঃ সুতা যক্ষা স্তেষাং নামানি মে শৃণু। কেবলো হরিকেশশ্চ কপিলঃ

কাঞ্চন তথা ॥ মেঘনাম্নী চ যক্ষাণাং গণ এষ উদাহৃতঃ। তস্য ব্যুৎপত্তি র্যথা। ধাতু র্যক্ষত্যথোক্ত স্তু দনে ক্ষপণে চ সঃ। যদ্যক্ষ তক্তে বাসেষ 'তস্মাদ্যক্ষো' ভবত্যয়ং ॥ ইতি বহ্নিপুরাণে কাশ্যপীয় বংশঃ ॥

যক্ষকর্দ্দমঃ পুং কর্পূরাগুরু কস্তূরী কক্কোলানাং নিশ্রিত সমভাগঃ। ইত্যমরঃ ॥ কর্পূরাদিভি র্গন্ধদ্রব্যৈঃ সমভাগৈঃ সাধিতো হনুলেপন ভেদো যক্ষকর্দ্দম উচ্যতে। যক্ষপ্রিয়ঃ কর্দ্দমো যক্ষকর্দ্দমঃ। কুঙ্কুমাগুরু কস্তূরী কর্পূরং চন্দনং তথা। মহাসুগন্ধ মিত্যুক্তং নামতো যক্ষকর্দ্দমঃ ॥ ইতি ধন্বন্তরিঃ ॥ অন্যত্রাপি কর্পূরাগুরু কস্তূরী কক্কোল ঘর্ষণাদি চ। একীকৃত মিদং সর্ব্বং যক্ষকর্দ্দম ইষ্যতে ॥ ইতি তট্টীকায়াং ভরতঃ ॥

যক্ষতরুঃ পুং বটবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥

যক্ষধূপঃ পুং ধূপসামান্যং ॥ ধূনকধূপঃ। ইতি কেচিৎ ॥ ধুনা ইতি খ্যাত ইতি কেচিৎ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। সর্জ্জরসঃ ২ অরালঃ ৩ সর্ব্বরসঃ ৪ বহুরূপঃ ৫। ইত্যমরঃ ৫ রালঃ ৬ ধূনকঃ ৭ বহ্নিবল্লভঃ ৮। ইতি রভসঃ ॥ সালসারঃ ৯ সালজঃ ১০ সালনির্য্যাসঃ ১১ সর্জ্জ্যঃ ১২। ইতি রত্নমালা ॥ সরলবৃক্ষরসঃ। টারপিনতেল ইতি ভাষা। তৎপর্য্যায়ঃ। পায়সঃ ২ শ্রীবাসঃ ৩ সরলদ্রবঃ ৪। ইতি হেমচন্দ্রঃ ॥

যক্ষরসঃ পুং পুষ্পমদ্যং। তৎপর্য্যায়ঃ। মধ্বাসবঃ ২। ইতি ত্রিকাণ্ডশেষঃ ॥

যক্ষরাজঃ পুং কুবেরঃ। ইতি শব্দরত্নাবলী ॥

যক্ষরাট্ পুং কুবেরঃ ॥ রঙ্গমণ্ডপঃ। ইতি মেদিনী ॥

যক্ষরাট্পুরী স্ত্রী অলকা। সা চ কৈলাসপর্ব্বতস্থিত কুবেরপুরী। ইতি জটাধরঃ ॥

যক্ষরাত্রিঃ স্ত্রী কার্ত্তিকীপূর্ণিমা। তৎপর্য্যায়ঃ। দীপালী ২। ইতি ত্রিকাণ্ডশেষঃ ॥

যক্ষসাধনং ক্লী যক্ষোপাসনা। যথা। যক্ষাণাং যক্ষিণীনাঞ্চ পৈশাচীনাঞ্চ সাধনং। ভূতবেতাল গান্ধর্ব্বং মারণোচ্চাটনানি চ ॥ অধোগমন্মেতেষাং সাধনে ঐহিকং হিতং। ইতি বারাহীতন্ত্রং ॥

যক্ষানলক° স্ত্রী. পিণ্ডখর্জ্জূরফলং। ইতি শব্দমালা ॥
যক্ষাবাসঃ পুং বটবৃক্ষঃ। ইতি রাজ-নির্ঘণ্টঃ ॥
যক্ষিণী স্ত্রী কুবেরপত্নী। ইতি শব্দ-রত্নাবলী ॥ যক্ষভার্য্যা চ ॥
যক্ষী স্ত্রী কুবেরপত্নী। ইতি শব্দ-রত্নাবলী ॥
যক্ষোড়ুম্বরক° স্ত্রী অশ্বত্থফলং। ইতি ত্রিকাণ্ডশেষঃ ॥
যক্ষ্মঘ্নী স্ত্রী দ্রাক্ষা। ইতি শব্দমালা॥
যক্ষ্মা পুং রোগবিশেষঃ। তৎ-পর্য্যায়ঃ। ক্ষয়ঃ ২ শোষঃ ৩। ইত্যমরঃ। রাজযক্ষ্মা ৪ রোগরাট্ ৫। অথ রাজযক্ষ্মাধিকারঃ। তত্র রাজযক্ষ্মণো বিপ্রকৃষ্টং সন্নিকৃষ্টঞ্চ নিদান মাহ। বেগরোধাৎ ক্ষয়া-চ্চৈব সাহসাদ্বিষমাশনাৎ। ত্রি-দোষো জায়তে যক্ষ্মা গদো হেতু চতুষ্টয়াৎ ॥ বেগো হত্র বাত মূত্র পুরীষাণাং। বাত মূত্র পুরীষাণি নিগৃহ্লাতি যদা নরঃ। ইতি চরক বচনাৎ ॥ ক্ষয়াৎ ক্ষীয়তে হনেনে-তি ক্ষয়ঃ তেনাতিব্যবায়ানশনে-র্ষ্যাদয়ো ধাতুক্ষয় হেতবঃ ক্ষয় শ দ্দেনোচ্যন্তে। সাহসাৎ বলবতা সহং মল্লযুদ্ধাদিতঃ। বিষমাশনাৎ বহু স্তোক মকালে বা তদুক্তং বিষ-মাশনং। তস্মাৎ। ত্রিদোষঃ সান্নি-পাতিকঃ। হেতু চতুষ্টয়াৎ অন্যে-পি হেতবঃ হেতু চতুষ্টয় এবান্ত র্ভবন্তি। যক্ষ্মণঃ পর্য্যায়াঃ রাজযক্ষ্ম ক্ষয় শোষাঃ ॥ * ॥ যক্ষ্মাদীনাং শ-ব্দানাং নিরুক্তি মাহ। বৈদ্যো ব্যাধি মতাং যস্মাৎ ব্যাধের্যত্নেন যক্ষ্যতে। স যক্ষ্মা প্রোচ্যতে লোকে শব্দশা-স্ত্রবিশারদৈঃ ॥ যক্ষ্যতে পূজ্যতে। রাজ্ঞ শ্চন্দ্রমসো যস্মাদভূদেষ কি-লাময়ঃ। তস্মাত্তং রাজযক্ষ্মেতি কে-চিদাহু র্মনীষিণঃ ॥ ক্রিয়াক্ষয়কর-ত্বাত্তু ক্ষয় ইত্যুচ্যতে বুধৈঃ। সং-শোষণাদ্রসাদীনাং শোষ ইত্যভি-ধীয়তে ॥ * ॥ সংপ্রাপ্তি মাহ। কফ প্রধানৈ দোষৈস্তু রুদ্ধেষু রসবর্ত্মসু। অতিব্যবায়িনো বাপি ক্ষীণে রেতস্য-নন্তরা ॥ ক্ষীয়ন্তে ধাতবঃ সর্ব্বে ততঃ শুষ্যতি মানবঃ। কফ প্রধানৈ র্দো-ষৈঃ রসবত্মসু রুদ্ধেষু অনন্তরা সর্ব্বে ধাতবঃ ক্ষীয়ন্তে ততো মানবঃ শুষ্য-তি। কারণভূতস্য রসস্য ক্ষয়ে কা-র্য্যাণাং রক্তাদীনা মনুক্রমেণ ক্ষীয়-মাণত্বাৎ ॥ * ॥ মার্গাবরোধে রসক্ষয় হেতু মাহ চরকঃ। রস স্রোতঃসু রু-দ্ধেষু স্বস্থানস্থো বিদহ্যতে। স ঊর্দ্ধং

কাস বেগেন বহুরূপঃ প্রবর্ত্ততে ॥ স্বস্থানস্থঃ হৃদয়স্থঃ । কাসং বিনাপি রসক্ষয়ো ভবতি মার্গাবরোধ কুপিত বাতেন রসস্য শোষণাৎ । উক্তঞ্চ । বায়ো ধাতুক্ষয়াৎ কোপো মার্গস্যাবরণেন চেতি ॥ ॥ অনুলোমক্ষয়ং দর্শয়িত্বা প্রতিলোমক্ষয়মপ্যাহ । অতিব্যবায়িনো বা রেতসি ক্ষীণে প্রতিলোম ক্রমেণানন্তরা সর্ব্বে ধাতবো রসপর্য্যন্তাঃ ক্ষীয়ন্তে । তদ্যথা । শুক্রে ক্ষীণে মজ্জা ক্ষীয়তে মজ্জনি ক্ষীণে অস্থি ক্ষীয়তে । এবং পূর্ব্বং পূর্ব্বং ক্ষীয়তে । নন কার্য্যস্য শুক্রস্য ক্ষয়ে কথং কারণ ভূতানাং মজ্জাদীনাং ক্ষয়ঃ । উচ্যতে । শুক্রক্ষয়াদ্বায়ুঃ কুপ্যতি । যদুক্তং । বায়ো ধাতুক্ষয়াৎ কোপো মার্গস্যাবরণেন চেতি । স বায়ুঃ সান্নিধ্য ক্রমেণ মজ্জাদীন্ সর্ব্বান্ ধাতূন্ সংশোষয়তি । তত স্তদনন্তরং মানবঃ শুষ্যতি ॥ ॥ পূর্ব্বরূপ মাহ । শ্বাসাঙ্গসাদ কফ সংস্রব তালুশোষ বম্যগ্নিসাদ মদ পীনস কাস নিদ্রাঃ । শোষে ভবিষ্যতি ভবন্তি স চাপি জন্তুঃ শুক্লেক্ষণো ভবতি মাংসপরো রিরংসুঃ ॥ স্বপ্নেষু কাক শুক শল্লকি নীলকণ্ঠ গৃধ্রা স্তথৈব কপয়ঃ কৃকলাসকাশ্চ । তং বাহয়ন্তি স নদী র্বিজলাশ্চ পশ্যেৎ শুষ্কাং স্তরূন্ পবন ধূম দবার্দ্দিতাংশ্চাপি ॥ স্বরূপ লক্ষণ মাহ । অংস পার্শ্বাভিতাপশ্চ সন্তাপঃ করপাদয়োঃ । জ্বরঃ সর্ব্বাঙ্গগশ্চেতি লক্ষণং রাজযক্ষ্মণঃ ॥ অংসযোঃ পার্শ্বযোঃ অভিতাপঃ পীড়া । অত্র সকল ধাতুক্ষয় পূর্ব্বকঃ সকল শরীর শোষোপি বোদ্ধব্যঃ । ক্ষীয়ন্তে ধাতবঃ সর্ব্বে ততঃ শুষ্যতি মানব ইতি সংপ্রাপ্তেঃ । এবং ষড়্রূপে একাদশরূপে চ বোদ্ধব্যং । এতানি ত্রীণি লক্ষণানি প্রায়ো ভাবিত্বেন চন্দ্রকেণোক্তানি । সুশ্রুতেন যক্ষ্মণি ষট্ লক্ষণান্যুক্তানি । তদুদ্দেশো জ্বরঃ কাসঃ শ্বাসঃ শোণিতদর্শনং । স্বরভেদশ্চ জায়েত ষড়্রূপে রাজযক্ষ্মণি ॥ ॥ উল্বণতয়া দোষাণাং ভেদাদেকাদশ লক্ষণান্যাহ । স্বরভেদোঽনিলাচ্ছূলং সঙ্কোচশ্চাংস পার্শ্বযোঃ । জ্বরো দাহোঽতিসারশ্চ পিত্তাদ্রক্তস্য চাগমঃ ॥ শিরসঃ পরিপূর্ণত্ব মভক্ত ছন্দ এব চ । কাসঃ কণ্ঠস্য চোদ্ধ্বংসো বিজ্ঞেয়ঃ কফ কোপতঃ ॥ অনিলাদুল্বণাৎ এব পিত্তাৎ কফাচ্চ । যত আহ সুশ্রুতঃ । এক এব মতঃ শোষঃ সন্নিপাতাত্মকো গদঃ । উদ্রেকাত্তত্র লিঙ্গানি দো-

ঘ্রাণং নিপতন্তি চ॥ ॥ ❀ ॥ অসাধ্য যক্ষ্মিণ মাহ। একাদশভি রেভি র্বা ষড়্‌ভি র্বাপি সমন্বিতং। ত্রিভি র্বা পীড়িতং লিঙ্গৈ র্জ্বর কাসাসৃগাময়ৈঃ॥ জহ্যাচ্ছোষার্দ্দিতং জন্তু মিচ্ছেৎ সুবিপুলং যশঃ॥ ❀ ॥ তত্র বিশেষমাহ। সর্ব্বৈ রর্দ্ধৈ স্ত্রিভি র্বাপি লিঙ্গৈ র্মাংস বলক্ষয়ৈঃ। যুক্তো বর্জ্য শ্চিকিৎস্যস্তু সর্ব্বরূপোঽপ্যতোঽন্যথা॥ সর্ব্বৈ র্লিঙ্গৈ রেকাদশভিঃ। অর্দ্ধৈঃ ষড়্‌ভিঃ। ত্রিভি জ্বর কাস রুধিরবমনৈঃ। অতোঽন্যথা মাংসে বলে সতি সর্ব্বরূপো ঽপি পুত্যা ক্ষায় চিকিৎস্যঃ। মহাশনং ক্ষীয়মাণ মতীসার নিপীড়িতং। শূনমুষ্কোদরঞ্চৈব যক্ষ্মিণং পরিবর্জয়েৎ ॥ মহাশনং ক্ষীয়মাণ মিত্যেক মসাধ্য লক্ষণং। অতীসার নিপীড়িত মিতি দ্বিতীয়ং। যত উক্তং। মলায়ত্তং বলং পুংসাং শুক্রায়ত্তন্তু জীবনং। তস্মা দ্যত্নেন সংরক্ষেদ্যক্ষ্মিণো মল রেতসী॥ শূনমুষ্কোদর মিতি তৃতীয়ং॥ ❀ ॥ অরিষ্টমাহ। শুক্লাক্ষ মন্নদ্বেষ্টার মূর্দ্ধ শ্বাস নিপীড়িতং। কৃচ্ছ্রেণ বহু মেহন্তং যক্ষ্মা হন্তীহ মানবং॥ মেহন্তং শুক্রং ক্ষরন্তং। শুক্লাক্ষত্বাদীনি একৈকশোঽরিষ্ট লক্ষণানি ॥❀॥ অবধিমাহ। পরং দিন সহস্রন্তু যদি জীবতি মানবঃ। সুভিষগ্‌ভি রুপক্রান্ত স্তরুণঃ শোষ পীড়িতঃ॥ শোষপীড়িতো মানব শ্চেত্তরুণো ভবতি। সুভিষগ্‌ভি রুপক্রান্তো ভবতি। তদা পরং দিনং সহস্রং। দ্বিতীয় দিন সহস্রং যদি জীবতি তত্র জীবন বিকল্প ইত্যর্থঃ। এতেন শোষপীড়িতো মানব শ্চেত্তরুণো ভবতি। সদ্বৈদ্যৈ শ্চিকিৎস্যো ভবতি। তদা প্রথম দিনসহস্রং জীবেদেব ইত্যুক্তা চিকিৎস্য মাহ। জ্বরানুবন্ধ রহিতং বলবন্তং ক্রিয়া সহং। উপক্রমেদাত্মবন্তং দীপ্তাগ্নি মকৃশং নরং॥ আত্মবন্তং যত্নবন্তং। ধৃতিমন্তং বা॥ ❀ ॥ অথ নিদানবিশেষৈঃ শোষবিশেষানাহ। ব্যবায শোক বার্দ্ধক্য ব্যায়ামাধ্ব প্রশোষিতান্। ব্রণোরঃক্ষত সংজ্ঞৌ চ শোষিণৌ লক্ষণৈঃ শৃণু। ব্রণোরঃক্ষতসংজ্ঞৌ শোষিণৌ। ব্রণশোষী উরঃক্ষতশোষী চ॥ ❀ ॥ তত্র ব্যবায়শোষিণো লক্ষণ মাহ। ব্যবায়শোষী শুক্রস্য ক্ষয় লিঙ্গৈরুপদ্রুতঃ। পাণ্ডুদেহো যথা পূর্ব্বং ক্ষীয়ন্তে চাস্য ধাতবঃ॥ শুক্রস্য ক্ষয় লিঙ্গৈঃ সুশ্রুতোক্তৈঃ। তানি যথা। শুক্রক্ষয়ে মেঢ্র বৃষণয়ো র্বেদনা অশক্তি র্মৈথুনে চিরাদ্বা প্রসেকঃ প্রসেকে

চাল্প শুক্র দর্শন মিতি। যথা পূর্ব্বং ক্ষীয়ন্তে চাস্য ধাতবঃ প্রথমং শুক্রং ক্ষীয়তে পশ্চাৎ শুক্রক্ষয় জনিত বায়ুনা মজ্জাদযোপি ধাতবো যথা পূর্ব্বং ক্ষীয়ন্তে ॥ ❀ ॥ শোকশোষিণো লক্ষণ মাহ। প্রধ্যান শীলঃ স্রস্তাঙ্গঃ শোকশোষ্যপি তাদৃশঃ। বিনা শুক্রক্ষয়কৃতৈ র্বিকারৈ রুপলক্ষিতঃ॥ প্রধ্যানশীলঃ যস্যা ভাবেন শোকো জনিত স্তদ্ধ্যান পরঃ। স্রস্তাঙ্গঃ শিথিলাঙ্গঃ তাদৃশঃ ব্যবায়শোষি সদৃশঃ। তেন শুক্রাদি সর্ব্ব ধাতুক্ষয়যুক্তো ভবতি। পরং শুক্র ক্ষয়কৃতৈ র্বিকারৈ র্মেঢ্র বৃষণ বেদনাদিভি র্বর্জ্জিতো ভবতি। ব্যাধিস্বভাবাৎ ॥ ❀ ॥ জরাশোষিণো লক্ষণ মাহ। জরাশোষী কৃশো মন্দবীর্য্য বুদ্ধিবলেন্দ্রিয়ঃ। কম্পনোঽরুচিমান্ ভিন্নকাংস্য পাত্র হতস্বরঃ॥ ষ্ঠীবতি শ্লেষ্মণা হীনং গৌরবারুচি পীড়িতঃ। সংপ্রস্রুতাস্য নাসাক্ষঃ শুষ্ক রুক্ষমলচ্ছবিঃ॥ প্রসুপ্ত গাত্রাবয়বঃ শুষ্ক ক্লোম গলাননঃ। মন্দশব্দঃ স্বল্পার্থঃ। শুষ্ক রুক্ষ মলচ্ছবিঃ শুষ্ক রুক্ষে মলচ্ছবী যস্য সঃ। প্রসুপ্ত গাত্রাবয়বঃ প্রসুপ্তঃ স্পর্শাজ্ঞঃ। ক্লোমং তিলকং পিপাসা স্থানং ॥ ❀ ॥ অধ্বশোষিণো লক্ষণ মাহ। অধ্বপ্রশোষী স্রস্তাঙ্গঃ সংভৃষ্ট পরুষচ্ছবিঃ। সংভৃষ্টস্যেব পরুষা ছবির্যস্য সঃ॥ ❀ ॥ ব্যায়ামশোষিণো লক্ষণমাহ। ব্যায়াম শোষী ভূয়িষ্ঠ মেভি রেব সমন্বিতঃ। লিঙ্গৈ রুরঃক্ষত কৃতৈঃ সংযুক্তশ্চ ক্ষতং বিনা। এভিরেব স্রস্তাঙ্গত্বাদিভি রধ্বশোষিণো লক্ষণৈরেব। ভূয়িষ্ঠং অত্যর্থং ॥ ❀ ॥ সনিদানং ব্রণশোষ মাহ। রক্তক্ষয়াদ্বেদনাভিস্তথৈবাহারযন্ত্রণাৎ। ব্রণিতস্য ভবেচ্ছোষো যাপ্যো ঽসাধ্যশ্চ সম্মতঃ॥ ❀ ॥ উরঃক্ষতস্য নিদান মাহ। ধনুষা যস্যতো ঽত্যর্থং ভার মুদ্বহতো গুরুং। যুধ্যমানস্য বলিভিঃ পততো বিষমোচ্চতঃ॥ বৃষং হয়ং বা ধাবন্তং দম্যং চান্যং নিগৃহ্নতঃ। শিলাকাষ্ঠাশ্মনির্ঘাতান্ ক্ষিপতো নিঘ্নতঃ পরান্॥ অধীয়ানস্য চাত্যুচ্চৈ র্দূরং বা ব্রজতো দ্রুতং। মহানদীং বা তরতো হয়ৈ র্বা সহ ধাবতঃ॥ সহসোৎপততো দূরং তূর্ণঞ্চাতিপ্রনৃত্যতঃ। অথান্যৈঃ কর্ম্মভিঃ ক্রূরৈ র্ভৃশমভ্যাহতস্য বা॥ স্ত্রীষু চাতিপ্রসক্তস্য রুক্ষাল্প প্রমিতাশিনঃ। বিক্ষতে বক্ষসি ব্যাধি র্বলবান্ সমুদীর্য্যতে॥ আযাস্যতঃ আযাসং কুর্ব্বতঃ। দম্যং বৃষাদিকং। অন্যঞ্চ গজোষ্ট্রাদিকং

শিলা দীর্ঘপাষাণঃ। অশ্ম প্রস্তরখণ্ডঃ ॥ নির্ঘাতো হস্ত্রবিশেষঃ। ব্যাধিঃ উরঃক্ষতাখ্যঃ ॥ ❀ ॥ উরঃক্ষতস্য লক্ষণ মাহ। উরো বিরুজ্যতে হত্যর্থং ভিদ্যতে চ বিভজ্যতে। প্রপীড্যতে ততঃ পার্শ্বে শুষ্যত্যঙ্গং প্রবেপতে ॥ ক্রমাদ্বীর্য্যং বলং বর্ণো রুচি রগ্নিশ্চ হীযতে। জ্বরো ব্যথা মনো দৈন্যং বিড্‌ভেদো হগ্নিবধ স্তথা ॥ দুষ্টঃ শ্যাবঃ সুদুর্গন্ধঃ পীতো বিগ্রথিতো বহু। কাসমানস্য চাভীক্ষ্ণং কফঃ সাসৃক্ প্রবর্ত্ততে ॥ স ক্ষতঃ ক্ষীযতে হত্যর্থং তথা শুক্রৌজসোঃ ক্ষযাৎ। অব্যক্তং লক্ষণং তস্য পূর্ব্বরূপ মিতি স্মৃতং ॥ বিরুজ্যতে পীড্যতে। ভিদ্যতে বিদার্য্যত ইব। বিভজ্যতে দ্বিধা ক্রিযত ইব। স পুরুষঃ। ক্ষতঃ উরঃক্ষতবান্। অত্যর্থং ক্ষীযতে ক্ষীণো ভবতি। ন কেবলং সাস্রু কফ ক্ষযাদেব ক্ষীণো ভবতি। তথা শুক্রৌজসোঃ ক্ষযাৎ। স্ত্র্যতিসেবনাদিনা শুক্রৌজসোঃ ক্ষযাদপি ক্ষীণো ভবতি ॥ ❀ ॥ উরঃক্ষতস্য বিশিষ্টং লক্ষণ মাহ। উরো রুক্ শোণিত ছর্দ্দিঃ কাসো বৈশেষিকঃ ক্ষতে। ক্ষীণে সরক্ত মূত্রত্বং পার্শ্ব পৃষ্ঠ কটিগ্রহঃ ॥ ক্ষতে উরঃক্ষতবতি। উরো রুক্ শোণিত ছর্দ্দিঃ কাসো বৈশেষিকঃ বিশেষকতো ভবত্যেব। তস্মিন্নেবোরঃক্ষতবতি সাস্রু কফ শুক্রৌজসাং ক্ষযাৎ ক্ষীণে সরক্ত মূত্রত্বং পার্শ্ব পৃষ্ঠ কটি গ্রহশ্চ ভবতি ॥ ❀ ॥ নিদান বিশেষেণোরঃক্ষতস্য লক্ষণ বিশেষ মাহ। ক্ষুণারোধাৎ ক্ষযাচ্চৈব কোষ্ঠাৎ প্রতিমলাত্তথা। ক্ষতোরস্কস্যাম্লপাকে নিঃশ্বাসো বাতি পূতিকঃ ॥ ক্ষযাৎ ধাতুক্ষযহেতো রতিব্যবাযাদিতঃ কোষ্ঠাৎ প্রতিমলাৎ কোষ্ঠাৎ প্রতিলোম বাতেন প্রতিলোম বলাৎ পূতিকঃ পূতিগন্ধঃ ॥ ❀ ॥ উরঃক্ষতস্য সাধ্য যাপ্যাসাধ্য লক্ষণ মাহ। অল্প লিঙ্গস্য দীপ্তাগ্নেঃ সাধ্যো বলবতো নবঃ। পরিসম্বৎসরো যাপ্যঃ সর্ব্বলিঙ্গন্তু বর্জযেৎ ॥ ❀ ॥ ❀ ॥ অথ রাজযক্ষ্ম চিকিৎসা। বলিনো বহুদোষস্য পঞ্চ কর্ম্মাণি কারযেৎ। যক্ষ্মিণঃ ক্ষীণ দেহস্য তৎ কৃতং স্যাদ্বিষোপমং ॥ মলাযত্তং বলং পুংসাং শুক্রাযত্তন্তু জীবনং। তস্মাদ্যত্নেন তং রক্ষেদ্যক্ষ্মিণো মল রেতসী ॥ শালি ষষ্টিক গোধূম যব মুদ্গাদযো হিতাঃ। মদ্যানি জাঙ্গলাঃ পক্ষি মৃগাঃ শস্তা বিশোষিণঃ ॥ স পিপ্পলীকং সযবং স কুলত্থং স

নাগরং। দাড়িমামলকোপেতং স্নিগ্ধ মাজং রসং পিবেৎ॥ তেন ষড়্বিনিবর্ত্তন্তে বিকারাঃ পীনসাদয়ঃ। দ্রব্যতো দ্বিগুণং মাংসং সর্ব্বতো ষট্‌গুণং জলং॥ পাদস্থং সংস্কৃতঞ্চাজ্যে ষডঙ্গো যূষ উচ্যতে। তদ্যথা। যব পল ১ জলথপল ১ ছাগমাংসপল ৪ জলপল ৪৮ শেষপল ১২ ততঃ পলমিতে ঘৃতে সংস্করণীয়ং। তত্র কর্ষ মিতং সৈন্ধবং দেয়ং সৌরভার্থং হিঙ্গু চ দেয়ং। পিপ্পলী নাগরঞ্চ পৃথক্ মাষমিতং কল্কীকৃত্য দেয়ং। দাড়িমামলকাভ্যা মম্লত্বং সাধ্যং। ষডঙ্গযূষঃ॥ * ॥ কঙ্কভত্বক্ নাগবলা বানরীবীজং বিচূর্ণিতং পয়সা। পীতং মধু ঘৃত যুক্তং সসিতং যক্ষ্মাদি কাসহরং॥ ছাগমাংসং পয়শ্ছাগং ছাগং সর্পিশ্চ নাগরং। ছাগোপসেবা শয়নং ছাগমধ্যে তু যক্ষ্মণুৎ। মধুতাপ্য বিডঙ্গাশ্মং জতু লোহ ঘৃতাভয়া। ঘ্নন্তি যক্ষ্মাণ মত্যুগ্রং সেব্যমানা হিতাশিনঃ॥ তাপ্যং সুবর্ণমাক্ষীকং। শর্করা মধু সংযুক্তং নবনীতং লিহন্ ক্ষয়ী। ক্ষীরাশী লভতে পুষ্টি মতুল্যে চাজ্য মাক্ষিকে॥ সিতোপলা তুগাক্ষীরী পিপ্পলী বহুলাত্বচঃ। অন্ত্যাদূর্দ্ধং দ্বিগুণিতা শ্চূর্ণিতা মধু সর্পিষা॥ লেহয়েদ্রাজরোগার্ত্তং কাস শ্বাস জ্বরাতুরং। পার্শ্বশূলিন মল্পাগ্নিং সুপ্তজিহ্বং কচিচ্যুতং॥ হস্ত পাদাঙ্গ দাহে চ জ্বরে রক্ত তথোর্দ্ধগে। সিতোপলা মিশ্রী। বহুলা সূক্ষ্মেলা। সিতোপলাদি রবলেহঃ॥ * ॥ জাতীফলং বিডঙ্গানি চিত্রকং তগরং তিলা। তালীসং চন্দনং শুণ্ঠী লবঙ্গ মুপকুঞ্চিকা॥ কর্পূর শ্চাভয়া ধাত্রী মরীচং পিপ্পলী তুগা। এষা মক্ষ সমা ভাগা শ্চাতুর্জাতক সংযুতাঃ॥ পলানি সপ্ত ভঙ্গায়াঃ সিতা সর্ব্ব সমা মতা। চূর্ণ মেতৎ ক্ষয়ং কাসং শ্বাসঞ্চ গ্রহণী গদং॥ অরোচকং প্রতিশ্যায়ং তথা চানল মন্দতাং। এতান্ রোগান্ নিহন্ত্যেব বৃক্ষ মিন্দ্রাশনি র্যথা॥ জাতীফলাদ্যচূর্ণং॥ * ॥ বালরোগাধিকারোক্তং তৈলং লাক্ষাদি যোজয়েৎ। অভ্যঙ্গে যক্ষ্মিণো নিত্যং বৃদ্ধ বৈদ্যোপদেশতঃ॥ বাসকস্য রস প্রস্থং মাণিকা সিত শর্করা। পিপ্পলী দ্বিপলং তাবৎ সর্পিষশ্চ শনৈঃ পচেৎ। তস্মিন্ লেহত্ব মায়াতে শীতে ক্ষৌদ্র পলাষ্টকং॥ দত্ত্বাবতারয়েদ্বৈদ্যো লীঢো লেহোয মুত্তমঃ। নিহন্তি রাজযক্ষ্মাণং কাসং

শ্বাসঞ্চ দারুণং ॥ পার্শ্বশূলঞ্চ হৃচ্ছূলং রক্তপিত্তং জ্বরন্তথা। রাসাবলেহঃ॥ ॥ অথ ব্যবায়াদি হেতুক শোষচিকিৎসা। তত্র ব্যবায়শোষ চিকিৎসা। ব্যবায়শোষিণং ক্ষীর রস মাংসাজ্য ভোজনৈঃ। সুকূলৈ র্মধুরৈ হৃদ্যৈ জীবনীয়ৈ রুপাচরেৎ ॥ রসো মাংসরসঃ সুকূলৈ হিঁ তৈঃ ॥ ॥ শোকশোষ চিকিৎসা॥ হর্ষণা শ্বাসনৈঃ ক্ষীরৈঃ স্নিগ্ধৈ র্মধুর শীতলৈঃ। দীপনৈ র্লঘুভি শ্চান্নৈঃ শোকশোষ মুপাচরেৎ ॥ ॥ ব্যায়ামশোষ চিকিৎসা। ব্যায়ামশোষিণং স্নিগ্ধৈঃ ক্ষত ক্ষয হিতৈ হিঁ তৈঃ। উপাচরেজ্জীবনীয়ৈ র্বিধিনা শ্লেষ্মিকেন তু ॥ ॥ অধ্বশোষ চিকিৎসা। আস্যাসুখৈ দিবাস্বপ্নৈঃ শীতৈ র্মধুর বৃংহনৈঃ। অম্ল মাংস রসাহারৈ রধ্বশোষ মুপাচরেৎ ॥ ॥ ব্রণশোষ চিকিৎসা। ব্রণশোষং জয়েৎ স্নিগ্ধৈ দীপনৈঃ স্বাদু শীতলৈঃ। ঈষদম্লৈ রনম্লৈ র্বা যূষ মাংস রসাদিভিঃ ॥ ॥ অথোরঃক্ষত চিকিৎসা। বলাশ্বগন্ধা পর্ণী বহুপুত্রী পুনর্নবা। পয়সা নিত্য মভ্যস্তাঃ শময়ন্তি ক্ষত ক্ষয়ং ॥ শ্রীপর্ণী গম্ভারী। বহুপুত্রী শতাবরী। বলাদিচূর্ণং ॥ ॥ এলা পত্র ত্বচো দ্রাক্ষা পিপ্পল্যর্দ্ধপলং পৃথক্। সিতা মধুক খর্জ্জুর মৃদ্বীকাশ্চ পলোন্মিতাঃ ॥ সংচূর্ণ্য মধুনা যুক্তা বটিকা সংপ্রকল্পয়েৎ। অক্ষমাত্রা ততশ্চৈব ভক্ষয়েচ্চ দিনে দিনে ॥ ক্ষত ক্ষয়ং জ্বরং কাসং শ্বাসং হিক্কাং বমিং ভ্রমং। মূর্চ্ছা মদং তৃষা শোষং পার্শ্বশূল মরোচকং। প্লীহান মামবাতঞ্চ রক্তপিত্তং স্বরক্ষয়ং। এলাদিগুটিকা হন্তি বৃষ্যা সন্তর্পণী পরা ॥ ॥ দ্রাক্ষাযাঃ প্রস্থ মেকন্তু মধুকস্য পলাষ্টকং ॥ পচেত্তোযাষ্টকে শুদ্ধে পাদশেষেণ তেন তু॥ পলিকে মধুক দ্রাক্ষে পিষ্টে কৃষ্ণা পল দ্বযং। প্রদায সর্পিষঃ প্রস্থং পচেৎ ক্ষীরে চতুর্গুণে॥ সিদ্ধে শীতে পলান্যষ্টৌ শর্করাযাঃ প্রদাপযেৎ। এতদ্রাক্ষাঘৃতং সিদ্ধং ক্ষত ক্ষীণে সুখাবহং ॥ বাত পিত্ত জ্বর শ্বাস বিস্ফোটক হলীমকান্। প্রদর রক্তপিত্তঞ্চ হন্যান্মাংস বলপ্রদং ॥ দ্রাক্ষাদিঘৃতং॥ ॥ ক্ষীরে ধাত্রী বিদারী ক্ষু বরীণাঞ্চ তথা রসে। পচেৎ সমে ঘৃত প্রস্থং মধুরৈঃ কর্ষ সম্মিতৈঃ ॥ দ্রাক্ষা দ্বি চন্দনোশীর শর্করোৎপল পদ্মকৈঃ। মধূক কুসুমনান্তা

কাশ্মরী তৃণ সংজ্ঞকৈঃ ॥ প্রস্থার্দ্ধং মধুনঃ শীতে শর্করার্দ্ধ তুলান্তথা। পলার্দ্ধকাংশ্চ সংচূর্ণ্য ত্বগেলা পত্র কেশরান্ ॥ বিনীয তত্র সংলিহ্যা-ন্মাত্রাং নিত্যং সুযন্ত্রিতঃ। অমৃত প্রাশ মিত্যেতদশ্বিভ্যাং পরিকীর্ত্তিতং ॥ ক্ষীর মাংসাশিনাং হন্তি রক্ত পিত্ত ক্ষত ক্ষয়ং। তৃষ্ণারুচি শ্বাস কাস ছর্দ্দি মূর্চ্ছা প্রমর্দনং ॥ মূত্রকৃচ্ছ্র জ্বরঘ্নঞ্চ বল্যং স্ত্রী রতিবর্দ্ধনং। অমৃত প্রাশাবলেহঃ ॥ * ॥ যদ্মচ তর্পণং শীত মবিদাহি হিতং লঘু। অন্ন পানং নিষেব্যন্তৎ ক্ষত ক্ষীণৈঃ সুখার্থিভিঃ ॥ শোকং স্ত্রিয়ঃ ক্রোধ মসূয়তাঞ্চ ত্যজেদুদারান্ বিষযান্ ভজেচ্চ। তথা দ্বিজাতীং স্ত্রিদশান্ গুরূংশ্চ বাচশ্চ পুণ্যাঃশৃণুযাদ্দিজেভ্যঃ ॥ * ॥ অথ রাজযক্ষ্মণি রসাঃ। রস ভস্মামৃতা সত্ত্বং লৌহং মধু ঘৃতান্বিতং। অমৃতেশ্বর নাম্নায়ং ষড়্ভুজো রাজযক্ষ্মজিৎ ॥ রসভস্ম মারিতো রসঃ ॥*॥ অমৃতাসত্ত্বং গুড়ূচী সত্ত্বং। লৌহং মারিতং। অমৃতেশ্বরোরসো রাজযক্ষ্মণি রসেন্দ্র চিন্তামণৌ। ত্রযো হংশা মারিতাৎ সূতাদেকোংশো হেম ভস্মতঃ ॥ একোংশো মৃত তাম্রস্চ শিলা গন্ধশ্চ তালকং। প্রত্যেকং ভাগযুগ্মং স্যাদেতৎ সর্ব্বং বিচূর্ণযেৎ ॥ বরাটী পূরযেত্তেন ছাগীক্ষীরেণ টঙ্কণং। পিষ্ট্বা তেন মুখং রুধ্বা মৃদ্ভাণ্ডে তাংশ্চ পূরযেৎ। ততো গজপুটে পক্ত্বা চূর্ণযেৎ স্বাঙ্গ শীতলং ॥ রসোরাজ মৃগাঙ্কো হয়ং চতুর্গুঞ্জঃ ক্ষযাপহঃ ॥ মরিচৈ রূনবিংশত্যা কণাভি র্দশভি স্তথা ॥ মধুনা সর্পিষা চাপি দদ্যাদেতং রসং ভিষক্। অনেন নশ্যতি ক্ষিপ্রং বাত শ্লেষ্ম ভব ক্ষযঃ ॥ রাজমৃগাঙ্কো রসো রাজযক্ষ্মণি রসেন্দ্রচিন্তামণৌ ॥ * ॥ শুদ্ধসূতং দ্বিধা গন্ধং কুর্য্যাৎ খল্লেন কজ্জলীং তযোঃ সমং তীক্ষ্ণ চূর্ণং মর্দ্দযেৎ কন্যকাদ্রবৈঃ ॥ ত্রিযাম মাতপে গোলং তাম্রপাত্রে বিধারযেৎ। আচ্ছাদ্যেরণ্ড পত্রেণ স্যাদুষ্ণং যামযুগ্মতঃ ॥ ধান্যরাশৌ ন্যসেৎ পশ্চাদহোরাত্রাত্তদুদ্ধরেৎ। সংচূর্ণ্য গালযেদ্বস্ত্রে সত্যং বারিতরং ভবেৎ ॥ ত্রিকটু ত্রিফলৈলাভি র্জাতীফল লবঙ্গকৈঃ। নব ভাগোন্মিতৈ রেতৈঃ সম এব রসো ভবেৎ ॥ নিষ্কদ্বয মিতং নিত্যং মধুনা সহ লেহযেৎ। অয মগ্নিরসো নাম্না কাস ক্ষয হরঃ পরঃ ॥ অগ্নিরসঃ শার্ঙ্গধরে। ইতি ভাবপ্রকাশে রাজযক্ষ্মাধিকারঃ ॥

যা ন গতৌ। ইতি কবিকল্পদ্রুমঃ॥
ন যাতি। ইতি দুর্গাদাসঃ॥
যাগঃ পং যজ্ঞঃ। ইত্যমরঃ॥ তত্র
শ্রৌতাগ্নিকৃত্য হবির্যজ্ঞাঃ সপ্ত।
যথা। অগ্ন্যাধানং তদেবাগ্নিহোত্রং
১ দর্শপৌর্ণমাসৌ ২ পিণ্ডপিতৃয-
জ্ঞঃ ৩ আগ্রয়ণং ৪ চাতুর্মাস্যঃ ৫
নিরূঢ়পশুবন্ধঃ ৬ সৌত্রামণিঃ ৭।
স্মার্ত্তাগ্নিকৃত্য পাকযজ্ঞাঃ সপ্ত।
যথা। ঔপাসনং ১ বৈশ্বদেবঃ ২
স্থালীপাকঃ ৩ আগ্রয়ণং ৪ সর্পব-
লিঃ ৫ ঈশানবলিঃ ৬ অষ্টকান্বষ্টকা
৭। শ্রৌতাগ্নিসপ্তসংস্থাঃ। যথা।
সোমযাগঃ সএবাগ্নিষ্টোমঃ ১ অ-
ত্যগ্নিষ্টোমঃ ২ উক্‌থ্যঃ ৩ ষোড়শী
৪ বাজপেয়ঃ ৫ স দ্বিবিধঃ সংস্থা
রূপশ্চ। অতিরাত্রঃ ৬ অপ্তূর্য্যা-
মঃ ৭। উত্তরক্রতবো বহবঃ। যথা।
মহাব্রতং ১ সর্ব্বতোমুখং ২ রাজসূ-
য়ঃ ৩ পৌণ্ডরীকং ৪ অভিজিৎ ৫
বিশ্বজিৎ ৬ অশ্বমেধঃ ৭ বৃহস্পতি-
সবঃ ৮ আঙ্গিরসঃ ৯ চয়নাদ্যষ্টাদ-
শ ২৭। ইত্যাদি শ্রৌতসূত্রং॥*॥ স-
র্ব্বদেবানাং যাগকালো যথা। শুক্র-
উবাচ। স্বল্পেনৈব তু দ্রব্যেণ মহা-
পুণ্যং যথা ভবেৎ। তদহং শ্রোতু-
মিচ্ছামি গ্রহযাগং সুরেশ্বর॥ ব্র
হ্মোবাচ। শৃণু বৎস প্রবক্ষ্যামি
যথা ত্বং পরিপৃচ্ছসি। অল্পকেন ম-
হাপুণ্যং গ্রহর্ক্ষ তিথি যৌগিকং॥
ভৃগু পূর্ণাষ্টমী যোগং শিবযাগেষু
চোত্তমং। মৃদবর্গঞ্চ ভাগ্যঞ্চ উমাযা
ভৃগুবাসরে॥ দৈব যোগাৎ যদা ষষ্ঠী
পুষ্যর্ক্ষ রবিবাসরং। স্কন্দযাগ স্তদা
কার্য্যঃ সর্ব্বকাম প্রসাধকঃ॥ বারেণ
বা যদা সূর্য্যঃ সপ্তমী বিজয়া মতা।
তদা তু ভবতে ভানো র্যাগঃ সর্ব্ব
গুণাবহঃ॥ শশি রিক্তানুসংযোগে
অর্কর্ক্ষে সোত্তরাসু চ। নবম্যাং মঙ্গ-
লা যোগো ভানু মূল দিনং যদা॥
অষ্টম্যাং বাথ চন্দ্রাহে শ্রবণেন শু-
ভাবহং। অহি বুধ্নে রজাহে তু গণে-
শে তস্য বাহনি॥ পুনর্ব্বসৌ গুরো
র্বারে দ্বাদশ্যাং শ্রবণেন বা। সোম
গ্রস্তং যদা যোগং বিষ্ণোঃ সর্ব্বার্থ
সাধকং॥ দ্বিতীয়াযাং যদা সৌম্যে
কৃত্তিকর্ক্ষং ভবেৎ ক্বচিৎ। গ্রহযাগ
স্তদা কার্য্যঃ সর্ব্বশান্তি প্রদায়কঃ॥
স্বাতী সৌম্যী চতুর্থী চ উমাযাগে
বরা স্মৃতা। উত্তরাসু চ সর্ব্বাসু
ভানু পৌর্ণাষ্টমীষু চ॥ শান্ত্যভিষেক
যাগেষু সর্ব্ব কামার্থদাষ্টমী। শুক্রা-
বেকাদশী পুষ্যে রোহিণ্যা বা ত্রয়দা
শনিঃ॥ সুত সৌভাগ্য কামায যা-

গো রুদ্র বিনায়কে। পূর্ণিমাসু চ সর্ব্বাসু অষ্টমী দ্বাদশীষু চ॥ চতুর্দ্দশ্যাং তৃতীযাসু গ্রহ ঋক্ষে শুভেষু চ। সর্ব্বেষাং ভবতে যাগো ভক্তিপূর্ব্বো মহাম্নে॥ মন্ত্রসাধন দ্রব্যাযো রুদ্রযাগাদবাপ্যতে। শ্রী মেধা জ্ঞান বাৎসল্য মুমাযাগান্মহামুনে॥ যোগ জ্ঞান যশঃ সিদ্ধিং মহাদেবাদবাপ্নুযাৎ। আরোগ্যং সপ্রতাপত্বং ভাস্করাৎ প্রাপ্যতে ধ্রুবং॥ গতি মিষ্টাং যথা কামং প্রযচ্ছতি ত্রিবিক্রমঃ। বিঘ্নো ন ভবতে তস্য যস্তু পশ্যেদ্বিনাযকং॥ বিগতারি র্ভবেৎ ষষ্ঠ্যাং দৃষ্ট্বা স্কন্দং মখে ক্ষণাৎ। মাতৃযাগান্মহাসিদ্ধিঃ সর্ব্বেষা মপি জাযতে॥ ভবতে ধনবান্ পুংসঃ প্রথমাহে হুতাশনাৎ। স্বর্গাপবর্গ সংসিদ্ধি দুর্গাযাগাৎ প্রজাযতে॥ মাঘাদ্যে মঙ্গলাংশোত্থা জ্যৈষ্ঠাদ্যে বুদ্ধ জাযতে। ঈশাদ্যেঃ কালিকাদ্যাস্তু যষ্টব্যা বিধিনা মুনে॥ ইত্যাদ্যে দেব্যবতারে উদয তিথ্যৃক্ষ যোগ মাহাত্ম্য কীর্ত্তনং॥ ❋॥ অথ গ্রহযাগ বিধিঃ। প্রণম্য নব রব্যাদীন্ শুভাশুভ ফলপ্রদান্। গ্রহযাগ বিধিং সম্যক্ বক্তি শ্রীরঘুনন্দনঃ॥ অথ গ্রহযাগ প্রযোগঃ। তত্র রবি সোম বুধ গুরু শুক্র বারেষু চিত্রানুরাধা মৃগশিরো রেবতী পুষ্যাশ্বিনী হস্তা রোহিণ্যুত্তরা ত্রযেষু চন্দ্র তারানুকূলে শুভলগ্নে যাগঃ কার্য্যঃ। অত্র বালগ্রহ ভূতগ্রহ প্রবলতর নরাধিপ শত্রু দুঃসহ রোগাভিভবাদ্ভুত দুঃস্বপ্নাবলোকনগ্রহদৌষ্ট্যাদি নিমিত্তকং শান্তিকং মলমাসাদাবপি কর্ত্তব্যং। অবগ্রহং বিনা কেবল বৃষ্ট্যাযুঃ পুষ্টি পুত্র শ্রীকামাদি পৌষ্টিকন্তু মলমাসাদীতর কাল এব কার্য্যং। ❋। তত্র যজমানঃ কৃতস্নানাদিঃ গোমযোপলিপ্তে দেশে সদর্ভাসনোপবিষ্ট উদঙ্মুখঃ স্বস্তি বাচ্য সূর্য্যঃ সোম ইতি পঠিত্বা ফল পুষ্প তিল দর্ভত্রয সহিত জলপূর্ণ তাম্রপাত্রং গৃহীত্বা ওঁ তদ্বিষ্ণো রিতি বিষ্ণুং সংস্মৃত্য ওঁ তৎসদিত্যুচার্য্য ওঁ অদ্যেত্যাদি অমুক গোত্রঃ শ্রীঅমুকদেবশর্ম্মা অমুক কামো গ্রহযজ্ঞ মহং করিষ্যে ইতি সঙ্কল্প্য তজ্জল মৈবৈশান্যাং নিঃক্ষিপেৎ। অন্যাথত্বে গোত্রনাম্নোঃ ষষ্ঠ্যন্ততা। করিষ্যে ইত্যত্র করিষ্যামীতি বিশেষঃ। ততঃ শ্বেতসর্ষপানাদায ওঁ বেতালাশ্চ পিশাচাশ্চ রাক্ষসাশ্চ সরীসৃপাঃ। অপসর্পন্তু তে সর্ব্বে যে চান্যে বিঘ্নকারকাঃ॥ ওঁ বিনাযকা বি-

স্নকরা মহোগ্রা যজ্ঞদ্বিষো যে পিশিতাশনাশ্চ। সিদ্ধার্থকৈ বজ্রসমানকল্পৈ র্ময়া নিরস্তা বিদিশঃ প্রযান্তু॥ ইত্যেতাভ্যাং মন্ত্রাভ্যাং শ্বেতসর্ষপ প্রক্ষেপৈ র্বিঘ্নকারকানপসারয়েৎ। ততঃ সগণাধিপ ষোড়শ মাতৃকা পূজা বসোর্ধারা আয়ুষ্য জপং তদজ্ঞানে গাযত্রী জপং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা তদশক্তৌ ভোজ্য মুৎসৃজ্য ব্রাহ্মণান্ পরিতোষ্য ততঃ স্বযমশক্তৌ কর্ত্তা প্রাঙ্মুখং গুরুং ওঁসাধুভবানাস্তা মিতি বদেৎ ওঁ সাধ্বহমাসে ইতি প্রতিবচনং। ততো গন্ধপুষ্প বস্ত্রাঙ্গুরীযকাদিনা গুরু মলঙ্কৃত্য দক্ষিণং জানু স্পৃষ্ট্বা ওঁঅদ্যেত্যাদি॥ মৎ সঙ্কল্পিত গ্রহযাগ কর্ম্মণি গ্রহ পূজা হোম কর্ম্ম করণায অমুক গোত্রং অমুক দেব শর্ম্মাণং গন্ধাদিভি রভ্যর্চ্য ভবন্তমহং বৃণে। ওঁ বৃতো হস্মীতি প্রতিবচনং। ওঁ যথা বিহিতং পূজাদি কর্ম্ম কুরু। ওঁ যথা জ্ঞানং করবাণীতি প্রতিবচনং। ততো মণ্ডপোত্তর পূর্ব্বভাগে বিতস্তি দ্বয বিস্তৃতাযাং বিতস্ত্যুচ্ছ্রিতাযাং উদক্ প্লবাযাং বেদ্যাং গোময়েনোপলিপ্তাযাং রক্তচন্দনাদিনা মধ্যে বর্ত্তুলং সূর্য্যং। আগ্নেয্যাং শ্বেত মর্দ্ধচন্দ্রাকারং সোমং। দক্ষিণস্যাং ত্রিকোণং রক্তং মঙ্গলং। ঐশান্যাং পীতং ধনুরাকারং বুধং। উত্তরস্যাং পীতং পদ্মাকারং বৃহস্পতিং। প্রাচ্যাং শ্বেতং চতুষ্কোণং শুক্রং। প্রতীচ্যাং শ্যামং সর্পাকারং শনিং। নৈর্ঋত্যাং শ্যামং মকরাকারং রাহুং। বাযব্যাং ধূম্রবর্ণান্ খড়্গাকারান্ কেতূন্ বিলিখ্য স্বগৃহ্যোক্ত বিধিনা অগ্নিস্থাপনাদি বুক্ষস্থাপন পর্য্যন্তং কর্ম্ম কৃত্বা মণ্ডলে গ্রহানাবাহযেৎ॥ * ॥ তত্র ক্রমঃ। মধ্যে। ওঁক্ষত্রিযং কাশ্যপং রক্তং কালিঙ্গং দ্বাদশাঙ্গুলং। পদ্ম হস্তদ্বযং পূর্ব্বাননং সপ্তাশ্ববাহনং॥ শিবাধিদৈবতং ধ্যাযেদ্বহ্নি প্রত্যধিদৈবতং। সপ্তম্যাং জাযমানং বিশাখা নক্ষত্রং রক্তমাল্যাম্বরধরং। ইতি ধ্যাত্বা ওঁ ভূ ভুবঃ স্বঃ সূর্য্যগ্রহ ইহা গচ্ছ ২ ইহতিষ্ঠ ২ ইতি শুক্লতণ্ডুলৈ রাবাহ্য স্থাপযেৎ॥ ১॥ আগ্নেযে। ওঁসামুদ্রং বৈশ্য মাত্রেযং হস্তমাত্রং সিতাম্বরং। শ্বেতং দ্বিবাহুং বরদং দক্ষিণং সগদেতরং॥ দশাশ্বং শ্বেতপদ্মস্থং বিচিন্ত্যোমাধিদৈবতং। জল প্রত্যধিদৈবঞ্চ সূর্য্যাস্য মাস্থযেত্তথা॥ চতুর্দ্দশ্যাং জাতং কৃত্তিকা নক্ষত্র মিতি ধ্যাত্বা

ওঁ ভূর্ভুবঃ স্বঃ সোমগ্রহ ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ২ ॥ দক্ষিণস্যাং। ওঁ আবন্ত্যং ক্ষত্রিয়ং রক্তং মেষস্থং চতুরঙ্গুলং। আরক্ত মাল্য বসনং ভারদ্বাজং চতুর্ভুজং ॥ দক্ষিণোর্দ্ধ ক্রমাচ্ছক্তি বরাভয় গদাকরং। আদিত্যাভিমুখং দেবং তদ্বদেব সমাহ্বয়েৎ।। স্কন্দাধিদেবতং ভৌমং ক্ষিতি প্রত্যধিদেবতং। দশম্যাং জাতং পূর্বাষাঢ়া নক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ মঙ্গলগ্রহ ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ৩ ॥ ঐশান্যাং ওঁ মাগধং ধ্যাত্বা আত্রেয়ং বৈশ্যং পীতং চতুর্ভুজং। বামোর্দ্ধ ক্রমত শ্চর্ম্ম গদা বরদ খড়্গিনং॥ সূর্য্যাস্যং সিংহগং সৌম্যং পীত বস্ত্রং তথাহ্বয়েৎ। নারায়ণাধিদৈবঞ্চ বিষ্ণুপ্রত্যধিদৈবতং ॥ দ্বাদশ্যাং জাতং ধনিষ্ঠা নক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ বুধগ্রহ ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ৪ ॥ উত্তরস্যাং। দ্বিজ মাঙ্গিরসং পীতং সৈন্ধবঞ্চ ষড়ঙ্গুলং। ধ্যাত্বা পীতাম্বরং জীবং সরোজস্থং চতুর্ভুজং ॥ দক্ষোর্দ্ধ্বা দক্ষ বরদ করকা দণ্ড মাহ্বয়েৎ। ব্রহ্মাধিদৈবং সূর্য্যাস্য মিন্দ্র প্রত্যধিদৈবতং ॥ একাদশ্যাং জাতং উত্তরফল্গুনী নক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ বৃহস্পতে ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ৫ ॥ ততঃ প্রাচ্যাং। ওঁ শুক্রং ভোজকটং বিপ্রং ভার্গবঞ্চ নবাঙ্গুলং। পদ্মস্থ মাহ্বয়েৎ সূর্য্যমুখং শ্বেতং চতুর্ভুজং॥ সদাক্ষ বর করকা দণ্ডহস্তং সিতাম্বরং। শক্রাধিদেবতং ধ্যায়েৎ শচী প্রত্যধিদৈবতং ॥ নবম্যাং জাতং পুষ্য নক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ শুক্র ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ৬ ॥ পশ্চিমায়াং। সৌরাষ্ট্রং কাশ্যপং শূদ্রং সূর্য্যাস্যং চতুরঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং গৃধ্রগতং সৌরিং চতুর্ভুজং ॥ তদ্বদ্বাণ বর শূল ধনুর্হস্তং সমাহ্বয়েৎ। যমাধিদৈবতং প্রজাপতি প্রত্যধিদৈবতং ॥ কৃষ্ণচতুর্দ্দশ্যাং জাতং রোহিণী নক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ শনৈশ্চর ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলে রাবাহ্য স্থাপয়েৎ ॥ ৭ ॥ নৈর্ঋত্যাং। রাহুং মলয়জং শূদ্রং পৈঠীনং দ্বাদশাঙ্গুলং। কৃষ্ণং কৃষ্ণাম্বরং সিংহাসনং ধ্যাত্বা তথা-

স্মরেৎ ॥ চতুর্ব্বাহুং খড়্গ বর্ম্ম শূল চর্ম্ম করং তথা । কালাধিদৈবং সূর্য্যাস্য সর্প প্রত্যধিদৈবতং ॥ পৌর্ণমাস্যাং জাতং ভরণীনক্ষত্র মিতি ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ ভগবন্ রাহো ইহাগচ্ছ ২ ইহ তিষ্ঠ ২ ইতি শুক্ল তণ্ডুলৈ রাবাহ্য স্থাপয়েৎ ॥ ৮ ॥ বায়ব্যাং । কৌশদ্বীপং কেতুগণং জৈমিনীয়ং ষডঙ্গুলং । ধূম্রং গৃধ্রগতং শূদ্রং স্মরেৎ দ্বিকৃতাননং ॥ সূর্য্যাস্যং ধূম্রবসনং বরদং গদিনং তথা । চিত্রগুপ্তাধিদৈবঞ্চ ব্রহ্ম প্রত্যধিদৈবতং ॥ অমাবাস্যায়াং জাতং অশ্লেষা নক্ষত্রমিতি ধ্যাত্বা ওঁ ভূ র্ভুবঃ স্বঃ ভগবন্তঃ কেতব ইহাগচ্ছত ২ ইহ তিষ্ঠত ২ ইতি শুক্ল তণ্ডুলৈ রাবাহ্য স্থাপয়েৎ ॥ ৯ ॥ অধিদৈবত প্রত্যধিদৈবত পূজনঞ্চাযুত হোমাদৌ । তত তত্ত দ্বর্ণবস্ত্র তত্তদ্বর্ণগন্ধ তত্তদ্বর্ণপুষ্পং দদ্যাৎ । * । ধূপে বিশেষঃ । রবয়ে গুগ্গুলুধূপং । সোমায় সরলং । মঙ্গলায় দেবদারু । বুধায় ঘৃত মিশ্রিত দেবদারু । বৃহস্পতয়ে দশাঙ্গং । শুক্রায় অগুরুং । শনৈশ্চরায় কালাগুরুং । রাহবে গুড়ত্বচং । কেতুভ্যো মধুমিশ্রিত গুড়ত্বচং । অভাবে ষোড়শাঙ্গং বা ॥ * ॥ গন্ধেবিশেষঃ । সূর্য্যায় রক্ত

চন্দনং । সোমায় শ্বেতচন্দনং । মঙ্গলায় কুঙ্কুমং । বুধায় সরলং । গুরবে রক্তচন্দন শ্বেতচন্দন কুঙ্কুম সরলং মিশ্রিত সমভাগত্বেন দদ্যাৎ । শনৈশ্চরায় কস্তুরীং । রাহবে পদ্মকাষ্ঠং । কেতুভ্যশ্চ পদ্মকাষ্ঠং । অধিদেবতা প্রত্যধিদেবতাঃ পূজয়েৎ । * । অধিদেবতা প্রত্যধিদেবতা যথা । সূর্য্যস্য শিব বহ্নী । সোমস্য উমা জলং । মঙ্গলস্য স্কন্দঃ ক্ষিতিঃ । বুধস্য নারায়ণ বিষ্ণু । বৃহস্পতেঃ ব্রহ্মা ইন্দ্রশ্চ । শুক্রস্য শক্রঃ শচী । শনৈশ্চরস্য যমঃ প্রজাপতিশ্চ । রাহোঃ কালঃ সর্পশ্চ । কেতো শ্চিত্রগুপ্তঃ ব্রহ্মা চ । এতত্তু অযুতাদি হোমে জ্ঞেয়ং । * । সূর্য্যায় গুড়ৌদন বলিঃ । এবং সোমাদীনামপি । সতি সামর্থ্যে ষোড়শোপচারাদিনা ॥ বলৌ তু । সূর্য্যায় গুড়ৌদনং । সোমায় ঘৃতপায়সং । মঙ্গলায় পদ্ম যব চূর্ণাত্মক যাবকং । বুধায় ক্ষীরান্নং । গুরবে দধ্যোদনং । শুক্রায় ঘৃতৌদনং । শনৈশ্চরায় কৃসরং । রাহবে ছাগমাংসং । কেতুভ্যো অজাক্ষীর সাধিতাজকর্ণ রক্তমিশ্রিত যব তিল তণ্ডুল রূপং চিত্রৌদনং । তত্তৎ দ্রব্যালাভে ভক্ষ্যান্তরং দদ্যাৎ । * । ততঃ শক্ত

শ্রপয়েৎ। তত্র সামগানাং ক্রমঃ। অগ্নেঃ পশ্চিমায়াং দিশি প্রাগগ্রান্ কুশানাস্তীর্য্য তদুপরি প্রক্ষালিত বারুণ মুদূখলং বৈণবঞ্চ সূর্পং বারুণ চমসঞ্চ জল প্রোক্ষিতং সংস্থাপ্য ব্রীহীন্ যবান্ বা অশক্তৌ শালি তণ্ডুলান্ সূর্পে নিধায় ওঁ সূর্য্যায়ত্বা জুষ্টং নির্ব্বপামি ইতি গৃহীত্বা উদূখলে স্থাপয়েৎ। এবং সোমায়। এবং মঙ্গলাদীনামপি নির্ব্বপণং কৃত্বা উদূখলে স্থাপয়েৎ। দ্বি স্তুষ্ণীং। ততো দক্ষিণহস্ত মুপরি কৃত্বা মুষলেনাবহত্য সূর্পেণ প্রস্ফোটয়েৎ। ইত্থমেব বারত্রয়ং। ততশ্চরুস্থাল্যা মনস্তরং কৃত্বোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য তত্র প্রক্ষালিত তণ্ডুলান্ নিধায় তদুপরি দগ্ধং দত্ত্বা যথা পায়সঞ্চরু র্ভবতি তথা স্তোকং স্তোক মুদকং দত্ত্বা তন্মধ্যে খদির পলাশোড়ুম্বরাণা মন্যতমস্য প্রাদেশ প্রমাণং উভ যথা সার্দ্ধাঙ্গুষ্ঠ প্রমাণং চতুষ্কোণ পুষ্কলং মেক্ষণং দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা তথা পচেৎ যথা অন্তরোষ্মণা সম্যক্ পাকো ভবতি মণ্ডগালনং দাহশ্চ ন ভবতি। সম্যক্ পাকে ভূতে চরু মধ্যে ঘৃত স্রুবং দত্ত্বা প্রাগাদি দিক্ চিহ্নিতং কৃত্বা চরু মব

তার্য্য অগ্নে রুত্তরতঃ কুশোপরি স্থাপয়িত্বা পুন র্মধ্যে ঘৃত স্রুবং দদ্যাৎ। ততো ভূমি জপাদি স্রুব সংস্কার পর্য্যন্তং কর্ম্ম কৃত্বা অগ্নেঃ পশ্চিমতঃস্তরণ কুশোপরি পূর্ব্বমাজ্যং পশ্চাচ্চরুং নিধায় উদকাঞ্জলি সেকং কৃত্বা বিরূপাক্ষ জপান্তাং কুশণ্ডিকাং সমাপয়েৎ॥*॥ যজুর্ব্বেদিনাস্তু আজ্যস্থাল্যা মাজ্য নির্ব্বপণানন্তরং সূর্পং পুরতো দক্ষিণ ভাগে সংস্থাপ্য তত্রোদূখলং বিন্যস্য ব্রীহ্যাদ্যন্যতমং তত্র নিধায় ওঁ সূর্য্যায়ত্বা জুষ্টং গৃহ্নামি ইত্যেকাং মুষ্টিং গৃহীত্বা ওঁ সূর্য্যায়ত্বা জুষ্টং নির্ব্বপামীতি উদূখলে স্থাপয়িত্বা ওঁ সূর্য্যায়ত্বা জুষ্টং প্রোক্ষামীতি প্রোক্ষণী জলেন প্রোক্ষয়েৎ। এবং সোমায়ত্বা ইত্যাদি। তত ওঁ অগ্নয়ে স্বিষ্টিকৃতেত্বা ইত্যাদিনা গ্রহণ নির্ব্বপণ প্রোক্ষণানি কৃত্বা দ্বি স্তুষ্ণীং কুর্য্যাৎ। ততঃ পূর্ব্ববৎ শ্রপণং। পক্বং জ্ঞাত্বা জ্বলদগ্নিং গৃহীত্বা চরুমধ্যে দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা তমগ্নিং তত্রৈবাগ্নৌ ক্ষিপেৎ। তত আঘারাজ্য ভাগান্তং কর্ম্ম কুর্য্যাৎ॥*॥ ঋগ্বেদিনাস্তু প্রোক্ষণী পাত্র স্থাপনানন্তরং পবিত্রান্তর্হিতে ওঁ সূর্য্যায়ত্বা জুষ্টং নির্ব্বপামীতি ব্রীহ্যাদ্যন্যতমদ মুষ্টিং প্রক্ষিপ্য ওঁ সূর্য্যা-

যত্বা জুষ্ট° প্রোক্ষামীতি প্রণীতা জলেন প্রোক্ষযেৎ । এব°সোমায়ত্বা ইত্যাদি । ততঃ স্বিষ্টি কৃদথ কিঞ্চি দগ্নিক° তূষ্ণী° তথা কৃত্বা পবিত্রান্ত হিত° কৃত্বা পূর্ব্বগ্রীবোদ্ধ লোম কৃষ্ণা- জিনে উদুখলং নিধায় তত্র সূর্পস্থ ব্রীহ্যাদ্যন্যতম° প্রক্ষিপ্য মুষলেনাব হত্য সূর্পেণ বিতুষীকৃত্য প্রক্ষোট্য ত্রিঃ প্রক্ষাল্য পবিত্র° চরুস্থাল্যা° প্রক্ষিপ্য তৎথ শ্রাপ যিত্বা উদীচ্যা° দক্ষিণ ভাগে ওঁসোমায় স্বাহেতি হোমপর্য্যন্ত° কুর্য্যাৎ । ততঃ শান্তি কর্ম্মণি অগ্নি ভূবরদ নামাসীতি নাম কৃত্বা ওঁ পিঙ্গ ভ্রূশ্মশ্রু কেশাক্ষঃ পীনাঙ্গ জঠরো২রুণঃ । ছাগস্থঃ সা- ক্ষ সূত্রো২গ্নিঃ সপ্তার্চিঃ শক্তিধারকঃ ॥ ইত্যাদিপুরাণীয°ধ্যাত্বা ওঁবরদ না- মাগ্নে ইহাগচ্ছ২ইহতিষ্ঠ২ইত্যাবাহ্য পাদ্যাদিনা পূজযেৎ ॥*॥ পৌষ্টিক কর্ম্মণি তু বলদনামাগ্নিঃ । গৃহহোমে অগ্নীনাহ গোভিলঃ । আদিত্যে ক- পিলো নাম পিঙ্গলঃ সোম উচ্যতে । ধূম্রকেতু স্তথা ভৌমে জঠরাগ্নি বুধে স্মৃতঃ ॥ বৃহস্পতৌ শিখী নাম শুক্রে ভবতি হাটকঃ । শনৈশ্চরে মহাতে- জা রাহৌ চৈব হুতাশনঃ । কেতুষু লোহিতো২গ্নিঃ স্যাদিতি বহ্নি বি-

নির্ণযঃ ॥ ততঃস্বগৃহ্যোক্ত বিধিনানেন ক্রমেণ সূর্য্যাদি গ্রহেভ্যঃ প্রত্যেকাহু- তি° দদ্যাৎ ।*। অত্র মন্ত্রাঃ । সূ- র্য্যস্য আকৃষ্ণেনেতি মন্ত্রস্য হিরণ্য- স্তূপাঙ্গিরা ঋষি স্ত্রিষ্টুপ্‌ছন্দঃ সবিতা দেবতা আদিত্যস্য পূজা হোম ক- র্ম্মণি বিনিযোগঃ । ওঁআকৃষ্ণেন রজ- সা বর্ত্তমানো নিবেশযন্নমৃত° মর্ত্ত্য- ঞ্চ হিরণ্যযেন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্ স্বাহা । ইদ° সূর্য্যায ইতি দেবতোদ্দেশঃ সামগে- তরৈঃ কার্য্যঃ ॥ ১॥ সোমস্য ইমন্দে বেতি মন্ত্রস্য বরুণ ঋষি রগ্নি র্দেবতা সোমস্য পূজা হোম কর্ম্মণি বিনি- যোগঃ । ওঁ ইমন্দেবা অসপত্ন° সুব- ধ্ব° মহতে ক্ষত্রায মহতে জ্যৈষ্ঠায । ইম মম মনুষ্য পত্র মনুষ্যাঃ পুত্র- মস্যৈ বিশে স্বাহা । ইদ° সোমায ॥ ২ ॥ মঙ্গলস্য অগ্নি র্মূর্দ্ধেতি মন্ত্র- স্য অপাঙ্গিরা ঋষি গাযত্রীছন্দো ২গ্নির্দেবতা মঙ্গলস্য পূজা হোম ক- র্ম্মণি বিনিযোগঃ । ওঁঅগ্নি র্মূর্দ্ধাদিবঃ ককুৎপতিঃ পৃথিব্যা অযমপা° রে- তা°সি জিন্বতি স্বাহা ইদ° মঙ্গলায ॥ ৩ ॥ বুধস্য উদ্বুধ্যস্বেতি মন্ত্রস্য পরমেষ্ঠি ঋষি স্ত্রিষ্টুপ্‌ছন্দো ২গ্নির্দে- বতা বুধস্য পূজা হোম কর্ম্মণি বিনি-

যোগঃ। ওঁ উদ্বুধ্যস্ব অগ্নে প্রতিজাগৃহি ত্বং মিষ্টাপূর্ত্তে সংসৃজেথা মযঞ্চ অস্মিন্ সধস্থে অধ্যুত্তরস্মিন্ বিশ্বে দেবা যজমানশ্চ সীদত স্বাহা। ইদং বুধায় ॥ ৪ ॥ বৃহস্পতেঃ বৃহস্পতে অতীতি মন্ত্রস্য গৃৎসমদ ঋষি স্ত্রিষ্টুপ্‌ছন্দো ব্রহ্মা দেবতা জীবস্য পূজা হোম কর্ম্মণি বিনিযোগঃ। ওঁ বৃহস্পতে অতি যদর্য্যো অর্হাদ্দ্যুমদ্বিভাতি ক্রতুমজ্জনেষু। যদ্দীদযৎ স্বস ঋত প্রজাত তদস্মাসু দ্রবিণং ধেহি চিত্রং স্বাহা॥ ইদং বৃহস্পতয়ে ॥ ৫॥ শুক্রস্য অন্নাৎ পরিশ্রুত ইতি মন্ত্রস্য প্রজাপতি ঋষি রতিজগতীছন্দো অগ্নি সরস্বতীন্দ্রাদেবতাঃ শুক্রস্য পূজা হোম কর্ম্মণি বিনিযোগঃ। ওঁ অন্নাৎ পরিশ্রুতো রসং ব্রহ্মণা ব্যপিবৎ ক্ষত্রং পযঃ সোমং প্রজাপতিঃ। ঋতেন সত্য মিন্দ্রিযং বিপানং শুক্রমন্ধস ইন্দ্রস্যেন্দ্রিয মিদং পযো অমৃতং মধু স্বাহা॥ ইদং শুক্রায ॥ ৬॥ শনৈশ্চরস্য শন্নোদেবীতি মন্ত্রস্য দধ্যঙ্ঙাথর্ব্বণ ঋষি গাযত্রীছন্দ আপোদেবতা শনৈশ্চরস্য পূজা হোম কর্ম্মণি বিনিযোগঃ। ওঁ শন্নোদেবী রভীষ্টযে আপো ভবন্তু পীতযে সংযো রভিস্রবন্তু নঃ স্বাহা। ইদং শনৈশ্চরায ॥ ৭॥ রাহোঃ কাণ্ডাৎ কাণ্ডাদিতি মন্ত্রস্য অগ্নি ঋষি র্গাযত্রীছন্দো দুর্ব্বেষ্টকাদেবতা রাহোঃ পূজা হোম কর্ম্মণি বিনিযোগঃ। ওঁ কাণ্ডাৎ কাণ্ডাৎ প্ররোহন্তী পরুষঃ পরুষঃ পরি। এবানো দূর্ব্বে প্রতনু সহস্রেণ শতেন চ স্বাহা। ইদং রাহবে ॥ ৮॥ কেতূনাং কেতুং কৃণ্বন্নিতি মন্ত্রস্য মধুছন্দ ঋষি রনিরুদ্ধাযত্রীছন্দো অগ্নি র্দেবতা কেতোঃ পূজা হোম কর্ম্মণি বিনিযোগঃ। ওঁ কেতুং কৃণ্বন্ন কেতবে পেশো মর্য্যা অপেশসে। সমুষদ্ভি রজা যথা স্বাহা॥ ইদং কেতুভ্যঃ॥ ৯॥ ততো মধুঘৃতাক্তাং ঘৃতাক্তাং ক্ষীরাক্তাং বা প্রাদেশ প্রমাণাং সাগ্রা মর্ক সমিধ মাদায ওঁ আকৃষ্ণেন ইত্যাদি মন্ত্রেণ সূর্য্যাযাষ্টোত্তরশতং অষ্টাবিংশতি মষ্টৌ বা অশক্ত্যা। শক্ত্যা গ্রহস্যাতিপীড়াকরস্যাবা অষ্টোত্তর সহস্রং জুহুযাৎ ॥*॥ সমিধমাহ যাজ্ঞবল্ক্যঃ। অর্কঃ পলাশঃ খদির স্ত্বপামার্গো অথ পিপ্পলঃ। উড়ুম্বরঃ শমী দূর্ব্বা কুশাশ্চ সমিধঃ ক্রমাৎ ॥ হোমো গ্রহাদিপূজানাং শতমষ্টোত্তরং ভবেৎ। অষ্টাবিংশতি রষ্টৌ বা যথা শক্তি বিধীযতে॥ অতিপীড়াকরো যস্তু তস্ত

যত্নেন পূজয়েৎ। ততো হোমানন্তরং উদীচ্যং কর্ম্ম কুর্য্যাৎ। ততো গুড়ৌদনাদীন্ ঋত্বিজে ভোজয়েৎ। তদ্দুব্যালাভে ভোজ্যান্তরাণি বা দদ্যাৎ। তোজনসামর্থ্যে তদ্দ্রব্যাণি পাণিনা স্পর্শয়েৎ। ততো নবস্যপুরাণোক্তৈ মন্ত্রৈ দক্ষিণা দদ্যাৎ। ধেনুঃ শঙ্খ স্তথানড্বান্ হেম বাসো হয় স্তথা। কৃষ্ণা গৌ রায়সং ছাগ এতা বৈ দক্ষিণাঃ ক্রমাৎ॥ তত্র কপিলে সর্ব্বদেবানাং পূজনীয়াসি রোহিণী। তীর্থ দেবময়ী যস্মাদতঃ শান্তিং প্রযচ্ছ মে॥ ইতি পঠিত্বা ওঁ অদ্যেত্যাদি কীর্ত্তিতৎ সগ্রহ যজ্ঞ কর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণাং কপিলাং ধেনুং রুদ্রদেবতাকাং অমুকগোত্রায়ামুক দেবশর্ম্মণে ব্রাহ্মণায় ঋত্বিজে তুভ্যমহং সম্প্রদদে। অন্যাগ্রহেভ্যঃ দদামীতি ব্রূয়াৎ। কপিলাভাবে গোমাত্রাং বা। তদভাবে কাঞ্চনং। তদভাবে রজতাদিকং বা দদ্যাৎ। কাঞ্চনাদি স্তু শঙ্খাদি দক্ষিণাভাবে হপি দদ্যাৎ॥ ১॥ এবং পুণ্য স্তং শঙ্খ পুণ্যানাং মঙ্গলানাঞ্চ মঙ্গলং। বিষ্ণুনা বিধৃতো নিত্যমতঃ শান্তিং প্রযচ্ছ মে। ইত্যাচার্য্য পূর্ব্বোক্ত ক্রমেণ সোম গ্রহ যজ্ঞে শঙ্খং দদ্যাৎ॥ ২॥ ওঁ ধর্ম্ম স্ত্বং বৃষরূপেণ জগদানন্দ কারকঃ। অষ্টমূর্ত্তে রধিষ্ঠান মতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য মঙ্গলযজ্ঞে বৃষং দদ্যাৎ॥ ৩॥ ওঁ হিরণ্য গর্ভ গর্ভ স্ত্বং হেমরূপং বিভাবসোঃ। অনন্ত পুণ্য ফলদ মতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য বুধ যজ্ঞে কাঞ্চনং দদ্যাৎ॥ ৪॥ ওঁ পীতবস্ত্র যুগং যস্মাদ্বাসুদেবস্য বল্লভং। বস্ত্রপ্রদানাত্তদ্বিষ্ণো রতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য গুরুযজ্ঞে পীতবস্ত্র যুগং দদ্যাৎ তদভাবে হন্যবর্ণবাসো যুগমপি দদ্যাৎ॥ ৫॥ ওঁ বিষ্ণু স্ত্ব মশ্বরূপেণ যস্মাদর্ণব সম্ভবঃ। চন্দ্রার্ক বাহন স্ত্বং বৈ অতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য শুক্রযজ্ঞে অশ্বং দদ্যাৎ॥ ৬॥ ওঁ যস্মাত্ত্বং পৃথিবী সর্ব্বা ধেনুঃ কেশব সম্ভবা। সর্ব্বপাপ হরা নিত্য মতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য শনৈশ্চর যজ্ঞে কৃষ্ণাং ধেনুং অন্যবর্ণাং বা দদ্যাৎ॥ ৭॥ ওঁ যস্মাদায়স কর্ম্মাণি ত্বদধীনানি সর্ব্বদা। লাঙ্গলাদ্যায়ুধাদীনি ততঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য রাহুযজ্ঞে লৌহং দদ্যাৎ॥ ৮॥ ওঁ যস্মাত্ত্বং সর্ব্ব ভূতানাং মঙ্গলায ব্যবস্থিতঃ। যানং বিভাবসো নিত্য মতঃ শান্তিং প্রযচ্ছ মে॥ ইত্যাচার্য্য কেতুযজ্ঞে ছাগং

দদ্যাৎ ॥৯॥ দক্ষিণা জলং শান্তি জলন্তু জলেন সংমিশ্র্য শান্তিং দদ্যাৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ গচ্ছন্ত্বমরাঃ সর্ব্বে গৃহীত্বার্চ্চাং স্বমালয়ং। সন্তুষ্টা বর সম্যাকং দত্ত্বেদানীং সুপূজিতাঃ॥ ইতি বিষ্ণুধর্ম্মোত্তরীয়ং পঠিত্বা গ্রহান্ বিসর্জ্জয়েৎ॥ দক্ষিণা চ প্রদাতব্যা গ্রহাণাঞ্চ বিসর্জ্জন মিতি বশিষ্ঠ বচনাৎ। ইতি রঘুনন্দন ভট্টাচার্য্য বিরচিত গ্রহযাগপ্রযোগঃ সমাপ্তঃ॥

যাচ টু ডু ঋ ঞ যাচনে। ইতি কবিকল্পদ্রুমঃ॥ যাচন মাত্মনে দানার্থং প্রেরণং। টু যাচথুঃ। ডু যাচিত্রিমং। ঋ অযযাচৎ। ঞ যাচতি যাচতে নৃপং বিপ্রঃ। গ্রহণার্থং প্রেরণেপি যাচতি বিত্তং গুরবে শিষ্যঃ। ইতি দুর্গাদাসঃ॥

যাচকঃ ত্রি যাচ্ঞাকর্ত্তা। তৎপর্য্যায়ঃ। বনীযকঃ ২ যাচনকঃ ৩ মার্গণঃ ৪ অর্থী ৫। ইত্যমরঃ॥ বনীপকঃ ৬ ভিক্ষুকঃ ৭ ভিক্ষাকরঃ ৮। ইতি শব্দরত্নাবলী॥ তস্য লঘুত্বং যথা। তৃণাদপি লঘু স্তুলং তুলাদপি চ যাচকঃ। বায়ুনা কিং ন নীতোঽসৌ কিঞ্চিৎ প্রার্থন শঙ্কয়া॥ ইতি প্রাচীনাঃ॥ অপিচ। অন্নস্য কীট ঘাতস্য বাতাগ্নিস্বাসিতস্য চ। শিখরে বসতি স্তস্য বরং জন্ম ন যাচিতং॥ জগৎপতি র্হি যাচিত্বা বিষ্ণু র্বামনতাং গতঃ ৭ কোঽন্যো ঽধিকতরস্তস্য যোঽর্থী যাতি ন লাঘবং॥ ইতি গারুড়ে নীতিসারে ১১৫ অধ্যায়ঃ॥

যাচক ত্রি যাচকঃ। যথা। মুখভঙ্গঃ স্বরো দীনো গাত্রস্বেদো মহদ্ভয়ং। মরণে যানি চিহ্নানি তানি চিহ্নানি যাচতঃ॥ ইতি গারুড়ে নীতিসারে ১১৫ অধ্যায়ঃ॥

যাচন ক্লী যাচ্ঞা। যাচ ধাতোর্ভাবে অনট্ প্রত্যযেন নিষ্পন্নং॥

যাচনকঃ ত্রি যাচকঃ। ইত্যমরঃ॥

যাচনা স্ত্রী যাচ্ঞা। ইত্যমরঃ॥

যাচমানঃ ত্রি যাচকঃ। যথা। নবীন দীন ভাবস্য যাচমানস্য মানিনঃ। বচো জীবিতয়ো রাসীৎ পুরোনিঃসরণে রণঃ॥ ইতি বররুচিঃ॥ অপিচ। দ্বিজেভ্যো যাচমানেভ্যো যজমানঃ প্রযচ্ছতি। স যাতি চাক্ষয়ান্ লোকান্ যেভ্যো নাবর্ত্ততে পুনঃ॥ ষষ্টি বর্ষ সহস্রাণাং সহস্রাণি বসেদ্দিবি॥ যোনুমন্তাপি ভবতি নিরয়ে প্রতিষেধকঃ॥ ইতি বহ্নিপুরাণে বামনপ্রাদুর্ভাবো না-

মাধ্যায়ঃ ॥

যাচিতং ক্লী যাচনবৃত্তিঃ। তৎপর্য্যায়ঃ। মৃতং ২। যথা। দ্বে যাচিতাযাচিতয়োর্যথা সংখ্যং মৃতামৃতে ৮ ইত্যমরঃ ॥ দ্বে। যাচনবৃত্তি মরণমিব দুঃখজনকত্বাৎ মৃতং। অযাচিতং অমৃতমিব অমৃতং। যাচিতাযাচিতয়োর্ভাবে কর্ম্মণি বা ক্তঃ। ইতি ভরতঃ ॥ প্রার্থিতবস্তুনি ত্রি ॥

যাচিতকং ক্লী যাচ্ঞাপ্রাপ্তং। ইত্যমরঃ ॥ যাচ্ঞয়া। প্রত্যর্পণীয়ত্বেন যাচ্ঞয়া যৎ প্রাপ্ত মলঙ্কারাদি বস্তু তৎ যাচিতকং। কার্য্যানন্তরং বস্তু স্বামী যৎ পুনর্গৃহ্লাতি তদিত্যর্থঃ। যাচিতেন প্রাপ্ত মিতি ঢঘেকাদিতি কঃ। ইতি ভরতঃ ॥

যাচ্ঞা স্ত্রী যাচনং। তৎপর্য্যায়ঃ। অভিশস্তিঃ ২ যাচনা ৩ অর্থনা ৪ ভিক্ষা ৫ অর্দনা ৬। ইত্যমরঃ ॥ লালসা ৭। ইতি জটাধরঃ ॥

যাজঃ পুং অন্নং। ইতি হেমচন্দ্রঃ ॥

যাজকঃ পুং যাজ্ঞিকঃ ॥ রাজ্ঞোগজঃ। ইতি মেদিনী ॥ মত্তহস্তী। ইতি জটাধরঃ ॥ ঋত্বিক্। যথা। অগ্নীধ্রাদ্যা ধনৈর্ব্বার্য্যাঃ ঋত্বিজো যাজকাশ্চ তে। ইত্যমরঃ। যজমানেন ধনৈর্ব্বার্য্যাঃ ধনানি দত্ত্বা ইষ্টসম্পাদনায় ব্রিয়ন্তে প্রার্থ্যন্তে যে অগ্নীধ্র প্রভৃতয়স্তে ঋত্বিজো যাজকাশ্চ কথ্যন্তে। অগ্নিং ইন্ধয়ন্তি দীপয়ন্তি অগ্নীধ্রাঃ ইন্ধী ঞি ধ উদ্যতৌ ঞিঃ নাগ্নীতির: মনীষাদিত্বাৎ ন লোপঃ। আদিনা ব্রহ্মোদ্গাতৃ হোত্র ধ্বর্য্যু ব্রাহ্মণাচ্ছংসি প্রভৃতয়ঃ ষোড়শ গৃহ্যন্তে। বার্য্যা ইতি হস্বৃযাসো রিতি ঘ্যণ্ দৃ ভৃ জুষেত্যাদৌ বৃঞ ইতি ঞানুবন্ধ নির্দ্দেশাৎ অন্যবৃধাতো র্নক্যপ্ ঋতৌ যজন্তি ঋত্বিজঃ ক্বিপ্। যজন্তি যাজকাঃ ণকঃ। ইতি ভরতঃ ॥ * ॥ বহুযাজক গ্রামযাজকয়ো র্নিন্দা যথা। অব্রাহ্মণাস্তু ষট্ প্রোক্তা ঋষিভি স্তত্ত্ব দর্শিভিঃ। আদ্যো রাজভৃত স্তেষাং দ্বিতীয়ঃ ক্রয় বিক্রয়ী ॥ তৃতীয়ো বহু যাজ্যঃ স্যাচ্চতুর্থো গ্রামযাজকঃ। পঞ্চমস্তু ভৃত স্তেষাং গ্রামস্য নগরস্য চ ॥ অনাদিত্যাঞ্চ যঃপূর্ব্বাং সাদিত্যাঞ্চৈব পশ্চিমাং। নোপাসীত দ্বিজঃ সন্ধ্যাং স ষষ্ঠো হব্রাহ্মণঃ স্মৃতঃ ॥ ইত্যাহ্নিকতত্ত্বং ॥ অপিচ। শূদ্র সপ্তোদ্দিক্ত যাজী গ্রামযাজীতি কীর্ত্তিতঃ। শূদ্রপাকোপজীবী যঃ সূপকারঃ প্রকীর্ত্তিতঃ ॥ সন্ধ্যাপূজা বিহীনশ্চ প্রমত্তঃ পতিতঃ স্মৃতঃ।

এতে মহাপাতকিনঃ কুম্ভীপাকং প্রযান্তি তে ॥ ইতি ব্রহ্মবৈবর্ত্তে প্রকৃতিখণ্ডে ২৭ অধ্যায়ঃ ॥

যাজনং ক্লী যাগক্রিয়াকারণা। যাগ করান ইতি ভাষা। তত্তু ব্রাহ্মণস্য ষট্‌কর্ম্মান্তর্গত কর্ম্মবিশেষঃ। যথা। অধ্যাপনমধ্যয়নং যজনং যাজনন্তথা। দানং প্রতিগ্রহশ্চৈব ব্রাহ্মণানামকল্পয়ৎ ॥ ইতি মানবে ১ অধ্যায়ঃ ॥

যাজিঃ পুং যজ্ঞঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ। যাগকর্ত্তা। ইত্যুণাদিকোষঃ ॥

যাজুষং ত্রি যজুর্ব্বেদসম্বন্ধি। ইতি সিদ্ধান্তকৌমুদী ॥

যাজ্ঞবল্ক্যঃ পুং ধর্ম্মশাস্ত্রপ্রযোজক মুনিবিশেষঃ। তৎপর্য্যায়ঃ। ব্রহ্মরাত্রিঃ ২ যোগেশঃ ৩। ইতি হেমচন্দ্রঃ ॥ যোগীশ্বরঃ ৪। ইতি মিতাক্ষরা ॥

যাজ্ঞসেনী স্ত্রী যজ্ঞসেনস্যাপত্যং। সা চ দ্রৌপদী। ইতি হেমচন্দ্রঃ ॥

যাজ্ঞিকঃ পুং দর্ভভেদঃ ॥ যাজকঃ ॥ যজ্ঞকর্ত্তা। ইতি শব্দরত্নাবলী ॥ রক্তখদিরঃ ॥ পলাশঃ ॥ অশ্বত্থঃ। ইতি রাজনির্ঘণ্টঃ ॥

যাজ্ঞিক্যং ক্লী যজ্ঞঃ। ইতি সিদ্ধান্তকৌমুদী ॥

যাজ্যং ক্লী যাগলব্ধধনাদি। ইতি সিদ্ধান্তকৌমুদী ॥ যজনীয়ে ত্রি ॥

যাজ্যা স্ত্রী যাগমন্ত্রঃ। ইতি মুগ্ধবোধব্যাকরণং ॥

যাৎ ব্য আখ্যাতপ্রত্যয়বিশেষঃ। সচ বিধিলিঙাশীর্লিঙোঃ পরস্মৈপদপ্রথমপুরুষৈকবচনং। সতু বিধ্যাদ্যর্থক আশীর্ব্বাদার্থকশ্চ। ইতি ব্যাকরণং ॥ মুগ্ধবোধমতে বিধ্যাদ্যর্থে অস্য থী সংজ্ঞা। আশীরর্থে টী সংজ্ঞা ॥

যাতং ক্লী নিষাদিনাংপাদকর্ম্ম। ইতি হেমচন্দ্রঃ ॥ পুস্তকান্তরে যত মিতি পাঠঃ। যথা। অপষ্টন্ত্বঙ্কুশস্যাগ্রং যাত মঙ্কুশবারণং। নিষাদিনাং পাদকর্ম্ম যতং বীতন্তু তদ্দ্বয়ং ॥

যাতঃ ত্রি গতঃ। যাধাতোঃ ক্ত প্রত্যয়েন নিষ্পন্নঃ ॥

যাতনা স্ত্রী গাঢবেদনা। তৎপর্য্যায়ঃ। কারণা ২ তীব্রবেদনা ৩। ইত্যমরঃ ॥ অতিব্যথা ৪। ইতি শব্দরত্নাবলী ॥ নরককজ্জা। ইতি কেচিদিতি ভরতঃ ॥

যাতযামং ত্রি জীর্ণং ॥ পরিভুক্তং। ইত্যমরঃ ॥ উজ্ঝিতং। ইতি মেদিনী

যাতা স্ত্রী পতিভ্রাতৃপত্নী। যা ইতি ভাষা। ইত্যমরঃ॥ গমনকর্ত্তরি ত্রি

যাতাযাতং ক্লী গমনাগমনং। যথা। পৃষ্ঠে ভ্রাম্যদমন্দ মন্দর গিরি গ্রা-বাগ্র কণ্ডুয়নান্নিদ্রালোঃ কমঠাকৃতে র্ভগবতঃ শ্বাসানিলাঃ পান্তু বঃ। যৎসংস্কার কলানুবর্ত্তনবশাদ্বেলানিভেনাম্ভসাং যাতাযাত মতন্দ্রিতং জলনিধে র্নাদ্যাপি বিশ্রাম্যতি॥ ইতি শ্রীভাগবতে ১২ স্কন্ধে ১৩ অধ্যায়ঃ॥

যাতিকঃ পুং পান্থঃ। ইতি শব্দরত্নাবলী॥

যাতু ক্লী রাক্ষসঃ। ইত্যমরঃ॥

যাতুঃ পুং কালঃ॥ অধ্বগঃ। ইতি সিদ্ধান্তকৌমুদ্যামুণাদিবৃত্তিঃ॥ বায়ুঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ

যাতুঃ ত্রি গন্তা। ইত্যুণাদিকোষঃ॥ ক্রিয়াপদং চেৎ গচ্ছতু॥

যাতুঘ্নঃ পুং গুগ্গুলুঃ। ইতি রাজনির্ঘণ্টঃ॥

যাতুধানঃ পুং রাক্ষসঃ। ইত্যমরঃ॥

যাতৃকঃ পুং পান্থঃ। ইতি শব্দরত্নাবলী॥

যাত্যং ত্রি যতিতব্যং। যতনীয়ং। যতধাতোঃ কর্ম্মণি ণ্যৎ প্রত্যয়েন নিষ্পন্নং॥

যাত্রা স্ত্রী বিজিগীষোঃপ্রযাণং। তৎপর্য্যায়ঃ ১ ব্রজ্যা ২ অভিনির্যাণং ৩ প্রস্থানং ৪ গমনং ৫ গমঃ ৬। ইত্যমরঃ॥ প্রস্থিতিঃ ৭ যানং ৮ প্রাণনং ৯। ইতি শব্দরত্নাবলী॥ যাপনং॥ উৎসবঃ। ইতি মেদিনী॥ উপায়ঃ। ইতি বিশ্বঃ॥ * ॥ অথ যাত্রাদিনং। ভাদ্র পৌষ চৈত্রেতর মাসেষু দূরযাত্রা কর্ত্তব্যা॥ পূর্ব্বস্যাং দিশি রবি শুক্র বারস্য প্রাশস্ত্যং। দক্ষিণস্যাং মঙ্গল বারস্য প্রাশস্ত্যং। পশ্চিমায়াং সোম শনিবারস্য প্রাশস্ত্যং। উত্তরস্যাং বৃহস্পতি বারস্য প্রাশস্ত্যং॥ পূর্ব্বস্যাং দিশি সোম শনি বারে নগন্তব্যং। দক্ষিণস্যাং বৃহস্পতি বারে কেষাঞ্চিন্মতে বুধ বারে চ নগন্তব্যং। পশ্চিমায়াং রবি শুক্র বারে। এবং উত্তরস্যাং বুধ মঙ্গল বারে নগন্তব্যং॥ দ্বিতীয়া তৃতীয়া পঞ্চমী সপ্তমী দশমী একাদশী ত্রয়োদশী চ তিথয়ো যাত্রায়াং প্রশস্তাঃ॥ অত্রোত্তম নক্ষত্রাণি। অশ্বিনী অনুরাধা রেবতী মৃগশিরা মূলা পুনর্ব্বসুঃ পুষ্যা হস্তা জ্যেষ্ঠা॥ মধ্যম নক্ষত্রাণি। রোহিণী পূর্ব্বাত্রয়ং চিত্রা স্বাতী শতভিষা শ্রবণা ধনিষ্ঠা॥ অধম

নক্ষত্রাণি। উত্তরাত্রয়ং বিশাখা মঘা আর্দ্রা ভরণী কৃত্তিকা অশ্লেষা॥ তত্র নক্ষত্রশূল কথনং। স্বাত্যাং জ্যেষ্ঠা যাঞ্চ পূর্ব্বদিগ্গমনং নিষিদ্ধং। এবং পূর্ব্বভাদ্রপদে অশ্বিন্যাঞ্চ দক্ষিণ দিগ্গমনং পুষ্যে রোহিণ্যাঞ্চ পশ্চিমদিগ্গমনং উত্তরফল্গুন্যাং হস্তাযাঞ্চ উত্তরদিগ্গমনং নিষিদ্ধং॥ তত্রানুক্ত করণানি। গরং বণিজং বিষ্টিঃ। গরমপি কৈশ্চিচ্ছস্তং মন্যতে॥ অত্র উত্তম লগ্নানি। সিংহ বৃষ ঋন্ত কন্যা মিথুনানি॥ তত্র যোগিনী নির্ণয়ঃ। প্রতিপদি নবম্যাঞ্চ প্রাচ্যাং যোগিনী। তৃতীযাযাং একাদশ্যাঞ্চাগ্নিকোণে। পঞ্চম্যাং ত্রয়োদশ্যাঞ্চ দক্ষিণে। দ্বাদশ্যাং চতুর্থ্যাঞ্চ নৈর্ঋতকোণে। ষষ্ঠ্যাং চতুর্দশ্যাঞ্চ পশ্চিমে। সপ্তম্যাং পূর্ণিমাযাঞ্চ বায়ুকোণে। দ্বিতীযাযাং দশম্যাঞ্চ উত্তরদিশি। অষ্টম্যামমাবাস্যাযাঞ্চ ঈশানকোণে। তাং দক্ষিণে সম্মুখে চ কৃত্বা ন গন্তব্যং। পাপযোগ ত্র্যহস্পর্শ মাসদগ্ধাদিষু যাত্রা ন কর্ত্তব্যা। বারবেলা কালবেলা কুলিকবেলা বিষ্টিভদ্রাদিষু চ যাত্রা ন কর্ত্তব্যা॥ দ্বিরাগমনদিনং নবরত্নাব্দে দ্রষ্টব্যং॥ * ॥ অথ গো যাত্রা প্রবেশ বিক্রযাঃ। তত্র তিথযঃ। অমাবস্যাষ্টমী চতুর্দ্দশী বিষ্টিভিন্নাঃ। তত্র নক্ষত্রাণি। রোহিণী পূর্ব্বফল্গুনী পূর্ব্বাষাঢা পূর্ব্বভাদ্রপৎ উত্তরফল্গুনী উত্তরাষাঢা উত্তরভাদ্রপৎ শ্রবণা ভরণী চিত্রা এতদ্ব্যতিরিক্তানি। যোগাঃ। ব্যতীপাত ভিন্নাঃ। বারাঃ। ক্রূর ভিন্নাঃ। * ॥ অথ নৌকাযাত্রা। তত্র বিহিত নক্ষত্রাণি। অশ্বিনী হস্তা পুষ্য মৃগশিরঃ পূর্ব্বফল্গুনী পূর্ব্বাষাঢা পূর্ব্বভাদ্রপদনুরাধা ধনিষ্ঠা শ্রবণাঃ। বারাঃ শুভ গ্রহাণাং। তত্র লগ্নং শোভনং। তত্র শোভনশ্চন্দ্রঃ। তারা চ শোভনা বিহিতা। ইতি জ্যোতিস্তত্ত্বং॥ * ॥ অথ যাত্রাযাং শুভজনকদ্রব্যদর্শনাদি যথা। ধেনু র্বৎস প্রযুক্তা বৃষ গজ তুরগা দক্ষিণাবর্ত্তবহ্নি র্দিব্যস্ত্রী পূর্ণকুম্ভো দ্বিজ নৃপ গণিকাঃ পুষ্পমালা পতাকা। সদ্যোমাংসং ঘৃতং বা দধি মধু রজতং কাঞ্চনং শুক্লধান্যং দৃষ্ট্বা শ্রুত্বা পঠিত্বা ফলমিহ লভতে মানবো গন্তু কামঃ॥ ইতি সময়প্রদীপঃ॥ * ॥ তত্রাশুভজনক দর্শনং যথা। সম্মুখে রজকং পশ্চাৎ ক্ষুরিণং যদি পশ্যতি। ন গন্তব্যং তদা তস্মাৎ তৈলং বাপ্যগ্রগো হ্যশুভঃ॥ অক্ষো লুণ্ঠতি গৌঃ কাসী ক্ষুতং বা

ত্যকত্তে নরঃ। পশ্যন্ যাত্রা নকর্ত্তব্যা স্ত্রীবং পশ্যতি বাগতঃ॥ ইতি জ্যোতিরাক্ষ্মঃ॥ ❀॥ যাত্রাকালে বিশেষ দর্শন ফলং যথা। মৃগাহি কপি মার্জ্জার শ্বানঃ শূকর পক্ষিণঃ। নকুলো মুষিকশ্চৈব যাত্রায়াং দক্ষিণে শুভাঃ॥ বিপ্রকন্যা শবো কুদু শঙ্খ ভেরী বসুন্ধরাঃ। জন্দুকোষ্ট্রখরাদ্যাশ্চ যাত্রায়াং বামকে শুভাঃ॥ বেণু স্ত্রী পূর্ণ কুম্ভানাং যাত্রায়াং দর্শনং শুভং। কার্পাসৌষধ তৈলঞ্চ পঙ্কাঙ্গার ভুজঙ্গমাঃ। মুক্তকেশো রক্তমাল্যং নগ্নাদ্যশুভ লক্ষণং॥ ❀॥ যাত্রাকালে ছিক্কায়াঃ ফলং যথা। ছিক্কায়া লক্ষণং বক্ষ্যে লভেৎ পূর্ব্বে মহাফলং। আগ্নেয়ে শোক সন্তাপৌ দক্ষিণে হানি মাপ্নুয়াৎ॥ নৈর্ঋত্যে শোক সন্তাপৌ মিষ্টান্নঞ্চৈব পশ্চিমে। অন্নং প্রাপ্নোতি বায়ব্যে উত্তরে কলহো ভবেৎ॥ ঈশানে মরণং প্রোক্তং প্রোক্তং ছিক্কা ফলাফলং॥ ❀॥ অথ যাত্রায়াং দিগ্বিশেষে বিশেষ নক্ষত্রাণি। কৃত্তিকাদৌ তু পূর্ব্বেণ সপ্তঋক্ষাণি বৈ ব্রজেৎ। মঘাদৌ দক্ষিণে গচ্ছেদনুরাধাদি পশ্চিমে॥ প্রশস্তা চোত্তরে যাত্রা ধনিষ্ঠাদিষু সপ্তসু। অশ্বিনী রেবতী চিত্রা ধনিষ্ঠাঃ সদলঙ্কৃতাঃ॥ মৃগাশ্বি চিত্রা পুষ্যাশ্চ মূল হস্তৌ শুভৌ সদা॥ ❀॥ যাত্রাদৌ লগ্নাদিষু গ্রহস্থিতি ফলং যথা। কন্যা প্রদানে যাত্রায়াং প্রতিষ্ঠাদিষু কর্ম্মসু। শুক্রচন্দ্রৌ চ জন্মস্থৌ শুভদৌ চ দ্বিতীয়গৌ॥ শশি জ্ঞ শুক্র জীবাশ্চ রাশৌ চাথ তৃতীয়কে। ভৌম মন্দ শশাঙ্কার্কা বুধঃ শ্রেষ্ঠ শ্চতুর্থকে॥ শুক্রজীবৌ পঞ্চমৌ চ শ্রেষ্ঠৌ সপ্তি কদাহৃতৌ। মন্দার্কেন্দু ক্ষজাঃ ষষ্ঠে গুরু চন্দ্রৌ চ সপ্তমে॥ শুক্র জ্ঞাবষ্টমে শ্রেষ্ঠৌ নবমস্থো গুরুঃ শুভঃ। অর্কার্কি চন্দ্রা দশমে একাদশে হ্যথিলা গ্রহাঃ॥ বুধো হ্যথ দ্বাদশে চৈব ভার্গবঃ সুখদো ভবেৎ। ইতি গারুড়ে ৬০। ৬১ অধ্যায়ঃ॥ ❀॥ অথ রাজ যাত্রা। ইদানীং সর্ব্বধর্ম্মজ্ঞ ধর্ম্মশাস্ত্র বিশারদ। যাত্রাকাল বিধানং মে কথয়স্ব মহীক্ষিতাং॥ যদা মন্যেত নৃপতি রাক্রন্দেন বলীয়সা। পার্ষ্ণিগ্রাহাভিভূতো হরি স্তদা যাত্রাং প্রযোজয়েৎ॥ যোধামত্বা প্রভূতাংশ্চ প্রভূতঞ্চ বলং মম। মূল রক্ষা সমর্থোস্মি তদা যাত্রাং প্রযোজয়েৎ॥ অশুদ্ধপার্ষ্ণি র্নৃপতি র্নতু যাত্রাং প্রযোজয়েৎ। পার্ষ্ণিগ্রাহাধিকং সৈন্যং মূলে নিঃক্ষিপ্য বা ব্রজেৎ॥ চৈত্রে বা মা-

র্গশীর্ষং বা যাত্রাং যাযান্নরাধিপঃ। চৈত্রী নশ্যতি নৈদাঘং হন্তি পুষ্টিঞ্চ শারদী ॥ এতদেব বিপর্য্যস্তং মার্গ-শীর্ষং নরাধিপঃ। শত্রো র্বা ব্যসনে যাযাৎ কালঃ স তু সুদুর্লভঃ ॥ দি-ব্যান্তরীক্ষ ক্ষিতিজৈরুৎপাতৈঃ পী-ড়িতং পরং। সদৃক্ষ পীড়া সংতপ্তং পীড়িতঞ্চ তথা গ্রহৈঃ ॥ জ্বলন্তীব তথৈবোল্কা দিশং যস্য প্রপদ্যতে। ভূকম্পোল্কা দিশং যান্তি যাঞ্চ কেতুঃ প্রসূযতে ॥ নির্ঘাতশ্চ পতেদ্যত্র তং যাযাদ্বসুধাধিপঃ। সবল ব্যসনো-পেতং তথা দুর্ভিক্ষ পীড়িতং ॥ সম্ভূ-ত্যান্তরকোপঞ্চ ক্ষিপ্রং যাযাদরিং নৃপঃ। যূক মাক্ষীক বহুলং বহুপঙ্কং তথা বিলং ॥ নাস্তিকং ভিন্নমর্য্যাদং তথা মঙ্গল বাদিনং। অপেত প্রকৃ-তিঞ্চৈব নিরাশঞ্চ তথা জযেৎ ॥ বিদ্বিষ্ট নাযকাং সেনাং তথা ভিন্নাং পরস্পরং। ব্যসনাসক্ত নৃপতিং বল রাজাভিযোজযেৎ ॥ সৈনিকানাম শস্ত্রাণি স্ফুরন্ত্যঙ্গানি যত্র চ। দুঃস্ব প্নান্যপি পশ্যন্তি বলন্তদভিযোজ-যেৎ ॥ উৎসাহ বল সম্পন্ন শ্চানুর-ক্ত বল স্তথা। তুষ্ট পুষ্ট বলো রাজা পরানভিমুখো ব্রজেৎ ॥ শরীর স্ফুরণে ধন্যে তথা দুঃস্বপ্ন নাশনে।

নিমিত্তে সঙ্কুলে ধন্যে জাতে শত্রু-পুরং ব্রজেৎ ॥ ঋক্ষেষু ষট্‌সু শুদ্ধেষু গ্রহেস্বনুগুণেষু চ। প্রশ্নকালে শুভে-জ্ঞাতে পরান্ যাযান্নরাধিপঃ ॥ এবন্তু দৈব সম্পন্ন স্তথা পৌরুষ সং-যুতঃ। দেশ কালোপপন্নান্তু যাত্রাং যাযান্নরাধিপঃ ॥ উলূকস্য নিশি ধ্বাঙ্ক্ষঃ সচ তস্য দিবা বশে। এবং দে-শঞ্চ কালঞ্চ জ্ঞাত্বা যাত্রাং প্রযোজ-যেৎ ॥ পদাতি নাগ বহুলাং সেনাং প্রাবৃষি যোজযেৎ। হেমন্তে শিশিরে চৈব রথ বাজি সমাকুলাং ॥ খরো-ষ্ট্র বহুলাং সেনাং তথা গ্রীষ্মে নরা-ধিপঃ। চতুরঙ্গ বলোপেতাং বসন্তে বা শরদ্যথ ॥ সেনা পদাতি বহুলা যস্য স্যাৎ পৃথিবীপতেঃ। অভি-যোজ্যো ভবেত্তেন শত্রু র্বিষম মা-শ্রিতঃ ॥ গম্যে বৃক্ষাবৃতে দেশে স্থি-তং শত্রুং তথৈব চ। কিঞ্চিৎ পঙ্কে তথা যাযাদ্বহু নাগো নরাধিপঃ ॥ রথাশ্ব বহুলো যাযাৎ শত্রুং সমপ-থাশ্রিতং। তদাশ্রযন্তো বহুলা স্তথা রাজাভিপূজযেৎ ॥ খরোষ্ট্র বহুলো রাজা শত্রুং বন্ধন সংস্থিতং। বন্ধন-স্থোপি যোজ্যো হরি স্তথা প্রাবৃষিং ভূভুজা ॥ হিমপাত যুতে দেশে স্থি-তং গ্রীষ্মেভিযাজযেৎ। করদ্বজন্তী

ধর্ম্মজ্ঞ কালৌ সাধারণৌ স্মৃতৌ ॥ দ্বিজোত্তম রাজা দ্বিজদেশকালৌ দৈব ত্রিকোণঞ্চ তথৈব বুদ্ধা। প্রাবাৎ পরং কাল বিদাং মতেন সংক্ষিপ্য সার্দ্ধং দ্বিজ মন্ত্র বিদ্ভিঃ ॥ ইতি মাৎস্যে ২১৪ অধ্যায়ঃ ॥ ॥ যাত্রা কালে মাঙ্গল্য দ্রব্যাণি যথা। পৌর্ব্বাপর্য্যং স্ববৃত্তান্তং তানুক্তা চ শুভক্ষণে। তৈরেব সার্দ্ধং বলবান্ বভূব গমনোন্মুখঃ ॥ দদর্শ মঙ্গলং রামঃ শুশ্রাব জয়সূচকং। বুবুধে মনসা সর্ব্বং বিজয়ং বৈরি সংক্ষয়ং ॥ যাত্রাকালে চ পুরতঃ শুশ্রাব সহসা মুনিঃ। হরি শব্দং শঙ্খরবং ঘণ্টা দুন্দুভি বাদনং ॥ আকাশবাণীং সঙ্গীতাং জয় স্তে ভবিতেতি চ। নরোক্তং তঞ্চ কল্যাণং মেঘশব্দং জয়াবহং ॥ চকার যাত্রাং ভগবান্ শুভ্রেত্যেবম্বিধং শুভং। দদর্শ পুরতো বিপ্র বন্দি দৈবজ্ঞ ভিক্ষুকান্ ॥ জ্বলৎ প্রদীপং বিভ্রন্তীং পতি পুত্র বতীং সতীং। পুরো দদর্শ ঘোরাস্যাং নানা ভূষণ ভূষিতাং ॥ শিবং শিবাং পূর্ণকুম্ভং চাসঞ্চ নকুলন্তথা। গচ্ছন্ দদর্শ রামেশো যাত্রা মঙ্গল সূচকং ॥ কৃষ্ণসারং গজং সিংহং তুরগং গণ্ডকং দ্বিপং। চমরীং রাজ হংসঞ্চ চক্রবাকং শুকং পিকং ॥ ময়ূরং খঞ্জনঞ্চৈব শঙ্খচিল্ল ঞ্চকোরকং। পারাবতং বলাকাঞ্চ কারণ্ডং চাতকং চটং ॥ সৌদামিনীং শক্রচাপং সূর্য্যং সূর্য্যপ্রভাং শুভাং। সদ্যোমাংসং সজীবঞ্চ মৎস্যং শঙ্খং সুবর্ণকং ॥ মাণিক্যং রজতং মুক্তাং মণীন্দ্রঞ্চ প্রবালকং। দধি লাজং শুক্লধান্যং শুক্ল পুষ্পঞ্চ কুঙ্কুমং ॥ শুক্লছত্রং পতাকাঞ্চ দর্পণং শ্বেতচামরং। ধেনুং বৎস প্রযুক্তাঞ্চ রথস্থং ভূমিপং তথা ॥ দুগ্ধঞ্চ রোচনা মাজ্য মমৃতং পায়সং তথা। শালগ্রামং পক্কফলং স্বস্তিকং শর্করাং মধু ॥ মার্জ্জারঞ্চ বৃষেন্দ্রঞ্চ মেঘ পর্ব্বত মূষকং। মেঘাচ্ছন্নস্য চ রবে রুদয়ং চন্দ্রমণ্ডলং ॥ কস্তুরীং কজ্জলং তোয়ং হরিদ্রাং তীর্থমৃত্তিকাং। সিদ্ধান্নং সর্ষপং দূর্ব্বাং বিপ্রবালঞ্চ বালিকাং ॥ মৃগং বেশ্যাঞ্চ ভ্রমরং কর্পূরং পীতবাসসং। গোমূত্রং গোপুরীষঞ্চ গোধূলিং গোপদাঙ্কিতং ॥ গোষ্ঠং গবাং বর্ত্ম রম্যং গোশালং গোরতিং শুভাং। তাম্রং স্ফটিকং রৈত্যঞ্চ সিন্দূরং রক্তচন্দনং ॥ গন্ধঞ্চ হীরকং রত্নং দদর্শ দক্ষিণে শুভং। সুগন্ধি বায়ো রাঘ্রাণং প্রাপ বিপ্রাশিষং শুভং ॥ ইত্যেবং মঙ্গলং কৃত্বা প্রযযৌ স মুদান্বিতঃ। ইতি ব্রহ্মবৈবর্ত্তে

গণপতিখণ্ডে ৩৩ অধ্যায়ঃ ॥ ॥ যাত্রাকালে অমঙ্গল সূচকানি যথা। রাজা জগাম সমরং হৃদয়েন বিদূয়তা। সার্দ্ধং সৈন্যসমূহৈশ্চ বাদ্যভাণ্ডৈরসংখ্যকৈঃ॥ দদর্শামঙ্গলং রাজা পুরো বর্ত্মনি বর্ত্মনি। যযৌ তথাপি সমরং ন জগাম গৃহং পুনঃ॥ মুক্তকেশীং ছিন্ননাসাং রুদন্তীঞ্চ দিগম্বরীং। কৃষ্ণবস্ত্রপরীধানামপরাং বিধবামপি॥ মুখদুষ্টাং যোনিদুষ্টাং ব্যাধিযুক্তাঞ্চ জটিনীং। পতিপুত্রবিহীনাঞ্চ ডাকিনীং পুংশ্চলীং মহো॥ অস্ত্রকারং তৈলকারং ব্যাধং সর্পোপজীবিনং। অচেলমপি রুক্ষাঙ্গং নগ্নং কাষায়বাসসং॥ বৎসবিক্রয়িণঞ্চৈব কন্যাবিক্রয়িণং তথা। চিতাং দগ্ধশবং ভস্ম নির্ব্বাণাঙ্গারমেব চ॥ সর্পক্ষতনরং সর্পং গোধাঞ্চ শশকং বিষং। শ্রাদ্ধপাকঞ্চ পিণ্ডঞ্চ মোদকঞ্চ তিলাং স্তথা॥ দেবলং বৃষবাহঞ্চ শূদ্রশ্রাদ্ধান্নভোজিনং। শূদ্রান্নপাচকং শূদ্রযাজকং গ্রামযাজকং॥ অশপুত্রাদিকঞ্চৈব শবদাহকারিণং। [illegible]স্থং [illegible]স্থং তৈলং লবণমস্থি চ॥ কার্পাসং কচ্ছপং চূর্ণং অক্রূরং [illegible] রবং। দা[illegible]ণে চ শৃগাল ও সর্বত্ত ভৈরবং রবং। কপর্দ্দকঞ্চ ক্ষৌরঞ্চ ছিন্নকেশং নখং মলং॥ কলহঞ্চ বিলাপঞ্চ বিলাপকারিণং জনং। অমঙ্গলং বদন্তঞ্চ রুদন্তং শোককারিণং॥ মিথ্যাসাক্ষিপ্রদাতারং চৌরঞ্চ নরঘাতিনং। পুংশ্চলীপতিপুত্রৌ চ পুংশ্চল্যন্নভোজিনং॥ দেবতা গুরু বিপ্রাণাং বস্তুবিত্তাপহারিণং। দত্তাপহারিণং দস্যুং হিংসকং সূচকং খলং। পিতৃমাতৃবিরক্তঞ্চ দ্বিজাশ্বত্থবিঘাতিনং॥ সত্যঘ্নঞ্চ কৃতঘ্নঞ্চ স্থাপ্যাপহারিণং জনং। মিত্রদ্রুহং মিত্রঘ্নঞ্চ ক্ষতং বিশ্বাসঘাতিনঃ॥ গুরুদেবদ্বিজানাঞ্চ নিন্দকং স্বাঙ্গঘাতকং। জীবানাং ঘাতকঞ্চৈব স্বাঙ্গহীনঞ্চ নির্দয়ং॥ ব্রতোপবাসহীনঞ্চ দীক্ষাহীনং নপুংসকং। গলিতব্যাধিগাত্রঞ্চ গুরুলঙ্ঘনমেব চ॥ পুরুষং ছিন্নলিঙ্গঞ্চ সুরামত্তং সুরাং তথা। ক্ষিপ্তং বমন্তং রুধিরং মহিষং গর্দ্দভং তথা॥ মূত্রং পুরীষং শ্লেষ্মাণং কচ্ছিনং নৃকপালিনং। ঝঞ্ঝাবাতং রক্তবৃষ্টিং বাদ্যঞ্চ নৃপঘাতকং॥ বন্ধ্যাঞ্চ শূকরং গৃধ্রং শ্যেনং কঙ্কঞ্চ ভল্লুকং। পাশঞ্চ শুষ্ককাষ্ঠঞ্চ বায়সং গর্দ্দভং তথা॥ অগ্রদানী ব্রাহ্মণঞ্চ তন্ত্রমন্ত্রোপজীবিনং। বৈদ্যঞ্চ রক্তপুষ্পৈশ্চৌষধস্তম্ভমেব চ॥ জলাস্তা

মৃতবার্ত্তাঞ্চ বিপ্রশাপঞ্চ দারুণং। দুর্বাক্যং ব্রাতং দুঃশব্দং রাজা সংপ্রাপ বত্মনি॥ মনশ্চ দৃঢ়ং সিতং প্রাণাঃ ক্ষুভিতাশ্চ নিরন্তরং। বামাঙ্গস্পন্দনং দেহজাড্যং রাজ্ঞো বভূবহ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৩৫ অধ্যায়ঃ॥ * ॥ শ্রীকৃষ্ণস্য মথুরাযাত্রা যথা। রাধিকায়াঞ্চ সুপ্তায়াং সুপ্তাসু গোপিকাসু চ। পুষ্প চন্দন তল্পে চ বায়ুনা সুরভী কৃতে॥ তৃতীয়প্রহরে হতীতে নিশায়াশ্চ শুভক্ষণে। শুভচন্দ্রিক যোগে চামৃতযোগ সমন্বিতে॥ সৌম্য স্বামিযুতে লগ্নে সৌম্যগ্রহ বিলোকনে। পাপগ্রহ সমাসক্ত দৃষ্টি দোষাদি বর্জ্জিতে॥ যশোদাং বোধয়ামাস কারয়ামাস মঙ্গলং। বন্ধুনাপ্যাসয়ামাস সমুত্থায় হরিঃ স্বয়ং। বাদ্যং নিষেধয়ামাস রাধিকা ভয়ভীতবৎ॥ স্বতন্ত্রো বিশ্বকর্ত্তা চ পাতা ভর্ত্তা স্বতন্ত্রবৎ। প্রক্ষাল্য পাদযুগলং ধৃত্বা ধৌতে চ বাসসী॥ উবাস সংস্কৃতে স্থানে বিলিপ্তে চন্দনাদিনা। ফল পল্লব সংযুক্তং সংস্কৃতং চন্দনাদিভিঃ॥ বামে কৃত্বা পূর্ণকুম্ভং বহ্নিং বিপ্রং স্ব দক্ষিণে। পতি পুত্রবতীং দীপং দর্পণং পুরত স্তথা॥ দূর্ব্বা কাণ্ডঞ্চ সুস্নিগ্ধং পুষ্পং ধান্যং সিতং শুভং। গুরুদত্তং গৃহীত্বা চ পুষ্পং মস্তকোপরি॥ ঘৃতং দদর্শ মাধ্বীকং রজতং কাঞ্চনং দধি। চন্দনং লেপনং কৃত্বা পুষ্পমালাং গলে দদৌ॥ গুরুবর্গং ব্রাহ্মণঞ্চ বন্দয়ামাস ভক্তিতঃ। শঙ্খধ্বনিং বেদপাঠং সঙ্গীতং মঙ্গলাষ্টকং॥ বিপ্রাশীর্ব্বচনং রম্যং শুশ্রাব পরমাদরং। ধ্যাত্বা মঙ্গল রূপঞ্চ সর্ব্বত্র মঙ্গল প্রদং॥ চিক্ষেপ দক্ষিণং পাদং সুন্দরং স্বাত্ম বিগ্রহং। বিধৃত্য নাসিকা বামভাগং নিধ্যায় বিভুঃ বিসৃজ্য বায়ু নিঃশ্বাসং নাসা দক্ষিণ রন্ধ্রতঃ। ততো যযৌ নন্দনন্দো নন্দস্য প্রাঙ্গনং বরং॥ ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণ জন্মখণ্ডে ৭১ অধ্যায়ঃ॥ * ॥ অথ যাত্রা যুক্তিঃ। তত্র সময়ঃ। যাত্রায়াং দ্বিবিধঃ কালো বৈকারঃ সহজ স্তথা। প্রোক্ত আত্যয়িকে কার্য্যে বিকারো নাত্র নির্ণয়ঃ॥ সহজঃ স্বেচ্ছয়া রাজ্ঞাং তস্য নির্ণয় উচ্যতে। যাত্রাজ সিংহ মধ্যা শনৈশ্চর বুধোশনসাং গৃহেষু। ভানৌ জলীর বৃষ বৃশ্চিক গোভি দীর্ঘা শস্তস্তু দেবলমতে হ্যধুনি পৃষ্ঠতো হর্কঃ॥ অশ্বিনী রেবতী জ্যেষ্ঠা তথা পুষ্য পুনর্ব্বসূ। মৈত্রং মৃগশিরো মূলা যাত্রায়া মুক্তমাঃ

স্মৃতাঃ ॥ ভরণী কৃত্তিকাশ্লেষা বিশাখাচোত্তরাত্রয়ং। মঘাপশুপতিশৈচব যাত্রায়াং মরণপ্রদাঃ ॥ পূর্বে জ্যেষ্ঠে দহনে নিশাটে যমে জলেশে পবনে মহেশে। ত্যাজ্যং নরস্য প্রতিপৎ ক্রমেণ যুগ্মং তিথীনাং প্রবদন্তি তজ্জ্ঞাঃ ॥ স্যাৎ সংমুখে যান মসুক্ষয়ায় পশ্চাদ্ভবেৎ সর্ব্ব শুভায় পুংসাং। সূর্য্যঃ শুক্রঃ কুজো রাহু [illegible] চন্দ্রো গুরু র্বুধঃ। অশুভঃশোভনা যাত্রা পৃষ্ঠগো মরণং ধ্রুবং ॥ [illegible] দক্ষিণে যানপাদং রোহিণ্যে তচার্য্য মাথ্যঞ্চ শূলং। কামং যায়াৎ সাম্পরায়েষু কার্য্যেষ্বন্যত্রাপি প্রোক্ত শূলানি ভানি ॥ ॥ তত্র দিক্শূলং। ষষ্ঠ্যষ্টমী চতুর্থী চ নবমী দ্বাদশী তথা। চতুর্দ্দশী কুহূ স্ত্যাজ্যা যাত্রায়া মশুভপ্রদাঃ ॥ প্রায়ো জগুঃ সহজ শত্রু দশায় সংস্থাঃ পাপাঃ শুভাঃ সবিতৃজং পরিমুচ্য খস্থং। সর্ব্বত্রগাঃ শুভ ফলং জনয়ন্তি সৌম্যা স্ত্যক্ত্বারি সংস্থ মমরারিগুরুং জিগীষোঃ ॥ নাকাল বর্ষ বিদ্যুৎ স্তনিতেষ্বিষ্টং কথঞ্চিদপি যানং। আসপ্তাহাদ্দিব্যান্তরীক্ষ ভৌমৈ স্তথোৎপাতৈঃ ॥ ॥ তত্র ক্রমঃ। রাজ্ঞাং যাত্রা বিধিং বক্ষ্যে জিগীষূণাং পরাবনীং। নীরাজনা বিধিং কৃত্বা সৈনিকাশ্চানয়েত্ততঃ ॥ গজাননশ্বান্ মৃগানন্যানিতি যাত্রা ক্রমো মতঃ ॥ ॥ তত্র নীরাজনাবিধিঃ। বর্ষান্তে হ্যুত্তরদিকে শুক্রে চন্দ্রে পূর্ণে শুভক্ষণে। অশ্বনীরাজনং কুর্য্যাৎ যথোক্ত মৃষি সত্তমৈঃ ॥ উদীচীং প্রস্থিতে ভানৌ সংক্রান্ত্যাং বা শুভে দিনে। গজ নীরাজনং কুর্য্যাৎ মহীপালো জিগীষিবান্ ॥ বৃশ্চিকস্থে রবৌ কুর্য্যাৎ পত্তিনীরাজনা বিধিং। নৌকা নীরাজনং কুর্য্যাৎ দক্ষিণাশাং প্রতিষ্ঠতি ॥ অন্যেষাঞ্চৈব যানানাং বিজয়া দশমী তিথিং। ধ্বজাদীনাঞ্চ সর্ব্বেষাং শক্রোত্থানে নিরাজনং ॥ ছত্রস্য নবদণ্ডস্য তথা সিংহাসনস্য চ। গৃহস্য নগরস্যাপি মহাবিষুব সংক্রমে ॥ আত্মনো যুবরাজস্য মহিষ্যা মন্ত্রিণাং তথা। স্ব জন্মদিবসে রাজা কুর্য্যান্নীরাজনা বিধিং ॥ অভিষেক দিনং প্রোক্তমেবাং জন্মদিনং যথা। তদ্বথা। অশ্বানাং ভাস্করো দেবো রেবন্তমিতি সংজ্ঞয়া। গজানাং দেবতা শক্রঃ পত্তীনাং কালিকা মতা ॥ নৌকানাং বরুণো দেবো যানানান্ত জয়ন্তকঃ। অস্ত্রাণাং দেবতা রামো যমঃ খড়্গস্য পূজ্যতে ॥ ধ্বজানাং

হনুমান্ পূজ্যো বৃহস্পতি রিতি ক্রমাৎ। তান্ পূজয়িত্বা বিধিবদেতান্নীরাজয়েন্নৃপঃ ॥ দ্বাদশ মহিষৈঃ পুষ্টৈ শ্চামর ঘণ্টা স্বনাদি ভূষিতৈঃ। ছাগলৈ র্মহিষ দ্বিগুণৈঃ পুরুষৈ স্তদ্দ্বিগুণৈ শ্চারু দীপিকাভিঃ॥ ভব্যং বা সহস্রাংশু দিনে নীরাজয়েদ্রাজা। দ্বাদশ বাহৈ রুচিরৈঃ সাঙ্গোপাঙ্গৈ রতোর্দ্ধত শ্চোষ্ট্রৈঃ॥ তস্যার্দ্ধতো ব্যাঘ্রৈ র্গজশত নীরাজনং সমুক্তি। ছাগল শতং বৃষভ শতং শতঞ্চ মেষাণাং॥ তুরগা দশ হৃষ্টাঙ্গা ব্যাঘ্রাঃ পঞ্চ দ্বিপশ্চৈকঃ। ভল্লুকা হি স্তকুরাশ্চৈকৈকাঃ পত্তি লক্ষণস্য ॥ নৌকা শতকং সাঙ্গং নব দশকং কাঞ্চনাদিভি র্ঘটিতং। বহুশতমপি জন্তূনাং নৌকা নীরাজনে রাজ্ঞাং॥ যদ্বা দ্বিপদং যানং সর্ব্বেষা মিষ্যতে তুরগৈঃ। সুদশা বৎসরবসিতৈ র্যোগ্যাঙ্গৈ র্যোগ্যবর্ণৈশ্চ॥ অষ্টাভি র্ধাতুভিঃ স্বয্যাদস্ত্র নীরাজনা বিধিং। গজাশ্ব নর নৌকাভি র্দ্বিগুণাভি র্যথোত্তরং। রত্নৈ র্নানাবিধৈ র্বস্ত্রৈ র্ধাতুভি র্বসনৈ স্তথা॥ সিংহাসনৈশ্চ যোগ্যৈশ্চ স্বর্য্যান্নীরাজনা বিধিং। গৃহ নীরাজনাপ্যেবং নরস্যাথ নিগদ্যতে ॥ শ্বভিঃ খরৈঃ শৃগালৈশ্চ ব্যাঘ্রৈ রুষ্ট্রৈ স্তথোদ্ধতৈঃ। পুরং নীরাজয়েদ্রাজা চির সম্পত্তি হেতবে॥ দ্বাদশাশ্ব স্তদর্দ্ধেন নরৈশ্চৈব তদর্দ্ধতঃ। ব্যাঘ্রাদীনাং তথৈবৈকং রত্নং নানা বিধ স্তথা॥ অস্ত্রাণি ধাতবশ্চৈব বস্ত্রাণি চ ফলানি চ। বনজাঃ স্থলজাশ্চৈব জলজাশ্চৈব জন্তবঃ॥ নবগ্রহাশ্চ সূর্য্যাদ্যাঃ শৈলাঃ সপ্ত ঘটা স্তথা। যোগ্য ধাতু সুসম্বদ্ধা নৌকাথণ্ডত্রয় স্তথা॥ নিজ দেহ মিতং স্বর্ণং রজতং তাম্রমেব বা। আত্ম নীরাজনে দদ্যাদ্দ্বিজেভ্য শ্চির সংস্থিতিং॥ অস্ত্রৈ র্নানা বিধৈঃ স্বর্য্যাদ্দ্বব রাজ্ঞ নিরাজনং। অলঙ্কারৈশ্চ বিবিধৈ র্দেবী নীরাজনং মতং॥ মন্ত্রি নীরাজনং রাজা স্বযৈনৈব সমাচরেৎ। অমাত্যানাং সৈনিকানাং বিপ্রাণাং ধনিনা স্তথা। বস্ত্রে নীরাজনং স্বর্য্যাদিতি ভোজস্য সম্মতং। নীরাজনায়া বস্তূনি ন পশ্যেন্ন পুনঃ স্পৃশেৎ॥ সপ্ত কৃত্বঃ পরিভ্রাম্য স্বর্য্যান্নীরাজনা বিধিং। ন্যসেদ্বা পররাষ্ট্রেষু গহনে বা জলে পিবা॥ দৈবজ্ঞবৈদ্য দীনেভ্যঃ প্রযচ্ছেদ্বা যথা যথং। ইতি সংক্ষেপতঃ প্রোক্তো ময়া নীরাজনা বিধিঃ। অনেন বিধিনা রাজা সুচিরং সুখ মশ্নুতে ॥ তথাহি গর্গঃ। নীরাজনা

মহীন্দ্রাণাং নিহন্তি বিপদো খিলাঃ। সৈব সমূহনং রাজ্ঞাং কঞ্চুকেনেব সংযতঃ ॥ নীরাজনা বন্দিতানাং ন ভয়ং বিদ্যতে ক্বচিৎ। নীরাজনা বিহীনানাং নশ্যেয়ুঃ সর্ব্ব সম্পদঃ ॥ তথা চ বাৎস্যঃ। যে ভূমিপালাঃ প্রতিবৎসরান্তে স্বর্ব্বন্তি নীরাজন কর্ম্ম সম্যক্। তেষাং ন লক্ষ্মীঃ ক্ষয়তামুপৈতি সাম্রাজ্য লক্ষ্মীঃ করগৈব তেষাং। এবং নীরাজনং কৃত্বা রাজা প্রস্থান মাচরেৎ। ইতি নীরাজনাবিধিঃ ॥ ॥ অথ যাত্রা। গুণাতিশয় সম্পন্নঃ শত্রুং যাযাজ্জিগীষয়া যদি পশ্চাৎ প্রকোপো ন যদি রাষ্ট্রে ন কণ্টকাঃ ॥ সংজ্ঞাবান্যত্র যাযাদ্বা পার্ষ্ণিগ্রাহেণ শত্রুণা। রাত্রাবুলূকো বিনিহন্তি কাকান্ কাকো হ্যপ্যুলূকান্ রজনী ব্যপায়ে। ইতি স্বকালং সমুদীক্ষ্য যাযাৎ কালে ফলন্তীহ সমীহিতানি ॥ প্রবল ব্যসনোপেতং দুর্ভিক্ষাদি প্রপীড়িতং। সস্য সান্তরকোপেতং ন যাযাৎ পৃথিবীপতিঃ ॥ নিজ দৈবানুকূল্যে হি প্রাতিকূল্যে পরস্য চ। যাযাজ্জপো যতো দৈবং বলমেতৎপরং মতং। অন্যত্র তু। নিরাতঙ্কে নিকেৎপাতে নিরুদ্বিগ্নে নিরাময়ে। বিপক্ষে স্বয়মিচ্ছন্তি রাজানো বিজিগীষবঃ ॥ ইতি যুক্তিকল্পতরুঃ ॥ ॥ যুদ্ধযাত্রায়াং মঙ্গল দর্শনং যথা। তস্য নির্গচ্ছতো গেহাৎ শ্বানোহি মুখতো হুভবৎ। গৃধ্রে ক্রুরোহ কাপোতঃ শিবা শ্যামা চ দক্ষিণা ॥ পিঙ্গলাচঞ্চুগোধা চ শূকরী কেবলী তথা। গজ বানর সেনাজ শিখি ছিক্কাশ্চ বামতঃ ॥ পথং বিভিন্দতে সর্পঃ স্বস্তোদকং ব্যশীর্য্যত। ক্বরাব বানরো ঋক্ষো মার্জারো হ্যতি ভৈরবং ॥ তৈল তক্র তৃণ কেশ যূক্কাভ্যক্তাদি দর্শনং। বাস্তোন্মত্ত জড়মূক ক্ষুৎক্ষাম নক্রজং রবং ॥ তুষ কার্পাস লবণানাং নিন্দিতানাঞ্চ দর্শনং। রক্তাম্বর ধরো মুণ্ডঃ পক্কাস্রিষং তথা বসা ॥ ললাটং শক্রসশ্চাপ উল্কাপাত ধূম্রাকণাঃ। দিশাং দাহ মহাকম্পাঃ সরজঃ কলুষং নভঃ ॥ নিস্তেজ স্তেপতে ভানু র্নদ্যঃ প্রতিমুখাবহাঃ। উষ্ণোদকং মহাকূপং দর্শং দীর্ঘিকাসু চ ॥ অকাল বিকৃতিঃ পদ্ম কলানা মহ্ভুত্তদা। শীত উষ্ণ বিপর্য্যাসা মেঘনাদাশ্চ দারুণাঃ ॥ আরণ্য সত্ত্বা গ্রামেষু গ্রামজারণ্যবাসিনঃ। ক্রোষ্ট্র সর্প সমূহাশ্চ শঙ্খশ্বানা পিপীলকাঃ ॥ ঋক্ষাণাং মহতাসেনা মৃগানাঞ্চ তথৈব চ। এতে চ

পুরপ্রাকারে নিপতন্ত্যুৎপতন্তি চ ॥ দুর্নিবারঃ শার্করো বায়ুর্দীনা যোধা হতপ্রভাঃ। শকৃন্মূত্রাসৃক্পাতাধনি গজা অশ্বাঃ প্রচক্রিরে ॥ ধ্বজ ছত্র শস্ত্রাকানাং স্ফুটনং দণ্ডভিন্দনং। কলঙ্ক মসি চক্রে চ হতা দুন্দুভি রেব চ ॥ ছত্রাতলাকূটনঞ্চাপি নারাচানাঞ্চ জঞ্চতা। গদানাং মুদ্গরাণাঞ্চ শীর্ণতা হ্যনুভিন্দত। শঙ্খপুরোহংশ্চার্কসার্দ্ধং পাত স্তথৈব চ। প্রতিমাক দিক্ স্বেদা মৃতকানাঞ্চ জল্পনং ॥ শিবাং রাসভ মারোহঃ স্ত্রীণাঞ্চ বরপত্যতা। স্ত্রীসূতে অবি ছাগাদি হ্যজাবি শিশুশোভনং ॥ বালানাং যাতনং যুদ্ধে নিস্ত্রিংশাঃ সকলাঃ প্রজাঃ। মক্ষিকা দংশ মণ্ডূক বহু গোনাস দর্শনং ॥ নিস্তেজা ন বহেদ্বহ্নিঃ সধূমঃ স্ফুটতে মুহুঃ। এবম্বিধান্ তথোৎপাতান্ দৃষ্টান্ ঘোরেণ বাসব ॥ পপ্রচ্ছ নারদং সো২থ কিমেতদ্বিকৃতং দ্বিজ। ইত্যাদ্যে দেব্যবতারে ঘোর বধাধ্যায়ঃ ॥ * ॥

অথ দ্বাদশযাত্রা।

প্রণম্য জগতাং নাথং কলি কল্মষ নাশনং। দ্বাদশ যাত্রাং তত্ত্বানি বক্তি শ্রীরঘুনন্দনঃ ॥ তত্রাদৌ দ্বাদশ যাত্রা কালস্য মুখ্যোপাদেয়ত্বাৎ আদৌ সএব নিরূপ্যতে। তদ্যথা স্কন্দপুরাণে ইন্দ্রদ্যুম্ন উবাচ। বৈশাখাদিষু মাসেষু যাত্রা পূজা বিধিং মুনে ॥ শ্রোতুমিচ্ছামি দেবেশে যথাবদ্বক্তু মর্হসি। জৈমিনিরুবাচ। বৈশাখাদিষু মাসেষু দেবদেবস্য শার্ঙ্গিণঃ। যাযাদ্বাদশ যাত্রাঃ স্যু স্তা হি বক্ষ্যামি তে শৃণু ॥ বৈশাখে চান্দনী যাত্রা জ্যৈষ্ঠে স্নাপনদীরিতা। আষাঢে রথযাত্রা স্যাৎ শ্রাবণে শয়নী তথা ॥ ভাদ্রে দাক্ষিণপার্শ্বী যা আশ্বিনে বাম পার্শ্বিকা। উত্থানী কার্ত্তিকে মাসি ছাদনী মার্গশীর্ষকে ॥ পৌষে পুষ্যাভিষেকঃ স্যান্মাঘে শাল্যোদনী তথা। ফাল্গুনে দোল যাত্রা স্যাচ্চৈত্রে মদনভঞ্জিকা ॥ একৈকা মুক্তিদা সর্ব্বা ধর্ম্মকামার্থসাধনাঃ। * ॥ অথ যাত্রা বিধিঃ। স্কান্দে। বৈশাখস্য সিতেপক্ষে তৃতীয়াক্ষয সংজ্ঞিতা। তত্র মাং লেপয়েদ্গন্ধ লেপনৈ রতিশোভনৈঃ ॥ বৈশাখস্যামলেপক্ষে তৃতীয়া পাপনাশিনী। স্বয়মাবিষ্কৃতা চৈষা প্রাজাপত্যর্ক্ষসংযুতা ॥ যঃ পশ্যতি তৃতীয়ায়াং কৃষ্ণং চন্দন ভূষিতং। বৈশাখস্য সিতে পক্ষে স যাত্যচ্যুত মন্দিরং ॥ বৈষ্ণবা জয়শব্দৈশ্চ পূজয়িত্বা তদা

হরিং। নানা সূক্তোপনিষদৈ র্বিশেষং সংস্তবন্তি চ ॥ বেণু বীণাদি বাদ্যৈশ্চ তথা নানোপহারকৈঃ। সন্তোষযন্ জগন্নাথং তৃতীযাদৌ বিলেপযেৎ ॥ বৈশাখস্য তৃতীযাযাং জলমধ্যে বিশেষতঃ। লেপনং মণ্ডপে বার্য্যাম্মণ্ডলে বা বৃহদ্বনে। চন্দনাগুরু হ্রীবেরং কুষ্ঠ কুঙ্কুম রোচনাঃ॥ জটামাংসী মুরা চৈব বিষ্ণো র্গন্ধাষ্টকং বিদুঃ। এতৈ র্গন্ধৈ স্তথান্যৈশ্চ বিষ্ণো র্গাত্রাণি লেপযেৎ ॥ ঘৃতঞ্চ তুলসীকাষ্ঠং বর্য্যাল্লেপন কর্ম্মণি ॥ ১ ॥ * ॥ অথ স্নানযাত্রা। স্কন্দ পুরাণং। জ্যৈষ্ঠ্যা মহঞ্চাবতীর্ণ স্তৎ পুণ্যং জন্মবাসরং। তস্যাঞ্চ স্নাপনং কার্য্যং মহাস্নান বিধানতঃ॥ তস্যাং প্রাতস্নানকালে ব্রহ্মণা সহিতঞ্চ মাং। রামং সুভদ্রাং সুস্নাপ্য মম লোক মবাপ্নুযাৎ॥ তথা। মাসি জ্যৈষ্ঠে তু সংপ্রাপ্তে নক্ষত্রে শক্রদৈবতে। পৌর্ণমাস্যাং হরেঃ স্নানং সর্ব্ব কাম ফলপ্রদং॥ সর্ব্বতীর্থ সমঃ কূপ স্তদা স্তে নির্ম্মলঃ শুচিঃ। তদা ভোগবতী তত্র প্রত্যক্ষং ভবতি দ্বিজাঃ ॥ তস্মাৎ জ্যৈষ্ঠ্যাং সমুদ্ধৃত্য হেমাজ্যৈঃ কলশৈ র্জ্জলৈঃ স্নাপযন্তি তদা কৃষ্ণং সভদ্রং তং হলাযুধং॥ জন্মাহনি হরেঃ স্নান মুৎসবং পরমাদ্ভুতং। উৎসবো বৈ ন হীযেত তস্মাত্তন্নত্রতশ্চরেৎ। ... জন্মনাং ক্ষযকারিত্বাজ্জন্মযাত্রা প্রতিষ্ঠিতা। জ্যৈষ্ঠ স্নানং ভগবতো যে পশ্যন্তি মুদান্বিতাঃ॥ ন তে ভবাব্ধৌ মজ্জন্তি যাত্রাযাং যতমানসাঃ। জ্যৈষ্ঠে চ স্নপনং বর্য্যাৎ শ্রী বিষ্ণো র্জন্মবাসরে ॥ দৈনন্দিনকৃত দুরিতং পক্ষ মাসর্ত্তু বর্ষজং। ব্রহ্মহত্যা সহস্রাণি জ্ঞানাজ্ঞান কৃতানি চ ॥ স্বর্ণস্তেয সুরাপান গুরুতল্পযুতানি চ। কোটি কোটি সহস্রাণি ক্ষুদ্রপাপানি যানি চ ॥ সর্ব্বান্যেব প্রণশ্যন্তি পৌর্ণমাস্যান্তু বাসরে। পুরুষসূক্ত মন্ত্রেণ পাবমান্যা তথৈব চ॥ নারিকেলোদকেনাথ তথা তাল ফলাম্বুনা। পঞ্চামৃতৈঃ শীততোযৈ র্দূর্ব্বা কর্পূরবাসিতৈঃ॥ যবোদকেন শুদ্ধেন তথা পুষ্পোদকেন চ। স্নাপযিত্বা জগন্নাথং পূজযেৎ পরমেশ্বরং ॥ ওঁ ঘং ঘণ্টাযৈ নমঃ ইতি ঘণ্টাবাদ্যং নিবেদযেৎ। য এবং কুরুতে বিদ্বান্ ব্রাহ্মণঃ ক্ষত্রিযঃ শুচিঃ ॥ সর্ব্ব পাপৈঃ প্রমুচ্যেত বিষ্ণুলোকং স গচ্ছতি। চতুর্দশ্যাং দৃঢ়ং মঞ্চং কারযিত্বা সুশোভনং॥ সুগন্ধি ধূপ সুরভিং চন্দনাম্বুঃ সমুক্ষিতং। এবং মঞ্চং

প্রতিষ্ঠাপ্য কলসানধিবাসয়েৎ ॥ সুবাসিতং জল পূর্ণং পাবকং কলসং ন্যসেৎ। জয়শব্দৈশ্চ স্তুতিভির্নীয়ন্তে জগদীশ্বরঃ॥ জয়স্ব রাম কৃষ্ণেতি জয় ভদ্রেতি চোদিতে। নীয়তে মঞ্চদেশন্তু নিশীথে ব্রাহ্মণাদিভিঃ॥২॥ ❀॥ অথ রথ যাত্রা। স্কন্দপুরাণং। গুণ্ডিকাখ্যাং মহাযাত্রাং প্রজ্ঞবীথাঃ ক্ষিতীশ্বর। আষাঢস্য সিতে পক্ষে দ্বিতীয়া পুষ্য সংযুতা॥ তস্যাং রথে সমারোপ্য রামং মাং ভদ্রয়া সহ। যাত্রোৎসবং প্রবৃত্ত্যাথ প্রীণয়েচ্চ দ্বিজান্ বহূন্॥ ঋক্ষাভাবে তিথৌ কার্য্যা সদা সা প্রীতয়ে মম। সপ্তাহং সরিত স্তীরে মম যাত্রা ভবিষ্যতি॥ অষ্টমে দিবসে সর্ব্বান্ রথান্ মাল্যৈ র্বিভূষয়েৎ। নবম্যা মানয়েদ্দেবাংস্তেষু প্রীতঃ সমৃদ্ধিদান্॥ দক্ষিণাভিমুখী যাত্রা বিষ্ণোরেষা সুদুর্লভা। যথা পূর্ব্বা তথা চেয়ং তে দ্বে মুক্তি প্রদায়িকে॥ অষ্টাহে বিসৃজেচ্চক্রং তদর্দ্ধেন তু পার্ব্বতীং। ইতিবৎ তিথিনা একাহো বোদ্ধব্যঃ। তিথিনৈকেন দিবস শ্চান্দ্রমানেন কীর্ত্তিতঃ। ইতি বিষ্ণুধর্ম্মোত্তরাৎ॥ মত্ত। আষাঢস্য সিতে পক্ষে ভদ্রা যা পুষ্য সংযুতা। যাত্রোৎসবং প্রজ্ঞবীথা স্তু ভাবে পুষ্য এব হি॥ ইতি ঈশ্বর সংহিতায়াং বচনান্তরং। তদ্বৈকল্পিক প্রযোগান্তর বিধায়কং॥ পাদ্মে। আষাঢস্য দ্বিতীয়ায়াং রথং কুর্য্যাদ্বিশেষতঃ। আষাঢ শুক্লৈকাদশ্যাং জপ হোম মহোৎসবং॥ নাতঃ পরং হি কৃষ্ণস্য যাত্রান্তর মপেক্ষতে। অত্র স্বয়ং ত্রিলোকেশঃ স্যন্দনেন কুতূহলাৎ॥ নাশয়ন্ সর্ব্বপাপানি বর্ষে বর্ষে ব্রজেদসৌ। রথস্থিতং ব্রজন্তং তং মহাবেদী মহোৎসবে॥ যে পশ্যন্তি মুদা ভক্ত্যা বাস স্তেষাং হরেঃ পদে। সত্যং সত্যং পুনঃ সত্যং প্রতিজ্ঞাতং দ্বিজোত্তমাঃ॥ নাতঃ শ্রেয়ঃ পদো বিষ্ণো রুৎসবঃ শাস্ত্র সম্মতঃ। রথযাত্রৈব যাত্রাণাং মুখ্যেত্যাহ প্রজাপতিঃ॥ মহাবেদীং ব্রজন্তং তং রথস্থং পুরুষোত্তমং। বলভদ্রং সুভদ্রাঞ্চ দৃষ্ট্বা মুক্তি র্নচান্যথা॥ আষাঢস্য সিতে পক্ষে দিনে বিষ্ণোঃ শুভপ্রদে। প্রতিষ্ঠাপ্য সমৃদ্ধেন বিধিনা পূর্ব্বদ্দ্বিজাঃ॥ রথং নরো হরেঃ কুর্য্যাৎ স্বাসনং সুপরিস্কৃতং। ভূষয়েদ্বিবিধৈ র্ভক্ত্যা বস্ত্রালঙ্কার মাল্যকৈঃ॥ মৃদঙ্গ পণবাদ্যৈশ্চ ভেরী ঢক্কাদয় স্তথা। নট নর্ত্তক মুখ্যাশ্চ গায়না বহব স্তথা॥ বেশ্যা

যৌবন দর্পাঢ্যা রূপালঙ্কার ভূষিতাঃ। ধৃতাশ্চ বহব স্তত্র পতাকাধিষ্ঠিতান্তরাঃ॥ গরুড়ঙ্ক ধ্বজং স্বর্য্যাৎ রক্তচন্দন মিশ্রিতং। দীর্ঘনাসং পীতদেহং স্বণুনাত্যাং বিভূষিতং॥ চঞ্চুগ্রদষ্ট ভুজগং সর্ব্বালঙ্কার ভূষিতং। দেব্যাঃ পদ্মধ্বজং স্বর্য্যাৎ পদ্মরাগ বিনির্ম্মিতং॥ সপ্তচ্ছদময়ং স্বর্য্যাচ্ছীরিণে লাঙ্গলধ্বজং। সারথিং বাজিনশ্চৈব বলং বল মুখান্বিতং॥ হীর কৈর্মঙ্গলৈর্দীপ্তৈর্বলিবর্গৈঃ সুশোভনং। ইত্থং সু ঘটিতং তস্ত রথংদেবত্রয়স্য চ॥ অরুণোদয় বেলায়াং দেবং ত্রয়াৎ প্রপূজয়েৎ। ব্রাহ্মণৈ র্বৈষ্ণবৈঃ সাৰ্দ্ধং যতিভিশ্চ তপস্বিভিঃ॥ বিজ্ঞাপয়েদ্দেবদেবং যাত্রার্থে স কৃতাঞ্জলিঃ। ততঃ কর্পূর পর্ণৈশ্চ সুমনোভি রবাকিরেৎ॥ পথি শোভন সূক্তানি প্রপঠন্তি দ্বিজাতয়ঃ। কেচিন্মঙ্গল গাথাশ্চ কেচিজ্জয় জয়েতি চ॥ জিতন্ত ইতি মন্ত্রং বৈ কেচিৎ পুরুষ জপন্তি চ। সূত মাগধ মুখ্যাশ্চ কীর্ত্তিং কার্যাং মুদা যুতাঃ॥ চর্চ্চরী ঝাঝরী বেণু বীণা মাধুরিকাদয়ঃ। শব্দায়ন্তে সমধুরং গোবিন্দ বি... [illegible] ...প্রাঃ পাঠন্ত ... কৃষ্ণং ... ভদ্রা

ঞ্চ কৃত্রিমাশ্চ বিশ তথা॥ কয়ে ধৃত্বা জগন্নাথং ভ্রাময়িত্বা রথত্রয়ং। রামং ভদ্রাঞ্চ কৃষ্ণঞ্চ রথমধ্যে নিবেশয়েৎ॥ পূজয়েদুপচারৈস্তৈঃ শ্রদ্ধা ভক্তি সুসংযতঃ। রথচ্ছায়াং সমাক্রম্য ব্রহ্মহত্যাং ব্যপোহতি॥ তদ্রেণু সংসক্ত তনুস্ত্যজেদ্বৈ পাপ সংহতিং॥ ঘনাম্বু বৃষ্টি সিক্তেন স্বর্গঙ্গা স্নানজং ফলং॥ যে প্রণামং প্রকুর্ব্বন্তি তেপি মোক্ষ মবাপ্নুয়ুঃ। অনুগচ্ছন্তি যে কৃষ্ণং তে দেব তুল্য বিগ্রহাঃ॥ বেদৈ স্তুবন্তি বেদানাং বক্তারো মোক্ষভাগিনঃ। ইতিহাস পুরাণাদ্যৈঃ স্তোত্রৈ র্বাপি সুসংস্কৃতৈঃ॥ স্তুবন্তি পুণ্ডরীকাক্ষং যেবৈ বিগত কল্মষাঃ। তে বৈ জয়ন্তি পাপানি জয়শব্দৈ স্তুবন্তি যে॥ নর্ত্তনং কুরুতে বাপি গায়ন্ত্যথ নরোত্তমাঃ। বৈষ্ণবোত্তম সংসর্গান্মুক্তিং প্রাপ্নোত্যসংশয়ং॥ নামানি কীর্ত্তয়িষ্যন্তি ন তে যান্তি যমালয়ং। জয়ম্ব রাম কৃষ্ণেতি জয় ভদ্রেতি যো বদেৎ। ন মাতৃগর্ভে বাসোহস্য স চ দেবত্ব মাপ্নুয়াৎ। চামরৈর্ব্যজনৈঃ পত্রৈ স্তবকৈ শ্চীনচেলকৈঃ॥ রথস্যাগ্রে স্থিতো যো বৈ বীজয়েৎ পুরুষোত্তমং। সংবীজ্যমানো হপ্সরোভির্দেব গন্ধর্ব্ব যোজিতান্॥ ভুক্ত

ভুক্তভোগানখিলান্ যাবদাহূত সংপ্লবং। নাতঃ পরতরো লোকে মহাবেদী মহোৎসবাৎ ॥ সর্ব্বপাপহরো যোগঃ সর্ব্বতীর্থ ফলপ্রদঃ। কৃষ্ণমুদ্দিশ্য যে তত্র দানং দদতি বৈ নরাঃ ॥ যৎকিঞ্চিদক্ষয় ফলং মেরুদানেন সংমিতং। গুণ্ডিকামণ্ডপে যান্তং ভদ্রা কৃষ্ণং সহাগ্রজং ॥ তত্রাতপশ্রান্ত গাত্রং দর্পণেষ্বভিষেচয়েৎ। পঞ্চামৃতৈঃ শীততোয়ৈঃ পদ্ম কর্পূর বাসিতৈঃ ॥ নারিকেল জলেনাথ তথা তাল ফলাম্ভসা। রত্নোদকেন শুদ্ধেন তথা পুষ্পোদকেন চ ॥ সর্ব্বাঙ্গমনুলিম্পেচ্চ চন্দনেন্দুমৃগদ্রবৈঃ। সুগন্ধি মাল্যাভরণৈ শ্চীনচেলৈঃ সুশোভনৈঃ ॥ চামরৈশ্চ জলাভৈশ্চ শীতলৈ র্ব্যজনৈস্তথা। বীজয়েৎ পুণ্ডরীকাক্ষং সুভদ্রাং বলমেব চ ॥ সিতাভিঃ পানকৈ র্হৃদ্যৈস্তথা খণ্ডবিকারকৈঃ। খর্জ্জূরৈ র্নারিকেলৈশ্চ নানা রম্ভাফলাদিভিঃ ॥ তথা ক্ষীরবিকারৈশ্চ পনসৈ রিক্ষুভিস্তথা। বাসিতৈঃ শীততোয়ৈশ্চ গন্ধ তাম্বূল পত্রকৈঃ ॥ সকর্পূর লবঙ্গাদ্যৈঃ পূজয়েৎ পরমেশ্বরং। রথত্রয় স্থিতং দেব ত্রয়ং যে পুরুষর্ষভাঃ ॥ প্রদক্ষিণং প্রকুর্ব্বন্তি ত্রি চতুঃ সপ্ত এব চ ॥ ততো হপরাহ্নে দেবেশং দক্ষিণানিল বীজিতং ॥ শনৈঃ শনৈ র্নয়েদ্বিষ্ণুং মঞ্চকস্য চ মধ্যগে। এবং ব্রজতি দেবেশে সূর্য্যঃ শান্তং গতো ভবেৎ ॥ দীপকানাং সহস্রাণি জ্বালিতানি নরৈস্ততঃ। মণ্ডপে বাসয়েদ্দেবান্ গুণ্ডিকাখ্যে মনোহরে ॥ চারুচন্দ্রাতপে চারুমাল্য চামর ভূষিতে। পূজয়িত্বা জগন্নাথং তোষয়েৎ গীত নৃত্যকৈঃ ॥ উপহারাদিভিস্তত্র সপ্তাহানি জনার্দ্দনং। সপ্তাহং যে প্রপশ্যন্তি গুণ্ডিকামণ্ডপে হরিং ॥ মাঞ্চ রামং সভদ্রাঞ্চ বিষ্ণুসাযুজ্যমাপ্নুয়াৎ। দিবা তদ্দর্শনং পুণ্যং রাত্রৌ দশগুণং ভবেৎ ॥ যৎকিঞ্চিৎ ক্রিয়তে কর্ম্ম কোটি কোটি গুণং ভবেৎ। সর্ব্বং মেরুসমং দানং সর্ব্বে ব্যাসসমা দ্বিজাঃ ॥ মহাবেদ্যাং গতে কৃষ্ণে যোগো হয়ং খলু দুর্লভঃ। অর্দ্ধোদয়াদিকা যোগাঃ স্কন্দেন পরিভাবিতাঃ ॥ মহাবেদ্যাখ্য যোগস্য কলাং নার্হন্তি ষোড়শীং। অষ্টাহে চ পুনঃ কৃত্বা দক্ষিণাভিমুখান্ রথান্ ॥ দক্ষিণাভিমুখী যাত্রা বিষ্ণোরেষা প্রকীর্ত্তিতা। কার্য্যা প্রযত্নতঃ সা হি ভুক্তি মুক্তিপ্রদা ভবেৎ ॥ দক্ষিণাভিমুখং যান্তং কৃষ্ণং পশ্যন্তি যে নরাঃ। ন তেষাং পুনরাবৃত্তিঃ সত্য

মেতন্নসংশযঃ ॥ পুরাবিদো বদন্ত্যেতাং যাত্রাং নবদ্রিনাত্মিকাং। তস্যাঃ সংকীর্ত্তনাদেব নির্ম্মলো জাযতে নরঃ ॥ তাবতীযং মহাযাত্রাং যো যথা কর্ত্তুমিচ্ছতি। সোপি বিষ্ণু প্রভাবেন বৈকুণ্ঠভবনং ব্রজেৎ ॥ উদ্ধৃত্য সপ্তপুরুষান্ পাপাবলি সমন্বিতান্ ॥৪॥ ❀ ॥ অথ শযন যাত্রা। স্কান্দে। আষাঢে শুক্ল দ্বাদশ্যাং জগ্যাৎ স্বাপ মহোৎসবং। মণ্ডলে রচযেত্তত্র শয়নাগার মুত্তমং ॥ দেবস্য পুরতঃ শয্যাং রত্নাদি নির্ম্মিতোপরি। আস্তীর্য্য মৃদুচেলাদি মৃদুচীনোত্তরচ্ছদাং ॥ কর্পূর ধূলি বিক্ষিপ্তাং সান্দ্রচন্দ্রাতপাং শুভাং। পুষ্পগন্ধ যুতাং মুক্তা রঞ্জিতাং চন্দনাঙ্কিতাং ॥ সাধু দ্বারাং শুভাং স্নিগ্ধাং নানা চিত্রোপশোভিতাং। এবং স্বাপগৃহং কৃত্বা নিশীথে স্বাপযেদ্বিভুং ॥ সংপূজ্য ভাবযেদৈক্যং তেষাং কৃষ্ণাদিভিঃ সহ। এহ্যেহীতি চ সংপ্রার্থ্য স্বাপার্থং পরমেশ্বরং ॥ নযেচ্ছয্যাগৃহদ্বারং বাসযেৎ ঘটিকাত্রযং। পঞ্চামৃতৈঃ স্নাপযেত্তান্ পৃথক্ পল শতাধিকৈঃ ॥ সুগন্ধি চন্দনৈর্লিপ্তান্ বস্ত্রালঙ্করণাদিভিঃ। পূজযিত্বা যথা ন্যাযং প্রাঞ্জলি র্মন্ত্রমুচ্চরেৎ ॥ জগদ্বন্দ্য ইত্যাদি। সুদৃঢ়ং কারযেদ্দ্বারং বিষ্ণোঃ শযন বেশ্মনঃ। স্বাপযিত্বা জগন্নাথং লভতে সুখমুত্তমং ॥ ৫ ॥ ❀ ॥ অথ পার্শ্বপরিবর্ত্তন যাত্রা। অথাতে সংপ্রবক্ষ্যামি পার্শ্বস্য পরিবর্ত্তনং। নভস্য বিমলে পক্ষে সংপ্রাপ্তে হরিবাসরে ॥ বিষ্ণোঃ স্বাপগৃহদ্বারং শনৈ র্গত্বা প্রবিশ্য চ। নমস্কৃত্য জগন্নাথং পর্য্যঙ্ক শযিতং মুদা ॥ অবঘাট্য শনৈ র্দ্বারং পূজযেদুপচারকৈঃ। প্রণম্য ভক্ত্যা তৎপাদৌ স্বাপযেদুত্তরামুখং ॥ মন্ত্রঞ্চেমং পঠেৎ। ওঁদেবদেব জগন্নাথ কল্যাণং পরিকল্পয। পরিবৃত্ত মিদং সর্ব্বং যথা স্থাবর জঙ্গমং ॥ যৎ দৃষ্ট্বা চেষ্টিতৈরেব জাগ্রৎ স্বপ্ন সুষুপ্তিভিঃ। জগদ্ধিতায সুপ্তোঽসি পার্শ্বেন পরিবর্ত্তয ॥ পরিবর্ত্তন কালোঽযং জগতঃ পালনাযতে। ত্বৎপ্রজো হযং শক্রোঽপি ধ্বজে তিষ্ঠেৎ সমুৎসুকঃ ॥ দৃষ্টং ত্বৎ পাদকমলং বিমৃক্ষ মৃদ্ধি তজ্জলং। মহীং জলং প্লাবযতি প্রজাপালনহেতুকং ॥ ইতি সংপ্রার্থ্য দেবেশং বিনযাত্তোষযেত্ততঃ। ব্যজনৈ শ্চামরৈ শ্চৈব বীজযেৎ পরমেশ্বরং ॥ সুগন্ধি চন্দনৈ রস্য সর্ব্বাঙ্গং পরিলেপযেৎ। স্বাদূনি ভক্ষ্যদ্রব্যাণি পাযসাদীনি দাপযেৎ

॥ শয্যাগৃহদ্বারি বিভোঃ শনৈর্ভ ক্ত্যা নিবেদয়েৎ ।. দেব মন্দিরশ্য যৎ অর্য্যাং সর্ব্ব মঙ্গলতাং ব্রজেৎ ॥ পার্শ্বে চ জন্মদিবসে উপবাসপরো ভবেৎ ॥৬॥ ॥ এবং আশ্বিন শুক্ল- কাদশ্যাং পূর্ব্বোক্ত বিধানেন শ্রীকৃ ষ্ণস্য বামপার্শ্ব পরিবর্ত্তনং কার্য্যং ॥ ৬ ॥ ॥ মতান্তরে । শুভে চৈবা- শ্বিনে মাসি মহামায়াং প্রপূজয়েৎ । সৌপর্ণীং রাজতীং মাত্তীং বিষ্ণুমা- য়াং মহেশ্বরীং ॥ হিংসা চৈব ন কর্ত্ত ব্যা কদাচিদ্বিষ্ণুপূজকৈঃ ॥৬॥ ॥ অথোত্থান যাত্রা । একাদশ্যাস্তু কা- র্ত্তিক্যাং শুক্লায়াং পৃথিবীপতে । কৃষ্ণ মুত্থাপয়েদ্ভক্ত্যা পূজয়িত্বা জগদগু রুং ॥ পূর্ব্ববৎ পূজয়িত্বা তু প্রাত মন্ত্রং সমুচ্চরেৎ । মন্ত্রস্তু । ওঁ উত্তিষ্ঠ দেব- দেবেশ তেজো রাশে জগৎপতে । বীক্ষ্যেতৎ সকলং দেব প্রসুপ্তং তব- মায়য়া ॥ প্রফুল্ল পুণ্ডরীকাক্ষ শ্রীহ- রে শয়নেন বৈ । ত্বয়া দৃষ্টং জগদিদং পরমং সুখ মেষ্যতি ॥ যে তে স্মার্ত্তাঃ ক্রিয়াঃ সর্ব্বাঃ প্রবর্ত্তন্তে ততো ধ্রুবং । ইত্যুত্থাপ্য জগন্নাথং বেণু বীণাদি ভিঃস্বনৈঃ ॥ জয়শব্দে স্তথা দেবং নয়েযু নৃত্য মণ্ডপং । তৈলেনাভ্যজ্য তো যেন স্নাপয়েৎ পুরুষোত্তমং ॥ প-

ঞ্চামৃতৈ র্নারিকেল রসৈঃ ফল রসৈ স্তথা । সুগন্ধামলকেনাথ যবকল্কেন লেপয়েৎ ॥ ঘর্ষয়েত্তুলসীচূর্ণৈ র্লেপ- পয়েদ্রক্ত চন্দনৈঃ । পুষ্পবাসিত তো- য়ৈশ্চ জল রত্নোদকৈ স্তথা ॥ স্নাপ- য়িত্বা ক্ষয়েৎ পাপং বহুজন্মোপপা- দিতং । মহোপচারৈঃ সংপূজ্য বিষ্ণুং নীরাজয়েত্ততঃ ॥ কৃতাঞ্জলিপুটো ভূত্বা প্রার্থয়েৎ পরয়া মুদা ॥ ৭ ॥ ॥ অথ প্রাবরণ যাত্রা । মার্গশীর্ষে সিতে পক্ষে অর্য্যাং প্রাবরণোৎসবং । কৃত্বা দৃষ্ট্বা নরো ভক্ত্যা বৈষ্ণবং লো- কমাপ্নুয়াৎ ॥ বাসো হধিবাসং ভ- ষ্ঠীতে পঞ্চম্যাং নিশি কর্ম্মযেৎ । প্রভাতে মণ্ডলং স্বর্য্যাৎ পদ্ম মষ্টদ- লান্বিতং ॥ দিক্পালান্ পূজয়েদ্দি- ক্ষু ক্ষেত্রপালং গণাধিপং । চণ্ড প্র- চণ্ডৌ চ বহি শ্চতুর্দ্দিক্ষু প্রপূজয়েৎ ॥ তন্মধ্যে স্থাপয়েদ্যন্ত্রং ক্ষালয়ে- দুষ্ণবারিণা । পূজয়িত্বা জগন্নাথং গন্ধতৈলেন দীপকং ॥ দত্ত্বা কৃষ্ণায় ভক্ত্যা তু গীতবাদ্যৈ র্নবৈম্মিশাং । প্রাতঃ প্রপূজয়েদ্দেবং নানাদ্রব্যৈঃ স- শোভনৈঃ ॥ সপ্তভিঃ সপ্তভি র্দৈবান্ বাসোভিঃ পরিবেষ্টয়েৎ । মুখবর্জ- ঞ্চ সর্ব্বাঙ্গে শীত প্রাবরণৈ র্দ্বিজাঃ ॥ দূর্ব্বাক্ষতৈঃ প্রপূজ্যাথ সর্ব্বান্নীরাজ-

ম্নাংবিভোঃ। ভগবন্তং সমুদ্দিশ্য ব্রাহ্মণেভ্যঃ প্রদাপযেৎ॥ গুরুভ্যশ্চান্য দেবেভ্যো দীনার্মাথেভ্য এব চ। শীত প্রাবরণং দদ্যাৎ সকৃৎ পরমযা মুদা॥ দদাতি ভগবান্ প্রীতস্তস্মৈ বর মনন্তুনং॥ ৮॥ ❀॥ অথ পুষ্যস্নান যাত্রা। পুষ্যস্নানোৎসবং বক্ষ্যে যথোক্তং ব্রহ্মণা পুরা। পুষ্যর্ক্ষেণ চ সংযুক্তা পৌর্ণমাসী যদা ভবেৎ॥ পৌষে মাসি তু তৎ কর্য্যাৎ পুষ্যস্নানোৎসবং হরেঃ। চতুর্দ্দশী নিশাযান্ত কুম্ভানা মধিবাসনং॥ রাত্রৌ জাগরণং কৃত্বা প্রাত র্বহ্নিং প্রকীরযেৎ। ব্রহ্ম বিষ্ণু শিবেভ্যশ্চ প্রত্যেকং সন্নিধং ক্রমাৎ॥ জুহুযাৎ পূজযিত্বা তু তদন্তে পুরুষোত্তমং। পূজযেদুপচারৈস্তু আদর্শে প্রতিবিম্বিতং॥ ততঃ পুরুষসূক্তেন কুম্ভাং স্নানভিমন্ত্রযেৎ। ক্রমাদ্দেবস্য শিরসি স্নাপযেদ্বিধিবত্ততঃ॥ সূক্ত মুচ্চরন্। ততঃ পঞ্চামৃতে নৈব বাসুদেবঞ্চ ক্ষালযেৎ। লক্ষ্ম্যা যুক্তং পুন র্বিপ্র উপচারৈঃ প্রপূজযেৎ॥ দূর্ব্বাঙ্কুরাদ্যৈঃ স্তুতিভি র্বাদ্যৈঃ সংপূজ্য কেশবং সমন্তাদ্বিকিরেদেবং কর্পূরাদ্যৈঃ সুতণ্ডুলান্॥ নীরাজযেজ্জগন্নাথং কর্পূর যুত বর্ত্তিভিঃ॥ ততঃ প্রদক্ষিণং কৃত্বা দণ্ডবৎ প্রণমেৎ ক্ষিতৌ॥ পুষ্য স্নানোৎসবং পুণ্যং যে পশ্যন্তি মুদান্বিতাঃ। সর্ব্বসম্পন্ন কামাস্তে ক্রজেয়ু র্বৈষ্ণবং পদং॥ ৯॥ ❀॥ অথ নবশস্য যাত্রা। কর্য্যাদযন সংক্রান্ত্যাং নবশস্য মহোৎসবং। সংক্রান্তেঃ পূর্ব্বদিবসে নবাং শালিং সুসংস্থিমাং॥ প্রাসাদ পূর্ব্ব দেশে তু স্থাপযিত্বাধিবাসযেৎ। তথা চ পাদ্মে। সংক্রান্ত্যাং মাঘমাসস্য স্বাধিবাসিত তণ্ডুলান্। নিবেদ্য বিষ্ণবে ভক্ত্যা ইমং মন্ত্র মুদীরযেৎ॥ ত্বযি তুষ্টে জগৎসর্ব্বং মমেন প্রভবিষ্যতি। রক্ষ সর্ব্বং জগন্নাথ গৃহ্বতাং পিষ্টকং শুভং॥ ব্রাহ্মণান্ ভোজযেদ্ভক্ত্যা দেবদেব পুরস্থিতান্। অভ্যর্চ্য ভগবদ্ভক্তানিত্যাদি॥ নবেন বাসসা বেষ্ট্য দূর্ব্বা সর্ষপ পুষ্পকৈঃ। পূজযিত্বাভিমন্ত্রেণ কৃত্বাসমভিরক্ষতু॥ পুনঃ প্রভাতে দেবেশং প্রলিপেদ্গন্ধ চন্দনৈঃ। বস্ত্রালঙ্কার মাল্যৈশ্চ পূজযিত্বা যথা বিধি॥ নীরাজযিত্বা দেবেশং তণ্ডুলানধিবাসিতান্। স্থালীষু পাকপাত্রেষু মধু খণ্ডাজ্য মিশ্রিতান্॥ পঙ্‌ক্তিশঃ স্থাপযেদগ্রে গন্ধপুষ্পাক্ষতান্বিতান্। সপূপং পাযসং কৃত্বা দদ্যাদ্বৈ চক্রপাণযে॥ দ-

পবর্ণক পিষ্টকং বিষ্ণোঃ প্রিয়তরং পরং। ওঁ জীবনং সর্ব্বভূতানাং জনকস্তু জগদ্গুরো। তন্ময়া শালিনো ক্ষেত্রে ত্বয়ৈব জনিতাঃ প্রভো॥ লোকানুগ্রহণার্থায় গৃহীত্বা চিত্র বিগ্রহং। তব প্রীত্যৈ কৃতানেতান্ গৃহাণ পরমেশ্বর॥ ত্বয়ি তুষ্টে জগৎ সর্ব্বং মনেন পুষ্ট ভবিষ্যতি। স্বাহাকার স্বধাকার বষট্কারা দিবৌকসাং॥ আপ্যায়না ভবিষ্যন্তি তেনৈবাপ্যায়িতং জগৎ। রক্ষ সর্ব্বং জগন্নাথ তন্ময়ং সচরাচরং॥ ইতি সংপ্রার্থ্য দেবেশং শালীং স্তান্ বিনিবেদয়েৎ॥১০॥ *॥ অথ দোল যাত্রা। ফাল্গুনে মাসি স্ত্রীতি দোলারোহণ মুত্তমং। যত্র ক্রীড়তি গোবিন্দো লোকানুগ্রহণায় বৈ॥ প্রত্যর্চাং দেবদেবস্য গোবিন্দাখ্যাস্তু কারয়েৎ। কলগৃৎসবং প্রজ্ঞব্বীত পঞ্চাহানি ত্র্যহানি বা॥ ফাল্গুন্যাঃ পূর্ব্বতো বিপ্রা শ্চতুর্দ্দশ্যাং নিশামুখে। বহ্ন্যুৎসবং প্রজ্ঞব্বীত দোলমণ্ডপ পূর্ব্বতঃ॥ পাদ্মে। পৌর্ণমাস্যাং সমারভ্য পঞ্চম্যাঞ্চ সমাপয়েৎ॥ ১১॥ *॥ অথ মদন ভঞ্জিকা যাত্রা। বাসন্তিকাং সমাখ্যান্যে যাত্রাং মদনভঞ্জিকাং। যস্যাং কৃতায়াং দৃষ্টায়াং প্রীণাতি পুরুষোত্তমঃ॥ চৈত্র শুক্ল ত্রয়োদশ্যামাহরেত্তৎ সমূলকং। দেবস্যাগ্রে বিরচিতে মণ্ডপে সাধিবাসিতে॥ ১২॥ *॥ ইতি যাত্রাতত্ত্বং॥

যাদঃ ক্লী জলজন্তুঃ। ইত্যমরঃ॥

যাদঈশঃ পুং সমুদ্রঃ। ইতি হেমচন্দ্রঃ॥

যাদঃপতিঃ পুং সমুদ্রঃ। ইত্যমরঃ॥ বরুণঃ। ইত্যজয়পালঃ॥

যাদবঃ পুং শ্রীকৃষ্ণঃ। ইতি শব্দরত্নাবলী॥ যযাতে র্জ্যেষ্ঠপুত্রো যদুস্তস্য বংশঃ। যথা। যযাতে র্জ্যেষ্ঠপুত্রস্য যদোর্বংশং নরর্ষভ। ইত্যুপক্রম্য মাধবা বৃষ্ণয়ো রাজন্ যাদবাশ্চেতি সংজ্ঞিতং॥ ইতি শ্রীভাগবতে ৯ স্কন্ধে ২৩ অধ্যায়ঃ॥

যাদবং ক্লী গোমহিষ্যাদিধনং। ইত্যমরঃ॥

যাদবী স্ত্রী দুর্গা। ইতি ত্রিকাণ্ডশেষঃ॥

যাদসাংনাথঃ পুং বরুণঃ। ইতি হলায়ুধঃ॥

যাদসাংপতিঃ পুং সমুদ্রঃ। ইত্যমরঃ॥ বরুণঃ। ইতি মেদিনী॥

যাদৃক্ } ত্রি য ইব দৃশ্যতে সঃ। যে-
যাদৃশঃ } মন ইতি ভাষা। ইতি মু-
যাদৃক্ষঃ } গ্ধবোধব্যাকরণং॥

যাদোনাথঃ পুং সমুদ্রঃ। ইতি রাজনির্ঘণ্টঃ॥

যাদোনিবাসঃ পুং জলং। ইতিহেমচন্দ্রঃ॥

যানং ক্লী রাজ্ঞাং সন্ধ্যাদিষড়্গুণান্তর্গত গুণবিশেষঃ। তত্তু উপচিতশক্তেঃ কৃতমূল রাষ্ট্ররক্ষস্য শত্রো রাস্কন্দনায় যাত্রা। ইতি ভরতঃ॥ হস্ত্যশ্বরথদোলাদি। তৎপর্য্যায়ঃ। বাহনং ২ যুগ্যং ৩ পত্রং ৪ ধোরণং ৫। ইত্যমরঃ॥ বিমানং ৬ চক্রং ৭ যাপনং ৮ গতিমিত্রকং ৯। ইতি শব্দরত্নাবলী॥ ॥ অথ চতুষ্পদযানোদ্দেশঃ। যে ব্রহ্ম জাত্যাদি বিভেদতো হমী ময়া নিরুক্তা ইহ বাজি মুখ্যাঃ। দিশানয়া সর্ব্ব চতুষ্পদানাংভেদো বিধেয়ো বিদুষাদরেণ॥ যথা যথা শ্বাদিক পোষণেন যানেন বাদোষ গুণৌ ভবেতাং। তথা তথৈবান্য চতুষ্পদানাং প্রকীর্ত্তিতৌ দোষ গুণৌ বুধেন॥ বর মযান মপোষণ মেব বা বর মিবান্য শরীর মপোষণং। ন খলু দোষ যুতং চতুষ্পদং স্পৃশতি পশ্যতি শোভন চেতনঃ॥ সুরাবিন্দু র্দূষয়তি পযোঘট শতং যথা। তথা সর্ব্বং দূষয়তি দোষ দুষ্ট শ্চতুষ্পদঃ॥ ইতি চতুষ্পদ যানোদ্দেশঃ॥ ॥ অথ দ্বিপদযানোদ্দেশঃ। মানুষৈঃ পক্ষিভি র্ব্বাপি তথান্যৈ র্দ্বিপদৈ রপি। যানং স্যাদ্দ্বিপদং নাম তস্য ভেদো হ্যনেকধা॥ সামান্যশ্চ বিশেষশ্চ তস্য ভেদো দ্বিধা ভবেৎ। তত্র সামান্যং যথা। যানং যদ্দ্বিপদাভ্যাং সৎ তদ্দোলাদিক মুচ্যতে। চতুর্ভি র্যুক্তি সংযুক্তৈ র্দণ্ড ধাতু গুণান্বয়ৈঃ॥ দোলেতি কথ্যতে তেষাং নিয়মো হ্যয়ং প্রদর্শ্যতে। তত্র সময়ঃ। উপেন্দ্র মূলাহি শিবাগ্নি বর্জং শস্তেন্দ্র তারা তিথিযোগ লগ্নে। বিষ্টি ক্ষপাপুত্র যমাহ বর্জং দোলাদিকারোহণ মাদ্য মিষ্টং॥ দণ্ডকাষ্ঠস্য নিয়মে নিয়মশ্ছত্র দণ্ডবৎ। কনকং রজতং তাম্রং লৌহং ধাতু চতুষ্টয়ং॥ চতুর্বিধানা মুদ্দিষ্টং ব্রহ্মাদীনাং যথা ক্রমং। সুরাণা মসুরাণাঞ্চ চাতুর্ব্বর্ণ্য মুদাহৃতং॥ ত্রিহস্ত সম্মিতো মধ্যে তদর্দ্ধং পার্শ্বয়ো র্দ্বয়োঃ। বিজয়া নাম দোলেয়ং বিজয়ায় মহীক্ষিতাং॥ বিজয়া মঙ্গলা ক্রূরা শিবা শ্লেষা শুভা ক্রমাৎ। বিতস্ত্যৈকৈক সংবৃদ্ধ্যা দোলাঃ ষট্ স্যুঃ সখাম্মদাঃ॥ জম্ভুশ্চ পদ্মকোষশ্চ শঙ্খঃ পর্ব্বত এব চ। চতুর্বিধানাং দোলাসু কল্যাণায় চতুষ্টয়ং॥

হংসঃ কেকী শুকো ভৃঙ্গশ্চতুষ্টয় মি-
দং ক্রমাৎ। অস্ত্রাদ্যগ্রে নিধাতব্যং
চতুর্ব্বিধং মহীক্ষিতাং ॥ অত্রাপি বর্জ্য
বিন্যাসো বিজ্ঞেয়ো নরদণ্ডবৎ।
ভোজস্তু। গজঃ পুস্থান দোলায়াং
রণদোলাসু কেশরী ॥ মৃগো ভ্রমণ
দোলায়াং ক্রীড়া দোলাসু ষট্পদঃ।
ভুজঙ্গমঃ শত্রুরাজ্যে বৃষভো দান
কর্ম্মণি ॥ দোলোপর্য্যুপরি ন্যস্যো
বর্হিভি র্মুনি শাসনং। যদ্বক্র দণ্ডং
যানং স্যাৎ তৎ পর্য্যঙ্ক মিতি স্মৃতং ॥
ত্রিহস্ত সম্মিতো যান স্তদর্দ্ধ পরিণা-
হবান্। পর্য্যঙ্কঃ ক্ষেম নামাগ্রং ভর্ত্তুঃ
সর্ব্বার্থ সাধকঃ ॥ ক্ষেমো মৃত্যুর্জয়ো
দুঃখ শ্চত্বারস্তে যথা ক্রমং। বিতস্ত্যে-
কৈক সংবৃদ্ধ্যা যথা চানু র্নসঙ্গিনঃ ॥
মণি ধাতু গুণাদীনাং নিয়মঃ পূর্ব্বব-
ন্মতঃ। বিশেষ মথ বক্ষ্যামি পর্য্য
ঙ্কস্য যথাক্রমং ॥ শুক্তিশ্চ গজদন্ত
শ্চ মৃগশৃঙ্গ স্তথৈব চ। অনূপাদিক
জাতানাং পর্য্যঙ্কেষু ন্যসেৎ ক্রমাৎ
॥ পদ্ম শঙ্খ গজাশ্বালি হংস কোক
শুকান্ ক্রমাৎ। আদিত্যাদি দশা-
ভানাং মণিরূপেণ বিন্যসেৎ ॥ ম-
হীন্দ্রাণাং বিশেষেণ সিংহমানেব
শস্যতে। নির্ম্মাণে শক্তি দণ্ডাশ্চ
রাজ্যভোগ সুখপ্রদাঃ ॥ তদেবাবক্র
দণ্ডন্তু খট্টাযান মিতি স্মৃতং। অ-
স্যাপি পূর্ব্ববন্মান মণি ধাত্বাদি
নির্ণয়ঃ ॥ বিশেষ শ্চরণোচ্ছায়ঃ প-
রিণাহার্দ্ধ সম্মিতঃ। তদেব চেন্নি-
শ্চরণং পীঠযান মিতি স্মৃতং ॥
তস্য ভেদো দ্বিধা দণ্ড বক্রাবক্র
প্রভেদতঃ। মানাদিকং পূর্ব্বতুল্যং
বিশেষাচ্চতুরস্রতা ॥ এব মন্যানি
মিশ্রাণি যানানি বিবিধানি চ।
সামান্যাথ্যানি জানীয়াৎ শিল্পি-
ভি র্নির্ম্মিতানি বৈ ॥ মনোহরত্বং
লঘুতা দৃঢ়তেতি গুণত্রয়ং। প্রোক্তং
দ্বিপদ যানানাং সহজং ভোজ ভূ-
ভুজা ॥ ইতি সামান্যদ্বিপদযান-
কথনং। ইতি যুক্তিকল্পতরুঃ ॥ * ॥
বিশেষ দ্বিপদযানন্তু চতুর্দোলশ-
ব্দে নিম্নগযানোদ্দেশস্তু নৌকাশব্দে
দ্রষ্টব্যঃ ॥

যানপাত্রং ক্লী নিম্নগযানবিশেষঃ।
জাহাজ ইতি ভাষা। তৎপর্য্যায়ঃ।
বহিত্রকং ২ বোহিত্থং ৩ বহনং ৪
পোতঃ ৫। ইতি হেমচন্দ্রঃ ॥ সমু
দ্রযানং ৬। ইতি বরাহপুরাণং ॥

যানমুখং ক্লী রথাদেঃপুরোভাগঃ।
তৎপর্য্যায়ঃ। ধূঃ ২। ইত্যমরঃ ॥

যাপনং ক্লী বর্ত্তনং ॥ কালক্ষেপণং ॥
নিরসনং। ইতি মেদিনী ॥

যাপ্তা স্ত্রী জটা। ইতি ভূরিপ্রয়োগঃ॥

যাপ্যঃ ত্রি অধমঃ। নিন্দিতঃ। ইত্যমরঃ॥ যাপনীয়ঃ। ক্ষেপনীয় কালাদিঃ। ইতি মেদিনী॥ ব্যাধি বিশেষঃ। যথা। সাধ্যা যাপ্যা অসাধ্যাশ্চ ব্যাধয় স্ত্রিবিধাঃ স্মৃতাঃ। সুখসাধ্যঃ কষ্টসাধ্যো দ্বিবিধঃ সাধ্য উচ্যতে॥ যাপ্য লক্ষণ মাহ। যাপনীয়স্তু তং বিদ্যাৎ ক্রিয়াং ধারয়তে হি.তাং। ক্রিয়াযান্তু নিবৃত্তায়াং সদ্যো যশ্চ বিনশ্যতি॥ প্রাপ্তা ক্রিয়া ধারয়তি সুখিনং যাপ্য মাতুরং। প্রপতিষ্যদিবাগারং স্তম্ভো যত্নেন যোজিতঃ॥ সাধ্যা যাপ্যত্ব মাযান্তি যাপ্যা শ্চাসাধ্যতাং তথা। ঘ্নন্তি প্রাণানসাধ্যাস্তু নরাণা মক্রিয়াবতাং॥ অক্রিয়াবতাং চিকিৎসা রহিতানাং। ইতি ভাবপ্রকাশঃ॥

যাপ্যযানং ক্লী শিবিকা। মহাপায়া ইতি ভাষা। ইত্যমরঃ॥

যাভং ক্লী মৈথুনং। যথা। বৃষাশ্বযো র্যাভে হর্থে সন্। ইতি সিদ্ধপাদে বোপদেবঃ॥

যামঃ পুং দিবারাত্র্যোশ্চতুর্থভাগৈক ভাগঃ। তৎপর্য্যায়ঃ। প্রহর ২। ইত্যমরঃ॥ সংযমঃ। ইতি মেদিনী॥

যামঘোষঃ পুং কুক্কুটঃ। ইতি শব্দমালা॥

যামঘোষা স্ত্রী যন্ত্রবিশেষঃ। ঘড়ী ইতি ভাষা। তৎপর্য্যায়ঃ। নালী ২ ঘটী ৩ যামনালী ৪ যমেরুকা ৫ দণ্ডঢক্কা ৬। ইতি ত্রিকাণ্ডশেষঃ॥

যামনালী স্ত্রী যামঘোষা। ইতি ত্রিকাণ্ডশেষঃ॥

যামনেমিঃ পুং ইন্দ্রঃ। ইতি ত্রিকাণ্ডশেষঃ॥

যামলং ক্লী যুগলং। ইতি হেমচন্দ্রঃ॥ তন্ত্রশাস্ত্রবিশেষঃ। তস্য লক্ষণং যথা। সৃষ্টিশ্চ জ্যোতিষাখ্যানং নিত্যকৃত্যপ্রদীপনং। ক্রমসূত্রং বর্ণ ভেদো জাতিভেদ স্তথৈব চ॥ যুগ ধর্ম্মশ্চ সংখ্যাতো যামলস্যাষ্ট লক্ষণং। তত্তু ষড়্বিধং। আদিযামলং ১ ব্রহ্মযামলং ২ বিষ্ণুযামলং ৩ রুদ্রযামলং ৪ গণেশযামলং ৫ আদিত্যযামলং ৬। ইতি বারাহীতন্ত্রং॥ এষাং শ্লোক সংখ্যা তন্ত্রশব্দে দ্রষ্টব্যা॥

যামবতী স্ত্রী রাত্রিঃ। ইতি রাজনির্ঘণ্টঃ॥

যামাতা পুং জামাতা। দুহিতুঃপতিঃ। ইত্যমরটীকা শব্দরত্নাবলী চ॥ জামাতু র্বিষ্ণু তুল্যত্বং তস্য গৃহে

কন্যাদাতু র্দৌহিত্র জননাৎ প্রাক্ ভোজন নিষেধশ্চ যথা। কামংধ নাবাদিত্যপুরাণং। বিষ্ণু যামোত্তরং মন্যে তস্য মন্যুং ন কারয়েৎ।" অপ্রজায়ান্ত কন্যাযাং নাশ্নীযাত্তস্যৈব গৃহে॥ ইত্যুদ্বাহতত্ত্বং॥

যামার্দ্ধং ক্লী প্রহরস্যার্দ্ধং। তস্যাধিপা যথা। বারেশাদর্দ্ধযামেষু রাত্র্যহ্নোঃ পঞ্চ ষট্ ক্রমাৎ। অধিপাঃ স্যু র্গ্রহা স্তত্র যথার্কাহে ভবন্তি হি॥ রবীন্দ্বেন্দ ভৃগু জ্ঞার্জ শনি স্তু রবযো নিশি। রবি শুক্র স্তু রাত্রীশ শনীজ্য জ্ঞ ভাস্করাঃ॥ দিনে তুল্যাঃ পরেষ্বেবং তত্রাধ্যক্ষাশ্চ তদ্গ্রহাঃ। পাপদণ্ডে ভবেদ্দুষ্টিঃ শুভদণ্ডে শুভং ভবেৎ॥ শুভগ্রহস্য দণ্ডেতু কর্ম্মারম্ভাচ্ছুভং ভবেৎ। আরম্ভাৎ পাপদণ্ডেতু কর্ম্ম নিষ্ফলতাং ব্রজেৎ॥ যস্যার্দ্ধ যাম স্তস্যৈব প্রাগ্দণ্ডঃ সমুদাহৃতঃ। ষট্ ষট্ পরীত্য দণ্ডাশ্চ ত্রযো রাত্রৌ মতা স্তথা॥ যামার্দ্ধাধিপ সংখ্যাতো দ্বিতীযস্তু তদর্দ্ধতঃ। তদর্দ্ধাত্তু তৃতীযস্যার্দ্ধদর্দ্ধাত্তু তুরীযকঃ॥ অঙ্কাভাবে তু রাহুঃ স্যাত্তদঙ্কো বসুসংখ্যকঃ। ভগ্নাঙ্কস্য পরিত্যাগাদ্দিবাদণ্ডাধিপা যথা॥ ইতি জ্যোতিষতত্ত্বং॥

যামিঃ স্ত্রী স্বসা॥ কুলস্ত্রী। ইত্যমরঃ॥ স্বসা ভগিনী। কুলস্ত্রী কুলবধূঃ। প্রহরে সংযমে যামো যামিঃ স্বসৃ কুলস্ত্রিযো রিত্যন্ত্যস্থাদৌ রভসঃ॥ জিহ্মস্ত জটিলে নিন্দ্যে জামিঃ স্বসৃ কুলস্ত্রিযো রিতি চবর্গতৃতীযাদাবজয ইতি ভরতমুকুটৌ॥ যথা। জাময়ো যানি গেহানি শপন্ত্যপ্রতিপূজিতাঃ। ইতি স্বামী॥ জৈ ক্ষযে বাহুলকান্মিঃ। যদ্বা জমু অদনে বাহুলকাদিণ্ জামিরিতি। অন্ত্যস্থাদৌ যা প্রাপণে ধাতু র্বোধ্যঃ। ইতি রামাশ্রমঃ॥ *॥ যামিনী। ইতি শব্দরত্নাবলী॥ ধর্ম্মস্যপত্নী। তস্যাঃ কন্যা নাগবীথী। যথা। অরুন্ধতী বসু র্যামি র্লম্বা ভানু র্মরুত্বতী। সঙ্কল্পা চ মুহূর্ত্তা চ সাধ্যা বিশ্বা চ নামতঃ॥ ধর্ম্মপত্ন্যো দশ ত্বেতা স্তাস্বপত্যানি মে শৃণু। লম্বাযা শ্চৈব ঘোষো হসৌ নাগবীথী তু যামিজা॥ ইতি বহ্নিপুরাণে কশ্যপীয প্রজাসর্গঃ॥

যামিকভটঃ পুং প্রহরিকঃ। চৌকীদার ইতি ভাষা। যথা। উন্মাদাস্থূদ বর্দ্ধিতান্ধতমসঃ প্রভুষ্ট দিগ্মণ্ডলে কালে জাগ্রদদপ্র যামিকভট

প্রারব্ধ কোলাহলে। কর্ণস্যাসহ্য-
দর্প বাসুবড়বা বক্ষে যদন্তঃপুরাদ্যা,
যাতাসি যদস্বজাক্ষি কৃতকং মন্যে
ভযং যোষিতাং॥ ইতি প্রাচীনাঃ॥।
যামিত্রং ক্লী লগ্নাৎসপ্তমরাশিঃ।
যথা। ধীস্থানং পঞ্চমং জ্ঞেয়ং যা
মিত্রং সপ্তমং স্মৃতং। দ্যূনং দ্যূনং
তথাস্তাখ্যং ষষ্ঠাণং রিপুমন্দিরং
॥ * ॥ যামিত্রবেধো যথা। পা-
পাৎ সপ্তমগঃ শশী যদি ভবেৎ
পাপেন যুক্তো হথ বা যত্নেনাপি বি
বর্জযেন্মুনি নেতো দোষো হপ্যযং
কথ্যতে। যাত্রাযাং বিপদো গৃহে
সুতবধঃ ক্ষৌরেষু রোগোদ্ভবো
হপ্যুদ্বাহে বিধবা ব্রতে চ মরণং
শূলঞ্চ পুংস্কর্ম্মণি। রবি মন্দ কুজা-
ক্রান্তং মৃগাঙ্কাৎ সপ্তমং ত্যজেৎ।
বিবাহ যাত্রা চূড়াসু গৃহকর্ম্ম প্রবে-
শনে ॥ ইতি যামিত্রবেধঃ॥ * ॥
অস্য প্রতিপ্রসবো যথা। মূল ত্রি-
কোণ নিজ মন্দিরগো হথ পূর্ণো
মিত্রর্ক্ষসৌম্যগৃহগো হথ তদীক্ষি
তো বা। যামিত্রবেধ বিহিতানপহ
ত্যদোষান্ দোষাকরঃ সুখ মনেক
বিধং বিধত্তে॥ ইতি জ্যোতিস্তত্ত্বং॥
যামিনী স্ত্রী রাত্রিঃ॥ হরিদ্রা। ইত্য-
মরঃ॥

যামিনীপতিঃ পুং চন্দ্রঃ। ইতি শব্দ-
রত্নাবলী॥ কর্পূরং। ইত্যমরঃ॥
যামী স্ত্রী দক্ষিণদিক্। ইতি রাজ-
নির্ঘণ্টঃ॥ কুলস্ত্রী। ইতি শব্দরত্না-
বলী॥
যামুনং ক্লী স্রোতোহঞ্জনং। ইত্য-
মরঃ॥ যমুনাসম্বন্ধিনি ত্রি॥
যামুনেষ্টকং ক্লী সীসকং। ইতি জটা-
ধরঃ॥
যামেযঃ পুং ভাগিনেযঃ। যথা।
যামিঃ স্বসৃ কুলস্ত্রিযো রিত্যমরশা-
সনাৎ যামে রপত্য মিত্যর্থে ঢেয
প্রত্যয নিয়মঃ॥
যাম্যঃ পুং অগস্ত্যমুনিঃ॥ চন্দন-
বৃক্ষঃ। ইতি মেদিনী॥
যাম্যা স্ত্রী দক্ষিণদিক্॥ ভরণী-
নক্ষত্রং। ইতি মেদিনী॥
যাম্যাযনং ক্লী দক্ষিণাযনং। যথা।
যাম্যাযনে হরৌ সুপ্তে সর্ব্বকর্ম্মাণি
বর্জ্জযেৎ। ইতি মলমাসতত্ত্বং॥
যাম্যোদ্ভূতঃ পুং শ্রীতালবৃক্ষঃ। ইতি
রাজনির্ঘণ্টঃ॥
যাযজুকঃ পুং পুনঃপুনর্যাগকর্ত্তা।
তৎপর্য্যাযঃ। ইজ্যাশীলঃ ২।
ইত্যমরঃ॥
যাযাবরঃ পুং অশ্বমেধীযাশ্বঃ। ইতি
জটাধরঃ॥ জরৎকারুমুনিঃ। ইতি

ত্রি স্ত্রী শুশেষঃ ॥ পুনঃ পুনর্গমনশীল

চঞ্চলে প্রাণচুঁ মর্চ্য জগদচনীয় ।

ইতি ভটিঃ ॥

যাবঃ পুং অলক্তঃ। ইত্যমরঃ ॥

যাবকঃ পুং কুল্মাসঃ। ইত্যমরঃ ॥ দ্বে বোরো ধান্যে। কুলথ ইত্যন্যে ॥ মাষাকৃতি পত্রে কাশ্মীরেষু তুলসীতি খ্যাতে। ইতি সুভূতিঃ ॥ যব ইব গুণেন ইতি যবকঃ বিকার সংঘেতি কঃ। যবক এব যাবকঃ স্বার্থে ষ্ণঃ। কুলেন মস্যতি পরিণমতি কুল্মাসঃ মসীর্য স্থ পরিমাণে পরীণামে ঘঞ মনীষাদিত্বাদলুক্। কুল্মাসো দন্ত্যসকারবান্ মূর্দ্ধন্যষকার বাংশ্চ। কুল্মাসো রভসশ্চেতি দন্ত্যান্তে রক্ষিত ইতি মধুঃ ॥ কুল্মাষো যাবকে পুংসি কাঞ্জিকে তু নপুংসক মিতি মূর্দ্ধন্যান্তে রভসঃ। ইতি ভরতঃ ॥ যবকঃ স্যাত্তু কুল্মাষঃ কুল্মাসো যাবকো২পি চ। বোরবাখ্যে যষ্টিকে বা কুল্মে কাশ্মীর দেশজে ॥ শালিধান্যেষু চত্বার ইতি কেচিৎ প্রচক্ষতে। ইতি শব্দরত্নাবলী ॥ * ॥ যাবাম্ং। ইতি হেমচন্দ্রঃ। অলক্তকঃ। ইতি শব্দরত্নাবলী ॥

যাবজ্জীবং স্ত্রী যাবদায়ুঃ। জীবনপর্য্যন্তং। যথা। যাবজ্জীব মহং মৌনী বন্ধ্যাসীদপুত্রশ্চ পিতা মম ॥ ইতি আহূত শব্দটীকায়াং ভরতঃ ॥

যাবৎ ব্য সাকল্যং ॥ অবধিঃ ॥ মানং ॥ অবধারণং। ইত্যমরঃ ॥ সাকল্যে নিরবশেষে। যথা। যাবদ্দত্তং তাবদ্ভুক্তং ॥ অবধৌ মর্য্যাদায়াং। মূলাৎ শাখাং যাবৎ প্রকাণ্ডঃ ॥ মানং প্রমাণং। যাবদ্গৃহাণি তাবদ্ভিক্ষবঃ ॥ অবধারণ মিবত্তাপরিচ্ছেদঃ। ইয়তো ভাব ইয়ত্তা পরিমাণং তস্য পরিচ্ছেদো নিশ্চয়ঃ। যথা যাবৎ পাত্রং তাবদ্ব্রাহ্মণানামন্ত্রয়স্ব ॥ যাবৎ কার্স্নে২বধারণে প্রশংসায়াং পরিচ্ছেদে মানাধিকার সম্ভ্রমে পক্ষান্তরে চেতি মেদিনিঃ। ইতি ভরতঃ ॥ যদ্ শব্দাৎ নিপাতনাদ্বতু প্রত্যয নিষ্পন্নে ত্রি। তত্র যাবান্ যাবতী যাবৎ ইতি রূপ ত্রয়ং ভবতি। ইতি তদ্ধিতপাদে বোপদেবঃ ॥

যাবতিথঃ ত্রি যাবৎপরিমাণং। ইতি মুগ্ধবোধব্যাকরণং ॥

যাবনঃ পুং সিহ্লাখ্যগন্ধদ্রব্যং। ইত্যমরঃ ॥

যাবনালঃ পুং ধান্যবিশেষঃ। জো-আর ইতি ভাষা। তৎপর্য্যায়ঃ। যবনালঃ ২ শিখরী ৩ বৃত্ততণ্ডুলঃ ৪ দীর্ঘনালঃ ৫ দীর্ঘশরঃ ৬ ক্ষেত্রেক্ষুঃ ৭ ইক্ষুপত্রকঃ ৮। তস্য গুণাঃ। ধবলত্বং। গৌল্যত্বং। বল্যত্বং। ত্রিদোষজিত্ত্বং। বৃষ্যত্বং। রুচ্যত্বং। অর্শো যক্ষ্ম গুল্ম ব্রণ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

যাবনালশরঃ পুং শরভেদঃ। জোহুরলী ইতি হিন্দীভাষা। তৎপর্য্যায়ঃ। নদীজঃ ২ দৃঢত্বক্ ৩ বারিসম্ভবঃ ৪ যাবনালনিভঃ ৫ খরপত্রঃ ৬। অস্য মূল গুণাঃ। ঈষন্মধুরত্বং। রুচ্যত্বং। শীতত্বং। পিত্ত তৃষা নাশিত্বং। পশুনাম্বলপ্রদত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

যাবনালী স্ত্রী যাবনালশর্করা। তৎপর্য্যায়ঃ। হিমোৎপন্না ২ হিমানী ৩ হিমশর্করা ৪ ক্ষুদ্রশর্করিকা ৫ ক্ষুদ্রা ৬ গুডভা ৭ জলবিন্দুজা ৮। অস্যা গুণাঃ। গৌল্যত্বং। উষ্ণত্বং। তিক্তত্বং। অতিপিচ্ছিলত্বং। বাতঘ্নত্বং। সারকত্বং। রুচ্যত্বং। দাহ পিত্তাস্রনাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥

যাবশূকঃ পুং যবক্ষারঃ। ইতি রত্নমালা॥

যাবসঃ পুং যবসসমূহঃ। ইতি সিদ্ধান্তকৌমুদী॥

যাব্যং ত্রি মিশ্রণীয়ং। যুযতে যৎ। ইতি মুগ্ধবোধব্যাকরণং॥

যাশোধিরেয়ঃ পুং শাক্যমুনিপুত্রঃ। ইতি হেমচন্দ্রঃ॥

যাষ্টীকঃ পুং যষ্টিধারিযোদ্ধা। লেঠেল ইতি ভাষা। তৎপর্য্যায়ঃ। যাষ্টিহেতিকঃ ২। ইত্যমরঃ॥

যাসঃ পুং দুরালভা। ইত্যমরঃ॥

যাসা স্ত্রী মদনশলাকাপক্ষী। শব্দমালা॥

যু ল মিশ্রণে॥ অমিশ্রণে। ইতি কবিকল্পদ্রুমঃ॥ ল যৌতি। মিশ্রণে যথা। যৌতি কালে জলস্ত্রীভিঃ ক্ষত্রসন্তান বৃদ্ধয়ে। ইতি হলায়ুধঃ॥ অমিশ্রণে সনবায়লক্ষণে। অনুত সিদ্ধানা মিতি মিলিত সিদ্ধানা মিত্যর্থঃ। ইতি দুর্গাদাসঃ॥

যু ঐগ বন্ধে। ইতি কবিকল্পদ্রুমঃ॥ ঐ গ যুনাতি যো বয়স্থো হপি নবেশ্যা বন্ধকীজনৈ রিতি হলায়ুধঃ। ইতি দুর্গাদাসঃ॥

যু উক নিন্দনে। ইতি কবিকল্পদ্রুমঃ॥ উক যাবযতে। ইতি দুর্গাদাসঃ॥

যুক্ ত্রি সমাধিমান্। ইতি মুগ্ধবোধ-

ব্যাকরণং ॥ যুগ্মং । ইতি শব্দরত্নাবলী ॥

যুক্‌ ন্যু নিন্দা । যুজ ক ড নিন্দে ইত্যর্থভাবে ক্বিপ্‌ প্রত্যয়েন নিষ্পন্নং ॥

যুক্তং ত্রি ন্যায্যং । তত্তুন্যাগাগত দ্রব্যাদি । ইত্যমরঃ ॥ অপৃথগ্‌ভূতং । মিলিত মিত্যর্থঃ । ইতি মেদিনী ॥

যুক্তং ক্লী হস্তচতুষ্টয়ং । ইতি মেদিনী ॥

যুক্তঃ পুং অভ্যস্তযোগঃ । যথা । যোগী তু দ্বিবিধঃ প্রোক্তো যুক্তযুঞ্জান ভেদতঃ । যুক্তস্য সর্ব্বদা ভানং চিন্তা সহ কৃতো হপরঃ ॥ ইতি জ্ঞানশাস্ত্রং ॥

যুক্তরসা স্ত্রী রাস্না । কাঁটাআনরুলী ইতি ভাষা । ইত্যমরভরতৌ ॥

যুক্তা স্ত্রী বৃক্ষবিশেষঃ । এলানী ইতি ভাষা । ইতি রত্নমালা ॥

যুক্তিঃ স্ত্রী ন্যায়ঃ । ইতি মেদিনী ॥ লোকব্যবহারঃ । ইতি ব্যবহারমাতৃকা ॥ ধর্ম্মশাস্ত্র বিরোধে তু যুক্তি যুক্তো বিধিঃ স্মৃতঃ । ইতি স্মৃতিশ্চ ॥ অনুমানং । যথা । যুক্তিস্বপ্যবসন্নাসু সপথেনৈনন মর্দ্দয়েৎ । যুক্তিরনুমানং । অনুমানেন বিজ্ঞেয়ং নস্যাতাং পঞ্চসাক্ষিণৌ । ইত্যেক বাক্যত্বাদিতি বিবরণং ॥ অথযুক্তিঃ । নারদঃ । উল্কাহস্তো হগ্নিদো জ্ঞেয়ঃ শস্ত্রপাণিশ্চ ঘাতকঃ । কেশাকেশি গৃহীতশ্চ যুগপৎ পারদারিকঃ ॥ কুদ্দালপাণি র্বিজ্ঞেয়ঃ সেতুভেত্তা সমীপগঃ । তথা কুঠারহস্তশ্চ বনচ্ছেত্তা প্রকীর্ত্তিতঃ ॥ প্রত্যক্ষ চিহ্নৈ র্বিজ্ঞেয়ো দণ্ডপারুষ্য কৃন্নরঃ । অসাক্ষি প্রত্যয়াহ্যেতে পারুষ্যে তু পরীক্ষণং ॥ প্রত্যক্ষ চিহ্নৈ রুধিরাক্ত খড়্গাদিভিঃ । পারুষ্যে বাক্‌পারুষ্যে । শঙ্খঃ । লোপ্তু হস্তশ্চ চৌর ইতি । নারদঃ । অভীক্ষ্ণ দৃশ্যমানো হপি প্রতিহন্যান্ন তদ্বচঃ । ত্রি চতুঃ পঞ্চকৃত্বো বা পরতো হর্থং সমাবহেৎ । যদা ধনিকেনাধমর্ণিক ত্রি চতুঃ পঞ্চকৃত্বো বা ত্বং মে ঋণং ধারয়সীতি পুনঃপুন র্দৃশ্যমানো হপি ন তদ্বাক্যং প্রতিহন্তি তদোত্তরকাল মনেনাভ্যুপগতো হয়মর্থ ইত্যবধার্য্য তমর্থং মৃণিকায় দাপয়েদিত্যর্থঃ ॥ ইতি ব্যবহারতত্ত্বং ॥ * ॥ নাট্যালঙ্কারবিশেষঃ । তস্য লক্ষণং । যথা । যুক্তি রর্থাবধারণং । উদাহরণং যথা । যদি সমর নপাস্য নাস্তি মৃত্যো র্ভয় মিতি যুক্ত মিতো হন্যতঃ প্রযাতং । অথ মরণ মবশ্য মেব জন্তোঃ কিমিতি মুধা

মলিনং যশঃ অক্রধ্বং ॥ ইতি বেণী-সংহারঃ। ইতি সাহিত্যদর্পণং ॥

যুগ ই বর্জ্জনে। ইতি কবিকল্পদ্রুমঃ॥ অন্ত্যস্থাদিঃ। ই যুঙ্গ্যতে। ইতি দর্গাদাসঃ॥

যুগং ক্লী যুগ্মং॥ কৃতাদিকালচতুষ্টয়ং॥ বৃদ্ধিনামৌষধং॥ হস্ত চতুস্কং ইতি মেদিনী॥ দেবানাং দ্বাদশ সহস্রবৎসরেণ চতুর্যুগং ভবতি। মনুষ্যমানেন চতুর্যুগ পরিমাণং বিংশতি সহস্রাধিক ত্রিচত্বারিংশল্লক্ষং। তত্র সত্যযুগস্য মানং ১৭২৮০০০ বর্ষাঃ। ত্রেতাযুগস্য ১২৯৬০০০ বর্ষাঃ। দ্বাপরযুগস্য ৮৬৪০০০ বর্ষাঃ। কলিযুগস্য ৪৩২০০০ বর্ষাঃ। ইতি শ্রীভাগবতমতং॥ তেষাং ভারতবর্ষবর্ত্তিত্ব বিবরণঞ্চ যথা। চত্বারি ভারতে বর্ষে যুগানি ঋষয়ো হব্রুবন্। কৃতং ত্রেতা দ্বাপরঞ্চ কলিশ্চেতি চতুর্যুগং॥ পূর্ব্বং কৃতযুগং নাম ততস্ত্রেতা বিধীযতে। দ্বাপরঞ্চ কলিশ্চৈব যুগানি পরিকল্পযন্॥ চত্বার্য্যাহুঃ সহস্রাণি বর্ষানান্ত কৃতং যুগং। তস্য তাবৎ শতী সন্ধ্যা সন্ধ্যাংশশ্চ তথা বিধঃ॥ ইতরেষু সসন্ধ্যেষু সসন্ধ্যাংশেষু চ ত্রিষু। একাপায়েন বর্ত্তন্তে সহস্রাণি শতানি চ॥ ত্রেতাং ত্রীণি সহস্রাণি যুগ সংখ্যাবিদো বিদুঃ। তস্যাপি ত্রিশতী সন্ধ্যা সন্ধ্যাংশঃ সন্ধ্যযা সমঃ॥ দ্বে সহস্রে দ্বাপরে তু সন্ধ্যাংশৌ তু চতুঃশতে। সহস্রমেকং বর্ষাণাং দিব্যং কালো প্রকীর্ত্তিতং॥ দ্বে শতে চ তথান্যে বৈ সংখ্যাতঞ্চ মনীষিভিঃ। এষা দ্বাদশ সাহস্রী যুগ সংখ্যা তু সংজ্ঞিতা॥ কৃতং ত্রেতা দ্বাপরঞ্চ কলিশ্চেতি চতুর্যুগং। তত্র সম্বৎসরাঃ সৃষ্টা মানুষা স্তান্নিবোধত॥ চত্বারিংশত্তথা ত্রীণি কৃতং যুগ মথোচ্যতে। বিংশতিশ্চ সহস্রাণি কালোহেষ চতুর্যুগঃ॥ পৃথকত্বেনেহ বক্ষ্যামি যুগানি তু নিবোধত। নিযুতানি দশ দ্বে চ পঞ্চ চৈবাত্র সংখ্যয়া॥ অষ্টাবিংশ সহস্রাণি কৃতং যুগ মথোচ্যতে। অযুতস্তু তথা পূর্ণং দ্বে চান্যে নিযুতে পুনঃ॥ ষট্‌ত্রিংশচ্চ সহস্রাণি সংখ্যাতানি তু সংখ্যযা। ত্রেতা যুগস্য সংখ্যেযা মানুষেণ তু কীর্ত্তিতা॥ অষ্টৌ শতসহস্রাণি বর্ষাণাং মানুষাণি তু। চতুঃষষ্টি সহস্রাণি বর্ষাণাং দ্বাপরং যুগং॥ চত্বারি নিযুতানিস্যু বর্ষাণান্ত চতুর্যুগং। দ্বাত্রিংশচ্চ তথান্যানি সহস্রাণি তু সংখ্যযা

॥ এতৎ কলিযুগং প্রোক্তং মানুষেণ প্রমাণতঃ। এষা চতুর্যুগাবস্থা মানুষেণ প্রকীর্ত্তিতা॥ চতুর্যুগস্য সংখ্যাতা সন্ধ্যা সন্ধ্যাংশকেন চ। এষা চতুর্যুগাখ্যা তু সাধিকা ত্বেকসপ্ততিঃ॥ কৃত ত্রেতাদি যুক্তা সা মনোরন্তর মুচ্যতে। ইতি মাৎস্যে ১১৮ অধ্যায়ঃ ॥ ❀ ॥ যুগধর্ম্মো যথা। ধ্যানং পরং কৃতযুগে ত্রেতায়াং জ্ঞান মধ্বরঃ। দ্বাপরে যজ্ঞ মেবাহু র্দান মেকং কলৌ যুগে॥ ব্রহ্মা কৃত যুগে দেব স্ত্রেতায়াং ভগবান্ রবিঃ। দ্বাপরে দৈবতং বিষ্ণুঃ কলৌ রুদ্রো মহেশ্বরঃ॥ ব্রহ্মা বিষ্ণু স্তথা সূর্য্যঃ সর্ব্ব এব কলিষ্বপি। পূজ্যতে ভগবান্ রুদ্র শ্চতুর্ষ্বপি পিনাকধৃক্॥ আদ্যে কৃত যুগে ধর্ম্ম শ্চতুষ্পাদঃ সনাতনঃ। ত্রেতাযুগে ত্রিপাদঃ স্যাদ্দ্বিপাদো দ্বাপরে স্থিতঃ॥ ত্রিপাদ হীন স্তিষ্যে তু সত্তামাত্রেণ তিষ্ঠতি। ইতি কূর্ম্মপুরাণে যুগধর্ম্ম কীর্ত্তনং নাম ২৬ অধ্যায়ঃ॥ ❀॥ যুগাবতারা যথা। কৃতে যুগে পরং জ্ঞানং কপিলাদি স্বরূপ ভৃৎ। দদাতি সর্ব্বভূতাত্মা সর্ব্বভূতহিতে রতঃ॥ চক্রবর্ত্তি স্বরূপেণ ত্রেতায়া মপি স প্রভুঃ। দুষ্টানাং নিগ্রহং কুর্ব্বন্ পরিপাতি জগত্রয়ং॥ বেদমেকং চতুর্ভেদং কৃত্বা শাখা শতৈ র্বিভুঃ। করোতি বহুলং ভূয়ো বেদব্যাস স্বরূপধৃক্॥ বেদাংস্তু দ্বাপরে ব্যস্য কলে রন্তে পুন র্হরিঃ। কল্কি স্বরূপী দুর্ব্বৃত্তান্মার্গে স্থাপযতি প্রভুঃ॥ এব মেব জগৎ সর্ব্বং পরিপাতি করোতি চ। হন্তি চান্যেষ্বনন্তাত্মা নাস্ত্যস্মাদ্ব্যতিরেকি যৎ॥ ইতি বিষ্ণু পুরাণে ৩ অংশে ২ অধ্যায়ঃ॥ ❀॥ যুগধর্ম্মান্তরং যথা। জৈমিনি রুবাচ। কলৌ যুগে মহাভাগ সমাযাতে সুদারুণে। ভবিষ্যন্তি জনাঃ সর্ব্বে কীদৃশা স্তদ্বদস্ব মে॥ ব্যাস উবাচ। আদ্যং সত্যযুগং প্রাহু স্ততস্ত্রেতাহ্বয়ং যুগং। ততশ্চ দ্বাপরং বিপ্র কলি মন্ত্যং বিদু র্বুধাঃ॥ কৃতে ধর্ম্ম শ্চতুষ্পাদঃ সর্ব্বধর্ম্মরতা জনাঃ। বর্ণাশ্রমাচাররতা স্তপো ব্রতপরায়ণাঃ॥ নারায়ণার্চ্চনপরাঃ শোক ব্যাধি বিবর্জ্জিতাঃ। সত্যোক্তিভাষিণঃ সর্ব্বে সদয়া দীর্ঘজীবিনঃ॥ ধন ধান্যাদি সম্পন্না হিংসা দম্ভ বিবর্জ্জিতাঃ। পরোপকারিণ শ্চৈব সর্ব্বশাস্ত্রবিদ স্তথা॥ এবম্বিধাঃ সত্যযুগে সর্ব্বে লোকা দ্বিজোত্তম। রাজধর্ম্ম গ্রাহিণশ্চ ভূপালা জনপালিনঃ॥ অহো সত্যযুগস্যান্তি কঃ সংখ্যাতুং

গুণাম্ জনঃ। অধর্ম্মাচরণং তত্র জনাঃ কেচিন্নজন্বতে ॥ * ॥ ত্রেতাযুগে সমায়াতে ধর্ম্মঃ পাদোনতাং গতঃ। অল্পক্লেশান্বিতা লোকাঃ কেচিৎ কেচিদ্‌যশস্বযাঃ ॥ বিষ্ণুধ্যানরতা লোকা যজ্ঞদানপরায়ণাঃ। বর্ণাশ্রমাচাররতাঃ সুখিনঃ সুস্থচেতসঃ ॥ ক্ষত্রা ভূমিস্পৃশঃ শূদ্রাঃ সর্ব্বে ব্রাহ্মণসেবিনঃ। ব্রাহ্মণাশ্চ মহাত্মানো বেদবেদাঙ্গপারগাঃ ॥ প্রতিগ্রহ নিবৃত্তাশ্চ সত্যসন্ধা জিতেন্দ্রিয়াঃ। তপো ব্রতরতা নিত্যং দাতারো বিষ্ণুসেবিনঃ ॥ কালবর্ষী তড়িত্বাংশ্চ স্ত্রিয়ঃ সর্ব্বাঃ পতিব্রতাঃ। বসুন্ধরা চ শস্যাঢ্যা পুত্রাশ্চ পিতৃসেবিনঃ ॥ * ॥ ত্রেতাযুগস্যাবসানে দ্বাপরে যুগ আগতে। দ্বিপাদো ভূতবান্ ধর্ম্মঃ সুখ দুঃখান্বিতা নরাঃ ॥ কেচিৎ কেচিৎ পাপরতাঃ কেচিদ্ধর্ম্মরতা স্তথা। কেচিৎ কেচিৎ গুণৈ হীনাঃ কেচিৎ কেচিন্মহাগুণাঃ ॥ অত্যন্ত দুঃখিনঃ কেচিৎ কেচিচ্চান্তিবনা স্তথা। প্রতিগ্রহে ব্রাহ্মণাশ্চ কদাচিৎ জন্বতে স্পৃহাং ॥ ভূভুজা ঘন লোভেন কদাচিদ্দণ্ড্যতে প্রজাঃ। বিষ্ণুপূজাপরা বিপ্রাঃ শূদ্রাশ্চ দ্বিজসেবিনঃ ॥ তদা বিষ্ণু র্ব্যাসরূপী বেদভাগং চকার হ ॥ * ॥ কলৌযুগে চ বিপ্রেন্দ্র সর্ব্বপাপৈকমন্দিরে। একপাদো হ্যভবদ্ধর্ম্মঃ সর্ব্বে পাপরতা জনাঃ ॥ ব্রাহ্মণাঃ ক্ষত্রিয়া বৈশ্যাঃ শূদ্রাঃ পাপপরায়ণাঃ। নিজাচারবিহীনাশ্চ ভবিষ্যন্তি কলৌ যুগে ॥ বিপ্রা বেদবিহীনাশ্চ প্রতিগ্রহপরায়ণাঃ। অত্যন্তকামিনঃ ক্রূরা ভবিষ্যন্তি কলৌ যুগে ॥ পরান্নলোলুপা নিত্যং তপো ব্রতপরাঙ্মুখাঃ। পাষণ্ডসঙ্গ লব্ধাশ্চ ভবিষ্যন্তি কলৌযুগে ॥ বিত্তার্থং ব্রাহ্মণাঃ কেচিন্মহাকপটধর্ম্মিণঃ। বল্কাধরা ভবিষ্যন্তি জটিলাঃ শ্মশ্রুধারিণঃ ॥ কলৌ যুগে ভবিষ্যন্তি ব্রাহ্মণাঃ শূদ্রধর্ম্মিণঃ। শূদ্রাশ্চ দীক্ষাগুরবো নিত্যং ব্রাহ্মণধর্ম্মিণঃ ॥ কল্মৌ যাস্যন্তি নির্বৃত্তা উত্তমা অপি নীচতাং। নীচাশ্চ ধনসম্পন্না যাস্যন্ত্যুচ্চপদং প্রতি ॥ প্রদাস্যন্ত্যপকারিভ্যো দানানি সকলা জনাঃ। যত্নাদপি চ নেষ্যন্তি বৃষলা বিপ্র বর্ত্তনং ॥ মিত্র স্নেহান্বদিষ্যন্তি জসাক্ষ্যঞ্চ কলৌ জনাঃ। অধর্ম্মবুদ্ধিদাতারো ধর্ম্মবুদ্ধিবিলোপিনঃ ॥ পরোক্ষনিন্দকাঃ ক্রূরাঃ সংমুখে প্রিয়বাদিনঃ। পরস্ত্রীহিংসকা শ্চৈব মিথ্যাবচনভাষিণঃ ॥

ভবিষ্যন্তি কলৌ বিপ্রাঃ পরস্বিত্তাভিলাষিণঃ। গৃহস্থাযান্ত মতিথিং সম্পরাধ্য বিধানতঃ॥ ধনলোভাদ্ধনিষ্যন্তি নরা নরকভাগিনঃ। ঋণেপরস্ত্রীবিনষ্টশ্চৈব ভবিষ্যন্তি কলৌ যুগে॥ স্ত্রীজিতাঃ পুরুষাঃ সর্ব্বে স্ত্রিযোপ্যত্যন্তচঞ্চলাঃ। দুনীতি বাধতে তাসাং স্বামিনঞ্চ ন সংশয়ঃ॥ জৈমিনি রুবাচ। মনঃশুদ্ধি বিহীনত্বাৎ সর্ব্বেষাং প্রাণিনাং মনে॥ অতঃ সর্ব্বং ত্বযা প্রোক্তং মনো বিস্ময়দং মম। কলৌ সর্ব্বে ভবিষ্যন্তি মনঃশুদ্ধি বিবর্জিতাঃ॥ তেষাং যথা ভবেৎ কর্ম্ম সফলং ব্রূহি তদ্গুরো। ব্যাস উবাচ। অনর্পিতন্তু যৎ কর্ম্ম তদ্ভবে ন্নিষ্ফলং খলু। একেন মনসা বিপ্র সুদৃঢ়ং কথ্যতে মযা॥ বিষ্ণু ভক্তিমতাং পুংসাং ন কিঞ্চিন্নিষ্ফলং ভবেৎ। ইতি তে কথিতং সর্ব্বং ব্যক্তং ব্রাহ্মণ সত্তম॥ যৎ শ্রুত্বা ভক্তি ভাবেন নরো মোক্ষ মবাপ্নুযাৎ॥ ইতি পাদ্মে ক্রিযাযোগসারে ২৫ অধ্যাযঃ॥ *॥ অপিচ। কৃতে ধর্ম্ম শ্চতুষ্পাচ্চ সত্যং দানং তপো দযা। ধর্ম্ম শাস্তা হরিঃ শ্বেতঃ সন্তুষ্টা জ্ঞানিনো নরাঃ॥ চতুর্ব্বর্ষ সহস্রাণি নরা জীবন্তি বৈ তদা। কৃতান্তে ক্ষত্রিযৈ র্বিপ্রা বিট্ শূদ্রাশ্চ জিতা দ্বিজৈঃ॥ শুরস্য প্রণতিঃ পুত্রো বিষ্ণুঃ ক্রুদ্ধং জঘান হ॥ *॥ ত্রেতাযুগে ত্রিপাদ্ধর্ম্মঃ সত্য দান দযাত্মকঃ। নরা যজ্ঞপরা স্তস্মিং স্তথা ক্ষত্রোদ্ভবং জগৎ॥ রক্তো হরি র্নরৈঃ পূজ্যো নরা দশ শতাযুষঃ। তত্র বিষ্ণু র্ভীমরথঃ ক্ষত্রিয়ো রাক্ষসানহন্॥ *॥ দ্বিপাচ্চ দ্বাপরে ধর্ম্মঃ পীততাঞ্চাচ্যুতে গতে। চতুঃ শতাযুষো লোকা দ্বিজ ক্ষত্রোত্তরাঃ প্রজাঃ॥ তদা দৃষ্ট্বাল্পবুদ্ধীংশ্চ বিষ্ণু র্ব্যাস স্বরূপধৃক্। তদেকন্তু যজুর্ব্বেদং চতুর্ধা ব্যভজৎ পুনঃ॥ শিষ্যানধ্যাপযানাস নানিত স্তান্নিবোধ মে। ঋগ্বেদ মথ পৌলস্ত্যং সামবেদঞ্চ জৈমিনিং॥ অথর্ব্বাণং সুমন্তুস্তু যজুর্ব্বেদং মহামুনিং। বৈশম্পাযন সংজ্ঞন্তু পুরাণং সূতমেব চ॥ অষ্টাদশ পুরাণানি যেষু বৈ হরি রেব হি। সর্গশ্চ প্রতিসর্গশ্চ বংশো মন্বন্তরাণি চ। বংশানুচরিতঞ্চৈব পুরাণং পঞ্চ লক্ষণং। ব্রাহ্মং পাদ্মং বৈষ্ণবঞ্চ শৈবং ভাগবত স্তথা। ভবিষ্যং নারদীযঞ্চ পুরাণঞ্চেতি বিস্তরং॥ মার্কণ্ডেযং তথাগ্নেযং ব্রহ্মবৈবর্ত্ত মেব চ। কৌর্ম্মং মাৎস্যং গারুডঞ্চ বাযবীয মনন্তরং॥ অষ্টাদশং সমুদিতং ব্রহ্মাণ্ড মিতি

সংজ্ঞিতং। অন্যান্যুপপুরাণানি মুনিভিঃ কথিতানিতু॥ আদ্যং সনৎকুমারোক্তং নারসিংহ মথাপরং। তৃতীয়ং স্কান্দ মুদ্দিষ্টং কুমারেণ তু ভাষিতং॥ চতুর্থং শিবধর্ম্মাখ্যং সাক্ষান্নন্দীশ ভাষিতং। দুর্ব্বাসসোক্ত মাশ্চর্য্যং নারদোক্ত মতঃ পরং॥ কাপিলং বামনঞ্চৈব তথৈবোশনসেরিতং। ব্রহ্মাণ্ডং বারুণঞ্চাথ কালিকাহ্বয় মেব চ॥ মাহেশ্বরং তথা শাম্বং সৌর সর্ব্বার্থসঞ্চয়ং। পরাশরোক্ত মপরং মারীচং ভার্গবাহ্বয়ং॥ পুরাণং ধর্ম্মশাস্ত্রঞ্চ বেদা অঙ্গানি যন্মুনে। ন্যায়ঃ শৌনক মীমাংসা আয়ুর্ব্বেদার্থশাস্ত্রকং॥ গান্ধর্ব্বশ্চ ধনুর্ব্বেদো বিদ্যা হ্যষ্টাদশ স্মৃতাঃ। দ্বাপরান্তে স চ হরি র্ভুবো ভার মপাহরৎ॥ * ॥ একপাদ স্থিতে ধর্ম্মে কৃষ্ণতাঞ্চাচ্যুতে গতে। জনা স্তদা দুরাচারা ভবিষ্যন্তি চ নির্দ্দয়াঃ॥ সত্ত্বং রজ স্তম ইতি দৃশ্যন্তে পুরুষে গুণাঃ। কালসঞ্চোদিতা স্তে হপি পরিবর্ত্তন্ত আত্মনি॥ প্রভূতঞ্চ যদা সত্ত্বং মনো বুদ্ধীন্দ্রিয়াণি চ। তদা কৃত যুগং বিদ্যাদ্দানে তপসি যদ্রতিঃ॥ যদা কর্ম্মসু কার্য্যেষু শক্তি র্যশসি দেহিনাং। তদা ত্রেতা রজোবৃত্তি রিতি জানীহি শৌনক॥ যদা লোভ স্ত্বসন্তোষো মানো দম্ভো হথ মৎসরঃ। কর্ম্মণাঞ্চাপি কাম্যানাং দ্বাপরন্তদ্রজ স্তমঃ॥ যদা সদানৃতং তন্দ্রী নিদ্রা হিংসাদি সাধনং। শোক মোহ ভয়ং দৈন্যং স কলিস্ত তদা স্মৃতঃ॥ যস্মিন্ জনাঃ কামিনোপি শশ্বৎ কটুকভাষিণঃ। দস্যুকৃষ্টা জনপদা বেদাঃ পাষণ্ডদূষিতাঃ॥ রাজানশ্চ প্রজাভক্ষাঃ শিশ্নোদরপরা দ্বিজাঃ। অব্রতা বটবো হশৌচা ভিক্ষবশ্চ কুটুম্বিনঃ॥ তপস্বিনো গ্রামবাসা ন্যাসিনো নিত্যলোলুপাঃ। হ্রস্বকাযা মহাহারা শ্চৌর্য্য মাযোরুসাহসাঃ॥ ত্যক্ষন্তি ভৃত্যাশ্চ পতিং ভৃত্যং ভর্ত্তার এব চ। শূদ্রাঃ প্রতিগৃহীষ্যন্তি তপোবেশোপজীবিনঃ॥ উদ্বিগ্না শ্চানলঙ্কারাঃ পিশাচ সদৃশাঃ প্রজাঃ। অস্নাত ভোজনেনাগ্নি দেবতাতিথি পূজনং॥ করিষ্যন্তি কলৌ প্রাপ্তে নচ পিণ্ডোদক ক্রিযাং। স্ত্রীপরাশ্চ জনাঃ সর্ব্বে শূদ্রপ্রাযাশ্চ শৌনক॥ বহুপ্রজাল্প ভাগ্যাশ্চ ভবিষ্যন্তি কলৌ স্ত্রিযঃ। শিরঃ কণ্ডূযনপরা আজ্ঞাং ভেৎস্যন্তি সৎপতেঃ॥ বিষ্ণুং ন পূজযিষ্যন্তি পাষণ্ডোপহতা জনাঃ। কলে র্দোষ

নিষেধবিপু অস্তি হ্যেকো মহান্ গুণঃ ॥ কীর্ত্তনাদেব কৃষ্ণস্য মুক্তবন্ধঃ পরং ব্রজেৎ। কৃতে যদ্ধ্যায়তো বিষ্ণুং ত্রেতায়াং যজতঃ ফলং ॥ দ্বাপরে পরিচর্য্যায়াং কলৌ তদ্ধরিকীর্ত্তনাৎ। তস্মাজ্জ্ঞেয়ো হরির্নিত্যং ধ্যেয়ঃ পূজ্যশ্চ শৌনক ॥ ইতি গারুড়ে যুগধর্ম্মাঃ ২২৭ অধ্যায়ঃ ॥

যুগঃ পুং রথহলাদ্যঙ্গং। জোয়ালি তি ভাষা। ইতি মেদিনী ॥

যুগকীলকঃ পুং যুগকাষ্ঠস্যকীলকঃ। জোয়ালের খিল ইতি ভাষা। তৎপর্য্যায়ঃ। শম্যা ২। ইত্যমরঃ ॥

যুগন্ধরঃ পুং যত্ররথস্যযুগকাষ্ঠমাসজ্যতে তত্র। রথস্যাশ্বা যত্র বধ্যন্তে তদ্যুগকাষ্ঠং তদ্যুগং ধরতিযুগন্ধরঃ। ইতি ভরতঃ ॥ তৎপর্য্যায়ঃ। কূবরঃ ২। ইত্যমরঃ॥ পর্ব্বতবিশেষঃ। যথা। নিষধো মাল্যবান্ বিন্ধ্যো হেমকূটো যুগন্ধরঃ। ইতি শব্দরত্নাবলী ॥

যুগপৎ ব্য একদা। এককালীনং। ইত্যমরঃ ॥

যুগপত্রঃ পুং কোবিদারবৃক্ষঃ। ইতি হেমচন্দ্রঃ ॥ যুগ্মপর্ণবৃক্ষমাত্রঞ্চ ॥

যুগপত্রকঃ পুং কোবিদারবৃক্ষঃ। ইত্যমরঃ ॥

যুগপত্রিকা স্ত্রী শিংশপাবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ ॥

যুগপার্শ্বগঃ পুং অভ্যাসার্থলাঙ্গলপার্শ্ববদ্ধোগৌঃ। পাঁটেবাঁধাগরু ইতি ভাষা। তৎপর্য্যায়ঃ। পৃষ্ঠবাট্ ২। ইত্যমরঃ ॥

যুগলং ক্লী যুগ্মং। ইত্যমরঃ ॥

যুগলমন্ত্রঃ পুং লক্ষ্মীনারায়ণাদিমন্ত্রঃ। যথা। ইদং রহস্যং পরমং লক্ষ্মীনারায়ণাহ্বয়ং রাজং শুবাণি বক্ষ্যামি পুপত্তিং শরণাগতিং ॥ দ্বযাৎ পরতরং মন্ত্রং নাস্তি সত্যং ব্রবীমি তে। দ্বযাৎ পরতরং ধর্ম্মং নাস্তি লোকেষু কিঞ্চন ॥ সর্ব্বেষাং কৃষ্ণমন্ত্রাণাং মধ্যে যুগলসংজ্ঞকং। মন্ত্রং হি সর্ব্বতঃ শ্রেষ্ঠং কৃষ্ণ জপ্য মনুত্তমং ॥ সর্ব্বতো যুগলং মন্ত্রং কাষ্ণং পরতরং নৃপ। গুহ্যাদ্গুহ্যতমং জাতু জ্ঞেয়ং তত্তদুপাসকৈঃ ॥ ইতি পাদ্মোত্তরখণ্ডে ২৫ অধ্যায়ঃ ॥

যুগলাখ্যঃ পুং বর্ব্বরবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ ॥ যুগ্মনামকশ্চ ॥

যুগাংশকঃ পুং বৎসরঃ। ইতি হারাবলী ॥ যুগবিভাজকশ্চ ॥

যুগান্তঃ পুং প্রলয়ঃ। ইতি হলায়ুধঃ ॥ যুগশেষশ্চ ॥

যুগ্মং ক্লী দ্বযং। যোড়া ইতি ভাষা ।

তৎপর্য্যায়ঃ। দ্বন্দ্বং ২ যুগলং ৩ যুগং ৪
। ইত্যমরঃ॥ দ্বিতীয় চতুর্থ ষষ্ঠাষ্টম
দশম দ্বাদশ রাশয়ঃ। যথা। ক্রূরো
ঽথ সৌম্যঃ পুরুষো ঽঙ্গনা চ ওজো
ঽথ যুগ্মং বিষমঃ সমশ্চ। চরস্থির
দ্ব্যাত্মকনামধেয়া মেষাদয়ো ঽমী
ক্রমশঃ প্রদিষ্টাঃ॥ ইতি জ্যোতি-
স্তত্ত্বং॥ মেলনং। যথা। যুগ্মাগ্নি
কৃতভূতানি ষণ্মুন্যো র্বসুরন্ধ্রযোঃ।
রুদ্রেণ দ্বাদশী যুক্তা চতুর্দশ্যাথ প-
ূর্ণিমা॥ প্রতিপদা প্যমাবাস্যা তি-
থ্যো র্যুগ্মং মহাফলং। এতদ্ব্যস্তং
মহাঘোরং হন্তি পুণ্যং পুরাকৃতং॥
দ্বিতীয়াতৃতীয়য়ো শ্চতুর্থী পঞ্চ-
ম্যোঃ ষষ্ঠীসপ্তম্যো রষ্টমীনবম্যো
রেকাদশীদ্বাদশ্যো শ্চতুর্দ্দশী পৌ-
র্ণমাস্যোঃ প্রতিপদমাবাস্যয়ো র্যু-
গ্মং মেলনং। তত্তত্তিথি মাত্র নি-
মিত্তকে কর্ম্মণি মহাফলং। এতৎ
প্রয়োজনন্ত তিথিবিশেষ বিহিতে
কর্ম্মণি তিথিখণ্ডবিশেষ নিয়মনং
। স্বতিথ্যা কর্ম্মানির্ব্বাহে সহায়
ভাবেনান্য তিথ্যনুপ্রবেশাদুপবা-
সাদ্যাচরণঞ্চ। ইতি তিথ্যাদি-
তত্ত্বং॥

যুগ্মপত্রঃ পুং রক্তকাঞ্চনবৃক্ষঃ। ইতি
রত্নমালা॥ যুগলপর্ণে ক্লী॥

যুগ্মপত্রিকা স্ত্রী শিংশপাবৃক্ষঃ।
ইতি শব্দরত্নাবলী॥

যুগ্মপর্ণঃ পুং কোবিদারবৃক্ষঃ॥ স-
প্তপর্ণবৃক্ষঃ। ইতি রাজনির্ঘণ্টঃ॥

যুগ্মফলা স্ত্রী ইন্দ্রচির্ভিটী॥ বৃশ্চি-
কালী। ইতি রাজনির্ঘণ্টঃ॥ গন্ধি-
কা। ইতি রত্নমালা॥

যুগ্মাদরঃ পুং তিথিবিশেষযোগেন
তিথিখণ্ডবিশেষস্যাদরণং। যথা।
পঞ্চমী সপ্তমী চৈবেত্যাদিনা বি-
শেষতঃ সায়াহ্নব্যাপিতিথে র্গ্রহ-
ণাদুপবাসে ঽপি ন রাত্রি যুগ্মাদরঃ
। ইতি তিথ্যাদিতত্ত্বং॥ অস্য বিব-
রণং যুগ্মশব্দে দ্রষ্টব্যং॥

যুগ্মাদরণং ক্লী যুগ্মতিথিপূজ্যতা।
যথা। ত্রিসন্ধ্যব্যাপিনী যা তু সৈব
পূজ্যা সদা তিথিঃ। ন তত্র যুগ্মাদ-
রণ মন্যত্র হরিবাসরাৎ॥ ইতি
তিথ্যাদিতত্ত্বং॥

যুগ্যং ক্লী বাহনং। যানং। ইত্যমরঃ॥

যুগ্যঃ পুং যুগবোঢা। ইত্যমরঃ॥

যুজ্ পুং যোগকর্ত্তা। মেলনকর্ত্তা।
ইতি মুগ্ধবোধব্যাকরণং॥

যুঙ্গী পুং বর্ণসঙ্করজাতিবিশেষঃ।
সতু গঙ্গাপুত্রকন্যায়াং বেশধারি-
ণো জাতঃ। যথা। গঙ্গাপুত্রস্য
কন্যায়াং বীর্য্যেণ বেশধারিণঃ।

বভূবঃ বেশধারী। পুং। প্রায়ুঞ্জীপুকী স্থিতঃ। ইতি ব্রহ্মবৈবর্ত্তে ব্রহ্মখণ্ডং॥

যুছ প্রমাদে। ইতি কবিকল্পদ্রুমঃ॥ অন্তস্থাদ্যাদিঃ পঞ্চমস্বরী। প্রমাদো হনবধানতা। যুছতি পাপে সাধুঃ। ওষ্ঠ্যবর্গাদ্যাদি রিতি রমানাথঃ। পচাদিত্বাদবি পুছো লাঙ্গুলং। ওষ্ঠ্যবর্গশেষাদি রিতি ত্রিলোচনঃ। মুছতি। ইতি দুর্গাদাসঃ॥

যুজ কি সংযমে॥ যুতৌ। ইতি কবিকল্পদ্রুমঃ॥ অন্তস্থাদ্যাদিঃ। কি যোজযতি। যোজতি। সংযমো বন্ধনং। ইতি দুর্গাদাসঃ॥

যুজ ইর ধ ঞ ঔ যুতৌ। ইতি কবিকল্পদ্রুমঃ॥ ইর অযুজৎ অযৌক্ষীৎ। ধ যুনক্তি যুঙ্‌ক্তে ঘৃতেনান্নং লোকঃ। ঔ যোক্তা। ইতি দুর্গাদাসঃ॥

যুজ য ঔ ঙ সমাধৌ। ইতি কবিকল্পদ্রুমঃ॥ সমাধি র্যোগ্যভাবঃ। য ঙ স্বযমুমা নিযুজ্যতে। ইতি হলাযুধঃ। ঔ যোক্তা। ইতি দুর্গাদাসঃ॥

যুজ ঙ ক নিন্দে। ইতি কবিকল্পদ্রুমঃ॥ ক ঙ যোজযতে। ইতি দুর্গাদাসঃ

যুজানঃ পুং সারথিঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

যুঞ্জৌ পুং অশ্বিনীকুমারৌ। ইতি ত্রিকাণ্ডশেষঃ॥ নিত্যদ্বিবচনান্তোযং॥

যুঞ্জানঃ পুং সারথিঃ॥ বিপ্রঃ। ইতি মেদিনী॥ ভাবনাসহকারেণসর্ব্বজ্ঞঃ। যথা। যোগজো দ্বিবিধঃ প্রোক্তো যুক্ত যুঞ্জান ভেদতঃ। যুক্তস্য সর্ব্বদাভানং চিন্তাসহ কৃতো হপরঃ॥ ইতি ভাষাপরিচ্ছেদঃ॥ যুক্তস্যেতি যোগাভ্যাসাবগত্য বশীকৃত সমাধি সমাসাদিতো বিবিধ সিদ্ধিযুক্ত ইত্যুচ্যতে অযমেব বিশিষ্ট যোগবত্ত্বাৎ যুক্ত ইত্যচ্যতে। সর্ব্বদেতি চিন্তাসহকারং বিনেত্যর্থঃ। ভানং সর্ব্ববিষযানাং প্র। অপরো যুঞ্জানঃ। বিষয ব্যাবৃত্ত্যা মনস সমাধিমঃ। অসঙ্গ যুঞ্জান উচ্যতে। চিন্তা ধ্যানং তদেব কারণং তৎসহকারাৎ স্থূল সূক্ষ্ম ব্যবহিত বিপ্রকৃষ্টানর্থান্ মনঃ প্রত্যক্ষীকরোতীত্যর্থঃ। ইতি সিদ্ধান্তমুক্তাবলী॥

যুৎ ক্লী নিন্দা। যুঙ ক নিন্দে ইত্যস্মাদ্ভাবে ক্বিপ্ প্রত্যযেন নিষ্পন্নং॥

যুৎ স্ত্রী যুদ্ধং। ইত্যমরঃ॥

যুত ঋ ঙ দীপ্তৌ। ইতি কবিকল্পদ্রুমঃ॥ ঋ অযুযোতৎ। ঙ যোততে। ইতি দুর্গাদাসঃ॥

যুতং ক্লী হস্তচতুষ্টযং। ইতি মেদিনী॥

যুতঃ ত্রি যুক্তঃ। অপৃথগভূতঃ।

ইতি মেদিনী ॥

যুতকং ক্লী সংশয়ঃ ॥ যুগং ॥ নারী বস্ত্রাঞ্চলং ॥ যুক্তং ॥ চলনাগ্রং ॥ যৌতুকং । ইতি বিশ্বমেদিন্যৌ ॥ মৈত্রীকরণং । ইতি শব্দরত্নাবলী ॥ স্ত্রীবস্ত্রভেদঃ । ইতি হেমচন্দ্রঃ ॥ সংশুয়ঃ ॥ শূর্পাগ্রং । ইতি নানার্থ-রত্নমালা ॥

যুদ্ স্ত্রী যুদ্ধং । ইত্যমরঃ ॥

যুদ্ধং ক্লী যোধনং । লড়াই ইতি ভাষা । তৎপর্য্যায়ঃ । আযোধনং ২ জন্যং ৩ প্রধনং ৪ প্রবিদারণং ৫ মৃধং ৬ আস্কন্দনং ৭ সংখ্যং ৮ সমীকং ৯ সাম্পরায়িকং ১০ সমরং ১১ অনীকং ১২ রণঃ ১৩ কলহঃ ১৪ বিগ্রহঃ ১৫ সংপ্রহারঃ ১৬ অভিসম্পাতঃ ১৭ কলিঃ ১৮ সংস্ফোটঃ ১৯ সংযুগঃ ২০ অভ্যামর্দ্দঃ ২১ সমাঘাতঃ ২২ সংগ্রামঃ ২৩ অভ্যাগমঃ ২৪ আহবঃ ২৫ সমুদায়ঃ ২৬ সংযৎ ২৭ সমিতিঃ ২৮ আজিঃ ২৯ সমিৎ ৩০ যুৎ ৩১ । ইত্যমরঃ ॥ সংরাবঃ ৩২ আনাহঃ ৩৩ সম্পরায়কঃ ৩৪ বিদারঃ ৩৫ দারণং ৩৬ সংযিৎ ৩৭ সম্পরায়ঃ ৩৮ । ইতি শব্দরত্নাবলী ॥ তীক্ষ্ণং ৩৯ অম্বরীষং ৪০ বলজং ৪১ আনর্ত্তঃ ৪২ অভিমর ৪৩ সমুদয়ঃ ৪৪ । ইতি জটাধরঃ ॥ * ॥

যুদ্ধে বর্ণনীয়ানি যথা । চর্ম্ম ১ বর্ম্ম ২ বলং ৩ শঙ্খঃ ৪ ধূলিঃ ৫ তূর্য্যস্বনঃ ৬ সিংহনাদঃ ৭ শবমণ্ডলং ৮ রক্তনদী ৯ ছিন্নছত্রং ১০ রথঃ ১১ চামরঃ ১২ হস্তী ১৩ অশ্বঃ ১৪ কেতুঃ ১৫ বিদীর্ণকুম্ভিকুম্ভমুক্তা ১৬ ব্যূহরচনাবহিঃসেনা ১৭ সুরপুষ্পবৃষ্টিঃ ১৮ । ইতি কবিকল্পলতা ॥ * ॥

অথ যুদ্ধ ফলং । অগ্নিষ্টোমাদিভির্যজ্ঞৈ রিষ্ট্বা বিপুল দক্ষিণৈঃ । ন তৎফল মবাপ্নোতি সংগ্রামে যদবাপ্নুযাৎ ॥ ইতি যজ্ঞবিদঃ প্রাহু র্যজ্ঞ কর্ম্মবিশারদাঃ । তস্মাত্তত্তে প্রবক্ষ্যামি যৎফলং শস্ত্রজীবিনাং ॥ * ॥

যুদ্ধে মরণ ফলং যথা । ধর্ম্মলাভো ঽর্থলাভশ্চ যশোলাভ স্তথৈব চ । যঃ শূরো বধ্যতে যুদ্ধে বিমৃদন্ পরবাহিনীং ॥ যস্য ধর্ম্মার্থ কামৌ চ যজ্ঞশ্চৈব সদক্ষিণঃ । পরং হ্যভিমুখে হত্বা তযোঃ পন্থাধিরোহতি ॥ বিষ্ণোঃ স্থান মবাপ্নোতি এবং যুধ্যন্ রণাজিরে । অশ্বমেধানবাপ্নোতি চতুর স্তেন কর্ম্মণা ॥ যস্ত শস্ত্রং সমুৎসৃজ্য বীর্য্যবান্ বাহিনী মুখে । সম্মুখো বর্ত্ততে শূরঃ স স্বর্গান্ন নিবর্ত্ততে ॥ রাজা বা রাজপুত্রো বা

সেনাপতি রথাপ্রিবা। হতঃ ক্রমেণ যঃ শূরস্তস্য লোকো হক্ষযো ধ্রুবঃ ॥ যাবন্তি তস্য গাত্রাণি ভিন্দন্তি শস্ত্রমাহবে। তাবতো লভতে লোকান্ সর্বকামদুহো হক্ষযান্ ॥ বীরাসনং বীরশয্যা বীরস্থান স্থিতিঃ স্থিরা। গবার্থে ব্রাহ্মণস্যার্থে গোস্বাম্যর্থে চ যে হতাঃ ॥ তে গচ্ছন্ত্যমরস্থানং যেস্যুঃ সুকৃতিন স্তথা। অভগ্নো যঃ পরং সৈন্যং ভগ্নঞ্চ পরিরক্ষতি ॥ পৃষ্ঠ স্থিতঃ পালযন্তি সোপি গচ্ছন্তি তদ্গতিং। অনুত্তীর্ণ স্তথা সদ্যঃ প্রাণান্ য স্ত্যজতে যুধি ॥ হতশ্চ স্বপক্ষে যুদ্ধে সম্বর্গাম নিবর্ত্ততে। দংষ্ট্রিভিঃ শৃঙ্গিভি র্বাপি তথা ম্লেচ্ছশ্চ তস্করৈঃ ॥ স্বাম্যর্থে যে হতা রাজং স্তেষাং স্বর্গো ন সংশয়ঃ। শস্ত্রাগ্নিনা সুনির্দ্দগ্ধঃ স্বগৃহে চ চ্যুতো যদি ॥ সংগ্রামান্ম্রিযতে রাজং তস্য স্বর্গো ন সংশয়ঃ। ভযেন লজ্জযা বাপি স্নেহেন চ রণাজিরে ॥ সম্মুখো ম্রিযতে রাজং স্তদা স্বর্গো ন সংশযঃ। যস্তুভিন্নীকৃতং গাত্রং শর শক্ত্যৃষ্টি তোমরৈঃ ॥ দেবকন্যাস্তু তং বীরং রামযন্তি রমন্তি চ। বরাপ্সরঃ সহস্রাণি শূর মাযোধনে হতং ॥ ত্বরিতান্যভিধাবন্তি মম ভর্ত্তা ভবেত্তি চ। যত্র তত্র হতঃ শূরঃ শত্রুভিঃ পরিবেষ্টিতঃ ॥ অক্ষযান্ লভতে লোকান্ যদি ক্লীবং ন ভাষতে। জিতেন লভ্যতে লক্ষ্মী মৃতেনাপি সুরাঙ্গনাঃ ॥ ক্ষণ বিধ্বংসিনি কাযে কা চিন্তা মরণে রণে। হতস্যাভিমুখস্য যে লোকা ন নিবর্ত্তিনঃ ॥ হতে গোস্বামি বিপ্রার্থে নরস্ত্বেং ফলং হি তৎ। স্থানাভিঘাতে শরণাগতে চ রাজ্ঞো লিপন্তৌ দ্বিজ সার্থঘাতে ॥ স্ত্রী বাল বৃদ্ধাজন গোগৃহে চ শস্ত্রং মুনীনামপি ধারণীযং। দ্বাং যজ্ঞ সংঘৈ স্তপসা চ বিপ্রাঃ স্বর্গৈষিণো যত্র ন বৈ প্রযান্তি ॥ ক্ষণেন তা মেব গতিং প্রযান্তি মহাহবে স্বাং তনুং সংত্যজন্তঃ। সর্বাংশ্চ বেদান্ সুমহদ্ভি রঙ্গৈঃ সাংখ্যঞ্চ যোগঞ্চ বনে বিবাসং ॥ এতে গুণা একপদে প্রবিষ্টা মহাহবে স্বাং তনুং সংত্যজেদ্যঃ। ইমাং গিরং বেদবিদঃ শুভাক্ষরাং সুভাষিতাং বৃত্রভিদা দিবৌকসাং ॥ চমূ মুখে যঃ স্মরতে দৃঢ স্মৃতি র্নহন্যতে হন্তি চ সোপি বৈরিণঃ। সদা পুণ্যতমঃ স্বর্গ্যঃ সুযজ্ঞঃ সর্বতো মুখঃ ॥ সর্বেষা মেব বর্ণানাং ক্ষত্রিযস্য বিশেষতঃ। ভূয শ্চৈব তু বক্ষ্যামি রণধর্ম্মং সনাতনং ॥ যাদৃশায প্রবর্ত্তব্যং যাদৃশং পরিবর্জযেৎ

। আততায়িন মায়ান্ত মপি বেদা-
ন্তগং দ্বিজং ॥ জিঘাংসন্তং জিঘাংসী-
য়ান্ন তেন ব্রহ্মহা ভবেৎ । কোদণ্ড
শস্ত্রপাণিস্ত প্রহরন্তং দ্বিজং যদি ॥
হন্যাত্তমাসুরং ভাবং হত্বা ন ব্রহ্মহা
ভবেৎ । ব্রহ্মহা জায়তে যৈস্ত হতৈ
স্তুতং শৃণুস্ব মে ॥ বচঃ সংখ্যে নৃপ-
শ্রেষ্ঠ ন্যায় যজ্ঞে সনাতনে । বিরথং
বিগতং ব্যস্তং বিবর্ণং বিমুখ স্থিতং
॥ যুদ্ধোৎসাহহতং হত্বা ব্রহ্মহা
জায়তে নরঃ । নিশস্ত্রং বিধনুষ্কঞ্চ তং
ভীতো হস্মীতি বাদিনং ॥ বর্ণশাখো
দ্যুতাং শান্তং হত্বা স ব্রহ্মহা ভবেৎ
। ভগ্ন্যা হত্বা ন কর্ত্ত্যো বালো
বাক্কা নপাংসকং ॥ ভয়াক্তং শরদ-
ন্মন্ন শনৈঃ কৃতা হৃদ্ধ ভীরবঃ ।
তস্মাদেতান্ পরিহরেচ্ছূরো ধর্ম্মহ
তাং বরঃ ॥ সম্যগ্ যজ্ঞ ফলস্ত্বীহন্
হত্বাসৌ ব্রহ্মহা ভবেৎ । শক্যাস্থিহ
সম্বন্ধস্ত যজ্ঞৈঃ ক্রতুশতৈ নৃপাঃ ॥
আত্ম দেহ পরিত্যাগঃ কর্ত্তুং যুদ্ধে
সুদুষ্করঃ । ব্রহ্মহা শুধ্যতে হশুদ্ধো
দেহং ত্যক্ত্বা রণাজিরে ॥ ন শুদ্ধী রণ
ভগ্নানাং ঋতে কৃচিন্মহাপথাৎ । সং-
গ্রামে যুধ্যতো লক্ষ্মীঃ কীর্ত্তিঃ স্যাৎ
স্বর্গতি স্তথা ॥ ভগ্নস্য তেহপি নশ্য
ন্তি মহাসত্যান্মহারণাৎ । তস্মাৎ
সত্যেন যৎ কিঞ্চিৎ ক্রিয়তে তচ্ছ ভং
প্রভ ॥ যজ্ঞং দানং প্রভৃত্যপি সং-
গ্রামে নৃপ সত্তম । ইত্যাদ্যে বহ্নি-
পুরাণে সংগ্রাম প্রশংসা ॥ ॥ অথ
যুদ্ধ নির্ণয়ঃ । যত্রাযুদ্ধে ধ্রুবং নাশো
যুদ্ধে জীবিত সংশয়ঃ । তং কাল মে-
কং যুদ্ধস্য প্রবদন্তি মনীষিণঃ ॥ আ-
ত্মোদয়ে বিগৃহ্নীয়াৎ ক্ষোভো নাত্ম
বলে যদি । ব্যসনেচ প্রহর্ত্তব্যং শত্রৌ
ন তু বিপর্য্যয়ে ॥ স্বয়ং রাজ্ঞা ন যো-
দ্ধব্যং যেপি শস্ত্রাস্ত্রকোবিদঃ । ন তা
যুদ্ধেষ দৃশ্যন্তে শক্তেভ্যঃ শক্তিমত্ত-
রাঃ ॥ রথযুদ্ধং সমেদেশে বিষমে
হস্তিনম্বরঃ । অশ্বযুদ্ধং নরৌদেশে
পত্তিযুদ্ধঞ্চ দুর্গমে ॥ অত্যয়ে সর্ব্ব-
যুদ্ধং স্যান্নৌকাযুদ্ধং জলপ্লুতে ।
সংহত্য যোধয়েদল্পান্ কামং বি-
স্তারয়েদ্বহূন্ ॥ সূচীমথ মনীকং স্যা-
দল্পং হি বহুভিঃ সহ । অপি পঞ্চা-
শতঃ শূরা ন নিঘ্নন্তি পরবাহিনীং ॥
যেপি বা পঞ্চ ষট্ সপ্ত সহিতাঃ কৃত
নিশ্চয়াঃ । ॥ অথ যুদ্ধাসন নির্ণয়ঃ
। অন্য দ্বারা বিপক্ষস্তু বিগৃহ্যাসন
মুচ্যতে । অরিং বিগৃহ্য বা স্থানং
বিগৃহ্যাসন মুচ্যতে ॥ অরেশ্চ বিজি-
গীষোশ্চ বিগ্রহে হীয়মানয়োঃ । স-
ন্ধায় যদবস্থানং সন্ধায়াসন মুচ্যতে

॥ উদাসীনে মধ্যমে বা সমানে প্রতি শঙ্কয়া। এভিভূর ব্যবস্থানং সমুদ্ধাসনমুচ্যতে ॥ সর্বেষাং প্রীতিজনন্ং নিস্তুরঙ্গস্য লক্ষণং। এতৎ প্রীত্যাসনং নাম সর্বাসন মহত্তরং ॥ ॥ অথ দ্বন্দ্ব যুক্তিঃ। রাজ্ঞো বলং নহি বলং দ্বন্দ্ব মেব বলং বলং। অপ্যল্প বলবান্ রাজা স্থিরো দ্বন্দ্ব বলাদ্ভবেৎ ॥ তথাচ। একঃ শতং যোধ তি প্রাকারস্থো ধনুর্ধরঃ। শতং দশসহস্রাণি তস্মাদ্দর্গং বিশিষ্যতে ॥ অকৃত্রিমং কৃত্রিমঞ্চ তৎ পুন দ্বি

ভবেৎ। যদ্দেব মাচতং দ্বন্দ্বং গিরি নদ্যোদি সংশ্রিতং ॥ অকৃত্রিম মিদং জ্ঞেয়ং দুলঙ্ঘ্য মরি ভূভুজাং। প্রাকার প রথারণ্য সংশ্রয়ং যচ্চ বেদিহ ॥ কৃত্রিমং নাম বিজ্ঞেয়ং লঙ্ঘ্যালঙ্ঘ্য ন্তু বৈরিণাং। ॥ অথাকৃত্রিম দ্বন্দ্ব যুক্তিঃ। অত্যুচ্চ বিস্তীর্ণ শিরা দুরারোহঃ সকাননঃ। স জলাশয় সম্ভার ভোজ্যদ্রব্য সনাশ্রয়ঃ ॥ সথনিঃসরণো দ্বন্দ্বঃ পর্বতাখ্যো মহীভুজাং। নদ্যো গভীর বিস্তীর্ণা শ্চতুর্দিক্ষু ব্যবস্থিতাঃ ॥ তন্মধ্যে ভূপ্রদেশো যো নদী দ্বন্দ্বঃ স উচ্যতে। যদন্যচির কালীনং দুলঙ্ঘ্য বিপিনাদিকং ॥ তন্মধ্য রচিতা ভূমি দ্বন্দ্বত্বেনোপতিষ্ঠতে। বনদ্বন্দ্ব মিতিখ্যাতং যথা পূর্বং মহত্তরং ॥ ॥ কৃত্রিম দ্বন্দ্ব যুক্তি যথা। যস্মিন্রাজ্যে গিরি নাস্তি নদ্যো বা গহনোদকাঃ। তস্য মধ্যে মহীপালঃ কৃত্রিমং দ্বন্দ্ব মারভেৎ ॥ গজৈরলঙ্ঘ্যা বিস্তীর্ণা গম্ভীরাঃ পূর্ণ বারয়ঃ। দ্বন্দ্বত্বেন সমাদিষ্টাঃ পরিখা বহু যাদসঃ ॥ শিলাশালং সূক্ষ্ম বহুকণ্টকি সঙ্কটং। দ্বন্দ্বত্বেন সমাদিষ্টং বিস্তীর্ণং বিষমং স্থলং ॥ অধোধো বধ্যমানোপি কন্দ

স্ন জলংস্রবন্। দ্বন্দ্বত্বেন সমুদ্দিষ্টঃ সোদলঙ্ঘ্যো হি ভূভুজাং ॥ সর্বতঃ পরিখাং কৃত্বা নিবদ্ধোপরি কন্দরং। তজ্জলপ্লুত দেশত্বাজ্জল দ্বন্দ্বং তদুচ্যতে ॥ এষামভাবে নিম্নস্য ভূপ্রদেশস্য বন্ধনাৎ। বর্ষা সুপগতে বারি জলদ্বন্দ্বং ততো ভবেৎ ॥ এতযো রপি সংমিশ্রাৎ সংমিশ্রং দ্বন্দ্ব মাচরেৎ। আশ্রিত্য কৃত্রিমং দ্বন্দ্বং বলবদ্বৈরিণো দিশি ॥ অন্যত্র কৃত্রিমং দ্বন্দ্বং কৃত্বা নরপতি বিশেৎ। রথপতি যদা বৈরী স্থলদ্বন্দ্বং তদাচরেৎ ॥ গজাশ্বনাথ শ্চেদ্বৈরী জলদ্বন্দ্বং তদাচরেৎ। গিরিদ্বন্দ্বং নৃপঃ সেবেৎ যস্য স্যাদ্বিবিধো রিপুঃ ॥ সর্বো হি ত্রিবিধো যুদ্ধঃ সমাসাদুপদিশ্যতে।

প্রতিরাজস্য রাজ্যান্তে প্রকটে গুপ্ত এব চ ॥ রাজ্যান্তে সৈনিকান্ রক্ষেৎ প্রকটে নিবসেৎ স্বয়ং। গুপ্তে স্ত্রীকোষ সম্ভারং সংরক্ষেদিতি নিশ্চয়ঃ ॥ ॥ অথ সামান্যতো গুণাঃ। তথা হি নীতিশাস্ত্রং। সপ্রবেশাপসরণং দ্বন্দ্ব মুত্তম মুচ্যতে। অন্যত্র বন্দি শালেব নতাদৃগ্ বদ্ধ মাশ্রয়েৎ ॥ ধনুর্দ্বন্দ্বং মহীদ্বন্দ্বং গিরিদ্বন্দ্বং তথৈবচ। মনুষ্যদ্বন্দ্ব সংসর্গং বনদ্বন্দ্বঞ্চ তানি ষট্ ॥ অন্যে তু। ন দ্বন্দ্বং দ্বন্দ্ব মিত্যাহু র্যোদ্ধৃদ্বন্দ্বং প্রকীর্ত্তিতং। যোদ্ধৃ শূন্যং হি যদ্দুদ্ধং মৃত্যুকায সমং হি তৎ ॥ ॥ অথান্যত্রাপি। যাবৎ প্রমাণং নগরং হি রাজ্ঞাং ততো ভবেদুত্তম মধ্যমান্ত্যং॥ ত্রিংশজ্জল ক্ষ্মাষ্ট গুণোত্তরেণ ত্রিদেশজানাং ধরণীপতীনাং। গর্গস্তু। যদন্য দ্বিবিধং দ্বন্দ্বং প্রোচ্যতে ধরণীভুজাং। তেভ্য এবাতিরিচ্যেত মন্ত্রদ্বন্দ্বং বিশেষতঃ ॥ অন্যেষু দৈবাভিভূমেষ মন্ত্রদ্বন্দ্বাদ্জয়েন্নৃপঃ। মন্ত্রদ্বন্দ্বে হি ভিন্নে হি ন চান্যৎ কার্য্য কারকং ॥ যদৈব বৈরিদুর্লঙ্ঘ্যং বিস্তীর্ণং বিষমঞ্চ তৎ। স প্রবেশাপসরণং তদ্দুদ্ধ মুত্তমং বিদুঃ ॥ ইতি যুক্তিকল্পতরুঃ ॥

যুদ্ধরঙ্গঃ পুং কার্ত্তিকেয়ঃ। ইতি শব্দমালা ॥

যুদ্ধসারঃ পুং ঘোটকঃ। ইতি শব্দচন্দ্রিকা ॥

যুধ য ঔঁড যুদ্ধে। ইতি কবিকল্পদ্রুমঃ ॥ য উ যুধ্যতে। ঔ যোদ্ধা। সংমুখস্থিতযো র্দ্বযোঃ। সাংগ্রামিকরীত্যা পরস্পরাভিভবেচ্ছা যুদ্ধং। যুধ্যতে যোধঃ কদাচিদেকস্য সহভাব বিবক্ষাযাং যুধ্যতে যোধঃ পরেণ। কদাচিদ্ধনেনাপি যুধ্যতে চৌরং রাজা হস্তীত্যর্থঃ। যো ভক্ত পিণ্ডস্য কৃতে ন যুধ্যেদিতি অস্মাভাবে ক্বিপি ভর্মিদ্ধতীতি ক্যে তং করোতীতি কণ্ড্বাদিত্বাৎ ক্যে বা সাধ্যং। ইতি দুর্গাদাসঃ ॥

যুধানঃ পুং ক্ষত্রিযঃ। ইত্যুণাদিকোষঃ ॥

যুধিকঃ ত্রি যোদ্ধা। যুধ শব্দাৎ ক্বিক প্রত্যযেন নিষ্পন্নঃ ॥

যুধিষ্ঠিরঃ পুং পাণ্ডবরাজঃ। স কুন্তী গর্ভে ধর্ম্মাজ্জাতঃ। তৎপর্য্যাযঃ। অজাতশত্রুঃ ২ শল্যারিঃ ৩ ধর্ম্মপুত্রঃ ৪ অজমীঢঃ ৫। ইতি হেমচন্দ্রঃ ॥

যুধ্মঃ পুং সংগ্রামঃ ॥ ধনুঃ। ইতি মেদিনী ॥ বাণঃ। ইত্যুণাদিকোষঃ ॥

যোদ্ধা। ইতি সিদ্ধান্তকৌমুদ্যা-মুণাদিবৃত্তিঃ॥ ৫ খরভঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥

যুধীযঃ ত্রি যোদ্ধা। যুধধাতো রীয-প্রত্যযেন নিষ্পন্নঃ॥

যুপ য ইর বিমোহে। ইতি কবিকল্পদ্রুমঃ॥ বিমোহ আঙ্গলীকরণং। য যুপ্যতি। ইর অযুপৎ অযো-পীৎ। পুষাদিত্বাৎ ঙ ইত্যন্যে। ইতি দুর্গাদাসঃ॥

যুযুঃ পুং অশ্বঃ। ইতি হলাযুধঃ॥

যুযুক্ষুরঃ পুং ক্ষুদ্রব্যাঘ্রঃ। ইতি শব্দচন্দ্রিকা॥

যুযুধানঃ পুং সাত্যকিঃ। যথা। শৈনেযস্তু শিনের্নপ্তা যুযুধানশ্চ সাত্যকিঃ। ইতি ত্রিকাণ্ডশেষঃ॥ ইন্দ্রঃ॥ ক্ষত্রিযঃ। ইতি সংক্ষিপ্তসারোণাদিবৃত্তিঃ॥ যোদ্ধা চ॥

যুবগণ্ডঃ পুং যূনোগণ্ডস্থ ব্রণবিশেষঃ। বযস্ফোড়া ইতি ভাষা। যথা। যুবগণ্ডো যবগণ্ডঃ স্যাৎ বযস্ফোটা-স্বযে দ্বযং। ইতি শব্দরত্নাবলী॥

যুবকঃ পুং যুবা। যুবন্ শব্দাৎ কণ্ প্রত্যযেন নিষ্পন্নঃ॥

যুবযানিঃ পুং যুবতীপতিঃ। যথা। যুবযানি ধনূংষি ভূমিষ্ঠঃ খবিচারিণঃ। রানো যজ্ঞদ্রুহো হন্তি কাল-কল্পশিলীমুখঃ॥ ইতি ভট্টিঃ॥

যুবতিঃ) স্ত্রী প্রাপ্তযৌবনা। তৎপর্য্যা-
যুবতী ) যঃ। যুনী ৩ তরুণী ৪ তলুনী ৫ দিক্করী ৬ ধনিকা ৭ ধনীকা ৮ মধ্যমা ৯ দৃষ্টরজাঃ ১০ মধ্যমিকা ১১। ইতি শব্দরত্নাবলী॥ ঈশ্বরী ১২ বর্য্যা ১৩। ইতি হেমচ বস্তা ১৪। ইতি রাজনির্ঘণ্টঃ॥ তস্যা লক্ষণাদি যথা। আষোড়শা ভবেদ্বালা তরুণী ত্রিংশতা মতা। পঞ্চপঞ্চাশতঃ প্রৌঢা বৃদ্ধা ভবতি তৎপরং। ইতি কালীদাসঃ॥ বালা তু প্রাণদা প্রোক্তা যুবতী প্রাণহারিণী। প্রৌঢা করোতি বৃদ্ধত্বং বৃদ্ধা মরণমাদিশেৎ॥ নিদাঘ শরদো র্বালা প্রৌঢা বর্ষা বসন্তযোঃ। হেমন্তে শিশিরে যোগ্যা ন বৃদ্ধা ক্বাপি শস্যতে॥ যোগ্যা যুবতী। ইতি রাজবল্লভঃ॥ স্ত্রীসামান্যং। যথা। প্রমদাচেতি বিজ্ঞেযা যুবতিশ্চ তথা স্মতেতি ভাগুরিঃ। প্রাপ্তযৌবনা যুবতি রিতি বাৎস্যাযনঃ। ইত্যমরটীকাযাং ভরতঃ॥ *॥ হরিদ্রা। ইতি শব্দচন্দ্রিকা॥

যুবতীষ্টা স্ত্রী স্বর্ণযূথিকা। ইতি রাজ-

নির্ঘণ্টঃ ॥

যুবনাশ্বঃ পুং সূর্য্যবংশীয়রাজবিশেষঃ। স চ গৌরীগর্ভে প্রসেনজিতো জাতঃ মান্ধাতৃপিতা চ। যথা। তস্যাঃ প্রসেন জিজ্জজ্ঞে লেভে ভার্য্যাং পতিব্রতা। গৌরী নামাভিশপ্তা সা নদী ভূতা তরঙ্গিণী॥ তস্যাং প্রসেনজিজ্জজ্ঞে যুবনাশ্বং মহীপতিং। যাবৎ সূর্য্য উদেতিস্ম যাবচ্চ প্রতিতিষ্ঠতি॥ সর্ব্বং তদ্যৌবনাশ্বস্য মান্ধাতঃ ক্ষেত্র মুচ্যতে। ইতি বহ্নিপুরাণে সগরোপাখ্যানাধ্যায়ঃ॥

যুবনাশ্বজঃ পুং মান্ধাতৃরাজঃ। ইতি হেমচন্দ্রঃ॥

যুবরাজঃ পুং ভাবিবুদ্ধবিশেষঃ। তৎপর্য্যায়ঃ। মৈত্রেয়ঃ ২ অজিতঃ ৩। ইতি ত্রিকাণ্ডশেষঃ॥ রাজপুত্রঃ। তৎপর্য্যায়ঃ। কুমারঃ ২ ভর্তৃদারকঃ ৩। ইত্যমরঃ॥ যুবা বালো রাজ্ঞো যূনাং বা রাজা যুবরাজঃ। সখ্যুরো রাজ্ঞ ইতি ষঃ। কুমারয়তি কুমারঃ। স্যাৎ কুমার কুমালৎক কেলৌ অন্। ভর্তৃ দারকঃ পুত্রঃ ভর্ত্তা চাসৌ দারকশ্চেতি বা ভর্তৃদারকঃ। দারকো ভেদকে শিশাবিতি নিগমঃ। ইতি ভরতঃ॥

যুবা ত্রি তরুণঃ। শ্রেষ্ঠঃ॥ নিসর্গবলশালী। ইতি মেদিনী॥

যুবা পুং যৌবনাবস্থা বিশিষ্টঃ। ষোড়শবর্ষাৎ ত্রিংশদ্বর্ষপর্য্যন্তবয়স্কঃ। ইতি কেচিৎ॥ ষোড়শবর্ষাৎ সপ্ততিবর্ষ পর্য্যন্ত বয়স্কঃ। যথা। আষোড়শাদ্ভবেদ্বাল স্তরুণ স্তত উচ্যতে। বৃদ্ধঃ স্যাৎ সপ্ততে রুদ্ধং বর্ষীয়ান্ নবতেঃ পর মিতি ভরত ধৃত স্মৃতিঃ॥ তৎপর্য্যায়ঃ। বয়স্থঃ ২ তরুণঃ ৩। ইত্যমরঃ॥ বয়ঃস্থঃ ৪ তরুনঃ ৫। ইতি শব্দরত্নাবলী॥ গর্ভরূপঃ ৬ বেটকঃ ৭। ইতি জটাধরঃ॥

যুষ ভজনে। ইতি কবিকল্পদ্রুমঃ॥ সৌত্রধাতুরয়ং। যোষিৎ যুষ্মদ্। ইতি দুর্গাদাসঃ॥

যুষ্মদ্ সর্ব্বনামযুষ্মচ্ছব্দঃ। তস্য ত্রিষু লিঙ্গেষু সমানি রূপাণি। যথা। ত্বং ১৹ যুবাং ১ঃ যূয়ং ১ঃ৹। ত্বাং ২৹ যুবাং ২ঃ যুষ্মান্ ২ঃ৹। ত্বয়া ৩৹ যুবাভ্যাং ৩ঃ যুষ্মাভিঃ ৩ঃ৹। তুভ্যং ৪৹ যুবাভ্যাং ৪ঃ যুষ্মভ্যং ৪ঃ৹। ত্বৎ ৫৹ যুবাভ্যাং ৫ঃ যুষ্মৎ ৫ঃ৹। তব ৬৹ যুবযোঃ ৬ঃ যুষ্মাকং ৬ঃ৹। ত্বয়ি ৭৹ যুবযোঃ ৭ঃ যুষ্মাসু ৭ঃ৹। ইতি ব্যাকরণং॥

যূঃ স্ত্রী যূষঃ। ইতি হেমচন্দ্রঃ॥

যূকঃ পুং মৎকুণঃ। ইতি জটাধরঃ॥

যূকা স্ত্রী মৎকুণঃ। যূকা ইতি উকুণ ইতি চ ভাষা। তৎপর্য্যায়ঃ। কেশকীটঃ ২ স্বেদজঃ ৩ ষট্পদঃ ৪। ইতি রাজনির্ঘণ্টঃ॥ পালী ৫ বালকৃমিঃ ৬। ইতি জটাধরঃ॥

যূতিঃ স্ত্রী মিশ্রণং। ইতি মুগ্ধবোধব্যাকরণং॥

যূথং ক্লী সজাতীয়সমূহঃ। ইত্যমরঃ॥

যূথনাথঃ পুং বন্যকরিণাং সমূহস্য ঈশ্বরঃ। তৎপর্য্যায়ঃ। যূথপঃ ২। ইত্যমরঃ॥

যূথপঃ পুং অরণ্যহস্তিনাং প্রধানং। ইতি শব্দরত্নাবলী॥

যূথভ্রষ্টঃ পুং যূথাৎপলায়িতহস্তী। ইতি শব্দমালা॥

যূথিকা স্ত্রী পাঠা। ইতি রাজনির্ঘণ্টঃ॥ অম্লানকঃ। ইতি মেদিনী॥ পুষ্পবিশেষঃ। যুইফুল ইতি ভাষা। তৎপর্য্যায়ঃ। গণিকা ২ অম্বষ্ঠা ৩ মাগধী ৪। সা পীতা চেৎ হেমপুষ্পিকা। ইত্যমরঃ॥ যূথী ৫ পুষ্পসন্ধী ৬। ইতি ত্রিকাণ্ডশেষঃ॥ শিখণ্ডিনী ৭ বাসন্তী ৮। ইতি রত্নমালা॥ বালপুষ্পিকা ৯ বহুগন্ধা ১০ ভৃঙ্গানন্দা ১১। অস্যা গুণাঃ। স্বাদুত্বং। শিশিরত্বং। শর্করার্ত্তি পিত্ত দাহ তৃষা নানাত্বগ্দোষ নাশিত্বঞ্চ। ইতি রাজনির্ঘণ্টঃ॥ অপিচ। যূথী যুগং হিমং তিক্তং কটুপাকং সরং লঘু। মধুরং তুবরং হৃদ্যং পিত্তঘ্নং কফ বাতলং॥ ব্রণাস্র মুখ দন্তাক্ষি শিরোরোগ বিষাপহং। ইতি ভাবপ্রকাশঃ॥

যূথী স্ত্রী যূথিকা। ইতি শব্দরত্নাবলী॥

যূথীনঃ পুং যূথপঃ। ইতি শব্দচন্দ্রিকা॥

স্ত্রী যোগং। মিশ্রণং। ইতি সিদ্ধান্তকৌমুদী॥

যূনী স্ত্রী যুবতী। ইতি শব্দরত্নাবলী॥

যূপঃ পুং ক্লী যজ্ঞেপশুবন্ধনকাষ্ঠং। ইত্যমরঃ॥ তস্য পরিমাণাদির্যথা। স্মৃতৌ। চতুর্হস্তো ভবেদ্যূপো যজ্ঞবৃক্ষ সমুদ্ভবঃ। বর্ত্তুলঃ শোভনঃ স্থূলঃ কর্ত্তব্যো বৃষ মৌলিকঃ॥ ভবিষ্যে। বিল্বস্য বঞ্জলস্যৈব কলৌ যূপঃ প্রশস্যতে। ইতি সামবেদিবৃষোৎসর্গতত্ত্বং॥

যূপঃ পুং জয়স্তম্ভঃ॥ যাগস্তম্ভঃ। ইত্যুণাদিকোষঃ॥

যূপকটকঃ পুং যজ্ঞসমাপ্তিসূচকং পশুবন্ধাদ্যর্থং যজ্ঞভূমৌ যৎকাষ্ঠমারোপ্যতে স যূপঃ তস্য শিরসি

বলয়াকৃতি উদূখলাকৃতি বা যঃ কাষ্ঠবিকারঃ সঃ। যূপমূলে নিহিত লোহবলয় ইতি কেচিৎ। ইতি ভরতঃ॥ তৎপর্য্যায়ঃ। চষালঃ২। ইত্যমরঃ॥

যূপকর্ণঃ পুং যূপৈকদেশঃ। তৎপর্য্যায়ঃ। ঘৃতাবনিঃ২। ইতি হেমচন্দ্রঃ॥

যূপদ্রুঃ পুং খদিরবৃক্ষঃ। ইতি ত্রিকাণ্ডশেষঃ॥

যূপদ্রুমঃ পুং খদিরবৃক্ষঃ। ইতি শব্দরত্নাবলী॥ রক্তখদিরঃ। ইতি রাজনির্ঘণ্টঃ॥

যূপলক্ষ্যঃ পুং পক্ষী। ইতি শব্দমালা॥

যূপাগ্রং ক্লী যূপস্যাগ্রভাগঃ। তৎপর্য্যায়ঃ। তর্ম্ম ২। ইত্যমরঃ॥

যূষ বধে। ইতি কবিকল্পদ্রুমঃ॥ ষষ্ঠস্বরী। যূষতি। ইতি দুর্গাদাসঃ॥

যূষং পুংক্লী মুদ্গাদিক্বাথরসঃ। ইত্যমরঃ॥ যূষো হস্তস্যাদিঃ। চবর্গাদিশ্চেতি মুকুটঃ। ইতি ভরতঃ॥ *॥ অথ মুদ্গযূষগুণাঃ। মুদ্গযূষো হগ্নিদো হৃদ্যঃ শুদ্ধানাং ব্রণিনামপি। পথ্যো বলাশ পিত্তঘ্নো জ্বরহা চ কৃতাকৃতঃ॥ অস্নেহ লবণং সর্ব্ব মকৃতং কটুকৈ র্বিনা। বিজ্ঞেয়ং লবণ স্নেহ কটুকৈঃ সংস্কৃতং কৃতং॥ স তু দাড়িম্ব মৃদ্বীকা যুক্তঃ স্যাদ্রাগষাড়বঃ। রোচকশ্চ লঘু পাকশ্চ দোষাণাং মবিরোধকৃৎ॥ *॥ মসূরযূষ গুণাঃ। মসূরযূষঃ সংগ্রাহী বৃংহী স্বাদুঃ প্রমেহজিৎ। পিত্ত শ্লেষ্ম জ্বরহর স্তথাতীসার নাশনঃ॥ *॥ কুলত্থ যূষগুণাঃ। কুলত্থযূষো হনিলহা শর্করাশ্মরি নাশনঃ। তূণী প্রতূণী কাসার্শো গুল্ম মেদঃ কফাপহঃ॥ *॥ অম্লেন সহ মাষযূষ গুণাঃ। অম্ল মাষো গুরু র্ভেদী বাতঘ্নো দীপনো মতঃ॥ *॥ অথ খডযূষঃ। তক্রং কপিত্থং চাঙ্গেরী মরিচাজাজি চিত্রকৈঃ। সুপক্বং খডযূষো হয় মযং কাম্বলিকো হপরঃ॥ *॥ খডকাম্বলিকযূষ গুণাঃ। দধ্যম্লো লবণ স্নেহ তিল মাষ বিপাচিতঃ। খডকাম্বলিকৌ যূষৌ গ্রাহি বাত কফাপহৌ॥ ইতি রাজবল্লভঃ॥ *॥ অপিচ। অথ যূষস্য বিধি গুণাশ্চ। অষ্টাদশ গুণে নীরে সমীধান্যশৃতো রসঃ। বিরলাম্নে ঘনঃ কিঞ্চিৎ পেয়াতো যূষ উচ্যতে॥ উক্তঃ স এব নির্যূহো রুচিকৃচ্চ বিশেষতঃ॥ *॥ যূষস্য প্রকারান্তর মাহ। কল্কদ্রব্য পলং শুণ্ঠী পিপ্পলী ক্বার্দ্ধ কার্ষিকীং। বারি প্রস্থেন বিপচেত্তদ্ভবো

যূষ উচ্যতে ॥ অযমর্থঃ। যূষাম্বং পলমিতং তৎ কল্কীকৃতং শুণ্ঠী পিপ্পলী চ সমুদিতার্দ্ধকর্ষমিতা কর্ষ্কীকৃত্য উভয মপি প্রস্থমিতেন ঋদ্ধিণা পচেৎ। তদ্ভবো যূষঃ। যূষো বল্যো লঘুঃ পাকে রুচ্যঃ কণ্ঠ্যঃ কফাপহঃ ॥ ✱ ॥ অথ মুদ্গযূষ বিধিঃ। বৃন্দটীকাযাং তন্ত্রান্তরে। মুদ্গানাং দ্বিপলং তোযে শৃত মর্দ্ধাঢ়কোন্মিতে। পাদস্থং মর্দ্দিতং পূতং দাড়িমস্য পলেন তৎ ॥ যুক্তং সৈন্ধব বিশ্বাজ্য ধান্যকৈঃ পাদকাংশিকৈঃ। কণাজীরকযো শ্চূর্ণাচ্ছাণৈকেনাব চূর্ণিতঃ। সংস্কৃতো মুদ্গযূষো হ্যযং পিত্ত শ্লেষ্মহরো মতঃ ॥ ✱ ॥ অথ মুদ্গযূষ গুণাঃ। মুদ্গানা মুত্তমো যূষো দীপনঃ শীতলো লঘুঃ। ব্রণোর্দ্ধ যত্র কণ্ঠাহ কফ পিত্ত জ্বরাস্র হৃৎ ॥ ✱ ॥ অথ মুদ্গামলক যূষ গুণাঃ। মুদ্গামলক যূষস্তু ভেদী পিত্তানিলাপহঃ। তৃড দাহ শমনঃ শীতো মূর্চ্ছা শ্রম মদাপহঃ ॥ ✱ ॥ মসূর যূষ গুণাঃ পূর্ব্ববৎ। ইতি ভাবপ্রকাশঃ ॥

যূষঃ পুং ব্রহ্মদারুবৃক্ষঃ। ইতি শব্দ রত্নাবলী ॥

যেষ ঋ উ যত্নে। ইতি কবিকল্পদ্রুমঃ ॥ অন্তস্থাদিঃ। ঋ অযিযেষৎ। উ যেষতে যিযেষে। ইতি দুর্গাদাসঃ ॥

যোক্ত্রং ক্লী যুগেনসহবৃষাদগুস্ত্রাবধ্যতে অনেন তৎ। যোৎদড়ি ইতি ভাষা। তৎপর্য্যাযঃ। আবন্ধঃ ২ যোত্রং ৩। ইত্যমরঃ ॥

যোক্তা ত্রি যোগকর্ত্তা। ইতি যুজ্ধাতোঃ কর্ত্তরি তৃন্ প্রত্যযেন নিষ্পন্নং ॥

যোগঃ পুং সন্নহনঃ ॥ উপাযঃ ॥ ধ্যানং ॥ সঙ্গতিঃ। যুক্তিঃ। ইত্যমরঃ ॥ অপূর্ব্বার্থসম্প্রাপ্তিঃ ॥ বপুঃস্থৈর্য্যং ॥ প্রযোগঃ ॥ বিষ্কম্ভাদিঃ ॥ ভেষজং ॥ বিস্রব্ধঘাতকঃ ॥ দ্রব্যং ॥ কার্ম্মণং। ইতি মেদিনী ॥ নৈযাযিকঃ ॥ ধনং। ইতি হেমচন্দ্রঃ ॥ চারঃ ॥ সূত্রং। ইতি ত্রিকাণ্ডশেষঃ ॥ ✱ ॥ অথ সপ্তবিংশতি যোগানাং নামানি যথা। বিষ্কম্ভ প্রীতি রাযুষ্মান্ সৌভাগ্যঃ শোভন স্তথা। অতিগণ্ডঃ সুকর্ম্মা চ ধৃতিঃ শূল স্তথৈব চ ॥ গণ্ডো বৃদ্ধি র্ধ্রুবশ্চৈব ব্যাঘাতো হর্ষণ স্তথা। বজ্রু শ্চাসৃক্ ব্যতীপাতো বরীযান্ পরিঘঃ শিবঃ ॥ সিদ্ধঃ সাধ্যঃ শুভঃ শুক্রো ব্রহ্মেন্দ্রো বৈধৃতি স্তথা। ✱। তেষাং বর্জ্জনীয ভাগা যথা। পরিঘস্য ত্যজে-

দর্দ্ধং শুভকর্ম্ম ততঃ পরং ॥ ত্যজাদৌ পঞ্চ বিষ্কম্ভে সপ্তশূলে চ নাড়িকাঃ। গণ্ডব্যাঘাতযোঃ ষট্ চ নব হর্ষণ বজ্রযোঃ ॥ বৈধৃতি ব্যতিপাতৌ চ সমস্তৌ পরিবর্জয়েৎ। শেষা যথার্থ নামানো যোগাঃ কার্য্যেষু শোভনাঃ ॥ * ॥ আনন্দযোগো যথা। ভীমপরাক্রমে। অশ্বিনী সহ সূর্য্যেণ সোমে মৃগশির স্তথা। অশ্লেষা ভৌমবারেণ বুধে হস্তঃ প্রকীর্ত্তিতঃ ॥ অনুরাধা গুরো র্বারে বিশ্বদেবস্তু ভার্গবে। বারুণং শনি সংযুক্ত মানন্দো হয়ং প্রকীর্ত্তিতঃ ॥ * ॥ যোগবরা যথা। দীপিকায়াং। ভূমিপুত্রাকযো রহ্নি নন্দা মরুদ্বারুণাদ্রাস্ত্য চিত্রাহি মূনাগ্নিভিঃ। ভার্গবৈণাঙ্কযো রহ্নি ভদ্রা ভবেৎ ফল্গু যুগ্মোড়ু সংযুতা ॥ সোমপুত্রস্য বারে জয়াস্যামৃগোপেন্দ্র গুর্বিন্দ বাম্যাভিজিদ্বাজিভিঃ। গীষ্পতে রহ্নি রিক্তা চ যুক্তা যদা বিশ্ব শক্রাগ্নিযুক্ পিত্রাদিভ্যম্বুভিঃ ॥ সূর্য্য সুতস্য দিনে যদি পূর্ণা ব্রহ্ম দিনাধিপতি দ্বিদৈবৈঃ স্যাৎ যোগবরা স্ত্রিভি রেব সমেতাঃ সর্ব্ব সমীহিত সিদ্ধি নিযুক্তাঃ। অয়মেব ত্ব্যমৃত যোগঃ ॥ * ॥ অথামৃতযোগঃ। শ্রুর গুরু কর মূলা পৌষ্ণভান্যর্কবারে হস্তিযুগ বিধি যুগ্মে ফল্গুনী ভাদ্রযুগ্মে। দিবসকর তুরঙ্গৌ সর্ব্বরীনাথবারে গুরু যুগনলা বার্তোপান্ত্য পৌষ্ণানি ক্রৌঞ্জে ॥ দহন বিধি শতধিষ্ণ্য মৈত্রভং সৌম্যবারে মরুদদিতিভ পুষ্যা মৈত্রভং জীববারে। ভগযুগজ্যাগম্যো বিষ্ণু মৈত্রে সিতাহে শ্রবণ কমলযোনী সৌরি বারে হমৃতানি ॥ যদি বিষ্টি ব্যতীপাতৌ দিনং বাপ্যশুভং ভবেৎ। হন্যতে হমৃতযোগেন ভাস্করেণ তমো যথা ॥ সর্ব্বদেশাবিশেষেণ ফলং স্যাচ্ছুভযোগজং। অমৃতং সিদ্ধিযোগশ্চ যদ্যেকস্মিন্ দিনে ভবেৎ। তদ্দিনন্তু ভবেদ্দুষ্টং নম্রসর্পি র্যথা বিষং ॥ * ॥ অথ সিদ্ধি দগ্ধ পাপ যমঘণ্ট যোগাঃ। যথা। নন্দাদ্যাঃ সিদ্ধিযোগা ভৃগুজ বুধ জগ্না কীজ্য বারৈঃ প্রশস্তাঃ। সূর্য্যে শাশাগ্নি ষড় দৃশ্যানি মিত তিথযোর্কাদি বারৈঃ প্রদগ্ধাঃ ॥ রাজমার্ত্তণ্ডে। মাসা রুদ্রাদিশো রামা বট্পক্ষ মুনয় স্তথা। দহ্যন্তে তিথয়ঃ সপ্ত রব্যাদি সপ্তভির্গ্রহৈঃ ॥ অপিচ। দ্বাদশ্যর্ক যুতা ভবেদশুভদা সোমেন চৈকাদশী ভৌমে চাপি যুতা তথৈব দশমী নেষ্টা তৃতীয়া বুধে। ষষ্ঠী নেষ্ট ফল-

শুদ্ধা সুরগুরৌ শুক্রে দ্বিতীয়া তথা সর্ব্বারম্ভ বিনাশ বিঘ্ন জননী সূর্য্যাত্মজে সপ্তমী ॥ পাপোর্কাহে বিশাখাত্রয় যম মূড়প স্যাহ্নি চিত্রা চতুষ্ক ভৌর্ফ বিশ্বাভিজিদ্ভ ত্বষ্ট্র দিবসে স্বত্রয় বিশ্ব রুদ্রৌ । জ্ঞাহে মৃগা বিশাখা যম ধন তুরগান্ত্যানি জৈবে হ্নি পিত্র রোহিণ্যাদ্রা যমেন্দ্র শতভ মথ ভগো রহ্নি পুষ্যা ত্রযেন্দ্রৌ ॥ সৌরাহে হস্ত যুগ্মার্য্যম যম জলবুক্ পৌষ্ণ পুষ্যা ধনানি ঘণ্টৌ ইত্থগুর্ক্ষ যুক্তে স্বগৃহপতি দিনে সৌম্যবারে হর্য্যমাপি ॥ ❀ ॥ অথোৎপাতাদি যোগাঃ । রব্যাদি দিবসে যুক্তা বিশখাদি চতুশ্চতুঃ । উৎপাটা মৃত্যবঃ কাণা অমৃতানি যথা ক্রমং ॥ ❀ ॥ অথ করকচাযোগঃ । বাজি চিত্রোত্তরাষাঢা মূল পাশীজ্য ভান্তকাঃ । সূর্য্যাদি বার সংযুক্তা যোগাঃ করকচাঃ স্মৃতাঃ । ❀ ॥ অথ মৃত্যু যোগঃ । আদিত্য ভৌমযো র্নন্দা ভদ্র শুক্র শশাঙ্কযোঃ । বুধে জয়া গুরৌ রিক্তা শনৌ পূর্ণা চ মৃত্যুদা ॥ ❀ ॥ অথ যমঘণ্টাদীনাং বর্জ্যকাল নির্ণয়ঃ । যমঘণ্টে ত্যজেদষ্টৌ মৃত্যৌ দ্বাদশ নাড়িকাঃ । অন্যেষাং পাপযোগানাং মধ্যাহ্নাৎ পরতঃ শুভং ॥ ❀ ॥ অথ শুভ চন্দ্রেণ করকচাদি শান্তিঃ । অযোগেষ চ সর্ব্বেষু পূর্ব্বযামং পরিত্যজেৎ । অযোগাশ্চ বিনশ্যন্তি চন্দ্র শুদ্ধিহতা ইমে ॥ করকচা মৃত্যুযোগাশ্চ দিনং দগ্ধং তথা পরে । শুভে চন্দ্রে প্রণশ্যন্তি বৃক্ষা বজ্রহতা ইব ॥ ❀ ॥ বিরুদ্ধ যোগানাং দেশবিশেষে প্রবৃত্তিপ্রসবো যথা । শ্রীপতিঃ । বিরুদ্ধ সংজ্ঞা স্তিথি বার যোগা নক্ষত্র বার প্রভবাশ্চ যে বৈ । হূনাঙ্গ বঙ্গেষু খশেষ বর্জ্যাঃ শেষেষু দেশেষু ন তে বিরুদ্ধাঃ ॥ ইতি জ্যোতিস্তত্ত্বং ॥ ❀ ॥

অথ ক্রিয়াযোগঃ ।

মনয উচুঃ । দুঃখাব্ধ মগ্নাঃ পুরুষাঃ প্রাপ্য ব্রহ্ম মহালয়ং । উত্তরেয় ভবাম্ভোধিং তথা ত্বমনুচিন্তয ॥ ইত্যুক্তঃ স তদা প্রাহ ক্রিয়াযোগং মহাত্মনাং । নরাণা মুপকারায় দুঃখ বিচ্ছিত্তিকারকং ॥ বহ্নিরুবাচ । আরাধযধ্ব বিশ্বেশঃ জগতাং কারণং পরং । কেশব স্তন্নিরাপেক্ষা এব মুক্তং প্রযাস্যথ ॥ ইষ্ট্যা পূজা নমস্কারৈঃ শুশ্রূষাভি রহর্নিশং । ব্রতোপবাসৈ র্বিবিধৈ র্ব্রাহ্মণানাঞ্চ তর্পণৈঃ ॥ তৈ স্তৈ শ্চাত্মহিতৈঃ কামৈ র্যে স্বচেতসি তুষ্টিদাঃ । ভবেযু রপরিচ্ছেদাদারা-

ধ্যেত কেশবং ॥ তন্নিষ্ঠা স্তদ্গতধিয
স্তৎ কর্ম্মাণি স্তদাশ্রয়াঃ । তদ্দৃষ্টয়
স্তন্মনসঃ সর্ব্বস্মিন্ স ইতি স্থিতঃ ॥
সমস্তান্যথ কর্ম্মাণি তত্র সর্ব্বাত্মনা
ত্মনি । সংন্যস্যত্ত্বং স বঃ কর্ত্তা সমস্তা-
বরণ ক্ষযঃ ॥ পরঃ পরাণাং পরমঃ
স একো নরোত্তমো যস্য পদম ভিন্নং
।-চরাচরং বিশ্বমিদং সমন্তাদচিন্ত্য
রূপম্নুপরিগ্রহং যৎ ॥ তমারাধ্য
জগন্নাথং ক্রিয়াযোগেন বাডবাঃ ।
আপ্নৌ মোক্ষং পরং জন্ম স্তস্মাত্তন্মো-
ক্ষ কারণং ॥ সংসারার্ণব মগ্নানাং
বিষযাক্রান্ত চেতসাং । বিষ্ণুপোতং
বিনা নান্যৎ কিঞ্চিদস্তি পরাযণং ॥
উত্তিষ্ঠং শ্চিন্তয হরিং ব্রজং শ্চিন্তয
কেশবং । ভুঞ্জং শ্চিন্তয গোবিন্দং
স্বপং শ্চিন্তয মাধবং ॥ যূয মেকাগ্র-
চিত্তা হি সংশ্রিতা মধুসূদনং । জন্ম
মৃত্যু জরাগ্রাহং সংসারং সন্তরিষ্য
থ ॥ ক্রিযা যোগ পরাণীহ মুক্তিকা-
র্য্যাণ্যনেকশঃ । সমারাধ্য জগন্নাথং
রাজানো মোক্ষ মাপ্নুযুঃ ॥ ইতি
বহ্নিপুরাণং ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

অথ যোগসাধনং ।

কেশিধ্বজ উবাচ । যোগ স্বরূপং খা-
ণ্ডিক্য শ্রূযতাং গদতো মম । যত্র স্থি-
তো ন চ্যবতে প্রাপ্য ব্রহ্মলযং মুনিঃ ॥
মন এব মনুষ্যাণাং কারণং বন্ধ মো-
ক্ষযোঃ । বন্ধস্য বিষযাসঙ্গি মুক্তে
র্নির্ব্বিষযং তথা ॥ বিষযেভ্যঃ সমা-
হৃত্য বিজ্ঞানাত্মা মনো মুনে । চিন্ত-
যেন্মুক্তযে তেন ব্রহ্ম ভূতং পরেশ্বরং ॥
আত্মভাবং নযত্যেবং তদ্ব্রহ্মধ্যাযিনং
মুনে । বিকার্য্যমাত্মনঃ শক্ত্যা লোহ
মাকর্ষকো যথা ॥ আত্ম প্রযত্ন সা-
পেক্ষা বিশিষ্টা যা মনোগতিঃ । ত-
স্যা ব্রহ্মণি সংযোগো যোগ ইত্য-
ভিধীযতে ॥ এব মত্যন্ত বৈশিষ্ট্য
যুক্তধর্ম্মোপলক্ষণঃ । যস্য যোগঃ স
বৈ যোগী মুমুক্ষুরভিধীযতে ॥ যোগ
যুক্ প্রথমং যোগী যুঞ্জানঃ সো হ-
ভিধীযতে । বিনিষ্পন্ন সমাধিস্তু পর
ব্রহ্মোপলব্ধিমান্ ॥ যদ্যন্তরায দো-
ষেণ দূষ্যতে চাস্য মানসং । জন্মান্ত-
রৈ রভ্যসতো মুক্তিঃ পূর্ব্বস্য জাযতে
॥ বিনিষ্পন্ন সমাধিস্তু মুক্তিং তত্রৈব
জন্মনি । প্রাপ্নোতি যোগী যোগাগ্নি
দগ্ধকর্ম্মা চযো হচিরাৎ ॥ ব্রহ্মচর্য্য
মহিংসাঞ্চ সত্যাস্তেযাপরিগ্রহান্ ।
সেবেত যোগী নিষ্কামো যোগ্যতাং
স্বং মনো নযন্ ॥ স্বাধ্যায শৌচ স-
ন্তোষ তপাংসি নিযতাত্মবান্ । কু-
র্ব্বীত ব্রহ্মণি তথা পরস্মিন্ প্রবণং
মনঃ ॥ এতে যমাঃ সনিযমাঃ পঞ্চ

পঞ্চ প্রকীর্ত্তিতাঃ। বিশিষ্ট ফলদাঃ কাম্যা নিষ্কামাণাং বিমুক্তিদাঃ ॥ এক° ভদ্রাসনাদীনাং সমাস্থায় গুণৈ র্যুতঃ। যমাখ্যৈ র্নিয়মাখ্যৈশ্চ যুঞ্জীত নিয়তো যতিঃ ॥ প্রাণাখ্য মনিলং বশ্য মভ্যাসাৎ কুরুতে তু যৎ। প্রাণায়ামঃ স বিজ্ঞেয়ঃ সবীজো হবীজ এব চ ॥ পরস্পরেণাভিভবং প্রাণাপানৌ যদানিলৌ। কুরুতঃ সদ্বিধানেন তৃতীয়ঃ সংযমাত্তয়োঃ ॥ তস্য চালম্বনবতঃ স্থূলরূপং দ্বিজোত্তম। আলম্বন মনন্তস্য যোগিনো হভ্যসতঃ স্মৃতং ॥ শব্দাদিস্বনুরক্তানি নিগৃহ্যাক্ষাণি যোগবিৎ ॥ কুর্য্যাচ্চিত্তানুকারীণি প্রত্যাহার পরায়ণঃ ॥ বশ্যতা পরমা তেন জায়তে হতিচলাত্মনাং। ইন্দ্রিয়াণা মবশ্যৈ স্তৈ র্ন যোগী যোগসাধকঃ ॥ প্রাণায়ামেন পবনৈঃ প্রত্যাহারেণ চেন্দ্রিয়ৈঃ। বশীকৃতৈ স্ততঃ কুর্য্যাৎ স্থিতং চেতঃ শুভাশ্রয়ে ॥ শ্রীখাণ্ডিক্য উবাচ। কথ্যতাং মে মহাভাগ চেতসো যঃ শুভাশ্রয়ঃ। যদাধার মশেষং তদ্ধন্তি দোষ ফলোদ্ভবং ॥ শ্রীকেশিধ্বজ উবাচ। আশ্রয় শ্চেতসো ব্রহ্ম তচ্চ স্বভাবতঃ। ভূপ মূর্ত্ত মমূর্ত্তঞ্চ পরঞ্চাপর মেব চ ॥ ত্রিবিধা ভাবনা

বিপ্র বিশ্বমেতন্নিবোধ মে। ব্রহ্মাখ্যা কর্ম্ম সংজ্ঞা চ তথা চৈবোভযাত্মিকা ॥ ব্রহ্মভাবাত্মিকা হ্যেকা কর্ম্মভাবাত্মিকা পরা। উভযাত্মিকা তথৈবান্যা ত্রিবিধা ভাব ভাবনা ॥ সনন্দনাদযো ব্রহ্মভাব ভাবনযা যুতাঃ। কর্ম্মভাবনযা চান্যে দেবাদ্যাঃ স্থাবরা শ্চরাঃ ॥ হিরণ্যগর্ভাদিষু চ ব্রহ্ম কর্ম্মাত্মিকা দ্বিধা। বোধাধিকার যুক্তেষু বিদ্যতে ভাব ভাবনা ॥ অক্ষীণেষু সমস্তেষু বিশেষ জ্ঞান কর্ম্মসু। বিশ্ব মেতৎ পরং চান্যদ্ভেদ ভিন্ন দৃশাং নৃপ ॥ প্রত্যস্ত মিত ভেদং যৎ সত্তা মাত্র-মগোচরং। বচসা মাত্ম সংবেদ্যং তজ্জ্ঞানং ব্রহ্ম সংজ্ঞিতং ॥ তচ্চ বিষ্ণোঃ পরং রূপ মরূপস্যাজ মক্ষরং। বিশ্ব স্বরূপ বৈরূপ্য লক্ষণং পরমাত্মনঃ ॥ ন তদ্যোগ যুজা শক্যং নৃপ চিন্তয়িতুং যতঃ ॥ ততঃ স্থূলং হরে রূপং চিন্ত্যং যদ্বিশ্বগোচরং। হিরণ্যগর্ভো ভগবান্বাসবো হথ প্রজাপতিঃ ॥ মরুতো বসবো রুদ্রা ভাস্করা স্তারকা গ্রহাঃ। গন্ধর্ব্ব যক্ষ দৈত্যাদ্যাঃ সকলা দেবযোনযঃ ॥ মনুষ্যাঃ পশবঃ শৈলাঃ সমুদ্রাঃ সরিতো দ্রুমাঃ। ভূপ ভূতান্যশেষাণি ভূতানাং যে

চ হেতবঃ ॥ প্রধানাদি বিশেষান্তং চেতনা চেতনাত্মকং ॥ একপাদং দ্বিপাদঞ্চ বহুপাদ মপাদকং । মূর্ত্ত মেতদ্ধরে রূপং ভাবনা ত্রিতয়াত্মকং ॥ এতৎ সর্ব্ব মিদং বিশ্বং জগদেতচ্চরাচরং । পরংব্রহ্ম স্বরূপস্য বিষ্ণোঃ শক্তি সমন্বিতং ॥ বিষ্ণুশক্তিঃ পরা প্রোক্তা ক্ষেত্রজ্ঞাখ্যা তথা ২পরা । অবিদ্যা কর্ম্ম সংজ্ঞান্যা তৃতীয়া শক্তি রিষ্যতে ॥ যযা ক্ষেত্রজ্ঞ শক্তিঃ সা চেষ্টিতা নৃপ সর্ব্বগা । সংসার তাপানখিলানবাপ্নোত্যনুসন্ততান্॥ তযা তিরোহিতত্বাচ্চ শক্তিঃ ক্ষেত্রজ্ঞ সংজ্ঞিতা । সর্ব্বভূতেষু ভূপাল তারতম্যেন লক্ষ্যতে । অপ্রাণবৎসু স্বল্পাল্পা স্থাবরেষু ততোধিকা । সরীসৃপেপি তেভ্যোপি অতিশক্ত্যা পতত্রিষু ॥ পতত্রিভ্যো মৃগাস্তেভ্যঃ স্বশক্ত্যা পশবো ২ধিকাঃ । পশুভ্যো মনুজা শ্চাতিশক্ত্যা পুংসঃ প্রভাবিতাঃ ॥ এভ্যোপি নাগ গন্ধর্ব্বা যক্ষাদ্যা দেবতা নৃপ । শক্রঃ সমস্ত দেবেভ্য স্ততশ্চাপি প্রজাপতিঃ ॥ হিরণ্যগর্ভোপি ততঃ পুংসঃ শক্ত্যপলক্ষিতঃ । এতান্যশেষ রূপস্য তস্য রূপাণি পার্থিব ॥ যতস্তচ্ছক্তিযোগেন যুক্তানি নভসা যথা । দ্বিতীয়ং বিষ্ণু সংজ্ঞস্য যোগিধ্যেয়ং মহামতে ॥ অমূর্ত্তং ব্রহ্মণোরূপং যৎ সদিত্যুচ্যতে বুধৈঃ । সমস্তাঃ শক্তয়শ্চৈতা নৃপ যত্র প্রতিষ্ঠিতাঃ ॥ তদ্বিশ্বরূপ রূপং বৈ রূপমন্যদ্ধরে র্মহৎ । সমস্ত শক্তিরূপাণি তৎ করোতি জনেশ্বর ॥ দেব তির্য্যঙ্ মনুষ্যাদি চেষ্টাবন্তি স্বলীলয়া । জগতা মুপকারায ন সা কর্ম্ম নিমিত্তজা ॥ চেষ্টা তস্যাপ্রমেযস্য ব্যাপিন্যব্যাহতাত্মিকা । তদ্রূপং বিশ্বরূপস্য তস্য যোগযুজো নৃপ ॥ চিন্ত্য মাত্ম বিশুদ্ধ্যর্থং সর্ব্ব কিল্বিষ নাশনং । যথাগ্নি রুদ্ধত শিখঃ কক্ষং দহতি সানিলঃ ॥ তথা চিত্তে স্থিতো বিষ্ণু র্যোগিনাং সর্ব্ব কিল্বিষং । তস্মাৎ সমস্ত শক্তীনা মাধারে তত্র চেতসঃ ॥ কুর্ব্বীত সংস্থিতিং সা তু বিজ্ঞেয়া শুদ্ধধারণা । শুভাশ্রয়ঃ সচিত্তস্য সর্ব্বগস্য তথাত্মনঃ ॥ ত্রিভাব ভাবনাতীতো মুক্তযে যোগিনাং নৃপ । অন্যে চ পুরুষব্যাঘ্র চেতসো যে ব্যপাশ্রযাঃ ॥ অশুদ্ধাস্তে সমস্তাস্তু দেবাদ্যাঃ কর্ম্ম যোনযঃ । মূর্ত্তং ভগবতো রূপং সর্ব্বাপাশ্রয নিস্পৃহং ॥ এষা বৈ ধারণা জ্ঞেয়া যচ্চিত্তং তত্র ধার্য্যতে । তচ্চ মূর্ত্তং হরে রূপং যাদৃক্ চিন্ত্যং নরা-

ষিপ ॥ তদ্রূপতা মনাধারা ধারণা নোপপদ্যতে। প্রসন্ন চারুবদনং পদ্মপত্রায়তেক্ষণং॥ সুকপোলং সুবিস্তীর্ণ ললাটফলকোজ্জ্বলং। সমকর্ণান্ত বিন্যস্ত চারুকর্ণ বিভূষণং॥ কম্বুগ্রীবং সুবিস্তীর্ণ শ্রীবৎসাঙ্কিত বক্ষসং। বলী ত্রিভঙ্গিনা মগ্ন নাভিনা চোদরেণ বৈ॥ প্রলম্বাষ্ট ভুজং বিষ্ণু মথবাপি চতুর্ভুজং। সমস্থিতোরু জঙ্ঘঞ্চ সুস্থিরাঙ্ঘ্রি করাম্বুজং॥ চিন্তয়েদ্ব্রহ্ম ভূতং তং পীত নির্ম্মল বাসসং। কিরীট চারু কেয়ূর কটকাদি বিভূষিতং॥ শার্ঙ্গ শঙ্খ গদা খড়্গ চক্রাক্ষ বলয়ান্বিতং। চিন্তয়েত্তন্ময়ো যোগী সমাধায়াত্মমানসং॥ তাবদ্যাবদ্দৃঢ়ীভূতা তত্রৈব নৃপ ধারণা। ব্রজত স্তিষ্ঠতো ঽন্যদ্বা স্বেচ্ছয়া কর্ম্ম কুর্ব্বতঃ॥ নাপযাতি যদা চিত্তাৎ সিদ্ধাং মন্যেত তাং তদা। ততঃ শঙ্খ গদা চক্র শার্ঙ্গাদি রহিতং বুধঃ॥ চিন্তয়েদ্ভগবদ্রূপং প্রশান্তং সাক্ষসূত্রকং। সা যদা ধারণা তদ্বদবস্থানবতী ততঃ॥ কিরীট কেয়ূর মুখৈ র্ভূষণৈ রহিতং স্মরেৎ। তদেকাবয়বং দেবং চেতসাপি পুন র্বুধঃ॥ কুর্য্যাত্ততো ঽবয়বিনি প্রণিধানপরো ভবেৎ। তদ্রূপ প্রত্যয়ৈকাগ্র সন্ততি শ্চান্য নিস্পৃহা॥ তদ্ধ্যানং প্রথমৈ রঙ্গৈঃ ষড়্‌ভি র্নিষ্পাদ্যতে নৃপ। তস্যৈব কল্পনাহীনং স্বরূপগ্রহণং হি যৎ॥ মনসা ধ্যান নিষ্পাদ্যং সমাধিঃ সো ঽভিধীয়তে। বিজ্ঞানং প্রাপকং প্রাপ্য পরে ব্রহ্মণি পার্থিব॥ প্রাপণীয় স্তথৈবাত্মা প্রক্ষীণাশেষ ভাবনঃ। ক্ষেত্রজ্ঞঃ করণী জ্ঞানং করণং তেন তস্য তৎ॥ নিষ্পাদ্য মুক্তি কার্য্যং বৈ কৃত কৃত্যং নিবর্ত্ততে। তদ্ভাব ভাবমাপন্ন স্ততো ঽসৌ পরমাত্মনা॥ ভবত্যভেদী ভেদশ্চ তস্যাজ্ঞানকৃতো ভবেৎ। বিভেদ জনকে ঽজ্ঞানে নাশ মাত্যন্তিকং গতে॥ আত্মনো ব্রহ্মণো ভেদ মসন্তং কঃ করিষ্যতি। ইত্যুক্তস্তে মযা যোগঃ খাণ্ডিক্য পরিপৃচ্ছতে॥ ইতি বিষ্ণুপুরাণে ৬ অংশে ৭ অধ্যায়ঃ॥ * ॥ * ॥ * ॥ * ॥

ব্রহ্ম কৃত যোগো যথা।

সুখং যোগাসনং কৃত্বা বভূব সংপুটাঞ্জলিঃ। পুলকাঙ্কিত সর্ব্বাঙ্গঃ সাশ্রুনেত্রো ঽতিদীনবৎ॥ ইডাং সুসুম্নাং মেধ্যাঞ্চ পিঙ্গলাং নলিনীং ধুরাং। নাড়ী ষট্‌কঞ্চ যোগেন নিরুধ্য চ প্রযত্নতঃ॥ মূলাধারং স্বাধিষ্ঠানং মণিপূর মনাহতং। বিশুদ্ধং পরমা-

জ্ঞাখ্যং ষট্‌চক্রঞ্চ নিরুধ্য চাগ্নিমণ্ডলং কারয়িত্বা চ তং ষট্‌চক্রং ক্রমাদ্বিধিঃ। ব্রহ্মরন্ধ্রং সমানীয় বায়ুবন্ধং চকার হ॥ নিরুধ্য বায়ুং মেধান্তা মানীয় হৃদয়াম্বুজং। তং বায়ুং ভ্রামযিত্বা চ যোজযামাস মেধ্যযা॥ এবং কৃত্বা তু নিস্পন্দো যো দত্তো হরিণা পুরা। জজাপ পরমং মন্ত্রং তং তস্যৈকাদশাক্ষরং॥ মুহূর্ত্তঞ্চ জপং কৃত্বা ধ্যাযং ধ্যাযং পদাম্বুজং। দদর্শ হৃদয়াম্ভোজে সর্ব্বং তেজোময়ং মুনে॥ তত্তেজসো হন্তরে রূপ মতীব সুমনোহরং। দ্বিভুজং মুরলী হস্তং ভূষিতং পীতবাসসা॥ শ্রুতি মূল স্থল ন্যস্ত জ্বলন্মকরকুণ্ডলং। ঈষদ্ধাস্যং প্রসন্নাস্যং ভক্তানুগ্রহ কাতরং॥ নবীন জলদাকার শ্যামসুন্দর বিগ্রহং। স্থিতং জন্তুষু সর্ব্বেষু নির্লিপ্তং সাক্ষি রূপিণং॥ স্বাত্মারামং পূর্ণকামং জগদ্ব্যাপি জগৎপরং। সর্ব্বস্বরূপং সর্ব্বেষাং বীজরূপং সনাতনং॥ সর্ব্বাধারং সর্ব্ববরং সর্ব্বশক্তি সমন্বিতং। সর্ব্বারাধ্যং সর্ব্ব গুরুং সর্ব্বমঙ্গল কারণং॥ সর্ব্বমন্ত্র স্বরূপঞ্চ সর্ব্বসম্পৎকরং বরং। যদ্দৃষ্টং ব্রহ্মরন্ধ্রে চ হৃদি তদ্বহি রেব চ। দৃষ্ট্বা চ পরমাশ্চর্য্যং তুষ্টাব পরমেশ্বরং॥

ইতি ব্রহ্মবৈবর্ত্তে শ্রীকৃষ্ণজন্মখণ্ডে ২০ অধ্যায়ঃ॥ * ॥ * ॥ * ॥

অথ ধ্যানযোগঃ।

হরিরুবাচ। অথ যোগং প্রবক্ষ্যামি ভুক্তি মুক্তিকরং পরং। ধ্যাযিভিঃ প্রোচ্যতে ধ্যেযো ধ্যানেন হরিরীশ্বরঃ॥ তৎ শৃণুষ্ব মহেশান সর্ব্বপাপ বিনাশনং। বিষ্ণুঃ সর্ব্বেশ্বরো হনন্তো যড়্ভূমি পরিবর্জ্জিতঃ॥ বাসুদেবো জগন্নাথো ব্রহ্মাত্মা অহমেব তু। দেহি দেহস্থিতো নিত্যঃ সর্ব্বদেহ বিবর্জিতঃ॥ দেহধর্ম্ম বিহীনশ্চ ক্ষরাক্ষর বিবর্জিতঃ। তদ্ধর্ম্ম রহিতঃ স্রষ্টা নাম গোত্র বিবর্জিতঃ॥ মন্তা মনস্থিতো দেবো মনসা পরিবর্জিতঃ। মনোধর্ম্ম বিহীনশ্চ বিজ্ঞানাব্যয এব চ॥ বোদ্ধা বুদ্ধিস্থিতঃ সাক্ষী সর্ব্ববোধ বিবর্জিতঃ। বুদ্ধিধর্ম্ম বিহীনশ্চ সর্ব্বঃ সর্ব্বগতো হমলঃ॥ সর্ব্বপ্রাণবিনির্ম্মুক্তঃ প্রাণধর্ম্ম বিবর্জিতঃ। প্রাণ প্রাণো মহা শান্তো ভযেন পরিবর্জিতঃ॥ অহঙ্কারাদি হীনশ্চ তদ্ধর্ম্ম পরিবর্জিতঃ। তৎসাক্ষী তন্নিযন্তা চ পরমানন্দ রূপকঃ॥ জাগ্রৎ স্বপ্ন সুসুপ্তশ্চ তৎসাক্ষী তদ্বিবর্জিত। তরীযঃ পরমো ধাতা দৃগ্‌রূপো গুণ বর্জিতঃ॥ মুক্তো

বুদ্ধো জনব্যাপী সত্য আত্মাস্ম্যহং শিবঃ। এবং যে মানবা বিজ্ঞা ধ্যায়ন্তীশ পরং পদং ॥ প্রাপ্নুয়ুস্তে চ তদ্রূপং নাত্র কার্য্যা বিচারণা। ইতি ধ্যানং মযা খ্যাতং তব শঙ্কর সুব্রত ॥ পঠেদ্য এতৎ সততং বিষ্ণুলোকং স গচ্ছতি। ইতি গারুড়ে ১৪ অধ্যায়ঃ॥

অথাষ্টাঙ্গযোগঃ।

মুক্তি রষ্টাঙ্গ বিজ্ঞানাৎ সংক্ষেপাত্তদ্বদে শৃণু। যমাঃ পঞ্চ ত্ব হিংসাদ্যা অহিংসা প্রাণ্যহিংসনং ॥ সত্যং ভূতহিতং বাক্য মস্তেয়ং স্বাগ্রহং পরং। অমৈথুনং ব্রহ্মচর্য্যং সর্ব্বত্যাগো হপরিগ্রহঃ॥ নিযমাঃ পঞ্চ সত্যাদ্যা বাহ্য মাভ্যন্তরং দ্বিধা। শৌচং তুষ্টিশ্চ সন্তোষ স্তপ শ্চেন্দ্রিয নিগ্রহঃ॥ স্বাধ্যাযঃ স্যান্মন্ত্র জাপঃ প্রণিধানং হরে র্যজিঃ। আসনং পদ্মকাদ্যুক্তং প্রাণাযামো মরুজ্জযঃ॥ মন্ত্রধ্যান যুতো গর্ভো বিপরীতো হ্যগর্ভকঃ। অগর্ভাত্তু সগর্ভস্থঃ প্রাণাযাম স্ততো হধিকঃ॥ এবং দ্বিধা ত্রিধাপ্যুক্তঃ পূরণাৎ পূরকঃ স চ। জম্ভকো নিশ্চলত্বাৎ স রেচকাদ্রেচক ত্রিধা॥ লঘু র্দ্বাদশ মাত্রঃ স্যাচ্চতুর্ব্বিংশতিকঃ পরঃ। ষট্‌ত্রিংশন্মাত্রিকঃ শ্রেষ্ঠঃ প্রত্যাহারশ্চ রোধনং॥ স্বাত্ম চিন্তাধ্যানং স্যাৎ ধারণা মনসো ধৃতিঃ। অহং ব্রহ্মেত্যবস্থানং সমাধি র্ব্রহ্মণঃ স্থিতিঃ॥ অহমাত্মা পরং ব্রহ্ম সত্যং জ্ঞান মনন্তকং। বিজ্ঞান মানন্দো ব্রহ্ম সত্ত্বমসি কেবলং॥ অহং ব্রহ্মাস্ম্যহং ব্রহ্ম অশরীর মনিন্দ্রিযং। অহং মনো বুদ্ধি মহদহঙ্কারাদি বর্জ্জিতং॥ জাগ্রৎ স্বপ্ন সুষুপ্ত্যাদি মুক্তং জ্যোতি স্তুদীবকং। নিত্যং শুদ্ধং বুদ্ধিযুক্তং সত্যমানন্দ মদ্বযং॥ যো হসাবাদিত্য পুরুষঃ সো হসাবহ মখণ্ডওঁ। ইতি ধ্যাযন্ বিমুচ্যেত ব্রাহ্মণো ভববন্ধনাৎ॥ ইতি গারুড়ে ৫৯ অধ্যাযঃ॥ * ॥ অপিচ। এতত্তে কথিতং জ্ঞানং যোগক্ষেমং নিবোধমে। যং প্রাপ্য ব্রহ্মণা যোগী শাশ্বতানন্যতাং ব্রজেৎ॥ প্রাণাখ্যাত্মনা জেযো যোগিনা সহি দুর্জযঃ। তদ্বীতি তজ্জযে যত্নং তস্যোপাযং শৃণুষ্ব মে॥ প্রাণাযামৈ র্দহেদ্দোষান্ ধারণাভিশ্চ কিল্বিষং। প্রত্যাহারেণ সংসর্গান্ ধ্যানেনানীশ্বরান্ গুণান্॥ যথা পর্ব্বত ধাতূনাং ধ্মাতানাং দহ্যন্তে মলং। তথেন্দ্রিয কৃতা দোষা দহ্যন্তে প্রাণনিগ্রহাৎ॥ প্রথমং সাধনং ধর্য্যাৎ প্রাণাযামস্য যোগ-

বিৎ। প্রাণাপান নিরোধস্তু প্রাণা-
যাম উদাহৃতঃ ॥ লঘু মধ্যোত্তরী-
যাখ্যঃ প্রাণায়াম স্ত্রিধোদিতঃ।
তস্য প্রমাণং বক্ষ্যামি তদলর্ক শৃণুষ্ব
মে॥ লঘু র্দ্বাদশ মাত্রস্তু দ্বিগুণঃ স
তু মধ্যমঃ। ত্রিগুণাভিশ্চ মাত্রাভি
রুত্তরীয় উদাহৃতঃ ॥ নিমেষোন্মে
ষণে মাত্রা তালো লঘ্বক্ষরো মতঃ।
প্রাণায়ামস্য সংখ্যার্থং স্মৃতো দ্বাদ-
শমাত্রকঃ॥ প্রথমেন জয়েৎ স্বেদং
মধ্যমেন তু বেপথুং। বিষাদং হি
তৃতীয়েন জয়েদ্দোষাননুক্রমাৎ ॥
মৃদুত্বং সেব্যমানাস্তু সিংহ শার্দূল
কুঞ্জরাঃ। যথা যান্তি তথা প্রাণো
বশ্যো ভবতি যোগিনঃ॥ বশ্যং মত্তং
যথেচ্ছাতো নাগং নয়তি হস্তিপঃ।
তথৈব যোগীচ্ছন্দেন প্রাণং নয়তি
সাধিতং॥ যথা হি সাধিতঃ সিংহো
মৃগান্ হন্তি ন মানবান্। তদ্বন্নিষি
দ্ধঃ পবনঃ কিল্বিষং ন নৃণাং তনুং॥
তস্মাদ্যুক্তঃ সদা যোগী প্রাণায়াম-
পরো ভবেৎ। শ্রূয়তাং মুক্তি ফলদং
তস্যাবস্থা চতুষ্টয়ং॥ ধ্বস্তিঃ প্রাপ্তি
স্তথা সম্বিৎ প্রসাদশ্চ মহীপতে।
স্বরূপং শৃণু বৈ তেষাং কথ্যমান-
মনুক্রমাৎ ॥ কর্ম্মণা মিষ্ট দুষ্টানাং
জায়তে ফল সংক্ষয়ঃ। চেতসো

বিকষায়ত্বং যত্র সা ধ্বস্তি রুচ্যতে ॥
ঐহিকামুষ্মিকান্ কামান্ লোভ
মোহাত্মকাংশ্চ যান্। নিরুধ্যাস্তে
সদা যোগী প্রাপ্তিঃ সা সার্ব্বকামিকী
॥ অতীতানাগতানর্থান্ বিপ্রকৃষ্টতি
রোহিতান্। বিজানাতীন্দু সূর্য্যর্ক্ষ
গ্রহাণাং জ্ঞান সম্পদা॥ তুল্য প্র-
ভাবস্তু যদা যোগী প্রাপ্নোতি সম্বি-
দং। তদা সম্বিদিতি খ্যাতা প্রাণা-
য়ামস্য সা স্থিতিঃ। যান্তি প্রসাদং
যেনাস্য মনঃ পঞ্চ চ বায়বঃ। ইন্দ্রি-
য়াণীন্দ্রিয়ার্থাশ্চ সপ্রসাদ ইতি স্মৃতঃ
। শৃণুষ্ব চ মহীপাল প্রাণায়ামস্য
লক্ষণং॥ যুঞ্জতশ্চ যথা যোগং যা-
দৃগ্বিহিত মাসনং। পদ্ম মর্দ্ধাসনং
বাপি তথা স্বস্তিক মাসনং॥ আ-
স্থায় যোগী যুঞ্জীত কৃত্বা চ প্রণবং
হৃদি। সমঃ সমাসনো ভূত্বা সংহৃত্য
চরণাবুভৌ। সংবৃতাস্য স্তথা চোরূ
সম্যগ্বিষ্টভ্য বাগ্যতঃ ॥ পার্ষ্ণিভ্যাং
লিঙ্গ বৃষণাবস্পৃশন্ প্রযতঃ স্থিতঃ
কিঞ্চিদুন্নামিত শিরা দন্তৈর্দন্তান্
সংস্পৃশেৎ ॥ সংপশ্যন্নাসিকাগ্রং
স্বং দিশশ্চানবলোকয়ন্। রজসা
তমসো বৃত্তিং সত্ত্বেন রজস স্তথা॥
সংস্থাপ্য নির্ম্মলে সত্ত্বে স্থিতো যু-
ঞ্জীত যোগবিৎ। ইন্দ্রিয়াণীন্দ্রিয়ার্থে-

র্থেভ্যঃ প্রাণাদীন্ মন এব চ ॥ নি-
গৃহ্য সমবায়েন প্রত্যাহারমুপক্র
মেৎ ৷ যস্তু প্রত্যাহরেৎ কামান্
কূর্ম্মো হঙ্গানীব সর্ব্বশঃ ॥ সদাত্ম
রতি রেকস্থঃ পশ্যন্নাত্মান মাত্মনি
৷ স বাহ্যাভ্যন্তরং শৌচং নিষ্পাদ্যা
কণ্ঠ নাভিতঃ ॥ পূরয়িত্বা বুধো দেহং
প্রত্যাহার মুপক্রমেৎ ৷ প্রাণায়ামা
দশ দ্বৌ চ ধারণা সাভিধীয়তে ॥
দ্বিধারণা স্মৃতা যোগো যোগিভি
স্তত্ত্বদর্শিভিঃ ৷ তথা বৈ যোগ যুক্ত
স্য যোগিনো নিয়তাত্মনঃ ॥ সর্ব্বে
দোষাঃ প্রণশ্যন্তি স্বস্থশ্চৈবোপজা-
য়তে ৷ বীক্ষতে চ পরং ব্রহ্ম প্রাকৃতাং
শ্চ গুণান্ পৃথক্ ॥ ব্যোমাদি পরমা-
ণুংশ্চ তথাত্মান মকল্মষং ৷ ইত্থং
যোগী জিতাহারঃ প্রাণায়াম পরা-
য়ণঃ ॥ জিতাং জিতাং শনৈ র্ভূমি
মারোহেত যথা গৃহং ৷ দোষান্
ব্যাধিং তথা মোহ মাক্রান্তা ভূরনি
র্জ্জিতা ॥ বিবর্দ্ধয়তি নারোহেত্তস্মা-
দ্ভূমি মনির্জ্জিতাং ৷ প্রাণানামপসং-
রোধাৎ প্রাণায়াম ইতি স্মৃতঃ ॥
ধারণেত্যুচ্যতে চেয়ং ধার্য্যতে যন্মনো
হনয়া ৷ শব্দাদিভ্যঃ প্রবৃত্তানি যদ-
ক্ষাণি জিতাত্মভিঃ ॥ প্রত্যাহ্রিয়ন্তে
যোগেন প্রত্যাহার স্ততঃ স্মৃতঃ ৷ উ-
পায শ্চাত্র কথিতো যোগিভিঃ প-
রমর্ষিভিঃ ॥ যেন ব্যাধ্যাদয়ো দো-
ষা ন জায়ন্তে হি যোগিনঃ ৷ যথা
তোয়ার্থিন স্তোয়ং যন্ত্র নালাদিভিঃ
শনৈঃ ॥ আপিবেয়ু স্তথা বায়ুং পি-
বেদ্যোগী জিতশ্রমঃ ৷ প্রাগ্নাভ্যাং হৃ-
দয়ে বাথ তৃতীয়া চ তথোরসি ॥
কণ্ঠে মুখে নাসিকাগ্রে নেত্র ভ্রূমধ্য
মূর্দ্ধসু ৷ কিঞ্চিত্তস্মাৎ পরস্মিংশ্চ
ধারণা পরমা স্মৃতা ॥ দশৈতা ধার-
ণাঃ প্রাপ্য প্রাপ্নোত্যক্ষর সাম্যতাং
৷ নাধ্মাতঃ ক্ষুধিতঃ শ্রান্তো ন চ ব্যা-
কুল লোচনঃ ॥ যুঞ্জীত যোগং রা-
জেন্দ্র যোগী সিদ্ধ্যর্থ মাত্মনঃ ৷ না-
তিশীতে ন চৈবোষ্ণে দ্বন্দ্বে নাম্বনি-
লাত্মকে ॥ কালেষ্বেতেষু যুঞ্জীত
ন যোগং ধ্যান তৎপরঃ ৷ স শব্দে
হগ্নি জলাভ্যাসে জীর্ণে গোষ্ঠে চতু-
ষ্পথে ॥ শুষ্কপর্ণ চয়ে নদ্যাং শ্মশানে
সসরীসৃপে ৷ সভয়ে কূপতীরে বা
...
তদ্বজ্জ্বো যোগাভ্যাসং বিবর্জ্জয়েৎ
॥ সত্ত্বস্যানুপপত্তৌ চ দেশ কাল
বিবর্জ্জিতে ৷ নাসতো দর্শনং যোগে
তস্মাত্তং পরিবর্জ্জয়েৎ ॥ দোষা নে-
তাননাদৃত্য মূঢ়ত্বাদ্যো যনক্তি বৈ ৷
৷ বিঘ্নায় তস্য যে দোষা জায়ন্তে তা-

ম্নিবোধমে ॥ বাধির্য্যং জড়তা লোপঃ স্মৃতে র্মূকত্ব মন্ধতা। জ্বরশ্চ জায়তে সদ্য স্তদ্বদজ্ঞান যোগিনঃ ॥ প্রমাদাদ্যোগিনো দোষা যথৈতেস্যু শ্চিকিৎসিতং। তেষাং নাশায় কর্ত্তব্যং যোগিনা তং নিবোধ মে ॥ স্নিগ্ধাং যবাগূ মত্যুষ্ণাং ভুক্ত্বা তত্রৈব ধারয়েৎ। বাত গুল্ম প্রশান্ত্যর্থং গুদাবর্ত্তে তথো দধি ॥ যবাগূর্বাপি পবনে বায়ুগ্রন্থীন্ পরিক্ষিপেৎ। তদ্বৎ কম্পে মহাশৈলং স্থিরং মনসি ধারয়েৎ ॥ বিঘাতে বচসো বাপি বাধির্য্যে শ্রবণেন্দ্রিয়ে। তথৈবাম্রফলং ধ্যায়েত্তৃষ্ণার্ত্তো রসনেন্দ্রিয়ে। যস্মিন্ যস্মিন্ রুজা দেহে তস্মিং স্তদপকারিণীং ॥ ধারয়েদ্ধারণা মুষ্ণে শীতাং শীতে বিদাহিনীং। কীলং শিরসি সংস্থাপ্য কাষ্ঠং কাষ্ঠেন তাড়য়েৎ ॥ লুপ্তস্মৃতেঃ স্মৃতিঃ সদ্যো যোগিন স্তেন জায়তে। দ্যাবাপৃথিব্যৌ বায়্বগ্নী ব্যাপিনাবনুধারয়েৎ ॥ অমানুষাৎসত্ত্ব জাতাদ্বাধা স্থিতি চিকিৎসিতং। অমানুষং সত্ত্বমন্ত যোগিনং প্রবিশেদ্যদি ॥ বায়্বগ্নি ধারণা চৈবং দেহ সংস্থং বিনির্দহেৎ। এবং সর্ব্বাত্মনা কার্য্যা রক্ষা যোগবিদা নৃপ ॥ ধর্ম্মার্থ কাম মোক্ষাণাং শরীরং সাধনং যতঃ। প্রবৃত্তি লক্ষণা খ্যাতা যোগিনো বিস্ময়াস্তথা ॥ বিজ্ঞানং বিলয়ং যাতি তস্মাদ্গেচৈষ্যাঃ প্রবৃত্তয়ঃ। অলৌল্য মারোগ্য মনিষ্ঠুরত্বং গন্ধঃ শুভো মূত্র পুরীষ মল্পং। কান্তিঃ প্রসাদঃ স্বরসৌম্যতা চ যোগ প্রবৃত্তেঃ প্রথমং হি চিহ্নং ॥ অনুরাগং জনো যাতি পরোক্ষে গুণ কীর্ত্তনং। ন বিভ্যতি চ সত্ত্বানি সিদ্ধের্লক্ষণ মুত্তমং ॥ শীতোষ্ণাদিভি রত্যুগ্রৈর্যস্য বাধা ন জায়তে। ন ভীতি মেতি চান্যেভ্য স্তস্য সিদ্ধি রুপস্থিতা ॥ ইতি মার্কণ্ডেয়পুরাণে যোগি চিকিৎসা নামাধ্যায়ঃ ॥ * ॥

অথ ত্রিবিধ যোগঃ।

শ্রীভগবানুবাচ। যোগা স্ত্রয়ো ময়া প্রোক্তা নৃণাং শ্রেয়ো বিধিৎসয়া। জ্ঞানং কর্ম্ম চ ভক্তিশ্চ নোপায়ো হন্যো হস্তি কুত্রচিৎ ॥ নির্ব্বিন্নানাং জ্ঞানযোগো ন্যাসিনা মিহ কর্ম্মসু। তেষ্বনির্ব্বিন্ন চিত্তানাং কর্ম্ম যোগশ্চ কামিনাং ॥ যদৃচ্ছয়া মৎকথাদৌ জাত শ্রদ্ধস্তু যঃ পুমান্। ন নির্ব্বিন্নো নাতিসক্তো ভক্তি যোগো হস্য সিদ্ধিদঃ ॥ তাবৎ কর্ম্মাণি কুর্ব্বীত ন নির্ব্বিদ্যেত যাবতা। মৎকথা শ্রবণাদৌ বা শ্রদ্ধা যাবন্ন জায়তে ॥ স্বধর্ম্মস্থো

যজন্ যুক্তে রবাপ্নীঃ কাম উদ্ধব। ন যান্তি স্বর্গনরকৌ যদ্যন্যম সমাচরেৎ ॥ অস্মিল্লোকে বর্ত্তমানঃ স্বধর্ম্মস্থো হনঘঃ শুচিঃ। জ্ঞানং বিশুদ্ধ ম্যাপ্নোতি মদ্ভক্তিঞ্চ যদৃচ্ছয়া ॥ ইতি শ্রীভাগবতে ১১ স্কন্ধে ২০ অধ্যায়ঃ ॥ * ॥ সাংখ্যযোগঃ ২ কর্ম্মযোগঃ ৩ জ্ঞানকর্ম্মন্যাসযোগঃ ৪ সংন্যাসযোগঃ ৫ ধ্যানযোগঃ ৬ বিজ্ঞানযোগঃ ৭ ব্রহ্মযোগঃ ৮ রাজগুহ্যযোগঃ ৯ বিভূতিযোগঃ ১০ ভক্তিযোগঃ ১২ প্রকৃতিপুরুষবিবেকযোগঃ ১৩ গুণত্রয়যোগঃ ১৪ পুরুষোত্তমযোগঃ ১৫ আচারবিবেকযোগঃ ১৭ মোক্ষযোগঃ ১৮ এতে যোগা এতেম্বধ্যায়েষু ভগবদ্গীতায়াং দ্রষ্টব্যাঃ ॥ * ॥ অথ বিষ্কম্ভাদি যোগানয়ন ক্রমঃ। রবীন্দু যোগ লিপ্তাভ্যো যোগা ভ ভোগ ভাজিতাঃ। গত গম্যাশ্চ ষষ্টিঘ্না নাড্যো ভুক্ত্যন্তরোদ্ধৃতাঃ ॥ ইতি সূর্য্যসিদ্ধান্তঃ ॥

যোগচরঃ পুং হনুমান্। ইতি শব্দরত্নাবলী ॥

যোগজং ক্লী অগুরু। ইতি ভাবপ্রকাশঃ ॥ যোগজাতে ত্রি ॥

যোগজঃ পুং অলৌকিকসন্নিকর্ষবিশেষঃ। স চ দ্বিবিধঃ। যুক্তঃ যুঞ্জানশ্চ। যথা। অলৌকিকঃ সন্নিকর্ষস্ত্রিবিধঃ পরিকীর্ত্তিতঃ। সামান্যলক্ষণো জ্ঞানলক্ষণো যোগজ স্তথা ॥ আসত্তি রাশ্রয়াণান্তু সামান্য জ্ঞান মিষ্যতে ॥ তদিন্দ্রিয়জ তদ্ধর্ম্ম বোধ সামগ্র্যপেক্ষ্যতে ॥ বিষয়ী যস্য তস্যৈব ব্যাপারো জ্ঞানলক্ষণঃ। যোগজো দ্বিবিধঃ প্রোক্তো যুক্ত যুঞ্জান ভেদতঃ ॥ যুক্তস্য সর্ব্বদা ভানং চিন্তা সহকৃতো হপরঃ ॥ ইতি ভাষাপরিচ্ছেদঃ ॥ * ॥ যোগজ ইতি। যোগাভ্যাস জনিত ধর্ম্মবিশেষঃ। শ্রুতি পুরাণাদি প্রমাণক ইত্যর্থঃ। যুক্তেতি। যুক্ত যুঞ্জান রূপ যোগ দ্বৈবিধ্যাৎ ধর্ম্মস্য দ্বৈবিধ্য মিতি ভাবঃ। যুক্তস্যেতি। যোগাভ্যাসাবগত্যা বশীকৃত সমাধি সমাসাদিত বিবিধ সিদ্ধিযুক্ত ইত্যুচ্যতে। অয়মেব বিশিষ্টযোগবত্ত্বাৎ যুক্ত ইত্যুচ্যতে। সর্ব্বদেতি। চিন্তাসহকারং বিনেত্যর্থঃ। ভানং সর্ব্ব বিষয়াণাং প্রত্যক্ষং। অপরো যুঞ্জানঃ। বিষয়ব্যাবৃত্ত্যা মানস সমাধিস্থঃ অয়ঞ্চ যুঞ্জান উচ্যতে। চিন্তা ধ্যানং তদেব কারণং তৎ সহকারাৎ স্থূল

শূক্ষ্ম ব্যবহিত বিপ্রকৃষ্টানর্থান্ মনঃ ॥ প্রত্যক্ষীকরোতীত্যর্থঃ। ইতি সিদ্ধান্তমুক্তাবলী ॥

যোগদানং ক্লী ছলেনদানং। যথা। যোগাধমন বিক্রীতং যোগদান প্রতিগ্রহং। যত্র বাপ্যুপধিং পশ্যেত্তৎ সর্ব্বং বিনিবর্ত্তয়েৎ ॥ ইতি মানবে ৮ অধ্যায়ঃ ॥ যোগাধমনেতি। যোগশব্দঃ ছলবাচী ছলেন যে বন্ধক বিক্রয় দান প্রতিগ্রহাঃ ক্রিয়ন্তে ন তত্ত্বতো হন্যত্রাপি নিঃক্ষেপাদৌ যত্র ছদ্ম জানীয়াৎ বস্তুতো নিঃক্ষেপাদি ন কৃতং তৎসর্ব্বং নিবর্ত্তয়েৎ। ইতি তট্টীকায়াং কুল্লূকভট্টঃ ॥

যোগনাবিকঃ পুং মৎস্যবিশেষঃ। তৎপর্য্যায়ঃ। গগাটঃ ২। ইতি হারাবলী ॥

যোগনিদ্রা স্ত্রী দুর্গা। যথা। যা নিদ্রা তু স্থিতা ধস্যা জগদণ্ড কপালতঃ। বিভর্ত্ত্য পুরুষং যাতি যোগনিদ্রেতি সোচ্যতে ॥ ইতি কালিকাপুরাণে ৬ অধ্যায়ঃ ॥

যোগপদকং ক্লী পূজাদৌধার্য্যোত্তরীয়বিশেষঃ। যোগপাটা ইতি ভাষা। যথা। ত্রিবিধং যোগপদক মাদ্যং ব্যাঘ্রাজিনোদ্ভবং। দ্বিতীয়ং মৃগচর্ম্মাঢ্যং তৃতীয়ং তন্তুনির্ম্মিতং ॥ চতুর্মাত্র প্রবিস্তারং দৈর্ঘ্যেণ যজ্ঞসূত্রবৎ। চতুর্মাত্রং চতুরঙ্গুল মাত্রং ॥ ইতি বীরমিত্রোদয়ধৃত সিদ্ধান্তশেখরঃ ॥

যোগপীঠং ক্লী দেবানাং যোগাসনং। যথা। মণ্ডলং যোগপীঠন্তু পদ্মং পদ্মে বিচিন্তয়েৎ। শাবাদীন্যাসনানীহ চত্বার্য্যপি বিচিন্তয়েৎ ॥ যোগপীঠং পৃথগ্ধ্যাত্বা মণ্ডলেন সহৈকতাং। পুন র্ধ্যাত্বা ততঃ পশ্চাৎ পূজয়েদাসনং ততঃ ॥ ধ্যানেন যোগপীঠস্য ধ্যাত্বা যদ্দীয়তে জলং। নৈবেদ্য পুষ্প ধূপাদি তৎ স্বগক্ষোপতিষ্ঠতে ॥ সর্ব্বে দেবাঃ স গন্ধর্ব্বাঃ স চরাচর গুহ্যকাঃ। চিন্তিতাঃ পূজিতাশ্চস্যু র্যোগপীঠস্য পূজনে ॥ ইতি কালিকাপুরাণে ৫৬ অধ্যায়ঃ ॥

যোগমায়া স্ত্রী ভগবতী। সা চ বিষ্ণুমায়া। যথা। ততশ্চ শৌরি র্ভগবৎ প্রচোদিতঃ সুতং সমাদায় স সূতিকা গৃহাৎ। যদা বহি র্গন্তু মিয়েষ তর্হ্যজা যা যোগমায়া জনি নন্দজায়য়া। ইতি শ্রীভাগবতে ১০ স্কন্ধে ৩ অধ্যায়ঃ ॥

যোগরঙ্গঃ পুং নারঙ্গঃ। ইতি রাজ-

নির্ঘণ্টঃ ॥

যোগরূঢ়ঃ পুং যোগার্থসহভাবেন রূঢ্যর্থবোধকশব্দঃ। যথা। যোগরূঢ়াশ্চ রূঢ়াশ্চ যৌগিকাশ্চেতি তে ত্রিধা। তে শব্দাঃ পুন স্ত্রিধা ভবন্তি। যোগরূঢ়াঃ পঙ্কজাদয়ঃ। পঙ্ক জনি ডপ্রত্যয়ৈঃ পঙ্কজনি কর্ত্রভিধায়কেন যোগেনাপি পদ্মার্থ এব প্রতিপাদ্যতে ন কুমুদাদ্যর্থে ইতি। যোগার্থ পুরস্কারেণাপি রূঢ্যর্থ এবেতি যোগরূঢ়ঃ। এবং ঈশ্বর সঙ্কেত মহিম্না ঝটিতি পদ্মস্যৈব প্রতেঃ। ইত্যলঙ্কারকৌস্তুভে ২ কিরণঃ ॥

যোগবাহঃ পুং অনুস্বারঃ॥ বিসর্গঃ ॥ জিহ্বামূলীয়ঃ॥ উপাধ্মানীয়ঃ। ইতি ব্যাকরণং ॥

যোগবাহী স্ত্রী ক্ষারবিশেষঃ। যথা। স্বর্জ্জিস্তু স্বর্জ্জিকাসুক্ষ্মী যোগবাহী সুবর্চিকা। ইতি হেমচন্দ্রঃ ॥ পারদশ্চ ॥

যোগসারঃ পুং সর্ব্বরোগহরোপায়ঃ। যথা। ধন্বন্তরিরুবাচ। সর্ব্বরোগ হরং সিদ্ধং যোগসারং বদান্যহং। শৃণু সুশ্রুত সংক্ষেপাৎ প্রাণিনাং জীবহেতবে ॥ নিমেষাদি র্হবিঃ কাল শ্চিন্তাভিঃ বাত্বধো ভবেৎ। কষায় কটু তিক্তাম্ল রুক্ষাহারাদ ভোজনাৎ ॥ চিন্তা ব্যবায় ব্যায়াম ভয় শোক প্রজাগরাৎ। উচ্চৈ র্ভাষ্যতিভাবাচ্চ ... কর্ম্মযোগাতিকর্ষণাৎ ॥ বায়ুঃ প্রপ্যতি পর্য্যন্তে জীর্ণান্নে দিন সংক্ষয়ে। উষ্ণাম্ল লবণ ক্ষার কটুকাজীর্ণ ভোজনাৎ ॥ তীক্ষ্ণাতপাগ্নি সন্তাপ মদ্য ক্রোধ নিষেবনাৎ। বিদাহ কালে ভুক্তস্য মধ্যাহ্নে জলদাগমে ॥ গ্রীষ্মকালেঽর্দ্ধরাত্রেপি পিত্তং প্রপ্যতি দেহিনঃ। স্বাদ্বম্ল লবণ স্নিগ্ধ গুরু শীতাতিভোজনাৎ ॥ নবান্ন পিষ্টলানূপ মাষাভিস্যন্দি সেবনাৎ। অব্যবায়ো দিবাস্বপ্ন শয্যাসন সুখাদিভিঃ ॥ কফঃ প্রদোষে ভুক্তে চ বসন্তে চ প্রকুপ্যতি। পারুষ্য মূল সঙ্কোচ তোদ বিষ্টম্ভ ভোজনাৎ ॥ খরতা সুপ্ততা হর্ষ রৌক্ষ স্তম্ভন শোষণং। শ্যাবত্ব মঙ্গবিশ্লেষ বলনাশামবর্দ্ধনং ॥ বায়ো লিঙ্গানি তৈ র্যুক্তং রোগং বাতাত্মকং বদেৎ। দাহোষ্ম পাদ সংক্লেদ কোপ রাগ পরিস্রবাঃ ॥ কট্বম্ল শববৈগন্ধ্য স্বেদ মূর্চ্ছাতিতৃট্ শ্রমাঃ। হারিদ্রং হরিতত্বঞ্চ পিত্ত লিঙ্গানি তৈ র্যুতঃ ॥ স্নেহোপদেহ মাধুর্য্য চিরকারিত্ব বন্ধনং। স্তৈমিত্য দৃষ্টি সংঘাত

শোথ শীতত্ব গৌরবং ॥ কণ্ডু নি-দ্রাভিযোগশ্চ লক্ষণং কফ মস্তব্য। হেতু লক্ষণ সংসৃগাদ্বিদ্যাদ্ব্যাধিং ত্রিদোষজং ॥ সর্ব্বহেতু সমুৎপন্নং ত্রিলিঙ্গং সান্নিপাতিকং। দোষ ধাতু মলাধারো দেহিনাং দেহ উচ্যতে ॥ তেষাং সমত্ব মারোগ্যং ক্ষয় বৃদ্ধী বিপর্য্যযঃ। রসাসৃঙ্মাংস মেদোঽস্থি মজ্জ শুক্রাণি ধাতবঃ ॥ বাত পিত্ত কফা দোষা বিণ্মূত্রাদ্যা মলাঃ স্মৃতাঃ। বায়ুঃ শীতো লঘুঃ সূক্ষ্মঃ খরো রুক্ষো হস্থিরো বলী ॥ পিত্ত মম্ল কটুষ্ণঞ্চ পক্ত্যাখ্যো রোগ কারণং। মধুরো লবণঃ স্নিগ্ধো গুরুঃ শ্লেষ্মাতিপিচ্ছিলঃ ॥ গুদশ্রোণ্যাশ্রয়ো বায়ুঃ পিত্তং পক্বাশয় স্থিতং। কফস্যামাশয়ং স্থানং কণ্ঠোরু মূর্দ্ধ সন্ধয়ঃ ॥ কটু তিক্ত কষায়াশ্চ কফ পিত্তাদি সংশ্রয়াঃ। কট্বম্ল লবণাঃ পিত্তং স্বাদম্ল লবণাঃ কফং ॥ এতএব বিপর্য্যস্তাঃ সমাসেবাং প্রযোজিতাঃ। ভবন্তি রোগিণাং শান্ত্যৈ সুস্থানাং সুখহেতবঃ ॥ ইত্যাদি গারুড়ে ১৭৩ অধ্যায়ঃ ॥

যোগক্ষেমং ক্লী অনাগতানযনাগতরক্ষণে। যথা মনুঃ। দিবা বক্তব্যতা পালে রাত্রৌ স্বামিনি তদ্গৃহে। যোগক্ষেমে ঽন্যথা চেত্তু পালো বক্তব্যতা মিযাৎ। কুল্লূকভট্টঃ। অনাগতস্য চানেতুঃ স্বাগতস্য চ রক্ষকঃ। রাত্রাবপি যদান্যোঽস্তি তদা স্বামী ন দোষভাক্। ইতি প্রায়শ্চিত্ততত্ত্বং ॥ অপিচ। ফল-পুষ্পাদে রলব্ধস্য লাভনং যোগঃ। শরীরাদে র্লব্ধস্য পালনং ক্ষেমঃ। ইতি ভট্টিটীকায়াং ভরতঃ ॥ যোগক্ষেমৌ শরীরস্থিতি পালনে। ইতি তত্রৈব জয়মঙ্গলঃ ॥ যথা। যোগক্ষেমকরং কৃত্বা সীতায়া লক্ষ্মণং ততঃ মৃগস্যানুপদী রামো জগাম গজ বিক্রমঃ ॥ ইতি ভট্টিকাব্যে ৫ সর্গঃ ॥

যোগাধমনং ক্লী ছলেনবন্ধকং। যথা। যোগাধমন বিক্রীতং যোগদান প্রতিগ্রহং। যত্র বাপ্যুপধিং পশ্যেৎ তৎ সর্ব্বং বিনিবর্ত্তয়েৎ। ইতি মনুঃ ॥ অস্য বিবরণং যোগদান শব্দে দ্রষ্টব্যং ॥

যোগারঙ্গঃ পুং নারঙ্গঃ। ইতি রাজনির্ঘণ্টঃ ॥

যোগারূঢঃ পুং ইন্দ্রিযার্থতৎসাধন কর্ম্মানাসক্তঃ। যথা। যদা হি নেন্দ্রিযার্থেষু ন কর্ম্মস্বনুসজ্জতে। সর্ব্ব সংকল্প সংন্যাসী যোগারূঢ স্তদো-

চ্যতে। ইতি শ্রীভগবদ্গীতাখ্যা ৬। অধ্যায়ঃ॥ কীদৃশোঽয়ং যোগারূঢ়ো যস্য শমঃ কারণমুচ্যতে ইত্যত্রাহ যদেতি। ইন্দ্রিয়ার্থেষ্বিন্দ্রিয় ভোগ্যেষু শব্দাদিষু তৎসাধনেষু চ কর্ম্মসু যদা নানুষজ্জতে আসক্তিং ন করোতি। তত্র হেতুঃ আসক্তি মূল ভূতান্ সর্ব্বান্ ভোগ বিষয়ান্ কর্ম্মবিষয়াংশ্চ সঙ্কল্পান্ সংন্যসিতুং ত্যক্তুং শীলং যস্য স তদা যোগারূঢ় উচ্যতে। ইতি তট্টীকাযাং শ্রীধরস্বামী॥

যোগাসনং ক্লী ব্রহ্মাসনং। ধ্যানাসনং। ইতি হেমচন্দ্রঃ॥

যোগিদণ্ডঃ পুং বেত্রঃ। ইতি রাজনির্ঘণ্টঃ॥

যোগিনী স্ত্রী যোগযুক্তানারী॥ ভগবত্যাঃ সখীরূপা আবরণদেবতা। সা কোটি বিধা। তাসাং মধ্যে চতুঃষষ্টিঃ প্রধানাঃ। যথা। নারায়ণী ১ গৌরী ২ শাকম্ভরী ৩ ভীমা ৪ রক্তদন্তিকা ৫ ভ্রামরী ৬ পার্ব্বতী ৭ দুর্গা ৮ কাত্যায়নী ৯ মহাদেবী ১০ চণ্ডঘণ্টা ১১ মহাবিদ্যা ১২ মহাতপা ১৩ সাবিত্রী ১৪ ব্রহ্মবাদিনী ১৫ ভদ্রকালী ১৬ বিশালাক্ষী ১৭ রুদ্রাণী ১৮ কৃষ্ণপিঙ্গলা ১৯ অগ্নিজ্বালা ২০ রৌদ্রমুখী ২১ কালরাত্রিঃ ২২ তপস্বিনী ২৩ মেঘস্বনা ২৪ সহস্রাক্ষী ২৫ বিষ্ণুমায়া ২৬ জলোদরী ২৭ মহোদরী ২৮ মুক্তকেশী ২৯ ঘোররূপা ৩০ মহাবলা ৩১ শ্রুতিঃ ৩২ স্মৃতিঃ ৩৩ ধৃতিঃ ৩৪ তুষ্টিঃ ৩৫ পুষ্টিঃ ৩৬ মেধা ৩৭ বিদ্যা ৩৮ লক্ষ্মীঃ ৩৯ সরস্বতী ৪০ অপর্ণা ৪১ অম্বিকা ৪২ যোগিনী ৪৩ ডাকিনী ৪৪ শাকিনী ৪৫ হাকিনী ৪৬ হাকিনী ৪৭ লাকিনী ৪৮ ত্রিদশেশ্বরী ৪৯ মহাষষ্ঠী ৫০ সর্ব্বমঙ্গলা ৫১ লজ্জা ৫২ কৌশিকী ৫৩ ব্রহ্মাণী ৫৪ মাহেশ্বরী ৫৫ কৌমারী ৫৬ বৈষ্ণবী ৫৭ ঐন্দ্রী ৫৮ নারসিংহী ৫৯ বারাহী ৬০ চামুণ্ডা ৬১ শিবদূতী ৬২ বিষ্ণুমায়া ৬৩ মাতৃকা ৬৪। ইতি বৃহন্নন্দিকেশ্বরপুরাণোক্ত দুর্গাপূজা পদ্ধতিঃ॥*॥ অপিচ। ব্রহ্মাণী চণ্ডিকা রৌদ্রী গৌরীন্দ্রাণী তথৈব চ। কৌমারী বৈষ্ণবী দুর্গা নারসিংহী চ কালিকা॥ চামুণ্ডা শিবদূতী চ বারাহী কৌশিকী তথা। মাহেশ্বরী শাঙ্করী চ জয়ন্তী সর্ব্বমঙ্গলা॥ কালী কপালিনী মেধা শিবা শাকম্ভরী তথা। ভীমা শান্তা ভ্রামরী চ রুদ্রাণী চাম্বিকা তথা॥ ক্ষমা ধাত্রী তথা স্বাহা স্বধাপর্ণা

মহোদরী। ঘোররূপা মহাকালী ভদ্রকালী ভযঙ্করী॥ ক্ষেমঙ্করী চোগ্রচণ্ডা চণ্ডোগ্রা চণ্ডনাযিকা। চণ্ডা চণ্ডবতী চণ্ডী মহামোহা প্রিযঙ্করী॥ বলবিকরিণী দেবী বলপ্রমথিনী তথা। মনোন্মথিনী দেবী চ সর্ব্বভূতস্য দামিনী॥ উমা তারা মহানিদ্রা বিজযা চ জযা তথা। পূর্ব্বোক্তাঃ শৈলপুত্র্যাদ্যা যোগিন্যষ্টৌ চ যাঃ ক্রমাৎ॥ তাভি রাভিশ্চ সহিতাশ্চতুঃষষ্টীশ্চ যোগিনীঃ। পূজযেন্মণ্ডলস্যান্তঃ সর্ব্বকামার্থসিদ্ধযে॥ ইতি কালিকাপুরাণে ৬২ অধ্যাযঃ॥ ※॥ অষ্টযোগিন্যো যথা। ততোষ্টপত্রেষ্বব্জস্য পূজযেদষ্টযোগিনীঃ। শৈলপুত্রীং চণ্ডঘণ্টাং স্কন্দমাতরমেব চ॥ কালরাত্রিঞ্চ পূর্ব্বাদি চতুর্দিক্ষু প্রপূজযেৎ। চণ্ডিকানথ কুষ্মাণ্ডীং তথা কাত্যাযনীং শুভাং॥ মহাগৌরীং চাগ্নিকোণে নৈর্ঋত্যাদিষু পূজযেৎ। ইতি তত্রৈব ৫৩ অধ্যাযঃ॥ ※॥ তিথিবিশেষে দিগ্বিশেষাবস্থিতযোগিন্যো যথা। ব্রহ্মাণী সংস্থিতা পূর্ব্বে প্রতিপন্নবমী তিথৌ। মাহেশ্বরী চোত্তরে চ দ্বিতীযা দশমীতিথৌ॥ স্থিতাগ্নেযে চ কৌমারী তৃতীযৈকাদশী তিথৌ॥ নারাযণী চ নৈর্ঋত্যে চতুর্থী দ্বাদশী তিথৌ॥ পঞ্চম্যাঞ্চ ত্রযোদশ্যাং বারাহী দক্ষিণে তথা। ষষ্ঠ্যাঞ্চৈব চতুর্দ্দশ্যা মিন্দ্রাণী পশ্চিমে স্থিতা॥ সপ্তম্যাং পৌর্ণমাস্যাঞ্চ চামুণ্ডা বাযুগোচরে। অষ্টম্যমাবাস্যযোশ্চ মহালক্ষ্মীশগোচরে॥ যোগিনী সংমুখে নৈব গমনাদি প্রকারযেৎ। ইতি গারুড়ে ৫৯ অধ্যাযঃ॥ ※॥ অপিচ। প্রতিপন্নবমী পূর্ব্বে দ্বামা রুদ্রাশ্চ পাবকে। শর ত্রযোদশী যাম্যে বেদা মাসাশ্চ নৈর্ঋতে॥ ষষ্ঠী চতুর্দশী পশ্চাৎ বাযব্যাং মুনি পূর্ণিমা। দ্বিতীযা দশমী যক্ষে ঐশান্যাং চাষ্টমী দর্শঃ॥ বামে শুভঙ্করী দেবী মৃত্যুদা দক্ষিণে স্থিতা। বধবন্ধকরী চাগ্রে পৃষ্ঠে সর্ব্বার্থসাধনী॥ ইতি জ্যোতিস্তত্ত্বং॥ ※॥ তৎকালযোগিনী যথা। যস্যাং দিশ্যুদযং যাতি ততো যামার্দ্ধভুক্তিকা। ভ্রমন্তী তেন মার্গেণ ভবেত্তৎকালযোগিনী॥ প্রাচী ধনেশ্বর হুতাশন কৌণপেযবাযব্যবারুণযমাধিপ শঙ্করেষু। এষু ক্রমান্নিবসতি প্রতিপন্নবম্যোঃ পৃষ্ঠে স্থিতা শুভকরী গিরিরাজপুত্রী॥ ইতি সমযামৃতং॥ ※॥

অথ যোগিনীসাধনং।

ভূতডামরে। অথাতঃ সংপ্রবক্ষ্যাং

মি যোগিনী সাধনোত্তমং। সর্ব্বার্থ সাধনং নাম দেহিনাং সর্ব্বসিদ্ধিদং॥ অতিগুহ্যা মহাবিদ্যা দেবানামপি দুর্লভা। যা সা সম্ভেদনং কৃত্বা যক্ষেশো হ্ ভুবনাধিপঃ॥ তাসাং মাদ্যং প্রবক্ষ্যামি সুরাণাং সুন্দরী প্রিয়ে। অস্যা অভ্যর্চ্চনে নৈব রাজত্বং লভতে নরঃ॥ অথ প্রাতঃ সমুত্থায় কৃত্বা স্নানাদিকং শুভং। প্রাসাদঞ্চ সমাসাদ্য অর্য্যাদাচমনং ততঃ॥ প্রণবান্তে সহস্রারে হুঁ ফট্ দিগ্বন্ধনং চরেৎ। প্রাণায়ামং ততঃ কুর্য্যাৎ মূলমন্ত্রেণ মন্ত্রবিৎ॥ ষড়ঙ্গং মায়য়া কুর্য্যাৎ পদ্মমষ্টদলং লিখেৎ। তস্মিন্ পদ্মে মহামন্ত্রং জীবন্যাসং সমাচরেৎ॥ পীঠে দেবীং সমাবাহ্য ধ্যায়েদ্দেবীং জগৎপ্রিয়াং। পূর্ণচন্দ্র নিভাং গৌরীং বিচিত্রাম্বর ধারিণীং॥ পীনোত্তুঙ্গ কুচাং রামাং সর্ব্বেষা মভয প্রদাং। ইতি ধ্যাত্বা চ মূলেন দদ্যাৎ পাদ্যাদিকং শুভং॥ পুন ধূপং দীপং নৈবেদ্যং মূলমন্ত্রতঃ। গন্ধ চন্দন তাম্বূলং সকর্পূরং সুশোভনং॥ প্রণবান্তে ভুবনেশী আগচ্ছ সুর সুন্দরি। বহ্নে জায়া জপেন্মন্ত্রং ত্রিসন্ধ্যঞ্চ দিনে দিনে॥ সহস্রৈক প্রমাণেন ধ্যাত্বা দেবীং সদা বুধঃ। মাসান্তে ব্যাপ্য দিবসং বলিং পূজাং সুশোভনাং॥ কৃত্বা চ প্রজপেন্মন্ত্রং নিশীথে যাতি সুন্দরী। সুদৃঢ়ং সাধকং মত্বা যাতি সা সাধকালয়ে॥ সুপ্রসন্না সাধকাগ্রে সদা স্মের মুখীততঃ। দৃষ্ট্বা দেবীং সাধকেন্দ্রো দদ্যাৎ পাদ্যাদিকং শুভং॥ সুচন্দনং সুমনসো জাত্যাভিলসিতং বদেৎ। মাতরং ভগিনীং বাপি ভার্য্যাং বা ভক্তি ভাবতঃ॥ যদি মাতা তদা বিত্তং দ্রব্যঞ্চ সুমনোহরং। ভূপতিত্বং প্রার্থিতং যত্তদ্দদাতি দিনে দিনে॥ পুত্রবৎ পাতি তং লোকে সত্যং সত্যং সুনিশ্চিতং। স্বসা দদাতি দ্রব্যঞ্চ দিব্যবস্ত্রং তথৈব চ॥ দিব্যাং কন্যাং সমানীয নাগকন্যাং দিনে দিনে। যদ্ভবতি ভূতঞ্চ ভবিষ্যতীতি যৎপুনঃ॥ তৎ সর্ব্বং সাধকেন্দ্রায নিবেদযতি নিশ্চিতং। যৎ যৎ প্রার্থযতে সর্ব্বং দদাতি সা দিনে দিনে॥ ভ্রাতৃবৎ পাতিতং লোকে কামনাভি র্মনোগতৈঃ। ভার্য্যাস্যাদ্যদি সা দেবী সাধকস্য মনোহরা॥ রাজেন্দ্রঃ সর্ব্ব রাজানাং সংসারে সাধকোত্তমঃ। স্বর্গে মর্ত্ত্যে চ পাতালে গতিঃ সর্ব্বত্র নিশ্চিতং॥ যদ্দদাতি সা দেবী কথিতুং নৈব শক্যতে।

তযা সার্দ্ধঞ্চ সংভোগং করোতি সা-
ধকোত্তমঃ ॥ অন্যস্ত্রী গমনং ত্যক্ত্বা
অন্যথা নশ্যতি ধ্রুবং। ১॥*॥ ততো
হন্যৎ সাধনং বক্ষ্যে নির্ম্মিতং ব্রহ্মণা
পুরা। নদীতীরং সমাসাদ্য অর্য্যাৎ
স্নানাদিকং ততঃ ॥ পূর্ব্ববৎ সকলং
কার্য্যং চন্দনৈ র্মণ্ডলং লিখেৎ। স্ব
মন্ত্রং তত্র সংলিখ্যাবাহ্য ধ্যায়েন্মনো-
হরাং ॥ তরঙ্গনেত্রাং শরদিন্দু বক্ত্রাং
বিম্বাধরাং চন্দন গন্ধ লিপ্তাং। চীনাং
শুকাং পীন কুচাং মনোজ্ঞাং শ্যা-
মাং সদা কামদুঘাং বিচিত্রাং ॥ এবং
ধ্যাত্বা জপেদ্দেবী মগুরু ধূপ দীপ
কৈঃ। গন্ধং পুষ্প রসঞ্চৈব তাম্বুলাদীং-
শ্চ মূলতঃ ॥ তারং মায়া গচ্ছ মনো-
হরে পাবকবল্লভা। কৃত্বা যুক্তং প্র
তিদিনং জপেন্মন্ত্রং প্রসন্নধীঃ ॥ মা-
সান্তে ব্যাপ্য দিবসং অর্য্যাচ জপ
মুত্তমং। আনিশীথং জপেন্মন্ত্রং
জ্ঞাত্বা চ সাধকং দৃঢ়ং ॥ গত্বা চ সা-
ধকাভ্যাসে সুপ্রসন্না মনোহরা।
ততো হর্ষিতা প্রসন্না সা পৃচ্ছতি
প্রার্থিতং চ যৎ ॥ স্বর্ণশতং সাধকায়
দদাতি সা দিনে দিনে। সাবশেষং
ব্যয়ং অর্য্যাৎ হিতে তত্তু নদাস্যতি
॥ অন্যস্ত্রী গমনং তস্য ন ভবেৎ
সত্যমীরিতং। অব্যাহতগতি স্তস্য
ভবতীতি ন সংশয়ঃ ॥ ইযং তে কথি-
তা বিদ্যা সুগোপ্যা যা সুরাসুরৈঃ।
তব স্নেহেন ভক্ত্যা চ বক্ষ্যে হহং প-
রমেশ্বরি ॥ ২॥*॥ ততো হন্যৎ
সাধনং বক্ষ্যে শৃণুষ্বৈকমনাঃ প্রিয়ে।
গত্বা বটতলং দেবীং পূজয়েৎ সাধ-
কোত্তমঃ ॥ প্রাণায়ামং ষড়ঙ্গঞ্চ মা-
য়য়াথ সমাচরেৎ। মদ্যো মাংসং
বলিং দত্বা পূজয়েত্তাং সমাহিতঃ।
অর্ঘ্যমুচ্ছিষ্ট রক্তেন দদ্যাত্তস্যৈ দিনে
দিনে ॥ প্রচণ্ডবদনাং গৌরীং পক্ক
বিম্বাধরাং প্রিয়ে। রক্তাম্বরধরাং বা-
লাং সর্ব্বকামপ্রদাং শুভাং। এবং
ধ্যাত্বা জপেন্মন্ত্র ময়ুতং সাধকোত্ত-
মঃ। সপ্তদিনং সমভ্যর্চ্য চাষ্টমে বি-
ধিবচ্চরেৎ ॥ কায়েন মনসা বাচা পূ-
জয়েচ্চ দিনে দিনে। তারং মায়া তথা
কূর্চং রক্ষ কর্ম্মণি তদ্বহিঃ। আগচ্ছ
কনকান্তে তু বতিঃ স্বাহা মহামনুঃ ॥
আনিশীথং জপেন্মন্ত্রং বলিং দত্বা
মনোহরং। সাধকেন্দ্রং দৃঢ়ং মত্বা
আযাতি সাধকালয়ে ॥ সাধকেন্দ্রো-
হপি তাং দৃষ্ট্বা দদ্যাদর্ঘ্যাদিকং ততঃ
। ততঃ সপরিবারেণ ভার্য্যা স্যাৎ
কাম ভোজনৈঃ ॥ বস্ত্র ভূষাদিকং ত্য-
ক্ত্বা যাতি সা নিজ মন্দিরং। এবং ভা-
র্য্যা ভবেন্নিত্যং সাধকাজ্ঞানুরূপতঃ

॥ আত্মভার্য্যাং পরিত্যজ্য ভজেত্তাঞ্চ বিচক্ষণঃ। ৩॥ * ॥ ততঃ কামেশ্বরী বক্ষ্যে সর্ব্বকাম ফল প্রদাং। প্রণবং ভুবনেশানী চাগচ্ছ কামেশ্বরি ততঃ॥ বহ্নে ভার্য্যা মহামন্ত্রং সাধকানাং সুখাবহং। পূর্ব্ববৎ সকলং কৃত্বা ভূর্জ্জপত্রে সুশোভনে॥ গোরোচনাভিঃ প্রতিমাং বিনির্ম্মায স্বলঙ্কৃতাং। শয্যা মারুহ্য প্রজপে স্মন্ত্র মেকমনা স্ততঃ॥ সহস্রৈক প্রমাণেন মাসমেকং জপেদ্বধঃ। ঘৃতেন মধুনা দীপং দদ্যাচ্চ সুসমাহিতঃ॥ কামেশ্বরী শশাঙ্কাস্যাং চলৎ খঞ্জন লোচনাং। সদা লোল গতিং কান্তাং কুসুমাস্ত্র শিলীমুখীং॥ এবং ধ্যাত্বা জপেন্মন্ত্রং নিশীথে যাতি সা তদা। দৃষ্ট্বা তু সাধকঃ শ্রেষ্ঠা মাজ্ঞাং দেহীতি তাং বদেৎ॥ স্ত্রীভাবেন মুদা তস্যৈ দদ্যাৎ পাদ্যাদিকং ততঃ। সুপ্রসন্না তদা দেবী সাধকং তোষয়েৎ সদা॥ অন্নাদৈস্তর্পয়িত্বা ভোগেন পতিবৎ পালয়েৎ সদা। নীত্বা রাত্রৌ সুথৈশ্বর্য্যং দত্ত্বা চ বিপুলং ধনং॥ বস্ত্রালঙ্কার দ্রব্যাদীন্ প্রভাতে যাতি নিশ্চিতং। এবং প্রতিদিনং তস্য সিদ্ধিঃ স্যাৎ কাম রূপতঃ॥৪॥ * ॥ ততঃ পটে বিনির্ম্মায পুত্তলিং ধ্যান রূপতঃ। সুবর্ণ বর্ণাং গৌরাঙ্গীং সর্ব্বালঙ্কার ভূষিতাং॥ নূপুরাঙ্গদ হারাঢ্যাং রম্যাঞ্চ পুষ্করেক্ষণাং। এবং ধ্যাত্বা জপেন্মন্ত্রং দত্ত্বা চ পাদ্য মুত্তমং॥ সচন্দনেন পুষ্পেণ জাতী পুষ্পেণ যত্নতঃ। গুগ্গুলুং ধূপ দীপৌ চ দদ্যাত্মূলেন সাধকঃ॥ মন্ত্রস্তু। তারং মায়াং তথা গচ্ছ রতিসুন্দরি পদং ততঃ। বহ্নি জায়া চাষ্টসহস্রং জপেন্মন্ত্রং দিনে দিনে॥ মাসান্তে দিবসং প্রাপ্য স্বর্য্যাৎ পূজাদিকং শুভং। ঘৃতদীপং তথা গন্ধং পুষ্পং তাম্বূল মেব চ॥ তাবন্মন্ত্রং জপেদ্বিদ্বান্ যাবদায়াতি সুন্দরী। জ্ঞাত্বা দৃঢং সাধকেন্দ্রং নিশীথে যাতি নিশ্চিতং॥ তত স্তা মর্চ্চয়েদ্ভক্ত্যা জাতী কুসুম মালয়া। সুসন্তুষ্টা সাধকেন্দ্রং তোষয়েদ্রতি ভোজনৈঃ॥ ভূত্বা ভার্য্যা চ সা তস্মৈ দদাতি বাঞ্ছিতং বরং। ভূষাদিকং পরিত্যজ্য প্রভাতে যাতি সা ধ্রুবং॥ সাধকাজ্ঞানুরূপেণ প্রযাতি সা দিনে দিনে। নির্জ্জনে প্রান্তরে দেবি সিদ্ধিঃ স্যান্নাত্র সংশযঃ॥ ত্যক্ত্বা ভার্য্যাং ভজেত্তাঞ্চ অন্যথা নশ্যতি ধ্রুবং। ৫॥ * ॥ ততো হন্যৎ সাধনং বক্ষ্যে স্বগৃহে শিব সন্নিধৌ। বেদাদ্যং ভু-

বেশ্যা আগচ্ছ পদ্মিনি বল্লভা ॥ পাবকস্য মহামন্ত্রং পূর্ববৎ সকলং ততঃ। মণ্ডলং চন্দনৈঃ কৃত্বা মূলমন্ত্রং লিখেত্ততঃ॥ পদ্মাননাং শ্যামবর্ণাং পীনোত্তুঙ্গ পয়োধরাং। কোমলাঙ্গীং স্মেরমুখীং রক্তোৎপল দলেক্ষণাং॥ এবং ধ্যাত্বা জপেন্মন্ত্রং সহস্রঞ্চ দিনে দিনে। মাসান্তে পূর্ণিমাং প্রাপ্য বিধিবৎ পূজয়েৎ সদা॥ আনিশীথং জপেন্মন্ত্রং দৃঢ়াভ্যাসেন সাধকঃ। সর্বত্র মঙ্গলং জ্ঞাত্বা সা যাতি সাধকালয়ং॥ ভূত্বা ভার্য্যা সাধকং হি সাধয়েদ্বিবিধৈ রপি। ভোগৈ দিব্যৈ ভূষণাদ্যৈঃ পদ্মিনী সা দিনে দিনে॥ পতিবৎ পাতি তং লোকে নিত্যং স্বর্গে চ সর্বদা। ত্যক্ত্বা ভার্য্যাং ভজেত্তাঞ্চ সাধকেন্দ্রঃ সদা প্রিয়ে॥ ৬॥ * ॥ ততো বক্ষ্যে মহাবিদ্যাং বিশ্বামিত্রেণ ধীমতা। জ্ঞাত্বা যাং সাধিতা বিদ্যা বলা চাতিবলা প্রিয়ে॥ মন্ত্রস্তু প্রণবান্তে মহামায়া নটিনি পাবকপ্রিয়া। মহাবিদ্যেহ কথিতা গোপনীয়া প্রযত্নতঃ॥ অশোকস্য তলং গত্বা স্নানং পূর্ববদাচরেৎ। মূলমন্ত্রেণ সকলং জপ্যাচ্চ সুসমাহিতঃ॥ ত্রৈলোক্য মোহিনীং গৌরীং বিচিত্রাম্বরধারিণীং। বিচিত্রালঙ্কৃতাং রম্যাং নর্ত্তকী বেশধারিণীং॥ এবং ধ্যাত্বা জপেন্মন্ত্রং সহস্রঞ্চ দিনে দিনে। মাংসোপহারৈঃ সংপূজ্য ধূপং দীপং নিবেদয়েৎ॥ গন্ধ চন্দন তাম্বূলং দদ্যাত্তস্যৈ মুদা বধঃ। মাস মেকঞ্চ তাং ভক্ত্যা পূজয়েৎ সাধকোত্তমঃ॥ মাসান্তে দিবসং প্রাপ্য জপ্যাচ্চ পূজনং মহৎ॥ অর্দ্ধরাত্রৌ ভয়ং দত্ত্বা কিঞ্চিৎ সাধক সত্তমে॥ সুদৃঢ়ং সাধকং মত্বা যাতি সা সাধকালয়ং। বিদ্যাভিঃ সকলাভিশ্চ কিঞ্চিৎ স্মেরমুখী ততঃ॥ বরং বরয় শীঘ্রং ত্বং যত্তে মনসি বর্ত্ততে। তৎ শ্রুত্বা সাধক শ্রেষ্ঠো ভাবয়েন্মনসা ধিয়া॥ মাতরং ভগিনীং বাপি ভার্য্যাং বা প্রীতি ভাবতঃ। কৃত্বা সন্তোষয়েদ্ভক্ত্যা নটিনী তৎ করোত্যলং॥ মাতাস্যাদ্যদি সা দেবী পুত্রবৎ পাতি তং মুদা। স্বর্ণশতং সিদ্ধিদ্রব্যং দদাতি সা দিনে দিনে॥ ভগিনী যদি সা কন্যাং দেবস্য নাগকন্যকাং। রাজকন্যাং সমানীয় দদাতি সা দিনে দিনে॥ অতীতানাগতাং বার্ত্তাং সর্বাং জানাতি সাধকঃ। ভার্য্যা স্যাৎ যদি সা দেবী দদাতি বিপুলং ধনং॥ অন্নাদ্যৈ রুপচারৈশ্চ

দদাতি কামভোজনং। স্বর্ণশতং সদা তস্মৈ দদাতি সা ধ্রুবং প্রিয়ে॥ যৎ যৎ বাঞ্ছতি তৎ সর্ব্বং দদাতি নাত্র সংশয়ঃ॥ ৭॥ *॥ মহাবিদ্যাং প্রবক্ষ্যামি সাবধানাবধারয়। জক্ষমেন সমালিখ্য ভূর্জ্জপত্রে স্ত্রিয়ং মুদা॥ ততোষ্টদল মালিখ্য অর্ঘ্যান্যাসাদিকং প্রিয়ে। জীবন্যাসাদিকং কৃত্বা ধ্যায়েত্তত্র প্রসন্নধীঃ॥ শুদ্ধস্ফটিক সঙ্কাশাং নানা রত্ন বিভূষিতাং। মঞ্জীর হার কেয়ূর রত্ন কুণ্ডল মণ্ডিতাং। এবং ধ্যাত্বা জপেন্মন্ত্রং সহস্রন্তু দিনে দিনে॥ প্রতিপদ্দিন মারভ্য পূজয়েৎ কুসুমাদিভিঃ। ধূপ দীপ বিধানৈশ্চ ত্রিসন্ধ্যং পূজয়েন্মুদা॥ পূর্ণিমাং প্রাপ্য গন্ধাদ্যৈঃ পূজয়েৎ সাধকোত্তমঃ। ঘৃত দীপং তথা ধূপং নৈবেদ্যঞ্চ মনোরমং॥ রাত্রৌ চ দিবসে জপ্যং অর্ঘ্যাচ সুসমাহিতঃ। প্রভাতসময়ে যাতি সাধকস্যান্তিকং ধ্রুবং॥ প্রসন্নবদনা ভূত্বা ক্ষোব্যন্দুতি ভোজনৈঃ। দেব দানব গন্ধর্ব্ব বিদ্যাধৃগ্ যক্ষ রক্ষসাং॥ কন্যাভী রত্ন ভূষাভিঃ সাধকেন্দ্রং মুহু র্মুহুঃ। চর্ব্যং চোষ্যাদিকং দ্রব্যং দিব্যং দদাতি সা ধ্রুবং। স্বর্গে মর্ত্ত্যে চ পাতালে যদ্বস্তু বিদ্যতে প্রিয়ে। আনীয় দীয়তে সত্যং সাধকাজ্ঞানুরূপতঃ॥ স্বর্ণশতং সদা তস্মৈ দদাতি সা দিনে দিনে। সাধকায় বরং দত্ত্বা যাতি সা নিজ মন্দিরং॥ তস্যা বর প্রসাদেন চিরজীবী নিরাময়ঃ। সর্ব্বজ্ঞঃ সুন্দরঃ শ্রীমান্ সর্ব্বগো ভবতি ধ্রুবং॥ রেমে সার্দ্ধং তয়া দেবি সাধকেন্দ্রো দিনে দিনে। মন্ত্রস্তু। তারং মায়াং তথা গচ্ছানুরাগিণি মৈথুন প্রিয়ে। বহ্নিভার্য্যা মনুঃ প্রোক্তঃ সর্ব্বসিদ্ধি প্রদায়কঃ॥ এষা মধুমতী তু স্যাৎ সর্ব্বসিদ্ধিপ্রদা প্রিয়ে। গুহ্যাৎ গুহ্যতরা বিদ্যা তব স্নেহাৎ প্রকীর্ত্তিতা॥ ৮॥ *॥ দেব্যুবাচ। শ্রুতঞ্চ সাধনং পুণ্যং যক্ষিণীনাং সুখপ্রদং। যস্মিন্ কালে প্রকর্ত্তব্যং বিধিনা কেন বা প্রভো॥ অত্রাধিকারিণঃ কেবা সমাসেন বদস্ব মে। ঈশ্বর উবাচ। বসন্তে সাধয়েদ্ধীমান্ হবিষ্যাশী জিতেন্দ্রিয়ঃ॥ সদা ধ্যানপরো ভূত্বা তদ্দর্শন মহোৎসুকঃ। উজ্জাটে প্রান্তরে বাপি কামরূপে বিশেষতঃ॥ স্থানেষ্বেকতমং প্রাপ্য সাধয়েৎ সুসমাহিতঃ। অনেন বিধিনা সাক্ষাৎ ভবিষ্যতি ন সংশয়ঃ॥ দেব্যাশ্চ সেবকাঃ সর্ব্বে পরং চাত্রাধিকারিণঃ। তারকব্রহ্মণো ভৃত্যং বি

নাপ্যত্রাধিকারিণঃ ॥ ইতি তন্ত্রসারে। যোগিনীসাধন প্রকরণং সমাপ্তং ॥ ॥*॥ দশবিধ দশান্তর্গত দশাবিশেষঃ। যথা। স্ব নক্ষত্রং ধ্রুবং কৃত্বা পঞ্চ তত্র বিমিশ্রয়েৎ। মঙ্গলেন হৃতঃ শেষো মঙ্গলাদি বিনিশ্চয়ঃ ॥ মঙ্গলা পিঙ্গলা ধন্যা ভ্রামরী ভদ্রিকা তথা। উল্কা সিদ্ধা সঙ্কটা চ যোগিন্যষ্টৌ প্রকীর্ত্তিতাঃ ॥ অব্দৈকং মঙ্গলা ধত্তে শেষা স্তৈকৈক বর্দ্ধিকাঃ। পুন স্ত্র্যঙ্কান্নিবর্ত্তন্তে চক্রবৎ পরিবর্ত্তনাৎ ॥ অপিচ। রোহিণ্যাদৌ ত্রিরাবৃত্ত্যা মঙ্গলাদৌ যথা ক্রমং। উল্কা সিদ্ধা সঙ্কটা চ অশ্বিন্যাদি ত্রয়ে পুনঃ ॥ এতাষা মন্তর্দশা। দশা বর্ষস্তু ষট্‌ত্রিংশদ্ভাগং কৃত্বা বিনির্দ্দিশেৎ। যস্তু যস্যা হি যদ্বর্ষং তত্তদ্ভাগং প্রকীর্ত্তিতং ॥*॥ ফলং যথা। মঙ্গলা মঙ্গলং ধত্তে হতুল ভোগং সুখং তথা। গোগজাশ্ব সহস্রাণি গৃহে তস্য দিনে দিনে। পিঙ্গলা বিবিধং দুঃখ মমচিন্তাদি সম্ভবং। দদাতি নাশং শত্রুভ্যো ধন ধান্য গজাদিকং ॥ ধন্যা চ সততং দত্তে সর্বত্র বিজয়াদিকং। শত্রুভ্যো রক্ষতে নিত্যং মাতৃবৎ পরিপালয়েৎ ॥ ভ্রামরী বিবিধং দুঃখ মন্তঃ সম্ভ্রম সম্ভবং। অকস্মাত্তস্য দুর্দৈবং বিঘিনা প্রেরিতং ভবেৎ ॥ ভদ্রিকা বিবিধান্ ধত্তে সম্মানাদি মনোরথান্ ॥ তুষ্টা চেদ্ভদ্রিকা নিত্যং দুর্গহঃ সুগ্রহায়তে। উল্কা ব্যাধিকরী প্রোক্তা নিত্যং নানা ভয়প্রদা ॥ উল্কা যদি সমায়াতি সুগ্রহো দুর্গ্রহায়তে। সিদ্ধা চ সাধয়েৎ সর্বং মন্ত্রারম্ভ ধনাদিকং ॥ যস্য তুষ্টা ভবেৎ সিদ্ধা লক্ষ্মী স্তস্য করে স্থিতা। সঙ্কটা সঙ্কটং দত্তে ভক্ষ্যে ধান্য ধনাদিকং ॥ সৈব ভাব্যা সদা নিত্যং গৃহী কৃষ্ণঃ ফণী যথা। ইত্যদ্যোগচন্দ্রিকা ॥

যোগী পুং যোগযুক্তঃ। তস্য লক্ষণাদি যথা। স্বর্ণেলোষ্টে গৃহে হরণ্যে সুস্নিগ্ধে চন্দনে তথা। সমতা ভাবনা যস্য স যোগী পরিকীর্ত্তিতঃ ॥ ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ৩৫ অধ্যায়ঃ ॥ অপিচ। আত্মৌপম্যেন সর্বত্র সমং পশ্যতি যোহর্জ্জুন। সুখং বা যদি বা দুঃখং স যোগী পরমো মতঃ ॥ ইতি শ্রীভগবদ্গীতায়াং ৭ অধ্যায়ঃ ॥ অন্যচ। ঋষয়ঊচুঃ। ভগবন্ দেবতারিঘ্ন হিরণ্যাদি নিসূদন। চত্বারো হ্যাশ্রমাঃ প্রোক্তা যোগীনান ক উচ্যতে ॥ কূর্ম উবাচ। সর্ব্বকর্ম্মাণি

সংন্যস্য সমাধি মচলং স্থিতঃ। য আস্তে নিশ্চলো যোগী স সন্ন্যাসী ন পঞ্চমঃ॥ সর্ব্বেষামাশ্রমাণান্তু দ্বৈবিধ্যং শ্রুতি দর্শিতঃ। ব্রহ্মচার্য্যপকুর্ব্বাণো নৈষ্ঠিকো ব্রহ্ম তৎপরঃ॥ যো হধীত্য বিধিবদ্বেদান্ গৃহস্থাশ্রম মাব্রজেৎ। উপকুর্ব্বাণকো জ্ঞেয়ো নৈষ্ঠিকো মরণান্তিকঃ॥ উদাসীনঃ সাধকশ্চ গৃহস্থো দ্বিবিধো ভবেৎ। ঋণানি ত্রীণ্যপাকৃত্য ত্যক্ত্বা ভার্য্যা ধনাদিকং॥ একাকী যস্তু বিচরেদুদাসীনঃ স মোক্ষিকঃ। কুটুম্ব ভরণাযত্তঃ সাধকোসৌ গৃহী ভবেৎ॥ তপ স্তপ্যতি যো হরণ্যে যজেদ্দেবান্ জুহোতি চ। স্বাধ্যায়ে চৈব নিরতো বনস্থ স্তাপসো মতঃ॥ তপসা কর্ষিতো হত্যর্থং যস্তু ধ্যানপরো ভবেৎ। সংন্যাসিকঃ স বিজ্ঞেয়ো বানপ্রস্থাশ্রমে স্থিতঃ॥ যোগাভ্যাসরতো নিত্য মারুরুক্ষু র্জিতেন্দ্রিয়ঃ। জ্ঞানায় বর্ত্ততে ভিক্ষুঃ প্রোচ্যতে পরমেষ্ঠিকঃ॥ যস্ত্বাত্ম রতিরেব স্যান্নিত্য তৃপ্তো মহামুনিঃ। সম্যগ্দর্শন সম্পন্নঃ স যোগী ভিক্ষু রুচ্যতে॥ জ্ঞান সন্ন্যাসিনঃ কেচিদ্বেদসন্ন্যাসিনঃ পরে। কর্ম্মসন্ন্যাসিনঃ কেচি দ্বিবিধাঃ পরমেষ্ঠিকাঃ॥ যোগী চ ত্রিবিধো জ্ঞেয়ো ভৌতিকঃ সাংখ্য এব চ। তৃতীয়ো হন্যাশ্রমী প্রোক্তো যোগ মুত্তম মাস্থিতঃ॥ ইতি কৌর্ম্মে ২ অধ্যায়ঃ॥

যোগীশ্বরঃ পুং যোগিনাংশ্রেষ্ঠঃ। সতু যাজ্ঞবল্ক্যমুনিঃ। যথা। যোগীশ্বরং যাজ্ঞবল্ক্যং সংপূজ্য মুনয়ো হব্রুবন্। বর্ণাশ্রমেতরাণাং নো ব্রূহি ধর্ম্মানশেষতঃ॥ যোগিনাং সনকাদীনাং ঈশ্বরঃ শ্রেষ্ঠ স্তং যাজ্ঞবল্ক্যং সংপূজ্য। ইতি মিতাক্ষরা॥

যোগীশ্বরী স্ত্রী দুর্গা। যথা। যোগিশক্রাদয়ো দেবাঃ সনকাস্তা স্তপোবলাঃ। তেষাং স্বামী তথা যোগী ঈশ্বরী প্রভু পালনা॥ আত্মেন্দ্রিয় মনাদীনাং সংযোগো যোগ উচ্যতে। তেষাং বা যোজনাদ্যোগী যোগৈশ্বর্য্য বিবোধনা॥ ইতি দেবীপুরাণে ৪৫ অধ্যায়ঃ॥

যোগেশঃ পুং যাজ্ঞবল্ক্যঃ। ইতি হেমচন্দ্রঃ॥

যোগেশ্বরঃ পুং শ্রীকৃষ্ণঃ। যথা। ব্রূহি যোগেশ্বরে কৃষ্ণে ব্রহ্মণ্যে ধর্ম্ম বর্ম্মণি। স্বাং কাষ্ঠা মধুনোপেতে ধর্ম্মঃ কং শরণং গতঃ॥ ইতি শ্রীভাগবতে ১ স্কন্ধে ১ অধ্যায়ঃ॥

যোগেশ্বরী স্ত্রী বন্ধ্যাকর্কোটকী।

ইতি ভাবপ্রকাশঃ ॥
যোগেষ্টং ক্লী সীসকং। ইত্যমরঃ॥
যোগ্যং ক্লী ঋদ্ধিনামৌষধং॥ বৃদ্ধি-
নামৌষধং। ইত্যমরঃ ॥
যোগ্যঃ ত্রি প্রবীণঃ॥ যোগার্হঃ॥
উপায়ী ॥ শক্তঃ। ইতি মেদিনী
হেমচন্দ্রশ্চ ॥ পুষ্যনক্ষত্রে পুং।
ইতি মেদিনী ॥
যোগ্যতা স্ত্রী ক্ষমতা। ইতি লোক-
প্রসিদ্ধিঃ॥ শাব্দবোধকারণবিশে-
ষঃ। স তু পদার্থানাং পরস্পরসম্ব-
ন্ধে বাধাভাবঃ। ইতি সাহিত্যদ-
র্পণঃ॥ ন্যায়মতে তৎপদার্থে তৎ
পদার্থবত্তা। যথা। পদার্থে তত্র
তদ্বত্তা যোগ্যতা পরিকীর্ত্তিতা।
ইতি ভাষাপরিচ্ছেদঃ॥ যোগ্যতাং
নিরূপয়তি পদার্থ ইত্যাদিনা।
একপদার্থে হপরপদার্থ সম্বন্ধো
যোগ্যতা ইত্যর্থঃ। তজ্জ্ঞানাভা-
বাচ্চ বহ্নিনা সিঞ্চতীত্যাদৌ ন শা-
ব্দবোধঃ ॥ নন্বেতস্যা যোগ্যতায়া
জ্ঞানং শাব্দবোধাৎ প্রাক্ সর্ব্বত্র
ন সম্ভবতি বাক্যার্থস্যাপূর্ব্বত্বা-
দিতি চেন্ন তত্তৎ পদার্থ স্মরণে
সতি ক্বচিৎ সংশয় রূপস্য ক্বচি-
ন্নিশ্চয় রূপস্যাপি যোগ্যতায়া
জ্ঞানস্য সম্ভবাৎ। নব্যাস্তু যো-
গ্যতা জ্ঞানং ন শাব্দজ্ঞানে কারণং বহ্নিনা সিঞ্চতি ইত্যাদৌ লোকে
বহ্নিকরণকত্বাভাবরূপাযোগ্যতা-
য়া নিশ্চয়েন প্রতিবন্ধাৎ শাব্দবো-
ধঃ। তদভাব নিশ্চয়স্য লৌকিক
সন্নিকর্ষাজন্য দোষ বিশেষাজন্য
জ্ঞানমাত্রে প্রতিবন্ধকত্বাৎ শাব্দে
প্রতিবন্ধকত্বং সিদ্ধং যোগ্যতা জ্ঞা-
ন বিলম্বাচ্চ শাব্দ বিলম্বো ন সিদ্ধ
ইতি বদন্তি। ইতি সিদ্ধান্তমুক্তা-
বলী ॥
যোগ্যা স্ত্রী অভ্যাসঃ॥ অর্কযোষিৎ
। ইতি মেদিনী ॥ শস্ত্রাভ্যাসঃ।
তৎপর্য্যায়ঃ। খুরলী ২ শ্রমঃ ৩ অ-
ভ্যাসঃ ৪। তদ্ভূঃ খলূরিকা। ইতি
হেমচন্দ্রঃ ॥
যোজনং ক্লী পরমাত্মা॥ চতুঃক্রোশী
॥ যোগঃ। ইতি মেদিনী ॥ ॥
দ্বাদশাঙ্গুলিকঃ শঙ্কুস্তদ্বয়ন্তু শয়ঃ
স্মৃতঃ। তচ্চতুষ্কং ধনুঃ প্রোক্তং ক্রো-
শো ধনুঃ সহস্রিকঃ॥ তচ্চতুষ্কং যো-
জনং স্যাদিত্যাদি মানশাস্ত্রং ॥ অ-
ন্যমতে ষোড়শসহস্রহস্তৈর্যোজনং
ভবতি। দ্বাত্রিংশৎ সহস্রহস্তৈরপি
যোজনং। যথা। যবোদরৈ রঙ্গুল-
মষ্টসংখ্যৈর্হস্তোঙ্গুলৈঃ ষড়গুণিতৈ
শ্চতুর্ভিঃ। হস্তৈ শ্চতুর্ভি র্ভবতীহ

দণ্ডঃক্রোশঃ সহস্র দ্বিতয়েন তেষাং ॥ স্যাদ্‌যোজনং ক্রোশ চতুষ্টয়েন তথা করাণাং দশকেন বংশঃ ॥ ইতি লীলাবতী ॥

যোজনগন্ধা স্ত্রী কস্তুরী ॥ সীতা ॥ সত্যবতী। ইতি মেদিনী ॥

যোজনগন্ধিকা স্ত্রী সত্যবতী। ইতি জটাধরঃ ॥ কস্তুরী। ইত্যজয়পালঃ ॥ সীতা। যোজনগন্ধা শব্দাৎ স্বার্থে ক প্রত্যয়েন জাতত্বাৎ ॥

যোজনপর্ণী স্ত্রী মঞ্জিষ্ঠা। ইতি রত্নমালা ॥

যোজনবল্লিকা স্ত্রী মঞ্জিষ্ঠা। ইতি রাজনির্ঘণ্টঃ ॥

যোজনা স্ত্রী যোগকারণা। ইতি এ্যন্ত যুজধাতো রয প্রত্যয়েন সিদ্ধং ॥

যোজনবল্লী স্ত্রী মঞ্জিষ্ঠা। ইত্যমরঃ ॥

যোজিতং ত্রি কারিতযোজনং। এ্যন্ত যুজধাতোঃ কর্ম্মণি ক্ত প্রত্যয়েন নিয়মং ॥

যোটকঃ পুং যোটনং। মেলন মিতি যাবৎ। বিবাহে রাশিযোটক গ্রহযোটক নক্ষত্রযোটক গণযোটক বর্ণযোটক যোনিযোটক বর্গযোটক ভেদেন সপ্তবিধো যোটকঃ। তত্র রাশি যোটকে ষড়ষ্টক নব পঞ্চম দ্বি দ্বাদশ বিরস সপ্তক যোগা নিষিদ্ধাঃ। তদাহ শ্রীপতিসংহিতায়াং। ষড়ষ্টকং ত্রিকোণঞ্চ দ্বি দ্বাদশক মেব চ। পরস্পরং জন্মরাশে স্ত্যক্ত্বা কন্যা জমায়যোঃ ॥ ষড়ষ্টকে ভবেদ্দোষো বৈধব্যং মৃত্যু রেব বা। ত্রিকোণে পুত্র হানিঃ স্যাৎ ধনহানি ধনব্যযে ॥ পুরুষস্যাষ্টমে কন্যা কন্যাযাঃ ষষ্ঠকে পুমান্। শুভং ষড়ষ্টকং জ্ঞেযং নোদ্বাহে দূষণং ভবেৎ ॥ নব পঞ্চমে। পুংসো গৃহাৎ সুত গৃহে সুতহা চ কন্যা ধর্ম্মে স্থিতা সুতবতী পতিবল্লভা চ। দ্বি দ্বাদশে ধনগৃহে ধনহা চ কন্যা রিপ্ফে স্থিতা ধনবতী পতিবল্লভা চ ॥ যোটকে সপ্তকে মেষ তুলৌ যুগ্মহযৌ তথা। সিংহ ঘটৌ সদা বর্জ্যৌ মৃতি স্তত্রানুবীক্ষিবঃ ॥ রাজযোটক মাহ দীপিকাযাং। একরাশৌ চ দম্পত্যোঃ শুভং স্যাৎ সম সপ্তকে। চতুর্থ দশকে চৈব তৃতীযেকাদশে তথা ॥ ইতি রাশিযোটক বিচারঃ ॥ ❀ ॥ গ্রহযোটকে গ্রহশত্রু যোগো নিষিদ্ধঃ। কন্যা বর রাশ্যধিপ গ্রহযোঃ শত্রুত্বে গ্রহ শত্রু যোগঃ। তত্র বিবাহে রোগাদিঃ ফলং। তদাহ গর্গঃ। মরণং ভাব বিরোধে গ্রহ রিপুভাবে চাচিরেণ রোগাদিঃ। ইতি গ্রহ-

যোটক বিচারঃ ॥*॥ অন্যেযৌটকাঃ প্রপঞ্চভয়ান্নলিখিতাঃ। ইতি জ্যোতিষং ॥ গ্রন্থান্তরে যোটকশব্দশ্চবর্গতৃতীয়াদিশ্চ ॥

যোতুঃ পুং পরিমাণং। ইত্যুণাদিকোষঃ ॥

যোত্রং ক্লী যোক্ত্রং। ইত্যমরঃ ॥

যোদ্ধা পুং যুদ্ধকর্ত্তা। তৎপর্য্যায়ঃ। ভটঃ২ যোধঃ৩। ইত্যমরঃ ॥

যোধঃ পুং যোদ্ধা। ইত্যমরঃ ॥

যোধনং ক্লী যুদ্ধং ॥ অস্ত্রং। যুধ ধাতো র্ভাবে করণে চানট্ প্রত্যয়েন নিষ্পন্নং ॥

যোধসংরাবঃ পুং অন্যোন্যংযোধানাং যুদ্ধায়াহ্বানং। তৎপর্য্যায়ঃ। ক্রন্দনং২। ইত্যমরভরতৌ ॥

যোধেয়ঃ পুং যোদ্ধা। যোধশব্দাৎ ঢেয় প্রত্যয়েন নিষ্পন্নঃ ॥

যোনলঃ পুং শস্যবিশেষঃ। তৎপর্য্যায়ঃ। যবনালঃ২ জূর্ণাহ্বয়ঃ৩ দেবধান্যং৪ জোন্তালা৫ বীজপুষ্পিকা৬। ইতি হেমচন্দ্রঃ ॥

যোনিঃ পুং স্ত্রী আকরঃ। ইতি মেদিনী ॥ কারণং ॥ জলং। ইতি হেমচন্দ্রঃ ॥ উৎপত্তিস্থানং। ইতি ত্রিকাণ্ডশেষঃ ॥ ভগং। ইত্যমরঃ ॥ তৎপর্য্যায়ঃ। বরাঙ্গং২ উপস্থঃ৩ স্মরমন্দিরং৪। ইতি রাজনির্ঘণ্টঃ ॥ রতিগৃহং৫ জন্মবর্ত্ম৬ অধরং৭ অবাচ্যদেশঃ৮ প্রকৃতিঃ৯ অপথং১০ স্মরকূপকঃ১১ অপদেশঃ১২ প্রকৃতিঃ১৩ পদ্মী১৪ সংসারমার্গকঃ১৫ সংসারমার্গঃ১৬ গুহ্যং১৭ স্মরাগারং১৮ স্মরধ্বজং১৯ রত্যঙ্গং২০ রতিগহ্বরং২১ কলত্রং২২ অধঃ২৩। ইতি শব্দরত্নাবলী ॥ রতিমন্দিরং২৪ স্মরগৃহং২৫ কন্দর্পকূপঃ২৬ কন্দর্পসম্বাধঃ২৭ কন্দর্পসন্ধিঃ২৮ স্ত্রীচিহ্নং২৯। ইতি জটাধরঃ ॥ স তু গর্ভস্থায়াঃ সপ্তভির্মাসৈ র্ভবতি। ইতি সুখবোধঃ ॥ *॥ তস্যা লক্ষণং যথা। শুভঃ কমঠপৃষ্ঠাভো গজস্কন্ধোপমো ভগঃ। বামোন্নত শ্চেৎ কন্যাপ্তিঃ পুত্রাপ্তো দক্ষিণোন্নতঃ ॥ আখুরোমা গূঢ়মণিঃ সুশ্লিষ্টঃ সংহতঃ পৃথুঃ। তুঙ্গঃ কমলবর্ণাভঃ শুভো২শ্বত্থদলাকৃতিঃ ॥ জরঙ্কুখরূ কপোযশ্চুল্লিকোদর সন্নিভঃ। রোমশো বিবৃতাস্যশ্চ দৃশ্যনাসঃ। ইতি দুর্ভগঃ ॥ শঙ্খাবর্ত্তো ভগো যস্যাঃ সা গর্ভং নিহ নেচ্ছতি। চিপিটঃ কর্পরাকারঃ কিঙ্করী পদদো ভগঃ ॥ বংশবেতসপত্রাভৌ গজরোমোচ্চনাসিকঃ। বিকটঃ কুটিলাকারো

অমৃগন্ধস্তথাশুভঃ ॥ ইতি কাশীখণ্ডে ৩৭ অধ্যায়ঃ ॥ * ॥ অপিচ । শঙ্খনাভ্যাকৃতি যোনি স্ত্র্যাবর্ত্তা সা চ কীর্ত্তিতা । তস্যাঃ তৃতীয়ে ত্ব্যাবর্ত্তে গর্ভশয্যা প্রতিষ্ঠিতা ॥ * ॥

অথ যোনিরোগাধিকারঃ ।

তত্র যোনিরোগাণাং নিদানান্যাহ । মিথ্যাহার বিহারাভ্যাং দুষ্টৈর্দোষৈঃ প্রদূষিতাৎ । আর্ত্তবাদ্বীযত শ্চাপি দৈবাদ্বা স্যু র্ভগে গদাঃ ॥ * ॥ রোগিণীনাং যোনীনাং নামান্যাহ । উদাবর্ত্তা তথা বন্ধ্যা বিপ্লুতা চ পরিপ্লুতা । বাতলা যোনযো রুগ্না বাত দোষেণ পঞ্চধা ॥ পঞ্চধা পিত্ত দোষেণ তত্রাদৌ লোহিতক্ষরা । প্রস্রংসিনী বামিনী চ পুত্রঘ্নী পিত্তলা তথা ॥ অত্যানন্দা কর্ণিনী চ চরণানন্দ পূর্ব্বিকা । অতিপূর্ব্বাপি সাজ্ঞেয়া শ্লেষ্মলা চ কফাদিমাঃ ॥ খণ্ডাণ্ডিনী চ মহতী সূচী বক্ত্রা ত্রিদোষিণী ॥ পঞ্চৈতা যোনয়ঃ প্রোক্তাঃ সর্ব্বদোষ প্রকোপতঃ ॥ * ॥ অথ তাসাং লক্ষণান্যাহ । সা ফেনিল মুদাবর্ত্তা রজঃ কৃচ্ছ্রেণ মুঞ্চতি । বন্ধ্যা নষ্টার্ত্তবা জ্ঞেয়া বিপ্লুতা নিত্যবেদনা ॥ পরিপ্লুতায়াং ভবতি গ্রাম্যধর্ম্মে রুজা ভৃশং । বাতলা কর্কশা স্তব্ধা শূলনিস্তোদ পীড়িতা ॥ চতসৃষ্বপি চাদ্যাসু ভবত্যনিল বেদনাঃ । অনিলবেদনা স্তোদাদয়ঃ ॥ বাতলায়াং ভূতিশযিতা বাত বেদনা বোদ্ধব্যা । বাতলা ইত্যন্বয়াৎ ॥ * ॥ সদাহং ক্ষরতে রক্তং যস্যাঃ সা লোহিতক্ষরা । প্রস্রংসিনী স্রংসতে চ ক্ষোভিতা দুঃপ্রজায়িনী ॥ ক্ষোভিতা বিমর্দ্দিতা স্রংসতে স্বস্থানাৎ চ্যবতে দুঃপ্রজায়িনী দুষ্ট প্রজননশীলা ॥ সবাত মুদ্গিরেদ্বীর্য্যং বামিনী রজসা যুতং । স্থিতং স্থিতং হন্তি গর্ভং পুত্রঘ্নী রক্ত সংস্রবাৎ ॥ পুত্র শব্দো হত্রাপত্যোপলক্ষকঃ ॥ অত্যর্থং পিত্তলা যোনি দাহ পাক জ্বরান্বিতা । চতসৃষ্বপি চাদ্যাসু পিত্ত লিঙ্গোচ্ছ্রয়ো ভবেৎ ॥ * ॥ অত্যানন্দা ন সন্তোষং গ্রাম্যধর্ম্মেণ বিন্দতি । কর্ণিন্যাং কর্ণিকা যোনৌ শ্লেষ্মাসৃগ্ভ্যাং প্রজায়তে ॥ কর্ণিকা মাংসস্য কর্ণিকাকারো গ্রন্থিঃ । মৈথুনে চরণাপূর্ব্বং পুরুষাদতিরিচ্যতে । অতিরিচ্যতে রজোমুঞ্চতি ইত্যর্থঃ । বহুশ শ্চাতিচরণা তয়ো র্ব্বীজং ন তিষ্ঠতি । বহুশঃ বারং বারং অতিরিচ্যতে তয়োঃ চরণাতিচরণয়োঃ । শ্লেষ্মলা পিচ্ছিলা যোনিঃ কণ্ডুযুক্তাতিশীতলা । চতসৃষ্বপি চাদ্যাসু শ্লেষ্ম লিঙ্গো

স্রবো ভবেৎ ॥ * ॥ অনার্ত্তবস্তনী ষণ্ডী খরস্পর্শা চ [illegible] স্তনী ঈষৎ স্তনৌ যস্যাং সা অত্র লক্ষ্যা ষণ্ডী ॥ অণ্ডিনী মাহ। মহামেঢ্র গৃহীতায়া বালায়া অণ্ডিনী ভবেৎ। মহামেঢ্রঃ পুরুষঃ তেন গৃহীতায়া বালায়াঃ সূক্ষ্মযোনি ছিদ্রায়া অণ্ডিনী অণ্ডবল্লম্বমানা যোনি র্ভবতি ॥ বিবৃতাতিমহাযোনিঃ সূচী বক্ত্রাতিসংবৃতা। সর্ব্বলিঙ্গ সমুত্থানাৎ সর্ব্বদোষ প্রকোপজা ॥ চতসৃষ্বপি চাদ্যাসু সর্ব্বলিঙ্গ নিদর্শনং ॥ * ॥ অসাধ্যা যোনী রাহ। পঞ্চাসাধ্যা ভবন্তীহ যোনয়ঃ সর্ব্বদোষজাঃ। পঞ্চ ষণ্ডী প্রভৃতয়ঃ ॥ * ॥ অথ যোনিকন্দস্য নিদান মাহ। দিবাস্বপ্নাদতিক্রোধাদ্ব্যায়ামাদতিমৈথুনাৎ। ক্ষতাচ্চ নখ দন্তাদ্যৈ র্ব্বাতাদ্যাঃ কুপিতা যথা ॥ বাতাদ্যাঃ কুপিতা যথা। যথা নিদান কুপিতা বাতাদ্যাঃ ॥ * ॥ রূপমাহ। পূয শোণিত সঙ্কাশং লকুচাকৃতি সন্নিভং। জনয়ন্তি যদা যোনৌ নাম্না কন্দঃ স যোনিজঃ ॥ লকুচাকৃতি সন্নিভং লকুচাকারাকারং। লকুচ মত্র বিশেষ্যং বোদ্ধব্যং ॥ * ॥ বাতজাদি ভেদেন রূপ ভেদ মাহ। রূক্ষং বিবর্ণং স্ফুটিতং ॥ বাতিকং তং বিনির্দ্দিশেৎ। দাহ রাগ জ্বর যুতং বিদ্যাৎ পিত্তাত্মকং তু তং ॥ তিলপুষ্প প্রতীকাশং কণ্ডূমত্তং কফাত্মকং। সর্ব্বলিঙ্গ সমাযুক্তং সন্নিপাতাত্মকং ভবেৎ ॥ * ॥ * ॥ * ॥

অথযোনিরোগাণাংচিকিৎসা।

তত্র বন্ধ্যা চিকিৎসা। তস্যা লক্ষণ মাহ। বন্ধ্যা নষ্টার্ত্তবা জ্ঞেয়েতি। ততঃ প্রথমতো নষ্টার্ত্তবা চিকিৎসা। আর্ত্তবা দর্শনে নারী মৎস্যান্ সেবেত নিত্যশঃ। কাঞ্জিকঞ্চ তিলান্ মাষানুদশ্বিচ্চ তথা দধি ॥ ইক্ষ্বাকু বীজ দন্তী চপলা গুড় মদন কিণ্ব যবশূকৈঃ। সস্নুক্ক্ষীরৈ র্ব্বর্ত্তি র্যোনিগতা কুসুমসঞ্জননী। ইক্ষ্বাকুঃ কটুতুম্বী। চপলা পিপ্পলী। দনন্তো মদনফলং। কিণ্বং সুরাবীজং ॥ পীতং জ্যোতিষ্মতী পত্রং রাজিকোগ্রাসনং ত্র্যহং। শীতেন পয়সা পিষ্টং কুসুমং জনয়েদ্ধ্রুবং ॥ জ্যোতিষ্মতী কটভী বৃক্ষবিশেষঃ কঙ্গুনী ইতি লোকে। পয়সা দুগ্ধেন ॥ * ॥ অথ বন্ধ্যা চিকিৎসা। বলা সিতা সাতিবলা মধুকং বটস্য শুঙ্গং গজকেশরঞ্চ। এতন্মধু ক্ষীর ঘৃতৈ র্নিপীয় বন্ধ্যা সুপুত্রং নিয়তং প্রসূতে ॥ অশ্বগন্ধা কষায়েণ সিদ্ধং দুগ্ধং ঘৃতান্বিতং।

ঋতুস্নাতাঙ্গনা প্রাতঃ পীত্বা গর্ভং দধাতি হি॥ পুষ্যেণোদ্ধৃতং লক্ষ্মণায়া মূলং দুগ্ধেন কন্যয়া। পিষ্ট্বা পীত্বা ঋতুস্নাতা গর্ভং ধত্তে ন সংশয়ঃ॥ অশ্বগন্ধমূলং ধাতক্যা অসুমানি বটাঙ্কুরাঃ। নীলোৎপলং পয়ো যুক্ত মেতদ্গর্ভপ্রদং ধ্রুবং॥*॥ যাবলা পিবতি পার্শ্ব পিপ্পলং জীরকেণ সহিতং হিতাশনা। শ্বেতয়া বিশিখপুঙ্খয়া যুতং সা সুতং জনয়তীহ নান্যথা। শ্বেতজস্নুময়া শরপুংখয়া সহ॥ পত্র মেকং পলাশস্য পিষ্ট্বা দুগ্ধেন গর্ভিণী। পীত্বা পুত্রমবাপ্নোতি বীর্য্যবন্তং ন সংশয়ঃ॥ শূকরশিম্বীমূলং মধ্যং বা দধি ফলস্য সপযস্কং। পীত্বাথোভয লিঙ্গীবীজং কন্যাং ন সূতে স্ত্রী॥ পুত্রমজারী মূলং বিষ্ণুক্রান্তেশালিঙ্গিনী সহিতা। এতৎগর্ভেষ্টদিনং পীত্বা কন্যাং ন সর্ব্বথা সূতে॥ পুত্রনজারী পতত্রিআ তস্যা মূলং। ঈশ্বরলিঙ্গিনী পচওরিআ॥*॥ গর্ভপ্রদর ভেষজ কথনাবসরে গর্ভাজনক মপি ভেষজ মাহ। পিপ্পলী বিডঙ্গ টঙ্কণ সমচূর্ণং যা পিবেৎ পয়সা। ঋতুসময়ে নহি তস্যা গর্ভঃ সংজায়তে ক্বাপি॥ আরনাল পরিপেষিতং ত্র্যহং যা জয়াজসূম নত্তিপুষ্পিণী। সৎপুরাণ গুড কুষ্ঠ্যাদি। পী সা দধাতি নহি গর্ভমঙ্গনা॥*॥ তাসু যোনিষু চাদ্যাসু স্নেহাদি ক্রম ইষ্যতে। বস্ত্যভ্যঙ্গ পরীষেক প্রলেপ পিচুধারণং॥ বস্তি স্রোতোত্তরবস্তিঃ। ক্রম শ্চিকিৎসা॥ নত বার্ত্তাকিনী অষ্ঠ সৈন্ধবামরদারুভিঃ। তিলতৈলং পচেম্মাত্রী পিচুং তস্য বিধারয়েৎ॥ বিপ্লুতায়াং সদা যোনৌ ব্যথা তেন প্রশাম্যতি॥ নতং তগরং। বাতলাং কর্কশাং স্তব্ধা মল্পস্পর্শাং তথৈব চ। কুস্ত্রী স্বেদৈ কপচরেদন্তর্বেশ্মনি সংবৃতে॥ ধারয়েদ্বা পিচুং যোনৌ তিলতৈলস্য সা সদা। পিত্তলানাঞ্চ যোনীনাং সেকাভ্যঙ্গ পিচু ক্রিয়াঃ॥ শীতাঃ পিত্তহরাঃ কার্য্যাঃ স্নেহনার্থং ঘৃতানি চ। প্রস্রংসিনীং ঘৃতাভ্যক্তাং ক্ষীরস্বিন্নাং প্রবেশয়েৎ। পিধায় বেশবারেণ ততো বন্ধং সমাচরেৎ॥ শুণ্ঠী মরিচ কৃষ্ণাভি র্ধান্যকাজাজি দাড়িমৈঃ। পিপ্পলীমূল সংযুক্তৈ র্বেশবারঃ স্মৃতো বুধৈঃ॥ ধাত্রীরসং সিতাযুক্তং যোনি দাহে পিবেৎ সদা। সূর্য্য ক্রান্তা ভবং মূলং পিবেদ্বা তণ্ডুলাম্বনা॥ যোন্যাস্ত পূযস্রাবিণ্যাঃ শোধন দ্রব্য নির্ম্মিতৈঃ। সগোমূত্রৈঃ

জলবর্ণৈঃ পিণ্ডৈঃ সংপূরণং হিতং ॥
শোধন দ্রব্যাণি নিম্বপত্রাদীনি
দুর্গন্ধাং পিচ্ছিলাং বাপি চূর্ণৈঃ পঞ্চক
ষায়জৈঃ। পূরয়েদ্ধারয়েদ্রাজবৃক্ষাদি
ক্বথিতাম্বুনা ॥ পঞ্চকষায়াঃ। বচা
বাসা পটোল প্রিয়ঙ্গু নিম্বাঃ॥ রা-
জবৃক্ষাদি। ধনবহেরা। পিপ্পল্যা
মরিচৈর্মাষৈঃ শতাহ্বা কুষ্ঠ সৈন্ধবৈঃ
। বর্ত্তিস্তুল্যা প্রদেশিন্যা যোনৌ শ্লে-
ষ্ম বিশোধিনী ॥ তুল্যা প্রদেশিন্যা
দৈর্ঘ্যেণ পরিণাহেন চ। কর্ণিন্যাং
বর্ত্তয়ো দেয়াঃ শোধন দ্রব্য নির্মিতাঃ
। গুড়ূচী ত্রিফলা দন্তী ক্বথিতোদক
ধারয়া॥ যোনিং প্রক্ষালয়েত্তেন তত্র
কণ্ডুঃ প্রশাম্যতি॥ মুদ্গপুষ্পং সখদি-
রং পথ্যাং জাতীফলং তথা। বিম্বীং
পূগঞ্চ সংচূর্ণ্য বস্ত্রপূতং ক্ষিপেদ্ভগে॥
যোনির্ভবতি সংকীর্ণা ন স্রবেচ্চ জলং
ততঃ। কপিকচ্ছু ভবং মূলং ক্বাথয়ে-
দ্বিধিনা ভিষক্॥ যোনিঃ সংকীর্ণতাং
যাতি ক্বাথেনানেন ধাবনাৎ। জীর-
ক দ্বিতয়ং কৃষ্ণা সুষবী সুরভি বচা
। বাসকঃ সৈন্ধব শ্চাপি যবক্ষারো
যবানিকা॥ এষাং চূর্ণং ঘৃতে কিঞ্চিৎ
ভৃষ্টং খণ্ডেন মোদকং। কৃত্বা খাদে-
দ্যথা বহ্নি যোনিরোগাদ্বিমুচ্যতে॥
মঞ্জিষ্ঠা মধুকং কুষ্ঠং ত্রিফলা শর্করা

বলা। মেদে পয়স্যা কাকোলী মূল-
ঞ্চৈবাশ্বগন্ধজং॥ অজমোদা হরিদ্রে
দ্বে প্রিয়ঙ্গু কটুরোহিণী। উৎপলং কু-
মুদং দ্রাক্ষা কাকোল্যৌ চন্দন দ্বয়ং
॥ এতেষাং কার্ষিকৈ র্ভাগৈ র্ঘৃত
প্রস্থং বিপাচয়েৎ। শতাবরী রসং
ক্ষীরং ঘৃতাজ্জ্ঞেয়ং চতুর্গুণং॥ সর্পি-
রেতন্নরঃ পীত্বা স্ত্রীষু নিত্যং বৃষায়-
তে। পুত্রান্ জনয়তে বীরান্ মেধা-
ঢ্যান্ প্রিয়দর্শনান্॥ যা চৈবাস্থির
গর্ভাস্যাৎ পুত্রং বা জনয়েন্মৃতং।
অল্পায়ুষং বা জনয়েৎ যাচ কন্যাং প্র-
সূয়তে॥ যোনিরোগে রজোদোষে প-
রিস্রাবে চ শস্যতে। প্রজাবর্দ্ধন মা-
য়ুষ্যং সর্ব্বগ্রহ নিবারণং। নাম্না ফল
ঘৃতং হ্যেতদশ্বিভ্যাং পরিবর্ত্তিতং॥
অনুক্তং লক্ষণা মূলং ক্ষিপন্ত্যত্র চি-
কিৎসকাঃ। জীববৎসৈক বর্ণায়া ঘৃ-
তঞ্চাত্র প্রযুজ্যতে॥ আরণ্য গোময়ে-
নেহ বহ্নি জ্বালা চ দীয়তে। মেদে
মেদা মহামেদাঽভাবে রভাবে শতা-
বরী দ্বিগুণা দেয়া। পয়স্যাত্র ক্ষীর
কাকোলী কাকোলী যুগলাভাবে অ-
শ্বগন্ধা দ্বিগুণা দেয়া। প্রিয়ঙ্গুস্থানে
কেচিদ্ধিঙ্গু পঠন্তি। পয়স্যা কাকো-
লীত্যুক্ত্বা পুনঃ কাকোল্যাবিতি কা-
কোলী ক্ষীরকাকোল্যৌ দ্বৈগুণ্যার্থং

এতস্য ফলঘৃতস্য পাঠো নানা তন্ত্রেষু নানা বিধঃ। তত্র হিঙ্গু বচা তগর জীবকর্ষভকা এবাধিকাঃ। তত্র জীবকর্ষভযো রভাবে বিদারীকন্দো দ্বিগুণো দেয়ঃ। ফলঘৃতং সকল যোনি রোগেষু ॥ * ॥ অথ যোনিকন্দস্য চিকিৎসা। গৈরিকাম্রাস্থি জন্তুঘ্ন রজন্যঞ্জন কট্‌ফলং। পূরয়েদ্যোনি মেতেষাং চূর্ণৈঃক্ষৌদ্র সমন্বিতৈঃ॥ ত্রিফলাযাঃ কষাযেণ সক্ষৌদ্রেণ চ সেচযেৎ। প্রমদা যোনিকন্দেন ব্যাধিনা পরিমুচ্যতে ॥*॥ অথ প্রসঙ্গাৎ গুর্ব্বিণ্যারোগাণাং চিকিৎসা। হ্রীবেরাতিবিষা মুস্ত মোচ শক্রৈঃ শৃতং জলং। দদ্যাদ্রক্তে প্রচলিতে প্রদরে কুক্ষি রুজ্যপি ॥ কুক্ষিরুক্ উদরব্যথা। চলিতগর্ভস্থাপনে হ্রীবেরাদিক্বাথঃ ॥*॥ অথ গর্ভস্রাবপাতযো র্নিদানং। গ্রাম্যধর্ম্মাধ্বগমনযানাসন প্রপীড়নৈঃ। জ্বরোপবাসোৎপতন প্রহারাজীর্ণ ধাবনৈঃ॥ বমনাচ্চ বিরেকাচ্চ জন্তুনা-দ্রূভপাতনাৎ। তীক্ষ্ণ ধারোষ্ণ কটুক তিক্ত রুক্ষ নিষেবণাৎ॥ বেগাভিঘাতাদ্বিষমাদাসনাচ্ছযনাদ্ভযাৎ। গর্ভঃপততি রক্তস্য সশূলং দর্শনং ভবেৎ॥ গর্ভপাতনাৎ নিযুনে গর্ভেপাতনশীলং দ্রব্যং তস্মাৎ। গর্ভস্য স্রাব পাতযোঃ পূর্ব্বরূপ মাহ। গর্ভেপততীত্যাদি। পততি স্রাবেণ পাতেন বা পতিষ্যতি। স্রাবপাতযো রবধি মাহ। আচতুর্থাত্ততো মাসাৎ প্রস্রবেদ্গর্ভ বিদ্রবঃ। ততঃ স্থির শরীরস্য পাতঃ পঞ্চম ষষ্ঠযোঃ॥ আচতুর্থাৎ মাসাৎ চতুর্থ মাসপর্য্যন্তং। গর্ভস্য বিদ্রবঃ। শোণিতরূপগর্ভঃ। স্রবতি শোণিত মিতি ভোজ বচনাৎ। স্থিরশরীরস্য কঠিনশরীরস্য গর্ভস্য। গর্ভপাতস্য দৃষ্টান্তং দর্শযতি। গর্ভোভিঘাত বিষমাসন পীড়নাদ্যৈঃ। পক্বং দ্রুমাদিব ফলং পততি ক্ষণেন। যথা বৃন্ত ভগ্নং পক্বং ফলমভিঘাতেনাকালং এব পততি তথা গর্ভোপ্যভিঘাতাদিনা অকালেপি পততি ॥ * ॥ অথ গর্ভস্রাবস্য চিকিৎসা ॥ গুর্ব্বিণ্যা গর্ভতো রক্তং স্রবেদ্যদি মুহুর্মুহুঃ। তন্নিরোধায সুস্নিগ্ধ মুৎপলাদি শৃতং পিবেৎ ॥ উৎপলাদিগণ মাহ। উৎপলং নীলমরক্তং কহ্লারং কুমুদং তথা। শ্বেতাম্ভোজঞ্চ মধুক মুৎপলাদি রযংগণঃ ॥ সংশীলিতো হরত্যেব দাহং তৃষ্ণাং হৃদাময়ং। রক্তপিত্তঞ্চ মূর্চ্ছাঞ্চ তথা ছর্দি মরোচকং ॥ * ॥ অথ গর্ভপাতস্য উপদ্রবানাহ। প্রস্র-

শয়ানে গর্ভে স্যাদ্দাহঃ শূলঞ্চ পা-
র্শ্বযোঃ। পৃষ্ঠরুক্ প্রদরানাহৌ মূত্র
সঙ্গশ্চ জায়তে। প্রস্রংশমানে পত-
তি॥ * ॥ অথ গর্ভস্য স্থানান্তর গ-
মনে চোপদ্রবানাহ। স্থানাৎ স্থানা-
ন্তরং তস্মিন্ প্রযাত্যপি চ জায়তে।
আম পক্বাশয়াদৌ তু ক্ষোভঃ পূর্ব্বে
প্যুপদ্রবাঃ॥ পূর্ব্বেপ্যুপদ্রবাঃ পার্শ্ব
শূলাদয়ঃ॥ * ॥ তচ্চিকিৎসামাহ।
স্নিগ্ধ শীতাঃ ক্রিয়া স্তেষু দাহাদিষু
সমাচরেৎ। কুশ কাশোরুবূকাণাং
মূলৈর্গোক্ষুরকস্য চ॥ শৃতং দুগ্ধং সি-
তা যুক্তং গর্ভিণ্যাঃ শূল হৃৎপরং।
শ্বদংষ্ট্রা মধুক ক্ষুদ্রাম্লানৈঃ সিদ্ধং পয়ঃ
পিবেৎ॥ শর্করা মধু সংযুক্তং গুর্ব্বিণী
বেদনাপহং। অম্লানঃ পুষ্পজাতিঃ।
অয়ং বাণপুষ্প ইতি গৌড়াদৌ প্র-
সিদ্ধঃ॥ মৃৎকোষ্ঠাগারিকা গেহ সং-
ভবাত্র চ মৃত্তিকা। সমঙ্গা ধাতকী
পুষ্পং গৈরিকঞ্চ রসাঞ্জনং॥ তথা স-
র্জ্জরসৈশ্চ তান্ যথা লাভং বিচূর্ণ-
য়েৎ। তচ্চূর্ণং মধুনা লিহ্যান্নারী প্রদর
শান্তয়ে॥ মৃৎকোষ্ঠাগারিকা সংভ-
বা মৃৎকোষ্ঠাগারিকা বরটী তন্নির্ম্মি-
তগৃহভবা মৃত্তিকা। সমঙ্গা লজ্জালুঃ
॥ কসেরুৎপল শৃঙ্গাট কল্কং বা পয়-
সা পিবেৎ। পক্বং বচা রসোনাভ্যাং
হিঙ্গু সৌবর্চ্চলান্বিতং। আনাহে তু
পিবেৎ দুগ্ধং গুর্ব্বিণী সুখিনী ভবেৎ
॥ সৌবর্চ্চলং চৌহার ইতি লোকে।
তৃণপঞ্চক মূলানাং কল্কেন বিপচেৎ
পয়ঃ। তৎপয়ো গুর্ব্বিণী পীত্বা মূত্র
সঙ্গাদ্বিমুচ্যতে॥ শালীক্ষু কুশ কা-
শৈঃ স্যাচ্ছরেণ তৃণ পঞ্চকং। এষাং
মূলং তৃষা দাহ পিত্তাসৃঙ্মূত্র সঙ্গ-
হৃৎ॥ * ॥ অথ প্রসূতায়া যোনেঃ
ক্ষতাদেশ্চিকিৎসা। তুম্বীপত্রং তথা
লোধ্রং সমভাগং সুপেষয়েৎ। তেন
লেপো ভগে কার্য্যঃ শীঘ্রং স্যাদ্যো-
নি রক্ষতা॥ পলাশোড়ুম্বর ফলং
তিলতৈল সমন্বিতং। যোনৌ বিলি-
প্তং বিধিনা গাঢ়াকরণমুত্তমং॥ ইতি
ভাবপ্রকাশঃ॥ * ॥ * ॥ * ॥

অথ কুযোনিপ্রাপ্তিকারণানি।

হরি জুহ্বতি নাগ্নৌ যে গোবিন্দং
নার্চ্চয়ন্তি যে। নভক্তৈর্নাত্মবিদ্যাঞ্চ
সতীর্থ বিমুখাশ্চ যে॥ সুবর্ণং বস্ত্র
তাম্বূলং রত্ন মধুঃ ফলং জলং। আর্ত্তে-
ভ্যো ন প্রযচ্ছন্তি সর্ব্বে সুকৃত দারকাঃ
॥ বন্ধুস্বঞ্চ স্ত্রীধনানি যে ভাবেন হ-
রন্তি যে। বলেন ছদ্মনা বাপি ধূর্ত্তাশ্চ
পরবঞ্চকাঃ॥ নাস্তিকাঃ কুহকাশ্চৌ-
রা যে চান্যেরকৃত্তয়ঃ। বাল বৃদ্ধা-
তুর স্ত্রীষু নির্দয়াঃ সত্যবর্জ্জিতাঃ॥

অগ্নিদা গরদা যে চ যেচান্যে কূটসাক্ষিণঃ। অগম্যা গামিনঃ সর্ব্বে যে চান্যে গ্রামযাজিনঃ॥ ব্যাধাচরণ সম্বন্না বর্ণাদি ধর্ম্ম বর্জ্জিতাঃ। দেবোপদেব দনুজ রক্ষো যক্ষাদি সেবিনঃ॥ সর্ব্বদা মাদকদ্রব্য পানমত্তা হরিদ্বিষঃ। দেবতোচ্ছিষ্ট পতিত নৃপ শূদ্রান্ন ভোজিনঃ॥ অসৎকর্ম্ম রতা নিত্যং সর্ব্বপাতক পাপিনঃ। পাষণ্ড ধর্ম্মাচরণাঃ পুরোধো বৃত্তি জীবিনঃ॥ পিতৃ মাতৃ স্বসাপত্য স্বদারত্যাগিনশ্চ যে। যে কদর্য্যাশ্চ লুব্ধাশ্চ নাস্তিকা ধর্ম্মদূষকাঃ॥ ত্যজন্তি স্বামিনং যুদ্ধে ত্যজন্তি শরণাগতং। গবাং ভূমেশ্চ হর্ত্তারো যে চান্যে রত্নদূষকাঃ॥ মহাক্ষেত্রেষু সর্ব্বেষু প্রতিগ্রহরতাশ্চ যে। পরদ্রোহ রতা যে চ তথা যে প্রাণিহিংসকাঃ॥ পরাপবাদিনঃ পাপা দেবতা গুরুনিন্দকাঃ। অপ্রতিগ্রাহিণঃ সর্ব্বে সম্ভবন্তি পুনঃ পুনঃ॥ প্রেত রাক্ষস পৈশাচ্যতির্য্যগ্ বৃক্ষ অযোনিষু। ন তেষাং সুখলেশো হস্তি ইহলোকে পরত্র চ॥ তস্মাৎ ত্যক্ত্বা নিষিদ্ধার্থং বিহিতং কর্ম্ম কারয়েৎ। যজ্ঞং দানং তপস্তীর্থং মন্ত্রং দেবং গুরুং ভয়েৎ॥ নাচরেৎ অংসিতং কর্ম্ম মনসা চ কদাচন। বিপাকং কর্ম্মণাং দৃষ্ট্বা যোনি কোটিষু দুঃসহং॥ চতুর্ভিরপি বর্ণৈস্তু সেব্যো ধর্ম্মো নিরন্তরং। ইতি পাদ্মোত্তরখণ্ডে ১৮ অধ্যায়ঃ॥ ॥ যোনিদৃষ্টাদ্যসাধ্বীত্বং যথা। সাধ্বী স্ত্রী মাতৃতুল্যা চ সর্ব্বথা হিতকারিণী। অসাধ্বী বৈরতুল্যা চ শশ্বৎ সন্তাপ দায়িকা॥ মুখদুষ্টা যোনিদুষ্টা চৈবাসাধ্বীতি বিশ্রুতা। ইতি ব্রহ্মবৈবর্ত্তে গণপতিখণ্ডে ২ অধ্যায়ঃ॥ ॥ পাপ পুণ্য ফলং অধমোত্তম যোনি প্রাপ্তি যথা। পাপ পুণ্য ফলং লোকে প্রত্যক্ষং খলু দৃশ্যতে। দেব দানব মানুষ্য তির্য্যক্ত্বং কৃমি যোনিতা। নানা যোনিষু জন্মানি নানা ব্যাধি প্রপীড়িতাঃ। মরণং বাল বৃদ্ধানা মন্ধত্বং জড়তা তথা॥ ঐশ্বর্য্যং সুদরিদ্রত্বং পাণ্ডিত্যং মূর্খতা তথা। এতা শ্চরাচরে লোকে ভবন্তি কথমন্যথা॥ ইতি পাদ্মোত্তরখণ্ডে ২১ অধ্যায়ঃ॥ ॥ পক্ষিযোনি প্রাপ্তিকারণং যথা। ইতি শ্রুতকথো বিপ্র সারসং প্রাহ বানরঃ। সন্যগ্বেত্তি ভবাননং ত্বং কথং পক্ষিত্বং গতঃ॥ বৃত্তান্ত মে তং কথয় শ্রোতুমিচ্ছামি সারস। সারস উবাচ। কথয়িষ্যামি তৎকর্ম্ম যেনাহং দুর্গতিং গতঃ।

পক্ষিযোনিং গতো যেন তৎ সর্ব্বং
শ্রোতু মর্হসি ॥ ধান্য ধারী শতং
সাগু মুৎসৃষ্টং হি ত্বয়া পুরা । বহু
ভ্যো ব্রাহ্মণেভ্যশ্চ নর্ম্মদায়াঃ পরি-
গ্রহে ॥ পৌরোহিত্যমদাল্লোভা
দ্বঞ্চয়িত্বা দ্বিজাং স্তথা । কিঞ্চিদত্বা
তু তেভ্যশ্চ গৃহীতমখিলং ময়া ॥
বিপ্রসাধারণদ্রব্য গ্রহণোৎপন্ন পা
তকাৎ । পতিতঃ কালসূত্রেহং নর
কে রক্তকর্দমে ॥ বক্তুমত্র ন শক্নোমি
দুঃখং বানর নারকং । দৈবাৎ কথ
মপি প্রাপ্ত উত্তারো নরকাম্বুধেঃ ॥
ময়া যদি তত্রাপীহ শঙ্কনত্ব মুপ-
স্থিতং । অপহৃত্য পুরা কাংস্য ভা
জনং ভগিনী গৃহাৎ । দ্যূতকর্ত্রে ময়া
দত্তং তেন মে সারসী গতিঃ ॥
ইয়ঞ্চ ব্রাহ্মণী পূর্ব্বং কাংস্য চৌরী সু
দারুণা । তেনেহ সারসী জাতা ম-
দ্ভার্য্যা সহধর্ম্মিণী ॥ ইতি তত্রৈব
১৯।২০ অধ্যায়ঃ ॥ * ॥ পাপিনাং
নরক ভোগানন্তরং স্থাবরাদি যোনি
প্রাপ্তির্যথা । স্থাবরাঃ কৃময়ো ২জা
শ্চ পক্ষিণঃ পশবো নরাঃ । ধার্ম্মিকা
স্ত্রিদশা স্তদ্বন্মোক্ষিণশ্চ যথা ক্রমং ॥
সহস্র ভাগ প্রথমা দ্বিতীয়ানুক্রমা
স্তথা । সর্ব্বে হ্যেতে মহাভাগ যাব-
ন্মুক্তি সমাশ্রয়াঃ । ইতি বিষ্ণুপুরাণে
২ অংশে ৫ অধ্যায়ঃ ॥ * ॥ পাপিনাং
নরক ভোগানন্তরং স্থাবরাদ্যাসূত্ত-
রোত্তর মুৎকৃষ্টাসু নবধা ভিন্নাসু যো
নিষু জন্মক্রম মাহ । স্থাবরা ইতি ।
অজ্ঞা মৎস্যাদয়ঃ । ধার্ম্মিকা নরেষ্বে
ব পুণ্য বিশেষেণ কেচিন্মোক্ষিণশ্চ
মুমুক্ষবশ্চ যথাক্রমং ভবন্তীতি শেষঃ
। তেষাঞ্চ পূর্ব্ব বাহুল্য মুত্তরোত্তরা-
ল্পত্বঞ্চাহ সহস্রেতি । দ্বিতীয়ানুক্র-
মাঃ দ্বিতীয়ো ২নুক্রম উদ্দেশো যে-
ষাং দ্বিতীয়স্থানে ২নুক্রান্তা যে ক্রময়-
স্তে সহস্রভাগ প্রথমাঃ সহস্রভাগাঃ
সহস্রগুণাঃ প্রথমাঃ প্রথম নির্দ্দিষ্টাঃ
স্থাবরা যেষাং তে । কৃমিভ্যঃ সহস্র-
গুণ মধিকাঃ স্থাবরাঃ । তৎসহস্র
তম ভাগাঃ কৃময় ইত্যর্থঃ । পঞ্চম্যন্ত
পাঠেপি দ্বিতীয় স্থানে ২নুক্রান্তাৎ
কৃমি বর্গাৎ সহস্র গুণাঃ স্থাবরা
ইত্যেবার্থঃ । তথা সর্ব্বেহ্যেত ইতি
। সর্ব্বে স্থাবরাঃ স্থানান্তর নির্দ্দিষ্টেভ্যঃ
কৃমিভ্যঃ সহস্রগুণ মধিকাঃ । তথা
কৃময়ঃ স্থানান্তর নির্দ্দিষ্টেভ্যো ২জ্ঞে-
ভ্যঃ সহস্রগুণ মধিকাঃ । এবং পক্ষ্যা-
দিষ্বপি দ্রষ্টব্যং । মোক্ষং সম্যগাশ্রয়-
ন্তে ইতি মোক্ষ সমাশ্রয়া মুমুক্ষবো
জ্ঞাননিষ্ঠা স্তৎপর্য্যন্ত মেবং পূর্ব্বপূর্ব্বা-
দুত্তরোত্তর ন্যূনত্বেন জন্মক্রমঃ । ততঃ

পরং মুক্তিঃ। এতচ্চ সংসারি জীব বাহুল্য কথনং মোক্ষস্য দুর্লভতা সূচনার্থং। অযঞ্চ নবধা নির্দ্দিষ্টো ক্রমক্রমঃ প্রাযিক এব। তদুক্ত মাদিত্য পরাণে। ব্যুৎক্রমেণাপি মানুষ্যং প্রাপ্যন্তে পুণ্য গৌরবাৎ। বিচিত্রা গতযঃ পুংসাং কর্ম্মণাং গুরু লাঘবৈঃ। ইতি তট্টীকা ॥ * ॥ অযোনিমোক্ষণং যথা। বারাহ উবাচ। যেন গর্ভং ন গচ্ছেত তন্মে শৃণু হি মাধবি। কথযিষ্যামি তে হ্যেবং সর্ব্ব ধর্ম বিনিশ্চযং॥ কৃত্বাপি বিপুলং কর্ম্ম আত্মানং ন প্রশংসতি। অর্ব্বতে বহু কর্ম্মাণি শুদ্ধেনৈবান্তরাত্মনা॥ কৃত্বাপি মম কর্ম্মাণি মৎ প্রিযাণি বসুন্ধরে। নৈব অর্ব্বন্ত্যহঙ্কারং ক্রোধঞ্চৈব ন গৃহ্নতি॥ সমং পশ্যতি চিত্তেন লাভালাভ বিবর্জিতঃ। পঞ্চানামিন্দ্রিযাণাঞ্চ সমর্থো নিগ্রহে রতঃ॥ কার্য্যাকার্য্যে বিজ্ঞানাতি সর্ব্ব ধর্ম্মেষু নিষ্ঠিতঃ। শীতোষ্ণ বাত বর্ষাদি ক্ষুৎ পিপাসা সহশ্চ যঃ॥ যো দরিদ্রো নিরালস্যঃ সত্যবাগনসূযকঃ। স্ব দার নিরতো নিত্যং পরদার বিবর্জিতঃ॥ সত্য বাদী বিশুদ্ধাত্মা নিত্যং ভাগবত প্রিযঃ। সম্বিভাগী বিশেষজ্ঞো নিত্যং ব্রাহ্মণ বৎসলঃ॥ প্রিযবাদী দ্বিজানাঞ্চ মম কর্ম্ম পরাযণঃ। অযোনিস্তু ন গচ্ছেত মম লোকায গচ্ছতি ॥ * ॥ বিযোনিমোক্ষণং যথা। অন্যচ্চ তে প্রবক্ষ্যামি তচ্ছৃণুষ্ব বসুন্ধরে। যো বিযোনিং ন গচ্ছেত মম কর্ম্ম পরাযণঃ॥ জীবহিংসা নিবৃত্তস্তু সর্ব্ব ভূত হিতঃ শুচিঃ। সর্ব্বত্র সমতাযুক্তঃ সম লোষ্টাশ্ম কাঞ্চনঃ॥ বাল্যে স্থিতো হপি বযসি ক্ষান্তো দান্তঃ শুভে রতঃ। কৃত্যং নৈব বিজানাতি পরেণাপকৃতং কৃচিৎ॥ কৃত্যঞ্চ সংস্মরেৎ হেতদসত্যঞ্চ ন জল্পতি। ব্যলীকেষু নিবৃত্তো যঃ পর্য্যেতি কৃত নিশ্চযঃ॥ নিত্যঞ্চ ধৃতিমান্ কিঞ্চিৎ পরোক্ষেপি নচ ক্ষিপেৎ। ঋতুকালে হভিগচ্ছেত অপত্যার্থং স্বকাং স্ত্রিযং॥ ঈদৃশাস্তু নরা ভদ্রে মম কর্ম্ম পরাযণাঃ। তে বিযোনিং ন গচ্ছন্তি মম গচ্ছন্তি সুন্দরি॥ * ॥ তির্য্যগ্যোনি মোক্ষণং যথা। বারাহ উবাচ। গুহ্যানাং পরমং গুহ্যং তচ্ছৃণুষ্ব বসুন্ধরে। তির্য্যগ্যোনি গতাশ্চাপি যে ন গচ্ছন্তি কিল্বিষং॥ অষ্টম্যাঞ্চ চতুর্দ্দশ্যাং মৈথুনং যো ন গচ্ছতি। ভুক্ত্বা পরস্য চান্নানি যশ্চৈব ন বিজল্পতি॥ বাল্যে বযস্যপি চ যো মম

নিত্য মনবৃতঃ। যেন কেনাপি সন্তুষ্টঃ পিতৃ মাতৃ প্রপূজকঃ॥ প্রাপ্তেন জীবতি চ যঃ প্রবিভাগী গুণান্বিতঃ। অলুব্ধঃ সর্ব্বকার্য্যেষু স্বতন্ত্রো নিত্য সংযতঃ॥ বিকর্ম্ম নাভিজ্ঞবী চ কৌমার বৃত সংস্থিতঃ। সর্ব্বভূত দয়াযুক্তঃ সত্ত্বেন চ সমন্বিতঃ॥ মতিমান্নৈব তপ্যেত পরার্থেষু কদাচন। ঈদৃশীং বুদ্ধি মাস্থায মম কর্ম্মাণি কুর্ব্বতে॥ তির্য্যগ্যোনিং ন গচ্ছেত মম লোকায গচ্ছতি। ইতি বরাহপুরাণে যোনিগর্ভ মোক্ষণ নামাধ্যাযঃ॥

যোনিকন্দঃ পুং যোনিরোগবিশেষঃ। তস্য নিদানং যথা। দিবাস্বপ্নাদতিক্রোধাদ্ব্যাযামাদতিমৈথুনাৎ। ক্ষতাচ্চ নখ দন্তাদ্যৈর্বাতাদ্যাঃ কুপিতা যথা॥ বাতাদ্যাঃ কুপিতা যথা যথা নিদান কুপিতা বাতাদ্যাঃ॥ রূপমাহ। পূয শোণিত সঙ্কাশং লকুচাকৃতি সন্নিভং। জনযন্তি যদা যোনৌ নাম্না কন্দঃ স যোনিজঃ॥ লকুচাকৃতি সন্নিভং লকুচাকারাকারং। গুড়ক মত্র বিশেষ্যং বোদ্ধব্যং॥ * ॥ বাতজাদিভেদেন রূপভেদমাহ। রূক্ষং বিবর্ণং স্ফুটিতং বাতিকং তং বিনির্দ্দিশেৎ। দাহ রাগ জ্বর যুতং বিদ্যাৎ পিত্তাত্মকন্তু তৎ॥ তিলপুষ্প প্রতীকাশং কণ্ডুমন্তং কফাত্মকং। সর্ব্বলিঙ্গ সমাযুক্তং সন্নিপাতাত্মকং ভবেৎ॥ * ॥ অস্য চিকিৎসা যোনিশব্দে দ্রষ্টব্যা। ইতি ভাবপ্রকাশঃ॥

যোনিজং ত্রি যোনিনিঃসৃতশরীরং। যথা। সা চ ত্রিধা ভবেদ্দেহ ইন্দ্রিযং বিষয স্তথা। যোনিজাদি ভবেদ্দেহ ইন্দ্রিযং ঘ্রাণ লক্ষণং॥ ইতি ভাষাপরিচ্ছেদঃ॥ যোনিজাদীতি যোনিজ মযোনিজ ঞ্চেত্যর্থঃ। যোনিজমপি জরাযুজ মণ্ডজঞ্চ। জরাযুজং মানুষাদীনাং অণ্ডজং সর্পাদীনাং। অযোনিজং স্বেদজোদ্ভিদাদিকং। স্বেদজাঃ কৃমি দংশাদ্যাঃ উদ্ভিদ স্তরু গুল্মাদ্যাঃ। নারকিণাঞ্চ শরীর মপ্যযোনিজং। ইতি সিদ্ধান্তমুক্তাবলী॥

যোনিদেবতা স্ত্রী পূর্ব্বফল্গুনীনক্ষত্রং। ইতি হেমচন্দ্রঃ॥

যোনিমুদ্রা স্ত্রী ভগবত্যাঃপূজাযাং প্রদর্শনীযাঙ্গুলী রচিত যোন্যাকার মুদ্রাবিশেষঃ। যথা। পঞ্চ প্রণামান্ কৃত্বাথ ওঁ হ্রীঁ শ্রীমিতি মন্ত্রকৈঃ। অন্যেষাং পুরত শ্চৈব

অম্বিকাম্বা যথেচ্ছয়া ॥ যোনিমুদ্রাং ততঃ পশ্চাৎ দর্শয়িত্বা বিসর্জ্জয়েৎ। দ্রৌপাণী প্রসৃতী কৃত্য কৃত্বা তুত্তান মঞ্জলিং ॥ অঙ্গুষ্ঠাগ্র দ্বয়ং ন্যস্য কনিষ্ঠাগ্রদ্বয়ো স্ততঃ। অনামিকায়াং বামস্য তৎ কনিষ্ঠাং পুরো ন্যসেৎ ॥ দক্ষিণস্যানামিকায়াং কনিষ্ঠাং দক্ষিণস্য চ। অনামিকায়াঃ পৃষ্ঠে তু মধ্যমে বিনিয়োজয়েৎ ॥ দ্বে তজ্জন্যৌ কনিষ্ঠাগ্রে তদগ্রেণৈব যোজয়েৎ ॥ যোনিমুদ্রা সমাখ্যাতা দেব্যাঃ প্রীতিকরী মতা ॥ ত্রিবারং দর্শয়েদগ্রে মূলমন্ত্রেণ সাধকঃ। তাং মুদ্রাং শিরসি ন্যস্য মণ্ডলং বিন্যসেত্ততঃ ॥ ইতি কালিকাপুরাণে ৫৩ অধ্যায়ঃ ॥ পারিভাষিকযোনিমুদ্রা যথা মন্ত্রমুক্তাবল্যাং। উপবিশ্যাসনে মন্ত্রী প্রাঙ্মুখো বাপ্যুদঙ্মুখঃ। ষট্‌চক্রং চিন্তয়েদ্দেবি প্রাণায়ামজরং ॥ চতুর্দলং স্যাদাধারঃ স্বাধিষ্ঠানন্তু ষড়্দলং। নাভৌ দশদলং পদ্মং সূর্য্যসংখ্য দলং হৃদি ॥ কণ্ঠে স্যাৎ ষোড়শদলং ভ্রূমধ্যে দ্বিদলং তথা। সহস্রদল মাখ্যাতং ব্রহ্মরন্ধ্রে মহাপথে ॥ আধারে কন্দমধ্যস্থং ত্রিকোণ মতিসুন্দরং। ত্রিকোণ মধ্যে দেবেশি কামবীজং সুলক্ষণং। কামবীজোদ্ভবং তত্র স্বয়ম্ভুলিঙ্গ মুত্তমং ॥ তস্যোপরি পুনর্ধ্যায়েৎ চিৎ কলাং হংস মাশ্রিতাং। ধ্যায়েৎ কুণ্ডলিনীং দেবীং স্বয়ম্ভুলিঙ্গ বেষ্টিতাং ॥ চিৎকলয়া কুণ্ডলিনীং তেজোরূপাং জগন্ময়ীং। আধারাদীনি পদ্মানি ভিত্ত্বা তেজঃ স্বরূপিণীং ॥ হংসেন মনুনা দেবীং ব্রহ্মরন্ধ্রং নয়েৎ সুধীঃ। সদাশিবেন দেবেশি ক্ষণ মাত্রং রমেৎ প্রিয়ে ॥ অমৃতং জায়তে দেবি তৎক্ষণাৎ পরমেশ্বরি। তদুদ্ভবা মৃতং দেবি লাক্ষারস সমোপমং ॥ তেনামৃতেন দেবেশি তর্পয়েৎ পরদেবতাং। ষট্‌চক্র দেবতা স্তত্র সন্তর্প্যামৃত ধারয়া ॥ আনয়েত্তেন মার্গেণ মূলাধারং পুনঃ সুধীঃ। ততস্তু পরমেশানি অক্ষমালাং বিচিন্তয়েৎ ॥ চিত্রিণী বিসতন্তুভা ব্রহ্মনাড়ী গতান্তরা। তয়া সংগ্রথিতা ধ্যেয়া সাক্ষাজ্জাগৎ স্বরূপিণী ॥ অনুলোম বিলোমেন মন্ত্রবর্ণ বিভেদতঃ। মন্ত্রেণান্তরিতান্ বর্ণান্ বর্ণেনান্তরিতং মনুং জপ্যাদ্বর্ণময়ীং মালাং সর্ব্ব মন্ত্রপ্রকাশিনীং। চরমার্ণং মেরুরূপং লঙ্ঘনং নৈব কারয়েৎ ॥ সবিন্দুং বর্ণ মুচ্চার্য্য পশ্চামন্ত্রং জপেৎ সুধীঃ। অষ্টোত্তর

শতং মূলমন্ত্রং জ্ঞানেন সংজপেৎ। বর্গাণামষ্টবর্গেণ অষ্টবারং জপেৎ সুধীঃ ॥অ ক চ ট ত প য শ। ইত্যেবঞ্চাষ্ট বর্গকাঃ। যোনি মুদ্রা মহেশানি তব স্নেহাৎ প্রকাশিতা ॥ মন্ত্রার্থং মন্ত্র চৈতন্যং যোনিমুদ্রাং ন বেত্তি যঃ। শতকোটি জপেনাপি তস্য সিদ্ধি র্ন জায়তে ॥ ইতি শাক্তানন্দতরঙ্গিণী ॥

যোনিরোগঃ পুং ভগন্দরঃ। অস্য নিদানাদি যোনি শব্দে দ্রষ্টব্যঃ ॥

যোন্যর্শঃ স্ত্রী যোনিজাতরোগবিশেষঃ। তৎপর্য্যায়ঃ কন্দসংজ্ঞং ২। ইতি ত্রিকাণ্ডশেষঃ ॥

যোষা স্ত্রী নারী। ইত্যমরঃ ॥

যোষিৎ স্ত্রী নারী। ইত্যমরঃ ॥ তস্যা অবধ্যত্বং যথা। তং প্রেক্ষ্য ভরতং শ্রেষ্ঠং শত্রুঘ্নো বাক্য মব্রবীৎ। অবধ্যাঃ সর্ব্ব ভূতানাং যোষিতঃ ক্ষম্যতা মিতি ॥ ইতি বহ্নিপুরাণং ॥

যোষিৎপ্রিয়া স্ত্রী হরিদ্রা। ইতি ভাবপ্রকাশঃ ॥

যোষিত্তা স্ত্রী নারী। যথা। স্ত্রী বধূরবলা নারী প্রিয়া রামা জনির্জ্জনী। যোষা যোষিদ্যোষিতা চ জোষিজ্জোষা চ জোষিতা ॥ ইতি শব্দরত্নাবলী ॥

যৌক্তিকঃ পুং নর্ম্মসচিবঃ। ইতি শব্দরত্নাবলী ॥ যুক্তিযোগ্যে ত্রি ॥

যৌগকঃ ত্রি যোগসম্বন্ধী। ইতি সিদ্ধান্তকৌমুদী ॥

যৌগিকঃ ত্রি প্রকৃতিপ্রত্যযযোগলভ্যার্থবাচকঃ। যথা। যোগায প্রভবতি। ইতি যোগ্যঃ যৌগিকঃ। ইতি সিদ্ধান্তকৌমুদী ॥ যোগরূঢাশ্চ রূঢাশ্চ যৌগিকা শ্চেতি তে ত্রিধা। আদিতে যাদি শব্দা যৌগিকাঃ অদিতে রপত্যানীতি চক্ প্রত্যযেন কেবলং যোগার্থ এব। ইত্যলঙ্কারকৌস্তুভে ২ কিরণঃ ॥

যৌজনশতিকঃ ত্রি যোজনশতগমনকর্ত্তা। ইতি সিদ্ধান্তকৌমুদী ॥

যৌজনিকঃ ত্রি একযোজনগমনকর্ত্তা। ইতি সিদ্ধান্তকৌমুদী ॥

যৌট ঋ সম্বন্ধে। ইতি কবিকল্পদ্রুমঃ ॥ চতুর্দ্দশস্বরী ঋ অযুযৌটৎ। যৌটতি কাষ্ঠং তক্ষা। ইতি দুর্গাদাসঃ ॥

যৌড় ঋ সম্বন্ধে। ইতি কবিকল্পদ্রুমঃ ॥ চতুর্দ্দশস্বরী ঋ অযুযৌড়ৎ। যৌড়তি কাষ্ঠং তক্ষা। ইতি দুর্গাদাসঃ ॥

যৌতকং ক্লী যৌতুকং। ইতি হলাযুধরাযমুকুটৌ ॥

যৌতব° স্ত্রী পরিমাণং ইত্যমরঃ ॥
যৌতুক° স্ত্রী যৌতকং বিবাহকালেদ-
ম্পত্যোর্লব্ধং ধনং উপচারাৎ অন্ন-
প্রাশনাদিসংস্কারকাললব্ধমপি । ·
যুতক° যোনিসম্বন্ধঃ তত্র ভব মিতি
ঞে যৌতক° । যুতযো র্বধূবরযো
রিদ মিতি বা কণি যৌতক° । যৌ-
তক মুকার মধ্য মপি । যৌতক°
যৌতুকঞ্চ তৎ । ইতি বাচস্পতিঃ ॥
যৌতকাদি তু যদ্দেয়° সদাযো হর-
ণঞ্চ তদিত্যত্রামর টীকাযাং ভরতঃ
॥ * ॥ স্ত্রিযা যৌতকধনস্যাধিকার
ক্রমো যথা । যত্তু দুহিতৃ নাত্রাধি-
কারার্থ° গোতম বচন° । স্ত্রীধন°
দুহিতৃণা মপ্রত্তানা মপ্রতিষ্ঠিতানা
ঞ্চ । যচ্চ নারদস্য । মাতু দুহি-
তরো ঽভাবে দুহিতৃণাং তদন্বযঃ ।
যচ্চ কাত্যাযনস্যাপি । দুহিতৃণা
মভাবে তু রিকথং পুত্রেষু তদ্ভ
বেৎ । যচ্চ যাজ্ঞবল্ক্যস্য মাতু-
দুহিতরঃ শেষ মৃণাত্তাভ্য ঋতে
ঽন্বযঃ । তানি পূর্ব্বোক্ত দেবলবচন
বিরোধেন যৌতক ধনমাত্র বিষযা-
নি । অতএব মনুঃ । মাতুশ্চ যৌতক°
যৎস্যাৎ কুমারী ভাগ এব সঃ ।
যৌতক° পরিণযন লব্ধং যু মিশ্রণ
ইতি ধাতো যুত ইতি পদ° । মিশ্র

তা চ স্ত্রীপুংসযো রেক শরীরতা তচ্চ
বিবাহাদ্ভবতি । অস্থিভি রস্থীনি
মাংসৈ র্মাংসানি ত্বচা ত্বচ মিতি শ্রু-
তেঃ । অতো বিবাহ কাল লব্ধ° যৌ-
তক° । ততশ্চ পরিণযন লব্ধং স্ত্রী-
ধন° দুহিতু রেব ন পুত্রাণাং । তত্রৈ-
ব ক্রমার্থ° গোতম বচনং । স্ত্রীধন°
দুহিতৃণা মপ্রত্তানা মপ্রতিষ্ঠিতানাঞ্চ
। প্রথম মপ্রত্তানাং তদভাবে প্র-
ত্তানাং তদভাবে সমূঢানাং । স্ত্রীধন°
দুহিতৃণামিতি সামান্যতঃ প্রাপ্তত্বাৎ
। অপ্রত্তানা মিত্যাদেস্তু ক্রমার্থত্বাৎ ।
তথা যাজ্ঞবল্ক্যঃ । অপ্রজঃ স্ত্রীধন° ভ-
র্ত্তু ব্রাহ্ম্যাদিষু চতুর্ষ্বপি । দুহিতৃণাং
প্রসূতা চেচ্ছেষেষু পিতৃগামি তৎ ॥
তত্র ব্রাহ্ম্যাদিষু বিবাহেষু যল্লব্ধ ম-
ধ্যগ্নি ধন° স্ত্রিযা তৎ তস্যাং মৃতাযাং
প্রথম° দুহিতৃণামেব তত্রাপি প্রথম°
কন্যাযা স্তদভাবে প্রত্তাযা স্তদভাবে
পরিণীতাযাঃ সর্ব্বদুহিত্রভাবে চ পুত্র
স্যাধিকারঃ অপ্রজঃ স্ত্রীধনে ভর্ত্তুর-
ধিকারাৎ । বৃহস্পতিনা অপ্রত্তাপ-
দেন অপ্রত্তাদ্যভাবে সমূঢাযা অ-
প্যধিকারঃ সূচিতঃ । ব্রাহ্ম্য দৈবার্ষ
গান্ধর্ব্ব প্রাজাপত্যেষু যদ্ধন° । অপ্র-
জাযা মতীতাযাং ভর্ত্তু রেব তদি-
ষ্যতে ॥ যত্ত্বস্যাঃ স্যাদ্ধন° দত্ত°

বিবাহেষ্বাসুরাদিষু । অতীতায়া ম- ॥ পুত্রায়াং মাতা পিত্রো স্তদিষ্যতে ॥ অস্যাঃ ...মিতি পরাচীনং পূর্ব্বত্রানুষজ্যতে । তেন বিবাহেষু য- ন্ধনং দত্ত মিতি সম্বন্ধাৎ বৈবাহিক ধনমাত্র প্রতীতের্ন যাবন্ধন বিষয়ত্বং । তথা যমঃ । আসুরাদিষু যদ্দ্রব্যং বি- বাহেষু প্রদীয়তে । বিবাহ ক্রিয়য়া পূর্ব্বাপরীভূতায়াং যদ্দ্রব্যং প্রদীয়তে ইতি যৌতক ধনমাত্র গোচরত্বমেব প্রতীয়তে। ইতি দায়ভাগঃ ॥*॥ উ- টাধিঃ যৌতকধনে প্রথমং কন্যায়া তদ- ভাবে বাগ্দত্তা অধিকারিণী । এতয়ো রভাবে উঢয়োঃ পুত্রবতী সম্ভাবিত পুত্রয়ো যুগপদধিকারঃ । একা ভাবে চাপরায়াঃ এতয়োরভাবে বন্ধ্যা বিধ বয়ো স্তুল্যাধিকারঃ । একাভাবে চা পরায়াঃ । ততঃ পুত্র দৌহিত্র পৌত্র প্রপৌত্র সপত্নীপুত্র পৌত্র প্রপৌ- ত্রাণাং ক্রমেণাধিকারঃ । গুহ্কৃন্মতে সপত্নী পুত্রানন্তরং দৌহিত্রস্যাধি কার ইতি বিশেষঃ। ততো ব্রাহ্ম্যাদি বিবাহ পঞ্চক সময় লব্ধ যৌতকধনে ভর্ত্তা ভ্রাতা মাতা পিতা চেতি ক্রমঃ । আসুরাদি বিবাহ ত্রয় সময় লব্ধ যৌতকধনে মাতা পিতা ভ্রাতা ভর্ত্তা চেতি ক্রমঃ । ততো দেবরঃ ততো দেবরপুত্র ভ্রাতৃশ্বশুর পুত্রৌ ততো ভগিনীপুত্রঃ ততো ভর্তৃভাগিনেয়ঃ ততো ভ্রাতৃপুত্রঃ ততো জামাতা ততঃ শ্বশুরঃ ততো ভ্রাতৃশ্বশুরঃ ততঃ আনন্তর্য্য ক্রমেণ সপিণ্ডাঃ ততঃ স- কুল্যাঃ ততঃ সমানোদকাঃ । ইতি তট্টীকায়াং শ্রীকৃষ্ণতর্কালঙ্কারঃ ॥

যৌধিষ্ঠিরং ত্রি যুধিষ্ঠিরসম্বন্ধি । যথা । সা চ যৌধিষ্ঠিরী সেনা গাঙ্গেয় শরতাড়িতা । প্রতিপৎ পাঠশী- লানাং বিদ্যেব তনুতাং গতা ॥ ইতি মহাভারতং ॥

যৌধেয়ঃ পুং যোদ্ধা । ইতি সিদ্ধান্ত- কৌমুদী ॥

যৌনং ক্লী যোনিসম্বন্ধাধীনপাপং । যথা । বৌধায়নঃ । সম্বৎসরেণ পততি পতিতেন সহাচরন্ । যা- জনাধ্যাপনাদ্যৌনাৎ ন তু যানাসনাশনাৎ ॥ সুমন্তুঃ । যশ্চৈতৈঃ স্তৈন্য মৌথ শ্রৌবাদীনাং সম্বন্ধা- না মন্যতমেন সহ সম্পর্ক মিয়াৎ তস্যাপ্যেতদেব প্রায়শ্চিত্তং বিদ- ধ্যাদিতি । ইয়াৎ জ্ঞায়াৎ । এত- দেবেতি দ্বাদশ বার্ষিক মিত্যর্থঃ । অত্র যাজনাদীনামন্যতমেন সহৎ- সরেণ পততীত্যবগম্যতে । ইতি প্রায়শ্চিত্তবিবেকঃ ॥

যৌবত° • স্ত্রী যুবতিসমূহঃ। ইত্যমরঃ ॥ পরিমাণ° । ইতি তট্টীকায়াং ভরতঃ॥

যৌবন° ক্লী যূনোভাবঃ। তৎপর্য্যায়ঃ। তারুণ্য°২। ইত্যমরঃ॥ বয়ঃ ৩ ইতি জটাধরঃ॥ তত্তু ষোড়শবর্ষ মারভ্য সপ্ততিবর্ষপর্য্যন্ত°। যথা। আষোড় শাদ্ভবেদ্বাল স্তরুণ স্তত উচ্যতে। বৃদ্ধঃ স্যাৎ সপ্ততে রূর্দ্ধ° বর্ষী যান্ নবতেঃ পর°। ইতি স্মৃতিঃ॥ নবযৌবন লক্ষণ° যথা। দরোদ্ভিন্ন স্তন° কিঞ্চিৎ চলাক্ষ° মেদুর স্মিত°। মনাগভিস্ফুরদ্ভাব° নব্য° যৌবন মুচ্যতে॥ ইত্যুজ্জ্বলনীলমণিঃ॥ নবযৌবন কারক মৌষধ° যথা। অশ্বগন্ধা নাগবলা গুড মা°স নিষেবিনা°। রূপ° ভবেদ্যথা তদ্বৎ নবযৌবন চারিণা°॥ ইতি গারুড়ে ১৮৯ অধ্যায়ঃ॥

যৌবনকণ্টক° পু° ক্লী যুবগণ্ড। ব্রণ-স্ফোড়া ইতি ভাষা। ইতিশব্দমালা॥

যৌবনলক্ষণ° ক্লী লাবণ্য°॥ স্তনঃ। ইতি মেদিনী॥ তারুণ্যচিহ্নঞ্চ॥

যৌবনাশ্বঃ পু° মান্ধাতৃরাজঃ। ইতি ত্রিকাণ্ডশেষঃ॥ অপিচ। যৌবনাশ্বো২থ মান্ধাতা চক্রবর্ত্ত্যবনীপ্রভুঃ সপ্তদ্বীপবতী মেকঃ শশাসাচ্যুত তেজসা॥ ঈজে চ যজ্ঞ° ক্রতুভিরাত্মবিদ্ভূরি দক্ষিণৈঃ। সর্ব্বদেবময়° দেব° সর্ব্বাত্মক মতীন্দ্রিয়°॥ দ্রব্য° মন্ত্রো বিধি র্যজ্ঞো যজমান স্তথর্ত্বিজঃ। ধর্ম্মো দেশশ্চ কালশ্চ সর্ব্ব মেতদ্যদাত্মক°॥ যাবৎ সূর্য্য উদেতিস্ম যাবচ্চ প্রতিতিষ্ঠতি। তৎ সর্ব্ব° যৌবনাশ্বস্য মান্ধাতুঃ ক্ষেত্র মুচ্যতে॥ শশবিন্দো র্দুহিতরি বিন্দুমত্যা মধান্নৃপঃ। পুরুকুৎস মম্বরীষ° মুচুকুন্দঞ্চ যোগিন°॥ তেষা° স্বসারঃ পঞ্চাশৎ সৌভরি° বব্রিরে পতি°। ইতি শ্রীভাগবতে ৯ স্কন্ধে ৬ অধ্যায়ঃ॥

যৌবনাশ্বকঃ পু° মান্ধাতৃরাজঃ। ইতি জটাধরঃ॥

যৌষ্মাক° ) ত্রি যুষ্মদ্‌সম্বন্ধি। যুষ্মাকমিদ°
যৌষ্মাকীন° ) ইত্যর্থে ষ্ণ-প্রত্যয়েন খীন্ প্রত্যয়েন চ ক্রমাৎ নিষ্পন্ন°। ইতি মুগ্ধবোধব্যাকরণ°॥ * ॥ যুষ্মদ্ শব্দে অলিখিতত্বাদবসরসঙ্গত্যা গৌণ যুষ্মদস্মদ্ শব্দ প্রযোগো হত্র লিখ্যতে। যুষ্মদস্মদো র্মুখ্যত্বে গৌণত্বে চ সি জস ঙে ঙসা° স্বরূপ গ্রহণাৎ তেষু পরেষু ত্বাহ যূয় বয় তুভ্য মহ্য তব মমাঃ স্যুরেব। সি জসাদে

ত্বন্যত্র যুষ্মদস্মদো র্থ্যন্তে একবচনে পরে ত্বমৌ দ্বিবচনে পরে যুবাবৌ বহুবচনে পরে স্বরূপেণাবস্থানং। গৌণত্বে তু পরবিভক্তি মনাদৃত্য যুষ্মদস্মদো রেকত্বে ত্বমদৌ দ্বিত্বে যুবাবৌ বহুত্বে স্বরূপেণাবস্থানমিতি ॥ যথা ত্বা মতিক্রান্তঃ অতিত্বং অতিত্বাং। অতিযুষ্ং অতিত্বাং অতিত্বাং অতিত্বান্। অতিত্বয়া অতিত্বাভ্যাং অতিত্বাভিঃ অতিতুভ্যং অতিত্বাভ্যাং অতিত্বভ্যং অতিত্বৎ অতিত্বাভ্যাং অতিত্বৎ। অতিতব অতিত্বয়োঃ অতিত্বয়াং। অতিত্বয়ি অতিত্বয়োঃ অতিত্বাসু ॥ ❀ ॥ যুবামতিক্রান্তঃ অতিত্বং অতিযুবাং অতিযুয়ং। অতিযুবাং অতিযুবাং অতিযুবান্ অতিযুবয়া অতিযুবাভ্যাং অতিযুবাভিঃ। অতিতুভ্যং অতিযুবাভ্যাং অতিযুবভ্যং। অতিযুবৎ অতিযুবাভ্যাং অতিযুবৎ। অতিতব অতিযুবয়োঃ অতিযুবয়াং। অতিযুবয়ি অতিযুবয়োঃ অতিযুবাসু ॥ ❀ ॥ যুষ্মানতিক্রান্তঃ অতিত্বং অতিযুষ্মাং অতিযুয়ং। অতিযুষ্মাং অতিযুষ্মাং অতিযুষ্মান্। অতিযুষ্ময়া অতিযুষ্মাভ্যাং অতিযুষ্মাভিঃ। অতিতুভ্যং অতিযুষ্মাভ্যাং অতিযুষ্মভ্যং। অতিযুষ্মৎ অতিযুষ্মাভ্যাং অতিযুষ্মৎ। অতিতব অতিযুষ্ময়োঃ অতিযুষ্ময়াং অতিযুষ্ময়ি অতিযুষ্ময়োঃ অতিযুষ্মাসু ॥ ❀ ॥ মামতিক্রান্তঃ অত্যহং অতিমাং অতিবয়ং। অতিমাং অতিমাং অতিমান্ অতিময়া অতিমাভ্যাং অতিমাভিঃ অতিমহ্যং অতিমাভ্যাং অতিমভ্যং। অতিমৎ অতিমাভ্যাং অতিমৎ। অতিমম অতিময়োঃ অতিময়াং। অতিময়ি অতিময়োঃ অতিমাসু ॥ ❀ ॥ আবামতিক্রান্তঃ অত্যহং অত্যাবাং অতিবয়ং। অত্যাবাং অত্যাবাং অত্যাবান্। অত্যাবয়া অত্যাবাভ্যাং অত্যাবাভিঃ। অতিমহ্যং অত্যাবাভ্যাং অত্যাবভ্যং। অত্যাবৎ অত্যাবাভ্যাং অত্যাবৎ। অতিমম অত্যাবয়োঃ অত্যাবয়াং। অত্যাবয়ি অত্যাবয়োঃ অত্যাবাসু ॥ ❀ ॥ অস্মানতিক্রান্তঃ। অত্যহং অত্যস্মাং অতিবয়ং। অত্যস্মাং অত্যস্মাং অত্যস্মান্ অত্যস্ময়া অত্যস্মাভ্যাং অত্যস্মাভিঃ। অতিমহ্যং অত্যস্মাভ্যাং অত্যস্মভ্যং। অত্যস্মৎ অত্যস্মাভ্যাং অত্যস্মৎ। অতিমম অত্যস্ময়োঃ অত্যস্ময়াং। অত্যস্ময়ি অত্যস্ময়োঃ অত্যস্মাসু। ইতি দুর্গাদাসঃ॥